श्रीराधाकृष्णाभ्यां नमः

महर्षिवेदव्यासप्रणीतस्य

अनेकव्याख्यासमलंकृतस्य

# श्रीमद्भागवतस्य

## द्वितीयः स्कन्धः

सम्पादकः

श्रीदलसुखरामात्मजः कृष्णशङ्करः शास्त्री

'अभिनवशुकः' वेदान्ताचार्यः साहित्यतीर्थः श्रीभागवतसुधानिधिः ।

# श्रीमद्भागवतम् ।

## अनेकव्याख्यासमलंकृतम् ।

## द्वितीयः स्कन्धः ।

### प्रथमोऽध्यायः ।

### ॐनमो[1] भगवते वासुदेवाय ।

श्रीशुक उवाच । वरीयानेष ते प्रश्नः कृतो लोकहितं नृप । आत्मवित्सम्मतः पुंसां श्रोतव्यादिषु यः परः ॥ १ ॥
श्रोतव्यादीनि राजेन्द्र नृणां सन्ति सहस्रशः । अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनाम् ॥ २ ॥
निद्रया ह्रियते नक्तं व्यवायेन च वा वयः । दिवा चार्थेहया राजन् कुटुम्बभरणेन वा ॥ ३ ॥
देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि । तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ॥ ४ ॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या ।

यन्नामकीर्त्तनं दानतपोयोगादिसत्फलम् । तं नित्यं परमानन्दं हरिं नरमहं भजे ॥
द्वितीये तु दशाध्यायैः श्रीभागवतमादितः । उद्देशलक्षणोक्तिभ्यां संक्षेपेणोपवर्ण्यते ॥
तत्र तु प्रथमाध्याये कीर्त्तनश्रवणादिभिः । स्थविष्ठे भगवद्रूपे मनसो धारणोच्यते ॥
उक्तः पूर्वमुपोद्घातः सप्रसङ्गः शुकागमः । राज्ञा पृष्टं नृणां कृत्यमथाह शुकसन्मुनिः ॥ ० ॥

राज्ञः प्रश्नमभिनन्दति वरीयानिति । ते त्वया पुंसां श्रोतव्यादिषु मध्ये यः परः श्रेष्ठः प्रश्नः कृतः एष वरीयान् । यतो लोकहितमेतद् मोक्षहेतुत्वात् । आत्मविदां मुक्तानाञ्च सम्मतो यतः ॥ १ ॥ ❀ ❀ तत्र तावत् स्वाभाविकक्रियाणामनर्थहेतुतां वदन् ब्रूहि । यद्वा विपर्य्ययम् इत्यस्योत्तरमाह श्रोतव्यादीनीति त्रिभिः । गृहेषु सक्तानाम् अत एव गृहमेधिनां तद्गतपञ्चसूनापराणाम् । मेधतिर्हिंसार्थः ॥ २ ॥ ❀ ❀ तेषां वृथैवायुर्व्ययो भवतीत्याह निद्रयेति । नक्तं रात्रौ यत् वयः आयुः तन्निद्रया व्यवायेन रत्या वा ह्रियते । दिवा अह्नि यद्वयः तदर्थेहया अर्थार्थमुद्यमेन सिद्धेऽर्थे कुटुम्बभरणेन वा । चकारौ अनुक्तसमुच्चायकौ ॥ ३ ॥ ❀ ❀ ननु नश्वरकुटुम्बाद्यर्थं कथमायुर्व्ययं कुर्यात् तत्राह । देहादिषु आत्मनः सैन्येषु परिकरेषु असत्सु मिथ्याभूतेष्वपि प्रमत्तः प्रसक्तः तेषां पित्रादिदृष्टान्तेन नाशं पश्यन्नपि नानुसन्धत्ते ॥ ४ ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या ।

ॐ स्वस्ति श्रीगणेशाय नमः ।

वन्देऽहं पार्वतीसूनुं सर्वविघ्नोपशान्तये । श्रीगुरून्सर्वतो नत्वाऽऽरंभे टीकां मनोहराम् ॥ १ ॥
ब्रह्मर्षीणां समाजे यो राजानं च परीक्षितम् । गङ्गातटे समुद्धर्तुं शुकरूपेण केशवः ॥ २ ॥
समाजगाम सच्छास्त्रोपदेशेन स्वयं हरिः । तं वंदेऽभीप्सितार्थाप्त्यै नंदसूनुं जगद्गुरुम् ॥ ३ ॥
अधुना द्वितीयस्कंधप्रकाशः क्रियतेतराम् । गिरं गुरुं च संध्याय श्रीधरस्वामिनं तथा ॥ ४ ॥

---

१. प्राचीने पाठे 'ॐ नमो भगवते वासुदेवाय' एष अंशो न । २. प्रा० पा० लोकहितो । ३. प्रा० पा०—सौख्येष्व ।

अत्र श्रीशुकागमनाह्लादविस्मृतस्वेष्टप्रणतिः श्रीधराचार्योऽध्यायगणनापुरस्सरं व्याख्यातुमारभते। द्वितीये त्विति। नाममात्रेण वस्तुसंकीर्तनमुद्देशः संकीर्त्तनत्वमुद्देशत्वमित्युक्ते ताल्वोष्ठपुटव्यापारेणोच्चारणं संकीर्त्तनम्। इह वंशे पाटयमाने दलद्वयविभागजन्यचटचटशब्देऽतिव्याप्तिवारणाय संपदम्। काकरवेऽतिव्याप्तिवारणाय नामपदम्। लक्षणवाक्येऽतिव्याप्तिवारणाय मात्रपदम्। वन्ध्यात्मजेऽतिव्याप्तिवारणाय पदार्थपदम्। असाधारणधर्मो लक्षणम्। असाधारणत्वं नाम लक्ष्यतावच्छेदकसमनियतत्वम्, लक्ष्यतावच्छेदकसमनियतत्वं नाम लक्ष्यतावच्छेदकव्याप्यत्वे सति लक्ष्यतावच्छेदकव्यापकत्वम् यथा–गंधवत्त्वं पृथिव्या लक्षणं लक्ष्या पृथिवी लक्ष्यता पृथिव्यां लक्ष्यतावच्छेदकं पृथिवीत्वं यत्र यत्र गंधवत्त्वं तत्र तत्र पृथिवीत्वमिति कृत्वा गंधे लक्ष्यतावच्छेदकव्याप्यत्वमस्ति एवं यत्र यत्र लक्ष्यतावच्छेदकं पृथिवीत्वं तत्र तत्र गंध इति कृत्वा गंधे लक्ष्यतावच्छेदकव्यापकत्वमप्यस्तीति व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परमित्युक्तेर्गन्धवत्त्वपृथिवीत्वयोर्व्याप्यव्यापकत्वमनुसंधेयम्। तथा च इदं श्रीभागवतमिति कथनमुद्देशः। असाधारणधर्मोऽत्र सर्गादिदशकमेव न ज्ञेयस्तस्यान्यत्रापि महापुराणे विद्यमानत्वात्। किंतु हयग्रीवब्रह्मविद्यादिरेव तस्यैवासाधारणधर्मत्वात्। यद्यप्यत्र तन्नोक्तं तथापि बीजभूतभगवदुपदिष्टचतुःश्लोक्यां तदस्त्येव वटकणिकायां वट इव तच्च श्रीगुरुप्रसादं विना दुर्ज्ञेयं "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥" इति श्वेताश्वतरोक्तेः। 'यथा हि भगवानेव वस्तुतः सदसच्च यत्' इत्यादि हयग्रीवब्रह्मविद्या 'अहमेवासमेवाग्रे नान्यद् यत्सत्परम्' इत्यनेन यथाकथंचिदसूचि गायत्र्या ब्रह्मविद्यारूपत्वेन तेनारंभोऽप्यसूच्येव। तमःशब्देन वृत्रवधाद्यप्यसूचि' 'तमसा त्वाष्ट्रमूर्तिना' इत्यत्र तमःशब्दस्य वृत्रे प्रयुज्यमानत्वात्। तमो राहुर्यथास्त्यपि न प्रतीयेतेत्यनेन तद्वधो ध्वनितः। अप्रतीतिर्हि नष्टस्यैव वस्तुनो भवतीत्यलमपूर्वविचारेण। अल्पाक्षरैर्बह्वर्थाभिधानं संक्षेपः॥ १॥ तत्र दशाध्यायेषु आदिनामननग्रहः॥ २॥ पुनरागतस्मृतिः श्रीधरो मंगलं वस्तुनिर्देशात्मकमाचरति। यन्नामेति। दानं च तपश्च योग आदिर्यस्य तीर्थयात्रादेस्सयोगादिश्च तेभ्यः सच्छ्रेष्ठं फलं यस्य। "तत्तथा-गोकोटिदानं ग्रहणेषु काशो प्रयागगङ्गाऽयुतकल्पवासः। यज्ञायुतं मेरुसुवर्णदानं गोविन्दनामस्मरेण तुल्यम्"॥ इति पाण्डवगीतोक्तेः। हे नरेति स्वात्मानमुद्दिश्योक्तं तं नम नमस्कुरु स्मर चेत्यन्वयः॥ ३॥ वर्णनीयमर्थं मनसि निधाय तदर्थमर्थान्तरकल्पनमुपोद्घातः उपोद्घातरूपः। अथ शुकश्चासौ सन्मुनिश्चेति तथा कृत्यमन्तकृत्यम्॥ ४॥ आदिना मंतव्यादिग्रहः। श्रेष्ठः श्रीकृष्णः गोचरो विषयो यस्य स श्रेष्ठगोचरः। अत्र संदर्भः। "अपि मे भगवान्प्रीतः कृष्णः पाण्डुसुतप्रियः" इत्यादिना श्रीकृष्ण एव स्वरतिं राजा ध्रियमाणां श्रोतव्यादिप्रश्नेनैवांतकाले श्रीकृष्ण एव मय्युपदिश्यतामिति राजाभिप्रायानंतरं श्रीशुक उवाच–बरीयानिति॥ ते त्वया पुंसां श्रोतव्यादिषु मध्ये यः परः श्रीकृष्णकथाश्रवणाभिप्रायेण परमः प्रश्नः कृत एव तु वरीयान् वर्णाश्रमसाधारणधर्मप्रश्नो हि वरः। स्वाश्रमधर्मप्रश्नो वरतरस्तत्रापि निष्कामेन तदाचरणप्रश्नो वरतमः श्रीभगवद्विषयकः प्रश्नस्तु वरीयानेवेति चतुर्थकोटौ ही यसुन्प्रत्ययः। यः प्रश्नोऽपि श्रोतव्यादिषु परः यस्य प्रश्नस्यापि श्रवणादौ परमपुरुषार्थः सिध्यतीत्यर्थः। सर्वावतारावतारिप्रश्नेभ्यः परममहान्। स च लोकहितं यथा स्यात्तथैव कृतः त्वं तु तथाभूतश्रीकृष्णैकनिर्बद्धप्रेमत्वात् कृतार्थ एवेति भावः। तदुक्तम्। "वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः॥ "उपधार्य मतिं कृष्ण औत्तरेयः सतीं व्यधात्" इति सती विद्यमाना श्रीकृष्णे या मतिस्तामेव विशेषेण धृतवानित्यर्थः। एतदेव व्यक्तीकरिष्यते राजा "हरेरद्भुतवीर्यस्य कथा लोकसुमंगलाः। कथयस्व महाभाग यथाहमखिलात्मनि॥ कृष्णे निवेश्य निःसंगं मनस्त्यक्ष्ये कलेवरम्" इति एवमेव "कथितो वंशविस्तारः" इत्यादि। अनंतरं "सम्यग्व्यवसिता बुद्धिः" इत्यादि। पूर्वं मया नानावतारादिकथाभिरभिनंदितस्यापि या श्रीमद्वसुदेवनंदनस्यैव कथायां नैष्ठिकी स्थायिरूपा रतिर्जाता एषा बुद्धिस्तु सम्यग्व्यवसिता परमरसविदग्धेत्यर्थः। यद्वा यः प्रश्नोऽपि श्रोतव्यादिषु परः यस्य प्रश्नस्य श्रवणादौ परमपुरुषार्थः। विश्वनाथः—पूर्वस्कंधांते "ततः पृच्छामि संसिद्धिम्" इति "पुरुषस्येह यत्कृत्यम्" इति वाक्याभ्यां सम्यक्सिद्धिः काऽत्र साधनं च किमिति तत्रापि श्रव्यजप्यादिकं किन्तथैवाश्रव्याजप्यादिकं च किमिति राज्ञः प्रश्नमभिनंदति। वरीयाञ्श्रेष्ठस्ते त्वया कृतः एष प्रश्न एव लोकानां हितं न चायं प्राकृतः प्रश्न इत्याह। आत्मविदामेषां युष्मत्सभोपविष्टानां संमतः एतदर्थमेवैतेषामत्रागमनादिति भावः। यतः श्रोतव्यादिष्विति सतां प्रश्नोऽपि श्रूयते कीर्त्यते स्मर्यते इत्यतः श्रोतव्यादिषु प्रश्नेषु मध्ये यः प्रश्नः पर इतोऽन्यस्योत्कृष्टस्याभावात्सर्वांतिमः। इमं प्रश्नमेव श्रुत्वा कीर्तयित्वा स्मृत्वा पुमांसः सर्वतोऽप्यतिकृतार्था भवंति। पुनरेतत्प्रश्नस्योत्तरं मया दत्तं श्रुत्वा त्वं कृतार्थी भविष्यतीति भविष्यसीति भावः। इत्थमेवाग्रे वक्ष्यते "वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि॥ वक्तारं पृच्छकं श्रोतृंस्तत्पादसलिलं यथा॥" इति नृपेति। लोकहितकरणेनैवं नृपत्वं सत्स्यतीति भावः॥ १॥ तत्र तावत् द्वितीयस्कंधे आदौ भगवच्चरणप्राप्तिरेवसंसिद्धिस्तत्र कृत्यं तन्नामलीलाश्रवणकीर्त्तनाद्येव सर्वोत्कृष्टमित्यग्रे प्रतिपादयिष्यन् प्रथमं "ब्रूहि यद्वा विपर्ययम्" इत्यस्योत्तरत्वेन कर्मयोगमाह। "श्रोतव्यादीनि" इति। आत्मनां तत्त्वं कवयः किं कुर्महे किमुदर्का भविष्यामः कथं निस्तारं प्राप्नुम इत्यपश्यतां किंतु गृहेषु सक्तानां 'मेधृ हिंसायाम्'। राजेन्द्रेति। राज्ञामेव बहुकार्याकुलत्वादात्मतत्त्वज्ञानं न भवति किमुत राजेन्द्रस्येति भावः। पञ्चसूनास्तु। "कंडनी पेषणी चुल्ली उदकुंभी च मार्जनी॥ पञ्चसूना गृहस्थस्य ताभिः स्वर्गं न विंदति।" इति स्मृतेः। सूना वधस्थानम्। यद्वात्मतत्त्वं भगवत्तत्त्वम्। तस्मादित्युपसंहरिष्यमाणत्वात्। तदपश्यतां परमश्रोतव्यत्वेनाजानतामित्यर्थः॥ २॥ तैः श्रोतव्यादिभिः। रत्येति। कर्मिणां स्त्रीसंगस्यानिषिद्धत्वात् कर्मयोगे कुटुंबभरणस्य विहितत्वात् "अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्" इत्युक्तेः॥ ३॥ अत्राक्षिपति। नन्विति। असत्सु जीवात्मनो देहादिसंबंधाभावा-

न्मिथ्याभूतेष्वपि तेषु प्रमत्तः प्रसक्तः । यद्वाऽसत्स्वसाधुष्वपि बहिर्मुखत्वादसमर्थेष्वपीत्यर्थः नानुसंधत्ते । यद्वा मोहमद्यपानोन्मत्तत्वान्नानुसंधत्ते तदुक्तं भर्तृहरिणा । "आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते । दृष्ट्वा रोगजराविपत्तिमरणं त्रासश्च नोत्पद्यते पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ।" इति । तेनायं कालेनैव ग्रस्यते भगवद्भक्तस्तु भगवदुन्मुखैर्देहादिभिरप्रमत्तः कालमपि जयतीति भावः ॥ ४ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

उद्देशेति—नाममात्रेण सङ्कीर्त्तनमुद्देशः । लक्ष्यते ज्ञायते अनेनेति लक्षणम् असाधारणधर्मकथनमिति यावत् । तद् द्विविधम्—इतरभेदानुमापकं व्यवहारप्रयोजकञ्च । उपोद्घात इति—सङ्गतिस्तावत् न्यायशास्त्रे षोढ़ा निरूपिता—सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा । निर्वाहकैककार्यत्वं षोढ़ा सङ्गतिरिष्यते ॥ इति वचनात् । तत्र स्मृतस्योपेक्षणानर्हत्वं प्रसङ्गत्वम् । चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः । हेतुता कारणता । शिष्यजिज्ञासानिवृत्त्युत्तरावश्यकवक्तव्यमवसरः । निर्वाहकं कारणतानिर्वाहकं कार्यत्वम् । एककार्यत्वमेककार्यस्यानुकूलत्वं कार्यत्वकारणत्वमिति यावत् । तथाहि प्रकृतप्रस्तावे उपोद्घातत्वं प्रसङ्गत्वं वा कथमस्तीति पाठकः स्वयमेव चिन्त्यम् ॥ १ ॥ ॐ । ॐ ब्रूहीति प्रथमस्कन्धीयैकोनविंशाध्यायस्याष्टत्रिंशत्तमश्लोकः ॥ पञ्चसूनेति । पञ्चप्रकारप्राणिवधस्थानं यथा—पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः । कण्डनी चोदकुम्भश्च बध्यते याश्च वाहयन् ॥ इति शुद्धितत्त्वम् । तज्जन्यपापं गृहस्थस्य प्रतिदिनं भवति । तस्य प्रायश्चित्तं वैश्वदेवः । यथा—लौकिके वैदिके वापि हुतोच्छिष्टे जले क्षितौ । वैश्वदेवन्तु कुर्वीत पञ्चसूनाऽपनुत्तये ॥ इति आह्निकतत्त्वधृतशातातपवचनम् ॥ अशौचकालोत्पन्नपञ्चसूनादिजन्यपापस्य दानादिनाश्यत्वं यथा—दशाहात्तु परं सम्यक् विप्रोऽधीयीत धर्मवित् । दानञ्च विधिना देयमशुभात् तारकं हि तत् ॥ इति शुद्धितत्त्वधृतसंवर्त्तवचनम् ॥ २—४ ॥

### श्रीमद्वीरराघवव्याख्या ।

ॐ श्रीहयग्रीवाय नमः ॥ वेदान्तोपबृंहणपरेऽस्मिन्पुराणे उपोद्घातरूपप्रथमस्कंधांते प्रसंगाच्छुकागम उक्तः, स च शुकः श्रोतव्याद्यर्थान् श्रोतव्यादींश्च प्रति राज्ञा पृष्टश्चेदानीं राज्ञः प्रश्नमभिनंदति । वरीयानिति । हे नृप ? राजंस्ते त्वया पुंसां श्रोतव्यादिषु श्रोतव्यमंतव्यनिदिध्यासितव्यार्थेषु परः गोचरः श्रोतव्याद्यर्थतत्वविषयः । लोकहितमिति पाठे प्रतीतिशेषः लोकहितं प्रति यः प्रकृत एषः प्रश्नो वरीयान् श्रेष्ठः कुत इत्यत आह । यतः आत्मवित्संमतः आत्मज्ञानिनां संस्तुतः । ननु नायमात्मविषयकश्रवणमननादिप्रश्नः यच्छ्रोतव्यमथो जाप्यं ब्रूहि यद्वा विपर्ययमिति सामान्येन पृष्टत्वादतः कथमात्मवित्संमत्या प्रश्नाभिनंदनमिति चेन्मैवम् । किमयं प्रष्टा आत्मविषयकश्रवणादीनां मुक्तिसाधनत्वं जानाति न वा ? नांत्यः म्रियमाणस्य यत्कर्तव्यं यच्छ्रोतव्यमिति पुरुषविशेषकर्त्तृकप्रश्नायोगात् । नाद्यः सुतरां प्रश्नानुपपत्तेरतः सामान्याकारेणात्मश्रवणादीनां मुक्तिसाधनत्वं जानतो विशेषत आत्मनः श्रवणादीनां च स्वरूपमजानतोऽयं प्रश्न इति प्रश्नस्य विशेषनिष्ठत्वादात्मवित्संमत्याभिनन्दनोपपत्तेः ॥ १ ॥ ॐ । ॐ अथ ब्रूहि यद्वा विपर्ययमित्यस्य प्रश्नस्य श्लोकत्रयेणोत्तरमाह । श्रोतव्यादीनीति । हे राजेंद्र ! गृहमेधिनाम् । नृणां श्रोतव्यादीनि सहस्रशः सन्ति । मुमुक्षोस्तु ब्रह्मैकमेवेत्यभिप्रायः । तदनुबंधित्वेनोपासनादीनां श्रवणमर्थसिद्धम् । गृहमेधिनां तद्व्रतपंचसूनापराणाम् । मेधः हिंसार्थः । यद्वा । मेधा बुद्धिःगृहेषु मेधा एषामस्तीति गृहमेधिनः गृहासक्ताः । यद्वा मेधः पशुः "उपनयनमध्यापरआशासानामेधपतिभ्यामेध" मितिवैदिकप्रयोगात् । तत्संबंधिव्यापारोऽपि उपचारान्मेधः स एषामस्तीति गृहमेधिनः पशुर्हि यज्ञांगभूतेन्द्रादीनां प्रीतिजनकः तद्वदेतेऽपि केवलकर्मानुष्ठानासक्तास्तत्प्रीतिसंपादका इति पशुसाम्यमुच्यते । केवलैहिकामुष्मिकफलासक्ता गृहस्था इति यावत् । अत एवात्मतत्वमात्मयाथात्म्यमजानतां गृहेषु सहस्रशः संतीत्यनेन "बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिना" मिति रीत्या सांसारिकफलसाधनानामानत्यं तारतम्यं चाभिप्रेतम् ॥ २ ॥ ॐ । ॐ एतैश्च वृथैवायुर्याप्यत इत्याह । निद्रयेति । नक्तं रात्रौ यद्वयस्तन्निद्रया व्यवायेन मिथुनीभावेन वा ह्रियते याप्यते दिवा यद्वयस्तदर्थेहया अर्थार्जनानुकूलचेष्टया संपादिते चार्थे कुटुंबभरणेन कुटुंबपोषणेन, चकारवकारावनुक्तसमुच्चयार्थौ, उक्तातिरिक्तव्यापारांतरेणापीत्यर्थः ॥ ३ ॥ ॐ । ॐ ननु नश्वरकुटुंबाद्यर्थं कथमायुर्व्ययःस्यात्तत्राह । देहेति । आत्मसैन्येषु आत्मनः स्वस्य परिजनेष्वसत्सु अंतवत्स्वपि देहापत्यकलत्रादिषु प्रसक्तः । अन्येषां निधनम् । अंतवत्त्वं दृष्टांतत्वेन पश्यन्नपि तेषां देहादीनामंतवत्त्वं स्वात्मनि न पश्यति नानुसंधत्ते ॥ ४ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या ।

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः । श्रीवेदव्यासाय नमः । वरीयान् प्रष्टव्यो निगमविषयो योऽस्यजनको वराहाख्यात्मा योऽवतरति सुरारातिहतये । अदाद्धात्रे ज्ञानं सकलविषयं यश्च विनुतस्तमंगोपास्वत्वं हृदयसततं स्वेष्टकृतये ॥ १ ॥ ॐ । ॐ संप्रति परीक्षित्प्रश्नं परिहरिष्यन् स्तौति वरीयानिति । श्रीभागवतसंहिताप्रारंभकारणं सविस्तरमभिधाये-

दानीं श्रीभागवतसंहिता प्रारभ्यत इत्याह वरीयानिति । यच्छ्रोतव्यमथो जाप्यमित्यादिना यस्त्वया कृतः स एष प्रश्नो वरीयान्, अङ्गीकार्यतमः सर्वोत्कृष्टत्वात् । लोकहितमिति क्रियाविशेषणं यथा लोकस्य हितं भवति तथा कृत इत्यनेन न केवलं तवैव हितकरोऽयं किंतु सर्वस्येत्युक्तं भवति । उत्कृष्टत्वे हेतुगर्भविशेषणमाह–आत्मविदिति मुख्यत आत्मविदो ब्रह्मादयस्तेषामपि संमतत्वात्, तत्कथमत्राह पुंसामिति । आत्मविदित्यनुवर्तते, इह जगति नृणां सहस्रशः श्रोतव्यानि संति म्रियमाणानाममम्रियमाणानां च पुंसां श्रोतव्यादिषु यः परः परमात्मा स एवात्मवित्संमत इति यत्तस्मादित्यर्थः । "आत्मा वा अरे द्रष्टव्य" इत्यादिश्रुतेः । अनेन परमात्मविषयत्वेनास्य वरीयस्त्वमित्युक्तं भवति । इतोऽपि परमात्मश्रवणादिकमंतरेण संसारस्य तदज्ञाननिबंधनस्य दुरुच्छेद्यत्वात्स एव तेषु मुख्यत्वेन संमत इत्युपसंहरन्नज्ञलोकप्रवृत्तिप्रकारमाह=अपश्यतामित्यादिना । दृशिरत्र ज्ञानार्थः आत्मनः परमात्मनस्तत्त्वमनारोपितं रूपं ज्ञानादिलक्षणं आत्मनां लक्ष्मीब्रह्मादिचेतनानां कदाप्यनभिभूततरतमभावेनावस्थितिं चापश्यतामजानतां निद्रये[1] त्यत्राप्यनुसंधेयं गृहमेधिनां गृहमेधा गृहाश्रम एव कर्तुं योग्याः पंचमहायज्ञाः स्मृतिविहितप्रत्यवायपरिजिहीर्षया तान् कर्तुं शीलमेषामस्तीति गृहमेधिनः तेषां गृहेषु गृहाश्रमेष्वेव वर्तमानानां पुंसाम् ॥ २ ॥ ❀ । ❀ निद्रया व्यवायेन च स्त्रीभोगेन च नक्तं रात्रिर्नवं वयो ह्रियते दिवा चाहश्चार्थेहया श्रीनारायणाराधनानुपयोगिहिरण्याद्यापादनायासेन "अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवी" दिति वचनात् कुटुंबभरणेन वा ह्रियत इत्यन्वयः ॥ ३ ॥ ❀ । ❀ आत्मतत्त्वाज्ञाने कारणमाह देहेत्यादिना । अपिर्गर्हार्थः । आत्मनः स्वस्य दीनत्वं क्षीणत्वमापादयंतीत्यात्मदैन्यानि तेषु दीङ् क्षय इतिधातोः यद्वा स्वत एव दीनभावो येषां ते तथा तेषु अत एवासत्स्वभद्रेषु तदुक्तं "सद्भावे साधुभावे चेति" निधनं नाशं प्रकर्षेण सक्तः प्रसक्तः न पश्यति स्वस्येति शेषः । अपिनाऽसच्छब्दस्य मिथ्यार्थाभिधायित्वं गर्हितमिति दर्शयति तेषु प्रमत्तो निधनमितिपाठोऽनन्वितः ॥ ४ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या ।

द्वितीयक्रमसन्दर्भे सन्दर्भाणां समाहृतिः । क्रियते यन्निदेशेन स मेऽनन्यगतेर्गतिः ॥ ० ॥

"अपि मे भगवान् प्रीतः कृष्णः पाण्डुसुतप्रियः" इत्यादिना श्रीकृष्णे एव स्वरतिं व्यज्य म्रियमाणानां श्रोतव्यादि-प्रश्नं नैवान्तकाले श्रीकृष्ण एव मय्युपदिश्यतामिति श्रीराजाभिप्रायानन्तरं शुक उवाच वरीयानेष इति । ते त्वया पुंसां श्रोतव्यादिषु मध्ये यः परः श्रीकृष्णश्रवणाभिप्रायेण परमः प्रश्नः कृतः, यद्वा त्वया कृतः यः प्रश्नोऽपि श्रोतव्यादिषु परः यस्य प्रश्नस्यापि श्रवणादौ परमपुरुषार्थः सिध्यतीत्यर्थः, एष वरीयान् सर्वावतारावतारिप्रश्नेभ्यः परममहान् । स च लोकहितो यथा स्यात् तथैव कृतः । त्वन्तु तथाभूतश्रीकृष्णैकनिर्बद्धप्रेमत्वात् कृतार्थ एवेति भावः । तदुक्तम्—वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः । उपधार्य्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ॥ इति । सती विद्यमाना श्रीकृष्णे या मतिस्तामेव विशेषेण धृतवानित्यर्थः । एतदेव व्यक्ती-करिष्यते राज्ञा—"हरेरद्भुतवीर्यस्य कथा लोकसुमङ्गलाः । कथयस्व महाभाग यथाहमखिलात्मनि । कृष्णे निवेश्य निःसङ्गं मनस्त्यक्ष्ये कलेवरम्" ॥ इति । एवमेव कथितो वंशविस्तारः इत्याद्यनन्तरं सम्यगव्यवसिता बुद्धिरित्यादि । पूर्वं मया नाना-वतारादिकथाभिनन्दितस्यापि यत् श्रीमद्वसुदेवनन्दनस्यैव कथायां नैष्ठिकी स्थायिरूपा रतिर्जाता एषा बुद्धिस्तु सम्यग्व्यवसिता परमरसविदग्धेत्यर्थः ॥ १ ॥ ❀ । ❀ तत्र भगवदाविर्भावमात्रस्य श्रवणादेरावश्यकत्वेन कैमुत्यमाह श्रोतव्यादीनीति चतुर्भिः । आत्मतत्त्वं भगवत्तत्त्वं, तस्मादित्युपसंहरिष्यमाणत्वात्, तदपश्यतां परमश्रोतव्यत्वेनाजानतामित्यर्थः ॥ २ ॥ अति प्राकृतानान्तु निद्रयेत्यादि ॥ ३—४ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी व्याख्या ।

प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम् । लोकनाथं जगच्चक्षुः श्रीशुकं तमुपाश्रये ॥
गोपरामाजनप्राणप्रेयसेऽतिप्रभूष्णवे । तदीयप्रियदास्याय मां मदीयमहं ददे ॥
दशाध्याये द्वितीयेऽस्मिंश्चक्रे नारायणादितः । प्रवृत्तस्यास्य शास्त्रस्य प्रक्रमं व्यासनन्दनः ॥
अध्यायैस्त्रिभिरुत्कर्षो भक्तेरेकेन सन्नतिः । हरेर्धातुर्नारदस्य संवादस्त्रिभिरुच्यते ॥
प्रश्ना एकेन विष्णूपदेश एकेन धातरि । एकेन लक्षणान्यस्य दशेति स्कन्धसंग्रहः ॥
तत्र तु प्रथमेऽध्याये यमाद्यष्टाङ्गयोगिनः । वैराजमूर्त्तेः पातालपादमूलादिधारणा ॥ ० ॥

पूर्वस्कन्धान्ते "अतः पृच्छामि संसिद्धिम्" इति पुरुषस्येह यत् कृत्यमिति वाक्याभ्यां सम्यक् सिद्धिः का अत्र साधनञ्च किमिति तत्रापि श्रव्यजप्यादिकं किं तथैवाश्रव्याजप्यादिकञ्च किमिति राज्ञः प्रश्नमभिनन्दति । वरीयान् श्रेष्ठः ते त्वया कृतः प्रश्न

---

१. तथाचात्र निद्राशब्दोऽविद्यापरपर्यायबन्धकप्रकृतिपर इति भावः ।

एव लोकानां हितम् । न चायं प्राकृतः प्रश्न इत्याह—आत्मविदाम् एषां युष्मत्सभोपविष्टानां सम्मतः एतदर्थमेवैतेषामत्रागमनादिति भावः । यतः श्रोतव्यादिष्विति सतां प्रश्नोऽपि श्रूयते कीर्त्यते स्मर्यत इत्यतः श्रोतव्यादिषु प्रश्नेषु मध्ये यः प्रश्नः परः इतोऽन्यस्योत्कृष्टस्याभावात् सर्वान्तिमः इमं प्रश्नमेव श्रुत्वा कीर्तयित्वा स्मृत्वा पुमांसः सर्वतोऽप्यतिकृतार्था भवन्ति किं पुनरेतत्प्रश्नस्योत्तरं मया दत्तं श्रुत्वा त्वं कृतार्थो भविष्यसीति भावः । इत्थमेवाग्रेऽपि वक्ष्यते—वासुदेवकथाप्रश्नः पुरुषांस्त्रीन् पुनाति हि । वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा ॥ इति ॥ १ ॥ ❋ ❋ भगवच्चरणप्राप्तिरेव संसिद्धिस्तत्र कृत्यं तन्नामलीलाश्रवणकीर्तनाद्येव सर्वोत्कृष्टमित्यग्रे प्रतिपादयिष्यन् प्रथमं ब्रूहि यद्वा विपर्ययम् इत्यस्योत्तरत्वेन कर्मयोगमाह श्रोतव्यादीनीति त्रिभिः । आत्मनां तत्त्वं के वयं किं कुर्महे किमुदर्का भविष्यामः कथं निस्तरं प्राप्नुम इति अपश्यतां किन्तु गृहेषु सक्तानां गृहमेधिनां गृहगतपञ्चसूनापराणाम् । मेधृ हिंसायाम् ॥ २ ॥ ❋ ❋ तेषां वृथैवायुर्व्ययो भवतीत्याह । नक्तं यद्वयस्तन्निद्रया ह्रियते इति रात्रेः प्रायः कर्मानर्हकालत्वाद् व्यवायेन रमणेन वा इति कर्मिणां स्त्रीसङ्गस्यानिषिद्धत्वात् । अर्थेहया अर्थस्पृहया अर्थान् विना कर्मासिद्धेः । चार्थे कुटुम्बभरणेन वेति कर्मयोगे कुटुम्बभरणस्य विहितत्वात् ॥ ३ ॥ ❋ ❋ अपश्यतामात्मतत्त्वमिति यदुक्तं तद्विवृणोति । देहादिषु आत्मनः सैन्येषु स्वसैन्यतुल्येषु कालेन सह योद्धुमिवेति भावः । असत्स्वपि जीवात्मनो देहादिसम्बन्धाभावान्मिथ्याभूतेष्वपि तेषु प्रमत्तः प्रसक्तः । यद्वा असत्स्वपि असाधुष्वपि बहिर्मुखत्वादसमर्थेष्वपीत्यर्थः । प्रमत्तः अनवहितः । यतस्तेषां निधनं कालेनैव नाशम् अनष्टानामपि पित्रादिदृष्टान्तेन नाशं पश्यन्नपि नानुसन्धत्ते । तेनायं कालेनैव ग्रस्यते भगवद्भक्तस्तु भगवदुन्मुखैर्देहादिभिरप्रमत्तः कालमपि जयतीति भावः ॥ ४ ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीनिंबार्कं नमस्कृत्य वेदांतार्थप्रकाशकम् । द्वितीयस्कंधसिद्धान्तप्रदीपोऽयं विरच्यते ।

श्रीकृष्णाय नमः ॥ जन्माद्यस्येत्यादिश्लोकत्रयीसर्वस्य श्रीमद्भागवतस्य सूत्रं तद्विवरणभूतः प्रथमस्कंधः, तद्विस्तारः सर्वोप्यग्रिमो ग्रंथः, तत्रापि मूलरूपो द्वितीयस्कंधः विवरणभूता अन्ये स्कंधाः ।सोऽयं द्वितीयः स्कंधो यथामति व्याख्यायते, अतिक्रांतस्कंधांते राज्ञा कृतं प्रश्नमभिनंदति भगवान् शुकः । वरीयानिति । हे नृप ! एष ते प्रश्नः वरीयान् । अतिशयेन वरः श्रेष्ठः श्रेष्ठत्वादेवात्मवित्संमतः नन्वनात्मविदा मया कृतः कथमात्मवित्संमतो भवेदित्यत्र न भवाननात्मवित् किंत्वात्मविदैव भवता परोपकाराय प्रश्नः कृत इत्याह कृतो लोकहितमिति लोकहितं प्रतीत्यर्थः । पुंसां श्रोतव्यादिषु मध्ये यः परः उपादेयतया श्रेष्ठः ॥ १ ॥

राज्ञा यत्पृष्टं ब्रूहि यद्वा विपर्य्ययमिति तस्योत्तरमाह श्रोतव्यादीनीति श्लोकत्रयेण । हे राजेंद्र ! गृहमेधिनां"कंडनी पेषणी चुल्ली उदकुंभी च मार्जनी । पंचसूना गृहस्थस्य ताभिः स्वर्गं न गच्छती" त्युक्तसूनाशब्दार्थो गृहेषु मेधो मेधतेर्हिंसार्थत्वाद्धिंसारूपो व्यापारः एषामस्तीति गृहमेधिनस्तेषां गृहेषु श्रोतव्यादीनि सहस्रशः सन्ति अत एव बहिर्दृष्टित्वादात्मतत्त्वमपश्यताम् ॥ २ ॥

अत एव नक्तं रात्रौ यद्वय आयुस्तन्निद्रयाऽथवा व्यवायेन मैथुनेन चकारादसन्मनोरथादिना दिवाऽह्नि चार्थेहयाऽर्थार्जनचेष्टया सत्यर्थे कुटुंबभरणेन वा ह्रियते ॥ ३ ॥ ❋ ❋ ननु कुतः कुटुंबादेरनित्यत्वमाज्ञाय निर्विण्णः सन्हरिभजनपरो न स्यादत्राह देहेति आत्मनः सैन्येषु भोगायतनतदुपकरणेषु देहतदनुबंधिषु असत्स्वपि । अनित्येष्वपि प्रमत्तः तन्नित्यत्वबुद्ध्या भ्रांतं तेषां निधनं लोकतः पश्यन्नपि न पश्यति नानुसंधत्ते ॥ ४ ॥

## श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या ।

स्कन्धे तु प्रथमे प्रोक्तास्त्रिविधा ह्यधिकारिणः । तेषां कर्तव्यनिर्द्धारो द्वितीये विनिरूप्यते ॥ १ ॥
तस्मिन्निर्द्धारिते पश्चात्क्रियाविषयसङ्कथा । अग्रे च तां प्रवक्ष्यामस्तृतीयादिभिरुत्तमैः ॥ २ ॥
निर्द्धारणेऽङ्गत्रितयं वस्तुनिर्द्धारणं पुरा । श्रद्धा चैव विमर्शश्च वस्तुनिर्द्धारणं पुनः ॥ ३ ॥
प्रमाणेन प्रमेयेण साधनेन फलेन च । एकत्र मानमेये हि फलं साधनमेकतः ॥ ४ ॥
अतोऽत्र वस्तुनिर्द्धारे ह्यध्यायद्वितयं मतम् । श्रद्धाऽपि द्विविधा लोके श्रोतृवक्तृविभेदतः ॥ ५ ॥
फलोपकार्यङ्गमेतन्नाऽधिकारे ततो विशेत् । विमर्शोऽपि द्विधा पूर्वमुत्पत्त्या चोपपत्तितः ॥ ६ ॥
त्रिविधे द्वे ततस्तत्र षडध्यायास्ततो दश । तत्र तु प्रथमेऽध्याये कर्तव्यं विनिरूप्यते ।
वस्तुनस्तत्त्वनिर्द्धारो मानमेयविभेदतः ॥ ७ ॥

पूर्वस्कन्धेऽधिकारनिरूपणे परीक्षितो मुख्याधिकारं निरूप्य तेन किं कर्त्तव्यमित्यपेक्षायां भगवत्कृपया सत्सङ्गे सति सर्वतत्त्वजिज्ञासार्थं प्रश्नः कर्त्तव्य इति प्रथमं प्रश्नद्वयं कृतम् । सर्वात्मना किं कर्तव्यं म्रियमाणैश्च किं कर्तव्यमिति । सर्वात्मना

कर्तव्यं नाम यस्मिन्नकृते कोऽपि पुरुषार्थो न सिद्ध्यति तत्सर्वात्मना कर्तव्यम् । तत्राऽधिकारिणो न निर्द्धारिताः । ते [1]चोत्तरदान-समये नि[2]र्द्धारणीयाः । म्रियमाणानां कर्त्तव्यनिर्द्धारो द्वितीयः । ये पुनः श्रोतव्यादिपञ्च पदार्थाः पृष्टास्ते यथायथमेतन्निरूपणेनैव निरूपिता भविष्यन्ति । कांश्चिदग्रे निरूपयिष्यामः । अतो द्वयं निरूपणीयम्—सर्वात्मना कर्तव्यं म्रियमाणैश्चकर्तव्यमिति । तदर्थं सर्वेषां वस्तूनां याथात्म्यं निरूप्यं फलमुखमङ्गं [3]श्रद्धा निरूप्या विचारश्च निरूप्यः । एतेषामावश्यकत्वं तत्तत्प्रकरणे निरूपयिष्यामः । तत्र सर्वात्मना कर्तव्यनिर्द्धारं चतुर्दशश्लोकैराह—**वरीयानित्यादिभिः** । कर्तव्यनिरूपणात्पूर्वमभिनन्दनं [4]कर्तव्यं प्रश्नस्य हेतुत्वा-र्थम् । यथा क्षुधितस्याऽन्नदानं तथा साकाङ्क्षस्य कर्तव्यकथनम् । अधिकारनिर्द्धारश्च कर्तव्यः । विशेषतः पूर्वं प्रश्नशेषतया अनिरूपणात् । प्रेक्षापूर्वकारिणं प्रवर्त्तयन्फलमनिरूप्य विधिः प्रवर्त्तयितुं न शक्नोति । अतः फलनिर्द्धारार्थमधिकारो निरूपणीयः । तत्र दोषत्रयं निराकार्यम् । तदर्थं त्रयः श्लोकाः । तत्र प्रथमं प्रश्नमभिनन्दति— ❀ ❀ **वरीयानिति** । श्रोतव्यादिषु प्रश्नेषु मध्ये यः प्रथमतः पृष्टः सर्वात्मना किं कर्तव्यमिति एष प्रश्नो **वरीयान्** श्रेष्ठः । उत्तमत्वे हेतुमाह । यतः स तु ते तवोपकाराय । अन्ये त्वन्येषाम् । अस्मिन्नर्थे महतां सम्मतिमाह—**आत्मवित्सम्मत इति** । आत्मविदामप्ययं प्रश्नः सम्मतः । अनेनाऽत्र प्रश्नोत्तरे बुद्धेर्भरोदय इति सूचितम् । किञ्च । पुंसां सर्वेषामेव विचारकाणां स्वतन्त्राणामयं प्रश्नः सम्मत इति सम्बन्धः । तस्मादत्रोत्तरं कथयिष्यामीति भावः ॥ १ ॥ ❀ ❀ इदानीं फलप्रेप्सुमधिकारिणं निर्द्धारयितुं सर्वेषामेकं कर्तव्यं नाऽस्तीत्याह— ❀ ❀ **श्रोतव्यादीनीति** । अग्रिमप्रश्ना[5]नामनभिनन्दनाद्गौणता सूचितैव । तथापि यदि राज्ञस्तत्राऽऽकाङ्क्षा दृढा भवेत्तदा प्रथमोत्तर-मुच्यमानं न सम्यगवगम्येत । अतोऽधिकारनिरूपणप्रस्तावे श्रोतव्यादीन्यपि निराकरोति । राजेन्द्रेति सम्बोधनात्—बहुविधाः पुरुषास्त्वयैव दृष्टा बहूनि च शास्त्राणि, तत्र तव तेषां वा न कोऽपि पुरुषार्थः सिद्ध इति तदनुभवस्य सम्मतिः प्रदर्शिता । प्रश्ने नृ[6]भिरिति वचनात्तज्ज्ञापनायोत्तरेऽप्याह । तर्हि तानि कुतो न वक्तव्यानि ? तत्राऽऽह—**सन्ति सहस्रश इति** । मत्कथनात्पूर्वमेव मत्कथनमनपेक्ष्य सहस्रशः सन्ति । सामान्येषु स्वाभिप्रेतानामप्रवेशार्थमाह—**अपश्यतामात्मतत्त्वमिति** । आत्मनस्तत्त्वमनारोपितं रूपम् । तच्छास्त्राभावादपश्यताम् । लोकव्यवहारेणाऽऽत्मा आरोपित एव दृश्यते देहादिरूपः संवलितो वा । ननु कथमुपाये विद्यमाने ते आत्मतत्त्वं न जानन्ति ? तत्राऽऽह—**गृहेषु गृहमेधिनामिति** । तैर्विविक्तात्मस्वरूपं ज्ञात्वा किं कर्तव्यम् ? ते हि गृहमेधिनः गृह एव पर्यवसितमतयः । तेषां गृहोपयोगि यद्भवेत्तदेव ज्ञातव्यम् । विविक्तात्मा तु गृहस्य बाधकः । अतो न ज्ञातव्यः । **गृहेष्विति** निमित्तसप्तमी तेषां गृहेषु[7] बुद्धिरस्ति गृहैकनिष्ठा भविष्याम इति । अतो गृहाः प्राप्तव्याः । तस्मात्त्वयैव बुद्ध्या गृहसिद्धि-स्तामेव बुद्धिं सम्पादयन्ति । सा च लोकसिद्धग्रन्थैरेव पुष्टा नाऽस्मद्वाक्यमपेक्षते । अतस्तद्विषयकस्तव प्रश्नो न साधुः । अनेन म्रियमाणविषयको यः प्रश्नः स न स्तुतो न वा निन्दित इति तदुत्तरमग्रे वक्ष्यतीति सम्भाव्यते ॥ २ ॥ ❀ ❀ ननु केवलं गृहार्थे कथं तेषां बुद्धिः ? सद्बुद्धिसाधनानां विद्यमानत्वात् । तत्राऽऽह— ❀ । ❀ **निद्रया ह्रियते नक्तमिति** । सत्सङ्गसाधनीभूतः समय एव तेषां नास्ति । तत्समयस्याऽन्यैरेवाऽपहारात् । तदाह । निद्रा चेष्टा चाऽर्द्धश आयुह्र[8]तवत्यौ । तत्र निद्रया नक्तं वयो ह्रियते । रात्रिसम्बन्ध्यायुरज्ञानेन गच्छति । दिवा च दिनसम्बन्ध्यायुरर्थेहया गच्छति । अज्ञानादन्यथा ज्ञानाच्च सर्वमायुर्गच्छतीत्युक्तं भवति । ननु न सर्वा रात्रिर्निद्रया गच्छति ? तत्राऽऽह **व्यवायेन च वेति** । चकारात्तत्साधनेन । वेति प्रकारद्वयं परित्यज्य नाऽन्यः पक्षस्तेषु सम्भावितः । वयःशब्देन पुरुषार्थसाधनीभूतमायुस्तारुण्यमेव । तच्चेद्गतं जरठः किं नु साधयेत् । बालो वा । **अर्थेहया** । गृहस्य मूलं धनम् । चकारान्निद्रया । अर्थार्थं प्रयत्नेन सिद्धेऽर्थे कुटुम्बभरणेन वा ॥ ३ ॥ ❀ । ❀ ननु वैराग्यसाधनानां जायमानत्वात्कथं तेषां गृहे विचिकित्सा न जायते ? तत्राऽऽह— ❀ ❀ देहापत्येति । त्रयो गृहे मुख्याः । देहः पुत्रो भार्या च । तन्मूलका अन्ये । ते च स्वभावतो गुणतश्च दुष्टाः । यत आत्मनाशकाः । ये हि यस्य परिकरा भवन्ति ते तं पोषयन्ति । एत [9]आत्मसैन्यान्यात्मानमेव शत्रुभिर्घातयन्ति । अतोऽसन्तः । ननु किमतो यद्येवम् ? [10]एवमेतदित्याह । ते [11]ह्यात्मघातदोषेण धनेन पोषिता निधनं प्राप्नुवन्ति । तदा दुष्टानां नाशादात्मनिष्ठो भवेत् । तदन्तःस्थदोषान्न जायत [12]इत्याह—प्रमत्त इति । यथा [13]अत्यन्तं मदिरामत्तो गतमपि वस्त्रं स्पृशन्नपि देहं वस्त्रगमनं नाऽनुसन्धत्ते तथाऽयमपि मृतानपि तान् पश्यन् जीवत इव तदर्थं प्रयतते । तस्माद्बाह्यान्तरदोषव्याप्तत्वा-दायुषो वृथा क्षयाद्गृह एव पर्यवसितबुद्धित्वात्तेषां श्रोतव्यादि न प्रष्टव्यमित्यर्थः । बुद्धिश्चाऽऽयुश्च दोषाणामभावः कारणं यतः । यस्य नैते भविष्यन्ति तस्य नाऽस्त्यधिकारिता ॥ ४ ॥

### श्रीमद्गोस्वामिश्रीमत्पुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः

श्रीकृष्णः शरणं मम । अथ द्वितीयस्कन्धं व्याचिकीर्षवः पूर्वोत्तरस्कन्धयोः कार्यकारणभावरूपां सङ्गतिं प्रदर्शयितुं पूर्वस्कन्धार्थमनुवदन्तः प्रकृतस्कन्धार्थमाहुः स्कन्धे त्वित्यादि । तथाच कर्तव्याधिकारिणोः कार्यकारणभावात्तन्निरूपकयोरपि सैव सङ्गतिरित्यर्थः । ननु कर्तव्यनिर्धारस्तु एकविंशतिभिरेव पद्यैः क्रियते इति कथं तस्य स्कन्धार्थत्वमित्याशङ्कायां तत्परिचायकमाहुः

---

१. स चेति ख० ग० घ० । २. निर्द्धारणीय इति ख० ग० घ० निर्द्धारिता इति ङ । ३. श्रद्धां निरूप्येति घ० । ४. वक्तव्यमिति क० ग० । ५. अग्रिमप्रश्नानभिनन्दनादिति क० ग० । ६. नृणामिति क. । ७. गृहे इति ख. । ८. परिहृत्येति ख० । ९. आत्मसैन्या अपीति क० । १०. एवमित्याद्याहेत्यन्तं नास्ति ख० ग० । ११. त्यात्मेति ग० । १२. ज्ञायत इति ख० ग० । १३. इत्यन्तमिति क० ।

तस्मिन्नित्यादि । तस्मिन् स्कन्धार्थे एकविंशतिपद्यैर्निर्धारिते पश्चादनन्तरं क्रियाविषयसंकथा क्रियाविषयजिज्ञासाज्ञापको राजप्रश्नस्तदुत्तरदानं चेति । तथा च यदि क्रियानिर्धारो न जातः स्यात् , तर्हि सैव जिज्ञास्येत, यदि सा क्रिया प्रसिद्धविषया स्यात् , विषयो नोच्येत, यस्मादुभयमुच्यते, अतो विषयनिर्धारसहितः कर्तव्यनिर्धारः स्कन्धार्थ इत्यर्थः । ननु विषयसंकथा चेदत्रैव क्रियते, तदान्ये स्कन्धा निरर्थाः स्युरित्यत आहुः अग्रे चेति । प्रवक्ष्यामः प्रकर्षेण विशेषभावेन वक्ष्यामः । उत्तमैः मुख्यलीलानिरूपकैः । तथा च सामान्यविशेषभावस्य विद्यमानत्वान्न नैरर्थ्यमित्यर्थः । एतेन द्वितीयस्य तृतीयादिभिर्विषयिविषयभावः सङ्गतिरप्युक्तप्राया । ननु विषयनिर्धारोऽप्यध्यायद्वयेनैव सम्पद्यते इति शिष्टानां किं प्रयोजनमत आहुः निर्धारणे इतिचरणत्रयम् । निर्धारणे विषयनिर्धारणे एवं चाङ्गनिरूपणमन्तरेणाङ्गी निरूपयितुं न शक्यत इत्यङ्गनिरूपणमध्यायान्तरप्रयोजनमित्यर्थः । एतेन स्कन्धार्थस्य प्रकरणार्थैरङ्गाङ्गिभावः सङ्गतिरिति स्फुटीचक्रे । नन्वेवं सत्यध्यायत्रयमेवास्तु, किं दशकेनेत्यत आहुः वस्त्वित्यादिपादोनकारिकाचतुष्टयम् । एतेन प्रकरणाध्यायार्थानां परस्परं सङ्गतिरपि प्रदर्शिता ज्ञेया । तथाहि । वस्तुनिर्धारणं नाम वस्तुन इदमित्थतया निश्चयः, स च प्रथमप्रकरणस्यार्थः, तच्च प्रमाणादिचतुष्टयाधीनम् , तेनाद्यप्रकरणाध्यायार्थयोः कार्यकारणभावः सङ्गतिः । नन्वेवं सत्यध्यायचतुष्टयं स्यादित्यत आहुः एकत्रेत्यादि । एकस्मिन्नध्याये श्रुत्यविरुद्धा युक्तिर्योगश्चेति प्रमाणभूते स्थूलरूपाख्यं प्रमेयं चोच्यते । 'मानाधीना मेयसिद्धि' रिति । एकतः एकस्मिन्नध्याये फलं सूक्ष्मरूपाख्यं साधनं द्विविधा भक्तिश्चोच्यते । 'साधनाधीना फलानुभूति' रिति । अतो हेतोः । अत्र स्कन्धे वस्तुनिर्धारप्रकरणे हि निश्चयेन अध्यायद्वितयं मतं व्यासचरणानां सम्मतमित्यर्थः । एवमाद्यप्रकरणस्याध्यायार्थं सङ्गतिं च प्रदर्श्य द्वितीयस्याहुः श्रद्धेत्यादि । ह्यध्यायेतिचरणो देहलीदीपवदिहाप्यन्वेति । एवं द्वितीयप्रकरणेऽप्यध्यायद्वयोपपादनद्वारा प्रकरणाध्यायार्थयोः सामान्यविशेषभावरूपा सङ्गतिः प्रदर्शिता । ननु श्रद्धा नामास्तिक्यबुद्धिरादरात्मिका, तस्या अधिकारिविशेषणत्वमेव, नह्यश्रद्धालुर्विहिते प्रवर्तते, सा च प्रथमस्कन्ध उक्तैवेति किमर्थमत्र तदुक्तिरित्याकाङ्क्षायामाहुः फलेत्यादि । एतन् निष्कामानन्यभगवद्भजनकर्तव्यताध्यवसायात्मकश्रद्धारूपमङ्गमुभयनिष्ठं फलोपकारि परमानन्दानुभवोपकारि । ततो हेतोः । अधिकारे न विशेत् श्रवणस्वरूपोपकारित्वेऽपि उक्तरूपाद्विशेषात्तत्रोक्तायां श्रवणाद्यादररूपायां श्रद्धायां न विशेत् , तस्मादत्रोक्तमित्यर्थः । द्वितीयस्योपपाद्य तृतीयस्याहुः विमर्शोऽपीत्यादि । त्रिविधे द्वे इति । जननसमागमप्राकट्यभेदेनोत्पत्तित्रैविध्यम् । आक्षेपसिद्धान्तफलभेदेनोपपत्तित्रैविध्यं बोध्यम् । तथा च विमर्शप्रकरणस्य स्वावान्तरप्रकरणाभ्यां सह सामान्यविशेषभावः तयोश्च परस्परमेककार्यत्वम्, तयोस्तत्तदध्यायैः सह सामान्यविशेषभाव इति सङ्गतिनिष्कर्षः । एवं स्कन्धाद्यर्थं सङ्गतिं च निरूप्य प्रथमाध्यायार्थमाहुः तत्र त्वित्यादि । कर्तव्यं श्रवणादि तस्य सविषयत्वाद्विषयनिर्धारः । विषयस्य द्वैविध्यात्तन्निर्धारश्च । तथा च विषयसहितकर्तव्यनिर्धारः प्रथमाध्यायार्थ इत्यर्थः । ❀ । ❀ एवं सर्वमर्थं सङ्गृह्य व्याख्यानपीठिकामाहुः पूर्वेत्यादि । न निर्धारिता इति । 'मनुष्येषु मनीषिणा' मिति प्रश्नवाक्ये मनीषिपदेनोक्ता अपि मनीषाया बहुविधत्वादेते मनीषिण इति निश्चित्य नोक्ताः स चेति । चोऽप्यर्थे । सोऽपीत्यर्थः । तथा चैतावानर्थः सङ्गृहीतादधिक इत्यर्थः । ननु पूर्वस्कन्धे राज्ञा प्रश्नषट्कमन्यादपि कृतं 'यच्छ्रोतव्यमथो जाप्य' ( १।१९।३८ ) मित्यादिना, तत्कथं द्वयं कृतमित्युच्यते, तत्राहुः ये पुनरित्यादि । एतन्निरूपणेनेति प्रश्नद्वयोत्तरनिरूपणेन प्रथमप्रश्नोत्तरनिरूपणेन वा । तर्हि 'यद्वा विपर्यय'—( १।१९।३८ ) मित्यनेनोक्तस्य षष्ठस्य कुत्रोत्तरमित्यत आहुः काँश्चिदित्यादि । अग्र इति । दशमाध्यायसमाप्तौ 'अमुनी भगवद्रूप' २।१०।३५ इत्यादिना । निरूपयिष्याम इति उत्तरभेदेऽपि विषयाभेदेनैकरूपतया निरूपयिष्यामः । तेन सिद्धमाहुः अत इत्यादि । एवं प्रथमकारिकार्थ उक्तः । अग्रिमाणामाहुः तदर्थमित्यादि । ननु त्रयाणामेतेषां कुतोऽङ्गत्वमित्याकाङ्क्षायामाहुः एतेषामित्यादि । ननूत्तरे वक्तव्ये प्रश्नाभिनन्दनस्य किं प्रयोजनमत आहुः कर्तव्येत्यादि । किं हेतुताबोधनेनेत्यत आहुः यथेत्यादि । तथा च तदाकाङ्क्षापूर्तिस्तत इति तया च व्यग्रतानिवृत्त्या सुखेन कर्तव्यसिद्धिरिति तत्प्रयोजनमित्यर्थः । एवमाद्यश्लोकप्रयोजनमुक्तम् । तदग्रिमत्रयाणामाहुरधिकारेत्यादि । किं तावतेत्यत आहुः प्रश्नेत्यादि । तर्ह्येकः श्लोकोऽस्तु, किं त्रिभिरित्यत आहुः तत्रेत्यादि । तत्रेति अधिकार एवोत्तरदानात् । पूर्वेषां चतुर्णां तात्पर्यमुक्त्वा व्याचक्षते तत्रेत्यादि । अन्य इति । 'अथो जाप्य' मित्यादिनोक्ताः । ते विषयाभेदेऽप्यन्योपकारका इति भावः । ❀ । ❀ तच्छास्त्राभावादिति । सत्स्वपि ग्रन्थेषु तदभिज्ञगुर्वलाभेन तेषां शास्त्रत्वाभावादित्यर्थः । एतेन छान्दोग्यस्थसनत्कुमारनारदसंवादन्यायो बोधितः । निमित्तसप्तमीति । 'निमित्तात्कर्मयोग' इत्यनेनोक्ता । तथा च गृहार्थं श्रोतव्यादीनि सहस्रशः सन्तीत्यर्थः । तव प्रश्नो न साधुरिति । प्रश्नस्तव न साधुरित्यन्वयः । अनेनेति । आद्याभिनन्दनेनेतरविषयकनिन्दनेन च । ❀ । ❀ विचिकित्सेति । जुगुप्सोत्पादको गृहं दुःखदं न वेति संशयः । त्रीनपि व्याख्याय तेषामधिकारशेषत्वाय तदर्थं सङ्गृह्याहुः बुद्धिरिति ।

## श्रीगिरिधरकृता बालप्रबोधिनी

॥ श्रीकृष्णाय नमः ॥ ॥ पाताला[1]दिस्वरूपो यो योगिध्येयाङ्घ्रिपङ्कजः ॥ द्वितीयस्कन्धव्याख्यायां स[3] एव शरणं मम ॥ १ ॥ तदेवं प्रथमस्कन्धे ह्यधिकारो निरूपितः । द्वितीये तु दशाध्यायैः श्रवणाङ्गं निरूप्यते ॥ २ ॥ तदेवं प्रथमस्कन्धेऽधिकारं

---

१. 'पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम् [ स्कं. १, अः १, श्लो. २६ ] इत्यादिवक्ष्यमाणावयवसन्निवेश-

तस्मिन्नित्यादि । तस्मिन् स्कन्धार्थे एकविंशतिपद्यैर्निर्धारिते पश्चादनन्तरं क्रियाविषयसंकथा क्रियाविषयजिज्ञासाज्ञापको राजप्रश्नस्तदुत्तरदानं चेति । तथा च यदि क्रियानिर्धारो न जातः स्यात् , तर्हि सैव जिज्ञास्येत, यदि सा क्रिया प्रसिद्धविषया स्यात् , विषयो नोच्येत, यस्मादुभयमुच्यते, अतो विषयनिर्धारसहितः कर्तव्यनिर्धारः स्कन्धार्थ इत्यर्थः । ननु विषयसंकथा चेदत्रैव क्रियते, तदान्ये स्कन्धा निरर्थाः स्युरित्यत आहुः अग्रे चेति । प्रवक्ष्यामः प्रकर्षेण विशेषभावेन वक्ष्यामः । उत्तमैः मुख्यलीलानिरूपकैः । तथा च सामान्यविशेषभावस्य विद्यमानत्वान्न नैरर्थ्यमित्यर्थः । एतेन द्वितीयस्य तृतीयादिभिर्विषयिविषयभावः सङ्गतिरप्युक्तप्राया । ननु विषयनिर्धारोऽप्यध्यायद्वयेनैव सम्पद्यते इति शिष्टानां किं प्रयोजनमत आहुः निर्धारणे इतिचरणत्रयम् । निर्धारणे विषयनिर्धारणे एवं चाङ्गनिरूपणमन्तरेणाङ्गी निरूपयितुं न शक्यत इत्यङ्गनिरूपणमध्यायान्तरप्रयोजनमित्यर्थः । एतेन स्कन्धार्थस्य प्रकरणार्थैरङ्गाङ्गिभावः सङ्गतिरिति स्फुटीचक्रे । नन्वेवं सत्यध्यायत्रयमेवास्तु, किं दशकेनेत्यत आहुः वस्त्वित्यादिपादोनकारिकाचतुष्टयम् । एतेन प्रकरणाध्यायार्थानां परस्परं सङ्गतिरपि प्रदर्शिता ज्ञेया । तथाहि । वस्तुनिर्धारणं नाम वस्तुन इदमित्थतया निश्चयः, स च प्रथमप्रकरणस्यार्थः, तच्च प्रमाणादिचतुष्टयाधीनम् , तेनाद्यप्रकरणाध्यायार्थयोः कार्यकारणभावः सङ्गतिः । नन्वेवं सत्यध्यायचतुष्टयं स्यादित्यत आहुः एकत्रेत्यादि । एकस्मिन्नध्याये श्रुत्यविरुद्धा युक्तिर्योगश्चेति प्रमाणभूते स्थूलरूपाख्यं प्रमेयं चोच्यते । 'मानाधीना मेयसिद्धि' रिति । एकतः एकस्मिन्नध्याये फलं सूक्ष्मरूपाख्यं साधनं द्विविधा भक्तिश्चोच्यते । 'साधनाधीना फलानुभूति' रिति । अतो हेतोः । अत्र स्कन्धे वस्तुनिर्धारप्रकरणे हि निश्चयेन अध्यायद्वितयं मतं व्यासचरणानां सम्मतमित्यर्थः । एवमाद्यप्रकरणस्याध्यायार्थं सङ्गतिं च प्रदर्श्य द्वितीयस्याहुः श्रद्धेत्यादि । ह्यध्यायेतिचरणो देहलीदीपवदिहाप्यन्वेति । एवं द्वितीयप्रकरणेऽप्यध्यायद्वयोपपादनद्वारा प्रकरणाध्यायार्थयोः सामान्यविशेषभावरूपा सङ्गतिः प्रदर्शिता । ननु श्रद्धा नामास्तिक्यबुद्धिरादरात्मिका, तस्या अधिकारिविशेषणत्वमेव, नह्यश्रद्धालुर्विहिते प्रवर्तते, सा च प्रथमस्कन्ध उक्तैवेति किमर्थमत्र तदुक्तिरित्याकाङ्क्षायामाहुः फलेत्यादि । एतत् निष्कामानन्यभगवद्भजनकर्तव्यताध्यवसायात्मकश्रद्धारूपमङ्गमुभयनिष्ठं फलोपकारि परमानन्दानुभवोपकारि । ततो हेतोः । अधिकारे न विशेत् श्रवणस्वरूपोपकारित्वेऽपि उक्तरूपाद्विशेषात्तत्रोक्तायां श्रवणाद्यादररूपायां श्रद्धायां न विशेत् , तस्मादत्रोक्तमित्यर्थः । द्वितीयस्योपपाद्य तृतीयस्याहुः विमर्शोपीत्यादि । त्रिविधे द्वे इति । जननसमागमप्राकट्यभेदेनोत्पत्तित्रैविध्यम् । आक्षेपसिद्धान्तफलभेदेनोपपत्तित्रैविध्यं बोध्यम् । तथा च विमर्शप्रकरणस्य स्वावान्तरप्रकरणाभ्यां सह सामान्यविशेषभावः तयोश्च परस्परमेककार्यत्वम्, तयोस्तत्तदध्यायैः सह सामान्यविशेषभाव इति सङ्गतिनिष्कर्षः । एवं स्कन्धाद्यर्थं सङ्गतिं च निरूप्य प्रथमाध्यायार्थमाहुः तत्र त्वित्यादि । कर्तव्यं श्रवणादि तस्य सविषयत्वाद्विषयनिर्धारः । विषयस्य द्वैविध्यात्तन्निर्धारश्च । तथा च विषयसहितकर्तव्यनिर्धारः प्रथमाध्यायार्थ इत्यर्थः । ❀ । ❀ एवं सर्वमर्थं सङ्गृह्य व्याख्यानपीठिकामाहुः पूर्वेत्यादि । न निर्धारिता इति । 'मनुष्येषु मनीषिणा' मिति प्रश्नवाक्ये मनीषिपदेनोक्ता अपि मनीषाया बहुविधत्वादेते मनीषिण इति निश्चित्य नोक्ताः स चेति । चोऽप्यर्थे । सोऽपीत्यर्थः । तथा चैतावानर्थः सङ्गृहीतादधिक इत्यर्थः । ननु पूर्वस्कन्धे राज्ञा प्रश्नषट्कमन्यादपि कृतं 'यच्छ्रोतव्यमथो जाप्य' ( १।१९।३८ ) मित्यादिना, तत्कथं द्वयं कृतमित्युच्यते, तत्राहुः ये पुनरित्यादि । एतन्निरूपणेनेति प्रश्नद्वयोत्तरनिरूपणेन प्रथमप्रश्नोत्तरनिरूपणेन वा । तर्हि 'यद्वा विपर्यय'—( १।१९।३८ ) मित्यनेनोक्तस्य षष्ठस्य कुत्रोत्तरमित्यत आहुः काँश्चिदित्यादि । अग्र इति । दशमाध्यायसमाप्तौ 'अमुनी भगवद्रूप' २।१०।३५ इत्यादिना । निरूपयिष्याम इति उत्तरभेदेऽपि विषयाभेदेनैकरूपतया निरूपयिष्यामः । तेन सिद्धमाहुः अत इत्यादि । एवं प्रथमकारिकार्थ उक्तः । अग्रिमाणामाहुः तदर्थमित्यादि । ननु त्रयाणामेतेषां कुतोऽङ्गत्वमित्याकाङ्क्षायामाहुः एतेषामित्यादि । ननूत्तरे वक्तव्ये प्रश्नाभिनन्दनस्य किं प्रयोजनमत आहुः कर्तव्येत्यादि । किं हेतुताबोधनेनेत्यत आहुः यथेत्यादि । तथा च तदाकाङ्क्षापूर्तिस्तत इति तया च व्यग्रतानिवृत्त्या सुखेन कर्तव्यसिद्धिरिति तत्प्रयोजनमित्यर्थः । एवमाद्यश्लोकप्रयोजनमुक्तम् । तदग्रिमत्रयाणामाहुरधिकारेत्यादि । किं तावतेत्यत आहुः प्रश्नेत्यादि । तर्ह्येकः श्लोकोऽस्तु, किं त्रिभिरित्यत आहुः तत्रेत्यादि । तत्रेति अधिकार एवोत्तरदानात् । पूर्वेषां चतुर्णां तात्पर्यमुक्त्वा व्याचक्षते तत्रेत्यादि । अन्य इति । 'अथो जाप्य' मित्यादिनोक्ताः । ते विषयाभेदेऽप्यन्योपकारका इति भावः । ❀ । ❀ तच्छास्त्राभावादिति । सत्स्वपि ग्रन्थेषु तदभिज्ञगुर्वलाभेन तेषां शास्त्रत्वाभावादित्यर्थः । एतेन छान्दोग्यस्थसनत्कुमारनारदसंवादन्यायो बोधितः । निमित्तसप्तमीति । 'निमित्तात्कर्मयोग' इत्यनेनोक्ता । तथा च गृहार्थं श्रोतव्यादीनि सहस्रशः सन्तीत्यर्थः । तव प्रश्नो न साधुरिति । प्रश्नस्तव न साधुरित्यन्वयः । अनेनेति । आद्याभिनन्दनेनेतरविषयकनिन्दनेन च । ❀ । ❀ विचिकित्सेति । जुगुप्सोत्पादको गृहं दुःखदं न वेति संशयः । त्रीनपि व्याख्याय तेषामधिकारशेषत्वाय तदर्थं सङ्गृह्याहुः बुद्धिरिति ।

## श्रीगिरिधरकृता बालप्रबोधिनी

॥ श्रीकृष्णाय नमः ॥ ॥ पाता[1]लादिस्वरूपो यो योगिध्ये[2]याङ्घ्रिपङ्कजः ॥ द्वितीयस्कन्धव्याख्यायां स[3] एव शरणं मम ॥ १ ॥ तदेवं प्रथमस्कन्धे ह्यधिकारो निरूपितः । द्वितीये तु दशाध्यायैः श्रवणाङ्गं निरूप्यते ॥ २ ॥ तदेवं प्रथमस्कन्धेऽधिकारं

---

१. 'पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम् [ स्कं. १, अ. १, श्लो. २६ ] इत्यादिवक्ष्यमाणावयवसन्निवेश-

तस्माद्भारत सर्वात्मा भगवानीश्वरो हरिः । श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम् ॥ ५ ॥
एतावान् सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया । जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः ॥ ६ ॥
प्रायेण मुनयो राजन्निवृत्ता विधिषेधतः । नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः ॥ ७ ॥
इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् । अधीतवान् द्वापरादौ पितुर्द्वैपायनादहम् ॥ ८ ॥

### श्रीधरस्वामीकृता भावार्थदीपिकाव्याख्या

एवं विपर्ययप्रश्नोत्तरमुक्त्वा श्रोतव्यादिप्रश्नस्योत्तरमाह । तस्मादिति । हे भारत भरतवंश्य । सर्वात्मेति प्रेष्ठत्वमाह । भगवानिति सौंदर्यम् । ईश्वर इत्यावश्यकत्वम् । हरिरिति बंधहारित्वम् । अभयं मोक्षमिच्छता ॥५॥ अतः परमन्यच्छ्रेयो नास्तीत्याह एतावानेव जन्मनो लाभः फलम् । तमाह नारायणस्मृतिरिति सांख्यादिभिः साध्य इति । स्वातंत्र्येण तेषां लाभत्वं वारयति । सांख्यमात्मानात्मविवेकः योगोऽष्टांगः अंते तु स्मृतिः परो लाभः न तन्महिमा वक्तुं शक्य इत्यर्थः ॥६॥ तत्र सदाचारं प्रमाणयति । प्रायेणेति । विधिषेधतः विधिनिषेधाभ्यां निवृत्ताः नैर्गुण्ये ब्रह्मणि स्थिता अपि । स्म प्रसिद्धम् ॥७॥ ननु किमिदमपूर्वं कथयसि सत्यमत्यपूर्वमेवेदमित्याह । इदं भगवत्प्रोक्तं तन्नामैकप्रधानं पुराणं ब्रह्मसंमितं सर्ववेदतुल्यम् । यद्वा ब्रह्म सम्यक् मितं येन । कुतस्त्वया प्राप्तमत आह । अधीतवानिति । द्वैपायनात्पितुः कदा द्वापरादौ द्वापर आदिर्यस्य कालस्य तस्मिन्द्वापरांत इत्यर्थः । शंतनुसमकाले व्यासावतारप्रसिद्धेः ॥८॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अतः कृतार्थी भवितुं कर्मादिकमकुर्वाणा भक्तिमेव कुर्वीरन्नित्याह—तस्मादिति । भारतेति । भरतवंशस्य हरिभक्तत्वेन त्वां प्रत्यहं भगवत्तत्त्वमवश्यं वदामीति भावः । अभयं स्वपराभवाभावं यद्वाऽभयं सर्वभयनिवारकसर्वानंदमयपुरुषार्थम् "गतवानभयं हरिम्" इति वक्ष्यमाणत्वात् "मर्त्यो मृत्युव्यालभीतः पलायन्" इत्याद्युक्तेश्चाभयं श्रीकृष्णमीत्यर्थः । अत्र हरिरिति विशेष्यपदं सर्वात्मेत्यादिविशेषणत्रयेण मोक्षाभिसंधिनी रागानुगा वैधी चेति भक्तिर्व्यंञ्जिता । तत्र प्रथमायामभयं मोक्षमिच्छता सर्वेषामात्मा परमात्मा हरिः श्रोतव्य इति द्वितीयायामभयं निष्कृपं यथा स्यात्तथा इच्छता लोभवता पुंसा भगवानतिसुन्दरो नंदसूनुः श्रोतव्य इति । "भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु" इत्यमरः । तृतीयायां न बिभेत्यस्मादित्यभयो हरिरेव मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिम्" इत्यग्रिमश्लोके वक्ष्यमाणत्वात् । इच्छतामभयमात्मत्राणमिच्छता वा ईश्वरो हरिरीशितव्येन पुंसा श्रोतव्य इत्यादि कीर्त्तितव्यश्च स्मर्तव्यश्चेति चकाराभ्यां श्रवणानंतरं कीर्तनश्रवणयोरेव कालत्वं विहितमिति श्रोतव्यादिप्रश्नस्योत्तरमुक्तम् ॥ ५ ॥ अतो भगवच्छ्रवणादेः । इत्यर्थ इति । 'अंते या मतिः सा गतिः' इति न्यायेन साक्षाच्छ्रीहरिप्रापकत्वादिति भावः । विश्वनाथः—ज्ञानिकर्मिप्रभृतयोन्येऽपि साधुसंगवशाद्यदि भक्ता भवन्ति न पुनः कर्मादिकं कुर्वंति तदा तेऽपि कृतार्था इत्याह—एतावानिति । सांख्ययोगस्वधर्मनिष्ठाभिरेतावान् जन्मनो लाभः परः श्रेष्ठः कोऽसावन्ते प्रत्यासत्तिन्यायेन ज्ञानकर्मयोगानामवसाने सनकादिनवयोगेश्वरप्राचीनबर्हिःप्रभृतीनामिव नारायणस्मृतिः शुद्धा भक्तिर्यदि स्यात् । अंत इति । यदि पुनरपि भक्तिं त्यक्त्वा ज्ञानादिषु निष्ठिता न भवंतीत्यर्थः । अत एवमेव वक्ष्यते । "एतावानेव यजतामिह निःश्रेयसोदयः ॥ भगवत्यचलो भावो यद्भागवतसंगतः" इति ॥ ६ ॥ संसिद्धिस्तु भगवद्रूपगुणमाधुर्यानुभव एव स च ब्रह्मसायुज्यादप्यतिश्रेष्ठ इति महदनुभवप्रमाणेनाह । प्रायेणेति । नैर्गुण्ये स्थिता मुक्ता अपीत्यर्थः । गुणानुकथन एव रमंते न तु निर्विशेषब्रह्मसुखेऽपीत्यर्थः । प्रायेणान्ये जीवन्मुक्तास्ततो निकृष्टाः सायुज्यार्थं गुणानुकथनं कुर्वंति न तु तत्र रमंते ॥ ७ ॥ किमिदमश्रुतपूर्वं कथयसि सत्यमपूर्वमेवेदमित्याह—भागवतं भगवंतमधिकृत्य कृतं, भगवता प्रोक्तं वा भगवत इदमिति वा शास्त्रमिदं युष्मदस्मत्प्रश्नोत्तरविराजि श्रीभगवल्लीलामयमंतर्भूतयुष्मदादिजन्मस्थितिसंस्थितिकथाप्रपञ्चमध्यात्मदीपं सर्वोपनिषत्साररसरूपमनादिसिद्धमेव मत्पित्रा बादरायणेनाविर्भावितम् । अधीतवानिति । शास्त्रस्यार्थो बुद्धिबलेन स्वयं प्राप्तुमशक्य इति भावः । कृष्णावतारादनतिपूर्वमेव सत्यवत्यां द्वैपायनस्य प्रादुर्भावाद् द्वापरादाविति न संगच्छते । तस्माद् द्वापरशब्देनात्र द्वापरांत एव [illegible] द्वापरांते इत्यर्थः । यथा वृक्षाग्रे पक्षी खड्गाग्रं मारप्रशेत्यादावंतेऽप्यग्रव्यवहारस्तद्वदत्रापीति । यद्वा द्वापर आदिर्यस्य संध्यांशस्य स तथा ॥ ८ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

प्रेष्ठत्वमिति । प्रियतमत्वमित्यर्थः । अतिशयविशिष्टार्थवृत्तेः प्रियशब्दात् स्वार्थे 'अतिशायने तमबिष्ठनौ' ( पा० ५ । ३ । ५५ ) इति सूत्रेण इष्ठन् प्रत्यये 'प्रिय-स्थिर-स्फिरोरु-बहुल-गुरु-वृद्ध तृप्र-दीर्घ-वृन्दारकाणां प्र-स्थ स्फ-वर-बंहि-गर-वर्षि-त्रप्-द्राघि-वृन्दाः ( पा ६ । ४ । १५८ ) इति सूत्रेण प्रियशब्दस्य प्रादेश प्रेष्ठशब्दः साधनीयः ॥ ५—७ ॥ ❀ ❀ [द्वापरादाविति ।

१. प्रा० पा० व्यः स्वेच्छया विभुः

अत्र विजयध्वजः—द्वापरादौ कृष्णावतारापेक्षया द्वापरे आदौ च न तु द्वापरस्य आदाविति। व्यासः षट्शतवर्षीयो धृतराष्ट्रमजीजनदिति वचनाद् द्वापरान्ते भारतकथाप्रवृत्तिकथनाच्चेति ॥ किञ्चात्र कृष्णावतारादनतिपूर्वमेव सत्यवत्यां द्वैपायनस्य प्रादुर्भावाद् द्वापरादाविति न सङ्गच्छते। तस्माद् द्वापरशब्देनात्र द्वापरान्त एव लक्ष्यते ॥ ८—१५ ॥

## श्रीमद्वीरराघवव्याख्या

विपर्य्ययप्रश्नस्योत्तरमुक्त्वा श्रोतव्यादि प्रश्नस्योत्तरमाह तस्मादिति। हे भारत भरतवंश्य सर्वात्मा सर्वजीवानामंतर्य्यामी "अंतःप्रविष्टः शास्ताजनाना" मितिश्रुतिप्रत्यभिज्ञानात्। जनशब्दस्य चेतनमात्रे स्वारस्यात्। हरिः। आश्रितदुरितहर्त्ता अनेनोपासकानां स्वप्राप्तिविरोधिदुरितनिवर्त्तकत्वमुक्तं भवति भगवानित्यनेन देवताविशेष उक्तः। भगवानिति शब्दोऽयमिति स्मरणादीश्वरः कार्यकारणावस्थचेतनाचेतननियंता अनेन कारणत्वमभिप्रेतं "कारणं तु ध्येय" इति श्रुतेः। ईदृशो हरिः। अभयं मोक्षं कामयमानेन श्रोतव्य इत्यादिविषयीकर्त्तव्यः। स्वरूपरूपगुणविभूतिविशिष्टपरमात्मविषयकश्रवणादिकमेव मुमुक्षुणा कार्य्यं नान्यविषयकमित्यर्थः। "आत्मा वारे द्रष्टव्यः तमेवैकमात्मानं जानथ। अन्या वाचो विमुंचथे"ति श्रुतेः। एवं च शारीरकशास्त्रार्थप्रतिज्ञापरा "ऽथातोब्रह्मजिज्ञासे"ति प्रथमसूत्रार्थोनुसंहितो भवति ॥ ५ ॥ ❀ ❀ एतस्मादन्यत्कर्त्तव्यं नास्तीत्याह। एतावानिति। सांख्यं ज्ञानयोगः योगफलाभिसंधिरहितकर्मयोगः। ( ज्ञानयोगः ) "ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिना"मिति भगवद्वचनात्। स्वधर्मो भगवच्छेषतैकवृत्तिः। तदुपासनमिति यावत् तस्य परिनिष्ठया। अविघ्नेन परिसमाप्त्या च। अंते देहावसाने नारायणस्मृतिः। साध्येति यद् एतावान् पर उत्कृष्टः जन्मलाभः फलं ज्ञानकर्मयोगानुगृहीतभगवदुपासनासाध्या नारायणस्मृतिरंतकाले संपाद्येत्यर्थः ॥ ६ ॥ ❀ ❀ अत्र सदाचारं प्रमाणयति। प्रायेणेति। विधिनिषेधतः विधिनिषेधात्मकवेदबोधितात्काम्यात्कर्मणो निवृत्ताः। नत्वावश्यकात्पंचमहायज्ञाद्यनुष्ठानरूपात्कलंजभक्षणादिनिषेधाद्वा निवृत्ताः। "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्। तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति। क्रियावानेष ब्रह्मविदां वरिष्ठः। नाविरतो दुश्चरितान्नाशांतो नासमाहित" इति विधिनिषेधानुवर्त्तनाभावे तदुपासनानिवृत्त्यभावप्रतिपादनात्। न च तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेद् बाल्यं च पांडित्यं च निर्विद्याथ मुनिरितिबालस्य यत्कर्मकामचारादिकं तद्विदुष उपादेयतया श्रुतमिति वक्तुं शक्यम्। अनाविः कुर्वन्नन्वयादित्यधिकरणे बालस्य यत्स्वमाहात्म्यानाविष्कारारूपं कर्म तदेव विदुष उपादेयं न तु कामचारादिकमिति सिद्धांतितत्वाद् ब्राह्मणो विद्यावान्पांडित्यं निर्विद्य उपास्यं ब्रह्मतत्त्वं परिशुद्धं परिपूर्णम्। च विदित्वा वेदनं प्रतिलभ्य यत्स्वभावानाविष्काररूपं कर्म बहुपाददानो वर्तेतेति तस्यार्थः। मुनयः शुभाश्रयसंशीलनपराः। नत्विदं श्रवणानंतरभाविमननं विद्यापांडित्यबाल्यप्राप्त्यनंतरभाविनोमननांतरस्यायुक्तदशास्वपि शुभाश्रयसंशीलनरूपस्वांगांतरस्यापि विहितत्वान्नैर्गुण्यस्थाः रजस्तमस्तत्संकीर्णसत्त्वरहिते ब्रह्मणिस्थास्तदुपासका इत्यर्थः। हरेराश्रितदुरितहारिणो गुणानुकथने गुणानुवादे रमन्ते स्म ॥ ७ ॥ ❀ ❀ न केवलं पूर्व एव रमंतेऽहमपि तत्रैव रम इत्याह इदमिति द्वयेन। भगवत्प्रोक्तं भागवतं चतुःश्लोक्यामूलभूतायास्तत्प्रोक्तत्वात्। यद्वा भगवत्स्वरूपरूपादिप्रतिपादकत्वेन भागवतं ब्रह्मवेदस्तेन संमितं तुल्यम्। यद्वा ब्रह्म सम्यग्मितं प्रमितं येन तदिदं पुराणं कर्म पितुर्द्वैपायनाद्व्यासाद्वापरादौ द्वापर आदिर्यस्य सः द्वापरादिः कलियुगादिः। तस्मिन् शंतनुचक्रवर्त्तिसमकालत्वप्रसिद्धेर्व्यासावतारस्य अहमधीतवान् ॥ ८ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

यतः श्रीनारायणश्रवणादि विना न संसारनिवृत्तिस्तस्मात्सर्वात्मी सर्वव्यापी। सर्वमभाष्टीमाददानो वा। भगवान्निरतिशयैश्वर्यादिगुणवान् ब्रह्मादिचेतनराशिपूज्यो वा हरिः स्मरणमात्रेणाशेषसंसारक्लेशसंहर्ता सर्वजगदीश्वरो नित्यभयरूपादस्मात्संसारादभयं मोक्षमिच्छता पुरुषेण श्रवणादिविषयः कर्त्तव्य इत्यन्वयः। श्रवणादित्रयेणाज्ञानसंशयादिनिरासं करोति "श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ संशयं च पराणुद्य लभते ब्रह्मदर्शन" मितिवचनात्। श्रवणेनाज्ञानम्। कीर्तनापरपर्यायमननेन संशयविपर्ययौ निरस्य स्मरणलक्षणध्यानेन ब्रह्मापरोक्षज्ञानं लभत इति। श्रोतव्योऽन्यो जप्तव्योऽन्य इति शंकानिरासार्थं श्रवणादीनां चतुर्णामेकविषयत्वं द्योतयितुं सर्वात्मेत्यादिविशेषणचतुष्टयमुपात्तम् अहंकाररूपेण सर्वव्यापित्वेन सर्वात्मारुद्रः किं नस्यादित्यत उक्तं हरिर्भगवानिति तथापि सूर्याद्यन्यतमः किं नस्यादत उक्तमीश्वर इति ईशाद्रुद्राद्वर इति योगेन तस्य रुद्रप्रसिद्धिरपि निरस्तेति ज्ञातव्यम् ॥ ५ ॥ ❀ ❀ एतदेव सर्ववेदेतिहासपुराणेषु तात्पर्य्येण प्रतिपादितमिति दर्शयति एतावानिति अन्ते मरणकाले नारायणस्मरणं यथा स्यात्तथा बहुशास्त्राभ्यासः कर्त्तव्य इति भावेनेत्यतोत आह एतावानिति। सांख्यशास्त्रोक्तसांख्येन तत्त्वज्ञानेन योगशास्त्रोक्तभगवत्पूजादियोगानुष्ठानेन तथास्वधर्मपरिनिष्ठया स्वविहितवर्णाश्रमोक्तस्वधर्मानुष्ठानेन चांते मरणकाले नारायणस्मृतिरिति यावानेतावानियानेव पुंसां पर उत्कृष्टो जन्मलाभो जन्मनः साफल्यमित्यन्वयः अतो वेदादिशास्त्रेषु क्रियमाणेन सर्वथा नारायणस्मरणं कर्त्तव्यं नान्यदितिप्रतिपाद्यत इति अतः प्रष्टुःपरिहारः सुप्रसिद्ध इति सिद्धम् ॥ ६ ॥ ❀ ❀ सर्वथा नारायणश्रवणादिकार्यमित्यत्र कैमुत्यन्यायमाह प्रायेणेति मुनयः स्वस्वयोग्यज्ञानवंतो विधिनिषेधाभ्यां निवृत्ताः निर्गुणो भगवान् तेन दीयमानत्वात्तत्सम्बधिनिर्योगं

नैर्गुण्यं तत्स्थामुक्ताहरेर्गुणानु-कथने रमंत इत्यन्वयः गुणान् स्मारंस्मारं कथयंत इत्यस्मिन्नर्थे स्मेतिपदं कदाचिद्व्यानाभिप्रायेणोक्तं प्रायेणेति । अतो ज्ञानार्थिभिर्निरंतरं हरिगुणश्रवणादिकार्यमिति किं वाच्यमित्यर्थः ॥ ७ ॥ ❀ ❀ इदानीं भागवतप्रतिपाद्यमर्थं तस्माद्भारतेत्यादिश्लोकत्रयेणाभिधाय पुनस्तद्विस्तरेण वक्तुमुपक्रमते इदमिति बुद्धिसन्निहितत्वादिदमित्युच्यते ब्रह्मसंमितं वेदसमम् । तदर्थव्याख्यानरूपत्वाद् द्वापरादौ कृष्णावतारापेक्षया द्वापर आदौ च । न तु द्वापरस्यादाविति "व्यासःषट्शतवर्षीयो धृतराष्ट्रमजीजनदितिवचनाद् द्वापरान्ते भारतकथाप्रवृत्तिकथनाच्च ॥ ८ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

अभयं सर्व्वभयनिवारकसर्व्वानन्दमयपुरुषार्थं गतवानभयं हरिम् इति वक्ष्यमाणाद् मर्त्यो मृत्युव्यालभीत इत्यादेश्च ॥ ५—६ ॥ तदेव कैमुत्येन दर्शयति प्रायेणेति ॥ ७ ॥ ❀ ❀ ब्रह्मसम्मितं नराकृतिपरब्रह्मणः श्रीकृष्णस्य तुल्यं कृष्णे स्वधामोपगते इत्यादेः । द्वापरादौ वृक्षशाखादिवत्तदग्रत्वव्यवहारेण द्वापरान्ते इत्यर्थः । यद्वा द्वापर एवादिर्यस्य तत्र तदीयान्ते सन्ध्यांशे इत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

अतः कृतार्थो भवितुं कर्म्मादिकमकुर्व्वाणा भक्तिमेव कुर्व्वीरन्नित्याह तस्मादिति । हे भारतवंश्य अभयं स्वपराभवाभावम् इच्छता पुंसा हरिः श्रोतव्यः । अत्र हरिरिति विशेष्यपदम् । सर्वात्मादिविशेषणत्रयेण मोक्षाभिसन्धिनी रागानुगा वैधी च भक्तिर्व्यञ्जिता । तत्र प्रथमायाम् अभयं मोक्षम् इच्छता सर्व्वेषामात्मा परमात्मा हरिः श्रोतव्य इति । द्वितीयायाम् अभयं निष्कम्पं यथा स्यात् तथा इच्छता लाभवता पुंसा भगवान् अतिसुन्दरो नन्दसूनुः श्रोतव्य इति "भगं श्रीकाममाहात्म्यवीर्य्ययत्नार्ककीर्त्तिषु" इत्यमरः । तृतीयायां न बिभेत्यस्मादित्यभयो हरिरेव मुहूर्त्तात् सर्व्वमुत्सृज्य गतवानभयं हरिम् इत्यग्रिमश्लोकदृष्टस्तम् इच्छता अभयम् आत्मत्राणम् इच्छता वा ईश्वरो हरिरीशितव्येन पुंसा श्रोतव्य इत्यादि । कीर्त्तितव्यश्च स्मर्त्तव्यश्चेति चकाराभ्यां श्रवणानन्तरं कीर्त्तनस्मरणयोरेककालत्वं विहितमिति श्रोतव्यादिप्रश्नस्योत्तरमुक्तम् ॥ ५ ॥ ❀ ❀ ज्ञानिकर्म्मिप्रभृतयोऽन्येऽपि साधुसङ्गवशाद् यदि भक्ता भवन्ति न पुनः कर्म्मादिकं कुर्व्वन्ति तदा तेऽपि कृतार्था इत्याह एतावानिति । सांख्ययोगस्वधर्म्मनिष्ठाभिरिति विशेषणे तृतीया जटाभिस्तापसमद्राक्षीदितिवत् । तथाच तैर्विशिष्टानां पुसामेतावान् जन्मनो लाभः परः श्रेष्ठः । कोऽसौ अन्ते प्रत्यासत्तिन्यायेन ज्ञानयोगकर्म्मणामवसाने सनकादिनवयोगेश्वरप्राचीनबर्हिःप्रभृतीनामिव नारायणस्मृतिः शुद्धा भक्तिः यदि स्यात् । अन्ते इति यदि पुनरपि भक्तिं त्यक्त्वा ज्ञानादिषु निष्ठिता न भवन्तीत्यर्थः । अत एवमेव वक्ष्यते एतावानेव यजतामिह निःश्रेयसोदयः । भगवत्यचलो भावो यद्भागवतसङ्गतः ॥ इति । जन्मन एवान्ते नारायणस्मृतिः परो लाभ इति केचिदाहुः ॥ ६ ॥ ❀ ❀ संसिद्धिस्तु भगवद्रूपगुणमाधुर्य्यानुभव एव स च ब्रह्मसायुज्यादप्यतिश्रेष्ठ इति महदनुभवप्रमाणेनाह- प्रायेणेति । विधिषेधतः विधिनिषेधाभ्यां निवृत्ता नैर्गुण्ये स्थिता मुक्ता अपीत्यर्थः । गुणानुकथने एव रमन्त न तु निर्विशेषब्रह्मसुखेऽपीत्यर्थः । प्रायेणेति अनेनान्ये जीवन्मुक्तास्ततो निकृष्टाः सायुज्यार्थां गुणानुकथनं कुर्व्वन्ति न तु तत्र रमन्ते ॥ ७ ॥ ❀ ❀ किमिदमश्रुतचरमपूर्वं कथयसि । सत्यम् । अपूर्वमेवेदमित्याह । भागवत भगवन्तमधिकृत्य कृतं भगवता प्रोक्तं वा भगवत इदमिति वा शास्त्रम् इदं युष्मदस्मत्प्रश्नोत्तरविराजिश्रीभगवल्लीलामयमन्तर्भूतयुष्मदादिजन्मस्थितिसंस्थितिकथाप्रपञ्चमध्यात्मदीपं सर्व्वोपनिषत्सारसरूपमनादिसिद्धमेव मत्पित्रा बादरायणेनाविर्भावितम् । ब्रह्मसम्मितं परब्रह्मतुल्यं ब्रह्मापि सम्यक् मितं येनेति वा । कुतस्त्वया प्राप्तम् अत आह अधीतवानिति । अस्य शास्त्रस्यार्थो बुद्धिबलेन स्वयं ज्ञातुमशक्य इति भावः । कृष्णावतारादनतिपूर्वमेव सत्यवत्यां द्वैपायनस्य प्रादुर्भावात् द्वापरादाविति न सङ्गच्छते । तस्माद्द्वापरशब्देनात्र द्वापरान्त एव लक्ष्यते । ततश्च द्वापरस्य द्वापरान्तस्य आदौ द्वापरोपान्ते इत्यर्थो व्याख्येयः ॥ ८ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ यच्छ्रोतव्यमथो जाप्यं यत्कर्त्तव्यं नृभिः प्रभो । स्मर्त्तव्यं भजनीयं वेति प्रश्नपंचकस्योत्तरमाह । तस्मादिति तस्माद्भगवदितरपदार्थाभिनिवेशेन वृथा वयोविनाशाद्धेतोः । हे भारत भरतान्वयोत्पन्न अभयं हरिपदमिच्छता मुमुक्षुणा हरिः स्वपदप्राप्तिप्रतिबंधकस्वभक्तपापहारिः हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतइत्यादिस्मृतिप्रसिद्धः श्रोतव्यः गुरुमुखात्कीर्त्तितव्यश्च शिष्यादिभ्यः हरये नम इत्येवमुच्चैः कीर्त्तितव्यश्च मंत्रमूर्त्तिस्तूपांसुमनसैव कीर्त्तितव्यः । अनेन यज्जप्यमित्यस्योत्तरमुक्तम् स्मर्तव्यः चकाराद्भजनीयः सेवनीयः द्वितीयाचकारात्सर्वकर्त्तव्यनाविषयः सर्वक्रियाभिराराधनीय इत्यन्वयः । तत्र हेतुप्रदर्शनार्थं हरिं विशिनष्टि सर्वात्मा नतदस्ति विना भूतं मया यत्स्याच्चराचरमिति श्रीमुखोक्तः सर्वकारणकारणः निःसमानातिशयः यदन्यो भजनीयो नास्तीत्यर्थः "मत्तः परतरं नान्यत्किंचिदस्तिधनंजय" इति स्मृतेः । तमेवैकं विजानथ अन्या वाचा विमुञ्चथेति श्रुतेः भगवान्स्वाभाविकषडैश्वर्य्यसंपन्नः । ईश्वरः नियन्ता सर्वभक्तिकामपरिपूरक इतिपदद्वयार्थः ॥ ५ ॥ ❀ ❀ हरेरेव भजनीयत्वं तद्भजनस्य परमपुरुषार्थत्वं चोपपादयन्योगत्रयस्य भगवत्स्मृतिसाधनत्वमाह । एतावानिति "एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु"

इति श्रीमुखवचनात् । सांख्यशब्दः ज्ञानवाचकः योगशब्दश्च निष्कामकर्मयोगवाचकः ज्ञानयोगेन निष्कामकर्मयोगेन स्वधर्मनिष्ठया भक्तियोगनिष्ठया च । अन्ते प्राणप्रयाणसमयेऽपि नारायणस्मृतिः इत्येतावानेव पुंसां परः उत्कृष्टः जन्मनो लाभः ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् यः प्रयाति त्यजन् देहं सयाति परमां गतिमिति स्वस्मृतिफलं च स्वमुखेनैवोक्तम् ॥ ६ ॥ ❀ ❀ हरिभजनानंदे निमग्नानामप्राप्तिविधिनिषेधावसाराणां महामुनीनामाचारं चात्र प्रमाणयति प्रायेणेति नैर्गुण्यस्थाः प्राकृतगुणास्पृष्टब्रह्मनिष्ठाः मुनयस्तन्मननैकस्वभावाः हरिध्यानैकनिष्ठाः हरेर्गुणानुकथनमुपलक्षणमन्येषां भजनप्रकाराणाम् अतो विधिनिषेधतो विधिनिषेधाभ्यां निवृत्ताः यत्र चामृततुल्यस्याभिहितस्यावकाशो नास्ति तत्र किमुत विषयद्वेयस्य निषिद्धस्यावकाशो नास्तीति वक्तव्यमिति । अतएवोक्तं प्राणांतरे "स्मर्तव्यः विष्णुर्विस्मर्तव्यो न जातुचित् सर्वे विधिनिषेधाः स्युरेतयोरेव किंकरा" इति प्रायेणेत्यविधिनिषेधौ लोकसंग्रहाय गुणानुकथनोपयोगितया च गृह्णंतीत्यर्थः ॥ ७ ॥ ❀ ❀ एवं हरिव्यतिरिक्तश्रवणादिकमनुपादेयं तच्छ्रवणादिकं चोपपादेयमित्युक्तमथतच्छ्रवणादिनिष्ठापादकं शास्त्रं श्रावयितुं प्रतिजानीते इदमित्यादित्रिभिः । भगवता वेदव्यासेनप्रोक्तं भागवतम् ब्रह्मणा वेदेन संमितं तुल्यम् पितुर्वेदव्यासाद् द्वापर आदिर्यस्य द्वापरांतस्य तस्मिन्काले ऽहमधीतवान् ॥ ८ ॥

## श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

एवं प्रश्नमभिनन्द्य साधारण्यं परिहृत्याऽभयमिच्छतामुपायमाह—

**तस्मादिति** । यस्मादाद्य एव पक्षः समीचीनः यस्मादन्यविषयकश्चाऽसमीचीनस्तस्माद्येषां संसाराद्भयमस्ति तद्भयनिवृत्त्यर्थं च यतन्ते तेषामभयमिच्छतां भगवाञ्छ्रोतव्यः । यद्यप्यत्र युक्तिर्वक्तव्या तथापि बहिर्मुखस्य बुद्धिर्युक्तिमपि न गृह्णातीति स्वभावतोऽधिकारी वक्तव्यः । तदाह । **भारतेति** विशिष्टाधिकारद्योतकमुक्तविश्वासाय । "दौष्यन्तिरत्यगान्मायामि"ति भरतस्य मायामोहाभावात्तद्धर्मपुरस्सरं तद्वंशोत्पन्नानामपि मायामोहाभावादुक्तविश्वासः । ननु वैदिकविधिबोधितानामग्निहोत्रादीनामात्मजिज्ञासाया वा कथनं परित्यज्य कथं भगवच्छ्रवणं विधीयते ? अवैदिकत्वात् । तत्राऽऽह—**सर्वात्मेति** । प्रमाणबलात्प्रमेयबलं महदित्यग्रे वक्ष्यते । प्रमेये च युक्तिर्बलिष्ठा । तत्रैषा युक्तिः । अभयप्रेप्सवस्त्रैर्णिका एव भवन्तीति नाऽस्ति नियमः । अन्येषामपि कृतपुण्यपुञ्जानामभयेच्छासम्भवात् । अतस्तेषामुपायो वेदे नोक्त इति तदर्थं वक्तव्ये साधने तेनैव साधनेन त्रैवर्णिकानामपि पुरुषार्थसिद्धावावश्यकत्वाल्लाघवाच्च सर्वोपयोग्येक एवोपायो वक्तव्यः । स च सर्वात्मत्वाद्भगवतस्तद्विषय एव कश्चिद्वक्तव्यः । न हि स्वस्याऽऽत्मा कस्यचिन्न श्रोतव्यः । "आत्मा वा अरे श्रोतव्यः" "आत्मलाभान्न परं विद्यते" "तरति शोकमात्मविदि"ति श्रुतेः । तत्र स्वस्वात्मश्रवणे बोध्यमाने बोधकस्य वाक्यापर्यवसानमेव स्यात् । आत्मसु प्रकृतिविकृतिभावाभावाच्च । तस्मात्सर्वेषामेक-य आत्मा भवति स एव श्रोतव्यः । अतः[1] श्रुतावप्यात्मपदं सर्वात्मपरम् । न च जातिवाचकत्वमात्मपदस्य । तथा सति व्यक्तिरूपस्य स्वस्य गौणत्वेनाऽश्रौतत्वात्क्रियावज्ज्ञानेऽनुपपत्त्यभावाच्च नाऽऽत्मनः कार्यं सिद्ध्येत् । सद्भातेऽप्यात्मज्ञानस्य विद्यमानत्वाच्छ्रुतौ प्रकारविशेषस्याऽनुक्तत्वाज्ज्ञानार्थं प्रयासो व्यर्थः स्यात् । श्रुतिश्चोपचरिता भवेत् । अतः सर्वात्मैव श्रोतव्यः । तस्य[2] शारीरस्य च भेदाभावान्न स्वस्य गौणता । किञ्च । "फलमत उपपत्तेरि"ति न्यायेन न केवलं ज्ञानमात्रेण फलम् । किन्तु श्रवणादिभिर्ज्ञाते ब्रह्मणि तत्फलं प्रयच्छति । [3]तच्चेन्निर्द्धर्मकं शारीररूपं वा स्यात् फलदाने असमर्थमेव स्यात् । अतः फलदानसमर्थरूप एवाऽऽत्मा श्रोतव्य इत्याह—**भगवानिति** । षड्गुणैश्वर्यसम्पन्नो न तु भ्रान्तशास्त्रैः प्रतिपन्नः । वेदार्थोऽप्ययमेवेत्यवादिष्म । किञ्च । फलं दुःखाभावः सुखञ्च । तत्र प्रथमं दुःखाभावो मृग्यः । बुद्धेस्तत्रैव प्रथमं प्रवृत्तेः । तत्र श्रवणस्य तत्साध्यज्ञानस्य वैकफलत्वे सर्वफलत्वे वा आहारपृथक्त्वेन सर्वफलत्वनिर्द्धारात्प्रथमं जाते साक्षात्कारे दुःखनिवृत्तौ परमानन्दो न स्यात् । परमानन्दे वा स्वर्गादि[4]सुखवद्दुःखनिवृत्तिर्न स्यात् । सन्नियोगशिष्टत्वेऽपि फलदातृत्वाद्भगवतो द्वयं न प्रयच्छेत् । अन्यथा आहारपृथक्त्वन्यायो भज्येत् । अतः श्रवण एव तादृग्विषयो वक्तव्यः । यस्तूभयरूपो भवति । तदाह—**हरिरीश्वर इति** । हरित्वेन सर्वदुःखहर्तृत्वेनेश्वरत्वेन सर्वफलदातृत्वेन च श्रोतव्यः । "तं यथा यथोपासत" इति श्रुतेः । अतो धर्मचतुष्टययुक्तत्वेन गुणोपसंहारन्यायेन तादृशः श्रोतव्य इति विषयं व्यावर्त्तकधर्मैः परिच्छिद्य तत्र कर्तव्यमाह श्रोतव्यादित्रयम् । नन्वस्य शास्त्रस्य भक्तिफलकत्वाच्छ्रवणादिकं न धर्मरूपम् । उत्तमवक्तृकथनाच्च । अतो नवविधा भक्तिः कर्त्तव्यत्वेन वक्तव्या । तत्कथं त्रयमेवोच्यत इति चेत् ? सत्यम् । नवविधभक्तेर्वक्तव्यत्वेऽपि प्रेमानन्तरभावित्वादन्येषां त्रयमेवोक्तम् । त्रिभिः स्नेहे जाते अन्येषां कर्तव्यता अनुक्तसिद्धैव । ननु भगवाञ्छ्रोतव्य इति कोऽर्थः ? तद्वाचकाः शब्दाः श्रोत्रेण ग्राह्यास्तेषामर्थो वा ज्ञातव्यः । अभिप्रायो वा सर्वेषां वा केषाञ्चिदेव वा ? आद्ये विधिर्व्यर्थः । प्रमाणवस्तुपरतन्त्रत्वेन ज्ञानस्य श्रोत्रेन्द्रियवतो यतः कुतश्चिच्छब्द उच्चारिते ज्ञानं भविष्यत्येव । गृहीतसङ्केतस्य तु

---

१ अत इति नास्ति ख. ग. २ तस्य चेति ख. ग. ३ तच्चेति क. ग. ४ स्वर्गादितस्सुखवदिति ग.

पुनरर्थज्ञानमपि भविष्यति । न च तत्सम्पादने यत्नः कर्त्तव्य इति । दैवगत्या यत्नं विनाऽपि सर्वेषां तत्सम्भवात् । अथ सर्वदा अशक्त्याऽसम्भवात् । जीवनानुपपत्तिश्च । किञ्च । भगवद्वाचकानां सर्वेषां पदवाक्यानामेकेनोपस्थापयितुमशक्यत्वाद्यत्किञ्चित्पदवाक्यमात्रस्य सर्वजनीनत्वादवक्तव्यत्वम् । अथ शक्तितात्पर्यनिर्द्धारः पदवाक्ययोः श्रवणम् । तथैव कीर्त्तनं स्मरणं चेति चेन्न । सर्वेषां पदवाक्यानामनुपस्थितौ तन्निर्द्धारस्याऽशक्यत्वात् । यत्किञ्चित्पदवाक्यमात्रस्य तु[1] [2]शक्तितात्पर्यनिर्द्धारः सर्वजनीन इति नोपदेशो युक्त इति ? मैवम् । **श्रोतव्यविषयत्वेन लीला दशविधा पुनः । उक्तैव वासुदेवस्य तदर्थमपरा कृतिः ।** शक्तितात्पर्यनिर्द्धारः **सामान्येन पदादिगः । क्रियते स्कन्ध एवाऽत्र तेन नाऽत्रोक्तदूषणम् ।** भगवान् दशविधलीलायुक्तः श्रोतव्यः । अन्यथा विषयवाचकपदचतुष्टयेनैव श्रवणसिद्धेर्विधेर्वैयर्थ्यं स्यात् । तृतीयादिदशस्कन्धकृतिवैयर्थ्यं च । तावता[3] शक्तितात्पर्यनिर्द्धारः सामान्यन्यायेन व्याकरणवन्मीमांसावच्चाऽत्रैव क्रियते । तस्मान्न कोऽपि दोषः । एते हि चत्वारो गुणा अधिकारिफलनिरूपकत्वेनोक्ताः । न तु श्रोतव्यत्वेन । अवच्छेदकत्वेनैव तदुपयोगात् । गुणानामानन्त्येऽपि यथा दशलीलासु सर्वप्रवेशस्तथोत्तरत्र वक्ष्यते । अनुप्रवेशेऽपि यथाऽऽनन्त्यं तथाऽपि वक्ष्यते । अथाऽत्र त्रयं न विधातव्यम् । एकेनैव प्रेमद्वारा अभयसिद्धेः । न च मिलितानां त्रयाणां साधकत्वम् । परीक्षिति तदभावेनाऽभयाभावप्रसङ्गात् । श्रवणस्याऽऽवश्यकत्वाच्च न विकल्पेनाऽनेकविधानमिति वाच्यम् । अत्रोच्यते । त्रयाणामन्योन्यनिर्वाहकत्वेन विधानम् । तथाहि । कीर्त्तनाविधाने श्रवणमेव न निर्वहेत् । न चाऽध्ययनविधिवदेकविधानेनाऽन्यप्राप्तिरिति वाच्यम् । अध्यापनस्य संसारिकर्तव्यत्वेन विधिं विनाऽपि वृत्तित्वेन प्राप्तत्वात् । न चाऽत्र तथा । श्रवणेन कृतार्थस्य कीर्त्तने प्रवृत्त्यनुपपत्तेः । तर्हि कीर्त्तनमेव विधीयताम् । श्रवणं त्वर्थादेव भविष्यतीति । न । परीक्षिति तदभावात् । अभये वैलक्षण्याभावाच्च । तस्माच्छुकादीनामतिनिरपेक्षाणामपि कीर्त्तने प्रवृत्तिसिद्ध्यर्थं कीर्तनविधानम् । तदैव श्रवणसिद्धिः । फलं तु प्रत्येकमेव । अभयं तु भगवत्प्रवेशरूपम् । तदैव सर्वभयनिवृत्तेः । तर्हि स्मरणं न विधातव्यम् । न च श्रवणानन्तरमस्मरणे विस्मरणात्कीर्तनानुपपत्तिरिति वाच्यम् । अन्यलभ्यत्वेन विध्यनुपपत्तेरिति चेन्न । सकृत्कृतकीर्त्तनस्याऽपि विस्मरणसम्भवान्न कीर्त्तनशेषत्वेन स्मरणमायाति । विहिते तु स्मरणे श्रवणकीर्तने सदा भवतः । दोषान्तराप्रवेशश्च । किञ्च । त्रयाणां देहपातपर्यन्तमावृत्तानामेवाऽभयसाधकत्वम् । उत्तरावधिर्देहपात एव । पूर्वावधिः संसारभयज्ञानम् । "**आवृत्तिरसकृदुपदेशादि**"ति न्यायेन स्मरणान्तरव्यावृत्त्यर्थम् । यद्यपि स्नेहे जाते आवृत्तिर्न विधातव्या । स्वत एव तत्सम्भवात् । अथाऽपि भरतवत्कदाचिदन्यासक्तिर्भवेत् । न च तथा सत्यधिकाराभावादेव विधिर्व्यर्थ इति वाच्यम् । तदभावार्थमेव विधानात् । तस्माद्यथासम्भवं देहपातपर्यन्तं त्रयाणामावृत्तिः कर्तव्या । ननु मननिदिध्यासने कुतो न विहिते । ज्ञानं च साध्यत्वेन कुतो नोक्तम् । "**ज्ञानादेव तु कैवल्यमि**"ति श्रुतिविरोधश्च । न च ज्ञानस्याऽर्थात्सिद्धिः । तथा सति ज्ञानस्य व्यापारत्वं स्यात् । अत्र स्नेहस्य तथात्वेन विवक्षितत्वाच्चेति चेन्न । मननिदिध्यासनयोरङ्गत्वेन श्रवणमध्यपातात् । तदत्रैवोत्तरत्र वक्ष्यते । ज्ञानं तु शाब्दं सिद्धमेव । प्रेम्णा क्रियमाणैस्त्रिभिर्भगवत्साक्षात्कारोऽपि सम्भवति । तथापि श्रवणादीनामेव कारणत्वम् । अन्तिमसाक्षात्कारस्य तु फलनान्तरीयकत्वात्फलमध्यपातः । न चाऽऽध्यात्मिकश्रवणवच्छ्रवणाद्याहितसंस्कारसध्रीचीनेन मनसा शारीरात्मसाक्षात्कारवद्भगवत्साक्षात्कारो वक्तुं शक्यः । "**नाऽहं वेदैरि**"ति वाक्यात् । न च शारीरसाक्षात्कार एव फलम् । सञ्जातादुद्गतस्य कैवल्यं प्राप्तस्य भगवच्छ्रवणे मुख्याधिकारात् । "**एतावदरे खल्वमृतत्वमि**"ति ब्रह्मप्रकरणस्थत्वाद्ब्रह्मात्मविषयकमेव । भगवतश्च स्वतन्त्रत्वान्नाऽन्येन प्रकारेणाऽऽविर्भावः सम्भवति । यत्तु वाक्यात्स्वप्नवद् ब्रह्मात्मभावस्फूर्त्तिस्तेन वा सर्वाविद्यानिवृत्तिः स्वचरितार्थता वोच्यते । तज्ज्ञानदुर्बलानां मनोरथमात्रमेव । शुकसनकादीनामद्याऽपि परिभ्रमणात् । तस्मात्सायुज्य एव सर्वभयनिवृत्तिः । "**ब्रह्मैव सन्ब्रह्माऽप्येती**"ति श्रुतिश्च तमेवाऽर्थं वक्ति । न चोपनिषदां वैयर्थ्यम् । अस्यैवाऽर्थस्याऽधिकारिभेदेन प्रकारभेदेन विधानात् । फलं त्वेकमेव । **ते प्राप्नुवन्ति मामेवे**"ति वाक्यात् । "**वेदैश्च सर्वैरहमेव वेद्य**" इति च । "**सर्वे वेदा यत्पदमामनन्ति**" "**तद्विष्णोः परमं पदमि**" ति च । "**तदेव ब्रह्म परमं कवीनामि**" ति च । तस्माद्वैदिकप्रकारेण भागवतप्रकारेण वा भगवति प्रवेशस्त्रैवर्णिकानाम् । अन्येषां तु भागवतप्रकारेणैव । न च व्यवस्थितविकल्पः । "**किं पुनर्ब्राह्मणाः पुण्या**" इति वाक्यात् । "**क्लेशोऽधिकतरस्तेषामि**" ति च । अत एव श्रुतिविप्रतिषेधोऽपि नास्ति । शाण्डिल्यस्य तथा वचनं पूर्वं चित्तशुद्धिस्तथा न जातेति नोपनिषद्भिः फलोदयः । चित्तशोधकानां वैदिकमार्गे क्लेशसाध्यत्वात् । अतः स्वपक्ष[4]स्थापनामात्रपरत्वादितरपक्षनिन्दावचनानां न तावता श्रुतिविरोधः सम्भवति । तस्मात्सूत्रविचारानुसारिवैदिकमार्गेण भगवन्मार्गेण वा यथाधिकारं सर्वेषां परमपुरुषार्थप्राप्तेः सर्वमनवद्यम् । विधिविशेषविचारस्तु न कर्तव्यः । तव्यप्रत्ययस्य विधावविधानात् । लिङ्लोट्पञ्चमलकाराणामेव[5] विधौ विधानात् । लोकवेदप्रसिद्धत्वाच्च भगवतो नाऽत्र विधिः सम्भवति । भक्तिशास्त्रत्वाच्च । फलसाधनता तु तादर्थ्येन विधानात्समभि[6]व्याहारादेव लभ्यते । वाक्यार्थस्याऽपूर्वत्वाद्भावनापक्षश्च पूर्वमीमांसाभाष्य एव निराकृतः । अयं च तव्यप्रत्यय आवश्यके विहितः—"**कृत्याश्चे**" ति सूत्रेण । प्रश्नानुगुणश्चाऽयम् । तस्माद्भगवत्प्रवेशार्थं यावज्जीवं यथासम्भवं त्रयाणामावृत्तिः कर्तव्येति सिद्धम् । श्रोतव्यः कीर्तितव्यश्च ।

---

१. तुर्नास्ति ख. २. शक्तितात्पर्येति वर्णा न सन्ति क. ३. तावतामिति क. ४. स्थापनमात्रेति ख. ५. विधाविति नास्ति ख. ६. समभिव्यवहारादेवेति ख.

कीर्तितव्यः श्रोतव्यश्च। स्मर्त्तव्यः पूर्वोक्तश्च। एवं प्रतिपादनार्थं चकारद्वयम्। **इच्छतेति** पदाच्छ्रवणाद्यकरणे अभयमेव न भविष्यति न तु तदकरणकृतः प्रत्यवायोऽपीति सूचितम्॥ ५॥ ❀ ❀ श्रवणास्याऽङ्गत्वे श्रुतेः संवादित्वात्स्मरणकीर्तनयोः फलहेतुत्वं साधनीयं वादिविप्रतिपत्तिनिराकरणाय। तत्र प्रथममितरासापेक्षत्वात्स्मरणस्य फलसाधकत्वं साधयति—**एतावानीति**। पञ्च सिद्धान्ताः स्वतन्त्रतया विहिताः। तत्र श्रुतिवैष्णवौ समप्रधानत्वेनोक्तौ। पशुपतिमतस्य कल्पभेदेन तामसपरत्वेनोत्कर्ष-जननद्वारा परम्परया यथायथमुपयोगः। क्रममुक्तिहेतुत्वेन वा। अतः परं साङ्ख्ययोगौ धर्मशास्त्रं च सर्वाङ्गत्वेन प्रतिपादितम्। स्वतन्त्रतया ब्रह्ममीमांसायां निन्दितत्वादन्यत्र प्रवेशमलभमानाः स्मरणशेषा भवन्तीत्याह। एतावान्पुरुषार्थ इत्यर्थः। बुद्धिस्थमेत-च्छब्दार्थं विवृणोति—**अन्ते नारायणस्मृतिरिति**। अयमेव परो जन्मलाभः। स्वधर्मस्य पञ्चाग्निविद्याप्रकारेणोत्तमदेहजननं फलम्। तथा योगस्याऽपि। **"शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायत"** इत्यारभ्य **"अनेकजन्मसंसिद्धस्ततो याति परां गतिमि"** त्युपसंहाराद्योगेनाऽप्यन्तिमो देहः साध्यते। साङ्ख्येऽपि—**"बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यत"** इति वाक्याद् **"ज्ञानिभ्योऽप्यधिको मत"** इति योगप्रशंसावाक्याच्चाऽन्तिमजन्मसाधकत्वमेव। भगवद्धर्माणामपि व्रतोपवासादीनां भगवदीय-देहसाधकत्वम्। अतोऽन्तिमदेहे सर्वे उपक्षीणाः। न च सोऽपि देहः स्वरूपभूतः सन्फलसाधकः। किन्तु **"अन्ते या मतिः सा गतिरि"**ति न्यायात् **"यं यं वाऽपि स्मरन्भावमि"**ति भगवद्वाक्याच्चाऽन्ते भगवत्स्मरणहेतुत्वेन तदुपयोगः। स चेदसदुक्तप्रकारेण यस्मिन्कस्मिंश्चिदपि देहे अन्ते भगवत्स्मरणं भवेत् तदा **"पूर्वात्परबलीयस्त्वमि"**ति न्यायेन स एव देहोऽनन्तिमोऽप्यन्तिमत्वमा-पद्यमानो लाभत्वेन सम्पद्यते। योगादयश्च स्वस्वमार्गेण दूरफलाः सन्तोऽत्रैव प्रविशन्ति। अतो देहसाधकानां योगादीनां देहस्य चाऽयमेव लाभो यदन्ते नारायणस्मृतिरिति। अतोऽस्य साक्षाद्भगवत्प्रवेशहेतुत्वान्नाऽत्र विधिशेषतया श्रुतिसंवादोऽपेक्षितः। यद्यपि भगवदीयत्वमपि जन्मलाभस्तथापि ततोऽप्ययं परः। ननु **"अपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाऽऽद्रियन्ते भगवदीयत्वेनैव परिसमाप्तसर्वार्था"** इति वाक्यविरोध इति चेत्? तत्राऽऽह—**पुंसामिति**। भगवदीयत्वं हि साक्षा-द्भगवदनुगृहीतानां पुष्टि[1]मार्गीयाणां जन्मलाभरूपमित्युच्यते। इदं तूक्तसाङ्ख्यादिमार्गाणां प्रवाहिकमर्यादामार्गरूपत्वात्तन्निष्ठानामपि तथात्वादन्ते या मतिरिति न्यायेनाऽन्ते भगवत्स्मृतौ तत्प्राप्तिर्भवतीति तस्या[2]स्तथात्वमुच्यत इति नोक्तविरोधः। **पुंसामिति**। साधारणानामपीत्यर्थः[3]। अतो महाफलत्वात्स्मरणस्य सर्वदा भगवान्स्मर्त्तव्य इति सिद्धम्॥ ६॥ ❀ ❀ इदानीं कीर्त्तनस्य तथात्वं साधयति—**प्रायेणेति**। कीर्त्तनं तु ततोऽप्यधिकम्। येषामन्तिमं जन्म जातं ये च जीवन्मुक्ताः केवलं गुणातीत एव व्यव-सिताः पुनरावृत्तिसम्भावनारहितास्तेऽपि हरेर्गुणानुकथने श्रवणानन्तरभाविनि कीर्त्तने परमानन्दरसमुपलभमानाः साधनदशायामे-वैवं सुखमेतत्साध्यफलदशायां कीदृशं सुखं भविष्यतीति मन्यमाना रमन्ते। स्मेति प्रसिद्धेः। केचन पुनर्मनन एव पर्यवसितमतयः असम्प्रज्ञातसमाधयो वा तस्मिन्नेव सुखे स्थिताः। तेऽपि उत्थानाभावान्न रमन्ते। तद्व्यावृत्त्यर्थं प्रायोग्रहणम्। राजन्निति सम्बोधनं तथाभूतशमीकस्मरणाय। अत्र विषयरसादेव तथा रमणम्। न तु कृतेर्धर्महेतुत्वेन। ते हि कृतिगुणदोषसम्बन्धरहिताः। तदाह—**निवृत्ता विधिषेधत इति**। विधिसहितान्निषेधान्निवृत्ताः। **"द्वयं तथा ब्रह्मणि कर्म नर्च्छती"**ति न्यायेन ब्रह्मभूता अपि। **"दोष-बुद्ध्योभयातीत"** इति वाक्यात्। विधिसहितनिषेधकथनेन चैतज्ज्ञापयति **"बुधो बालकवत्क्रीडेदि"**त्यादिवाक्यानि यद्यपि विधि-रूपाणि तथाप्यस्याऽग्रे निषेधाभावान्नैतेषां ग्रहणमिति। नैर्गुण्ये गुणत्रयातीते स्वस्मिन्नैव स्थिताः। विरोधाभासबोधनार्थं गुणग्रहणम्। तस्मात्स्वतन्त्रपुरुषार्थत्वात्कीर्त्तने शङ्काऽपि न कर्त्तव्या॥ ७॥ ❀ ❀ एवं युक्त्या द्वयं समर्थयित्वा त्रयस्याऽपि पुरुषार्थ-साधकत्वे साधिते युक्तिमूलकमिदमप्रामाणिकमिति शङ्का स्यात्। तन्निवृत्त्यर्थमाह—**इदमिति**। **पुराणमिति** प्रमाणम्। **भागवतं नामेति** तदवान्तरभेदः। यौगिकश्चाऽयम्। तेन भगवता प्रोक्तं भगवत्प्रतिपादकं भगवत्फलकं चेति। अस्य दुर्बलत्वं वारयति। ब्रह्मणा वेदेन सम्मितम्। परब्रह्म वा सम्यङ्मितं ज्ञातं यत्र। गुरुपरम्परामाह—**पितुर्द्वैपायनादिति**। तदानीन्तनकालस्य प्राणिबुद्धि-नाशकत्वायाऽऽह—**द्वापरादाविति**। द्वापरस्याऽऽदौ। तदानीमपि द्विपराबुद्धिर्न जाता। **अधीतवानिति** वेदवन्नियमेनाऽर्थावबोध-पूर्वकमध्ययनमुक्तम्। **पितुरिति**। **"पितैवोपनयेत्पुत्रमि"**ति न्यायेन उपनयनाध्याप[4]नयोरेककर्तृकत्वादध्ययनप्रकारः सर्वोऽपि सुसम्पन्न इति सूचितम्॥ ८॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः

**तस्मादित्यत्र**। **अत्रेति**। सर्वभयनिवृत्यर्थं भगवान् श्रोतव्य इत्यस्मिन्नर्थे। **बहिर्मुखस्येति**। भगवति विश्वासरहितस्य **स्वभावतोधिकारीति**। औत्पत्तिकविश्वासवान्। **तदाहेति** तस्मादाहेत्यर्थः। विशिष्टाधिकारं स्फुटीकुर्वन्ति दौष्यन्तिरित्यादि। **तद्धर्मपुरःसरमित्यनेन** दुर्योधनादयो व्यावर्तिताः। एवं राज्ञो दृढीकरणेन युक्तेर्वक्तव्यत्वमुपपाद्य वक्ष्यमाणां तां दृढीकर्तुमाशङ्कन्ते **नन्वित्यादि**। **कथमिति**। केन प्रकारेण। आत्मत्वेन चेत्, वैदिकपरित्यागायोगः, प्रकारान्तरेण चेत्, तत्र विश्वासाभाव इति।

---

१ पुष्टिजन्मलाभरूपमिति ख. २ तस्मादिति ख. ३ इत्यर्थ इति नास्ति ख. ४ उपनयनाध्ययनयोरिति ख.

तत्राहेति । तादृश्यामाशङ्कायामुभयदोषनिवारकं प्रकारमाहेत्यर्थः । ननु जाता प्रमाणाकाङ्क्षा तत्पूर्त्यर्थं प्रमाणे वक्तव्ये प्रमेयविशेषणं किमित्युच्यते, तत्राहुः प्रमाणेत्यादि । वक्ष्यत इति बलिष्ठेति । पूर्वतन्त्रे तथैव निर्णीयमानत्वाद्बलिष्ठा लोकेऽपि प्रमाणमेकदेशं प्रमापयति, प्रमेयं तु ततोऽप्यधिकमिति दृश्यते, अतः प्रमाणकाङ्क्षापूर्त्यर्थं तादृशतत्कथनं युक्तमित्यर्थः । सा केत्याकाङ्क्षायां तामाहुः तत्रेत्यादि वक्तव्य इत्यन्तरम् । तत्रेति । भगवच्छ्रवणे । नास्ति नियम इति । नारदपूर्वजन्मनि दासीपुत्रेऽपि तदुक्त्या नियमभङ्गदर्शनादिदानीन्तनानामपि तथा दर्शनाच्च नास्तीत्यर्थः । अत इति । तादृशामुद्धार्यत्वात् तेषामर्थे उपाय उद्धारोपायः वेदे त्रैवर्णिकमात्रोपकारके नोक्तः उक्तो नास्तीति हेतोस्तदृथ वक्तव्ये साधने आवश्यकत्वात्तेनैवेत्यादिनोक्तरीत्या लाघवादित्यन्वयः । तथा चैताभ्यां युक्तिभ्यां सर्वात्मत्वेन रूपेण भगवच्छ्रवणं विधीयत इत्यर्थः । ननु कथमेतेन प्रमाणाकाङ्क्षापूर्तिरित्यत आहुः नहीत्यादि । तथा च श्रुतिसामानाधिकरण्यात् प्रमाणकाङ्क्षापूर्तिरित्यर्थः । कथं युक्तेर्बलिष्ठत्वमित्यत आहुः तत्रेत्यादि । तत्र श्रौते श्रवणविधौ 'आत्मनः कामाय पतिः प्रियो भवती' त्याद्युपक्रममापाततोनुरुध्याभ्यर्हितत्वात् स्वस्वात्मश्रवणे स्वपदेन देहो वाच्यः, तथा च तत्तदवच्छिन्नस्य तत्तदभिमन्तुर्वा श्रवणे बोध्यमाने बोधकस्य वाक्यापर्यवसानमेव स्यात्, देहानन्त्येनात्मीयत्वानन्त्यात्तथा स्यात्, तथा चाशक्योपदेशत्वेनाननुष्ठापकत्वात् प्रामाण्यमेव तस्य भज्येतेत्यर्थः । अथात्मीयापेक्षया देहात्मन्यभ्यर्हितस्वत्वस्याधिक्यात्स्वत्वमात्मत्वमेवेति चेत्, तत्राहुः आत्मस्वित्यादि तथा च तद्वैशिष्ट्यस्य सर्वेषु तुल्यत्वाद् आत्मसु तद्व्यवच्छेदकस्य प्रकृतिविकृतिभावस्याभावात्सर्वात्मश्रवणप्राप्तौ तदानन्त्यादपि स एव दोष इत्यर्थः । अथ स्वत्वमभिन्नत्वमेवेतिचेत्, किमिदमभिन्नत्वम्, नानात्वराहित्यं वान्योन्याभावराहित्यं वा, नोभौ, अनेकात्मवादाभ्युपगमे नानात्वभेदयोस्तत्रोपगतत्वेन तदभाववत्त्वस्य तत्राशक्यवचनत्वात् । भिन्नत्ववदभिन्नत्वमपि प्रतियोगिसापेक्षत्वेन [illegible] इति ज्ञेयतयात्माश्रयान्योन्याश्रयापातेन ज्ञानदौर्घट्याच्च । इदं चकारेण सङ्गृहीतम् । सिद्धमाहुः तस्मादित्यादि । उपक्रमस्यानुरोध्यत्वाद्दोषस्य च परिहार्यत्वात् सर्वेषामेको य आत्मा भवति, स स्वात्मापि भवत्येवेति स एव श्रोतव्य इत्यर्थः । युक्तेर्बलिष्ठत्वायाहुः अत इत्यादि । अत इति । उक्तहेतोः । तथा चैवं श्रुत्यर्थनिश्चायकतया बलिष्ठत्वेन, अतः प्रमाणकाङ्क्षाया अपि पूर्तिरित्यर्थः । नन्वात्मनां नित्यत्वेन प्रवाहशक्तिपक्षस्यात्रासंभवादात्मशब्दस्य व्यक्तौ जातिविशिष्टव्यक्तौ वा शक्त्यङ्गीकारे पूर्वोक्तदोषसंभवाच्च तान् पक्षान् परित्यज्य सर्वात्मत्वस्योपाधित्वेन गुरुत्वात् तत्परत्वमपि त्यक्त्वा जातिवाचकत्वमादरणीयम्, ततश्च जात्या व्यक्त्याक्षेपदशायामहंवित्तिवेद्यैवाक्षेप्या, न त्वन्या, उपक्रमानुरोधात्, अतो न श्रुतावात्मपदस्य सर्वात्मपरत्वमित्यत आहुः नचेत्यादि । तत्र हेतुः तथा सतीत्यादि । उक्तदोषपरिहारायात्मपदस्य जातिवाचकत्वेऽङ्गीकृते सति व्यक्तिरूपस्य स्वस्यात्मनो गौणत्वेनावाच्यत्वेनाश्रौतत्वात् क्रियावद्व्रीहिभिर्जुहोतीत्यादिक्रियायां यथा व्रीहित्वादेर्होमादिसाधकत्वानुपपत्त्या व्रीह्यादिव्यक्तिराक्षिप्यते, तस्याश्चानन्यलभ्यत्वाच्छब्दार्थत्वं चाङ्गीक्रियते, तथा ज्ञानेऽनुपपत्त्यभावाच्छब्दश्रवणमात्रेण जातिज्ञाने जायमाने व्यक्त्याक्षेपकानुपपत्त्यभावाच्चाक्षेप्यत्वाभावेनाप्यश्रौतत्वाच्चात्मनः कार्यं सिध्येदात्मवेदनस्याभावेन शोकतरणरूपमात्मलाभरूपं च कार्यं न सिध्येदित्यर्थः । नन्वात्मत्वजातिशब्दादेवात्मकार्यसिद्धिरस्तु, को दोष इति चेत्, न तस्या जातिवाचकपदश्रवणमात्रेणापि भवनात् प्रियत्वलिङ्गश्रावणाविरोधापत्तेः । ननु तर्हि यथाकथञ्चिदात्मश्रवणे विधिरङ्गीकार्य इति चेत्, तत्राहुः सञ्जातेऽपीत्यादि । श्रवणविधिमन्तरेणापि सञ्जातेऽहंवित्तिरूपस्यात्मज्ञानस्य प्रमाणवस्तुभ्यां जायमानस्य विद्यमानत्वाद् 'न वा अरे' इत्यादिश्रुतौ पत्यादिष्विव शरीर औपाधिकप्रीत्यश्रावणेन प्रकारविशेषस्यानुक्तत्वात्तज्ज्ञानार्थं श्रवणादिरूपप्रयासो व्यर्थः स्यात्, तथा च श्रवणविधिवैयर्थ्यापातान्न तथाङ्गीकर्तुं शक्यमित्यर्थः । ननु मणिपरीक्षायामिवात्मपरीक्षायामपि वाक्यसहकृतस्य प्रत्यक्षस्यैव हेतुत्वान्न श्रवणविधिवैयर्थ्यमितिचेत्, तत्राहुः श्रुतिश्चेत्यादि । तथा सति वाक्यस्य चक्षुःसहकारित्वं मनःसहकारित्वं वा वाच्यम्, तत्राद्ये देहात्मभावदृढीकरणेनोपचारिता, द्वितीयेऽपि प्राणान्मनसश्चात्मविवेकस्याजातत्वाच्छ्रुत्यन्तर 'आत्मानं चेद्विजानीयादयमस्मीति पुरुषः । किमिच्छन् कस्य वा हेतोः शरीरमनुसञ्ज्वरे' दित्यात्मज्ञाने शारीरतापजतापनिवृत्त्यादेरेवोक्तत्वात्तस्याश्च योगेन समाधिदशायां प्राणे सप्राणे स मनसि वा जायमानतया तद्विशिष्टात्मभावदृढीकरणेनोपचरिता भवेत्, तथा च लक्षणादोषापातात्तथा नोपगन्तुं शक्यमित्यर्थः । सिद्धमाहु अत इति । असन्दिग्धत्वेन प्रतिपत्तिलाघवात्तत्प्रकरणगतवाक्यान्तरान्वयस्वारस्याच्च सर्वात्मैव श्रोतव्यत्वेन श्रुत्या विधियत इत्यर्थः । नन्वस्त्वेवं श्रोतव्यविधिनिर्वाहः, तथाप्यात्मलाभश्रुतौ शोकतरणश्रुतौ च जीवात्मैवात्मपदेन ग्राह्यः, लाभपदस्य सिद्धासिद्धान्यतरवस्तुस्वाधीनतायामेव प्रयोगाद्, ईश्वरस्य स्वतन्त्रत्वेन जीवाधीनताया अशक्यवचनत्वाद्, जीवे तु विस्मृतकण्ठमणिलाभन्यायेन ज्ञानमात्रेणापि लाभस्य शक्यवचनत्वात्तेन च शारीरादिज्वराभावे शोकस्यापि निवृत्तेस्तस्यैव लाभस्य परत्वेन सिद्धेश्च, सर्वात्मश्रवणविधानाङ्गीकारे तु स्वस्याश्रुतत्वेनाज्ञाततयाऽलब्धत्वात्स्वस्य पराधीनत्वरूपया गौणतया शोकस्याप्यनिवृत्तेः, अत एतत्सामञ्जस्याय तत्रापि शारीर एव आत्मा श्रोतव्यत्वेन स्वीकार्य इत्याकाङ्क्षायामाहुः तस्येत्यादि । भेदाभावादिति । सुवर्णतत्खण्डयोरिवांशांशभावेन तादात्म्यात् । तथा च तज्ज्ञानेऽप्यात्मज्ञानसिद्ध्यात्मलाभशो-

---

१. बोधकवाक्यापर्यवसान दोषः ।

कतरणयोः सिद्धेः श्रुतिसामञ्जस्यात् तत्राप्यात्मपदेन सर्वात्मैव ग्राह्य इत्यर्थः । **एतेन जीवब्रह्मभेदवादो निराकृतः । विशिष्टाद्वैतवादश्च**, तत्रापि विशेषणत्वेन गौणत्वानपायात् । नन्वेवं सति तादात्म्येऽपि किञ्चिद्गौणतासत्त्वात्तमपि वादं विहाय शुद्धाभेदवाद एव स्वीकार्यः, तथा सति घट्टकुट्यां प्रभातमिति शङ्कायां युक्त्यन्तरमाहुः **किञ्चेत्यादि** । **फलमिति** । शोकतरणादिरूपम् **अत इति** । दानस्य दातृसामर्थ्यसापेक्षत्वात् । **षड्गुणेत्यादि** । तथा च शुद्धाभेदवादोपि दुष्ट इति न्यायसामञ्जस्यार्थं तादात्म्यमेवाङ्गीकृत्य श्रुत्यर्थो निर्णेय इत्यर्थः । ननु तथापि यौक्तिक एवायमर्थः, न तु श्रौत इत्याकाङ्क्षायामाहुः **वेदेत्यादि** । भगवानेव वेदार्थ इति तस्यैव श्रवणादिकं विधेयमिति वेदार्थ इति सर्वनिर्णये प्रथमस्कन्धे वाक्यान्वयाधिकरणे च 'सर्वे वेदा यत्पदमामनन्ति वेदैश्च सर्वैरहमेव वेद्य' इत्यादिश्रुत्युपन्यासपूर्वकं 'सर्वत्र प्रसिद्धोपदेशा' दित्यादिन्यायोपन्यासपूर्वकं चोक्तमित्यर्थः । नन्वेवं सति श्रुत्यर्थनिश्चायनाय सर्वात्मा भगवान् श्रोतव्य इत्येव वक्तव्यम्, कृतमन्याभ्यामित्याकाङ्क्षायां तत्प्रयोजनमाहुः **किञ्च फलमित्यादि** । **दुःखाभाव इत्यादि** । अवान्तरभेदबाहुल्येप्येतद्द्वये एव पर्यवसन्नत्वादित्यर्थः । **तत्रेत्यादि** । तत्र तत्साधनविचारे क्रियमाणे मैत्रेयीब्राह्मणे दर्शनसाधनत्वेनोपस्थितस्य श्रवणस्यैकफलत्वे, 'द्रष्टव्य' इत्यनेनोपस्थितस्य तत्साध्यज्ञानस्य वैकफलत्वेऽमृतपदोक्तदुःखाभावफलत्वे, **सर्वफलत्वे वा** 'ब्रह्मविदाप्नोति परं' 'न पश्यो मृत्युं पश्यति' ब्रह्मविदमुपक्रम्य 'सर्वेषु लोकेषु कामचारो भवती' त्यादिश्रुत्यन्तरोक्तसर्वफलत्वे वा आहारपृथक्त्वेन सर्वफलत्वनिर्धारात् । ( 'मैत्रावरुणीं द्विरूपामालभेतान्नकामः', एवंवृष्टिकामः प्रजाकाम' इति नानाफलार्थं विहितानां यागानां ) 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः स्पर्धमानः सङ्ग्राममुपप्रयास्यन्, सङ्ग्रामं जित्वे'ति नानावाक्यविहिते यागे, किं सकृत्करणेन सर्वफलसिद्धिः, उत तत्तदर्थमावृत्तिः कर्तव्येति सन्देहे, कालभेदादिना आहारस्याहरणस्य यत्पृथक्त्वमावृत्तिस्तेन सर्वफलत्वम्, न तु सकृत्करणेनेति निर्धारात् । प्रथमं जाते साक्षात्कारे तेन विहितज्ञानेन तथा स्यात् ।

नन्वेकसाधनकत्वेन निर्दिष्टानां सन्नियोगशिष्टत्वात् सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिरिति न्यायेन सहभवनस्य शक्यवचनत्वात्कुतो न फलद्वयमिति चेत्, तत्राहुः **सन्नियोगेत्यादि** । तत्र हेतुः **अन्यथेत्यादि** । तथा च सन्नियोगशिष्टन्यायस्य व्याकरणसिद्धत्वेन शब्दविषयत्वादुक्तन्यायस्य च क्रियानिर्णायकत्वेन तद्विषयत्वात् श्रवणस्थले तद्भङ्गे क्रियामर्यादैव भज्येत । न च भगवतोऽनियम्यत्वात्को दोष इति शङ्क्यम् । 'स्वकृतसेतुपरीप्सये' त्यादिवाक्यैस्तदभञ्जकत्वनिश्चयात्, अतस्तदभङ्गार्थत्वाच्छ्रवण एव तथेत्यर्थः । **हरित्वेनेत्यादि** । तथा च तथा जातेष्ट्यधिकरणे 'यदष्टाकपालो भवति गायित्रियैवैनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालस्त्रिवृतैवास्मिन् तेजो दधाति, यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति, यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति यद्द्वादशकपालो जगत्यैवास्मिन् पशून्दधाति, यस्मिञ्जाते एतामिष्टिं निर्वपन्ति पूतस्तेजस्व्यन्नाद इन्द्रियावी पशुमान्' भवतीति श्रुत्या द्वादशकपालपुरोडाशस्य सकृत्करणेऽपि तद्गताष्टाकपालत्वादिधर्मेण नानाफलसिद्धिः, तथात्र श्रोतव्यगतधर्मेणेति न न्यायविरोध इत्यर्थः । ननु श्रवणस्य क्रियाकल्पत्वेन तस्यानेकफलत्वे तथानिर्णयोऽस्तु, प्रकृते तु तत्साध्यज्ञानस्य तथात्वं विवक्ष्यत इति तस्य कथं पूर्वतन्त्रेण निर्णय इत्याकाङ्क्षायामाहुः **तमित्यादि** । 'तं यथायथोपासते तदेव भवति तद्धैतान् भूत्वावतीति तस्मादेनमेवंवित् सर्वैरेतैरुपासीत सर्वं हि तद्भवति सर्वं हैनं तद्भूत्वावती'ति श्रुतेः । **उपासनं** चिन्तनम् । तथा चोत्तरकाण्डेऽपि ज्ञेयधर्मभेदेन ज्ञानफलभेदस्योक्तत्वादत्रापि तथैव निर्णय इत्यर्थः । सिद्धं वदन्तस्तस्य न्यायसिद्धतां बोधयन्ति **अत इत्यादि** । एवं श्रुतिसामानाधिकरण्यव्युत्पादनेनास्य प्रकारस्य बलिष्ठत्वं दृढीतम् । अतः परं सर्वोपयोगित्वं दृढीकर्तुमाहुः **नन्वित्यादि** । **उत्तमवक्तृकथना**दिति । परमविरक्तज्ञानिभक्तेन वक्त्रा कथनात् । **अत इति** । भक्तित्वात् । तथा च सङ्ख्याभेदेन भक्तित्वसंशये सर्वोपयोगित्वस्यापि संशय इत्यर्थः । अत्र तदुक्तमुपगम्य सङ्ख्योक्तिसमर्थनेन समादधते **सत्यमित्यादि** । एवं सङ्ख्याविचारेण भगवच्छ्रवणविधेः सार्थक्यमुपपाद्य विधेयश्रवणविषयविचारेणोपपादयन्ति **ननु भगवानित्यादि** । **इति कोऽर्थ इति** । अस्मिन् वाक्ये किमभिधेयम् । अत्र षड् विकल्पाः । तेष्वाद्यं दूषयन्ति **आद्य इत्यादि** । द्वितीयं विकल्प्य दूषयन्ति **गृहीतेत्यादि** । द्वितीयं दूषयन्ति **किञ्चेत्यादि** । तृतीयं दूषयन्ति **अथेत्यादि** । **पदवाक्ययोरिति** । श्रोत्रेन्द्रियगृहीतयोः पदवाक्ययोः । **तथैवेति** । तन्निर्धारपूर्वकं शब्दोच्चारणम्, तन्निर्धारजन्यसंस्कारजनितज्ञानमित्यर्थः । तत्र सङ्ख्यां नियमयन्तः समादधते **मैवमित्यादि** । **पुनरिति** । विधानानन्तरम् । **उक्तदूषणमिति** । उपदेशायोगरूपम् । कारिकां व्याकुर्वन्ति **भगवानित्यादि** । अत्र भगवच्छ्रवणं विधायाग्रे दशविधलीलानां कथनान्नायं वाक्यार्थ इत्यर्थः । अत्र भगवच्छब्दो योगरूढः । **श्रोतव्य इति** शब्दविषयः कर्तव्यः । श्रवण—पदस्य श्रोत्रेन्द्रियजन्यज्ञान इव शाब्देपि रूढत्वात् । 'गजराजः श्रुतः' 'बृंहितं श्रुत' मित्यादिप्रयोगतौल्यदर्शनादीदृशस्य श्रोतव्यत्वेऽर्थापत्तिं प्रमाणयन्ति **अन्यथेत्यादि** । नन्वेवमपि द्वितीयस्कन्धवैयर्थ्यं तु तदवस्थमित्यत आहुः **तावतामित्यादि** । दशविधलीलावाचकानां तद्युक्तवाचकानां तत्तात्पर्यकारणानां च पदवाक्यानां शक्तितात्पर्यनिर्धारः असङ्कोचसंकोचभेदेन द्विविधायाः शक्तेस्तादृशप्रत्यायने वक्तुरिच्छायाश्च निर्णयः सामान्यन्यायेन व्याकरणवन्मीमांसावच्चात्रैव क्रियते । यथा व्याकरणे संबन्धिभेदात् सत्तैव भिद्यमाना गवादिषु जातिरित्युच्यते, तस्यां सर्वे शब्दा व्यवस्थिता इत्यादौ सर्वशब्दानामेकस्यां सत्तायां तदस्यास्त्यस्मिन्निति मतुप्, तदस्य सञ्जातं तारकादिभ्य इतजित्यादौ चैकस्य मतुपस्तारकितशब्दस्य चार्थे बोधिते तदन्तानां तदादीनां च तत्र सत्तार्थे शक्तिनिर्धारः क्रियते, यथा च मीमांसायां 'आकाशस्तल्लिङ्गात्' 'वाक्यान्वया' दित्यादौ तात्पर्यबोधनप्रकार उक्ते तल्लिङ्गादिभिर्हेतुभिरन्येषा-

मपि पदानां वाक्यानां च शक्तितात्पर्यनिर्धारः क्रियते, तद्वदत्रैव 'द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्त्वतः' २।५।१४ इत्यादिषु 'शाब्दस्य हि ब्रह्मण एष पन्थाः' २।२।२ इत्यादिषु सर्वशब्दानां भगवति 'पातालमेतस्य हि पादमूल' २।१।२६ मित्यादिषु भगवदवयवविशेषरूपेऽर्थे शक्तितात्पर्यनिर्धारः, 'नारायणपरा वेदाः' २।५।१५ 'भगवान् ब्रह्म कार्त्स्न्येन' २।२।३४ इत्यादौ वाक्यानां तात्पर्यनिर्धारश्च क्रियते, तस्माच्छाब्दप्रमितिं प्रति शक्तितात्पर्यग्रहणयोः कारणत्वात्तद्ग्रहस्य च व्याकरणाद्यन्यतमाधीनत्वादस्मिन् स्कन्धे तद्ग्राहकयोर्विवृत्त्याप्तवाक्ययोर्निरूपणान्न कोऽपि दोषः । न पुनरुक्तिर्वैयर्थ्यं वेत्यर्थः । एतेन यथा गायकगीयमानालापगततननादिशब्दश्रवणमहिम्नार्थज्ञानविधुराणामपि श्रोतॄणां चित्तद्रुतिर्जायते, तथा भगवद्वाचकशब्दश्रवणमहिम्नाऽभयसिद्धिरपि भविष्यतीत्यपि चोद्यं निरस्तम् । ननु शक्यादिनिर्धारस्य सम्पूर्णस्कन्धसापेक्षत्वे विषयस्य च स्कन्धान्तरेषु निरूपणे भगवान् श्रोतव्य इत्येव वक्तव्यम्, तावतैव विधानसिद्धेः, सर्वात्महरीश्वरपदानां शेषाणां किं प्रयोजनमत आहुः एते हीत्यादि । अवच्छेदकत्वेनेति । तदितरस्य विवक्षितफलनिरूपकताव्यावर्तकत्वेन । तथा च श्रुतिसामानाधिकरण्याय सर्वात्मपदम्, निर्धर्मकस्यैकजीववाद्यभिमतशारीरस्य च व्यावृत्त्यर्थं भगवत्पदम्, तस्य केवलयौगिकत्वगौणत्वयोर्वारणाय हरिपदम्, भगश्चासौ वांश्च भगवानिति योगस्याथर्वशिरसि शिवे दर्शितत्वात्, 'भगवानिन्द्रः प्रतिघातमचीकरत् दृढं प्रलब्धो भगवानपां पति' रित्यादौ गौण्या प्रयोगस्यान्यत्रापि दर्शनात् । 'उत्पत्तिं च निवृत्तिं च भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवा'निति व्युत्पत्तेरन्यत्रापि दर्शनात्तन्निर्धारणायेश्वरपदमित्येवमितरव्यावर्तनेन भगवत एवाधिकारिणः फलम्, तेनरस्मादिति बोधनायोक्ता इत्यर्थः । ननु गुणानामनन्तत्वेऽपि किमिति दशानामेव श्रोतव्यविषयनियमनमित्याकांक्षायामाहुः गुणानामित्यादि । नन्वेवं सति 'विष्णोर्नुकं वीर्याणि प्रवोचम्' 'गायन् गुणान् दशशतानन आदिदेवः शेषोधुनापि समवस्यति नास्य पार'मित्यादि-श्रुतिस्मृतिविरोध इत्यत आहुः अनुप्रवेशेऽपीत्यादि । एवं विधेयश्रवणादिपदार्थं विधिवाक्यार्थं च निर्णीय विधेयगतसङ्ख्याया विवक्षितत्वात्तं विचारयन्ति अथेत्यादि । अत्रायमर्थः । अभयार्थमत्र त्रयाणां विधानम्, तत्र विधेयानां श्रवणादीनामभयं प्रति तृणारणिमणिन्यायेन यदि कारणत्वम्, तदा सङ्ख्याविरोधोऽष्टदोषदुष्टो विकल्पश्च, यदि दण्डचक्रादिन्यायेन कारणता स्यात्, तदा समुच्चयेऽधिकारिविशेषस्य फलाभावप्रसङ्गः स्यात्, यदि व्यवस्थितविकल्पः 'उदिते जुहोत्यनुदिते जुहोती'तिवत्, तदा तु श्रवणस्याधिकारिविशेषेऽनावश्यकतायां कीर्तनाद्यधिकारिणा तदकरणे तयोरप्यनिर्वाहः, अत आवश्यकत्वाच्छ्रवणमेव विधातव्यम्, कीर्तनस्मरणे त्वर्थबलादेवायास्यतः, न हि कीर्तनाभावे श्रवणं संभवति, न वाऽस्मरन् कीर्तयतीति, अतः श्रुत्यर्थनिर्णयाय श्रवणमात्रं विधातव्यम्, न तु त्रयमिति, अत्र समादधते अत्रेत्यादि । अर्थात् प्राप्तिं निराचक्षते न चेत्यादि । तत्र हेतुः अध्यापनस्येत्यादि । अयमर्थः । श्रुतौ 'स्वाध्यायोऽध्येतव्य' इति विधिना प्राप्तेऽध्ययने कस्मादध्येय इत्यध्ययनहेत्वाकांक्षायां 'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीते'ति श्रुत्यन्तरगतनिव्विहितात्मनेपदेनाचार्यत्वकामिनो नियोज्यत्वावगमात्ततोऽध्ययनमायाति । आचार्यश्च 'उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते' इति स्मृत्युक्तलक्षणकः । आचार्यत्वकामना च प्रतिष्ठार्थं वा वृत्त्यर्थं वा पुत्रस्नेहादिना वा । अतो विधिविचारे सांसारिककर्तव्यत्वेऽर्थात्प्राप्तिविचारे वृत्तित्वेन वृत्तिः स्नेहस्याप्युपलक्षिका, अतस्तैराचार्यत्वकामनाहेतुभिः प्रतिष्ठावृत्तिस्नेहैरध्यापनस्य प्राप्तत्वादध्ययनस्यापि सांसारिककर्तव्यत्वात्तद्विधिवदेकविधानेनान्यप्राप्तिः, सात्र न, कीर्तने मुक्तकर्तृकर्तव्यताया विवक्षितत्वेन सांसारिककर्तव्यत्वाभावात् । किं तावतेत्यत आहुः श्रवणेनेत्यादि । तथा चान्यत्र कीर्तनस्य श्रवणविध्याक्षेपलभ्यत्वेऽप्यत्र विवक्षितकीर्तनस्य न तेन लाभ इत्यर्थः । नच शुकादीनां विहिताकारित्वे 'दोषबुद्ध्योभयातीत' इत्यादिवाक्यविरोध इति शङ्क्यम् । 'निवृत्ता विधिषेधत' इत्यत्र तत्परिहारस्य वक्ष्यमाणत्वात् । एवं कीर्तनविधिः समर्थितः । श्रवणविधिं समर्थयन्ति तर्हीत्यादि । तर्हि कीर्तनस्याक्षेपलभ्यत्वाभावे । अर्थादेव भविष्यतीति । भगवान् कीर्तितव्यो नाम कीर्तनगोचरीकर्तव्यः । कीर्तनं नाम ताल्वोष्ठपुटादिव्यापारेण शब्दाभिव्यञ्जनम्, तदभिव्यञ्जितः शब्दो वा । धातोः फलव्यापारयो रूढत्वात् । तयोर्मध्येऽत्र तादृशशब्द एवात्र ग्राह्यः । भगवतो व्यापाराविषयत्वेन शब्दविषयत्वात् । तत्र तादृशं शब्दोच्चारणं च श्रोतारं विनाऽसंभवाच्छ्रवणमाक्षेप्स्यतीति तथेत्यर्थः । तत्परिहरन्ति नेत्यादि । तथा च श्रवणस्यार्थात्प्राप्तावविहितत्वे ततः फलाभावे प्रसक्ते परीक्षिति कीर्तनस्याभावात्तस्याभयं न स्यात्, तथा सत्युपदेशवैयर्थ्यमित्यर्थः । तत्सार्थक्यार्थं ततोऽपि फलाङ्गीकारे दूषणान्तरमाहुः । अभये इत्यादि । अर्थात्प्राप्ते विहिते च फलतारतम्यस्य गुरुशिष्यादौ दृष्टत्वादत्रापि तथा वक्तव्यम्, तत्त्वभये वैलक्षण्याभावाद्वक्तुमशक्यम्, तथा चोपदेशसार्थक्यार्थं श्रवणोपदेशोऽप्यावश्यक इत्यर्थः । एवं श्रवणस्यावश्यकत्वे तेन सिद्धमाहुः तस्मादित्यादि । तस्मात् कृतार्थीकृतस्य कीर्तनस्य विधिं विनानुपपन्नत्वात् । अतः श्रवणस्य च कीर्तनं विनानुपपन्नत्वात् । अतिनिरपेक्षाणामिति । 'प्रियावतारे नः सतीति तत्र वाक्यात् । अत्र तु 'महापौरुषिको भवा'निति वाक्याद्याज्ञवल्क्यापेक्षयाप्यतिनिरपेक्षाणाम् । तथा च श्रौतश्रवणविधौ कीर्तनाक्षेपसंभवेऽप्यत्र तदसंभवादुत्तमवक्तृप्रवृत्तिसिद्ध्यर्थं कीर्तनविधानमावश्यकमित्यर्थः । हेत्वन्तरमप्याहुः तदैव श्रवणसिद्धेरिति । वक्तुरपेक्षादोषे श्रोत्रानुसंहिते गुरुभक्तिन्यूनतायां 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन' इति श्रुतेस्तादृशस्यार्थप्रकाशाभावान्न वाक्यतात्पर्यनिर्धारः । अतिनिरपेक्षवक्तृके तु गुरुभक्तिप्रकर्षसंभवात् तन्निर्धारः संभवत्यतो तद्विधानमावश्यकमित्यर्थः । नन्वेवं

सति श्रवणस्याभयसाधनकत्वं युज्यते, कीर्तनस्य तु श्रवणं जनयित्वोपक्षयादभयरूपफलसंबन्धो धनं न सङ्गच्छत इत्यत आहुः फलं तु प्रत्येकमेवेति। प्रतिव्यक्तिभिन्नमेव। तथा च कीर्तनस्य स्वव्यधिकरणश्रवणजनकत्वेऽपि स्वसमानाधिकरणाभयजनकत्वमक्षतमतो नासङ्गतमित्यर्थः। नन्वेवं प्रतिव्यक्ति फलभेदे तद्वैलक्षण्यमपि संभवत्येवेति श्रवणविधिमन्तरेणापि तल्लाभाच्छ्रवणविधिवैयर्थ्यं दुर्वारमित्यत आहुः अभयं त्वित्यादि। तदैवेति प्रवेशेनाभेदे। तथा च न वैलक्षण्यसंभावनावसर इत्यर्थः। अत्र 'तदा तर्हीति शब्दाः सप्तम्यन्ततच्छब्दस्यार्थे रूढा ज्ञातव्याः। एवं श्रवणकीर्तनविधी उपपाद्य स्मरणविधिमुपपादयन्ति तर्हीत्यादि। तर्हीति। विधिद्वयेनैव निर्वाहे। अन्यलभ्यत्वेनेति। कीर्तनानुपपत्तिलभ्यत्वेन। समादधते न, सकृदित्यादि। अयमर्थः। अत्र श्रोतव्यः कीर्तितव्यः स्मर्तव्य इत्यानुपूर्वीविशेषेण कीर्तनानन्तरमपि स्मरणं लभ्यते, तच्च कीर्तनानन्तरभावित्वान्न तद्विधिनाक्षेप्तुं शक्यम्, प्राथमिकतदाक्षेपेणैव स्मरणाक्षेपेण स्वरूपलाभस्य कीर्तनस्वरूपलाभस्य जातत्वात्, अतः स्मरणविधिरावश्यक इति। न च तर्हि स्मरणं वा स्मरणकीर्तने वा विधातव्ये, शिष्टमर्थादायास्यतीति वाच्यम्, दशविधलीलायुक्तभगवत्स्मरणस्यात्र विवक्षितत्वेन भगवतस्तादृशत्वस्य राज्ञाऽज्ञातत्वेन वाक्यस्यानुत्तरत्वापातात्। द्वयविधानेऽपि दोषतादवस्थ्याच्च। गुणविशेषादप्यावश्यकत्वमाहुः दोषान्तराप्रवेशश्चेति। अन्यासक्तेः फलप्रतिबन्धकत्वात्तदभावस्यावश्यकतया स्मरणेनोत्तरकालीनस्य तस्यासंभवश्चेति फलोपकारशैघ्र्यादपि स्मरणमावश्यकमतोऽपि तद्विधानम्। तथा च श्रीशुकस्याध्ययनापदेशेन श्रवणेन भगवति स्नेहो भगवत्स्मरणजनकसंस्कारश्चोत्पादितः, ततस्तेन स्मरणेन पूर्वस्नेहपोषकं स्नेहान्तरं कीर्तनं चोत्पादितम्, अत एव 'तं व्याससूनुमुपयामि गुरुं मुनीना'मिति मुनिगुरुत्वमुक्तम्। ततस्तेन कीर्तनेन पूर्वपोषकं स्नेहान्तरं पुनः स्मरणान्तरमुत्पादितमिति स्वानुभूतस्य दोषान्तराप्रवेशस्यान्योन्यनिर्वाहस्य च स्फुटीकरणाय शुकेन त्रितयमुपदिष्टमित्यर्थः। हेत्वन्तरमप्याहुः किञ्चेत्यादि। अवधी तु 'तस्मात्सर्वात्मना राजन्निति'श्लोके ( २-२-२६ ) स्फुटौ भविष्यतः ननु न्यायेप्यावृत्तिनिरूपणस्य किं प्रयोजनमत आहुः स्मरणान्तरव्यावृत्त्यर्थमिति। तथा च 'अन्ते या मतिः सा गति'रिति फलप्रतिबन्धकीभूतमत्यन्तरनिवृत्त्यर्थमावृत्तिविधानाय त्रितयविधानमित्यर्थः। ननु स्नेहोत्पत्त्यनन्तरं तेनैवावृत्तिसंभवाद्व्यर्थमावृत्तिविधानमिति शङ्कायामाहुः यद्यपीत्यादि। तथा च प्रारब्धवशादन्यासक्तिरुत्पद्यते इति प्रारब्धनिवृत्त्यर्थमावृत्तिविधानमित्यर्थः। एतेन 'मामेव ये प्रपद्यन्ते' इति वाक्यार्थः स्मारितः। कायवाङ्मनसां तदीयत्वस्यैव प्रपत्तिपदार्थत्वादिति। सिद्धमाहुः तस्मादिति। स्मरणान्तव्यावृत्तेरावश्यकत्वात्। एवं सर्ववाक्यव्याख्याने तत्र विधेयश्रवणविषयविचारेऽत्रावयुत्यानुवादाद्भगवत्त्वांशे विधिः, शेषेऽनुवाद इति श्रवणविधेरवयुत्यानुवादत्वं सिद्धम्। तत्रानुवादांशे श्रुतिविरोधमाशङ्कन्ते नन्वित्यादि। तथा च मननाद्यकथनेन प्रवेशरूपाभयस्य भेदसहिष्णुतया कैवल्यश्रुतिविरोधेन मध्ये ज्ञानाङ्गीकाराज्ज्ञाने हेतुताबोधकश्रुतिविरोधेन चात्रत्यश्रवणविधेर्न श्रुतिसामानाधिकरण्यमित्यर्थः। तत्र समादधते नेत्यादि। साङ्गस्य श्रवणस्यात्रावयुत्यानुवाद इत्यत्र गमकमाहुः तदित्यादि। सिद्धमेवेति। भगवतः श्रोतव्यत्वविधानादेव सिद्धम्, तेनानुक्तसिद्धत्वात्तत्रेवात्रापि नोक्तमतो न दोष इत्यर्थः। ननु तथापि दृशेश्चाक्षुषे मानसे च शक्तेरत्र तदभावे द्रष्टव्यश्रुतिविरोधस्तु तदवस्थ इत्यत आहुः प्रेम्णेत्यादि। 'भक्त्या मामभिजानाती'ति वाक्येऽभिज्ञाया उक्तत्वात्तस्याश्च तत्तदन्तावगाहिज्ञानत्वेन साक्षात्कारविशेषात्मकत्वात्प्रेम्णा तत्संभवे सोऽपि नेत्यर्थः। प्रवेशस्य लिङ्गभङ्गानन्तरभावित्वाज्जीवस्य तदानीं भेदसहिष्णुतायामपि न कैवल्यश्रुतिविरोधोऽपीति श्रवणविधेर्न श्रौतसामानाधिकरण्यहानिरिति भावः। नन्वेवं सति ज्ञानादेवात्र मोक्षसिद्धेर्व्याख्येयवाक्यविरोधः, वाक्ये श्रवणादीनामेवाभयकारणत्वबोधनादित्यत आहुः तथापीत्यादि। तथा च साक्षात्कारोत्तरमपि तस्यानन्तिमत्वे श्रवणादेः प्रेम्णावृत्तेरवश्यंभावित्वात्तत्कारणतयाऽभङ्गेन न व्याख्येयवाक्यविरोध इत्यर्थः। ननु तथाप्यन्तिमसाक्षात्कारेणान्यथासिद्धेस्तद्विरोधो दुर्वार इत्यत आहुः अन्तिमेत्यादि। नान्तरीयकत्वमविनाभूतत्वम्। तथा च यथासंभवं तैः प्रेमोत्पाद्यम्, सप्रेमभिस्तैः साक्षात्कारः, ततस्तदनन्तरभाविभिः सप्रेमभिरन्तिमसाक्षात्कारप्रवेशाविति न कोऽपि दोषलेश इत्यर्थः। ननु किमित्येवं कल्प्यते, वैदिक्येव प्रक्रिया कुतो नाङ्गीक्रियत इत्यत आहुः न चाध्यात्मिकेत्यादि। श्रवणवदिति। सप्तम्यर्थे वतिः। अनङ्गीकारे हेतुः नाहमित्यादि। अत्र वेदशब्दो वेदोदितज्ञानमात्रवाची। 'सर्वेषां वेदानां हृदयमेकायन'मित्यादौ तथा दर्शनात्। विदेर्ज्ञानवचनत्वादत्र सङ्कोच एव, न तु लक्षणा, न तु वेदोदितयावत्साधनवाची, तपआदीनां पृथगुपादानाल्लक्षणापत्तेश्च। दृशिस्तु ज्ञानदर्शनोभयसाधारणः, अग्रिमवाक्यस्वारस्यात्। एतेन 'नायमात्मे'ति श्रुतिरपि संगृहीता। तथा चातो नाङ्गीक्रियत इत्यर्थः। ननूक्तैर्दोषैः श्रवणविधौ शारीरस्य विषयत्वेन ग्रहीतुमशक्यत्वेऽपि दर्शनविधौ स एव ग्राह्यः, अभ्यर्हितत्वात्। न च वाक्यभेदापत्तिः। सर्वात्मदर्शन एव स्वदर्शनस्यापि सिद्धेः। ततश्च 'आत्मानं चेद्विजानीया'दिति श्रुत्यनुसारेण शोकस्यापि निवृत्तिरात्मलाभश्च भविष्यतीति फलत्वं तत्साक्षात्कारस्यैवोचितमिति शङ्कायामाहुः न चेत्यादि। तत्र हेतुः सङ्घातेत्यादि। अयमर्थः। अस्यामेव श्रुतौ 'यद्वै तन्न शृणोति शृण्वन् वै तच्छ्रोतव्यं न शृणोति न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोन्यद्विभक्तं—यच्छृणुयादिति, एवमेव 'यद्वै तन्न पश्यती'त्यादि। अत्र यद्वै तन्न शृणोती'त्याद्युक्त्वाऽश्रवणादिप्रकारं वदति 'शृण्वन्वा' इत्यादिना, तत्र च श्रुत्यादीनामविनाशित्वकथनेनात्मधर्मत्वं बोध्यते, तथा सङ्घाते विद्यमानेऽपि ब्रह्मभावेन ब्रह्मधर्मप्राकट्याद्व्यापकः सङ्घातादुद्गतः कैवल्यं प्राप्तः सर्वेन्द्रियकार्यं ब्रह्मैक्येन

श्रवणदर्शनादिकं स्वयमेव करोति। यथा ब्रह्म 'प्राणन्नेव प्राणो भवती'त्यादिश्रुत्या स्वयं करोति, तद्वत्। तादृशस्य च भगवच्छ्रवणे प्रवृत्तिः शुकेनैव वक्ष्यते 'परिनिष्ठितोऽपि नैर्गुण्य' इत्यनेन। एवं सति तद्विषयकश्रवणं तद्दर्शनस्यैव फलत्वम्, फलं च न शारीरदर्शनस्येत्यर्थः। नन्वेवं पुराणोक्तश्रवणेऽस्तु, न तु श्रौतेऽपि, मानाभावादित्यत आहुः **एतावदिति**। तथा च तत्रापि श्रुतेः सन्दिग्धत्वेन प्रकरणबलाद्दर्शनस्यापि ब्रह्मात्मविषयत्वमेव निर्णीयतेऽतो न प्रमाणाभाव इत्यर्थः। ननु श्रुतौ द्वारत्वेन, प्रेम्णोनुक्तेस्तदंशे विरोध इति शङ्कायामाहुः **भगवत** इत्यादि। तथा च 'यमेवे' त्यादिश्रुत्यन्तरेण तत्रापि तदभिप्रेतमिति न विरोध इत्यर्थः। अस्मिन्नर्थे वादिविप्रतिपत्तिं निराकर्तुं तन्मतमनुवदन्ति यत्त्वित्यादि। दूषयन्ति तदित्यादि। तथा च यदि तथा स्यात्, शुकः किमिति छायां दद्यात्, सनत्कुमारो वा किमिति स्कन्दरूपेणावतरेत्, अतो न तथेत्यर्थः। सिद्धमाहुः **तस्मादित्यादि**। तथा चाभयपदेन भगवत्प्रवेश एव, न जीवस्वरूपलाभ इत्यात्मलाभश्रुतावपि भगवत्सायुज्यमेवाभिप्रेतमित्यर्थः। अत्र गमकमाहुः **ब्रह्मैवेत्यादि**। तथा च यदि स्वरूपलाभमात्रं मोक्षपदवाच्यं फलं स्यात्, तदा ब्रह्मभावानन्तरमप्ययं न वदेत्, अतः सायुज्य एव सर्वभयनिवृत्तिरिति तदेवात्मलाभपदार्थ इत्यर्थः। ननु प्रकारान्तरेण भगवदाविर्भावाभावे फलस्याप्यभावादुपनिषत्सु भक्तेरस्फुटत्वान्निष्फलतायां तद्वैयर्थ्यापात इत्यत आहुः **न चेत्यादि**। अस्य भजनरूपस्यार्थस्याभिधेयस्य फलस्य **चाधिकारिभेदेन** मर्यादापुष्टिभेदेन **प्रकारभेदेन** अव्यक्तादिरूपान्तरादिभेदेन विधानमतो न वैयर्थ्यमित्यर्थः। ननु प्रकारभेदे फलभेदोऽप्यापद्येत लोकवदिति चेत्, तत्राहुः **फलं त्वित्यादि**। ननु भगवद्रूपमेव प्रमेयं तत्सायुज्यरूपमेव च फलं श्रुतावप्युच्यत इत्यत्र किं गमकमित्याकांक्षायां तदाहुः **वेदश्चेत्यादि**। तथा च वेदे सर्ववेद्यत्वं यस्योक्तं तस्यैवोंकारवाच्यस्य निष्कर्षो गीतायां 'अह' मिति वक्तुरभिधायकेन पदेन क्रियते। 'ततोऽभूत् त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट्। स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः। स सर्वमन्त्रोपनिषद्वेदबीजं सनातन' मिति परमात्मवाचकं सकलनिष्कलभेदेन द्विविधमोमिति यत्पदमेतदेव सर्वे वेदा आमनन्ति तद्बीजकत्वात्तस्यैवार्थं नानाप्रकारैरभिदधति, सोऽहं भगवानिति, अतः प्रमेयैक्यम्, काठके 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पद'मिति यत्फलमुक्तम्, यदेव च 'अंभस्यपार' इत्यादिना समुद्रशायित्वलिङ्गपुरःसरं बृहन्नारायणीयोपनिषदुक्तम्, तदेवात्र 'मा' मित्यनेन निष्कृष्यते। न हि पदस्य पुरुषाद्भेद इति फलैक्यम्, अतः साधनप्रकारभेदमात्रम्, न तु प्रमेयफलभेद इत्यर्थः सिद्धमाहुः **तस्मादित्यादि**। नन्वत्राधिकारिभेदो वर्णपरत्वेनैव वक्तव्यः, अन्यथा विकल्पाव्यवस्थयाष्टदोषापत्तिरित्यत आहुः **न चेत्यादि**। तथा च 'अव्यक्तासक्तचेतसा' मिति वाक्यशेषाच्चित्तासक्तिभेदादेवाधिकारभेदः, न वर्णभेदेनेत्यर्थः। तर्हि विकल्पस्य कथं व्यवस्थेत्यत आहुः **अत एवेत्यादि**। काम्यस्थले तथैव व्यवस्थादर्शनादित्यर्थः। अत्र ऋष्यन्तरमाहुः **शाण्डिल्यस्येत्यादि**। तच्च 'सा मुख्येतरापेक्षितत्वा' दित्यारभ्य 'प्रश्ननिरूपणाभ्यामाधिक्यसिद्धे' रित्यन्तं पञ्चदशसूत्रात्मकं ज्ञेयम्। तस्यार्थमाहुः **पूर्वमित्यादि**। नन्वेवं सति 'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमिति न स वेद यथा पशुरेवं हि स देवानां पशु' रित्यादिवाक्यानां का गतिरित्यत आहुः **अत इत्यादि**। **अत** इति। अधिकारिभेदात्। तथा च 'नहि निन्दा निन्द्यं निन्दितुं प्रवृत्ता, अपि तु विधेयं स्तोतु' मिति न्यायात्तादृशानि वचनान्यहंग्रहाद्युपासनास्तावकानीति न विरोध इत्यर्थः। फलितमाहुः **तस्मादित्यादि**। नन्वत्र विधिर्नियमः परिसङ्ख्या वा, आद्येऽश्रौतत्वान्नैर्बल्यम्, द्वितीयादौ तु विकल्पापत्तिरित्यत आहुः **विधीत्यादि**। ननु 'प्रैषानुवादे'ति सूत्रे प्रैषपदेन विधिरेव सर्वैर्व्याख्यायत इति कथमविधानमित्याकाङ्क्षायां तदुक्तमुपगम्य हेत्वन्तरमाहुः **लोकेत्याऽदि**। वस्तुतस्तु सूत्रकृता प्रैषमिति वदता विधिभिन्नत्वं तस्य ज्ञाप्यतेऽथापि व्याख्यातृप्रसिद्ध्या तथाङ्गीकारेऽप्यत्र न संभवतीत्यर्थः। ननु विध्यभावे कथं फलसाधनत्वावगमः इत्यत आहुः **फलेत्यादि**। ननु विध्यभावेऽत्र मन्त्रादिरूपताया अप्यभावेनार्थवादत्वमेव वक्तव्यम्, तथा सति सिद्धार्थबोधकत्वेनानुवादत्वादनधिगतार्थगन्तृत्वाभावात्प्रामाण्यहानिरित्यत आहुः **वाक्यार्थस्यापूर्वत्वादिति**। तथा च भगवतः प्रसिद्धत्वेऽपि भजनसंसर्गस्य लोकानधिगतत्वेनापूर्वस्य बोधनान्न प्रामाण्यहानिरित्यर्थः। ननु भावनाङ्गीकारे को दोष इत्यत आहुः **भावनेत्यादि**। तन्निराकरणप्रकारस्तु भाष्यस्योत्सन्नत्वादिदानीं सर्वनिर्णयस्थेन 'साधनं च स्वरूपं च सर्वस्याह श्रुतिः फल' मित्यादिसन्दर्भेण विवरणादवगन्तव्यः। तर्हि तव्यस्यात्र कोऽर्थ इत्यत आहुः **अयं चेत्यादि**। आवश्यकार्थताङ्गीकारे गुणमाहुः **प्रश्नेत्यादि**। फलितमाहुः **तस्मादिति**। एवं वाक्यार्थस्य सिद्धत्वात्। शेषमतिरोहितार्थम् ॥ ५ ॥ ❀ ❀ **एतावानित्यत्र**। तत्र **प्रथममितरासापेक्षत्वादिति**। तयोः कीर्तनस्मरणयोर्मध्ये प्रथमोद्दिष्टत्वेनावसरप्राप्तात्कीर्तनविचारात्पूर्वं पुरुषान्तरानपेक्षत्वात्। उपोद्घातेनाहुः **पञ्चेत्यादि**। भारते मोक्षधर्मे 'साङ्ख्यं योगः पञ्चरात्रं वेदारण्यकमेव च। ज्ञानान्येतानि विप्रर्षे! लोके च प्रचरन्ति हि। किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा मुने। प्रब्रूहि वै मया पृष्टः प्रवृत्तिं च यथाक्रम'मिति जन्मेजयेन पृष्टे, वैशम्पायनेन 'साङ्ख्य' योगः पञ्चरात्रं वेदाः पाशुपतं तथा। ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै' इत्यादिना स्वतन्त्रफलसाधकत्वेनोक्ताः। ततः 'साङ्ख्यस्य वक्ता कपिलः परमर्षिः स उच्यते। हिरण्यगर्भो योगस्य वेत्ता नान्यः पुरातनः। अवान्तरतमश्चैव वेदाचार्यः स उच्यते। प्राचीनगर्भं तमृषिं प्रवदन्तीह केशवम्। उमापतिर्भूतपतिः श्रीकण्ठो ब्रह्मणः सुतः। ऊचिवानिदमव्यग्रो ज्ञानं पाशुपतं शिवः। पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वय' मिति प्रवर्तककथनेन प्रवृत्तिमुक्त्वा, 'सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते। यथागतं तथाज्ञानं निष्ठा नारायणः पर' इति कथनात्। तेषां मध्ये 'पञ्चरात्रविदो ये तु यथाक्रमपरा नृप। एकान्तभा-

वोपगतास्ते हरिं प्रविशन्ति वै' इति पाञ्चरात्रिकाणां भगवत्प्रवेशकथनेन श्रुतिवैष्णवसिद्धान्तौ समप्रधानत्वेनोक्तौ तुल्यफलतयोक्तौ । ततोऽग्रे 'साङ्ख्यं च योगश्च सनातने द्वे वेदाश्च सर्वे निखिलेन राजन् । सर्वैः समस्तै ऋषिभिर्निरुक्तो नारायणो विश्वमिदं पुराण' मित्यत्र पाशुपतस्याकथनात् पूर्वं चात्मप्रमाणेषु गणयित्वा युक्तिभिरहन्तव्यत्वस्यापि कथनात् पशुपतिमतस्य कल्पभेदेनोत्कर्षजननद्वारा श्रुतावुपयोगस्तामसपरत्वेन **परम्परया** वैष्णवसिद्धान्त उपयोगः । मत्स्यपुराणे कल्पविभागे 'तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गति' मित्यनेन सात्त्विककल्पेष्वेव मुक्तेरुक्तत्वात् । मोक्षधर्मे दक्षस्तवप्रसन्नेन शिवेन 'अपूर्वं सर्वतो रुद्रं सर्वतः सुखमव्ययम् । अब्दैर्दशार्धैः संयुक्तं गूढमप्राज्ञनन्दिनम् । वर्णाश्रमकृतैर्धर्मैर्विपरीतं क्वचित्समम् । शतान्तरव्यवसितं मत्याश्रयमिमं स्मृतम् । मया पाशुपतं दक्ष योगमुत्पादितं मये' ति तस्य योगस्य शतान्तरे व्यवसितकथनात् । ब्रह्मपुराणे च समाप्तिदशायां मायानुकीर्तनाध्यायारंभे 'तस्माद्वक्ष्यामि भो विप्राः कृष्णे भक्तिर्यथा भवे' दिति प्रक्रम्य प्रथममन्यदेव भक्तिं ततस्तत्प्रसादेन यज्ञकरणे भक्तिं ततोऽग्निमप्रसादेन भास्करे ततस्तत्प्रसादेन शंभौ भक्तिं चोक्त्वा, 'तुष्टे त्रिलोचने तस्य भक्तिर्भवति केशवे । सम्पूज्य तं जगन्नाथं वासुदेवाख्यमव्ययम् । ततो भक्तिं च मुक्तिं च स प्राप्नोति द्विजोत्तमा' इति व्यासवाक्य एकैकभावविमोकोत्तरं शिवभक्तेस्ततो भगवद्भक्तेः संसारमुक्तेश्च कथनात् , **क्रममुक्तिहेतुत्वेन** वा तदुपयोग इत्यर्थः । **अतः परमिति** । एतेभ्यः परं शिष्टं साङ्ख्यादित्रयम् , ते एते **स्वतन्त्रतया** फलसाधकत्वांशे तत्र निन्दितत्वात्पूर्वोक्तेषु प्रवेशमलभमाना स्मरणशेषा भवन्तीत्याहेत्यर्थः । धर्मशास्त्रादीनां स्मरणशेषत्वमुपपादयन्ति **स्वधर्मस्येत्यादि** । **अत इति** । उक्तवाक्यैरेवमर्थनिर्धारात् । **स्वरूपभूत इति** । अन्तिमभूतः । **तदुपयोग इति** । यस्य देहस्योपयोगः । **स इत्यादि** । स उपयोगः चेदित्यादिनोक्तप्रकारेण स्मरणं भवेत्, तदा भवेदित्यर्थः । कथमित्याकाङ्क्षायामाहुः **पूर्वादिति** । सिद्धमाहुः **अत इति** । यतः स्मरणस्यान्तिमदेहसम्पादकत्वं योगादीनामपि चैतस्मिन्नेव पर्यवसितत्वमत इत्यर्थः । एवं श्लोकं व्याख्याय तत्तात्पर्यमाहुः **अत इत्यादि** । एतेन युक्तिः प्रदर्शिता । तत्रायं प्रयोगः । अन्तकाले भगवत्स्मरणं साक्षाद्भगवत्प्रवेशहेतुः, योगादिशेषित्वात् , यन्नैवं तन्नैवम् , यथा काम्यादय इति । **तथात्वादिति** । 'ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् । यः प्रयाति त्यजन्देहं स याति परमां गति' मिति भगवद्वाक्येन तेषामपि लाभरूपत्वात् । **तस्यास्तथात्वमिति** । अन्तकालीनभगवत्स्मृतेः परमजन्मलाभत्वम् ॥ ६ ॥ ❀ ❀ **प्रायेणेत्यत्र । इदानीमिति** । स्मरणस्य फलसाधकत्वसाधनानन्तरम् । **साधयतीति** । पञ्चभिः साधयतीत्यर्थः । **गुणानुकथन इति** । गुणपदं लीलानामप्युपलक्षकम् । **असम्प्रज्ञातसमाधय इति** । 'विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्य' इति पातञ्जलयोगसूत्रे ध्येयसर्वावयवधारणोत्तरं तद्वशीकरणे सर्वावयवत्यागोत्तरमेकैकावयवध्यानं विरामप्रत्ययः तस्य योऽभ्यासः साधनाग्रहस्तत्पूर्वः संस्कारशेषः पूर्वप्रत्ययसूक्ष्मावस्थाशेषः शिष्टपदार्थो यत्र तादृशोऽन्यः असम्प्रज्ञातसमाधिरिति लक्षणात् । 'तत्सर्वव्यापकं चित्तमाकृष्य व्योम्नि धारयेत् । तच्च त्यक्त्वा मदारोहो न किञ्चिदपि संस्मरे' दिति भगवद्वाक्योक्तः । यत्र वेद्यं किमपि न ज्ञायते तादृशभावनाविशेषयुक्ताः **वाक्यादिति** । ल्यब्लोपे पञ्चमी, एतद्वाक्यमनुसन्धायेत्यर्थः । **विरोधाभासबोधनार्थमिति** । एतद्बोधनं भगवद्गुणानां गुणातीतत्वबोधनायेति ज्ञेयम् । सिद्धमाहुः **तस्मादिति** । तथा चात्रायं प्रयोगः, भगवद्गुणकीर्तनं साक्षाद्भगवत्प्रवेशहेतुः, गुणातीतरमणविषयत्वात्, 'रमन्ते योगिनो यस्मिन्नित्यानन्दे चिदात्मनि । इति रामपदेनासौ परं ब्रह्माभिधीयत' इति श्रुत्युक्तब्रह्मवदिति ॥ ७ ॥ ❀ ❀ **इदमित्यत्र । इदमप्रामाणिकमिति** । एवं स्मरणकीर्तनोत्कर्षसाधनम् । **आहेति** । प्रमाणमाहेत्यर्थः । **दुर्बलत्वमिति**श्रुत्यपेक्षया नैर्बल्यम् । **गुरुपरम्परामाहेति** । युष्माभिः कथं ज्ञातमित्यपेक्षायां तामाहेत्यर्थः । पितृपदस्यानतिप्रयोजनकत्वामाशङ्क्य तत्तात्पर्यमाहुः **पितैवेत्यादि** । 'यं प्रव्रजन्त' मित्यत्रोपनयनस्यानुक्तत्वात्कदा पठनमित्याशङ्कानिरासायेदमुक्तं ज्ञेयम् ॥ ८ ॥

## श्रीगिरिधरकृता-बालप्रबोधिनी

एवं विपर्ययप्रश्नस्योत्तरमुक्त्वा श्रोतव्यादिप्रश्नस्योत्तरमाह—**तस्मादिति** । 'दौष्यन्तिरत्यगान्माया' मिति वक्ष्यमाणतया **भरतस्य** मोहाभावेन तद्वंश्यस्य तवापि तथात्वमेव युक्तमित्याशयेन सम्बोधयति—**हे भारतेति** । यस्माद्भगवद्भजनविमुखस्य गृहाद्यासक्तस्य पुरुषार्थहेतुरप्यायुर्व्यर्थमेव याति तस्मादभयं निर्भयं पदं भगवन्तं तल्लोकं वेच्छता पुरुषेण हरिः स्वैकशरणानां स्वप्राप्तिप्रतिबन्धकदुरितनिवर्तनेन संसारदुःखहर्त्ता श्रीकृष्णः श्रोतव्यः कीर्तितव्यः स्मर्त्तव्यश्चेत्यन्वयः । दुःखहर्तृत्वे हेतुमाह–**ईश्वर इति** । तत्रापि हेतुमाह–**भगवानिति**, ऐश्वर्यादिषड्गुण इत्यर्थः । तस्य तथात्वेऽपि दुःखप्रदानां दुष्टानां बहूनां सत्त्वात् कथं सर्वथा दुःखनिवृत्तिरित्याशङ्क्याह—**सर्वात्मेति**, सर्वेषामात्माऽन्तर्यामीत्यर्थः । अतस्तत्प्रसादे न कोऽपि दुःखप्रद इति भावः । न च 'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्' इत्यादौ भक्तेर्नवविधत्वं तत्रैकैकयाऽपि भक्त्या निर्भयत्वं च प्रसिद्धं तत्कथमत्र भक्तित्रयमेवोच्यते इति शङ्कनीयम् , श्रवणं विना स्मरणकीर्तने न सम्भवतः, स्मरणं विना च कीर्त्तनश्रवणे न स्तः, कीर्त्तनं विनापि श्रवणस्मरणे न स्यातामिति श्रवणादित्रयाणां परस्परनिर्वाहकत्वज्ञापनाय भक्त्यन्तरस्य श्रवणादिहेतुकत्वज्ञापनाय च श्रवणादित्रयस्योक्तत्वात् । तत्राप्येकैकयाऽप्यभयत्वे तु न सन्देहः । अतः संसारभयज्ञानमारभ्य तन्निवृत्त्यर्थं देहपातपर्यन्तं निरन्तरं यथासम्भवं श्रवणाद्यावृत्तिः कर्त्तव्या, तद्विना तु न कदापि संसारभयनिवृत्तिः, नापि निरतिशियपरमानन्दावाप्तिरिति

निश्चयः ॥ ५ ॥ ❀ ❀ एतत्त्रितये कस्य श्रेष्ठत्वमित्यपेक्षायामितरनिरपेक्षफलसाधकत्वात् स्मरणस्यैव सर्वसाधनफलत्वेन श्रेष्ठत्वमाह—एतावानिति । साङ्ख्ययोगस्वधर्मपरिनिष्ठाभिरनेकजन्मानुष्ठिताभिः पुंसां जन्मनः परो लाभः श्रेष्ठं फलं तावानेव साध्यते इत्यन्वयः । किं तदित्यपेक्षायामाह—अन्ते देहत्यागसमये नारायणस्य भगवतः स्मृतिरिति यत् । साङ्ख्यमात्मानात्मविवेकः । योगो यमनियमाद्यष्टाङ्गः । अन्यदप्यर्थकामादिजन्मफलमस्ति तद्व्यावृत्त्यर्थं पर इति विशेषणम् । मध्ये कदाचिन्नारायणस्मृतौ जातायामपि मरणसमये यद्यन्यस्मृतिर्भवेत्तदा 'यं यं वाऽपि स्मरन्भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः' इति वाक्यानुसारेणान्यप्राप्तिरेव स्यान्न भगवत्प्राप्तिरत उक्तमन्ते इति ॥ ६ ॥ ❀ ❀ अत्र सदाचारं प्रमाणयति—प्रायेणेति । राजत्वात्त्वयाऽप्येवम्भूता बहवोऽनुभूता स्युरिति सूचयन् सम्बोधयति—हे राजन्निति । नैर्गुण्ये त्रिगुणातीते ब्रह्मणि स्थिता अत एव विधिनिषेधात्मकवेदान्निवृत्ताः तदुक्तपुण्यपापसम्बन्धरहिता अपि मुनयो मननशीलाः सदसद्विवेकिनः प्रायेण हरेर्गुणानां लीलानामनुकथने रमन्ते, प्रथमतः कीर्त्तनश्रवणाद्यभ्यासं विना ते स्मरणस्यासम्भवात् प्रथमतस्तदेव कुर्वन्तीत्यर्थः । स्मेति प्रसिद्धमेवैतदित्यर्थः ॥ ७ ॥ ❀ ❀ न केवलं पूर्वे एव तत्र रमंते किन्तु अहमपीदं वक्ष्यमाणपुराणं द्वापरादौ द्वापर आदौ यस्य तस्मिन् कलियुगप्रवेशकाले द्वैपायनाद्वेदव्यासात् स्वपितुः सकाशादधीतवानित्यन्वयः । तर्हि वेदाद्दौर्बल्यं स्यादित्याशङ्क्याह—ब्रह्मसम्मितमिति, वेदतुल्यमित्यर्थः । यद्वा ब्रह्म सम्यक् मितं प्रमितं येन तथाभूतमित्यर्थः । तत्र हेतुमाह—भागवतमिति, भगवत्प्रोक्तं भगवत्प्रतिपादकं भगवत्फलकं चेत्यर्थः ॥ ८ ॥

## हिन्दी अनुवाद

इसलिये हे परीक्षित् ? जो अभय-पदको प्राप्त करना चाहता है, उसे तो सर्वात्मा, सर्वशक्तिमान् भगवान् श्रीकृष्णकी ही लीलाओंका श्रवण, कीर्तन और स्मरण करना चाहिये ॥ ५ ॥ ❀ ❀ मनुष्यजन्मका यही—इतना ही लाभ है कि चाहे जैसे हो—ज्ञानसे, भक्तिसे अथवा अपने धर्मकी निष्ठासे जीवनको ऐसा बना लिया जाय कि मृत्युके समय भगवानकी स्मृति अवश्य बनी रहे ॥ ६ ॥ ❀ ❀ परीक्षित् । जो निर्गुण स्वरूपमें स्थित हैं एव विधि-निषेधकी मर्यादाको लाँघ चूके हैं, वे बड़े-बड़े ऋषि-मुनि भी प्रायः भगवानके अनन्त कल्याणमय गुणगणोंके वर्णनमें रमे रहते हैं ॥ ७ ॥ ❀ ❀ द्वापरके अन्तमें इस भगवद्‌रूप अथवा वेदतुल्य श्रीमद्भागवत नामके महापुराणका अपने पिता श्रीकृष्ण द्वैपायनसे मैंने अध्ययन किया था ॥ ८ ॥

**परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया । गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥ ९ ॥**
**तदहं तेऽभिधास्यामि महापौरुषिको भवान् । यस्य श्रद्दधतामाशु स्यान्मुकुन्दे मतिः सती ॥ १० ॥**
**एतन्निर्विद्यमानानामिच्छतामकुतोभयम् । योगिनां नृप[1] निर्णीतं हरेर्नामानुकीर्त्तनम् ॥ ११ ॥**
**किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह । वरं मुहूर्त्तं विदितं घटेत[2] श्रेयसे यतः ॥ १२ ॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

सिद्धस्य तव कुतोऽध्ययने प्रवृत्तिस्तत्राह । परिनिष्ठितोऽपीति गृहीतचेता आकृष्टचित्तः ॥ ९ ॥ ❀ ❀ महापुरुषो विष्णुस्तदीयः । यस्य यस्मिन् श्रद्धां कुर्वतां सती अहैतुकी ॥ १० ॥ ❀ ❀ साधकानां सिद्धानां च नातः परमन्यच्छ्रेयोऽस्तीत्याह । एतदिति । इच्छतां कामिनां तत्तत्फलसाधनमेतदेव । निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव । योगिनां ज्ञानिनां फलं चैतदेव निर्णीतम् । नात्र प्रमाणं प्रवक्तव्यमित्यर्थः ॥ ११ ॥ ❀ ❀ अल्पमेवायुरवशिष्टं किमहं साधयेयमिति मा शुच इत्याह किमिति त्रिभिः । परोक्षैरलक्षितैर्हायनैर्वर्षैर्विदितं वृथा यातीति ज्ञातम् । यतो येन ज्ञानेन घटेत यत्नं कुर्यात् ॥ १२ ॥

## वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

ननु त्वमतिप्रसिद्धो जन्मत एव ब्रह्मानुभवी गृहात्परिव्रज्य गतोऽनुव्रजंतं पितरमपि नैव पर्यचैषीः । संप्रति कथमेवं ब्रूष इत्यभिप्रायेण शंकते—सिद्धस्येति । आकृष्टचेता इति ब्रह्मानुभवादपि लीलाया माधुर्याधिक्येऽहमेव प्रमाणमिति भावः । राजर्षे इति । एतच्च ब्रह्मर्षय एव जानंति न तु प्रायो राजर्षय इति भावः ॥ ९ ॥ ❀ ❀ तर्हीदमपूर्वं वस्त्वहमपि लभेयेत्यत आमूलचूलमेव मामेनदास्वादयेत्यपेक्षायामाह । तदहमिति । महापुरुषं कृष्णं प्राप्तुमर्हसीति महापौरुषिकः । यद्वा विनयादित्वात्स्वार्थे ठक् । उत्तरपदवृद्धिश्च । यस्य यस्मिन् [illegible] विष्णुरात[illegible] तदीयेन श्रीभागवतं श्रावयामासेति ज्ञेयमत एव प्रथमद्वादशयोरपि शुकप्रोक्तत्वे "अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु" इति वचनं सम्यगुपपद्यते ॥ १० ॥ ❀ ❀ नन्वत्र शास्त्रे भक्तिरभिधेयेत्यवगम्यत एव तत्रापि भक्त्यंगेषु मध्ये महाराजचक्रवर्त्तिवत्किमेकं मुख्यत्वेन निर्णीयते तत्राह—नामानुकीर्त्तनमिति । सर्वेषु भक्त्यंगेषु मध्ये श्रवणकीर्त्तनस्मरणानि त्रीणि मुख्यानि तस्माद्भारतेति श्लोके

---

१. प्रा० पा० नृपते गीतं २ यतते ।

नोक्तानि तेषु त्रिष्वपि मध्ये कीर्त्तनं कीर्त्तनेपि नामलीलागुणादिसंबंधिनि तस्मिन्नामकीर्त्तनं तत्रानुकीर्त्तनं स्वभक्त्यनुरूपनामकीर्तनं निरंतरकीर्त्तनं वा निर्णीतं पूर्वाचार्यैरपि न केवलं मयैवाधुना निर्णीयत इति तेनात्र प्रमाणं न प्रष्टव्यमिति भावः। कीदृशमकुतोभयं-कालदेशपात्रोपकरणादिशुद्ध्यशुद्धिगतभयाभावस्य का वार्त्ता भगवत्सेवादिकमसहमाना म्लेच्छा अपि यत्र नैव विप्रतिपद्यंते इति भावः। किञ्च। साधकानां सिद्धानां च मुमुक्षूणां मुक्तानां च नातः परमन्यच्छ्रेय इत्याह। निर्विद्यमानानामर्थान्मोक्षपर्यंतसर्वकामेभ्य इति इच्छतामित्यर्थात्तानेव कामानिति प्रविश पिंडीमितिवल्लभ्यते। ततश्च निर्विद्यमानानामेकांतभक्तानामिच्छतां स्वर्गमोक्षादि-कामिनां योगिनामात्मारामाणां च एतदेव निर्णीतं यथायोगं साधनत्वेन फलत्वेन चेति भावः। अत्र संदर्भः 'परिनिष्ठितोपि नैर्गुण्ये' इत्यादौ 'तदहं तेभिधास्यामि' इत्यंतेन 'यस्य श्रद्दधतामाशु स्यान्मुकुंदे मतिः सती' इति श्रीभागवतस्य परममहिमानमुक्त्वा तदनंतरं श्रीभागवतमुपक्रममाण एव तस्य नानांगवतस्तन्नामकीर्त्तनमेवोपदिशति। तत्रापि सर्वेषामेव परमसाधनत्वेन परमसाध्य-त्वेन चोपदिशति। 'एतन्निर्विद्यमानानाम्' इति टीका च साधकानां सिद्धानां च नातः परमन्यच्छ्रेयोस्तीत्याह। एतदिति। इच्छतां कामिनां तत्तत्फलसाधनमेतदेव, निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव, योगिनां ज्ञानिनां फलं चैतदेव नात्र प्रमाणं वक्तव्यमित्यर्थं इत्येषा नामकीर्त्तनं चेदमुच्चैरेव प्रशस्तम्, 'नामान्यनंतस्य हतत्रपः पठन्' इत्याद्युक्तेः। अत्र पाद्मोक्तदशापराधाः परित्याज्याः यथा श्रीसनत्कुमारवाक्यम् "सर्वापराधकृदपि मुच्यते हरिसंश्रयः। हरेरप्यपराधान्यः कुर्याद्द्विपदपांशुलः॥ नामाश्रयः कदाचित्स्यात्तरत्येव स नामतः। नाम्नोपि सर्वसुहृदो ह्यपराधात्पतत्यधः॥" इति। अपराधाश्चैते। "सतां निंदा नाम्नः परमम-पराधं वितनुते यतः ख्यातिं यातं कथमु सहते तद्विगर्हणम् (१)॥ शिवस्य श्रीविष्णोर्य इह गुणनामादि सकलं धिया भिन्नं पश्ये-त्स खलु हरिनामाहितकरः (२)॥ गुरोरवज्ञा (३) श्रुतिशास्त्रनिंदनम् (४) तथार्थवादो (५) हरिनाम्नि कल्पनम् (६)। नाम्नो बलाद्यस्य हि पापबुद्धिर्न विद्यते तस्य यमैर्हि शुद्धिः (७)॥ धर्मव्रतत्यागहुतादिसर्वशुभक्रियासाम्यमपि प्रमादः (८)॥ अश्रद्दधाने विमुखेप्यशृण्वति यश्चोपदेशः शिवनामापराधः (९)॥ श्रुत्वापि नाममाहात्म्यं यः प्रीतिरहितोऽधमः। अहं ममापि परमो नाम्नि सोप्यपराधकृत्॥" इति (१०) अत्र सर्वापराधकृदपीत्यादौ श्रीविष्णुयामलवाक्यमनुसंधेयम्। "मम नामानि लोकेऽस्मिञ्छ्रद्धया यस्तु कीर्तयेत्॥ तस्यापराधकोटीस्तु क्षमाम्येव न संशयः" इति। सतां निन्देत्यनेन हिंसादीनां वचनागोचरत्वं दर्शितम्। निंदादयस्तु यथा स्कांदे मार्कंडेयभगीरथसंवादे "निंदां कुर्वंति ये मूढा वैष्णवानां महात्मनाम्। पतंति पितृभिः सार्द्धं महारौरवसंज्ञिते (१)॥ हंति निंदंति यो द्वेष्टि वैष्णवान्नाभिनंदति। क्रुध्यते याति नो हर्षं दर्शने पतनानि षट्॥ इति। तन्निंदा-श्रवणेपि दोष उक्तः। निंदां भगवतः शृण्वंस्तत्परस्य जनस्य वा। ततो नापैति यः सोपि यात्यधः सुकृताच्च्युतः" इति। ततोप-गमश्चायमसमर्थस्यैव समर्थेन तु निंदकजिह्वा छेत्तव्या तत्राप्यसमर्थेन तु स्वप्राणपरित्यागः कर्त्तव्यः। यथोक्तं देव्या। "कर्णौ पिधाय निरयाद्यदकल्प ईशे धर्मावितर्यसृणिभिर्नृभिरस्यमाने। जिह्वां प्रसह्य रुशतीमसतां प्रभुश्चेच्छिंद्यादसूनपि ततो विसृजेत्स धर्मः" इति। शिवस्य श्रीविष्णोरित्यत्रैवमनुसंधेयं श्रूयते हि। "यद्यद्विभूतिमत्सत्वं मम तेजोंशसंभवम्"॥ इति। "ब्रह्मा भवोहमपि यस्य कलाः कलायाः" इति। "यत्पादनिस्सृतसरित्प्रवरोदकेन तीर्थेन मूर्द्ध्नि कृतेन शिवः शिवोऽभूत्"। इति। "सृजामि तन्नियुक्तोहं हरो हरति तद्वशः। विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्॥" इति। तथा माध्वभाष्यधृतानि वचनानि। ब्रह्मांडे। "रुजं द्रावयते यस्माद्रुद्रस्तस्माज्जनार्दनः। ईशनादेव चेशानो महादेवो महत्त्वतः (१) पिबंति येन वा नाकं मुक्ताः संसार-सागरात्। तदाधारो यतो विष्णुः पिनाकीति ततः स्मृतः (२) शिवः सुखात्मकत्वेन सर्वसंरोधनाद्धरः॥ कृत्यात्मकमिमं देहं स्थितेरंते प्रवर्त्तयन्॥ कृत्तिवासास्ततो देवो विरिञ्चिस्तु विरेचनात्। बृंहणाद्ब्रह्मनामासावैश्वर्यादिन्द्र उच्यते। एवं नानाविधैः शब्दैरेक एव त्रिविक्रमः॥ वेदेषु च पुराणेषु गीयते पुरुषोत्तमः" इति। वामने "न तु नारायणादीनां नाम्नामन्यत्र संशयः॥ अन्य-नाम्नां किल गतिर्विष्णुरेव प्रकीर्त्तितः" इति स्कांदे। "ऋते नारायणादीनि नामानि पुरुषोत्तमः॥ अदादन्यत्र भगवान् राजवर्त्ते स्वकं वपुः" इति ब्राह्मे। "चतुर्मुखः सदानंदो ब्रह्मणः पद्मभूरिति। उग्रो भस्मधरो नग्नः कपालीति शिवस्य च॥ विशेषनामानि ददौ स्वकीयान्यपि केशवः" इति। तदेवं श्रीविष्णोः सर्वात्मकत्वेन प्रसिद्धात्तस्मात्सकाशाच्छिवस्य गुणनामादिकं भिन्नं शक्त्यंतरसिद्ध-मिति यो धियापि पश्येदित्यर्थः। द्वयोः भेदतात्पर्येण षष्ठ्यंतत्वे सति श्रीविष्णोश्चेत्यपेक्ष्य च शब्दः क्रियते तत्प्राधान्यविवक्षयैव श्रीशब्दश्च तत्रैव दत्तः। अत एव शिवनामापराध इति शिवशब्देन मुख्यतया श्रीविष्णुरेव प्रतिपादित इत्यभिप्रेतं सहस्रनामादौ च स्थाणुशिवादिशब्दास्तथैव॥ गुरोरवज्ञाऽनादर इति। अथ श्रुतिशास्त्रनिंदनम्। यथा पाखंडमार्गेण दत्तात्रेयर्षभदेवोपासकानां पाखंडिनाम्। अथार्थवादः स्तुतिमात्रमिदमिति मननं कल्पनं तन्माहात्म्ये गौण्यताकरणाय गत्यंतरचिंतनम्। यथोक्तं कौर्मे व्यास-गीतायाम्—देवद्रोहाद्गुरुद्रोहः कोटिकोटिगुणाधिकः॥ ज्ञानापवादो नास्तिक्यं तस्मात्कोटिगुणाधिकम्" इति। यत्तु विष्णुपार्ष-देभ्यः श्रुतनाममाहात्म्यस्याप्यजामिलस्य। "सोहं व्यक्तं पतिष्यामि नरके भृशदारुणे" इति वाक्यं तत्खलु स्वदौरात्म्यमात्रदृष्ट्या नाममाहात्म्यदृष्ट्यात्वग्रे वक्ष्यते। 'तथापि मे दुर्भगस्य' इत्यादिद्वयम्। नाम्नो बलादिति। यद्यपि भगवन्नाम्नो बलेनापि कृतस्य पापस्य तन्नाम्ना क्षयस्तथापि येन नाम्नो बलेन परमपुरुषार्थस्वरूपं सच्चिदानंदसांद्रं साक्षाच्छ्रीभगवच्चरणारविंदं साधयितुं प्रवृत्तस्तेनैव परमघृणास्पदं पापं विषयं साधयतीति परमदौरात्म्यम्। ततः कदर्थयत्येतन्नाम चेति ततः पापकोटिमहत्तमस्यापराधस्यापातो

बाढमेव ततो यमैर्बहुभिर्यमनियमादिभिः कृतप्रायश्चित्तस्य क्रमेण प्राप्ताधिकारैरनेकैरपि दंडधरैर्वा कृतदंडस्य तस्य शुद्धभावो युक्त एव । 'नामापराधयुक्तानाम्' इत्यादिवक्ष्यमाणानुसारेण पुनरपि संततनामकीर्तनमात्रस्य तत्र प्रायश्चित्तत्वात् सर्वापराधकृदपीत्याद्युक्तानुसारेण नामापराधयुक्तस्य भगवद्भक्तिमतोप्यधःपातलक्षणभोगनियमाच्च तत्रेंद्रस्याश्वमेधाख्य-भगवद्यजनबलेन वृत्रहत्या प्रवृत्तिस्तु लोकोपद्रवशांतिं तदीयासुरतावखंडनं चेच्छूनामृषीणामाज्ञाकृतत्वान्न दोष इति मंतव्यम् । अथ धर्मव्रतत्यागेति । धर्मादिभिः साम्यमननमपि प्रमादोऽपराधो भवतीत्यर्थः । अत एव "वेदाक्षराणि यावंति पठितानि द्विजातिभिः ॥ तावंति हरिनामानि कीर्त्तितानि न संशयः" ॥ इत्यतिदेशेनापि नाम्न एव प्राधान्यमायाति । उक्तं हि । 'मधुरमधुरमेतत्' इत्यादौ 'सकलनिगमवल्ली सत्फलम्' इति । तथा श्रीविष्णुधर्मे "ऋग्वेदो हि यजुर्वेदः सामवेदो ह्यथर्वणः । आधीतास्तेन येनोक्तं हरिरित्यक्षरद्वयम्" स्कांदे पार्वत्युक्तौ । "मा ऋचो मा यजुस्तात मा साम पठ किञ्चन । गोविंदेति हरेर्नाम गेयं गायस्व नित्यशः ।।" पाद्मे रामाष्टोत्तरशतनामस्तोत्रे 'विष्णोरेकैकनामापि सर्ववेदाधिकं स्मृतम्" इति । अथाश्रद्दधाने इत्यादिनोपदेष्टुरपराधं दर्शयित्वोपदेशस्याह-श्रुत्वेतियातः अहंममादिपरमोऽहंताममताद्येकतात्पर्यत्वेन तस्मिन्न-नादरवानित्यर्थः । 'नामैकं यस्य वाचि स्मरणपथगतम्' इत्यादौ देहद्रविणादिनिमित्तकपाखंडशब्देन च दशापराधा लक्ष्यंते । पाखंडमयत्वात्तेषां तथा तद्विधानादेवापराधानंतरमुक्तं पाद्मे वैशाखमाहात्म्ये "अवमन्य च ये यांति भगवत्कीर्त्तनं नराः । ते यांति नरकं घोरं तेन पापेन कर्मणा" इति । एतेषां चापराधानामनन्यप्रायश्चित्तत्वमेवोक्तं तत्रैव "नामापराधयुक्तानां नामान्येव हरंत्यघम् ॥ अविश्रांतिप्रयुक्तानि तान्येवार्थकराणि च" इति । अत्र सत्प्रभृतिष्वपराधेषु तत्संतोषणार्थमेव संततनामकीर्तनादिकं समुचितम् । अंबरीषचरितादौ तदेकक्षम्यत्वेनापराधानां दर्शनात् । उक्तं च नामकौमुद्याम् "महदपराधस्य भोग एव निवर्तकस्तदनुग्रहो वा" इति । तस्माद्गत्यंतराभावात्साधूक्तमेतन्निर्विद्यमानानामिति ॥ ११ ॥ ❀ ❀ श्रेयसे नामकीर्तनादिरूपाय ॥ १२ ॥

### श्रीमद्वीरराघवव्याख्या

ननु सिद्धस्य तव कुतोऽध्ययने प्रवृत्तिस्तत्राह । परिनिष्ठित इति । नैर्गुण्ये परिनिष्ठितः काष्ठांगतः शास्त्रनैरपेक्ष्येण भगवद-नुसन्धानप्रकारे स्थित इत्यर्थः । ईदृशोऽप्यहमुत्तमश्लोकलीलया भगवल्लीलया गृहीतचेताः आकृष्टचित्तः । हे राजर्षे यदाख्यानं पुराण-मधीतवानस्मि । तदभिधास्यामीत्युत्तरश्लोकेनान्वयः ॥ ९ ॥ ❀ ❀ आरूढानां मादृशामप्यस्य पुराणस्योपादेयत्वात्कैमुत्यन्या-येनारुरुक्षोस्तवसुतरामिदमुपादेयमिति तुभ्यमुपदिशामीत्याह । तत्पुराणान्ते तु तुभ्यमभिधास्यामि कथयिष्यामि चिरमशुश्रूषवे मह्यं कथमभिधास्यसीत्यत आह । महापौरुषिक इति महापुरुषो भगवान् 'वेदाहमेतं पुरुषं महान्तमिति'श्रुतेः स उपायस्त्वेनास्यास्तीति महापौरुषिको महापुरुषभक्तो भवान् । नहि भगवद्भक्तानां रहस्यार्थोपदेशने चिरं शुश्रूषापेक्षेति भावः । यत्र पुराणे श्रद्दधतां श्रद्धां कुर्वतां मुकुन्दे मोक्षप्रदं भगवति सती अहैतुकी मतिर्भक्तिःस्याद्भवेत् ॥ १० ॥ ❀ ❀ मुमुक्षूणां नातःपरमन्यन्मोक्षसाधन-मित्याह । एतदिति । तापत्रयादिहेतुकनिर्वेदं प्राप्तानामकुतोभयं मोक्षमिच्छतां योगिनामनभिसंहितफलकर्मयोगनिष्ठानां हे नृप ! हरेर्नामानुकीर्तनं स्वरूपादिचिन्तनादेरप्युपलक्षणमिदं तन्नामानुकीर्तनं तत्स्वरूपादिचिन्तनं चेत्येतदेव मुक्तिसाधनं नान्यदित्यर्थः ॥ ११ ॥ ❀ ❀ अल्पमेवायुरवशिष्टं किमहं साधयेयमिति माशुच इत्याह । किमिति । प्रमत्तस्य देहापत्यकलत्रादिष्वासक्तस्य परोक्षैरज्ञाततयैवगतैर्बहुभिर्हायनैःकिं किं प्रयोजनं न किमपीत्यर्थः । विदितं वृथायातीति ज्ञातं मुहूर्त्तमेव वरं यतः येन विदितेन मुहूर्त्तेन श्रेयसं घटेत यत्नं कुर्यात् ॥ १२ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

नन्वस्तु भवतो भागवताध्ययनं तात्कमर्थमिति तत्राह परिनिष्ठित इति यत्र यच्छ्रद्दधतां यत्र यस्मिन् भागवते प्रतिपादि-तमर्थं श्रद्दधतामिति वा अहं भागवतं नाम यदाख्यानमधीतवान् । तत्ते तुभ्यमभिधास्यामीत्यन्वयः अभिधानं निमित्तमाह महा-पुरुषिक इति पूर्णषड्गुणत्वात्पुरुषो भगवांस्तद्भक्ताः पुरुषिकास्तेषां मध्ये महानिति यत्तस्मादित्यर्थः । स्थितप्रज्ञतया कृतकृत्यस्य भवतो भागवताध्ययनं किमर्थमिति तत्राह-परिनिष्ठित इति । नैर्गुण्ये मुक्तौ परिनिष्ठितः भुक्तिरस्य भवतीतिनिश्चयवानपि उदरं संशयः प्रोक्तःपरिनिष्ठा विनिश्चय इत्यभिधानात् कथमनेनास्य परिहार आयात इति तत्राह उत्तमश्लोकेति । अनेनैवंविधमा हात्म्यादतिशयोभगवानित्युक्तं भवति ॥ ९—१० ॥ ❀ ❀ न केवलं तवैवैतन्निर्णीतमपितु सर्वयोगिनामपीत्याह-एतदिति । निर्विद्यमानानां विरज्यमानानां क्लेशैरितिशेषः अकुतोभयं मोक्षः एवं वैराग्यादिसाधनसामग्रीमतां योगिनां हरेर्नामानुकीर्तनं[1] यदेतत्तदंते हरिस्मरणकारणमित्यर्थः ॥ ११ ॥ ❀ ❀ अनेन भागवताकर्णनमभिप्रेतं तदर्थंतात्पायुष्ट्वे न न घटत इति शंकामाभू-दित्याह-किमिति हायनैर्वत्सरैः परोक्षैरागामिभिः यतो येन मुहूर्त्तेन हरिस्मरणाख्यश्रेयसे घटेत तदेकं मुहूर्त्तं घटिकाद्वयमपि परमुत्तमं विदितं प्रख्यातम् ॥ १२ ॥

---

१. अत्रनामशब्दो ग्रन्थपरः । सोहं नामविदेवास्मीत्यादौ ग्रन्थे प्रयोगदर्शनात् । हरिविषयग्रंथश्रवणादिकमिति यावत् ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

परिनिष्ठितोऽपि नैर्गुण्ये इत्यादौ तदहं तेऽभिधास्यामि इत्यन्ते यस्य श्रद्दधतामाशु स्यान्मुकुन्दे मतिः सती इति श्रीभागतस्य परममहिमानमुक्त्वा श्रीभागवतमुपक्रममाण एव तस्य नानाङ्गवतः श्रीमन्मुखतया तन्नामकीर्त्तनमेवोपदिशति, तत्रापि सर्व्वेषामेव परमसाधनत्वेन चोपदिशति, एतन्निर्विद्यमानानामिति। टीका च—साधकानां सिद्धानाञ्च नातः परमन्यच्छ्रेयोऽस्तीत्याह, एतदिति। इच्छतां कामिनां तत्तत्फलसाधनमेतदेव, निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव, योगिनां ज्ञानिनां फलञ्चैतदेव निर्णीतं, नात्र प्रमाणं वक्तव्यमित्यर्थः इत्येषा। नामकीर्त्तनञ्चेदमुच्चैरेव प्रशस्तं, नामान्यनन्तस्य हतत्रपः पठन् इत्यादेः। तत्र पाद्मोक्ता दशाप्यपराधा परित्याज्याः। यथा श्रीसनत्कुमारवाक्यम्—सर्व्वापराधकृदपि मुच्यते हरिसंश्रयः। हरेरप्यपराधान् यः कुर्य्याद्द्विपदपांशुलः॥ नामाश्रयः कदाचित् स्यात् तरत्येव स नामतः। नाम्नोऽपि सर्व्वसुहृदो ह्यपराधात् पतत्यधः॥ इति। अपराधाश्चैते—सतां निन्दा नाम्नः परममपराधं वितनुते यतः ख्यातिं यातं कथमु सहते तद्विगर्हाम् (१)। शिवस्य श्रीविष्णोर्य इह गुणनामादिकमलं धिया भिन्नं पश्येत् स खलु हरिनामाहितकरः (२)॥ गुरोरवज्ञा (३) श्रुतिशास्त्रनिन्दनम् (४) तथार्थवादो हरिनाम्नि (५) कल्पनम् (६)। नाम्नो बलाद् यस्य हि पापबुद्धिर्न विद्यते तस्य यमैर्हि शुद्धिः (७)॥ धर्म्मव्रतत्यागहुतादिसर्व्वशुभक्रियासाम्यमपि प्रमादः (८)। अश्रद्दधाने विमुखेऽप्यशृण्वति यश्चोपदेशः शिवनामापराधः (९)॥ श्रुत्वापि नाममाहात्म्यं यः प्रीतिरहितोऽधमः। अहंममादिपरमो नाम्नि सोऽप्यपराधकृत् (१०)॥ इति। अत्र सर्वापराधकृदपि इत्यादौ श्रीविष्णुयामलवाक्यमप्यनुसन्धेयम्—मम नामानि लोकेऽस्मिन् श्रद्धया यस्तु कीर्त्तयेत्। यस्यापराधकोटीस्तु क्षमाम्येव न संशयः॥ इति। सतां निन्देत्यनेन हिंसादीनां वचनागोचरत्वं दर्शितम्। निन्दादयस्तु यथा स्कान्दे मार्कण्डेयभगीरथसंवादे—निन्दां कुर्व्वन्ति ये मूढा वैष्णवानां महात्मनाम्। पतन्ति पितृभिः सार्द्धं महारौरवसंज्ञिते॥ हन्ति निन्दति वै द्वेष्टि वैष्णवान्नाभिनन्दति। क्रुध्यते याति नो हर्षं दर्शने पतनानि षट्॥ इति। तन्निन्दाश्रवणेऽपि दोष उक्तः—निन्दां भगवतः शृण्वंस्तत्परस्य जनस्य वा। ततो नापैति यः सोऽपि यात्यधः सुकृताच्च्युतः॥ इति। ततोऽपगमश्चासमर्थस्यैव, समर्थेन तु निन्दकस्य जिह्वा छेत्तव्या, तत्राप्यसमर्थेन तु स्वप्राणपरित्यागोऽपि कर्त्तव्यः। यथोक्तं देव्या—कर्णौ पिधाय निरियाद्यदकल्प ईशे धर्म्मावितर्य्यसृणिभिर्नृभिरस्यमाने। छिन्द्यात् प्रसह्य रुषतीमसतां प्रभुश्चेज्जिह्वामसूनपि ततो विसृजेत् स धर्म्मः॥ इति। शिवस्य श्रीविष्णोः इत्यत्रैवमनुसन्धेयम्—श्रूयते हि—यद्यद्विभूतिमत् सत्त्वं मम तेजोंशसम्भवम् इति, ब्रह्मा भवोऽमहपि यस्य कलाः कलायाः इति, यत्पादनिसृतसरिद्प्रवरोदकेन तीर्थेन मूर्द्धन्यधिकृतेन शिवः शिवोऽभूत् इति, सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः।विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्॥ इति। तथा माध्वभाष्यधृतानि वचनानि ब्रह्माण्डे—रुजं द्रावयते यस्माद्रुद्रस्तस्माज्जनार्द्दनः। ईशनादेव चेशानो महादेवो महत्त्वतः॥ पिबन्ति ये नरा नाकं मुक्ताः संसारसागरात्। तदाधारो यतो विष्णुः पिनाकीति ततः स्मृतः॥ शिवः सुखात्मकत्वेन सर्व्वसंरोधनाद्धरः। कृत्त्यात्मकमिमं देहं यतो वस्ते प्रवर्त्तयन्॥ कृत्तिवासास्ततो देवो विरिञ्चिश्च विरेचनात्। बृंहणाद्ब्रह्मनामासावैश्वर्य्यादिन्द्र उच्यते॥ एवं नानाविधैः शब्दैरेक एव त्रिविक्रमः। वेदेषु च पुराणेषु गीयते पुरुषोत्तमः॥ इति। वामने न तु नारायणादीनां नाम्नामन्यत्र सम्भवः। अन्यनाम्नां गतिर्विष्णुरेक एव प्रकीर्त्तितः॥ इति। स्कान्दे—ऋते नारायणादीनि नामानि पुरुषोत्तमः। अदादन्यत्र भगवान् राजेवर्त्ते स्वकं पुरम् (वपुः)॥ इति। ब्राह्मे—चतुर्मुखः शतानन्दो ब्रह्मणः पद्मभूरिति। उग्रो भस्मधरो नग्नः कपालीति शिवस्य च। विशेषनामानि ददौ स्वकीयान्यपि केशवः॥ इति। तदेवं श्रीविष्णोः सर्व्वात्मकत्वेन प्रसिद्धात्तस्मात् सकाशाच्छिवस्य गुणनामादिकं भिन्नं शक्त्यान्तरसिद्धमिति यो धियापि पश्येदित्यर्थः। द्वयोरभेदतात्पर्य्येण षष्ठ्यन्तत्वे सति श्रीविष्णोश्चेत्यपेक्ष्य च शब्दः क्रियेत। तत्प्राधान्यविवक्षयैव श्रीशब्दश्च तत्रैव दत्तः। अत एव शिवनामापराधः इति शिवशब्देन मुख्यतया श्रीविष्णुरेव प्रतिपादित इत्यभिप्रेतम्। सहस्रनामादौ च स्थाणुशिवादिशब्दास्तथैव। अथ गुरोरवज्ञा अनादरः। अथ श्रुतिशास्त्रनिन्दनं, यथा—पाखण्डमार्गेण दत्तात्रेयर्षभदेवोपासकानां पाखण्डिनाम्। अथार्थवादः—स्तुतिमात्रमिदमिति मननम्। कल्पनं—तन्माहात्म्यगौणताकरणाय गत्यन्तरचिन्तनम्। यथोक्तं कौर्म्मे व्यासगीतायाम्—देवद्रोहाद्गुरुद्रोहः कोटिकोटिगुणाधिकः। ज्ञानापवादो नास्तिक्यं तस्मात् कोटिगुणाधिकम्॥ इति। यत्तु श्रीविष्णुपार्षदेभ्यः श्रुतनाममाहात्म्यस्याजामिलस्य—सोऽहं व्यक्तं पतिष्यामि नरके भृशदारुणे इत्येतद्वाक्यं, तत् खलु स्वदौरात्म्यमात्रदृष्ट्या। नाममाहात्म्यदृष्ट्या त्वग्रे वक्ष्यते—अथापि मे दुर्भगस्य इत्यादिद्वयम्। नाम्नो बलादिति—यद्यपि भवेनाम्नो बलेनापि कृतस्य पापस्य तेन नाम्ना क्षयः, तथापि येन नाम्नो बलेन परमपुरुषार्थस्वरूपं सच्चिदानन्दसान्द्रं साक्षात् श्रीभगवच्चरणारविन्दं साधयितुं प्रवृत्तस्तेनैव परमघृणास्पदं पापं विषयं साधयतीति परमदौरात्म्यं, ततः कदर्थयत्येव तन्नाम चेति, ततः पापकोटिमहत्तमस्यापराधस्यापातो बाढ़मेव, ततो यमैः बहुभिर्यमनियमादिभिः कृतप्रायश्चित्तस्य क्रमेण प्राप्ताधिकारैरनेकैरपि दण्डधरैर्वा कृतदण्डस्य तस्य शुद्ध्यभावो युक्त एव, नामापराधयुक्तानाम् इत्यादिवक्ष्यमाणानुसारेण [illegible]
प्रवृत्तिस्तु लोकोपद्रवशान्ति तदीयासुरभावखण्डनञ्चेच्छूनामृषीणामाज्ञाकृततत्त्वान्न दोष इति मन्तव्यम्। अथ धर्म्मव्रतत्यागेति—धर्म्मादिभिः साम्यमननमपि प्रमादः अपराधो भवतीत्यर्थः। अत एव—वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः। तावन्ति हरि-

नामानि कीर्त्तितानि न संशयः इत्यतिदेशेनापि नाम्न एव माहात्म्यमायाति । उक्तं हि—मधुरमधुरमेतत् इत्यादौ सकलनिगमवल्लीसत्फलम् इति । तथा श्रीविष्णुधर्मे—ऋग्वेदो हि यजुर्व्वेदः सामवेदोऽप्यथर्व्वणः । अधीतास्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥ स्कान्दे पार्व्वत्युक्तौ–मा ऋचो मा यजुस्तात मा साम पठ किञ्चन । गोविन्देति हरेर्नाम गेयं गायस्व नित्यशः ॥ पाद्मे श्रीरामाष्टोत्तरशतनामस्तोत्रे—विष्णोरेकैकनामापि सर्व्ववेदाधिकं स्मृतम् इति । अथाश्रद्दधाने इत्यादिनोपदेष्टुरपराधं दर्शयित्वोपदेश्यस्याह श्रुत्वेति । यतः अहं ममादिपरमः अहन्ताममताद्येकतात्पर्य्यत्वेन तस्मिन्ननादरवान् इत्यर्थः । नामैकं यस्य वाचि स्मरणपथगतम् इत्यादौ देहद्रविणादिनिमित्तकपाखण्डशब्देन च दशापराधा लक्ष्यन्ते, पाखण्डमयत्वात् तेषाम् । तथा तद्विधानामेवापराधानन्तरमुक्तं पाद्मे वैशाखमाहात्म्ये—अवमन्य च ये यान्ति भगवत्कीर्त्तनं नराः । ते यान्ति नरकं घोरं तेन पापेन कर्म्मणा ॥ इति । एतेषाञ्चापराधानामनन्यप्रायश्चित्तत्वमेवोक्तं तत्रैव—नामापराधयुक्तानां नामान्येव हरन्त्यघम् । अविश्रान्तिप्रयुक्तानि तान्येवार्थकराणि च ॥ इति । अत्र सत्प्रभृतिष्वपराधे तु तत्सन्तोषणार्थमेव सन्ततनामकीर्त्तनादिकं समुचितम्, अम्बरीषचरितादौ तदेकक्षम्यत्वेनापराधानां दर्शनात् । उक्तञ्च नामकौमुद्याम्—महदपराधस्य भोग एव निवर्त्तकस्तदनुग्रहो वा इति । तस्माद् गत्यन्तराभावात् साधूक्तम्—एतन्निर्विद्यमानानामिति । तत्राभास एव द्रष्टव्यः ॥ ११ ॥ ❀ ❀ किमित्यस्य टीकायां माशुच इति माशोचीरित्यर्थः । श्रेयसे नामकीर्त्तनादिरूपाय ॥ १२ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

ननु त्वमतिप्रसिद्धो जन्मत एव ब्रह्मानुभवी गृहात् परिव्रज्य गतोऽनुव्रजन्तं पितरमपि नैव पर्य्यचैषीः सम्प्रति कथमेवं ब्रूष इत्यत आह परिनिष्ठित इति । गृहीतचेताः आकृष्टचित्तः । ब्रह्मानुभवादपि लीलाया माधुर्य्याधिक्येऽहमेव प्रमाणमिति भावः ॥९॥ ❀ ❀ तर्हीदमपूर्व्वं वस्त्वहमपि लभेयेत्यत आमूलचूलमेव मामेनदेवास्वादयेत्याकांक्षायामाह तदहमिति । महापुरुषं कृष्णं प्राप्तुमर्हतीति महापौरुषिकः । यद्वा विनयादित्वात् स्वार्थे ठक् उत्तरपदवृद्धिः । यस्य यस्मिन् श्रीभागवते । यद्वा श्रद्दधतां मध्ये यस्य तव मतिः सती । ततश्च जन्माद्यस्य इत्यारभ्य विष्णुरातममूमुचदित्यन्तं सर्वमेव श्रीभागवतं श्रावयामासेति ज्ञेयम् । अत एव प्रथमद्वादशयोरपि शुकप्रोक्तत्वे अम्बरीषशुकप्रोक्तं नित्यं भागवतं शृणु इति वचनं सम्यगुपपद्यते ॥१०॥ ❀ ❀ नन्वत्र शास्त्रे भक्तेरभिधेयतावगमादेव तत्रापि भक्त्यङ्गेषु मध्ये महाराजचक्रवर्त्तिवत् किमेकं मुख्यत्वेन निर्णीयते तत्राह नामानुकीर्त्तनमिति । सर्वेषु भक्त्यङ्गेषु मध्ये श्रवणकीर्तनस्मरणानि त्रीणि मुख्यानि तस्माद्भारत इति श्लोकेनोक्तानि तेषु त्रिष्वपि मध्ये कीर्तनं, कीर्तनेऽपि नामलीलागुणादिसम्बन्धिनि तस्मिन् नामकीर्तनं, तत्राप्यनुकीर्त्तनं स्वभक्त्यनुरूपनामकीर्तनं निरन्तरकीर्तनं वा निर्णीतं पूर्वाचार्य्यैरपि, न केवलं मयैवाधुना निर्णीयत इति तेनात्र प्रमाणं न प्रष्टव्यमिति भावः । कीदृशम् अकुतोभयमिति । कालदेशपात्रोपकरणादिशुद्ध्यशुद्धिगतभयाभावस्य का वार्त्ता भगवत्सेवादिकमसहमाना म्लेच्छा अपि यत्र नैव विप्रतिपद्यन्त इति भावः । किञ्च साधकानां सिद्धानाञ्च नातः परमधिकं श्रेय इत्याह निर्विद्यमानानाम् अर्थान्मोक्षपर्य्यन्तसर्वकामेभ्य इति । इच्छताम् इति अर्थात्तानेव कामानिति प्रविश्य पिण्डीभितिवल्लभ्यते । ततश्च निर्विद्यमानानाम् एकान्तभक्तानाम् इच्छतां स्वर्गमोक्षादिकामिनां योगिनाम् आत्मारामाणाञ्च एतदेव निर्णीतं यथायोग्यं साधनत्वेन फलत्वेन चेति भावः ॥ ११ ॥ ❀ ❀ हन्त हन्ताल्पमेवायुरवशिष्टं किमहं साधयेयम् इति माशुच इत्याह किमिति त्रिभिः । परोक्षैः वृथा यान्तीत्यविदितैर्हायनैर्वर्षैः । विदितं तु मुहूर्त्तमपि वरम् । यतः येन वेदनेन घटेत सयत्नो भवेत् ॥ १२ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

नैर्गुण्ये प्राकृतगुणसम्बन्धरहिते मङ्गलगुणगणार्णवे परिनिष्ठितोपि यदर्थः शास्त्राध्ययनादिव्यापारस्तां ध्याननिष्ठां प्राप्तोऽपि उत्तमकीर्त्तेर्भगवतो लीलया गृहीतं चेतो यस्य सः । यदाख्यानमधीतवानस्मि तदभिधास्यामीत्युत्तरेणान्वयः ॥ ९ ॥ ❀ ❀ तदाख्यानन्ते तुभ्यमहमभिधास्यामि कथयिष्यामि यतो भवान् वेदाहमेतं पुरुषम् महान्तमिति श्रुतिप्रोक्तो महापुरुषो भगवांस्तदीयः आख्यानश्रवणकथनादेः फलङ्कैमुतिकन्यायेनाह । यत्रेति यस्मिन् । श्रद्दधतां श्रद्धां कुर्वताम् मुकुन्दे मुक्तिप्रदे सत्यभिचारिणी मतिःस्यात् । तद्गुणश्रवणादिद्वारा अनन्यविषया भक्तिर्भवेत् ॥ १० ॥ ❀ ❀ किञ्च हे नृप ! संसारान्निर्विण्णानां योगत्रयनिष्ठानामकुतोभयं मोक्षमिच्छतामभयसाधनमेतदेव किन्तत् हरेर्नामानुकीर्तनम् इदं गुणस्वरूपादि श्रवणमननादेरप्युपलक्षणम् ॥ ११ ॥ ❀ ❀ अल्पायुरधुना किं करिष्यामीतिसंशयं माकुर्वित्याह । किमिति त्रिभिः प्रमत्तस्य देहाद्यासक्तस्य परोक्षैरविदितैर्बहुभिरपि हायनैः संवत्सरैः किं फलं भवेन्न किमपीत्यर्थः विदितन्तु । इदमवशिष्टं तद्वृथा मा भवतु इत्येवं ज्ञातन्तु मुहूर्तमपि वरं श्रेष्ठं यतो येन विदितेन श्रेयस्कामः श्रेयसे घटेत यजेत ॥ १२ ॥

## श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

नन्वस्याऽध्ययनस्य[1] वेदवत्सामग्रीश्रवणादिदमपि विचार्यमेव। अतो नाऽनेन केवलेन निर्द्धारितार्थः प्रतिपत्तुं शक्य इत्याशङ्कयाऽऽह—**परिनिष्ठितोऽपीति।** ममाऽध्ययनं न बालवत्। किन्तु विचारपूर्वकम्। प्रथमतोऽधिकार एव मया विचारितः। ममेदं कर्त्तव्यं नवेति। तत्र सर्वस्याऽप्यध्ययनस्य—"आत्मलाभान्न परं विद्यत"—इत्यादिश्रुतिभिरात्मपर्यवसानाद्गुणातीतसमाधिरूपे नित्यं स्थितः सन्। भागवतस्य च रसमनुभूय तस्याऽप्राकृतत्वं ज्ञात्वा यथा ब्रह्मणि लीनो न समाध्यवस्थां भजते[2] तथा ब्रह्मरसादप्यधिक[3]रसत्वाद्गुणैर्गृहीतचेताः आख्यानमधीतवान्। आकरस्थो यो रसः स स्वस्थाने स्थितः स्वस्मिन्नागतान्प्रति न स्वात्मानं तथा प्रकाशयति। किन्तु केवलधर्मरूपेण प्रकटः। नृत्ये पात्रस्थपेयजले च दर्शनात्। यदा भगवाँल्लीलारूपेण प्रकटो जातस्तदा तस्यां लीलायां यो रसः स एव रसो ब्रह्मणि परं नाऽभिव्यक्त इति निश्चित्य किमर्थं तदाशया स्थीयते तदपेक्षयाऽपीदानीमेव रसः कथं न पीयत इति विचारसहितलीलया गृहीतचित्तत्वम्। इममर्थमाह—**उत्तमश्लोकेति।** उत्तमैः श्लोक्यत इति भगवानुत्तमश्लोकः। गुणकरणादेव भगवतः स्तोत्रमपि जनैः सह सम्बन्धोऽपि। तस्माद्यः कश्चन भगवत्स्वरूपात्मको रसो निरतिशयत्वेऽपि सातिशयः स्वाऽभिव्यक्त्या भोक्तव्य इति येषामिच्छा तैर्लीला श्रोतव्येति निर्द्धार्य मया श्रोतव्यरसाभिज्ञेन आख्यानमधीतमित्यर्थः। **राजर्षे** इति सम्बोधनं यथा ऋषिदशायां राजत्वरसस्फूर्त्तिरधिका ज्ञानमिश्रत्वान्मान्यताधिक्याच्च तथेदमपीति युक्तौ सम्मतिरुक्ता। अनेन मर्यादात्वेऽपि पुष्टिरूपमिदमित्युक्तम् ॥ ९ ॥ ❀ ❀ अतस्तादृशैरेव श्रोतव्यमिति कीर्त्तनरसास्वादनार्थं परिभ्रमता मया तादृशो भवानुपलब्धः। अतस्तदहं तेऽभिधास्यामीत्याह—**तदहमिति।** तत्पूर्वोक्तमुद्धृतब्रह्मामृतरसभूतमहं कीर्त्तनरसप्रेप्सुस्ते तादृशाय तुभ्यमभिधास्यामि कथयिष्यामि। अथवा[4]। ते त्वत्सम्बन्धिभूतं तत्त्वयि स्थापयित्वाऽहमेवाऽभितः सर्वतो धास्यामि पास्यामीत्यर्थः। पीतस्य पुना रसास्वादनं निष्काश्याऽन्यत्र स्थापयित्वा पुनः पाने भवति। इदं तु गजेषूपलब्धम्। अभितश्च पानं सेचनादिरूपम्। द्वैपायनपदस्याऽप्येतत्सूचकत्वम्। द्विर्गता आपो यत्रेति तद्भवत्वादन्तर्बहिः पाता उक्तः। अन्तःस्थबहिःस्थयोश्च गुणयोः। अतः सूक्ष्मरूपभागवतद्वयं बहिः स्थितं भगवता ब्रह्मणा च प्रकटितमन्तःप्रवेश्य पुनः प्रकटितवान्। अत एवोत्पत्त्या चोपपत्त्या च भगवद्गुणानां स्वरूपविचारे तदुभयमुदाहृतम्। अन्यथा ब्रह्मणाऽनुभूयमानो भगवान् किमिति स्वगुणप्रकाशकं भागवतं वदेत्। सोऽपि नारदाय कथं वदेत्। अत उपपत्त्या भगवदपेक्षया गुणा अधिका निरूपिताः। उत्पत्तौ च अन्तःप्रविष्टा अपि ते गुणाः पुनर्बहिः कृताः। अतस्तेऽभिधास्यामीति सिद्धम्। ननु कथमहमत्राऽधिकारीत्याकाङ्क्षायामाह—**महापौरुषिको भवानिति।** महापुरुषस्य सम्बन्धी महापौरुषिकः। महापुरुषो हि कीर्त्या। कीर्त्तिश्च गुणात्। तदीयत्वं च गुणास्वादनयोग्यतयैव। अन्यथा तादृशधर्मवतः सम्बन्धी न स्यात्। **भवानिति।** नाऽत्र तिरोहितमिव। एवं भगवद्गुणानामाधिक्यमुक्त्वा तेषां फलमाह—**यस्येति।** यस्याऽऽख्यानस्य सम्बन्धिनी या श्रद्धा तद्युक्तानां मोक्षदातरि स्वानन्ददायके सती पतिव्रतारूपा तदेकरसास्वादिनी मतिर्भवति ॥ १० ॥ ❀ ❀ एवं स्वरूपं फलं चोक्त्वा तत्र स्वमात्रविचारतां दूरीकर्त्तुं सर्वेषामेव विचारकाणां सम्मतिमाह—**एतदिति।** अत्र सर्वैरेवैतन्निर्णीतम्। एतद् भगवद्गुणानुकथनरूपम्। निर्विद्यमानानां विरक्तीच्छूनां विरक्तिं वाऽभ्यसताम्। अकुतोभयं ब्रह्मानन्दमिच्छताम्। तदर्थं योगादिकं च कुर्वताम्। एतन्निर्णीतं यद्धरेर्नामानुकीर्त्तनम्। तैर्वा तेषामर्थे वा। प्रथमतो विरक्ता ब्रह्मानन्दप्रेप्सवस्तद्रसञ्च योगेनाऽनुभवन्तस्तादृशं रसं तत्राऽननुभूय तत्प्रकटस्थानं भगवन्नाम। हरित्वात्पूर्वक्लेशं दूरीकुर्वन्नेव तद्रसं पाययतीति। तन्नाम्नां पूर्वोक्तप्रकारेण तद्रसाभिव्यक्तियुक्तानां प्रथमं पानं कृत्वा पश्चादनुकीर्त्तनं कर्त्तव्यमिति शास्त्रार्थनिर्द्धारः। अतो भवानहं च महारसे पतितावित्युभयोरुत्तमाधिकारिणोः परमोत्साहः सूचितः ॥ ११ ॥ ❀ ❀ एवं गुणकथनश्रवणरसं श्रुत्वा स्वस्य शापेन शीघ्रमरणमनुस्मृत्य तादृशरसास्वादनाभावाद्विषीदन्तं राजानं प्रत्याह—**किं प्रमत्तस्येति।** साधनीभूतमायुर्नाऽस्तीति विषादो न कर्त्तव्यः। यथा साकाङ्क्षस्याऽधिकारिणो रसाभिव्यक्तिस्तथा जीवनेयत्तापरिज्ञानरहितस्याऽनधिकारिणो नाऽभिव्यक्तिः। अतो जीवनेयत्ताज्ञापकः शाप उत्तम एव। अल्पता चोत्तमा। उत्तरावधेर्नैकट्यात्। आस्वाद्य परमरसं तस्मिन् रसे प्रवेशान्न पश्चात्तापः। अतः प्रमत्तस्य स्वार्थेऽनवहितस्य बहुभिरपि हायनैर्वर्षैरज्ञातैर्न किञ्चित्फलम्। ज्ञातं तु मुहूर्त्तमपि वरं पुरुषार्थसाधकम्। यतो ज्ञानात्तेनाऽपि क्षणेन पुरुषार्थसाधनाय घटेत ॥ १२ ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः

परिनिष्ठित इत्यत्र। अत इति। निगूढाशयत्वात्। आहेति। निर्धारितार्थप्रतिपत्तिजनकत्वाय स्वानुभवमपि तत्र प्रमाणयितुं स्वस्यैतज्ज्ञानप्रकारमाहेत्यर्थः। **गुणैरिति।** लीलाभिः। अत्र गृहीतचेता इति विशेषणेन श्रवणद्वारा श्रीभागवतरसानुभावो ध्वन्यते, तेन चोपादानबुद्धिगोचरत्वान्मम वचनैस्तव निर्धारितार्थप्रतिपत्तिः सुकरेति बोध्यते। तदुपपादयाहुः आकरस्थ इत्यादिना। स्तोत्रमिति स्तुत्यता। **स्वाभिव्यक्तयेति।** स्वस्मिन् भगवत्प्राकट्येन। फलितमाहुः **अनेने**त्यादि। उक्ताधिकारवत्त्वेऽपि लीलागृहीतचित्तत्वकथनेन, ईदृशं स्वाधिकारस्वरूपमुक्तमित्यर्थः ॥ ९ ॥ ❀ ❀ **तदहमित्यत्र।** अत इति। यत ईदृशी मदुपरि कृपा, तज्जन्योऽनुभवश्चैतादृशेष्वेव प्रमितिजनक अत इत्यर्थः। अत इति समानशीलत्वात्। ननु निरपेक्षस्य भवतः कथने किं प्रयोजनमतः

---

१. अध्यापनस्येति क। २. भजेतेति ख। ३. अधिकारसत्वादिति क। ४. अथ चेति क. ख.

आहुः **अथेति** । **अथ** चेत्यादिनोक्तमर्थमुपादयन्ति । **पीतस्येत्यादि सिद्धमित्यन्तम्** । वान्तत्वदोषपरिहारायोदाहरणमाहुः **इदमि**-त्यादि । अत्र सेचनादेः पानत्वकथनमन्तःप्रवेशकत्वसाधर्म्येण गौण्या ज्ञेयम् । 'नेत्राञ्जलिभिः पपु' रितिवत् । नन्वयं पानार्थक एव प्रयोग इति कथं निश्चेयमित्यत आहुः **द्वैपायनेत्यादि** । अन्यथा पितृपदेनैव चारितार्थ्यादिदं न वदेत्, पदान्तरं वा वदेदतस्तथे-त्यर्थः । कथमेतस्य तत्सूचकत्वमित्यत आहुः **द्विर्गता इत्यादि** । द्वैपायनपदगर्भस्थबहुव्रीहिणा द्विविधौ गुणौ सूच्येते, तद्धितेन च द्विविधं पातृत्वं तदुदाहृत्य दर्शयन्ति **अत इत्यादि** । **अत इति** । द्विधा द्वयोः पातृत्वात् । अत्र भगवत्प्रकटितमन्तःस्थगुणप्रकाशकम्, ब्रह्म प्रकटितं बहिष्ठगुणप्रकाशकम् । पुनः प्रकटनं च बहिः पानरूपमिति ज्ञेयम् । तेन द्वैपायनपदस्यैतत्सूचकत्वमित्यर्थः । **अत एवेति** । गुणद्वैविध्यप्रकाशनार्थत्वादेव । **अत एवेति** । गुणानां द्वैविध्यादेव । सिद्धमाहुः **अत इत्यादि** । अतः कथनं विना दर्शनमात्रेण ज्ञातुमशक्यत्वबोधनाद् गुणा भगवदपेक्ष्यात्यन्तमुपकारका उक्ताः उत्पत्तौ च बहिः प्रकटिताः । अतो गुणद्वैविध्यस्य पानद्वैविध्यस्य च परम्पराप्राप्तत्वा 'त्तेऽभिधिस्यामी' त्यनेन बोधितं गुणद्वैविध्यं पानद्वैविध्यं च निर्विवादमित्यर्थः । **इत्याकाङ्क्षायामाहेति** । योग्य-तामाहेत्यर्थः । एवमत्र प्रथमे स्वस्वरूपकथनेनोक्तार्थे स्वानुभवः प्रमाणत्वेनोक्तः, द्वितीये च फलकथनेन राज्ञः प्रतिपत्तिसौकर्ये उपाय उक्तः ॥ १० ॥ ❀ ❀ एतदित्यत्र । **तैर्वेति** । 'कर्तृकर्मणोः कृती' ति कर्तृषष्ठ्या तथेत्यर्थः । कथं तेषां निर्णेतृत्वमित्याकाङ्क्षायां व्याख्यानमुखेनाहुः **प्रथमत इत्यादि** ॥ ११ ॥ ❀ ❀ **किं प्रमत्तस्येत्यत्र** । **आहेति** । श्रोतृविषादस्य वक्तृद्वेगजनकत्वेन रसानुभव-प्रतिबन्धकत्वात्तन्निवारणायाश्वासनमाहेत्यर्थः । **अत इति** । आकाङ्क्षाजनकत्वात् ॥ १२ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

ननु ब्रह्मिष्ठस्य तव कथमेतदध्ययने प्रवृत्तिस्तत्राह—परिनिष्ठित इति । नैर्गुण्ये गुणातीते ब्रह्मणि परिनिष्ठितः पर्यवसितान्तः-करणोऽपि अहमुत्तमश्लोकस्य उत्तमैरुपगीयमानयशसो विघ्न[1]निवर्तकयशसो वा भगवतो लीलया गृहीतचेता आकृष्टचित्तो यदिद-माख्यानं श्रीभागवताख्यं अधीतवानस्मि तदहं ते तुभ्यमभिधास्यामि कथयिष्यामीत्युत्तरेणान्वयः । ब्रह्मानन्दे स्थितस्यापि भजनानन्द आकर्षक इति तु तवापि सिद्धमिति सूचयन् सम्बोधयति—हे राजर्षे इति ॥ ९ ॥ ❀ ❀ ननु मम[2] कथने को हेतुरिति चेद्धीकारि-त्वमेवेत्याह—तदिति । यतो भगवान् महापौरुषिको महापुरुषो भगवान् स सेव्यतया अस्यास्तीति महापौरुषिको भगवद्भक्तः । कैमु-त्यन्यायेन तच्छ्रवणफलमाह—यस्येति । यत्र श्रद्दधतां श्रद्धां कुर्वतामेव मुकुंदे मोक्षप्रदे भगवति सती संसारदुःखनिवर्तिका अहैतुकी निश्चला मतिर्भक्तिराशु शीघ्रमेव स्यादित्यन्वयः ॥ १० ॥ ❀ ❀ मुमुक्षूणामतः श्रेष्ठमन्यत्साधनं नास्तीत्याह—एतदिति । सर्वजनपालकस्य तवापि श्रवणादिना एतत्प्रवर्तकत्वमेवोचितमिति सूचयन् सम्बोधयति—हे नृपेति । निर्विद्यमानानां आध्यात्मि-कादितापत्रयाभिभवहेतुकनिर्वेदं वैराग्यं प्राप्तानां अतएवाभयं पदमिच्छतां अतएव योगिनां तत्प्राप्त्युपायपराणां तत्प्राप्तिसाधनत्वे-नैतद्धरेर्नामानुकीर्तनमेव वृद्धैर्निर्णीतं निर्णयपूर्वकमुक्तमतो नात्र प्रमाणं वक्तव्यमिति शेषेणान्वयः ॥ ११ ॥ ❀ ❀ इदानीमल्पमेवा-युरवशिष्टं तेन किमहं साधयेयमिति शोचन्तं प्रत्याह—किमिति त्रिभिः । प्रमत्तस्य देहापत्यकलत्रादिष्वासक्ततया कर्त्तव्यानुस-न्धानरहितस्य परोक्षैरज्ञाततया गतैर्बहुभिरपि हायनैः संवत्सरैरिह मनुष्यजन्मनि किं किं प्रयोजनं सिद्ध्यति ? न किञ्चिदपीत्यर्थः । देहादीनां नश्वरतया स्वभावानपायाद्वृथैव श्रम इति भावः । विदितं वृथैव यातीति ज्ञातं तु मुहूर्त्तमपि वरं श्रेष्ठम्, यतो येन विदितेन मुहूर्तेन श्रेयसे मोक्षाय घटेत यत्नं कुर्यात् ॥ १२ ॥

## हिन्दी अनुवाद

राजर्षे! मेरी निर्गुणस्वरूप परमात्मामें पूर्ण निष्ठा है। फिर भी भगवान् श्रीकृष्णकी मधुर लीलाओंने बलात् मेरे हृदयको अपनी ओर आकर्षितकर लिया। यही कारण है कि मैंने इस पुराणका अध्ययन किया ॥ ९ ॥ ❀ ❀ तुम भगवान्के परम भक्त हो, इसलिये तुम्हें मैं इसे सुनाऊँगा। जो इसके प्रति श्रद्धा रखते हैं, उनकी शुद्ध चित्तवृत्ति भगवान् श्री कृष्णके चरणोंमें अनन्य प्रेमके साथ बहुत शीघ्र लग जाती है ॥ १० ॥ ❀ ❀ जो लोग लोक या परलोककी किसी भी वस्तुकी इच्छा रखते हैं, या इसके विपरीत संसारमें दुःखका अनुभव करके जो उससे विरक्त हो गये हैं और निर्भय मोक्ष-पदको प्राप्त करना चाहते हैं, उन साधकोंके लिये तथा योगसम्पन्न सिद्ध ज्ञानियोंके लिये भी समस्त शास्त्रोंका यही निर्णय है कि वे भगवान्के नामोंका प्रेमसे संकीर्तन करें ॥ ११ ॥ ❀ ❀ अपने कल्याण-साधनकी ओरसे असावधान रहनेवाले पुरुषकी वर्षों लम्बी आयु भी अनजानमें ही व्यर्थ बीत जाती है। उससे क्या लाभ? सावधानीसे ज्ञानपूर्वक बितायी हुई घड़ी दो घड़ी भी श्रेष्ठ है; क्योंकि उसके द्वारा अपने कल्याण की चेष्टा तो की जा सकती है ॥ १२ ॥

---

१. अस्मिन्पक्षे द्वेकारको निर्देश इति विशेषः। २. मह्यं कथने इति क-ख-पुस्तकपाठः।

खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः ।
मुहूर्तात् सर्वमुत्सृज्य गतवानभयं हरिम् ॥ १३ ॥
तवाप्येतर्हि कौरव्य सप्ताहं जीवितावधिः ।
उपकल्पय तत् सर्वं तावद्यत् साम्परायिकम् ॥ १४ ॥
अन्तकाले तु[1] पुरुष आगते गतसाध्वसः ।
छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु[2] ये च तम् ॥ १५ ॥
गृहात् प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः[3] ।
शुचौ विविक्त आसीनो विधिवत् कल्पितासने ॥ १६ ॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

खट्वांगो हि देवपक्षे स्थित्वा दैत्यानजयन् । ततः प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्तोऽतस्तेनोक्तं प्रथमं तावन्ममायुः कथ्यतामिति । ततो देवैरुक्तं तत्तु मुहूर्तमात्रमस्तीति । ततोऽतिशीघ्रं विमानेन भुवमागत्य हरिं शरणं गत इति । यत इयं स्वर्गभूमी रजोधिका कर्मभूमिः पृथ्वी ॥ १३ ॥ ❀ ❀ तव तु एतर्ह्यपीदानीमपि । तावदिति । तावता कालेन सांपरायिकं पारलौकिकं साधनं संपादय ॥ १४ ॥ ❀ ❀ तत्र वैराग्यं तावदाह । अंतकाल इति । गतसाध्वसो मृत्युभयशून्यः असंगो नामानासक्तिः तेन शस्त्रेण स्पृहां सुखेच्छां तं देहमनु ये पुत्रकलत्रादयस्तेष्वपि स्पृहां छिंद्यात् ॥ १५ ॥ ❀ ❀ किं च गृहात्प्रव्रजितो निर्गतः गृहे स्थितस्य पुनरप्यासक्तिसंभवात् । तत्राष्टांगयोगमाह । धीर इति ब्रह्मचर्यादियमोपलक्षणम् । पुण्यतीर्थेति स्नानादिनियमोपलक्षणम् । आसनमाह । शुचाविति । विविक्ते एकांते विधिवत्कुशाजिनचैलैः क्रमेण निर्मिते ॥ १६ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अत्र खट्वांगचरितं प्रमाणयति । खट्वांग इति ॥ १३ ॥ ❀ ❀ कौरव्येति । तव तु राज्ञः सांपरायसाधनसंपादनं न दुष्करमाज्ञयैव सर्वव्यवहारसिद्धेरिति भावः । सप्तानामह्नां समाहारः सप्ताहम् । "रात्राह्नाहाः पुंसि" इति त्वार्षत्वान्न ॥ १४ ॥ ❀ ❀ तत्रांतकाले म्रियमाणेन किं कर्त्तव्यमिति प्रश्ने योगेनैव स्वेच्छया देहं परित्यज्य सुखेनैव ब्रह्मपदं प्रवेष्टुं योगाभ्यास एव कर्त्तव्य इत्याचिख्यासूनां तन्महासदःस्थानां केषांचिन्मतमष्टांगयोगं स्वमतस्य शुद्धभक्तियोगस्य पुनरपि द्वितीयाध्यायांते वक्तव्यस्योत्कर्षार्थमाह । अंतकाल इति ॥ १५ ॥ ❀ ❀ आसन्नमरणस्यान्यदपि कृत्यमाह किञ्चेति । तत्र गृहेतरे देशे ॥ १६ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या ।

तत्राष्टाङ्गेति । योगस्याष्टावङ्गानि यथा, पातञ्जले—यम-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोऽस्यैवाङ्गानि । तत्र अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः । शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः । स्थिरसुखम् आसनम् इति ॥ १६ ॥

### श्रीमद्वीरराघवव्याख्या ।

विदितस्य मुहूर्त्तस्य श्रेयोघटकत्व इतिहासमाह । खट्वाङ्ग इति । खट्वाङ्गो हि देवपक्षे स्थित्वा दैत्यानजयत्ततः प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्ते तेनोक्तं प्रथमं ममायुः कथ्यतामिति । ततो देवैरुक्तं मुहूर्त्तमात्रमस्तीति ततः शीघ्रं विमानेन भुवमागत्य हरिं शरणं गत इति नवमस्कन्धे प्रसिद्धम् । खट्वाङ्गो नाम राजर्षिरायुष इयत्तां एतावत्तां ज्ञात्वा इदमस्मिँल्लोके सर्वं देहादिश्चात्मात्मीयत्वाद्यभिमानमुत्सृज्य हित्वाऽभयं भयप्रतिभटं हरिं गतवान्प्राप्तः ॥ १३ ॥ ❀ ❀ कैमुत्यन्यायेनाह । तवेति अपिस्त्वर्थः तव त्वित्यर्थः हे कौरव्य ! तव तु एतर्हीदानीमपि जीवितावधिर्जीवितस्यावधिः परिमाणं सप्ताहं सप्तदिनपर्यन्तं तावत् । तावता सप्ताहेन कालेन सांपरायिकं परलोकहितं एतत्सर्वं उपकल्पय सम्पादय ॥ १४ ॥ ❀ ❀ तावद्वैराग्यमाह अन्तकाल इति अन्तकाले देहावसानकाले आगते प्राप्ते सति पुरुषः गतसाध्वसः निवृत्तभयः असङ्गोऽनासक्तिः । स एव शस्त्रं तेन देहे तं देहमनु ये अनुसृत्य ये वर्त्तमाना अपत्यकलत्रादयो देहानुबन्धिनस्तेषु च स्पृहामात्मात्मीयत्वाभिमानप्रयुक्तभोगेच्छां छिन्द्यात् ॥ १५ ॥ ❀ ❀ किञ्च गृहात्प्रव्रजितः निर्गतः धीर इत्यादिना आश्रयं भद्रमीक्षत इत्यन्तेनाष्टाङ्गयोगसंक्षेपोक्तिः धीरः जितेन्द्रियः अनेन ब्रह्मचर्यादिलक्षणो यम उक्तः । पुण्यतीर्थजलेषु आप्लुतः स्नात इत्यनेन स्नानदानादिनियम उक्तः शुचौ परिशुद्धे विविक्ते एकान्ते विधिवच्चैलाजिनकुशोत्तर इति ह्युक्तक्रमेण कल्पिते आसने विधिवदासीनः ऋजुकायत्वस्वस्तिकादीनतिक्रम्योपविष्टः अनेनासनरूपांगमुक्तम् ॥ १६ ॥

---

१. प्रा० पा० ऽपि । २. प्रा० पा० देहानुयायिनीम् । ३. प्रा० पा० परिप्लुतः ।

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

एतमर्थमाख्यानेन द्रढयति खट्वाङ्ग इति । नामशब्दः प्रख्यात्यर्थे इह मनुष्यलोके मुहूर्तात्पूर्वमायुष इयत्तां मर्यादां ज्ञात्वा राज्यादिसङ्गमुत्सृज्य हरिमुद्दिश्येन्द्रियाणि च दत्त्वाऽभयलक्षणं मोक्षं गतवानित्यन्वयः "त्यागो विहायितन्दानमुत्सर्जनविसर्जन" इत्यभिधानं अभयं पुरुषार्थरूपं हरिं गतवानिति वा ॥ १३ ॥ ❀ ❀ तव तदपेक्षयानेकायुष्ट्वान्महत्तापः कार्यं इत्यतस्तत्सर्वं हरिचरणारविन्दस्मरणविषयत्वेन कल्पयेत्याह तवापीति एतर्हीदानीं सप्तानामह्नां समाहारः सप्ताहं जीवितावधिरायुष्यस्येयत्ता यत्तावदायुः तत्सर्वमपि साम्पराय उत्तरकालो मुक्तिकालस्तत्सम्बन्धि यथा भवति तथा तावन्तकालं हरिचरणस्मरणगोचरमुपकल्पय भागवताकर्णने तात्पर्यं कुर्वित्यर्थः "साम्परायस्तु संग्रामआपदागामिकालयो" रिति यादवः मरणलक्षणापत्काले हरिचरणस्मरणं यथा भवति तथातावन्तं कालं भागवताकर्णनं कुर्विति वा ॥ १४ ॥ ❀ ❀ मरणकालं ज्ञात्वा हरिस्मरणमिच्छतो वैराग्यं प्रथमसाधनमित्याह अन्तकाल इति आगते स्वतः देहनाशप्रयुक्तभयरहितः पुत्रादिस्नेहलक्षणः सङ्गः तद्विरोधिविवेकज्ञानलक्षणोऽसङ्गस्तेन शस्त्रेण तं देहमनु ये स्त्रीपुत्रादयस्तेषु च स्पृहां छिन्द्यादित्यन्वयः ॥ १५ ॥ ❀ ❀ अथ किं कर्तव्यमत्राह गृहादिति गृहात् प्रव्रजितः संन्यासलक्षणवैराग्यं प्राप्तःधीरः प्रतिबन्धकनिवर्तनसमर्थः पुण्यतीर्थजलाप्लुतो भागवतादिपुण्यशास्त्रजलस्नातस्तथा गङ्गादिपुण्यतीर्थजलस्नातो निर्धूतबाह्यान्तर्मलः सन् शुचौ शुद्धे विविक्ते दुर्जनसङ्गरहिते देशे नात्युच्छ्रितन्नातिनीचमिति विधिवत्कल्पितासन आसीनो भवेदिति शेषः ॥ १६ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

खट्वाङ्ग इत्यस्य टीकायां भुवमागत्येति स्वर्गमहाविषयदर्शनेन चित्तविक्षेपात् ॥ १३ ॥ ❀ ❀ यत्तु पूर्वम् इतिलङ्घितमर्यादं तक्षकः सप्तमेऽहनि इति बहुवचनं यच्चेदानीमपि सप्ताहं जीवितावधिरिति शुकवचनं तदुभयमपि श्रीभगवतैव तत्तदागमनस्य शीघ्रघटनया घटत इति ज्ञेयम् । तत् सर्वं श्रवणकीर्त्तनादिरूपं श्रोतव्यादीनि राजेन्द्र इत्याद्युक्तेन न्यायेन न ह्यतोऽन्यः शिवः पन्था इत्यादि वक्ष्यमाणेन च ॥ १४ ॥ ❀ ❀ अत एवान्तकाले इत्यादि मध्यमं प्रकरणं केषाञ्चिदन्येषामेव साधनत्वेन ज्ञेयम् ॥ १५ ॥ ❀ ❀ गृहादिति युग्मकम् ॥ १६—१९ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

तत्र खट्वाङ्गचरितं प्रमाणयति । खट्वाङ्गो हि देवपक्षे स्थित्वा दैत्यानजयत् ततः प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्तस्तानाह प्रथमं तावन्ममायुः कथ्यतामिति तैरुक्तं मुहूर्त्तमात्रं तत् । ततस्तूष्णीमेव शीघ्रं भुवमागत्य हरिं शरणं गत इति ॥ १३ ॥ ❀ ❀ तवापि तव तु । अत एतर्ह्यपि समये यत् साम्परायिकं पारलौकिकं साधनं तत्तावत् सर्व्वम् उपकल्पय कुरु ॥ १४ ॥ ❀ ❀ तत्र म्रियमाणस्य किं कर्त्तव्यमिति प्रश्ने योगेनैव स्वेच्छया देहं परित्यज्य सुखेनैव ब्रह्मपदं प्रवेष्टुं योगाभ्यास एव कर्त्तव्य इत्याचिख्यासूनां तन्महासदःस्थानां केषाञ्चिन्मतमष्टाङ्गयोगं स्वमतस्य शुद्धभक्तियोगस्य पुनरपि द्वितीयाध्यायान्ते वक्तव्यस्योत्कर्षार्थमाह अन्तकाले इति असङ्गोऽनासक्तिः । देहं तथा तं देहम् अनु ये पुत्रकलत्रादयः तेष्वपि ॥ १५ ॥ ❀ ❀ धीर इति ब्रह्मचर्यादिर्यमः प्रथमः । पुण्यतीर्थ इति स्नानादिर्नियमो द्वितीयः । विधिवत् कुशाजिनचैलैः क्रमेण कल्पिते आसने आसीन इत्यासनं तृतीयम् ॥ १६ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

खट्वाङ्गो नाम राजर्षिर्देवमुखान्मुहूर्तमात्रं तवायुरस्तीति आयुषः । इयत्तामेतावत्तां ज्ञात्वा सर्वं राज्यादिकमुत्सृज्य तस्मादेव विदितान्मुहूर्ताद्धरिभजनरूपसाधननिष्पत्तिकालादभयं हरिं गतवान्प्राप्तः ॥ १३ ॥ ❀ ❀ हे कौरव्य तव तु एतर्हि इदानीमपि सप्ताहज्जिवितावधिरस्ति । तावता सप्ताहेन यत्साम्परायिकम् परलोकसाधनम् तत्सर्वमुपकल्पय समाचर ॥ १४ ॥ ❀ ❀ तत्सर्वपरित्यागपूर्वकम् सपरिकरमष्टाङ्गयोगन्तावदाह । अन्तकाले इति सार्द्धैः सप्तभिः । देहान्तकाले आगते आसन्ने गतसाध्वसः निरस्तमृत्युभयः असङ्गशस्त्रेण वैराग्यखड्गेन देहं देहमनु ये देहानुबन्धिनस्तेषु च स्पृहामिच्छामासक्तिं छिंद्यात् ॥ १५ ॥ ❀ ❀ गेहाद् योगविरोधिजनालयात् । प्रव्रजितो निर्गतः धीरो विजितेन्द्रियः ब्रह्मचर्यादिर्यमस्योपलक्षणमिदम् । पुण्यतीर्थजलाप्लुतः । इत्यनेन स्नानादिनियमो दर्शितः आसनाख्यमङ्गमाह शुचाविति ॥ १६ ॥

### श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

अतः शत्रूणामायुरिवाऽज्ञातं स्वायुर्न प्रयोजकं किन्तु ज्ञातमेवेत्यत्र दृष्टान्तमाह खट्वाङ्गो नामेति । खट्वाङ्गनामा दिलीपो देवपक्षपाती भूत्वा दैत्यान् हत्वा देवैर्वरं ब्रूहीत्युक्त आयुषः परिमाणं[1] ज्ञात्वा तदनुसारेण वरं प्रार्थयिष्यामीति विचिन्त्याऽऽयुःपरिमाणं[2] पृष्टवान् । ततस्तद्वचनान्मुहूर्त्तमात्रं ज्ञात्वा भूमौ समागत्याऽग्रे पालत्वेन[3] हरेरुक्तत्वात्तदतिरिक्तं सर्वं परित्यज्य अभयरूपं हरिं

१. परिणाममिति ख । २. परिणाममिति ख । ३. अग्रे पालत्वेन हरेरुक्तत्वात्तदतिरिक्तमित्ययमंशो नास्ति ख ।

स्मरणेन गतः सन् तं प्राप्तवानित्यर्थः। तस्मात्कालभूयस्त्वं नाऽपेक्ष्यत इति भावः ॥ १३ ॥ ❀ ❀ तव तु मुहूर्त्तानां शतद्वयमधिकं चाऽस्ति। एकेनाऽपि मुहूर्त्तेन कार्यं सेत्स्यति। तथापि पूर्वमस्माभिरुक्तं श्रवणं यावद्दशविधलीलायुक्तभगवद्विषयकमुपकल्पयेत्याह—**तवाऽपीति**। यथा तस्य ज्ञातमायुरेवं तवाऽपीति। एतर्हि इदानीमपि। जीवितावधिः सप्ताहम्। सप्तदिनमात्रं जीवितस्याऽवधिः। अतस्तावत्पर्यन्तं सर्वमेव परलोकसाधनमुपकल्पय सम्पादय। सर्वं परित्यज्य भगवत्कथां शृण्वित्यर्थः। केचनाऽग्रे वक्ष्यमाणमाहुः। तत्प्रमेयविरोधादुपेक्ष्यम् ॥ १४ ॥ ❀ ❀ एवं सपरिकरं प्रथमप्रश्नोत्तरमुक्तं सर्वात्मना किं कर्त्तव्यमित्यस्य (?)। **"अन्ते नारायणस्मृतिरि"**ति च **"गतवानभयं हरिमि"** ति च वाक्याभ्यां **सर्वमुपकल्पये"** त्यनेन चाऽन्तकालकर्त्तव्यमुपदिष्टमेव। सर्वात्मना सर्वसमये तदेव कर्त्तव्यं यतः। तथापि राज्ञश्चेद्धृदये तस्योत्तरं देयमित्याकाङ्क्षा स्यात्तदाऽस्माभिरुच्यमानं श्रवणं न सम्यग्हृदये भासेतेति विशेषेणाऽन्तकालकर्त्तव्यं वदन् पूर्वोक्तस्य श्रवणस्य फलोपकार्युत्तराङ्गे मनननिदिध्यासने निरूपयति **अन्तकाल** इति। मननं नाम युक्तिभिरनुचिन्तनम्। तत्र भगवाञ्छ्रोतव्य इत्युक्तम्। तत्र को भगवानित्याकाङ्क्षायां सर्वात्मेत्यादिपदैः सर्वपुरुषार्थरूपः सर्वफलसाधकः सर्वमेव भगवानित्युक्तं भवति। तत्र कथं सर्वं भगवानित्याकाङ्क्षायां **"आत्मैवेदं सर्वम्"** **"ब्रह्मैवेदं सर्वम्"** **"अहं हरिः सर्वमिदं जनार्दन"** इति वाक्यानां प्रमाणानां विद्यमानत्वेऽपि लौकिकयुक्त्यपेक्षायां सर्वस्याऽपि जगतो भगवच्छरीरे सन्निवेश उच्यते। पुरुषश्च भगवानित्यविवादम्। **"पुरुषो ह वै नारायणोऽकामयते"** ति श्रुतेः। **"पुरुष एवेदꣳसर्वमि"** ति च। तत्र सर्वस्याऽपि यावत् पुरुषशरीरे निवेशनं न क्रियते तावत् सर्वत्वं पुरुषस्य न मन्येत। अतः पुरुषशरीरे[1] निवेशनं कथयति। किञ्च। पुरुषस्य शरीरे सर्वं वचनेन निवेशितमपि यद्यनुभवेन विसंवादि स्यात्तदापि न मन्येत। अतस्तद्ध्यानरूपेण वदति। ध्यायमानस्य कदाचित्साक्षात्कारो भवेत्तदा तस्य शरीरे सर्वं पश्यन्निःसन्दिग्धो भवेदिति मननं निदिध्यासनावधि साक्षात्कारफलकं तत्त्वनिरूपणार्थमुपदिशन् **"पाक्षिकोऽपि दोषः परिहरणीय"** इति न्यायेन को वेदाऽन्तकाले स्मरणे क्रियमाणे व्यासङ्गान्तरमपि भवेत्तदा तदेव भवेतिदि तद्दोषपरिहारार्थं चित्तवृत्तिनिरोधरूपं योगं वदन् तदङ्गभूतध्यानविषयत्वेन भगवत्स्वरूपमपि वदन्नन्तकालकर्त्तव्यप्रश्नोत्तरमप्याह। तुशब्दस्तवैतत्कर्त्तव्यमिति पक्षं व्यावर्त्तयति। पूर्वपक्षसङ्गतमेव किञ्चिदुच्यत इति वा पक्षं व्यावर्त्तयति। अन्तकालो मरणकालः। कालस्याऽन्तो वा वयोरूपस्य। राजदन्तादिवत्परनिपातः।[2] अन्तकस्य वा कालः। समागत इति ज्ञाते प्रथमसाधनं गतसाध्वस इति तदर्थं पूर्वोक्तं कर्त्तव्यम्। तदनु असङ्गशस्त्रेण वैराग्यशस्त्रेण देहे तमनु ये देहानुवर्त्तिनो गृहादयस्तेषु च स्पृहामभिलाषं ममैते भवन्तु[3] तत्कृतोपकारो वेति छिन्द्यात् अन्तःकरणे तेषामपेक्षां त्यजेत्। इदं द्वितीयम्। ततो गृहात्प्रव्रजेत्। संन्यासं गृहीत्वा गच्छेत्। तृतीयम्। ततः शीतादिबाधायां धैर्यं चतुर्थम्। एते यमा उक्ताः। नियममाह—**पुण्यतीर्थजलाप्लुत** इति पुण्यं जलमुद्धृतमपि भवतीति तीर्थपदम्। पुण्यपदेन काम्यतीर्थपरित्यागः। पुण्यरूपं तीर्थं गङ्गा वा। तीर्थपदेन घट्टो वा। **"तीर्थे हि ते तां प्रावेशयन्नि"** ति श्रुतेः। आप्लुतः सम्यक् स्नातः। आसनमाह। शुचौ पवित्रे। विविक्ते एकान्ते। विधिवत् चैलाजिनकुशोत्तरप्रकारेण कल्पिते आसने आसीनः। अभ्यसेदिति सम्बन्धः ॥ १५,१६ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः।

**तवापीत्यत्र**। **प्रमेयविरोधादिति**। अत्र हि 'तस्माद्भारते'त्यारभ्य 'तस्मात्सर्वात्मने'त्युपसंहारात्सर्वात्मना कर्तव्यप्रश्नोत्तरमेव मुख्यतया प्रतीयते, तदेव चात्र कार्यते, तेन श्रवणकरणमेव प्रमेयं तद्विरोधादित्यर्थः ॥ १४ ॥ ❀ ❀ **अन्तकाले त्वित्यत्र**। श्रवणकरणस्य प्रमेयस्य विरोधमेतदाभासेनापि स्फुटीकुर्वन्ति **एवमित्यादि**। अत्र मननादिनिरूपणं कथं सिध्यतीत्यपेक्षायां तद्व्युत्पादयन्ति **मननमित्यादि**। **तदर्थं पूर्वोक्तं कर्तव्यमिति**। साध्वसनिवृत्त्यर्थं **श्रवणं कर्तव्यम्**। **वेतीति**। इति हेतोर्ममैते भवन्त्वित्यपेक्षामित्यर्थः ॥ १५ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

विदितस्य मुहूर्तस्य श्रेयोघटकत्वे इतिहासमाह—खट्वाङ्ग इति। खट्वाङ्गो नाम राजा देवपक्षे स्थित्वा दैत्यानजयत्, ततः प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्ते प्रथमतः आयुषः प्रमाणं ज्ञात्वा तदनुरूप एव वरो याचनीयोऽन्यथाऽऽयुषोऽल्पत्वं तदा महावरयाञ्चा वृथा स्यादतस्तेनोक्तं प्रथमं ममायुः कियदस्ति तत्कथ्यतामिति, ततो देवैरुक्तं तत्तु मुहूर्तमात्रमस्तीति, एवमायुष इयत्तां प्रमाणं ज्ञात्वा स्वर्गे रजोगुणाधिके मनसो नैश्चल्यासम्भवादिह साधनभूमावागत्य सर्वं देहापत्यकलत्रादिकमुत्सृज्य तेभ्यो मनः प्रत्यावर्त्य अभयं सर्वभयरहितं भयनिवर्तकं च हरिं ध्यायन् मुहूर्त्तान्मुहूर्त्तमात्रेणैव ध्यानेन हरिं गतवान् प्राप्तः। वरग्रहणसमये तस्यैवं विरक्त्यादि कथमित्याकाङ्क्षायामाह—राजर्षिरिति ॥१३॥ ❀ ❀ कैमुत्यन्यायेनाह—तवेति। श्रेष्ठकुले जातस्य तवाप्येतदेव युक्तमिति सूचयन् सम्बोधयति—हे कौरव्येति। तव त्वेतर्हीदानीमपि जीवितस्यावधिः प्रमाणं सप्ताहं सप्तदिनपर्यन्तमस्तीति यत्साम्परायिकं परलोकसाधनं श्रीभागवतश्रवणादिकं तत्तावता कालेनोपकल्पय सम्पादय ॥१४॥ ❀ ❀ तदेवं मरणकाले श्रवणादिना भगवान् स्मर्तव्य

---

१. मन्मत इति ख। पुरुषस्य शरीरे इति क। २. अन्तकालस्येति ग। ३. एवं तत्कृतेत्यादि क।

इत्युक्तं तत्र यदि व्यासङ्गान्तरमपि स्यात्तदा तद्रूपप्राप्तिरेव स्यात् न भगवत्प्राप्तिरिति व्यासङ्गान्तरपरिहाराय चित्तवृत्तिनिरोधलक्षणो योगः कर्तव्य इत्याह—अन्तकाले इति सार्द्धैः सप्तभिः । अन्तकाले देहावसानकाले आगते प्राप्ते सति पुरुषो गतसाध्वसो मरणभयरहितः सन् असङ्गः अनासक्तिस्तद्रूपेण शस्त्रेण देहे तं देहमनुसृत्य ये वर्तमाना गृहापत्यकलत्रादयस्तेषु च स्पृहां आत्मात्मीयत्वाभिमानमुत्कर्षेणाच्छिन्द्यादित्यन्वयः ॥ १५ ॥ ❀ ❀ गृहात्प्रव्रजितो निर्गतः सम्बन्धस्तदित्युत्तरेणान्वयः । कथम्भूतः सन्नित्यत तत्राह—धीर इति, जितेन्द्रिय इत्यर्थः । अनेन ब्रह्मचर्यादिलक्षणो यम उक्तः । पुण्यतीर्थानि गङ्गादीनि तज्जलेषु आप्लुतः सम्यक् स्नातः, इति स्नानादिनियम उक्तः । शुचौ पवित्रे विविक्ते एकान्ते देशे विधिवत् चैलाजिनकुशोत्तरम्, इति व्युत्क्रमेण कल्पिते आसने आसीनः ऋजुकायत्वस्वस्तिकादीन् अनतिक्रम्योपविष्टः, इत्यासनरूपमङ्गमुक्तम् ॥ १६ ॥

## हिन्दी अनुवाद

राजर्षि खट्वाङ्ग अपनी आयु की समाप्तिका समय जानकर दो घड़ीमें ही सब कुछ त्यागकर भगवानके अभयपदको प्राप्त हो गये । ॥ १३ ॥ ❀ ❀ परीक्षित् ? अभी तो तुम्हारे जीवनकी अवधि सात दिन की है । इस बीचमें ही तुम अपने परम कल्याणके लिये जो कुछ करना चाहिये सब कर लो ॥ १४ ॥ ❀ ❀ मृत्युका समय आनेपर मनुष्य घबराये नहीं । उसे चाहिये कि वह वैराग्यके शस्त्रसे शरीर और उससे सम्बन्ध रखनेवालोंके प्रति ममताको काट डालें ॥ १५ ॥ ❀ ❀ धैर्यके साथ घरसे निकलकर पवित्र तीर्थके जलमें स्नान करे और पवित्र तथा एकान्त स्थानमें विधिपूर्वक आसन लगा कर बैठ जाय ॥ १६ ॥

**अभ्यसेन्मनसा शुद्धं त्रिवृद् ब्रह्माक्षरं परम् । मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् ॥ १७ ॥**
**नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः । मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया ॥ १८ ॥**
**तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा । मनो निर्विषयं युक्त्वा ततः किञ्चन न स्मरेत् ।**
**पदं तत् परमं विष्णोर्मनो यत्र प्रसीदति ॥ १९ ॥ रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः ।**
**यच्छेद्धारणया धीरो हन्ति या तत्कृतं मलम् ॥ २० ॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

जपगर्भं प्राणायामं वक्तुं जप्यमाह । त्रिवृद्ब्रह्माक्षरं त्रिवृत् त्रिभिरकारादिभिर्वर्तितं ग्रथितं ब्रह्माक्षरं प्रणवं मनसाऽभ्यसेदावर्तयेत् । मनसेंद्रियप्रत्याहारं वक्तुं प्राणायामेन मनोनियमनमाह । मनो यच्छेद्वशी कुर्यात् । ब्रह्मबीजं प्रणवमविस्मरन्नेव जितश्वासः सन् ॥ १७ ॥ ❀ ❀ प्रत्याहारमाह । नियच्छेन्निगृह्णीयात् । अक्षानिंद्रियाणि निश्चयात्मिका बुद्धिः सारथिर्यस्य सः । धारणामाह । मन इति । पुनश्च कर्मभिस्तद्वासनाभिराक्षिप्तमाकृष्टं शुभार्थे भगवद्रूपे ॥ १८ ॥ ❀ ❀ ध्यानमाह । तत्रेति । एकमेकं पादाद्यवयवं अव्युच्छिन्नेन समग्ररूपादवियुक्तेन आश्रयविशेषेण सामान्यतश्चित्तस्थिरीकरणं धारणा अवयवविभावनया तद्दार्ढ्यं ध्यानमिति भेदः । समाधिमाह । निर्विषयं मनो युंक्त्वा समाधाय स्थिरीभूते मनसि स्फुरत्परमानंदमात्राकारं कृत्वेत्यर्थः । प्रसीदत्युपशाम्यति ॥ १९ ॥ ❀ ❀ गुणवशात्पुनरपि क्षोभे सति धारणामेव स्थिरीकुर्यादित्याह । रजसा आक्षिप्तं तमसा विमूढं स्वीयं मनो निरुंध्यात् । तत्कृतं रजस्तमोभ्यां कृतम् ॥ २० ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

ब्रह्मणो वेदस्य बीजं कारणम् । 'ॐकारप्रथमा वेदाः' इत्युक्तेः ॥ १७ ॥ ❀ ❀ आकृष्टं प्राचीनकर्मणां प्राबल्यात्प्राणायामैरपि सम्यङ्निश्चलीकर्तुमशक्यमित्यर्थः ॥ १८ ॥ ❀ ❀ तत्र भगवद्रूपे निर्विषयं विषयस्पर्शरहितं ततोऽन्यत्किञ्चन किमपि । इत्यर्थ इति । यन्मनसः परमानंदाकारता तदेव भगवतो विष्णोः परमं पदं ब्रह्मेति भावः । प्रसीदति उपशाम्यति । यत्र परमानंदे सति निजचाञ्चल्यं त्यक्त्वा स्थिरीभवतीत्यर्थः ॥ १९ ॥ ❀ ❀ या धारणा ॥ २० ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या ।

जपगर्भमिति । प्राणायामो द्विविधः सगर्भः निर्गर्भश्च । तत्र प्रणवादिजपसहकृतः सगर्भः तद्विरहितो निर्गर्भः । तथा चोक्तम्—सगर्भो मन्त्रजापेन निर्गर्भो मात्रया भवेदिति ॥ प्राणायाममिति । श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः इति पातञ्जलसूत्रम् ॥ १७ ॥ ❀ ❀ प्रत्याहारेति । स्वविषयासम्प्रयोगे चित्तस्वरूपानुकारे इन्द्रियाणां प्रत्याहारः ( पातं । साधन । ५४ ) ॥

---

१. प्रा० पा० मनुस्म ।

धारणामाहेति। देशबन्धश्चित्तस्य धारणा (पातं। विभूति। १)॥ १८॥ ❀ ❀ ध्यानमाहेति। प्रत्ययैकतानता ध्यानम्। (पातं। विभूति। २)॥ पादाद्यवयवमिति। वक्ष्यमाणतृतीयस्कन्धोक्ताष्टाविंशाध्यायीयविंशश्लोकाद्युक्तदिशेति ज्ञेयम्॥ अवयवविभावनयेति। अवयवानां पृथक् पृथग् यथाक्रममेकैकस्य स्वरूपचिन्तयेत्यर्थः॥ समाधिमाहेति। तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः (पातं। विभूति। ३)॥ १९-२६॥

## श्रीमद्वीरराघवव्याख्या

प्राणायामस्य जपगर्भत्वात्तावज्जप्यमन्त्रमाह। अभ्यसेदिति। त्रिवृत्त्रयाणामकारोकारमकाराणां वृद्वर्त्तनं यस्मिन्नक्षरत्रयग्रथितमित्यर्थः ब्रह्माक्षरं ब्रह्मप्रतिपाद्यमक्षरं प्रणवम्मनसाऽभ्यसेदावर्त्तयेत्। जितश्वासो जितप्राणो ब्रह्मबीजं प्रणवमविस्मरन् स्मरन्नेव मनो यच्छेन्नियच्छेत्। इदञ्च प्राणायामरूपमङ्गमुक्तम्॥ १७॥ ❀ ❀ इन्द्रियप्रत्याहारमाह। नियच्छेदिति। विषयेभ्यः शब्दादिभ्यः। अक्षान् श्रोत्रादीन्द्रियाणि बुद्धिः सारथिर्यस्य स तथाभूतः प्रग्रहभूतेन मनसा यच्छेत् "बुद्धिस्तु सारथिम्विद्धि मनः प्रग्रहमेवचे" ति श्रवणात्। धारणामाह। मन इति। पुनश्च कर्मभिस्तद्वासनाभिराक्षिप्तम्विक्षिप्तं मनः शुभार्थे शुभाश्रये भगवद्रूपे निश्चयात्मिकया बुद्धया धारयेत् स्थिरं कुर्यात् शुभाश्रये मनसोऽवस्थापनं धारणम् शुभाश्रयस्य पुनः पुनः चिन्तनं ध्यानम्। तस्य विजातीयप्रत्ययान्तराव्यवहितत्वं समाधिरिति भेदः॥ १८॥ ❀ ❀ ध्यानमाह तत्रेति। अव्युच्छिन्नेन समग्रशुभाश्रयावियुक्तेन चेतसा चित्तेन। एकावयवं प्रधानाङ्गं सुखाकारं ध्यायेत्। अनेनास्य चिन्तायाः पूर्वभावित्वं सिद्धम्। पूर्णध्यानाशक्त एकावयवं स्मरेदित्यर्थः। समाधिमाह। मन इति। निर्विषयं बाह्यविषयानुभवरहितमनो युक्त्वा समाधाय किञ्चन बाह्यविषयादिकं न स्मरेदित्यर्थः। आनन्दसंप्लवे लीनत्वान्न किञ्चित्स्मर्तुन्द्रष्टुं वा क्षमत इति चार्थः॥ १९॥ ❀ ❀ शुभाश्रयरूपमाह। पदमिति। यत्र मनः प्रसीदति। यस्मिन्स्वरूपे—चिन्त्यमाने मनो रागाद्यकलुषितं भवति तदेव विष्णोः परमं पदम्। यस्मात्तत्परमं सर्वोत्कृष्टं स्वरूपमित्यर्थः। कदाचिद्रागादिकालुष्यसम्भावनामाशङ्क्याह रजस्तमोभ्यामिति रजसा आक्षिप्तं विक्षिप्तं तमसा विमूढमात्मनः स्वस्य मनः धारणया यच्छेत्। धारणामाहात्म्यमाह या धारणा तत्कृतं रजस्तमोभ्यां कृतं मलं रागादिकं हन्ति निवर्त्तयति।

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या।

स्थिरासनस्य कृत्यमाह अभ्यसेदिति। रेचकादिक्रमपरम्परया प्राणायामेन जितश्वासः प्राप्तप्राणप्रसादः मनो यच्छेत् स्ववशं कुर्यादेवं जितमनस्कः सन् बीजं सर्वजगद्व्यंजकं शुद्धं परं ब्रह्मानुस्मरन् अकारादींस्त्रीन्वर्णान्विवृणोतीति त्रिवृदक्षरं ब्रह्मवाचकत्वात्सर्वगतं परमुत्कृष्टमोकारं मनसा[१]ऽभ्यसेदावर्तयेदित्यन्वयः॥ १७॥ ❀ ❀ जाप्यमुक्त्वा ध्यानप्रकारमाह नियच्छेदिति। बुद्धिःसारथिर्यस्य स तथा सत्पुरुषो जितेन मनसाऽक्षानिन्द्रियाणि विषयेभ्यो नियच्छेत् प्रत्याहरेत्। प्रत्याहृत्य च संस्कारवशाद् बहिर्मुखतया कर्मभिराक्षिप्तं मनः स्वधिया सारथिना शुभार्थे परममङ्गलार्थे हरौ धारयेदित्यन्वयः॥ १८॥ ❀ ❀ एवं हरौ नियतचेतसो योगिनो ध्यानाभ्यासप्रकारमाह—तत्रेति। तत्र युगपत्सर्वावयवध्यानाशक्तो विषयैरव्युच्छिन्नेनाखण्डितेन चेतसा एकावयवमेकैकावयवं श्रीपादादिलक्षणं ध्यायादेवमनायासेन स्मरणविषयं कुर्यात् तत्परिपाकमाह मन इति एवमभ्यासपाटवेन युगपत्सर्वावयवस्मरणसमर्थः संस्ततोऽनन्तरं निर्विषयं विषयेभ्यो निर्गत्य स्थितं मनस्तस्मिन् हरौ सर्वावयवव्यापितया युक्त्वा नियुज्य यत्र मनः प्रसीदति निरतिशयं सुखं लभ्यते तद्विष्णोः परमं पदं समग्ररूपमेव स्मरेत्ततोऽन्यत्किञ्चिन्न स्मरेदित्यन्वयः॥ १९॥ ❀ ❀ अखण्डध्यानोपायमाह रजस्तमोभ्यामिति रजसाऽक्षिप्तमितस्ततो विषयैराकृष्टं तमसा विमूढं कृत्याकृत्यज्ञानशून्यं आत्मनःस्वस्य। मनः। धारणया तैलधारवदव्युच्छिन्नया स्मृत्या यच्छेद्विषयेभ्यः आवृत्य ध्यानमग्नं कुर्यात् या धारणा तत्कृतं रजस्तमोभ्यामाक्षिप्तं रागाविद्यादिमलं हन्ति तयेत्यन्वयः॥ २०॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या।

अतिविक्षिप्तस्य मूढचित्तस्य यस्य तु साक्षाच्छ्रीभगवति धारणा न सम्पद्यते तस्य विक्षेपहेतुं प्रपञ्चमेव एतद्धारणामयत्वेन सम्पादयति रज इत्यादिना॥ २०॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी व्याख्या।

त्रिभिकारादिभिर्वृद्वर्त्तनं ग्रथनं यस्य तत् ब्रह्माक्षरं प्रणवम् अभ्यसेत् आवर्त्तयेत् जपेदिति प्राणायामश्चतुर्थः। प्राणायामबाहुल्येनैव प्रथमं मनः यच्छेत् निश्चलीकुर्यादित्यर्थः। ब्रह्मबीजं प्रणवम्॥ १७॥ ❀ ❀ ततश्च नियतेन मनसा विषयेभ्यः शब्दादिभ्यः सकाशात् अक्षान् कर्णादीनीन्द्रियाणि नियच्छेदिति प्रत्याहारः। पञ्चमः। निश्चयात्मिका बुद्धिरेव सारथिर्यस्य सः। ततो मनः शुभेऽर्थे भगवद्रूपे धिया धारयेदिति धारणा षष्ठी। कीदृशं मनः कर्म्मभिराक्षिप्तं प्राचीनकर्म्मणामतिप्राबल्यात् प्राणायामैरपि सम्यक्निश्चलीकर्त्तुमशक्यमित्यर्थः॥ १८॥ ❀ ❀ तत्रैकावयवम् एकमेकं भगवदङ्गं ध्यायेदिति ध्यानं सप्तमम्। आश्रयविशेषे सामान्यतश्चित्तस्थिरीकरणं धारणा। अवयवभावनया तद्दार्ढ्यं ध्यानमिति भेदः। अव्युच्छिन्नेन तस्मादवियुक्तेन।

---

१. उच्चैरुच्चारणवारणाय मनसेति॥

निर्विषयं विषयस्पर्शरहितं युक्त्वा संयोज्य किञ्चन ततोऽन्यत् किमपि न स्मरेत् । तदेव विष्णोः भगवतः पदं स्वरूपं ब्रह्मेत्यर्थः । यत्र सति मनः प्रसीदति उपशाम्यतीति समाधिरष्टम उक्तः ॥ १९ ॥ ❀ ❀ गुणवशात् पुनरपि क्षोभे सति धारणयैव स्थिरीकुर्यादित्याह । रजसा आक्षिप्तं तमसा विमूढं स्वीयं मनो निरुन्ध्यात् । तत्कृतं रजस्तमोभ्यां कृतम् ॥ २० ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जपगर्भं प्राणायामं दर्शयितुं तत्र जाप्यन्तावदाह । अभ्यसेदिति । त्रिवृत् त्रिभिरकारोकारमकारैर्वृतं वर्तितं प्रवर्तितम् ब्रह्माक्षरञ्चित्चिच्छक्तिमद्ब्रह्मवाचकम् । तत्राकारो विशेषतः । शक्तिमद्वाचकः । अक्षरद्वयं शक्तिद्वयवाचकम् । समुदायोऽभेदपरोऽवयवा भेदपराः तदेवं सर्ववेदसूत्रं प्रणवं शुद्धं मनसाऽभ्यसेदावर्तयेत् । जितश्वासः जितप्राणः ब्रह्मबीजं वेदसूत्रमविस्मरन्मनो नियच्छेत् । प्रणवजपाशक्तथा प्राणायामेन मनोनियमनं कुर्यात् । इति प्राणायाम उक्तः ॥१७॥ ❀ ❀ इन्द्रियप्रत्याहारप्रकारन्दर्शयति । नियच्छेदिति । निश्चयात्मिका बुद्धिः सारथिः सहायकारिणी यस्य सः । प्राणायामेन नियमितं यन्मनस्तेन विषयेभ्यः शब्दादिभ्योऽक्षान् श्रोतादीनीन्द्रियाणि नियच्छेद्वशवर्तीनि कुर्यात् । धारणामाह मन इति । कर्मभिः प्रणवजपाऽक्षनियमनादिव्यापारैराकृष्टं मनः शुभे भगवद्रूपे । अर्थे आश्रये सामान्यतः धारयेत् स्थिरीकुर्यात् ॥ १८ ॥ ❀ ❀ ध्यानमाह । तत्रेति । अव्युच्छिन्नेन समग्ररूपादविनिवृत्तेन चेतसा तत्र तस्मिन् रूपे विशेषतः एकमवयवं पादादिरूपमङ्गन्ध्यायेत् । समाधिमाह । मन इति । मनो निर्विषयं कृत्वा करणरूपं मनो उपनेत्रोपम् भगवद्रूपादपसार्य ज्ञातैव केवलः । पादपद्माद्यालिङ्गनं कुर्यादतः किञ्चन करणादिकमपि न स्मरेदित्यर्थः ॥ १९ ॥ ❀ ❀ आश्रयन्निरूपयति । पदमिति परा तदसाधारणा मा श्रीर्यस्मिन् तत् यत्र मनः प्रसीदत्युपशाम्यति तद्विष्णोः । पदं स्वरूपम् । कदाचिद्रजस्तमोभ्यां क्षोभे सति धारणयैव स्थिरीकुर्यादित्याह रजस्तमोभ्यामिति ! रजसा आक्षिप्तं तमसा विमूढमात्मनो मनः धारणया यच्छेत्स्थिरीकुर्यात् । धारणमाहात्म्यं दर्शयति सपादेन रजस्तमोभ्यां कृतं मनोमलं रागादिकं हन्त्यपनयति ॥ २० ॥

## श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

प्राणायाममाह अभ्यसेदिति । सबीजप्राणायामे शीघ्रं वायुः स्थिरो भवति । पापेन च वायोश्चलनम् । अतस्त्रिवृद्ब्रह्माक्षरं अकारोकारमकारैर्वृतं सङ्गृहीतं वर्णत्रयात्मकमेकं ब्रह्मवाचकं निर्विघ्नार्थं मङ्गलरूपञ्च । परम् । परापश्यन्तीमध्यमावैखरीप्रकारेषु प्रथमम् । अवर्णात्मकं वा । तदभ्यसेत् । तेन वायुजयो भवति । ततः प्रत्याहारमाह—मनो यच्छेदिति । जितश्वासस्यैव मनोनियमनम् । श्वासजयश्च ब्रह्माक्षरेण अतो ब्रह्मबीजमनुस्मरञ्जितश्वासो[1] मनो यच्छेदिति सम्बन्धः ॥ १७ ॥ ❀ ❀ प्रत्याहारे मनसश्चेन्द्रियाणामन्योन्यहेतुहेतुमद्भावेन भेदं निरूपयति—नियच्छेदिति । मनसा[2] इन्द्रियाणि विषयेभ्यो नियच्छेत् । विषयाणां दुष्टत्वबुद्धिर्मनसेन्द्रियनियमने सारथिः सहायः । पूर्वं मनसः क्रिया निवारिता प्राणायामेन । अधुना कर्मभिराक्षिप्तं प्रत्याहाररूपैः कर्मभिराक्षिप्तं आ समन्ताद्विषयेभ्यो दूरीभूतम्[3] । विषयज्ञानाननुकूलमिति यावत् । तादृशं मनः शुभरूपे अर्थे धिया सर्वावयवव्यापिकया बुद्ध्या मानसीं मूर्त परिकल्प्य तत्र सर्वावयवस्थितं मनो धारणारूपं कुर्यात् । सर्वावयवे मनसः स्थापनं धारणा । एकावयवे मनोधारणं ध्यानमिति भेदः ॥ १८ ॥ ❀ ❀ ध्यानमाह—तत्रैकावयवमिति । तत्र मनोगृहीतमूर्त्तावेकमवयवं ध्यायेत् । अव्युच्छिन्नेन पूर्वध्यातावयवसंश्लिष्टेन । अनेन खण्डशो ध्यानं निवारितम् एकमप्यवयवमितरावयवैर्यथायोग्यं संश्लिष्टमेव ध्यायेत् । एवं ध्याने क्रियमाणे यदा मनो विषयवासनां त्यजति तदा इममपि विषयं त्याजयित्वा सर्वथा निर्विशयं युक्त्वा योगसहितं कृत्वा । सर्ववृत्तिनिरोधं कृत्वेत्यर्थः । ततः किमपि न संस्मरेत् । योगसाधितप्रयत्नेन चित्तं निरुद्ध्य तिष्ठेत् । ॥ १९ ॥ ❀ ❀ ततो यद्भवति तदाह—पदमिति । एवं चित्तनिरोधे क्रियमाणे तच्चित्तं स्वयमेव प्रसीदति ध्यानाकारेण परिणमति । तस्य परिणामस्य आधारस्तद्विष्णोः परमं पदम् । अन्यथा स्थलान्तरे निरुद्धं तदभिव्यक्तिं कुर्याद्विषीदेद्वा । अतो यत्र निरुद्धं प्रसीदति तदाधारसामर्थ्यादेव प्रसीदतीति प्रसादाधारो भगवत्पदमेव । चित्तप्रसादे यत्प्रकाशते तज्जीवात्मस्वरूपं पुरुषोत्तमस्य स्थानम् "**तस्याः शिखाया मध्ये परमात्मा व्यवस्थित**" इति श्रुतेर्वह्निशिखात्वेनाऽप्युच्यमाना जीवकलैव । अथवा । अक्षरस्य भगवत्पदत्वात्तदंशो जीवोऽपि भगवत्पदम् । एवं यावत्कालं प्रसन्नं मनस्तिष्ठति तावत्तथैव स्थातव्यम् । "रजः सत्त्वं तमश्चैवे"[4] ति न्यायेन कारणीभूतं रजस्तमो वा कालप्रेरितं सत् मनो विक्षिपति विमूढं वा करोति । तदा योगबलेनाऽन्येषामपि मनांसि भगवत्पदे भासन्ते । सर्वेषां जीवानां तत्रैकीभावात् । तत्राऽन्यमनोविक्षेपे न किञ्चित्कुर्यात् । यदा त्वात्मनो मनः कर्मणि क्षिपेद्रजो मूढं वा कुर्यात्तमस्तदा तद्दोषपरिहारार्थं पुनर्धारणया मनो यच्छेत् । तत्र नियमनसमये वासनया रजो विषयानुपस्थापयति । तमश्च

---

१. अविस्मरञ्जिति घ । २. प्रत्याहारे मनसेत्यादि ख । ३. दूरीकृतमिति घ । ४. तमश्चेति न्यायेनेति क ।

निद्रादिकम् । तत्रोभयत्राऽपि धीरो भवेत् । तादृशी च धारणा कर्त्तव्या यया रजोदोषस्तमोदोषश्च दूरीक्रियते । चण्डिकाशिवादिधारणाव्यावृत्त्यर्थमुक्तम्—हन्ति या तत्कृतं मलमिति ॥ २० ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तत्रैकावयवमित्यत्र । विषयवासनामिति । ध्यानगृहीतध्येयविषयकज्ञानसूक्ष्मावस्थारूपां स्ववृत्तिमित्यर्थः । १९ ❀ ❀ पदं तदित्यत्र । ध्यानाकारेण परिणमतीति । कार्यं करणकर्तृभावं विहायाविकल्परूपं भवति । पुरुषोत्तमस्य स्थानमिति, अन्तर्यामिब्राह्मणे, 'य आत्मनि तिष्ठ'न्नित्यनेन जीवान्तर्भगवत्स्थितेरुक्तत्वात्तस्य स्थितिस्थानमित्यर्थः । ननु महानारायणोपनिषदि जाठराग्निशिखामध्ये नारायणस्य परमात्मनः स्थितिरुक्तेति तस्याः पदत्वम्, न जीवात्मन इति शङ्कायामाहुः तस्या इत्यादि । तथा च श्रुत्यन्तरस्वारस्यात्तथेत्यर्थः । ननूपक्रमविरोधात्तस्याः श्रुतेः जीवकलापरत्वं न वक्तुं शक्यमित्यरुच्या पक्षान्तरमाहुः अथवेत्यादि । जीवानामिति, लिङ्गविशिष्टजीवानाम् ॥ २० ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

प्रणवस्य ब्रह्मवाचकत्वेन मङ्गलरूपत्वात् तज्जपगर्भस्य प्राणायामस्य शीघ्रं मनोनैश्चल्यहेतुत्वात् प्रथमं तज्जपं विधत्ते—अभ्यसेदिति । त्रिवृत्त्रयाणां अकारोकारमकाराणां वृद्वर्तनं यस्मिन् तदकारादित्रयग्रथितं ब्रह्माक्षरं ब्रह्मप्रतिपादकमक्षरं अतएव शुद्धमुपासकानां शुद्धिकरं अतएव परं मन्त्रान्तराच्छ्रेष्ठं प्रणवं मनसाऽभ्यसेदावर्त्तयेत् । मनसेन्द्रियप्रत्याहारं वक्तुं प्राणायामेन मनोनियमनमाह—मन इति । जितश्वासः सन् ब्रह्मबीजं प्रणवमविस्मरन् स्मरन्नेव मनो यच्छेद्वशीकुर्यादित्यन्वयः ॥ १७ ॥ ❀ ❀ इन्द्रियप्रत्याहारमाह—नियच्छेदिति । 'बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च' इति वचनाद्बुद्धिः सारथिः सहायो यस्य स मनसा प्रग्रहभूतेन विषयेभ्यः शब्दादिभ्योऽक्षान् श्रोत्रादीनीन्द्रियाणि नियच्छेत्परावर्तेत । सर्वावयवे मनस्स्थापनलक्षणां धारणामाह—मन इति । कर्मभिः प्रत्याहाररूपैः आक्षिप्तं आ सर्वतो विषयेभ्यो क्षिप्तं दूरीकृतं विशुद्धं मनः शुभार्थे शुभाश्रये भगवद्रूपे निश्चयात्मिकया बुद्ध्या धारयेत् स्थिरं कुर्यात् ॥ १८ ॥ ❀ ❀ एकैकावयवचिन्तनरूपं ध्यानमाह—तत्रेति । तत्र भगवत्स्वरूपेऽव्युच्छिन्नेन समग्ररूपादवियुक्तेन चेतसा एकमेकं पाद्याद्यवयवं ध्यायेत् । विजातीयप्रत्ययान्तराऽव्यवहितत्वे सति तदेकाकारतारूपं समाधिमाह—मन इति । मनो निर्विषयं तदतिरिक्तविषयानुसन्धानरहितं युंक्त्वा कृत्वा ततस्तदनन्तरं किञ्चनाप्यन्यन्न स्मरेत् । 'शुभार्थे धारयेद्धिया' इति यदुक्तं[1] तत्किमाश्रयस्वरूपं यत्र संलग्नं मनोरागलोभादिदोषांस्त्यजतीत्यपेक्षायां तदाह—पदमिति । यत्र स्थितं मनः प्रसीदति कामक्रोधादिवासनास्त्यक्त्वाऽऽनन्दसमुद्रे लीनं भवति तद्भगवतो विष्णोः पदं स्वरूपमेव नान्यत् । तत्र हेतुमाह—परममिति, सर्वत आश्रयान्तरादुत्कृष्टमित्यर्थः ॥ १९ ॥ ❀ ❀ मनः कदाचित् पुनर्विक्षेपादि प्राप्नुयात् तदा किं कर्त्तव्यमित्यपेक्षायामाह—रज इति । यदात्मनः स्वस्य मनो रजसाऽऽक्षिप्तं तमसा विमूढं वा स्यात्तदा धीरः सन् या तत्कृतं रजस्तमोभ्यां कृतं मलं विक्षेपादिदोषं हन्ति निवर्त्तयति तया धारणया [2]तन्नियच्छेद्वशीकुर्यादित्यन्वयः ॥ २० ॥

### हिन्दी अनुवाद

तत्पश्चात् परम पवित्र 'अ उ म' इन तीन मात्राओंसे युक्त प्रणवका मन-ही-मन जप करे । प्राणवायुको वशमें करके मनका दमन करे और एक क्षणके लिये भी प्रणवको न भूले ॥ १७ ॥ ❀ ❀ बुद्धिकी सहायतासे मनके द्वारा इन्द्रियोंको उनके विषयोंसे हटा ले । और कर्मकी वासनाओंसे चञ्चल हुए मनको विचारके द्वारा रोककर भगवान्के मङ्गलमय रूपमें लगाये ॥ १८ ॥ ❀ ❀ स्थिर चित्तसे भगवान्के श्रीविग्रहमेंसे किसी एक अङ्गका ध्यान करे । इस प्रकार एक-एक अङ्गका ध्यान करते-करते विषय-वासनासे रहित मनको पूर्णरूपसे भगवान्में ऐसा तल्लीन कर दे कि फिर और किसी विषयका चिन्तन ही न हो । वही भगवान् विष्णुका परम पद है, जिसे प्राप्त करके मन भगवत्प्रेमरूप आनन्दसे भर जाता है ॥ १९ ॥ ❀ ❀ यदि भगवान्का ध्यान करते समय मन रजोगुणसे विक्षिप्त या तमोगुणसे मूढ़ हो जाय तो घबराये नहीं । धैर्यके साथ योगधारणाके द्वारा उसे वशमें करना चाहिये; क्योंकि धारणा उक्त दोनों गुणोंके दोषोंको मिटा देती है ॥ २० ॥

---

१. प्राङ्गनसप्तदशे श्लोके । २. तन्मनः ।

**यस्यां संधार्यमाणायां योगिनो भक्तिलक्षणः । आशु संपद्यते योग आश्रयं भद्रमीक्षतः ॥ २१ ॥**

**राजोवाच ।**

**यथा संधार्यते ब्रह्मन्धारणा यत्र सम्मता । यादृशी वा हरेदाशु पुरुषस्य मनोमलम् ॥ २२ ॥**

**श्रीशुक उवाच ।**

**जितासनो जितश्वासो जितसंगो जितेंद्रियः । स्थूले भगवतो रूपे मनः सन्धारयेद्धिया ॥ २३ ॥**

**विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम् । यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च सत् ॥ २४ ॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

यतः यस्यां क्रियमाणायां भद्रं सुखात्मकमाश्रयं विषयं पश्यतस्तत्रैव प्रीतिर्भवति ॥ २१ ॥ * * यथा यत्र यादृशी चेति कर्तव्यताविषयतत्तद्विशेषाणां प्रश्नाः ॥ २२ ॥ * * यथेत्यस्योत्तरम् । जितासन इति । विषयमाह स्थूल इति सार्धेन ॥ २३ ॥ * * विशेषो विराड्देहः अतिस्थूलानामपि स्थूलतरः सत्कार्यमात्रम् ॥ २४ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

भक्तिरेव लक्षणं चिह्नं यस्य सः । भक्तिमिश्रस्यैव योगस्य मोक्षसाधकतोक्तेर्न तु भक्तिरहितस्येति भावः । सुखात्मकं भगवंतम् ॥ २१ ॥ * * राजोवाचेति भक्तिमिश्रयोगे राज्ञो जिज्ञासेव न तु चिकीर्षा शुकदेवशिष्यस्य तस्य शुकस्याभिमतायां शुद्धभक्तावेव प्रवृत्त्यौचित्यात् इति । कर्त्तव्यता तत्करणरीतिस्तस्या विषये तत्तद्भेदानां प्रश्नाः ॥ २२ ॥ * * यत्र संमतेत्यस्योत्तरं वदन् पूर्वोक्तस्यांतर्यामिणश्चिद्घनस्वरूपे धारणायामसमर्थानामशुद्धचित्तानां योगिनां रागद्वेषादिमालिन्यनिवृत्त्यर्थं वैराजधारणामाह स्थूल इति ॥ २३ ॥ * * यत्रेदं दृश्यत इत्यनेन दृश्यश्रव्यादिवस्तुमात्राणां भगवद्विभूतित्वाद्भगवद्रूपत्वेन ध्येयत्वे सति स्पर्द्धासूयादयो न क्वापि भवेयुरित्यतः स्पर्द्धाद्यभावे चित्तशुद्धिश्चित्तशुद्धौ च चिद्घनात्मकश्रीनारायणमूर्त्तौ धारणा सुकरा स्यादिति द्योतितम् ॥ २४ ॥

### श्रीमद्वीरराघवव्याख्या

यस्यान्धारणायां सन्धार्यमाणायां धारणायां क्रियमाणायामित्यर्थः । भक्तिलक्षणो योगः । प्रीतिपूर्वमनुध्यानं भक्तिरित्यभिधीयते इत्युक्तलक्षणरूपो योगः । भद्रं शुभमाश्रयं ईक्षतः । ध्यातुराशु सम्पद्यते सम्पन्नो भवति एतादृशमाहात्म्यवती धारणेत्यभिप्रायः ॥ २१ ॥ * * एवं सङ्ग्रहेणाष्टाङ्गयुक्ते योगे उपदिष्टे पुनर्विस्तरबुभुत्सया परीक्षित्पृच्छति । यथेति । धारणाविषयप्रश्नः । यादृशीतिधारणा दशाविशेषप्रश्नः यथेति यत्नक्रमप्रश्नः न तु धारणाया एव दशाविशेषादीनां विशेषेण प्रश्नः न तु प्रधानभूतस्य ध्यानस्येति कश्चित् धारणापूर्वकत्वाद्ध्यानस्य धारणानुसारेणैव ध्यानाच्च तत्प्रश्नेनैव गतार्थत्वात् एवमुत्तरेष्वनुसन्धेयम् ॥ २२ ॥ * * तत्रैकम्वासंयोगरूपचोदनाख्याविशेषाश्शब्दादिभेदादित्यादिन्यायेनोपास्यब्रह्मरूपाणान्नानात्वेनोपासनानामपि नानात्वात्प्रथमङ्गच्छरीरकस्योपासनमाह मुनिः जितासन इति । जितासनः आसनकृतायासरहितः । जितप्राणः जितसङ्गः जितान्तःकरणः जितेन्द्रियः जितबाह्येन्द्रियः स्थूले स्थविष्ठे भगवतो रूपे स्वीयं मनः सारथिभूतया धिया धारयेत् ॥ २३ ॥ * * चिदचिदात्मकप्रपञ्चस्य भगवच्छरीरत्वकथनपूर्वकं तस्य धारणाविषयत्वमाह विशेष इति । विशेषकार्यकारणाकारः पृथिव्यादिभूतमयप्रपञ्चः तस्य देहः स्थवीयसां स्थूलतराणामपि मध्ये स्थविष्ठः स्थूलतरः यत्र देहे विश्वं समस्तम्भूतम्भव्यञ्च भवच्च भूतभविष्यद्वर्त्तमानकालगोचरं समष्टिव्यष्ट्यात्मकम्पदार्थजातं दृश्यतेऽन्तर्गतत्वेनोपास्यते ॥ २४ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

न केवलं मलनाशो धारणायाः फलं किन्तु निरन्तरं भक्तिलक्षणयोगश्चेत्याह यस्यामिति । यस्यां धारणायाम् । सर्वजगदाश्रयं भद्रं भगवन्तमीक्षतश्चिंतयतो योगिनो भक्तिलक्षणो योग आशु सम्पद्यत इत्यन्वयः । भदि कल्याण इति धातोः । कल्याणं मंगलं मंगलं भगवान् विष्णुरितिवचनम् ॥ २१ ॥ * * परीक्षिद्विशेषबुभुत्सया शुकं पृच्छति-यथेति । अत्र यथा यत्र यादृशीतियच्छब्दाः प्रश्नार्थाः । यतश्चोदेति सूर्यः । यच्छब्दस्तु परामर्शे प्रश्नार्थे चापि भण्यत इत्यभिश्रुत्यभिधानाभ्यां निश्चितत्वात् तथा च यथा कथं यत्रकुत्र यादृशी कीदृशीति सम्पद्यत इत्यर्थः ॥ २२ ॥ * * तत्र प्रथमतो यथा प्रश्नं परिहरति जितासन इति । यत्रेत्यनंतरं प्रश्नं प्रत्याह स्थूल इति ॥ २३ ॥ * * क्रमप्राप्तत्वाद्यादृशीति प्रश्नप्रतिवक्ति विशेष इति । यदिदं भूतं भव्यं भवच्च जडाजडं तद्विश्वं यत्राण्डकोशे दृश्यते सोऽयं स्थवीयसां स्थूलतराणां सकाशात् स्थविष्ठः स्थूलतमो विशेष आण्डकोशः शिलालक्षणप्रतिमावत्तस्य तदन्तःस्थस्य हरेर्देहः न तु साक्षाद्देह इत्यन्वयः तदुक्तं शिलावतस्य देहोयमण्डकोशस्तु सावृतिरिति ॥ २४ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

भक्तिलक्षणः पूर्वोक्तधारणादिरूपः ॥ २१ ॥ ❀ ❀ यथेति । अयमपि राजप्रश्नोऽन्यहितार्थ एव ॥ २२-२७ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

यतः यस्यां धारणायाम् । भक्तिरेव लक्षणं चिह्नं यस्य सः । भक्तिमिश्रस्यैव योगस्य मोक्षसाधकत्वोक्तेः न तु भक्तिरहितस्येति भावः । योगिनः कीदृशस्य भद्रमाश्रयं भगवन्तम् ईक्षतः धारणया ईक्षमाणस्य ॥ २१ ॥ ❀ ❀ राजोवाचेति भक्तिमिश्रयोगे राज्ञो जिज्ञासैव न तु चिकीर्षा शुकदेवशिष्यस्य तस्य शुकाभिमततायां शुद्धभक्तावेव प्रवृत्त्यौचित्यात् ॥ २२ ॥ ❀ ❀ यथेत्यस्योत्तरमाह जितासन इति । यत्र सम्मतेत्यस्योत्तरं वदन् पूर्वोक्तस्यान्तर्यामिणश्चिद्घनस्वरूपे धारणायामसमर्थानामशुद्धचित्तानां योगिनां रागद्वेषादिमालिन्यनिवृत्त्यर्थं वैराजधारणामाह स्थूले इति ॥ २३ ॥ ❀ ❀ विशेषः समष्टिविराट् । यत्रेदं दृश्यते इत्यनेन दृश्यश्रव्यादिवस्तुमात्राणां भगवद्विभूतित्वाद्भगवद्रूपत्वेन ध्येयत्वे सति स्पर्द्धासूयादयो न क्वापि भवेयुरित्यत स्पर्द्धाद्यभावे चित्तशुद्धिः चित्तशुद्धौ च चिद्घनात्मकश्रीनारायणमूर्त्तौ धारणा अतिसुकरा स्यादिति द्योतितम् । सत् कार्य्यमात्रम् ॥ २४ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यतो यस्यां सन्धार्यमाणायामनुष्ठीयमानायां भद्रं कल्याणरूपमाश्रयमीक्षतः । ध्यातुर्भक्तिलक्षणो योगः शीघ्रं सम्पद्यते ॥ २१ ॥ ❀ ❀ एवं संक्षेपतोऽष्टांगयोगं श्रुत्वा विस्तरतस्तज्जिज्ञासुः पृच्छति । यथेति । हे ब्रह्मन् ! धारणा यथा सन्धार्यते । यत्र यस्मिन्नाश्रये संमताच वेति चार्थः । यादृशी पुरुषस्य धातुः आशुमनोमलं हरेत् । एतत्सर्वं ब्रूहीति शेषः ॥ २२ ॥ ❀ ❀ उत्तरमाह-जितासन इत्यारभ्य तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत इत्यन्तेन तत्र यथा सन्धार्यते इत्यस्योत्तरं जितासन इत्यादि । यत्र सम्मतेत्यस्य स्थूले भगवतो रूपे इति मन्दाधिकारिविषयत्वेन केचित् स्वदेहान्तर्हृदयाकाशे प्रादेशमात्र मित्युत्तमाधिकारिविषयत्वेन चोत्तरम् । यादृशीत्यस्य तु मनः सन्धार्यते धियेति दृढतया कृतं मनोमलमाशु हरिष्यतीत्युत्तरं बोध्यम् । स्थूले विस्तरतो वक्ष्यमाणे स्थविष्ठे विराड्देहे ॥ २३ ॥ ❀ ❀ यत्र भूतमतीतं भव्यमनागतं भवद्वर्तमानमिदं चिदचिदात्मकं विश्वं सर्वं दृश्यते । स्थवीयसां स्थूलानामपि स्थूलतरः सत्कार्याकारः । विशेषः पृथिव्यादिसंघातरूपस्तस्य भगवतो देहः ॥ २४ ॥

### श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

किञ्च । तादृशी धारणा कर्त्तव्या यया धारणया योगः सिद्ध्येत् । सन्ति च बहवो योगाश्चित्तनिरोधकाः कर्मादयः । तत्रापि भक्तिलक्षणो योगो यया सम्पद्यते तां धारणां कुर्यादित्याह—यत्रेति यत्र विषये सर्वावयवसंस्थितायां चित्तवृत्त्यां सत्याम् । योगिनश्चित्तनिरोधकस्य । भक्तिरेव लक्षणं यस्य गोसाक्षात्कादवत्कदाऽपि भक्तिर्न व्यभिचरति, भक्त्यैव च तत्प्रसिद्धिस्तादृशो योगः सम्पद्यते । ननु योगस्य कस्माद्भक्तिलक्षणत्वम् ? तत्राऽऽह—आश्रयं भद्रमीक्षत इति । भद्रं मनोहरम् । आश्रयं धारणायाः । भगवद्रूपमिति यावत् । तदीक्षतस्तद्ध्यायतः । भगवद्ध्याने भक्तिलक्षणो योगः सम्पद्यत इत्यर्थः ॥ २१ ॥ ❀ ❀ ॥ तत्र राजा विशेषं पृच्छति—यथेति । इयं धारणा कथं सन्धार्या ? किं मानसीं मूर्तिं कृत्वा तत्र मनः स्थापनीयम् ? आहोस्विच्छ्रुतां भगवन्मूर्तिं स्मृत्वा ? किञ्च । यत्र सम्मता । यस्यां मूर्त्तौ सम्मता अनन्तमूर्तित्वाद्भगवतो यस्यामेव मूर्त्तौ सर्वेषामेव योगिनां सम्मतिरस्ति । किञ्च । यादृशी वा । यादृक्प्रकारा । रूपप्राधान्येन धर्मप्राधान्येन वा । स्थूला सूक्ष्मा वा ? निराकारा साकारा वा ? शान्ता वा सामहा वा ? तत्र यादृशी पुरुषस्य मनोमलं हन्ति तत्कथयेत्यर्थादुक्तं भवति । गुरोः सन्निधाने नियोगोऽनुचित इत्यभिप्रायबोधकवाक्यशेषमुक्त्वा नियोगांशं नोक्तवान् ॥ २२ ॥ ❀ ❀ तत्रोत्तरमाह—जितासन इति । यादृशीत्यस्योत्तरम् । आसनादिजयसहिता सा मनोमलं हन्ति । जितसङ्गः । जितो विषयसङ्गो येन । अनेन मनोनियमनमुक्तम् । यत्र सम्मतेत्यस्योत्तरमाह—स्थूल इति । धिया निश्चयात्मकया बुद्ध्या ॥ २३ ॥ ❀ ❀ ननु भगवतः कथं स्थूलं रूपम् ? व्यापकन्तु फलरूपं न धारणामर्हति । अन्यानि मत्स्यादिरूपाण्यनिर्द्धारितपरिमाणानि । अतः स्थूलं किमित्याकाङ्क्षायामाह—विशेषस्तस्य देहोऽयमिति । विशेषः पृथ्वी । सर्वे विशेषास्तद्रूपा इति "अतो विशेष" इति वाक्यात् । विशिष्टः शिष्टो यत्रेति वा । वेः कालस्य शेषो वा । अत्रत्यानां स्वच्छया कालग्रासात् । अत एव भगवतो देहो विशेषः । कालस्य भगवच्चेष्टात्वात्तदाधारो देहो भवत्येव । देहात्मनोः संयोगः सम्बन्ध इति साङ्ख्याः । तदेकदेशिनो योगिनश्चाऽध्यास इति । आवेश इत्यपरे । अग्न्ययोगोलकवत् । अहङ्कारेणाऽहमिति स्वीकार इत्यपरे । ते चत्वारोऽपि पक्षा भगवतो देहस्य च सम्बन्धप्रतिपादका न भवन्ति । किन्तु स्वस्वामिसम्बन्ध इति षष्ठ्या सम्बोधयति—तस्येति । "दिह उपचये" इति धातोरच्प्रत्यये कृते देह इति भवति । भगवतोऽयमुपचय इत्यर्थः । स्वरूपस्थितेनैव यद्यपि सर्वं कर्तुं शक्यते तथापि सर्वेषां पोषार्थं स्वरूपादप्यधिकसुखदानार्थमुपचितः सन् पुष्टः सन् सर्वं करोतीति तदेव रूपं

भगवतो धारणविषयं भवतीति सर्वेषां सम्मतिः। अयमित्यपरोक्षविषयः। यद्यप्येकदेश एव तथा तथापि तेनेतरानुमानं सुकरमिति इतरावयवज्ञानसहकृता प्रत्यक्षसामग्र्येव विशिष्टज्ञानं जनयतीत्ययमित्युक्तम्। **स्थविष्ठञ्च स्थवीयसामिति**। प्रथनात्पृथिवी स्थविष्ठा स्थूला वा। अत्र शास्त्रे विरलावयवाः सूक्ष्माः। संहतावयवाः स्थूलाः। अत एवाऽऽकाशादयः सूक्ष्मास्तथा व्यवहारागोचराः। पृथिवी तु सर्वव्यवहारगोचरा स्थूला। संहतैरुपचितैरवयवैर्गुप्तोऽवयवी प्रकटीक्रियते। तथा देहेनाऽपि भगवान्प्रकटीक्रियत इति ध्यानविषयतायां भगवानपि प्रकटो भवतीति तस्य स्थूलत्वनिरूपणम्। बुद्धौ प्रविष्टो वा बुद्धिमपि विशदयतीति पश्चात्स्थूला बुद्धिः सूक्ष्मान्विषयान्न ग्रहीष्यति। तेन मनसो रजस्तमःकृतो दोषो निवर्त्तितो भवति। चकारात्सुन्दरश्च। सर्वविशेषसमवायात्। तेन तत्र बुद्धिः स्थिरा भवति। स्थवीयसामाकाशादीनां मध्ये। उपचितावयवत्वादिति। अत एव "**आकाशशरीरं ब्रह्मे**"ति "**वायुरात्मे**"ति "**ज्योतिषां ज्योतिरि**"ति "**तोयात्मने नम**" इति वाक्यैः सर्वाण्येव भूतानि भगवच्छरीरत्वेनोक्तानि। तथाप्य-स्मादेव विशेषादस्य धारणाविषयत्वम्। किञ्च। सर्वाणि रूपाण्यत्र सम्भवन्ति। इदं तु नाऽन्यत्र सम्भवतीत्यस्य ध्यानास्पदत्वम्। तदाह—यत्रेति। सर्वमेव विश्वमत्र व्यज्यते समुद्राः सूर्यो वायुरवकाशश्च। अन्येषामपि सूक्ष्माणामेतदवान्तरभूतानामहङ्कारा-दीनाञ्च स्वयमेवाऽत्र निवेशं वक्ष्यति—"**पातालमि**" त्यादिना। किञ्च। कालोऽप्यत्र निविशते[1] कार्यद्वारेति तदाह—**भूतं भव्यं भवच्चेति**। अनुदयास्तमयरूपस्य कालस्य भूतत्वादिसाधकत्वम्। **केनचिन्निमित्तेना**ऽतीतत्वादिधर्मसम्बन्धात्। तत्रोत्पत्तिस्थिति-विनाशलक्षणगुणत्रयप्रेरणात्तथात्वम्। अतः स्वकार्यसहितः कालो भगवच्चेष्टारूपोऽत्र स्पष्टतया प्रकाशत इति सर्वमेव भगवत्कार्यमत्र स्पष्टतया ज्ञातं भवति। भूतं जातम्। भव्यम् भाव्यम्। भवत् वर्त्तमानरूपम्। चकारात्कालत्रयसम्बन्धरहितमपि प्राणजीवादि-स्वरूपमत्र दृश्यत इत्यर्थः। यदिति प्रसिद्धम्। नाऽत्र तिरोहितमिव किञ्चित्। अतो विशेषतः प्रमाणं न व्यक्तव्यमिति भावः॥२४॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः

**यथा सन्धार्यत इत्यत्र। सर्वेषामेवेति**। एतेन सर्वसम्मतस्य सर्वाधिकारकत्वात् सुगमत्वं भवतीति तदेव वक्तव्यमि-त्याशय इत्यर्थः॥२२॥ ❀ ❀ **जितासन इत्यत्र। आसनादीति**। एतेन साग्रहेत्युत्तीरितम्। उत्तरार्थे **स्थूल** इत्यादिकथनेन स्थूला साकारा रूपप्राधान्येनेत्युत्तरितम्। धियेत्यनेन निदिध्यासनं चोक्तं ज्ञेयम्॥२३॥ ❀ ❀ **विशेष** इत्यत्र। **कथमिति**। केन परि-माणेन अतिमहता वा मध्यमेन वा। **अतो विशेष इति**। 'परस्य दृश्यते धर्मो ह्यपरस्मिन् समन्वयात्। अतो विशेषो भावानां भूमावेवोपलक्ष्यत' इति तृतीयस्कन्धीयवाक्याल्लुप्तमत्त्वर्थीयं विशेषपदमित्यर्थः। अनयैवारुच्या पक्षद्वयमाहुः **विशिष्ट** इत्यादि। अत्र विः शेषः **शिष्टो यत्रे**ति पाठः प्रतिभाति। द्वितीयाङ्गीकारे हेतुमाहुः**अत्रत्याना**मित्यादि। तथा चात्रत्यानां ग्रासोत्तरमवान्तरप्रलये-ऽयमेव शिष्यतेऽतस्तथेत्यर्थः। **अत एवेति**। ग्रासानधीनत्वादेव। प्रथमाङ्गीकारे हेतुमाहुः **कालस्ये**त्यादि। **न भवन्तीति**। तत्संयुक्त-तदध्यस्ततदाविष्टेषु संयुक्तादिपदं विना केवलषष्ठ्या तत्तन्मतविवक्षितप्रतीत्यनुत्पत्तेस्तस्यायमिति प्रयोगाभावान्न भवन्तीत्यर्थः। **पोषार्थमिति** पदस्यार्थमाहुः **स्वरूपे**त्यादि। **सम्मतिरि**ति। तथा च 'यत्र सम्मते' ति २।१।२२ प्रश्नस्येदमुत्तरमित्यर्थः। **इतरानुमान-मिति**। अयं ब्रह्माडैकदेशः इतरावयवसंलग्नः। अवच्छिन्नैकदेशत्वात्। अस्मदादिशरीरैकदेशवत्–इत्यादिरूपम्। **अयमित्युक्त-मिति**। शुकस्य योगजधर्मेण सर्वप्रत्यक्षसिद्धावपीदानीं ज्ञानलक्षणया विशिष्टज्ञानं राज्ञोपि सुकरमित्येतद्बोधनायायमित्युक्तम्। अन्यथा असावित्येव वदेदित्यर्थः। स्थविष्ठस्थूलयोर्भेदबोधनार्थं स्थूलपदार्थं विवृण्वन्ति **अत्रे**त्यादि। **तथेति** पृथिवीवत्। **ध्यानविषयतायामिति**। उपचितावयवप्रकारकध्यानविषयत्वे। **इति तस्येति**। इति हेतौ। तथा च यद्येवमर्थो बोधनीयो न स्यात्, तदायमित्यनेन विशिष्टविषयताया बोधितत्वात्तेन स्थूल (रूप) ताज्ञानस्यापि जननादिमं चरणं न वदेदित्यर्थः। स्थविष्ठपदस्य विस्तारार्थकत्वपक्षे तत्कथनप्रयोजनमाहुः **बुद्धावित्यादि**। **स्थूलेति**। **बहुविषयग्राहकतया विस्तीर्णा**। **तेनेति**। सौन्दर्येण। **अत एवेति**। अनुपचितावयवत्वादेव। **भगवच्छरीरत्वेनेति**। न तु देहत्वेनेत्यर्थः **अस्मादिति**। **उपचितावयवत्वरूपात्**। एतस्य धारणाविष-यतायाः सर्वसम्मतत्वाय देहत्वविशदीकरणार्थमेव स्थविष्ठादिपदानीत्याशयमाहुः **किञ्चेत्यादि**। तुरीयचरणप्रयोजनमाहुः **कालोपीत्यादि**। ननु साङ्ख्यानुयायिभिश्चिरक्षिप्रादिव्यवहारवद्भूतभव्यभवद्व्यवहारोप्युपाधिभिरेव साध्यत इति नानेन व्यवहा-ररूपेण कार्येण कालसिद्धिरित्यत आहुः **अनुदयेत्यादि**। उदयास्तमयाभ्यां रूप्यत इत्युदयास्तमयरूपा सूर्यादिगतिस्तद्भिन्नस्य नित्यस्य **कालस्य भूतत्वादिसाधकत्वं** भूतत्वादिव्यवहारोपपादकत्वं **केनचिन्निमित्तेन** भगवदिच्छया चलनैकस्वभावत्वेन धर्मेण, **अतीतत्वादिधर्मसम्बन्धात्**, यथा भ्रमतः कुलालादिचक्रस्य तत्तद्देशप्रतियोगिकसंयोगे नातीतत्वादिसम्बन्धः, तथा ब्रह्माण्डावयव-भूतं तं तं देशमतिक्रामतोधिधिष्ठितः प्रयास्यतश्च कालस्य तत्प्रतियोगिकावयवसम्बन्धेनातीतत्वादिसम्बन्धादुपपद्यत इति तत्सिद्धि-रित्यर्थः। ननु ब्रह्माण्डस्य नश्वरत्वात्तदभावे तत्सम्बन्धाभावात् कथं तत्सिद्धिरित्यत आहु **अत्रेत्यादि**। तथा च सर्गादौ तन्मतेपि चन्द्रसूर्याद्यभावेन तद्गतिरूपोपाध्यभावेप्युत्पत्तिस्थितिनाशानां क्रमिकत्वस्य (नित्येन) गुणस्वभावं कालस्य भूतत्वादिसाधकत्वं भूतत्वादिव्यवहारोपपादकत्वं गुणस्वभावमात्रेणोपपत्त्याभावाद्गुणत्रयप्रेरणाय कालोवश्यमभ्युपेय इति तेषां नित्यानां गुणानां प्रेरणा-

---

१. निविशति इति क।

दतीतत्वादिव्यवहारोपपादकत्वमित्यर्थः । सिद्धमाहुः अत इत्यादि । अखण्डस्यापि कालस्यैवं भूतादिव्यवहारोपपादकत्वात्तथेत्यर्थः । एवं भूतादिव्यवहारं साधयित्वा व्याकुर्वन्ति भूतमित्यादि । दृश्यत इत्यत्र । दृशिर्ज्ञानसामान्यार्थकः । ननु कालसम्बन्धरहितस्य दृश्यत्वे किं मानमत आहुः यदित्यादि ॥२४॥

### श्रीगिरिधरकृता बालप्रबोधिनी

का सा धारणा या मनोमलं निवर्तयतीत्यपेक्षायामाह—यत इति । आश्रयभेदात् सन्ति बह्वयो धारणाः परन्तु यतो यस्यां धारणायां सन्धार्यमाणायां सम्यक् क्रियमाणायां भद्रं मङ्गलरूपमाश्रयं विषयं भगवत्स्वरूपमीक्षतो ध्यातुर्योगिनो भक्तिलक्षणो भगवति परमप्रेमरूपो योगस्तत्प्राप्त्युपायरूप आशु सम्पद्यते, सैव धारणाऽनुष्ठेयेति शेषेणान्वयः ॥ २१ ॥ ❀ ❀ एवं संक्षेपेणाष्टाङ्गयुक्ते योगे उपदिष्टे पुनर्विस्तरबुभुत्सया पृच्छति—यथेति । धारणा यथा सन्धार्यते सम्यक् क्रियते इति इतिकर्त्तव्यताक्रमप्रश्नः । तवाविदितं किञ्चिन्नास्त्यतो मदनुग्रहायोत्तरं वक्तव्यमित्याशयेन सम्बोधयति—हे ब्रह्मन्निति । यादृशो धारणाऽऽशु शीघ्रं पुरुषस्य योगिनो मनोमलं विक्षेपादिकं हरेदिति विशेषतो धारणास्वरूपं वक्तव्यमित्यर्थः । यत्र धारणा सम्मतेति भगवतोऽप्यनन्तरूपत्वात् कस्मिन् स्वरूपे धारणा तवाभिप्रेता तद्वक्तव्यमित्यर्थः । न च राज्ञा धारणाप्रकारादिप्रश्न एव किमिति कृतो ध्यानसमाध्योस्तत्प्रश्नः कुतो न कृत इति शङ्कनीयम्, ध्यानसमाध्योरपि धारणापूर्वकत्वेन धारणानुसारेणैव अनुष्ठेयतया धारणाप्रश्नेनैव तत्प्रश्नस्यापि गतार्थत्वादिति ज्ञेयम् ॥ २२ ॥ ❀ ❀ एवं पृष्टः शुको यथा सन्धार्येत इत्यस्यासनाद्यभ्यासपूर्वकं सन्धार्येते इत्युत्तरमाह—जितासन इति । अभ्यासबलेनासनकृतायासरहितः । जितश्वास इति प्राणायामाभ्यासेन वशीकृतप्राणः । जितसङ्ग इति सदसद्विवेकबलेन देहापत्यकलत्रादिष्वासक्तिरहितः । जितेन्द्रिय इति सदसद्विवेकेनैव शब्दादिविषयेभ्यः प्रत्याहृतेन्द्रियश्च सन् धिया निश्चयात्मिकया बुद्ध्या स्थूले भगवतो रूपे मनः सम्यग्धारयेत् ॥ २३ ॥ ❀ ❀ किं तस्य स्थूलं स्वरूपमित्यपेक्षायामाह—विशेष इति । अयमपरोक्षो ब्रह्माण्डात्मको विशेषशब्दवाच्यस्तस्य भगवतो देहः स्थवीयसां स्थूलतराणामपि मध्ये स्थविष्ठः स्थूलतरः एतदेवोपपादयति—यत्र भगवद्देहे इदं भूतं भव्यं भवच्च भूतभविष्यद्वर्तमानकालगोचरं सत् समष्टिव्यष्ट्यात्मकं कार्यमात्रं विश्वं दृश्यते इत्यन्वयः ॥ २४ ॥

### हिन्दी अनुवाद

धारणा स्थिर हो जानेपर ध्यानमें जब योगी अपने परम मङ्गलमय आश्रय ( भगवान् ) को देखता है, तब उसे तुरन्त ही भक्तियोगकी प्राप्ति हो जाती है ॥ २१ ॥ ❀ ❀ परीक्षित्ने पूछा—ब्रह्मन् ! धारणा किस साधनसे किस वस्तुमें किस प्रकार की जाती है और उसका क्या स्वरूप माना गया है, जो शीघ्र ही मनुष्यके मनका मैल मिटा देती है ॥ २२ ॥ ❀ ❀ श्रीशुकदेवजीने कहा—परीक्षित् ! आसन, श्वास, आसक्ति और इन्द्रियोंपर विजय प्राप्त करके फिर बुद्धिके द्वारा मनको भगवान्के स्थूल रूपमें लगाना चाहिये ॥ २३ ॥ ❀ ❀ यह कार्यरूप सम्पूर्ण विश्व जो कुछ कभी था, है या होगा-सब-का-सब जिसमें दीख पड़ता है, वही भगवान्का स्थूल-से-स्थूल और विराट् शरीर है ॥ २४ ॥

**आ[१]ण्डकोशे शरीरेऽस्मिन्सप्तावरणसं[२]युते । वैराजः पुरुषो योऽसौ भगवान्धारणाश्रयः ॥ २५ ॥**

**पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम् ।**
**महातलं विश्वसृजोऽथ गुल्फौ तलातलं वै पुरुषस्य जंघे ॥ २६ ॥**
**द्वे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलं चातलं च ।**
**महीतलं तज्जघ[३]नं महीपते नभस्तलं नाभिसरो गृणन्ति ॥ २७ ॥**
**उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य ।**
**तपो रर[४]ाटीं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः ॥ २८ ॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

अस्य चोपलक्षणत्वेन विषयत्वं वस्तुतस्तु विराड् जीवनियंता भगवानेव विषय इत्याह अंडकोशांतर्वर्तिनि कटाह एव पृथिव्यावरणं ततोऽप्तेजोवाय्वाकाशाहंकारमहत्तत्त्वानीति सप्त ॥ २५ ॥ ❀ ❀ विराड्देहतज्जीवतदंतर्यामिणामभेदमारोप्योपासनं कर्तव्यमित्याशयेनाह । पातालं पादमूलं पादस्याधोभागं पातालादीनां तदवयवता विधीयते पातालादीन्यतलांतान्यधस्तना-

१. प्रा० पा० अण्डकोशे । २. प्रा० पा० संयुतः । ३. प्रा० पा० तज्जघने । ४. प्रा० पा० ललाटं ।

दारभ्य सप्त भूविवराणि पठंति गृणंतीत्यादिप्रमाणप्रदर्शनम् । पार्ष्णिप्रपदे पादस्य पश्चात्पुरोभागौ ॥ २६ ॥ ❀ ❀ ऊरुद्वयस्याधोभागे वितलमुत्तरभागे अतलमिति ज्ञेयम् । नाभिरेव सरः ॥ २७ ॥ ❀ ❀ ज्योतिरनीकं ज्योतिषां समूहं स्वर्गं महर्लोकं ग्रीवेति गृणंति । तपोलोकं रराटीं ललाटं सत्यं सत्यलोकम् ॥ २८ ॥

## वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अस्य च विराड्देहस्य च अंडकोशस्यांतर्वर्ती कटाहस्तदाकारः पृथिवी देहो यत्र विश्वं स्थितं स एव पृथिव्यावरणं न तु ततोन्यत्ततस्तेन सहाबादयः सप्त ज्ञेया इत्यर्थः । वैराजो हिरण्यगर्भस्य देहः भगवानिति हिरण्यगर्भांतर्यामी गर्भोदशायी । द्वितीयः पुरुषस्तत्प्रतिमात्वेनोपास्यमानो वैराजोपि भगवच्छब्देनोच्यते ॥ २५ ॥ ❀ ❀ पठंति वेदा इति । न त्वहमेव वदामीति प्रमाणप्रदर्शनम् ॥ २६ ॥ ❀ ❀ महीतलं भूतलं तज्जघनं कटितटम् । महीपते इति । एतद्ध्याने विशेषतस्त्वया कार्यमिति भावः । अगाधत्वाद्ब्रह्मजनकपद्मनिदानत्वाद्वा नाभिसर इत्युक्तम् ॥ २७ ॥ २८ ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

जघनं नाभेरधोभाग इत्यर्थः ॥ २७—३० ॥

## श्रीमद्वीरराघवव्याख्या

एतच्छरीरको निरुद्धांशभूतः पुरुषो विषय इत्याह आण्डकोश इति सप्तावरणसंयुते पृथिव्यप्तेजोवाय्वाकाशाहङ्कारमहत्तत्त्वानि सप्तावरणानि तैर्युक्तेऽण्डकोशाख्यशरीरे वैराजः विराट् अनिरुद्धः तदंशभूतः पुरुषः वैराजः न चतुर्मुखः तस्यैवं पुरा धारणयात्मयोनिरित्येतद्रूपोपासकत्त्वावगमादसौ वैराजः पुरुषः भगवान्धारणाश्रयः धारणाविषयः ॥ २५ ॥ ❀ ❀ एवं चतुर्दशभुवनात्मकाण्डकोशस्य तच्छरीरत्वं सामान्येनोक्त्वाऽण्डकोशान्तर्गतपदार्थान् विभज्य पादाद्यवयवत्वेनोपासनामाह पातालमिति एतस्य वैराजपुरुषस्य पादमूलं पादस्याधोभागम्पातालम्वदन्ति पादतलत्वेन पातालमुपास्यम्वदन्तीत्यर्थः एवमग्रेपि पार्ष्णिश्च प्रपदञ्च पार्ष्णिप्रपदे पार्ष्णिः पादमूलं प्रपदं पादाग्रं एतदुभयं रसातलमित्यर्थः विश्वसृजः विश्वस्रष्टुः द्वावपि गुल्फौ महातलं द्वे अपि जङ्घे तलातलम् ॥ २६ ॥ ❀ ❀ विश्वमूर्त्तेर्द्वे जानुनी सुतलम्वितलमतलञ्च ऊरुद्वयं महीतलं भूर्लोकं तस्य जघनङ्कट्याः पुरोभागन्नभस्थलम्भुवर्लोकं नाभिरेव सरस्तत्वेनोपास्यं गृणन्ति वदन्ति तत्तत्त्वविद इति शेषः ॥ २७ ॥ ❀ ❀ अस्य वैराजस्योरःस्थलं उरःप्रदेशं ज्योतिरनीकं ज्योतिश्चक्रं ग्रीवात्वेन महर्लोकं उपास्य इत्यर्थः । अस्य वदनं जनलोकः आदिपुंसः रराटीं ललाटं तपोलोकं विदुः सहस्रशीर्ष्णः सहस्रशिरसः शीर्षाणि शिरांसि सत्यं सत्यलोकं विदुरित्यर्थः ॥ २८ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

पृथिव्यादिपंचभूताहंकारमहत्तत्वसंज्ञैः सप्तभिरावरणैः कवचस्थानीयैः संयुते बहिरावृते । शरीरे शीर्यमाणत्वात् । तस्मिन्नाण्डकोशे योऽसौ विशेषेणप्रकाशनाद्विराजाख्याण्डांतर्वर्तित्वात् सर्वतो वरत्वाद्वैराजाख्यः पुरुषः पुरु बहुकर्मफलं सनोति ददातीति पुरुषः । असौ भगवान् धारणाश्रयः तद्विषयतया कृता धारणा मनोमलं हरतीत्यन्वयः । अण्डकोशो विराट्प्रोक्तो विशेषेण प्रकाशनात् । वैराजस्तद्गत इत्यादेः ॥ २५ ॥ ❀ ❀ उपदिष्टरूपध्यानप्रकारमाह पातालमित्यादिना । अंडाख्यप्रतिमायाः पातालादिसत्यलोकपर्यंता लोकाः पादमूलादिशिरोंतान्यंगानि नत्वंडस्थितस्य तस्य हरेस्तान्यंगानि किं तर्हि । तत्पादमूलाद्यवयवेभ्यो जातानि तदाश्रितानि वाऽतो न तेषां केवलं चिदानंदाद्यात्मकभगवदवयवैरभेदः शंकनीयः । एतस्य पादमूलमित्याद्यभेदोक्तिस्तु "ब्राह्मणोस्यमुखमासी" दित्यादिवद्युज्यते एवमेवेंद्रादिदेवादीनामत्र तदवयवेंद्रियगोलकाद्यभेदकथनं तत्तदंगादिभ्य उत्पन्नत्वात्तदाश्रितत्वात्तदधीनत्वाभिप्रायं न तु स्वरूपैक्याभिप्रायम् । तेषां स्वतस्तेभ्यो भिन्नत्वात्प्रतिमापेक्षयांगानि भूरादीनि स्वरूपत इत्यादेः ॥ तथाचाक्षरयोजना ॥ एतस्याडांतर्वर्तिनो हरेःपादमूलं पातालं पठंतीत्यन्वयः चिदानंदाद्यात्मकात्पादमूलाज्जातं तदाश्रितं चेति ज्ञानिनः शिष्टेभ्य उपदिशंति । उपदिष्टास्तथोपासते चेत्तत्राप्येवमेवानुसन्धेयम् । हिशब्द उक्तार्थप्रमाणप्रसिद्धिप्रकाशकः पार्ष्णिश्च प्रपदं च पार्ष्णिप्रपदे पार्ष्णिः पादस्य पृष्ठभागः प्रपदं पादाग्रं विश्वं सृज्यतीति विश्वसृट् तस्य गुल्फौ प्रशस्तलक्षणपिंडकाख्यपर्वणी महातलं पठंतीति पूर्वेणान्वयः ॥ २६ ॥ ❀ ❀ अधोभागे वितलमुपरिभागे त्वतलमिति विभागः । जघनं कटितलं एतत्स्मरणं विशेषात्त्वया कार्यमित्यतो महीपत इति संबोधितं अगाधत्वब्रह्मजनकपद्मनिदानत्वाभिप्रायेण नाभिसर इत्युक्तं नभस्तलं भुवर्लोकः ॥ २७ ॥ ❀ ❀ ज्योतिरनीकं ज्योतिश्चक्रस्थानं स्वर्लोकः ॥ महर्लोकोस्य हरेर्ग्रीवेति गृणंति जनो जनलोकः । तपस्तपोलोकः रराटिं ललाटम् ॥ २८ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

उरःस्थलमित्यस्य टीकायां गृणन्ति इत्यत्र विदूरेवान्वेतुं युक्तम् ॥ २८ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या।

स एव विशेषः कुत्र को वा इत्यत आह। अण्डकोशे पञ्चाशत्कोटियोजनप्रमाणे ब्रह्माण्डे पृथिव्यप्तेजोवाय्वाकाशाहङ्कारमहत्तत्त्वानीति सप्तावरणानि तैर्युते। वैराजः हिरण्यगर्भस्य देहः, भगवानिति हिरण्यगर्भान्तर्यामी गर्भोदशायी द्वितीयः पुरुषः, तत्प्रतिमात्वेनोपास्यमानो वैराजोऽपि भगवच्छब्देनोच्यते॥ २५॥ ❀ ❀ तस्य पादादित्वेन किं किं ध्येयम् इत्यपेक्षायामाह। पादमूलं पादस्याधोभागम्। पार्ष्णिप्रपदे पादस्य पश्चात्पुरोभागौ॥ २६॥ ❀ ❀ ऊरुद्वयमिति तस्याधोभागे वितलम् ऊर्ध्वभागे अतलमिति ज्ञेयम्॥ २७॥ ❀ ❀ उरः स्वर्गः ग्रीवा महर्लोकः वदनं जनलोकः ललाटं तपोलोकः शीर्षाणि सत्यलोकम्॥ २८॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

आंडकोशे ब्रह्माण्डकोशे पृथिव्यप्तेजोवाय्वाकाशाहंकारमहदाख्यैः सप्तभिरावरणैः संयुते। बाह्यतः कपित्थाकारेणान्तश्चरणाद्यवयववता कूर्मोपमेन रूपेण चतुर्मुखाख्यस्वाभिमानिक्षेत्रज्ञभोग्यतया च विशेषतो राजत इति विराट् तत्रोपास्यतया भवो वैराजः पुरुषो धारणाश्रयः। धारणाविषयः॥ २५॥ ❀ ❀ एतस्य पुरुषस्य सावरणपातालादिसत्यान्तचतुर्दशभुवनशरीरिणः पातालं पादमूलं पादस्याधोभागं मुनयः पठन्ति पातालं पुरुषपादतलत्वेनोपास्यं बोधयन्तीत्यर्थः। एवमग्रेऽपि बोध्यम्। पार्ष्णिश्च प्रपदे पादस्य पश्चात्पुरोभागे रसातलं पठन्ति। विश्वसृजः सर्वस्रष्टुः द्वौ गुल्फौ महातलं द्वे जङ्घे तलातलं पठन्ति॥ २६॥ ❀ ❀ विश्वमूर्त्तेर्द्वे जानुनी सुतलम्। वितलमतलं चोरुद्वयं महीतलं भूर्लोकं जघनं नभस्तलं भुवर्लोकं नाभिसरोनाभिसरस्तद्गृणन्ति वदन्ति॥ २७॥ ❀ ❀ अस्य वैराजस्य पुरुषस्य उरःस्थलमुरःप्रदेशं ज्योतिषां समूहं स्वर्गलोकं गृणन्ति। महर्लोकः अस्य ग्रीवा ज्ञेया जनलोकः वदनं ज्ञेयमुपासकैरिति शेषः। तपस्तपोलोकं रराटिं ललाटं सत्यं सत्यलोकं शीर्षाणि शिरांसि विदुः पूर्वे उपासकाः॥ २८॥

## श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

तत्र तस्य कथं ध्येयत्वम्। ध्यानस्य फलदानावश्यम्भावात्। क्रियान्तरवद्ध्यानस्य नाऽदृष्टद्वारा फलजनकत्वम्। ध्येयसाक्षात्कारस्यैव दृष्टत्वात्। भगवत्सम्बन्धाद्ध्येयत्वेऽपि "गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय" इति न्यायेन भगवानेव कथं न ध्यानविषयीक्रियते। तत्राऽऽह—आण्डकोश इति। नेदं ध्यानविषयत्वेन निरूपितं किन्तु तदाश्रयत्वेन। अनेन "यथा सन्धार्यत" इत्यपि निरूपितं भवति। भगवान् साक्षाद्विषयत्वेन आण्डकोशस्तु तदाधारत्वेन। यद्यपि स्वात्मन एव जीवस्याऽऽधारत्वं युक्तं तदप्यग्रिमाध्याये मतान्तरत्वेन वक्ष्यते। तथापि बहिःस्थितो भगवानन्तः प्रवेशनीय इति स्नेहाधिक्यसिद्ध्यर्थमात्मनो महत्वसिद्ध्यर्थं च प्रयत्नसाफल्याय च स्वात्मनि सिद्धभगवद्रूपापेक्षया सिद्धसाधनत्वदोषाभावात्स्मरणमात्रविषयत्वाच्च ध्यानसिद्ध्यर्थं ब्रह्माण्डाधार एव भगवान्विषयत्वेन निरूप्यते। अण्डसम्बन्धी आण्डः। स एव कोशो मुकुलितकमलरूपः। स एव शरीरम्। "भूतैर्यदा पञ्चभिरात्मसृष्टैरि"ति वाक्यात्स्वार्थं भगवाञ्छरीरमिदं कृतवान्। अतोऽत्र कृतं तस्य भोगाय भवति। भोगायतनत्वाच्छरीरस्य। अत आत्मापेक्षयाऽप्ययमेवाऽऽधारत्वेन ध्येय इति भावः। कोशरूपत्वादस्येतर[1]देहवत्सच्छिद्रता निवारिता। तत्रैव मकरन्दपानञ्च। अस्य शरीरस्य सुरक्षितत्वं कथयन्भगवद्व्यतिरिक्तस्यैव सर्वस्य तत्त्वसमूहस्याऽत्र निवेशमाह—सप्तावरणसंयुक्त इति। सप्त यान्यावरणानि तैः संयुक्ते। संयुक्तपदान्मध्ये शून्यं स्थानं निवारितम्। जलादिप्रकृत्यन्तानि सप्ताऽऽवरणरूपाणि। तत्र यो वैराजः पुरुषो द्वितीयपुरुषरूपो यः सर्वत्र शास्त्रे प्रसिद्धः असावित्यनुभवसिद्धश्च स एव वैराजो विराट्शरीरे प्रविष्टः। न तु जीवविशेषः कश्चित्। तदाह—भगवानिति। यो वैराजः पुरुष उक्तः स एव भगवान् योगिप्रत्यक्षसिद्धः। अत एव प्रचुरतराभ्यासादसाविति प्रत्यक्षतया निर्देशः। स तु धारणाया आश्रयः। तस्याऽऽश्रयः कोशः। यथा अयोगोलकस्थो वन्हिः। यथा वा कमलस्थितो भ्रमरः। यथा वा प्रासादस्थितो राजा। आश्रयपदेन धारणायाः फलं स्वशरणमागतायाः सर्वथा दास्यतीति सूचितम्॥ २५॥ ❀ ❀ इदानीं सर्वेषामेव सूक्ष्माणां साधाराणां तत्र निवेशनं वक्तुं भारत्वाभावायाऽऽधाराणामवयवत्वं निरूपयति पातालमित्यादिभिः—चतुर्दश लोकाश्चतुर्दशभेदेनाऽवयवविन्यासत्वमापन्ना ध्यानविषयत्वमापद्यन्ते। न तु भगवदवयवा लोकत्वमापन्नाः। तथा सत्युत्तमस्य हीनभावादध्येयत्वमेव स्यात्। तदाह। पातालं सर्वाधो लोकः। पादमूलं पादारक्तस्थानम्। तथा सति वासुकिप्रभृतीनां रेखात्वमुपपद्यते। अत्र प्रमाणमाह—पठन्तीति। वेदवदनादिसिद्धेयं प्रसिद्धिः। एतस्य शरीरस्य। भगवत्पक्षे साकारब्रह्मणस्तत्र व्याप्तत्वात्तद्भावमापन्नमिति। पार्ष्णिश्चरणपश्चाद्भागः। प्रपदं पादाग्रम्। प्रत्याहारेण तन्मध्यभागश्च। रसातलं तदुपरितनो लोकः। गुल्फौ पादग्रन्थिरूपौ। महातलं रसातलादुपरितनो लोकः। एवमग्रेऽपि पूर्वनिरूपितस्योपरितनो लोकः पश्चान्निरूप्य इति। महातलस्य महत्पदप्रयोगे हेतुमाह—विश्वसृज इति। तत आरभ्य सृष्टेराधिक्यात्। तस्य भिन्नखण्डत्वनिरूपणायाऽथशब्दः। एतावता पञ्चात्मकः पुरुष इति निरूपितो भवति। तत्र लोकद्वयमेकः खण्डः। अथ भिन्नप्रकारेण। गुल्फौ। त्रयाणामपि गुणानां पञ्च भेदा अप्युक्ता भवन्ति। केवलं तमः, रजस्तमः, रज, रजःसत्त्वम्, सत्त्वमिति। तत्र केवलं तमो निरूपितम्। महा-

१. उत्तरदेहवदिति ख।

तलादिसुतलपर्यन्तं द्वितीयः खण्डः । तत्र जंघे तलातलम् । पुरुषस्येति लोमशत्वम् । जंघे जङ्घाद्वयम् । उभयावयवत्वान्नाम्नि पदद्वयप्रयोगः । आधारत्वेन वा । सुतलं द्वे जानुनी । जानुनीपदेनैव जानुद्वये प्राप्ते पुनर्द्विपदं तस्य लोकस्य द्विरूपताज्ञापनार्थम् । अत एवाग्रे सुतलं शुद्धमिति वक्ष्यति । साधारणस्थानं स्वस्थितिस्थानञ्च । यत्र बलिस्तिष्ठति तच्छुद्धम् । अत एव तस्य प्रदर्शितं विश्वरूपमनुस्मारयति—विश्वमूर्त्तेरिति । वितलमतलञ्च ऊरुद्वयम् । एकमतलम् । एकं वितलम् । केचनाऽग्रपश्चाद्भावभेदेन द्वयमपि द्वयमाहुः । तल्लौकिकपुरुषन्यायेन तथा सम्भवेऽपि पञ्चमे ततोऽधस्तादित्यभावाच्चिन्त्यम् । अत्र चकारद्वयस्य विद्यमानत्वात्तथात्वं वा । तत्राप्यवान्तरभेदो वा । महादेवक्रीडास्थानं मयपुत्रस्थानञ्च स्वर्गापररूपम् । महीतलं पृथिवी । तस्य भगवतो जघनम् । उत्थितपुरुषस्यैवं व्यवस्था । ऊर्ध्वगोलस्य च । ध्येयस्तु स एव । महोपतेरिति राजरूपेणाऽत्र भगवत्स्थितिरुक्ता । नभस्तलमन्तरिक्षम् । नाभिसर इत्यन्तरिक्षे जलस्थितिरुक्ता । प्रत्यक्षविरोधेऽपि वेदप्रमाणसिद्धमित्याह—गृणन्तीति । "सलिलं वा इदमन्तरासीद्यदतरन्तत्तारकाणां तारकात्वमि" ति श्रुतेः । अत्र भगवन्मूर्त्तेरभावाद्रुद्रालयत्वाच्च नाभिकमलोद्भवसम्भवाच्च सरस्त्वेनैव निरूपणम् । उरः वक्षस्थलम् । ज्योतिरनीकमादित्यादिध्रुवान्तं ज्योतिश्चक्रम् । तदस्य । तत्र नाऽन्यस्तिष्ठतीत्युक्तं भवति । शिशुमारस्य भगवत्त्वात् । हृदये च जीवस्थानं भवति । अतो ज्योतिरनीके शिशुमारे भगवान् ध्येयः । ग्रीवा महर्लोकः । वदनं जनलोकश्चिबुकादिभ्रूपर्यन्तम् । अयमपि केवलं भगवतः । नित्यसुखस्थानत्वात् । तदग्रे वक्ष्यामः । तपोलोको रराटी ललाटं शून्यस्थानम् । स्त्रीपदप्रयोगः शृङ्गाराधारत्वख्यापनार्थः । आदिपुंस इति । तपसा तत्प्राप्यत इति । सत्यं तु शीर्षाणि । शिरसां बहुत्वे हेतुः—सहस्रशीर्ष्ण इति । "सहस्रशीर्षे" ति तस्य श्रौतत्वज्ञापनाय । तत्र ब्रह्मादीनां बहूनां लोकभेदात्सर्वेषां मूर्धन्यतासिद्ध्यर्थं मूर्द्धानं यन्तीति शीर्ष्णा बहुवचनम् ॥ २६ ॥ २७ ॥ २८ ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः ।

आण्डकोश इत्यत्र । तदाश्रयत्वेनेति । ध्यानविषयाश्रयत्वेन । ननु यदि भगवानेव ध्येयो न देहस्तदायं किमित्युच्यते, यदि तदाधारत्वेन तदा जीव एव तथात्वेन ग्राह्यः । 'य आत्मनि तिष्ठन्नात्मानमन्तरो यस्यात्मा शरीर' मिति शरीरत्वाधारत्वयोस्तत्र श्रावितत्वेनान्तरत्वेन सहजस्नेहविषयत्वेन चोत्कृष्टत्वादित्याशङ्कायामाहुः यद्यपीत्यादि । युक्तमिति । उक्तहेतुभ्यो युक्तम्, तथापि बहिष्ठ एवान्तस्तिष्ठतीति माहात्म्यज्ञाने तत्र स्नेहोऽधिको भवतीति तत्सिद्ध्यर्थं हृदयदेशावच्छिन्नः शारीरोऽणुरेव भवति, तत्र चेदियान् माति, तदा सोऽपि महान् भवेदिति तन्महत्त्वसिद्ध्यर्थं स्वात्मनीत्यादिनोक्ताद्धेतोः प्रयत्नस्य ध्यानीयस्य साफल्याय सर्वस्य भगवत्त्वे तस्यैव स्मरणत्वावच्छिन्नयावत्स्मरणविषयत्वादन्यध्याने बाहिर्मुख्यनिवृत्तौ ध्यानं सुकरमिति तत्सिद्ध्यर्थं बहिःस्थितोऽन्तः प्रवेशनीय इति गुणाधिक्यात्तथा निरूप्यत इत्यर्थः । भूतैरिति । इदमेकादशे योगेश्वरवाक्यम् । द्वितीयपुरुषरूप इति । अक्षररूपः । 'यो वैराज' इत्यादिना यः पुरुषः स एव वैराज इत्युद्देश्यविवरणेनाक्षरपुरुषोत्तमयोरभेदो बोध्यते । यथेत्यादिनोक्तं दृष्टान्तत्रयं च वैराजपुरुषभगवत्पदैः सूचितं ज्ञेयम् । तेन यथाधिकारं त्रिधा ध्यानं कर्तव्यत्वेन बोधितं ज्ञेयम् ॥ २५ ॥

❀ ❀ पातालमित्यत्र । इदानीमिति । विशेषस्य कथं देहत्वं कथं च स्वविष्ठत्वमित्याकाङ्क्षायाम् । तस्येति पदं भारतत्वाभावायेत्यनेन सम्बध्यते । एतावतेति । लोकद्वयोक्त्यनन्तरं भिन्नप्रक्रमकथनेन । पञ्चात्मकत्वं स्फुटीकुर्वन्ति तत्रेत्यादि । द्वितीयः खण्ड इति । एतेन यथा लौकिके पुरुषशरीरे खण्डविभागस्तथात्रेति बोधितम् । तेन वितलातले तृतीयो मह्यादिज्योतिरनीकान्तस्तुरीयो महरादिसत्यलोकान्तः पञ्चम इति सिध्यति । उभयावयवत्वादित्यादि । गुल्फजानुसम्बन्धेन जङ्घायास्तद्द्वयावयवत्वेन जान्वपेक्षया नीचत्वाद्गुल्फापेक्षयोच्चत्वाच्च लोकनाम्नि पदद्वयस्य प्रयोग इत्यर्थः । आङ्प्रश्लेषे आसमन्तात्तलमित्यर्थान्तरं सम्भवतीति बलवत्त्वबोधनाय तमपि पक्षं संगृह्णन्ति आधारत्वेन वेति । अत एवेति । बलिस्थानस्य शुद्धत्वादेव । वितलं च तलं चेत्यत्र । अग्रपश्चाद्भावभेदेनेति । वितलमग्रभागः अतलं पश्चाद्भाग इति भेदेन । ननु पश्चाद्भागस्याधस्त्वाभावान्न पञ्चमस्कन्धविरोध इत्यतस्तमपि पक्षं स्वीकृत्याहुः अत्रेत्यादि । तथात्वमिति । अग्रपश्चाद्भागभेदः । तथा च न्यायमात्रादसङ्गतमेवेत्यर्थः । ननु फलतो न कश्चिद्विशेष इत्यत आहुः अवान्तरभेदो वेति । चकारयोरेवमप्युपपत्तौ । तस्मिन्नर्थे विनिगमनाविरहाल्लोके तदग्रभागादेरुपर्यादिभागत्वेन व्यवहाराच्च तं पक्षं विहायैवमादरणीयमित्यर्थः । तद्विभजन्ति महादेवेत्यादि । वितलं महादेवक्रीडास्थानम्, अतलं मयपुत्रस्य स्थानं स्वर्गापररूपमित्यर्थः ॥ २६ ॥

❀ ❀ महीतलमित्यत्र । तस्येति । एतेन तदिति पदं भिन्नं सुलुक्सूत्राल्लुप्तषष्ठीकमिति बोधितम् । एवं व्यवस्थेति । पञ्चमस्कन्धस्वारस्यावगता सेत्यर्थः । अत्र यद्यपि श्रोणिलोकनिवेशो नोक्तस्तथाप्यग्रे 'सर्वे मृगाः पशवः श्रोणिदेशे' इति मृगाद्यधिकरणतया श्रोणिदेशस्य वक्ष्यमाणत्वान्मृगादीनां च भूमिष्ठत्वात्तस्मिन्नपि भूर्लोकतैव बोध्या, तथाग्रे 'निरयस्य गुदः स्मृत' इत्यनेन वक्ष्यमाणस्य नरकस्य पञ्चमस्कन्धे 'अधस्ताद्भूमेरुपरिष्टाच्च जलाशया' दिति भूम्यधस्तात्तत्स्थानकथनाच्च । सरस्त्वेनैव निरूपणमिति । एतेन ज्योतिरनीकस्य निराधारतापि वारिता । तथा 'पराभूतेरधर्मस्य तमसश्चापि पश्चिम' मिति वक्ष्यमाणस्य पृष्टदेशस्यापि पर्वतादिद्वारा भूरादिमहर्लोकपर्यन्तं संलग्नतापि

बोध्या । पञ्चमस्कन्धे लोकालोकसंस्थानकथने 'आदित्यानां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोर्वाचीना एव न पराचीना भवितुमुत्सहन्ते तावदुन्नहनायाम' इति कथनात् । तत्रापि पराभूतिस्थानस्यान्तरिक्षसमानदेशत्वम्, अधर्मस्थापनस्यादित्यादिसादेश्यम्, तमःस्थानस्य ध्रुवसादेश्यमिति । एतेन प्रवृत्तिमार्गनिष्ठत्वात् 'न ध्रुवोपरि तद्गति' रिति निबन्धोक्तः कर्मिणां सत्यलोकगमनमार्गोऽपि सङ्गमिष्यते । ग्रीवा महरिति । सादेश्याद्दूरत्वमपि तस्यैवोन्नेयम् । यन्तीति । कर्मणा प्राप्नुवन्ति । एवं बहुत्वोपपादनात् 'ब्रह्मलोकमकर्मक' मित्यादीनां विरोधः परिहृतः ॥ २७ ॥

### श्रीगिरिधरकृता-बालप्रबोधिनी

ननु भगवन्तं विहाय किमिति प्रपञ्चात्मकं तच्छरीरं धारणाश्रयत्वेनोच्यते इत्याशङ्क्य विराड्देहतज्जीवतदन्तर्यामिणां अभेदमारोप्योपासनं कर्तव्यमित्याशयेन तथोक्तम् । वस्तुतस्तु विराड्जीवनियन्ता भगवानेव धारणाविषय इत्याह—आण्डकोशे शरीरे इति । पृथिव्यप्तेजोवाय्वाकाशाहङ्कारमहत्तत्त्वानि दशगुणोत्तराधिकानि सप्तावरणानि तैर्युक्तेऽस्मिन्नाण्डकोशाख्ये शरीरे योऽसौ शरीरी वैराजाख्यः पुरुषः स धारणाया आश्रयो विषयः । तस्य कुतो धारणाविषयत्वं तत्राह—भगवानिति ॥ २५ ॥ ❀ ❀ एवं चतुर्दशभुवनात्मकाण्डकोशस्य सामान्ये भगवच्छरीरत्वमुक्त्वा तत्पादादिरूपेण किं ध्येयमित्यपेक्षायामण्डकोशान्तर्गतपदार्थान् विभज्य पादाद्यवयवत्वेनोपासनामाह—पातालमिति । एतस्य वैराजपुरुषस्य पादमूलं पादस्याधोभागं पातालं पठन्ति वेदज्ञाः, पादतलत्वेन पातालमुपास्यमिति वदन्तीत्यर्थः । अतोऽत्र संशयो न कर्तव्य इति सूचयन्नाह—हीति । एवमग्रेऽप्यस्यैव क्रियापदस्य सम्बन्धः । पार्ष्णिः पादपश्चाद्भागः प्रपदं पादाग्रभागस्तदुभयं रसातलं पठन्ति । अथ तथा विश्वसृजो विश्वस्रष्टुः पुरुषस्य भगवतो गुल्फौ महातलं पठन्ति । द्वे अपि जङ्घे तलातलमेव पठन्ति ॥ २६ ॥ ❀ ❀ विश्वं मूर्तौ यस्य तस्य भगवतो द्वे जानुनी सुतलं गृणन्ति वदन्ति । तस्योरुद्वयं वितलं चातलं च गृणन्ति, तत्रोरोरधोभागो वितलं उत्तरभागे तलमिति ज्ञेयम् । विश्वासार्थं मादरेण सम्बोधयति—हे महीपते इति । तस्य जघनं कट्याः पुरोभागं महीतलं भूर्लोकं गृणन्ति । नाभिरेव सरस्तन्नभस्तलं भुवर्लोकं गृणन्ति ॥ २७ ॥ ❀ ❀ अस्य वैराजस्य उरस्थलमुरःप्रदेशं ज्योतिरनीकं ज्योतिषां समूहं स्वर्गलोकं गृणन्ति । ग्रीवारूपेण महर्लोकं उपास्यं गृणन्ति । जनो जनलोकोऽस्य वदनं वदनतयोपास्य इति गृणन्ति । अस्यादिपुंसो रराटीं ललाटं तपोलोकं विदुर्जानन्ति । अस्य सहस्रशीर्ष्णः सहस्रशिरसः शीर्षाणि शिरांसि तु सत्यं सत्यलोकं विदुः ॥ २८ ॥

### हिन्दी अनुवाद

जल, अग्नि, वायु, आकाश, अहंकार, महत्तत्त्व और प्रकृति इन सात आवरणोंसे घिरे हुए इस ब्रह्माण्ड-शरीरमें जो विराट् पुरुष भगवान् हैं, वे ही धारणाके आश्रय हैं, उन्हींकी धारणा की जाती है ॥ २५ ॥ ❀ ❀ तत्त्वज्ञ पुरुष उनका इस प्रकार वर्णन करते हैं—पाताल विराट् पुरुषके तलवे हैं, उनकी एडियां और पंजे रसातल हैं, दोनों गुल्फ-एड़ीके उपरकी गांठे महातल हैं, उनके पैरके पिंडें तलातल हैं ॥ २६ ॥ ❀ ❀ विश्वमूर्ति भगवान्के दोनों घुटने सुतल हैं, जांघें वितल और अतल है, पेडू भूतल है, और परीक्षत् ? उनके नाभिरूप सरोवरको ही आकाश कहते हैं ॥ २७ ॥ ❀ ❀ आदि पुरुष परमात्माकी छातीको स्वर्गलोक, गलेको महर्लोक, मुखको जनलोक और ललाटको तपोलोक कहते हैं । उन सहस्र सिरवाले भगवानका मस्तकसमूह ही सत्यलोक है ॥ २८ ॥

इंद्रादयो बाहव आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः ॥
नासत्यदस्रौ परमस्य नासे[1] घ्राणो[2]ऽस्य गंधो मुखमग्निरिद्धः ॥ २९ ॥
द्यौरक्षिणी चक्षुरभूत्पतंगः पक्ष्माणि विष्णोरहनी उभे च ॥
तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमापोऽस्य तालू रस एव जिह्वा ॥ ३० ॥
छंदांस्यनन्तस्य शिरो गृणंति दंष्ट्रा यमः स्नेह[3]कला द्विजानि ॥
हासो जनोन्मादकारी च[4] माया दुरंतसर्गो यदपांगमोक्षः ॥ ३१ ॥
व्रीडोत्तरोष्ठोऽधर एव लोभो धर्मः स्तनोऽधर्मपथो[5]ऽस्य पृष्ठम् ॥
कस्तस्य मेढ्रं वृषणौ च मित्रौ[6] कुक्षिः समुद्रा गिरयोऽस्थिसंघाः ॥ ३२ ॥

---

१. प्रा० पा० नासा । २. प्रा० पा० प्राणं च । ३. स्वेदकला द्विजालयः । ४. प्रा० पा० हि । ५. प्रा० पा० धर्मपथः स्वपृष्ठः । ६. प्रा० पा० मित्रः ।

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

उस्रा देवाः तेजोमयशरीरत्वात्ते बाहव इत्याहुः । दिशोऽस्मदादिश्रोत्राधिष्ठात्र्यो देवताः । कर्णौ श्रोत्रस्याधिष्ठानं शब्दस्तु श्रोत्रविषयः सः तस्य श्रोत्रेंद्रियम् । एवं नासिकादिष्वपि नासत्यदस्रौ अश्विनौ नासे नासापुटे इद्धो दीप्तः ॥ २९ ॥ ❀ ❀ द्यौरंतरिक्षं अक्षिणी नेत्रगोलके चक्षुरिंद्रियं पतंगः सूर्यः अहनी रात्र्यहनी पक्ष्माणि नेत्ररोमाणि परमेष्ठिधिष्ण्यं ब्रह्मपदम् । तालु अधिष्ठानं जिह्वा इंद्रियम् ॥ ३० ॥ ❀ ❀ छदांसि वेदाः शिरो ब्रह्मरंध्रं स्नेहकलाः पुत्रादिस्नेहलेशाः द्विजानि दंताः । षंढत्वमार्षम् । दुरंतोऽपारः सर्गः इति यत्स कटाक्षः ॥ ३१ ॥ ❀ ❀ अधर्ममार्गोऽस्य पृष्ठभागः । कः प्रजापतिः । मित्रौ मित्रावरुणौ ॥ ३२ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अत्र व्यष्टिसमष्टिविराजोर्यद्यपि तुल्यात्माध्यात्म्यादिविभागस्तथापि समष्टिविराडयं हिरण्यगर्भोपासकैर्योगिभिः परमेश्वरत्वेनोपास्य इति । परमेश्वरस्य चेंद्रियेभ्य एव विराजो विषया भवंति । तदीयेंद्रियाधिष्ठानेभ्यस्त्विद्रियाणि तदधिष्ठात्र्यो देवताश्च स्युरिति । कार्यकारणयोर्भेदोपचारादैक्येन दिक्शब्दादिभिः समष्टिविराजोऽस्य परमेश्वरत्वेन ध्येयत्वात्कर्णश्रोत्रादिकल्पना ज्ञेया ॥ २९ ॥ ❀ ❀ द्यौरंतरिक्षं तत्रत्यः सूर्यश्चाक्षिणी नेत्रगोलके । यद्वा । द्युपदेन मंचाः क्रोशंतीतिवत्सूर्यो लक्ष्यते । पतंगो रूपं चक्षुरिन्द्रिम् । अत्र पतंगपदेन तैजसं रूपं लक्ष्यते न तु सूर्य उच्यते । दिवः सूर्यस्य चाक्षिणी । इति । एतद्वै पौरुषं रूपम् । भूः पादौ । द्यौः शिरः । नभः नाभिः । सूर्योक्षिणी । नासे वायुः । कर्णौ दिशः । प्रभोरित्यग्रिमवाक्यविरोधात् अहनी रात्र्यहनी 'नपुंसकमनपुंसकेन' इति नपुंसकशेषः । लिंगसमवायन्यायेन वाहः पदेन रात्रेरपि ग्रहणम् । आपो वरुणः ॥ ३० ॥ ❀ ❀ षंढत्वं क्लीबत्वम् ॥ ३१ ॥ स्तनो दक्षिणः 'धर्मस्तनाद्दक्षिणतः' इत्युक्तेः । मेढ्रं शिश्नः ॥ ३२ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

दंष्ट्रा तीक्ष्णाग्रदन्तविशेषः । 'दाढ़ा' इति हेमचन्द्रः ॥ ३१—३४ ॥

### श्रीमद्वीरराघवव्याख्या

इन्द्रादय उस्राः देवा बाहव इत्याहुः अमुष्य कर्णौ श्रोत्रेन्द्रियाधिष्ठानभूतकर्णबिले दिशः तदधिष्ठेयं श्रोत्रेन्द्रियन्तु शब्दः ध्वन्यात्मको वर्णात्मकश्च एवमग्रेपि परमस्य समाभ्यधिकरहितस्य नासापुटे नासत्यदस्रावश्विनौ गन्धः शान्तोग्रादिरूपेण नानाविधो गन्धः तदिन्द्रियम्-इद्धः दीप्तः अग्निः तस्य मुखम् ॥ २९ ॥ ❀ ❀ द्यौर्द्युलोकः अक्षिणी नेत्रगोलके तत्र चक्षुरिन्द्रियं पतङ्गः सूर्यः विष्णोर्वैराजस्य पक्ष्माणि उभेऽहनी अहोरात्रः तस्य वैराजस्य भ्रूविजृम्भः भ्रूवितानः भ्रूविलास इति यावत् परमेष्ठिधिष्ण्यं परमेष्ठिनः चतुर्मुखस्य स्थानमस्य वैराजस्य तालु आपः तदभिमानी वरुणः अस्य जिह्वा रसः ॥ ३० ॥ ❀ ❀ अनन्तस्य त्रिविधपरिच्छेदशून्यस्य शिरश्छन्दांसि गृणन्ति, दंष्ट्रा यमः, द्विजानि दन्ताः, नपुंसकत्वमार्षं स्नेहकलाः स्नेहस्य कला अंशा अस्मदादीनां स्नेहकला वैराजस्य दन्ता इत्यर्थः । तस्य हासः हसनञ्जनोन्मोहकरी माया आश्चर्यशक्तिः मायाशब्दस्य सर्वत्रानुगतं प्रवृत्तिनिमित्तमाश्चर्यमेव तच्च विस्मयनीयत्वरूपं तच्च नानाविधकार्यकरत्वात् यस्यापाङ्गमोक्षः दुरन्तसर्गः अपारसर्गः ॥ ३१ ॥ ❀ ❀ व्रीडा लज्जोत्तरोष्ठः अधरः अधरोष्ठः लोभः धर्मः स्तनः अधर्मपथः अधर्ममार्गः अस्य पृष्ठः पृष्ठभागः तस्य वैराजस्य मेढ्रं प्रजापतिः । वृषणौ मित्रावरुणौ समुद्रः कुक्षिरुदरङ्गिरयस्तस्यास्थिसङ्घाः ॥ ३२ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

इन्द्रादयो लोकपालास्तस्य बाहव इत्याहुः दिशःकर्णौ गोलकस्थानीयौ । अमुष्य हरेः श्रोत्रमिन्द्रियं शब्द इति । नासत्यदस्रावश्विनौ नासे नासिके गन्धो भूमेर्गुणः घ्राणङ्गन्धग्राहीन्द्रियं गन्धजनकमाहुरित्यर्थः इद्धो दीप्तः ॥ २९ ॥ ❀ ❀ द्यौर्द्युलोकः । अक्षिणी गोलके पतङ्गः सूर्यः मनुष्याणामहनी देवादीनामहनी इति उभे च विष्णोः पक्ष्माणि ततो जाते तदाश्रिते च परमेष्ठिधिष्ण्यं ब्रह्मलोकः मधुरादिरसः ॥ ३० ॥ ❀ ❀ गायत्र्यादिच्छन्दांसि गिरो वचनानि गृणन्ति अर्यमेन्दू सूर्यचन्द्रौ दंष्ट्राद्वयाजाताविति शेषः बहुरूपत्वात्पुनर्वचनम् । बहुत्त्वं बहुत्वत इति वचनात् उडुगणा नक्षत्राणि द्विजानि दन्ताः अत्र प्रगृह्यसंज्ञाऽभावो लिङ्गव्यत्ययश्च वैलक्षण्यद्योतनायेति ज्ञातव्यं मायामोहनशक्तिः हासोहासादभिव्यक्ता सप्तसुप्रथमेतिसूत्रात् दुरन्तसर्गोऽनवसानविश्वसृष्टिः ॥ ३१ ॥ ❀ ❀ व्रीडा लज्जा अधरोऽधरोष्ठः । एवशब्दोन्ययोगव्यवच्छेदकः कः प्रजापतिः मेढ्रमिन्द्रियं वृषणौ बीजद्वयं मित्र इत्युपलक्षणं वरुणश्च ॥ ३२ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

इन्द्रादय इति । अत्र टीकायाम् एवं नासिकादिष्वपि इति प्रायिकमेव, चक्षुषि व्यभिचारात्, तत्र हि सूर्यस्यैव हि गोलकत्वेन प्राप्तत्वात् । तदेवमत्र युक्तिर्नानुसन्धेया किन्तु उपासनार्थं शास्त्राज्ञैव कारणमिति सर्व्वं समञ्जसम् ॥ २९ ॥ ❀ ❀ आपः तदधिष्ठाता वरुणः ॥ ३०—३८ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

उस्राः देवाः, इन्द्रादयो देवा बाहव इत्याहुः । दिशः अस्मदादिश्रोत्राधिष्ठात्र्यो देवताः अस्य कर्णौ श्रोत्रस्याधिष्ठानम् । शब्दोऽस्मदादिश्रोत्रविषयः अमुष्य श्रोत्रेन्द्रियम् । एवमेव सर्वत्र व्यवस्था । अत्र व्यष्टिसमष्टिविराजोर्यद्यपि तुल्य एवाध्यात्म्यादि-विभागस्तदपि समष्टिविराडयं हिरण्यगर्भोपासकैर्योगिभिः परमेश्वरस्य च इन्द्रियेभ्य एव बिराजो विषया भवन्ति तदीयेन्द्रिया-धिष्ठानेभ्यस्त्विन्द्रियाणि इन्द्रियाधिष्ठात्र्यो देवताश्च स्युरिति कार्यकारणयोरभेदोपचारादैक्येन दिक्शब्दादिभिः समष्टिविराजोऽस्य परमेश्वरत्वेन ध्येयत्वात् कर्णश्रोत्रादिकल्पना ज्ञेया । नासत्यदस्रौ अश्विनौ नासे नासापुटे । इद्धः दीप्तः ॥ २९ ॥ ❀ ❀ द्यौः अन्तरिक्षं तत्रत्यः सूर्यश्च अक्षिणी नेत्रगोलके । यद्वा द्युपदेन मञ्चाः क्रोशन्ति इति न्यायेन सूर्यो लक्ष्यते । पतङ्गः रूपं चक्षुः इन्द्रियम् । अत्र पतङ्गपदेन तैजसं रूपं लक्ष्यते न तु सूर्य उच्यते, दिवः सूर्यस्य चाक्षिणी इति, एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः । नाभिः सूर्योऽक्षिणी नासे वायुः कर्णौ दिशः प्रभोः ॥ इत्याद्यग्रिमवाक्यविरोधात् । अहनी रात्र्यहनी मिथुनगण-लक्षणया लिङ्गसमवायन्यायेनाहःशब्देन रात्रिरप्युच्यते । परमेष्ठिधिष्ण्यं ब्रह्मपदम् । आपः वरुणः तालुः अधिष्ठानम् । जिह्वा इन्द्रियम् ॥ ३० ॥ ❀ ❀ छन्दांसि वेदाः । शिरः ब्रह्मरन्ध्रम् । स्नेहकलाः पुत्रादिस्नेहलेशाः । द्विजानि दन्ताः षण्ढत्वमार्षम् । दुरन्तसर्गः अपारसंसारः ॥ ३१ ॥ ❀ ❀ धर्म्मस्तनो दक्षिणः, धर्म्मः स्तनाद्दक्षिणत इत्युक्तेः । कः प्रजापतिः मेढ्रं शिश्नः । मित्रौ मित्रावरुणौ वृषणौ अण्डकोषौ ॥ ३२ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इन्द्रादय अष्टौ उस्रा देवाः बाहव इत्याहुः । दिशः श्रोत्राधिष्ठात्र्यो देवताः कर्णौ श्रोत्राधिष्ठानछिद्रे अमुष्य श्रोत्रन्तुशब्दः एव-मग्रेपि अस्मदादीन्द्रियाधिष्ठात्र्यो देवतास्तदिन्द्रियगोचरास्तदिन्द्रियाधिष्ठानानि । अस्मदादीन्द्रियाणीति बोध्यम् नासत्यदस्रौ अश्विनौ-परमस्योपास्यस्य नासे नासापुटे । इद्धो दीप्तः वचनं वागिन्द्रियमित्यनुक्तं बोध्यम् ॥ २९ ॥ ❀ ❀ द्यौर्द्युलोकः । अक्षिणी नेत्रगोल-के पतंगः सूर्यश्चक्षुरिन्द्रियमभूत् । अहनी रात्र्यहनी विष्णोः पक्ष्माणि परमेष्ठिधिष्ण्यं ब्रह्मपदन्तस्य विष्णोर्भ्रूविजृंभः भ्रूविलासः । आपस्तदधिष्ठाता वरुणः तालुरधिष्ठानम् । रसःजिह्वा इन्द्रियम् ॥ ३० ॥ ❀ ❀ अनन्तस्येयत्ताशून्यस्य छन्दांसि वेदान् । शिरो-ब्रह्मरंध्रं गृणन्ति । यमस्तद्दंष्ट्राः स्नेहकलाः देहगेहादौ स्नेहलेशाः । द्विजानि दन्ताः । नपुंसकत्वमार्षम् । जनानामुन्मादकरी मोहकरी माया कार्योन्मुखी प्रकृतिर्हासः दुरन्तसर्गः अपारः सर्गः यत् यस्य अपाङ्गमोक्षः कटाक्षः ॥ ३१ ॥ ❀ ❀ व्रीडा लज्जा अधर्मपथः अधर्ममार्गः अस्य पृष्ठः पृष्ठभागः कः प्रजापतिः । मित्रौ मित्रावरुणौ कुक्षिरुदरम् ॥ ३२ ॥

### श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

एवं लोकानां सन्निवेशमुक्त्वा तत्रत्यानां जीवानां सन्निवेशमाह **इन्द्रादय इत्यादिना**—यद्यपि येषां यत्स्थानं ते तत्र निविष्टा इत्यर्थादुक्तं भवति .तथाप्यनियतस्थानजीवानां स्थानं निरूप्यते । यतो देवाः सर्वेषु लोकेषु परिभ्रमन्ति । अथवा । भगवदिन्द्रियाणामाधारत्वं न भविष्यतीति तन्निरूपणार्थं पृथङ्निरूपणम् । आधिदैविकास्ते देवाः । अन्येऽपि तत्प्रकरणे निरू-पितास्तद्रूपा एव । इन्द्रादयो देवा उस्राः कर्मफलदातारः । भारवहनसमर्था उस्रा उच्यन्ते । उत् ऊर्ध्वं सरन्तीति । "उस्रावेतं धुरषा'हावि" त्यत्र तथा निरूपणात् । भगवद्बाहवश्च फलदातारः । भगवतः कर्णौ ब्रह्माण्डे दिशः । यस्तु शब्दः स भगवतः श्रोत्रमिन्द्रियम् । नासत्यदस्रौ अश्विनौ । नासे परमस्य । नासिकाद्वयं परमस्य यज्ञस्य । यज्ञ एव तत्कृतोपकारात् । अस्मदिन्द्रि-याद्यधिष्ठातारो भगवदिन्द्रियगोलकानि । विषयस्त्विन्द्रियम् । गन्धोऽस्य घ्राणम् । इद्धो ज्वलन्नग्निः । अतो भगवन्मुखे यद्देयं तज्ज्वलदग्नौ देयम् ॥ २९ ॥ ❀ ❀ द्यौः स्वर्गलोकः शिशुमारस्थानभूतः । अक्षिणी गोलके । चक्षुरिन्द्रियं पतङ्गः सूर्यः । पतद्ग-च्छतीति । चक्षुरपि भगवदीयं स्वस्मिन्पतच्चलत्वित्येतदर्थम् । पक्ष्माणि चत्वारि नेत्रोन्मीलननिमीलनकर्तॄणि । विष्णोरिति ।

---

१. धूर्षाहेति ख । २. तद्विकाश इति ग ।

कालरूपस्य यज्ञस्वरूपस्य वा । अहनी रात्र्यहनी । उभे चेति देवमनुष्यभेदेन । चकारात्पितृब्रह्मणोरपि । परमेष्ठिधिष्ण्यं ब्रह्मस्थानं सत्यलोकस्थितं तस्य भगवतो भ्रूविजृम्भः । यं प्रति भ्रुवोर्विजृम्भणं सन्तोषेण प्रसारं करोति तं ब्रह्मासने उपवेशयति । आपो जलानि वरुणपत्नीरूपाणि । अस्य तालुर्गोलकरूपा जिह्वा । जिह्वा इन्द्रियम् । एवकारेण रसवद्द्रव्यं निवारितम् ॥ ३० ॥ ❀ ❀ छन्दांसि गायत्र्यादीनि । परःसहस्रं छन्दांसि । तत्र सप्त मुख्यानि । यशः कीर्तिः । गृणन्तीति पूर्ववत्प्रमाणकथनम् । भगवद्दंष्ट्रा यमः । स्नेहकला मोहादयो द्विजानि[1] दन्ताः । हासः हास्यं प्राणिनामुन्मादकर्त्री मायैव । चकारादनुन्मादकरी भक्तिरूपा च । माया पूर्वमुक्ता । दुरन्तसर्गः नित्यप्रवाहरूपा सृष्टिः । अपाङ्गमोक्षः कटाक्षमोक्षः ॥ ३१ ॥ ❀ ❀ व्रीडा लज्जा । ब्राह्मणानामुपरि भवति । अधरः अधरोष्ठः । अधस्तनानामेव लोभो भवति । एवकारेणोपरितनानां लोभाभावः सूचितः । धर्मो ब्रह्मसुतो नरनारायणपिता । चतुष्पाद्धर्मो वा । एकस्तनो दक्षिणः । वामस्त्वधर्मः । अधर्ममार्गश्च भगवतः पृष्ठभागः कः प्रजापतिः । मेण्ढ्रं (?) अर्थः (?) इन्द्रियमिति यावत् । मित्रौ मित्रावरुणौ । मित्रद्वयं वा । कुक्षिरुदरम् । सर्वेऽपि समुद्रा भगवतत्कुक्षिः । गिरयः पर्वताः । अस्थिसमूहा वङ्क्रयः ॥ ३२ ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः

इन्द्रादय इत्यत्र । स्थानाभावे परिभ्रमणमात्रेणावयवत्वं न वक्तुं शक्यमित्यरुच्या पक्षान्तरमाहुः अथवेत्यादि । उस्रावेतमित्यादि । एतेन मन्त्रमयी देवतेति जैमिनीयं मतमसङ्गतमिति बोधितम् । नासत्यदस्रावित्यत्र । यज्ञस्येति । एतेन यज्ञपुरुषयोरभेदो बोधितः । स च 'तमेव यज्ञपुरुषं तेनैवायजमीश्वर' २।६।२७ मित्यत्र स्फुटो भविष्यति । शिशुमारस्थानभूत इति । एतेन विरुद्धधर्मवत्त्वं बोध्यते । पक्ष्माणि विष्णोरित्यत्र कालरूपस्येति । अत्रापि पुरुषाभेदो गीतायां 'कालोस्मी'ति भगवद्वाक्याज्ज्ञेयः । पूर्वमुक्तेति । प्रथमस्कन्धे 'अपश्यत्पुरुषं पूर्ण' मित्यत्र भगवदुपाश्रितत्वेनोक्ता । मेढ्रं अर्थं इन्द्रियमिति । अथ इन्द्रियमिति पाठो भाति । वङ्क्रय इति । पार्श्वास्थीनि । महत्त्वज्ञापनार्थमिति । राजादिवत्सामर्थ्यादिभिर्महत्त्वज्ञापनार्थम् । गन्धर्वं इत्यत्र । स्मृतिं स्मृती स्मृतयः इति मूलपदं बाहुलकादुभयथापि संभाव्यत इत एवमुक्तम् ॥ २९ ॥

## श्री गिरिधरकृता बालप्रबोधिनी

एवं चतुर्दशलोकानां भगवद्विग्रहावयवत्वेन उपासनमुक्त्वा तत्रत्यानां जीवानामपि तदाह—इन्द्रादय इति । इन्द्रादय उस्रा देवा अमुष्य वैराजस्य बाहव इत्याहुः । दिशोऽस्मदादिश्रोत्राधिष्ठात्र्यो देवता अस्य कर्णौ श्रोत्रेन्द्रियस्य अधिष्ठानम् । अस्मदादिश्रोत्रविषयः शब्दस्तु तस्य श्रोत्रेन्द्रियम् एवमग्रे नासिकादिष्वपि द्रष्टव्यम् । परमस्य स्वसाम्याधिक्यरहितस्य वैराजस्य नासे नासिकापुटे नासत्यदस्रौ अश्विनौ । गन्धोऽस्य घ्राणेन्द्रियम् । इद्धः प्रदीप्तोऽग्निर्मुखम् ॥ २९ ॥ ❀ ❀ द्यौर्द्युलोकोऽक्षिणी नेत्रगोलके । पतङ्गः सूर्यो विष्णोर्व्यापकस्य वैराजस्य चक्षुरिन्द्रियमभूत् । उभे अहनी अहोरात्रं तस्य विष्णोः पक्ष्माणि तस्य भ्रूविजृम्भो भ्रूविलासः परमेष्ठिनः चतुर्मुखस्य धिष्ण्यं स्थानम् । अस्य तालुः आपस्तदभिमानी वरुणः । अस्य जिह्वा रसः ॥ ३० ॥ ❀ ❀ अनन्तस्य देशकालवस्तुपरिच्छेदरहितस्य शिरः छन्दांसि गायत्र्यादीनि गृणन्ति । अत्र शिरश्शब्देन तदुपरिभागो ब्रह्मरन्ध्रं पूर्वं सत्यं तु शीर्षागीत्युक्तत्वात् । यशो गृणन्तीति तु पाठान्तरम् । दंष्ट्रा यमः । पुत्रादिस्नेहस्य कला लेशाः द्विजा दन्ताः, षण्ढत्वमार्षम् । तस्य हासो हसनं जनानामुन्मादकरी मोहकरी माया । यत् योऽयं दुरन्तोऽपारः सर्गः स तस्यापाङ्गमोक्षः कटाक्षः । तत्कटाक्षमात्रेणैव सृष्टिप्रवृत्ते "स ऐक्षत बहुस्याम्" इत्यादिश्रुतौ सिद्धत्वादिति भावः ॥ ३१ ॥ ❀ ❀ व्रीडा लज्जा अस्य उत्तरोष्ठः उपरितनोष्ठः । लोभः प्राप्तेऽपि पदार्थे उत्तरोत्तराभिलाषाधिक्यरूप एवं अधरोऽधरोष्ठः । धर्मः स्तनः । अधर्ममार्गोऽस्य पृष्ठभागः । तस्य मेढ्रं कः प्रजापतिः । मित्रौ मित्रावरुणौ तस्य वृषणौ । समुद्राः कुक्षिरुदरम् । गिरयोऽस्थिसमूहाः ॥३२॥

## हिन्दी अनुवाद

इन्द्रादि देवता उनकी भुजाएं हैं । दिशाएं कान और शब्द श्रवणेन्द्रिय हैं । दोनों अश्विनीकुमार उनकी नासिकाके छिद्र हैं; गन्ध घ्राणेन्द्रिय है और धधकती हुई आग उनका मुख है ॥ २९ ॥ ❀ ❀ भगवान् विष्णुके नेत्र अन्तरिक्ष हैं, उनमें देखनेकी शक्ति सूर्य है, दोनों पलकें रात और दिन हैं, उनका भ्रूविलास ब्रह्मलोक है । तालु जल हैं और जिह्वा रस ॥ ३० ॥ ❀ ❀ वेदोंको भगवान्का ब्रह्मरन्ध्र कहते हैं और यमको दाढ़ें । सब प्रकारके स्नेह दांत हैं और उनकी जगन्मोहिनी मायाको ही उनकी मुसकान कहते हैं । यह अनन्त सृष्टि उसी मायाका कटाक्ष-विक्षेप है ॥ ३१ ॥ ❀ ❀ लज्जा ऊपरका होठ और लोभ नीचेका होठ है । धर्म स्तन और अधर्म पीठ है । प्रजापति उनके मूत्रेन्द्रिय हैं, मित्रावरुण अण्डकोश है, समुद्र कोख हैं और बड़े-बड़े पर्वत उनकी हड्डियां है ॥ ३२ ॥

---

1. द्विजानीति मूले ।

नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेंद्र ।
अनंतवीर्यः श्वसितं मातरिश्वा गतिर्वयः कर्मगुणप्रवाहः ॥ ३३ ॥
ईशस्य केशान्विदुरंबुवाहान्वासस्तु संध्यां कुरुवर्य भूम्नः ।
अव्यक्तमाहुर्हृदयं मनश्च स चन्द्रमाः सर्वविकारकोशः ॥ ३४ ॥
विज्ञानशक्तिं महिमामनंति सर्वात्मनोऽतःकरणं गिरित्रम् ।
अश्वाश्वतर्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणिदेशे ॥ ३५ ॥
वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा मनुजो निवासः ।
गंधर्वविद्याधरचारणाप्सरः स्वरस्मृतीरसुरानीकवीर्यः[1] ॥ ३६ ॥

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

अनंतं वीर्यं यस्य वयः कालस्तस्य गमनम् । गुणप्रवाहः प्राणिनां संसारः कर्म तस्य क्रीडा ॥ ३३ ॥ ❀ ❀ भूम्नो विभोः अव्यक्तं प्रधानम् । स प्रसिद्धश्चंद्रमास्तदीयं मनः सर्वेषां विकाराणां कोश इवाश्रयभूतम् ॥ ३४ ॥ ❀ ❀ विज्ञानशक्तिं चित्तम् । महिं महत्तत्त्वम् । अंतःकरणमहंकारम् । गिरित्रं श्रीरुद्रम् । गर्दभाद्वडवायामुत्पन्नाश्वतरी ॥ ३५ ॥ ❀ ❀ वयांसि पक्षिणस्तस्य व्याकरणं "नामरूपे व्याकरवाणि" ॥ इति श्रुत्युक्तं शिल्पनैपुण्यम् । यथाहुः । येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः । मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ॥" इति । मनुः स्वायंभुवः मनीषा बुद्धिः पुरुषः निवास आश्रयः "पुरुषत्वे चाविस्तरामात्मा" इति श्रुतेः । गंधर्वादीनां द्वंद्वैक्यम् गंधर्वादयः । स्वरस्मृतीः षड्जादिस्वरस्मृतयः इत्यर्थः । असुरानीकं वीर्यं यस्य सः । स्वरः स्मृतिरसुरानीकवर्य इति पाठे गंधर्वादयः स्वरः असुरसमूहश्रेष्ठः प्रह्लादः स्मृतिस्तस्येति ॥ ३६ ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अनंतः शेषो वा वीर्यं विक्रमो यस्य स तथा । हे नृपेन्द्रेति नरपालकेषु मुख्यस्य तवैतद्ध्यानमवश्यं कार्यमिति भावः ॥ ३३ ॥ ❀ ❀ हे कुरुवर्येति । शुद्धकुलोद्भवत्वात्तुभ्यमहं योगिध्येयरूपं वदामीति भावः ॥ ३४ ॥ ❀ ❀ गिरिः कैलासः । सर्वं गिरतीति गिरिः कालो वा । गृणाति तत्त्वमिति गिरिर्वेदो वा तं तस्मात्तेन वा त्रायते इति गिरित्रो महादेवः । मृगा हरिणादयः पशवो गवादयः श्रोणिदेशे नितंबप्रदेशे उपास्या इति शेषः ॥ ३५ ॥ ❀ ❀ तस्य शिल्पनैपुण्ये प्रमाणमाह । यथाहुरिति । पुरुषत्वे मनुष्यत्वेऽतिशयेन प्रकट आत्मास्तीति श्रुतिपदार्थः । इत्यर्थः इति प्रथमार्थे द्वितीयेति भावः ॥ ३६ ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

[ नखानि नखोपलक्षितानि ऋक्षादीनीति केचित् । ] वडवा घोटकी तस्यामित्यर्थः ॥ ३५—३९ ॥

## श्रीमद्वीरराघवव्याख्या

नद्यः गंगायमुनादयोऽस्य नाड्यः तनूरुहाणि रोमाणि महीरुहाः वृक्षा विश्वतनोर्विश्वशरीरकस्य । हे नृपेन्द्र ! अनन्तवीर्यश्वसितमनन्तवीर्यस्यापारवीर्यस्य श्वसितं प्राणः मातरिश्वा वायुः गतिर्गमनव्वयः कालः तस्य कर्मगुणप्रवाहः गुणानां सत्वरजस्तमसां प्रवाहः कार्यं प्राणिनां संसार इत्यर्थः ॥ ३३ ॥ ❀ ❀ ईशस्य भगवतः केशानं बुवाहान्मेघान् विदुः हे कुरुवर्य ! भूम्नः विभोर्वासः वस्त्रं सन्ध्ये सायंप्रातःसन्ध्ये तस्य हृदयं हृदयकमलमव्यक्तं प्रधानमाहुः स प्रसिद्धः सर्वविकारकोशः सर्वौषधिविकारहेतुः चन्द्रमाः तदीयं मनः सर्वविकाराश्रय इत्यर्थः ॥ ३४ ॥ ❀ ❀ विज्ञानशक्तिं व्यवसायशक्तिं तां महिं महत्तत्त्वमामनन्ति उपासते सर्वात्मनः सर्वान्तर्यामिणः गिरित्रं रुद्रम् अन्तःकरणमहङ्कारम् अतएव रुद्रो वक्षसि चाभवदिति विश्वरूपेण कथितम् अहङ्कारश्चानात्मन्यात्माभिमानहेतुरिति मोहकस्य गिरित्रस्य तदात्मकत्वं युक्तं रासभाद्वडवायामुत्पन्नाऽश्वतरी अश्वाश्वतर्युष्ट्रगजास्तस्य नखानीत्यर्थः सर्वे मृगाः पशवश्च तस्य श्रोणिदेशे उपास्यास्तत्त्वेनानुसन्धेयाः इत्यर्थः ॥ ३५ ॥ ❀ ❀ वयांसि वेदात्मकतित्तिर्यादयः पक्षिणस्तस्य व्याकरणं "नामरूपे व्याकरवाणीतिश्रुत्युक्तं शिल्पनैपुण्यं मनुर्मन्त्रः तस्य मनीषा बुद्धिः मनुजः मनुष्यवर्गः तन्निवासस्थानं गन्धर्वादीनां द्वंद्वैक्ये गन्धर्वादिरप्सरोंऽतो वर्गः अस्य स्वरः षड्जादिस्वरः तेषां गानायन्वयात्तत्स्वरत्वं युक्तम् । असुरानीकवर्यः असुरसमूहश्रेष्ठः प्रल्हादस्तस्य स्मृतिः ॥ ३६ ॥

---

१ प्रा. पा. स्वरः स्मृतिर्वैभासुरानीकवीर्यः ।

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

विश्वाति तत्तत्पदार्थेषु तिष्ठति तनुर्यस्य स तथा तस्य विश्वतनुः प्रतिमा यस्य स तथा तस्येति वा वीर्यं रेतोन्नं प्राणिभोग्यं गतिर्गमनं तस्माद्वय आयुः प्राणिनां जीवनावधिलक्षणमुत्पन्नं कर्मव्यापारः तस्मात्सत्त्वादिगुणानां प्रवृत्तिक्रमः ॥ ३३ ॥ ❀ ❀ संध्ये द्वे अव्यक्तं मूलप्रकृतिं मनोभिमानत्वाच्चंद्रस्य कामादिनानाविकारगृहत्वमुपचारः मनो मनसो जातः ॥ ३४ ॥ ❀ ❀ विज्ञानं शक्तिं विरिञ्चिं गिरिं कैलासं त्रायत इति गिरेर्वायोस्त्राणं यस्य सः तथेति वा गिरित्रो रुद्रः सर्वात्मनः सर्वस्वामिनः अन्तकरणमहङ्कारः तस्माज्जातः नखानि नखेभ्यः। गर्दभाद्वडवायामुत्पन्नाऽश्वतरी श्रोणिदेशे स्थितास्तस्माज्जाताश्च ॥ ३५ ॥ ❀ ❀ वचांसि लौकिकवैदिकानि विचित्रं तस्य व्याहरणं शब्दः व्याहरणाश्रितानि तज्जातानि च मनुर्वायुः तस्य मनीषां बुद्धिः ते वायवे मनवे वाधितायै श्रुतिः मनुस्वायंभुवो वा मनीषा विचारः भगवद्विचारशक्तिजातत्वात् स्मृतिकर्तृत्वं मनोर्निवासो निवसनं कर्मजनितत्वात् गन्धर्वादीनामुत्पादिके स्वरस्मृती यस्य स तथा स्वरः षड्जादिलक्षणः स्मृतिरतीतादिविषया असुरानीकस्य जनकं वीर्यं यस्य स तथा ॥ ३६ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

अनन्तः शेषो वीर्यं विक्रमो यस्य सः। वयः कालः तस्य गतिः गमनम्। गुणप्रवाहः प्राणिनां संसारः कर्म क्रीड़ा ॥ ३३ ॥ ❀ ❀ भूम्नः विभोः। अव्यक्तं प्रधानम् तस्य हृदयं बुद्धिः। सः प्रसिद्धः चन्द्रमास्तदीयं मनः सर्व्वेषां विकाराणां कोष इवाश्रयभूतम् ॥ ३४ ॥ ❀ ❀ विज्ञानशक्तिं चितम्। महिं महत्तत्त्वम्। अन्तःकरणम् अहङ्कारम्। गिरित्रं रुद्रम्। गर्दभात् वड़वायामुत्पन्ना अश्वतरी ॥ ३५ ॥ ❀ ❀ वयांसि पक्षिणः तस्य व्याकरणं नामरूपे व्याकरवाणीति श्रुत्युक्तं शिल्पनैपुण्यम्। यथाहुः—येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः। मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ॥ इति। मनुः स्वायम्भुवः मनीषा विचारवती बुद्धिः। मनुजः पुरुषः पुरुषत्वे चाविस्तरामात्मा इति श्रुतेः। गन्धर्व्वादीनां द्वन्द्वैक्यं गन्धर्व्वादयः स्वरः षड्जादिः। असुरानीकवर्य्यः प्रह्लादः स्मृतिः। स्वरस्मृतीरसुरानीकवीर्य्यं इति पाठे—स्वराणां स्मृतयः। असुरानीकं वीर्य्यं यस्य सः ॥ ३६ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

तनूरुहाणि रोमाणि अनन्तवीर्यः महाबलो मातरिश्वा वायुःश्वसितं प्राणः वयः कालस्तस्य गतिर्गमनम् गुणानां सत्वादीनां प्रवाहः यत्र सुरनरादयः नदीप्रवाहे तृणानीव स्रवन्ति स तस्य कर्मक्रीड़ा ॥ ३३ ॥ ❀ ❀ ईशस्य सर्वनियन्तुर्भगवतःकेशानम्बुवाहान् घनान् विदुः। भूम्नःविभोर्वासः सन्ध्यां वाससीसन्ध्ये इत्यर्थः। अव्यक्तंप्रधानं हृदयं हृदयकमलमाहुः स प्रसिद्धः सर्वविकारकोशः सर्वौषधिप्रवृत्तिहेतुः चन्द्रमा मनो ज्ञेयम् ॥ ३४ ॥ ❀ ❀ सर्वात्मनः सर्वस्य चतुर्दशभुवनस्यात्मनः विज्ञानशक्तिं चिदात्मिकां महत्तत्वाख्यं महिमानमामनन्ति तस्यान्तकरणमहङ्कारङ्गिरित्रमामनन्ति अश्वाश्वतर्युष्ट्रगजास्तस्य नखानि ध्यातृभिर्ज्ञेयानीत्यर्थः। सर्वे मृगाः पशवस्तस्य श्रोणिदेशे ज्ञेयाः ॥ ३५ ॥ ❀ ❀ वयांसि पक्षिणस्तस्यव्याकरणं शिल्पनैपुण्यम् मनुः स्वायंभुवस्तस्य मनीषा बुद्धिः मनुजो मनुष्यस्तस्य निवासः। निवासस्थानम्। गन्ध्र्वादीनां द्वंद्वैक्यङ्गन्धर्वविद्याधरचारणाप्सरसस्तस्य स्वरः षड्जादिसप्तस्वरसमूहः ध्यातृभिर्बोध्यः असुरानीकवर्यः प्रह्लादस्तस्य स्मृतिः ॥ ३६ ॥

### श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

नद्यो गङ्गाद्याः। अस्य भगवतो नाड्यः। तनूरुहाणि लोमानि। अथेत्यचेतनप्रायसृष्टिसन्निवेशार्थम्। राजसानां वा लोकास्तामसाः। देवादय एतदन्ताः सात्त्विकाः। महीरुहा वृक्षाः षड्विधा अपि भगवतो लोमानि। विश्वतनोरिति। विश्वं तनौ यस्य। अनेन तेषां विश्वरूपत्वं निरूपितम्। अन्नाच्छादनरूपत्वात्। नृपेन्द्रेति सम्बोधनं महाराजस्य राज्ये एकस्मिन्नपि वृक्षे च्छिन्ने लोमच्छेदनवत्क्लेशो भवतीत्यनुभवस्य संवादार्थम्। अनन्तवीर्यस्य भगवतः श्वसितं नासापुटस्थवायुः। मातरिश्वा अयं वायुः। भगवतो गतिर्वयः कालः। कर्म भगवतो गुणप्रवाहः सत्त्वरजस्तमसां देवतिर्यङ्मनुष्यादिसृष्टिरूपः ॥ ३३ ॥ ❀ ❀ ईशस्य ईश्वररूपस्य। अम्बुवाहा मेघाः। विदुरिति पूर्ववत्प्रमाणम्। वासः पीताम्बरम्। सन्ध्ये सन्ध्याद्वयम्। तुशब्देन मायापक्षव्यावृत्तिः। भूम्न इति। कालस्य। कुरुवर्येति सम्बोधनं भगवतो महत्त्वज्ञापनार्थम्। अव्यक्तं प्रकृतिर्भगवतो हृदयम्। आहुरिति

१. स्वरः स्मृतिर्वै भासुरानीकवीर्यः।

पूर्ववत्। स चन्द्रमा आधिदैविकरूपः सर्वविकाराणां कोषरूपं भगवन्मनः। तद्विकासे सर्वे विकारा उत्पद्यन्त इति ॥ ३४ ॥ ❀ ❀ विज्ञानशक्तिं ज्ञानशक्तिम्। महिं महत्तत्त्वम्। अन्तःकरणमहङ्कारम्। गिरित्रं महादेवम्। सर्वात्मन इत्यहङ्कारस्य सर्वत्र स्थितिरुक्ता। अश्वादयश्चत्वारोऽवयवचतुष्टयनखानि। तत्राऽऽद्यौ हस्तयोः। वामहस्तनखानां श्रीपूपयोग इत्यश्वतरी। सर्वे मृगाः पशवश्च भगवतोऽवयवत्वाभावेऽपि श्रोणिदेशे श्रोणिस्थाने भवन्ति। अथवा। मृगाः पशवश्च श्रोणिस्थानद्वयम् ॥ ३५ ॥ ❀ ❀ वयांसि पक्षिणस्तस्य भगवतो व्याकरणम्। "मयूराश्चित्रिता येने" ति वाक्यात्। मनुः स्वायम्भुवादिः। मनीषा इच्छा। मनुजो मनुष्यः। निवासो गृहम्। गन्धर्वादयोऽप्सरोन्ता एकवद्भावं प्राप्ताः। स्वरो भगवत्कर्तृको रागविशेषः। असुरानीकवर्यैः प्रह्लादः स्मृतिः स्मृतीः स्मृतयः। पाठान्तरे अप्सरोन्ताः प्रह्लादश्च स्वरस्मृती। आद्यः स्वरः। द्वितीयः स्मृतिः। वीर्य इति पाठे पूर्वोक्ता एव स्वरस्मृतयः। असुरानीकं वीर्यं यस्य। समास एव उद्देश्यविधेयभावः ॥ ३६ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

नद्यो गङ्गादयोऽस्य नाड्यः। अथ तथा विश्वतनोर्विश्वशरीरकस्य महीरुहा वृक्षाः तनूरुहाणि रोमाणि। इदमाश्चर्यभूतं भगवतः स्वरूपं त्वया सावधानतया ध्येयमिति सूचयन् सम्बोधयति—हे नृपेन्द्रेति। अनन्तवीर्यस्य भगवतः श्वसितं प्राणः मातरिश्वा वायुः। गतिर्गमनं वयः कालः। तस्य कर्म गुणानां सत्त्वरजस्तमसां प्रवाहः देवतिर्यङ्मनुष्यादिसृष्टिपरम्परा ॥ ३३ ॥ ❀ ❀ ईशस्य तस्य वैराजस्य भगवतः केशानम्बुवाहान् मेघान् विदुः। भगवत्कथाश्रवणे प्रवृत्तं राजानमादरं सूचयन् सम्बोधयति—हे कुरुवर्येति। भूम्नो महत्तमस्य भगवतो वासो वस्त्रं तु सायं प्रातरुभे सन्ध्ये। तस्य हृदयं त्वव्यक्तं प्रधानमाहुः। स प्रसिद्धः सर्वविकारकोशः सर्वौषध्यादिविकारहेतुभूतश्चन्द्रमाः तदीयं मनः ॥ ३४ ॥ ❀ ❀ तस्य सर्वात्मकस्य विज्ञानशक्तिं व्यवसायशक्तिं महिं महत्तत्त्वं आमनन्ति कथयन्ति। गिरित्रं श्रीरुद्रमन्तःकरणमहङ्कारमामनन्ति। रासभाद्वडवायामुत्पन्ना अश्वतरी। अश्वादयस्तस्य नखानि। सर्वे मृगा हरिणादयः पशवश्च गवाश्वादयस्तस्य श्रोणिदेशे उपास्या इत्यर्थः ॥ ३५ ॥ ❀ ❀ वयांसि विचित्ररूपाः पक्षिणः विचित्रं तस्य व्याकरणं "नामरूपे व्याकरवाणि" इति श्रुत्युक्तं शिल्पनैपुण्यम्, यथोक्तम्—येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ॥ मयूरश्चित्रितो येन स ते वृत्तिं विधास्यति' इति। मनुः स्वायम्भुवादिः मनीषा बुद्धिः, मनुजो मनुष्यवर्गो निवासस्थानम् "पुरुषे त्वाविस्तरामात्मा" इति श्रुतेः। गन्धर्वादीनां द्वन्द्वैकवद्भावः[1], गन्धर्वादयोऽप्सरोन्ता एकवद्भावं प्राप्ताः। स्वरः[2] भगवत्कर्तृकः षड्जादिरागविशेषः। असुरानीकवर्यैः असुरसमूहे श्रेष्ठः प्रह्लादस्तस्य स्मृतिः। स्मृतीरिति[3] पाठे स्मृतय इत्यर्थः। स्वरस्मृतीरसुरानीकवीर्यं इति पाठे तु गन्धर्वादयस्तस्य स्वरजातय इत्यर्थः। असुरानीकं वीर्यं प्रभावो यस्य स इति समास एवोद्देश्य[4]विधेयभावः ॥ ३६ ॥

## हिन्दी अनुवाद

राजन्? विश्वमूर्ति विराट् पुरुषकी नाड़ियाँ नदियाँ हैं। वृक्ष रोम हैं। परम प्रबल वायु श्वास है। काल उनकी चाल है और गुणोंका चक्कर चलाते रहना ही उनका कर्म है ॥ ३३ ॥ ❀ ❀ परीक्षित्! बादलोंको उनके केश मानते हैं। सन्ध्या उन अनन्तका वस्त्र है। महात्माओंने अव्यक्त (मूलप्रकृति) को ही उनका हृदय बतलाया है और सब विकारोंका खजाना उनका मन चन्द्रमा कहा गया है ॥ ३४ ॥ ❀ ❀ महत्तत्वको सर्वात्मा भगवान्का चित्त कहते हैं और रुद्र उनके अहङ्कार कहे गये हैं। घोड़े, खच्चर, ऊँट और हाथी उनके नख हैं। वनमें रहनेवाले सारे मृग और पशु उनके कटिप्रदेशमें स्थित हैं ॥ ३५ ॥ ❀ ❀ तरह-तरहके पक्षी उनके अद्भुत रचना कौशल हैं। स्वायंभुव मनु उनकी बुद्धि हैं और मनुकी सन्तान मनुष्य उनके निवासस्थान हैं। गन्धर्व, विद्याधर, चारण और अप्सराएँ उनके षड्ज आदि स्वरोंकी स्मृति हैं। दैत्य उनके वीर्य हैं ॥ ३६ ॥

---

१. मूले अप्सरश्शब्दस्य समाहारद्वन्द्वान्नपुंसकत्वमित्यर्थः। २. ते गन्धर्वादयस्तस्य स्वर इत्यर्थः। ३. स्मृतीरिति द्वितीयाबहुवचनान्तपाठे स्मृतय इत्यर्थः इति क ख-पुस्तकपाठः। स्मृतीरिति सुपां सुलुगित्यादिना सवर्णदीर्घश्छान्दसः स्मृत इत्यर्थः। ४. यस्मिन्धर्मिणि योऽज्ञातो धर्मो बोध्यते तौ क्रमेण उद्देश्यविधेयौ भवतः। यथा—असुरानीके धर्मिणि भगवद्वीर्यत्वधर्मो बोध्यते इति असुरानीकं उद्देश्यं भगवद्वीर्यत्वं विधेयम्। अनेन तस्य वीर्यं असुरानीकमित्यर्थतः सिद्धम्।

ब्रह्माऽऽननं क्षत्रभुजो महात्मा विडूरुरंघ्रिश्रितकृष्णवर्णः ।
नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः कर्मवितानयोगः ॥ ३७ ॥
इयानसावीश्वरविग्रहस्य यः सन्निवेशः कथितो मया ते ।
संधार्यते ऽस्मिन्वपुषि स्थविष्ठे मनः स्वबुद्ध्या न यतोऽस्ति किंचित् ॥ ३८ ॥
स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः ।
तं सत्यमानंदनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कंधे महा[1]पुरुषसंस्थानुवर्णने विराड्रूपकथनं नाम प्रथमोऽध्यायः ॥ १ ॥

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

ब्रह्मा विप्रस्तस्याननं मुखम् । क्षत्रं क्षत्रियो भुजौ यस्य विट् वैश्यः ऊरू यस्य अंघ्रिश्रितः कृष्णवर्णः शूद्रो यस्य नानाभिधा नामानि येषां ते च तेऽभीज्या देवास्तेषां गणैर्वसुरुद्रादिभिरुपपन्नो युक्तः द्रव्यात्मको हविः साध्यः वितानयोगो यज्ञप्रयोगः तस्य कर्म कायमावश्यकोऽभिप्रेतः इत्यर्थः ॥ ३७ ॥ ❀ ❀ इयानेतावान्सन्निवेशोऽवयवसंस्थानम् । अस्मिन्स्वबुद्ध्या मनः संधार्यते मुमुक्षुभिः यतो व्यतिरिक्तं किंचिन्नास्ति तस्मिन् ॥ ३८ ॥ ❀ ❀ तदेवं चित्तस्थैर्यार्थं विराड्देहजीवेश्वराणामभेदेनोपासनमुक्तम् । तत्र तु देहजीवावीश्वरे प्रविलाप्य स एव ध्येय इति निर्धारयति । स इति । सर्वेषां धीवृत्तिभिरनुभूतं सर्वं येन स एक एव सर्वांतर आत्मा तमेव सत्यं भजेत । अन्यत्रोपलक्षणेन सज्जेत । यत आसंगादात्मनः पातः संसारो भवति । एकस्य तत्तदिंद्रियैः सर्वानुभूतौ दृष्टान्तः स्वप्नजनानामीक्षिता तथेति स्वप्ने हि कदाचिद् बहून् देहान् प्रकल्प्य जीवस्तत्तदिन्द्रियैः सर्वं पश्यति तद्वद् ईश्वरस्य तु विद्याशक्तित्वान्न बंधः ॥ ३९ ॥

इति श्रीम० भा० द्वि० स्कं० टीकायां प्रथमोध्यायः ॥ १ ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अंघ्रिश्रितः अंघ्री पादौ श्रितः । कृष्णवर्णत्वं शूद्रस्य शुद्धतामसत्वात् । इत्यर्थ इति । आवश्यकं कृत्यमिति भावः ॥ ३७ ॥ ❀ ❀ अत्रायमर्थः स्वचांचल्यवशाद्यत्र यत्र भ्रमति तत्र तत्रैव भगवत इदममुकमंगमिति स्वबुद्ध्या विचारयेत् । एवञ्च मनसः स्वाभाविकाः सर्व एव विषया भगवदंगान्येवेति सर्वमपि चिंतनं भगवच्चिंतनत्वेन पर्यवस्येत् । तथा स्पर्धावज्ञादयो भावा नैवोत्पद्येरन् । स्पर्द्धादिविषयानां मनुष्यगंधर्वादीनामपि भगवदंगभूतत्वेन ध्यायेदेवेति ॥ ३८ ॥ ❀ ❀ नन्वेवं भगवद्धारणाभ्यासस्यानुषंगिकानि फलानि भोगैश्वर्यादीन्यवश्यमुत्पद्यत एव । योगी तानि स्वतः प्राप्तान्युपभुंजीत न वेति । आद्ये शैथिल्यप्रसङ्गः । तदुक्तम् । "यदा न योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेंग ॥ अनन्यहेतुष्वथ मे गतिः स्यादात्यंतिकी यत्र न मृत्युहासः" इति । द्वितीये—उपस्थितभोगत्यागस्य दुष्करत्वमिति सत्यं विवेकेनैव सर्वं सुकरमिति । विवेकप्रकारं दर्शयति । स इति । स योगी सर्वाभिर्धियां वृत्तिभिरिंद्रियलक्षणाभिः प्राचीनसहस्रसहस्रजन्मवर्त्तिनीभिरनुभूतमेव सर्वं देवेंद्रत्वनरेंद्रत्वादिकं भोगैश्वर्यादिकं येन सः । किं पुनश्चर्वितचर्वणयेति भावः । न च तस्यापि स्थिरत्वमित्यत्र दृष्टान्तः । आत्मा जीवो यथा स्वप्ने जनानां शत्रुमित्रसैन्यादीनां तदुपलक्षितराज्यादिभागानां च स्वसृष्टानामेक एवेक्षिताऽनुभविता अतस्तं सत्यं सर्वकालदेशवर्त्तिनमानंदानां निधिं भगवंतमेव भजेत न त्वन्यत्र सार्वदिकत्वादसत्येऽनानंदनिधौ विषयसुखे इत्यर्थ इति विश्वनाथः । तत्र तु त्रयाणां मध्ये तु उपलक्षणे देहादौ विद्यया च तथेतर इत्युक्तेरीशस्य बंधो नास्तीत्यर्थ इति स्वामिचरणाः ॥ ३९ ॥

इति श्रीभागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कंधे प्रथमोऽध्यायः ॥ १ ॥

## श्रीमद्वीरराघवव्याख्या

ब्रह्म ब्राह्मणस्तस्याननं महात्मा वैराजः, क्षत्रभुजःक्षत्रं क्षत्रियो भुजो यस्य सः विट् वैश्यः ऊरू यस्य तथोक्तः अंघ्रिश्रितकृष्णवर्णः अंघ्रौ श्रितः कृष्णवर्णः शूद्रो यस्य सः कृष्णवर्णस्तु तदंघ्रित्वेनानुसन्धेय इत्यर्थः नानाभिधाभीज्यगणाः नानानामका अभीज्या यष्टव्यावसुरुद्रादयस्तेषां गणैरुपपन्नो युक्तः यो द्रव्यात्मको हविः साध्यः वितानयोगः यज्ञादियोगः स तस्याराधनरूपं कर्मेत्यर्थः ॥ ३७ ॥ ❀ ❀

---

१. प्राचीने पाठे 'महा' इति पदं न ।

ईश्वरविग्रहस्य वैराजविग्रहस्य यः सन्निवेशः अवयवसन्निवेशः कथितः असौ इयानेतावानेव स्थविष्ठेऽस्मिन् वैराजसम्बन्धिनि वपुषि स्वकीयबुद्ध्या मुमुक्षुभिर्मनः सन्धार्यते यतः यस्मादीश्वरशरीरादन्यद्बहिर्भूतं नास्ति सर्वं तच्छरीरान्तर्भूतमित्यर्थः ॥ ३८ ॥ ❀ ❀ एतदेवाह-स इति दृश्यते श्रूयतेपि वेति श्रुत्यर्थ उच्यते सर्वधीवृत्तिभिः प्रत्यक्षानुमानादिसर्वविधज्ञानैरनुभूताः सर्वे ये पदार्थास्तेंऽतर्बहिश्चाधिष्ठेयतया यस्य सः तथोक्तः एवञ्च तदधिष्ठेयपदार्थानां तच्छरीरत्वमर्थसिद्धं तत्र दृष्टान्तमाह यथा एक आत्मा जीवः स्वप्नेक्षिता स्वप्नजनद्रष्टा स्वाप्नजनद्रष्टा ह्यात्मा स्वकीयसुकृतादुष्कृतानुसारेण परमात्मसृष्टान्स्वेनैवानुभाव्यान् तत्कालमात्रावसानान् पदार्थानधिष्ठाय राज्याभिषेक-शिरश्छेदादिसुखदुःखमनुभवति तथा अत्रैकस्यानेकपदार्थेष्वधिष्ठातृत्वमात्रे दृष्टान्तः । एवं दृष्टश्रुतचेतनशरीरकत्वेऽपि शरीरगतदोषासंस्पर्शित्वमाह सत्यमिति सत्यं स्वरूपतो गुणतश्च निर्विकारन्तस्य पुरुषार्थत्वमाह आनन्दनिधिमिति आनन्दाश्रयमित्यर्थः । आनन्दस्वरूपत्वस्याप्युपलक्षणं आनन्दं ब्रह्मणो विद्वान्विज्ञानमानन्दमित्युभयत्रापि श्रवणात् । भजेत उपासीत यद्वा सत्यमित्यचिद्व्यावृत्तिः आनन्दनिधिमिति क्षेत्रज्ञव्यावृत्तिः अन्यत्र न सज्जेद्ब्रह्मात्मकस्वतन्त्रवस्तु किञ्चित्परिकल्प्य तत्रासक्तो न भवेत् यतस्तदासंगादात्मपातः । आत्मनः स्वस्य पातः संसारः स्यात्तस्मान्न सज्जेदित्यर्थः ॥ ३९ ॥

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचयप्रसक्ततत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवीरराघवविदुषा लिखितायां श्रीमद्भागवतचन्द्रिकायां द्वितीयस्कन्धसमाख्यायां प्रथमोऽध्यायः ॥ १ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

ब्रह्मणः ब्राह्मणजातेर्जनकमाननं यस्य स तथा क्षत्रजातेरुत्पादकौ भुजौ यस्य स तथा विशाञ्जनकौ ऊरू यस्य स तथा । अंघ्रिश्रितःकृष्णवर्णः शूद्रजातिर्यस्य स तथा देवपितृभ्यो विनियुज्यमानस्वाहास्वधा तयोरुत्पादको वीर्यगुणो रेतोगुणस्तेनोपपन्नः हव्यजनक आत्मा मध्यदेहो यस्य सः तथा अग्निष्टोमादिकर्मवितानस्योत्पादको योग उपायो यस्य सः तथा वितानं विस्तारः ॥ ३७ ॥ ❀ ❀ उक्तार्थमुपसंहरति इयानिति । ईश्वरविग्रहस्य वैराजाख्यहरिदेहस्य यः सन्निवेशोऽवस्थितिविशेषः स इयानित्थंभूतो मया ते तव कथितः यतोऽस्मादीश्वरविग्रहात्स्थविष्ठमुत्तमं च नास्ति । योगिभिर्मनोस्मिन् स्थविष्ठे सर्वोत्तमे वपुषि स्वबुद्ध्या सन्धार्यते । मनोनैर्मल्यायेति शेष इत्यन्वयः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे विजयध्वजकृतटीकायां प्रथमोऽध्यायः ॥ १ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या ।

एतदन्तां विराड्धारणामुक्त्वा तदपवादेनापि तां पूर्वोक्तां भक्तिमेवाह स सर्वेति । यः सर्वधीत्यनुक्तत्वात् स तं भजेतेति योजयितव्यस्य कर्त्तुर्विद्यमानत्वादयमेवार्थः—स तथाभूतविराड्धारणासिद्धो योगी विराड्गताभिः सर्वाभिर्धीवृत्तिभिर्ज्ञानेन्द्रियैरनुभूतं सर्वं विराड्गतं येन तथाभूतः सन्, तं सत्यमानन्दनिधिं विराडन्तर्यामिणं श्रीनारायणमेव भजेत् । अन्यत्र विराड्गते तद्धारणान्तरफले च कुत्रापि न सज्जेत । यतः सज्जनाद् आत्मपातः संसार एव स्यात् । तस्य सर्वानुभूतौ दृष्टान्तः, आत्मा स्वप्नद्रष्टा जीवः यथा स्वप्नगतानां सर्वेषां जनानां तदुपलक्षितानां वस्तूनाञ्च एक एव ईक्षिता भवतीति । अत्र तमित्यनेन स ऐक्षत इति स्वाभाविकी ज्ञानबलक्रिया च इति श्रुतिप्रसिद्धपरानपेक्षज्ञानादिसिद्धेस्तथा सन्ध्ये सृष्टिराह हि मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति न्यायप्राप्तेन स्वप्नस्यापि तत्कर्तृकत्वेन जाग्रदादिमयजगत्कर्त्तृत्वस्य पूर्णत्वप्राप्तेर्वैलक्षण्यं दर्शितं, सत्यादिद्वयेन परमपुरुषार्थत्वञ्चेति ज्ञेयम् ॥ ३९ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे प्रथमोऽध्यायः ॥ १ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

ब्रह्म ब्राह्मणः आननम् । क्षत्रं क्षत्रियो भुजा यस्य सः । विट् वैश्य ऊरू यस्य सः । अंघ्री श्रितः कृष्णवर्णः शूद्रो यस्य सः । नाना अभिधा नामानि येषां ते च ते अभोज्या देवाः तेषां गणैर्वसुरुद्रादिभिरुपपन्नो युक्तः, द्रव्यात्मकः हविःसाध्यः वितानयोगः यज्ञप्रयोगः तस्य कर्म्म आवश्यकं कृत्यम् ॥ ३७ ॥ ❀ ❀ इयान् एतावान् सन्निवेशः अवयवसंस्थानम् । अस्मिन् वपुषि स्वबुद्ध्या सारथिभूतयेत्यर्थः । मनः सन्धार्यते योगिभिः । यतो व्यतिरिक्तं किञ्चिदपि नास्ति तस्मिन् । अयमर्थः—मनो हि स्वचाञ्चल्यवशाद् यत्र यत्र भ्रमति तत्र तत्रैव भगवत इदममुकमङ्गमिति स्वबुद्ध्या विचारयेत्, एवञ्च मनसः स्वाभाविकाः सर्वं एव विषया भगवदङ्गान्येवेति सर्वमपि चिन्तनं भगवच्चिन्तनत्वेन पर्यवस्येत्, तथा स्पर्द्धावज्ञादयो भावा नैवोत्पद्येरन्, स्पर्द्धादिविषयाणां मनुष्यगन्धर्वादीनामपि भगवदङ्गभूतत्वेन ध्येयत्वादेवेति ॥ ३८ ॥ ❀ ❀ नन्वेवं भगवद्धारणाभ्यासस्यानुषङ्गिकाणि फलानि भोगैश्वर्य्यादीन्यवश्यमुत्पद्यन्त एव । योगी तानि स्वतःप्राप्तान्युपभुञ्जीत न वा । आद्ये योगशैथिल्यप्रसङ्गः । यदुक्तम्—यदा

न योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेऽङ्ग। अनन्यहेतुष्वथ मे गतिः स्यादात्यन्तिकी यत्र न मृत्युहासः॥ इति। द्वितीये उपस्थितभोगत्यागस्य दुष्करत्वमिति। सत्यम्। विवेकेनैव सर्व्वं सुकरमिति विवेकप्रकारं दर्शयति। स योगी सर्व्वाभिधियां वृत्तिभिरिन्द्रियलक्षणाभिः प्राचीनसहस्रसहस्रजन्मवर्त्तिनीभिरनुभूतमेव सर्व्वं देवेन्द्रत्वनरेन्द्रत्वादिकं भोगैश्वर्यादिकं येन सः किं पुनश्चर्वितचर्व्वणयेति भावः। न च तस्य तस्यापि न स्थिरत्वमित्यत्र दृष्टान्तः आत्मा जीवः यथा स्वप्ने जनानां पात्रमित्रसैन्यादीनां तदुपलक्षितराज्यादिभोगानाञ्च स्वसृष्टानामेक एव ईक्षिता अनुभविता। अतस्तं सत्यं सर्व्वकालदेशवर्त्तिनम् आनन्दानां निधिं भगवन्तमेव भजेत, न त्वन्यत्र असार्व्वदिकत्वादसत्ये अनानन्दनिधौ विषयसुखे इत्यर्थः॥ ३९॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। द्वितीये प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम्॥ १॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

ब्रह्म ब्राह्मणस्तस्याननं मुखम्। महात्मा वैराजःपुरुषः क्षत्रं क्षत्रियो भुजा यस्य स तस्य विट् वैश्यः ऊरू यस्य स तथा अंघ्रिश्रितः कृष्णवर्णः शूद्रो यस्य स तथा नानाऽभिधाः बहुनामकाः येऽभीज्याः देवास्तेषाङ्गणैरुपपन्नो यो द्रव्यात्मकोः हविः। साध्योवितानयोगः यज्ञयोगस्तस्याराधनभूतं कर्म॥ ३७॥ ❀ ❀ ईश्वरविग्रहस्य पुरुषशरीरस्य यः सन्निवेशः पादादिसन्निवेशः मया ते तुभ्यं कथितः असौ इयानेतावानेव अस्मिन्नीश्वरविग्रहे स्वबुद्ध्या मुमुक्षुभिर्मनः सन्धार्यते स्थिरीक्रियते यतोऽन्यत्किञ्चिन्नास्ति॥ ३८॥ ❀ ❀ स इति। यः स्थूलदेहे भजनीयतयोक्तः स भगवान् सर्वधीवृत्तिभिरनुभूतं सर्वं चराचरं येन स तथोक्तः यतः स आत्मा सर्वं यदात्मकमेवातः सर्वं तद्ज्ञानगोचरम् स्वप्ने जीवस्य फलविशेषभोगाय पुरुषसुरथादीन् भगवान् करोति तान्। जीवात्मा यथा एक एव पश्यति तद्वत् स्वप्नसृष्टिर्भगवत्कर्त्तृकेति वेदान्तकौस्तुभे स्थितम् एवम्भूतन्तम्भगवन्तं सत्यमानन्दनिधिं भजेत अन्यत्राऽब्रह्मात्मकतया कस्मिंश्चिदुपासनाबुद्ध्या न सज्जेत्। यत आसङ्गादात्मपातः॥ ३९॥

इति श्रीसनत्कुमारसन्ततिप्रवर्त्तकभगवन्निम्बार्कचरणचिन्तकशुकसुधीप्रणीते श्रीमद्भागवतसिद्धान्तप्रदीपे द्वितीयस्कन्धीये प्रथमाध्यायार्थप्रकाशः॥ १॥

## श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

ब्रह्मभावः कश्चिद्धर्मः। यस्मिन् विद्यमाने ब्राह्मणशब्दवाच्यो भवति पुरुषः। ब्राह्मण्यापरनाम। ब्राह्मण्यं न जातिः। व्यक्तिसद्भावेऽपि तस्याऽपगमात्। "ब्राह्मण्यादेव हीयत" इति वाक्यानुरोधात्। वृत्त्यन्तरकल्पनायां प्रमाणाभावात्। नियतव्यञ्जकाभावाच्च। ब्राह्मण्यां ब्राह्मणाज्जातत्वं चतुर्मुखे तत्पुत्रेषु मानसेषु च अव्यापकम्। ऋषभपुत्रे[1]ष्वेकाशीतिर्ब्राह्मणा बभूवुरिति वाक्याच्च। तस्माच्छास्त्रे बहुवाक्यविरोधाद्ब्राह्मण्यं काचिद्देवता। सा यस्मिन्नेव देहेऽभिव्यक्ता भवति ते ब्राह्मणा इत्युच्यन्ते। अत एव शापादिना शूद्रत्वं चण्डालत्वमनुग्रहेण ब्रह्मत्वमिति। [2]सा चोपनयनेन देहे समायाति। तदा बहूनि वाक्यानि सङ्गच्छन्ते। एवं क्षत्रम्। अत एव परशुरामे उभयनिवेशः। ब्रह्म आननं यस्य। क्षत्रं भुजो यस्य। पूर्वमिद्धोऽग्निर्मुखत्वेनोक्तो वाक्प्रकाशार्थम्। अतो वागिन्द्रियदेवताऽग्निः। इन्द्रादयश्च भोक्तारो बाहवः पूर्वमुक्ताः। अत्र तु रसाधिष्ठात्री देवता वरुणः। रसभोक्तृ ब्राह्मण्यम्। तथा रक्षाकर्त्तृ क्षत्रमिति। विट् ऊरू यस्य। वितलात[3]लरूपस्याऽप्यूरुणो (?) वैश्यत्वम्। स्थि[4]तिसाधकत्वेन [5]पूर्ववद्विशः। वृत्तेश्चतुर्विधत्वाद्बहुवचनम्। विश [6]ऊरू यस्येति। एवमङ्घ्रिः श्रि[7]तकृष्णवर्णः। श्रितः कृष्णवर्णो यम्। कृष्णवर्णः शूद्रत्वम्। वेदरहिता विद्या च। कर्म द्विविधम्। स्वाभाविकं वैशेषिकञ्च। स्वार्थं परार्थमिति यावत्। तत्र परार्थं पूर्वमुक्तं कर्म गुणप्रवाह इति। अत्र तु स्वार्थं कर्म। वितानयोगो यज्ञविस्तारः। वितानाः सप्ततन्तुवितानाः। तेषां योगो यत्र सत्रा (?) हीनेषु स [8]भगवत्कर्म। तस्य द्व्यङ्गतामाह। नानाभिधाः नानानामान इज्यगणा देवगणाः पूज्यगणास्तत्राऽप्यभितः प्रधानगुणभावेन तेनोपपन्नः। द्रव्यात्मकश्च व्रीहियवादिसाध्य[9]पुरोडाशादिः। देवतोद्देशेन द्रव्यत्यागो यागः। तत्र देवता द्रव्यञ्चाऽङ्गम्॥ ३७॥ ❀ ❀ एवं सर्वपदार्थानां [illegible] अवयवविन्यासप्रकारः इयानेतावानेव। नाऽधिको विन्यासोऽस्तीत्यर्थः। असौ अयमेव विन्यासो न [10]त्वन्योऽपि विन्यासोऽस्ति। अथवा। असौ [11]प्रकृतरूपो विन्यास इयानेतावान्। आनन्दमयस्य त्वन्यः। स उत्तरत्र वक्ष्यते। अत्र पदार्थानां विनिवेशस्योद्देशप्रकरणत्वान्नाऽस्माभिर्विवरणमुक्तम्। अग्रे विमर्शे वक्तव्यत्वात्। एवं निवे[12]शकथनस्य प्रयोजनमाह—सन्धार्यत इति। अस्मिन्नेव

---

१ एकाशीति ब्रह्मणेति ख. २ च चोपनयनेनेति ग. ३ वितलातलरूपस्याऽपि ऊरुणोर्वैश्यत्वमिति ऊरोः द्विः वैश्यत्वमिति वा क. ऊरुणोर्वैश्यत्वमित्येव ग. वितलातलरूपस्याऽपि ऊरोर्वैश्यत्वमिति ख. ४ स्थितिसाधकत्वेऽपीति ग. ५ पूर्ववद्विष इति क. पूर्ववद्विशेष इति घ. ६. ऊरु इति क. ७ श्रितः कृष्णवर्ण इति क. ८ भगवत्कर्मा इति क. ९ पुरोडाशादय इति ख. १० अपिर्नास्ति क. ११ प्राकृतरूप इति ख. १२ निवेशनकथनस्येति क. ख.

वपुषि सर्वैर्योगिभिर्मनः सन्धार्यते। योगाङ्गधारणविषयोऽयमेव क्रियते। स्थविष्ठ इति पूर्ववत्। वं सुखं पुष्णातीति वपुर्देहापरपर्यायः। तुल्यार्थत्वादस्याऽप्यर्थस्तत्रैवोक्तः। स्वबुद्धया आत्मबुद्धया आत्मरूपत्वेन। अन्यथा सर्वप्रवेशो न स्यात्। परमभक्तिराकाङ्क्षाभावश्च न भवेत्। फलञ्च। भोगोऽतिक्रमश्च न भवेत्। एतस्मिन् धारणाविषये जाते कुत्र धारणा कर्त्तव्या कुत्र नेत्यादिसन्देहा गच्छेयुः। यतो—न यतोऽस्ति किञ्चित्। यस्माद्रूपादन्यद्भिन्नं किमपि नास्ति ॥ ३८ ॥ ❋ ❋ साधारणानां पञ्चप्रश्नेषु कर्त्तव्यमध्य एव श्रोतव्यस्मर्त्तव्ययोरनुप्रवेशान्नामानुकीर्त्तनेनैव जपस्योक्तत्वात्कर्त्तव्यमध्य एव कर्त्तव्यस्य प्रवेशाद्वैकल्पिकपक्षत्वाच्चाऽन्येषां भजनीयप्रश्नोऽवशिष्यते। तमाह—स सर्वधीवृत्त्यनुभूतसर्व इति। योऽत्र धारणाविषयत्वेनोक्तः सर्वात्मपदेन च श्रोतव्यविषयतावच्छेदकवाचकेन निरूपितो यस्य विवरणार्थमयं सन्निवेशो निरूपितः स एव श्रवणादिना भजनीयः। श्रवणादिना भगवत्सन्निधाने गत्वा तत्सायुज्यं वा प्राप्य साक्षात्तमेव भजेत। अन्यत्र फले साधनान्तरेणाऽनेन वा साधनेनाऽऽसक्तः स्वस्थानादपि पतेत्। यस्यामवस्थायां तिष्ठति ततोऽपि पतेत्। अनेन प्रथमं फलार्थं भवतु पश्चात्तदर्थमपीत्यपि पक्षो निवारितः। नन्वस्य फलत्वं भजनीयत्वं वा कथम्? तत्राऽऽह—आनन्दनिधिमिति। भजनीयं फलमेव। साधनस्य पुरुषशेषत्वात्। यद्यपि फलमपि पुरुषशेषः। पुरुषानुभवविषयत्वादनुभवरूपत्वाद्वा। तथापि रसत्वेन रसप्रधानत्वेनैव भोगे रसिकता भवतीति फलं सेव्यम्। तच्च परमानन्दः। सोऽपि न गणनया प्राप्तो ब्रह्मणि स्थिता परिमितत्वात्। किन्त्वानन्दनिधिः। आनन्दो नितरां धीयतेऽस्मिन्निति पूर्णानन्दो भगवानेव सेव्यः। आनन्दपोषस्योक्तत्वात्तस्य तिरोभावमाशङ्कयाऽऽह—सत्यमिति। ननु फलान्तरविषये चित्तसद्भावे किं विधेयम्। "उद्यतस्य हि कामस्य प्रतिवादो न शस्यते" इति न्यायात्। तत्राऽऽह—सर्वधीवृत्त्यनुभूतसर्व इति। सर्वधीवृत्तिभिः सर्वेषां सर्वज्ञानजनकेन्द्रिय-वृत्तिभिरनुभूतं सर्वं येन। यत्किञ्चित्फलं येन केनचिदुपभोग्यं तत् तदिन्द्रियद्वारा अनेनैवोपभोग्यम्। अतः स्वरूपतोऽस्मादन्यथा 'अन्यन्नावशिष्यते[1] तथा फलमपि। एतदनुपभोग्यं फलञ्च नाऽवशिष्यते। ननु कथमस्य भोक्तृत्वम्। तत्तदधिष्ठातॄणां विद्यमानत्वात्। तत्राऽऽह—आत्मा यथेति। तत्तदिन्द्रियाधिष्ठातॄणां दिगादीनां विद्यमानत्वेऽपि यथा आत्मा सर्वेन्द्रियानुभूतसर्व एवं भगवानपि तमप्येकदेशाभिमानिनमविगणय्य तेनाऽधिष्ठितैरेवेन्द्रियैः सर्वमनुभवतीत्यर्थः। नन्वात्मन इन्द्रियाधिष्ठातॄणाम-प्रतीतत्वादात्मीयत्वेनैवेन्द्रियाणां ग्रहणात्तस्य स्वगृहीतमात्रानुभवो भवतु नाम। भगवतस्तु समष्टिरूपस्य व्यष्टिषु देहस्थितकीटेष्विव प्रतीत्यभावादात्मीयत्वाभावाच्च तदिन्द्रियाणां कथं सर्वधीवृत्तिभिर्भगवाननुभवति? तत्राऽऽह—स्वप्नजनेक्षितैक इति। स्वप्नजनानामीक्षिता द्रष्टा यथैकः। स्वप्नस्य मायिकत्वेऽपि ज्ञानं न मायिकम्। तस्याऽऽत्मरूपत्वात्। तत्र स्वप्नद्रष्टाः पुरुषाः सर्वं पश्यन्तीति प्रतीतिरस्ति। तत्र पुरुषदेहानां मायिकत्वं न्यायसिद्धम्। तथापि तन्निष्ठा या प्रतीतिः सा न मायिकी। तत्र चैतन्यान्तराभावाद्भगवतो वा जीवस्य वा चैतन्यं भवति। स्वस्याऽपि द्रष्टृत्वाभावादिन्द्रियाणां गोलकाभावेन प्रदर्शनासामर्थ्याद्गोलकस्य च स्वाप्नस्य च मिथ्यात्वाद्भगवानेव पश्यतीति युक्त्याऽध्यवसीयते। निद्रावशाच्च तेन सह भेदो न स्फुरति। तथाऽन्यत्रापि स एव पश्यतीत्यध्यवसीयते स्वप्नदृष्टान्तेन[2]। ततस्तेषु देहेषु जीवसद्भावे वा भगवानेव द्रष्टेति निश्चीयते। तस्य चाऽस्मदिन्द्रियगोलकापेक्षा नास्ति। देवतानामेव गोलकत्वात्। विषयस्य चेन्द्रियत्वात्। विषये चाऽस्मदादीन्द्रियलयात्। कारणलयपक्षेऽपि वासनया तत्र विषयसद्भावात्[3]। कारणस्याऽलये लीनानामपि प्रकाशसम्भवाल्लयाङ्गीकारे गौरवाच्च विषय एव लयोऽङ्गीकर्त्तव्यः। अन्यथा निद्राया अव्यवधाय-कत्वात्पुनरुद्बोधः कथं क्रियते[4]? अहङ्कारस्त्वात्माध्यासरूप इन्द्रियवल्लीयते। न त्विन्द्रियकारणभूतः। तथा सति पुनः सृष्ट्यभावान्नोत्पद्येरन्। अतो विषयलीनानीन्द्रियाणि भगवदिन्द्रियलीनानि भवन्ति। अतः स्वप्न द्रष्टृविचारे[5] क्रियमाणे यथा सर्वं व्याप्य सर्वेषामात्मा भूत्वा सर्वं पश्यतीति निश्चयः। एवं जागरणावस्थायामपि तत्तद्विषये प्रविष्टानीन्द्रियाणि भगवदिन्द्रियप्रवेशाद्भगवज्ज्ञानसाधकानि भवन्ति। अन्यथा भगवत इंद्रियातिरिक्तस्य विषयस्याऽभावात्किं गृह्णीयात्। तत्रेन्द्रिये 'सम्बद्धमात्मानं[6] गृह्णन्नपि वेद्यत्वाकाङ्क्षायामात्मनोऽवेद्यत्वात्परेन्द्रियवेद्यत्वेनेन्द्रियस्यैव वेद्यत्वं सम्भवति। अतोऽप्यस्मदिन्द्रियापेक्षा। स च सर्वत्रैकः। भेदकप्रमाणाभावात्स्वप्नदृष्टान्तेन व्यावर्त्तकानामव्यावर्त्तकत्वात्। अतस्तेनैव सर्वभोगसिद्धौ पुनर्यत्नान्तरेण भोगो न साधनीयः। आत्मनः पातसम्भवाच्च। देहस्थितकीटेषु तु स्वस्य सर्वात्मभावतिरोभावाज्जीवत्वाद्वा न स्फुरणमिति सर्वमविवादम् ॥ ३९ ॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षित-
विरचितायां द्वितीयस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

---

१ अन्यत्रावशिष्यत इति ख २ यद्दृष्टान्तेनेति ख. ३ सम्भवादिति ख. ४ क्रियते इति ख. ५. स्वप्नदृष्टेति क. स्वप्नद्रष्टृविचारे इति ख, ६ सम्बद्ध आत्मानमिति क।

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः**

**ब्रह्मानन** इत्यत्र । **ब्रह्मभाव** इत्यादि । ननु ब्राह्मण्यं हि लोके जातित्वेन प्रसिद्धम् तत्किमिति धर्मान्तरत्वेन स्वीक्रियते इत्यत आहुः **न जातिरिति** । तत्र हेतुः **व्यक्तीत्यादि** । नन्वपगमे किं मानमित्यत आहुः **ब्राह्मण्यादेवेत्यादि** । 'शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम् । तस्यां तनयमुत्पाद्य ब्राह्मण्यादेव हीयत' इति वाक्ये एवकारेणापगमस्यैव शीघ्रं प्रतीतेरित्यर्थः । ननु 'अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिःकृता' इत्यादौ ब्राह्मणकर्मानधिकारस्य प्रत्ययात् 'येन विप्लावितं ब्रह्म वृषल्यां जायतात्मना' इत्यादावपि ब्रह्म विप्लावितं नाम ब्राह्मणकर्मानधिकारित्वं सम्पादितमिति लाक्षणिकशाब्दबोध इव उक्तवाक्येपि ब्राह्मणकर्माधिकाराद्धीनो भवति स्वयमित्येवं शाब्दबोधसम्भवान्नोक्तदूषणावकाश इत्यत आहुः **वृत्त्यन्तरेत्यादि** । 'गुणवचनब्राह्मणादिभ्यः कर्मणि चे'त्यनुशासने कर्मणि ष्यञ्विधानेन भावपक्षेपि तस्य जातिभिन्नधर्मपरत्वेनाविरोधाल्लक्षणाकल्पने मानाभावादित्यर्थः । किञ्च । उक्तवाक्यादौ गौण्यनवकाशाद् गङ्गायां घोष इत्यादौ शैत्यपावनत्वादिवदत्र फलविशेषस्याप्यप्रत्ययान्निरूढलक्षणास्थले च 'कृती कुशल' इत्यादिकोशेन डित्थादिष्विव शक्तेरेव ग्रहणेन तस्याः विप्रतिपन्नत्वात्का वा लक्षणा वाच्येत्येवमपि प्रमाणाभावो बोध्यः । ननु विश्वामित्रादौ जातिगमागमदर्शनाद्व्याप्यव्यापकभेदेन जातिचतुष्टयस्य जातित्रयस्य वा स्वीकारवदत्राप्यनपायिब्राह्मण्यव्याप्यापायिब्राह्मण्यस्वीकारे 'ब्राह्मो जाताविति सूत्रप्रत्युदाहरणलिङ्गादव्याप्यवृत्तिजातिस्वीकारे वा को दोषः इत्यत आहुः **नियतेत्यादि** । यदि अव्याप्यवृत्तिर्जातिर्विश्वामित्रादौ स्यात्, तदा तत्तद्व्यञ्जकं तु नियतं स्यात्, तदभावाच्च नाव्याप्यवृत्तिर्जातिरित्यर्थः । न च क्रोधतेजःप्रभृतीनां व्यञ्जकत्वं वक्तुं शक्यम् । दुर्वासः प्रभृतिषु व्यभिचारात् । प्रत्युदाहरणं तु मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जीबन्धना' दिति स्मार्तजननमादाय जननं जातिरिति व्युत्पत्त्या सङ्गमनीयमिति सर्वमनवद्यम् । उपाधित्वमाशङ्क्य दूषयन्ति **ब्राह्मणादित्यादि** । तथा च ब्राह्मण्यां जातत्वं चाण्डालेऽतिव्यापकम्, ब्राह्मण्यां ब्राह्मणाच्च जातत्वमुक्तस्थलेऽव्यापकम्, अतो न सखण्डोपाधिर्वक्तुं शक्य इत्यर्थः । ननु विशुद्धमातापितृकत्वं ब्राह्मणत्वमित्युक्ते न कश्चिद्दोष इत्यत आहुः **ऋषभेत्यादि** । तथा सति नवसु भागवतत्वं दशसु क्षत्रियत्वमेकाशीतिषु यवीयःसु ब्राह्मणत्वमिति तारतम्यं न स्यादित्यर्थः । एवं विशुद्धमातृकत्वं विशुद्धपितृकत्वं च यायातेषु पुंड्रसुह्मादिषु यथायथमतिव्यापकं ज्ञेयम् फलितमाहुः **तस्मादित्यादि** । **उच्यन्त** इत्यन्तम् । तस्माज्जातेः सखण्डोपाधेश्चानिरूप्यत्वादखण्डोपाध्यङ्गीकारेपि तस्याः जातिकल्पत्वेन उक्तरीत्या शास्त्रे बहुवाक्यविरोधाद् ब्राह्मण्यं देवता इत्यर्थः । **अत एवेति** । देवताभिव्यक्त्यनभिव्यक्तिभ्यामेवेत्यर्थः । **इतीति** । प्रसिद्धमित्यर्थः । ननु देवता कथमभिव्यक्ता भवतीत्यत आहुः **सा चेत्यादि** । उपनयनेत्युपलक्षणम्, तदनुकूलेश्वरेच्छा च सर्वत्र सहकारिणी सर्वैरेव मन्तव्येति न कश्चिद्दोषः । एतेन देवताभिव्यक्तिः समागमनरूपा ज्ञापितेति ज्ञेयम् । **बहूनि वाक्यानीति** । 'जन्मना जायते शूद्रः संस्कारैर्द्विज उच्यते । वेदाभ्यासाद्भवेद्विप्रो ब्रह्मज्ञो ब्राह्मणः स्मृत' इत्यादीनीत्यर्थः । अयं चार्थो बृहदारण्यकीयपुरुषविधब्राह्मणे 'ब्रह्म वा इदमग्र आसी'दित्यारभ्य 'वैश्येन वैश्यः शूद्रेण शूद्र' इत्यन्तग्रन्थे स्पष्टः । एवञ्च ब्राह्मणीत्वमपि 'विवाहस्तु समन्त्रक' इत्यादिवाक्यात् विवाहान्तरमेव । पूर्वं तु ब्राह्मणकन्यात्वमेव । तत्र व्यभिचारादावपि पापतारतम्यं प्रायश्चित्ततारतम्यं च ज्ञेयम्, अत एव तादृङ्मरणे आशौचतारतम्यमपि सङ्गच्छत इति बहूनि सङ्गच्छन्त इति सुष्ठूक्तम् । एवञ्च 'ब्रह्मणे ब्राह्मणमालभेत क्षत्राय राजन्यं मरुद्भ्यो वैश्यं मरुतो वै देवानां विश' इत्यादिश्रुतयोपि सङ्गच्छन्ते । अन्यत्राप्यतिदिशन्ति **एवं क्षत्रमिति** । इदमुपलक्षणं ज्ञेयम् । ननु शूद्रत्वस्याजातित्वे शूद्रापदे टाबभावापत्तिरजातित्वादितिचेन् । न । 'वेदाक्षरविचारेण ब्राह्मणीगमनेन च । कपिलाक्षीरपानेन शूद्रश्चाण्डालतां व्रजे'दित्यादिलिङ्गात्तत्रापि जननमादायैव निर्वाहात् । तथा च यत्रैव बाधाभावः, तत्रैव जातित्वमवधेयम्, नान्यत्रेति । दिक् । **अत एवेति** । देवताद्वयसमागमादेव । **उभयनिवेश इति** । ब्रह्मक्षत्ररूपदेवताद्वयनिवेश इत्यर्थः । एतेन ग्रन्थेन भारते वनपर्वण्याजगरे 'ब्राह्मणः को भवेद्राजन्निति प्रश्ने 'सत्यं दानं क्षमा शीलमानृशंस्यं तपो घृणा । दृश्यन्ते यत्र नागेन्द्र स ब्राह्मण इति स्मृतः' इति लक्षिते, 'चातुर्वर्ण्यं प्रमाणं च सत्यं च ब्रह्म चैव हि । शूद्रेष्वपि च सत्यं च' इत्यादिनातिव्याप्तौ दर्शितायाम्, शूद्रे तु यद्भवेल्लक्ष्म द्विजे तच्च न विद्यते । न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः । यत्रैतल्लक्ष्यते सर्प स ब्राह्मण इति स्मृतः । यत्रैतन्न भवेत्सर्प तं शूद्रमिति निर्दिशे'दित्यनेन लक्ष्यकुक्षिनिक्षेपे लक्ष्यबहिष्कारे च कृते, यदि ते वृत्ततो राजन् ब्राह्मणः प्रसमीक्षितः । वृथा जातिस्तदायुष्मन् कृतिर्यावन्न विद्यत' इत्यनेनानियतव्यङ्ग्यायां जातौ स्वीकृतायाम् 'जातिरत्र महासर्प मनुष्यत्वे महामते । संस्कारात्सर्ववर्णानां दुःपरीक्ष्येति मे मतिः । सर्वे सर्वास्वपत्यानि जनयन्ति सदा नरा' इत्यनेन साङ्कर्यं दूषणं जातावुक्त्वा, 'दुःपरीक्ष्ये'त्यनेन अनियतव्यङ्ग्या न जातिः, किन्तु नियतव्यङ्ग्यैव जातिरिति सूचयित्वा, 'इदमार्षं प्रमाणं चे'त्यारभ्य 'यत्रेदानीं महासर्प संस्कृतं वृत्तमिष्यते । तं ब्राह्मणमहं पूर्वमुक्तवान् भुजगोत्तमे'त्यन्तेन संस्कारवृत्ताभ्यां ब्राह्मण्यमुक्तम् । तदप्येतदविरोधीति ज्ञापितं ज्ञेयम् । वारद्वयं मुखाद्युक्तेस्तात्पर्यमाहुः **पूर्वमित्यादि कर्मेत्यन्तम्** । तथा च कार्यभेदान्मुखान्तराद्युक्तिः । विश्वरूपाध्याये 'अनेकबाहूदरवक्त्रनेत्र'मिति कथनादत्रापि 'सहस्रशीर्षा' इत्यनेन तत्सूचनान्न कोपि सन्देह इत्यर्थः । **ऊरुण इति** । नपुंसकप्रयोगो लिङ्गस्य लोकाश्रयत्वेनाशिष्यत्वाज्ज्ञेयः । 'सक्थि क्लीबे पुमानूरु'रिति कोशे 'सक्थी'ति

रूपभेदेन नपुंसकत्वे सक्थिशब्दस्यावगते 'पुमानूरुः क्लीबे' इत्यन्वयादपि सुष्ठु ॥ ३७ ॥ * * इयानसावित्यत्र। प्रथमपक्षे सन्निवेशमुद्दिश्य इयत्त्वमदस्त्वं चेति विधेयद्वयं बोध्यम्। द्वितीयपक्षस्य फलमाहुः आनन्देत्यादि। आत्मरूपत्वेनेति। ब्रह्माण्डं स्वात्मत्वेन ध्यात्वा तत्र मनः सन्धार्येत इत्यर्थः। नन्वात्मत्वेन ब्रह्माण्डध्यानस्य किं प्रयोजनमत आहुः अन्यथेत्यादि। आत्मत्वेन ब्रह्माण्डध्यानाभावे इत्यर्थः। अतिक्रम इति। चण्डिकादिधारणातिक्रमः। तथा चैतेषां प्रयोजनानामप्यात्मत्वेन ध्यानमुच्यत इत्यर्थः। तदेव विवृण्वते एतस्मिन्नित्यादि गच्छेयुरित्यन्तेन ॥ ३८ ॥

स सर्वधीवृत्त्यनुभूतसर्व इत्यत्र। ननु राजकृतप्रश्नसप्तके आद्यप्रश्नद्वयोत्तरं सोपपत्तिकमुक्तम्, शेषाश्च निन्दिता एव इति भजनविधायकमिदं पद्यं न सङ्गच्छत इत्याशंक्य सङ्गतिं विमृशन्ति साधारणानामित्यादि। अयमर्थः। शुकैर्हि 'वरीया' नित्यनेनैकं प्रश्नं स्तुत्वा, 'तस्माद्भारते' त्यारभ्य 'नामानुकीर्तन' मित्यन्तेन चत्वारोऽर्थाः उक्ताः, तेनैवं ज्ञायते, यच्छ्रोतव्यादिगतं साधारण्यमेव परिहरति, स्तुत्यगतमेकत्वं चैकविषयत्वेन समर्थयतीति। एवं सति 'नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणा' मित्यत्र 'नृणा' मिति साधारण्येन कथनात्तादृशानां पञ्चप्रश्नेषु सर्वात्मना कर्तव्यमध्य एवोक्तरीत्या चतुर्णां प्रवेशात् 'भजनीयं वा ब्रूहि' इति राजप्रश्नेन वैकल्पिकपक्षत्वाच्च भजनीयप्रश्नः साधारणोऽनुत्तरितोवशिष्यते, तमाह तमसाधारणत्वेनाहास्मिन् पद्य इति। एवञ्चावसरः प्रसङ्गो वात्र सङ्गतिरिति भावः। मूलस्थयोः स इति तमिति पदयोः पूर्वपरामर्शित्वात्पूर्वं च वपुषः सन्निवेशस्य चोक्तत्वात्तदन्यतरस्य भजनीयत्वव्युदासाय तदर्थं विवृण्वते य इति भजनीय इत्यन्तम्। तथा च पुलिङ्गेन वपुषः प्रतिबन्धात् सर्वेत्यादिविशेषणेन च सन्निवेशप्रतिबन्धा 'न्मुख्ये कार्यसंप्रत्यय' इति न्यायाच्च 'वैराजः पुरुषो योऽसौ भगवान् धारणाश्रय' इत्यत्र यच्छब्देन यः परामृष्टः, स एव तच्छब्दार्थ इत्यर्थः। अत्र ब्रह्माण्डे। श्रवणादिनेति। श्रवणकीर्तनस्मरणानां भक्तिलक्षणकयोगस्य च प्रस्तुतत्वात्तैरित्यर्थः। अन्यथा भजनीयत्वे तदुत्तरं पूर्वमेव वदेत्। भजनीय इति। पद्यफलितार्थकथनम्। तथा च 'भजनीयं ब्रूही' त्यनेन यः पृष्टः सोयमित्यर्थः। एतेन च पूर्वोत्तरार्धयोः सर्वधीवृत्त्यनुभूतसर्वत्वात् स एव भजनीय इति 'तं भजेत' इत्येवंरूपो हेतुहेतुमद्भावो ज्ञापितः। तमेवेत्येवकारश्च तुरीयचरणार्थसंग्राहको ज्ञेयः। अत इति। सर्वरूपत्वात् फलमपीत्यस्यैव विवरणम्। एतदित्यादि। विराडन्तर्वर्तिनो भगवतः सर्वेषां धीवृत्तिभिर्जन्यं सर्वानुभवं साधयितुं दृष्टान्तं व्युत्पादयन्ति तत्रेत्यादि। तथा च स्वराडस्मदाद्यात्माधिष्ठितेन्द्रियानुभूतसर्वः। अस्मदाद्यधिष्ठितसर्वेन्द्रियस्वामित्वात्। तत्तद्देवाधिष्ठितेन्द्रियस्यास्मदाद्यात्मवदित्यनुमानेन तथात्वसिद्धिरित्यर्थः। प्रतीत्यभावादिति। अस्मदादिदेहप्रतीत्यभावात्। तथा च स्वराड् नास्मदाद्यधिष्ठितेन्द्रियानुभूतसर्वः। समदृष्टित्वेनास्मदादिदेहप्रतीतिशून्यत्वात्। देहस्थितकीटप्रतीतिशून्यास्मदाद्यात्मवदिति। तथा च, स्वराट् न तथा। अस्मादादिदेहानभिमानित्वात्। परदेहानभिमानिपरात्मवदिति सत्प्रतिपक्षान्न तेन स्वराजस्तथात्वमित्यर्थः तत्राहेति। एवं दोषे प्राप्ते दृष्टान्तन्तरमाहेत्यर्थः। यथेति मूलस्थं देहलीदीपवद्युज्यते। स्वप्नजनानामीक्षिता इति। स्वप्नदृष्टजनानां शरीरेषु द्रष्टृत्वेन प्रतीयमानः स्वयम्। ननु स्वप्नस्य मायिकत्वेन तत्रत्यप्रतीतेरपि मायिकत्वेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमित्यतस्तदभावमुपपादयन्ति स्वप्नस्येत्यादि। स्वप्नस्य सन्ध्यसृष्टेः मायिकत्वेपि ज्ञानं तद्विषयकं न मायिकम्। तत्र हेतुः। तस्य स्वाप्नज्ञानस्य। आत्मरूपत्वात्। ज्योतिर्ब्राह्मणे 'आत्मज्योतिरेवाय' मिति प्रतिज्ञाय, 'अत्रायं स्वयञ्ज्योतिर्भवती' त्युपसंहारेण तस्यात्मरूपत्वबोधनं क्रियते यस्मात्। एतेन स्वप्नस्य स्मरणरूपत्वं वदन्तोपि प्रत्युक्ता वेदितव्याः। अस्मिञ्ज्योतिर्ब्राह्मणे स्वप्नस्य 'तस्मिन् सन्ध्ये स्थाने तिष्ठन्नुभे स्थाने पश्यती' ति स्थानत्वेन प्रयोगादिति। नन्वस्तु ज्ञानस्य सत्यत्वम्, तथापि स्वप्नस्य मायिकत्वेन तत्र प्रतीतस्येक्षितुर्मायिकत्वात्तदृष्टान्तेन कथं प्रकृतसिद्धिरित्यतस्तदुपपादयन्ति तत्रेत्यादि। तत्र स्वाप्ने ज्ञाने स्वप्नदृष्टाः पुरुषाः पश्यन्तीति प्रतीतिरस्ति, पुरुषादिप्रतीतिवत्, तन्निष्ठज्ञानविषयिण्यपि प्रतीतिरनुव्यवसाय इव जायते, तत्र स्वप्नदृष्टपुरुषनिष्ठज्ञानविषयिण्यां प्रतीतौ, पुरुषदेहानां मायिकत्वं न्यायसिद्धं 'मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वा' दिति सूत्रसिद्धम्। तथापि न्यायरीत्यापि तन्निष्ठा या प्रतीतिः पश्यन्तीत्याकारिका, सा न मायिकी, सूत्रे हि 'कार्त्स्न्येनानभिव्यक्तस्वरूपा' दिति हेतुरुक्तो मायिकत्वे। तथाऽनभिव्यक्तिश्च देहादेरेव, प्रतीतिस्तु ज्ञानत्वेन रूपेण कार्त्स्न्येनाभिव्यज्यत एवेति न मायिकी, आत्मरूपत्वाच्च न मायिकी। ननु सा प्रतीतिर्देहान्तर्निष्ठत्वेन प्रतीयते, तेषां च मायामात्रत्वेन तेषु चैतन्याभावादात्मरूपस्य दुर्घटत्वेन कथं न मायिकीत्यत आहुः तत्रेत्यादि। तत्र पुरुषाः पश्यन्तीति प्रतीतौ चैतन्यान्तराभावात् स्वप्नदृष्टपुरुषदेहानां मायिकत्वेन ऐन्द्रजालिकदेहेष्विव जीवान्तरस्याभावाद्भगवतो वा जीवस्य वा चैतन्यं भवतीति, भगवदात्मरूपा स्वप्नदृष्टजीवात्मरूपा वा सा भवतीति न मायिकीत्यर्थः ननु संभवत्येवम्, परं सन्दिग्धत्वेन निर्वक्तुमशक्यतया तस्या अपि कार्त्स्न्येनाभिव्यक्त्यभावान्नामायिकत्वं निश्चेतुं शक्यमित्यत आहुः स्वस्यापीत्यादि। स्वस्य स्वप्नद्रष्टुरपि तथाभिमानाभावे स्वाप्निकदेहेषु द्रष्टृत्वेन प्रतीतः मदात्मा न भवति, तद्देहाभिमानित्वात्, यस्य यद्देहानभिमानित्वम्, तस्य न तदात्मत्वम् मद्देहानभिमान्यात्मान्तरवदित्यनुमानेन द्रष्टृत्वाभावात् नापीन्द्रियाण्येव पश्यन्तीति शंक्यम्। इन्द्रियाणां गोलकाभावेन प्रदर्शनासामर्थ्यात्। 'पराञ्चि खानी'तिश्रुतेः पराचामिन्द्रियाणामन्तर्गोलकाभावेनानाधाराणां प्रदर्शनसामर्थ्याभावात्। न च स्वाप्नेन गोलकेन सामर्थ्यसिद्धिरिति शङ्क्यम्। स्वाप्नस्य च गोलकस्य मिथ्यात्वादेवं निवृत्ते जीवस्येन्द्रियाणां

च द्रष्टृत्वे भगवानेव पश्यतीति युक्त्याध्यवसीयते। तेषु तथा प्रतीतः अन्यो जीवात्मा न भवति, तदनभिमानित्वान्मदात्मवदित्यनुमानेन जीवमात्रनिवृत्तौ। तत्र तथा प्रतीतः स्वराडेव सर्वात्मत्वात्, यन्नैवं तन्नैवं मदात्मवदित्यनुमानरूपया परिशेषरूपया च युक्त्या निश्चीयते। तथा चैवं निरुक्ते द्रष्टरि तस्याः कार्त्स्न्याभिव्यक्तिसिद्ध्या मायिकत्वाभावान्न दृष्टान्तवैषम्यमित्यर्थः। ननु भगवाँश्चेत्पश्येत्, तदा स्वाप्नपुरुषवत् सोपि कथं न प्रतीयते, अतो नैवमित्यत आहुः निद्रेत्यादि। निद्रा हि रजःसहितस्य तमस उद्रेकात् प्रवर्तमानो बुद्धिवृत्तिविशेषः, तद्वशात्तेन भगवता सह तेषां भेदो न स्फुरति, यथा स्वाप्यये, उभयत्रापि तमोभिभवस्य तौल्यात्। तथा च तदप्रतीतिमात्रेण तस्या द्रष्टृत्वं न वक्तुं शक्यमतस्तत्र स एव प्रतीतिनिश्चयो निर्बाध इत्यर्थः। अत्र पूर्वदृष्टान्तस्यापि सङ्ग्रहाज्जीवस्य द्रष्टृत्वं न निषिध्यते, किन्तु भगवतोपि साध्यते इति बोध्यम्। एवमेकत्र स्वप्ने द्रष्टृत्वं भगवतः समर्थयित्वान्यत्राप्यतिदिशन्ति तथेत्यादि। अध्यवसायप्रकारस्तु व्याख्यात एव। तदेतल्लिङ्गमयन्ति तत इत्यादि। तत इति। परिशेषात्। नन्वस्तु द्रष्टा, तथापि साक्षित्वेन वा इन्द्रियैर्वेति विचारणीयम्, तत्र नाद्यः, प्रतिज्ञाविरोधात्प्रकृतानुपयोगाच्च। न द्वितीयः, करणसामग्र्यभावादतो नानेन प्रकृतसिद्धिरिति शङ्कायामाहुः तस्य चेत्यादि। तथा च 'नासत्यदस्रौ परमस्य नासे प्राणं च गन्ध' इत्यादिभिस्तस्य करणसामग्र्या उक्तत्वेन तत्करणेष्वस्मदिन्द्रियाणां श्लेषे स्वस्यैव करणसामग्र्या पश्यन्नस्मदिन्द्रियैः पश्यतीति न प्रतिज्ञाविरोधः, नापि प्रकृतानुपयोग इत्यर्थः। ननु लयवादिनां मते इन्द्रियाणां कारण एव लयोङ्गीक्रियते, 'इन्द्रियाणि स्वयोनिष्वि'ति पुराणवाक्येपि लयभावनायां तथाङ्गीकाराच्च, अतस्तदिन्द्रियेष्वस्मदिन्द्रियलयाभावादस्मदिन्द्रियैः पश्यतीत्यसङ्गतमित्याशङ्कायामाहुः कारणलयेत्यादि। किमत्रेन्द्रियकारणत्वेन विवक्षितम्, भूतानि वा मात्रा वा, भूतादिर्वा तैजसो वा। तत्र पुराणवाक्योक्तबहुवचनानुरोधादाद्यविकल्पद्वयोक्तान्यतराङ्गीकारे तु विषये लयो निर्विवादः। बहुवचनमनादृत्य तृतीयाङ्गीकारेपि तत्र सूक्ष्मरूपेण मात्रासद्भावात्तथा। अथ तुरीयोवशिष्यते, तत्र लयपक्षेपि वैकारिककार्ये मनसीवेन्द्रियकारणे तैजसेपि विक्षेपस्य रजोजन्यत्वेन वासनोत्पत्तेस्तौल्ये वासनया तत्र विषयसद्भावात् तेष्वेव लय इत्यर्थः। ननु कारणे लयपक्षेपि तेष्वेव लय इत्यत्र किं मानमिति शङ्कायामाहुः कारणस्येत्यादि। तस्य विक्षेपकत्वात्तदलये तत्र लीनानामिन्द्रियाणां विक्षेपेण विषयप्रकाशसंभवात्तस्यापि लयाङ्गीकारे उभयलयाङ्गीकारापातेन गौरवाच्च तथाङ्गीकार्यः। तथा च लाघवानुगृहीतं प्रकाशाभावप्रत्यक्षमेव विषयेष्विन्द्रियलये मानमित्यर्थः। ननु शास्त्रानुग्रहात्फलमुखमिदं गौरवं न दोषायेति चेत्तत्राहुः अन्यथेत्यादि। तैजसस्य लयाङ्गीकारे तत्र[1] निद्राव्यवधायकत्वाभावेन तस्याः निवृत्त्यसंभवात्पुनर्जागरणं कथं क्रियेत तामसवैकारिकयोरचञ्चलत्वेनाविक्षेपकत्वात्केन प्रकारेण क्रियेत, तथा च जागरणान्यथानुपपत्त्या तैजसस्य न लीनता, तदलये च विषयप्रकाशापत्तिरिति तदभावान्यथानुपपत्त्या विषय एव लयोङ्गीकार्य इत्यर्थः। ननु सुषुप्तावहंवित्तेरभावादहङ्कारलयः प्रत्यक्षानुभवसिद्ध इति तल्लयकृतं गौरवं न दोषायेत्यत आहुः अहङ्कार इत्यादि। सत्यं तल्लयोनुभवसिद्धः, परं सोहङ्कारो भिन्नः आत्माध्यासरूपः, न त्विन्द्रियजनक इति तेनानुभवेनैतस्य गौरवस्य प्रामाणिकत्वं नापादयितुं शक्यमित्यर्थः। ननु विवेचकस्याभावादहंवित्तौ सर्व एव भासन्ते इति सोनुभवः सर्वाहङ्कारलयबोधक इति न तस्य गौरवस्याप्रामाणिकत्वमित्यत आहुः तथा सतीत्यादि। विक्षेपस्य तस्यापि लये सति प्रलयदशायामिव सुषुप्तावपि पुनः सृष्ट्यभावादिन्द्रियाणि पुनर्नोत्पद्येरन्निति जागर एव स्यात्, जागरे वा ऐन्द्रियकज्ञानमेव न स्यात्, अतो जागरिताज्ञानानुरोधाद्विवेक आवश्यक इति तल्लयगौरवमप्रामाणिकमेवेत्यर्थः। न च कालस्य क्षोभकत्वात्तैजसोद्भवे पुनः सृष्ट्युपपत्तेस्तल्लयो नाप्रामाणिक इति वाच्यम्। तथा सत्येकस्य जागरेऽन्येषामपि जागरणप्रसङ्गात्, कालस्य साधारणत्वात्, अतस्तन्नियामकत्वेनास्य स्थितिरावश्यकी। इदमेव हृदि कृत्वाहुः अतो विषयेत्यादि। अत इति। कारणपक्षस्योक्तरीत्या दुष्टत्वाद्विषय एव लयो युक्त इत्यर्थः। न 'चेन्द्रियाणि स्वयोनिष्वि'ति भगवद्वाक्यविरोधः। तस्य प्रलयसामयिकदशाभावनविषयत्वेन स्वापविषयत्वात्। एतेन, बहिरिन्द्रियजन्यज्ञानं प्रति तत्तदिन्द्रियमनःसंयोगत्वेन जागरे कारणता, हितावच्छिन्नात्ममनःसंयोगत्वेन च स्वप्ने कारणतेत्येवं कार्यकारणभावद्वयमङ्गीकृत्य स्वप्नं साधयन्निन्द्रियलयमनङ्गीकुर्वन्तो नैयायिका अपि प्रत्युक्ताः। दृप्तबालाकिब्राह्मणे तदेषां प्राणानां विज्ञानेन विज्ञानमादायेत्यादिना श्रावितस्यार्थस्य विरोधात्। तत्रादानकथनेन प्राणशब्दवाच्येन्द्रियाणां स्वस्वस्थानत्यागबोधनात्तद्विध लोहितभृतासु नाडीषु लयबोधनादिति। सिद्धमाहुः अतः स्वप्नेत्यादि। प्रविष्टानीति। इन्द्रियभावेन संबद्धानि। तथा च स्वराट् अस्मदादिसर्वेन्द्रियवृत्तिभिः सर्वं भवति, अस्मदादिसर्वेन्द्रियाधिष्ठातृत्वात्, स्वाप्नसर्वदेहाद्यधिष्ठातृस्ववदित्यनुमानेन तथात्वसिद्धिरित्यर्थः। ननु स्वप्नेस्वप्नसृष्टेर्विषयत्वाद्भवतु द्रष्टृत्वम्, जाग्रति तु विषये प्रविष्टानामिन्द्रियाणां भगवदिन्द्रिये प्रविष्टत्वे स्वप्नावस्थायामिवेन्द्रियकोटिनिवेशेन विषयभावाभावात् दृश्याभावेन पूर्वोक्तद्रष्टृत्वं न सुघटम्। यदि च लयाभावादिन्द्रियकोटावनिवेशः, तदापि विषयतयैव संयुक्तानीति भगवतोस्मदिन्द्रियापेक्षापि नास्ति इति तदिन्द्रियकरणकं तस्य ज्ञानं भविष्यति, नत्वस्मदिन्द्रियकरणम् अतोपि तथात्वं दुर्घटमित्याकाङ्क्षायामाहुः अन्यथेति। स्वाप इवेन्द्रियाभावत्यागेन प्रवेशे विषयाभावान्न किमपि गृह्णीयादिति सत्यम्, परन्तु

१ तस्य पाठः।

जाग्रद्दशायां तैर्विषयग्रहणस्यानुभूयमानत्वेन तेषामिन्द्रियभावात्यागनिश्चयात्तेषामिन्द्रियत्वेनैव प्रवेश इति तान्यपीन्द्रियत्वेनैवाधितिष्ठति । एतावान् परं विशेषः, स्वप्ने तानि स्वेन्द्रियत्वेन गृह्णाति, जाग्रति तु परेन्द्रियत्वेनेति । एवं सति स्वप्ने स्वेन्द्रियैः स्वाप्नसृष्टिमस्मदाद्यात्मानं च पश्यति, जाग्रति तु अस्मदिन्द्रियाण्यस्मदात्मानं च । अस्मदिन्द्रियैस्तु स्वेन्द्रियरूपान् विषयानेव, न त्वस्मदात्मानमपि, परात्मनः परेन्द्रियावेद्यत्वादिति । तदेतदुक्तं तत्रेन्द्रियेत्यादिना । आत्मानमिति । अस्मदात्मानम् । इन्द्रियस्येति । स्वेन्द्रियरूपस्य विषयस्य । एकपदं विवृण्वन्ति स चेत्यादि । स्वप्नेत्यादि । स्वप्ने यथा स्वस्य स्वाप्नपुरुषदेहाद्यनभिमानित्वम्, तथा तत्तद्देहाद्यभिमानित्वेपि सर्वानभिमानित्वेन व्यावर्तकत्वादित्यर्थः । सिद्धमाहुः अत इत्यादि । तेनैवेति । स्वात्मतया ब्रह्माण्डपुरुषाभेदध्यानेनैव । ननु व्यावर्तकानां चेदव्यावर्तकत्वम्, तदा देहस्थितकीटेन्द्रियादिजन्यं ज्ञानमस्माकमपि स्यादित्यत आहुः देहेत्यादि । तथा च सर्वात्मभावे जाते ब्रह्मभावेनाभेदस्य भानाज्जीवत्वे वा निवृत्ते वामदेवशुकादिवत्स्यादेवेति न कोपि विवादलेश इत्यर्थः ॥ ३९ ॥

इति श्रीमद्द्वितीयस्कन्धसुबोधिनीप्रकाशे प्रथमाध्यायविवरणं सम्पूर्णम् ॥ १ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

ब्रह्म ब्राह्मणस्तस्याननं, भगवतो मुखद्वयं ब्राह्मणोऽग्निश्च, तत्राग्निः पूर्वमेव 'मुखमग्निरिद्धः' इत्युक्तः, अतएव भगवते यद्देयं तदुभयत्र दीयते । क्षत्रं क्षत्रियो रक्षकत्वाद्भुजा यस्यः सः । विड् वैश्यः व्यवहारनिर्वाहकत्वादूरू यस्य सः । अङ्घ्री श्रितः कृष्णवर्णः सेवाधर्मकः शूद्रो यस्य स एवंविधो महात्मा सर्वात्मा वैराजः । ब्राह्मणत्वादिनिर्णयस्तु 'यस्य यल्लक्षणं प्रोक्तम्' इत्यत्र सप्तमस्कन्धे स्फुटीभविष्यति । नानाभिधा नानानामका ये अभीज्या यष्टव्या वसुरुद्रादयो देवास्तेषां गणैरुपपन्नो युक्तो यो द्रव्यात्मको हविस्साध्यो वितानयोगो यज्ञादिप्रयोगः स तस्य कर्म आराधनतयाऽभिप्रेतमित्यर्थः ॥ ३७ ॥ ❀ ❀ इयानेतावान् असावीश्वरविग्रहस्य यः सन्निवेशोऽवयवसंस्थानरूपः स मया ते तुभ्यं कथितः । अस्मिन् स्थविष्ठे वपुषि योगिभिः स्वबुद्ध्या मनः सन्धार्यते । स्थविष्ठत्वमेव स्पष्टयति—यतो यस्मादीश्वरविग्रहाद्व्यतिरिक्तं वस्तु किञ्चिदपि नास्तीति ॥ ३८ ॥ ❀ ❀ तदेवं मनो हि स्वचाञ्चल्यवशाद्यत्र यत्र भ्रमति तत्र तत्रैव भगवत इदममुकमङ्गमिति बुद्ध्या विचारयेत् । एवं च मनसः स्वाभाविकाः सर्व एव विषया भगवदंशा एवेति सर्वमपि चिन्तनं भगवच्चिन्तनत्वेन पर्यवसयेत् तथाच स्पर्द्धावज्ञादयो मनोदोषा नैवोत्पद्येरन् स्पर्धादिदोषविषयाणां मनुष्यादीनामपि भगवदङ्गभूतत्वेन ध्येयमध्यपातित्वादित्येतदर्थं विराड्देहजीवेश्वराणामभेदेन स्थूलधारणोक्ता, अविशुद्धमनसः प्रथमतः सूक्ष्मधारणाया दुर्घटत्वाद् अनया धारणया मनसि विशुद्धे स्थैर्यं प्राप्ते च सति सच्चिदानन्दविग्रहः परमपुरुषार्थरूपो भगवानेव मुमुक्षुभिर्ध्येय इत्याह—तं सत्यमानन्दनिधिं भजेतेति । अन्यत्र देहापत्यकलत्रादौ स्थूलधारणावान्तरफलरूपास्वणिमादिसिद्धिषु च न सज्जेत । तदासक्तौ को दोष इत्यपेक्षायामाह—यत इति । यस्मादासङ्गादात्मनः स्वस्य संसारमध्ये पात एव भवति । न च भगवत उपासकप्रयत्नज्ञानमेव कथं येन तत्प्रसादेनोपासनस्य साफल्यं स्यादिति शङ्कनीयं, तस्य सर्वसाक्षित्वादित्याशयेनाह—स इति, सर्वेषां धीवृत्तिभिरनुभूतं सर्वं येन स तथाभूत इत्यर्थः । एकेन कथं तत्तदिन्द्रियैः सर्वानुभवः सम्भवतीत्यपेक्षायां दृष्टान्तेन तत्साधयति—आत्मेति । स्वप्ने कल्पितानां जनानामिन्द्रियैरेक एवात्मा जीव ईक्षिता यथा तथा भगवानपीत्यर्थः ॥ ३९ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता च द्वितीयेऽत्र तत्त्वध्याननिरूपणे । विवृतः प्रथमोध्यायः स्थूलध्याननिरूपकः ॥ ३ ॥

## हिन्दी अनुवाद

ब्राह्मण मुख, क्षत्रिय भुजाएँ, वैश्य जङ्घाएँ और शूद्र उन विराट् पुरुषके चरण हैं । विविध देवताओंके नाम से जो बड़े-बड़े द्रव्यमय यज्ञ किये जाते हैं, वे उनके कर्म हैं ॥ ३७ ॥ ❀ ❀ परीक्षित्! विराट् भगवानके स्थूल-शरीरका यही स्वरूप है, सो मैंने तुम्हें सुना दिया । इसीमें मुमुक्षु पुरुष बुद्धिके द्वारा मनको स्थिर करते हैं; क्योंकि इससे भिन्न और कोई वस्तु नहीं है ॥ ३८ ॥ ❀ ❀ जैसे स्वप्न देखनेवाला स्वप्नावस्थामें अपने-आपको ही विविध पदार्थोंके रूपमें देखता है, वैसे ही सबकी बुद्धि-वृत्तियों के द्वारा सब कुछ अनुभव करनेवाला सर्वान्तर्यामी परमात्मा भी एक ही है । उन सत्यस्वरूप आनन्दनिधि भगवान्का ही भजन करना चाहिये, अन्य किसी भी वस्तुमें आसक्ति नहीं करनी चाहिये; क्योंकि यह आसक्ति जीवनके अधःपतनका हेतु है ॥ ३९ ॥

**पहला अध्याय समाप्त**

# अथ द्वितीयोऽध्यायः

## श्रीशुक उवाच

एवं पुरा धारणयाऽऽत्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् ।
तथा ससर्जेदममोघदृष्टिर्यथा[1]प्ययात् प्राग् व्यवसायबुद्धिः ॥ १ ॥
शा[2]ब्दस्य हि ब्रह्मण एष पन्था यन्नामभिर्ध्यायति धीरपार्थैः ।
परिभ्रमंस्तत्र न विन्दतेऽर्थान् मायामये वासनया शयानः ॥ २ ॥
अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः ।
सिद्धेऽन्यथार्थे न यतेत तत्र परिश्रमं तत्र[3] समीक्षमाणः ॥ ३ ॥
सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्व[4]सिद्धे ह्युपबर्हणैः किम् ।
सत्यञ्जलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः ॥ ४ ॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

द्वितीये तु ततः स्थूलाधारणातो जितं मनः । सर्वसाक्षिणि सर्वेशे विष्णौ धार्यमितीर्यते ॥ १ ॥
दृश्यालंबनरूपैव मुक्तवैराजधारणा ॥ इहोच्यते तु तत्साध्या सर्वांतर्यामिधारणा ॥ २ ॥

तत्र तावत्पूर्वोक्तधारणाया अवांतरफलमाह । एवं या धारणा तया तुष्टाद्धरेः पुरा प्रलयसमये नष्टां सृष्टिस्मृतिं प्रत्यवरुद्ध्य लब्ध्वा ब्रह्मा अप्ययात्प्रागिदं विश्वं यथाऽऽसीत्तथा ससर्ज । व्यवसायात्मिका बुद्धिर्यस्य सः । अत एवामोघा दृष्टिर्यस्येति । अतस्तया धारणया विश्वसृष्टिसामर्थ्यं भवति ॥ १ ॥ ❀ ❀ उपासनाफलादपि विरक्तस्य शुद्धात्मधारणायामधिकारोऽतो वैराग्यार्थं सर्वं कर्मफलं निंदति । शाब्दं शब्दमयं ब्रह्म वेदः तस्य एष पंथाः कर्मफलबोधप्रकारः । कोऽसौ अर्थशून्यैरेव स्वर्गादिनामभिः साधकस्य धीर्ध्यायति तत्तदिच्छां करोतीति यत् । अपार्थत्वमेवाह । तत्र मायामये पथि सुखमिति वासनया शयानः स्वप्नान्पश्यन्निव परिभ्रमन्नर्थान्न विंदति तत्तल्लोकं प्राप्तोऽपि निरवद्यं सुखं न लभत इत्यर्थः ॥ २ ॥ ❀ ❀ तर्हि सर्वथा कर्मफलत्यागे सद्य एव देहपातः स्यादित्याशंक्याह । अतः कविर्नामसु नाममात्रेषु भोग्येषु यावताऽर्थेनार्थो देहनिर्वाहो यस्य स तथाभूतः स्यात् । अप्रमत्तस्तावन्मात्रेप्यनासक्तः व्यसाय-बुद्धिर्नेदं सुखमिति निश्चयवान् तदापि तत्र तस्मिन्नर्थेऽन्यथैव सिद्धे सति तत्र यत्ने परिश्रमं पश्यन्न यतेत ॥ ३ ॥ ❀ ❀ अन्यथासिद्धिमाह द्वाभ्याम् । सत्यामिति । कशिपोः शय्यायाः । स्वतः सिद्धबाहौ सति उपबर्हणैरुच्छीर्षकैः । पुरुधा बहुप्रकारया-ऽन्नपात्र्या भोजनपात्रेण ॥ ४ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

ततः पूर्वोक्तायाः ॥ १ ॥ तया वैराजधारणया साध्या ॥ २ ॥ तत्र धारणाद्वयमध्ये अवांतरमानुषंगिकम् । व्यवसाये भगवत्प्रेरणावशात्स्रक्ष्याम्येवेति निश्चये बुद्धिर्यस्य सः । यद्वा । व्यवसायो निश्चय एवमेतत्स्रष्टव्यमित्येवं तदात्मिका निश्चिता बुद्धिर्यस्य स तथा । अत एव व्यवसायबुद्धित्वादेव अमोघा सफला अतः सफलदृष्टित्वात् ॥ १ ॥ ❀ ❀ इत्यर्थ इति "एवं पुण्यचितो लोकः क्षीयते" इति श्रुतेः क्षयिष्णुत्वोक्तेरिति भावः । अत्र विश्वनाथोऽवतरणिकामाह । अत्र म्रियमाणः किं कुर्वीतेति प्रश्ने स्वर्गसाधकं यागादिकं कुर्वीतात्र सर्वो वेदः प्रमाणमित्याचिख्यासूंस्तत्र कांश्चन प्रत्याह । शाब्दस्येति ॥ २ ॥ ❀ ❀ अत्राक्षिपति तर्हीति । अर्थे देहनिर्वाहे अत्र विश्वनाथः—एवं योगप्रसंगं एव कर्मिणां मतमतिबहिरंगत्वेन स्पष्टमेव विनिंद्य कर्मफलेषु वैराग्यं भक्तज्ञानिनोरपि साधारणम् । योगारूढानामवश्यकर्त्तव्यत्वेनाह । अतो बुद्धिमान्भोगार्थं न ध्यायेत् न यतेत च । किंतु । 'कामस्य नेंद्रियप्रीतिर्लाभो जीवेत यावता' इत्युक्तन्यायेन नामसु भोग्यवस्तुषु यावताऽर्थेन स्वीकृतेनार्थः । स्वकृत्यनिष्पत्त्यर्थं देहनिर्वाहस्तावानर्थो ग्राह्यो तस्य तथाभूतः स्यात् । यतोऽयमप्रमत्तः स्वसाधनसिद्धौ सावधानः । किञ्च विघ्नबाहुल्यदर्शनेपि स्वयोगान्न

---

१ प्रा. पा. यथाश्रयात्प्राग् । २ प्रा. पा. शब्दस्य । ३ प्रा. पा. त्वत्र । ४ प्रा. पा. बाहौ च सिद्धे ।

परावर्त्तेतेत्याह। व्यवसायबुद्धिः यद्भवेत्तद्भवतु मया तु यन्निश्चितं तन्निश्चितमेवेति दृढविचार इत्यर्थः। किञ्च। यावदर्थतापि सुकुमारस्यैवोक्ता न तु स्वतः समर्थस्येत्याह अन्यथा प्रकारांतरेणार्थे स्वदेहनिर्वाहे सिद्धे सति तत्र पिष्टपेषणन्यायेन न यतेत। यतस्तत्र यत्ने परिश्रमं धनिकजनोपासनादिकम् ॥ ३ ॥ ❀ ❀ समर्थस्यान्यथासिद्धिमाह—सत्यामिति। देवनिर्मितायां क्षितौ सत्याम्। बाहौ भुजे। उच्छीर्षकैः शिरःपीठैः ॥ ४ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या।

निरवद्यम् इति। ऐकान्तिकात्यन्तिकलक्षणमित्यर्थः। तत्रैकान्तिकत्वं दुःखनिवृत्तेरवश्यम्भावः आत्यन्तिकत्वं नाम निवृत्तस्य दुःखस्य पुनरनुत्पाद इति ॥ २ ॥ ❀ ❀ कविरिति। धीर इत्यर्थः ॥ ३—५ ॥

### श्रीमद्वीरराघवव्याख्या

एवं वैराजधारणामुक्त्वा मुमुक्षोर्हृदये उपास्यन्तदुपासनानिष्ठस्यार्चिरादिना गतिञ्च वक्ष्यन्नुक्ताया वैराजधारणाया एव तावन्माहात्म्यमाह मुनिः। एवमिति एवं या धारणा तया तुष्टाद्धरेः पुराप्रलयसमये नष्टां पूर्वकल्पे चतुर्मुखेन सह विनष्टां स्मृतिं सर्गविषयकज्ञानं प्रत्यवरुध्य लब्ध्वा व्यवसायबुद्धिः स्मृतिविषयव्यवसायरूपज्ञानः अतएवामोघदृष्टिरमोघा यथावस्थिता दृष्टिस्तत्तद्वस्तुविषयज्ञानं यस्य स तथोक्तः आत्मयोनिश्चतुर्मुखः अप्ययात्प्रलयात्प्राग्यथातथा ससर्ज। पूर्वकल्पपदार्थसजातीयानेव पदार्थान्ससर्जेत्यर्थः अत्र यद्यपि पूर्वकल्पे विनष्टां स्मृतिं परिलभ्येत्यनेन पूर्वकल्पे यश्चतुर्मुखः स एवास्मिन्कल्पेपि प्रतीयते। तथापि प्रतिकल्पं चतुर्मुखानां भेद एव न्याय्यः तत्तत्कल्पचतुर्मुखस्य ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे ते ब्रह्मलोके तु परां न काले पराभृतात्परिमुच्यन्ति सर्वे इतिमुक्त्यवगमेन पुनरावृत्त्यसम्भवाद्भगवत्पूर्णकृपापात्रस्य पुनः संसारायोगाच्च। तथाहि वक्ष्यति भगवान् ऋषिमाद्यं न बध्नाति पापीयांस्त्वां रजोगुणः नात्मावसीदत्यस्मिंस्तेवर्षीयान्मदनुग्रह इति अतः प्रतिकल्पं विभिन्ना एव चतुर्मुखाः अतएव यद्यपि पूर्वानुभूतवस्तुविषयकज्ञानपरः स्मृतिशब्दः तथापीह सर्गविषयकज्ञानमात्रपरः स्मृतिशब्दप्रयोगस्तु ज्ञातृज्ञेयज्ञानानामत्यंतसाजात्याभिप्रायकृतः पूर्वदृष्टात्यन्तसजातीये गवान्तरे स एवायं गौरिति प्रत्यभिज्ञावत्। ननु वैराजधारणया विश्वसृष्टिसामर्थ्ये विश्वसृष्टौ च सत्यां सृष्टानां पातालादीनां वैराजपादतलादिरूपेण धारणेतीतरेतराश्रयवदाभाति न च स्रक्ष्यमाणपदार्थविषयकज्ञानसद्भावेन पातालादीनामवयवत्वकल्पनं युक्तं स्मृतिं प्रत्यवरुद्धेदित्यनेन ज्ञानस्यापि धारणातो लभ्यत्वावगमात्सत्यं भगवन्नाभिकमलाच्चतुर्मुखे उत्पन्ने तपश्चर्यया भगवति प्रसन्ने भूयस्त्वं तप आतिष्ठ विद्याञ्चैव मदाश्रयां नाभ्यामंतर्हृदि ब्रह्मन् लोकान् द्रक्ष्यस्यपावृतान्। तत आत्मनि लोके च भक्तियुक्तः समाहितः द्रष्टासि मां ततं ब्रह्मन्मयि लोकास्त्वमात्मन इति वक्ष्यमाणरीत्या स्रक्ष्यमाणेषु सर्वेषु पदार्थेषु दृष्टेषु तेषां च पदार्थानां भगवदवयत्वेन धारणया सृष्टिविषयज्ञानसृष्टिसामर्थ्यलाभस्यात्राभिधानात्। दैनन्दिनकल्पाभिप्रायं वा एवं प्रपञ्चशरीरकतदाश्रयभगवद्ध्यानाद् ब्रह्मणः सृष्टिक्षमत्वलाभ उक्तः ॥ १ ॥ ❀ ❀ अथ मुमुक्षुभिर्हृदि उपास्यं रूपं वक्ष्यन् यावानर्थ उदपाने सर्वतः संप्लुतोदके इति न्यायेन वेदे मुमुक्षोः साकल्येनार्थानुपादेयत्वमाह। शाब्दस्येति शाब्दस्य शब्दात्मकस्य ब्रह्मणो वेदस्यैष पंथा एषा दिक्। क इत्यत आह—यदिति अपार्थैरपगतपरमपुरुषार्थैः नामभिः स्वर्गादिविषयशब्दैः धीर्बुद्धिर्ध्यायति चिन्ताङ्करोतीति यत्स्वर्गादिफले श्रुते तत्र धीः। प्रवणस्यादित्यर्थः। नाम्नां सारवत्त्वं न स्वरूपत इति द्योतनार्थं नामपदप्रयोगः तृतीया चाध्ययनेन वसतीत्यादिवद्धेत्वर्थे नाममात्रसारभूतस्वर्गाद्यर्थकर्मणि बुद्धिप्रावण्यापादनमिति यदयं वेदमार्ग इत्यर्थः स्वर्गादीनामपार्थत्वमेवाह परिभ्रमन्निति मायामये प्रपञ्चे वासनयानादिकर्मवासनया शयानो वर्त्तमानः तत्र स्वर्गादिविषये परिभ्रमन्नर्थान्मोक्षतदुपायादीन्न विंदते न लभते ॥ २ ॥ ❀ ❀ ननु मातापितृसहस्रेभ्योपि वत्सलतमो वेद आत्मोज्जीवने प्रवृत्तः कथं नाममात्रसारभूतस्वर्गाद्यर्थकर्मबोधयन्प्रतारयेदित्याशङ्क्यां परिहरन्मुमुक्षोरपेक्षितांशस्योपादेयतामाह। अत इति अतः वेदोक्तस्य साकल्येनानुपादेयत्वात्कविःत्याज्योपादेय विषय विवेकवाननेनोक्ता शंका परिवृता भेदो हि तमःप्रचुराणां रजःप्रचुराणां सत्वप्रचुराणां च लोकानां वत्सलतयैव हितमवबोधयति यद्येषां स्वगुणानुगुण्येन स्वर्गादि साधनमेव हितं नावबोधयेत्तदा एते रजस्तमःप्रचुरतया सात्विकफलमोक्षविमुखाः स्वपेक्षितफलमजानन्तः कामप्रावण्यवशा अनुपाये उपायभ्रान्त्या प्रनष्टा भवेयुरिति गुणत्रयप्रचुराणां स्वर्गादिफलानि तत्साधनानि चावबोधयति। केवलसात्विकस्य तु मुमुक्षोस्तानि परित्याज्यानि परिगृहीतानि वा तत्फलानि परित्यज्य सर्वाणि कर्माणि मोक्षैकफलतयानुष्ठेयानीति विवेकसम्पन्नः अप्रमत्तः कदाचिद्देहधारणाद्यर्थतया परिग्राह्येष्वप्यन्नपश्वादिष्वनासक्तः व्यवसायबुद्धिःस्वर्गादीनां क्षयिष्णुत्वसातिशयत्वनिश्चयात्मकज्ञानवान्नामसु नाममात्रसारभूतेषु भोगेषु यावदर्थः स्यात्। यावत्प्रयोजनवान् स्यात्। न तु प्रयोजनाभासेषु रतः स्यादित्यर्थः। नानाविधेषु फलेषु तत्साधनभूतेषु बहुषु कर्मसु वेदबोधितेषु सत्स्वपि यावता देहधारणमुपासनानिर्वृतिश्च भवति तावत्परिग्रहवान्स्यादित्यर्थः देहधारणार्थं क्षुद्रफलेष्वपि यतितव्यमित्यत आह। सिद्ध इति अर्थेऽपेक्षितेऽर्थेऽन्यथा पूर्वकर्मानुरूपे सिद्धे सति तत्तत्क्षुद्रफलतदुपायादिष्वपि न यतेत कथम्भूतो न यतेत तत्र यत्ने क्रियमाणे परिश्रमं समीक्षमाणः भवितव्यमेव भवति। परिश्रमस्तु फलति इत्यर्थः ॥ ३ ॥ ❀ ❀ अन्यथासिद्धिं विवृणोति सत्यामित्यादिना द्वयेन क्षितौ सत्यां कशिपोः शय्यायाः पर्यंकादेः प्रयासैस्तदर्जनानुकूलप्रयत्नैः किं न किमपि। किंतु परिश्रम एवेत्यर्थः। स्वतः सिद्धे

बाहौ सत्युपबर्हणैः किं अञ्जलौ सति पुरुधान्नपात्र्या नानाविषये भोजनपात्रेण किं उपधानैः दिक्वल्कलादौ सति दिक्षूत्तरीयस्थानीयासु सतीषु वल्कलेषु अन्तरीयस्थानीयेषु सत्सु न तु वल्कलाभावे दिक्षु सतीष्वित्यर्थः स्वरसः अपवित्रकरो नग्न इति नग्नस्य कर्मानर्हत्वस्मरणान्मुमुक्षोरप्यावश्यकानामनुष्ठेयत्वाद् दुकुलैः क्षौमैः किम् ॥ ४ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

एवं वैराजाख्यस्थूलरूपस्य धारणाश्रयत्वमुक्त्वाऽस्मिन्नध्याये तत्तद्धृदयकमलकर्णिकान्तर्वर्त्तिनो हरेरात्माख्यरूपस्य धारणाविषयत्वं तदुपासकानां फलं चोपदिशति । तत्र प्रथमतो धारणायां क्षिप्रप्रवृत्तये कुत्र कस्य दृष्टफलेयं धारणेति शङ्काशंकुमुन्मूलयन्ब्रूहि यद्वा विपर्ययमिति प्रश्नं परिहरति एवमित्यादिना आत्मा परमात्मा योनिः कारणं यस्य स तथा स ब्रह्मा पुरा आदिसृष्टौ कालेन नष्टान्तिरोहितां प्राक्कल्पविषयां स्मृतिमेव । मुक्तधारणया प्रत्यवरुद्धवांऽकुरीकृत्य प्रतिलभ्य तुष्यन्नलंबुद्धिं गच्छन् व्यवसाये जगत्सर्जनलक्षणोद्योगे बुद्धिर्यस्य स तथा तत एव धारणाया एवामोघदृष्टिः अप्ययात्प्रलयात्पूर्वं यथाऽवस्थितं तथेदं जगत्ससर्जेत्यन्वयः ब्रह्मणो दृष्टफलत्वादियं विश्वसनीयेति विज्ञायते ॥ १ ॥ ❀ ❀ वाङ्मनोऽगोचरस्य कथं धारणावलंबनत्वमत्राह शाब्दस्येति । उक्तप्रकारेण श्रोतव्यादित्वेन विपश्चितां संमतत्वात्स्वतन्त्रत्वात् ब्रह्मादिसर्वजगत्स्रष्टृत्वात्सर्वांतःस्थितत्वात्सर्वस्य तदधीनत्वात्सर्वगुणसम्पूर्णत्वाच्च शब्दस्य ब्रह्मणो वेदादिसर्वशब्दराशेरेष हरिःपन्था विषयो मुख्यवाच्य इत्यन्वयः । इन्द्रादिनाम्नां पुरन्दरादिष्वेव रूढत्वात् हरेस्तन्नामवाच्यत्वे रूढेः काप्यप्रयोजकत्वमत्राह यन्नामभिरिति मायामय ईश्वरेच्छानिर्मितत्वात्तदधीने संसारे शयानः परिभ्रमन्किमप्यजानन्वर्तमानो स एव वासनया नानाकर्मवासनया नानायोनिषु परिभ्रमन्यो जीवस्तस्य धीर्यत्पुरन्दरादिकमिन्द्रादिनामभिर्ध्यायति तत्र पुरन्दरादावर्थादिन्द्रादिनामनुपहतपरमैश्वर्यादिलक्षणान्न विन्दते अलम्बुद्धिन्न प्राप्नोति किञ्च तदुपास्त्यातेभ्यः पुरुषार्थांश्च न लभते । कुत इत्यत उक्तं अपार्थैरिति तत्रैश्वर्याद्यर्थानामसम्भवात् अतो हरिरेव परमैश्वर्यादिगुणाकारत्वेनाभिधेय इति स एव स्मर्तव्य इति अन्यत्सर्वमस्मर्तव्यं प्राधान्येनेति भावः । अनुपसर्गेपि क्विप प्रत्ययविधानाद्ध्यायतीनिधीर्ज्ञानाश्रयः पुरुषो वा यदित्यस्याव्ययत्वेनापार्थैरित्यनेन संयोज्य यदपार्थैर्येस्मिन्पुरन्दरादावपार्थैरिन्द्रादिनामभिः पुरन्दरादिकन्ध्यायति तत्र पुरन्दरादाविति वा सर्वनामा यतो विष्णुस्तदन्यार्थान्न तु स्मरेदिति स्मृतिप्रसिद्धिं हि शब्देनाह ॥ २ ॥ ❀ ❀ सर्वशब्दानां विष्ण्वैकविषयत्वे विदुषामभिवादनादिसर्वव्यवहारोच्छेदप्रसंग इति तत्राह अत इति एवं सर्वनामार्थतयाह हरिरेव ध्येयस्तद्व्यवहार्यश्च यतोऽतः कविः सर्वज्ञः । अप्रमत्तो जागरणशीलो नाम्नां हरिविषयत्वमविस्मरन्नित्यर्थ अतएव व्यवसायबुद्धिर्निश्चयबुद्धिर्नामसु हरीतरविषयेषु घटादिषु अभिवादनादिना यावदर्थः स्वप्रोजनं यस्य स तथा स्यात् । नातोधिकप्रयोजन इत्यर्थः अन्यथा घटादिलोकविषयव्यवहारमन्तरेणार्थे स्वप्रयोजने सिद्धे स्वयमेव सम्पन्नो न तत्र यतेतेत्यन्वयः कुतोत्राह तत् तदिति तत्तत्पदार्थेषु तत्तत्परिश्रममर्थपूर्त्यभावेन मनःक्लेशं समीक्षमाण इत्यन्वयः ॥ ३ ॥ ❀ ❀ इदानीं स्वतःसिद्धिप्रकारं दर्शयति सत्यामिति । देवनिर्मितायां क्षितौ सत्याङ्कशिपोः शय्यायाः सम्पादने प्रयासैः किं न किमपि प्रयोजनम् । शरीरयात्रानिर्वाहस्य द्रव्यान्तरेण सिद्धत्वादिति भावः । बाहौ स्वसिद्धे स्वतोऽनायासेन सम्पन्ने सति उपबर्हणैः शिरःपीठैरुच्छीर्षकैः किम् । कराञ्जलौ सति पुरुभिर्विस्तीर्णैः पर्णपात्रैः किं बर्हं पर्णं दलं पत्रमित्यभिधानं दिशामेव वस्त्राणां लाभे सति दुकूलैर्निष्कापाद्यक्षौमादिवसनैः किम् ॥ ४ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

॥ १ ॥ ❀ ❀ शाब्दस्येति । यत् यस्मात् यं श्रुत्वेत्यर्थः ॥ २—५ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

द्वितीये चिद्घनवपुर्धारणासिद्धयोगिनः । देहं जिहासोः सायुज्यप्राप्तावुक्तं श्रुतिद्वयम् ॥
भगवत्त्वमिहारोप्य दृश्यप्राकृतवस्तुषु । धारणोक्ताथ तत्साध्या भगवद्धारणोच्यते ॥

उक्तलक्षणधारणाया अवान्तरफलमाह । प्रत्यवरुध्य प्राप्य तुष्टात् परमेश्वरात् । अप्ययात् प्रलयात् प्राक् इदं विश्वं यथासीत् तथा ससर्ज । व्यवसायं भगवत्प्रेरणावशात् स्रक्ष्याम्येवेति निश्चये बुद्धिर्यस्य सः ॥ १ ॥ ❀ ❀ अत्र म्रियमाणः किं कुर्वीतेति प्रश्नं स्वर्गसाधनं यागादिकं कर्मैव कुर्वीतात्र वेदः सर्व एव प्रमाणमित्याचिख्यासूंस्तत्र कांश्चन प्रत्त्याह । शाब्दं शब्दमयं ब्रह्म वेदस्तस्य एष पन्थाः । कोऽसौ यन्नामभिः नाममात्रैरेव स्वर्गादिभिः धीः साधकस्य बुद्धिः ध्यायति स्वर्गे सुखमेव प्राप्स्यामीति विचारयति वृथैव । यतोऽपार्थैः अपार्थत्वमेवाह मायामये तत्र स्वर्गादौ सुखमिति वासनया शयानः स्वप्नान् पश्यन्निव परिभ्रमन् अर्थात् न विन्दति तत्तल्लोकं प्राप्तोऽपि क्षयिष्णुत्वान्निरवद्यं सुखं न लभते इत्यर्थः ॥ २ ॥ ❀ ❀ एवं योगप्रसङ्गे एव कर्मिणां मतम् अतिबहिरङ्गत्वेन स्पष्टमेव विनिन्द्य कर्मफलेषु वैराग्यं भक्तज्ञानिनोरपि साधारणं योगारूढानाम-वश्यकर्त्तव्यत्वमाह । अतो बुद्धिमान् भोगार्थं न ध्यायेत् न यतेत च । किन्तु कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता इत्युक्तन्यायेन नामसु

भोग्यवस्तुषु यावता अर्थेन स्वीकृतेन अर्थः स्वकृत्यनिष्पत्त्यर्थं देहनिर्वाहस्तावानेवार्थो ग्राह्यो यस्य तथाभूतः स्यात् । यतोऽयम् अप्रमत्तः स्वसाधनसिद्धो सावधानः । किञ्च विघ्नबाहुल्यदर्शनेऽपि स्वयोगान्न परावर्त्तेतेत्याह । व्यवसायबुद्धिः यद्भवेत् तद्भवतु मया तु यन्निश्चितं तन्निश्चितमेवेति दृढविचार इत्यर्थः । किञ्च यावदर्थतापि कस्यचिदतिसुकुमारस्यैवोक्ता न तु स्वतः समर्थस्येत्याह । अन्यथा प्रकारान्तरेण अर्थे स्वदेहनिर्वाहे सिद्धे सति तत्र पिष्टपेषन्यायेन न यतेत । यतः तत्र यत्ने परिश्रमं धनिकजनोपासनादिकम् ॥ ३ ॥ ❀ ❀ समर्थस्यान्यथासिद्धिमाह सत्यामिति । कशिपोः शय्यायाः । बाहौ स्वसिद्धे स्वतःसिद्धे सति उपबर्हणैः उच्छीर्षकैः पुरुधा पुरुः बहुः प्रकारे धा अन्नपात्र्या भोजनपात्रेण ॥ ४ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पूर्वाध्याये साधनरूपा स्थूलविग्रहवतो वैराजस्य भगवतो धारणोक्तेदानीं तत्साध्यरूपां सर्वांतर्यामिणो भक्तेच्छयाविष्कृताप्राकृतशरीरस्य धारणां वक्ष्यन्पूर्वोक्ताया धारणाया अवांतरफलमाह एवमिति । एवमुक्तलक्षणया धारणया तुष्टाद् वैराजात्पुरा प्रलयवेलायां नष्टां सृष्टिस्मृतिं प्रत्यवरुध्य पूर्वप्रजातुल्याया उत्तरप्रजाया रचनार्हां पुनः प्राप्य अतएवाऽमोघादृष्टिर्यस्य सः अतएव व्यवसायबुद्धिः आत्मयोनिर्भगवत्पुत्रः ब्रह्मा अप्ययात्प्रलयात्प्रागिदं विश्वं यथासीत्तथा तादृशमेव ससर्ज "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्" इति श्रुतेः ननु पूर्वसृष्टिकर्तुर्ब्रह्मणः "ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदम्" इति वचनादात्मयोनेर्मुक्तत्वादिदं नोपपद्यत इति चेन्न सर्वेषां चतुर्मुखानामेकैकेन जन्मनाऽपुनरावृत्तिवाच्याभावात् । न च वाच्यं प्रतिकल्पसृष्टिविषयकस्मृतिं प्राप्नोतीति तत्र स्मृतिनाशासंभवात् ॥ १ ॥ ❀ ❀ ननु नानोद्यमेषु क्लिश्यमानोपि जनः किंचिदपि यथेष्टं सुखं न प्राप्नोति यद्धारणया विश्वसृष्टिसामर्थ्यं भवति तस्य भगवतः सुखसाध्ये महाफले पथि कुतो न प्रवर्त्तते इत्यत्राह शाब्दस्येति शाब्दस्य "वेदैश्चसर्वैरहमेव वेद्यः" इति स्मृतेः सर्वे वेदा यत्पदमामनंतीति श्रुतेश्च वेदैकप्रमाणकस्य ब्रह्मणः एष पंथाः तस्य न भवति कस्य यत् यस्य बुद्धिः अपार्थैः पुरुषार्थवर्जितैः नामभिर्नामेतिरूपस्याप्युपलक्षणं तथाचनामरूपैरित्यर्थः अध्ययनेन वसतीतिवत्तृतीयाहेत्वर्थे हेतुभूतैः दाराऽपत्यादिभिः ध्यायति अतएव मायामये प्राकृते लोके वासनया शयानः परिभ्रमन् तत्र मायामये तानर्थान्स्वकर्मानुरूपान्दारापत्यादीन्विंदते न तु योगसिद्धिमित्यर्थः ॥ २ ॥ ❀ ❀ एवं बद्धजीवस्वभावमुक्त्वा वक्ष्यमाणधारणाया अधिकारिणं मुमुक्षुं प्रति रहस्यमुपदिशति भगवान् शुकः । अत इति पञ्चभिः अतो बद्धस्य विवेकिनो नामरूपासक्त्या योगेऽधिकाराभावाद्धेतोः कविः क्रांतदर्शी हेयोपादेयविवेकवान् । व्यवसायबुद्धिः सर्वं परित्यागपूर्वकं हरिभजनं कर्तव्यमिति निश्चयवान् मुमुक्षुःनामसु नामरूपेषु भगवद्ध्यानयोगे उक्तरीत्याऽनधिकारापादकेषु यावदर्थ एव स्यात् । भोजनाच्छादनादिरूपो हरिसेवार्थं देहधारणार्थकोऽर्थो यस्य तथाभूतः स्यात् । भोजनाच्छादनादिनिर्वाहकेषु नामरूपेष्वप्यप्रमत्तोऽनासक्तः तावन्मात्रेऽप्यर्थेऽन्यथासिद्धे भूयो न यतेत तत्र यत्ने परिश्रमं समीक्षमाणः ॥ ३ ॥ ❀ ❀ सिद्धेऽन्यथार्थे इत्येतद्विवृणोति सत्यामिति द्वयेन क्षितौ पृथिव्यां कशिपोः शय्यायाः पर्यंकादेःप्रयासैः प्रयत्नैः किं ? न किमपि । स्वतः सिद्धे बाहौ सति उपबर्हणैः शिरोपधानैः किम् ? अञ्जलौ सति उरुधा बहुविधया अन्नपात्र्या किम् ? दिग्वल्कलादाविति वल्कलादौ सति तदभावे दिक्षु सतीष्वित्यर्थः । तच्चात्यंतत्यागिमुमुक्षुविषयम् अतएवोक्तं शुकलक्षणं दिगंबरमिति । "अपवित्रकरो नग्न" इत्यादिवाक्यं तु केवलकर्मविषयम् आदिना वस्त्रखंडादिपरिग्रहः बहुयत्नसाध्यैर्दुकूलैः किम् ॥ ४ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

मानमेयविनिर्द्धारस्तत्त्वार्थं विनिरूपितः । फलसाधननिर्द्धारो द्वितीये विनिरूप्यते ॥ १ ॥
द्विविधस्तत्त्वनिर्देशो बाह्याभ्यन्तरभेदतः । बाह्यो निरूपितस्तत्र मानमेयपुरस्सरम् ॥ २ ॥
आन्तरं भिन्नमार्गेण फलसाधनबोधतः, अतः साधननिर्द्धारः प्रथमं क्रियते स्फुटः । पश्चात्फलस्य निर्द्धारस्ततस्तत्त्वं फलिष्यति ॥ ३ ॥

एवं पूर्वाध्याये सर्वेषां वस्तूनां प्रमाणतः प्रमेयतश्च तत्त्वं निर्द्धारितम् । भिन्नतया प्रतीतानामपि भगवति प्रवेशाद्भगवतो द्रष्टृत्वाच्च प्रसङ्गाद्भगवतः साधनत्वं फलत्वं चोक्तम् । तथापि बाह्यत्वान्न तयोस्तत्त्वनिर्द्धारः इदानीं सर्वेषां केन रूपेण साधनता केन रूपेण च फलतेति विचार्यते । तत्र त्यागविषयत्वेन साधनता अवान्तरफलत्वेन च फलतेति सर्वपरित्यागेन जीवस्वरूपस्य साधनत्वं ब्रह्मस्वरूपस्य च फलत्वं निर्द्धारितं भविष्यति । तत्र पूर्वोक्तफलस्य साधनस्य वा प्रकृतोपयोगं वक्तुं वैराग्यशेषत्वेन तदुपयोगमाह—एवं पुरेति । तथा सामर्थ्यं फलमिति केचित् । तद्ब्रह्मणः स्वतः सिद्धत्वात् नष्टस्मृतेः प्रत्यवरोधवचनाच्च विचारणीयम् । नष्टपदेन च सर्वथा नाशे पुनस्तुष्टेन भगवता तत्सम्पादने तोषहेतुत्वमेव भवेत् न तु सामर्थ्यहेतुत्वमपि । अन्यथा सिद्धत्वात् । अत्र तु पूर्वविस्मृतोद्बोधहेतुत्वे दृढवैराग्यहेतुत्वं भगवत्तोषे वा सर्वहेतुत्वमिति प्रथमं तदेवोच्यते । पुरा दैनन्दिनप्रलयानन्तरम् । एवं धारणया पूर्वकल्पे या स्मृतिः पदार्थनिर्माणज्ञानं तत्प्रत्यवरुध्य पुनः ससर्जेति सम्बन्धः । तुष्टादिति हेतौ पञ्चमी । तुष्टाद्भगवतः सकाशाद्भगवतो हेतुमद्भावाद्वा । यथा पूर्वं तथा ससर्ज तोषे पूर्वज्ञानमेव हेतुः । यथा कश्चित्कञ्चन पदार्थं सङ्गोप्य बालके व्यामोहिते स चेदुपायेन तज्जानीयात्तदा सन्तुष्टो भवेत् पितृत्वात् । तथा स्वस्याऽपि सृष्टेः

पूर्वं भगवन्निकटे स्थितत्वाद्भौमभोगार्थमागतस्य तद्विस्मरणादुपायेन [1]'तत्स्मरणे सन्तुष्टः सखा स्वरूपं प्रापयेदिति मुख्यं साधनं पूर्वोक्तधारणैव। तोषसाधनपक्षेऽपि "तुष्टे तु तत्र किमलभ्यमि" ति न्यायेनाऽन्यत्सर्वं सुगमं भविष्यतीति तदवश्यं साधनं कर्त्तव्यम्। सृष्टिसामर्थ्यं त्वप्रयोजकम्। परमधिकारित्वेन प्रतिबन्धकम्। आत्मयोनिर्ब्रह्मा। नष्टां विस्मृताम्। स्मृतिं पदार्थज्ञानम्। सृष्टेरनादित्वात्पूर्वमपि स्मरणेनैव कृतम्। अतः संस्कारनाशो नोक्तः। तुष्टाद्भगवतः सकाशात्। इदं सर्वं भगवत्येव लीनं स्थितम्। पुनस्तथैव यथाऽप्ययात् प्रलयात् प्राक्। पूर्वं यथेयं सृष्टिर्यथा वा व्यवसायात्मिका बुद्धिर्यस्य तथाभूतः सन् तथा ससर्जेत्यर्थः ॥ १ ॥ ❀ ❀ इदानीमिहामुत्रार्थफलभोगवैराग्यं सर्वविषयत्यागार्थं साधनान्तरमाह—शाब्दस्य हीति। सर्वे विषयास्त्यक्तव्याः। तत्र महतां लौकिकबाधाभावेऽपि परित्यागे वैदिकं बाधकं भवेत्। "यावज्जीवमग्निहोत्रं जुहुयात्स्वर्गकामः प्रजाकामः पशुकाम" इति। तत्र यावज्जीवाधिकारस्य नित्याङ्गत्वेन प्रजाकामनादीनां वा नित्यत्वे वैराग्यमकर्त्तव्यमेव स्यात्। कर्त्तव्यत्वे वा आन्तरमेव कर्त्तव्यं स्यात्। आत्मन्यग्निसमारोपणं वा कृत्वा अग्निहोत्रं कुर्वाण एव प्रव्रजेद्वा। [2]जरामर्यादाग्निहोत्रं वा कुर्यात्। सर्वेषां पदार्थानां श्रुतिमूलकत्वेन तद्विरोधेन पदार्थकल्पनाया अशक्यत्वात्। तस्माद्यथोक्ता एव पदार्थाः फले साधने चाऽवगन्तव्याः। तस्माद्वैराग्यं पूर्वोक्तप्रकारेण शास्त्रार्थनिर्द्धारो वा न सम्भवतीत्याशङ्क्य सर्वस्याऽपि वेदस्याऽर्थमाह। यथा परब्रह्म भगवानर्थरूपः। एवं वेदोऽपि शब्दराशिभूतं ब्रह्म। अम्बुराशिवत्। यथा ब्रह्मणि सर्वत्राऽऽनन्द[5]ः पूर्ण एवं शब्दब्रह्मण्यपि सर्वत्र फलमुच्यते स्वस्य ब्रह्मत्वख्यापनाय। शब्दप्रस्थानत्वाच्च शब्दमात्रम्। अर्थस्तु परब्रह्मरूपमिति फलं तद्गतम्। अन्यथा एकस्मिन् कर्मणि प्रतिसाधनं धर्मधर्मिभेदेन क्रियाभेदेन चोच्यमानानि फलान्यप्रामाण्यमन्यानर्थक्यं वा सम्पादयेयुः। यथा "स्वर्गाय वा एतानि लोकाय हूयन्त" इत्युपक्रम्य दक्षिणहोमे आहुति-चतुष्टये नैमित्तिके दक्षिणसंस्कारत्वेन क्रियमाणे गार्हपत्ये आहुतिद्वयम्। आग्नीध्र उत्तरवेद्यां चैकै[6]काहुतिः। तत्र प्रतिकर्म सङ्ख्यादी-नामपि माहात्म्यं वेदेन बोध्यते। "द्वाभ्यां गार्हपत्ये जुहोति द्विपाद्यजमानः प्रतिष्ठित्या" इति यद्येतदाहुतिद्वय एव यजमानः प्रतिष्ठितस्तदा अन्यानर्थक्यमेव स्यात्। विरोधेनाऽप्रामाण्यं वा स्यात्। विकल्पस्तु न भवति। एककर्मत्वात्। किञ्च। "आग्नीध्रे जुहोत्यन्तरिक्ष एवाऽऽक्रमत" इति। यद्याग्नीध्रहोममात्रेणैव अन्तरिक्षाक्रमणसामर्थ्यं स्यात्तदा श्रुतिः प्रमाणं स्यात्। तत्प्रत्यक्ष-विरोधादसम्भावितम्। "आहवनीये जुहोति स्वर्गमेवैनं लोकं गमयती"ति तदानीमेव यजमानस्य स्वर्गप्रापणमनिष्टमिति प्रवृत्ति-प्रतिबन्धकता च स्यात्। किञ्च। आहुतिद्वयसङ्ख्या यजमानस्याऽत्र प्रतिष्ठितत्वमुक्त्वा "सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोत्यमुमे-वैनं लोकं समारोहयती"ति होमसाधनऋचोः सूर्यप्रकाशत्वेन धर्मेण स्वर्गाक्रमणलक्षणं फलमुक्तम्। तच्च सङ्ख्याफलेन विरुद्ध्यते। एवं सर्वत्र बहुफलत्वमन्योन्यविरुद्धफलत्वं बाधितफलत्वं च कर्मणां [7]वददप्रामाणिकमेव स्यात्। अतः प्रामाण्यार्थं किञ्चित्तात्पर्यं वर्णनीयम्। यथा च शब्दार्थौ बाधितो न भवेत्तथा च वर्णनीयम्। तत्र षोड[8]शर्त्विग्रूपस्य यजमानात्मकस्य यज्ञस्य सर्वलोकान्तः-पातिनो भगवद्रूपस्य लीला सर्वत्र वर्ण्यते। यतः[9] स भगवानेकत्रैव सर्वरसानां विद्यमानत्वात्सर्वत्र सर्वपूर्णोऽपि यथा यत्र येन भोगेन[10] लीलां कृतवान् तथा वेदो वदतीति निश्चीयते। ततश्च काण्डद्वयेऽप्ययमेव भगवान् विराड्रूपो यज्ञापरनामा प्रतिपाद्यत इति यदस्माभिः स्थूलधारणोक्ता वेदेनाऽपि तदेवोक्तेति शाब्दस्य ब्रह्मणोऽस्मदुक्त एव पन्थाः। किन्तु लोके भ्राम्यति। वाक्यार्था-परिज्ञानात्। यतो यत्र स्थितैर्नामभिर्वाक्यार्थसम्बन्धरहितैरेव पदार्थं विनिश्चित्य खण्डशः साधनतां ज्ञात्वा तत्तदिच्छां करोति। ततस्तमेवाऽर्थं ध्यायति। न हि पदानां वाक्यार्थबोधने पदार्थेष्वपि बोधकत्वम्। युगपद्वृत्तिद्वयविरोधात्। अतः स्वार्थे अपार्थैरपि नामभिर्लोको भ्राम्यति। ततः स्वबुद्ध्या वेदार्थं मत्वा तत्र तत्र बुद्ध्या परिभ्रमंस्तदर्थं कर्म वा कुर्वन्नर्थान् फलत्वेनोक्तान्न विन्दते। किन्तु वासनया कामनादार्ढ्येन तमेवाऽर्थं विचारयन् शयानो भवति। महामोहे निमग्नो भवतीत्यर्थः। तस्मादस्मदुक्ते वेदोक्ते च भेदाभावान्न प्रामाण्यसन्देहः कर्त्तव्य इति भावः। ननु यदि वेदो भिन्नप्रकारेण कमप्यर्थं प्रतिपादयेत्तदा [11]कोऽपि पुरुषार्थो न सिद्ध्येत। [12]सर्वकरणासामर्थ्यात्। तस्मान्नैवं निर्णयो युक्त इत्याशङ्क्य यत्र सिद्धार्थानुवादकत्वेन महावाक्योपयोगार्थमवान्तर-फलान्यनुवदति तानि लोकसिद्धत्वाद्युक्तियुक्तानि साधनानि तादृशफलार्थं कर्त्तव्यानि। यथा—"धवन्निव प्रपा असि" अग्नेः स्तुतौ लोकसिद्धा प्रपा दृष्टान्तीक्रियते। तथा—"कारीर्या वृष्टिकामो यजेत" "श्येनेनाऽभिचरन् यजेते" ति फलानि प्रत्यक्षसंवादीनि भगवल्लीलार्थमेव प्रतिपादितानि महावाक्यार्थोपयोगीनि। श्रुतेस्तात्पर्यं लोकदृष्टान्तरूपमवगन्तुं निपुणो भूत्वा यद्यनुवादफलेषु स[4]साधनेषु स्वस्य कार्यं सिद्ध्यति तावन्मात्रपरः स्यात्। "शान्तो दान्त उपरतस्तितिक्षुरि" ति शमादिकमुपक्रम्य "आत्मन्येवाऽऽ-त्मानं पश्येत्" "स वै सर्वमिदं जगत्" "स स भूत स भव्याम" त्युक्त्वा "ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुप-याति विद्वानि"ति। "अम्भस्यपार" इत्युपक्रम्य "य एनं विदुरमृतास्ते भवन्ती"त्युपसंहाररूपम्। यथा यस्य यत्राऽधिकारस्ता-

---

१ तत्स्मरणेन सन्तुष्ट इति क. घ. २ जरामर्यादाग्निहोत्रमिति घ. । ३. अग्ने स्तुताविल्यविसर्गः पाठः क. ख. ग. । ४. स्वसाधनेष्विति साधनेष्विति घ. । ५. आनन्दमिति ख. । ६. चैकाहुतिरिति ग. । ७. वदत्प्रामाणिकमिति ख. ग. घ. । ८. षोडशर्त्विग्रूपयजमानात्मकस्येति ग. घ. । ९. यथेति ख. ग. घ. । १०. भागेनेति ख. । . अपार्थैरेवेति क. ११. कस्यापि कोपीति क. । १२. सर्वकारणाऽसामर्थ्यादिति क. ग. ।

वन्मात्रो भवेत्। तत्राऽप्यप्रमत्तः। न ह्येवं ज्ञानमात्रेणाऽग्रिमकृतिनिरपेक्षेण कार्यं सिद्ध्यति। नन्वेवं गोधूमराशिपतितयवोद्धारणवद्व्रतिनश्चक्षुरालोकादिवलाभावादशक्यमेव स्यादित्याशङ्क्याऽऽह—**व्यवसायबुद्धिरिति**। व्यवसायात्मिका बुद्धिर्यस्य। अतिविचारेण सर्वमालोड्य स्वार्थमुद्धृत्य निश्चित्य तत्साधनकरणार्थं दृढो भवेदित्यर्थः। तत्र किं कर्त्तव्यमित्याकाङ्क्षायां प्रथमतो लोकप्राप्तं देहादिनिर्वाहार्थं कार्यं न कर्त्तव्यमित्याह—**सिद्धेऽन्यथाऽर्थे** इति। अन्यथैव कालेन भगवता वा स्वभावेन कर्मणा लौकैर्वा देहनिर्वाहे सिद्धे स्वयं तत्र प्रयत्नं न कुर्यात्। स्वस्य हि परिमितः प्रयत्नः। स भगवत्सेवार्थं स्थापितो नाऽन्यत्र विनियोगमर्हति। किञ्च। **तत्तत्परिश्रमंतत्र समीक्षमाणः**। न केवलमन्यथासिद्धत्वमात्रं दूषणम् तत्र देहनिर्वाहे तत्तत्परिश्रमं तेषां तेषां परिश्रममेकैकस्मिन् शय्यादिपदार्थे देहेन्द्रियबुद्ध्यादीनां परिश्रमं समीक्षमाणो न यतेतेति सम्बन्धः॥ २॥ ३॥ ❀ ❀

अन्यथासिद्धिं क्लेशं च बोधयति—**सत्यां क्षिताविति**। क्षितौ विस्तीर्णतया प्रसारितशय्यारूपायां बालुकादौ कोमलरूपायां वोपार्जनक्लेशव्यतिरेकेणैव सत्यां सिद्धायां कशिपोस्तूलिकाया वस्त्रकार्पाससीवनधूननास्तरणप्रयासैः किं फलम्। साधनसुखस्य तुल्यत्वेऽप्यत्र दुःखाधिक्यात्। किञ्च। स्वतः सिद्धे बाहौ। महापुरुषस्येन्द्रियवैकल्यशङ्काभावादेवमुक्तम्। उपबर्हणैः शिरस्युच्चतासाधनभूतैर्गल्लयोः पादयोश्च सतूलवस्त्रपुटैः किं प्रयोजनम्। भिन्नं वाक्यम्। अतस्तात्पर्येणैकवाक्यता। करपात्रेणाऽपि भिक्षानिर्वाहे अनेकविधान्नपात्र्या ताम्रादिमय्या किम्। सर्वत्र प्रयासानुसन्धानं कर्त्तव्यम्। उष्णकाले दिशः। शीतकाले वल्कलादीनि। आदिशब्देन चीरपत्रादीनि दुकूलैःपट्टवस्त्रैःकिम्। किञ्च। महाविरक्तस्य जनैरपि किम्। लोका अपि सर्वे त्यक्तव्या इत्यर्थः॥ ४॥

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः।**

अथ द्वितीयाध्यायविवरणं चिकीर्षवस्तयोः पौर्वापर्ये बीजस्यानुक्तत्वात्तं वक्तुं पुनस्तदर्थमनुवदन्ति **मानेत्यादि**। **तत्त्वार्थमिति**। वस्तुनोऽनारोपितरूपस्य निर्धारार्थम्, इदमुत्तरार्धेऽपि युज्यते। तेनैककार्यत्वरूपा सङ्गतिरपि स्मारिता। बीजमाहुः **द्विविध** इत्यादि। तत्त्वस्य श्रोतव्यस्य ध्येयस्य च वस्तुनो निर्देशो लौकिकबुद्धिविषयीकरणम्। **द्विविधः** बाह्याभ्यन्तरभेदतः द्विप्रकारकम्, तत्र तयोः प्रकारयोर्मध्ये मानमेयपुरःसरं श्रुतिमूलकतदविरुद्धयुक्तियोगसाधितं मनश्चेति **मानम्**, क्षरावयवविन्यासो मेयम्, तदुभयकथनपूर्वकं बाह्यो निर्देशः पूर्वाध्याये **निरूपितः**। आन्तरज्ञानस्य बाह्यज्ञानाधीनत्वादुक्तः। तथा चोपोद्घातगर्भा हेतुता पूर्वापरभावे बीजमित्यर्थः। ननु पूर्वाध्याये योग उक्तः, स सर्वगमकः, तथा विषयः सर्वात्मक उक्तः, एवं सति किं वा अज्ञातं किं वा आन्तरमित्याकाङ्क्षायामाहुः **आन्तरमित्यादि**। यद्यपि योगमार्गेण सर्वं ज्ञातम्, तथापि 'यन्न योगेने' त्यादिवाक्यात्तदगोचरं तदप्राप्यं च **भिन्नमार्गेण** भक्तिमार्गेण **फलसाधनयोर्बोधतः** बोधनाद्वर्तते, अतः प्रथमं साधनस्य ततः फलस्य च निश्चयः क्रियते, ततस्ताभ्यां कृत्वा पूर्वोक्तयोरपि साधनफलयोस्तत्त्वं वक्ष्यमाणसाधनफलशेषतात्मकं वास्तवं रूपं **फलिष्यति**, लौकिक्या अपि बुद्धेर्विषयीभविष्यति, तथा च यथैतज्ज्ञानार्थं तत्कथनम्, तथा तत्तत्त्वनिर्धारायैतत्कथनमिति परस्परसाकाङ्क्षत्वात्प्रकरणैक्यमध्यायपौर्वापर्यं च युक्तमित्यर्थः। एतदेव विशदीकुर्वन्ति **एवमित्यादि**। **तयोरिति**। साधनत्वफलत्वयोः। **तत्रेति**। विचारे क्रियमाणे। एवमध्यायार्थं विशदीकृत्य व्याख्यातुमारभन्ते **तत्रेत्यादि**। **तत्रेति**। एवमध्यायार्थे निर्धारिते। **एवं पुरेत्यत्र**। अत्र केचन व्याख्यातारो नष्टां स्मृतिं धारणया प्रत्यवरुध्य तथा ससर्जेति योजयन्ति, तत्तात्पर्यमाहुः **तथेत्यादि**। **सृष्टिसामर्थ्यं** धारणाफलं नष्टस्मृतिप्रत्यवरोधो व्यापार इति तदभिप्राय इत्यर्थः। **तद्दूषयन्ति तदित्यादि**। **ब्रह्मणः सृष्टिसामर्थ्यस्य ब्रह्मत्वादेव सिद्धत्वादत्र** स्मृतिप्रत्यवरोधस्य फलत्वेन कथनाच्च तत्तेषां मतं चिन्त्यमित्यर्थः। ननु विद्यमाने सामर्थ्ये धारणप्रयोजनाभावान्नष्टस्मृतिप्रत्यवरोधस्य व्यापारत्वेन फलत्वस्याङ्गीकाराच्च मूलसङ्गतौ किमिति विचार्यत्वमुच्यत इति तत्राहुः **नष्टेत्यादि**। **सर्वथा नाश** इति। संस्काररूपस्यापि नाशे। **तोषहेतुत्वमिति**। धारणायास्तथात्वम्। तथा च तोषस्य व्यापकतायाः स्मृतिप्रत्यवरोधस्य च फलताया आपत्त्या। धारणायास्तत्रैवोपक्षयेण सामर्थ्यपर्यन्तधावनाक्षमत्वाद्विचार्यत्वमित्यर्थः। तर्हि किमत्र विवक्षितमित्याकाङ्क्षायामाहुः **अत्र त्वित्यादि**। **तदिति**। स्मृतिप्रत्यवरोधनम्। तथा च समभिव्याहारवशादेवं विवक्षितं निश्चीयत इत्यर्थः। ननु स्मृतिनाशवत्सामर्थ्यकौण्ठ्यस्यापि शक्यवचनत्वाद्धारणायास्तोषहेतुत्वाङ्गीकारे को दोषः, श्लोके छन्दोऽनुरोधस्यावश्यकत्वेन समभिव्याहरस्याप्रयोजकतया पार्ष्णिकान्वयस्यैव बलवत्त्वादिति शङ्कायामाहुः **तोष इत्यादि**। त उपपादयन्ति **यथेत्यादि**। अत्र भगवन्निकटे स्थितिः सुषुप्तौ सत्सम्पत्त्या बोध्या। **तद्विस्मरणादिति**। पूर्वकल्पीयपदार्थादिविस्मरणात्। **सखेति**। 'यावत्सखा सख्युरिवे' ति वक्ष्यमाणरीत्या समानशीलः सन्। **मुख्यं साधनमिति**। स्मृतिप्रत्यवरोधस्य मुख्यं साधनम्। ननु समभिव्याहाराग्रहेण प्राञ्जलान्वयाङ्गीकारेपि तोषस्य सृष्टिहेतुना प्राप्त्या सामर्थ्यकौण्ठ्यस्यार्थात्सिद्धिरिति तत्सामर्थ्यस्य फलत्वमवर्जनीयमतो व्यर्थः प्रयास इत्यत आहुः **तोषेत्यादि**। धारणायास्तोषसाधनत्वपक्षेप्युक्तन्यायेन तोषादेव सर्वभवने स्मृतिप्रत्यवरोधस्य फलत्वमर्जनीयमित्यावश्यकत्वात्तस्यैव फलत्वमस्तु, न तु सृष्टिसामर्थ्यस्य। तत्तु ब्रह्मत्वे रूपप्रतिकूलनिहतत्वात्तथापदेन सृष्टिकरणव्यवधानात्फलप्रतिबन्धकत्वाद्वा प्रयोजकम्, न ह्यत्र शुकस्तथासामर्थ्यार्थं धारणारूपसाधनमुपदिशति, येन तथा प्रशंसेत्, किन्तु पूर्वं 'नान्यत्र सज्जेदि' ति २।१।३९ कथनादग्रेपि अतः कविर्नामसु यावदर्थः स्यादप्रमत्तः' २।२।३ इति कथनाच्च

वैराग्यार्थम् । तथा सति यथा धारणया नष्टस्मृत्यवरोधेन भगवत्तोषात् सर्गेऽधिकृतस्य ब्रह्मणो यथापूर्वसृष्टिकरणम्, तथात्र धारणया नष्टस्मृतिप्रत्यवरोधेन भगवत्तोषादस्य स्थूलाहंब्रह्मोपासकस्य योगिनो वा 'तुष्टे त्वि' ति न्यायेनामोघदृष्टित्वे सर्वभोगेन वैराग्यदार्ढ्यमिति तथा सामर्थ्यस्य फलत्वकथनं विचार्यमित्यर्थः। न चास्य पूर्वं सर्वाननुभवान्नष्टस्मृतिप्रत्यवरोधोऽसङ्गत इति शङ्क्यम्। इदानीं प्रत्यहं प्राज्ञे सृष्टेः पूर्वं च भगवदुदर एव सत्त्वेन, सूक्ष्मानुभवस्य विभागमारभ्येयत्पर्यन्तं च तत्तज्जन्मसु नानाप्रकारकस्थूलानुभवानां च बहुधा जातत्वादिति। तस्मादेवमेवार्थ इति निश्चयः। यत्तदोर्नित्यसम्बन्धादेकेनैव तस्य लाभेपि पुनर्यथापदग्रहणतात्पर्यमाहुः यथा चेत्यादि। तथा च सृष्टौ बुद्धौ च पूर्वकल्पीयप्रकारतौल्यबोधनाय पदद्वयोक्तिरित्यर्थः। एवमनेन धारणारूपस्य साधनस्य प्रकृतोपयोगाय वैराग्यशेषत्वं साधितम्, अतः पूर्वाध्यायोक्तस्य फलस्यापि प्रकृतोपयोगाय तदर्थमेव द्वाभ्यां वैराग्यशेषत्वमुपपादयन्ति इदानीमित्यादि। साधनान्तरमिति। वेदतात्पर्यविचारकरणरूपं तदित्यर्थः॥ १॥ ❀ ❀ शाब्दस्य हीत्यत्र। ननु वेदेन सर्वविषयत्याजनाय स्थूलधारणैव कर्तव्यत्वेन बोध्यत इति कथमवगन्तुं शक्यत इत्याशङ्कायां तदुपपादयन्ति सर्व इत्यादि। प्रजाकामनादीनां वा नित्यत्व इति। यद्यपि नित्यविधायकं वाक्यं भिन्नम्, कामनार्थं[1] च भिन्नम्, तथापि यथा 'पुरोडाशं चतुर्धा करोति' इत्यस्याग्नेयं चतुर्धा करोतीत्यनेनोपसंहारः, तथा कामवाक्यस्य नित्ये वक्तुं शक्यत्वात्तथेत्यर्थः। कर्तव्यत्वेऽवान्तरमेवेति। यदहरेव विरजेत्तदहरेव प्रव्रजे' दिति जाबालश्रुतौ वैराग्यस्य प्रव्राजेऽधिकारविशेषणतया कथनात्तस्य कर्तव्यत्वे वा आन्तरमेव कामनात्यागेनैव अवान्तरमेव वा होमातिरिक्तसमय एव कर्तव्यं स्यात्। पक्षान्तराण्याहुः आत्मनेत्यादिना। एतेषु प्रथमः प्राणाग्निहोत्रोपनिषदुक्तः अग्निहोत्रेत्यादिनोक्तः, द्वितीयस्तु नवमस्कन्धे 'विरक्तो न्यासमास्थितः। सहैवाग्निभिरात्मानं युयोज परमात्मनी' ति सौभर्युपाख्यानोक्तः जरामर्येति। तृतीयो 'ऽम्भस्यपारे' इति तैत्तिरीयबृहन्नारायणोपनिषत्समाप्तौ 'तस्यैवं विदुषः' इत्यनुवाकोक्तः। एवं सर्वेषां प्रमाणसिद्धत्वेपि ये प्रव्राजस्यान्धपङ्ग्वाद्यधिकारकत्वमङ्गीकुर्वन्ति, तान्प्रत्याहुः सर्वेषामित्यादि। यदि तथा स्यात्तदा श्रुतिः प्राजापत्यामाग्नेयीं चेष्टिं जाबालादिश्रुतौ प्रव्रजपूर्वाङ्गत्वेन विदध्यात्, 'प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः इति, युधिष्ठिरोपि धर्मावतारो न प्राजापत्यां कृत्वा प्रव्रजेत्, सौभरिश्च याज्ञवल्क्यस्यापि प्रव्राजं वाजिशाखायां मैत्रेयीब्राह्मणे न श्रावयेत्, व्यासचरणा अपि साधनाध्यायतुरीयपादे प्रव्राजनिर्णयं न कुर्युः, अतो मीमांसकानां तथा कल्पनमयुक्तमिति तद्विहाय सर्वेषामुक्तानां पक्षाणां श्रुतिमूलत्वाद्यथाश्रुता एव साधनरूपाः पदार्थाः, फले फलरूपाश्च, ते साधनेऽधिकारिभेदेन वचनानि व्यवस्थाप्यावगन्तव्याः। अन्यथा नित्याग्निहोत्रप्रव्राजविधायकयोः श्रुत्योर्विरोधो दुष्परिहर एव स्यादित्यर्थः। एवं विचारेण सिद्धं पूर्वपक्षस्यार्थमाहुः तस्माद्वैराग्यमित्यादि। लौकिकविषयवैतृष्ण्यस्यैव श्रुत्यभिप्रेतत्वात् दृष्टानुश्रविकविषयवैतृष्ण्यं धारणाकरणरूपश्च शास्त्रार्थनिर्धारो न संभवतीति शङ्कायां सर्वस्यापि वेदस्य तात्पर्यमनेन पद्येनाहेत्यर्थः। सैद्धान्तिकमर्थं व्युत्पादयन्ति यथा परब्रह्मेत्यादि। प्रस्थानत्वादिति। प्रकृष्टस्थानत्वात्। ननु 'यजेत' 'जुहुया' दित्यादौ नियोगदर्शनात् पुरुषस्य कर्मशेषत्वेन कर्मणः फलशेषत्वेन फलस्य च पुरुषार्थतया पुरुषशेषत्वेन तद्वाक्यानां साध्यार्थत्वनिश्चये कर्मफलं पुरुषगतमेवायातीति सिद्धस्वरूपब्रह्मगतं फलमिति न वक्तुं शक्यमित्याशङ्कायां श्रुतार्थापत्तिं प्रमाणत्वेनाहुः अन्यथेत्यादि। अन्यथेति वाक्यानां साध्यार्थत्वमङ्गीकृत्य फलस्य पुरुषशेषत्वाङ्गीकारे अप्रामाण्यमन्यानर्थक्यं वेति, वाक्यस्याप्रामाण्यं कर्मान्तरस्यार्थक्यं वा, तदुदाहृत्य दर्शयन्ति यथा स्वर्गायेत्यादि। ननु वर्ण्यत एव तात्पर्यम्, अङ्गे फलश्रुतेरर्थवादत्वात्कर्मप्रशंसामात्रमत्र क्रियते इति तत्राहुः यथा चेत्यादि। किमत्र बालोपलालनरूपवत्स्तोभारूपा प्रशंसा, उत यथार्था, आद्या त्वेकत्र प्रतारकायां सिद्धायां मुख्यफलेप्यनाश्वासप्रसङ्गेन सर्वस्य वेदस्याप्रामाण्यप्रसङ्गः। द्वितीये तु परस्परविरोधात्प्रत्यक्षादिविरोधाच्च शब्दार्थस्यैव बाध इति नैवं तात्पर्यनिश्चय इति तदुभयदोषाभावो यथा तथा वर्णनीय इत्यर्थः। तर्हि कथं वर्णनीयमित्याकाङ्क्षायां वेदस्य सिद्धार्थत्वमनुसंधाय फलस्य ब्रह्मगतत्वं चानुसन्धाय वर्णनीयमित्याशयेन तत्प्रकारमाहुः तत्रेत्यादि। 'यज्ञो वै विष्णु' रिति श्रुत्या क्रियायां प्रविष्टतयान्यग्भूतऋत्विग्यजमानरूपेण स्वयमेव वर्तते, यज्ञियानां पदार्थानां चागतानामिव तदङ्ग एव निविष्टत्वात्पूर्वकाण्डे तस्यैव लीला वर्ण्यते। तत्र गमको हेतुः यथेत्यादि। यथा-'भगवा' नित्यत्र यत इति पाठः प्रतिभाति। अग्रे तदिति पदस्य दर्शनात्। अथायमेव चेत्पाठः, तदा यथापदस्योदाह्रियत इत्यर्थो बोध्यः। यत्र येन भोगेनेति। यस्मिन् गार्हपत्यादिरूपे मुखे येन हविरदनेनेत्यर्थः। निश्चीयत इति। 'सर्वे वेदा यत्पदमामनन्ति' वेदैश्च सर्वैरहमेव वेद्यः। 'मां विधत्तेऽभिधत्ते मा' मित्यादिवाक्यैः सर्वस्य वेदस्य भगवत्तात्पर्यकत्वे तद्बोधकत्वे तद्विधायकत्वे तद्वाचकत्वे च बोधिते वेदस्य सर्वस्य सिद्धार्थ एव तात्पर्यं निर्धार्य विधायकादिवाक्याबाधार्थमेवं प्रकारेणानुवादोयम्, न तु गुणवाद इति तात्पर्यं निश्चीयते। अतः काण्डद्वयेपि नामभेदेन प्रकारभेदेन च कथनात् सर्वस्य शब्दब्रह्मणो वेदस्यास्मदुक्त एव मार्ग इत्यर्थः। नन्वेवमर्थोऽन्यैः कुतो नाङ्गीक्रियत इत्यत आहुः किन्त्वित्यादि। नामभिर्वाक्यार्थसम्बन्धरहितैरिति। फलबोधकैः पदैः वाक्यार्थत्वेनाङ्गीक्रियमाणो यः पुरुषस्तेन सह सम्बन्धशून्यैः। खण्डश इति। अवान्तरवाक्यसम्बन्धमात्रेण। ध्यायतीति।

---

१. ०"कामार्थम्" पाठः।

धीर्ध्यायति । अत इति । वृत्तिद्वयविरोधशब्दार्थबाधाभ्याम् । तथा च यदि वेदस्य कर्मणि तस्य पुरःस्फूर्तिके फले पुरुषे च तथा तात्पर्यं स्यात्, तदा यथाश्रुताः फले साधने च ग्राह्याः स्युः, न त्वेवम्, किन्तु महावाक्यार्थविचारे उक्तरीत्या भगवत्परतैव सिध्यतीति यथाश्रुतग्रहणं न युक्तमित्यर्थः । फलत्वेनोक्तानिति । अङ्गवाक्येषु फलत्वेनोक्तान् । सिद्धमाहुः तस्मादित्यादि । तस्मादिति । वेदस्येश्वरात्मकत्वेन सामान्यैः ऋषिभिरपि तदर्थानिर्धारात्तत्तदंशे श्रद्धां विहायेत्यर्थः ॥ २ ॥ ❀ ❀ अत इत्यस्याभासे । भिन्नप्रकारेणेति लोकानुरोधेन भगवत्परतया । सर्वकरणासामर्थ्यादिति भगवद्दत्तसर्वकर्मकरणसामर्थ्याभावात् । तस्मादिति । सर्वेषां फलदर्शनात्प्रवृत्त्यव्यतिरेकादग्निहोत्रादिवाक्येषु श्रूयमाणस्य कामपदस्य भगवत्यनन्वयादवान्तरवाक्यानां भगवत्परत्वनिर्णयो न युक्त इति तथेत्यर्थः । एवमाशङ्कयातः कविरिति । श्लोकस्यार्थमाहुः यत्रेत्यादि, येषु वाक्येषु सिद्धार्थानुवादकत्वेन भगवल्लीलानुवादकत्वेन रूपेण महावाक्यार्थोपयोगार्थं महावाक्यार्थस्य मृत्युतरणस्योपकारार्थमवान्तरफलानि वृष्ट्यादिस्वर्गान्तान्यनुवदन्ति तानि कर्माणि लोकसिद्धत्वात् प्रवृत्त्यव्यतिरेकसिद्धत्वाद्युक्तियुक्तानि तत्तत्फलोपायभूतानि साधनानि, न तु प्रतारणरूपाणि, तादृक्फलार्थं साक्षात्परम्परया च मृत्युतरणार्थं कर्त्तव्यान्यनुष्ठेयानि । कथं युक्तियुक्तत्वं ? कथं वा उपयोगः ? इत्यपेक्षायां यथा "धन्वन्नि"त्यग्निस्तुतिवाक्येऽग्ने रतिप्रियत्वादिबोधनार्थं लोकसिद्धा प्रपा दृष्टान्तीक्रियते, इति तस्य वाक्यस्य तावन्मात्रे तात्पर्यं, न तु तद्विधाने, तथात्यन्तं सन्मार्गविमुखस्यौन्मुख्यजननमात्रे कारीर्यादिवाक्यतात्पर्यम् । एवं सन्मुखस्य संसारासक्तस्य तदावेशाद्विश्वासापगमशङ्कया तद्दार्ढ्यजननमात्रे "चित्रोद्भिदा" दिवाक्यतात्पर्यम् । एवं दृष्टाद्वितृष्णस्यानुश्रविके सक्तस्य दृष्टवैतृष्ण्यदार्ढ्यजननमात्रे ज्योतिष्टोमादिवाक्यतात्पर्यं, न तु तत्तदर्थमेव तत्तत्करणे । न च फलाभावः शङ्क्यः, तथा सति विश्वासाद्यपायप्रसङ्गात् । फलन्तु तात्पर्यभ्रमेणापि करणे लोकयात्रानिर्वाहार्थत्वा 'त्फलमत उपपत्ते'रिति न्यायेन भगवता दानाद्भविष्यति । तेनैतानि वृष्ट्यादीनि फलानि भगवल्लीलार्थमेव प्रतिपादितानि । एवमितराण्यपि तानि सर्वाण्युक्तरीत्या महावाक्यार्थे मुक्तिरूपे विप्रकृष्टसन्निकृष्टपरम्परयोपयुक्तानीति । एतेन ग्रन्थेन मूलस्थोतः शब्दार्थो विवृतः । अत उक्तवाक्यघटितस्य पूर्वकाण्डस्योपासनाकाण्डस्य च महावाक्यार्थोपयुक्तत्वात्, कविः श्रुतेस्तात्पर्यं लोकदृष्टान्तरूपमवगन्तुं निपुणो भूत्वा नामसु यावदर्थः स्यात् । येष्वित्यादिनोक्तरीत्या तथा स्यात् । तथा च, जैमिनीयमते यथा "वायुर्वै क्षेपिष्ठे—" त्यादीनामनुवादत्वं, तथा सिद्धान्ते कारीर्यादिज्योतिष्टोमान्तानां पूर्वकाण्डस्थानां मुक्त्यतिरिक्तदृष्टादृष्टफलबाधकानामुत्तरकाण्डस्थानाञ्च वाक्यानामधिकारिभेदेनावयुत्यानुवादत्वमवगत्य स्वापेक्षितपरो भवेदित्यर्थः । कानि कार्यसाधनानीत्यपेक्षायामाहुः शान्त इत्यादि, तथा जीवात्मनः क्षरपुरुषस्य वा दर्शनेधिकृतः स शान्त्यादिपरो भवेत् । यस्याक्षरदर्शनेधिकारः 'स सर्वं ब्रह्मे'ति ज्ञानपरो भवेत् । यस्य पुरुषोत्तमदर्शने स बृहन्नारायणोपनिषदुक्तज्ञानपरो भवेदित्यर्थः । एवं यथाधिकारं सर्वासु परविद्यासु बोध्यम् । विद्यानां परापरविभागस्य परपरमोत्कृष्टविभागस्य बाह्यरहस्यविभागस्य च श्रुतिसिद्धत्वादिति न कोपि वादलेशः । अप्रमत्तपदतात्पर्यमाहुः न हीत्यादि । व्रतिन इति । सर्वदैवं विचारनियमस्थस्य । तत्रेति । चक्षुरालोकादिबलसिद्धिविषये । न कुर्यादिति । तथा च प्रकारान्तरेणैव तद्बलसिद्धिरित्यर्थः ॥ ३ ॥ ❀ ❀ सत्यामित्यत्र—ननु सर्वेषामिन्द्रियसाकल्याभावेन बाहोः स्वतःसिद्धत्वस्य प्रायिकत्वादुपबर्हणकैमर्थ्यं कथमुच्यते इत्यत आहुः महापुरुषेत्यादि । यो हि राजवत् सम्पत्समृद्धाद् गृहादेवं विचारपूर्वकं विरज्यते, स भगवत्कृपयैवेति, तादृशस्य तथात्वादेवमुक्तमित्यर्थः । उपबर्हणपदगतबहुत्वसङ्ख्यायास्तात्पर्यमाहुः गल्लयोः पादयोश्चेति । अत्रोपबर्हणकैमर्थ्यकथनेन तदर्थकप्रयासकरणवैयर्थ्यमहत्त्वार्थेन लक्ष्यते । तथा च, पादयोर्बाहुकृतोपयोगाभावात् "सत्यां क्षिता" वित्यनेनाप्युपबर्हणपदान्वयो भवति तस्यां तैः किमिति । एवं सति विकलाङ्गस्यापि तत्सिद्धिरिति तादृशास्तु सर्वथैव प्रयासो न कार्य इत्यप्युपदेशः फलति ननु भिन्नवाक्यत्वे कथमुपदेशैक्यमित्यत आहुः अत इति, फलैक्यात् । एवमग्रेपि बोध्यम् । तुरीयपादसूचितमर्थमाहुः किञ्चेत्यादि ॥ ४ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

अध्यायेऽस्मिन् द्वितीये तु मुमुक्षुजनसम्मतम् । स्थूलध्यानफलं चात्र सूक्ष्मध्यानं निरूप्यते ॥ १ ॥

तत्र तावत्पूर्वोक्तधारणया अवान्तरफलमाह—एवमिति । एवं या धारणोक्ता तया तुष्टाद्धरेः प्रसादात् पुरा प्रलये मम नष्टां सृष्टिस्मृतिं प्रत्यवरुद्ध्य लब्ध्वा व्यवसायो निश्चयस्तदात्मिका एवमेवेदं स्रष्टव्यमिति निश्चयरूपा बुद्धिर्यस्य तथाभूतः सन् आत्मयोनिर्ब्रह्मा अप्ययात् प्रलयात् प्रागिदं विश्वं यथा आसीत्तथा ससर्जेत्यन्वयः । व्यवसायबुद्धित्वे हेतुमाह—अमोघदृष्टिरिति, अमोघा यथार्था दृष्टिर्ज्ञानं यस्य सः ॥ १ ॥ ❀ ❀ उपासनाफलादपि विरक्तस्य विशुद्धमनसो भगवत्स्वरूपधारणायामधिकारोऽतो वैराग्यार्थं वेदबोधितेऽपि तत्तत्फले आस्था न कर्तव्येत्याह—शाब्दस्येति । शाब्दं शब्दमयं ब्रह्म वेदस्तस्यैष पन्थाः कर्मफलबोधनप्रकारः । कोऽसावित्यपेक्षायामाह—अपार्थैः अपगतार्थैरेव "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इत्यादिनामभिः अक्षय्यत्वबोधकशब्दैः साधकस्य धीर्बुद्धिर्ध्यायति तत्तत्फलेच्छां करोतीति यत् । अपार्थत्वमेव विशदयति—तत्र तत्र स्वर्गादौ परिभ्रमन्नपि अर्थान् निरतिशयसुखजनकान् पदार्थान्न विन्दति । अक्षय्यभोगाभिलाषया कर्म कृत्वा स्वर्गादौ गतस्यापि तत्रत्यानां

विनाशदर्शनेन भयस्याऽनपायादिति भावः। तर्हि कथमेवं परिभ्रमति तत्राह—माया मये भगवदिच्छयोपस्थापिते देहेन्द्रियान्तःकरणपुत्रकलत्रादौ वासनया सुखेच्छया शयानः आत्मीयतया कृताभिमान इति ॥ २ ॥ ❀ ❀ तर्हि सर्वथा भोगत्यागे देहनिर्वाहः कथं स्यादित्याशङ्क्याह—अत इति। यस्माद्वेदबोधितेऽपि स्वर्गादौ यथोक्तं यथापेक्षितं च सुखं नास्त्येवातो हेतोः कविस्त्याज्योपादेयविषयकविवेकवान् नाममात्रेषु अतितुच्छेषु भोग्यवस्तुषु यावता वस्तुना अर्थो देहनिर्वाहो यस्य तथाभूतः स्यात्, किञ्च भगवदाराधनेऽप्रमत्तः सावधानश्च स्यादिति। अन्यथा प्रारब्धकर्मानुगुणेश्वरेच्छावशादर्थे देहनिर्वाहकपदार्थे सिद्धे प्राप्ते सति तत्र तस्मिन्नर्थे भूयस्ततोऽधिकलाभार्थं न यतेत प्रयत्ने को दोषस्तत्राह—तत्र यत्ने परिश्रम एव फलति नान्यदित्यालोचयन्नित्यर्थः। एवं सर्वपरित्यागेन भगवदाराधनं कथं स्यादित्यत आह—व्यवसायबुद्धिरिति। विषयभोगे सुखं नास्त्येव प्रत्युत दुःखनिवृत्तिः परमानन्दावाप्तिश्च भगवद्भजनादेवेति निश्चयात्मिका बुद्धिर्यस्य तथाभूतश्च स्यादित्यन्वयः ॥ ३ ॥ ❀ ❀ अन्यथा सिद्धिः प्रत्यक्षसिद्धैवेत्याशयेन तां दर्शयति—सत्यामिति द्वयेन। क्षितौ सत्यां कशिपोः शय्यापर्यङ्कादेः प्रयासैः किं प्रयोजनम्? पृथिव्यामेव शयनेन देहनिर्वाहसम्भवात्। तन्निर्वाहार्थशय्याद्युपार्जनप्रयत्ने तु केवलं श्रम एवावशिष्यते पुरुषार्थसाधकमायुश्च वृथैव गच्छति, प्रारब्धानुकूल्ये तु प्रयत्नं विनाऽपि तल्लाभसम्भवात्तद्विना तस्य दुर्घटत्वादित्यर्थः। एवमग्रेऽपि ज्ञेयम्। बाहौ स्वतस्सिद्धे सति उपबर्हणैः शिरस उच्चतासाधनभूतैः सतूलवस्त्रपुटैः किं प्रयोजनं? न किमपि, अधो निहितेन बाहुनैव तदुच्चतासम्भवात्। अञ्जलौ सति पुरुधाऽन्नपात्र्या बहुप्रकारान्नभोजनपात्रेण किं प्रयोजनं? अञ्जलिनैव अन्नभोजननिर्वाहसम्भवात् दिग्वल्कलादौ सति दुकूलैः सूक्ष्मपट्टवस्त्रैः किं प्रयोजनम्? उष्णकाले वस्त्रादि विनाऽपि दिग्भिरेव, शीतकाले तु वल्कलैर्वृक्षाणां त्वक्पत्रविशेषैः आदिपदेन चीरैश्च दुकूलकार्यनिर्वाहसम्भवात् ॥ ४ ॥

## हिन्दी अनुवाद

भगवानके स्थूल और सूक्ष्म रूपोंकी धारणा तथा क्रममुक्ति और सद्योमुक्तिका वर्णन।

श्री शुकदेवजी कहते हैं—सृष्टिके प्रारम्भमें ब्रह्माजीने इसी धारणाके द्वारा प्रसन्न हुए भगवानसे वह सृष्टिविषयक स्मृति प्राप्त की थी, जो पहले प्रलयकालमें विलुप्त हो गई थी। इससे उनकी दृष्टि अमोघ और बुद्धि निश्चयात्मिका हो गई। तब उन्होंने इस जगत्को वैसे ही रचा जैसा कि यह प्रलयके पहले था ॥ १ ॥ ❀ ❀ वेदोंकी वर्णन-शैली ही इस प्रकारकी है कि लोगोंकी बुद्धि स्वर्ग आदि निरर्थक नामोंके फेरमें फँस जाती है, जीव वहाँ सुखकी वासनासे स्वप्न-सा देखता हुआ भटकने लगता है; किन्तु उन मायामय लोकोंमें कहीं भी उसे सच्चे सुखकी प्राप्ति नहीं होती ॥ २ ॥ ❀ ❀ इसलिए विद्वान् पुरुषको चाहिये कि वह विविध नामवाले पदार्थोंसे उतना ही व्यवहार करे जितना प्रयोजनीय हो। अपनी बुद्धिको उनकी निस्सारताके निश्चयसे परिपूर्ण रक्खे और एक क्षणके लिए भी असावधान न हो। यदि संसारके पदार्थ प्रारब्धवश विना परिश्रमके यों ही मिल जायँ, तब उनके उपार्जनका परिश्रम व्यर्थ समझकर उनके लिये कोई प्रयत्न न करे ॥ ३ ॥ ❀ ❀ जब जमीनपर सोनेसे काम चल सकता है, तब पलँगके लिये प्रयत्न करनेसे क्या प्रयोजन। जब भुजाएँ अपने को भगवान्की कृपासे स्वयं ही मिली हुई हैं, तब तकियोंकी क्या आवश्यकता। जब अञ्जलिसे काम चल सकता है, तब बहुत-से बर्तन क्यों बटोरें। वृक्षकी छाल पहनकर या वस्त्रहीन रह कर भी यदि जीवन धारण किया जा सकता है तो वस्त्रोंकी क्या आवश्यकता ॥४॥

**चीराणि किं पथि न सन्ति दिशन्ति भिक्षां नैवांघ्रिपाः पररभृतः सरितोऽप्यशुष्यन्।**
**रुद्धा गुहाः किमजितोऽवति नोपसन्नान् कस्माद् भजन्ति कवयो धनदुर्मदान्धान् ॥५॥**

**एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननन्तः।**
**तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र ॥६॥**

**कस्तां त्वनादृत्य परानुचिन्तामृते पशूनसतीं नाम युञ्ज्यात्।**
**पश्यञ्जनं पतितं वैतरण्यां स्वकर्मजान् परितापाञ्जुषाणम् ॥७॥**

**केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम्।**
**चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति ॥८॥**

---

१ तत्र मायामये पथि सुखमिति वासनया शयानः स्वप्नान्पश्यन्निव परिभ्रमन्नर्थान्न विन्दति। तत्तल्लोकं प्राप्तोऽपि निरवद्यं सुखं न लभते इत्यर्थ इति श्रीधरस्वामिव्याख्यानम्। २. चीरैः जीर्णवस्त्रखण्डैः। ३. प्रा० पा० फलभृतः। ४. प्रा० पा० प्रियार्थो। ५. प्रा० पा० सुनिर्वृतो। ६. प्रा० पा० केचित् स्वदेहेऽन्तर्हृदोऽवकाशे।

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

ननु दिक्सद्भावो नाम नग्नत्वमेव वल्कलमन्नं तोयं वासः स्थानं तु याञ्चाप्रयत्नं विना कथं प्राप्येत तत्राह। चीराणि वस्त्रखंडानि। परान्बिभ्रति पुष्णंति फलादिभिर्ये ते भिक्षां फलादिरूपां न दिशंति किम्? किं वा सरितः स्यंदमाना नद्यः किमशुष्यन्। गुहाः गिरिदर्यः। ननु कदाचिदेषामलाभे किं कार्यं तत्राह। अजितो हरिरुपसन्नान्छरणागतान्किं नावति न रक्षति? किंशब्दस्य पूर्वत्रापि सम्बन्धः। धनेन यो दुर्मदस्तेनांधान्नष्टविवेकान्॥ ५॥ ❀ ❀ तदा तेन किं कर्तव्यं हरिस्तु सेव्य इत्याह। एवं विरक्तः संस्तं भजेत। भजनीयत्वे हेतवः। स्वचित्ते स्वत एव सिद्धः। यत आत्मा अत एव प्रियः प्रियस्य च सेवा सुखरूपैव। किंच अर्थः सत्यो न त्वनात्मवन्मिथ्या। भगवान् भजनीयगुणश्च अनंतश्च नित्यः य एवंभूतस्तं भजेत। नियतार्थः निश्चितस्वरूपः तदनुभवानंदेन निर्वृतः सन्निति स्वतः सुखात्मत्वं दर्शितम्। किंच। यत्र यस्मिन्भजने सति संसारहेतोरविद्याया उपरमो नाशो भवति॥ ६॥ ❀ ❀ एतदेवान्यचिंतानिंदया द्रढयति। क इति। तां तथा भूतां परस्य हरेरनुचिंतां धारणाम-नादृत्य पशून्कर्मजडान्विना। "यथा पशुरेवायं स देवानाम्" इति श्रुतेः। असतीं विषयचिंतां को नाम कुर्यात्। यया चिंतया वैतरण्यां पतितम्। तत्र च स्वकर्मजानाध्यात्मिकादिक्लेशान्सेवमानं जनं पश्यन्। वैतरणी यमस्य द्वारस्था नदी तत्तुल्यत्वात्संसृति-र्वैतरणी॥ ७॥ ❀ ❀ तामेव धारणां सविशेषणामाह केचिदिति षड्भिः। स्वदेहस्यांतर्मध्ये यद्धृदयं तत्र योऽवकाशस्त-स्मिन्वसंतम्। प्रादेशस्तर्जन्यंगुष्ठयोर्विस्तारः स एव मात्रा प्रमाणं यस्येति हृदयपरिमाणं तत्रोपचर्यते। कंजं पद्मम्। रथांगं चक्रम्॥ ८॥

## वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अत्राक्षिपति। नन्विति। पुनराक्षिपति नन्विति। विश्वनाथस्तु-ननु शीतत्राणोपायः कस्तत्र साक्षेपं क्रुध्यन्निवाह— चीराणीति। ननु ततोपि जाठरानलो दुर्वारस्तत्र तथैवाह—अंघ्रिपा अपि किं नैव भिक्षां ददति मनुष्याः खलु मा ददतु नामेति भावः। तर्हि पानार्थं जलं तु मृग्यमेवेति चेद्विक्लव बुद्धिमित्याह—सरितोपीति। ननु शिलावर्षात्त्राणार्थं पर्णशाला काचिदपेक्षितै-वेति चेत्तत्राह—रुद्धा इति। गुहां प्रविश्य व्याघ्रादयः खादन्तीति चेत्तत्राह—किमजित इति। व्याघ्रादीनामपि स एवांतर्यामी भक्तवत्सलस्तान्कथं तत्र प्रेरयिष्यतीति भावः। न ह्यजितभक्तं कोप्यभिभवितुं शक्यादित्यर्थः॥ ५॥ ❀ ❀ तदा वनाद्ये-कान्तदेशप्राप्तिसमये तेन विरक्तेन न केवलं सुखात्मतैवान्यदप्याधिक्यमस्तीत्याह। किञ्चेति। विश्वनाथः—ननु तर्हि भजनी-येश्वरस्य तद्भजनोपकरणानाञ्चान्वेषणं तु कर्त्तव्यमेव योगिभिरिति चेत्तत्राह—स्वचित्ते स्वत एव सिद्धो यत आत्मा चित्ताधिष्ठाता वासुदेव इति। नाप्यावाहनादिश्रम इति भावः। किञ्च तस्य भजनं स्वत एव भवितुमुचितमित्याह—प्रिय इत्यादिचतुर्विशेषणैः। प्रियः स्वभावत एव प्रेमास्पदम् न च प्रेमास्पदत्वेपि पतिपुत्रादिरूपोऽनर्थः यतोर्थः परमवस्तुरूपः। वस्तुरूपत्वेपि न केवल-मंतरात्मैव यतो भगवान्सौंदर्यादिगुणवत्त्वेन दृश्यः। न च तत्र देशनियम इत्याह। अनंतः। सर्वव्यापकत्वात्सर्वत्रैव देशे स्थितः। न च भजने श्रमः कोपित्याह—निर्वृतः। भजनानंदमयः सन् नियतः प्रेमैव भक्तावनुसंहितोर्थः प्रयोजनं यस्य तथाभूतः सन्। यद्वा। नित्यमेतावंति नामानि ग्रहीतव्यानि एतावती कथा श्रोतव्या एतावत्यः प्रणतयः कार्या एतावत्कालं ध्यानं कर्त्तव्य-मित्येवं नियमयुक्तानि कीर्तनश्रवणादीनि यस्य तथाभूतः सन्भजेत। यत्र भजने संसारहेतोरविद्याया उपरमश्च भवेदित्यनु-संहितं फलं भक्तमते ज्ञानियोगिनोर्मते तु संसारहेतूपरम एवानुसंहितं फलम्। चकारः पादपूरणे। नियतार्थो निश्चलरूप इत्यर्थः॥ ६॥ ❀ ❀ एतदेव हरिभजनमेव। स कर्मजडः देवानां पशुरेव पशुर्यथा स्वामिव्यापारक्लिष्टः सर्वदा तिष्ठति तथा सोपीति श्रुतिपदार्थः तत्तुल्यत्वात्। वैतरणी यथा दुःखेन तीर्यते वितरणेन दानेन च तथा भवोपीति भावः॥ ७॥ ❀ ❀ एवं च वैराग्यं भक्तेरन्वयव्यतिरेकी च प्रदर्श्य पुनरपि योगिनां पूर्वोक्तधारणातोप्यतिश्रेष्ठामंतर्यामिणश्चिद्घनरूपस्य धारणामाह। केचिदिति। पूर्वोक्तवैराजधारणानिष्ठेभ्योप्यपिश्रेष्ठा इत्यर्थः। किम्वा वक्ष्यमाणवाक्यानुसारेण वैराजधारणाभ्यासेन शुद्धचित्ता एवं तदन्तर्यामिणश्चिद्घनरूपस्य धारणां कुर्युरित्यभिप्रायेणाह। केचिदिति। अत्र धारणायां चतुर्विधा योगिनः सम्भवंति। तत्र प्रथमा भगवद्रूपमनालंब्यमानाः प्राणमनोधारणावंतः श्रीभागवता संमता विगीता एव। द्वितीयाः पूर्वोक्तवैराजधारणया शुद्ध-चित्ताः 'मृणालगौरायतशेषभोग' इत्यादि तृतीयस्कंधोक्ततदंतर्यामिधारणावंतः। तृतीया वैराजधारणा नंतरव्यष्टिविराडंतर्यामि-चतुर्भुजरूपधारणावंतः चतुर्थाः। स्वत एव शुद्धचित्ताः। प्रथमत एव व्यष्टंतर्यामिचतुर्भुजधारणावंतस्त एवात्र केचिच्छब्देनोच्यंते। प्रादेशमात्रमिति प्रादेशप्रमाणहृदयध्येयत्वात्पुरुषं तावन्मात्रप्रदेशेप्यचिंत्यशक्त्या पञ्चदशवर्षीयपुरुषाकारप्रमाणम्। 'संतं वयसि कैशोरे' इत्युक्तेः। अत एव स्वामिचरणैरुक्तं हृदयप्रमाणं तत्र भगवत्युपचर्यते' इति। वसंतं तत्रांतर्यामितया कृतवासम्॥ ८॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

निश्चितेति। निश्चितं स्वरूपं येन स निश्चितस्वरूप इति॥ ६—९॥

## श्रीमद्वीरराघवव्याख्या

ननु वल्कलमन्नं तोयं वासःस्थानञ्च याञ्चादि प्रयत्नं विना कथं प्राप्येत तत्राह । चीराणीति जीर्णवस्त्रखण्डानि पथि मार्गे न संति किं ? परभृतः परान् बिभ्रति पुष्णंति फलादिभिर्येते ऽङ्घ्रिपाः भिक्षां न दिशंति वा किं न प्रयच्छन्ति किमित्यर्थः । सरितो नद्यः अशुष्यन्किं गुहाः पर्वतबिला निरुद्धाः किं ननु कदाचिदेषामलाभे किं कार्यं स्यात् तत्राह अजित इति उपसन्नान्शरणागतानजितः सर्वेश्वरः नावति न रक्षति किं ? कवयो धनेन यो दुर्मदः तेनान्धान्कार्यानभिज्ञान्कस्माद्धेतोः भजन्ति [illegible] कथमपि दुर्मदांधा न भजनीया इत्यर्थः । ॥ ५ ॥ ❀ ❀ इतरं दुःसेव्याः हरिस्तु सुसेव्य उक्तरीत्यावस्थितेरवैतृष्ण्याद्भगवत एव प्रीतिविषयत्वादित्याह एवमिति स्वचित्ते स्वकीयचित्ते एवंसिद्धे-उक्तानुसन्धानपरे सति विषयान्तरविरक्तचित्तविषयभूतो य आत्मत्वादिगुणकः यत्र च यस्मिन्सेव्यमाने संसारहेतूपरमश्च बन्धहेतुभूताविद्यानिवृत्तिश्च भवति तं भजेतेत्यन्वयः भजनीयत्वस्यौपयिकगुणानाह आत्मेत्यादि आत्माऽतःप्रविश्य धारकः धार्य्यस्य शरीरस्य जीवात्मनः धारकपरमात्मानुवर्त्तित्वं युक्तमित्यभिप्रायः यत आत्माऽतएव प्रियः निरतिशयप्रीतिविषयकः आत्मसम्बन्धादेव हि देहापत्यकलत्रादिकं सर्वं प्रियवदाभाति आत्मनोऽप्यात्मा हरिः प्रिय इति निरतिशयसुखस्वरूपत्वस्याप्युपलक्षणम् अतएवार्थः निरतिशयपुरुषार्थस्वरूपः निरतिशयसुखमेव हि परमपुरुषार्थः पुरुषार्थस्वरूपस्यापिदुर्भगत्वेऽभजनीयत्वं स्यादत आह भगवान् हेयप्रतिभटसमग्रज्ञानशक्तिबलैश्वर्य्यवीर्यतेजःसम्पन्नः स्वरूपस्य ज्ञानादिगुणानाञ्च परिच्छिन्नत्वशङ्कां व्यावर्त्तयति अनन्त इति तमुक्तविधं स्वप्राप्तिविरोधिभूताविद्यानिवर्त्तकमात्मानं निर्वृत्त इतरविषयवैतृष्ण्यान्निरतिशयसुखरूपपरमात्मोपासनाच्च सुखितः नियतार्थः नियतप्रयोजनः फलान्तरनिवृत्त इत्यर्थः उपासीतेत्यर्थः ॥ ६ ॥ ❀ ❀ एतदेवार्थान्तरचिन्तानिन्दया द्रढयति क इति तमीश्वरमनादृत्य तामिति पाठे ईश्वरचिन्तामनादृत्येत्यर्थः को लोकः ऋते पशून्पशून्विना परानुचिन्तामर्थान्तरचिन्तामसतीमशोभनां कुर्य्यान्नामपशुरेव तथा कुर्य्यात्तथा कुर्वन्पशुरित्यर्थः परानुचिन्तया वैतरण्यां यमलोकसिन्धौ तत्सदृशे संसारे इत्यर्थः । पतितं तत्र च स्वकर्मजानाध्यात्मिकादिक्लेशान् जुषाणं सेवमानं पश्यन् कः कुर्यादिति पूर्वेण सम्बन्धः ॥ ७ ॥ ❀ ❀ एवं फलान्तरतदुपायनिवृत्तस्य भागवद्ध्यानप्रकारमाह केचिदित्यादिना भगवदुपासनाबाहुल्येन उपासकबाहुल्यात्केचिदित्युक्तिः ननु स्वासम्मतत्वेन स्वदेहस्यान्तर्मध्ये यो हृदयावकाशस्तत्र वसन्तं प्रादेशमात्रं प्रादेशसम्बन्धिनी मात्रा वपुः परिमाणं यस्य तं हृदयान्तःप्रादेशसम्बन्धिमात्रया परिच्छिन्नम् । "यस्त्वेतमेनं प्रादेशमात्रमभिविमानमात्मानं-वैश्वानरमुपास्ते" इति त्रैलोक्यशरीरकेऽप्युपासकानुग्रहाय उपासनायाः प्रदेशसम्बन्धिमात्रया परिच्छिन्नत्वश्रवणात् । हृदयकमलस्यांगुष्ठमात्रत्वाच्च एते तर्जन्यंगुष्ठविस्तारं प्रादेशस्तत्परिमितमित्ययुक्तमिति बोद्धव्यं कञ्जङ्कमलं रथाङ्गञ्च क्रन्दक्षिणबाहुभ्यांङ्कअरथाङ्गे वामाभ्यां शङ्खगदे बिभ्रतमित्यर्थः एवम्विधं पुरुषं केचिद्योगीश्वराः धारणया स्मरन्ति धारणापूर्वकमुपासत इत्यर्थः ॥ ८ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

ननु भवादृशानां योगिनां क्षित्यादिना शरीग्यात्रासिद्धावप्यपरिपक्वयोगिनां पुंसां कथमुपभोगः सम्पत्स्यत इत्यत्राह चीराणीति "पटचीराणि गृहिभिर्देयानि पथि तोरणे दरिद्राणाञ्च भिक्षूणामाच्छादनकराणि च" इति स्मृतेः पथि तोरणे गृहस्थैर्निहितानि चीराणि जीर्णवस्त्राणि मूषकादिप्रभिन्नानि वा । न सन्ति किं भोजनार्थमिति चेत्परान् फलपाकादिना बिभ्रतीति परभृतः अंघ्रिपा वृक्षाः फलादिना नो दिशंति वा दिशंत्येव शयनार्थमिति चेत् गुहा रुद्धाः पिहिताः किं केनचिदिति शेषः गुहासु सिंहादिभयेन कथं वासः सम्पद्यत इति तत्राह किमिति कृष्णोऽवधूतानां धूलिधूसरांगानां सुहृन्न किम् । सुहृदेव अतो वस्त्राद्याशया कवयो धनादिदुर्मदेनांधान्विवेकचक्षुरहितान् राजादीन्कस्माद्भजन्ति न भजंत्येव अतो मुमुक्षुणा यदृच्छयालब्धाशनादिना भाव्यमिति भावः ॥ ५ ॥ ❀ ❀ इदानीमुक्तानुष्ठानपरिपाकप्रकारमाह एवमिति एवमुक्तप्रकारेण यदृच्छया लब्धाशनादिना वृत्तिं दृष्ट्वा प्रसन्नस्य स्वतः स्वतंत्रस्य हरेः प्रसादात्स्वचित्ते स्वाधीनतया वर्त्तमाने सति भगवानैश्वर्य्यादिगुणसमुद्रोऽनन्तः परिच्छेदशून्यः आत्मा परमात्मा देहपुत्रादिभ्योऽत्यंतं प्रियोर्थ इति कृत्वा निर्वृतः समुद्भूतरोमाञ्चो नियतार्थ❀ "एतमितः प्रेत्याभिसम्भावितास्मि" इति निश्चितार्थ पुरुषस्तं भगवन्तम्भजेत । कदाचिदपि तद्भजनं न मुञ्चेत् । ततः किं फलमत्राह संसारेति । यत्र यस्मिन्सेव्यमाने सेवकस्य संसारहेतूनामविद्यादीनामुपरमः । अविद्यादीनां सद्भावे सोऽस्तीति शक्यशङ्का त एव न सन्ति यत इति शङ्कमानोऽसुरप्रकृतिरिति भावः तदेतत्प्रेय इत्यादिश्रुतिसिद्धं हरेः प्रियार्थत्वञ्च । न केवलं संसारहेतूपरमः फलम् । किन्तु निर्दुःखानंदानुभवलक्षणमोक्षप्राप्तिश्चेति च शब्दः ॥ ६ ॥ ❀ ❀ भजनापरपर्यायोपासनं गुणोपसंहारेण कार्य्यमिति यदतस्तद्गुणकथनपूर्वकं तदेवोपासनं स्पष्टीकुर्वन् विपक्षे बाधकमाह स सर्वविदिति "प्राण एवैतस्मिन्पुरे जाग्रति" इति श्रुतेः पञ्चवृत्तिरेको मुख्यप्राण एव यथासुप्तजनस्येक्षिता द्रष्टा । तथा स हरिः सर्वान्वेत्तीति सर्ववित् हृदिस्थित्वानुभूयथेष्टानंदानुभवनात् सर्वो गुणपूर्णः

---

❀ इतश्चरमदेहात् प्रेत्य मृत्वा एतं हरिं अभि आभिमुख्येन सम्भावितास्मि सम्यक् यथायोग्यं प्राप्तो भविष्यामीति नियतार्थ इति ।

आत्मा स्वामीत्येवं गुणानुपसंहृत्य सत्यं सर्वतः सारमानन्दनिधिं तम्विष्णुम्भजेतोपासीत आधिव्याध्यादिसमुद्भवेऽप्युपासनं न हातव्यमित्याशयेनोक्तं सर्वात्मनेति अतोऽन्यतः परमात्मानुपासनेऽपि आत्मघातः अहितकरणादिना स्वात्महननाख्यदोषापत्त्या नित्यदुःखतमप्राप्तिः स्यादित्यन्वयः च शब्दस्तत्तद्योग्यतानुसारेणेत्यस्मिन्नर्थे "यथैकस्तु बहून्सुप्तानसुप्तः पश्यति प्रभुः यथेष्टभवनाद् विष्णुरनुभूः परिकीर्त्तित" इत्यादेरुक्त एवार्थ इति । स्वेच्छयानुकूलविग्रहग्रहणाद्वाऽनुभूः अनेन प्राणेन दत्तानि चेष्टालक्षणानि कर्माणीत्यानन्दशब्देन कर्माण्युच्यन्ते तेषां फलपर्यन्तन्निधायकत्वेन निधिपालनत्वात् स्वामित्वाद्वाऽऽनन्दनिधिर्हरिस्तञ्च ॥ ७ ॥ ❀ ❀ भगवदुपासनामकुर्वाणस्य पशोरपि वैलक्षण्यं नास्तीत्याह कस्तमिति नरके विगततरणत्वाद्वैतरणी नाम नदी या तस्यां हरेरनुपासनाख्यदोषात्पतितं स्वकर्मजान्स्वकृतकर्मसमुद्भूतान् परितापान् सर्वतोदिशमायातान् दुःखविशेषान् जुषाणं भुंजानं जनं गुरुशास्त्रोपदेशद्दष्टया पश्यंस्तुशब्दसूचिततादृशदुःखनिवर्तकालं बुद्धिगोचरमुखप्रदं हरिं च पश्यन् को विवेकी तं भगवंतमनादृत्यासतीमशुभां परानुचिंतामितरविषयामुपास्तिलक्षणां स्मृतिं युंज्यात् पशुत्वं विवेकबुद्धिराहित्यमृते । यदि युंज्यात्तर्हि स पशुरेव न विवेकीत्यन्वयः "चतुर्वेद्यपि यो विप्रो वासुदेवं न विंदति वेदभारभराक्रांतः स वै ब्राह्मणगर्दभ" इति योग्यतातारतम्येनाधिकारिणां बहुत्वात्स्थूलरूपोपासनायोग्यानां तदुपास्तिमभिधायाधुना स्वदेहहृदयकमलकर्णिकानिकेतनात्मोपासनायोग्यानां तदुपासनं विधत्त केचिदिति केचिदात्मोपासनायोग्याः स्वदेहांतर्हृदयावकाशे वसंतं प्रादेशमात्रं प्रादेशपरिमाणम् । कंजं पद्मं रथांगं सुदर्शनं शंखं पांचजन्यं गदां कौमोदकीं धारयतीति कंजरथांगशंखगदाधरस्तंधारणया तैलधारावदखंडितमनोवृत्त्या स्मरंतीत्यन्वयः ॥ ८ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या ।

एवं तत्र तत्र भगवत्येव तात्पर्य्ये सति स्वचित्ते स्वत एव सिद्धः श्रीभगवानेव परमपुरुषार्थतया सेव्यः कि तत्तदाग्रहेणेत्याह एवं स्वचित्ते इति तस्माद्भारत सर्व्वात्मा इत्यादिना यदुक्तं तदेव पुनर्निर्णीयत इति भावः । चशब्देनानुषङ्गिकमेवाविद्यानिवृत्तिः फलमिति बोधितम् ॥ ६ ॥ ❀ ❀ व्यतिरेकेण तदेव द्रढयति कस्तामिति ॥ ७ ॥ ❀ ❀ अथ तत्राप्येकदेशिनां मतमाह केचिदित्यादिसार्द्धचतुष्कैः व्यष्टयन्तर्यामिण एव धारणेयम् । गर्भोदकशायिरूपसमष्टयन्तर्यामिधारणा तु तृतीयस्कन्धे तत्तद्वर्णनानुसारेण ज्ञेया । सैव सूचिता तं सत्यमानन्दनिधिं भजेत इत्यनेनेति ॥ ८—११ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या ।

ननु शीतत्राणोपायः कः तत्र साक्षेपं कुध्यन्निवाह । चीराणि वस्त्रखण्डानि । ननु ततोऽपि जाठरानलो दुर्व्वारः तत्र तथैवाह । अङ्घ्रिपा अपि किं नैव भिक्षां दिशन्ति ददति मनुष्याः खलु मा ददतु नामेति भावः यतः परान् बिभ्रति फलादिभिः पुष्णन्तीति । तर्हि पानार्थं जलन्तु मृग्यमेवेति चेत् धिक् तव बुद्धिमित्याह सरितोऽपीति । ननु शिलावर्षात् त्राणार्थं पर्णशाला कदाचिदपेक्षितव्यैवेति चेत्तत्राह रुद्धा इति । गुहां प्रविश्य व्याघ्रादयः खादन्ति चेत्तत्राह किमजित इति । व्याघ्रादीनामपि स एवान्तर्यामी भक्तवत्सलस्तान् कथं तत्र प्रेरयिष्यतीति भावः ॥ ५ ॥ ❀ ❀ ननु तर्हि भजनीयेश्वरस्य तद्भजनोपकरणानां चान्वेषणं तु कर्त्तव्यमेव योगिभिरिति चेत्तत्राह । स्वचित्ते स्वत एव सिद्धः यतः आत्मा चित्ताधिष्ठाता वासुदेव इति नाप्यावाहनादिश्रम इति भावः । किञ्च तस्य भजनं स्वत एव भवितुमुचितमित्याह प्रिय इत्यादिभिश्चतुर्भिर्विशेषणैः । प्रियः स्वभावत एव प्रेमास्पदम् न च प्रेमास्पदत्वेऽपि पतिपुत्रादिरूपोऽनर्थः । यतोऽर्थः परमवस्तुरूपः । वस्तुरूपत्वेऽपि न केवलमन्तरात्मैव । यतो भगवान् सौन्दर्य्यादिगुणवत्त्वेन दृश्यः न च तत्र देशनियम इत्याह । अनन्तः सर्व्वव्यापकत्वात् सर्व्वत्रैव देशे स्थितः । न च भजने श्रमः कोऽपीत्याह । निर्वृतः भजनानन्दमग्नः सन् । नियतः प्रेमैव भक्तावनुसंहितोऽर्थः प्रयोजनं यस्य तथाभूतः सन् । यद्वा नित्यमेतावन्ति नामानि गृहीतव्यानि एतावती कथा श्रोतव्या एतावत्यः प्रणतयः कर्त्तव्याः एवत्कालं ध्यानं कर्त्तव्यमित्येवं नियमयुक्तानि कीर्त्तनश्रवणादीनि यस्य तथाभूतः सन् भजेत । यत्र भजने संसारहेतोरविद्याया उपरमश्च भवेदित्यनुसंहितं फलं न भक्तमते ॥ ज्ञानियोगिनोर्मते तु संसारहेतूपरम एवानुसंहितं फलम् । चकारः पादपूरणे नियतार्थः निश्चलस्वरूप इत्यर्थः ॥ ६ ॥ ❀ ❀ व्यतिरेकेण तद्वाह क इति परस्य हरेरनुचिन्तां तां प्रसिद्धां भक्तिम् अनादृत्य पशून् कर्म्मजडान् विना पशुरेव स देवानाम् इति श्रुतेः असतीं विषयचिन्तां को नाम कुर्यात् ॥ ७ ॥ ❀ ❀ एवञ्च वैराग्यं भक्तेरन्वयव्यतिरेकौ च प्रदर्श्य पुनरपि योगिनां पूर्व्वोक्तधारणातोऽप्यतिश्रेष्ठामन्तर्यामिणश्चिद्घनरूपस्य धारणामाह । केचिदिति पूर्व्वोक्तवैराजधारणानिष्ठेभ्योऽप्यतिश्रेष्ठा इत्यर्थः । किं वा वक्ष्यमाणवार्त्तानुसारेण वैराजधारणाभ्यासेन शुद्धचित्ता एव तदन्तर्यामिणश्चिद्घनरूपस्य धारणां कुर्य्युरित्यभिप्रायेणाह केचिदिति । अत्र धारणायां चतुर्विधा योगिनः सम्भवंति । तत्र प्रथमा भगवद्रूपमनालम्बमानाः प्राणमनोधारणावन्तः श्रीभागवता सम्मता विगीता एव । द्वितीयाः पूर्वोक्तवैराजधारणया शुद्धचित्ताः मृणालगौरायतशेषभोगेत्यादितृतीयस्कन्धोक्ततदन्तर्यामिधारणावन्तः । तृतीया वैराजधारणानन्तरव्यष्टिविराडन्तर्य्यामिचतुर्भुजरूपधारणावन्तः । चतुर्थाः स्वत एव शुद्धचित्ताः । प्रथमत एव व्यष्टयन्तर्यामिचतुर्भुजधारणावन्तस्त एवात्र केचित् शब्देनोच्यंते । प्रादेशमात्रमिति

प्रादेशप्रमाणहृदये ध्येयत्वात्। पुरुषं तावन्मात्रप्रदेशेऽप्यचिन्त्यशक्त्या पञ्चदशवर्षीयपुरुषाकारप्रमाणं, सन्तं वयसि कैशोरे इत्युक्तेः। वसन्तं तत्रान्तर्यामितया कृतावासम्॥ ८॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

कवयो धनदुर्मदांधान्कस्माद्धेतोर्भजन्ति कविभिस्ते न भजनीया इत्यर्थः। ननु तर्हि वस्त्रखंडादिलाभः कुतो भवेदत्राह चीराणि किम्पथि न सन्ति परान्पुष्णन्ति ये ते अंघ्रिपाः वृक्षाः दयादिधर्माँघ्रिपालकाः वा भिक्षां किं नैव दिशन्ति नैव प्रयच्छन्ति सरितः गंगायमुनाद्याः नद्यः शिवजलाः अशुष्यन् किं निर्जला जाताः किम् गुहाः गोवर्द्धनादिगिरिदर्य्यः रुद्धाः किम् किञ्च अजितः श्रीकृष्णः उपसन्नान् किन्न अवति न रक्षति अपि तु रक्षत्येव॥ ५॥ ❀ ❀ एवं नियतः अनायाससिद्धः देहनिर्वाहरूपो ऽर्थप्रयोजनं यस्य सः निर्वृतः वैराग्यसुखसंपन्नः सन् तं भजेत यत्र भजने संसारहेतोः कार्यकारणरूपप्रकृतिसंगस्योपरमश्च भवति चकारस्तत्प्राप्तिं समुच्चिनोति "मद्भक्ता यांति मामपि" इति श्रीमुखवचनाद् विद्ययाऽविद्यायां निवृत्तायामुपास्योपासकस्वरूपयाथात्म्यज्ञानवान् श्रवणमनननिदिध्यासनावृत्त्या जन्ममरणाख्यं संसारहेतोः प्रकृतिसंबंधाद्विमुक्तो भवतीत्यर्थः तदावृत्तिमाह भगवान् सूत्रकारः आवृत्तिरसकृदुपदेशात्॥४।१।१ इति भजनीयं दर्शयति भगवान् स्वाभाविकषडैश्वर्यसंपन्नः। अनेन तद्वत्त्वैश्वर्यवंतो व्यावृत्ताः प्रियोऽर्थः अनेन प्रियपदार्थांतराभाव उक्तः आत्मा "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्" इति वक्ष्यमाणात् कृष्णाख्य आत्मपदार्थः भजनीयो न तु तदात्मकः जीवात्मेत्यर्थः स्वचित्ते स्वत एव सिद्धः अनेन सर्वत्र स्वतः सिद्धत्वेन तत्सन्निहिततादर्शिता अनंत इत्यनेन तदपरिच्छिन्नतोक्ताय एवंभूतस्तमिति योजना॥ ६॥ ❀ ❀ भगवद्भजनहीनकर्मनिष्ठजननिंदया भजननिष्ठां द्रढयति क इति वैतरिण्यां पतिते स्वकर्मजान्परितापान् जुषाणं सेवमानं जनं शास्त्रद्वारा पश्यन् वैतरणीतुल्यायां संसृतौ वा पतितं पश्यन् यत्र संसारहेतूपरमः तां भजननिष्ठामनादृत्य असतीमशोभनां परानुचितां भगवदितरचितां "पशुरेव स देवानाम्" इति श्रुतिप्रसिद्धं कर्मजडं विना पशुतुल्यं विवेकहीनं जनं विना वा को नाम कुर्यात् अनेन नित्यबद्धो जीवः सूचितः॥ ७॥ ❀ ❀ तामेव भजननिष्ठामाह केचिदिति षड्भिः। तत्र पञ्चभिर्धारणामेकेन ध्यानम् केचिद्भागवताः स्वदेहस्यांतर्मध्ये योवकाशस्तत्र वसंतं प्रादेशमात्रं प्रादेशस्तर्जन्यंगुष्ठमात्रा सा मात्रा परिमाणं यस्य तं श्रुतौ तु "अंगुष्ठमात्रं पुरुषं मध्ये आत्मनि संस्थितं तं ज्ञात्वा मृत्युमत्येति नान्यः पंथा विमुक्तये" इत्युक्तम् उभयत्र हृदयकमलापेक्ष्यं व्यापकस्यैव सूक्ष्मत्वं विवक्षितम्। चतुर्भुजं कंजरथांगशंखगदाधरं पद्मचक्रशंखगदाधरं धारणया स्मरंति॥ ८॥

## श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

ननु सर्वत्र सर्वे पदार्था अन्यदीयाः साधनेनैव सिद्ध्यन्ति। क्षितिरपि कस्यचिद्भवति। अतस्तदाज्ञया स्थातव्यं तदनुरोधेन च। देहश्च पराधीनः। वल्कलादिकमपि साधनसाध्यम्। अतः सर्वदा सर्वनैरपेक्ष्यस्याऽशक्यत्वात्किञ्चित्सापेक्षतायां कर्त्तव्यायां "मग्नश्चेत्पातालं विशेदि"ति न्यायेन सर्वथा सापेक्षतैवाऽस्तु। तत्राऽऽह—**चीराणि किं पथि न सन्तीति**। चीराणि वस्त्रखण्डाः। पथीति तत्सम्पादनार्थमप्यन्यत्र न गन्तव्यमिति सूचितम्। अङ्घ्रिपा वृक्षाः। परभृतः परानेव बिभ्रति न तु तत्फलैस्तेषामुपकारः कश्चन। ते हि पक्वं फलं स्वत एव त्यजन्ति। ईषत्पक्वं तु चालनेन। ते तु देवतारूपा वैष्णवाश्च। भगवज्जीवार्थं जगतः सृष्टत्वादेकपरित्यागेऽन्यदीयं तद्भवति। अतश्चीराण्यपि भगवदीयानि। मार्गाश्च भगवदीयाः। गतिसाधनत्वात्। अतस्तेऽपि किं वस्त्राणि न प्रयच्छन्तीति योजनीयम्। पादसम्बन्धात्तद्दानं लक्ष्यते। गतमात्रे च क्षणविलम्बाद्वा फलदानाद्भिक्षादातृत्वम्। तेषां हस्तस्याऽशुद्धत्वं च निर्धारितम्—**अङ्घ्रिपा इति**। जलातिरिक्तं च न भक्षयन्ति जलं चाऽङ्घ्रिभिरेव पिबन्ति। आतपादिभिश्च शाखाः शुद्धाः। वनस्थाः सहिष्णवश्च परार्थैकान्तजीविनश्च। अतस्तेष्वेव माधुकरी कर्त्तव्या। जलार्थमपि न लौकिकापेक्षेत्याह—**सरितोऽप्यशुष्यन्निति**। तदा हि कूपाद्यपेक्षा भवति। सरितां बहुत्वं महत्त्वं च सर्वप्रसिद्धम्। शीतवातातपवर्षानिवारणार्थमपि नाऽन्यापेक्षा कर्त्तव्येत्याह—**रुद्धा गुहा इति**। [1]तासां निरोधस्याऽश्रवणात्। ननु कदाचित्सर्वाभावे गुहासु च व्याघ्रादिभये किं कर्त्तव्यम्? तत्राऽऽह—**किमजितोऽवतीति**। केनाऽपि न जितः। अतिसमर्थः। उपपन्नान् शरणागतान्। किं नाऽवति। आग्रहेण सर्वत्र कथनं तथाऽधिकारिणोऽपि तथा न कुर्वन्तीति। एवं सर्वकार्येष्वपि सिद्धेषु ये अधिकारिणोऽपि भूत्वा धनदुर्मदान्धान् भजन्ति धनेन यो दुष्टो मदो गर्वस्तेन अन्धान् आगतस्वरूपानभिज्ञान् कस्माद्धेतोर्भजन्तीति न जानीमः॥ ५॥ ❀ ❀ एवं प्रसङ्गादन्यानुपदिश्य तादृशेन निरपेक्षेण यत्कर्त्तव्यं तदाह—**एवं स्वचित्त इति**। [2]भजनीयोपार्जनक्लेशाभावायाऽऽह—**एवं स्वचित्त इति**। [3]एवं सर्वप्रकारेण सर्वनैरपेक्ष्यं योऽन्तःकरणप्रेरणया साधयति सोऽन्तःकरणे तिष्ठतीत्यविवादम्। अत एवमस्माद्धेतोरेवम्प्रकारेण वा स्वचित्ते स्वाधीने चित्ते स्वत एव य[4]त्नव्यतिरेकेणैव सिद्धे सति सिद्धौ वा तं भजेतेति सम्बन्धः। तादृशस्य भगवतो भजनीयं रूपं वक्तुं सर्वपुरुषार्थहेतुभूतपञ्चधर्मवत्त्वमाह—**आत्मेत्यादिपदैः**। आत्मत्वात्प्रिय-

१ तेषामिति ख घ। २ भजनीयस्येति ख ३। एवं प्रकारेणेति घ ४ यत्र व्यतिरेकेणेति क। यत्न व्यतिरेकेणेति ब।

त्वम्, प्रियत्वादर्थत्वम्, अर्थत्वाद्भगवत्त्वम्, भगवत्त्वादनन्तत्वमिति हेतुहेतुमद्भावोऽपि विशेषणानाम्। प्राणिनां 'सेवौपयिकरूपाणि पञ्च। स्वात्मा देहो धनमीश्वरो नित्यकर्म च। तत्र भगवान् पञ्चरूपोऽपीत्याह। प्रथमतस्तेषामात्मा। वस्तुतोऽधिकारिणं प्रति तत्त्वेन प्रकाशमानोऽपि। तस्मादवश्यं सेव्यः। उपपत्त्या सेवनमुक्तम्। रुच्या सेवनमाह—प्रिय इति। यथा प्राणो यथा वा देहः प्राणिनां प्रीतिविषयो भवति। आत्मत्वेन प्रीतिविषयत्वे प्राप्तेऽपि पुनर्यत्प्रीतिविषयकथनं प्रीतेः परिच्छिन्नत्वज्ञापनार्थम्। अतः सा प्रीतिरेकत्र विनियुक्ता नाऽन्यं तथात्वेन गृह्णाति। अतः स[2]र्वरूपे एकस्मिन्नेव प्रीतिः कर्त्तव्या। अन्यथा खण्डश एकस्मिन्नेकरूपे वा क्रियमाणा न सर्वपुरुषार्थं साधयेत्। प्रीतिस्तु भगवद्धर्मः। भगवान् सर्वेभ्यो जीवेभ्यस्तं खण्डशो दत्तवान् सुखार्थम्। अतो यत्रैव प्रीयते तत एव सुखं भवति। ततः स्वसुखमेव स्वस्य भवतीत्युक्तं भवति। तद्यत्र विषयोऽपि सुखरूपो भवति तत्र तद्दाने महत्सुखं भवेत्। अतो देहादिभ्यः प्रीतिमाच्छिद्य भगवति स्थापयन्त्विति भावः। अर्थो धनरूपः। यावत्कार्यं तेन भविष्यति तत्सर्वं भगवता भविष्यतीति। अर्थशब्दस्य पञ्चार्थवाचकत्वात्पञ्चरूपोऽपि[3] भगवान्। सर्ववेदार्थः सर्वधनरूपः सर्ववस्तुरूपश्च सर्वनिवृत्तिरूपेण सर्वनिवर्त्तकश्च। भजने चैते धर्मा भजनीयविषयतावच्छेदकत्वेन गुणोपसंहारन्यायेन ग्राह्याः। तथा सति सर्वात्मकतया भजनं भवति। किञ्च। भगवान् षड्गुणैश्चर्यसम्पन्नः। ऐश्वर्याद्यर्थमपि स्वस्य सेवनं भवति। श्रीशब्देनाऽत्र शोभा ग्राह्या। किञ्च। अनन्तो देशकालापरिच्छिन्नो नित्यः। एतावता पञ्चविंशतितत्त्वानि षड्विंशकश्च महाविष्णुः। षड्विंशतिप्रकारेण सेवितव्यः। तत्राऽऽत्मा द्विविधो जीवब्रह्मभेदेन। प्रिय एकादशविधः। एकादशेन्द्रियभोग्यत्वात्। अर्थः पञ्चविध उक्तः। भगवान् षड्विधः। अनन्तो द्विविधश्च। एवं सर्वप्रकारेण सेवितव्य इत्यर्थः। सेवकस्याऽधिकारिविशेषणभूतधर्मद्वयमाह—**तं निवृ[4]तो नियतार्थ** इति। एकमन्यनिवृत्त्यर्थम्। एकं च भगवति दार्ढ्यार्थम्। इमौ च धर्मावावश्यकौ। अन्यथा सर्वप्रकारेण सेवितोऽपि न पुरुषार्थो भवति। सर्वतो निवृत्तः। अन्यथा ब्रह्मास्त्रन्यायो भवेत्। नियतो भगवत्येवाऽर्थः पुरुषार्थो यस्य। भगवान् वा। अन्यथा "**संशयात्मा विनश्यति**"। यद्यपि भगवानेव फलं न चाऽन्यदपेक्ष्यते[5] तथाप्यानुषङ्गिकं फलं संसारहेतोरज्ञानस्य भगवद्वैमुख्यस्य वा निवृत्तिर्भवति। चकारात्सायुज्यादि॥ ६॥ ❀ ❀ एवं भजनस्य सर्वोत्तमत्वं प्रतिपाद्य तादृशस्याऽकर्तृन् शोचन्नाह—**कस्तामिति**। ता भगवतः परामनुचिन्तां ध्यानेन[6] रूपचिन्तनाम्। ऋते पशून् विना पशून्। अनादृत्य अकृत्वा। असतो चिन्तकनाशिकां देहादिचिन्ताम्। **नामेति** प्रसिद्धे। युञ्ज्यात् स्त्रियमिव योजयेत्। अज्ञानाद्भवतु नाम योजनम्। तत्कृतमपकारं ज्ञात्वा कस्तां युञ्ज्यात्। अपकारं गणयति—**पश्यन् जनमिति**। यथा भगवद्भजने भगवदीयाः षड् गुणाः स्वस्मिन् सङ्क्रमन्ते तथा देहादिभजने तद्गताः षड् दोषाः सङ्क्रमन्ते। उत्पत्तिर्नाशो दुःखं कर्माणि परितापो हीनत्वं च। तदाह। जनमुत्पद्यमानम्। पतितं स्वस्थानाच्च्युतम्। मृतमिति यावत्। वैतरिण्यां यमद्वारस्थितनद्याम्। अनेनाऽसतीपरिग्रहे मृतो वैतरिण्यां पततीति सूचितम्। स्वकृतविविधकर्मफलं च सेवमानम्। परितापाः शोकादयः। अतः को वा अमृतं विहाय विषं [7]भक्षयतीति प्ररोचनार्थं न बहु वक्तव्यमिति भावः॥ ७॥ ❀ ❀ एवं सर्वार्थनिश्चयपूर्वकं भक्तिमार्गानुसारेण भगवद्विषयकं श्रवणादिकं साधनं कर्त्तव्यमिति सिद्धम्। अत्र केषाञ्चिन्मते सर्वनिर्द्धारो व्यर्थः। मुख्यभगवद्रूपं चतुर्भुजादि आनन्दमात्रकरपादमुखोदरादिरूपं ज्ञात्वा भजनं कर्त्तव्यमिति धारणायां स्थूलस्थाने भजनीयं भगवत आनन्दरूपं योजयन्ति। केचिदिति वचनान्नाऽत्र सर्वसम्मतिः अनेन ह्यानन्दाविर्भाव एव क्रियते न तु दोषनिवृत्तिः। यद्यपि नान्तरीयकपापादिनिवृत्तिः क्रियते तथापि सर्वभावत्वसम्पादकत्वाभावान्न रागादिनिवृत्तिः। भगवतो रूपाणि चत्वारि ध्येयानि। अङ्गुष्ठमात्रं, प्रादेशमात्रं, पुरुषमात्रं, पूर्वोक्तञ्च। तत्र स्वनैकत्र्यं प्रादेशमात्रस्यैवेति। वैश्वानरविद्यायां च सिद्धत्वात् शुद्धे च स्वहृदये मातुं शक्यत्वात्। अथवा। "अत्यतिष्ठद्दशाङ्गुलमि"ति पुरुषादतिरिक्तं रूपमतिरेकार्थं भजन्ते। अतिरिक्तमपि पुरुषाकारम्। वसन्तं तृतीयं पुरुषम्। तस्य स्थू[8]लरूपं वर्णयति—**चतुर्भुजमिति**। कञ्जं कमलम्। रथाङ्गं चक्रम्। हस्तचतुष्टयेऽप्यायुधधारिणम्। अनेन सर्वतो रक्षा सूचिता। प्रवेशेऽपि तत्त्वानि तत्र स्थापयित्वा स्वयं प्रविशेदिति। धारणया पूर्वोक्तया। स्मरन्तीति विद्यमानत्वान्नाऽन्तर्मनसा कल्पनमपे[9]क्ष्यते॥ ८॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

**चीराणी**त्यत्र। **देहश्च पराधीन** इति। 'देहः किमन्नदातुर्वे' ति न्यायात् पराधीन इत्यर्थः। **अत** इति सर्वस्य साधनसापेक्षत्वेन **विवृतौ**। ननु मार्गे चीरसत्त्वेपि स्वतस्तद्ग्रहणे बाधकमपि संभाव्यत इति कथं निस्तार इत्यत आहुः **अतस्तेपीति**। भगवदीयत्वात् भगवदीया अपि। तथा च, 'दिशन्ति ने' ति वाक्यस्यात्रापि योजनेऽस्माद्दोषान्निस्तार इत्यर्थः। ननु दानस्य चेतनधर्मत्वादचेतने मार्गे कथं तत्संभवः इत्यत आहुः **पादे**त्यादि। "सर्वेषामध्वानां पादावेकायनमि" ति श्रुत्युक्तादचेतनत्वेपि पादसम्बन्धात्तद्दानं लक्ष्यते। करणतया चीरदानं लक्ष्यते। तथा च; यथा परम्परितचेतनसम्बन्धेन दव्याहुतिदानं, तथा श्रौतज्ञा-

१ सेवोपयिकेति ख. सर्वौपयिकेति घ। २ स्वरूपे इति ख। ३ अपि नास्ति ख। ४ निवृत इति ख. ग. घ। ५ अपेक्षत इति ख। ६ ध्यानरूपचिन्तनामिति क। ७ भक्षयिष्यतीति ख. घ.। ८ मूलरूपमिति ख. ग. घ.। ९ अपेक्षते इति ग. घ.।

पकोपलब्ध्या पथिभिर्वस्त्रदानमपि युज्यत इति तेपि किं वस्त्राणि न प्रयच्छन्तीति वाक्ये गौण्या दानसम्भव इत्यर्थः । 'न च लक्षणां नैव वक्ष्यामी' ति प्रतिज्ञाभङ्ग इति वाच्यम्, तस्याः परोक्षवादभिन्नविषयत्वादत्र च परोक्षवादात् । कथमत्र परोक्षवादप्रत्यभिज्ञेति चेत्, तुरीयचरणादिति वदामः । धनमदान्धतद्भक्तौ प्रतिपद्यमर्थः प्रत्यक्षः स्यात्तेपि प्रतिबुध्येरन्, अप्रतिबोधाच्च परोक्षः इति निश्चीयते । अत एव नद्योऽशुष्यन् रुद्धपदेषु विपरीतलक्षणापि सङ्गच्छते । यत्तु काक्वात्र निर्वाहान्नात्र लक्षणेत्याह कश्चित्तन्मन्दम् । किम्पदवैयर्थ्यापत्तेः । न च तत्काकुबोधकमिति वाच्यं, विनिगमकाभावात्, वैपरीत्यस्यापि सुवचत्वात्, शब्दविकारस्यैव काकुत्वेन तस्यावृत्त्यन्तरापाताच्च । न च सा चेष्टाविशेष इति वाच्यं, 'काकुः स्त्रियां विकरो यः शोकभीत्यादिभिर्ध्वनेरि'ति कोशेन तस्यां ध्वनिधर्मत्वबोधनाच्चेष्टाविशेषाभिव्यञ्जितशब्दधर्मत्वस्यैवादरणीयत्वात् । न चास्तां ध्वनिधर्मत्वं, तथापि पदधर्मत्वान्न वृत्त्यन्तरत्वापत्तिरिति वाच्यं, ध्वनिधर्मत्वेपि पदनिष्ठध्वनिधर्मत्वेन पदधर्मत्वानपायात् । अन्यथा घण्टादिध्वनावपि काक्वापत्तेः । तस्मात्किमादिपदैस्तात्पर्यार्थानुपपत्तिबोधने काकुः सहकारिणी भवतु नाम, अभिनयादिवत्, न तु शक्यविपरीतार्थबोधने, अत्र शक्तेति लक्षणावश्यक्येवेति दिक् । अत्र एव पूर्वश्लोकेपि लक्षणा न दोषाय । ननु वृक्षेषु भिक्षादातृत्वं कथमवधेयमित्यत आहुः गतेत्यादि । तथा च, तत् साधर्म्यादवधेयमित्यर्थः ॥ ५ ॥ ❀ ❀ एवमित्यत्र । अस्माद्धेतोरिति । उपार्जनक्लेशराहित्यादित्यर्थः । अत इति परिच्छिन्नत्वात् । अत इति एकग्राहित्वात् । ननु दक्षिणेऽनेकमहिलासमरागित्वदर्शनान्नेदं साम्प्रतमित्यत आहुः अन्यथे-त्यादि । अन्यथा दक्षिणदृष्टान्तेन प्रीतौ सर्वविषयत्वाङ्गीकारे । खण्डशः क्रियमाणेत्यादि स्पष्टम् । ननु 'तस्य तदेव हि मधुर' मिति न्यायात्तथाकरणेपि को दोषः इत्यत आहुः प्रीतिस्त्वित्यादि । तत इत्यादेरेव विवरणं तत इत्यादि । अतः भगवतः सहजप्रिय-त्वात् । चेति आनन्दनिधित्वलक्षणप्रयोजनरूप इत्यर्थः । अत्रेति स्वेष्टैश्वर्यादौ एतावतेति पञ्चात्मकत्वेन ॥ ६ ॥ ❀ ❀ कस्तामित्यत्र । एवमिति सप्तपद्योक्तप्रकारेणेत्यर्थः ॥ ७ ॥ ❀ ❀ केचिदित्यत्र । अत्रेति साधननिर्द्धार इत्यर्थः । विवृतौ, तत्रेति आयुधेषु । स्वं जीवः । सूर्येन्दुवाय्वग्न्ययगममिति । 'रविमध्ये स्थितः सोम' इति मन्त्रे तथा सिद्धमित्यर्थः ॥ ८ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

ननु शीतनिवारणार्थं वस्त्रमन्नं जलं वासस्थानं च याच्ञादिप्रयत्नं विना कथं प्राप्यते तत्राह—चीराणीति । चीराणि जीर्णवस्त्रखण्डानि पथि मार्गे पतितानि किं न सन्ति ? तान्येव गृहीत्वा तैः शीतनिवारणादि कर्त्तव्यमित्यर्थः । परान् बिभ्रति फलादिभिः पुष्णन्ति ते परभृतोऽङ्घ्रिपाः वृक्षाः किं भिक्षां न दिशन्ति नैव प्रयच्छन्ति फलन्ति ? फलानि गृहीत्वा तैर्निर्वाहः कर्त्तव्य इत्यर्थः । सरितो नद्यः किमशुष्यन् ? नदीतीरं गत्वा जलपानं कर्तव्यमित्यर्थः । गुहाः पर्वतबिलानि किं रुद्धाः निरुद्धाः ? तत्र स्थित्वा शीतातपवातवर्षानिवारणं कर्त्तव्यमित्यर्थः । ननु सर्वत्र सर्वं नास्ति कदाचित्कुत्रचित्कस्यचिदलाभे तत्कार्यं कथं निर्वहेदित्या-शङ्क्याह—अजित इति । केनापि न जितोऽतिसमर्थः स्वतन्त्रः भगवान् उपसन्नान् शरणागतान् किं नावति न रक्षति ? सर्वथा समर्थेन भक्तवत्सलेन भगवता शरणागतस्य सर्वदा सर्वत्र रक्षायां सन्देहाभावात् । कवयो विवेकिनो धनदुर्मदेनान्धान् कार्या-कार्यानभिज्ञान् कस्माद्धेतोर्भजन्त्येव ? तद्भजनकर्त्तारस्त्वविवेकिन एवेति ज्ञेयम् ॥ ५ ॥ ❀ ❀ तर्ह्यनेन जीवेन किं कर्त्तव्यं येन परमपुरुषार्थलाभः स्यादित्याकाङ्क्षायामाह—एवमिति । एवमुक्तप्रकारेण देहादिनिर्वाहस्य अन्यथासिद्धत्वे सति यः स्वचित्तेऽ-न्तःकरणे स्वत एवावाहनादिप्रयत्नं विनाऽपि सिद्धः अन्तर्यामितया स्थितस्तं भगवन्तं भजेतेत्यन्वयः । तद्भजने किं स्यादित्यपेक्षा-यामाह—संसारेति । यत्र यस्मिन् भजने सति संसारहेतोरविद्याया उपरमो निवृत्तिर्भवति । चकारादुभयं परमानन्दस्वरूपभगव-त्प्राप्तिश्च भवति । कथं तद्भजनादेवं फलं भवतीत्यपेक्षायां तत्र हेतुमाह—भगवानिति । ऐश्वर्यादिषड्गुणपूर्ण इत्यर्थः । न च तद्भजने क्लेशलेशोऽपीत्याशयेनाह—निर्वृत इति, परमानन्दनिमग्नः सन् भजेतेत्यर्थः । तत्र हेतुमाह-प्रिय इति । नहि प्रियस्य भजने कोऽपि क्लेशो भवति किन्तु सुखमेवेति लोकेऽपि प्रसिद्धमेवेति भावः । तत्रापि हेतुमाह-अर्थ इति, परमपुरुषार्थरूप इत्यर्थः । तत्रापि हेतुमाह-आत्मेति । सर्वस्यैव धनधामस्त्रीपुत्रादेरात्मार्थत्वात् तस्यैव निरुपाधिकप्रीतिविषयत्वम् । "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति श्रुतिसिद्धमेवेति भगवतः सर्वात्मत्वेन स्वात्मत्वात् प्रियत्वे न कोऽपि सन्देह इत्यर्थः । न च देवतान्त-रवद्विनाशित्वं देशकालापरिच्छिन्नत्वादित्याशयेनाह-अनन्त इति । कथं भजेतेत्यपेक्षायामाह-नियतार्थ इति । नियताः नित्य-मेतावन्ति नामानि गृहीतव्यानि एतावती कथा श्रोतव्या एतावत्यः प्रणतयः कर्त्तव्याः एतावत्कालं ध्यानं कर्त्तव्य-मित्येवं नियमं प्राप्ताः श्रवणादिपदार्था यस्य तथाभूतः सन्नित्यर्थः । यद्वा नियतो निश्चितो भगवानेवार्थः परमपुरुषार्थो यस्य तथाभूतः सन्नित्यर्थः ॥ ६ ॥ ❀ ❀ एवं भगवद्भजनस्य मोक्षहेतुत्वमुपपाद्य विषयासक्तेर्नरकपातहेतुत्वं वदन् पूर्वोक्तां धारणामेव द्रढयति-क इति । तां पूर्वोक्तां भगवच्चिन्तां अनादृत्य पशून् ऋते विना असतीं नरकादिहेतुत्वेन दुष्टां परानुचिन्तां धनधामपुत्रकलत्रादिविषयान्तरानुचिन्तां को नाम युञ्ज्यात् कुर्यात् ? तया चिन्तया यमराजद्वारि यातनानदी वैतरणी तस्यां तत्तुल्ये संसारे वा पतितं तत्र च स्वकर्मजान् परितापान् आध्यात्मिकाधिदैविकाधिभौतिकान् क्लेशान् जुषाणं भुञ्जानं जनं पश्यन्नपि, यदि तां चिन्तां कुर्यात्तदा स पशुतुल्य एवेत्यर्थः ॥ ७ ॥ ❀ ❀ तदेवं विषयासक्तेर्नरकादिहेतुत्वात्तां विहाय भगवच्चिन्तनं

कर्त्तव्यमित्युक्तं तत्रापि स्थूलबुद्धिभिः प्रथमतः स्थूलरूपधारणा कर्त्तव्या, सूक्ष्मबुद्धिमन्तो विवेकिनस्तु आनन्दमात्रकरपादमुखोदरादिरूपं भगवन्तं ध्यायन्तीत्याह–केचिदिति । केचित् अनेकजन्मानुष्ठितश्रवणमननादिसाधनैः विशुद्धान्तःकरणत्वेन विवेकिनः स्वदेहस्यान्तर्मध्ये यो हृदयावकाशस्तत्र वसन्तं प्रादेशमात्रं तत्प्रमाणकं पुरुषं पुरुषाकारं भगवन्तं धारणया स्मरन्ति चिन्तयन्ती- [illegible] रक्षार्थं तेषु कञ्जादीनि धारयतीति तथा तम् ॥ ८ ॥

### हिन्दी अनुवाद

पहननेको क्या रास्तोंमें चिथड़े नहीं हैं ? भूख लगनेपर दूसरोंके लिये ही शरीर धारण करनेवाले वृक्ष क्या फल-फूलकी भिक्षा नहीं देते ? जल चाहनेवालोंके लिये नदियाँ क्या बिल्कुल सूख गयी हैं ? रहनेके लिये क्या पहाड़ोंकी गुफाएँ बंद कर दी गई हैं ? अरे भाई ! सब न सही, क्या भगवान् भी अपने शरणागतोंकी रक्षा नहीं करते ? ऐसी स्थितिमें बुद्धिमान् लोग भी धनके नशेमें चूर घमंडी धनियोंकी चापलूसी क्यों करते हैं ? ॥ ५ ॥ ❀ ❀ इस प्रकार विरक्त हो जानेपर अपने हृदयमें नित्य विराजमान, स्वतः सिद्ध, आत्मस्वरूप, परम प्रियतम, परम सत्य जो अनन्त भगवान् हैं, बड़े प्रेम और आनन्दसे दृढ़ निश्चय करके उन्हींका भजन करे; क्योंकि उनके भजनसे जन्म-मृत्युके चक्करमें डालनेवाले अज्ञानका नाश हो जाता है ॥ ६ ॥ ❀ ❀ पशुओंकी बात तो अलग है; परन्तु मनुष्योंमें भला ऐसा कौन है, जो लोगोंको इस संसाररूप वैतरणी नदीमें गिरकर अपने कर्मजन्य दुःखोंको भोगते हुए देखकर भी भगवान्का मंगलमय चिन्तन नहीं करेगा, इन असत् विषय-भोगोंमें ही अपने चित्तको भटकने देगा ? ॥ ७ ॥ ❀ ❀ कोई-कोई साधक अपने शरीरके भीतर हृदयाकाशमें विराजमान भगवान्के प्रादेशमात्र स्वरूपकी धारणा करते हैं । वे ऐसा ध्यान करते हैं कि भगवान्की चार भुजाओंमें शङ्ख, चक्र, गदा और पद्म है ॥ ८ ॥



**प्रसन्नवक्त्रं नलिनायतेक्षणं कदम्बकिञ्जल्कपिशङ्गवाससम् ।**
**लसन्महारत्न[1]हिरण्मयाङ्गदं स्फुरन्महारत्नकिरीटकुण्डलम् ॥ ९ ॥**
**उन्निद्रहृत्पङ्कजकर्णिकालये[2] योगेश्वरास्थापितपादपल्लवम् ।**
**श्रीलक्ष्मणं कौस्तुभरत्नकन्धरमम्लानलक्ष्म्यावनमालयाऽऽचितम् ॥ १० ॥**
**विभूषितं मेखलयाङ्गुलीयकैर्महाधनैर्नूपुरकङ्कणादिभिः ।**
**स्निग्धामला[3]कुञ्चितनीलकुन्तलैर्विरोचमानाननहासपेशलम् ॥ ११ ॥**
**अदीनलीलाहसितेक्षणोल्लसद्भ्रूभङ्गसंसूचितभूर्यनुग्रहम् ।**
**ईक्षेत चिन्तामयमेनमीश्वरं[4] यावन्मनो धारणयावतिष्ठते ॥ १२ ॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

नलिनं पद्मं तद्वत्प्रसन्ने आयते दीर्घे ईक्षणे यस्य । कदम्बकुसुमस्य किंजल्काः केसरास्तद्वत्पिशङ्गे पीते वाससी यस्य । लसन्ति महारत्नानि येषु तानि सुवर्णमयान्यंगदानि यस्य । स्फुरन्ति च तानि महारत्नानि च तन्मयानि किरीटकुंडलानि यस्य ॥ ९ ॥ ❀ ❀ उन्निद्रं विकसितं यद्धृत्पंकजं तस्य कर्णिकैवालयः स्थानं तस्मिन् । योगेश्वरैरास्थापितौ पादपल्लवौ यस्य । श्रीरेव लक्ष्म चिह्नं तद्युक्तम् । पामादिविहितो मत्वर्थीयो नप्रत्ययः । कौस्तुभरत्नं कंधरायां यस्य । अम्लाना लक्ष्मीः शोभा यस्यास्तया वनमालया चितं व्याप्तम् ॥ १० ॥ ❀ ❀ स्निग्धत्वादिविशिष्टैः कुंतलैर्विरोचमाने आनने यो हासस्तेन पेशलं सुन्दरम् ॥ ११ ॥ ❀ ❀ अदीनमुदारं यल्लीलाहसितं तेन यदीक्षणं तस्मिन्नुल्लसंतो ये भ्रूभंगा भ्रूविक्षेपास्तैः संसूचितो भूर्यनुग्रहो येन चिंतामयं चिंतया आविर्भवंतम् । कियन्तं कालमित्यत्राह । यावत्समं मनोऽवतिष्ठते स्थिरीभवति तावत् ॥ १२ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

महारत्नानि पद्मरागादीनि ॥ ९ ॥ ❀ ❀ योगेश्वरैरित्युक्तेस्तद्भक्तान्योगेश्वरानपि ध्यायेदिति भावः । वामस्तनोर्द्ध्व-लक्ष्मीरेखायुक्तमित्यर्थः । कौस्तुभरत्नं तद्ग्रथितहिरण्मयसूत्रसहितम् ॥ १० ॥ ❀ ❀ महाधनैर्बहुमूल्यैः ॥ ११ ॥ ❀ ❀ धारणया कृत्वा मनो यावदवतिष्ठते निश्चलं भवति तावदीक्षेतेत्यन्वयः ॥ १२ ॥

---

१ प्रा० पा० महाहारहिरण्मया. । २ प्रा० पा० कर्णिकालयम् । ३ प्रा० पा० स्निग्धामलैः ४ मयमेतमीश्व० ।

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

न-प्रत्यय इति। लोमादि-पामादि-पिच्छादिभ्यः शनेलचः (पा० ५।२।१००) इति सूत्रेण न-प्रत्यय इति यावत् ॥ १०—१८ ॥

### श्रीमद्वीरराघवव्याख्या

एवमेव पुरुषं विशिनष्टि प्रसन्नवक्त्रमिति। अनुग्रहोन्मुखं मुखं नलिनं पद्मं तद्वत्प्रसन्ने आयते दीर्घे ईक्षणे यस्य। कदंब-कुसुमस्य किंजल्कः केसरस्तद्वत्पिशंगे वाससी यस्य। लसंति महारत्नानि येषु तानि हारांगदानि यस्य। स्फुरंति महारत्नानि तन्मयानि किरीटकुंडलानि यस्य तम् ॥ ९ ॥ ❀ ❀ उन्निद्रं विकसितं यद् हृदयपंकजं हृदयकमलं तस्य। कर्णिकैवालयः स्थानं तस्मिन्। योगीश्वरास्थापितौ ध्यानविषयीकृतौ पादपल्लवौ यस्य। श्रीर्लक्ष्मीरेव लक्ष्म चिन्हं यस्यास्तीति श्रीलक्ष्मणः पामादिविहितमत्वर्थीयो न प्रत्ययः तस्याकृतिगणत्वात्। कौस्तुभरत्नं कंधरायां यस्य। अत्र कंधराशब्दस्तदासन्नवक्षःपरः। अम्लाना लक्ष्मीः शोभा यस्यास्तया वनमालया आचितं व्याप्तम् ॥ १० ॥ ❀ ❀ मेखलाया कटिसूत्रेण महाधनैरनर्घ्यैरंगुलीयकैर्नूपुरकंकणादिभिश्च विभूषितं विशे-षेणालंकृतं स्निग्धत्वादिविशिष्टैः कुंतलैर्विरोचमाने आनने यो हासस्तेन पेशलं सुंदरं तत्र स्निग्धा सस्नेहा आकुंचिता वक्राः ॥ ११ ॥ ❀ ❀ अदीनमुदारं यल्लीलाहसितं तेन युक्तं ईक्षणं तेनोल्लसंतो भ्रूभंगाः। भ्रूविक्षेपाः तैः संसूचितो भूर्यनुग्रहो येन तं चिंतामयं चिंताविषयं चिंताप्रचुरं ईक्षेतेतिक्रियाविशेषणं वा एवंविधमीश्वरं यावद्धारणया मनोऽवतिष्ठते तावदीक्षेतोपासीतेत्यर्थः ॥ १२ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

श्लोकचतुष्टयेन तमेव विशिनष्टि प्रसन्नवक्त्रमित्यादिना। नलिनवद्रक्तपद्मदलवदायते दीर्घे ईक्षणे यस्य स तथा तम्। कदंबः कृष्णप्रियस्तरुस्तस्य पुष्पस्य किंजल्कमंकुरविशेषस्तद्वत्पिशंगं पीतं वासो यस्य स तथा तम्। लसन्महाहारश्च हिरण्मयांगदश्च विलसन्महाहारहिरण्मयांगदस्तम्। स्फुरंति शोभमानानि महांति च रत्नानि तैर्युक्तं किरीटं कुंडले च यस्य स तथा तम् ॥ ९ ॥ ❀ ❀ उन्निद्रस्य विकसितस्य हृत्पंकजस्य कर्णिकाख्यालये योगेश्वरैः सनकादिभिरास्थापितौ पादपल्लवौ यस्य स तथा तम्। श्रीरेव लक्षणं चिह्नं यस्य वक्षसि स तथा तम्। कुस्तुभात्समुद्राज्जातं कौस्तुभं तेन रत्नेन युक्ता कंधरा यस्य स तथा तम्। अम्लानानां नव-पल्लवदलानां लक्ष्मीर्यस्याः सा तथा तया ॥ १० ॥ ❀ ❀ मेखलाया काञ्च्या अंगुलीयकैरंगुलीभूषणैः महांति धनानि गृह्णंतीति महाधनानि तैः स्निग्धाश्चामलाश्च ते तैः कुञ्चिता वक्राश्च नीलाश्च ते कुंतलास्तैर्विरोचमाने आनने यो हासस्तेन पेशलं सुंदरम् ॥ ११ ॥ ❀ ❀ अदीनलीलयोद्भूताभ्यां हसितेक्षणाभ्यामुल्लसंत्योर्भ्रुवोर्भंगेन स्फुरणविशेषेण संसूचितो भूर्यनुग्रहो येन स तथा तम्। ईक्षेत चिंतामयं चिंताप्रधानं "यस्मात्संचिंतितो विष्णुश्चिंतितं प्रददात्यज" इत्यादेः कियंतं कालं चिंतनमत्राह याव-दिति। यावद्धारणया समग्रांगे मनोऽचलमवतिष्ठते तावदिति शेषः ॥ १२ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

महारत्नानि पद्मरागादीनि ॥ ९ ॥ ❀ ❀ उन्निद्रं विकसितं हृत्पङ्कजं तस्य कर्णिकैवालयस्तत्र योगेश्वरैरास्थापितौ पादपल्लवौ यस्य तमिति तद्भक्तान् योगेश्वरानपि ध्यायेदिति भावः। श्रीलक्ष्मणं श्रीरेव लक्ष्म वामस्तनोर्द्ध्वलक्ष्मी रेखा तद्युक्तम् पामादिविहितो मत्वर्थीयो न-प्रत्ययः! कौस्तुभरत्नं तद्ग्रथनहिरण्मयसूत्रं कन्धरायां यस्य तम्। आचितं व्याप्तम् ॥ १० ॥ ❀ ❀ महाधनैः बहुमूल्यैः। स्निग्धत्वादिविशिष्टैः कुन्तलैर्विरोचमाने आनने यो हासः तेन पेशलं मनोहरम् ॥ ११ ॥ ❀ ❀ अदीनमतिमाधुर्यं यल्लीलाहसितं तद्युक्तमीक्षणञ्च उल्लसन्नुल्लासं प्राप्नुवन् भ्रूभङ्गश्च ताभ्यां संसूचितो भूर्यनुग्रहो येन तम् चिन्तामयं चिन्तयैवाविर्भवन्तम् ॥ १२ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्रसन्नं ध्यातॄनानंदप्रदं वक्त्रं यस्य। नलिनं पद्मं तद्वदायते दीर्घे ईक्षणे यस्य। कदंबकिंजल्कवत् कदंबपुष्पकेसरवत् पिशंगे वाससी यस्य। लसंति महारत्नानि येषु तानि हिरणमयान्यंगदानि यस्य। स्फुरंति च तानि महारत्नानि च तन्मयानि किरीटकुंडलानि यस्य तम् ॥ ९ ॥ ❀ ❀ उन्निद्रहृत्पंकजस्य विकसितहृदयकमलस्य कर्णिकैवालयः स्थानं तत्र योगेश्वरैरास्थापितौ ध्यानगोचरीकृतौ पादपल्लवौ यस्य। श्रीरूपं लक्ष्म चिह्नं विद्यते यस्य सः श्रीलक्ष्मणस्तम्। पामादिविहितो मत्वर्थीयो नप्रत्ययः। तस्याकृतिगणत्वात् कौस्तुभरत्नं कंधरायां यस्य। अम्लाना विस्फूर्यमाणा लक्ष्मीः शोभा यस्यास्तया आचितं सर्वतो विस्फूर्यमाणम् ॥ १० ॥ ❀ ❀ मेखलायां कटिसूत्रेणांगुलीयकादिभिश्च विभूषितम् स्निग्धैः सस्नेहैरमलैरुज्वलैः कुंचितैर्वक्रैर्नीलवर्णैरेवंविधैः कुंतलैर्विरोचमाने आनने यो हासस्तेन पेशलं सुंदरम् ॥ ११ ॥ ❀ ❀ अदीनेनोदारेण लीलाहसितेन युक्तं यदीक्षणं तेनोल्लसद्भिर्भ्रूभंगैर्भ्रूविक्षेपैः सम्यक

सूचितो भूर्यनुग्रहो येन तम् । चिंतामयं चिंताया ध्यानादाविर्भूतं तत आगत इत्यधिकारे मयट् एनं ध्येयमीश्वरमंतर्यामिणं यावन्मनो धारणयाऽवतिष्ठेत तावदीक्षेत ॥ १२ ॥

## श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

किञ्च । प्रसन्नवक्त्रम् । प्रसन्नं भक्तेभ्यः फलदानार्थं वक्त्रं यस्य । नलिनवत् आयते दीर्घे ईक्षणे यस्य । कदम्बकिञ्जल्क-वदर्थपीतारक्त[1]मन्तभागे [2]चाऽन्ते मुक्ताफलसहितं रेखाकारञ्च । कदम्बकिञ्जल्कवत्सुवर्णदण्डाकारसूत्रनद्धमुक्ताव्याप्तं कृतार्थीकृता-शेषजीवयुक्तवेदरूपम् । एतादृशं भगवतः पीताम्बरम् । लसन्ति महारत्नानि यस्मिन् हिरण्मये अङ्गदे । अङ्गदं बाह्वाभरणम् । स्फुरन्ति महारत्नानि किरीटे कुण्डलयोश्च यस्य ॥ ९ ॥ ❀ ❀ उन्निद्रे विकसिते हृदयरूपे पङ्कजे या कर्णिका तस्मिन् यदालयं गृहं सूर्येन्दुवाय्वग्न्यगमं तस्मिन्नालये योगेश्वरैरासमन्तात्स्थापितं पादपल्लवं यस्य । श्रीः लक्ष्म चिह्नं यस्य । कौस्तुभरत्नं कन्धरायां यस्य । अम्लाना लक्ष्मीर्यस्याः । सर्वदा प्रत्यग्रविकसितपुष्पयुक्ता । तादृश्या वनमालया अञ्चितं पूजितम् ॥ १० ॥ ❀ ❀ मेखलया कटिदोरकरूपया । अङ्गुलीयकैश्च महाधनैः अमूल्यरत्नादियुक्तैः । उभयत्र विशेषणम् । नूपुरमेकं महाराजचिह्नरूपम् । आदिशब्देन वलयादि । [3]स्निग्धाश्च तेऽमलाश्च । कुञ्चिता नीलाः कुन्तलाः । तैर्विरोचमानं यदाननं तेन यो हासस्तेन सुन्दरम् ॥ ११ ॥ ❀ ❀ अदीनं यल्लीलाहसितम् । सर्वेभ्यो याचकेभ्यः सर्वफलदानेऽप्यसङ्कोचयुक्तमदीनम् । लीलाहसितेन युक्तं यदीक्षणं तेन उल्लसन्त्यौ ये भ्रुवौ तयोर्भङ्गस्तेन संसूचितः भूरि अधिकः अनुग्रहो येन । एतादृशं चिन्तया प्रकटीभूतं राजाधिराज-रूपमीश्वरमीक्षेत । यावन् मनः धारणया सर्वाङ्गस्थितया अवतिष्ठते चाञ्चल्यं न प्राप्नोति ॥ १२ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

प्रसन्नमनुग्रहोन्मुखं वक्त्रम् मुखं यस्य तम् । नलिनं कमलं तद्वत्तापहरे आयते दीर्घे ईक्षणे नेत्रे यस्य तम् । कदम्बकुसुमस्य यः किञ्जल्कः केशरस्तद्वत्पिशङ्गे पीते वाससी यस्य तम् । लसन्ति महारत्नानि येषु तानि सुवर्णमयानि अङ्गदानि यस्य तम् । स्फुरन्ति यानि महारत्नानि तन्मयानि किरीटकुण्डलानि यस्य तम् ॥ ९ ॥ ❀ ❀ उन्निद्रं विकसितं यत् हृत्पङ्कजं हृदयकमलं तस्य कर्णिकैव आलयः स्थानं तस्मिन् योगेश्वरैरास्थापितौ पादपल्लवौ यस्य तम् । श्रीर्लक्ष्मीरेव लक्ष्म चिह्नं यस्य स श्रील[4]क्ष्मणस्तं वामस्तनोर्ध्वं लक्ष्मीरेखायुक्तम् । कौस्तुभं रत्नं कन्धरायां यस्य तम् । अत्र कन्धराशब्दस्तदासन्नवक्षःपरः । अम्लाना लक्ष्मीः शोभा यस्यास्तया वनमालया आचितं व्याप्तम् ॥ १० ॥ ❀ ❀ मेखलया कटिसूत्रेण महाधनैः अमूल्यरत्नादियुक्तैः अङ्गुलीयकैर्नूपुरकङ्कणादिभिश्च विभूषितं विशेषेणालङ्कृतम् । आदिपदेन वलयादिहस्तभूषणग्रहणम् । स्निग्धानि अमलानि आकुञ्चितानि नीलानि च यानि कुन्तलानि तैर्विरोचमाने आनने यो हासस्तेन पेशलं सुन्दरम् ॥ ११ ॥ ❀ ❀ अदीनं सर्वपुरुषार्थप्रदप्रसन्नतासूचकत्वेन अत्युदारं यल्लीलाहसितं तेन युक्तं यदीक्षणं तेनोल्लसन्तो ये भ्रूभंगा भ्रूविक्षेपास्तैः संसूचितो भूर्यनुग्रहो येन तम् । चिन्तामयं चिन्तयाविर्भूतमेनमीश्वरं यावद्धारणया मनोऽवतिष्ठते निश्चलं भवति तावदीक्षेत पश्येदित्यन्वयः ॥ १२ ॥

## हिन्दी अनुवाद

उनके मुखपर प्रसन्नता झलक रही है । कमलके समान विशाल और कोमल नेत्र हैं । कदम्बके पुष्पकी केसरके समान पीला वस्त्र धारण किये हुए हैं । भुजाओंमें श्रेष्ठ रत्नों से जड़े हुए सोनेके बाजूबंद शोभायमान हैं । सिर पर बड़ा ही सुन्दर मुकुट और कानोंमें कुण्डल हैं, जिनमें जड़े हुए बहुमूल्य रत्न जगमगा रहे हैं ॥ ९ ॥ ❀ ❀ उनके चरण-कमल योगेश्वरों के खिले हुए हृदय कमलकी कर्णिकापर विराजित हैं । उनके हृदयपर श्रीवत्सका चिह्न-एक सुनहरी रेखा है । गलेमें कौस्तुभमणि लटक रही है । वक्षःस्थल कभी न कुम्हलानेवाली वनमालासे घिरा हुआ है ॥ १० ॥ ❀ ❀ वे कमरमें करधनी अँगुलियोंमें बहुमूल्य अँगूठी, चरणोंमें नूपुर और हाथोंमें कंगन आदि आभूषण धारण किये हुए हैं । उनके बालोंकी लटें बहुत चिकनी, निर्मल, घुँघराली और नीली हैं । उनका मुख-कमल मन्द-मन्द मुसकानसे खिल रहा है ॥ ११ ॥ ❀ ❀ लीलापूर्ण उन्मुक्त हास्य और चितवनसे शोभायमान भौंहों के द्वारा वे भक्त-जनोंपर अनन्त अनुग्रहकी वर्षा कर रहे हैं । जबतक मन इस धारणाके द्वारा स्थिर न हो जाय, तब यक बार-बार इन चिन्तनस्वरूप भगवान् को देखते रहने की चेष्टा करनी चाहिये ॥१२॥

---

१. पीतारक्तयुक्तमिति क ख २. चाऽन्ते इति ग. घ. ३. स्निग्धानि च तान्यमलानीति कुन्तलानीत्यन्तं क्लीबपाठः क. । ४. श्रीलक्ष्मण-मित्यत्र मत्वर्थीयो नप्रत्ययः पामादिलक्षणः ।

एकैकशोऽङ्गानि धियानु[1]भावयेत् पादादि यावद्धसितं गदाभृतः ।
जितं जितं स्थानमपोह्य धारयेत् परं परं शुद्ध्यति[2] धीर्यथा यथा ॥ १३ ॥
यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः ।
तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत ॥ १४ ॥
स्थिरं सुखं चासनमाश्रितो यतिर्यदा जिहासुरिममङ्ग लोकम् ।
काले च देशे च मनो न सज्जयेत् प्राणान् नियच्छेन्मनसा जितासुः ॥ १५ ॥
मनः[3] स्वबुद्ध्यामलया नियम्य क्षेत्रज्ञ[4] एतां निनयेत् तमात्मनि ।
आत्मानमात्मन्यवरुध्य धीरो लब्धोपशान्तिर्विरमेत कृत्यात् ॥ १६ ॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

अस्यैव ध्यानमाह । एकैकश इति । अनुभावयेद्ध्यायेत् । यद्यज्जितमयत्नतः स्फुरितं पादगुल्फादि स्थानमवयवस्तत्तदपोह्य त्यक्त्वा परंपरं जंघाजान्वादि धारयेद्ध्यायेत् । शुद्ध्यति तस्मिन्निश्चला भवति ॥ १३ ॥ ❀ ❀ पूर्वोक्तवैराजधारणाया एतद्धारणांगत्वमाह । यावदिति । परे ब्रह्मादयोऽवरे यस्मात् । कुतः । विश्वेश्वरे द्रष्टरि, न तु दृश्ये चैतन्यघनत्वात् । भक्तियोगः प्रेमलक्षणः । क्रियावसाने आवश्यककर्मानुष्ठानानंतरम्, अनेन कर्मापि भक्तियोगपर्यंतमेवेत्युक्तम् । प्रयतो नियमतत्परः ॥ १४ ॥ ❀ ❀ एवं तावदासन्नमृत्योः पुंसः कृत्यमुक्तमिदानीं तस्यैव स्वयं देहं त्यक्तुमिच्छतः कृत्यमाह स्थिरमिति सार्धैश्चतुर्भिः । अंग हे राजन् एवंभूतो यतिर्यदेमं लोकं देहं जिहासुर्हातुमिच्छति तदा देशे पुण्यक्षेत्रे काले चोत्तरायणादौ मनो न सज्जयेत्संगं न प्रापयेत् । न देशकालौ योगिनः सिद्धिहेतू किंतु योग एवेति दृढनिश्चयो भूत्वा स्थिरं सुखकरं चासनमास्थितः प्राणं नियच्छेदित्यर्थः ॥ १५ ॥ ❀ ❀ तत् गृहीतविषयं मनः बुद्ध्या निश्चयरूपया नियम्य तन्मात्रं कृत्वा एतां बुद्धिं क्षेत्रज्ञे बुद्ध्यादिद्रष्टरि निनयेत्प्रविलापयेत् । तं च क्षेत्रज्ञमात्मनि शुद्धे, तं च शुद्धमात्मानमात्मैवाहमित्यात्मनि शुद्धे ब्रह्मण्यवरुद्ध्यैकीकृत्य लब्धोपशांतिः प्राप्तनिर्वृतिः सन् कृत्याद्विरमेत् । ततः परं प्राप्याभावात् ॥ १६ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

यद्वा यथायथा धीः शुध्यति विषयलांपट्यं त्यजति तथातथा धारयेदिति । चित्तशुद्धितारतम्येनैव ध्यानतारतम्यमुक्तं तेनात्यंताशुद्धचित्तस्य नात्राधिकारः । किंतु वैराग्यधारणायामेवेति ध्वनितम् ॥ १३ ॥ ❀ ❀ अत एवाशुद्धचित्तत्वादेतद्रूपं ध्यातुं यावन्न शक्नुयात्तावद्वैराजरूपमेव ध्यायेदित्यभिप्रेत्याह । पूर्वोक्तेत्यादि । अवरेऽर्वाचीनाः । अनेन क्रियावसान इति कथनेन ॥ १४ ॥ ❀ ❀ अंगेति संबुद्ध्यर्थेऽव्ययम् । इत्यर्थ इति । प्राणायामं कुर्यादिति भावः । जितासुर्जितेंद्रियः 'असुः प्राणेंद्रियबले' इति कोशात् । अत्र विश्वनाथेन प्राणानिति पठित्वा व्याख्यातम् । तथा हि—प्राणानिंद्रियाणि मनः नियच्छेत् प्राणान्मनोनियम्यान्कुर्यादित्यर्थः । तेन नियंतरि मनसींद्रियाणि प्रविलापयेदिति द्योतितम् ॥ १५ ॥ ❀ ❀ ततस्तन्मनः स्वबुद्ध्या नियम्येति मनो बुद्धौ प्रविलापयेदिति भावः । बुद्ध्यादिद्रष्टरि जीवे शुद्धे शुद्धजीवेंतर्यामिणि वा शुद्धे शोधितत्वंपदार्थे अग्रे शुद्धे ब्रह्मणि शोधिततत्पदार्थे इति केचित् । ततः शुद्धब्रह्मणः परमन्यत् प्राप्यं नास्ति तस्यैव परमावधित्वादिति ॥ १६ ॥

### श्रीमद्वीरराघवव्याख्या

युगपत्कृत्स्नशुभाश्रयगोचरध्यानाशक्त्या तदुपायभूतमुक्तरूपस्यैव ध्यानक्रमविशेषमाह । एकैकश इति गदाभृतः परमात्मनः पादादिः पादप्रभृतियावद्धसितं मन्दस्मितावधि । अंगानि एकैकशः प्रत्येकं धियानुभावयेच्चिन्तयेत् । जितं जितं भावनया स्फुरितं प्रतिष्ठितमिति यावत् स्थानं पादगुल्फाद्यवयवमपोह्य त्यक्त्वा विशेषाकारेणेति भावः सामान्याकारेण कृत्स्नशुभाश्रयगोचरज्ञानस्यापेक्षितत्वात्परं परं जंघाजान्वादि स्थानं धीर्यथाशुद्ध्यति प्रसीदत्यानाकुलीभवति तथा धारयेत् । कृत्स्नशुभाश्रयगोचरभक्तियोगोत्पत्तेः पूर्वमिदमवयवशो विभावनं यत्नेन कर्त्तव्यमुत्पन्नायां तु भक्तौ हानायोगात् ॥ १३ ॥ ❀ ❀ अतस्तत्सर्वं यत्नेन ध्येयमवयवश इत्याह यावदिति । परे ब्रह्मादयोऽवरे यस्मात्स परावरः तस्मिन् विश्वेषामीश्वरे नियंतरि द्रष्टरि सर्वज्ञेऽस्मिन्नुक्तविग्रहविशिष्टे

---

१. प्रा० पा० भावयन् । २. प्रा० पा० चात्मनि । ३. प्रा० पा० मनश्च बुद्ध्य । ४. प्रा० पा० क्षेत्रज्ञमेतं निनयेद् य आत्मनि ।

पुरुषे भक्तियोगः **विशेषाकारेण कृत्स्नशुभाश्रयगोचरः** प्रीतिपूर्वकोऽविच्छिन्नो ध्यानयोगः । यावन्न जायेत नोत्पद्येत तावत्क्रियावसाने आवश्यकानुष्ठानांते **पुरुषस्य प्रादेशमात्रं पुरुषमित्युक्तस्य पुरुषस्य स्थविष्ठं रूपं** दिव्यात्मस्वरूपापेक्षया स्थविष्ठं विग्रहं प्रयतः समाहित अवयवशः **स्मरेदित्यर्थः** । **स्थविष्ठं रूपं** वैराजस्य पूर्वोक्तरूपमिति तु मंदं रूपांतरोपासनाया एतद्रूपोपासनानुपयुक्तत्वात् ॥ १४ ॥ ❀ ❀ **एवमेकैकमवयवं शिक्षयित्वा** पश्चादेकैकांगध्यानपूर्वकं कृत्स्नध्यानाभ्यास उक्तः । अथेदृशोपासनानिष्ठस्य देहत्यागप्रकारं वक्ष्यन्स्वात्मनः परमात्मनि समर्पणप्रकारमाह स्थिरमिति । यतिर्योगी यदा परिपूर्णभक्तियोगसंपादकशरीरावस्थितिहेतुभूतप्रारब्धावसानकाले अंग हे राजन्निमं लोकं प्राकृतं लोकं जिहासुर्हातुमिच्छुर्भवति तदा गंगातीरोत्तरायणादिदेशकालादिषु मनो न सज्जयेत्सक्तं न कुर्यात्किन्तु जितप्राणः जितासुः स्थिरं निर्भयदेशस्थं सुखदमृद्वासनमास्थितः मनसा प्राणानींद्रियाणि नियच्छेदनन्यपराणि कुर्यात् ॥ १५ ॥ ❀ ❀ स्वबुद्ध्या निश्चयात्मिकया बुद्ध्याऽमलया भगवदुपासनेन निर्द्धूतमलया मनः नियम्य बुद्धिव्यापारमात्ररतं कृत्वा एतां बुद्धिं क्षेत्रज्ञे जीवे निनयेन्नियच्छेत्तं क्षेत्रज्ञमात्मनि नियच्छेदित्यर्थः । एवमात्मानं जीवमात्मनि परमात्मनि अवरुध्य समर्प्य लब्धोपशांतिः प्राप्तनिर्वृतिः सन्कृत्त्याद्विरमेत् अंतकाले परमात्मनि स्वात्मसमर्पणावधिकर्म न त्याज्यमिति कृत्याद्विरमेतेत्यनेनावगम्यते । आप्रयाणात्तत्रापि हि दृष्टम् ॥ ४।१।१२ ॥ इति न्यायेनोपासना या आप्रयाणादनुवर्तनीयत्वेन तन्निष्पादककृत्स्नस्याप्यप्रयाणादनुवर्तनीयत्वान्न हि मुमूर्षोः कृत्यविरतिर्विधेयास्वत एव विरतेः । अत्र यद्यपि यदा जिहासुरिमंगलोकमित्यनेन योगिनो स्वच्छंदमरणानां कृत्यमेव प्रतीयते तथापि "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये" इति कृत्स्नयोगशरीरारंभकप्रारब्धावसान एव परमात्मसंपत्तिश्रवणान्न तेषामिदं कृत्यं न च मुमूर्षोरनवहितकरणत्वेनाशक्तत्वान्न सज्जेन्नियच्छेद्विरमेतेत्यादिविधिविषयत्वानुपपत्त्या स्वच्छंदमरणानां कृत्यमेवेदमिति वक्तुं युक्तं योगप्रभावातिशयेन करणानां स्वायत्तत्वात् । ये च योगमाहात्म्यादविनष्टा एव प्रारब्धे म्रियंते तेषां पुनः संसार एवात एव भीष्मादीनामुत्तरायणादिकालप्रतीक्षा प्रारब्धस्याविनष्टत्वात् । अतो यदेत्यस्य प्रारब्धावसान इत्युक्त एवार्थः साधुः ॥ १६ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

सर्वांगस्मरणाशक्तस्य स्मरणप्रकारमाह एकैकश इति ध्यानेन जितमनायासेन ध्यानविषयं स्थानमवयवमपोह्य वशीकृत्य परंपरमजितमनभ्यस्तमवयवपादमारभ्य यावद्धसितं*पुष्पितं वनमितिवत् बद्धासने विकसितं मुखं हसितमिति लक्ष्यते । मुखपर्यन्तं सांगोपांगं प्रतिधिया मनोधारयेत् । यथायथा धीःशुध्यति सर्वांगध्यानक्षमा भवति तथातथाभ्यस्तं कुर्यादतः सर्वांगध्यानासामर्थ्ये तावत्पर्यंतमेकैकावयवमनुभावयेदित्यर्थः ॥ १३ ॥ ❀ ❀ इममेवार्थमुपसंहरति । यावदिति । पराब्रह्मादयोऽप्यवरा यस्मात्सपरावरस्तस्मिन् । द्रष्टरि सर्वसाक्षिणि । विश्वेश्वरे हरौ । यावत्सर्वोत्तमोत्तममहोपकारकोऽतएव सर्वतः प्रियतम इति ज्ञानपूर्वकप्रेमलक्षणाभक्तिपरम् । पुरुषस्य । स्थवीयोऽतिस्थूलं रूपम् । स्मरेत । तत्रापि निरन्तरध्यानासक्तः सन् नित्यक्रियावसाने प्रयतः प्रयत्नवान् स्मरेतेत्यन्वयः ॥ १४ ॥ ❀ ❀ इदानीमुक्तविधोपासनाजनितज्ञानेनापरोक्षकृतपरमात्मतत्त्वस्य तत्प्रसादाद्विज्ञातब्रह्मादितत्त्वस्य ज्ञानिनो यदा देहत्यागेच्छा तदा स्वदेहगतेंद्रियाद्यभिमानिदेवतालयस्मरणपूर्वकं मोक्षप्रकारमाह स्थिरमिति । यतिर्निर्जितेंद्रियग्रामोऽपरोक्षज्ञानी इमं लोकं देहं यदा जिहासुस्त्यक्तुमिच्छति तदा यथासुखं भवति तथा स्थिरमचलमासनमास्थितः काले देशे च कालस्थेषु देशस्थेषु च विषयेषु च यावन्मनो न सज्जेत् सक्तं न कुर्यात् अथ मनसा स्ववशेन प्राणान्विषयाननुधावंतीन्द्रियाणि च नियच्छेत् तत आहरेदाहृत्य च प्राणान्नियच्छेत्प्राणायामान् कुर्यादथ जितासुर्भक्त्या प्राप्तप्राणप्रसाद इन्द्रियप्रेरकान् दिशादिदेवान् मनोऽभिमानिनींद्रे नियच्छेत् इंद्राधीनांश्चिंतयेत् ॥ १५ ॥ ❀ ❀ मनश्च मनोऽभिमानिनमिन्द्रश्चामलया बुद्ध्या बुद्धिदेवतयोमया नियम्य तदधीनं स्मृत्वैतां बुद्धिदेवतामुमां क्षेत्रज्ञे जीवान्तर्यामिणि हरौ निनयेत् नितरां तदधीनाश्चिन्तयेत् तं क्षेत्रज्ञमात्मनि देहमध्यस्थे हरौ निनयेत् तदैक्येन चिन्तयेत् तं देहगतमात्मानं हरिमात्मनि सर्वगते हरावरुध्य तदेकीभावेन सञ्चिन्त्य देहादुत्क्रम्य लब्धोपशान्तिः प्राप्तसर्वाधिकमङ्गलाख्यविष्णुरूपो धीरः कृत्याद्विधिनिषेधलक्षणात्कार्याद्विरमेदित्यन्वयः "भक्त्या प्राणं वशे नीत्वा जितप्राणो भवत्युत जीवस्थो भगवान् विष्णुः क्षेत्रज्ञ इति गीयते हृद्गतस्तु स एवात्मा व्याप्तोऽप्यात्मेति भण्यते । हरौ हरेर्भवेन्नीतिस्तदेकत्वस्य चिन्तनम् अन्यत्र तन्नियम्यादिचिन्तनं नीतिरुच्यत" इति प्रमाणेभ्य उक्त एवार्थोऽन्योन स्वकपोलकल्पित इति भावः । मनस्तत्त्वं बुद्धितत्त्वे बुद्धितत्त्वं क्षेत्रज्ञेऽधिष्ठानभूते तं क्षेत्रद्रष्टारमात्मनि शोधितत्वंपदार्थे चिन्मात्रे तमात्मानं शोधितत्वंपदार्थभूतमात्मनिशोधितपदार्थभूते परमात्मन्यवरुध्यैकीकृत्य भेदहेतुमविद्याधिष्ठानम् यथार्थज्ञानेन निरस्य कृत्यात् विरमेतेति मायावादिनः एतां व्यष्टिरूपां बुद्धिं क्षेत्रज्ञे समष्टिरूपहिरण्यगर्भात्मनि कारणात्मने कारणात्मानमात्मनि शुद्धे ब्रह्मण्यवष्टभ्य कृत्याद्विरतः स्यादिति पौराणिकंमन्याः इति द्वयमपि प्रमाणविरुद्धत्वादुपेक्षणीयं मनश्चेति च शब्देन मनः शब्दवाच्यं रुद्रं बुद्धिशब्दवाच्यां वाणीं विरिंचलक्ष्मीद्वारा क्षेत्रज्ञे लयं तत्त्वानां स्वस्वकारणेषु कल्पत इति ज्ञातव्यम् "उपाधिके समीपे चेति शांतिः प्रशमंगले इति च मंगलं भगवान् विष्णुः" इति च ॥ १६ ॥

---

*पुष्पितमित्युक्ते यथावनमित्यर्थो लभ्यते तद्वदित्यर्थः ।

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

यावदिति । भक्तियोगः केचित् स्वदेहान्तः इत्यादिनोक्तसाधनलक्षणाभिनिवेशः अन्यत्तैः ॥ १४ ॥ ❀ ❀ अनन्तरं पूर्ववत् च यदि महत्कृपाविशेषेण दिव्यदृष्टिता भवति, तदा विशेषोपलब्धिश्च भवेत् । न चेत्, निर्विशेषचिन्मात्रब्रह्मानुभवेन तल्लीन एव भवति । तथैव निदिध्यासनमपि तेषाम् तथा च स्थिरमित्यादि ॥ १५ ॥ ❀ ❀ तथा मन इति । तञ्च क्षेत्रज्ञं स्वरूपभूतया बुद्धया आत्मनि तद्द्रष्टृत्वादिरहिते शुद्धे जीवे । अन्यत्तैः ॥ १६ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

अस्यैव ध्यानमाह एकैकश इति । नु निश्चितं भावयेत् ध्यायेत् । जितं जितं ध्यानेनाभ्यस्तं स्थानं पादगुल्फादि अपोह्य त्यक्त्वा परं परं जङ्घाजान्वादि धारयेत् स्वमनः प्रयोज्य ग्राहयेदित्यर्थः । यथा यथा धीश्च शुध्यति विषयलाम्पट्यं त्यजति तथा तथा धारयेदिति चित्तशुद्धितारतम्येनैव ध्यानतारतम्यमुक्तम् । तेनात्यन्ताशुद्धचित्तस्य नात्राधिकारः किन्तु वैराजधारणायामेवेति व्यञ्जितम् ॥ १३ ॥ ❀ ❀ अतएवाशुद्धचित्तत्वादेतद्रूपं यावद्ध्यातुं न शक्नुयात् तावद्वैराजरूपमेव ध्यायेदित्याह यावदिति । परे ब्रह्मादयोऽवरे यस्मात् । कुतः विश्वेश्वरे, द्रष्टरि न तु दृश्ये । भक्तियोगः योगाङ्गभूतध्यानलक्षणः । क्रियावसाने आवश्यककर्मानुष्ठानानन्तरम् ॥ १४ ॥ ❀ ❀ अथ तस्यैव भक्तिमिश्रयोगिनः स्वयं देहत्यागकृत्यमाह स्थिरमिति । लोकं देहं यदा जिहासुर्भवेत तदा देशे पुण्यक्षेत्रे काले चोत्तरायणादौ मनः न सज्जयेत सङ्गं न प्रापयेत् । योगिनः कालदेशौ न सिद्धिहेतू किन्तु योग एवेति दृढनिश्चयो भूत्वा प्राणान् इन्द्रियाणि मनसा नियच्छेत् प्राणान्मनोनियम्यान् कुर्यादित्यर्थः । तेन नियन्तरि मनसि इन्द्रियाणि प्रविलापयेदिति द्योतितम् ॥ १५ ॥ ❀ ❀ ततश्च तन्मनः स्वबुद्धया नियम्येति मनो बुद्धौ प्रविलापयेदिति भावः । एतां स्वबुद्धिं क्षेत्रज्ञे बुद्धयादिद्रष्टरि जीवे निलयेत् प्रविलापयेत् तञ्च क्षेत्रज्ञम् आत्मनि शुद्धजीवे तम् आत्मनि ब्रह्मणि अवरुध्य एकीकृत्य लब्धोपशान्तिः प्राप्तनिर्वृतिः सन्ः कृत्याद्विरमेत् । मुक्तस्य कर्त्तव्यान्तराभावादिति भावः ॥ १६ ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

ध्यानमाह एकैकश इति । गदाभृतो ध्येयस्य ध्यातृत्राणाय गृहीतकौमोदकेः पादादियावद्धसितं हसितयुक्तमुखावधि अङ्गानि एकैकशः धिया भावयेद्ध्यायेत् । जितं जितं स्थानं सुज्ञातं पादगुल्फाद्यम् । अपोह्य सुज्ञातत्वेन हृदि निधाय परंपरं जंघाजान्वादि धीर्यथायथा शुद्ध्यति तत्र तत्र निष्ठां प्राप्नोति तथा तथा धारयेद्ध्यायेत् ॥ १३ ॥ ❀ ❀ वैराजधारणासाधनभूता तावदनुष्ठेयैव यावत्साध्यधारणाश्रये भक्तिर्न भवेदित्याह यावदिति । अस्मिन्नुक्तशरीरिणि द्रष्टरि सर्वान्तर्यामिणि परेऽरे यस्मात्तस्मिन् विश्वेश्वरे सर्वेश्वरे यावत् भक्तियोगो न जायते तावत्क्रियावसाने आवश्यककर्मानुष्ठानावसाने पुरुषस्य वैराजस्य स्थवीयं स्थूलं चतुर्दशभुवनात्मकं प्रयतः स्मरेत ॥ १४ ॥ ❀ ❀ अथेदृग्भजननिष्ठावतो देहविसर्जनप्रकारं वक्तुं भगवत्यात्मसमर्पणप्रकारं भगवत्स्वरूपं चाह स्थिरमिति चतुर्भिः । अंग हे राजन् ! यतिर्भगवद्ध्यानयोगी यदा प्रारब्धकर्मक्षयकाले इमं लोकं प्राकृतं लोकं जिहासुर्हातुमिच्छुः स्यात् तदा देशे पुण्यक्षेत्रे काले उत्तरायणादौ च मनो न सज्जयेन्न प्रापयेत् । किन्तु स्थिरं सुखमासनमास्थितः जितासुर्जितप्राणः मनसा प्राणमिंद्रियगणं नियच्छेद्भगवत्परं कुर्यात् ॥ १५ ॥ ❀ ❀ तन्मनः स्वबुद्धया नियम्य एतां बुद्धिं क्षेत्रज्ञे आत्मनि जीवे निनयेन्नियच्छेत् । सर्वं देहेंद्रियरूपं जडवर्गं स्वनियम्यं स्वस्मात्पृथक् चिंतयेदित्यर्थः । तमात्मानं जीवम् आत्मनि भगवति निरुध्य समर्प्य धीरो लब्धोपशांतिः कृत्याद्विरमेत अनेन स्वात्मसमर्पणावधिसाधनावृत्तिर्दर्शिता ॥ १६ ॥

## श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

सर्वाङ्गास्फुरणे पुनरेकैकशोऽङ्गानि धारयेत् । एकं धृत्वा तस्य स्वाधीनतायां जातायां द्वितीयं धारयेदिति धियेत्युक्तम् । अत्र धारणायां क्रमो विवक्षितः । तदाह—पादादि यावद्धसितमिति । तृतीयस्कन्धे स्पष्टं भविष्यति । गदाभृत इति प्राणनिश्चलता सूचिता । जितं जितं स्थानं स्वाधीनं स्वाधीनं स्थानं पादाद्यपोह्य [1]ग्राहकबुद्ध्यग्रभागात्त्याजयित्वा तेनाऽग्रेणाऽन्यद्ग्राह्यम् । अन्यग्रहणे तथा भगवदवयवस्य अधिका गुणाः स्मर्त्तव्या यथा बुद्धिदोषा अपगच्छेयुः । तदपगमे बुद्धिर्विशदा भवति । तदा अवयवान्तरमपि भाति । एवमुत्तरत्राऽपि । यथा यथा बुद्धिः शुद्ध्यति तथा तथा परं धारयेदित्यर्थः ॥ १३ ॥ ❀ ❀ इयं च धारणा सञ्जातभक्तेर्भवति । यावत्पुनर्भक्तिर्न जायते तावत्पूर्वैव धारणा कर्त्तव्येत्याह—यावदिति । परेऽवरे यस्मात् । परावरत्वस्फुरणमपि सर्वोत्तमत्वरूपं

---

१ ग्राहकबुद्धिग्रहणादिति ख. ग. ग्राहकबुद्ध्यग्रभावादिति घ.

प्रेमभक्तेरङ्गं माहात्म्यज्ञानापरपर्यायम्। **अस्मिन्निति** स्वयं भक्त्या तं पश्यन्नाह। द्रष्टरि सर्वसाक्षिणि पूर्वोक्तन्यायेन सर्ववस्तुषु चैतन्यरूपेण वा प्रत्यग्रूपेण वा प्रकाशमाने। योगपदेन स्वसाधनं साधनभूतं भक्तेः स्थिरं रूपमुक्तम्। तावत् स्थवीयः स्थूलम्। पुरुषस्य पूर्वोक्तस्य। क्रियावसाने अग्निहोत्रादिकं कृत्वा अव्यग्रशुद्धावस्थायाम्। संन्यासं गृहीत्वेति केचित्। तदा निरन्तरं स्मरणं भवति। परं क्रियाया हेतुत्वं न स्यात्। प्रतिबन्धकत्वकल्पनापेक्षया साधकत्वकल्पनाया उत्कृष्टत्वात्। **"पुण्यतीर्थजलाप्लुत"** इति नियमानामुक्तत्वाच्च। प्रयतः सावधानो भूत्वा। नियमेऽपि धर्मः। अन्यभावनापरित्यागार्थं वा॥ १४॥ ❀ ❀ एवमन्तकाले पाक्षिकदोषपरिहारार्थं योगं साधयित्वा तस्य दृष्टोपायत्वज्ञापनाय बुद्धिपूर्वकं मरणप्रकारमाह **स्थिरमित्यादिना**—फलमुखमेतदङ्गं सन्निहितम्। उत्तराङ्गमिति केचित्। अवान्तरव्यापार इत्यपरे। स्थिरमचञ्चलम्। सुखं कोमलम्। पद्मासनादिरूपं वृष्या[1]दिरूपं वा। आ समन्तात् स्थितः। मनसाऽप्यन्यत्र गमनं निवारितम्। अतः परं संन्यासो नित्यः। तदा वा संन्यासः कर्त्तव्य इत्याह—**यतिरिति**। प्राणायामं कृत्वा पञ्चाक्षरं संन्यासमन्त्रं त्रिर्जपित्वा **"अभयमभयं भूतेभ्य"** इति भूताभयदानमुक्त्वा ब्राह्मणस्त्रिविधनिर्देशमुक्त्वा **"वसुरण्वो विभूरसी"**'ति महोपनिषदर्थं भावयित्वा ब्रह्मणि प्रणवेन जीवयोजनं यतित्वम्। एवं भूत्वा तदा अन्यदा वा यदा जिहासुर्भवति। इमं लोकं देहम्। तदा देशकालापेक्षा न कर्त्तव्येत्याह—**देशे च काले चेति**। देशे बदरिकाश्रमादिपुण्यस्थाने। काले उत्तरायणे। चकारादुभयाङ्गधर्मेषु मनो नाऽऽसक्तं कुर्यात्। विशेषणभूत एव देशादौ चित्तं व्याप्तं मा भवेदिति तदा केवलं भगवन्निष्ठं मनः कृत्वा यद्देशादिभिर्भविष्यति तद्भगवतैव भविष्यतीति मनः स्थैर्यं विधाय प्राणान्नियच्छेत्। मूलाधारादपानं सङ्कोच्य तत्र प्राणं निधाय कुण्डलिनीप्रबोधनेन प्रबुद्धां तां प्राणापानसहितां सुषुम्णारन्ध्रे निवेश्य वायुमूर्ध्वं नयेदित्यर्थः मनसा बुद्धिसहितेन देहचालनादिकमकृत्वा एतत्सामर्थ्यं जितासोरेव भव[2]तीति तदवसरे[3] स्मारयति—**जितासुरिति**। एवङ्कृते वा जितासुर्भवति। यदा कश्चित्स्वग्रामान्निष्काश्यते तदा जयः सिद्धो भवति॥ १५॥ ❀ ❀ तदनन्तरं मनः स्वबुद्ध्या आत्मबुद्ध्या सञ्जातव्यतिरिक्तरूपया। अमलया भक्त्यादिभिः शुद्धया। नियम्य स्थिरं कृत्वा प्रयत्नं त्याजयित्वा। दण्डवत्त्यक्त्वेति यावत्। स्वस्मिन् वा स्थापयित्वा बुद्ध्या वा संयोज्य। तां बुद्धिं मनः समाहितां वा। क्षेत्रज्ञे शारीरे आत्मनि। यः क्षेत्रं देहादि अहमिति ममेदमिति वा अभिमन्यते तस्मिन् प्रवेशयेत्। तञ्च क्षेत्रज्ञं भगवतो रूपविशेषे सर्वजीवसमूहरूपे आत्मनि **"अहमात्मा गुडाकेश सर्वभूताशयस्थित"** इति वाक्यनिरूपिते भगवद्विभूतिरूपे। तमात्मानं भगवति तस्मि[4]न्नेव भगवद्रूपे। अवरुध्य एकीकृत्य पुनर्देहानुसन्धानार्थमिच्छामकृत्वा धीरो भूत्वा [illegible] तत्राऽऽत्मनि लब्धोपशान्तिः कृतात् कार्यान्तरात् [illegible] उपरतो भवेत्। तत्राऽऽधायैव स्थित्वा पुनर्नाऽऽगच्छेदित्यर्थः। अत्रैव मुक्तिरित्येकः पक्षः एवं स्थिते देहः स्वयमेव स्वकारणलयाद्गच्छति। परं तन्नाऽनुसन्धत्ते। एतत्तृतीये वक्ष्यते॥ १६॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

कथं धारयेदित्याकाङ्क्षायामाहुः **जितं जितमित्यादि**॥ १३॥ ❀ ❀ **यावन्नेत्यत्र पूर्वोक्तन्यायेनेति**। स्वप्नजनेक्षितृन्यायेनेत्यर्थः। तत्र **'परावरेस्मिन्नि'**ति (मूल) पदाभ्यां माहात्म्यज्ञानपूर्विकां भक्तिं भगवदाविर्भावं स्वस्मिन् सूचयतीति भक्तियोगपदेन भक्तिलक्षणं योगमपि स्वस्मिन् सूचयतीत्याशयेनाहुः **योगपदेनेत्यादि**। **स्वसाधनं** स्वकृतं चित्तनिरोधरूपं साधनम्, साधनभूतं भक्तेः स्थिरं रूपमुक्तमसाधारणं भक्तिनिरूपकमुक्तम्, स्वस्मिन् भक्तिलक्षणो योग उक्त इत्यर्थः। **पूर्वोक्तस्य** क्षरस्येत्यर्थः। क्रियाया हेतुत्वङ्गीकार इष्टापत्तौ दूषणमाहुः **प्रतिबन्धकेत्यादि**। उत्कृष्टत्वञ्च 'एतान्यपि तु कर्माणि' 'स्वर्गः सत्त्वगुणोदय' इत्यादिवाक्यैरवगन्तव्यम्। प्रकृतानुशयोयमेवेत्यत्र विनिगमकमाहुः पुण्येत्यादि **प्रयत** इत्यादि च। फलानभिसन्धाने धर्मस्य किं प्रयोजनमित्यतः पक्षान्तरमाहुः **अन्येत्यादि**॥ १४॥ ❀ ❀ **स्थिरमित्यत्र एतदङ्गमिति**, बुद्धिपूर्वकं मरणं स्मरणस्याङ्गं सन्निहितं सहकारीत्यर्थः। **उत्तराङ्गमिति** फलजननदशायां सहकारि॥ १५॥ ❀ ❀ **मनः स्वेत्यत्र अत्रैव मुक्तिरितीति**। अत्रैव हृदयाकाश एवेत्यर्थः। **एतेन कठे** (कठे) 'यदा सर्वे प्रलीयन्ते कामा येऽस्य हृदि स्थिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत' तद् यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते बृ०४—४—७ इत्यादिका श्रुतिर्व्याख्याता ज्ञेया। **एवं स्थिते** इति स्वजीवमक्षरे संयोज्य स्थिते सतीत्यर्थः। **स्वकारणलयादिति**, देहाकारणञ्च प्राणधारणप्रयत्नो वा अविद्याकामकर्माणि वा तल्लयश्चोपशमाज्ज्ञेयः। अत्रैवमुक्तौ प्रमाणमाहुः **तृतीय** इति, देवहूतिसंसिद्धौ स्फुटं, ततोऽवधेयम्॥ १६॥

### श्रीगिरिधरकृता-बालप्रबोधिनी

एवं धारणामुक्त्वा ध्यानमाह—**एकैकश इति**। गदाभृतः परमात्मनः पादादि पादप्रभृति यावद्धसितं मन्दस्मितावधि एकैकशः प्रत्येकमङ्गानि धियाऽनुभावयेत् चिन्तयेत्। यथा यथा ध्यानेन धीः शुद्ध्यति तस्मिन्निश्चला भवति तथा तथा जितं

---

१ वृष्यादिरूपं वेति ख. २ सम्भवतीति क. ग. ३ तदवसरमिति क. ४ तस्मिन्नेव वा भगवद्रूपे इति ख.

जितं अनायासेन स्फुरितं स्फुरितं स्थानं पादगुल्फाद्यवयवमपोह्य त्यक्त्वा परं परं जङ्घाजान्वाद्यवयवं धारयेत् हृदये ध्यायेदित्यन्वयः ॥ १३ ॥ ❀ ❀ पूर्वोक्तवैराजधारणाया एतद्धारणाङ्गत्वमाह—यावदिति । परे ब्रह्मादयः अवरे यस्मात्तस्मिन् विश्वस्येश्वरे नियन्तरि द्रष्टरि सर्वसाक्षिणि अस्मिन्नुक्तविग्रहविशिष्टे अशुद्धबुद्धित्वात् यावद्भक्तियोगः परमप्रेमलक्षणो न जायते तावच्चित्तशुद्ध्यर्थं अग्निहोत्राद्यावश्यकीः क्रियाः कुर्वंस्तदवसाने तत्समाप्तौ सावकाशसमये प्रयतः प्रयत्नवान् सन् पुरुषस्य भगवतः स्थवीयः स्थूलतरं पूर्वोक्तं रूपं स्मरेत ध्यायेदित्यन्वयः ॥ १४ ॥ ❀ ❀ तदेवं तावदासन्नमृत्योः पुंसः कृत्यमुक्तम्, इदानीं तस्यैव स्वयं देहं त्यक्तुमिच्छतः कृत्यमाह—स्थिरमिति सार्द्धैश्चतुर्भिः । त्वं तु भगवद्भक्तत्वेन अस्मदङ्गतुल्योऽस्यतः सर्वमपि रहस्यं वदाम इति सूचयन्सम्बोधयति—हे अङ्गेति । यतिर्योगाभ्यासी यदा निर्भयपदप्राप्त्यर्थमिमं लोकं देहं जिहासुः स्यात् त्यक्तुमिच्छेत्तदा देशे पुण्यक्षेत्रे काले चोत्तरायणादौ मनो न सज्जयेत् सङ्गं न प्रापयेत् । न देशकालौ योगिनः सिद्धिहेतू किन्तु भगवानेवेति दृढनिश्चयः सन् स्थिरं सुखकरं चासनमाश्रितो मनसा प्राणानिन्द्रियाणि नियच्छेत् अनन्यपराणि कुर्यात् । एतच्च प्राणविजयं विना दुष्करमत आह—जितासुरिति । प्राणायामैर्वशीकृतप्राण इत्यर्थः ॥ १५ ॥ ❀ ❀ अमलया भगवदुपासनेन दूरीकृतमलया स्वबुद्ध्या मनो नियम्य बुद्धिव्यापारमात्ररतं कृत्वा एतां बुद्धिं क्षेत्रज्ञे जीवे निनयेत् नियच्छेत् । तं क्षेत्रज्ञमात्मनि परमात्मनि भगवति निनयेत् । एवमात्मानं जीवमात्मनि सर्वात्मनि भगवति अवरुद्ध्य समर्प्य तेन लब्धा उपशान्तिः कामक्रोधादिसर्वदोषनिवृत्तिर्येन तथाभूतः सन् कृत्यात्प्रयत्नाद्विरमेतेत्यन्वयः । एतत्पर्यन्तसाधनानुष्ठाने धैर्यमावश्यकमिति सूचयन्नाह—धीर इति ॥ १६ ॥

## हिन्दी अनुवाद

भगवान्‌के चरण-कमलोंसे लेकर उनके मुसकानयुक्त मुखकमलपर्यन्त समस्त अङ्गोंकी एक-एक करके बुद्धिके द्वारा धारणा करनी चाहिये । जैसे-जैसे बुद्धि शुद्ध होती जायगी, वैसे-वैसे चित्त स्थिर होता जायगा । जब एक अङ्गका ध्यान ठीक-ठीक होने लगे, तब उसे छोड़ कर दूसरे अङ्गका ध्यान करना चाहिये ॥ १३ ॥ ❀ ❀ ये विश्वेश्वर भगवान् दृश्य नहीं, द्रष्टा है । सगुण निर्गुण-सब इन्हींका स्वरूप है । जब तक इनमें अनन्य प्रेममय भक्तियोग न हो जाय, तब तक साधकको नित्य-नैमित्तिक कर्मोंके बाद एकाग्रतासे भगवान्‌के उपर्युक्त स्थूल रूपका ही चिन्तन करना चाहिये ॥ १४ ॥ ❀ ❀ परीक्षित् ! जब योगी पुरुष इस मनुष्य-लोकको छोड़ना चाहे, तब देश और कालमें मनको न लगाये । सुखपूर्वक स्थिर आसनसे बैठकर प्राणोंको जीतकर मनसे इन्द्रियोंका संयम करे ॥ १५ ॥ ❀ ❀ तदनन्तर अपनी निर्मल बुद्धि मनको नियमित करके मनके साथ बुद्धिको क्षेत्रज्ञमें और क्षेत्रज्ञको अन्तरात्मामें लीन कर दे । फिर अन्तरात्मा को परमात्मामें लीन करके धीर पुरुष उस परम शान्तिमय अवस्थामें स्थित हो जाय । फिर उसके लिये कोई कर्तव्य शेष नहीं रहता ॥ १६ ॥

न यत्र कालोऽनिमिषां परः[1] प्रभुः कुतो नु देवा जगतां य ईशिरे ।
न यत्र सत्त्वं न रजस्तमश्च न वै विका[2]रो न महान् प्रधानम् ॥ १७ ॥
प[3]रं पदं वैष्णवमामनन्ति तद् यन्नेति नेतीत्यतदुत्सिसृक्षवः ।
विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे ॥ १८ ॥
इत्थं मुनिस्तूपरमेद् व्यवस्थितो विज्ञानदृग्वीर्यसुरन्धिताशयः ।
स्वपार्ष्णिनाऽऽपीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः ॥ १९ ॥
नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः ।
ततोऽनुसन्धाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत ॥ २० ॥

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तदेवाह । न यत्रेति । यत्रात्मस्वरूपे कालो न प्रभुः किमपि कर्तुं न समर्थः । अत एव देवा न प्रभव इत्याह । अनिमिषां देवानां परः प्रभुः कालोऽपि यत्र न प्रभुस्तत्र कुतो नु देवाः प्रभवेयुः । देवनियम्यानां तु जगतां प्राणिनां का वार्तेत्याह । जगतामिति कुतो न प्रभवंतीत्यपेक्षायां निरुपाधित्वादित्याह । न यत्रेति । यद्वा जगत्कारणान्यपि न यस्य सृष्ट्यादौ प्रभवंतीत्याह । न

१ प्रा० पा० प्रभुः । २ प्रा० पा० विकाराः । ३ प्रा० पा० पदं परं ।

यत्रेति। विकारोऽहंकारः॥ १७॥ ॐ ॐ निरुपाधित्वं कुत इत्यत आह। परमिति। यद्यस्मादेतत् आत्मव्यतिरिक्तं नेति-नेतीत्येवमुत्स्रष्टुमिच्छवो दौरात्म्यं देहाद्यात्मत्वं विसृज्याहस्य पूज्यस्य श्रीविष्णोः पदेपदे क्षणेक्षणे हृदा उपगुह्य आश्लिष्य नान्यस्मिन्सौहृदं येषां तथाभूताः पदे संतस्तद्वैष्णवं पदमत एव परं सर्वतः श्रेष्ठमामनंतीत्यन्वयः॥ १८॥ ॐ ॐ तस्मादित्थं ब्रह्मत्वेन व्यवस्थितो मुनिरुपरमेत्। तुशब्देन 'यदि प्रयास्यन्' इति वक्ष्यमाणात्सकामाद्विशेष उक्तः तमाह। विज्ञायतेऽनेनेति विज्ञानं शास्त्रं तेन जाता दृक् ज्ञानं तस्य वीर्यं बलं तेन सुरंधिताः विहिंसिता आशया विषयवासना यस्य सः। इदानीं तस्य देहत्यागप्रकारमाह। स्वपार्ष्णिना पादमूलेन गुदमूलाधारमापीड्य निरुध्यानिलं प्राणमुन्नमयेदूर्ध्वं नयेत्। जितः क्लमो येन। षट्सु स्थानेषु नाभ्यादिषु॥ १९॥ ॐ ॐ नाभ्यां मणिपूरके स्थितं हृद्यनाहतचक्रेऽधिरोप्य उरसि कंठादधोदेशे स्थिते विशुद्धि-चक्रे मनस्वी जितचित्तः स्वतालुमूलं तस्यैव चक्रस्याग्रदेशम्। ततो बहुधा गमनसंभवाच्छनकैरित्युक्तम्॥ २०॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

तदेव ब्रह्मस्वरूपमेव। अत एव कालस्याप्रभुत्वमेव। अनिमिषामिति षष्ठ्यंतं किबंतमिषे रूपम्। जगतां प्राकृतजगत्स्वे-वेशिरे ऐश्वर्यं चक्रिरे। देवा इंद्राद्याः। ननु देवास्तत्त्वाभिमानिनो जगत्कारणीभूतास्तत्र कथं न प्रभवेयुरिति तत्राह। यद्वेति। अत्र संदर्भः—पूर्वोक्तधारणाफलं द्विविधं ब्रह्मकैवल्यप्राप्तिर्वैकुंठप्राप्तिश्च भक्तिसिद्धज्ञाननिष्ठत्वाद्भक्तिमयज्ञाननिष्ठत्वाच्च। अत उत्तराव-स्थामजामिलादिन्यायेन तत्रैव वैकुंठाभिव्यक्तिदर्शनार्थमाह। 'न यत्र' इति युग्मकेन। अत्र वैकुंठस्य सच्चिदानंदरूपत्वं श्रीभगवतै-वोक्तम् तद्यथा। "एवमेतान्यथादिष्ठाननुतिष्ठंति मे पथः। क्षेमं विदंति मत्स्थानं यद्ब्रह्म परमं विदुः॥" मे पथः ज्ञानभक्तिकर्म-लक्षणान् मत्प्राप्त्युपायान् ज्ञानकर्मणोरपि भक्तेषु भक्तेः प्रथमतः कांचित् किंचित्साहाय्यकारित्वात् क्षेमं मद्भक्तिमंगलमयं मत्स्थानं परमं ब्रह्मेति जानंति। इत्थमेवोदाहरिष्यते च। "इति संचिन्त्य भगवान्महाकारुणिको हरिः। दर्शयामास लोकं स्वं गोपानां तमसः परम्॥ सत्यं ज्ञानमनंतं यद्ब्रह्म ज्योतिः सनातनम्। यद्धि पश्यंति मुनयो गुणापाये समाहिताः॥" इति। उभयत्रापि चकाराद-ध्याहारादिना त्वर्थांतरं कष्टं भवति। तैरेव च व्याख्यातम्। तमसः प्रकृतेः परमिति। वैकुंठस्यापि विशेषणीकृत्येति॥ १७॥ ॐ ॐ परं पदमिति अतच्चिद्व्यतिरिक्तं नेतिनेतीत्येवमुत्स्रष्टुमिच्छवो दौरात्म्यं भगवदात्मनोर्भेददृष्टिं विसृज्याहस्य श्रीभगवतः पदं चरणारविंदं पदेपदे प्रतिक्षणं हृदोपगुह्याश्लिष्य अनन्यसौहृदा नान्यस्मिन्सौहृदं येषां तथाभूताः संतो यदामनंति तदेव वैष्णवं पदं श्रीवैकुंठाख्यमिति ब्रह्मस्वरूपमेव तदिति तात्पर्यम्। अनेन भक्तिलक्षणसाधनलिंगेन निराकाररूपमर्थांतरं निरस्तम्। अत्र निराकारपरायणस्यापि मुक्ताफलटीकाकृतो दैवाद्व्यंजिता गीर्यथा तत्परं पदं वैष्णवमामनंति अधिकृताधिष्ठितराजाधिष्ठितत्ववत्। ब्रह्मादिपदानामपि विष्णुनाधिष्ठितत्वात्परमित्युक्तम्। विष्णुनेवाधिष्ठितमित्यर्थ इति। अत एव श्रुतावपि तस्य स्वमहिमैक-प्रतिष्ठितत्वम्। "स भगवान्कस्मिन्प्रतिष्ठितः" इति। स्वे महिम्नीति। विश्वनाथस्तु—सत्त्वादयः कथं न संतीत्यत आह—परं प्रधानात्परम्। अत एव वैष्णवं पदं विष्णोर्निर्विशेषस्वरूपं तत्प्रसिद्धमेव। तदपि भगवद्भक्ता नारदादय एव यथा जानंति न तथा ज्ञानिनोपीत्याह। यद्ब्रह्म नेतिनेतीत्येवमेनत्तद्व्यतिरिक्तं वस्तु उत्सिसृक्षवः आ सम्यगेवामनंति जानंति। किं कृत्वा दौरात्म्यं केवलं ज्ञानिनामिव निर्बुद्धित्वं विसृज्य कीदृशा अनन्यसौहृदा विष्णुसंबंधव्यतिरिक्तवस्तुनि स्नेहाभाववंतः। अर्हस्य पूज्यस्य श्रीविष्णोः पदं चरणारविंदं पदेपदे क्षणेक्षणे हृदोपगुह्य इदमस्माकं सर्वस्वमित्यालिंग्य। अत्र तदुत्सृजंत इत्यनुक्ते यदा स्वप्रभो-र्ब्रह्मस्वरूपं केवलमनुबुभूषंति तदाऽतस्त्यक्तुमिच्छवो भवंति सर्वथा तु भगवत्सेवोपकरणत्वात्। दृश्यं जगन्न त्यजंतीत्यर्थाल्लभ्यते। दौरात्म्यमिति। विष्णोर्देहे मायिकत्वबुद्धिमतो दुरात्मान एव ज्ञेयाः॥ १८॥ ॐ ॐ तं विशेषम्। षट्सु नाभिहृदुरस्तालुमूल-भ्रूमध्यब्रह्मरंध्रेषु॥ १९॥ ॐ ॐ तत्र प्रथमं नाभेरधः स्वाधिष्ठानचक्रादुपरि नाभ्यां तस्यैव चक्रस्य विशुद्धिचक्रस्य॥ २०॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

यदि प्रयास्यन्नित्यस्याध्यायस्यैव द्वाविंशश्लोको द्रष्टव्यः॥ १९॥ ॐ ॐ नाभ्यादिष्विति। अत्र परोक्तेषु मणिपूरा-नाहतविशुद्धतालुमूलाज्ञाचक्रब्रह्मरन्ध्रेष्वित्यर्थः॥ [षट्चक्रभेदस्य विशेषविवृतिरस्मत्प्रकाशिते महानिर्वाणतन्त्रे सप्तपञ्चाशदधिक-शततमसंख्याङ्कितपत्रे द्रष्टव्या।]॥ २०—२४॥

## श्रीमद्वीरराघवव्याख्या

अथ प्राप्यं परमात्मस्वरूपं वक्ष्यंस्तस्मिन् स्वात्मसमर्पणावधि कर्म न त्याज्यमित्याह न यत्रेति। यत्र वैष्णवे पदे कालो न प्रभुः किमपि कर्तुं न समर्थः अतएव देवो न प्रभव इत्याह अनिमिषां ब्रह्मादीनां परः प्रभुः कालो यत्र न प्रभुः तत्र कुतो देवाः प्रभवः स्युः। देवनियम्यानां जगतां प्राणिनां का वार्तेत्याह जगतां प्राणिनां ये ईशिरे जगंति ये न्ययमयन्देवाः ते कुतो न प्रभवः तन्नियाम्यानां जगतां त्वप्रभुत्वं कैमुत्यन्यायसिद्धमित्यर्थः सर्वैरनियाम्यं सर्वैरनियन्त्रितमित्यर्थः किं च यत्र पदे प्रधानं तद्गुणाः सत्त्वादयः प्रधानकार्य-

भूतमहदहंकारादयश्च स्वकीयकार्यजननक्षमा न भवंति ॥ १७ ॥ ❀ ❀ यद्विष्णोः संबंधि परं सर्वोत्कृष्टं पदं प्राप्यं स्वरूपं पद्यते गम्यत इति हि व्युत्पत्तिः आमनंति वेदा इति शेषः किंकर्तुमिच्छव आमनंति यद्यस्मिन्नेतन्नेति नेतीति उत्सिसृक्षवः तद्व्यतिरिक्त-मुत्स्रष्टुमिच्छवः व्यावर्तयितुमिच्छवः अब्रह्मात्मकं स्वतंत्रं वस्तु नेतिनेतीति बोधयंतः कालादिभिरनियाम्यं कालादीनां च नियंतृ [illegible] धनीयस्य भगवतः परमनन्यसौहृदा अनन्यसौहृदयेन हृदयस्य हृदादेशः यद्वाऽनन्यसौहृदा वेदांताः आमनंतीति पूर्वेणान्वयः अनन्यतात्पर्यका इत्यर्थः हृदा हृदयेनोपगुह्य पदेपदे क्षणेक्षणे आश्लिष्य कृत्याद्विरमेत तदा कृतकृत्यो भवेदिति पूर्वेणान्वयः ॥ १८ ॥ ❀ ❀ अथ देहादुत्क्रांतिमाह इत्थमिति इत्थं तूपरमेन् देहादितिशेषः तु शब्दः कृत्याद्विरतेर्देहादुपरामस्य वैषम्यद्योतकः इत्थं वक्ष्यमाणप्रकारत्वेन एतदेवोपपादयति विज्ञानेति सर्वं ब्रह्मात्मकमिति व्यवस्थितमिति मतिर्विज्ञानं भगवदुपासनात्मकं ज्ञानं तदेव दृग्दर्शनात्मकं प्रत्यक्षतापन्नमित्यर्थः तादृशस्य ज्ञानस्य यद्वीर्यं सामर्थ्यं तेन सुरंधितः विहिंसितः निःशेषनिवृत्तः आशयो वासना यस्य स तथोक्तः योगी स्वपार्ष्णिना स्वपादमूलेन गुदं मूलाधारमापीड्य निरुध्य तत आपीडनानंतरमनिलं प्राणं षट्सु नाभ्यादिषु वक्ष्य-माणेषु स्थानेषु उन्नमयेत् । जितः क्लमो येन निवृत्तश्रम इत्यर्थः ॥ १९ ॥

नाभ्यां मणिपूरके स्थितं प्राणं हृद्यनाहताख्यहृदयकमलेऽधिरोप्य तस्माद्धृदः उदानगत्योदानस्योदानवायोर्गत्या संचार-प्रकारेण उरसि कंठादधोदेशस्थिते विशुद्धचक्रे तं प्राणं नयेत तत उरसः धियानुसंधाय गंतव्यमनुसंधाय मनस्वी यतचित्तः स्वतालु-मूलं स्वजिह्वाग्रपूर्वचक्रस्यैवाग्रभागं शनकैः ततो बहुधा गमनसंभवाच्छनकैरित्युक्तं नयेत प्रापयेत ॥ २० ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

एवमुक्तांतो ज्ञानी यं लोकमाप्नोति तमितरलोकेभ्यो व्यावर्तयति न यत्रेति यत्र यस्मिंल्लोकेऽनिमिषाणां रुद्रादिदेवानां प्रभुः कालो वायु र्न प्रभुःस्वशक्तेरुद्बोधकः "हरिश्च प्रकृतिश्चैव ब्रह्मवायू तथैवचेत्यादेः❀ ये रुद्रादयो देवा जगतामीशिरे जगति स्वस्वकार्ये प्रवर्तयामासुस्ते देवा न प्रभवंति कुतोन्यावकाशो न कुतोऽपीत्यर्थः । यत्र यस्मिन्स्थाने सत्त्वादिगुणत्रयं च स्वशक्तिप्रकाशकं न । विका-रो भूतेंद्रियात्मको हंकारश्च न । महान् महत्तत्त्वं च प्रधानं प्रकृतिश्च न । जरादिस्वधर्मोपादिका न भवंतीत्यर्थः ॥ १८ ॥ ❀ ❀ ननु कालादिसंसर्गाभावाच्छशविषाणवन्नास्तीति तत्राह परंपदमिति तद्विष्णवं तद्वैष्णोर्विद्यमानं परंपदं प्राप्तव्योत्तमं लोकमामनंति पठंतीत्य-न्वयः अनेन यथा कालादिकृतोपद्रवो हरेर्नास्ति तथालोकस्यापीत्युक्तं भवति यत्संबंधाल्लोकोऽपि तादृङ्महिमा स विष्णुः किंमहिमेति तत्राह यन्नेतीति वैष्णवमित्यनेन प्रस्तुतो विष्णुरयमुच्यते अतत् तस्मात् ब्रह्मण इतरत् संसारलक्षणं दुःखमुत्सिसृक्षवस्त्यक्तुकामाः विशिष्टाधिकारिणो यं विष्णुं नेतिनेति पृथिव्यादिवन्नाकाशादिवच्च न तत्कारणमहदादिवच्च न तदभिमानिवच्च नेत्युपास्यत तद्दौरात्म्यं दुरात्मनामसुरप्रकृतीनां विद्यमानं संसारदुःखं विसृज्यानन्यसौहृदा अनन्यभक्ता हृदा निरतिशयस्नेहलक्षणभक्त्योपगुह्य पदेपदे मनसा निरंतरं परिरभ्यामुमापुः एवंविधस्य हरेर्विद्यमानमितिपूर्वेणान्वयः यद्वा यत्सर्वोत्तमं परममंगलं विष्णुरूपमाप्नवान् तद्रूपमितरेभ्यो व्या-वर्तयति न यत्रेति अतत्तस्माद्ब्रह्मणोऽन्यद् जगदुत्सिसृक्षवस्त्याजयितुकामाः स वा एष आत्मानेतिनेतीत्यामनंति तदित्यन्वयः वेदाना-मचेतनत्वेन बुद्धिपूर्वकप्रवृत्त्यसंभवात्कथं तदुक्तं निर्णेतुं शक्यत इत्यत्राह विसृज्येति । वेदोक्तेन निर्णीय दौरात्म्यं दुष्टोपास्तिमैकविषयं विसृज्य पदेपदेऽन्वहं हृदोपगुह्यापरोक्षीकृत्यानन्यसौहृदा भूतभवद्भविष्यंतोऽमुमापुराप्नुवंत्याप्स्यंति वातो युक्तमुक्तमिति ॥ १८ ॥ ❀ ❀ संप्रति ज्ञानिनो देहादुत्क्रमणप्रकारमाह-इत्थमिति तुशब्दः प्रकरणभेदार्थः इत्थं स्थिरं सुखं चासनमित्युक्तप्रकारेण मुनिरपर-मेदुत्क्रमितो भवेत् । कथमत्राह व्यवस्थित इति देहादुत्क्रमणे व्यवस्थितो निश्चितबुद्धिः । विज्ञानमात्मयोग्यज्ञानं स्वबिंबविषयं तदे-दृक् तस्यावीर्येण सुष्ठु रंधितो दग्धआशयो बाह्यांतःकरणं यस्य स तथोक्तः । विज्ञानं ब्रह्मेति श्रुतेर्विज्ञानस्य ब्रह्मणो दृशो वीर्येणेति वा जितक्लमः शरीरग्लानिरहितः प्रथमं स्वपार्ष्णिनागुल्फाधोभागेन गुदमपानद्वारमापीड्य ततोपानद्वारनिरोधानंतरम् । ततो मूलाधा-राच्चतुर्दलपद्मादनिलमुदानवायुमुत्थाप्य नाभिहृदयोरस्तालुमूलभ्रूमध्यमूर्धसु षट्स्थानेषु क्रमादुन्नमयेदूर्ध्वं गमयेदित्यन्वयः ॥ १९ ॥ ❀ ❀ संक्षिप्योक्तं विशिनष्टि नाभ्यामित्यादिना मुनिर्मूलाधाराच्चतुर्दलपद्मादुन्नीय नाभ्यां स्थितं षट्दलपद्मेनीतमुदानगत्या ब्रह्मना-ड्या हृदि दशदलपद्मेऽवरोप्य सन्निधाय ततो दशदलपद्मात्तमुरसि द्वादशदलपद्मं नयेत् मनस्वी मनःसमाधाननिरतस्ततो द्वादशदल-पद्माद्यथानाड्यंतरं न गच्छेत्तथा धियानुसंधाय शनकैरसंभ्रमेण स्वतालुमूलं षोडशदलकमलं नयेत् ॥ २० ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

तत्फलञ्च द्विविधं ब्रह्मकैवल्यप्राप्तिर्वैकुण्ठप्राप्तिश्च, भक्तिसिद्धज्ञाननिष्ठत्वाद्भक्तिमयज्ञाननिष्ठत्वाच्च । तत्र पूर्वावस्था उक्ता । अथ उत्तरावस्थामजामिलादिन्यायेन तत्रैव वैकुण्ठाभिव्यक्तिदर्शनार्थमाह, न यत्रेति युग्मकेन । अत्र श्रीवैकुण्ठस्य

---

❀ कालशब्देरिताः क्रमादिति शेषतात्पर्यम् । कर्मणि षष्ठी ।

सच्चिदानन्दरूपत्वं श्रीभगवतैवोक्तम् । तद्यथा—एवमेतान् मयादिष्टाननुतिष्ठन्ति मे पथः—ज्ञानकर्म्मभक्तिलक्षणान् मत्प्राप्त्युपायान्; ज्ञानकर्म्मणोरपि भक्तेषु भक्तेः प्रथमतः कचित् कदाचित् किञ्चित्साहाय्यकारित्वात् । क्षेमं—मद्भक्तिमङ्गलमयम् । यत् स्थानं परमं ब्रह्मेति विदुर्जानन्ति । इत्थमेवोदाहरिष्यते च दशमे—इति सञ्चिन्त्य भगवान् महाकारुणिको विभुः । दर्शयामास लोकं स्वं गोपानां तमसः परम् । सत्यं ज्ञानमनन्तं यद्ब्रह्म ज्योतिः सनातनम् । यद्धिपश्यन्ति मुनयो गुणापाये समाहिताः ॥ इति । उभयत्रापि चकाराद्यध्याहारादिना त्वर्थान्तरं कष्टं भवति । तैरेव च तमसः प्रकृतेः परिमिति वैकुण्ठस्यापि विशेषणत्वेन व्याख्यातमिति ॥ १७ ॥ ❀ ❀ परं पदमिति । अतत् चिद्व्यतिरिक्तं नेति नेतीत्येवमुत्स्रष्टुमिच्छवः दौरात्म्यं भगवदात्मनोरभेददृष्टिं विसृज्य अर्हस्य श्रीभगवतः पदं चरणारविन्दं पदे पदे प्रतिक्षणं हृदा उपगुह्य आश्लिष्य अनन्यसौहृदाः नान्यस्मिन् सौहृदं येषां तथाभुताः सन्तः यत् आमनन्ति जानन्ति तद्वैष्णवं पदं श्रीवैकुण्ठाख्यमिति ब्रह्मस्वरूपमेव तदिति तात्पर्य्यम् । अनेन भक्तिलक्षणसाधनलिङ्गेन निराकाररूपमर्थान्तरं निरस्तम् । अत्र निराकारपरायणस्यापि मुक्ताफलटीकाकृतो दैवाभिव्यञ्जिता गीर्यथा—तत् परं पदं वैष्णवमामनन्ति अधिकृताधिष्ठितराजाधिष्ठितत्ववत् ब्रह्मादिपदानामपि विष्णुनाधिष्ठितत्वात् परमित्युक्तम् । विष्णुनैवाधिष्ठितमित्यर्थं इति । अतएव श्रुतावपि तस्य स्वमहिमैकप्रतिष्ठितत्वम्—स भगवान् कस्मिन् प्रतिष्ठित इति स्वे महिम्नि इति । अतएवोक्तम्—क इत्था वेद यत्र स इति ॥ १८ ॥ ❀ ❀ इत्थमित्यर्द्धकम् ॥ १९, २० ॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

न च मुक्तं कोऽप्यतिक्राम्यतीत्याह यत्र प्राप्तब्रह्मस्वरूपे तस्मिन् अनिमिषां देवानामपि परः शास्ता कालो न प्रभुः । तत्र कुतो नु देवाः प्रभवेयुः । ये देवा इन्द्राद्याः जगतां प्राकृतजगत्स्वेव ईशिरे ईशाञ्चक्रिरे । ननु तदेव ब्रह्म किं स्वरूपं तत्राह न यत्र सत्त्वमिति । यत्र ब्रह्मणि विकारः अहङ्कारः ॥ १७ ॥ ❀ ❀ सत्त्वादयः कथं न सन्ति इत्यत आह । परं प्रधानात् परम् अतएव वैष्णवं पदं विष्णोर्निर्विशेषं स्वरूपं तत् प्रसिद्धमेव तदपि भगवद्भक्ता नारदादय एव यथा जानन्ति न तथा ज्ञानिनोऽपीत्याह । यत् ब्रह्म नेति नेतित्येवम् अतत् तद्व्यतिरिक्तं वस्तु उत् सिसृक्षवः आ सम्यगेव आमनन्ति जानन्ति किं कृत्वा दौरात्म्यं केवलज्ञानिनामिव निर्बुद्धित्वं विसृज्य । कीदृशाः अनन्यसौहृदाः विष्णुसम्बन्धव्यतिरिक्तवस्तुनि स्नेहाभाववन्तः । अर्हस्य पूज्यस्य श्रीविष्णोः पदं चरणारविन्दं पदे पदे क्षणे क्षणे हृदा उपगुह्य इदमेवास्माकं सर्वस्वमित्यालिङ्ग्य । अत्र अतदुत्सृजन्तः इत्यनुक्तेर्यदा स्वप्रभोर्ब्रह्मस्वरूपं केवलमनुबुभूषन्ति तदा अतत् त्यक्तुमिच्छवो भवन्ति सर्व्वथा तु भगवत्सेवोपकरणत्वात् दृश्यं जगन्न त्यजन्तीत्यर्थो लभ्यते । दौरात्म्यमिति विष्णोर्देहे मायिकत्वबुद्धिमन्तो दुरात्मान एव ज्ञेयाः ॥ १८ ॥ ❀ ❀ इत्थं ब्रह्मत्वेन व्यस्थितो मुनिः । तुशब्देन यदि प्रयास्यन्निति वक्ष्यमाणात् सकामाद्विशेषः उक्तः । विज्ञानमनुभव एव दृग्दृष्टिस्तस्या वीर्य्येण बलेन सर्व्वतो निभालनाधिक्येन सुष्ठु रन्धिता आशया अतिसूक्ष्मा अपि विषयवासना येन सः ॥ १९ ॥ ❀ ❀ इदानीं तस्य देहत्यागे प्रकारमाह । स्वपार्ष्णिना पादमूलेन गुदं मूलाधारम् आपीड्य निरुध्य अनिलं प्राणं षट्सु स्थानेषु नाभिहृदुरस्तालुमूलभ्रूमध्यब्रह्मरन्ध्रेषु उन्नमयेत् । तत्र प्रथमं नाभेरधः स्वाधिष्ठानचक्रादुपरि नाभ्यां मणिपूरके स्थितम् अनिलं हृदि अनाहतचक्रे अधिरोप्य । उरसि कण्ठादधोदेशस्थिते विशुद्धचक्रे ॥ २० ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत्र भगवति स्वात्मसमर्पणपात्रे अनिमिषां देवानां परः भयदः कालोऽपि प्रभुः किंचित्करो न तत्र देवाः कालनियम्याः कुतः प्रभवः देवनियम्यानां जगतां प्राणिनां तु का कथेत्याह जगतां य ईशिरे इति । ये जगंति नियमंति ते तत्र न प्रभवः तत्र जगतां का कथेत्यर्थः । यत्र प्रधानं तत् कार्यभूतौ महदहंकारौ प्रधानगुणाश्च किंचिदपि कर्तुं न क्षमाः ॥ १७ ॥ ❀ ❀ अतद्ब्रह्मव्यतिरिक्तम् नेतिनेतीति उत्सिसृक्षवः उत्स्रष्टुमिच्छवः अनन्यसौहृदाः अनन्यविषयाः वेदांताः यत्परं सर्वोत्कृष्टं वैष्णवं पदं विष्णुस्वरूपमामनंति । जगत्कारणत्वेन सर्वात्मत्वेन सर्वशक्तिमत्त्वेन सत्यत्वादिमत्त्वेन च प्रतिपादयंति । तदर्हस्य पूज्यस्य विष्णोः पदं स्वरूपं स्वतंत्रोऽस्मीति दौरात्म्यमब्रह्मात्मकत्वं विसृज्य हृदा पदेपदे प्रतिक्षणमुपगुह्य संप्राप्य कृत्याद्विरमेतेति संबंधः ॥१८॥ ❀ ❀ एवं "न तस्य प्राणा उत्क्रामंति ब्रह्मैव सन् ब्रह्माप्येति यदासर्वे विमुच्यंते कामायेऽस्य हृदिस्थिताः अथमर्त्योऽमृतोभवत्यत्र ब्रह्मसमश्नुते" इति श्रुतिप्रोक्तां बद्धावस्थायां ब्रह्मप्राप्तिमुक्त्वा अर्चिरादिमार्गेण मुक्तावस्थायां ब्रह्मप्राप्तिप्रकारं वक्तुं तावद्देहादुत्क्रांतिप्रकारमाह इत्थमिति त्रिभिः । विज्ञानदृग्वीर्यसुरंधिताशयाः विज्ञानं शास्त्राचार्यानुग्रहाल्लब्धं विशिष्टं तत्त्वज्ञानं तदेव दृक् परिपाकावस्थापन्नं साक्षात्तत्त्वदर्शनं तस्य वीर्येण प्रभावेण सुरंधिताः आशयाः विषयवासना यस्य तथा । उक्तप्रकारेण व्यवस्थितः भगवति कृतात्मसमर्पणः इत्थं वक्ष्यमाणप्रकारेण मुनिस्तूपरमेद्देहादिति शेषः अनिलोत्थापनादिक्रियानभिज्ञस्य मुमुक्षोर्नाडीविशेषज्ञानं भगवदनुग्रहाद्भवतीति "हार्दानुगृहीतः शताधिकयेति सूत्रकारेण सूचितम् तस्मान्मुनेरनिलोत्थापनादिक्रियाभिज्ञस्य विशेषत्वद्योतकस्तुशब्दः तमेव प्रकारमाह स्वपार्ष्णिनेति द्वाभ्याम् स्वपार्ष्णिना स्वपादमूलेन गुदं मूलाधारमापीड्य निरुध्य ततस्तदनंतर-

मनिलं प्राणं षट्सु स्थानेषु नाभ्यादिपून्नमयेदूर्ध्वं नयेत् जितक्लमः जितश्रमः ॥ १९ ॥ ❀ ❀ नाभ्यां मणिपूरके स्थितमनिलं हृदि अनाहतचक्रेऽधिरोप्य ततोऽनाहतचक्रादुदानस्य वायोर्गत्या तमनिलमुरसि कंठादधोदेशे स्थिते विशुद्धिचक्रे नयेत् मनस्वी जितचित्तः ततो बहुधागमनसंभवात्तमनिलं धियानुसंधाय शनकैस्तालुमूलं तस्यैव विशुद्धिचक्रस्याग्रदेशं नयेत् ॥ २० ॥

## श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

तस्य मुक्तित्वं वदति—**न यत्रेति**। यत्राऽऽत्मनि कालो न प्रभुः। अनिमिषां देवानां परः उत्कृष्टः मुख्याधिकारी। प्रभुः तेषामपि नियन्ता। अनेनाऽधिकारः सामर्थ्यं चोक्तम्। तथापि भगवति स्थितत्वान्न प्रभुः। कुतो नु देवा इन्द्रियाधिष्ठातारः। ते हि सर्वदा समा[१]धिस्थितं निष्काशयन्ति। तेषा[२]मितो निष्काशने सामर्थ्यं कैमुतिकन्यायेन निवारितम्। तेषां सामर्थ्यमाह—**जगतां च ईशिर इति**। सर्वजगति ये प्रभवः। अतः कालस्य कालनियम्यानां वा न तत्र सामर्थ्यमित्युक्तम्। यद्यपि कालप्रेरणव्यतिरेकेण गुणा न क्षुभ्यन्ति। अक्षुब्धाश्च स्वरूपान्न प्रच्यावयन्ति। तथापि क्षोभणे कालो गुणाधीन इति तेषां पृथङ्निराकरणमाह—**न यत्रेति**। चकारात्प्रकृतिगुणा अहङ्कारगुणाश्च। वै निश्चयेन। अहङ्कारोऽपि। स तु सर्वदा स्वरूपच्यावकः। अतो वैशब्दः। महान् महत्तत्त्वम्। प्रधानं प्रकृतिः। तत्र स्थितं कोऽपि न चालयतीत्यर्थः ॥ १७ ॥ ❀ ❀ नन्वेवं तस्य स्थानस्य कथं माहात्म्यम्। तदाह—**परं पदमिति**। तत्सर्वेभ्यः पदेभ्यः स्थानेभ्य उत्कृष्टं पदमक्षररूपम्। पुरुषोत्तमपादरूपम् अत एव वैष्णवम्। यत् वैष्णवं परं पदमामनन्तीति योजना। **यदित्युद्देश्यम्। आमनन्तीति** तत्र प्रमाणम्। केवलश्रुतेः प्रमाणत्वे उपच[३]रितार्थत्वं वा कल्प्येत। अत आह—**नेति नेतीत्यतदुत्सिसृक्षव इति**। अतत् आत्मव्यतिरिक्तमस्मिन् सङ्घाते ये उत्सिसृक्षवो भवन्ति ते तद्वैष्णवं पदमिति वदन्ति। तदेकं ग्राह्यमन्यत्त्याज्यमिति विवेकः। न च तेषामुत्तमाधिकारादेव स्फुरणं भविष्यतीत्याशङ्क्य तेषामधिकारमाह—**विसृज्येति**। तेषामपेक्षितं गुणत्रतं वर्त्तते। सर्वदा देहादावात्मस्फूर्त्तित्यागः सर्वदोषाभावरूपः। न विद्यते अन्यस्मिन् सौहृदं येषाम्। अनेन पूर्वोक्तन्यायेन भगवति परमा प्रीतिरुक्ता। साधनञ्चाऽऽह। अर्हपदं भगवच्चरणारविन्दम्। पदे पदे क्षणे क्षणे मनसः स्थापनस्थाने वा। उपगूह्य आलिङ्ग्य। आमनन्तीति सम्बन्धः। एतादृशैरुक्तं नाऽन्यथा भवतीत्यर्थः ॥ १८ ॥ ❀ ❀ इत्थमित्युपसंहारः। एवं स्थिते देहादिः स्वयमेव गमिष्यतीति भावः। पक्षान्तरमाह—**मुनिस्त्विति**। यदि तत्र स्थितो न भवेत् मननवत्साधनान्तरपरो भवेत्। भिन्नतया तत्स्वरूपं भासयते चेत्तदा तस्मादुपरमेत्। प्रकारान्तरेण पुरुषार्थः साधनीय इति। तमेव प्रकारान्तरमाह—**व्यवस्थित इति**। विशेषाकारेण [४]तस्मिन्नेव पदे मनः स्थिरीकृत्य आत्मानं योजयित्वा भगवत्साक्षात्कारं ब्रह्मात्मभावं वा बहुकालमनुभूय तस्य विज्ञानस्य बलं प्राप्य विज्ञानमेव या दृक् अनुभवरूपं यज्ज्ञानं तस्य वीर्येण सामर्थ्येन सर्वाज्ञाननिवर्त्तकरूपेण सुष्ठु रन्धितः [५]शोधितः रागादिनिराकरणेन शुद्धः कृतः आशयो यस्य तादृशो भवेत्। सम्यक् चित्तशोधनं कुर्यादित्यर्थः तदा शुद्धे चित्ते देहत्यागार्थं यत्नं कुर्यादिति तत्त्यागोपायमाह—**स्वपार्ष्णिनाऽऽपीड्येति**। मूलाधारस्य पीडनं पार्ष्णिना कर्त्तव्यम्। एकवचनेन पार्ष्णिद्वयपक्षो निवारितः। गुदं मूलाधारस्थानम्। ततः कुण्डलिनीप्रबोधात्ततो मूलाधारादनिलमुत्थाप्य षट्चक्रभेदनेनोर्ध्वं नयेत्। तत्र वायोः स्थानभूतानि षट्चक्राणि मूलाधा[६]रस्वाधिष्ठानमणिपूरकानाहतविशुद्धि( ? )आज्ञारूपाणि गुदे गुह्य[७]स्थाने नाभौ हृदये तालुमूले भ्रूमध्ये च स्थितानि। तानि स्थानानि पद्मत्वेनोक्तानि चतुर्दलं, षड्दलं, अष्टदलं, द्वादशदलं षोडशदलं, द्विदलमिति। तेषु वायोरूर्ध्वनयनमार्जवेन न भवतीत्यन्यत्र गमनशङ्कया साधनमाह—**जितक्लम इति**। वा[८]य्वाकर्षणे जितः क्लमो येन। नाभिपर्यन्तमार्जवमग्रे वक्रता। अतो नाभ्यां स्थितं महता प्रयत्नेन हृद्यधिरोपणीयम्। तत्र हृत्पुण्डरीकमूर्ध्वनालमधोमुखम्। तद्वायुवशादूर्ध्वमुखं कर्त्तव्यम्। ततः प्रयत्नाधिक्यान्नाभ्यां स्थितमित्यनूद्य हृद्यधिरोपणमुक्तम्। तस्मादप्यग्रे नयनं [९]दुर्घटं तालुमूलस्थाने। उरस्युदानवायुरेव तिष्ठति। अन्योऽपि यो गच्छेत्तत्र स तद्भावमापन्न एव गच्छेत्। अत आह—**उदानगत्योरसि तं नयेदिति**। पूर्वाधिकारे हृदयपर्यन्तमेव वायोरानयनम्। अस्य त्वग्रे नयनमिति पूर्ववदाह—**मुनिरिति**। तत्र समावस्थितिभावं प्राप्तस्याऽग्रे गमनार्थं तद्भावं त्यक्त्वा पूर्वभावमनुसन्धाय ततो महत्या बुद्ध्या ग्रहणस्थापनसमर्थया मनस्वी महाबुद्धिमान् स्वतालुमूलं तस्यैवाऽग्रिमस्थानं शीघ्रं नीतस्य मुखादिद्वारेण निर्गमनशङ्कया शनकैर्नयेत्। तत्र बुद्धेः सूक्ष्मता विधेया स्थापनार्थं नयनार्थं चेत्याह—**सुधीरिति** ॥ १९,२० ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

**न यत्रेत्यत्राभासे। क्षोभने कालो गुणाधीन** इति, गुणाधीनत्वे युगपदेव क्षोभयेदिति क्रमदर्शनात्तथेत्यर्थः। विकारशब्दस्याहङ्कारबोधकत्वे विनिगमकमाहुः **अतो वै** इत्यादि। विकारशब्देन हि षोडशकमुच्यते। तदत्र देवानामनीशत्वोक्त्येन्द्रियाणां जडतया च भूतानां प्रच्यावनासमर्थत्वात् कैमुतिकेनैव परास्तमिति विकरोतीति योगान्महत्समभिव्याहाराच्चाहङ्कार एवोच्यत इति

---

१ समाधिस्थमिति ख. ग. २ तेषामपीतो निष्काशने इति ख. ग. । ३ उपचारितार्थत्वं कल्पेतेति क. ४ एकस्मिन्निति ख. ५ शोधित इति ख. । ६ मूलाधरं स्वाधिष्ठानमिति ख. ७ गुह्यमूले इति ख. ८ वाय्वाकर्षणेति ग. घ. ९ दुर्घटं ततः प्रयत्नाधिक्यादित्यधिकं ख.

ज्ञापनार्थमतः सर्वथा प्रच्यावकत्वाद् वैशब्द उक्त इत्यर्थः॥ १७॥ ❀ ❀ परस्पदमित्यत्र उपचरितार्थत्वं वेति। वाशब्दोप्यर्थे। न चेत्यादि। अनया शङ्कया च सर्वत्र भगवद्भाववत्त्वमुत्तमाधिकारित्वमिति ज्ञाप्यते। तथा च, तदुक्तं तादृशानामेवोपयोगि, न तु सामान्यानामिति सामान्यप्रत्ययार्थं सामान्याधिकारमाहेत्यर्थः। पूर्वोक्तन्यायेनेति 'स सर्वधीवृत्ती'ति श्लोकोक्तन्यायेन ॥ १८॥ ❀ ❀ इत्थं मुनिरित्यत्र मननवत्साधनेति। अत्र मतुब्ज्ञेयो न तु वतिः। विज्ञानमिति निदिध्यासनरूपं समूहालम्बनात्मकं ज्ञानमित्यर्थः॥ १९॥ ❀ ❀ नाभ्यामित्यत्र। अग्रेपदं तालुमूलस्थानविशेषणं ज्ञेयम्। ततोनुसन्धायेत्यत्र समावस्थितिभावमिति उदानसाम्यमित्यर्थः। केचिदिच्छन्तीति क्रममुक्त्यधिकारिणा योगिविशेषा इच्छन्तीत्यर्थः। तत्र हेतुमाहुः अग्र इत्यादिना। उपयोगश्च पवनान्तरात्मत्वम्। अथात्र प्रसङ्गादधिकारिविशेषकृतं प्रकारान्तरमाहुः केचिदित्यादि, ते च जीवन्मुक्तीच्छवो ज्ञेयाः। इहैवेति, बृहदारण्यकीयशारीरकब्राह्मणे'ऽथाकामयमान' इत्यधिकृत्य 'न' तस्मात्प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते ब्रह्मैव सन्ब्रह्माप्येती'तिवाक्यानुरोधात् प्राणानां प्राणसहितानां इन्द्रियाणामत्रैवात्मनि 'अहमात्मा गुडाकेशे'तिवाक्यनिरूपितहृदयाकाशवर्तिनि भगवद्विभूतिरूपे इन्द्रियमूलभूतासन्यरूपेण स्थितिमिच्छन्तीत्यर्थः। ननु जीवः स्वयं तत्रैव सायुज्यं प्राप्तः, तत्रैव प्राणा अपि सन्ति, तर्हि प्राणैर्भोगः कुतो न कीर्णत इत्यत आहुः भोगेत्यादि, सुषुप्ताविव पाप्मनाऽविद्धत्वाद्वेत्यर्थः। एवं प्रसङ्गाज्जीवन्मुक्तिर्व्याख्याता ज्ञेया। ननु जीवन्मुक्तिर्युज्यते, परं जीवस्यात्रैव सायुज्यप्राप्तौ इन्द्रियविसर्जनं तु दुर्घटम्, 'तमुत्क्रामन्तमि'ति (बृ० ४-४-२) श्रुतिविरोधादित्यत आहुः तमित्यादि। अमुक्तिविषयमिति। तथैवोपक्रमादित्यर्थः। नन्व'स्य सौम्य पुरुषस्य प्रयतो वाङ् मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां स य एषोणिमे'ति (छा० ६-८-६) श्रुतौ मुक्त्यमुक्तिसाधारण्येन वागादिचतुष्कस्यैव लय उक्तो, न त्विन्द्रियत्याग इतीन्द्रियविसर्जनं श्रुतिविरुद्धमाभातीत्यत आहुः उत्क्रान्तीत्यादि। 'प्राणमुत्क्रामन्तं सर्वे प्राणा उत्क्रामन्ती'तिशारीरकब्राह्मणोक्ता या प्राणानामुत्क्रान्तिः 'हन्तास्यैव सर्वे रूपं भवामे'ति 'त एतस्यैव रूपमभवंस्तस्मादेत एतेनाख्यायन्ते प्राणा इती'ति सप्तान्नब्राह्मणोक्तं यत्प्राणव्रतचरणं तयोर्विचारेणापि 'वागि' त्यादिश्रुतावपि प्राणशब्देनेन्द्रियाण्युच्यन्ते इति तत्रापि सर्वेन्द्रियलय उच्यते एवेति स्वस्यागमनेपीन्द्रियत्यागः श्रुत्यविरुद्ध इत्यर्थः। गतशब्दस्य गमनार्थत्वमभिप्रेत्य पक्षान्तरमाहुः गमने वेति। गमनेऽणुपन्थावितत: पुराणो मास्पृष्टोनुवितो मयैव। तेन धीरा अपियन्ति ब्रह्मविद उत्क्रम्य स्वर्गलोकमितो विमुक्ता', इति शारीरकब्राह्मणे ब्रह्मविद उत्क्रमोक्तेर्जीवस्य गमने आयुषोऽभावात्। आयुर्जीवितकालः जीवितञ्च स्मरणाधीनं, स्मरणं चात्माधीनमिति तद्गमने तत्तदभावेन तदभावाद् मुख्येत्यादिन्यायेन आसन्यानुरोधिनामिह लयः, 'न तस्मात्प्राणा उत्क्रमन्ती'त्युक्त्वानुपदमेव 'ब्रह्मविद उत्क्रम्य स्वर्गलोकमपि यन्ती'त्युक्तेरिहासन्ने प्राणलयो न श्रुतिविरुद्धः इत्यर्थः। तस्मात् मुक्तस्य लिङ्गभङ्गभञ्जनसमर्थत्वादित्यर्थः॥ २०॥

## श्री गिरिधरकृता बालप्रबोधिनी

एवमन्तकाले भगवत्यात्मसमर्पणेन किं स्यादित्यपेक्षायां तत्र संसारहेतूनां कालादीनां सामर्थ्याभावेन तत्प्राप्तस्य संसारदुःखनिवृत्तिः परमानन्दावाप्तिश्च स्यादेवेत्याशयेन तत्र कालादीनामकिञ्चित्करत्वं तस्य सर्वश्रेष्ठत्वं चाह—नेति द्वयेन। यत्र भगवत्प्राप्तौ सत्यामनिमिषां ब्रह्मादिदेवानामपि परो नियन्ता कालो न प्रभुः किमपि कर्तुं न समर्थस्तत्र तन्नियम्या देवाः कुतो नु प्रभवाः स्युः?। देवानियम्यानां तु का वार्त्तेति कैमुत्यन्यायं सूचयन् देवान् विशिनष्टि—जगतामिति। ये देवा जगतां जगन्ति प्राणिन ईशिरे नियमितवन्त इत्यर्थः। एवं कालादीनां प्रभुत्वाभावेऽपि सत्त्वादीनां तत्र प्रभुत्वं स्यादित्याशङ्क्याह—नेति। यत्र सत्त्वादयोऽपि नैव प्रभवः। वा इत्यवधारणे। विकारोऽहङ्कारः महान् महत्तत्त्वम्। प्रधानं प्रकृतिः॥ १७॥ ❀ ❀ कुतस्तत्र कालादयो न प्रभव इत्यपेक्षायां सर्वश्रेष्ठत्वादित्याह—परमिति। यत् यस्मात् नेति नेतीत्येवमेतत् तद्व्यतिरिक्तं सर्वमुत्सिसृक्षवः उत्स्रष्टुं त्यक्तुमिच्छवः परमविवेकिनस्तत्पूर्वोक्तं वैष्णवं विष्णुसम्बन्धि अतएव परं सर्वत उत्कृष्टं पदं पद्यते गम्यते इति पदं प्राप्यमामनन्ति निरूपयन्तीत्यन्वयः। कुतस्तेषामेवं विवेको येनाऽतत्त्यक्तुमिच्छन्तीत्यपेक्षायामाह—विसृज्येति। अर्हस्य पूज्यस्य भगवतः पदं चरणारविन्दं पदेपदे क्षणेक्षणे हृदा हृदयेन उपगुह्य आश्लिष्य तत्प्रभावेण दौरात्म्यं देहापत्यकलत्रादिष्वात्मात्मीयभावं विसृज्य त्यक्त्वा अनन्यसौहृदा न ततो भवतीत्यन्यस्मिन् सौहृदं स्नेहो येषां तथाभूता इत्यर्थः। अनन्यभक्तत्वादेव तेषां परमविवेकित्वमिति भावः॥ १८॥ ❀ ❀ एवं श्लोकद्वयेन प्रासङ्गिकमुक्त्वा प्रकृतमाह—यमिति। इत्थमुक्तप्रकारेण परमात्मन्यात्मानं समर्प्य व्यवस्थितो मुनिर्मननशीलो योगी तु 'कृत्यादुपरमे'दित्यन्वयः। तु शब्देन 'यदि प्रयास्यन्' इति वक्ष्यमाणात् 'सकामादस्य विशेष उक्तः, को वाऽस्य विशेष इत्यपेक्षायामाह—विज्ञानेति। विज्ञायतेऽनेनेति विज्ञानं शास्त्रं तेन जाता या दृक् ज्ञानं तस्य वीर्येण बलेन सुरन्धिताः विनाशिताः आशया विषयवासना यस्य स इत्यर्थः। इदानीं तस्य देहत्यागप्रकारमाह—सार्धाभ्याम्।

---

१ इयं श्रुतिः ४ २-१ सूत्रभाष्ये विवृता। १ क-ख पु० पाठस्तु 'विरमेत्' इति स च चिन्त्यः। २ क-ख-पु० पाठस्तु 'विरमेत्' इति स च चिन्त्यः। ३ अत्र 'सकाशात्' इति पुस्तकान्तरे पाठः।

स्वपार्ष्णिना स्वपादमूलेन गुदं मूलाधारमापीड्य निरुध्य ततो निरोधनानन्तरमनिलं प्राणं षट्सु नाभ्यादिषु वक्ष्यमाणेषु स्थानेषु उन्नमयेदूर्ध्वं नयेत् । एवं प्राणोन्नयने पूर्वप्राणायामाभ्यासोपेक्षित इत्याशयेनाह—जितक्लम इति । तदुन्नयने श्रमरहित इत्यर्थः ॥१९॥ ❀ ❀ नाभ्यां मणिपूरकचक्रे स्थितं प्राणं हृदि अनाहतचक्रेऽधिरोप्य तस्माच्चक्रादुदानस्य वायोर्गत्या तत्सञ्चारप्रकारेण उरसि कण्ठादधोदेशस्थिते विशुद्धचक्रे तं प्राणं मुनिर्नयेदित्यन्वयः । ततोऽनन्तरं ततः स्थानाद्बुधागमनसम्भवाद्धिया स्वबुद्ध्याऽनुसन्धाय विचार्य शनकैः स्वतालुमूलं पूर्वचक्रस्यैवाग्रप्रदेशं प्राणं नयेत् प्रापयेत् । एवमुन्नयनं चित्तविजयं विना न सम्भवतीति सूचयन्नाह—मनस्वीति ॥ २० ॥

## हिन्दी अनुवाद

इस अवस्थामें सत्त्वगुण भी नहीं है, फिर रजोगुण और तमोगुणकी तो बात ही क्या है। अहंकार, महत्तत्त्व और प्रकृतिका भी वहाँ अस्तित्व नहीं है। उस स्थितिमें जब देवताओंके नियामक कालकी भी दाल नहीं गलती, तब देवता और उनके अधीन रहनेवाले प्राणी तो रह ही कैसे सकते हैं? ॥ १७ ॥ ❀ ❀ योगी 'यह नहीं, यह नहीं'—इस प्रकार परमात्मासे भिन्न पदार्थोंका त्याग करना चाहते हैं और शरीर तथा उसके सम्बन्धी पदार्थोंमें आत्म-बुद्धिका त्याग करके हृदयके द्वारा पद-पदपर भगवान्‌के जिस परम पूज्य स्वरूपका आलिङ्गन करते हुए अनन्य प्रेमसे परिपूर्ण रहते हैं, वही भगवान् विष्णुका परम पद है—इस विषयमें समस्त शास्त्रोंकी सम्मति है ॥ १८ ॥ ❀ ❀ ज्ञानदृष्टिके बलसे जिसके चित्तकी वासना नष्ट हो गयी है, उस ब्रह्मनिष्ठ योगीको इस प्रकार अपने शरीरका त्याग करना चाहिए। पहले एड़ीसे अपनी गुदाको दबाकर स्थिर हो जाय और तब बिना घबड़ाहटके प्राणवायुको षट्चक्रभेदनकी रीतिसे ऊपर ले जाय ॥ १९ ॥ ❀ ❀ मनस्वी योगीको चाहिए कि नाभिचक्र मणिपूरकमें स्थित वायुको हृदयचक्र अनाहतमें, वहाँसे उदानवायुके द्वारा वक्षःस्थलके ऊपर विशुद्ध चक्रमें, फिर उस वायुको धीरे-धीरे तालुमूलमें ( विशुद्ध चक्रके अग्रभागमें ) चढ़ा दें ॥ २० ॥

**तस्माद् भ्रुवोरन्तरमुन्नयेत निरुद्धसप्तायतनोऽनपेक्षः ।**
**स्थित्वा मुहूर्तार्धमकुण्ठदृष्टिर्निर्भिद्य मूर्धन् विसृजेत्परं गतः ॥ २१ ॥**
**यदि प्रयास्यन्[1] नृप पारमेष्ठ्यं वैहायसानामुत यद् विहारम्[2] ।**
**अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेन्द्रियैश्च ॥ २२ ॥**
**योगेश्वराणां गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मनाम् ।**
**न[3] कर्मभिस्तां गतिमाप्नुवन्ति विद्यातपोयोगसमाधिभाजाम् ॥ २३ ॥**
**वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन[4] शोचिषा[5] ।**
**विधूतकल्कोऽथ हरेरुदस्तात् प्रयाति चक्रं नृप शैशुमारम् ॥ २४ ॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तस्माद्भ्रुवोरंतरमाज्ञाचक्रम् । निरुद्धानि श्रोत्रे नेत्रे नासिके मुखं चेत्येवं सप्तायतनानि प्राणमार्गा येन सः । अनपेक्षश्चेत्परं ब्रह्म गतः सन् मूर्धन्मूर्धनि ब्रह्मरंध्रे निर्भिद्य देहमिंद्रियाणि च विसृजेत् ॥ २१ ॥ ❀ ❀ सद्योमुक्तिमुक्त्वा क्रममुक्तिप्रकारमाह यदीति दशभिः । यदि तु पारमेष्ठ्यं पदं प्रयास्यन् भवति उत वैहायसानां खेचराणां सिद्धानां यद्विहारं क्रीडास्थानम् । कीदृशम् अष्टावाधिपत्यान्यणिमाद्यैश्वर्याणि यस्मिंस्तदपि प्रयास्यन् । क्व । गुणसन्निवाये गुणसमुदायरूपे ब्रह्मांडे सर्वत्रेत्यर्थः । तर्हि देहत्यागावसरे मनश्चेंद्रियाणि च न त्यजेत् । किंतु तैः सहैव तत्तल्लोकभोगार्थं गच्छेत् ॥ २२ ॥ ❀ ❀ यतः कर्मगतिवन्न योगगतिः परिच्छिन्नेत्याह । योगेश्वराणां त्रिलोक्या अंतर्बहिश्च महर्लोकादिषु ब्रह्मांडाद्बहिश्च गतिमाहुः । अत्र हेतुः । पवनस्यांतः आत्मा लिंगशरीरं येषामिति । विद्या उपासना तपो भगवद्धर्मः योगोऽष्टांगः समाधिर्ज्ञानं तान्ये भजंति तेषां या गतिस्ताम् ॥ २३ ॥ ❀ ❀ तामाह वैश्वानरमित्यष्टभिः । विहायसा आकाशेन तत्र च ब्रह्मलोकपथेन गतः सन्प्रथमं वैश्वानरमग्न्यभिमानिनीं देवतां याति । केनोपायेन सुषुम्णया नाड्या । सा च देहाद्बहिरपि विततास्तीत्याह । शोचिषा ज्योतिर्मय्या विधूतस्त्यक्तः कल्को मलो येन सः । काप्यसज्जमान इत्यर्थः । उदस्तादुपरिष्टाद्वर्तमानं हरेः संबंधि तारारूपम् । नारायणाधिष्ठितमित्यर्थः । शैशुमारं चक्रं पंचमस्कंधे वक्ष्यमाणं शिशुमाराश्रयं ज्योतिश्चक्रम् । चक्रस्थान्यादित्यादिध्रुवांतानि पदानि प्रयातीत्यर्थः ॥ २४ ॥

---

१ प्रा॰ पा॰ प्रयास्यतथ । २ प्रा॰ पा॰ विहारान् । ३ प्रा॰ पा॰ तत्कर्म॰ । ४ प्रा॰ पा॰ ब्रह्मपदेन । ५ प्रा॰ पा॰ योऽर्चिषा ।

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अनपेक्षः क्रममुक्तवत्पारमेष्ठ्यादिपदभोगकौतुकानपेक्षः ॥ २१ ॥ ❀ ❀ इत्यर्थ इति । यस्मिल्लोके गमनेच्छा भवेत्तत्र सर्वत्रेति भावः ॥ २१ ॥ ❀ ❀ अत्र बाह्याभ्यंतरगमने ॥ २३ ॥ ❀ ❀ तां गतिम् । इत्यर्थ इति । 'हृदये नारायणः' इत्युक्तेरिति भावः । इत्यर्थ इति । शिशुमारचक्रगतानि सूर्यादिस्थानानि गच्छति योगबलेनेति भावः ॥ २४ ॥

## श्रीमद्वीरराघवव्याख्या

तस्मात्स्वतालुमूलाद्भ्रुवोरंतरं भ्रूमध्यस्थाज्ञाचक्रप्रत्युन्नयेत ऊर्ध्वं नयेत कथंभूतः निरुद्धसप्तायतनः निरुद्धानि सप्तायतनानि श्रोत्रद्वयाक्षिद्वयनासारंध्रद्वयास्यरूपाणि स्थानानि येन सः विषयांतरनिरपेक्षः भ्रूमध्ये मुहूर्तार्द्धं स्थित्वा कुंठदृष्टिः स्वगंतव्यविषयाप्रतिहतज्ञानसंपन्नः परंपरमात्मानं प्राप्तः अनुसंदधन्मूर्द्धन्मूर्द्धानं सुपांसु लुक् ॥ ६।१।० ॥ इति सुब् लुक् निर्भिद्य शीर्षकपालं भिनत्तीति श्रुतिः स्मारितो विसृजेत्स्थूलदेहमिति शेषः ॥ २१ ॥ ❀ ❀ अथमुमुक्षोर्गन्तव्यमर्चिरादिमार्गं वक्ष्यंस्तस्य मुमुक्षोर्धूमादि मार्गस्य हेयत्वज्ञापनाय धूमादिमार्गेण गतानां गन्तव्यलोकानाह । यदीति एते सृती ते नृपवेदगीते इति मार्गद्वयस्य वक्ष्यमाणत्वादस्मिन्नध्याये धूमादिमार्गविषयग्रन्थान्तराभावाच्च । "तासां मूर्द्धानमभिनिःसृतैः कातयोर्ध्वमायन्नमृतत्वमेति विषङ्ङन्याउत्क्रमणे भवन्ति" इति श्रुतेः । मूर्द्धनिष्क्रान्तस्यार्वाचीनलोकगत्यनुपपत्तेश्च यदित्यादिश्लोकद्वयं धूमादिमार्गगतागतस्य चारप्रदर्शनपरमेव । न च "यदा सर्वे प्रमुच्यते कामा येऽस्य हृदिस्थिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति सद्योमुक्तिरेका प्रतीयते "तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरन्ह" इत्यादिना क्रममुक्तिरन्या प्रतीयते अत्रापि विसृजेत्परं गतः इति सद्योमुक्तिः । वैश्वानरं यातीति क्रममुक्तिश्च प्रतीयते । अतः क्रममुक्तिसद्योमुक्तिरूपमार्गद्वयस्यैवैते सृती ते इति वक्ष्यमाणत्वान्न धूमादिमार्गगतगन्तव्यप्रदर्शनपरमिति श्लोकद्वयमिति चेदुच्यते । सद्योमुक्तिस्तावदप्रामाणिकैव । ये चेमेऽरण्ये श्रद्धातप इत्युपासते तेऽर्चिषमभिसम्भवन्तीत्यादिना स एतान्ब्रह्म गमयतीत्यंतेन ब्रह्मोपासीनानामार्चिरादिनागतानामेव ब्रह्मप्राप्त्यवगमात् "विकल्पोऽविशिष्टफलत्वात् ॥ ३।३।० ॥ इति न्यायेन सर्वब्रह्मविद्यानामेकफलत्वेनार्चिरादिगतेः सर्वब्रह्मविद्यानिष्ठानां समत्वाच्छास्त्रप्रतिपाद्यायाः सद्योमुक्तेरभावात् । अथ ब्रह्मणः सर्वगतत्वान्न तत्प्राप्तये देशान्तरगमनापेक्षेति "न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति" इत्यादेः कोऽर्थ इति चेदुच्यते ॥ अत्रास्मिन्लोके उपासनदशायां ब्रह्मानुभवति तस्य ब्रह्मप्रेप्सोः प्राणा नोत्क्रामन्ति तं विहाय न गच्छन्ति किन्तूपासनफलभूतब्रह्मप्राप्तये तदधिष्ठितलोकांतरगमनाय सहैव तिष्ठंतीत्यर्थः । इति अतो धूमादिना गतानां गन्तव्यप्रदर्शनपरमिदं श्लोकद्वयमित्याह । यदीति हे नृप ? पारमेष्ठ्यं चतुर्मुखलोकं वैहायसानां खेचराणां सिद्धानां यद्विहारस्थानं कीदृशमष्टाधिपत्यमणिमाद्यष्टैश्वर्यसंपन्नं यदि प्रयास्यन् गमिष्यन् भवति तदागुणसन्निवाये मरणे मनसा इंद्रियैश्च सहैव गच्छेत्स्थूलदेहस्यैव भस्मीभावात्सूक्ष्मदेहेनैव गच्छतीत्यर्थः । अर्वाचीनलोकान् गच्छतां भूतसूक्ष्मेंद्रियात्मकलिंगशरीरेणैव सह गमनं ब्रह्मप्रेप्सोस्तु किंचिद्दूरं गच्छतो मध्ये विश्लेष इति विशेषः ॥ २२ ॥ ❀ ❀ योगेश्वराणां भगवद्भक्तिव्यतिरिक्तयोगनिष्ठानामब्रह्मात्मकस्वतंत्रजीवोपासकानां त्रिलोक्याः बहिः जनलोकादिषु पवनांतरात्मनां पवनस्यांतरात्मा पवनांतरात्मा तेन वायुभूतसूक्ष्मदेहेन गतिमाहुरित्यर्थः । यद्वा वायुमनुप्रविश्य गच्छतीति वायुतुल्यवेगो गच्छतीत्याहुरित्यर्थः । भगवद्भक्तिव्यतिरिक्तयोगनिष्ठानां गतिरितरैर्न लभ्यत इत्याह नेति । विद्याशास्त्रजन्यं ज्ञानं तपः कर्मयोगः योगो यमनियमादिः समाधिरब्रह्मात्मकस्वात्मरूपानुसंधानम् एतान् भजंति ये तेषां योगीश्वराणां तां गतिं ब्रह्मांडांतर्गतापेक्षितलोकगतिं कर्मभिरभिसंहितफलैः कर्मभिर्न प्राप्नुवंति केवलकर्मिभ्योऽधिको योगी केवलयोगिभ्योऽधिको भगवदुपासक इत्यभिप्रायः यद्वा भगवद्भक्तानां गतिः कर्मभिर्नावाप्यत इत्याह योगीश्वराणामिति । भगवद्भक्तियोगनिष्ठानामित्यर्थः । त्रिलोक्यां त्रिलोकान्तर्भूतचतुर्दशभुवनात्मकांडकोशाद्बहिः समाधिः परमात्मोपासनमिति भेदः एवं हेयत्वेन धूमादिमार्गगतिरुक्ता ॥ २३ ॥ ❀ ❀ अथ मुमुक्षोरर्चिरादिमार्गमाह वैश्वानरमिति छांदोग्ये "यथापुष्करपलाश आपो न श्लिष्यंते एवमेवं विदिपापं कर्म न श्लिष्यते" इत्युपक्रम्य ब्रह्मविद्यामुपदिश्याम्नाता "अथ यदु चास्मिञ्छव्यं कुर्वंति यदु चनार्चिषमेवाभिसंभवंति अर्चिषोहरन्ह आपूर्यमाणपक्षापूर्यमाणपक्षाद्यान् यान् षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथः एतेन प्रतिपद्यमाना इमं मानवमावर्तनावर्तते इत्याम्नाता श्रुतिः स वै पुनर्नेह विषज्जतेंगमित्यंतेनाभिमता अत्रानुक्तो हरादिप्रदेशस्त्वर्थसिद्धो वेदितव्यः शीर्षकपालभेदनानंतरमेव वैश्वानरप्राप्त्यसंभवात् श्रुतावपि वरुणेंद्रप्रजापत्यादयोऽन्यत्र श्रुता अर्थसिद्धा इति वेदितव्यम् ब्रह्मपथेनेति सुषुम्णाविशेषणं ब्रह्मप्रेप्सोर्मार्गभूतया शोचिषा प्रकाशमानया सुषुम्णया सुषुम्णाख्यया नाड्या देहान्निर्गतः शोचिषेत्यनेन तेन प्रद्योतेनैष आत्मानिष्क्रामति" इति श्रुत्युक्तसुषुम्णासंबंधिहृदयकमलाग्रस्य प्रकाशनं स्मारितं "तदोकोग्रज्वलनंतत्प्रकाशितद्वारोविद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ ४।३।० ॥ इति सूत्रकारः तदोकः तस्य ब्रह्मप्रेप्सोर्जीवस्य स्थानभूतं यद् हृदयकमलं तस्याग्रं सुषुम्णाख्यनाडीद्वारं तस्य ज्वलनं प्रकाशनं भवति । अयं जीवः हार्दानुगृहीत हृदयकमलस्थपरमात्मानुगृहीतः तेन परमात्मना प्रकाशितसुषुम्णाद्वारो विद्यायाः ब्रह्मविद्यायाः सामर्थ्याद्ब्रह्म-

विद्यांगभूतार्चिरादिगतिस्मृतियोगाच्च शताधिकया सुषुम्णया गच्छतीति सूत्रार्थः। एवं भूतसुषुम्णया गतः विहायसा शीर्षकपालबहिराकाशेन वैश्वानरमर्चिःशब्दवाच्यमतिवाहिकं दैवतं याति "अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् अर्चिषमभिसंभवतीत्यनेनैकार्थ्यात् अस्यैव मोक्षमार्गत्वं सूचयति विधूतकल्क इति "पुण्यपापे विधूय निरंजनः परमं साम्यमुपैति। अश्व इव रोमाणि विधूय पापं चंद्र इव राहोर्मुखात्प्रमुच्य धूत्वाशरीरम्" इति हि श्रूयते नहि धूमादिमार्गगतानां पुण्यपापप्रहाणं श्रूयते विधूतकल्कः निवृत्तपुण्यपापः अत्राहरादिप्रवेश उक्तः हरेरादित्यस्योदस्तादुपरिष्टात्स्थितं शैशुमारं चक्रं प्रयाति हे नृप! शैशुमारचक्रस्वरूपं तु पंचमे स्कंधे वक्ष्यते॥ २४॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

तस्माद् भ्रुवोरंतरं भ्रूमध्यस्थितं द्विदलं कमलमुन्नयेत तत्रापीतिकर्त्तव्यतया भाव्यमित्याह निरुध्येति। निरुद्धाःसप्तानामश्वानां कर्णाक्षिनासिकादिसंज्ञानां पंथानो येन स तथोक्तः। अनपेक्षो बाह्यसुखानिच्छुः अत्रापीत्थंभावमाह स्थित्वेति। मनसा परं गतो भ्रूमध्ये तु मुहूर्तार्धं स्थित्वा मार्गगम्यविशेषेष्वकुंठदृष्टिर्मूर्धन् मूर्धनि शिरोमध्ये निर्भिद्य विसृजेत् शरीरमिति शेषः गत इत्यनेन चिंतनमुच्यते अथैकयोर्ध्वमुदानः प्राणापानविडायां च पिंगलायां च वर्तत व्यानः संधिषु सर्वत्र उदानो ब्रह्मनाडिग इति श्रुतिस्मृतिभ्यामुदानगतिर्ब्रह्मनाड्यामिति सिद्धम्। इत्थं मुनिरित्यनेन निर्गुणविद्याफलमुक्त्वा 'स्वपार्ष्णिनेत्यनेन सगुणविद्याविदो देहोत्क्रमणप्रकार उच्यत इत्येतदनुपपन्नमेकावयवतयामुख्यार्थे संभवति वाक्यभेदायोगादिति॥ २१॥ ❀ ❀ एवं देहादुत्क्रांतानां योगिनां प्राप्यस्थानं गम्यं चाह यदीत्यादिना श्लोकद्वयेन अत्र यदिअथउतेति शब्दाः पुनरावृत्त्यान्वेतव्याः तथाहि यदि सम्यक् पक्वभक्त्यादिसाधनवांस्तर्हि अथोत्क्रमणानंतरमेव पारमेष्ठ्यं परमेष्ठिनो ब्रह्मणो लोकं प्रयास्यति तत्रायं किंकरोतीति तत्राह अथेति अथ तल्लोकप्राप्त्यनंतरं पुनरुत्पत्तिहीनो ब्रह्मसालोक्यमात्रं प्राप्य अथ भक्त्यादिलक्षणपरिपाकाय योगी वसति अनंतरं ब्रह्मप्रलये ब्रह्मणा सह स्वयोग्यां मुक्तिं प्राप्नोतीति शेषः। उतशब्दोऽप्यर्थे यद्यदिततउतपूर्वोक्तयोगिनोप्यपरिपक्वभक्त्यादिकल्याणवांस्तर्हि वैहायसानां वैमानिकानां सिद्धानां विहारं क्रीडास्थानं महर्लोकादि प्रयास्यति तत्रास्य योगफलमाह अष्टाधिपत्यमिति अथ महर्लोकादिस्थानेऽष्टानामणिमादियोगानामाधिपत्यमवाप्य वसति अथ यदि सम्यक्पक्वभक्त्यादिमानप्रतीकालंबनस्तर्हि यत्रपवनस्यांतरात्मा विकुंठनाथस्तत्र विकुंठनाथलोकेऽमुक्तस्थाने तोऽमुक्तैर्वैरुपास्यमानं हरिं प्रयास्यति यदि प्रतीकालंबनस्तर्हि यत्र पवनश्चासावंतरात्मा चेति वायुर्ब्रह्मा च तत्र सत्यलोके वायुं ब्रह्माणं च प्रयास्यति॥ २२॥ ❀ ❀ किमुक्तं भवति तत्राह॥ योगेश्वराणामिति। त्रिलोक्या भूम्यंतरिक्षस्वर्गसंज्ञाया बहिर्महर्लोकादौ योगेश्वराणां गतिमामनंति न त्वर्वाक्। तल्लोकप्राप्तौ साधनविशेषमाह विद्येति। विद्याऽपरोक्षज्ञानं तदादि पुरुषार्थसाधनसामग्रीमतां पुंसां तां महर्लोकादिगतिं केवलकर्मभिर्नाप्नुवंति किंत्वपरोक्षज्ञानेनैव अत्रायं कश्चन विशेषः गुणानां सत्त्वादीनां सन्निवायः सन्निवासो यत्र स गुणसन्निवायस्तस्मिन्महर्लोकादिवैकुंठामुक्तस्थानादधिके प्रदेशे प्रयास्यन् बाह्येंद्रियमनोभिः सहैव गच्छेत् "आविष्कृतनिजरूपस्यापितस्यारब्धकर्ममोक्षपर्यंतं दग्धपटवत्तेषां स्थित्युक्तेः पश्चाद्ज्ञानादिगुणसन्निवाये मुक्तस्थाने चिन्मात्रेंद्रियमनोभिः सहैव वसति तदुक्तं "चिन्मात्राणींद्रियाण्याहुर्मुक्तानामन्यदैवत्विति ईयुस्त्रीन् कर्मणा लोकान् ज्ञानेनैवतदुत्तरान् तत्र मुख्या हरिं यांति तदन्ये वायुमेव तु अपक्वा ये न ते यांति वायुं वा हरिमेव वा स्थानमात्राश्रितास्ते तु पुनर्जनिविवर्जिता" इति समाख्यावचनबलादध्याहारेण व्याख्यातम्। न तु स्वमनीषोत्प्रेक्षाबलादिति। यदि पारमेष्ठ्यादिलोकं प्रयास्यति तर्हि मनसेंद्रियैः सहैव गच्छेदिति वान्वयः। यत्र योगेश्वराणां गतिं त्रिलोक्या बहिरामनंति यत्र पवनांतरात्मा तत्र विद्यादिभाजः तां गतिं कर्मभिर्नाप्नुवंतीति वा॥ २३॥ ❀ ❀ तस्य योगिनो मार्गमाह। वैश्वानरमिति सुषुम्णया नाड्योत्क्रम्य विहायसा हृदयाकाशेन ब्रह्मपथेन सुषुम्णाख्यया शोचिषा। रोचिः शोचिरुभ इत्याद्यभिधानम्। गतो निर्गतोऽर्चिरादिदेवान् गत्वाथ वैश्वानरं याति अथ वैश्वानरप्राप्त्या विधूतकल्को दग्धपापतृणस्ततो वैश्वानरलोकादुदस्तादुपरि हरेः शैशुमारं चक्रं शिमुमारस्वरूपं प्रयातीत्यन्वयः। "वैश्वानरे द्युनद्यां वा सूर्ये वादेह एव वा विधूय सर्वपापानि यांति किंस्तुघ्नकेशवम्" इत्येतदथेति सूचितम्॥ २४॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

तत इति सार्द्धकम्॥ २१, २२, २३, २४, २५॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

मनस्वी जितचित्तः। स्वतालुमूलं तस्यैव चक्रस्याग्रदेशम्। ततो बहुधा गमनसम्भवात् शनकैरित्युक्तम्। तस्मात् भ्रुवोरन्तरम् आज्ञाचक्रम्। निरुद्धानि सप्त अस्वयनानि श्रोत्रे नेत्रे नासिके मुखञ्चेत्येवं सप्त प्राणमार्गा येन सः। अनपेक्षः क्रममुक्तवत् पारमेष्ठ्यादि पदभोगकौतुकानपेक्षः मूर्द्धन् मूर्द्धनि ब्रह्मरन्ध्रे निर्भिद्य देहमिन्द्रियाणि च विसृजेत्॥ २१॥ ❀ ❀ इति सद्योमुक्तिमुक्त्वा क्रममुक्तिमाह यदीति। पारमेष्ठ्यं ब्रह्मपदं यदि प्रयास्यन् भवेत्। तथा वैहायसानां खेचराणां यत्

विहारं विहरत्यस्मिन्निति विहारं क्रीडास्थानम् । कीदृशम् अष्टावाधिपत्यानि अणिमाद्यैश्वर्य्याणि यस्मिन् तत्र प्रयास्यन् । क गुणसमुदायरूपे ब्रह्माण्डे सर्व्वत्रेत्यर्थः । तर्हि देहत्यागावसरे मनश्चेन्द्रियाणि च न त्यजेत् किन्तु तैः सहैव तत्तल्लोकभोगार्थं गच्छेत् ॥ २२ ॥ ❀ ❀ भोगेऽपि योगिनो न कर्म्मिभिः साधारण्यमित्याह । योगेश्वराणां त्रिलोक्या अन्तः बहिश्च महर्लोकादिषु ब्रह्माण्डबहिश्च गतिमाहुः । तत्र हेतुः पवनस्यान्तः आत्मा लिङ्गशरीरं येषां तेषाम् । विद्या भगवदुपासना, तपो भगवद्धर्म्मः, योगोऽष्टाङ्गः समाधिज्ञानं, तान् ये भजन्ति तेषां या गतिस्ताम् ॥ २३ ॥ ❀ ❀ तत्र प्रथमं वैश्वानरम् अग्न्यभिमानिनीं देवतां याति । विहायसा आकाशेनैव सुषुम्णया नाड्या । कीदृश्या ब्रह्मपथेन ब्रह्मलोकमार्गरूपयेत्यर्थः । सा च देहाद्बहिरपि वितताऽस्तीत्याह शोचिषा ज्योतिर्म्मय्या । विधूतकल्कः त्यक्तमालिन्यः क्वाप्यसज्जमान इत्यर्थः । अथ हरेः भगवतः सम्बन्धि उदस्तात् इत ऊर्ध्वं स्थितं चक्रं शैशुमारं शिशुमाराकारम् । चक्रस्थानि आदित्यादीनि ध्रुवान्तानि पदानि प्रयातीत्यर्थः ॥ २४ ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्मात् स्थानात् । भ्रुवोरंतरमाज्ञाचक्रं प्रत्यनिलमुन्नयेत । कथंभूतः निरुद्धा निसप्तास्त्वयनानि छिद्राणि येन स तथा तानि च श्रोत्रे नेत्रे नासिके मुखमित्येवं सप्त । विषयांतरानपेक्षः आज्ञाचक्रे नियमितानिलो मुहूर्तार्द्धं स्थित्वा । अकुंठदृष्टिः प्रस्तुतगमने समाहितदृष्टिः ! परंगतः । उक्तप्रकारेण बद्धावस्थायां भगवंतं प्राप्नोति । मुक्तबंधनत्वेन भगवत्प्रेप्सुः । मूर्द्धन् मूर्द्धनि निर्भिद्य स्थूलं देहं विसृजेत् ॥ २१ ॥ ❀ ❀ एवं मूर्द्धनि निर्भिद्योत्क्रान्तस्य मुमुक्षोरर्चिरादिमार्गेण ब्रह्मप्राप्तिमाह । यदीति दशभिः तत्रेयं प्रक्रिया । विद्वान्स्थूलशरीरान्मूर्द्धन्यनाड्या निष्क्रम्य सलिंगशरीर एव सूर्य्यरश्मीनारुह्य यदावरं पदं गन्तुमिच्छति तदार्चिषोभिमानिनातिवाहिकेन सुसत्कृत्यादिनाभिमानिनं नीतस्तथैव तेन पक्षाभिमानिनं तेन संवत्सराभिमानिनं तेन वायुं तेन स्वस्मिन् छिद्रं दत्वादित्यं तथैव तेन चन्द्रमसन्तेन विद्युदभिमानिनं देवताविशेषं नीयते तदनंतरं वरुणमिंद्रं प्रजापतिञ्च प्राप्य ब्रह्माण्डं भित्वा विरजां प्राप्नोति तदा कारणे लिंगशरीरं हित्वा तान्तीर्त्वा ब्रह्मलोकं प्राप्य ब्रह्मसाधर्म्यलक्षणं मोक्षं प्राप्नोति । विस्तरस्त्वाकरे द्रष्टव्यः । तत्र कानि चित्स्थानान्यत्र संत्यन्यानि तदुपलक्षणतया ज्ञेयानि । यदि यस्मिन्काले स्थूलशरीरवियोगकाले हे नृप ! गुणसंनिवाये गुणसमुदायरूपे ब्रह्माण्डे पारमेष्ठ्यं प्रजापतिलोकं वैहायसानामुत यद्विहारम् । खेचराणां क्रीडास्थानञ्च अष्टौआधिपत्यानि अणिमाद्यैश्वर्याणि यस्मिन् तत् प्रयास्यन् भवति तदा मनसा इन्द्रियैश्च सहैवगच्छेत् स्थूलशरीरवत् सूक्ष्मशरीरत्यागो नास्ति तेनैव सह विरजापर्यंतं मुमुक्षुर्गच्छतीत्यर्थः ॥ २२ ॥

न केवलं त्रिलोक्यंतर्गतपारमेष्ठ्यप्राप्तावेव योगसिद्धानां गतिरपि तु ब्रह्माण्डाद्बहिरस्तीत्याह । योग इति । पवनान्तरः प्राणगर्भः आत्मा लिंगशरीरं येषान्तेषां योगेश्वराणां योगसिद्धानाम् । उर्ध्वाधोमध्यभेदत्रयम् पातालादिसत्यांताः लोकास्तेषां समाहारस्त्रिलोकी तस्याः अंतर्मध्ये पातालादिसत्यांतेषु लोकेषु बहिर्निरावरणलोके च गतिमाहुः । "तस्य सर्वेषु लोकेषु कामचारो भवति" इत्यादयः श्रुतयः तत्र हेतुगर्भविशेषणम् विद्यातपोयोगसमाधिभाजामिति विद्याब्रह्मजिज्ञासाजन्यं ज्ञानम् । तपः साधनावृत्तिः योगः समाधिः विद्यातपसोः परिपाकावस्था तान् ये भजन्ति तेषाम् । "एतेन मार्गेण ब्रह्मप्रतिपद्यमानाः इदं मानवमावर्तं नावर्तंते" इत्यादिश्रुतिप्रोक्तस्योपादेयस्यापुनरावृत्तिमार्गस्य प्रस्तुतस्य दार्ढ्यार्थमनुपादेयं पुनरावृत्तिमार्गं सूचयति न कर्मभिस्तां गतिमाप्नुवन्तीति । "यावत्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते" । इत्यादिश्रुतिप्रसिद्धमार्गसाधनैः कर्मभिः । विद्यातपोयोगसमाधिभाजान्ताङ्गतिं न कर्मठाः प्राप्नुवन्तीत्यन्वयः ॥ २३ ॥ ❀ ❀ एवमर्चिरादिमार्गप्राशस्त्यं धूममार्गं चानुपादेयत्वेनोक्त्वार्चिरादिमार्गं दर्शयति । वैश्वानरमिति । विहायसा आकाशेन मूर्द्धनि सूक्ष्मेण छिद्रेण ब्रह्मप्राप्तिमार्गेण तत्र च रोचिषा ज्योतिर्मय्यादेहादपि बहिश्चिततया सुषुम्णया नाड्यागतो निर्गतः । विधूतकल्को निष्पापः कल्कः पापं स च पुण्यस्याप्युपलक्षणम् । तथासति पुण्यापुण्यवर्जितः "अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखाद्विमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि" इति । ताण्डिरहस्ये श्रवणात् । "तदा विद्वान्पुण्यापे विधूय निरंजनः परमं साम्यमुपैति" इत्यथर्वणे श्रवणाच्च । प्रथमं वैश्वानरं याति अग्न्यभिमानिनीं देवतां प्राप्नोति तदनन्तरं दिनाद्यभिमान्यातिवाहिकद्वारा उदस्तादुपरिष्टाद्वर्तमानं हरेः विष्णोः शैशुमारं चक्रं शिशुमाराश्रयं ज्योतिश्चक्रं हेनृप । प्रयाति अनेनादित्याद्यातिवाहिकप्राप्तिरुक्ता ॥ २४ ॥

## श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

एवं तालुमूले स्थिरीकृतं मुखादिच्छिद्रद्वारा निर्गमनशङ्कया निरुद्धसप्तास्त्वयनः निरुद्धानि सप्त असोः प्राणस्य अयनानि द्वाराणि येन तादृशो भूत्वा तस्मात्पूर्वस्थानाद्भ्रुवोरन्तरमूर्ध्वं नयेत् । तत्राऽऽज्ञाचक्रे तं वायुं स्थिरीकृत्य अन्तःकरणशुद्धेः पूर्वं निरूपितत्वात्सर्वापेक्षारहितो भूत्वा तत्र भगवद्ध्यानेन भगवदाविर्भावे जाते तत्राऽकुण्ठदृष्टिर्मुहूर्तार्द्धं स्थित्वा परं भगवन्तं गतः सायुज्यं प्राप्तः । पूर्वमेव वायोर्बहिर्निर्गमनार्थं प्रयत्नस्य कृतत्वात् । मूर्द्धानं ब्रह्मरन्ध्रं निर्भिद्य विसृजेत् । इन्द्रियाणि विसृजेत् । प्राणानामपि निस्सारणं केचिदिच्छन्ति । अग्रे तेषामप्युपयोगात् । केचित् "**इहैव समवनीयन्त**" इति वाक्यानुरोधात्प्राणानामत्रैवाऽऽत्मनि

स्वमूलभूतासन्यरूपेण स्थितिमिच्छन्ति। प्राणस्य भोगासाधकत्वञ्च। "तमुत्क्रामन्तं प्राणोऽनूत्क्रामती" त्युमुक्तिविषयम्। उत्क्रान्तिचरणविचारेणाऽपि "वाङ्मनसि सम्पद्यत" इत्यादिभिः प्राणशब्देनेन्द्रियाण्युच्यन्ते। गमने वा आयुषो भावात् "मुख्ये कार्यसम्प्रत्यय" इति न्यायेन मुख्यानुरोधिप्राणानामिह लयः। तस्मादिन्द्रियाणि तत्सम्बद्धः प्राणश्च बहिर्निस्सारित इत्यर्थः ॥ २१ ॥ ❀ ❀ एवं सद्योमुक्तिर्द्विधा निरूपिता। उत्तममध्यमभेदात्। आद्यस्य वासनाया अक्षीणत्वाद्भोगेनैव तत्क्षयं मत्वा तं प्रति क्रममुक्तिं वदन्निन्द्रियादीनां स्वसङ्गे नयनमाह—यदीति। यदि प्रयास्यन् भवति तदा मनसा इन्द्रियैश्च सहैवोपगच्छेदिति सम्बन्धः। नृपेति सम्बोधनं सर्वपुरुषार्थसिद्धावपि यथा पारध्यादिगमनमक्षीणवासनत्वाद्राज्ञां तथेदमपीति सम्मत्यर्थम्। यदेव स्थानं प्रयास्यन्भवति तद्गणयति। पारमेष्ठ्यं ब्रह्मस्थानम्। वैहायसानां विमानमधिरुह्य स्त्रीभिः सह सर्वत्राऽन्तरिक्षे परिभ्रमतां यद्विहारस्थानं तत्र वा। उताऽप्यष्टाधिपत्यमष्टगुणैश्वर्यम्। किम्बहुना। गुणसन्निवाये ब्रह्माण्डे अधः उपरि मध्ये वा प्रयास्यन्भवति तत्रैव सह गच्छेत्। चकाराद्वासनाभिः प्राणैर्वा ॥ २२ ॥ ❀ ❀ नन्वेवं सामर्थ्यं कथं जीवस्येत्याशङ्क्याऽऽह—योगेश्वराणामिति। येषां स्वाधीनो योगः। यद्यपि स्वतो गमनसामर्थ्यं न भवति तथापि योगेन तद्भवतीति सर्वा गतय उच्यन्ते। त्रिलोक्याः अन्तर्बहिश्चेति। बहिःस्थिता अपि अन्तरा यान्ति। अन्तःस्थिता अपि बहिर्गच्छन्ति। तत्र हेतुः—पवनान्तरात्मनामिति। पवनस्याऽन्तः आत्मा लिङ्गशरीरं येषाम्। अत्र त्रिलोकीति न ब्रह्माण्डाभिप्रायम्। किन्तु लोकत्रयमेव। यद्यपि कर्मभिरपि सर्वत्र ब्रह्माण्डे गमनमस्ति तथापि न तेषां स्वेच्छया गमनमित्याह—तामिति। या स्वच्छन्दा योगिनां सा न कर्मिणामित्यर्थः। ननूपायस्य तुल्यत्वेऽपि योगस्य कथं गौणता कथं कर्मणां मुख्यत्वमिति। तत्राऽऽह—विद्यातपोयोगसमाधिभाजामिति। कर्म तु स्वतन्त्रमसहायं जीवं स्वाधीनं करोति। योगे तु विद्यादयोऽन्येऽपि चत्वारः सन्ति। तत्संवेष्टितं जीवं योगः स्वाधीनं कर्तुं न शक्नोति। एवमन्येऽपि। ततश्च जीव एव स्वतन्त्रः। अन्ये तु गुणभूताः स्वेच्छया गमने सहायभूता भवन्ति। विद्या उपासना मन्त्रप्रकारेण। तपः कृच्छ्रादि। ज्ञानं वा। योगोऽष्टाङ्गः। समाधिः समाधिस्थितभगवद्दर्शनेन तज्जनितभक्तिसहितपरमधर्म उच्यते। एतेषु करणदशायामपि पुरुषस्य स्वातन्त्र्यम्। कर्ममार्गे तु विध्यधीनतेति ॥ २३ ॥ ❀ ❀ एवं पुरुषस्य स्वाधीनतां निरूप्य गमनप्रकारमाह वैश्वानरं यातीत्यादिना—यावदवसाने आनन्दमयस्तावद्यातीति सम्बन्धः। वैश्वानरमग्न्यधिष्ठातृदेवतालोकम्। "अग्निर्ज्योतिरहः शुक्ल" इति वाक्यप्रकारेण गमनम्। ननु तस्य लोकस्य दूरे विद्यमानत्वाद्बहुकालव्यवधानेन अन्तरा भोगाभावाद्भोगाभिनिवेशस्य विद्यमानत्वात्पुनरागमनं स्यात्। तदर्थमाह—विहायसा गत इति। आकाशमार्गेण गतः। पूर्वमेव "पवनान्तरात्मनामि" त्युक्तत्वाद्यथा वायोर्गमनं तथा तेषामपीत्यर्थः। ननु वायोरितस्ततो गमनसम्भवात्तद्वदस्याऽपि न ऋजुमार्गेण वैश्वानरे [illegible]

गच्छति ? तत्राऽऽह—ब्रह्मपथेनेति। ब्रह्मणः पन्थाः। ब्रह्ममार्गत्वाद्यथापिवैकुण्ठ एव गच्छति। ननु सुषुम्णाया नाडीरूपत्वात्कथं देहाद्बहिर्निर्गमनम् ? तत्राऽऽह—शोचिषेति। तेजोरूपया। एवं तेन मार्गेण वैश्वानरलोकं गतस्य पूर्वमद्भिः सम्परिष्वक्तस्य गमनात्कामनाबाहुल्येन वा सकलकत्वात् तत्र भोगे अग्निमध्यभोगात्कल्कशोषः। अतस्तदनन्तरं ज्योतिस्स्थानगमने आदित्यादिध्रुवपर्यन्तं गमने विधूतकल्को भूत्वा, अथ भिन्नप्रक्रमेण तेजोमयशरीरेण हरेर्भगवतः स्वरूपभूतं शिशुमाररूपं चक्रमुपयाति। यद्यपि शिशुमारचक्रस्य भूमेः परितो विद्यमानत्वात्सर्वत्र गमनमायाति, तथाप्युदस्तादूर्ध्वमेव गच्छति। नृपेति सम्बोधनं शुद्धसत्त्वात्मकस्योर्ध्वगमनस्य संवादबोधकम्। यथा नरपालकस्य नृभिरूर्ध्वं नयनमिति। शिशुमारस्वरूपमग्रे वक्ष्यते। तत्र ध्रुवस्थानं शिशुमारस्याऽन्ते भवति ॥ २४ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः।

यदीत्यस्याभासे आद्यस्येति। प्रथमाधिकारिण इत्यर्थः। पारध्यादिगमनमिति मृगयादिगनमम्। वृवितौ प्राणैर्वेति पक्षान्तरं "पवनान्तरात्मनामि" ति वक्ष्यमाणविशेषणाभिप्रायेण ज्ञेयम् ॥ २२ ॥ ❀ ❀ योगेश्वराणामित्यत्र चत्वारः सन्तीति। एतेन विद्यादिरहिताः कुयोगिनो योगाधीना इति ज्ञापितम्। ते च 'विदूरकाष्ठाये' त्यत्र वक्ष्यन्ते। परमधर्म इति 'अयं हि परमो धर्मो यद्योगेनात्मदर्शनम्' इत्युक्त इत्यर्थः ॥ २३ ॥ ❀ ❀ वैश्वानरं यातीत्यत्र तेजोरूपयेति। तेजस ऊर्ध्वगामित्वं लोकप्रसिद्धमेवेति न कश्चित्संशय इत्यर्थः। सकलकत्वादिति। वैद्यके जले नैकीकृतं कल्कमिति २-२-२४ त्युच्यते। तथा च सकलकत्वेऽद्भिः सम्परिष्वक्तस्य शिष्टं गोलकद्वयं कल्कमिति पूर्वमद्भिः सम्परिष्वक्तस्य गमनादित्येको हेतुः। 'तपो न कल्कोऽध्ययनं न कल्क' इत्यादौ कल्कशब्देनानिष्टकरं कर्मोच्यते। 'कल्कस्तु शमलैनसोः दम्भेपी' ति कोशात्तमर्थमादाय कामनाबाहुल्येनेति द्वितीयो हेतुर्ज्ञेयः ॥ २४ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

तस्मादपि स्वतालुमूलाद्बहुधा गमनसम्भवात् निरुद्धानि श्रोत्रद्वयाक्षिद्वयनासारन्ध्रद्वयास्यरूपाणि सप्त अस्वयनानि प्राणमार्गा

१. पराध्यादिगमनमिति ग। २. त्रिलोकी न ब्रह्माण्डाभिप्रायमिति क. ग.। ३. नेति नास्ति। ४. स्वच्छन्दयोगिनामिति क.घ.। अन्ये गुणभूता इति क. ख. ग. ६.। विध्यधीनयेति क. ख. घ.।

येन तथाभूतः सन् भ्रुवोरन्तरं भ्रूमध्यस्थमाज्ञाचक्रं प्रति प्राणमुन्नयेतेत्यन्वयः । अनपेक्षः वक्ष्यमाणपारमेष्ठ्यादिपदभोगानिरपेक्षश्चे-न्मुहूर्तार्द्धं तथैव स्थित्वा परं परमात्मानं गतः अनुसन्दधन् मूर्द्धन् मूर्द्धानं निर्भिद्य देहमिन्द्रियाणि च विसृजेदित्यन्वयः । कथमेवं सर्वतो विरक्तिः सम्भवतीत्याशङ्क्याह—अकुण्ठा अखण्डा दृष्टिः सत्यानृतविवेकरूपं ज्ञानं यस्य स इति ॥ २१ ॥ ❀ ❀ एवं निष्कामस्य सद्योमुक्तिमुक्त्वा सकामस्य क्रममुक्तिमाह—यदीति दशभिः । हे नृप यदि पारमेष्ठ्यं ब्रह्मपदं प्रयास्यन् भवति अष्टावाधिपत्यानि अणिमाद्यैश्वर्याणि यस्मिन् तद्वैहायसानां विमानैराकाशे विचरतां सिद्धानां यद्विहारं क्रीडास्थानं वा यदि प्रयास्यन् भवति । किं बहुना ? गुणसन्निवाये गुणसमुदायरूपे ब्रह्माण्डे यत्र कुत्र वा यदि प्रयास्यन् भवति तर्हि देहत्यागावसरे मन इन्द्रियाणि च न विसृजेत्किन्तु मनसेन्द्रियैश्च सहैव तत्तल्लोकभोगार्थं गच्छेत् । चकारात्प्राणैश्च सहेति ज्ञेयम् ॥ २२ ॥ ❀ ❀ नन्वेवं जीवस्य कथं स्वातन्त्र्यमित्याशङ्क्याह—योगेश्वराणामिति । योगेश्वराणां स्वनुष्ठितयोगानां त्रिलोक्या अन्तः स्वर्गपातालादिमध्ये ततो बहिर्महर्लोकादिषु च गतिं गमनसामर्थ्यमाहुस्तां गतिं कर्मिणः कर्मभिर्नाप्नुवन्तीत्यन्वयः । कथं तथा सामर्थ्यमित्यपेक्षायामाह—पवनस्यान्तः आत्मा लिङ्गशरीरं येषां तेषामिति । एतदपि कैः साधनैरित्यपेक्षायामाह—विद्येति । विद्या मन्त्रजपादिरूपा, तपः कृच्छ्रचान्द्रायणैकादश्युपवासादिरूपम्, योगः अष्टाङ्गः, समाधिः समाधौ भगवद्दर्शनजनितपरमस्नेहः, तान् ये भजन्ति तेषा-मित्यर्थः ॥ २३ ॥ ❀ ❀ एवं योगिपुरुषस्य सहेतुकं सामर्थ्यं निरूप्य गमनप्रकारमाह—वैश्वानरं यातीति । प्रथमं विहायसा आकाशमार्गेण गतः सन् वैश्वानरः अग्न्यभिमानिनी देवता तां याति । अथ तदनन्तरं उदस्तादुपरिष्टाद्वर्त्तमानं हरेः सम्बन्धि नारायणाधिष्ठितं शैशुमारं पञ्चमस्कन्धे वक्ष्यमाणं शिशुमाराश्रयं ज्योतिश्चक्रं प्रयाति च, स्थानान्यादित्यादिध्रुवान्तानि पदानि प्रयातीत्यर्थः । नन्वाकाशस्य सर्वतः प्रसृतत्वात् कथं तेन तत्रैव गमनमित्याशङ्क्याह—ब्रह्मपथेनेति । कोऽसौ ब्रह्मपन्था इत्यपेक्षा-यामाह—सुषुम्णया नाड्येति । ननु सा तु देहान्तर्गतैवास्ति कथं तयाऽपि ब्रह्मलोकगमनमित्याशङ्क्याह—शोचिषेति, तेजोमय्येत्यर्थः । तथाच देहाद्बहिरपि ब्रह्मलोकपर्यन्तं सा वितताऽस्तीति भावः । कथं तस्यैव तेन मार्गेण गमनमित्यपेक्षायामाह—विधूतो निवृत्तः कल्को मलो यस्य स इति । नृपेति सम्बोधनं विश्वासार्थम् ॥ २४ ॥

## हिन्दी अनुवाद

तदनन्तर दो आँख, दो कान, दो नासाछिद्र और मुख—इन सातों छिद्रोंको रोककर उस तालुमूलमें स्थित वायुको भौंहोंके बीच आज्ञाचक्रमें ले जाय। यदि किसी लोकमें जानेकी इच्छा न हो तो आधी घड़ीतक उस वायुको वहीं रोककर स्थिर लक्ष्यके साथ उसे सहस्रारमें ले जाकर परमात्मामें स्थित हो जाय। इसके बाद ब्रह्मरन्ध्रका भेदन करके शरीर-इन्द्रियादिको छोड़ दे ॥ २१ ॥ ❀ ❀ परीक्षित् ! यदि योगीकी इच्छा हो कि मैं ब्रह्मलोकमें जाऊँ, आठों सिद्धियाँ प्राप्त करके आकाश-चारी सिद्धोंके साथ विहार करूँ अथवा त्रिगुणमय ब्रह्माण्डके किसी भी प्रदेशमें विचरण करूँ, तो उसे मन और इन्द्रियोंको साथ ही लेकर शरीरसे निकलना चाहिए ॥ २२ ॥ ❀ ❀ योगियोंका शरीर वायुकी भाँति सूक्ष्म होता है। उपासना, तपस्या, योग और ज्ञानका सेवन करनेवाले योगियोंको त्रिलोकीके बाहर और भीतर सर्वत्र स्वच्छन्दरूपसे विचरण करनेका अधिकार होता है। केवल कर्मोंके द्वारा इस प्रकार बेरोक-टोक विचरना नहीं हो सकता ॥ २३ ॥ ❀ ❀ परीक्षित् ! योगी ज्योतिर्मय मार्ग सुषुम्णाके द्वारा जब ब्रह्मलोकके लिये प्रस्थान करता है, तब पहले वह आकाशमार्गसे अग्निलोकमें जाता है; वहाँ उसके बचे-खुचे मल भी जल जाते हैं। इसके बाद वह वहाँसे ऊपर भगवान् श्रीहरिके शिशुमार नामक ज्योतिर्मय चक्रपर पहुँचता है ॥ २४ ॥

**तद् विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः ।**
**नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्[1] विबुधा रमन्ते ॥२५॥**
**अथो अनन्तस्य मुखानलेन दन्दह्यमानं स निरीक्ष्य विश्वम् ।**
**निर्याति सिद्धेश्वर[2]जुष्टधिष्ण्यं यद् द्वैपरार्ध्यं तदु पारमेष्ठ्यम् ॥२६॥**
**न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेग ऋते कुतश्चित् ।**
**यच्चित्ततोऽदः कृपयानिदंविदां दुरन्तदुःखप्रभवानुदर्शनात् ॥२७॥**
**ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनापोऽनलमूर्तिरत्वरन् ।**
**ज्योतिर्मयो वायुमुपेत्य काले वाय्वात्मना खं बृहदात्मलिङ्गम् ॥२८॥**

---

१ प्रा० पा० विबुधा यद्रमन्ते । २ प्रा० पा० विश्वेश्वर० ।

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तद्विष्णोश्चक्रं विश्वस्य नाभिं सूर्याद्याश्रयभूतम् । आविष्टलिंगत्वान्नाभिशब्दस्य न षंढत्वम् । अतिवर्त्य अतिक्रम्य परतः स्वर्गिणां गत्यभावादेक एव निर्मलेन लिंगशरीरेण ब्रह्मविदां स्थानमन्यैर्नमस्कृतं महर्लोकमुपैति । यस्मिन्विबुधा महाकल्पायुषो भृग्वादयः ॥ २५ ॥ ❀ ❀ अथो अनंतरं कल्पांते स विश्वं त्रैलोक्यमतिशयेन दह्यमानं निरीक्ष्य तत्राप्यूष्मप्राप्तेः यत् द्विपरार्धस्थायि तत्पारमेष्ठ्यं पदं प्रति निर्याति । सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि विमानानि यस्मिंस्तत् । उ इति श्रैष्ठ्यं सूचितम् ॥ २६ ॥ ❀ ❀ तदेवाह । न यत्रेति । आर्तिर्दुःखम् ' उद्वेगो भयम् । किंतु चित्ततो हेतोः यद्दुःखमद ऋते तदेकं विना तत्कुतो भवति अनिदंविदामिदं भगवतो ध्यानमजानतां प्राणिनां दुरंतदुःखो यः प्रभवो जन्म तस्यन्वनुदर्शनात् तेषां कृपया । यद्वा चित्ततोदो मनःपीडेति यत्तद्विना कुतश्चिदपि यत्र शोकादयो न संतीति । तत्र ब्रह्मलोकं गतानां त्रिविधा गतिः । ये पुण्योत्कर्षेण गतास्ते कल्पांतरे पुण्यतारतम्येनाधिकारिका भवंति ये तु हिरण्यगर्भाद्युपासनाबलेन गतास्ते ब्रह्मणा सह मुच्यंते, ये तु भगवदुपासकास्ते स्वेच्छया ब्रह्मांडं भित्त्वा वैष्णवं पदमारुहंति ॥ २७ ॥ ❀ ❀ तत्र प्रस्तुतस्य भगवद्भक्तस्य ब्रह्मांडभेदनप्रकारमाह तत इत्यादिना । तत्रेयं प्रक्रिया । ईश्वराधिष्ठितायाः प्रकृतेः केनचिदंशेन महत्तत्त्वं भवति, तस्यांशेनाहंकारः, तस्यांशेन शब्दतन्मात्रद्वारा नभः, तस्यांशेन स्पर्शतन्मात्रद्वारा वायुः, तस्यांशेन रूपतन्मात्रद्वारा तेजः, तस्यांशेन रसतन्मात्रद्वारा आपः, तदंशेन गंधतन्मात्रद्वारा पृथ्वी तैश्च मिलितैश्चतुर्दशभुवनात्मकं विराट्शरीरं तस्य पंचाशत्कोटियोजनविशालस्य पृथिव्येवांडकटाहविशेषशब्दवाच्या कोटियोजनविशालं प्रथमावरणम् । पंचाशत्कोटियोजनविशालमित्येके । ततश्चाबादीनां ये परिणता अंशास्तान्येवोत्तरोत्तरं दशगुणान्यावरणानि । अष्टमं तु प्रकृत्यावरणं व्यापकमेव तदेवं स्थिते पृथिव्याद्यावरणभेदप्रकारः कथ्यते । ततो विशेषं प्रतिपद्य लिंगदेहेन पृथिव्यात्मतां प्राप्येत्यर्थः एवमुत्तरत्रापि द्रष्टव्यम् । निर्भयः कथं यास्यामीति शंकाशून्यः तेनात्मना पृथिवीरूपेण तन्निरंतरा आपः प्रतिपद्यात्वरंस्त्वरामकुर्वन् । तत्तदात्मत्वेन क्लेददाहादिशंकाभावाद्यथेष्टं भोगान्भुंजान इत्यर्थः । एवं ज्योतिर्मयः सन् काले भोगावसाने बृहदात्मलिंगं परमात्ममूर्तित्वेनोपासनेपृक्तम् । यद्वा । वेदशब्दात्मना तस्य प्रमापकमिति ॥ २८ ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

आविष्टलिंगत्वादजहल्लिंगत्वात् । षंढत्वं क्लीबत्वं नेत्यर्थः । "नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्" इति मेदिनी ॥ २५ ॥ ❀ ❀ तत्रापि महर्लोकेपि उष्मा बह्न्युष्णत्वमौष्ण्यम् । पारमेष्ठ्यं सत्यलोकं प्रति ॥ २६ ॥ ❀ ❀ तदेव सत्यलोकमाहात्म्यमेव उत्तानार्थमाह । यद्वेति । तत्र व्याजस्तुतौ सत्यलोकस्था महाकृपालवो धन्या एवेति भावः ॥ २७ ॥ ❀ ❀ तत्र त्रिषु प्रस्तुतस्य ये तु भगवदुपासका इत्युक्तस्य । इत्यर्थ इति । तस्य लिंगदेह एव पृथिवीरूपो भूत्वा पृथिव्यां प्रविशतीति भावः । उत्तरत्रापि जलादिष्वपि । इत्यर्थ इति । घ्राणरसनादींद्रियैर्गंधरसादीन् विचित्रभोग्यविषयान् सेवमान एव यातीति भावः । 'खं ब्रह्मेत्युपासीत' इति श्रुतेरात्ममूर्तित्वम् । 'लिंगं मूर्तिलक्ष्मशेफज्ञापकेषु कारणे' इति कोशादर्थांतरमाह यद्वेति वेदशब्दात्मना सगुणीभूतशब्दरूपवेदरूपेण तस्य ब्रह्मणो प्रमापकं ज्ञापकमित्यर्थः ॥ २८ ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या ।

आविष्टलिङ्गत्वात् अजहल्लिङ्गत्वादित्यर्थः ॥ २४—२७ ॥ ❀ ❀ अधिकारिण इति । अत्र आधिकारिका इति च पाठः । आधिकारिका अधिकारे नियुक्ताः इति गोविन्दभाष्यम् ॥ तन्निरन्तरा इति । अन्तरमवकाशः । पृथिव्यन्तरहिताः इति यावत् ॥ २८—३१ ॥

## श्रीमद्वीरराघवव्याख्या

विश्वनाभिं विश्वस्य ग्रहतारकानक्षत्रादेः कृत्स्नस्याश्रयभूतं विष्णोः स्थानमिति शेषः । विरजेन प्रणष्टपुण्यपापेनाणीयसा सूक्ष्मतरेणात्मना लिंगशरीरेणैकः असहाय नमस्कृतं ब्रह्मविदां ब्रह्मविद्भिर्नमस्कृतम् इदं शिशुमारचक्रविशेषणं तदतिवर्त्येत्यन्वयः । अनेन चन्द्रप्राप्तिरपि सिद्धा तस्याव्यवहितः शिशुमारः यद्यत्र कल्पायुषः विबुधा आकल्पांतायुषः देवाः रमंते तं जनलोकमुपैति प्रयाति ॥ २५ ॥ ❀ ❀ अथ अधस्तात्स्थितस्यानंतस्य मुखानलेनावांतरप्रलये शेषमुखोद्भूतरुद्रगणपातालानलेन दंदह्यमानमिति । मस्तकस्थायी इह मृत्युरित्युक्तरीत्या सत्त्वाभिप्रायो वर्तमाननिर्देशः निरीक्ष्य त्रिकालज्ञानबलादपरोक्षं दृष्ट्वेत्यर्थः । जनलोके स्थित्वा कल्पांतरे तत उपैतीत्ययमर्थोऽनुपपन्नः । पुण्यपापविधूननस्योक्तत्वेन तत्रावस्थितिहेतुभूतकर्माभावात्तेषु लोकेषु स्थित्ययोगात् । अतो दोषं दृष्ट्वा द्वैपरार्ध्यं द्विपरार्द्धस्थायि सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि विमानानि यस्मिंस्तदुश्रेष्ठ्यं पारमेष्ठ्यं चतुर्मुखसंबंधिस्थानं याति निर्यातीत्यर्थः । वरुणेंद्रादिप्राप्तिस्त्वर्थसिद्धा ॥ २६ ॥ ❀ ❀ चतुर्मुखलोकस्य स्वर्गाद्यपेक्षया चिरकालस्थायित्वमभिप्रयन्नाह न यत्रेति । यत्रेत्यस्य तत्र दुरंतदुःखप्रभवानुदर्शनादित्युपरितनेनान्वयः आर्तिर्दुःखम् उद्वेगो मनःक्षोभः, भयमागामिदुःख-

दर्शनजं ज्ञानं, कुतश्चिदित्यस्य भयमित्यनेनान्वयः । कुतश्चिच्छीतातपवातवर्षादिभ्यः । एवंविधेऽपि चतुर्मुखलोके ब्रह्मविदां निर्वेदमाह यच्चितत इति यद्यस्मादित्यर्थः । अनिदंविदाम् इदं शब्दवाच्यपरिदृश्यमानप्रपंचविलक्षणपरंब्रह्मविदाम् । क्रियया कर्मणा हेतुभूतेन दुरंतदुःखप्रभवानुदर्शनात् । दुरंतमपारं यद्दुःखं तस्य प्रभवः प्रभवत्यस्मादिति प्रभवः दुःखहेतुभूतसंसारस्तस्यानुदर्शनम् उत्प्रेक्षणं तस्माच्चित्ततश्चितनाददः दुरंतदुःखमिति यच्चतुर्मुखलोकेऽपि ब्रह्मविद्भिः कर्महेतुकं दुरंतदुःखं चित्तेनानुमीयत इति यत्तत एव हेतोर्विशेषं प्रतिपद्येत्युत्तरत्रान्वयः । अर्थांतरपरत्वमनुपपन्नमध्याहारबाहुल्यात् । यस्य हिरण्यगर्भस्य चित्तत उपासनात् अदस्तस्य स्थानमुपासकैर्लभ्यत इति यदा योजना तदोपासकैर्लभ्यते इत्यध्याहारः । अनिदंविदां हिरण्यगर्भोपासनरहितानां दुरंतदुःखप्रभवानुदर्शनात्तदुपासकानामेव दुःखनिवृत्तिस्थानब्रह्मलोकाख्यं लभ्यते इति नोपपद्यते । हिरण्यगर्भस्थानस्यापि दुःखनिवृत्तिहेतुत्वाभावाच्चतुर्मुखलोकं गतस्य श्वेताख्यस्य राज्ञः पुनर्भुवमागत्य प्रतिदिनं स्वीयशवभक्षणं प्रसिद्धम् । आवृत्तेर्दर्शनाच्च ब्रह्मलोकस्थयोगिनां न पुनरावृत्तिदुःखभयम् । तत्र मोक्ष्यमाणत्वनिश्चयादिति चेन्न भूतलस्थयोगिनामपि मोक्ष्यमाणत्वनिश्चयान्न पुनरावृत्तिभयमिति मुमुक्षूणां महीतलचतुर्मुखलोकयोः को विशेषः "आब्रह्म भुवनाल्लोकाः पुनरावर्तिनोऽर्जुन" इति हि स्मर्यते । तच्च द्वैपरार्ध्यमित्यनेन सूचितम् अतो यथोक्त एवार्थः ॥ २७ ॥ ❀ ❀ विशेषं पृथिवीमयमंडकटाहं प्रतिपद्य व्याप्येत्यर्थः अनेन "पृथिवीमंडं भिनत्ति" इति श्रुतिर्व्याख्याता । विशेषशब्दः पृथिवीवाचकः "महदादयो विशेषांता" इतिप्रयोगात् । अत्रापि विशेषस्तु विकुर्वाणादंभसो गंधवानभूदिति वक्ष्यमाणत्वाच्च विशेषं प्रतिपद्य निर्यातीत्यनुषंगः यद्वा । उत्तरत्रोपैतीत्यनेनान्वयः । तेनात्मना स्वरूपेणोपलक्षितः आपः आवरणजलं प्रतिपद्येत्यन्वयः । आवरणाग्निव्याप्तिमाह अनलमूर्तिमिति मूर्तिभूतावरणाग्निं प्रतिपद्यात्वरन् त्वराम-कुर्वन् क्लेददाहादिशंकाभावादित्यभिप्रायः ज्योतिर्मयः वायुर्भूत्वा अभ्रं भवतीतिवत्संश्लेषाभिप्रायो ज्योतिर्मय शब्दः वायुम् आवरणवायुमुपेत्य काले पूर्वपूर्वकावरणात्ययानंतरकाले वाय्वात्मना वायुसंश्लिष्टरूपेणोपलक्षितो बृहत्स्वकार्यभूतवाय्वाद्यपेक्षया बृहत् । आत्मलिंगं स्वासाधारणशब्दलिंगकं खमावरणाकाशमुपेत्य आत्मलिंगमित्यत्र आत्मा स्वासाधारणशब्दः लिंगमात्मनात्मनोः प्रमाणं यस्य तत् इत्यर्थः लिंगं यद्दष्टदृश्ययोरिति वक्ष्यमाणत्वात् । इदमावरणांतरेष्वपि तत्तद्गंधादिगुणविशिष्टपृथिव्यादिसंश्लेषप्रदर्शनार्थमुक्तम् एवमाकाशं भिनत्तीत्यंतः श्रुत्यर्थ उक्तः ॥ २८ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

वैश्वानरो नाम क इति तत्राह य इति यो भूतानामंतः कोष्ठाग्नौ स्थित्वा तदुक्तं चतुर्विधमन्नं पचति यश्च ब्रह्मांडमध्यगः स्वपुरमध्यगस्तपति प्रकाशते स प्रधानवह्निर्वैश्वानराख्यो ब्रह्मदेवपितृलोकगंतुर्मुनेर्योगिनः कर्मयोगिनश्च गम्यत्वान्मार्ग इतीरित इत्यन्वयः । "पितृयानं देवयानं ब्रह्मयानमिति त्रिधा । गच्छन्वैश्वानरं याति तस्मान्मार्गः स ईरितः" । देवयानेन गंतॄणां वैश्वानरादर्वाग्यर्चिरादयो गम्याः संति । ब्रह्मदेवपितृलोकगंतृभिः सर्वैरपि वैश्वानर प्राप्यत इति द्योतनाय वैश्वानरं यातीति प्रथमत एव वैश्वानरप्राप्तिकथनमिति ज्ञातव्यम् ॥ २५ ॥ ❀ ❀ के तर्हि त इति तत्राह देवयानमिति शरीरदक्षिणपार्श्वस्थपिंगलाख्यनाडीभिः शतायुषा मरणाख्योत्क्रमणादहान्यहःसंज्ञदेवयानमेति इडाभिर्देहवामपार्श्वस्थेडाख्यनाडीभिः शतायुषा मरणेन रात्रीः रात्रिसंज्ञं पितॄणां यानं पितृयानमेति । देवयानपितृयानमार्गस्थानामहरादिकालाभिमानिनीनां देवतानां प्राचुर्यादहानि रात्रीरिति बहुवचनं 'दक्षिणाःपिंगलाःसर्वा इडा वामाःप्रकीर्त्तिताः नाड्योऽथ मध्यमा प्रोक्ता सुषुम्णा वेदपारगै' रिति "देवयानस्य मार्गस्था अहः शब्दाभिसंज्ञिताः पितृयानस्य मार्गस्था रात्रिशब्दाह्वयामता" इति वा पिंगलेडामध्यस्थया सुषुम्णया नाड्या शतायुषा विशिष्टसुखवत्त्वात्तद्विषुवत्ताख्यं ब्रह्मयानमेति । विशिष्टं सुखं विषु तदस्यास्तीति विषुवत् । तस्य भावो विषुवत्ता ताम् । सषयोरभेदाद्वीत्युपसर्गयोगाद्वा सकारस्य षकारः "विषुवत्ता ब्रह्मयानं विशेषेण सुखं यत" इति रागोपरक्तसुखादिदातृत्वात् पिङ्गलादेर्देवयानादिशब्दवाच्यत्वं तदुक्तं "पिङ्गला देवयानं स्यात्पिगाख्यसुखदा यतःइडाऽन्नदानात्पितॄणामेवं मार्गाः प्रकीर्त्तिता" इति अत्र देवयानब्रह्मयानभेदोऽवांतरोवगन्तव्यः ॥ २६ ॥ ❀ ❀ अधुना शिशुमारलोकादुपरितनमार्गप्रकारमाह । तदिति । शैशुमार इत्यनेन सद्रूपमुक्तं विष्णोस्तद्विश्वनाभि विश्वाधारं रूपं प्रतिपद्य तुशब्दसूचिताम् तदनुज्ञामादाय । विरजेन विगतरागादिदोषेणाऽणीयसा सूक्ष्मतरेणात्मस्वरूपेण सर्वोऽपि ब्रह्मज्ञानिजनस्तल्लोकमुपैति तं विशिनष्टि कल्पायुष इति कल्पायुषो विबुधा यद्यत्र रमंते क्रीडंति तमिति शेषः । किं विशिष्टं रूपम् । ब्रह्मविदां समुदायेन नमस्कृतमेकं मुख्यं केवलमिति वा "मन्वंतरायुषः स्वर्ग्या महर्लोके तु काल्पिका" इति पिंगलाभिरुत्क्रम्य देवयानेन गतः परांते ब्रह्म प्रयास्यंस्तत्र महर्लोकेऽष्टाधिपत्यमित्युक्तोऽणिमाद्यैश्वर्यशाली वसति कश्चन जनलोके कश्चन तपोलोके ज्ञानादिपरिपाकायास्ते कश्चित्सत्यलोके हर्याज्ञया वसति ब्रह्मयानेन गताः अप्रतीकालंबनाः प्रतीकालंबनाश्च शैशुमारहरिणानुज्ञातास्तदैवानिरुद्धप्रद्युम्नसंकर्षणादिदेवान्प्राप्य दिवस्पतिं वायुं प्राप्य तेन कार्यब्रह्मप्रापिताः तदुपदंशं प्राप्य प्रतीकोपासका निवसंति अन्ये तु तेन वायुना परं ब्रह्म प्रापितास्तल्लोके निवसंतीत्यादिविशेषस्तुशब्देन सूचित इति ज्ञातव्यम् ॥ २७ ॥ ❀ ❀ महर्लोकादिषु विहरतां तथाज्ञानादिसाधनपरिपाकाय च निवसतां चतुर्मुखप्राप्तिप्रकारमाह अथ इति महर्लोकादिषु वसन् स ज्ञानिसंघोऽथ द्विपरार्धावसाने ब्रह्मप्रलये ब्रह्मणा सह मुक्तिं यास्यन्

सिद्धैः सनकादिभिर्जुष्टस्य चतुर्मुखस्य धिष्ण्यं निवासस्थानं यत् द्वैपरार्ध्यं द्वयोः परार्धयोः संबंधि । चतुर्मुखस्याऽऽयुषः परेति नाम चतुर्मुखायुर्लक्षणशतसंवत्सरभोग्यमित्यर्थः । तत्पारमेष्ठ्यं निर्याति महर्लोकादेर्निर्गत्य सत्यलोकमाप्नोतीत्यर्थः गंतुं हेतुमाह अनंतस्येति । अनंतस्य भगवतो मुखानलेन मुखनिर्गताग्निः पुनः पुनर्दह्यमानं विश्वं निरीक्ष्य । संकर्षणमुखाग्निना प्रपञ्चस्य दाहो हेतुरित्यर्थः उशब्दो ब्रह्मलोकं प्राप्य तेनेव सह मुक्तिं प्राप्नोतीत्यस्मिन्नर्थे वर्तते ॥ २८ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

अथो लीलगृहीतशरीरेण तद्भोगानन्तरम् ॥ २६-२७ ॥ ❀ ❀ ततो विशेषमिति । अत्र टीकायामेकब्रह्माण्डपक्ष एव सङ्गमितः । बहुब्रह्माण्डपक्षस्त्वेवम्—ब्रह्माण्डानि खल्वेकत्रैवानुच्चनीचत्वेन मण्डलीभूय वर्त्तन्ते । तेषां पृथिव्यावरणं प्रत्येकं पृथगेव । जलावरणन्तु तन्मण्डलाद्बहिः पूर्व्वावरणाद्दशगुणमेकमेव । यस्योपरि च सर्व्वब्रह्माण्डकारणं कारणार्णवशाय्येक एक शेते । यत्तु मण्डलाभ्यन्तरेऽपि यत्किञ्चिज्जलं प्रविशति तत्त्वावरणसंज्ञं न भवति अनिश्चितमानत्वात् । तदेवमेवाहङ्काराद्यावरणानां सर्व्वभूतावरकत्वं सङ्गच्छेत इति विशेषं प्रतिपद्य प्राचीनस्थूलदेहे इव तत्र लिङ्गदेहावेशं कृत्वा । पुनश्च तेन विशेषाविष्टेन लिङ्गदेहाख्येनैव आत्मना अपः जलावरणं प्रतिपद्य प्राचीनस्थूलदेहत इव विशेषत उत्क्रमपूर्व्वकं तत्र तदावेशं कृत्वा । पुनश्च पूर्व्ववदनलमूर्त्तिः सन्नित्यादि योज्यम् । तत्र तत्र लोकविशेषेषु भोगाश्रेष्ठलीलाशरीरमपि मन्तव्यम् ॥ २८ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी व्याख्या

ततश्च तत् विष्णोश्चक्रम् अतिवर्त्त्य अतिक्रम्य । कीदृशं विश्वस्य नाभिं विश्वात्मकपुरुषस्य नाभिस्थानीयम् । अणीयसा अणिमादिसिद्धिमत्त्वादतिसूक्ष्मेण विरजेन निर्म्मलेन लिङ्गशरीरेण सह । ततः परत्र स्वर्गिणां गम्याभावादेकः नमस्कृतं पूज्यं ब्रह्मविदां स्थानं महर्लोकमुपैति । यत् यस्मिन् विबुधा महाकल्पायुषः रमन्ते खेलन्ति ॥ २५ ॥ ❀ ❀ अतो अनन्तरं यदि कल्पपर्य्यन्तं कौतुकवशात् तत्रैव स्थातुमिच्छति तदा कल्पान्ते सति विश्वं लोकत्रयम् । निर्याति उष्णीभूतात् महर्लोकादूर्ध्वं यत् द्वैपरार्द्ध्यं द्विपरार्द्धपर्य्यन्तस्थायि यत् पारमेष्ठ्यं सत्यलोकं प्रति याति । सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि विमानानि यस्मिंस्तत् ॥ २६ ॥ ❀ ❀ सत्यलोकस्य माहात्म्यमाह न यत्रेति । आर्त्तिर्दुःखम् । उद्वेगः भयम् । किन्तु चित्ततो हेतोः यत् दुःखम् अदः ऋते तदेकं विना तदेव किं कथं वा भवेत् तत्राह । अनिदंविदाम् इमं वैष्णवयोगमजानतां त्रिलोकस्थजनानां दुरन्तदुःखो यः प्रभवः संसारस्तस्यानुदर्शनाद्या कृपा तया । तेन व्याजस्तुत्या सत्यलोकस्थास्ते महाकृपालवो धन्या एवेति भावः ॥२७॥ ❀ ❀ अथ तत्रैव यदि महाकल्पपर्य्यन्तं स्थातुमिच्छति तदा ब्रह्मणा सहैव मुच्यते । यदि च तदन्तरमेव मोक्षमिच्छति तदा सप्तावरणानि निर्भिद्यैव ब्रह्म प्रविशतीति तत्प्रकारमाह । ततो विशेषं पञ्चाशत्कोटियोजनविशालस्य ब्रह्माण्डस्य प्रथमावरणरूपां पृथिवीं पञ्चाशत्कोटियोजनप्रमाणां प्रतिपाद्य प्राप्य । केन प्रकारेण तेनात्मना पृथिवीरूपेण । एवमुत्तरत्रापि द्रष्टव्यम् । निर्भयः तत्तदात्मत्वेन क्लेददाहादिशङ्काशून्य इत्यर्थः । ततोऽपः पृथिवी दशगुणप्रमाणाः प्रतिपद्य अवात्मनेति शेषः । ततोऽनलमूर्त्तिः जलदशगुणं तेज आवरणं प्राप्येत्यर्थः अत्वरन् भवेत् । तत्र तत्र पृथिवीजलादिषु घ्राणरसनादीन्द्रियैर्गन्धरसादीन् विचित्रभोग्यविषयान् भोक्तुमेवेति भावः । ततो ज्योतिर्म्मयः काले वाय्वात्मना वायुं तेजोदशगुणम् उपेत्य । खं वायुदशगुणमाकाशे, बृहदात्मनो लिङ्गं परमात्ममूर्त्तित्वेनोपासनेन युक्तं, यद्वा वेदशब्दात्मना तत्प्रमापकमिति ॥ २८ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तद्विष्णोश्चक्रं शैशुमारं विश्वनाभिं सूर्यादिग्रहनक्षत्रादेः सर्वस्याश्रयम् अतिवर्त्यातिक्रम्य विरजेन पुण्यापुण्यरहितेन अणीयसा सूक्ष्मतरेणात्मना लिंगशरीरेण एकः विद्वान् यत् यस्मिन् कल्पायुषो विबुधा रमन्ते तद्ब्रह्मविदां भृग्वादीनां स्थानं नमस्कृतं नमनीयं महर्लोकमुपैति प्राप्नोति ॥ २५ ॥ ❀ ❀ अथो अनन्तरं कल्पांते अनन्तस्य मुखानलेन अधस्थस्य शेषस्य मुखोद्भूताग्निना विश्वं त्रैलोक्यं दंदह्यमानं स विद्वान्निरीक्ष्य वरुणेन्द्रद्वारा यद्वैपराद्ध्यस्थायि सिद्धेश्वरैर्जुष्टानि युक्तानि धिष्ण्यानि विमानानि यस्मिंस्तदुपारमेष्ठ्यं परमेष्ठिपदं प्रति निर्याति भोगार्थं महर्लोके स्थिरो भूत्वा त्रैलोक्यं दह्यमानं निरीक्ष्य ततः पलायते इति न शङ्क्यं प्राकृतपदार्थभोगयोगाभावात् ॥ २६ ॥ ❀ ❀ यत्र लोके अनिदंविदाम् । इदं प्रस्तुतमपुनरावृत्ति वर्त्म ब्रह्म वा जानंतीतीदंविदस्तद्भिन्नानां प्रस्तुतविद्वद्व्यतिरिक्तानां पुनरावृत्तिवर्त्मना तत्र गतानाम् । दुरंतदुःखो यः प्रभवः पुनरावृत्त्या जन्म तस्यानुदर्शनात् कृपया यच्चित्ततो भवति । अदः ऋते शोकादि कुतश्चिन्न भवति । ततः पुनरावृत्तिस्तु "ऐश्वर्यं पारमेष्ठ्यं च तेतिकर्मविनिर्मितं निषेव्य पुनरायान्ति गुणव्यतिकरे सति" इति वक्ष्यमाणात् । "आब्रह्मभुवनाल्लोकाः पुनरावृत्तिनोऽर्जुन" इति भगवद्वचनाच्च ॥ २७ ॥ ❀ ❀ अथावरणभेदनप्रकारमाह तत इति । "दशोत्तराणि शेषाणि मैत्रयैतानि सप्तवै" इति पुराणान्तरात् पृथिव्याद्यावरणानि दशगुणोत्तराणि सप्त तत्र कोटियोजनमानमंडकटाहसंज्ञकं प्रथमावरणम् । "कोटियोजनमानस्तु

कटाहः संव्यवस्थितः" इति पुराणान्तरात् । महांतश्च समवृत्य प्रधानं संव्यवस्थितम् । अनन्तस्य न तस्यान्तमिति वचनाद्व्यापकमष्टमं प्रकृत्यावरणं निर्भयः आवरणभेदने भयशून्यः ततः पारमेष्ठ्याल्लोकात् तेनात्मना लिंगदेहेनोपलक्षितः विशेषं पृथिवीमयमण्डकटाहं प्रतिपद्य तद्भावं प्राप्य प्रतिपद्येत्यादीनाम् प्राणेनाकूतिमुपैतीत्यनेनान्वयः तन्निरन्तरा आपः प्रतिपद्य ततोऽनलमूर्तिः अनलभावं प्रतिपद्येत्यर्थः । अतएवात्वरन् त्वरामकुर्वन् तत्तद्भावं प्राप्तस्य तत्र तत्र भयाभावात् ततो ज्योतिर्मयः । अनलमूर्तिः काले अनलोत्तरवायुभेदकाले वायुमुपेत्य ततो वाय्वात्मनोपलक्षितः खमुपेत्य कथंभूतं वाय्वपेक्षया बृहत् । पुनः कथंभूतमात्मलिंगम् । आत्मस्वगुणभूतः शब्द एव लिङ्गं ज्ञापकं यस्य न तु चक्षुरादिग्राह्यत्वमित्यर्थः ॥ २८ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

तद्ब्रह्माण्डस्य नाभिस्थानीयम् ततोऽग्रे लोकचतुष्टयम् । तत्र तुशब्देन पूर्वरूपाद्रूपान्तरकरणमुक्तम् । ततो द्वितीयं ध्रुवे । विष्णोरित्युभयत्र सम्बध्यते । तत्र गमनयोग्यं शरीरं वर्णयति—**अणीयसा विरजेनाऽऽत्मनेति** । पूर्वापेक्षया तदणीयः । वायुप्रधानत्वात् । प्रशिथिलावयव इत्यर्थः । तत्रापि विरजः । वायोरपि लोकत्रय एव रजः सम्बन्धः । अथवा । पूर्वशरीरं [२]तामसं स्थितं [३]तद्वैश्वानरलोके त्यक्तम् । ततो द्वितीयं ध्रुवे त्यक्तम् । तृतीयमिदमिति तमोरजसोरभावाद्विरजेनेत्युक्तम् । केवलसत्त्वमयेन सत्त्वमिश्रेण वा । केवलसत्त्वेन ब्रह्माण्डभेदस्य वक्ष्यमाणत्वात् । आत्मना पूर्ववदात्मत्वेन गृहीतेन देहेन **एक इति** । तत्र वैमानिकानां गमनाभावादसहायत्वेनैकाकित्वम् ब्रह्मविदां स्थानं अन्यैर्नमस्कृतं केवलं ज्ञानिनामेव स्थितियोग्यं महर्लोकम् । यत्र महर्लोके । कल्पायुषः ब्रह्मकल्पपर्यन्तमायुर्येषाम् । विशेषेण बुधा ज्ञानिनो भृग्वादयो रमन्ते भगवद्गुणानुसरणैः ज्ञानेन वा समाधिरूपेण । अयमपि तत्र गतो ब्रह्मकल्पपर्यन्तं तिष्ठति ततो भगवच्छयने जाते अनन्तस्य सङ्कर्षणस्य मुखाग्निना त्रैलोक्यमत्यन्तं दह्यमानं निरीक्ष्य ततो निर्याति भृग्वादिभिः सह । गमनस्य बहुकालव्यवधानत्वात् अथो इत्युक्तम् । सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि यत्र जनस्तपोलोके । पारमेष्ठ्यं सत्यलोकस्थानम् । तदपि पूर्ववत्सिद्धेश्वरसेवितमित्यर्थः ॥ २५-२६ ॥ ❀ ❀ तत्र मुक्तिवत्सुखमाह—**न यत्रेति** । यत्र ब्रह्मलोके शोकः अज्ञानकार्यं नास्ति । न वा जरादेहधर्मः । न वा मृत्युः मृत्युग्रासः । नाऽऽधिः मनःपीडा अपि न । अन्तःकरणधर्माभावः । मृत्योः प्राणग्राहकत्वात्तद्धर्म इति केचित् । उद्वेगः बुद्धेः । असहिष्णुता वा । यद्यप्यसहिष्णुता उद्वेगश्च तत्राप्यस्ति, तथाप्यन्यतो न किन्तु स्वत एव । तदाह—**ऋते कुतश्चिदिति** । अन्यस्मादृते, किन्तु स्वत एव । स्वतस्त्वं विशदयति—**यच्चित्ततोऽद इति** । अदः प्रसिद्धं चित्ततः चित्ताद्धेतोः, यत् तत्स्वानुभवगम्यमतो विशेषतो न वक्तुं शक्यमिति तथोक्तम् । तत्र विषयमाह—**अनिदंविदां दुरन्तदुःखप्रभवानुदर्शनादिति** । इदं स्थानमेतत्साधनं ज्ञानं [४]मार्गप्रकारं वा न विदन्तीति तथा । दुरन्तं यद्दुःखं तस्य प्रभवो यत्र संसारे तस्य अनु पश्चाद्दर्शनम् । एकवारमुत्पन्ना अपि विवेकिनोऽपि पुनस्तत्रैव गच्छन्तीति तथा ॥ २७ ॥ ❀ ❀ ततः स्वेच्छया [५]ब्रह्माण्डभेदनमाह—**ततो विशेषमिति** । अश्वमेधयाजिनोऽपि तत्र गच्छन्ति । तथा हिरण्यगर्भोपासकाः पूर्वोक्ताश्च । तत्र "**आ ब्रह्मभुवनाल्लोका**" इति [६]वाक्यात्कर्मिणां पुनरावृत्तिः हिरण्यगर्भोपासकानां ब्रह्मणा सह या ब्रह्मणो गतिः सा गतिः । पूर्वोक्तस्त्वण्डं भित्त्वा गच्छतीत्याह । ततः सत्यलोकाद्विशेषं पृथिव्यावरणरूपं प्रतिपद्य पृथिवीरूपो भूत्वा तत्र प्रविष्टः पृथिव्यावरणातिक्रमे आवरणरूपपृथिवीसायुज्यं प्राप्य तामतिक्रम्य पुनर्जलरूपेण जलसायुज्यं प्राप्य तदतिक्रम्येत्येवमग्रेऽपि । [७]आकाशातिक्रमपर्यन्तं गच्छति । सर्वत्र तेनाऽऽत्मनेति ज्ञातव्यम् । **अत्वरन्निति** तत्र तत्र गन्धादिभोगान्भुञ्जान एव विलम्ब्य । काले भोगेच्छावसाने उत्तरत्र गमनमिति सर्वत्र । खमाकाशम् । तत् बृहत् अनन्तमेव । शब्दब्रह्मरूपं वा । तादात्मकं वा । तस्य बृहत्त्वे हेतुः । आत्मनो भगवतो लिङ्गं शरीरम् "**आकाशशरीरं ब्रह्मे**"ति श्रुतेः भगवतो व्यापकत्वं अन्तर्बहिर्व्यवहारहेतुत्वं परिच्छेदा परिच्छेदौ शब्दब्रह्माश्रयत्वमित्यादिधर्मबोधकम् ॥ २८ ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

**तद्विश्वनाभि**मित्यत्र । विरजशब्दलिङ्गकं गोलकत्रयं पक्षान्तरेणाहुः **अथवेत्यादि** । विरजशब्दस्यार्थान्तरमाहुः **सत्त्वमिश्रेण वेति** । विगतं कवलं रजो यस्मादित्युत्तरपदलोपी ज्ञेयः । तत्र हेतुः **केवलेत्यादि** । **स्थानमन्यैर्नमस्कृत**मिति अत्र स्थानान्यपदयोरध्याहारः । **कल्पायुष** इति । 'अथो अनन्तस्ये' ति लिङ्गकृतो ज्ञेयः ॥ २५ ॥ ❀ ❀ **अथोऽनन्तेत्यत्र—अथोशब्दार्थ**कथनेन वायवीयदेहापरित्यागः सूचितः ॥ २६ ॥ ❀ ❀ **न यत्रेत्यत्र अन्यस्मादृते इति** । अन्यस्मात्कुतश्चित् पदार्थभूताद्वक्ष्यमाणलक्षणादुद्वेगाद् ऋते विनेत्यर्थः । तं विशदयन्ति **किन्तु स्वत एवेति** ॥ २७ ॥

---

१. ध्रुवेत्युक्तमिति क. ग. । २. नाम संस्थितमिति क. । ३. वैश्वानरलोकेत्युक्तमिति ख. । ४. आत्मप्रकारं वा इति घ. । ५. भेदनप्रकारमिति ख. । ६. विशेषवाक्यादिति ख. । ७. आकाशादतिक्रमपर्यन्तमिति ख. आकाशादिति क्रमपर्यन्तमिति ग. ।

## श्रीगिरिधरकृता बालप्रबोधिनी

तज्ज्योतिश्चक्रं विश्वस्य ब्रह्माण्डात्मकविश्वरूपस्य नाभिस्थानीयं अतिवर्त्य अतिक्रम्य परतः स्वर्गिणां गत्यभावादेक एव विरजेन निर्मलेन अणीयसा अतिसूक्ष्मेण आत्मना लिङ्गदेहेन ब्रह्मविदां ज्ञानीनां प्राप्यस्थानं महर्लोकमुपैति । तत्स्थानं स्तौति—स्वर्गादिस्थैर्जनैर्नमस्कृतं, बहुमतमित्यर्थः । तत्र हेतुमाह—यत् यस्मिन् कल्पपर्यन्तमायुर्येषां ते विशेषेण बुधा ज्ञानिनो भृग्वादयो रमन्ते, स्वसुखेन वर्त्तन्ते इत्यर्थः ॥ २५ ॥ ❀ ❀ अथो अनन्तरं कल्पान्ते अनन्तस्य शेषस्य मुखानलेन विश्वं त्रैलोक्यमतिशयेन दह्यमानं स निरीक्ष्य तत्राप्यूष्मप्राप्तेः यत् द्वैपरार्ध्यं द्विपरार्धस्थायि सिद्धेश्वरैर्जुष्टानि सेवितानि धिष्ण्यानि विमानानि यस्मिन् तत् पारमेष्ठ्यं ब्रह्मपदं प्रति निर्याति । उ इति तस्य श्रेष्ठ्यं सूचयति ॥ २६ ॥ ❀ ❀ तस्य श्रेष्ठत्वमेव विशदयति—नेति । यत् यश्चित्ततोदो मनःपीडा तद्दते तां विना यत्र सत्यलोके कुतश्चिदपि हेतोः शोकादयो न सन्तीत्यन्वयः । शोकः कथं निर्वाहः स्यादित्याकारो मनोविकारः । आर्तिर्दुःखम् । उद्वेगो भयम् । तर्हि मनःपीडाऽपि कुतो भवतीत्यपेक्षायामाह—अनिदंविदामिति । इदं भगवतो ध्यानमजानतां प्राणिनां दुरन्तं दुःखं यस्मिंस्तथाभूतो यः प्रभवो जन्म तस्य ( अनु ) अनुदर्शनात् तेषां कृपयेत्यन्वयः ॥ २७ ॥ ❀ ❀ तत्र ब्रह्मलोकगतानां त्रिविधा गतिः—ये पुण्योत्कर्षेण गतास्ते कल्पान्तरे पुण्यतारतम्येनाधिकारिका भवन्ति, ये तु हिरण्यगर्भाद्युपासनाबलेन तत्र गतास्ते ब्रह्मणा सह मुच्यन्ते, ये तु भगवदुपासकास्ते स्वेच्छया ब्रह्माण्डं भित्त्वा वैष्णवं पदमारोहन्ति । तत्र ब्रह्माण्डोत्पत्तावियं प्रक्रिया—ईश्वराधिष्ठितायाः प्रकृतेः केनचिदंशेन महत्तत्त्वं भवति, तस्यांशेनाहङ्कारः, तस्यांशेन शब्दतन्मात्रद्वारा नभः, तस्यांशेन स्पर्शतन्मात्रद्वारा वायुः, तस्यांशेन रूपतन्मात्रद्वारा तेजः, तस्यांशेन रसतन्मात्रद्वारा आपः, तदंशेन गन्धतन्मात्रद्वारा पृथ्वी, तैश्च मिलितैश्चतुर्दशभुवनात्मकं विराट्शरीरं ब्रह्माण्डं भवति । तस्य च पञ्चाशत्कोटियोजनविशालस्य पृथिव्येव अण्डकटाहविशेषशब्दवाच्या, कोटियोजनविशालं प्रथमावरणम्, पञ्चाशत्कोटियोजनविशालमित्येकोनतश्चाबादीनां ये परिणता अंशास्तान्येवोत्तरोत्तरदशगुणान्यावरणानि, अष्टमस्तु प्रकृत्यावरणं व्यापकमेव । तदेवं स्थिते प्रस्तुतस्य भगवद्भक्तस्य पृथिव्याद्यावरणभेदप्रकारमाह—तत इति । सत्यलोकभोगानन्तरं निर्भयः कथं यास्यामीति शङ्काशून्यः सन् योगी विशेषं प्रतिपद्य लिङ्गदेहेन प्रथमावरणरूपां पृथिवीं प्राप्य तेनात्मना पृथिवीरूपेण तन्निरन्तरा अपः प्रतिपद्य ज्योतिर्मयः सन् काले भोगावसाने वायुमुपेत्य वाय्वात्मना खमाकाशमुपैति । आकाशं विशिनष्टि—बृहदात्मलिङ्गमिति । "आकाशशरीरं ब्रह्म" इति श्रुतौ बृहत आत्मनः परब्रह्मणो मूर्तित्वेनोपास्यमित्यर्थः । अत्वरन्निति तत्तदात्मत्वेन क्लेशदाहादिशङ्काभावाद्यथेष्टं भोगान् भुञ्जान इति सूचितम् ॥ २८ ॥

## हिन्दी अनुवाद

भगवान् विष्णु का यह शिशुमार चक्र विश्वब्रह्माण्डके भ्रमणका केन्द्र है । उसका अतिक्रमण करके अत्यन्त सूक्ष्म एवं निर्मल शरीरसे वह अकेला ही महर्लोकमें जाता है । वह लोक ब्रह्मवेत्ताओंके द्वारा भी वन्दित है और उसमें कल्पपर्यन्त जीवित रहनेवाले देवता विहार करते रहते हैं ॥ २५ ॥ ❀ ❀ फिर जब प्रलयका समय आता है, तब नीचेके लोकोंको शेषके मुखसे निकली हुई आगके द्वारा भस्म होते देख वह ब्रह्मलोकमें चला जाता है, जिस ब्रह्मलोकमें बड़े-बड़े सिद्धेश्वर विमानोंपर निवास करते हैं । उस ब्रह्मलोककी आयु ब्रह्माकी आयुके समान ही दो परार्द्धकी है ॥ २६ ॥ ❀ ❀ वहाँ न शोक है न दुःख, न बुढ़ापा है न मृत्यु । फिर वहाँ किसी प्रकारका उद्वेग या भय तो हो ही कैसे सकता है । वहाँ यदि दुःख है तो केवल एक बातका; वह यही कि इस परमपदको न जाननेवाले लोगोंके जन्ममृत्युमय अत्यन्त घोर सङ्कटोंको देखकर दयावश वहाँके लोगोंके मनमें बड़ी व्यथा होती है ॥ २७ ॥ ❀ ❀ सत्यलोकमें पहुँचनेके पश्चात् वह योगी निर्भय होकर अपने सूक्ष्म शरीरको पृथ्वीसे मिला देता है और फिर उतावली न करते हुए सात आवरणोंका भेदन करता है । पृथ्वीरूपसे जल को और जलरूपसे अग्निमय आवरणोंको प्राप्त होकर वह ज्योतिरूपसे वायुरूप आवरणमें आ जाता है, और वहाँसे समयपर ब्रह्मकी अनन्तताका बोध करानेवाले आकाशरूप आवरणको प्राप्त करता है ॥ २८ ॥

**घ्राणेन गन्धं रसनेन वै रसं रूपं तु दृष्ट्या श्वसनं त्वचैव ।**
**श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी ॥ २९ ॥**
**स[1] भूतसूक्ष्मेन्द्रियसंनिकर्षं मनोमयं देवमयं विकार्यम् ।**
**संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसंनिरोधम् ॥ ३० ॥**

---

१. प्राचीने पाठे 'स भूतसूक्ष्मे० इत्यारभ्य ............ ऽवसाने' इति सार्धश्लोकस्य स्थाने केनचित् परिवर्तनेन पादद्वयसंवर्धनेन च श्लोकद्वयमुपलभ्यते यथा—

तेनात्मनाऽऽत्मानमुपैति शान्तमानन्दमानन्दमयोऽवसाने ।
एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग ॥ ३१ ॥
एते सृती ते नृप वेदगीते त्वयाभिपृष्टे ह^2 सनातने च ।
ये^3 वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान् वासुदेवः ॥ ३२ ॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

इंद्रियार्थानां भूतसूक्ष्माणामतिक्रममाह। घ्राणेनाधिष्ठितेन गंधमुपेत्य श्वसनं स्पर्शं नभोगुणत्वं शब्दात्मतां घ्राणेन तत्तत्कर्मेंद्रियेण आकूतिं तत्तत्क्रियाम् ॥ २९ ॥ ❀ ❀ तदेवं स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहंकारप्राप्त्या महदादिप्राप्तिमाह। स योगी विकार्यं संसाद्य विज्ञानतत्त्वं याति विविधं कार्यमस्येति विकार्योऽहंकारः। स त्रिविधः तामसो राजसः सात्त्विक इति। तत्र तामसाज्जडानि भूतसूक्ष्माणि जायंते, राजसाद्बहिर्मुखानि दशेंद्रियाणि, सात्त्विकान्मनइंद्रियदेवताश्च, तेषां लयश्च तत्तदहंकारे तत्र भूतसूक्ष्माणामिंद्रियाणां च सन्निकर्षं लयस्थानम्। तामसं राजसं च मनोमयं देवमयं च सात्त्विकं प्राप्य गत्या एवं गमनेन तेनाहंकारेण सह विज्ञानतत्त्वं महत्तत्त्वं याति। ततः गुणानां सन्निरोधो लयो यस्मिंस्तत्प्रधानं याति ॥ ३० ॥ ❀ ❀ तेनात्मना प्रधानरूपेणानंदमयः सन्नुपाधीनामवसाने शांतमविकृतमानंदं परमात्मानमुपैति। न विषज्जते नावर्तत इत्यर्थः ॥ ३१ ॥ ❀ ❀ सृती मार्गौ प्रकारावित्यर्थः। हे नृप 'अनपेक्षो निर्भिद्य मूर्धन्विसृजेत्परं गतः' इति या सद्योमुक्तिः सैका सृतिः। 'यदि प्रयास्यन्' इत्यादिना क्रममुक्तिश्च द्वितीया सृतिः। एते सृती वेदेन गीते उक्ते न तु स्वोत्प्रेक्षिते तत्र "यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः ॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥" इति सद्योमुक्तिः। "तेऽर्चिरभिसंभवंति" इत्यादिना क्रममुक्तिश्च वेदेनोक्ता। यद्वा "न कर्मभिस्तां गतिमाप्नुवंति" इति दक्षिणमार्गस्यापि सूचितत्वादेते सृती इति द्विवचनम्। त्वयाऽभिपृष्टे 'यच्छ्रोतव्यम्' इत्यादिप्रश्नेनार्थान्मुक्तिविषये द्वे अपि सृती पृष्टे। 'ब्रूहि यद्वा विपर्ययम्' इति दक्षिणमार्गोऽप्यर्थात्पृष्टः एवं त्वया च ये पृष्टे एते सृती इत्यन्वयः ॥ ३२ ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

पृथिव्याद्यावरणेषु गंधादयः संति तेषामतिक्रमं पूर्वमनुक्तं संप्रत्याह—घ्राणेनेति ॥ २९ ॥ ❀ ❀ तदेवमित्थं तदावरणभूतः स्थूलसूक्ष्मभूतानामावरणभूतो योहंकारस्तस्य प्राप्त्या तत्तदहंकारे यतोयतो यस्योद्भवस्तत्र तत्राहंकारे ॥ ३० ॥ ❀ ❀ ततस्तेन प्रधानेन सहात्मना स्वस्वरूपेणात्मानं परं ब्रह्म आदिपुरुषमानंदरूपमुपैति। प्रकृत्यावरणात्परत्र कारणार्णवशायिमहापुरुषस्य स्थितेः। ततोऽवसाने आनंदमय इति तस्मिन्नेव सायुज्यं प्राप्येत्यर्थः। इत्यर्थ इति। "मां प्राप्य न निवर्त्तंते मृत्युसंसारवर्त्मनि" इति भगवदुक्तेरयं भावः। अत्र संदर्भः। तेनात्मना शुद्धेन स्वरूपेण प्रधानभावेशितेन पुनस्तत उत्क्रमितेन आत्मानं परमात्मानं परमवैकुंठनाथमित्यर्थः। भागवतीं गतिमित्युक्तेः ततो विशेषमित्यत्र टीकावतारिकायां ये तु भगवदुपासकास्ते स्वेच्छया ब्रह्मांडं भित्त्वा वैष्णवं पदमारोहंतीति। तस्मात्तन्मतेपि प्रकृत्यावरणाद्बहिर्महावैकुंठलोकः प्रकृत्यावरणस्य च व्यापकत्वं चापेक्षिकमिति ॥ ३१ ॥ ❀ ❀ इत्यर्थ इति। लक्षणया सृतिपदं प्रकारपरमिति भावः। प्रकारो भेदः। 'प्रकारस्तुल्यभेदयोः' इति मेदिनी 'सृतिः स्त्री गमने मार्गे' इति च। हे नृपेति। नृपालनासक्तेन त्वयैतत्कालपर्यंतं न ज्ञातमिति भावः। तत्र द्वयोर्मध्ये अस्य पुंसो हृदि मनसि श्रिताः स्थिता ये ते यदा न त्वविचारेण प्रमुच्यंते नश्यंति। कर्मकर्त्तरि प्रयोगः। अथ तदनंतरमेव मर्त्त्यो मरणधर्माप्यमृतस्तद्धर्मरहितो भवति। अत्रैव देहे ब्रह्मावाप्नोति तद्रूपो भवतीति श्रुत्यर्थः सृतिपदस्य प्रसिद्धार्थत्यागे कारणाभावमालक्ष्याह—यद्वेति। 'कर्मिणामेव ते धूममभिसंभवंति' इत्यादिश्रुत्या दक्षिणमार्गस्याभिहितत्वादर्चिरादिगतिस्तेषां नास्तीत्याह—न कर्मभिस्तां गतिमिति ॥ ३२ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

यदा सर्व्वे इति कठोपनिषदि द्वितीयाध्याये षष्ठवल्ल्यां चतुर्दशमन्त्रः ॥ तेऽर्च्चिभिरभि—सम्भवन्तीति। बृहदारण्यके अष्टमाध्याये—उपनिषत्सु षष्ठाध्याये द्वितीयब्राह्मणे पञ्चदशकण्डिका दक्षिणमार्गस्येति अत्र दक्षिणोत्तरमार्गादीनां विशेषजिज्ञासायामस्माभिः सम्पादिते श्रीमद्गोविन्दभाष्यसमेतवेदान्तदर्शने चतुर्थाध्यायीयद्वितीयतृतीयपादौ द्रष्टव्यौ ॥ यच्छ्रोतव्यमिति

---

१. 'स भूतसूक्ष्मेन्द्रियसन्निकर्षात् सनातनोऽसौ भगवाननादिः। अनाभयं देवमयं विकार्यं संसाद्य गत्या सह तेन याति ॥ १ ॥ विज्ञानतत्त्वं गुणसन्निरोधं तेनात्मनात्मानमुपैति शान्तम्। आनन्दमानन्दमयोऽवसाने सर्वात्मके ब्रह्मणि वासुदेवे ॥ २ ॥
२. प्रा० पा०—च। ३. प्रा० पा०—यद्वै।

प्रथमस्कन्धीयैकोनविंशाध्यायस्याष्टत्रिंशत्तमश्लोकः ॥ ब्रूहि—यद्वेति । प्रथमस्कन्धीयैकोनविंशतितमाध्यायस्याष्टत्रिंशत्तमश्लोकस्यैकदेशः ॥ ३२, ३३ ॥

### श्रीमद्वीरराघवव्याख्या

गच्छतो मुक्तस्य सूक्ष्मदेहस्थैरिंद्रियैस्तत्तद्भूतगुणग्रहणमाह । घ्राणेनेति । ब्रह्मलोकपर्यंतेष्वेव शब्दादिष्वनादरोऽभिप्रेतः आवरणभूतगुणानां त्वनितरभोग्यत्वात्तद्गतगंधादीन् गृह्णातीत्यभिप्रायः । घ्राणेन स्वकीयघ्राणेंद्रियेण गंधमावरणपृथिवीभूतगंधम् एवं च रसनेंद्रियेण रसं दृष्टया चक्षुरिंद्रियेण रूपं तेजोगुणम् । त्वचा त्वगिंद्रियेण एवकारः सांकर्याभावद्योतकः । श्वसनं वायुगुणं स्पर्शं श्रोत्रेण श्रोत्रेंद्रियेण नभोगुणत्वं स्वार्थे त्वप्रत्ययः प्राणेनांतःकरणेनाकूतिमभिप्रायं समानीय आकूतिरिरिति श्रुतम् । अत्र प्राणशब्देनेंद्रियवृत्तिहेतुभूतमुख्यप्राणो न विवक्षितः तेनाकूतिग्रहणासंभवादतोंऽतःकरणं विवक्षितम् । अंतःकरणप्रसूतोऽह्यभिप्रायः एवं घ्राणादिभिर्गंधादीनुपेत्य तत्तद्भूतभेदनदशायां तत्तद्गुणान् गृह्णन्नुपैतीत्यर्थः ॥ २९ ॥ ❀ ❀ अथाहंकारमहत्प्रकृतीनामतिक्रममाह । स इति । स योगी गत्यागमनेन विकार्यं स्वकार्यरूपेण परिणामिनमहंकारं संसाद्येत्यन्वयः । विकार्यमेव विशिनष्टि । देवमयं दिग्वातादिदेवाधिष्ठितेयेंद्रियकारणं मनोमयं मनःकारणं भूतसूक्ष्मेंद्रियसन्निकर्षं भूतान्याकाशादीनि तत् सूक्ष्माणि शब्दादीनींद्रियाणि ज्ञानकर्माभयेंद्रियाणि एतेषां सन्निकर्षं कारणं भूतसूक्ष्मसन्निकर्षत्वेंद्रियसंनिकर्षत्वाभ्यां द्विविधाहंकारभेदौ तामससात्विकाहंकारावुक्तौ । मनोमयं देवमयमिति च सात्त्विकाहंकारकार्यप्रदर्शनम् । देवमयमित्येतावतैव सिद्धे तत्कार्यप्रदर्शनायेंद्रियसन्निकर्षत्वमनोमयत्वोक्तिः इंद्रियसृष्टावनुग्राहकराजसाहंकारग्रहणाय अतएव राजसाहंकारस्य न पृथक्कार्यप्रदर्शनं तस्यानुग्राहकमात्रत्वेन पृथक्कार्याक्षमत्वाद् एतच्चाग्रेस्फुटीभविष्यति तेनातिक्रांताहंकारेण सहोपलक्षितः विज्ञानतत्त्वं महांतं याति विज्ञानसारथिर्यस्तु बुद्धिं तु सारथिं महान्वै बुद्धिलक्षण इति वचनानामैकार्थ्याद् गुणसाम्यावस्थप्रकृत्यतिक्रमणमाह गुणसंन्निरोधमिति । गुणानां सत्त्वरजस्तमसां सन्निरोधः साम्यं यस्मिन् तत्प्रधानं यातीत्यर्थः ॥ ३० ॥ ❀ ❀ अवसाने प्रकृतेरवधौ "गौरनाद्यंतवती सा जनित्री नित्या सततविक्रिया" इति प्रकृतेर्नित्यत्वाद्देशावधिरवसानशब्दोक्तः स्वकीयभूतसूक्ष्मेंद्रियाणां स्वकारणेषु लयोऽप्यवसानशब्दविवक्षितः तेनात्मना विरजसा स्वरूपेणोपलक्षितः शांतमूर्मिषट्करहितमानंदं निरतिशयानंदस्वरूपम् आत्मानं आनंदमयपरमात्मसाम्यापत्त्या आनन्दमयः स्वयं निरतिशयानंदप्रचुरः उपैति आत्मनंदशब्दाभ्यां "आत्मन आकाशः संभूतः आनंदो ब्रह्मेति व्यजाना"दित्युपक्रमोपसंहारगतवाक्यद्वयं स्मारितम् एवं "क्षयंतमस्य रजसः पराके आदित्यवर्णं तमसः परस्तात्तदक्षरे परमे व्योमन्" इत्युक्तप्रकृतिपुरुषातीतपरमाकाशस्था भगवत्प्राप्तिरर्चिरादिनागतस्योक्ता एवं स एतान् ब्रह्म गमयतीत्यस्यार्थ उक्तः । अथ धूमाद्यर्चिरादिमार्गयोः प्रामाणिकत्वं कथयन्नेतेन प्रतिपाद्यमाना इत्यंशस्यार्थमाह एतामिति भागवतीं भगवदुद्देश्यां गतिमर्चिरादिमार्गं योगतः स पुनरिह तत्प्रकृतिमंडलेंऽगकर्माधीनदेहं प्रति न विशज्जते नासक्तो भवति ॥ ३१ ॥ ❀ ❀ अथ मार्गद्वयमुक्तं निगमयति एते इति इमौ मार्गौ अर्चिरादिभूमादिमार्गौ वेदगीते । "येचेमेरण्ये श्रद्धां तप इत्युपासते तेर्चिषमभिसंभवंति अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंति" इत्यादिवेदबोधिते त एव सनातने स्थिते त एव सृती हे नृप ! त्वयाभिपृष्टे च यच्छ्रोतव्यमित्यनेनार्चिरादिमार्गस्य धूमादिमार्गस्यापि पृष्टत्वात् चकारान्मया कथिते इत्यर्थः । सनातनत्वं विशदयति । ये इति ये वै ये सृती पुरा कल्पादौ ब्रह्मणे चतुर्मुखायाराधितः सम्यगुपासनया प्रीतः वासुदेवः सर्वभूतांतरात्मा भगवानाह उवाच तस्मात्सनातने इत्यर्थः ॥३२॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

सत्यलोकस्येतरलोकेभ्यो वैशिष्ट्यमाह न यत्रेति । यत्र ऋते सत्यलोके शोकादयो न संति आधिस्तु व्यसने चित्तदुःखेऽधिष्ठानबंधयोरिति व्यसनमाधिरत्रोच्यते । यत्रानिदंविदामब्रह्मविदां क्रियया दुःखस्य प्रभवस्य जननादिलक्षणस्य चानुदर्शनात् जनस्य यश्चित्ततोदः सोऽपि नास्ति तं सत्यलोकमाप्नोतीति पूर्वेणान्वयः । जनादिलोकापेक्षया सत्यलोकस्य वैशिष्ट्यं न तु मुक्तिविशेषात् तदुक्तं "सर्वदुःखविहीना ये मुक्ताः प्रायस्तु तादृशाः अमुक्तास्तु जनाद्येषु विशेषेण तु सत्यगा" इति । ननु यदि ब्रह्मणा सहैव मुक्तिः सर्वेषां तर्हि ततः पूर्वमायासेन साधनसामग्रीसम्पादनं व्यर्थमिति चेन्न योग्यताबाहुविध्यान्मुक्तिप्राप्तेरपि बाहुविध्यात् तदुक्तं "विष्णोर्लोकं तदैवैके यांति कालांतरे परे आज्ञायैव हरेः केचिदपूर्तेः केचिदंजसा विहृत्यैवान्यलोकेषु मुच्यंते ब्रह्मणा सह" इति ॥ २९ ॥ ❀ ❀ एवं देवयानेन गत्वा सत्यलोके परब्रह्मलोके च स्थितानां ज्ञानिनां मोक्षं वक्तुं देवमुक्तिप्रकारमाह तत इति । प्रतीकालं वनाप्रतीकालं वनसंज्ञः संज्ञा निसंघो ब्रह्मप्रलये स्वबिंबं प्रविष्टो गरुडशेषलक्षणमार्गद्वयेन वाणीं प्रविश्य तया भौतिकशरीरं ब्रह्माणं प्रविश्य ततस्तेन ब्रह्मणा सह विशेषं पृथिवीं प्रतिपद्य तेन पृथिव्यात्मना सहापः प्रतिपद्यते नात्मनाऽनलमूर्ध्नि प्रतिपद्यते न ज्योतिर्मयोऽग्निप्रधानो भूत्वा वायुमुपेत्य मुक्तिकाले तेन वाय्वात्मना हरेर्लिङ्गमाकाशवद्व्याप्तं नित्यं चेति बृहन्महत् खरं प्रविशतीत्यन्वयः निर्भयः संसारभयान्मुक्तः अतएव त्वरमाणः । अत्रेदं तात्पर्यं च शब्दादवगंतव्यं तथाहि विशेषाख्यांडे व्यवस्थिते विशेषनाम्नि विरिंचे स्थितं वैराजाख्यं हरिं पुनस्तद्दशगुणांडकटाहात्मकविशेषाख्यपृथिव्यां स्थिते विरिंचे

स्थितमन्ननामानं हरिं तेनान्ननाम्ना हरिणाऽप्सुस्थिते चतुर्मुखे स्थितमन्नाख्यं हरिं तेनान्नेन विष्णुना तेजोगतविरिंचस्थे प्राणनामानं हरिं तेनाग्निगतेन हरिणा वायुस्थितचतुराननस्थितं प्राणाख्यं प्राप्यते न वायुस्थविरिंचांतर्यामिणाऽऽकाशस्थितविरिंचस्थं प्राणाख्यं हरिं प्रविशतीति पृथिव्यादिकार्याणां स्वस्वकारणेष्ववादिप्रधानानां तेषु लयः । तदभिमानिदेवताशरीराणां च । तत्र विरिंचकेशव-योस्तत्तत्पदार्थस्थितस्वस्वरूपैरेकीभावो दीपानां दीपांतरैरिव । अन्येषां द्वारमात्रमिति ज्ञानिनः प्रलये सर्वे ब्रह्मणा सह पार्थिवं भूम्यपामन्ननामानं प्राणमग्न्यादि संस्थितमित्यादिवाक्यद्वयं न च शब्दगृहीतेन निष्प्रमाणमिति शंका निरस्तेति ज्ञातव्यम् ॥ ३० ॥ ❀ ❀ इदानीं पंचतन्मात्राप्रलयप्रकारमाह घ्राणेनेति । घ्राणेंद्रियाद्यधिष्ठितविरिंचस्थेन हरिणा गंधतन्मात्राद्यधिष्ठातृ-विरिंचस्थितं हरिमुपेत्य योगी पुनरावृत्तिं नोपैतीत्यन्वयः । तत्र वाय्वादीनां पुनरावृत्तिसद्भावात्प्रायेणेत्युक्तं यद्वा एवमुक्तवक्ष्यमाण-प्रकारेण मुक्तानां तेषां ज्ञानिनां भोगप्रकारमाह घ्राणेनेति । एवमुक्तः केवलचिदानंदैकदेहो योगी सः ज्ञानिसंघस्ताद्दशैरिंद्रियैर्घ्राणादि-भिरत्युत्तमान् गंधादीन् पंचविषयानुपेत्य श्वेतद्वीपादिस्थानेष्वाश्रितः प्रलयेऽपि न पुनरावृत्तिमुपैतीत्यन्वयः । वा इत्यनेन पंचेद्रियै-र्ये विषया द्रष्टव्याः सर्वतो वरा इत्यादिमानसिद्धिं द्योतयति इयमेव मुक्तिर्नाद्वैतवादिकथितेत्येवशब्दः तु नामग्नस्य हि परे ज्ञाने किं न दुःखतरं भवेदिति मानं सूचयति ॥ ३१ ॥ ❀ ❀ उक्तमुक्तिशेषमाह स इति भूतसूक्ष्मेंद्रियसन्निकर्षात्❀ भूतसूक्ष्मैः पंचभूतैः शब्दादितन्मात्रादिभिः । तथाभूतसूक्ष्मैर्जीवराशिभिश्चेंद्रियैश्च तदभिमानिभिश्च सहितो नादिः सनातनः सोऽसौ भगवान् विकार्यं विविधकार्ययुक्तं देवमयं देवप्रधानं मनोमयं मनस्तत्त्वस्थेंद्रियस्थितविरिंचगतमानसनामानं स्वात्मानं यातीत्यन्वयः नातेन नादेन सहितत्वात्सनातनः "नादेन तेन महता सनातन इति स्मृत" इति "मनस्थितो हरिर्नित्यं सर्वदेवेषु संस्थितः देवप्रधानकान्लो-कान्करोत्यनुगतः सदि" ति च योऽसावनादिर्मनोमयो विष्णुस्तं यातीति चोभयथापि तस्यैव गम्यत्वं गंतृत्वं च ज्ञातव्यम् । मनस्थं मानसस्थं मानसनामानं स्वात्मानं संसाद्य स हरिरुमास्थितविरिंचस्थितस्वात्मद्वारा मतिशब्दवाच्यमहंकारगतवाणीस्थविरिंचस्थं स्वात्मानं मत्या मयिस्थेन तेन मनस्थेन च सह विज्ञाननामानं विज्ञानतत्त्वाख्यवाणीगतविरिंचस्थं स्वात्मानं याति ॥ ३२ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या ।

घ्राणेन गन्धमिति । अनेनाकाशावरणाद्बहिरेव सूक्ष्मरूपाण्यावरणानि लभ्यन्ते । युक्तञ्चेदम् । कारणकारणानां बहिर्बहि-रवस्थानप्राप्तेः, व्यवहितानामपि कारणानामंशमंशमुपादयेश्वरेण तत्तत्कार्यसृष्टेः, यथा गन्धतन्मात्रस्य जलस्य चांशमुपादाय तेन पृथिवी सृष्टेत्यादि । किन्तु गन्धतन्मात्रादीनां सूक्ष्मत्वेनानुपलभ्यमानत्वादाकाशतुल्यत्वमिति आकाशान्तर्गणनादष्टावेवा-वरणान्यवसीयन्ते । वाक्यमिदं त्वेवं विवेचनीयम् । तत्र घ्राणेनेति घ्राणद्वारा गन्धमाविश्येत्यर्थः । एवमुत्तरत्रापि ॥ २९ ॥ ❀ ❀ तेनाहङ्कारेण सहेति तल्लग्नं विज्ञानतत्त्वमित्यर्थः॥ ३० ॥ ❀ ❀ तेनात्मनेति । आत्मना शुद्धेन स्वरूपेण । तेन प्रधानमावेशितेन पुनस्तत उत्क्रमितेन । आत्मानं परमात्मानं परमवैकुण्ठनाथमित्यर्थः भागवतीं गतिमित्युक्तेः । ततो विशेष-मित्यत्र टीकावतारिकायाञ्च ये तु भगवदुपासकास्ते स्वेच्छया ब्रह्माण्डं भित्त्वा वैष्णवं पदमारोहन्ति इति । तस्मात्तन्मतेऽपि प्रकृत्यावरणाद्बहिर्महावैकुण्ठलोकः । प्रकृत्यावरणस्य व्यापकत्वं चापेक्षिकमिति ॥ ३१,३२ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या ।

इन्द्रियार्थानां भूतसूक्ष्माणामतिक्रममाह । घ्राणेन घ्राणेन्द्रियेण ग्राह्यं गन्धम् उपेत्य । एवं रसनेनेत्यादि । श्वसनं स्पर्शम् । नभोगुणत्वं नभोगुणं शब्दं प्राणेन कर्म्मेन्द्रियेण आकूतिं तत्तत्क्रियाम् । तत्र पृथिव्याद्यावरणेष्वेव गन्धादयः सन्ति तेषामतिक्रमं पूर्व्वमनुक्तं सम्प्रत्याहेति ज्ञेयम् ॥ २९ ॥ ❀ ❀ तदेवं स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहङ्कारप्राप्त्या महदादि-प्राप्तिमाह । स योगी विविधं कार्य्यमस्येति विकार्य्योऽहङ्कारस्तं संसाद्य प्राप्य । कीदृशं भूतसूक्ष्माणाम् । इन्द्रियाणाञ्च सन्निकर्षो लयो यत्र तम् । तामसाहङ्कारे भूतसूक्ष्माणि राजसाहङ्कारे इन्द्रियाणि प्रविलाप्येत्यर्थः । पुनः कीदृशं मनोमयं देवमयम् । सात्त्विकाहङ्कारे मनः देवताश्च प्रविलाप्येत्यर्थः । ततश्चावशिष्टेन तेन अहङ्कारेण सहगत्या विज्ञानतत्त्वं महत्तत्त्वं याति । अहङ्कारं महत्तत्त्वे प्रविलापयतीत्यर्थः । ततस्तेन महत्तत्त्वेन गुणाः सन्निरुध्यन्ते येन तत् प्रधानं याति । महतत्त्वं प्रधानं विलापयती-त्यर्थः ॥ ३० ॥ ❀ ❀ ततस्तेन प्रधानेन सह आत्मना स्वरूपेण आत्मानं परं ब्रह्म आदिपुरुषमानन्दरूपम् उपैति, प्रकृत्या वरणात् परत्र कारणार्णवशायिमहापुरुषस्य स्थितेः । ततोऽवसाने आनन्दमय इति तस्मिन्नेव सायुज्यं प्राप्येत्यर्थः । न विषज्जते इह संसारे नावर्त्तते ॥ ३१ ॥ ❀ ❀ सृती ब्रह्ममार्गौ । निर्भिद्य मूर्द्धन् विसृजेत् परं गतः इति यावत् सद्योमुक्तिरेका सृतिः यदि प्रयास्यन् इत्यादिना क्रममुक्तिश्च द्वितीया सृतिः । एते सृती वेदेन गीते न तु स्वोत्प्रेक्षिते । यदा सर्व्वे प्रमुच्यन्ते कामा

---

१ पृथिव्यं तर्यामिणा हरिणा । २ भूताकाशं । ३ भूतवायुः ।

येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति सद्योमुक्तिः । तेऽर्चिभिरभिसम्भवन्ति इत्यादिना क्रममुक्तिश्च वेदेनैवोक्ता त्वयाभिपृष्टे इति म्रियमाणस्य किं कर्त्तव्यमिति प्रश्नेनैवैतत्प्रश्नसिद्धेः ॥ ३२ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पृथिव्याद्यतिक्रमणकाले गन्धाद्यतिक्रमणमाह । घ्राणेनेति । दृष्टया चक्षुरिन्द्रियेण श्वसनं श्वसनगुणं स्पर्शम् । नभोगुणत्वमाकाशगुणं शब्दम् । त्वप्रत्ययः स्वार्थकः । प्राणेन कर्मेन्द्रियगणेन आकूतिं तत्तत्क्रियामुपैति ॥ २९ ॥ ❀ ❀ स योगी विकार्यं विविधं कार्यं यस्य तमहंकारं गत्याऽऽसाद्य कथंभूतं भूतसूक्ष्मेन्द्रियसंन्निकर्षं भूतसूक्ष्माणामिन्द्रियाणाञ्च सन्निकर्षं कारणम् । अनेन तामसो राजसश्चेति द्विविधोऽहंकार उक्तः । मनोमयमंतःकरणकारणं देवमयमिन्द्रियाधिष्ठातृदेवताकारणम् । अनेन सात्विकाहंकार उक्तः । एतत्सर्वमग्रे स्फुटीभविष्यति । तेन सोपानभूतेन त्रिविधेनाहंकारेण स योगीह स्फुटं विज्ञानतत्त्वं याति तदनंतरञ्च गुणसन्निरोधं गुणसमुदायं प्रधानं ब्रह्मात्मकं याति ॥ ३० ॥ ❀ ❀ अवसाने कार्यकारणरूपप्रकृतिमण्डलान्ते लिंगशरीरस्यापि प्रवेशानार्हे देशे । शान्तं परमशान्तिप्रदम् आत्मानम् "आत्मन आकाशः सम्भूतः आत्मा वा अरे द्रष्टव्य" इत्यादिश्रुतिप्रतिपादितम् । आनन्दम् "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवंति" इत्यादिश्रुतिप्रतिपादितम् । तेन रूपेण कार्यकारणरूपप्रकृतिवियुक्तेन रूपेणोपलक्षितः आनन्दमयः आनन्दप्रचुरः "ममसाधर्म्यमागता" इति श्रीमुखवचनात् "निरंजनः परमं साम्यमुपैति" इत्यादिश्रुतेः । लब्धपरमानन्दसाधर्म्यः । आविर्भूतापहतपाप्मत्वादिगुणः उपैति । विस्तरस्तु वेदान्तकौस्तुभे द्रष्टव्यः । हे अंग । एतामपुनरावृत्तिलक्षणां भागवतीं प्राप्य भूतस्य भगवतः सम्बन्धिनीं गतिं यो गतः स इह संसारे न विसज्जते नैव सक्तो भवति ॥ ३१ ॥ ❀ ❀

हे नृप ! त्वया यच्छ्रोतव्यमित्यनेनोपादेयतया अर्थादर्चिरादिमार्गरूपा पृष्टा ब्रूहि यद्वा विपर्ययमित्यनेनार्थादनुपादेयतया धूममार्गरूपा च पृष्टा । एवं ये सृती त्वया पृष्टे यदि प्रयास्यन् नृपेत्यादिना ते मया चोक्ते इति चकाराल्लभ्यते । कथंभूते "ये चेमेऽरण्ये श्रद्धातप इत्युपासते तेऽर्चिषमभिसंभवंति । अथ ये इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति" इति वेदेन गीते अतएव सनातने ॥ ३२ ॥

### श्रीमद्वल्लभाचार्यकृता सुबोधिनीव्याख्या

एवमाकाशान्तपरित्यागे महाभूतांशाः परित्यक्ताः । विषयातिक्रमे इन्द्रियातिक्रममाह—**घ्राणेनेति** । प्राणेनेति पाठेऽपि स एवार्थः । सर्वत्र तत्तदुपेत्य तद्भोगानन्तरं तत्तदतिक्रम्येति ज्ञातव्यम् । नभोगुणत्वं शब्दत्वम् । प्राणेन कर्मेन्द्रियसहितेन । तद्रूपेण वा । आकूतिं क्रियापञ्चकमपि । उपैति त्यजतीति पूर्ववत् । योगीति योगसामर्थ्याविस्मरणम् ॥ २९ ॥ ❀ ❀ अहङ्काराद्यतिक्रममाह—**स एव योगी** । भूतानां सूक्ष्माणामिन्द्रियाणां च सन्निकर्षमुत्पत्तिस्थानं तामसं राजसं चाऽहङ्कारं मनोमयं देवमयमिति सात्त्विकं विकार्यं मूलाहङ्कारम् । तेन रूपेण गत्या सह याति । क्रियामङ्कारं च त्यजतीत्यर्थः । विज्ञानतत्त्वं महत्तत्त्वम् । गुणसन्निरोधं प्र[1]कृतिम् । सर्वत्र तेनाऽऽत्मनेति । अग्रे पुरुषावरणम् । तत्रापि तेनाऽऽत्मना आत्मानमुपैति । ततः शान्तं अक्षरम् । तत आनन्दं पुरुषोत्तमम् । स्वयमप्यानन्दमयो भूत्वोपैति । **अवसाने** । अतः परं गमनं नास्ति । "**मामुपेत्य तु कौन्तेय**" इति वाक्यमेतादृशपरमित्याह—**एतां गतिमिति** । ब्रह्माण्डमध्ये हृदयमध्ये ब्रह्माण्डात्परतो वा यत्रैवाऽऽनन्दमयो भूत्वा आनन्दरूपं भगवन्तं प्रविशति स नैवेह पुनः संसारं प्रविशति ॥ ३०, ३१ ॥ ❀ ❀ एवमपुनरावृत्तिमार्गद्वयमुक्त्वा सद्योमुक्तिक्रममुक्तिरूपमुपसंहरति—**एते सृती इति** । एतेषां सर्वेषां पदार्थानामध्यायद्वयोक्तानां भगवत्स्वरूपत्वेनैव ज्ञानार्थमुक्तानां यथानिवेशं यथोपयोगं युक्तिभिर्विमर्शे स्वरूपं स्पष्टं भविष्यति । अत्र तूद्देशमात्रं कृतम् । तत्र स्पष्टमेव विवरिष्यामः । ते तुभ्यम् । हे नृ[2]पदेव । गीते रा[3]जत्वात्स्वत्सुखार्थं स्वरूपेण कीर्तिते । तत्रापि त्वया अभिपृष्टे । साधनस्य फलपर्यवसानात्साधनप्रश्नेनैव तत्प्रश्न उक्तो भवति । **सनातने च** । न हीदम्प्रथमतया कश्चिदस्मिन्मार्गे गच्छति किन्त्वनादिसिद्धे । अत्र गन्ता अग्रे स्पष्टो भविष्यति । अनादित्वे प्रमाणमाह—**ये वै पुरेति** । ब्रह्म[4]णैवं पृष्टे ब्रह्मणे आह भगवानपि पृष्टः सन् । कथने हेतुः—**आराधित इति** । एवं कथने हेतुमाह—**वासुदेव इति** । मोक्षदातृत्वेनैवमुक्तवानित्यर्थः ॥ ३२ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः ।

घ्राणेनेत्यत्र **कर्मेन्द्रियसहितेनेति** । इदं साहित्यं प्राणेन चेति चका-२९-३२ रेण द्योतितं ज्ञेयम् ॥ २९ ॥ ❀ ❀ **एते सृतीत्यत्र** । राज्ञा मार्गद्वयप्रश्नस्याकृतत्वात् त्वयाभिपृष्ट इत्युक्तिर्न सङ्गच्छते इत्याशङ्कयाहुः **साधनेत्यादि** । क्रियमाणसाधनप्रश्नेन तत्प्रश्न उक्तो भवतीत्यर्थः ॥ ३२ ॥

---

१. रूपं प्रकृतिमिति ख. २. नृपदेवेति इति ख. घ. ३. राजत्वात्सुखार्थमिति ख. घ. ४. ब्रह्मणैव पृष्टे इति ख. ग. घ.

## श्रीगिरिधरकृता बालप्रबोधिनी

तानेव भोगान् स्पष्टयति—घ्राणेन्द्रियेण गन्धमुपेत्य रसनेनैवेन्द्रियेण रसमुपेत्य तथा दृष्ट्या नेत्रेण तु रूपमुपेत्य त्वचैव श्वसनं स्पर्शनमुपेत्य श्रोत्रेण च नभोगुणं शब्दमुपेत्य-त्वप्रत्ययोऽत्र विवक्षितः-प्राणेन तत्तत्कर्मेन्द्रियेण चाकूतिं तत्तत्क्रियां योगी उपैति प्राप्नोतीत्यन्वयः ॥ २९ ॥ ❀ ❀ तदेवं स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहङ्कारप्राप्त्या महदादिप्राप्तिमाह—स इति । विविधं कार्यमस्येति विकार्योऽहङ्कारः, स च त्रिविधस्तामसो राजसः सात्त्विकश्चेति । तत्र तामसाज्जडानि भूतसूक्ष्माणि जायन्ते, राजसाद्बहिर्मुखानि दशेन्द्रियाणि जायन्ते, सात्विकान्मनइन्द्रियदेवताश्च जायन्ते तेषां लयश्च तत्तदहङ्कारे भवति । तत्र भूतसूक्ष्माणामिन्द्रियाणां च सन्निकर्षं लयस्थानं तामसं राजसं च मनोमयं देवमयं च सात्त्विकमहङ्कारं संसाद्य प्राप्य गत्वा एवं गमनेन स योगी तेनाहङ्कारेण सह विज्ञानतत्त्वं महत्तत्त्वं याति । ततश्च गुणानां सन्निरोधो लयो यस्मिंस्तत्प्रधानं याति ॥ ३० ॥ ❀ ❀ तेनात्मना प्रधानरूपेण वर्तमानोऽपि तस्याप्यवसाने लये सति स्वयमानन्दमयः सन् शान्तमविकृतमानन्दविग्रहमात्मानं परमात्मानमुपैति प्राप्नोति । एतां भागवतीं भगवत्सम्बन्धिनीं गतिं यो गतः स पुनरिह संसारे नैव विषज्जते नैवावर्त्तते इत्यर्थः । हे अङ्गेति सम्बोधनेन परमाधिकारित्वेन तवास्मदङ्गतुल्यत्वान्नैवात्र किञ्चिदन्यथा वदामीति सूचयति ॥ ३१ ॥ ❀ ❀ उक्तं मार्गद्वयमुपसंहरति—एते इति । तस्मिन् स्वस्नेहं सूचयन् सम्बोधयति—हे नृपेति । ये त्वयाऽभिपृष्टे ते 'एते सृती मार्गौ मोक्षप्रकारावित्यन्वयः । अनपेक्षो निर्भिद्य मूर्धन् विसृजेत्परं गत इति सद्योमुक्तिरेका सृतिः । यदि प्रयास्यन्नित्यादिना क्रममुक्तिश्च द्वितीया सृतिः । न चात्राप्रमाणशङ्का कर्त्तव्या, यतः "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ॥ अथ मर्त्यो मृतो भवत्यत्र ब्रह्म समश्नुते" इति सद्योमुक्तिः "तेऽर्चिरभिसम्भवन्ति"इत्यादिना क्रममुक्तिश्चेति द्वे अपि वेदेनैव गीते उक्ते, न तु मया स्वेनैवोत्प्रेक्षिते । अतएव सनातने एव शिष्टपरम्परासमागते, नत्वाधुनिके[2] क्यौ । हकारचकाराववधारणार्थौ । सनातनत्वमेव स्पष्टयति—ये वा इति । ये एव ब्रह्मणाऽऽराधितोऽतः प्रत्यक्षः संस्तेन पृष्टो भगवान् वासुदेवो ब्रह्मणे आह ते एते सृती इत्यन्वयः । यद्वा 'यच्छ्रोतव्यं' इत्यादिना मुक्तिमार्गस्य 'ब्रूहि यद्वा विपर्ययम्' इति संसारमार्गस्य च पृष्टत्वात् । उत्तरे च 'तस्माद्भारत सर्वात्मा' इत्यादिना मुक्तिमार्गद्वयस्य 'श्रोतव्यादीनि राजेन्द्र नृणां सन्ति सहस्रशः' । 'न कर्मभिस्तां गतिमाप्नुवन्ति' इत्यादिना संसारमार्गस्य चोक्तत्वादेते सृती इत्यनेनार्चिरादिमार्गो धूमादिमार्गद्वयं ज्ञेयम् । अन्यत्समानम् ॥ ३२ ॥

## हिन्दी अनुवाद

इस प्रकार स्थूल आवरणोंको पार करते समय उसकी इन्द्रियाँ भी अपने सूक्ष्म अधिष्ठानमें लीन होती जाती हैं। घ्राणेन्द्रिय गन्धतन्मात्रामें, रसना रसतन्मात्रामें, नेत्र रूपतन्मात्रामें, त्वचा स्पर्शतन्मात्रामें श्रोत्र शब्दतन्मात्रामें और कर्मेन्द्रिय अपनी-अपनी क्रियाशक्तिमें मिलकर अपने-अपने सूक्ष्मस्वरूपको प्राप्त हो जाती हैं॥ २९॥ ❀ ❀ इस प्रकार योगी पञ्चभूतोंके स्थूल-सूक्ष्म आवरणोंको पार करके अहङ्कारमें प्रवेश करता है। वहाँ सूक्ष्म भूतोंको तामस अहङ्कारमें, इन्द्रियोंको राजस अहङ्कारमें तथा मन और इन्द्रियोंके अधिष्ठाता देवताओंको सात्त्विक अहङ्कारमें लीन कर देता है। इसके बाद अहङ्कारके सहित लयरूप गतिके द्वारा महत्तत्त्वमें प्रवेश करके अन्तमें समस्त गुणोंके लयस्थान प्रकृतिरूप आवरणमें जा मिलता है॥ ३०॥ ❀ ❀ परीक्षित्! महाप्रलयके समय प्रकृतिरूप आवरणका भी लय हो जानेपर वह योगी स्वयं आनन्दस्वरूप होकर अपने उस निरावरणरूपसे आनन्दस्वरूप शान्त परमात्माको प्राप्त हो जाता है। जिसे इस भगवन्मयी गतिकी प्राप्ति हो जाती है, उसे फिर इस संसारमें नहीं आना पड़ता॥ ३१॥ ❀ ❀ परीक्षित्! तुमने जो पूछा था, उसके उत्तरमें मैंने वेदोक्त द्विविध सनातन मार्ग सद्योमुक्ति और क्रममुक्तिका तुमसे वर्णन किया। पहले ब्रह्माजीने भगवान् वासुदेवकी आराधना करके उनसे जब प्रश्न किया था, तब उन्होंने उत्तरमें इन्हीं दोनों मार्गोंकी बात ब्रह्माजीसे कही थी॥ ३२॥

**न ह्यतोऽन्यः शिवः पन्था विशतः संसृताविह । वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥३३॥**
**भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया । तदध्यवस्यत् कूटस्थो रतिरात्मन् यतो भवेत् ॥३४॥**
**भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः । दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥३५॥**
**तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदा । श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम् ॥३६॥**

**पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु[3] सम्भृतम् ।**
**पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥ ३७ ॥**

---

१. अस्यैवाध्यायस्य एकविंशद्वाविंशश्लोकाभ्यां कथिते । २. आधुनिके इति क-ख पाठः । ३. प्रा०पा० पुटेन ।

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

संति संसरतः पुंसो बहवो मोक्षमार्गास्तपोयोगादयस्तत्र समीचीनस्त्वयमेवेत्याह। नहीति। यतोऽनुष्ठिताद्भक्तियोगो भवेदतोऽन्यः शिवः सुखरूपो निर्विघ्नश्च नास्त्येव ॥ ३३ ॥ ❀ ❀ कुत एतदत आह। भगवान्ब्रह्मा कूटस्थो निर्विकारः एकाग्रचित्तः सन्नित्यर्थः। त्रिस्त्रीन्वारान् कात्स्र्न्येन साकल्येन ब्रह्म वेदमन्वीक्ष्य विचार्य यत आत्मनि हरौ रतिर्भवेत्तदेव मनीषया-ऽध्यवस्यत् निश्चितवान् ॥ ३४ ॥ ❀ ❀ नन्वनुभूतेऽर्थे रतिर्भवति। अननुभूते तु भगवति कथं रतिः स्यात्तत्राह।भगवाँल्लक्षितः दृष्टः। कथं स्वात्मना क्षेत्रज्ञांतर्यामितया कैर्दृश्यैर्बुद्ध्यादिभिः तदेव द्वेधा दर्शयति। दृश्यानां जडानां दर्शनं स्वप्रकाशं द्रष्टारं विना न घटत इत्यनुपपत्तिमुखेन लक्षणैः स्वप्रकाशांतर्यामिलक्षणैः। तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वाद् वास्यादिवदिति व्याप्तिमुखेनानुमापकः स्वतंत्रश्च कर्तेत्येवमीश्वरसिद्धिः ॥ ३५ ॥ ❀ ❀ यच्छ्रोतव्यमित्यादिप्रश्नोत्तरमुपसंहरति। तस्मा-दिति ॥ ३६ ॥ ❀ ❀ श्रवणादिफलमभिनयेनाह। पिबंतीति सतामात्मन आत्मत्वेन प्रकाशमानस्य कथैवामृतम्। विषयैर्विदूषितं मलिनीकृतमाशयं पुनंति शोधयंति तस्य चरणपद्मान्तिकं श्रीविष्णुपदं व्रजंति ॥ ३७ ॥

इति श्रीम० भा० द्वि० स्कं० टीकायां द्वितीयोऽध्यायः।

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

समीचीनः—सर्वसाध्यपरमसारप्रापकः। अयं क इति चेत्तत्राह—यत इति। भक्तियोगः प्रेमा यच्छब्देनात्र भगवत्सं-तोषार्थं कर्मोच्यते। स वै पुंसां परो धर्मः इत्युक्तेः। अत्र पूर्वमुक्तलक्षणं सृतिद्वयं यथा मोक्षप्रापकं तथाऽयं पंथा भक्तियोगप्रापक इति प्रापकस्यास्य पथः परमोत्कर्षप्रतिपादनादेतत्प्राप्यस्य भक्तियोगस्यापि सृतिद्वयप्राप्यान्मोक्षात्परमोत्कर्षो युक्तिसिद्धः। इति भक्तियोग-स्यास्य प्रेमलक्षणस्य मोक्षसाधनत्वं न व्याख्यातुं शक्यमित्यववेयम् ॥ ३३ ॥ ❀ ❀ इत्यर्थ इति। यावच्चेतो विकारवत्ताव-दैकाग्र्यं न जायते इति भावः। कूटस्तिष्ठतीति कूटस्थः। 'कूटोऽस्त्रीनिश्चले राशौ' इत्यादिकोशात्। निश्चयाश:—तत्र तत्र [illegible]
सर्वसारत्वेन स्वाभिमतत्वेन चेममेव पंथानं निश्चिनोष्यन्यं वा तत्र सामान्यस्य वा का कथा भगवानेव स्वमनीषया प्रथममेव निरणैषीदेवेत्याह। भगवान्स्वप्रकाशसार्वज्ञ्यादिगुणः परमेश्वरोपि स्वनिःश्वासोद्भूतब्रह्मवेदं कात्स्र्न्येन सामस्त्येन त्रिरन्वीक्ष्येति यथाऽन्ये मुनयः शास्त्रं द्विस्त्रिरन्वीक्ष्यैव तत्तात्पर्यं पर्यालोचयंति तथैव 'स मुनिर्भूत्वा समचिंतयत्' इति श्रुतेर्भगवानपि मुनिलील-त्वेनैव सर्ववेदाभिधेयसाराकर्षणलीलया वेदानां दुर्ज्ञेयत्वं लोके व्यञ्जयंस्त्रिर्विचार्येत्यर्थः ॥ कर्मभक्तिज्ञानप्रतिपादकत्वाभिप्रायेण वा त्रिरन्वीक्ष्य अनंतवैकुंठवैभवादिमयानामनंतविरिञ्चिपाठ्यभेदानां वेदानां तथेक्षणं तेनैव संभवतीत्याह कूटस्थः। 'कालव्यापी स कूटस्थ एकरूपतयैव यः' इत्यमरः। अत एवोक्तं स्वयमेव। "किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत्। इत्यस्य हृदयं लोके नान्यो मद्वेद कश्चन ॥" इति। स तद्वस्तु अध्यवस्यत्सर्ववेदप्रतिपाद्यत्वेन निश्चिकाय। यत आत्मनि स्वस्मिन्रतिः प्रेमा भवेत्। प्रेम्णो हि प्रथमावस्था रतिः। संदर्भस्तु—स हि भक्तियोगः सर्ववेदसिद्ध इत्याह–भगवानिति। भगवान् ब्रह्मेति स्वामिवत्। अत्राप्युपसंहारानु-रोधेनात्मशब्दस्य हरिवाचकता। निरुक्तश्च। 'आततत्वाच्च मातृत्वादात्मा हि परमो हरिः" इति। अतोऽग्रे विश्वनाथवद्द्वितीयोऽर्थः विशेषस्तु 'निगदकृदुपजह्रे भृंगगवद्वेदसारम्' इति शुकोक्तिरेव ॥ ३४ ॥ ❀ ❀ अत्राक्षिपति—नन्विति। तदेव लक्षितत्वमेव। संदर्भः। अथ भगवानपि लक्षितः केन सर्वभूतेषु सर्वेषु तेषु द्रष्टृषु प्रविष्टेन स्वात्मना स्वांशरूपेण "तस्मादेकेन मनसा भगवान्सात्वतां पतिः ॥ श्रोतव्यः कीर्त्तितव्यश्च" इत्यनेनैकवाक्यत्वाच्छ्रोतव्य इति प्राधान्यात् श्रवणकीर्त्तनस्मरणान्युक्तानि पादसेवनादीन्यपि ज्ञेयानि ॥ ३६ ॥ ❀ ❀ प्रीतादिचतुर्विधाया रतेः साधारण्येनानुभावमेव प्रेम्णः साधनं वदंस्तत्फलमपि दर्शयति। आत्मनः स्वस्य यो भगवानुपास्यस्तस्य नारायणस्य रामस्य कृष्णस्य वा कृष्णस्यापि स्वीयभावानुरूपस्य बालस्य पौगंडस्य किशोरस्य वा कथामृतं तथा तादृशस्य तस्य सतां भक्तानां नारदादीनां हनुमदादीनां नंदादीनां श्रीदामादीनां गोपालादीनां च कथामृतं पिबंतीत्यनेन तत्कर्तॄणां जातरतित्वं व्यंजितं तथात्वं एव माधुर्योपलंभेन पानपदप्रयोगसिद्धेः। अजातरतीनां तु तस्मात्सर्वात्मना' इत्यनेन श्रवणकीर्तनादीनि रतेः साधनान्युक्तान्येव। आशयमन्तःकरणं पुनंति क्षालयंतीत्यननुसंहितं फलं व्रजंति साक्षात्सेवितुमित्यनुसंहितं फलमिति। अतः पृच्छामि संसिद्धम्' इति प्रश्नस्योत्तरमुक्तम्। संदर्भस्तु सतामिति व्यधिकरणषष्ठ्या सतां स्वस्य यो भगवांस्तस्येत्यर्थः। तेषां भगवति स्वामित्वेन ममतास्पदत्वात् पुनंतीत्यनेन पूर्वोक्तस्थूलधारणमार्गश्च परिहृतः भक्तियोगस्य स्वतः पावनत्वादलं तत्प्रयासेनेति। अत्र कथामृतं प्रशस्यमानं श्रीभागवताख्यमेव मुख्यं "यस्यां वै श्रूयमाणायाम्" इत्यादिकं च तथैवोक्तम् ॥ ३७ ॥

इति श्रीभागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

[ आत्मन् आत्मनीति विजयध्वजः ॥ ३४—३७ ]

## श्रीमद्वीरराघवव्याख्या

संसारिणोऽर्चिरादिप्राप्तौ भक्तियोगादन्य उपायो नास्त्यर्चिरादिगतिचिंतापि भक्तियोगोपाय इत्याह नहीति । अत अर्चिरादेरन्यः अपरः संसृतौ संसारे शिवः पंथाः कल्याणरूपो मार्गो न विश्रुतः विशेषेण न श्रुतः यतः अर्चिरादिमार्गचिंतनाद्वासुदेवे सर्वांतरात्मनि भगवति परमात्मनि भक्तिर्भवेत्तस्मात्तच्चिंता च कार्या तथा च सूत्रकारः योगिनः प्रतिस्मर्यं ते स्मार्ते चैते ४।३।० योगिनो योगनिष्ठान्प्रति स्मार्ते स्मृतिविषयभूते स्मर्त्तव्ये देवयानपितृयानाख्ये गती स्मर्येते योगांगतयानुदिनं "नैते सृती पार्थ जानन् योगी मुह्यति, कश्चन तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन" इति स्मरणादिति सूत्रार्थः ॥ ३३ ॥ ❀ ❀ कथं वासुदेवे भक्तिरेवार्चिरादिगतावुपाय इत्यत्राह भगवानिति । "एवमेष महाशब्दो मैत्रेयभगवान्" इत्यादिप्रकारेण भगवच्छब्दशब्दितो वासुदेव एव ब्रह्मजगत्कारणं तद्भक्तिरेव मोक्षोपायः कथमित्यत्राह कात्स्र्न्येनेति मनीषया बुद्ध्या कात्स्र्न्येन त्रिरन्वीक्ष्य कृत्स्नप्रमाणजातं मुहुर्मुहुरालोच्य "आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनरि" तिवत् तदध्यवस्य निश्चित्य स्थितः किमध्यवस्येत्यत आह कूटस्थ इति । निर्विकारे परमात्मनि रतिः मुक्तौ आनंदः निरतिशयानंदपरमात्मानुभवजनितसर्वावस्थोचिताशेषशेषतैकरतिर्यतो भक्तियोगाद्भवेत्स एव भक्तियोगो मुक्त्युपायः इति निश्चित्य निपुणतरो लोकः स्थित इत्यर्थः ॥ ३४ ॥ ❀ ❀ नन्वतींद्रिये भगवति कथं भक्तिरुत्पद्यते कथंतरां रतिरित्याशंक्य परिशुद्धमनोविषयत्वादुभयमपि संभवतीत्याशयेनाह भगवानिति । स्वात्मना योगपरिशुद्धमनसा सर्वभूतेषु भगवान् लक्षितः साक्षात्कारार्हः मनसा तु विशुद्धेन मनसाभिक्लृप्त" इति श्रुतेः तर्हि स किं घटादिवदुपलक्षितोदृश्य एवेत्यत आह द्रष्टा सर्वज्ञः न केवलं योगपरिशुद्धमनोविषय एवं प्रमाणांतरविषयोऽपीत्याह बुद्ध्यादिभिः महदादिभिः महान्वै बुद्धिलक्षण इति वचनात् कार्यभूतमहदादिभिर्द्रष्टा तत्कारणभूतोऽनुमीयते इत्यर्थः न केवलमनुमानविषय एव किंतु शास्त्रविषयोऽपीत्याह लक्षणैरनुमापकैरिति पदद्वयेन लक्षयंतीति लक्षणानि वेदांतवाक्यानि "सत्यंज्ञानमनंतं, यतो वा इमानि भूतानी" त्यादीनि तथा तदुपजीव्यकारणत्वप्रतिपादकानि "सदेव सौम्येद मग्र आसीदि" त्यादीनि । तैरनुमापकैः स्मृतिवचनैः स्मृतीनां श्रुत्यनुमापकत्वाच्छ्रुतिस्मृतिभ्यामप्युपलक्षितः अनेन केवलानुमानगम्यत्ववादिनो वैशेषिका निरस्ताः तन्निरासस्तु "शास्त्रयोनित्वात् ॥ १।१।३ ॥ इत्यधिकरणसाध्यः बुद्ध्यादिकार्यवर्गैरुपलक्षितः जगत्कारणतया शास्त्रैः प्रतिपन्नः तत्स्वरूपं तु योगपरिशुद्धमनसा साक्षात्कुर्वंतीत्यागमोत्थविवेकजन्यज्ञानद्वयविषयत्वमुक्तं भवति ॥ ३५ ॥ ❀ ❀ यच्छ्रोतव्यमित्यादिप्रश्नोत्तरमुपसंहरति तस्मादिति स्पष्टोऽर्थः ॥ ३६ ॥ ❀ ❀ अस्तु योगपरिशुद्धमनोग्राह्यत्वं योगारंभो वा कथं स्यादित्यत आह पिबंतीति । भगवत आत्मनः परमात्मनः कथामृतं ये पिबंति ते विषयविदूषिताशयं पुनंतीत्यन्वयः कथामृतं वा कथं लभ्यते इत्यत आह सतामिति । कर्तरि षष्ठी सद्भिःकर्णपुटेषु संभृतं पूरितम् अनेन सत्सेवया प्रथमं भवितव्यमित्युक्तं भवति सत्सेवया प्राप्तहरिकथाश्रवणेन विषयैः शब्दादिभिः विदूषितं कलुषितमाशयमंतःकरणं पुनंति सत्सेवादिभक्तियोगांतस्य फलमाह व्रजंतीति तस्य भगवतश्चरणसरोरुहयोरन्तिकं समीपं व्रजंति प्राप्नुवंति प्रथमं सत्सेवा ततः श्रवणं ततो योगारम्भ ततः आगमोत्थविवेकादिसाधनसंपज्जन्यज्ञानाभ्यासाऽनुगृहीता प्रत्यख्यातापन्ना भक्तिरित्ययं क्रमोऽत्रोक्तः ॥ ३७ ॥

**इति श्रीमद्भागवते द्वितीयस्कन्धे श्रीवीरराघवाचार्यकृतटीकायां द्वितीयोऽध्यायः ॥ २ ॥**

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

तेन विज्ञानतत्त्वगतेन हरिणा गुणसंन्निरोधं सत्त्वादिगुणविधुरं सर्वमूलकारणं महत्तत्त्वाख्यविरिञ्चिगतं विज्ञाननामानं याति एवं सर्वांतरयामिरूपैरेकीभूतः स महत्तत्त्वांतर्यामी विज्ञाननामा हरिस्तेनात्मना विरिंचेन सह शांतिं चित्प्रकृतिस्थितमानंदनामानं हरिं याति स आनंदमयः पूर्णानंदः आनंदनामा महत्तत्त्वगतो विष्णुः श्रियानुज्ञातं ब्रह्माणमादायावसाने द्विपरार्धावसाने सर्वात्मके सर्वांतर्यामिणि गुणबृंहिते परिपूर्णे ब्रह्मणि वासुदेवाख्ये विहरति । जीवसंघः स्वस्वयोग्यतानुसारेण बृंहितत्वाच्च ब्रह्माख्ये स्वमूलरूपे विहरतीति शेषः । इत्येषा देवानां मुक्तिरिति भावः एवं स्वस्वबिंबद्वारेण हरिं प्रविष्टानां पुनरावृत्तिर्नास्तीत्याह वासुदेव इति ॥ ३३ ॥ ❀ ❀ यो भागवत आत्यंतिको भक्तो वासुदेवे एतां सायुज्याख्यां गतिं मुक्तिं गतः स ब्रह्मादिसंघः पुनरिह संसारे न विसज्जते संसारविषयो नेत्यन्वयः वैशब्देनानंदसंज्ञकेन नापि ब्रह्मणा परस्परैक्यं समुद्रे प्रविष्टनदीवदित्यादि दर्शयति नन्वित ❀ आनंदातिशये । नेह विषज्जते इतीदं युक्तं तदभावे प्रशंसामात्रमिदं किं न स्यादित्येतच्चोद्यं "वासुदेवाश्रिता देवा ब्रह्माद्या मुक्तबंधना" इत्यादिना परिहर्तव्यम् । उपसंहरति एते इति । पुरा चतुर्मुखेनाराधितः पृष्टो भगवान् वासुदेवो द्वे सृती ब्रह्मणे आह । ते एते सृती मया ते कथितेत्यन्वयः वक्तव्यत्वे हेतुमाह त्वयेति । तत्रापि निमित्तमाह वेदेति । अथेत्यनेन "अथ येऽरण्ये श्रद्धां तप इत्युपासते तेऽर्चिषमभिसंभवंति" इत्यादिवेदं सूचयति वेदगीतत्वेप्यश्रद्धेयत्वे न हेयत्वं दृष्टमत्राह सनातने इति नित्यस्थितिहेतुत्वादित्यर्थः ॥ ३४ ॥ ❀ ❀ अतोऽत्र निःश्रेयसार्थिभिर्भागवतमेवाभ्यसनीयमिति भावेनाह नहीति । इह संसृतौ अतो भागवताख्याद् ग्रंथादविश्रुतः शिवः पंथा नास्ति सज्जनकरुणया भागवतोक्तत्वादिति शेषः । हेत्वंतरमाह वासुदेव इति ॥ ३५ ॥

❀ ❀ एकस्य प्रतिभाने तु कृतकान्न विशिष्यत इत्यत आप्तिमूलत्वेन तदुक्तं प्रमाणमेवेत्याह भगवानिति । ब्रह्म वेदमन्वीक्ष्य आलोच्य । यतो ग्रंथादभ्यस्तादात्मन्नात्मकूटस्थे निर्विकारे हरौ भक्तिलक्षणा रतिर्भवेत् तद्भागवतं पुराणमपश्यदित्यन्वयः । हिशब्देन नित्यज्ञाने न सिद्धश्च पुनः पुनरवेक्षत इत्यादिकं सूचयति ॥ ३६ ॥ ❀ ❀ उत्तमाधिकारिणां वेदादिना भगवत्सद्भावे सिद्धेऽपीतरेषां तदस्तित्वं कथमवगंतुं शक्यमित्याशंक्याह भगवानिति । इतोऽपीदमेव निःश्रेयस हेतुत्वात् श्रवणादिनाभ्यसनीयमित्यत आह भगवानिति । द्रष्टा साक्षी भगवाननुमापकैर्निश्चयज्ञानजनकैर्द्दश्यैर्हेरेः सर्वस्वातंत्र्यादिना ब्रह्मादिजीवराशेरस्वातंत्र्यादिना च प्रमाणेन गृहीतव्याप्तिकैर्बुद्ध्यादिलक्षणैर्लिंगैः सर्वभूतेषु नियामकत्वेन स्थित इति आत्मना जीवेनास्मिन्पुराणे लक्षितो ज्ञात इत्यतस्तदस्तित्वे सिद्धे तेन प्रोक्तत्वाद्वेदमूलत्वेनाप्तिमूलत्वाच्चेदमवश्यमभ्यसनीयमित्यायातमिति भावः । इदं बुध्येयं न चेदमित्यत्र बुद्ध्यादीनां परवश्यत्वदर्शनादन्यो नियंतास्तीत्यस्य स्वानुभवसिद्धत्वात्स चान्यो हरिरेवेत्यस्यावधारणाय च शब्दः तदुक्तं "समाधावसमाधौ च निःस्वतंत्रस्य देहिन" इत्यादि ॥ ३७ ॥ ❀ ❀ उक्तमुपसंहरति तस्मादिति यस्मात् सर्वज्ञेन व्यासेनैष नारायण एव वेदवेद्येषु सर्वोत्तमत्वेन द्रष्टव्यत्वेनोक्तः तस्मात्स एव श्रोतव्यः ॥ श्रवणादिफलमाह पिबन्तीति । सतां सकाशात् श्रवणपुटेषु संभृतं पूरितं विषयैर्विशेषणदूषितम् ॥

**इति श्रीभागवते महापुराणे द्वितीयस्कंधे विजयध्वजतीर्थकृतटीकायां द्वितीयोऽध्यायः ॥ २ ॥**

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

अथ स्थिरं सुखं चासनम् इत्यादिना यदि प्रयास्यन्नृप पारमेष्ठ्यम् इत्यादिना च क्रमेण सद्योमुक्तिक्रममुक्त्युपायौ ज्ञानयोगावुक्त्वा ततोऽपि श्रेष्ठत्वं भक्तियोगहेतुभगवदर्पितकर्म्मणोऽप्युक्त्वा साक्षाद्भक्तियोगस्य तु कैमुत्यमेवानीतं यथा, न हीति । टीका च—सन्ति संसारतः पुंसो बहवो मोक्षमार्गास्तपोयोगादयः समचीनस्त्वयमेवेत्याह न हीति । यतोऽनुष्ठिताद्भक्तियोगो भवेत् अतोऽन्यः शिवः सुखरूपः निर्व्विघ्नश्च नास्त्येव इत्येषा यच्छब्देनात्र भगवत्सन्तोषार्थं कर्म्मोच्यते, स वै पुंसां परो धर्म्मः इत्युक्तेः अन्यत्तैः ॥ ३३ ॥ ❀ ❀ स हि भक्तियोगः सर्व्ववेदसिद्ध इत्याह भगवानिति । भगवान् ब्रह्मा कूटस्थो निर्व्विकार एकाग्रचित्तः सन्नित्यर्थः । त्रिः त्रीन् वारान् कात्स्न्र्येन साकल्येन ब्रह्म वेदमन्वीक्ष्य विचार्य यत आत्मनि हरौ रतिर्भवेत् तदेव भक्तियोगाख्यं वस्तु मनीषया अध्यवस्यत् निश्चितवान् । (त्रिरन्वीक्ष्येति कर्मज्ञानभक्तिप्रतिपादकतयाऽभिप्रेत्येति ज्ञेयम् ।) अत्राप्युपसंहारानुरोवेनात्मशब्दस्य हरिवाचकता । निरुक्तञ्च—आततत्वाच्च मातृत्वादात्मा हि परमो हरिः इति । अथवा (परमवेदविदा श्रीभगवता स एव मत इत्याह ।) भगवान् स्वप्रकाशसार्व्वज्ञ्यादिगुणः परमेश्वरोऽपि सर्व्ववेदाभिधेयसाराकर्षणलीलार्थं त्रिरन्वीक्ष्य तत्र शास्त्रविदन्तराणामीक्षणमनुकृत्य । अनन्तवैकुण्ठवैभवादिमयानामनन्तविरञ्चिपाठ्यभेदानां वेदानां तथेक्षणञ्च तेनैव संभवतीत्याह—कूटस्थः एकरूपतयैव कालव्यापीति । अत एवोक्तं स्वयमेव—किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्य हृदयं लोके नान्यो मद्वेद कश्चन ॥ इति । श्रीशुकेन च निगमकृदुपजह्रे भृंगवद्वेदसारम् इति ॥ ३४ ॥ ❀ ❀ नन्वितरेषां तावत् कथं तस्मिन् भगवति आस्तिक्यबुद्धिः स्यात् तत्राह भगवानिति । स्वात्मना स्वचित्तेन प्रथमं द्रष्टा जीवो लक्षितः कैः दृश्यैर्बुद्ध्यादिभिः । तदेव द्वेधा दर्शयति । दृश्यानां जडानां बुद्ध्यादीनां दर्शनं स्वप्रकाशं द्रष्टारं विना न घटत इत्यनुपपत्तिद्वारा लक्षणैः स्वप्रकाशद्रष्टृलक्षकैः । तथा बुद्ध्यादीनि कर्त्तृप्रयोज्यानि करणत्वाद् वास्यादिवदिति व्याप्तिद्वाराऽनुमापकैरिति । अथ भगवानपि लक्षितः केन सर्व्वभूतेषु सर्व्वेषु तेषु द्रष्टृषु प्रविष्टेन स्वात्मना स्वांशरूपेणान्तर्यामिणा । आदौ सर्वैर्द्रष्टृभिरन्तर्यामी लक्षितः । ततस्तेन भगवानपि लक्षित इत्यर्थः । स तु पूर्व्ववद् द्वेधैव लक्ष्यते । तथाहि कर्त्तृत्वभोक्तृत्वयोरस्वातन्त्र्यदर्शनात् कर्म्मणोऽपि जडत्वात् सर्व्वेषामपि जीवानां तत्र तत्र प्रवृत्तिरन्तःप्रयोजकविशेषं विना न घटत इत्यनुपपत्तिद्वारा अन्तर्यामी लक्ष्यते । "एष ह्यनेनात्मना चक्षुषा दर्शयति श्रोत्रेण श्रावयति मनसा मानयति बुद्ध्या बोधयति तस्मादेतावाहुः सृतिरसृति" रिति भाल्लवेयश्रुतिश्च । अथ तस्मै चान्तर्यामित्वैश्वर्य्याय तेषु यदि सर्वांशेनैव प्रविशति कोऽपि परस्तदा स्वतःपूर्णत्वाभावादनीश्वरत्वमेव स्यादित्यनुपपत्तिद्वारान्तर्यामिरूपेण तस्यांशेन भगवानपि लक्षितः । अतएव गीतोपनिषत्सु—अथवा बहुनैतेन किं ज्ञातेन तवार्जुन । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ इति । विष्णुपुराणे च—स्वशक्तिलेशावृतभूतसर्गः इति । तथा जीवाः प्रयोजककर्त्तृप्रेरितव्यापाराः अस्वातन्त्र्यात् तक्षादिकर्म्मकरजनवत् इत्येवमन्तर्यामिणि तद्द्वैधाव्याप्तिद्वारा सिद्धे पुनस्तेनैव भगवानपि साध्यते । तुच्छवैभवजीवान्तर्यामिस्वरूपमीश्वरतत्त्वं निजांशितत्त्वाश्रयम् । तथैव पर्य्याप्तेः । राजप्रभुत्वाश्रिततक्षादिकर्म्मकरप्रयोजकप्रभुत्ववदिति । अथवात्र—यथेन्द्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः । एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः इत्येवोदाहरणीयम् । अनेनैव गतिसामान्यञ्च सिध्यतीति ॥ ३५ ॥ ❀ ❀ अथ किन्तत् यतस्तत्र रतिः स्यात्तथैव यच्छ्रोतव्यम् इत्यादिप्रश्नस्योत्तरत्वेनोपसंहरति तस्मादिति । चकारात् पादसेवादयोऽपि गृह्यन्ते ॥ ३६ ॥ ❀ ❀ रत्युत्पत्तिमेव श्रवणप्राधान्येन दर्शयन् तन्महिमपराकाष्ठामाह पिबन्तीति । सताम् आत्मनः प्राणेश्वरस्य । यद्वा व्यधिकरणे षष्ठ्यौ सतां स्वस्य यो भगवान् तस्येत्यर्थः । तेषां

भगवति स्वामित्वेन ममतास्पदत्वात् । अत्र पुनन्तीत्यनेन पूर्व्वोक्तः स्थूलधारणमार्गश्च परिहृतः भक्तियोगस्यैव स्वतः पावनत्वादलं तत्प्रयासेनेति । तत्र कथामृतं प्रशस्यमानं श्रीभागवताख्यमेव मुख्यं, यस्यांवै श्रूयमाणायाम् इत्यादिकञ्च तथैवोक्तमिति ॥ ३७ ॥

**इति श्रीभागवतद्वितीयस्कंधस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे द्वितीयोऽध्यायः ॥ २ ॥**

**श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या**

किन्तु सर्व्वसाध्यपरमसारप्रापकस्त्वयमेव पन्था इत्याह न हीति । यतः भक्तियोगः प्रेमा भवेत् अतोऽन्यः शिवः सुखरूपो निर्व्विघ्नश्च पन्था नास्त्येव । अत्र पूर्व्वम् उक्तलक्षणं सृतिद्वयं यथा मोक्षप्रापकं तथायं पन्था भक्तियोगप्रापक इति प्रापकस्यास्य पथः परमोत्कर्षप्रतिपादनादेतत्प्राप्यस्य भक्तियोगस्यापि सृतिद्वयप्राप्यान्मोक्षात् परमोत्कर्षो युक्तिसिद्ध इति भक्तियोगस्यास्य प्रेमलक्षणस्य मोक्षसाधनत्वं न व्याख्यातुं शक्यमित्यवधेयम् ॥ ३३ ॥ ❀ ❀ ननु त्वं मनीषया सर्व्वसारत्वेन स्वाभिमतत्वेन चेममेव पन्थानं निश्चिनोष्यन्यो वा तत्र सामान्यस्य वा का कथा भगवानेव स्वमनीषया प्रथममेव निरणैषीदित्याह । भगवान् स्वप्रकाशसार्व्वज्ञ्यादिगुणः परमेश्वरोऽपि स्वनिश्वासोद्भूतं ब्रह्मवेदं कात्स्न्र्येन त्रिरन्वीक्ष्येति यथान्ये मुनयः शास्त्रं द्विस्त्रिरन्वीक्ष्यैव तत्तात्पर्य्यं पर्य्यालोचयन्ति तथैव "स मुनिर्भूत्वा समचिन्तयत्" इति श्रुतेर्भगवानपि मुनिलीलत्वेनैव सर्व्ववेदाभिधेयसाराकर्षणलीलया वेदार्थानां दुर्ज्ञेयत्वं लोके व्यञ्जयन् त्रिर्विचार्य्येत्यर्थः । अनन्तवैकुण्ठवैभवादिमयानामनन्तविरिञ्चिपाठ्यभेदानां देवानां तथेक्षणञ्च तेनैव सम्भवतीत्याह कूटस्थः, "कालव्यापी स कूटस्थ एकरूपतयैव यः" इत्यमरः । अतएवोक्तं स्वयमेव— किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्या हृदये लोके नान्यो मद्वेद कश्चन ॥ इति । स तत् वस्तु अध्यवस्यत् सर्व्ववेदप्रतिपाद्यत्वेन निश्चिकाय यतः आत्मनि स्वस्मिन् रतिः प्रेमा भवेत् । प्रेम्णो हि प्रथमावस्था रतिः ॥ ३४ ॥ ❀ ❀ सा च रतिः, येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् इति भगवद्वाक्येनाग्रे प्रतिपादयिष्यमाणा शान्तिप्रीतिसख्यवात्सल्यप्रियताभिधाना पञ्चविधा भवति । तत्र प्रथमं शान्ताख्याया रतेरसाधारण्येन प्रकारं विषयालम्बनञ्च दर्शयति भगवानिति । स्वात्मना स्वस्य जीवस्यात्मना अन्तर्यामिणैव स्वस्मिन्निव सर्व्वभूतेषु सर्व्वव्यापकत्वात् तदंशी भगवान् हरिः लक्षितः शान्तभक्तैरनुभवगोचरीकृत इत्यर्थः । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् इति भगवदुक्तेः । ननु जीव एव कथं लक्ष्यते तदन्तर्यामी वा येन भगवान् कृष्णो लक्षयितव्यः तत्राह । दृश्यैर्बुद्ध्यादिभिर्हेतुभिः द्रष्टा जीवः लक्षितः दृश्यानां जडानां बुद्ध्यादीनां दर्शनं हि चेतनं द्रष्टारं विना न सम्भवेदित्यनुपपत्तिमुखेन तथा बुद्ध्यादीनि कर्त्तृप्रयोज्यानि करणत्वाद् वास्यादिवदिति व्याप्तिमुखेन चानुमितः तथा अनुमापयन्ति यानि लक्षणानि चिह्नानि तैर्द्रष्टा अन्तर्यामी च लक्षितः; तानि च सर्वस्यापि जीवस्य कर्त्तृत्वभोक्तृत्वयोरस्वातन्त्र्यं तथा कर्म्मसाम्येऽपि फलतारतम्यं क्वचित् फलाभावश्चेत्यादीनि ज्ञेयानि । तथाहि जीवाः प्रयोजककर्त्तृस्वामिकाः, अस्वातन्त्र्यात् यथायोग्यस्वामिदत्तकर्म्मफलतारतम्यतदभाववत्त्वाच्च, तक्षादिकर्म्मकरजनवदिति ॥ ३५ ॥ ❀ ❀ भक्तियोगो यतो भवेद् इत्यत्र रतिरात्मन् यतो भवेद् इत्यत्र च यत्पदवाच्यं साधनमाह तस्मादिति । यस्माद् न ह्यतोऽन्यः शिवः पन्थाः तस्मादित्यर्थः । यस्मात् सर्व्वभूतेषु भगवान् लक्षितस्तस्मादिति वा । सर्व्वत्र सर्व्वदेति नात्र देशकालनियमोऽपेक्षितव्य इत्यर्थः । सर्व्वेणैवात्मना मनसा, न च क्वचन मनोवृत्तौ ज्ञानकर्म्माद्यपेक्षणीयमिति भावः । तस्मादेकेन मनसा भगवान् सात्वतां पतिः । श्रोतव्यः कीर्त्तितव्यश्च इत्यनेनैकवाक्यत्वात् । श्रोतव्य इति प्राधान्यात् श्रवणकीर्त्तनस्मरणान्युक्तानि, पादसेवनादीन्यपि ज्ञेयानि ॥ ३६ ॥ ❀ ❀ प्रीत्यादिचतुर्द्धाया रतेः साधारण्येनानुभावमेव प्रेम्णः साधनं वदन् तत्फलमपि दर्शयति । आत्मनः स्वस्य यो भगवानुपास्यः तस्य नारायणस्य रामस्य कृष्णस्य वा कृष्णस्यापि स्वीयभावानुरूपस्य बालस्य पौगण्डस्य किशोरस्य वा कथामृतं तथा तादृशस्य तस्य सतां भक्तानां नारदादीनां हनुमदादीनां नन्दादीनां श्रीदामादीनां गोपबालादीनाञ्च कथामृतम् । पिबन्तीत्यनेन तत्कर्त्तॄणां जातरतित्वं व्यञ्जितं तथात्वे एव माधुर्य्योपलम्भेन पानपदप्रयोगसिद्धेः । अजातरतीनां तु तस्मात् सर्व्वात्मना इत्यनेन श्रवणकीर्तनादीनि रतेः साधनान्युक्तान्येव । आशयमन्तः करणं पुनन्ति क्षालयन्तीत्यननुसंहितं फलं व्रजन्ति साक्षात् सेवितुमित्यनुसंहितं फलमिति, अतः पृच्छामि संसिद्धिम् इत्यस्य प्रश्नस्योत्तरमुक्तम् ॥ ३७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । द्वितीयेऽत्र द्वितीयोऽयं सङ्गतः सङ्गतः सताम् ॥ २ ॥

**श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः**

एवं तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः इत्यादिनापि भक्तेः श्रवणकीर्त्तनस्वाश्रमधर्मासनयमनियमादीन्यंगान्युक्तानि प्रायेण मुनयो राजन् निवृत्ता विधिषेधतः नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेरिति हृदोपगुह्यार्हपदं पदेपदे इत्यादिना च पराभक्तिश्च दर्शिता तेनात्मनात्मानमुपैतीति भगवत्प्राप्तिरूपं तत्फलं च दर्शितमथेदानीं च भक्त्यंगस्य पुरुषार्थत्वमाह न हीति द्वाभ्याम् । यतो भक्तियोगो भवेदतोऽन्यः संसृतौ विशतो जीवस्य शिवः क्षेमकरः पंथा नैवास्ति हीति निश्चये ॥ ३३ ॥ ❀ ❀ भगवान् ब्रह्मा कूटस्थः स्थिरप्रज्ञः मनीषया त्रीन्वारान्कात्स्न्र्येन ब्रह्मवेदमन्वीक्ष्य विचार्य यतः आत्मन्परमात्मनि रतिर्भवेत्तदेवाध्यवस्यत् निश्चितवान् ॥ ३४ ॥ ❀ ❀ नन्वलक्ष्ये कथं रतिः स्यादित्यत्राह भगवानिति । सर्वभूतेषु परतंत्रतयोपलभ्य-

मानेषु जन्मवृद्ध्यपक्षयमृत्युशीतोष्णवर्षादिकर्ता स्वतंत्रो भगवान् हरिर्लक्षितो दृष्टोऽस्ति किंच दृश्यैर्घटादिभिर्बुद्ध्यादीनि करणान्यनुमीयते तैश्च बुद्ध्यादिभिः स्वात्मा करणानां नियंता जीवोऽनुमीयते तेन स्वात्मना सर्वपुण्यापुण्यसाक्षी इष्टाऽनिष्टफलेषु कर्मसु बलान्नियोजकतया लक्षितोऽस्ति शिष्यबुद्धिवैचित्र्यार्थमिदमुक्तम्। वस्तुतस्तु वेदैकवेद्यो भगवानस्तीत्याह लक्षयंतीति लक्षणानि वेदवाक्यानि तैः तदर्थस्मारकैः स्मृतिवाक्यैर्भगवान् लक्षितः "सर्वे वेदा यत्पदमामनंति वेदैश्च सर्वैरहमेव वेद्य" इत्यादिभिः ॥ ३५ ॥ ❀ ❀ यस्माद्वासुदेवे भक्तियोगो भवेदतोऽन्यः शिवः पंथा नास्ति तस्माद्धेतोः हे राजन्! परभक्तिलाभाय सर्वत्र सर्वावस्थासु सर्वदा अहर्निशं सति वक्तरि श्रोतव्यः सति श्रोतरि कीर्तितव्यः उभयाभावे स्मर्तव्यो नृणां नृभिः ॥ ३६ ॥ ❀ ❀ श्रवणादिफलमाह पिबंतीति । भगवतः आत्मनः परमात्मनः सतां महतां धनभूतं कथामृतम् अर्थात्तैरेव सद्भिः श्रवणपुटेषु संभृतं पूरितं ये पिबंति ते विषयैर्विदूषितमपवित्रीकृतमाशयमंतःकरणं पुनंति पवित्रीकुर्वंति ततो निर्मलं ज्ञानं ततः पराभक्तिस्तया तस्य भगवतश्चरणसरोरुहयोरंतिकां निकटं व्रजंति गच्छंति ॥ ३७ ॥

**इति श्रीमद्भागवतसिद्धान्तप्रदीपे द्वितीयस्कंधीये द्वितीयाध्यायार्थप्रकाशः ।**

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं फलं निरूप्योपसंहृत्यैतन्मार्गप्रवेशे कियन्त उपाया सन्तीत्याकाङ्क्षायामाह—**न ह्यतोऽन्य इति** । अस्मात्पूर्वोक्तादन्यः शिवः कल्याणरूपः साधनदशायामपि सुखकरः पन्था आदौ तत्र निविष्टस्य पुनर्भ्रमाभावार्थं मार्गरूपः कोऽपि नास्ति । बहूनां च गतियोग्यः । एतदज्ञानेन इह संसारे विशतां, न तु निविष्टानां संसार्यैकस्वभावानाम् । तं मार्गं पुनः स्मारयति—**वासुदेवे भगवति भक्तियोगो यतो भवेदिति** । मोक्षदानार्थमागते भगवति साक्षात्परब्रह्म[1]रूपे सत्त्वाकारेण परिणतान्तःकरणे सत्त्वासने षड्गुणैश्वर्यरूपेणाऽऽविर्भूते येनैवोपायेन परमा प्रीतिर्भवति स एवोपाय इत्यर्थः । श्रवणादिभिः स्नेहः । ततो मननिदिध्यासनरूपेण[2] ध्यानेन सर्वभावस्नेहो द्वितीयः । ततोऽपि सूक्ष्मध्यानेन हृदि भगवति समागते तत्र यः परमस्नेहः साक्षाद्भगवत्प्रवेशहेतुः स फलरूपोऽपि साधनरूपोऽपि अवान्तरव्यापाररूपोऽपीति [3]तद्धेतुर्मार्गः गृहान्निर्गतस्येष्टदेशप्रवेशपर्यन्तं विततः । तत्र पूर्वभागः साधनरूपो [4]मध्यभागोऽवान्तरव्यापाररूपोऽग्रिमो भगवत्सम्बद्धफलरूपः । तत्र श्रवणादि ध्यानद्वयं च क्रमाद्वितता भूमिः । प्रीतिः पादौ । सा चेत्प्रीतिस्तन्मार्गेण तावत्पर्यन्तं गच्छति तदा भगवन्तं प्रापयति नाऽन्यथेति ॥ ३३ ॥ ❀ ❀ फलसाधननिर्धारः पूर्वमेव जात । इत्याह—**भगवानिति** । प्रमेयबलेन स्वयमुक्त्वाऽपि प्रमाणबलेनाऽपि तद्वक्तव्यमिति पूर्वोक्तमनादिसिद्धं राशीभूतवेदं मनीषया विचारकबुद्ध्या आलोड्य फलत्वेनाऽऽत्मानं विनिश्चित्य साधनविचारे क्रियमाणे **"यमेवैष वृणुत"** इत्यादिवाक्यैः प्रीतिमेवाऽवान्तरव्यापारं ज्ञात्वा **"भक्त्यैव तुष्टिमभ्येती"**ति विचार्य मुख्यं साधनं भक्तिं ज्ञात्वा तत्साधकत्वेनाऽन्यदिव्य[5]ध्यवस्यत् । तत्रापि कूटस्थो निश्चलः ॥ ३४ ॥ ❀ ❀ एवं प्रमाणेन युक्त्या च भक्तिमार्गं स्थिरीकृत्य अन्येषां मार्गाणां परस्परोपयोगं वक्तुमाह—**भगवानिति** । प्रतिपुरुषं प्रतिविषयं शास्त्राणि प्रसृतानि । तानि न सर्वथा बाधितविषयाणि । परम्परोपयोगात् । भगवांस्तैः सर्वैरेव सर्वभूतेषु लक्षितः लक्षणया [5]ज्ञापितः । नैयायिकैः कर्तृत्वेन, मीमांसकैः क्रियात्वेन, वेदान्तैरात्मत्वेन, साङ्ख्यादिभिः करणत्वेन । अन्यैश्च तद्धेदैर्ज्ञानत्वेन ज्ञातृत्वेन चाऽन्यैः । ज्ञानाधिष्ठातृत्वेन च । सर्वैरेव भगवानेकदेशे लक्षितः । अन्धहस्तिवत् । अनुभवेन युक्त्या च । स्वात्मना अनुभवेन । दृश्यैः । द्रष्टा । बुद्ध्यादिभिश्च लक्षणैरसाधारणचिह्नैः जीवेषु प्रवेशमलभमानैः क्रियादिभिः । अत एवाऽनुमापकैः तर्कसहकृतैः परोक्षज्ञानजनकैर्लक्षित इति सम्बन्धः । लक्षणया ज्ञापित इत्यर्थः ॥ ३५ ॥ ❀ ❀ तस्मात्सर्वेषामेव दर्शनानामप्रयोजकत्वात्पूर्वोक्तप्रकारेणैव कर्त्तव्यमित्युपसंहरति—**तस्मादिति** । **सर्वात्मनेति** । उत्तराङ्गसाहित्येन । **राजन्नि**त्यवधारणसामर्थ्यमुक्तम् । **हरिरिति** । साधनदशायां जातदुःखदूरीकरणार्थं **सर्वत्र सर्वदेति** । देशकालविचारो न कर्त्तव्यः । पूर्ववच्छ्रोतव्यादिफलार्थम्—**भगवानिति** । **नृणामिति** मनुष्यमात्रा[6]धिकारित्वम् ॥ ३६ ॥ ❀ ❀ एवं मार्गं वस्तुतत्त्वं चोक्त्वा प्रकरणस्य समाप्तत्वात्साधारणश्रवणस्यापि शुद्धिद्वारा भगवत्प्रापकत्वमाह—**पिबन्ति ये भगवत इति** । बहिःस्थितस्याऽन्तःप्रवेशनं पानम् । **भगवत आत्मनः सतामिति** । सर्वेषामेव भगवत्त्वेन भगवान् स्फुरति । सतां त्वात्मत्वेनाऽपि । सर्वे सकामाः सन्तः [7]प्रेमला इति विभागः । **कथैवाऽमृतम्** । **श्रवणपुटेषु** उत्तम्भितकर्णपुटेषु पूर्णम् । विषयैर्विदूषितमाशयं पुनन्ति । यथाऽन्तरसाध्यरोगव्याप्तौ वैद्यैरमृतरसेन सिद्धः क्रियते, तथाऽन्तःकरणमपि विषयसहितैर्वि[8]शेषेण दूषितं सर्वथा सन्मार्गानर्हं तादृशमपि पुनन्ति । क्रमात्तच्चरणसरोरुहान्तिकं वैकुण्ठं भक्तं वा प्राप्नुवन्तीत्यर्थः ॥ ३७ ॥

**इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां द्वितीयस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥**

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

**न ह्यतोन्य** इत्यत्र **स** इति । स्नेहत्वावच्छिन्न स्नेह इत्यर्थः । **तद्धेतुर्मार्ग** इति श्रवणादिरूप इत्यर्थः । **तत्रेति मार्गे**

---

१. परब्रह्मस्वरूपे इति ख. । २. ध्यानेनेति नास्ति ख. घ. । ३. तद्धेतुमार्ग इति ख. ग. । ४. मध्यमेति क. । ५. ज्ञात इति ख. ग. घ. । ६. मनुष्यमात्राधिकारित्वमिति ख. । ७. प्रेम्णा इति क. । ८. अतान्तविषयेत्यादि ख. ।

पूर्वभागः श्रवणादिः। मध्यभागः मनननिदिध्यासने। अग्रिमः सूक्ष्मध्यानरूपः। तत्रेति गमनसामग्रीविचार इत्यर्थः॥ ३३॥ ❀ ❀ भगवानित्यत्र पूर्वोक्तमिति। पूर्वं स्वयमुक्तमित्यर्थः। तत्साधकत्वेनेति भक्तिसाधकत्वेनेत्यर्थः। अन्यदितिपदाभ्यां मूलस्थतत्पदं तुरीयचरणश्च विवृत्तौ ज्ञेयौ॥ ३४॥ ❀ ❀ भगवान् सर्वभूतेष्वित्यत्र आहेति सकलदर्शनानां लक्षकत्वमाहेत्यर्थः। विवृतौ तैः सर्वैरिति शास्त्रकारैरित्यर्थः। कथं ज्ञात इत्याकाङ्क्षायामाहुः नैयायिकैरित्यादि। अन्धहस्तिवदिति। अन्धानुमितहस्तिवदित्यर्थः। तद्विशदयन्ति अनुभवेत्यादिना। दृश्यैरिति शास्त्रकारैरित्यर्थः। एतदेव मोक्षधर्मे उक्तं 'तमेव शास्त्रकर्त्तारः प्रवदन्ति मनीषिणः' इत्यादिना। मूलस्थं दृश्यैरितिपदं कर्तृवाचकमिदं ज्ञेयम्। जीवेष्वित्यादि। तादृशाश्च क्रियादयः सर्वकर्मका ज्ञेयाः। तथा च सर्वविषयकक्रियावत्त्वं, सर्वविषयककर्मत्वं, सर्वात्मत्वं, सर्वकरणत्वं, सर्वविषयकज्ञानत्वं, सर्वज्ञातृत्वं, सर्वज्ञानाधिष्ठातृत्वं च तत्तन्मते भगवल्लक्षणं ज्ञेयम्॥ ३५॥ ❀ ❀ तस्मादिति एकदेशज्ञापकत्वादित्यर्थः। तस्मादित्यत्र उत्तराङ्गसाहित्येनेति, चित्ताचाञ्चल्यसाहित्येनेत्यर्थः॥ ३६॥ ❀ ❀ पिबन्तीत्यत्र विषयसहितैरिति इन्द्रियैरित्यर्थः। एतेन मूलस्थं विषयपदं पापिवाचकपापपदवद्विषयिवाचकमिति ज्ञापितम्॥ ३७॥

इति श्रीद्वितीयस्कन्धसुबोधिनीप्रकाशे द्वितीयाध्यायविवरणम्॥ २॥

## श्रीगिरिधरकृता बालप्रबोधिनी

किं बहुनोक्तेन? भगवति ऐश्वर्यादिषड्गुणपूर्णे वासुदेवे वसुदेवनन्दने श्रीकृष्णे यतः साधनाद्भक्तियोगः परमस्नेहरूपो भवेदतोऽन्यः शिवः सुखकरः सुकरश्च संसृतौ जन्ममरणादिसन्तापयुक्ते संसारे विशतः पुंसस्ततो निस्सरणार्थं पन्था मार्ग इह शास्त्रे न ह्यस्ति। भक्तिसाधक एव मार्गः समीचीन इत्यर्थः॥ ३३॥ ❀ ❀ न केवलं मयैवैवमुच्यते किन्तु ब्रह्मणाऽपि तथैव निश्चितत्वादित्याशयेनाह—भगवानिति। ज्ञानादिगुणवानपि ब्रह्मा कूटस्थो निर्विकार एकाग्रचित्तः सन् स्वमनीषया त्रिः त्रीन् वारान् कार्त्स्न्येन साकल्येन ब्रह्म वेदमन्वीक्ष्य विचार्य यतः साधनादात्मनि भगवति रतिर्भक्तिर्भवेत्तदेव साधनं समीचीनमार्गं तयाऽध्यवस्यत् निश्चितवानित्यन्वयः॥ ३४॥ ❀ ❀ नन्वनुभूतेऽर्थे रतिर्भवति अननुभूते तु भगवति रतिः कथं स्यादित्याशङ्क्याह—भगवान् हरिः सर्वभूतेषु लक्षितः अनुभूतः कथं? स्वात्मना जीवान्तर्यामितया। कैः? दृश्यैर्बुद्ध्यादिभिः। तदेव द्विधा दर्शयति—दृश्यानां जडानां दर्शनं स्वप्रकाशं द्रष्टारं विना न घटत इत्यनुत्पत्तिमुखेन लक्षणैः स्वप्रकाशान्तर्यामिलक्षकैः, तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति व्याप्तिमुखेनाऽनुमापकैश्च स्वतन्त्रः कर्तेश्वरः सिद्ध्यति॥ ३५॥ ❀ ❀ यच्छ्रोतव्यमित्यादिप्रश्नोत्तरमुपसंहरति—तस्मादिति। तवाप्येतत्सम्मतमिति सूचयन् सम्बोधयति—हे राजन्निति। यस्माद्भगवद्भक्तिं विना न सर्वथा संसारभयनिवृत्तिस्तस्मात् सर्वात्मना एकाग्रेण मनसा सर्वत्र सर्वदेशे सर्वदा सर्वकाले च हरिः भक्तजनसंसारदुःखहर्त्ता भगवान् ऐश्वर्यादिभगवत्त्वेन सर्वथा दुःखनिवारणे समर्थो दशविधलीलाविशिष्टो नृणां नृभिः श्रोतव्यः कीर्तितव्यः स्मर्त्तव्यश्चेत्यन्वयः॥ ३६॥ ❀ ❀ तच्छ्रवणफलमाह—पिबन्तीति। सतां सद्भिर्भगवद्भक्तैः स्वश्रवणपुटेषु सम्भृतं सर्वात्मनो भगवतः कथारूपममृतं ये पिबन्ति बहिस्स्थपदार्थस्यान्तस्स्थापनस्यैव पानशब्दार्थत्वादादरेण श्रुत्वाऽन्तःकरणे स्थापयन्ति ते विषयवासनाभिर्दूषितमाशयं स्वान्तःकरणं पुनन्ति शोधयन्ति, तस्य भगवतश्चरणसरोरुहस्यान्तिकं समीपं व्रजन्ति च॥ ३७॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा॥ १॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी॥ २॥
रचिता च द्वितीयेऽत्र तत्त्वध्याननिरूपणे। द्वितीयो विवृतोऽध्यायः सूक्ष्मध्याननिरूपकः॥३॥

## हिन्दी अनुवाद

संसार-चक्रमें पड़े हुए मनुष्यके लिये जिस साधनके द्वारा उसे भगवान् श्रीकृष्णकी अनन्य प्रेममयी भक्ति प्राप्त हो जाय, उसके अतिरिक्त और कोई कल्याणकारी मार्ग नहीं है॥ ३३॥ ❀ ❀ भगवान् ब्रह्माने एकाग्र चित्तसे सारे वेदोंका तीन बार अनुशीलन करके अपनी बुद्धिसे यही निश्चय किया कि जिससे सर्वात्मा भगवान् श्रीकृष्णके प्रति अनन्य प्रेम प्राप्त हो, वही सर्वश्रेष्ठ धर्म है॥ ३४॥ ❀ ❀ समस्त चर-अचर प्राणियोंमें उनके आत्म-रूपसे भगवान् श्रीकृष्ण ही लक्षित होते हैं, क्योंकि ये बुद्धि आदि दृश्यपदार्थ उनका अनुमान करनेवाले लक्षण हैं, वे इन सबके साक्षी एकमात्र द्रष्टा हैं॥ ३५॥ ❀ ❀ परीक्षित! इसलिये मनुष्योंको चाहिए कि सब समय और सभी स्थितियोंमें अपनी सम्पूर्ण शक्तिसे भगवान् श्रीहरि का ही श्रवण-कीर्तन और स्मरण करें॥ ३६॥ ❀ ❀ राजन्! संत पुरुष आत्मस्वरूप भगवान् की कथाका मधुर अमृत बाँटते ही रहते हैं; जो अपने कानके दोनों में भर-भरकर उसका पान करते हैं, उनके हृदयसे विषयोंका विषैला प्रभाव जाता रहता है, वह शुद्ध हो जाता है और वे भगवान् श्रीकृष्णके चरण-कमलोंकी सन्निधि प्राप्त कर लेते हैं॥ ३७॥

दूसरा अध्याय समाप्त

# अथ तृतीयोऽध्यायः

## श्रीशुक उवाच

**एवमेतन्निगदितं पृष्टवान् यद् भवान् मम । नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणाम् ॥१॥**
**ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिम् । इन्द्रमिन्द्रियकाम[1]स्तु प्रजाकामः प्रजापतीन् ॥२॥**
**देवीं मायां तु श्रीकामस्तेजस्कामो विभावसुम् । वसुकामो वसून् रुद्रान् वीर्यकामोऽथ वीर्यवान् ॥३॥**
**अन्नाद्यकामस्त्वदितिं[2] स्वर्गकामोऽदितेः सुतान् । विश्वान्देवान् राज्यकामः साध्यान्संसाधको विशाम् ॥४॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तृतीये विष्णुभक्तेस्तु वैशिष्ट्यं शृण्वतो मुनेः ॥ भक्त्युद्रेकेण तत्कर्मश्रवणादर ईर्यते ॥ १ ॥

इदानीमन्यदेवताभजनस्यापि पुत्रादिभजनवदेव तुच्छफलत्वेन हेयत्वं वक्तुं पूर्वोक्तमनुवदति । एवमिति । ममेति माम् । कदाचिद्दैवयोगेन मनुष्यत्वं प्राप्तेषु जीवेषु ये मनीषिणस्तेषां तत्रापि ये म्रियमाणास्तेषां विशेषत एवमेतद्धरिकथाश्रवणादिकं निगदितं विहितमित्यर्थः ॥ १ ॥ ❀ ❀ ब्रह्मणस्पतिं वेदस्य पतिं ब्रह्माणं यजेत । इंद्रियपाटवकामस्त्विद्रम् । प्रजाकामः प्रजापतीन्दक्षादीन् ॥ २ ॥ ❀ ❀ मायां दुर्गाम् । विभावसुमग्निम् । वसुकामो धनार्थी । वीर्यं प्रभावस्तत्कामो वीर्यवान्स-न्रुद्रान् यजेत् ॥ ३ ॥ ❀ ❀ अन्नाद्यं भोज्यं भक्ष्यं च । अदितेः सुतान्द्वादशादित्यान् विशां देशस्थप्रजानां स्वाधीनता-मिच्छन् साध्यान् यजेत् ॥ ४ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

मुनेः सकाशाद्विष्णुभक्तेराधिक्यं शृण्वतो राज्ञो विष्णुकर्मश्रवणादरो वर्ण्यते । म्रियमाणानां नृणां कृत्यं यत्पृष्टं तदेतत् । योगिमते स्मृतिद्वयं निगदितम् । तथा तेष्वेव मनुष्येषु मध्ये ये मनीषिणो म्रियमाणा भवद्विधास्तेषामेतच्छ्रवणकीर्त्तनस्मरणकथा-मृतादि निगदितम् ॥ १ ॥ ❀ ❀ ये च तेष्वेव मनुष्येषु मंदधियस्तेषां च कृत्यं शृण्वित्याह यद्वा । किं वा भजनीयमिति यत्पृष्टं तत्र प्रथमं मंदधियां भजनीयानाह 'ब्रह्मवर्चस०' इत्यादिना 'कामकामो यजेत्सोमम्' इत्यंतेन । प्रजाकामो जनकामः । 'प्रजां तु जनपुत्रयोः' इति यादवः ॥ २ ॥ ❀ ❀ श्रीर्लक्ष्मीः शोभा च । 'तेजो बले प्रभावे च ज्योतिष्यर्चिषि रेतसि' इति कोशात् । प्रभावेच्छुः । वसु हिरण्यं गावश्चेति । वीर्यकामो बहुस्त्रीसंभोगार्थं शुक्राधिक्यकामः । 'वीर्यं पराक्रमे रेतस्यन्नमाहात्म्ययोरपि' इति च ॥ ३ ॥ ❀ ❀ यद्दन्तैरवखंड्यावखंड्य भक्ष्यतेऽपूपादि तद्भक्ष्यम् । यत्तु केवलं जिह्वया विलोड्य निगीर्यते संयावादि तद्भोज्यमिति विवेकः । साध्यान्साध्यसंज्ञान् ॥ ४ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या ।

० ॥ १—६ ॥

### श्रीमद्वीरराघवव्याख्या ।

एवं मुमुक्षोर्भगवच्छ्रवणादिकं कर्तव्यमित्युक्तम् अथ तदेव व्यतिरेकमुखेन द्रढीयतुमन्यदेवतानां क्षुद्रफलत्वं वक्ष्यन् पूर्वोक्तमनुवदति एवमिति । मनुष्येषु कदाचिद्दैववशान्मनुष्यत्वं प्राप्तेषु जीवेषु ये मनीषिणः तेषां तत्रापि ये म्रियमाणास्तेषां विशेषतो यत्कर्तव्यं पुरा मां प्रति पृष्टवान् तद्भगवच्छ्रवणादिकमेवेत्येवं निगदितमुक्तमित्यर्थः ॥ १ ॥ ❀ ❀ कामफलप्राप्त्यर्थमन्येषां देवतानां भजनमाह ब्रह्मवर्चसेत्यादिना । ब्रह्मवर्चसं कामयमानः ब्रह्मणस्पतिं वेदपतिं यजेत । इंद्रियकामः इंद्रियसामर्थ्यकामः इंद्रं यजेतेत्यनुषंगः एवमग्रेऽपि प्रजापतीन् दक्षादीन् ॥ २ ॥ ❀ ❀ देवीं देवस्य विष्णोः संबंधिनीं मायां विस्मापनीयशक्तिम् । विभावसुमग्निं वसुकामः अर्थकामः वसून् यजेत वीर्यकामस्तु रुद्रान् यजेत यजनफलमाह वीर्यवानिति । भवेदिति शेषः । इदं सर्वत्र तत् फलावाप्तेरुपलक्षणम् ॥ ३ ॥ ❀ ❀ अन्नं भोज्यम् । आद्यं भक्ष्यं खरं विशदमभ्यवहार्यं भोज्यं खरं कठिनं विशदं विविक्तावयवं ❀ भक्ष्यमिति विशेषः । तदुभयकामोदितिं यजेत् । अदितेः सुतान् देवानादित्यान्वा विशां साधकः दिक्पति-त्वकामः ॥ ४ ॥

---

१ प्रा० पा० कामाय । २ प्रा० पा त्वतिथिं ।

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या।

हरेः श्रवणादिजनितभगवद्भक्तिरेवापेक्षिताशेषपुरुषार्थसाधनं नान्यदन्यदेवतायागादिकं प्रातिस्विकफलदं तदपि हर्यैकायत्तमित्येतदस्मिन्नध्याये निरूप्यते तत्र प्रथमतो वृत्तमनुवदति एवमिति। भवान् मनुष्येषु मध्ये म्रियमाणानां मनीषिणां नृणां यत्कर्तव्यत्वेन म सकाशे पृष्टवान् तदेवं निगदितं यद्वा मनुष्येषु म्रियमाणानां नृणां यत्कर्तव्यत्वेन मनीषिणां मतं पृष्टवानेतदिति ॥ १॥ ❀ ❀ इदानीं प्रातिस्विकफलप्रदं यागप्रकारमाह ब्रह्मेति। ब्रह्मवर्चसकामो वृत्तध्ययनसंपत्कामः। शिष्यप्रशिष्यादिषु वेदप्रणेतृत्वेन ब्रह्मणस्पतिं वेदस्य पतिं बृहस्पतिं बृहजातिजीवकमलासनशब्दराशिष्विति धाताश्च यजेत। तत्तत्तंत्रोक्ततत्तद्रव्यैरिति शेषः। तुना ब्रह्मणि बुद्धिं सूचयति। इंद्रियकामश्चक्षुरादींद्रियपाटवकामः शुक्रस्तंभनकामो वा प्रजाकामः प्रजा तु जनपुत्रयोरिति यादवः। प्रजापतीन् कश्यपादीन् ॥ २॥ ❀ ❀ मायां देवीं लक्ष्मीं विभावसुमग्निं "तेजो बले प्रभावेऽन्ने ज्योतिष्यर्चिषि तेजसी" ति च। वसुकामो हिरण्यकामः वीर्यकामः "वीर्यपराक्रमे तेजस्यन्नमाहात्म्ययोरपि" इति च ॥ ३॥ ❀ ❀ विशां वैश्यानाम् ॥ ४॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

॥ ० ॥ १,२ ॥

वीर्य्यवान् गलच्छेदनादिसाहसवानित्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

तृतीये तु नृणां क्षुद्रफलैवान्यसुरार्चना। तथैवेन्द्रियवैफल्यञ्चोक्तं भक्तिमृते हरेः॥

म्रियमाणानां नृणां कृत्यं यत् पृष्टं तदेतत् योगमते स्मृतिद्वयं निगदितम्। तथा तेष्वेव मनुष्येषु मध्ये ये मनीषिणो म्रियमाणास्तेषां भवद्विधानामेवम् एतत् श्रवणकीर्त्तनस्मरणकथामृतादि निगदितम् ॥ १॥ ❀ ❀ ये च तेष्वेव मनुष्येषु मध्ये मन्दधियस्तेषाञ्च कृत्यं शृण्वित्याह। यद्वा किं वा भजनीयमिति। यत् पृष्टं तत्र प्रथमं मन्दधियां भजनीयानाह ब्रह्मवर्चसेत्यादिना कामकामो यजेत् सोमम् इत्यन्तेन। ब्रह्मणः पतिं वेदपतिं ब्रह्माणम्। प्रजापतीन् दक्षादीन् ॥ २॥ ❀ ❀ मायां दुर्गाम्। विभावसुम् अग्निम्। वीर्य्यवान् बलवान् पुरुषः वीर्य्यकामः बहुस्त्रीसम्भोगार्थं शुक्राधिक्यकामश्चेद् रुद्रान् यजेत् ॥ ३॥ ❀ ❀ अन्नाद्यं भोज्यं भक्ष्यञ्च। अदितेः पुत्रान् द्वादशादित्यान्। विशां कृषिवाणिज्यादीनां साधकः साधने प्रवृत्तः साध्यान् ४

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवं भगवद्भजनस्य मोक्षहेतुतया मुमुक्षूपादेयत्वमुक्तमिदानीं तदेव द्रढयितुमितरदेवभजनस्य बुभुक्षूपादेयत्वं वक्ष्यन् पूर्वोक्तमनुवदति एवमिति। मनुष्येषु कदाचिद्दैवयोगेन मनुष्यत्वं प्राप्तेषु जीवेषु ये मनीषिणस्तेषां तत्रापि विशेषतो म्रियमाणानां यत् कर्त्तव्यं प्रति मम मां पृष्टवान्। तदेवमेतद्धरिकथाश्रवणादिकं निगदितमुक्तम् ॥ १॥ ❀ ❀ ब्रह्मवर्चसं कामयमानो जनः ब्रह्मणस्पतिं वेदपतिं यजेत् पूजयेत् इंद्रियसामर्थ्यकामः प्रजापतीन् दक्षप्रभृतीन् ॥ २॥ ❀ ❀ देवीं मायां देवस्य भगवतः संबंधिनीं योगमायां शक्तिविशेषरूपाम्। विभावसुमग्निम्। वसुकामो धनकामः वीर्यकामः प्रभावकामः रुद्रान् यजेदथ यजनानंतरं वीर्यवान् स्यात् ॥ ३॥ ❀ ❀ अन्नं भोज्यं संश्लिष्टावयवम् आद्यं भक्ष्यं विविक्तावयवम् तदुभयकामः अदितेः सुतान् द्वादशादित्यान्। विशां देशस्थप्रजानां संसाधकः स्वकीयत्वमिच्छन्साध्यान् यजेत् ॥ ४॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

श्रोतव्यविषयत्वेन तत्त्वमेवं निरूपितम्। उद्देशेनाऽस्य निपुणं साधनं विनिरूप्यते ॥ १॥
अदृष्टं साधनं वाच्यं दृष्टं चाऽप्यत्र सम्मतम्। अन्यथा क्रियमाणस्तु विमर्शो व्यर्थतां व्रजेत् ॥ २॥
इन्द्रियाणामदुष्टत्वे ह्यनुकूले तथेश्वरे। साध्यं सम्पद्यते पूर्णमतोऽत्र द्वयमीर्यते ॥ ३॥
श्रद्धाऽपि तदभिप्रायाच्छ्रोतुवक्तुश्च गम्यते। तस्मात्साधनसंयुक्तः शृणुयान्नेतरो वृथा ॥ ४॥

एवमध्यायद्वयेन श्रवणं सविषयं निरूप्य, महाफले श्रवणे सर्वेषामप्रवृत्तिं दृष्ट्वा, किञ्चिदस्ति निमित्तं यतः सर्वे न प्रवर्त्तन्त इत्याकाङ्क्षायां विषयस्य निर्दुष्टत्वात्करणदोषो वा तदधिष्ठातृदोषो वा भवेदित्याशङ्क्य, तयोरप्यधिष्ठातुर्बलिष्ठत्वात्तत्प्रतिबन्धादेव श्रवणादिष्वप्रवृत्तिरिति विनिश्चित्य, देवतानां भजने तत्प्रतिबन्धो गमिष्यतीति पूर्वं देवतान्तरभजनं साधनीयं तत इन्द्रियाणां

१ यथा इति ग०।

च शोधनमित्याशङ्क्य, देवतान्तरभजने पुनर्बहिर्मुखत्वात्तेषां नियतफलजनकत्वाच्च प्रतिबन्धाभावार्थं क्रियमाणे भजने दोषान्तरमापद्येतेति तेषां फलानां नियतत्वं प्रतिपादयितुं प्रथमं पूर्वेण संश्लेषं निवारयितुं पूर्वोक्तमुपसंहरति—एवमेतदिति । मम मां प्रति । नृणां मध्ये ये म्रियमाणास्तेषामप्युक्तं मनुष्याणामपि मध्ये ये मनीषिणस्तेषामप्यर्थे श्रवणादिकमुक्तमित्यर्थः ॥१॥ ❀ ❀ पूर्वोक्तमुपसंहृत्य देवतान्तरभजननिराकरणार्थं स्वमते अष्टाविंशतिदेवास्तत्स्वरूपाः, वेदे च ये त्रयस्त्रिंशद्देवा वसवो रुद्रा आदित्या इन्द्रः प्रजापतिश्चेति तेऽप्यत्रोक्तास्तत्स्वरूपेण । किं बहुना । सर्वे तत्त्वेष्वन्तर्भूताः । ते' त्वष्टाविंशतिः । "एते देवाः कला विष्णोरि"ति वाक्यात् । ते च प्रजापतिप्रभृतिसोमान्ताः तत्र प्रथमं रजोगुणाभिमानिनी देवता ब्रह्मणस्पतिः । वेदादिकर्त्ता जगन्निर्माता चेत्यर्थः । तद्भजने ब्रह्मतेजो भवतीति ब्रह्मवर्चसकाम एव तं भजेदित्यर्थः । ततः सत्त्वाभिमानिनी इन्द्रो देवता यज्ञादिरूपः । तद्भजने इन्द्रियसिद्धिर्भवतीति इन्द्रियकामस्तं भजेत । एवमुत्तरत्राऽपि । प्रजाकामः ²पुत्रकामः । प्रजापतीन् मरीच्यादीन् । तमोधिष्ठात्रीं देव³ताम् । देवीं मायाम् । प्रकृत्यधिष्ठात्रीं देव⁴ताम् । श्रीकामः धनकामः । सम्पत्तिरूपं धनम् । तेजस्कामः । स्वस्मिन्नधृष्यं तेजः । दुर्द्धर्षत्वमिति यावत् । विभावसुरग्निः । वसुकामः धनमात्रकामः । वसून् द्रोणादीन् । ⁵रुद्रान् वामादीन् । वीर्यकामः पराक्रमकामः । अत्र फले विशेषमाह—अथ वीर्यवानिति । तदनन्तरमेव वीर्यवान् भवति । वागभिमानिनी देवता अग्निः । गन्धाभिमानिनी देवता वसवः । रुद्रा आकाशस्य । अदितिर्भूमेः । अन्नाद्यकामः । अन्नभोजनकामः । अन्नभक्षणसामर्थ्यमन्नसमृद्धिर्वा । स्वर्गकामः स्वर्गलोककामः अदितेः सुतान् द्वादशाऽऽदित्यान् । ते⁶जोऽभिमानिनी । विश्वेदेवाः विश्वायाः पुत्राः । राज्यकामः । साध्यान् साध्यायाः पुत्रान् । विशां देशस्थप्रजानां संसाधकः स्वाधीनकरणेच्छुः । विश्वेदेवा जलस्य । साध्या वायोः ॥ १—४ ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ तृतीयाध्यायं विवरिषवः पूर्वप्रकरणस्य समाप्तत्वात्तदर्थमनुवदन्तः प्रस्तूयमानप्रकरणार्थनिरूपणमुखेन तयोर्हेतुहेतुमद्भावरूपं सङ्गत्यन्तरमपि स्फुटीकुर्वन्ति, अन्यथा एतादृशे महाफले कुतो न सर्वेषां प्रवृत्तिरिति शङ्का स्यादिति तामपि निवारयन्ति, ( कारिकायां ) श्रोतव्येत्यादि । श्रोतव्यविषयेत्यत्र कर्मधारयः । तेन रूपेणैवं प्रमाणादिपूर्वकं द्वाभ्यां वस्तुतत्त्वं शुकेन उद्देशेन निरूपितम् । अस्य श्रवणस्य निपुणं फलोपकारि साधनं विनिरूप्यते, इदानीं शुकेन व्यासपादैश्चोच्यते इत्यर्थः ॥ १ ॥

एवं पूर्वप्रकरणार्थनिरूपणमुखेन सामान्यतस्तं प्रत्यस्य हेतुतां प्रदर्श्योत्तरं प्रत्यपि तां दर्शयितुं विशेषाकारेणास्यार्थमाहुः अदृष्टमित्यादि । अदृष्टं दृष्टञ्च साधनमत्रापि सम्मतमवश्यं वाच्यं वचसा स्फुटीकरणीयम् । ननु शाब्दज्ञानस्य सङ्केतग्रहमात्रसापेक्षस्य पूर्वाध्यायाभ्यां जातत्वात् किमन्येन स्वरूपोपकारिणा, श्रवणस्य फलजननेऽसहायशूरत्वात्किमन्येन फलोपकारिणेत्याशङ्कायां दृष्टादृष्टसाधनस्य सम्मतत्वेऽवश्यवाच्यत्वे च गमकमाहुः अन्यथेत्यादि । साधनान्तरस्यासम्मतत्वेऽनावश्यकत्वे च क्रियमाणः ब्रह्मवर्चस्कामेनेत्यादिना शुकेना "युरि" त्यादि २।३।१। शौनकवाक्योपन्यासाद् व्यासचरणै 'र्भूयः' २।४।६। इत्यादिप्रश्नै राज्ञा, पुनः २।४।१२। नमनादिवाक्यैः शुकेन क्रियमाणः अग्रिमप्रकरणे क्रियमाणो विमर्शो व्यर्थतां व्रजेत् , जाते शाब्दज्ञाने मुधैव स्यादतो ज्ञायते निर्धार उद्देशमात्रेण न भवतीति तेन दृष्टादृष्टसाधनकथनमावश्यकमित्यर्थः ॥ २ ॥

किन्त्वित्याकाङ्क्षायामाहुः इन्द्रियेत्यादिसार्द्धेन, साध्यं श्रवणं कीर्त्तनञ्च पूर्णं तात्पर्यनिर्द्धारान्तं तत्पूर्वकञ्च सम्पद्यते । अतो हेतोः अत्र प्रकरणे द्वयं पूर्वार्द्धोक्तमदृष्टं दृष्टञ्च साधनद्वयमीर्यते । तमेवाभिप्रायमनुसन्धाय द्वयोः श्रद्धापि ज्ञाप्यते, गम्यत इति णिजन्तात्कर्मणि प्रयोगः । एवञ्चात्र साधनद्वयस्य प्रतिपाद्यत्वेप्यदृष्टस्य दृष्टद्वारैवावगमाद्दृष्टाया भगवदनन्यत्वरूपायाः श्रद्धायाः स्फुटत्वात्तस्या एव मुख्यतया प्रकरणार्थतेति न पूर्वोक्तविरोध इत्यर्थः ॥ ३–३½ ॥

तेन फलितमभिप्रायान्तरमाहुः तस्मादित्यादि । एवं प्रकरणार्थनिर्द्धारादयं व्यासाशयो ज्ञायते इत्यर्थः ॥ ४ ॥ ( कारिकाः समाप्ताः )

एवं सङ्गतिं दर्शयित्वाऽन्यभजनबोधकवाक्यानामुपोद्घातरूपां सङ्गतिं प्रकृतार्थे दर्शयिष्यन्तः पीठिकामाहुः एवमित्यादि, तयोरिति, तयोर्मध्ये । बहिर्मुखत्वादिति इन्द्रियाणां तथात्वात् । इतिर्हेतौ ॥ १ ॥ ❀ ❀ ब्रह्मवर्चसेत्यादीनां तात्पर्योक्तौ निराकरणार्थमिति । तद्भजनमनुवदतीति शेषः । वेदेत्यादि । तथा च, बृहदारण्यके 'कत्येव देवा' इति शाकल्यप्रश्ने याज्ञवल्क्येन तथा निर्द्धारात्तावतीषु यथा सर्वान्तर्भावस्तथात्रापीति । तावतैव सर्वेतरभजननिराकरणसिद्धिरित्यर्थः । सर्वे इति । तत्र पक्षान्तरेणोक्ताः अन्यत्रोक्ताश्च । ते चेत्यादि । तथा च, त एवात्र नामान्तरेणोच्यन्ते इत्यर्थः । अन्तर्भावश्च द्वादशादित्येषु श्रौतानां मासानां 'आददानायन्ती' ति व्युत्पत्तेरुभयत्र साधारण्यात् । साहङ्कारेष्विन्द्रियेषु, प्राणरूपाणां रुद्राणां, सोमे नक्षत्राणां, 'नक्षत्रा-

१ तेष्वष्टाविंशति ख० । २ पुत्रकाम इति नास्ति क्वचित् । ३ देवतामिति ख० । ४ देवतामिति ख० । ५ रुद्रादीनिति क० । ६ तेजोऽभिमानिन इति ग० ।

णामहं शशी' ति वाक्यात्, शेषाः स्फुटा इवेति ज्ञेयम् । सत्त्वाभिमानिनीत्यादि । इन्द्रस्य सत्त्वाभिमानित्वं देवमुख्यत्वात्, देवानां सत्त्वारब्धत्वादिति । **प्रजापतीनिति** । एतेषां तमोधिष्ठातृत्वं प्रजायाः संसाराविच्छेदापादकत्वेन तामसत्वात् तत्पतित्वेन तत्राधिकृतत्वात् ॥ २ ॥ ❀ ❀ **देवीमित्यनेन** ब्रह्मानन्दरूपा व्यावर्त्यते । **वागभिमानिनीति** 'तेजोमयी वागि' ति श्रुतेर्वाचस्तेजोविकारत्वेन तेजस्कामस्य तद्भजनकथनादिदमवगम्यते । वसूनां गन्धाभिमानित्वं गन्धगुणकभूर्लोकजयश्रावणेनाग्रे व्युत्पाद्यम् । तथैव रुद्राणामाकाशाभिमानित्वमाकाशजयेनाग्रेतनग्रन्थाद्बोध्यम् । रुद्रभजने तात्कालिकफलकथनं विश्वासजननेन तद्भजनस्य दुर्वारत्वायेति बोध्यम् ॥ ३ ॥ ❀ ❀ **अन्नम् अद्यम्**, आद्यं वा यत्रेत्यन्नाद्यमिति व्युत्पत्तौ समृद्धिरप्यन्नाद्यपदेनायातीत्यतः पक्षान्तरमाहुः **अन्नसमृद्धिर्वेति** । **जलस्येति** विश्वेषां जलाभिमानित्वं, 'सर्वा देवता आप' इति श्रुतेर्जलस्य तथात्वेन विश्वेषां च सर्वदेवाधिष्ठातृत्वाज्ज्ञेयम् । **साध्यानां** वाद्यभिमानित्वं फलबलाद्वायुवदन्तर्बहिर्वर्त्तित्व एव चित्तपरावर्त्तनादिसिद्धिरिति । **लोकमातृत्वं गुण इति** । एतं गुणमनुसन्धायैव तद्भजनार्थमयमुक्त इत्यर्थः । श्रुतौ 'इदं द्यावापृथिवी सत्यमस्तु पितर्मातरि' त्युक्तत्वादेवं मातृत्वं न युक्तमित्यरुच्या पक्षान्तरमाहुः **मातृवेत्यादि** । 'गौरी १ पद्मा २ शची ३ मेधा ४ सावित्री ५ विजया ६ जया ७ देवसेना ८ स्वधा ९ स्वाहा १० मातरो लोकमातर' इति स्मृतौ तासु तथात्वस्य प्रसिद्धत्वेन तद्रूपत्वमनुसन्धायेत्यर्थः । **पुण्यजना जलस्येति** । **अत्र स्पर्शस्येति** पाठः प्रतिभाति । पूर्वमग्रे च स्पर्शदेवताया अनुक्तत्वात् । 'प्रतिसिञ्चन् विचिक्रीडे यक्षीभिर्यक्षराडिवे' त्यादौ तेषु स्पर्शसुखवत्वप्रसिद्धे विश्वेषु देवेषु स्पर्शसुखगमकानुपलम्भाच्च । अत्र यद्यपि मूले ब्रह्मणस्पतिप्रभृतीनां रजआद्यधिष्ठातृत्वं न प्रोक्तं, तथापि श्रुतिपुराणान्तराद्युक्तं ज्ञेयम् । वाराहे अदितेतावृत्तान्ते, गणपतेराकाशाभिमानित्वस्य स्कन्दस्याहङ्काराधिष्ठातृतायाश्चोक्तत्वेनान्यत्रैवं क्रमस्यापि सम्भावितत्वादिति । नन्वत्रेतरभजननिराकरणार्थं तेषु वाक्येषु तत्तत्कामनाया उल्लेखो न युक्तः, लोकप्रवाहसिद्धत्वात् । तथा देवतानामप्युल्लेखो न कर्त्तव्यः । **अकाम** इति श्लोकस्थस्य यजेतेति पदस्य परिसङ्ख्यात्वे सुखेन तन्निवृत्तिसम्भवादित्याकाङ्क्षायां तत्कथनप्रयोजनं वक्तुं तेषु यजिप्रयुक्ताया देवपूजायाः स्वरूपमाहुः **इयमित्यादि** । 'वाक्यान्वया' धिकरणे 'पुनश्च भूयाद्भगवत्यनन्ते रति' रित्यत्र प्रथमस्कन्धे चोपपादितत्वात्तथेत्यर्थः । ननु तत्तत्कामना तर्हि न स्यात् सर्वासु कामनासु स एव स्नेहविषयत्वेन तदर्थकक्रियोद्देश्यत्वेन च प्रकाशेतेत्याकाङ्क्षायां तथा तदप्रकाशे हेतुमाहुः **स तथेत्यादि** । ननु वेदे ब्रह्मण औपनिषदत्वस्य उक्तत्वात्तेन तत्प्रकाशस्य सम्भवान्न तत्र तेजोपेक्षेत्यत आहुः **वेदेनेत्यादि** । निषेधतयैव निरूपणात्तथेत्यर्थः । **साक्षादिति** केवला इत्यर्थः । ननु तर्हि धर्मोक्तेः का गतिरित्यत आहुः **नापीत्यादि** । तदुक्त्या यथाकथञ्चन शाब्दं भवतु न तु तत्प्रत्यक्षमपि वेदोक्तसाधनैः प्रत्यक्षेऽपि ब्रह्मणि समवेता अपि धर्मा अभिव्यञ्जकस्य सहकारिणोऽभावात्प्रत्यक्षतया **न** प्रकाशन्ते इत्यर्थः । **सामर्थ्यमिति**, कामयितव्यमित्यर्थः । तत्र हेतुः **न हीत्यादि** । तथा चात्र कामितस्य लोकप्रवाहसिद्धत्वाभावात्तदुल्लेख इत्यर्थः । देवतोल्लेखप्रयोजनमाहुः **तद्ब्रह्मेत्यादि** । तथा चात्रोक्तानां देवतानामप्यतिरिक्तत्वात्परिसङ्ख्यापि वक्तुमशक्येत्यतस्तदुभयकथनमित्यर्थः । इममेव प्रकारमग्रेप्यतिदिशन्ति **एवमित्यादि** । 'इन्द्रस्ये' त्यादिश्रुतिस्तु तैत्तरीयसंहिताद्वितीयाष्टकेस्ति । 'इन्द्रस्य वृत्रं जघ्नुष इन्द्रियं वीर्यं पृथिवीमनुष्याच्छन्तदोषधयो विरुधोभवन्निति स प्रजापतिं पशूनब्रवीदेतस्मै सन्नयतेति तेभ्यात्मन् समनयत्, तत्प्रत्यदुहन्नि' त्याद्युक्त्वा तत इन्द्रेण 'न तु मयि श्रयते' इत्युक्ते, 'एतदस्मै श्रितं कुरुते' त्याज्ञप्ते, ततः श्रवणोत्तरमिन्द्रेण 'न तु मा धिनोती' त्युक्ते, 'एतदस्मै दधिकुरुते' ति दधिकरणं तत्रोक्तम् । तेनेन्द्रस्य तथात्वात्स एव सेव्य इत्यर्थः । अत्रान्नान्नाद्ययोः कथं सेवासाधनत्वमित्याकाङ्क्षायामाहुः **यद्यदित्यादि** । तदभावे लोक इष्टतमस्य स्वप्रियस्य चाभावाद्वाक्यार्थबाधापत्तिरिति तेन तयोस्तथात्वमित्यर्थः । अदित्युपाख्यानं "त इमं लोकमजयन्नि" त्यादिश्रुतिश्च सप्तमाष्टके पठ्यते । **तद्वृत्तानुवृत्त्येति** रोदस्योः वृत्तस्य लोकमातृत्वरूपस्य पोषकत्वनुसरणेन । 'रूपमि' ति श्रुतिस्तु वाजसनेयिनां मण्डलब्राह्मणस्था । एवमेतेन सन्दर्भेण कामनाया भगवत्सेवोपयोगित्वेन देवतानाञ्च वायोः क्षेपिष्टत्ववत्तत्तत्सामर्थ्यवद्भगवदंशत्वेन लोकप्रवाहसिद्धेभ्यो भेदः साधितः ॥ ४ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

तृतीये भगवद्भक्तेः श्रेष्ठत्वं शृण्वतो मुनेः । तल्लीलाश्रवणे श्रद्धा शौनकस्य निरूप्यते ॥ १ ॥

देवतान्तरभजनस्य तुच्छफलत्वेन हेयत्वमभिप्रेत्य तत्फलं निरूपयिष्यन् पूर्वोक्तमनुवदति—एवमिति । म्रियमाणानामासन्नमृत्यूनां नृणां कृत्यं यद्भवान् मम मां पृष्टवांस्तदेवमुक्तप्रकारेण एतद्धरिकथाश्रवणादिकं निगदितं शास्त्रेषु विहितमित्यन्वयः । तर्हि बहवो म्रियमाणा दृश्यन्ते ते कुतो न तत्कुर्वन्तीत्याशङ्क्याह—मनुष्येष्विति । मनुष्यत्वं प्राप्तेषु जीवेषु ये मनीषिणो विवेकिनस्तेषामित्यर्थः । पशुवद्विषयासक्तत्वेन अशुद्धबुद्धित्वेन च कर्त्तव्याकर्त्तव्यविवेकाभावान्न ते तत्कुर्वन्तीति भावः ॥ १ ॥ ❀ ❀ तत्तद्देवताभजनफलान्येव दर्शयति—देवाध्ययनादिजनितं तेजो ब्रह्मवर्चसं तत्कामयमानस्तु ब्रह्मणस्पतिं वेदप्रवर्त्तकं ब्रह्माणं

---

१. वेदादिप्रवर्तकब्रह्मणस्पतिपुरस्सरसोमपर्यन्तानां अष्टाविंशतेर्देवतानां सकामानि भजनानि दर्शयति इति वल्ल० सु० ।

यजेत भजेत । इन्द्रियसामर्थ्यकामस्तु इन्द्रं भजेतेत्यनुषङ्गः । एवमग्रेऽपि प्रजाकामः पुत्रकामः प्रजापतीन् दक्षा[1]दीन् भजेत ॥ २ ॥ ❀ ❀ श्रीकामः हस्त्यश्वादिसम्पत्तिकामो देवीं देवस्य भगवतः शक्तिरूपां मायां भजेत । तेजो दुर्धर्षत्वं तत्कामो विभावसुमग्निं भजेत । वसुकामो धनमात्रार्थी द्रोणादीन् वसून् भजेत । वीर्यं प्रभावस्तत्कामो रुद्रान् भजेत, ततश्चाथानन्तरमेव वीर्यवान् भवतीति शेषः ॥ ३ ॥ ❀ ❀ अन्नं भोज्यं आद्यं भक्ष्यं च तत्कामः अदितिं भजेत । स्वर्गकामः अदितेः सुतान् द्वादशादित्यान् , भजेत । राज्यं राज्ञः कर्म तत्कामो विश्वान्देवान् भजेत । विशां देशस्थप्रजानां साधकः स्वाधीनतामिच्छन् साध्यान् भजेत ॥ ४ ॥

## हिन्दी अनुवाद

### कामनाओंके अनुसार विभिन्न देवताओंकी उपासना तथा भगवद्भक्तिके प्राधान्यका निरूपण

श्रीशुकदेवजीने कहा—परीक्षित् ! तुमने मुझसे जो पूछा था कि मरते समय बुद्धिमान् मनुष्यको क्या करना चाहिये, उसका उत्तर मैंने तुम्हें दे दिया ॥ १ ॥ ❀ ❀ जो ब्रह्मतेजका इच्छुक हो, वह बृहस्पतिकी; जिसे इन्द्रियोंकी विशेष शक्तिकी कामना हो, वह इन्द्रकी और जिसे सन्तानकी लालसा हो, वह प्रजापतियोंकी उपासना करे ॥ २ ॥ ❀ ❀ जिसे लक्ष्मी चाहिये वह मायादेवीकी, जिसे तेज चाहिये वह अग्निकी, जिसे धन चाहिये वह वसुओंकी और जिस प्रभावशाली पुरुषको वीरताकी चाह हो, उसे रुद्रोंकी उपासना करनी चाहिये ॥ ३ ॥ ❀ ❀ जिसे बहुत अन्न प्राप्त करनेकी इच्छा हो, वह अदितिका; जिसे स्वर्गकी कामना हो, वह अदितिके पुत्र देवताओंका, जिसे राजकी अभिलाषा हो, वह विश्वेदेवोंका और जो प्रजाको अपने अनुकूल बनानेकी इच्छा रखता हो उसे साध्य देवताओंका आराधन करना चाहिए ॥ ४ ॥

**आयुष्कामोऽश्विनौ देवौ पुष्टिकाम इलां यजेत् । प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥ ५ ॥**
**रूपाभिकामो गन्धर्वान् स्त्रीकामोऽप्सरउर्वशीम् । आधिपत्यकामः सर्वेषां यजेत परमेष्ठिनम् ॥ ६ ॥**
**यज्ञं यजेद् यशस्कामः कोशकामः प्रचेतसम् । विद्याकामस्तु गिरिशं दाम्पत्यार्थ[2] उमां सतीम् ॥ ७ ॥**
**धर्मार्थ[3] उत्तमश्लोकं तन्तुं तन्वन् पितॄन्[4] यजेत् । रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान् ॥ ८ ॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

इलां पृथ्वीम् । प्रतिष्ठा स्थानादप्रच्युतिः । रोदसी द्यावाभूमी ॥ ५ ॥ ❀ ❀ अप्सराश्चासौ उर्वशी च ताम् ॥ ६ ॥ ❀ ❀ यज्ञं यज्ञोपाधि विष्णुम् । कोशो वसुसंचयः वसुकाम इत्यत्र धनमात्रमिति भेदः । दांपत्यमन्योन्यप्रीतिस्तदेवार्थो यस्य सः ॥ ७ ॥ ❀ ❀ धर्मार्थो धर्मकामः । उत्तमश्लोकोपाधिं विष्णुम् । तंतुं तन्वन्संतानवृद्धिमन्विच्छन् । रक्षा बाधानिवृत्तिस्तत्कामः पुण्यजनान्यक्षान् । ओजो बलं तत्कामो मरुद्गणान् देवान् ॥ ८ ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

पुष्टिर्देहपुष्टिः ॥ ५ ॥ ❀ ❀ परमेष्ठिनं ब्रह्माणम् ॥ ६ ॥ ❀ ❀ यज्ञं तन्नामानमिंद्रं वा ॥ ७ ॥ ❀ ❀ कोशकामो निधिकामः । प्रचेतसं वरुणम् ॥ ८ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

वसुकाम इत्यत्र इति । पूर्वोक्ततृतीयश्लोके इति यावत् ॥ ७ ॥ ८ ॥

### श्रीमद्वीरराघवव्याख्या

पुष्टिर्देहबलं तत्कामः इलां पृथ्वीं यजेत । प्रतिष्ठाकामः स्थानादप्रच्युतिकामः रोदसी द्यावापृथिव्यौ तयोः सर्वलोकाधारत्वाल्लोकमातरत्वम् ॥ ५ ॥ ❀ ❀ रूपमभिकामयमानः अप्सराश्चासावुर्वशी च ताम् । सर्वेषामाधिपत्यकामः प्रभुत्वकामः परमेष्ठिनं ब्रह्माणम् ॥ ६ ॥ ❀ ❀ यज्ञं विष्णुं कोशो वसुसंचयः वसुकाम इत्यत्र धनमात्रमिति भेदः प्रचेतसं वरुणं विद्याकामः ज्ञानकामः दांपत्यार्थं दंपत्योरन्योऽन्यप्रीत्यर्थं सतीमित्युमाविशेषणं पतिव्रतामुमां देवीमित्यर्थः ॥ ७ ॥ ❀ ❀ उत्तमश्लोकं विष्णुं तंतुं संतानं तन्वन्विस्तारयन्सन्तानसृष्टिकाम इत्यर्थः । रक्षाकामः बाधानिवृत्तिकामः पुण्यजनान्यक्षानोजस्कामः बलकामः ॥ ८ ॥

---

१. मरीच्यादीनिति वङ्ग० सुबो० । २. प्रा० पा०—त्यार्थमुमां । ३. प्रा० पा०—धर्मार्थमुत्तम० । २. प्रा० पा०—तन्तुकामः पितॄन् ।

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

इलां भूमिं प्रतिष्ठाकामः स्वस्थानाभ्रंशेच्छुः लोकमातरौ लोकस्य मातापितरौ माता पृथ्वी द्यौः पिता "मधु द्यौरस्तु नः पिता" इति श्रुतेः ॥ ५ ॥ ❀ ❀ अप्सराश्चासावुर्वशी चेत्यप्सरा उर्वशी । तां परमेष्ठिनं चतुर्मुखम् ॥ ६ ॥ ❀ ❀ यज्ञमिन्द्रं फलभेदान्न पुनरुक्तिः कोशकामो निधिकामः प्रचेतसं वरुणं गिरीशं दक्षिणामूर्तिधरं दांपत्यार्थेऽखंडितदांपत्याय ॥ ७ ॥ ❀ ❀ धर्मार्थमक्षयपुण्यफलार्थमुत्तमश्लोकं विष्णुम् "अकामोऽधमकामो वा मोक्षकामोऽपि यो भवेद् अथवा सर्वकामो यः स विष्णुं पुरुषं यजेदि" त्यनेन विष्णुरेवोत्तम इति निश्चीयते । अकामः पुरुषं पुमानित्यत्रापि पुरुषो विष्णुरेवास्मादुक्तप्रमाणात् तंतुं संतत्यविच्छेदं तन्वन् विततं कुर्वन् । पुण्यजनान् यक्षान् मणिभद्रादीन् ॥ ८ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

उत्तमश्लोकाः पुण्यश्लोका धार्म्मिका नलादयः तदुपाधिं तदधिष्ठानकं विष्णुमित्यर्थः । उत्तमः श्लोकः धर्म्माचरणख्यातिर्वा ॥ ८ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

इलां पृथ्वीम् । प्रतिष्ठा स्वपदादप्रच्युतिः । रोदसी द्यावापृथिव्यौ ॥ ५ ॥ ❀ ❀ अप्सराश्चासावुर्व्वशी च ताम् ॥ ६ ॥ ❀ ❀ यज्ञं यज्ञसंज्ञमिन्द्रम् । दाम्पत्यं स्त्रीपुरुषयोः परस्परोपरि प्रीतिः ॥ ७ ॥ ❀ ❀ उत्तमःश्लोकं धर्म्मम् । तन्तुं तन्वन् सन्तानवृद्धिमिच्छन्, पुण्यजनान् यक्षान् । मरुद्गणान् देवान् ॥ ८ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पुष्टिकामः देहस्य बलं स्थौल्यमिच्छन् इलां पृथ्वीम् प्रतिष्ठाकामः स्थानादप्रच्युतिकामः रोदसी द्यावापृथिव्यौ लोकमातरौ लोकाधारभूते ॥ ५ ॥ ❀ ❀ रूपाभिकामः रूपमभिकामयमानः अप्सराश्चासावुर्वशी च ताम् । आधिपत्यकामः प्रभुत्वं कामयमानः परमेष्ठिनं ब्रह्माणम् ॥ ६ ॥ ❀ ❀ यज्ञं यज्ञमूर्तिं विष्णुं कोशकामः विपुलधनालयकामः प्रचेतसं वरुणं दम्पत्योरन्योऽन्यहिताचरणं दांपत्यं तदेवार्थः प्रयोजनं यस्य सः ॥ ७ ॥ ❀ ❀ धर्मार्थः धर्मकामः उत्तमश्लोकं सर्वोत्तमकीर्तिं विष्णुम् । तंतुं तन्वन्संतानं विस्तारयन् रक्षाकामः बाधानिवृत्तिकामः पुण्यजनान् यक्षान् ओजस्कामः बलकामः ॥ ८ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

आयुष्कामः आयुष्याभिवृद्धिकामः अश्विनौ अश्विनीकुमारौ । घ्राणदेवता । पुष्टिकामः स्थूलत्वकामः । सर्वान् पोषान् वा कामयते । इला भूमिः । शब्दाधिष्ठात्री देवता । प्रतिष्ठाकामः लोके सन्माननाकामः । पुरुष इति । योग्यस्यैवैषा कामना । एवमन्यत्राऽपि ज्ञा'तव्यम् । रोदसी द्यावापृथिव्यौ । लोकानां मातरौ । लोकमातृत्वं गुणः । मातृकापूजायां विहिते वा । हस्ताभिमानिनी । रूपाभिकामः सौन्दर्यकामः । गन्धर्वान् विश्वावसुप्रभृतीन् । एता राष्ट्रभृतो देवताः । "एते वै गन्धर्वाप्सरसो यद्राष्ट्रभृत" इति श्रुतेः । स्त्रीकामः सुन्दरस्त्रीप्राप्तिकामः । अप्सरोरूपामुर्वशीम् । अधरारणिदेवताम् । देवपत्नीमध्ये वा । गन्धर्वा रूपस्य । अप्सरसो रसस्य । आधिपत्यकामः सर्वेषामहमधिपतिर्भविष्यामीति । परमेष्ठिनं गुह्याधिष्ठातारम् । यज्ञं यज्ञपुरुषम् । चरणा'धिष्ठात्री । यशस्कामः कीर्त्तिकामः । कोशकामः भाण्डारकामः । कोशो धनसञ्चयः । प्रचेतसं वरुणम् । रसनेन्द्रियाधिष्ठातारं विद्याकामः । ब्रह्मविद्यादिविद्याः । गिरिशं महादेवम् । अहङ्काराधिष्ठातारम् । दाम्पत्यार्थं दम्पत्योः प्रीत्यर्थम् । उमां सतीम् । जन्मद्वयव्यापिनीं महादेवभार्याम् । धर्मार्थं धर्मसिद्ध्यर्थम् । उत्तमश्लोकं वेदवेद्यम् । तन्तुं तन्वन् सन्ततिं विस्तारयन् । पितॄन् अग्निष्वात्तादीन् । रक्षाकामः भूतादिभ्यः शत्रुभ्यो रक्षामिच्छन् पुण्यजनान् यक्षादीन् । ओजस्कामः इन्द्रियबलकामः । मरुद्गणानदितिपुत्रान् ॥ ५-८ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

आयुःकाम आयुष्याभिवृद्धिकामः अश्विनावश्विनीकुमारौ देववैद्यौ भजेत । पुष्टिकामः स्थूलत्वकाम इलां भूम्यभिमानिनीं देवतां भजेत । प्रतिष्ठा स्थानादप्रच्युतिर्लोकसन्माननं वा तत्कामः पुरुषो लोकमातरौ प्राण्याधारभूतौ रोदसी द्यावापृथिव्यौ भजेत ॥ ५ ॥ ❀ ❀ रूपाभिकामः सौन्दर्यकामः गन्धर्वान् विश्वावसुप्रभृतीन् भजेत । स्त्रीकामः सुन्दरस्त्रीप्राप्तिकामः अप्स-

---

१. तेजोऽभिमानिन इति ग, २. ज्ञातव्या इति क. ख. घ.

रोरूपामुर्वशीं भजेत । आधिपत्यकामः सर्वेषामहमधिपतिः प्रभुः स्या'मिति कामयमानः परमेष्ठिनं सर्वाधिपतिं ब्रह्माणं भजेत ॥ ६ ॥ ❀ ❀ यशस्कामो यज्ञं यज्ञोपाधिं विष्णुं भजेत कोशो धनसञ्चयस्तत्कामः प्रचेतसं वरुणं भजेत । ब्रह्मविद्याकामस्तु गिरिशं महादेवं भजेत । दाम्पत्यं दम्पत्योरन्योन्यप्रीतिः तदेवार्थो यस्य स उमां सतीं जन्मद्वयव्यापिनीं महादेवभार्यां भजेत ॥ ७ ॥ ❀ ❀ धर्मार्थः धर्मकामः उत्तमश्लोकं उत्तमयशसं विष्णुं भजेत । तन्तुं तन्वन् सन्ततिविस्तारमिच्छन् पितॄन् अग्निष्वात्तादीन् भजेत । रक्षाकामः सर्वतो बाधानिवृत्तिकामः पुण्यजनान् यक्षान् यजेत । ओजस्कामो बलकामो मरुद्गणान् भजेत ॥ ८ ॥

## हिन्दी अनुवाद

आयुकी इच्छासे अश्विनीकुमारोंका, पुष्टिकी इच्छासे पृथ्वीका और प्रतिष्ठाकी चाह हो तो लोकमाता पृथ्वी और द्यौ ( आकाश ) का सेवन करना चाहिये ॥ ५ ॥ ❀ ❀ सौन्दर्यकी चाहसे गन्धर्वोंकी, पत्नीकी प्राप्तिके लिये उर्वशी अप्सराकी और सबका स्वामी बननेके लिये ब्रह्माकी आराधना करनी चाहिये ॥ ६ ॥ ❀ ❀ जिसे यशकी इच्छा हो वह यज्ञपुरुषकी; जिसे खजानेकी लालसा हो वह वरुणकी; विद्या प्राप्त करनेकी आकाङ्क्षा हो तो भगवान् शङ्करकी और पति-पत्नीमें परस्पर प्रेम बनाये रखनेके लिये पार्वतीजीकी उपासना करनी चाहिए ॥ ७ ॥ ❀ ❀ धर्म उपार्जन करनेके लिये विष्णुभगवान्‌की, वंशपरम्पराकी रक्षाके लिए पितरोंकी, बाधाओंसे बचनेके लिये यक्षोंकी और बलवान् होनेके लिये मरुद्गणोंकी आराधना करनी चाहिये ॥ ८ ॥

**राज्यकामो मनून् देवान् निर्ऋतिं त्वभिचरन् यजेत्[1] । कामकामो यजेत् सोममकामः पुरुषं परम्[2] ॥ ९ ॥**
**अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ १० ॥**
**एतावानेव यजतामिह निःश्रेयसोदयः । भगवत्यचलो भावो यद् भागवतसंगतः ॥ ११ ॥**
**ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत[3] यत्र गुणेष्वसङ्गः ।**
**कैवल्यसम्मतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥ १२ ॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

राज्यं राजत्वं तत्कामो मनून् । देवान्मन्वंतरपालकान् । राज्ञः कर्म राज्यं तत्कामो विश्वान्देवानिति विशेषः । अभिचरञ्छत्रुमरणमिच्छन्निर्ऋतिं राक्षसम् । कामकामः भोगेच्छुः अकामो वैराग्यकामः पुरुषं परं प्रकृतिव्यतिरेकोपाधिमीश्वरम् ॥ ९ ॥ ❀ ❀ अकाम एकांतभक्तः उक्तानुक्तसर्वकामो वा । पुरुषं पूर्णं निरुपाधिम् ॥ १० ॥ ❀ ❀ पूर्वोक्तनानादेवतायजनस्यापि संयोगपृथक्त्वेन भक्तियोगफलत्वमाह । एतावानिति । इन्द्रादीनपि यजतामिह तत्तद्यजनेन भागवतानां संगतौ भगवत्यचलो भावो भक्तिर्भवतीति यदेतावानेव निःश्रेयस्य परमपुरुषार्थस्योदयो लाभः । अन्यत्तु स्वर्गादि सर्वं तुच्छमित्यर्थः ॥ ११ ॥ ❀ ❀ भागवतसंगत इत्यनेन सूचितां हरिकथारतिं स्तौति । ज्ञानमिति । यत् यासु कथासु ज्ञानं भवति । कीदृशम् ? आ सर्वतः प्रतिनिवृत्तमुपरतं गुणोर्मीणां रागद्वेषादीनां चक्रं समूहो यस्मात्तत् । उत अनंतरं तद्धेतुरात्मप्रसादश्च यत्र यासु मनःप्रसाद हेतुर्गुणेषु विषयेष्वसंगो वैराग्यं च । उभयत्रेति पाठे इहामुत्र च गुणेष्वसंगः अथ कैवल्यमित्येव संमतः पंथा एतादृशो यो भक्तियोग निर्वृतः श्रवणसुखेन अन्यत्रानिर्वृत इति वा । तासु हरिकथासु को रतिं न कुर्यात् ॥ १२ ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

उत्तमश्लोकाः पुण्यश्लोका धार्मिका नलादयस्तदुपाधि तदधिष्ठानकं विष्णुमिति संदर्भः ॥ ९ ॥ ❀ ❀ सर्वकाम इत्यनेनैव सकामसामान्ये लब्धे मोक्षकाम इति पृथगुपादानं तदधिकारिणां वयं निष्कामा इत्यभिमानखंडनार्थम् । किं वा । सर्वकाम इत्यपि मोक्षकामस्य सकामत्वातिशयज्ञापनार्थम् । तथा च स्वस्य दुःखहानेच्छा सुखप्राप्तीच्छा च काम उच्यते सा सा च स्वस्य तात्कालिककिञ्चिन्मात्रदुःखखंडनार्थं नश्वरस्वर्गादिसुखार्थं च प्रवृत्तेभ्यः कर्मिभ्यो देवतांतरोपासकेभ्यश्च ज्ञानाधिकारिणां स्वीयसंसारदुःखखंडने प्रवृत्तानां ब्रह्मसुखमनुबुभूषूणामधिकैव दृश्यते भक्तानां तु भजनीयपरमेश्वरसुखार्थमेव प्रवृत्तानां निष्कामता तद्वचनैरेवावसीयते । तानि च यथा । "नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम् । तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि ॥" इति "स्वकर्मफलनिर्दिष्टां यां यां योनिं व्रजाम्यहम् । तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढास्तु मे ॥" इति । "तन्नः समादिशोपायं येन ते चरणाब्जयोः । स्मृतिर्यथा न विरमेदपि संसरतामिह ॥" इति । प्रायोपवेशारंभे राज्ञोपि वचनं यथा । "पुनश्च

१. प्रा० पा० — नरः । २. प्रा० पा० — पुमान् । ३. प्रा० पा० — उभयत्र ।

भूयाद्भगवत्यनन्ते रतिः प्रसंगश्च तदाश्रयेषु। महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः॥" इति। उदारधीः सुबुद्धिः। कामराहित्ये साहित्ये वा भक्तेर्भगवद्विषयत्वमेव सुबुद्धित्वचिह्नं तदभाव एव मंदबुद्धित्वचिह्नमित्यर्थः। तीव्रेण ज्ञानकर्माद्यमिश्रेण मेघाद्यमिश्र एव सौरकिरणो यथा तीव्रः स्यात्तथेत्यर्थः। संदर्भस्तु—एवं प्राक्तनाध्यायाभ्यां कर्मयोगज्ञानेभ्यः श्रेष्ठत्वमुक्त्वा तदुत्तराध्यायेऽपि सर्वदेवोपासनेभ्यः। श्रेष्ठत्ववचनेन भगवद्भक्तियोगस्यैवाभिधेयत्वमाह—अकाम इति। तीव्रेण दृढेन स्वभावत एवानुपघात्येनेति विघ्नानवकाशतोक्ता। कामना तु याद‍ृच्छिकेनापि स्यात्। यथोक्तं भारते—"भक्तक्षणः क्षणोः विष्णोः स्मृतिः सेवा स्ववेश्मनि। स्वभोज्यस्यार्पणं दानफलमिन्द्रादिदुर्लभम्॥" इति। तदुक्तं श्रीकर्दमं प्रति श्रीकपिलेन। "न वै जातु मृषैव स्यात्प्रजाध्यक्ष मदर्हणम्" इति। अथवा यत्तत्कामस्तीव्रेणैव यजेत। ततश्च शुद्धभक्तिसंपादनायैवांते पर्यवसिष्यत्यसावित्यभिप्रायेण सविशेषणमुपदिष्टम्। तदनेनैकांतभक्ते मुमुक्षौ वा तद्भक्तियोगस्यैवाभिधेयत्वं किं वक्तव्यमपि तु सर्वकामेष्वपीति तदेव सर्वथापि निर्णीतम्। यद्वाऽकामत्वं भजनीयपरमपुरुषसुखमात्रस्वसुखत्वं भक्तिमात्रकामत्वे व्याख्याते धर्मपुरुषार्थिन्यतिव्याप्तिः। स्यात् तीव्रेण सर्वेषु साध्येषु परमसाधकतमत्वेन॥ १०॥ ❀ ❀ किञ्च—एतावानिति इत्यर्थ इति। हरिभक्तिं विना फलांतरस्य क्षयिष्णुत्वात्तुच्छत्वमिति भावः। अत्र "इन्द्रमिंद्रियकामस्तु इत्याद्युक्त पाटवादिकं पृथक्त्वेन फलं भागवतसंयोगे तु भावः फलं खादिरयूपसंयोगे यागस्य फलवैशिष्ट्यवदिति संदर्भः। "एकस्य तूभयत्वे संयोगपृथक्त्वम्" इति जैमिनिसूत्रम्। तदर्थस्तु एकस्य कर्मण उभयत्वेऽनेकफलसंबंधे संयोग उभयसंबंधबोधकवाक्यं तस्य पृथक्त्वे भेदः स हेतुः। यथा ज्योतिष्टोमादिकर्मणां "कर्मणा पितृलोकः" इत्यादिश्रुतेः स्वर्गादिहेतुत्वेपि "यज्ञेन" इत्यादिश्रुतेर्ज्ञानार्थत्वं तद्वदत्रेन्द्रादियजनस्येन्द्रियपाटवादिहेतुत्वेपि भागवतसंगतो भक्तिफलकत्वमपीत्यर्थः। 'खादिरो यूपो भवति, खादिरं वीर्यकामस्य यूपं कुर्वीत' इत्युभयविधवाक्योपलब्धेः खादिरस्योभयार्थता यथा तथात्रापीत्यप्यत्रानुसंधेयम्। विश्वनाथस्तु—ननूक्तलक्षणानां देवतांतरभक्तानां लब्धं तत्तत्कामानामंते खलु का गतिः स्यादिति चेन्न कापि किन्तु याद‍ृच्छिकमहत्कृपा स्यात्तदैव भक्तिः स्यादित्याह—एतावानेव। यजतां देवतांतरयाजिनां निःश्रेयसोदयः कोऽसौ यद्यदि भागवतानां संगतो हेतोर्भगवति भावः सेव्यत्वकामना स्यादन्यथा न निःश्रेयसं तत्तद्देवतानामपि निःश्रेयसाभावादिति भावः। तदुक्तं भगवता "येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः। तेपि मामेव कौंतेय यजंत्यविधिपूर्वकम्॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते॥" इति देवतांतरस्य यजनं तु न हि भगवद्भावकारणं किं तु भागवतसंग एव स च यदृच्छयैव भवेदिति प्राक्प्रतिपादितम्॥ ११॥ ❀ ❀ ननु यावज्जीवं यो यमाश्रितस्तस्यांते खल्वाश्रयांतरानौचित्यमेव तस्मात्सर्वकालमेव तत्तद्देवोपासकस्यांते भागवतसंगादपि भगवति भावः कथं कर्तुमुचित इति चेद्देवतांतरोपासकः खलु को वराको यतो ब्रह्मोपासकोऽपि भगवति शुद्धां भक्तिं करोतीत्यत्र क्रमरीतिं दर्शयन्नाह। ज्ञानं यदा स्यात् कीदृशं प्रतिनिवृत्तमुपरतं गुणोर्मीणां रागादीनां चक्रं समूहो यस्मात्तत्। तदात्मप्रसादः स्यात् यत्रात्मप्रसादे सति गुणेष्वसंगो वैराग्यम्। कीदृशः कैवल्ये संमतः पंथा अथ तदनंतरं भक्तियोगः स्यात्। भक्तियोगस्य याद‍ृच्छिकतायाः प्राक् प्रतिपादितत्वादसंगकार्यत्वं नाशंकनीयम्। भगवत्कृपया सनकादीनामिव भागवतकृपया शुकस्येव कीर्त्तनादिरूपः। ततः कः खलु निर्वृतो भक्तिसुखे निमग्नः। रतिमासक्तिं यो रतिं न कुर्यात्स त्वनिर्वृत इति भावः। अत्र कर्मज्ञानयोगदेवतांतरोपासनेभ्यः शुद्धभक्तेरुत्कर्ष इति तथा तत्तत्साध्यं केवलया भक्त्यैव सिध्यतीति तथा तत्तत्साधनवतामप्यंते पुनर्भक्त्यैव निःश्रेयसमिति। कर्मज्ञानादिनिरपेक्षा स्मरणकीर्त्तनश्रवणप्रधाना शुद्धा भक्तिरेव प्रेमभर्ा साधनमिति शुकदेवस्य स्वाभिमतम्। तत्रापि नामकीर्त्तनं सर्वोत्कृष्टतममिति वस्तुपंचकं निरूपितमिति प्रकरणार्थसंक्षेपः। संदर्भस्तु—प्रपंचातीतत्वात्कैवल्यरूप एव विद्वद्भिः संमतः पंथा भगवत्प्राप्त्युपायश्चेत्यर्थः। 'एको नारायणो देवः इत्यादौ। 'परापराणाम्परम आस्ते कैवल्यसंज्ञितः' इत्युक्तदिशा कैवल्याय श्रीनारायणं लब्धुं संमतः पंथा उपायो यो भक्तिभोगस्तत्प्रेमा स च यत्रेति वा॥ १२॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

विशेष इति। पूर्व्वोक्तचतुर्थश्लोकादिति शेषः॥ ९॥ १०॥ ❀ ❀ संयोगपृथक्त्वेनेति। सम्बन्धस्य भिन्नत्वेनेत्यर्थः। तत्तद्देवतायजने तत्तदुक्तफलसिद्धिरिति पृथक्त्वम्। तत्तद्देवताभजनेन पापक्षयाद् भागवतप्रसङ्गः तत्सङ्गत्या च भगवत्यचला भक्तिरिति संयोगः खादिरादिवदिति व्याख्यालेशः। अथवा—एकस्य तूभयत्वे संयोगपृथक्त्वम्। अस्यार्थः—एकस्य तु उभयत्वे उभयफलसाधकत्वे संयोगपृथक्त्वम्। यथा—खादिरो यूपो भवति, खादिरो वीर्य्यकामस्येति। यथैकस्य खदिरयूपस्य क्रत्वङ्गत्वं वीर्य्यसाधकत्वञ्च, तथात्र नानादेवताभजनं तत्तत्फलसाधकं हरिभक्तिफलसाधनञ्च तत्रोभयफलसाधकत्वे स्थिते हरिभक्तिकामनयेन्द्रादयो यष्टव्याः नान्यकामनयेति समुदायार्थः। यथा गोपकुमारिकाणां कृष्णकामनया कात्यायन्यर्च्चनम्॥ ११-१९॥

### श्रीमद्वीरराघवव्याख्या

राज्यकामः मनुरूपान् देवानभिचरन् शत्रुमरणमिच्छन्निरृतिं राक्षसं कामकामः भोगेच्छुः अकामः वैराग्यकामः परं पुरुषं परमपुरुषं "यो यो यां यां तनुं भक्त" इति इन्द्रादिरूपिणोऽपि परमपुरुषस्यैवांतवत्फलदत्वात् तत्तत्फलेप्सुभिरिज्यमानः

परम पुरुषएवांतवत्फलानि प्रयच्छति "अनन्याश्चिंतयंतो मामि" ति रीत्या तु भजमानस्य स एव मुक्तिं प्रयच्छतीत्यभिप्रायः ॥ ९ ॥ ❀ ❀ उदारधीरिति मोक्षकामविशेषणं तीव्रेण अविच्छिन्नेन भक्तियोगेन ॥१०॥ ❀ ❀ एवं यजद्भिः कदा मोक्षो वाप्यत इत्यत आह एतावानिति । इहास्मिन् लोके यजतां निःश्रेयसस्य मोक्षस्योदयो लाभः एतावान् एतदवधिकः भागवतसंगाद्भगवत्यचलो भाव इति यद् भागवतसंगाद् भगवत्यचले भावे सति निःश्रेयसोदयः सिद्ध एव तस्माद्भागवतसंगादचलो भाव एव संपाद्य इति भावः ॥ ११ ॥ ❀ ❀ यद्भागवतसंगत इत्यनेन सूचितां हरिकथां प्रस्तौति ज्ञानमिति । यासु हरिकथासु ज्ञानादीनि संपत्स्यंते तासु हरिकथासु रतिं को न कुर्यादित्यन्वयः । यदा हरिकथारतिदशायां प्रतिनिवृत्ताः गुणाः सत्त्वादिकार्याणि ऊर्मयः अशनापिपासाशोकमोहजरामृत्यवो यस्मात्तथाभूतं ज्ञानमात्मप्रसादश्चित्तनैर्मल्यमुभयत्र लोकद्वये गुणेषु शब्दादिषु विषयेष्वसंगो वैराग्यं कैवल्ये मुक्तौ संमतः पंथा उपायः कैवल्यसंमतपथः तथाभूतो भक्तियोगश्चेत्येते सम्पत्स्यन्ते तथाभूतासु हरिकथासु निर्वृतः सुखितः रतिमासक्तिं को न कुर्यात् सर्वोऽपि कुर्यादेवेत्यर्थः ॥ १२ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

अभिचरन् परोपद्रवकर्म कुर्वन् निर्ऋतिं कोणादिक्पतिं सोमं चंद्रम् अकामो निषिद्धकामरहितः पुरुषं पूर्णं षड्गुणम् ॥ ९ ॥ ❀ ❀ अकामो भगवत्प्रसादमंतरेणान्यत्राकामः सर्वकामः उक्तसर्वकामोऽन्यदेवतायजनमिच्छन् परं पुरुषं यजेत विष्णुयजने साधनमाह तीव्रेणेति ॥ १० ॥ ❀ ❀ काम्यानुष्ठानस्य यथा मुक्तिसाधनता स्यात् तं प्रकारमाह एतावानिति । इह कर्मभूमौ यजतां काम्यानुष्ठानं कुर्वतां निःश्रेयसोदय एतावान् भागवतानां संगतः सेवालक्षणाद् भगवति हरौ अचलो भावो भक्तिलक्षण इति यत्स इति ॥ ११ ॥ ❀ ❀ भागवतसंगादचलो भावः कथं स्यादित्याशंक्य तेषां सदसि प्रसक्तानां हरिकथामृतानां श्रवणलक्षणपानादिना प्रसन्नांतःकरणस्य पुंसो हरेरितरत्र विरक्तस्य ज्ञानसाधनं भगवत्यचला भक्तिस्तया ज्ञानं भविष्यतीत्याह—ज्ञानमिति । यदा सत्सभासु प्रसक्ताभिः श्रुताभिर्याभिर्हरिकथाभिः पुंसः आत्मप्रसादो मनसः प्रसन्नता नैर्मल्यलक्षणा तदोभयत्र इह परत्र च स्वर्गादौ गुणेषु विषयेष्वसंगः फलस्नेहराहित्यलक्षणवैराग्यं भवति । अथ भक्तिसाधनवैराग्यजन्मानंतरं कैवल्यसम्भृतपथः सम्यक्संपादितमोक्षमार्गो भक्तियोगो जायते तु शब्दात्तद्भक्तेष्वपि अथात्मनो हरेः प्रसादः स्यादनंतरं हरेरपरोक्षज्ञानं भवति कीदृशं प्रतिनिवृत्तमपक्रांतं सत्त्वादिगुणनिमित्तानामस्ति जायत इत्यादिषडूर्मीणां चक्रं पुनः पुनरावर्तनं येन तत्तथोक्तं यद्वापसारितसत्त्वादिगुणा एव ऊर्मयस्तरंगास्तेषां चक्रं येन तत्तथेति यद्वा यासां हरिकथानां श्रवणाद्भगवदपरोक्षज्ञानं तदा प्रतिनिवृत्तगुणोर्मिचक्रं सत्त्वादिगुणनिमित्ताशनापिपासाशोकमोहरागद्वेषलक्षणा ऊर्मयस्तेषां चक्रं निरस्तं भवति तस्मादात्मप्रसादस्तस्मादुभयत्र गुणेष्वसंगस्तस्माद्वैराग्यात् कैवल्यं संश्रियतेऽनेनेति कैवल्यसंभृतमपरोक्षज्ञानं तदेव पंथा मार्गो यस्य स तथोक्त एवंविधो भक्तियोगो जायते अथ कस्मात्को निवृत्तो रसज्ञः पुरुषस्तासु हरिकथासु रतिं न कुर्यादित्यर्थः ॥ १२ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

अकामः सर्व्वकामनाक्षयकामः । अत्र टीकायां पुरुषं प्रकृतिव्यतिरेकोपाधिमीश्वरमिति—प्रकृतेः सकाशात् यो व्यतिरेकः पूर्व्वं तत्सम्बन्धमारोप्य पश्चात् तदभावचिन्तनं वस्तुत एव तदभावात् सोऽप्युपाधिर्यस्य तमित्यर्थः । प्रकृत्येकोपाधिमिति तु पाठः क्वचित् ॥ ९ ॥ ❀ ❀ एवं प्राक्तनाध्यायाभ्यां कर्म्मयोगज्ञानेभ्यः श्रेष्ठत्वमुक्त्वा तदुत्तराध्यायेऽपि सर्व्वदेवतोपासनेभ्यः श्रेष्ठत्वप्रवचनेन भगवद्भक्तियोगस्यैवाभिधेयत्वमाह । अकामः सर्व्वकामो वा इति । टीका च—अकाम एकान्तभक्तः । उक्तानुक्तसर्व्वकामो वा । पुरुषं पूर्णं परं निरुपाधिम् इत्येषा । तीव्रेण दृढेन स्वभावत एवानुपघात्येनेति विघ्नानवकाशतोक्ता । कामना तु यादृच्छिकेनापि स्यात् । यथोक्तं महाभारते—भक्ताख्याने क्षणं विष्णोः स्मृतिः सेवास्ववेश्मनि । स्वभोज्यस्यार्पणं दानं फलमिन्द्रादिदुर्लभम् ॥ इति । तदुक्तं श्रीकर्द्दमं प्रति श्रीकपिलेन—न वै जातु मृषैव स्यात् प्रजाध्यक्ष मदर्हणम् इति अथवा यत्तत्कामस्तीव्रेणैव यजेत । ततश्च शुद्धभक्तिसम्पादनायैवान्ते पर्य्यवसिष्यत्यसावित्यभिप्रायेण सविशेषणमुपदिष्टम् । तदनेन एकान्तभक्ते मुमुक्षौ वा तद्भक्तियोगस्यैवाभिधेयत्वं किं वक्तव्यम् । अपि तु सर्व्वकामेष्वपीति तदेव सर्व्वथापि निर्णीतम् । यद्वा अकामत्वं भजनीयपरमपुरुषसुखमात्रस्वसुखत्वम् । भक्तिमात्रकामत्वे व्याख्याते धर्म्मपुरुषार्थिन्यतिव्याप्तिः स्यात् तीव्रेण सर्व्वेषु साध्येषु परमसाधकतमेन ॥ १० ॥ ❀ ❀ किञ्च एतावानिति । टीका च—पूर्व्वोक्तनानादेवतायजनस्यापि । संयोगपृथक्त्वेन भक्तियोगफलत्वमाह एतावानिति । इन्द्रादीनपि यजताम् । इह तत्तद्यजनेन भागवतानां सङ्गतो भगवत्यचलः भावः भक्तिः भवतीति यद् एतावानेव निःश्रेयसस्य परमपुरुषार्थस्य उदयः लाभः । अन्यत्तु सर्व्वं तुच्छमित्यर्थः । इत्येषा । अत्र इन्द्रमिन्द्रियकामस्तु इत्याद्युक्तम् इन्द्रियपाटवादिकं पृथक्त्वेन फलम् । भागवतेन संयोगे तु भावः फलम् । [ खादिरे पशुं बध्नाति खादिरं वीर्य्यकामस्येत्यादौ ] खादिरयूपसंयोगे यागस्य फलवैशिष्ट्यवदिति ज्ञेयम् ॥ ११ ॥ ❀ ❀ ज्ञानमिति । प्रपञ्चातीतत्वात् कैवल्यरूप एव विद्वद्भिः सम्मतः पन्थाः भगवत्प्राप्त्युपायश्चेत्यर्थः । एको नारायणो देव इत्यादौ "परावराणां परम आस्ते कैवल्यसंज्ञितः" इत्युक्तदिशा कैवल्याय श्रीनारायणं लब्धुं सम्मतः पन्था उपायो यो भक्तियोगस्तत् प्रेमा स च यत्रेति वा ॥ १२ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

राज्यं राजत्वं तत्कामः मन्वन्तरपालान् देवान् । राज्ञः कर्म्म राज्यं तत्कामः विश्वान् देवानिति विशेषः । अभिचरन् शत्रुमरणमिच्छन् निरृतिं राक्षसम् । कामकामः कामभोगेच्छुः । एवं मन्दधियां कृत्यमुक्त्वा उदारधियां कृत्यमाह । अकामः कामनाक्षयकामः । परं पुरुषं पुरुषोत्तमं भगवन्तमित्यर्थः ॥ ९ ॥ ❀ ❀ न केवलमकाम एव परमपुरुषं यजेद् अपि तु उक्तानुक्तसर्व्वकामोऽपि निष्कामश्च भगवन्तमेव यजेदित्याह । अकामः एकान्तभक्त इति श्रीधरस्वामिचरणाः । अकामः भजनीयपरमपुरुषसुखमात्रस्वसुख इति सन्दर्भः । इत्यनेनैव सकामसामान्ये लब्धे मोक्षकाम इति पृथगुपादानं तदधिकारिणां वयं निष्कामा इत्यभिमानखण्डनार्थम् । किंवा सर्वकामेभ्योऽपि मोक्षकामस्य सकामत्वातिशयज्ञापनार्थम् । तथाच स्वस्य दुःखशमनेच्छा सुखप्राप्तीच्छा च काम उच्यते । सा च स्वस्य तात्कालिककिञ्चिन्मात्रदुःखशमनार्थं नश्वरस्वर्गादिषु सुखार्थञ्च प्रवृत्तेभ्यः कर्म्मिभ्यो देवतान्तरोपासकेभ्यश्च ज्ञानाधिकारिणां स्वीयसंसारदुःखखण्डने प्रवृत्तानां ब्रह्मसुखमनुबुभूषूणामधिकैव दृश्यते भक्तानान्तु भजनीयपरमेश्वरसुखार्थमेव प्रवृत्तानां निष्कामता तद्वचनैरेवावसीयते । तानि च यथा—नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम् । तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि ॥ इति । स्वकर्म्मफलनिर्दिष्टां यां यां योनिं व्रजाम्यहम् । तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढास्तु मे ॥ इति । तन्नः समादिशोपायं येन ते चरणाब्जयोः । स्मृतिर्यथा न विरमेदपि संसरतामिह । इति । प्रायोपवेशारम्भे राज्ञोऽपि वचनं यथा—पुनश्च भूयाद्भगवत्यनन्ते रतिः प्रसङ्गश्च तदाश्रयेषु । महत्सु यां यामुपयामि सृष्टिमैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः । इति । उदारधीः सुबुद्धिः । कामराहित्ये कामसाहित्ये वा भक्तेर्भगवद्विषयत्वमेव सुबुद्धित्वचिह्नं तदभाव-एव मन्दबुद्धित्वचिह्नमित्यर्थः । तीव्रेण ज्ञानकर्म्माद्यमिश्रेण मेघाद्यमिश्र एव सौरकिरणो यथा तीव्रः स्यात् तथेत्यर्थः ॥ १० ॥ ❀ ❀ ननूक्तलक्षणानां देवतान्तरभक्तानां लब्धतत्तत्कामानामन्ते खलु का गतिः स्यादिति चेन्न । कापि किन्तु यदि यादृच्छिकमहत्कृपा स्यात् तदैव भक्तिः स्यादित्याह । एतावानेव यजतां देवतान्तरयाजिनां निःश्रेयसोदयः । कोऽसौ यत् यदि भागवतानां सङ्गतो हेतोर्भगवद्भावः सेव्यत्वभावना स्यात् अन्यथा न निःश्रेयसम् । तत्तद्देवतानामपि निःश्रेयसाभावादिति भावः । तदुक्तं भगवता—येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्व्वकम् । अहं हि सर्व्वयज्ञानां भोक्ता च प्रभुरेव च । न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ इति । देवतान्तरस्य यजनन्तु नैव भगवद्भावकारणं किन्तु भागवतसङ्ग एव । स च यदृच्छयैव भवेदिति प्राक् प्रतिपादितम् ॥ ११ ॥ ❀ ❀ ननु यावज्जीवं यो यम् स्वाश्रितस्तस्यान्ते खल्वाश्रयान्तरानौचित्यमेव । तस्मात् सर्व्वकालमेव तत्तद्देवोपासकस्यान्ते भागवतसङ्गादपि भगवति भावः कथं कर्त्तुमुचित इति चेद् देवतान्तरोपासकः खलु को वराकः यतो ब्रह्मोपासकोऽपि भगवति शुद्धां भक्तिं करोतीत्यत्र क्रमरीतिं दर्शयन्नाह । ज्ञानं यदा स्यात् । कीदृशं प्रतिनिवृत्तमुपरतं गुणोर्म्मीणां चक्रं समूहो यस्मात् तत् । तत आत्मप्रसादः स्यात् । यत्र आत्मप्रसादे सति गुणेषु असङ्गः वैराग्यम् । उभयत्रेति पाठे इहामुत्र च गुणेष्वसङ्गः । कीदृशः कैवल्ये सम्मतः पन्थाः । अथ तदनन्तरञ्च भक्तियोगः । भक्तियोगस्य यादृच्छिकतायाः प्राक्प्रतिपादितत्वादसङ्गकार्य्यत्वं नाशङ्कनीयं भगवत्कृपया सनकादीनामिव भागवतकृपया शुकस्येव कीर्त्तनादिरूपः । अतः कः खलु निर्वृतः भक्तिसुखे निमग्नः । रतिम् आसक्तिम् । यो रतिं न कुर्यात् स त्वनिर्वृत इति भावः । अत्र कर्म्मज्ञानयोगदेवतान्तरोपासनेभ्यः शुद्धभक्तेरुत्कर्ष इति, तथा तत्तत्साध्यं केवलया भक्त्यैव सिद्ध्यतीति, तथा तत्तत्साधनवतामप्यन्ते पुनर्भक्त्यैव निःश्रेयसमिति, कर्म्मज्ञानादिनिरपेक्षा निष्कामा श्रवणकीर्त्तनस्मरणप्रधाना शुद्धा भक्तिरेव प्रेमभक्तिसाधनमिति शुकदेवस्य स्वाभिमतं, तत्रापि नामकीर्त्तनं सर्व्वोत्कृष्टतममिति वस्तुपञ्चकं निरूपितमिति प्रकरणार्थसंक्षेपः ॥ १२ ॥

## श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः ।

राज्यकामः मनून्देवान् विश्वान्देवान् राज्यकाम इति द्विरुक्तिः गुणप्रधानविवक्षया बोध्या अभिचरणं शत्रुमरणमिच्छन् निरृतिं राक्षसं कामकामः भोगकामः सोमम् । अकामः निष्कामः परं पुरुषं पुरुषोत्तमम् ॥ ९ ॥ [ ❀ ❀ ] [ किंच अकामः सर्ववासनाशून्यः अतएवोदारधीः सर्वकामो वा विशेषतो मोक्षकामो वा तीव्रेण भक्तियोगेन पुरुषं पुरुषोत्तमं यजेत ॥१०॥ ❀ ❀ तीव्रेण भक्तियोगेन मोक्षकामो यजेतेति यदुक्तं तदुपपादयति एतावानिति । इह लोके यजतां साधकानां निःश्रेयसस्य मोक्षस्य उदयः उपक्रमः एतावानेव तमाह भगवति अचलो भावस्तीव्रो भक्तियोग इति ननु । स कुतो वाप्यते इत्यत्राह यद्भागवतसंगत इति । भागवतानां संगादवाप्यते ॥ ११ ॥ ❀ ❀ भागवतानां संगतो मोक्षासाधारणोपायः अचलो भक्तियोगो भवतीत्युक्तं तदुत्पत्तिक्रममाह ज्ञानमिति । भागवतसंगतो हरिकथाप्राप्तिरित्यर्थाल्लभ्यते यदा यासु भागवतसंगात् प्राप्तासु ज्ञानमुत्पद्यते कथं भूतमासमंततः प्रतिनिवृत्तमुपरतं गुणानां गुणकार्याणां रागादीनां जन्ममरणशोकमोहक्षुधापिपासाख्यानामुर्मीणां च चक्रं पुनः पुनरापतनं यस्मात्तत् तदनंतरमुभयत्र इहामुत्र असंगो वैराग्यं च भवति तदनंतरं कैवल्ये साध्यभूते मोक्षे संमतस्तदसाधारणोपायतयाभिमतः भक्तियोगो भवति तत आत्मनः भगवतः मोक्षलक्षणः प्रसादः स्यात् तासु हरिकथासु रतिं प्रीतिं को न कुर्यात् ॥ १२ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

राज्यकामः राज्याधिपत्यकामः । मनून् देवान् स्वायम्भुवादीन् तन्मन्वन्तरदेवताश्च । निर्ऋतिं मृत्युम् । अभिचरन् शत्रुमरणमिच्छन् । कामकामः कन्दर्पवृद्धिमिच्छन् । सोमम् । अकामः सर्वकामरहितस्तु परं पुरुषं पुरुषोत्तमम् । अयमेकोनत्रिंशत् सर्वतत्त्वपतिः । सोमो मनसः । निर्ऋतिः पायोः । मनवो देवाश्चक्षुषः । मरुद्गणास्त्वचः । पुण्यजना[1] जलस्य । पितरो महत्तत्त्वस्य उत्तमश्लोकः पुरुषस्य । उमा श्रोत्रस्य । एवं कामनाभेदेन प्रकृतोपयोगिसर्वबलसिद्ध्यर्थं तत्तद्देवताभजनं कर्त्तव्यमित्युक्तम् । वैराग्यार्थं च भगवान् । तत्र कामना ब्रह्मवर्चसादिविषयाः । [2]इयं कामनाभेदेन भक्तिः साक्षात्परब्रह्मणो वासुदेवस्याऽसाधारणो धर्मः स्नेहात्मा । स [3]तदैव प्रकाशते यदा तत्र वर्चस्तेजः प्रकाशकं भवति । वेदेन ब्रह्ममात्रं प्रकाशयितुं शक्यं न तु ब्रह्मधर्मः साक्षात् नाऽपि प्रत्यक्षतया । प्रत्यक्षसमवेता अप्यभिव्यञ्जकाभावे न प्रकाशन्ते । अतो ब्रह्मणि भगवति यद्वर्चस्तच्चेत्स्वस्मिन्नागच्छेद्दीपहस्त इव सर्वं पश्येत् । अतः प्रथमं ब्रह्मवर्चसकामना कर्त्तव्या । [4]वेदस्थं वा प्रकाशनसामर्थ्यम् । न हि चक्षुर्व्यतिरेकेण स्फीतालोकमध्यवर्त्त्यपि घटः प्रकाशते । तद्ब्रह्मगतं वेदगतं वा को वा दातुं शक्त इति विचारे यो ब्रह्मणः पतिः वेदस्य वेदार्थस्य वा नियामकः येन वा तत्सामर्थ्यं तत्र निहितं भवति तेनैव दातुं शक्यत इति ब्रह्मधर्मान् सर्वान् गृहीत्वा जगति प्रकटनार्थं या रजोगुणदेवता सैवोपास्या । प्रकटनार्थमेव तत्प्रवृत्तेः । नाऽपि कूटस्थम् । [5]तदर्थमप्रवृत्तत्वात् । एवमुत्तरत्राऽपि । इन्द्रियव्यतिरेकेण स्वतो जीवात्मा प्रकाशकेऽपि ब्रह्मवर्चसे करणाभावान्न ज्ञातुं शक्त इतीन्द्रियमपेक्ष्यम् । इन्द्रियवानेव भगवच्छास्त्रेऽधिकारी । "को नु राजन्निन्द्रियवानि"ति वाक्यात् । [6]तच्चेन्द्रियं स्वतो विद्यमानमपि ज्ञानक्रियारूपं कार्यं जनयदपि परमार्थवस्तुबोधकस्वरूपत्वाभावादपेक्षितेन्द्रियाद्भिन्नम् "इन्द्रस्य वृत्रं जघ्नुष इन्द्रियं वीर्यमि" त्यादिश्रुतौ तदिन्द्रियं प्रसिद्धम् । अन्यथा [7]वृत्रहननं प्रजापत्युपधावनं च न स्यात् । अतोऽलौकिकपदार्थज्ञानकरणेन्द्रियप्राप्त्यर्थमिन्द्र उपास्यः । तेन हि तदुपायेन प्राप्तम् । यद्यपि प्रजापतिः प्रयोजकस्तथापि तत्पदार्थरसानभिज्ञत्वाद्द्वयामपि तथात्वादिन्द्र एव सेव्यः । अन्यथेन्द्रस्य पुनः पुनरुपधावनं न भवेत् । अतो धिनोत्यन्तं तस्य रसमिन्द्र एव जानातीति स एव सेव्यः । ऋणत्रयापाकरणार्थं सहायार्थं वा प्रजा पुत्रादिरूपा अपेक्ष्यते । अन्यथा भगवद्भजने नैश्चिन्त्यं न स्यात् तत्र स्वतो जायमानाः [8]प्रजाः स्वापेक्षितं न कुर्वन्तीति स्वापेक्षितप्रजालाभार्थं मरीच्यादय एव सेव्याः । ते हि ब्रह्मणोऽभिप्रेतं कृतवन्त इति । इदानीं भगवद्भजने लक्ष्मीरूपा सम्पत्तिरपेक्ष्यते । सैव भगवन्निष्ठा तत्र विनियोगमर्हति । अन्यां भगवानपि न गृह्णीयात् । अतो भजनौपयिकां सम्पत्तिमिच्छन्मायामेव भजेत । तत्रैका माया व्यामोहिका । [9]एका जगत्करणभूता । ते उभे न सेव्ये । अन्यत्राऽधिकृतत्वात् । देवतारूपा सात्त्विकी मोक्षदातुर्वासुदेवस्य मोक्षदानार्थमेव तादृशं रूपं गृहीतवतः तदुपयोगिसाधनसम्पादनार्थं [10]लक्ष्मीरेव "विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मनस्तनुमि"ति वाक्यात्तद्भार्यारूपेण मायारूपं गृहीतवती । मया [11]सहाऽऽगन्तव्यमिति नियोगकरणान्मायेत्यभिधानम् । "इत्थं विचिन्त्य परमः स तु वासुदेवनामा बभूव निजकारणमुक्तिदाता । तस्याऽऽज्ञयैव [12]नियताऽथ रमाऽपि रूपं [13]वव्रे द्वितीयमिव यत्प्रवदन्ति मायामि"ति वाक्यात् । अत एव तु शब्देनाऽन्ये निवारिते । किञ्च । इन्द्रियेण सम्पत्त्या सहायेन प्रकाशेन च भगवद्धर्मेषु समानीतेषु स्वस्य धारणासामर्थ्यसिद्ध्यर्थं स्वस्मिन् तेजः अपेक्ष्यते । अन्यथा ते समागतास्तत्र न निविशेयुः । निविष्टा वा तदाश्रयं दहेयुः । अतः स्वयोग्यतासिद्ध्यर्थं तेजः अपेक्षितम् । तद्धि सर्वाभिभावकं सर्वमेव रूपं स्वसमानं करोति । तद्भगवन्निष्ठमेव वह्निना प्राप्तम् । विशेषेण भा दीप्तिः वसु धनं यस्येति विभावसुशब्दनिर्वचनात् । अतस्तेजस्कामो विभावसुमेव सेवेत । एवं धनस्याऽपि भगवद्भक्तेष्वानत्यर्थं (?) श्रवणादिसिद्ध्यर्थमुपदेशनार्थं वा [14]देय ( ? ) मपेक्ष्यते । साधनरूपश्रवणादिकं तादृशैरेव भवतीति । शुककर्तृकं तु फलरूपम् । दृष्टरूपत्वाच्च तदपेक्ष्यत एव । तत्तन्नाम्ना वसुष्वेव प्रतिष्ठितम् । "त इमं लोकमयजन्नि"ति श्रुतेः । एवं वीर्यस्य बलस्याऽपि भगवत्सेवौपयिकत्वाद्बलाधिष्ठानदेवताया[15] वायोः स्थानभूतस्याऽन्तरिक्षस्य रुद्राः प्रभव इति देवताऽपि तदधीनेति वीर्यकामो रुद्रानेव भजेत । [16]"तेऽन्तरिक्षमयजन्नि"ति श्रुतेः । एवमन्नादेरपि । अन्नभक्षणस्य वा । "यद्यदिष्टतमं लोके यच्चाऽतिप्रियमात्मनः" इति वाक्यादन्नाद्यमपि काम्यम् । तत्राऽदितिरियमेव भूम्यधिष्ठात्री देवता । [17]"साऽदितिरब्रवीद्वरं वृणा अथ मयाऽभिगृह्णीध्वमि" त्युपाख्याने तस्यास्तादृशत्वप्रसिद्धेः । भूमौ भगवद्भजनं कृत्वा दिव्यानां पदार्थानामभावात्स्वर्गे कर्त्तव्यमिति स्वर्गकामना भवति । तत्राऽऽदित्याः प्रभवः । "तेऽमुं लोकमयजन्नि"ति श्रुतेः । [18]विश्वेदेवास्तु राज्येऽधिकारिणः । सर्वदेवताधिष्ठातृदेवतारूपत्वात् । राजा च सर्वदेवतामयः । अतोऽत्र सर्वसम्पत्त्या भजनसिद्ध्यर्थं राजत्वमपेक्षितम् । भक्तिमार्गस्त्वलौकिक इत्यसाध्यसाधकपदार्थसिद्ध्यर्थं तदधिकारिणः साध्यान् भजेत । सर्वाश्चेत्प्रजाः स्वाधीना भवेयुस्तदा सर्वत्र भक्तिप्रचारो भवेदिति भक्तिप्रसरणार्थं

---

१. स्पर्शस्येति ख. २. इयं हीति ख. घ. ३. तथैवेति ख. ग. ४. वेदस्य वेति ख. ५. मम अप्रवृत्तत्वादिति ग. ६. तत्रेन्द्रियमिति क. ७. वृत्रहरणमिति क. ग. घ. ८. प्रजालाभार्थं प्रजेति ख. ९. जगत्कारणभूता इति ग. घ. १०. लक्ष्म्येव इति ख. ११. सह गन्तव्यमिति घ. १२. नियता परमाऽपि रूपमिति ख. १३. चक्रे इति ग. १४. देवमिति ख. १५. बलाधिष्ठानदेवता वायोरिति क. ग. घ. १६. अयजन्निति क. ग. घ. १७. वरं वृण इति क. ग । वरं वृणु इति घ. । १८. सुराज्ये इति ख.

तत्साधकत्वमपेक्ष्यते । आयुषस्तु भक्तसङ्गार्थमुपयोगः स्पष्ट एव । तत्राऽश्विनौ आयुषः प्रभू इति तदुपाधावनम्। एवं पुष्टिरपि लोकातीता भगवत्कार्यसाधिकेति सर्वपोषकर्त्रीं भूमिं भजेत्। यतो भूमिष्ठा एव सर्वे वर्द्धन्ते अङ्कुरादयः। प्रतिष्ठाया अपि [1]तद्वृत्तानुवृत्त्या प्रचयार्थमपेक्षा भवति। प्रतिष्ठा च माहात्म्याद्वैचित्र्याद्वा। तत् द्यावापृथिव्योरेवोभयं प्रसिद्धमिति। भगवदधिष्ठानेषु रूपाभिव्यक्तिसामर्थ्यार्थं "रूपमिति गन्धर्वा" इति श्रुतेस्ते सेव्याः। नृत्यादिना भगवद्भजनार्थं तादृशस्त्रीकामनायामनेकरूपकरणसमर्थोर्वशी सेव्या। नारायणोत्पन्नत्वादृषिमातृत्वाद् वैराग्यबोधनेन मुक्तिदातृत्वाच्च। पूर्वचित्त्यादयस्तु नैवंरूपाः। आज्ञापनसामर्थ्यसिद्ध्यर्थं तथाभूतः परमेष्ठी चतुर्मुखः सेव्यः। स हि सर्वानाज्ञापयतीति। आज्ञापनस्य च भक्तिकारणता स्पष्टा। तथा यशसोऽपि। कीर्त्या हि सर्वे समायान्ति, पश्चात्तद्वृत्तमनुतिष्ठन्ते। यज्ञो हि यशः प्राप्तवान्। "देवा[2] वै [3]सत्रमासतर्द्धिपरिमितं यशस्कामा" इत्यत्र यज्ञेनैव यशसः प्राप्तत्वात्स सेव्यः। प्रचेता निधिपतिः। अलौकिकार्थदाने हि भगवदुत्सवादिर्भवति। विद्यायास्तु साक्षादुपयोगात्। "ईश्वराज्ज्ञानमन्विच्छेदि"ति वाक्यात्। "प्रतिकूले गृहं त्यजेदि"ति दाम्पत्यं भगवद्भजनार्थमपेक्षितम्। तत्र परमभक्तायाः [4]परमभक्तस्वपतिनिष्ठतया बहुजन्मसिद्धत्वादुमा सेव्या। धर्मेण च भक्तिर्भवतीति पूर्वं साधितम्। उत्तमैश्च लोके वेदे धर्मप्रतिपादक एव सेव्यते। भक्तिमार्गस्य परम्परासिद्ध्यर्थं सन्तत्यपेक्षायां पितरो हि तदाशंसका इति तेषां भजनम्। रक्षायां क्रूराणामपेक्षितत्वाद्यक्षभजनम्। [5]ओजस इन्द्रियशक्तेश्च नेत्रश्रोत्रपाटवरूपत्वात्। मरुद्गणाश्च पटवो भवन्ति। बहुधा च्छिन्ना अपि न मृता इति। महापुरुषपूजया सिद्धा इति। परित्यक्तदोषा इति ते सेव्याः। अधिकारिणः सर्वविनियोगसामर्थ्यात्स्पष्टं मन्वन्तराधिपतयः सेव्याः। प्रतिबन्धकनिवृत्तेरपेक्षितत्वान्निर्ऋतिः सेव्यः। कामनया सर्वं भवतीति भगवद्विषयककामनोत्पत्त्यर्थं रासप्रकरणे निरूपितस्य सोमस्य भजनं कर्त्तव्यम्। तेन हि भगवतोऽपि कामः पूरित इति। [6]तादृशकामपितामहत्वाच्च ॥ ९ ॥ ❀ ❀ एवं भगवदंशानां तत्तत्साधकत्वमुक्त्वा ससाधनभक्तिसिद्ध्यर्थमपि भगवानेव सेव्य इत्याह—**अकाम इति**। वैराग्यकामः। पूर्वाध्यायोक्तन्यायेन स्वतन्त्रतया निष्कामो वा। सर्वकामः एतदध्यायोक्तकामः। मोक्षकामो वा। उदारा धीर्यस्येति स्वतन्त्रो वा। तीव्रेण शीघ्रं भगवत्प्रापकेण। पूर्वोक्तमेव परं पुरुषं भजेत। भगवतैव ससाधनं साध्यं सेत्स्यतीति ॥ १० ॥ ❀ ❀ ननु भजनमेव कथं सिध्येत् कामनाभावे बकबन्धप्रयासवदित्याशङ्क्य कामनया तत्साधनेऽप्यन्तरङ्गसाधनसाधकमेव सेव्यमित्यभिप्रायेणाऽऽह—**एतावानेवेति**। सर्वाण्येव साधनानि साधनद्वये प्रविशन्ति। भगवद्भक्तसङ्गसाधकत्वेन भगवति रतिसाधकत्वेन च। एतावानर्थश्चेत्सिद्धस्तदा नाऽन्यकामना कर्त्तव्या। अतएव यजतां मध्ये इह अस्मिन्भक्तिमार्गे श्रेयसः परम उदय एतावानेव। द्वयमेव तदुक्तम् ॥ ११ ॥ ❀ ❀ तयोरप्येकं साधनं, येन तौ भवत एव। तदाह—**ज्ञानमिति**। हरिकथासु रतिस्तयोः साधिका। कथारतिषु सक्तस्य कथका अपि मिलन्ति, प्रेमाऽपि भवतीति। आनुषङ्गिकं चाऽन्यद्वहेव भवतीत्याह। यासु कथासु आसमन्तात्प्रतिनिवृत्तं गुणोर्मीणामुत्पत्त्यादीनां चक्रं रागादिधर्मसमुदायो येन। सर्वाऽविद्यानिवर्त्तकमिति यावत्। तादृशं ज्ञानं भवति। तत्साधनमन्तःकरणप्रसादोऽपि भवति। तस्याऽपि साधनमैहिकामुष्मिकगुणेषु वैराग्यम्। एवं ससाधनं ज्ञानमपि सिद्ध्यति। [7]सोपायो मार्गोऽयम्। कैवल्ये सम्मतस्तु मार्गो भक्तियोगः। अथेति [8]भिन्नप्रक्रमे। स्वतन्त्रो न ज्ञानसाधनम्। न वा तत्सहायः। किन्तु पूर्वोक्तकामनया सिद्धसाधनसाध्यः। यत्राऽऽनुषङ्गिकं ज्ञानं भक्तिश्च भवति। भगवति प्रेम भक्तसङ्गश्च मुख्यतया भवति। तादृशीषु कथासु सन्मार्गवर्ती को वा रतिं न कुर्यादित्यर्थः। तत्राऽपि निर्वृतः अप्रवृत्तिमार्गपरः ॥ १२ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः।

**अकाम** इत्यत्र तद्भजननिराकरणबीजमाहुः भगवतैवेत्यादि। तथा च, पूर्वं 'श्रोतव्यादीनि राजेन्द्रे'ति (२-१-२) "नान्यत्र सज्जेदिति" (२-१-३९) "तन्निवृत्तो नियतार्थो भजेते" त्यादिभिः (२-२-६) पर्युदस्तस्य पुनः पर्युदासायोगादप्ययमेव शुकाशय इत्यर्थः ॥ १० ॥ ❀ ❀ **ज्ञानमित्यत्र सिद्धसाधनसाध्य** इति। तया सिद्धं यद्भगवद्भक्तसङ्गरूपं साधनं, तत्साध्यः ॥१२॥

### श्रीगिरिधरकृता बालप्रबोधिनी

राज्यकामः राजत्वकामः मनून् देवान् आदिराजभूतान् मनुरूपान् देवान् भजेत। अभिचरन् शत्रुमरणमिच्छंस्तु निर्ऋतिनामानं राक्षसं भजेत। कामकामः कन्दर्पवृद्धिमिच्छुः सोमं सर्वौषधिपोषकं चन्द्रं भजेत। अकामो वैराग्यकामः परं पुरुषं [illegible]

---

१. तद्वृत्त्यानुवृत्त्या इति ख. २. देवा वै सत्रं समासत ऋद्धिपरिमितमिति क. ख. ३. ऋद्धिपरिमितमिति ग. सिद्धं परिमितमिति घ. ४. परमभक्तैः स्वपतिनिष्ठाया इति ग. परमभक्तैस्त्वयमिति निष्ठयेति घ. ५. ओज इति क ग. ६. कामयिता महत्वाच्चेति घ. ७. सापाय इति ग. ८. भिन्नक्रम इति ग. ९. सर्वकामरहित इति क—पाठः। १०. ब्रह्मवर्चसेत्यारभ्य अकामः पुरुषं परमित्यन्ता उक्ताः कामाः।

विच्छिन्नेन भक्तियोगेन परं पुरुषं पुरुषोत्तममेव भजेतेत्यन्वयः । अकामत्वं कथं सम्भवतीत्यपेक्षायामाह—उदारधीरिति । तर्हि सर्वथा कामनारहितेन कस्यापि भजनं न कर्त्तव्यमित्याशङ्काऽकाम इत्यनेन निराकृता । सर्वतो विरक्तस्यापि भगवद्भजनं विना संसारदुःखनिवृत्तिर्न स्यादिति भावः । तर्हि देवतान्तरभजनाभावात् तत्तत्फलं न स्यादित्याशङ्का सर्वकाम इत्यनेन निराकृता । तत्तद्देवताभजने तत्तदेकैकं फलमेव, भगवद्भजने तु सर्वाण्येव फलानि भवन्तीति तु विशेषः । तत्तद्देवताभजने तत्तत्फलानामेव उक्तत्वान्मोक्षस्तु कस्य भजने भवतीत्यपेक्षा मोक्षकाम इत्यनेन निराकृता वेदितव्या ॥ १० ॥ ❀ ❀ पूर्वोक्तनानादेवताभजनस्यापि संयोगपृथक्त्वन्यायेन भक्तिफलकत्वमाह—एतावानिति । इह लोके यजतां इन्द्रादीन्भजतां यद्यपि कामनानुसारेण तत्तत्फलं भवति तथापि निःश्रेयसस्य परमफलस्योदयो लाभ एतावानेव, अन्यत्तु सर्वफलं तुच्छमेवेत्यर्थः । कोऽसौ लाभ इत्यपेक्षायामाह—भगवतीति । आराधितदेवप्रसादेन भागवतानां भगवद्भक्तानां सङ्गतो भगवति अचलो भावः निश्चला भक्तिर्भवतीति यदित्यन्वयः ॥ ११ ॥ ❀ ❀ भागवतसङ्ग इत्यनेन सूचितां हरिकथारतिं स्तौति—ज्ञानमिति । यद् यासु हरिकथासु आ सर्वतः प्रतिनिवृत्तमुपरतं सत्त्वादिगुणोर्मीणां रागादीनामशनायापिपासाशोकमोहजरामृत्युरूपाणां वा चक्रं समूहो यस्मात्तथाभूतं ज्ञानं भवति । ननु मलिनचित्तानामीदृग्ज्ञानमपि कथं स्यादित्याशङ्क्याह—उत अपि । आत्मप्रसादश्चित्तनैर्मल्यमपि यत एव भवतीति । वैराग्यं विना चित्तनिर्मलताऽपि कथं स्यादित्याशङ्क्याह—यत्रेति । यत्र यासु कथासु चित्तप्रसादहेतुर्गुणेषु शब्दादिविषयेष्वसङ्गो वैराग्यं च भवति । उभयत्रेति पाठान्तरे तु इहामुत्र च गुणेष्वसङ्गो भवतीत्यर्थः । अथ तु तदनन्तरमेवं कैवल्ये मोक्षे यः सम्मतः स तादृशो भक्तियोगश्च भवति तासु हरिकथासु रतिं प्रीतिं को न कुर्यादित्यन्वयः । ननु बहवोऽपि तत्र विरक्ता दृश्यन्ते एवेत्याशङ्कायाह—निर्वृत इति । शुश्रूषुभिः कृतिभिरिति प्रथम उक्तत्वात् स्वनुष्ठितपुण्यरहितानां कथाश्रवणसुखास्वादनाभावात् तेषां पशुतुल्यानां तत्र रत्यभावेऽपि स्वनुष्ठितपुण्यप्रभावेण श्रवणसुखानुभववांस्तत्र को वा रतिं न कुर्यादित्यर्थः ॥ १२ ॥

### हिन्दी अनुवाद

राज्यके लिए मन्वन्तरोंके अधिपति देवोंको, अभिचारके लिये निर्ऋतिको, भोगोंके लिये चन्द्रमाको और निष्कामता प्राप्त करनेके लिये परम पुरुष नारायणको भजना चाहिये ॥ ९ ॥ ❀ ❀ और जो बुद्धिमान् पुरुष है—वह चाहे निष्काम हो, समस्त कामनाओंसे युक्त हो अथवा मोक्ष चाहता हो—उसे तो तीव्र भक्तियोगके द्वारा केवल पुरुषोत्तम भगवान्की ही आराधना करनी चाहिये ॥ १० ॥ ❀ ❀ जितने भी उपासक हैं, उनका सबसे बड़ा हित इसीमें है कि वे भगवान्के प्रेमी भक्तोंका सङ्ग करके भगवान्में अविचल प्रेम प्राप्त कर लें ॥ ११ ॥ ❀ ❀ ऐसे पुरुषोंके सत्सङ्गमें जो भगवान्की लीला-कथाएँ होती हैं, उनसे उस दुर्लभ ज्ञानकी प्राप्ति होती है, जिससे संसार-सागरकी त्रिगुणमयी तरङ्गमालाओंके थपेड़े शान्त हो जाते हैं, हृदय शुद्ध होकर आनन्दका अनुभव होने लगता है, इन्द्रियोंके विषयोंमें आसक्ति नहीं रहती, कैवल्यमोक्षका सर्वसम्मत मार्ग भक्तियोग प्राप्त हो जाता है। भगवान्की ऐसी रसमयी कथाओंका चस्का लग जानेपर भला कौन ऐसा है, जो उनमें प्रेम न करे ॥ १२ ॥

## शौनक उवाच

**इत्यभिव्याहृतं राजा निशम्य भरतर्षभः । किमन्यत्पृष्टवान् भूयो वैयासकिमृषिं कविम् ॥१३॥**
**एतच्छुश्रूषतां विद्वन् सूत नोऽर्हसि भाषितुम् । कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवम् ॥१४॥**
**स वै भागवतो राजा पाण्डवेयो महारथः । बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे ॥१५॥**
**वैयासकिश्च भगवान् वासुदेवपरायणः । उरुगायगुणोदाराः सतां स्युर्हि समागमे ॥१६॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

अभिव्याहृतमुक्तम् । ऋषिं परब्रह्मदर्शिनम् कविं शब्दब्रह्मनिष्णातम् ॥ १३ ॥ ❀ ❀ श्रवणेच्छायां हेतुः । हरिकथा एव उदर्क उत्तरफलं यासु ताः कथाः । सतां भागवतानां सदसि सभायां स्युः । अत एतच्छुश्रूषतां श्रोतुकामानां नः ॥ १४ ॥ ❀ ❀ एतत्प्रपंचयति स वा इति द्वाभ्याम् । कृष्णपूजादिरूपां क्रीडां यः स्वीकृतवान् ॥ १५ ॥ ❀ ❀ उरुगायस्य गुणैरुदारा महत्यः कथाः स्युः ॥ १६ ॥

---

१ 'उभयत्र' इति पाठः । २ अशितुमिच्छाऽशनाया ।

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

ऋषिं परब्रह्मदर्शिनम् । कविमृषिष्वपि मध्ये तद्वर्णनातिशयचतुरम् ॥ १३ ॥ ❋ ❋ श्रवणकीर्तनादीन्येव स्वकर्त्तव्यत्वेन ज्ञात्वापि राज्ञा यदन्यत्पृष्टं तस्मात्तेषामेव श्रवणादीनां विषयाः कृष्णकथा एव प्रष्टव्या भविष्यंतीत्याशयेनाह—एतदिति । न च सर्गविसर्गमन्वंतरनानाराजादिकथानामपि तदन्यकथात्वं वाच्यमित्याह । कथा अपि हरिकथा एवोदर्क उत्तरफलं आसु ताः सर्गादिकथानामपि कृष्णकथायामेव पर्यवसितत्वात्ता अपि श्रवणादिविषया इति भावः । सतां सदसि प्राचीनार्वाचीनेषु मध्ये हे सूतेति कथनात्सूतस्य तु राजवंशकथाज्ञत्वमस्ति न तु हरिकथाभिज्ञत्वमित्याक्षेपवारणायाह—हे विद्वन्निति । व्यासशिष्यत्वात्त्वं सर्वज्ञोसीति भावः ॥ १४ ॥ ❋ ❋ सा सभा सर्वतः श्रेष्ठा यत्र श्रोता वक्ता च सर्वतोपि विलक्षण इत्याह—स वा इति । य इति । या या श्रीकृष्णस्य वृन्दावनादौ बालक्रीडा श्रुतास्ति तत्प्रेमावेशेन तत्सख्यादिभाववान् तां तामेव क्रीडां कृतवानित्यर्थः । बालानां क्रीडनकैः क्रीडासाधनैर्गोवत्सादिप्रतिकृतिभिः ॥ १५ ॥ ❋ ❋ भगवान्सर्वज्ञः सतां समागमे सति उरुभिर्वेदविद्भिर्गीयत इति उरुगायः श्रीकृष्णस्तस्य गुणा एवोदारा मनोरथप्रदातारः तत्रत्यानां जनिष्यमाणानां च जनानां ध्रुवं स्युरतस्तान् गुणानत्र प्रवर्त्तयेति । तेन कृष्णकथोदर्काः कथाश्च भक्तैरास्वादनीया इति भावः ॥ १६ ॥

## श्रीमद्वीरराघवव्याख्या

एवं हरिकथाप्रभावे उक्ते पुनर्जगद्व्यापाररूपहरिकथाबुभुत्सया मुनिऋषयोः संवादमवतारयितुं शौनकः पृच्छति इतीत्यादिना । इति पूर्वोक्तप्रकारेणाभिव्याहृतं निशम्य श्रुत्वा भरतर्षभः भरतवंशश्रेष्ठो राजा परीक्षिद्दृषिं परब्रह्मदर्शिनं कविं शब्दब्रह्मणि निष्णातं वैयासकिं व्यासपुत्रं श्रीशुकं प्रत्यन्यत्किं पृष्टवान् ॥ १३ ॥ ❋ ❋ एतच्छुश्रूषतां नः अस्माकं हे सूत हे विद्वन् ! भाषितुं वक्तुमर्हसि तत्प्रश्ने तव को लाभ इति चेत्तत्राह कथा इति । हरिकथैव उदर्कः उत्तरफलं यासां ताः हरिकथोदर्काः हरिकथाप्रधाना इत्यर्थः । तथाभूताः कथाः सतां भगवद्भक्तानां संसदि सभायां राजशुकयोः स्युः ध्रुवं निश्चयः । अतः भगवत्कथाश्रवणमेव लाभ इति भावः ॥ १४ ॥ ❋ ❋ भगवद्भक्तत्वमेवाह स इति सार्द्धेन । पांडवेयो महारथो राजा महाभागवतः यो राजा बालक्रीडनकैः बाल्यक्रीडाभिः क्रीडन् कृष्णक्रीडां श्रीकृष्णसेवारूपां क्रीडामाददे । तस्य क्रीडा अपि श्रीकृष्णपूजारूपा एवातः आबाल्यं भागवत इत्यभिप्रायः ॥ १५ ॥ ❋ ❋ एवं भगवानुत्पत्तिं प्रलयं चैव भूतानामित्यादिगुणविशिष्टो वैयासकिः वासुदेवः परायणं परमप्राप्यं परमोपायश्च यस्य स तथोक्तः । एवमुभयोरपि भागवतत्वात्तत्संवाद एव प्रष्टव्य इत्याह । हि यस्मात्सतां भागवतानां समागमे संगतो उरुगायस्य भगवतो गुणैरुदारा महत्यः कथाः स्युः प्रवृत्ता भवेयुः ॥ १६ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

परीक्षित्पृष्टशुकोक्तभगवत्कथा तद्द्विगुणभूतरसैव स्यादित्याशयवान् शौनकः सूतं पृच्छति इतीति । ऋषिमात्रस्य त्रिकालदर्शित्वमस्तीत्यतः कविमिति भगवंतमपरोक्षतो जानातीति ॥ १३ ॥ ❋ ❋ शुश्रूषतां श्रोतुकामानां सत्सभायां कदाचित्प्रसंगादितरकथापि संभाव्यत इति नेत्याह कथा इति । ध्रुवमित्यनेन नियमो दर्शितः ॥ १४ ॥ ❋ ❋ अनयोरेकस्याप्यसत्त्वे नियमभंगः स्यादिति नेत्याह स वा इति । तत्र हेतुमाह बाल इति ॥ १५ ॥ ❋ ❋ अस्तूभयोः सत्त्वं ततः किं तत्राह उरुगायेति उरुगायेत्यनेन हरिकथाया अवश्यसद्भावं दर्शयति उरुभिर्वेदविद्याविरदैर्महद्भिर्गीयत इति उरुगायः सतां समितौ प्राचुर्येण हरिकथासत्त्वेऽपि प्रसंगादन्यकथा स्यात् न तथा श्रीशुकपरीक्षितोरित्येतस्मिन्नर्थे हि शब्दः । कथा इति शेषः ॥ १६ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

इत्यभीति । सम्भाव्यैवेदं पृच्छति ॥ १३ ॥ ❋ ❋ कथा इति । लौकिक कथा अपि । हरिकथास्तु आदित एव तद्रूपाः । स्युरित्यर्थः ॥ १४ ॥ ❋ ❋ स वै इति । या या श्रीकृष्णस्य वृन्दावनादौ बालक्रीडा श्रुतास्ति तत् प्रेमावेशेन तत् सख्यादिभाववान् तां तामेव क्रीडां यः कृतवानित्यर्थः ॥ १५ ॥ ❋ ❋ अतएव स वै भागवतो राजा इत्याद्यनन्तरं राज्ञा समानवासनत्वेन वक्तारमाह । वैयासकिश्चेति । च शब्दः प्राग्वर्णितेन समानत्वं बोधयति । तस्मात् श्रीवसुदेवनन्दनत्वेनैवात्रापि वासुदेवशब्दो व्याख्येयः । अन्येषामपि सतां समागमे तावदुरुगायस्य गुणोदाराः कथा भवन्ति । तयोस्तु श्रीकृष्णचरितप्रधाना एव ता भवेयुरिति भावः ॥ १६ ॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

किमन्यत् पृष्टवानिति उक्ते नैतेनैव सर्वजिज्ञासितसिद्धेरिति विस्मयः सूचितः । ऋषिं परब्रह्मदर्शिनम् । कविं ऋषिष्वपि मध्ये तद्वर्णनातिशयचतुरम् ॥ १३ ॥ ❋ ❋ श्रवणकीर्त्तनादीन्येव स्वकर्त्तव्यत्वेन ज्ञात्वापि राज्ञा यदन्यत् पृष्टं तस्मात्तेषामेव

श्रवणादीनां विषयाः कृष्णकथा एव प्रष्टव्या भविष्यन्तीत्याशयेनाह एतदिति । न च सर्गविसर्गमन्वन्तरनानाराजादिकथानामपि तदन्यकथात्वं वाच्यमित्याह । कथा अपि हरिकथा एव उदर्कः उत्तरफलं यासुः ताः सर्गादिकथानामपि कृष्णकथायामेव पर्य्यवसितत्वात् ता अपि श्रवणादिविषया इति भावः ॥ १४ ॥ ❀ ❀ सतां सदस्यपि प्राचीनार्व्वाचीनेषु मध्ये सा सभा सर्व्वतः श्रेष्ठा यत्र श्रोता वक्ता च सर्व्वतोऽपि विलक्षण इत्याह—स वै इति द्वाभ्याम् । कृष्णक्रीडां कृष्णक्रीडानुकरणम् ॥ १५ ॥ ❀ ❀ भगवान् सर्व्वज्ञः । सतां समागमे सति उरुगायस्य कृष्णस्य गुणा एव उदारा मनोवाञ्छितार्थप्रदातारः तत्रत्यानां जनिष्यमाणानाञ्च जनानां ध्रुवं स्युः । अतस्तान् गुणानत्र प्रवर्त्तयेति । तेन कृष्णकथोदर्काः कथाश्च भक्तैरास्वादनीया इति भावः ॥ १६ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

एवं संक्षेपतः सर्वशास्त्रार्थं श्रुत्वा पुनर्विस्तरतस्तद्बुभुत्सया शुकपरीक्षित्संवादमवतारयितुं शौनक आह इतीति । अभिव्याहृतम् । श्रीशुकेनोक्तम् । निशम्य श्रुत्वा भूयः पुनः ऋषिं परब्रह्मदर्शिनं कविं शब्दब्रह्मदर्शिनं वैयासकिं व्यासपुत्रं शुकं प्रति । अन्यत् किं पृष्टवान् ॥ १३ ॥ ❀ ❀ हरिकथैव उदर्कः उत्तरफलं यासु ताः कथाः सतां भागवतानां सदसि सभायां ध्रुवं स्युः । अतो मद्राज्ञा पृष्टमेतच्छुश्रूषतां श्रोतुमिच्छतां नोऽस्माकं भाषितुमर्हसि ॥ १४ ॥ ❀ ❀ उभयोर्भागवतत्वं तयोः संवादे हरिकथाप्रवृत्तिं चाह स इति द्वाभ्याम् । यो बालक्रीडनकैः बालक्रीडाभिः क्रीडन् कृष्णक्रीडां श्रीकृष्णसेवारूपां क्रीडामाददे अतः स स्वभावत एव भागवतः ॥ १५ ॥ ❀ ❀ वासुदेवः परमुत्कृष्टमयनं प्राप्यो यस्य सः सतां समागमे संगतौ उरुगायस्य भगवतो गुणैरुदाराः श्रोतृणां सर्वार्थसाधकाः कथाः स्युः प्रवृत्ता भवेयुः । अतस्ताः भाषितुमर्हसि इति हि शब्दाल्लभ्यते ॥ १६ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं ससाधनं भक्तिमार्गमु[1]पदिश्य तस्य विशेषाकाङ्क्षायामन्यद्वक्तव्यमिति तूष्णींभूतः । [2]तथा सूतोऽपि । अयमर्थो गुप्ततया निरूपित इति शौनकादीनां हृदये समागतो [3]नवेति सन्दिह्य तूष्णींस्थिते स्वाभिप्रायं शौनकः प्रकटयन् गुप्ततयोक्तमर्थं प्रकटयितुमाह—[4]इत्यभिव्याहृत इति [5]यावदध्यायसमाप्ति । इदमेव हि तस्य परिज्ञानं यद्वक्त्यसाधकानां विद्यमानानां वैयर्थ्यज्ञानम् । तदा हि तत्साधनेषु प्रवृत्तिर्भवति । यस्तु सिद्धसाधनः स भगवत्सङ्गेऽपि सिद्धे कथायामपि रतौ सत्यां भगवति स्नेहार्थमेव [6]यत्तोऽवशिष्यत इत्यसदपेक्षया राजा महान् । अतस्तत्प्र[7]श्नानुसारेणैव भक्त्युपाये ज्ञाते तत्कर्त्तव्यमित्यभिप्रायेण प्रथमं प्रश्नं पृच्छति—इत्यभिव्याहृत इति चतुर्भिः । अभितो व्याहृतः । उपदिष्ट इत्यर्थः । निशम्य तदभिप्रायं ज्ञात्वा । [8]भरतर्षभत्वान्न व्यामोहः । अतः पूर्वोक्तमेव न पृष्टमित्यर्थः । अन्यदेव पृष्टवान् । यद्यपि सर्वमुत्तरितं तथापि प्रकारान्तरेण तदुपपादकरूपेण वा किं भूयः पृष्टवानित्यर्थः । शुकस्य विरक्तत्वाद्बहुकालस्थित्यभावेन न किञ्चित्पृष्टं भविष्यतीत्याशङ्क्याऽऽह—वैयासकिमिति । सर्वविस्ता[9]रकर्तुः पुत्रोऽपि तादृश इति । तत्राऽपि भागवतलक्षणं मन्त्राधिष्ठातृभगवदभिप्रायं जानातीति सर्वथा कथयिष्यतीति कीर्त्त्यभिप्रायेण ऋषिपदम् । विशेषकथनसामर्थ्यार्थं कविपदम् ॥ १३ ॥ ❀ ❀ तेन किं भवतामित्यपेक्षायामाह—एतदिति । एतच्छ्रवणेऽस्माकं महतीच्छा । त्वं च जानासि । सर्वत्र कथने च तवाऽधिकार एवेति सम्बोधनद्वयम्—विद्वन्, सूतेति । अतो नोऽस्मभ्यं भाषितुमर्हसि । श्रोतृवक्तृपरत्वव्यावृत्त्यर्थमाह—कथा हरिकथोदर्का इति । अन्या अपि कथाः सतां सदसि हरिकथोदर्का एव भवन्ति । हरिक[10]थैव [11]उदर्क उत्तरफलं यासु । ध्रुवमिति नाऽत्र सन्देहः ॥ १४ ॥ ❀ ❀ सत्सभायामेवैवं भवति । सुतरामपूर्वसत्सङ्गे । तत्रोभयोः सत्त्वमुक्त्वा तत्सङ्गे कथाऽऽवश्यकत्वं वक्तव्यम् । तत्र प्रथमं समागतस्य पृच्छकाधीनत्वात् पृच्छकस्य भगवद्भक्तत्वमाह— स वै भागवत इति । निश्चयेन राजाऽपि स भागवत एव । अथवा । राजा हि बहु पृच्छति । भागवतश्च भगवदीयम् । तस्योभयरूपत्वाद्भगवदीयं बहु [12]पृच्छतीत्यर्थः । तस्य भगवदीयत्वे साधनभूतं हेतुद्वयमाह— पाण्डवेयो महारथ इति । भगवदीयवंशे अवतीर्णत्वात्स्वधर्मनिष्ठत्वाच्च । फलमुखमन्तरङ्ग[13] साधनं तस्य चित्तस्वभावो भगवत्पर इत्याह । यस्तु बाल्ये बालक्रीडनकैः क्रीडन्नेकं भगवन्तं स्थापयित्वा तत्सेवकत्वेन राजलीलामिव क्रीडति । वृन्दावनस्थां भगवत्क्रीडां वा अभिनयेनानुकरोति ॥ १५ ॥ ❀ ❀ शुकोऽपि भगवद्भक्त इत्याह—वैयासकिश्चेति । श्रोता तु भगवदीयानां वंशजो भगवदीयः । शुकस्तु भगवतः पुत्रो भगवान् । तथाभूतः सन् वासुदेवपरायणः । चकारादन्येऽपि तादृशाः अतः सर्वेऽपि सन्तः । तेषां च नूतनः समागमः । तादृशे कथाः सर्वभक्तानां सम्मताः । सर्वपुरुषार्थानां स्वतन्त्रतया साधनाभावेऽपि दातारो ये भगवत्गुणास्ते यासु । अतस्ताः कथयेति पूर्वेणैव सम्बन्धः ॥ १६ ॥

---

१. उद्दिश्येति क. घ. २. सूतोपि तथा इति ख. ३ वा नेतीति क. ४. इत्यभिव्याहृतमिति क. घ. ५. यावदध्यायसमाप्तिः इति क. ग. घ. ६ यतोऽशिष्यत इति ख. ७ प्रश्नानुसारेणेति ख. ८ भरतऋषभत्वादिति क. ख. घ. ९ विस्तरेति ग. घ. १० कथनं चेति क. ख. घ. ११ उदर्कमुत्तरफलमिति क. ग. १२ प्रच्छतीत्यर्थ इति ख. १३ फलमुत्तरङ्गमिति ख. घ.

## श्रीगिरिधरकृता बालप्रबोधिनी

एवं साधनं भक्तिमार्गं उपदिश्याग्रे विशेषाकाङ्क्षायां अन्यद्वक्तव्यमित्यभिप्रायेण श्रीशुकस्तूष्णीं बभूवेति तदनुसारी सूतोऽप्येतेनैवाभिप्रायेण तूष्णीं जातस्तदभिप्रायं ज्ञात्वा शुकपरीक्षित्संवादद्वारैव कथाविशेषबुभुत्सया शौनकः पृच्छति—इतीति। इत्येवं पूर्वोक्तं शुकेनाभिव्याहृतं कथितं निशम्य श्रुत्वा राजा परीक्षित् वैयासकिं व्यासपुत्रं शुकं प्रति भूयः पुनः अन्यत्किं पृष्टवानित्यन्वयः। किञ्चित्पृष्टवानेवेति कथं निश्चय इत्याकाङ्क्षायां भगवद्भक्तत्वेन भरतवंशे श्रेष्ठत्वेनाधिकारित्वादित्याशयेनाह—भरतर्षभ इति। शुकस्योत्तरदानसामर्थ्ये तु सन्देहो नैवास्ति तत्र सामर्थ्यस्य विद्यमानत्वादिति सूचयन्नाह—कविं शब्दब्रह्मणि निष्णातमिति। तत्रापि हेतुमाह—ऋषिमिति, परब्रह्मनिष्ठमित्यर्थः॥ १३॥ ❀ ❀ किमपि पृच्छतु तेन भवतां किमित्यपेक्षायामाह—एतदिति। एतच्छुकपरीक्षित्संवादरूपं शुश्रूषतां नोऽस्माकं भाषितुं कथयितुं त्वमर्हसीत्यन्वयः। कथं तत्कथने मम योग्यतेत्यपेक्षायां तत्र तवाधिकारत्वादिति सूचयन्सम्बोधयति—हे सूतेति। सूतोऽप्यज्ञश्चेत्तर्हि कथं कथयेदिति शङ्कां तज्ज्ञत्वेन निराकुर्वन् पुनः सम्बोधयति—हे विद्वन्निति। तच्छ्रवणेच्छैव तव कथं जातेत्यपेक्षायां भगवत्कथायास्तत्रावश्यकत्वादित्याह—कथा इति। हरिकथैवोदर्क उत्तरोत्तरफलं यासु तथाभूताः कथाः सतां भागवतानां सदसि सभायां स्युरिति ध्रुवं निश्चितमेव, नात्र सन्देह इत्यर्थः॥ १४॥ ❀ ❀ श्रोतृवक्त्रोर्भागवतत्वमेव स्पष्टयति—स वा इति, स राजा परीक्षिद् भागवत एव। वा अवधारणे। कुतः? तद्भक्तपाण्डवकुलोत्पन्नत्वादित्याशयेनाह—पाण्डवेय इति। 'यद्यद्विभूतिमत्सत्त्वं' इति वाक्यानुसारेण तस्य भगवदनुग्रहेण महापराक्रमत्वादपि भागवतत्वमित्याशयेनाह—महारथ इति। स्वतोऽपि तस्य भागवतत्वमाह—यो राजा बाल्ये बालक्रीडनकैः क्रीडन् कृष्णपूजारूपां क्रीडामाददे स्वीकृतवान्॥ १५॥ ❀ ❀ भगवान् ज्ञानवैराग्यादिमान् वैयासकिः शुकश्च वासुदेवपरायणः। तत्र समागता अपि भागवता एव अतस्तेषां सतां समागमे समाजे उरुधा गीयते इत्युरुगा यो भगवांस्तस्य गुणैरुदारा यथाधिकारं धर्मादिचतुर्विधपुरुषार्थहेतुभूताः कथा एव स्युरित्यन्वयः। हीत्यवधारणे॥ १६॥

## हिन्दी अनुवाद

शौनकजीने कहा—सूतजी! राजा परीक्षित्‌ने शुकदेवजीकी यह बात सुनकर उनसे और क्या पूछा? वे तो सर्वज्ञ होनेके साथ-ही-साथ मधुर वर्णन करनेमें भी बड़े निपुण थे॥ १३॥ ❀ ❀ सूतजी! आप तो सब कुछ जानते हैं। हमलोग उनकी वह बातचीत बड़े प्रेमसे सुनना चाहते हैं, आप कृपा करके अवश्य सुनाइये; क्योंकि संतोंकी सभामें ऐसी ही बातें होती हैं, जिनका पर्यवसान भगवान्‌की रसमयी लीला-कथामें ही होता है॥ १४॥ ❀ ❀ पाण्डुनन्दन महारथी राजा परीक्षित् बड़े भगवद्भक्त थे। बाल्यावस्थामें खिलौनोंसे खेलते समय भी वे श्रीकृष्णलीलाका ही रस लेते थे॥ १५॥ ❀ ❀ भगवन्मय श्रीशुकदेवजी भी जन्मसे ही भगवत्परायण हैं। ऐसे संतोंके सत्सङ्गमें भगवान्‌के मङ्गलमय गुणोंकी दिव्य चर्चा अवश्य ही हुई होगी॥ १६॥

**आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ। तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया॥१७॥**
**तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत। न खादन्ति न मेहन्ति किं ग्रामपशवोऽपरे॥१८॥**
**श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः। न यत्कर्णपथोपेतो जातु नाम गदाग्रजः॥१९॥**
**बिले बतोरुक्रमविक्रमान् ये न शृण्वतः कर्णपुटे नरस्य।**
**जिह्वासती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः॥ २०॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

किं च। वृथैव क्षीयमाणमायुर्हरिकथया सफलं कुर्वित्याशयेनाह त्रिभिः। आयुरिति। असौ सूर्य उद्यन्नुद्गच्छन् अस्तमदर्शनं च यन्गच्छन् यत् येन क्षणो नीतस्तस्य आयुरृते तं वर्जयित्वा अन्येषां वृथैव हरति॥ १७॥ ❀ ❀ ननु जीवनमेव तेषामायुषः फलमस्ति तत्राह। तरव इति। ननु तेषां श्वासो नास्ति तर्हि भस्त्राश्चर्मकोशाः। ननु तासामाहारादिकं नास्ति तत्राह। न खादंति नाश्नंति न मेहंति रेतःसेकं मैथुनं न कुर्वंति किम्? उत अपि नराकारं पशुं मत्वाऽऽह। अपर इति॥ १८॥ ❀ ❀ तदेवाह। श्वादिभिः संस्तुतः सदृशो निरूपितः यस्य कर्णपथं कदाचिदपि नागतः सः अवज्ञास्पदत्वाच्छ्वभिः करमलविषयासक्तत्वाद्विड्वराहैर्ग्रामसूकरैः कंटकवद्दुःखदविषयासक्तत्वादुष्ट्रैर्भारवाहित्वात् खरैस्तुल्य इत्यर्थः॥ १९॥ ❀ ❀ तस्याङ्गानि

च निष्फलानीत्याह बिले इति पञ्चभिः । बतेति खेदे । न शृण्वतोऽशृण्वतो नरस्य ये कर्णपुटे ते बिले वृथा रंध्रे । न चेदुपगायति तस्य जिह्वा असती दुष्टा दर्दुरो भेकस्तदीया जिह्वेव ॥ २० ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

तत्र विलम्बः कार्य इत्याह—किं चेति । हरति वृथागामित्वाद्बलादाच्छिनत्तीव । यद्वा । क्षणोपि निमेषत्रयमपि तावतैव कालेन सर्वमायुः सफलं भवति । एकस्यामेव शाखायां फलितायां वृक्षोयं फलवानिति यथोच्यते । प्रतिशाखं फलवत्त्वे कैमुत्यमिव सर्वस्यायुषः कृष्णवार्त्तायुक्तत्वमपेक्ष्यम् । नन्वेवं चेदायुर्हरणाभावात्कृष्णवार्त्तयापि तत्क्षणे जनो न म्रियेत् । सत्यम् । सत्पात्रीकृतवित्तो जनोऽक्षयवित्तो यथोच्यते परत्र तद्भोगानंत्यप्राप्तेः "स मम ब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे । अधीते शतसाहस्रमनंतं वेदपारगे ॥" इति स्मृतेः । अब्राह्मणे ब्राह्मणेतरे सत्कर्मणि लिंगिजनादौ । ब्राह्मणब्रुवे कुत्सितविप्रे । अधीते शास्त्राध्येतरि । वेदपारगे वेदार्थज्ञानवति इति । तथैव कृष्णसात्कृतस्यायुर्जनः परत्र तत्पार्षदत्वप्राप्त्या ध्रुवमक्षयायुर्भवतीति । कृष्णभक्तस्यायुर्हरणाभावो ज्ञेयः । जरामरणरोगादिकं तु भक्त्युत्कर्षवृद्ध्यर्थं मतांतरोत्थानाभावार्थं च स्वभक्ते रहस्यत्वरक्षणार्थं च भगवदिच्छयैव भवति न तु तत्र कालकर्मादिर्वस्तुतः कारणतेत्युपपादितं भीष्मनिर्याणाध्याये ॥ १७ ॥ ❀ ❀ अत्राक्षिपति—नन्विति ॥ मनुष्येभ्योपि तेषां तरुभस्त्राग्रामपशूनां जीवनाधिक्यश्वासाधिक्यखादनाद्याधिक्यानि संतीत्यतस्ते नराकाराः पशव एवेति भावः ॥ १८ ॥ ❀ ❀ तदेव नराकारपशुत्वमेव । तेषां पशुत्वेप्यतिगर्हणीयत्वमाह श्वादिभिः संस्तुतः सम्यक् स्तुतः । अस्माकं चतुर्णामपि धर्मानयमेक एव धत्ते । वयं तु परस्परधर्मग्रहणेप्यसमर्था इति । तथाऽयं मनुष्योपि भूत्वा वयं तु पशवो भूत्वा पश्वंतरस्यैकस्यापि धर्मं धर्तुं न शक्नुम इति । तथायं शास्त्रादिष्टं स्वधर्ममप्युल्लंध्यातिरागेणैव धत्ते । वयं तु नियतिकृते स्वस्वधर्मे एव पतिता इति । तथायमसद्धर्मे जनिष्यमाणं नरकं ज्ञात्वा वयं तु मूढा एवेति चतुर्द्धा स्तुतिः । तेषां श्वादीनां धर्मा निर्हेतुरोषणत्वामेध्यभोजित्वमहाभारवाहित्वस्त्रीपादताडितत्वादयः । यस्य कार्यपथे जातु कदाचिदपि नोपेतो गतः गदाग्रज इति । गदस्य रोगस्याग्रे प्रतियोद्धेव जायते प्रादुर्भवतीति श्लेषेण तदैव ते क्रोधादयः पुरुषस्य रोगा नश्यंतीति भावः ॥ १९ ॥ ❀ ❀ तस्यांगिनः पुरुषस्य निंदां कृत्वा प्रत्येकतदंगानि निंदति । बिले एव ग्राम्यवार्ताभुजगगृहतुल्ये । श्लेषेणासती स्त्रीव तस्य सुकृतसर्वस्वं विप्लावयति । अत्र यद्यपि पुरुषो भुजाद्येकांगकृतयापि भक्त्या कृतार्थ एव भवति तदपि तस्यांगांतराणि तु व्यर्थान्येव भवंतीत्याशयेनांगानां निंदा ज्ञेया ॥ २० ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

[ न चेति । च शब्दश्चेदर्थे इति वोपदेवीयमुक्ताफले कैवल्यदीपिका ॥ २०-२५ ]

### श्रीमद्वीरराघवव्याख्या

किं च वृथैव क्षीयमाणमायुर्हरिकथायामेव सफलं कुर्वित्याशयेनाह आयुरिति त्रिभिः । असौ सूर्य उद्यन्नुदयं प्राप्नुवन्नस्तं च यन् तिरोधानं प्राप्नुवन्तिरोवन्नित्यर्थः । उत्तमश्लोकस्य भगवतो वार्त्तया कथया यत् क्षणो नीतः यः क्षणो नीतः तस्य ऋते तं क्षणं विना आयुर्हृतं स तु क्षणो न हृतः सफल इत्यर्थः ॥ १७ ॥ ❀ ❀ ननु जीवनमेव तदायुषः फलमस्तु तत्राह तरव इति । उत्पत्तिनाशमध्यस्थितिर्जीवनम् ननु तेषां श्वासो नास्ति तत्राह भस्त्रा इति चर्मकोशा न श्वसंति किं वायुमूर्ध्वं न निःसारयंति किं ननु तासामाहारादिकं नास्ति तत्राह ग्रामपशवः अपरे आयुर्व्ययं कुर्वतश्च न खादंति नादन्ति न मेहन्ति न रेतः सिंचंति मैथुनं न कुर्वंतीत्यर्थः ॥ १८ ॥ ❀ ❀ विड्वराहः ग्रामशूकरः ॥ १९ ॥ ❀ ❀ ऊरुक्रमस्य भगवतो विक्रमान् व्यापारान् न शृण्वतोऽशृण्वतो नरस्य ये कर्णपुटे ते बिले वृथा रंध्रे हे सूत ! उरुगायगाथाः भगवत्कथाः न चेदुपगायति तस्य जिह्वाऽसती दुष्टा दार्दुरिकी मण्डूकजिह्वेव ॥ २०

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

वासुदेवकथामंतरेण जीवनं व्यर्थमित्याह आयुरिति ॥ उद्यन् अस्तं च यन् गच्छन् असावादित्यः पुंसां यदायुर्हरति वै । "आदित्यस्य गतागतैरहरहः संक्षीयते जीवन" मिति वचनात् तस्यायुषो य उत्तमश्लोकवार्तया ऋते विना क्षणः कालविशेषः स नीत एव वृथेत्यन्वयः ॥ १७ ॥ ❀ ❀ हंत लोके दीर्घकालं जीवन् पुमान् स्तूयत इति तत्राह तरव इति । तरूणां श्वासाद्यभावादित्यत उक्तं भस्त्रा इति भस्त्रादयः । अयःसंतापनार्थाश्चर्मविशेषाः ॥ भस्त्राणां निश्चैतन्यात्र तत्साम्यमत्राह नेति । ग्रामपशवः सारमेयादयो मेहन्ति रेतो मूत्रादिकमुत्सृजंति अपरे तिर्यग्जातिव्यतिरिक्ताः स्त्रीपुरुषाः । अनेन हरिचरितश्रवणाभावे चेतनत्वमप्रयोजकमित्युक्तं भवति ॥ १८ ॥ ❀ ❀ एतदेव विशिनष्टि श्वविडिति । विड्वराहोऽमेध्यशूकरः पशुर्विवेकशून्यः । गदाभृत इति पाठे गदाभृत इति पदार्थः ग्राममश्रित इतिवत् ॥ १९ ॥ ❀ ❀ हतोपि हरिकथां श्रावं श्रावं वर्तमानस्य पुंसः श्रोत्रादीन्द्रिय-

साफल्येनायुषः साफल्यमन्यथा व्यर्थमित्याशयेनाह बिले इति । शृण्वतः शृणुतः बिले पर्वतस्येति शेषः । उरुगायगाथां न प्रगायति चेत्तर्हि दार्दुरिका दर्दुरस्य विद्यमाना जिह्वाऽसतीव ॥ २० ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या ।

अनन्तरं श्रीशौनकेनापि व्यतिरेकोक्त्या तस्यैवाभिधेयत्वं दृढीकृतम् । तदाह आयुर्हरतीति । असौ सूर्य्यः उद्यन् अस्तञ्च यन् गच्छन् हरति वृथागामित्वाद् बलादाच्छिनत्तीव । यत् येन क्षणोऽपि नीतः तस्य आयुः । ऋते वर्ज्जयित्वा । तावतैव सर्व्वसाफल्यात् । यद्यपि क्षणं भगवद्वार्त्तयापि सर्व्वमायुः सामान्याकारेण सफलं जायते । एकस्यां शाखायां फलितायामखण्डवृक्षवत् तथापि प्रतिविशेषावस्थमपि सफलं जायतामित्येतदर्थं मम प्रश्न इति भावः ॥ १७ ॥ ❀ ❀ तत्रायुरेकदेशेऽपि तत्सम्बन्धबहिर्भूतान्निन्दंस्तमेव दृढयति तरव इति द्वयेन । न च तरूणां श्वासो नास्तीति तेषु न्यूनत्वं वाच्यम् । सत्यपि श्वासे जीवनाभावदर्शनात् सोऽयमकिञ्चित्कर इत्याह भस्त्रा इति । ननु तरूणां रसनादिभोगो नास्ति तत्राह न खादन्तीति । न मेहन्ति मैथुनं न कुर्व्वन्ति । तानपि नराकारान् पशून् मत्वाह अपरे इति ॥ १८ ॥ ❀ ❀ तदेवाह श्वविड्वराह इति । श्वादितुल्यैस्तत् परिकरैः सम्यक् स्तुतोऽप्यसौ पुरुषः पशुः । तेषामेव मध्ये श्रेष्ठश्चेत्तर्हि महापशुरेवेत्यर्थः । यद्वा श्वादिभिः संस्तुतः सम्यक् स्तुतः सर्व्वेषामस्माकं यत् किञ्चिद्गुणादिकं तत् सर्व्वमनेन धृतमित्यर्थः ॥ १९ ॥ ❀ ❀ अथायुर्विशेषावस्थावैफल्यदृष्टान्तत्वेन तत्तदङ्गविशेषवैफल्यमाह बिले बतेति त्रिभिः । न-शृण्वतः अशृण्वतः नरस्य ये कर्णपुटे ते बिले वृथारन्ध्रे इत्यर्थः । असती दुष्टा । ( भेकस्य कालापकर्षकत्वेन दृष्टान्तत्वम् । न योपेति क्वचित् पाठः । स च स्वाम्यसम्मतः पूर्व्ववत् यत्तच्छब्दाभ्यामनन्वयात् चेच्छब्दाध्याहाराच्च ) ॥ २० ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या ।

नात्र विलम्बः कार्य्यं इत्याह आयुरिति । असौ सूर्य्य उद्यन् उदयं प्राप्नुवन् अस्तम् अदर्शनञ्च यन् गच्छन् । तस्य आयुः ऋते विना यत् येन क्षणः अवसरः । यद्वा क्षणोऽपि निमेषत्रयमपि । तावतैव कालेन सर्व्वमायुः सफलं भवति । एकस्यामेव शाखायां फलितायां वृक्षोऽयं फलवानिति यथोच्यते । प्रतिशाखं फलवत्त्वे कैमुत्यमेव सर्व्वस्यायुषः कृष्णवार्त्तायुक्तत्वमपेक्ष्यम् । नन्वेवञ्चेदायुर्हरणाभावात् कृष्णवार्त्तार्पितक्षणो जनो न म्रियेत । सत्यम् । सत्पात्रीकृतवित्तो जनोऽक्षयवित्तो यथोच्यते परत्र तद्भोगानन्त्यप्राप्तेः । "सममब्राह्मणे दानं द्विगुणं ब्राह्मणे भवेत् । अधीते शतसाहस्रमनन्तं वेदपारगे" इति स्मृतेः । तथैव कृष्णसात्कृतस्वायुर्जनः परत्र तत् पार्षदत्वप्राप्त्या ध्रुवमक्षयायुर्भवतीति कृष्णभक्तस्यायुर्हरणाभावो ज्ञेयः । जरामरणरोगादिकं तु भक्त्युत्कण्ठावृद्ध्यर्थं मतान्तरोत्खाताभावार्थञ्च स्वभक्तेः रहस्यत्वरक्षणार्थञ्च भगवदिच्छयैव भवति, न तु तत्र वस्तुतः कालकर्म्मादेः कारणतेत्युपपादितं भीष्मनिर्याणाध्याये ॥ १७ ॥ ❀ ❀ न चायुर्हरणाभावस्य मर्त्त्यलोके जीवनमेव फलमित्यत आह तरव इति । प्रत्युत मनुष्येभ्योऽपि तेषां जीवनाधिक्यम् । ननु तेषां श्वासो नास्तीत्यत आह—भस्त्रा इति । प्रत्युत मनुष्येभ्योऽपि । भस्त्राणां श्वासाधिक्यम् । ननु तासामाहारादिकं नास्तीति तत्राह—न खादन्तीति । न मेहन्ति स्त्रीसम्भोगं न कुर्व्वन्ति मेहनं रेतःसेकः । प्रत्युत मनुष्येभ्योऽपि तेषां खादनाद्याधिक्यम् । अपरे इत्यनेन तेषामपि नराकारपशुत्वं व्यञ्जितम् ॥ १८ ॥ ❀ ❀ तेषां पशुत्वेऽप्यतिगर्हणीयत्वमाह । श्वादिभिः सम्यक् स्तुतः । अस्माकं चतुर्णामपि धर्म्मान् अयमेक एव धत्ते वयन्तु परस्परधर्म्मग्रहणेऽप्यसमर्था इति, तथा अयं मनुष्योऽपि भूत्वा वयन्तु पशवोऽपि भूत्वा पश्वन्तरस्यैकस्यापि धर्म्मं धर्त्तुं न शक्नुम इति, तथायं शास्त्रादिष्टं स्वधर्म्ममप्युल्लङ्घ्य अतिरागेणैव धत्ते वयन्तु नियतिकृते स्वस्वधर्म्मे एव पतिता इति, तथायमस्मद्धर्म्मैः जनिष्यमाणं नरकं ज्ञात्वापि वयन्तु मूढा एवेति चतुर्द्धा स्तुतिः । तेषां श्वादीनां धर्म्मास्तु निर्हेतुरोषणत्वामेध्यभोजित्वमहाभारवाहित्वस्वस्त्रीपादताडितत्वादयः । यस्य कर्णपथे न जातु, कदाचिदपि न, उपेतः गतः । गदाग्रजः इति गदस्य रोगस्याग्रे प्रतियोद्धेव जायते प्रादुर्भवतीति श्लेषेण तदेव ते क्रोधादयः पुरुषस्य रोगा नश्यन्तीति भावः ॥ १९ ॥ ❀ ❀ एवं पुरुषमङ्गिनं निन्दित्वा प्रत्येकभक्त्या विना प्रत्येकतदङ्गानि निन्दति बिले इति पञ्चभिः । बत खेदे । न-शृण्वतः अशृण्वतः पुंसो ये कर्णपुटे ते बिले एव ग्राम्यवार्त्ताभुजङ्गगृहतुल्ये । दर्दुरो भेकस्तदीयेवासती मिथ्याभूता दुष्टा श्लेषेण असती स्त्री इव तस्य सुकृतसर्व्वस्वं विप्लावयति । अत्र यद्यपि भुजाद्येकाङ्गकृतयापि भक्त्या पुरुषः कृतार्थ एव भवति तदपि तस्याङ्गान्तराणि तु व्यर्थान्येव भवन्तीत्याशयेनाङ्गानां निन्दा ज्ञेया ॥ २० ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरिभजनं विना वृथैव देहधारणमित्याह—आयुरित्यष्टभिः । यद् येन उत्तमकीर्तेर्भगवतो वार्तया क्षणो नीतस्तस्यायुः ऋते विना । असौ सूर्यः उद्यन् उद्गच्छन् अस्तमदर्शनं च यन् गच्छन् पुंसामायुर्हरति वृथैव नाशयति ॥ १७ ॥ ❀ ❀ भस्त्राः चर्मकोषा अपरे प्रसिद्धपशुभ्यो नराकाराः पशवः न मेहन्ति न रेतः सिंचंति । देहधारणमात्रेण वा वायुधारणमात्रेण भोजनमैथुनपरत्वेन वा यद्यायुः सफलं स्यात्तर्हि तर्वादिभ्यः पुंसां को विशेष इति भावः ॥ १८ ॥ ❀ ❀ अत एव नाम प्रसिद्धो यः गदाग्रजः

श्रीकृष्णः यस्य जनस्य जातु कदाचिदपि कर्णपथोपेतो न भवति स श्वादिभिः संस्तुतः सदृशो निरूपितः ॥ १९ ॥ ❀ ❀ बतेति खेदे । उरुक्रमस्य त्रिविक्रमस्य भगवतो विक्रमान् न शृण्वतः अशृण्वतः नरस्य कर्णपुटे बिले निरर्थके छिद्रे । यः उरुगायस्य बहुधा गीयमानस्य भगवतः गाथाः कथा न चेदुपगायति तस्य जिह्वा असती दुष्टा दार्दुरिकेव दर्दुरस्येयं दार्दुरिका तत्तुल्या ॥ २० ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

इदानीं विद्यमानानां [1]भक्त्यसाधकत्वे वैफल्यं वक्तुं भक्तिसाधकत्वे सफलत्वं कैमुतिकन्यायेनाऽऽह—आयुर्हरतीति । **"योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेति, मा मे प्रजाया मा पशूनां मा मम प्राणानादायोदगाः । असौ योऽस्तमेति स सर्वेषां भूतानां प्राणानादायाऽस्तमेति । मा मे प्रजाया मा पशूनामि"** त्यादि श्रुतिवाक्ये, असौ सूर्यः सर्वेषां प्राणिनामुद्यन्न[2]स्तं च यन् सर्वेषामायुर्हरतीत्युक्तम् । तत्र मा मे प्रजाया इति कथनात्कस्यचिदायुर्न हरतीति ज्ञायते । तत्र को वेत्यपेक्षायामायुर्हरणार्थं स्थापितस्य सूर्यस्याऽधिकारिणः (१) लोकन्यायेनाऽधिकारदातुरन्तरङ्गस्य न हरतीति ज्ञायते । हृतं चाऽऽयुर्भगवदीये[3]भ्य एव प्रयच्छति । विनियोगस्याऽऽवश्यकत्वात् । यद्यपि वाक्ये प्रार्थकस्यैवाऽऽयुषो न हरणं, तथापि हरणस्याऽनित्यत्वज्ञापनेन तथाऽवसीयते । तस्य आयुः ऋते । "शतायुर्वै पुरुष" इति पुरुषस्य [4]शतमायूंषि भवन्ति । एकेन वत्सरेण सर्वब्रह्माण्डपरिभ्रमणेनैकमायुर्हरति । तत्र तस्याऽऽयुऋ ते इति यस्मिन्नायुषि स क्षणो भवेत् । [5]य उत्तमश्लोकवार्तया भगवत्समीपं नीतस्तदायुर्न गृह्णातीत्यर्थः । यत्तदोर्नित्यसम्बन्धात्तच्छब्देन क्षण एवोच्यते । सम्बन्धित्वं च स्वरूपत एवेति स यस्मिन्ना[6]युषि भवतीति सिद्ध्यति । वर्षमध्ये एकोऽपि क्षण उत्तमश्लोकवार्तया स्वार्थं भगवदर्थं वा नीतश्चेत्, स्वकार्यं वार्त्तयैव कृतमिति शिष्टमपि सैव हरिष्यतीति स्वयं न हरतीति भावः ॥ १७ ॥ ❀ ❀ एवं क्षणमात्रेऽपि भगवत्कथासम्बन्धे आयुषः कृतार्थतेत्युपलक्षणविधया सर्वेषां कृतार्थत्वं निरूप्य तदभावे बह्वप्यायुः प्रार्थनयाऽऽह [7]तमपि व्यर्थमिति सदृष्टान्तमाह—तरव इति । वृक्षाः किं बहुकालं न जीवन्ति । न तेषां स्वार्थे कश्चनोपयोगः । मुक्ताश्च न भवन्ति । अतो बहुकालजीवनं प्रार्थनयाऽपि प्राप्तं व्यर्थमित्यर्थः । ननु तेषामायुः प्राणं धृत्वा न तिष्ठतीति प्राणाधारकत्वेन तदुपयोगो भविष्यतीत्याशङ्क्याऽऽह—**भस्त्राः किं न श्वसन्त्युतेति** । पूर्वमपि नासा चर्मपुटरूपैव, तन्मार्गेण वायुरागच्छति गच्छति च । भस्त्रायामप्येवमिति न प्राणधारणेन कोऽप्युपयोगः सिद्ध्यति । नन्वत्र स्वपरोपकाराणां सिद्धत्वान्न दृष्टान्ततुल्यतेत्याशङ्क्याऽऽह—उतेति । पुनस्तथा कृत्वाऽपि व्यर्थ इत्यर्थः । यथा इङ्गाला [8]भस्त्राश्वासेन तप्ता भवन्त्यन्येऽपि तत्सम्बन्धाल्लोहादयः । तप्तानामाघातश्च भवति । अतः परोपतापाद्युपद्रवकर्तृत्वम् । तथा जीवनस्याऽपीति न कोपि विशेष इति भावः । पुरुषार्थसिद्ध्यभावस्तूभयत्र तुल्यः । ननु भोगोऽस्तीति चेत् ? तत्राऽऽह—लोकानां भोगभ्रमोऽन्नादिभक्षणे । वस्तुतस्त्वेकत्र प्रविष्टोऽन्यत्र निर्गच्छति । यथा स्वशरीरान्निर्गतं शूकरमुखे प्रविश्य पुनर्निर्गच्छति, तथा भूमिवृक्षादेर्निर्गतं स्वस्याऽपि मुखे प्रविश्य विनिर्गच्छतीति न शूकरादिभ्यः कश्चन विशेषः । तुल्यत्वं यस्य न स्फुरति तं प्रत्येतदापादनमनिष्टम्, न ब्रह्मविदं प्रति । स[9] हि प्राकृतः स्वात्मानं बहुमन्यते । अपरे इत्यनेनाऽयमप्येकः पशुः । **"तस्मात्त्रयः पशूनां हस्तादाना"** इति श्रुतेः । परं ग्रामपशुत्वेन निन्द्यत्वम् ॥ १८ ॥ ❀ ❀ एवं नीचैः सह तुल्यतामापाद्य ततोऽपि नीचतामाह **श्वविड्वराहोष्ट्रखरैरिति** । एते चत्वारः पशवः सर्वलोकेषु निन्दिताः । तेषां स्तुतिं कोऽपि न करोति । भगवद्विमुखे पुरुषे च दृष्टे लोकास्तानेव स्तुवन्तीति तैरयं [10]स्तुतः । [11]भगवद्विमुखे दृष्टे एतस्माच्छ्वादयः समीचीना इति लोकाः स्तुवन्तीत्येते जानन्त्यस्मानयं स्तावयति समीचीन इत्येवं तैरयं स्तुतो भवतीति भावः । यद्यपि श्वा पुच्छचालनादिना ग्रासमात्रेऽपि स्वलालसतां ज्ञापयति तथाऽयमपि गृहस्थः । परं स [12]स्वामिहितो भवति । अल्पसन्तोषी च । प्राकृतस्तु तद्विपरीतः । एवं विड्वराहोऽपि कुत्सितविषयासक्तो विण्मूत्रस्थाने रमते । तथाऽयमपि । तथापि सर्वानुपयुक्तमुपजीवति, न तत्र केऽपि भागिनः । अयं तु सर्वेषां भागं स्वयमश्नाति । यद्यप्युष्ट्राः कण्टकाद्यतिपरुषविषयभोक्तारस्तथापि स्वामिभारवाहकाः । अयं तु तद्विपरीतो न भगवतः कार्यं किञ्चित्करोति । यद्यपि खरः खरीपादताडितोऽपगच्छति पुरुषतुल्यस्तथापि न वक्रो न स्वामिकार्ये हठं करोति । अस्य तु तदीया दोषा एव न गु[13]णाः सन्तीति ततोऽपि निन्दित इत्यर्थः । नैतत्पुरुषमात्रसाधारणम् । येषां पुनरन्नभक्षण उपयोगोऽस्ति तद्व्यावृत्त्यर्थमाह । **"मोघमन्नं विन्दते अप्रचेताः । अन्नेन प्राणाः । अन्नात्प्राणा भवन्ती"**ति च वैयर्थ्यं ज्ञानभक्त्युपयोगौ चाऽन्नस्य निरूपितौ । तत्र वैयर्थ्यपक्षे तुल्यता । पक्षद्वये तु पुरुषार्थपर्यवसानान्नेति तद्वैपरीत्यमाह—**न यत्कर्णपथोपेत इति** । यस्य कर्णमार्गे कदापि गदाग्रजः कृष्णः केवलं भक्तिप्रकाशनार्थं प्रकटो यस्य कर्णमार्गं न गतः । **"स्वानामि"**ति वाक्यात् । अयं च तदीयो न भवतीति निश्चितम् । अतो [14]भक्तिमार्गज्ञाने निवारिते । गदस्तु मातापित्रोर्दुःखदूरीकरणानन्तर-

---

१ भक्त्यभावसाधकत्वेति क. २ अस्तमयन्निति ख. ३ येभ्यः प्रयच्छतीति ख. ४ शत इति क. ५ य इति नास्ति क. ६ आयुषि क्षणो भवतीति ख. ग. ७ अकृतमपीति घ. ८ भस्त्राः इति सर्वत्र. ९ सहि स्वात्मानमिति ख. १०. संस्तुत इति घ. ११. "भगवद्विमुखे दृष्टे इत्यादि स्तुतो भवतीति भाव" इत्यन्ता पङ्क्तिर्नास्ति क. ख. ङ. १२. स्वस्वामिहित इति क. ग. ङ १३. गुणगणा इति ख. घ ङ । १४ भक्तिमार्गज्ञानमार्गौ निवारितौ इति ग ।

मुत्पन्न इति यत्र भगवत्कृतदुःखदूरीकरणमभिप्रेतं तत्र गदाग्रज इत्युच्यते ॥ १९ ॥ ❀ ❀ एवमायुषो देहस्य च भोगायतनस्य वैफल्यमुक्त्वा इन्द्रियाणां वैफल्यमाह—बिले इति । बतेति खेदे । उरुक्रमस्य अतिविचित्रचरित्रस्य विक्रमान्न शृण्वतः पुरुषस्य ये कर्णपुटे ते बिले इत्यर्थः । तत्र स्वाभिप्रेतेन्द्रियाभावादपकारिसर्परूपप्राकृतेन्द्रियस्य विद्यमानत्वाच्छरीररूपगृहे अपकारिच्छिद्रे । यथा गृहे तादृशे बिले प्रविष्टः सर्पो गृहपतिं खादति, तथा प्राकृत्यः कथा एतत्कर्णे प्रविष्टा एनं सर्वतो नाशयन्तीत्यर्थः । तांस्तान्क्षिपन्त्यशरणेषु तमस्सु हन्ते'—ति वाक्यात् । जिह्वा चाऽसती । भगवता हि सर्वेन्द्रियेभ्यो विरलेयं कृता रक्षिता च । सर्वदा च दन्तेभ्यो रक्षां करोति । एवमपि सा न भगवत्परा, किन्तु व्यभिचारिणीवाऽन्यस्तोत्रकरणादन्यगामिनी । [1]तत्राऽपि विशेषमाह । दार्दुरिकेव [2]भेकजिह्वेव । [3]तस्याः जिह्वा न भगवता पृथक्कृता । न रक्षकत्वेन दन्ता दत्ताः । सा स्वत एव परुषा कीटादीन् भक्षयति । तथाऽस्याऽपि जिह्वा नियामकरहिता स्वत एव क्रूरा परघातार्थं प्रवृत्तेत्यर्थः । एवमपि दुष्टा विषयार्थमप्युरुगायगाथाश्चेद्गायति तदपि न काचिच्चिन्ता । तदपि नास्तीत्याह—न चोपगायतीति ॥ २० ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः ।

तरव इत्यत्र हस्तादाना इति । एतदग्रे 'पुरुषो हस्तिमर्कट' इति वाक्यशेषात्तथेत्यर्थः । श्वविडित्यत्र नैतदित्यादि । एतन्निन्द्यपशुत्वं न पुरुषमात्रसाधारणमिति ज्ञापयितुं येषां तत्रोपयोगोस्ति तद्व्यावृत्त्यर्थमाह श्रुतिविशेषमाहेत्यर्थः । तं बोधयितुं श्रुतित्रयं दर्शयन्ति "मोघमि"त्यादि । आद्या तैत्तरीयब्राह्मणद्वितीयाष्टकेस्ति । 'मोघमन्नं विन्दतेऽप्रचेताः सत्यं ब्रवीमि वध इत्सतस्य, नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी' ति भार्यापुत्रादिमात्रपोषकस्य कुक्षिम्भरेष्वत्र निन्दोक्ता । अग्रिमद्वयं तु बृहन्नारायणीयोपनिषदि ( ७९ ) अन्नेन प्राणाः, प्राणैर्बलं, बलेन तपस्तपसा श्रद्धा, श्रद्धया मेधा, मेधया मनीषा, मनीषया मनो, मनसा शान्तिः, शान्त्या चित्तं, चित्तेन स्मृतिँ स्मृत्या स्मारँ स्मारेण विज्ञानं, विज्ञानेनात्मानं वेदयति, तस्मादन्नं ददन् सर्वाण्येतानि ददात्यन्नात्प्राणा भवन्ति, भूतानां प्राणैर्मनो मनसश्च विज्ञानं विज्ञानादानन्दो ब्रह्मयोनिरि'त्येकस्मिन् प्रकरणे द्विवारमाम्नानादुभयोपयोगौ निरूपिताविलर्थः । तत्रेत्यादिपक्षद्वयमध्ये आद्ये अप्रचेतस्त्वपक्षे तादृशानां पूर्वोक्तपशुतुल्यतेत्यर्थः । स्वानामिति वाक्यं तु 'प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहमि'ति वक्ष्यमाणं ज्ञेयम् । शेषमतिरोहितार्थम् ॥१९॥

इति श्रीद्वितीयस्कन्धसुबोधिनीप्रकाशे तृतीयाध्यायविवरणम् ॥ ३ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

हरिकथां विना वृथैव क्षीयमाणमायुर्हरिकथया सफलं कुर्वित्याशयेनाह—आयुरिति त्रिभिः । असौ सूर्य उद्यन्नुदयं प्राप्नुवन् अस्तमदर्शनं च यन् गच्छन् पुंसामायुर्वृथैव हरति । यत् यः क्षण उत्तमश्लोकस्य अविद्यानिवर्तकयशसो भगवतो वार्तया नीतः व्यतीतस्तस्यर्ते तं क्षणं विना, स क्षणस्तु वृथा न याति किन्तु सफल एवेत्यर्थः ॥ १७ ॥ ❀ ❀ ननु जीवनमेव तेषामायुषः फलमस्तु तत्राह—तरवो वृक्षाः किं न जीवन्तीति । ननु तेषां श्वासो नास्ति तत्राह—भस्त्राश्चर्मकोशा उत अपि किं न श्वसन्ति वायुमूर्ध्वं न निस्सारयन्तीति । ननु तासां भोगो नास्ति तत्राह—ग्रामपशवः किं न खादन्ति नाश्नन्ति, न मेहन्ति रेतस्सेकं मैथुनं न कुर्वन्ति ? । तावतैव सन्तोषश्चेत्तत्तुल्यतैव स्यादित्याशयेनाह—अपरे इति ॥ १८ ॥ ❀ ❀ श्रवणादिभक्तिहीनस्य पुरुषस्य पशुश्रेष्ठत्वमेव स्पष्टयति—श्वेति । गदस्य संसारतापहेतुभूतरोगस्याविद्याया अग्रे निवर्तकतया जायते इति गदाग्रजः, यद्वा गदस्य रोहिणीपुत्रस्याग्रजः श्रीकृष्ण इति नाम जातु कदाचिदपि यस्य कर्णपथं नोपेतः नागतः स पुरुषरूपः पशुः श्वादिभिः संस्तुतः सदृशतया निरूपितः, यद्वा वयं प्रत्येकं धर्मं धारयामः अयं त्वस्माकं सर्वेषां सर्वान् धर्मानेक एव धत्ते अतोऽयमेव अस्मच्छ्रेष्ठ इति श्वादिभिरपि संस्तुतः । तत्रावज्ञास्पदत्वं श्वधर्मं कश्मलविषयासक्तिं विड्वराहधर्मं कण्टकवद्दुःखदविषयासक्तिमुष्ट्रधर्मं स्वल्पभोजित्वेऽपि बहुभारवाहित्वं खरधर्मं च धत्ते इति ज्ञेयम् ॥ १९ ॥ ❀ ❀ एवं भक्तिहीनस्यायुषो विफलत्वमुक्त्वा तस्याङ्गान्यपि विफलानीत्याह—बिले इति पञ्चभिः । बतेति खेदे । उरुक्रमस्य अतिविचित्रबहुचरितस्य भगवतो विक्रमान् न शृण्वतः अशृण्वतो नरस्य ये कर्णपुटे ते सर्पबिले । यथा गृहगतबिले स्थितः सर्पो गृहपतिं नाशयति तथा 'तांस्तान् क्षिपन्त्यशरणेषु तमस्सु हन्त' इति तृतीये वक्ष्यमाणत्वात् कर्णप्रविष्टाः प्राकृतकथा नरके निपात्य पुरुषं विनाशयन्तीति भावः । सूतत्वात् पुराणेषु त्वया सर्वनिर्णयो दृष्ट एवातस्तव किं बहु वक्तव्यमिति सूचयन् सम्बोधयति—हे सूतेति । उरुगायगाथाः भगवत्कथाः पुरुषो न चेदुपगायति तदा तस्य जिह्वा दार्दुरिका मण्डूकजिह्वेव वृथा बहुभाषिणी प्रत्युत असती मिथ्याभाषणादिपरतया नरकपातहेतुत्वाद्दुष्टैवेति ॥ २० ॥

---

१ तथापि इति क. ख. २ भेकजिह्वेवेति नास्ति क. ख. घ. ३ तस्य इति ग. ।

## हिन्दी अनुवाद

जिसका समय भगवान् श्रीकृष्णके गुणोंके गान अथवा श्रवणमें व्यतीत हो रहा है, उसके अतिरिक्त सभी मनुष्योंकी आयु व्यर्थ जा रही है। ये भगवान् सूर्य प्रतिदिन अपने उदय और अस्तसे उनकी आयु छीनते जा रहे हैं ॥ १७ ॥ ❀ ❀ क्या वृक्ष नहीं जीते ? क्या लुहारकी धौंकनी साँस नहीं लेती ? गाँवके अन्य पालतू पशु क्या मनुष्य-पशुकी ही तरह खाते-पीते या मैथुन नहीं करते ? ॥ १८ ॥ ❀ ❀ जिसके कानमें भगवान् श्रीकृष्णकी लीला-कथा कभी नहीं पड़ी, वह नर पशु, कुत्ते, ग्राम-सूकर, ऊँट और गधेसे भी गया-बीता है ॥ १९ ॥ ❀ ❀ सूतजी! जो मनुष्य भगवान् श्रीकृष्णकी कथा कभी नहीं सुनता, उसके कान बिलके समान हैं। जो जीभ भगवान्‌की लीलाओंका गायन नहीं करती, वह मेंढककी जीभके समान टर्र-टर्र करनेवाली है; उसका तो न रहना ही अच्छा है ॥ २० ॥

भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम् ।
शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्काञ्चनकङ्कणौ वा ॥२१॥
बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये ।
पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रज[1]तो हरेर्यौ ॥२२॥
जीवञ्छवो भागवताङ्घ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु ।
[2]श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसञ्छवो यस्तु न वेद गन्धम् ॥२३॥
तदश्मसारं हृदयं बतेदं यद् गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥२४॥
अथाभिधेह्यङ्ग मनोऽनुकूलं प्रभाषसे भागवत[3]प्रधानः ।
यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधु पृष्टः ॥२५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
द्वितीयस्[4]कन्धे तृतीयोऽध्यायः ॥ ३ ॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

पट्टवस्त्रोष्णीषेण किरीटेन च जुष्टमपि शिरो यदि न नमेत्तर्हि केवलं भार एव। शवो मृतकस्तत्करतुल्यौ लसती काञ्चनकंकणे ययोस्तौ। अप्यर्थे वाशब्दः ॥ २१ ॥ ❀ ❀ ये नयने विष्णोर्मूर्तीर्न निरीक्षेते ते बर्हायिते मयूरपिच्छनेत्रतुल्ये। द्रुमवज्जन्म भजत इति तथा वृक्षमूलतुल्यावित्यर्थः ॥ २२ ॥ ❀ ❀ नाभिलभेत अभितो न स्पृशेन्न धारयेत्। श्रीविष्णुपद्याः श्रीविष्णुपदलग्नायाः। न वेदेति अवघ्राय नाभिनंदेदित्यर्थः ॥ २३ ॥ ❀ ❀ अश्मवत्सारो बलं काठिन्यं यस्य। विक्रिया-लक्षणमाह। अथेति। गात्ररुहेषु रोमसु हर्ष उद्गमः ॥ २४ ॥ ❀ ❀ यस्मादभक्तस्य सर्वमेतद्व्यर्थम्। मनसोऽनुकूलं प्रियं च ब्रूषे। अथ अतः कारणान्नृपतिना साधु पृष्टः सन्वैयासकिर्नृपतिं प्रति यत्प्राह तदभिधेहीति ॥ २५ ॥

इति श्रीभा० म० द्वितीयस्कंधे टीकायां तृतीयोऽध्यायः ।

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

भार एव संसारसिंधौ प्रविशंतं तमधिकं निमज्जयतीति भावः। मृतककरतुल्यत्वाद्देवपित्रादयोऽपि तद्दत्तं जलादिकं न गृह्णंतीति भावः ॥ २१ ॥ ❀ ❀ मयूरपिच्छनेत्रतुल्ये। ताभ्यामात्मन उद्धारपदवीमपश्यंतः संसारकंटकक्षेत्र एव पतंतीति भावः। इत्यर्थ इति। यमदूतैरेव कुठारैश्छिद्यमानौ भविष्यत इति भावः ॥ २२ ॥ ❀ ❀ एकैकान्यंगानि निंदित्वा समुदितानि निंदति—जीवन्निति। जीवञ्छवः प्रेतशरीरविशेष इव चेष्टमानः। साधून्भीषयते। तत्प्राणिकृतसपर्यादिकमपि भगवान्न गृह्णातीति भावः। इत्यर्थ इति। यथा शवो गंधादिभिरर्चितोपि तन्नाभिनंदति तद्वत्सोपीति भावः ॥ २३ ॥ ❀ ❀ तदेवं व्यस्तसमस्ततया

---

१. प्रा० प्रा०—व्रजता। २. प्रा० प्रा०—यो विष्णु०। ३. प्रा० प्रा०—''तः प्र०। ४. प्राचीने पाठेऽत्र 'महापुरुषवर्णन' मित्यधिकम्।

बाह्यमंगं प्राधान्येन निंदित्वाभ्यंतरमपि निंदति—तदश्मसारं लोहमयमेव यत् खलु गृह्यमाणैः कीर्त्यमानैरपि बहुभिर्हरिनामधेयैर्न विक्रियते विक्रियालक्षणमाह—अथेत्यादि। गात्ररुहेषु रोमसु हर्षः रोमांचः बहुनामग्रहणेपि चित्तद्रवाभावो नामापराधलिंगमिति संदर्भः। किञ्चाश्रुपुलकावेव चित्तद्रवलिंगमित्यपि न शक्यते वक्तुम्। तदुक्तं श्रीमद्रूपगोस्वामिचरणैः 'निसर्गपिच्छिलस्वांते तदभ्यासपरेपि च। सत्त्वाभासं विनापि स्युः क्वाप्यश्रुपुलकादयः॥'' इति। तथातिगंभीरमहानुभावभक्तेषु हरिनामभिभिश्चित्तद्रवेपि बहिरश्रुपुलकादयो न दृश्यन्ते इति। तस्मादिदमेवं व्याख्येयम्। यद्धृदयं न विक्रियेत कदा? यदा विकारस्तदपीत्यर्थः। विकार एव कस्तत्राह—नेत्रे जलमिति। ततश्च बहिरश्रुपुलकयोः सतोरपि यद्धृदयं न विक्रियेत तदश्मसारमिति वाक्यार्थः। ततश्च हृदयविक्रियालक्षणान्यसाधारणानि क्षांतिनामग्रहणासक्त्यादीन्येव ज्ञेयानि तदुक्तम् ''क्षांतिरव्यर्थकालत्वं विरक्तिर्मानशून्यता। आशाबंधः समुत्कण्ठा नामगाने सदा रुचिः॥ आसक्तिस्तद्गुणाख्याने प्रीतिस्तद्वसतिस्थले। इत्यादयोनुभावाः स्युर्जातभावांकुरे जने॥'' अश्रुपुलकादीनि तु साधारणान्येव। अयमर्थः। उत्तमाधिकारिणां निर्मत्सराणां नामग्रहणे सत्येव नाममाधुर्यस्यानुभवः स्यात्तस्मिंश्च सति हृदयविक्रिया च स्यात्। सत्यां च तस्यां तद्व्यंजकाः क्षांत्यादयोऽश्रुपुलकादयश्च भवंत्येव कनिष्ठाधिकारिणां समत्सराणान्तु सापराधचित्तत्वान्नामग्रहणबाहुल्येपि तन्माधुर्यानुभवाभावे चित्तं नैव विक्रियेत तद्व्यंजकाः क्षांत्यादयोपि न भवंति। तेषामेवाश्रुपुलकादिसत्त्वेप्यश्मसारहृदयतया निन्दैषा। किञ्च तेषामपि साधुसंगेनानर्थनिवृत्तिनिष्ठारुच्यादिभूमिकारूढानां कालेन चित्तद्रवे सति चित्तस्याश्मसारत्वमपगच्छत्येव येषां तु चित्तद्रवे सति चित्तस्याश्मसारता तिष्ठेदेव ते तु दुश्चिकित्स्या एव ज्ञेयाः। तथा च वक्ष्यते तृतीये सबीजयोगध्याने ''एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात्। औत्कंठ्यबाष्पकलया मुहुरर्द्यमानस्तच्चापि चित्तबडिशं शनकैर्वियुंक्ते॥'' इति। अत्र द्रवद्धृदय इति चित्तद्रवः तच्च चित्तबडिशमिति चित्तस्यास्ससारता बडिशस्य लोहमयत्वात्। अश्मसारस्य लोहपर्यायत्वात्। प्रतिलब्धो भावो येनेति भावो यमाभासरूप एव चित्तद्रवोपि तादृश एव ज्ञेय इति यथार्थत्वे शनकैर्वियुंक्त इति तस्य पुरुषार्थबुद्ध्या तत्त्यागानुपपत्तेः। अत एव तादृशध्यानभक्त्याप्ययं भक्तशब्देन नाभिधीयते। किं तु योगिशब्देनैव चित्तस्य बडिशत्वेन कठोरत्वकुटिलत्वाभ्यां तद्विषयस्य भगवदंगस्य दुःखदात एव पर्याप्तेरिति। एवं च ''सा वाग्यया तस्य गुणान्गृणीते करौ च तत्कर्मकरौ'' इत्यादिवक्ष्यमाणवाक्यैरन्वयेन बिले बतेत्यादिवाक्यैर्व्यतिरेकेण च भक्तेरेव शास्त्राभिधेयत्वं दृढीकृतम्॥ २४॥ ❀ ❀ तदभिधेहीति। ततोधिकमन्यत्किं वक्तव्यमस्तीति भावः॥ २५॥

**इति श्रीभागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कन्धे तृतीयोऽध्यायः॥ ३॥**

### श्रीमद्वीरराघवव्याख्या

यदि मुकुंदं न नमेन्न नमस्कुर्यात्तदुत्तमांगं शिरः पट्टकिरीटजुष्टं पट्टेन शस्त्रोल्लेखेन किरीटेन वा जुष्टमपि परं केवलं भारः हरेः सपर्यां पूजां नो कुरुतः न कुर्वंतौ चेत्तौ करौ हस्तौ च लसन्तौ कांचनकंकणौ ययोस्तथाभूतावपि शावौ शवसंबंधिनाविव अमंगलावित्यर्थः॥ २१॥ ❀ ❀ विष्णोर्लिंगानि मूर्त्तीः न निरीक्षतश्चेत्ते नयने बर्हायिते मयूरपिच्छनेत्रतुल्ये। क्षेत्राणि श्रीरंगादीनि नानुव्रजतश्चेत्तौ नृणां पादौ द्रुमजन्मभाजौ द्रुमजन्मभजतः इति तथा वृक्षमूलतुल्यावित्यर्थः॥ २२॥ ❀ ❀ भागवतांघ्रिरेणुं जातु कदाचिदपि यस्तु मर्त्यो मनुष्यः नाभिलषेताऽभितो न स्पृशेन्न धारयेत्स जीवञ्छवः जीवन्नपि शवतुल्यः। श्रीविष्णुपद्याः श्रीविष्णुपदलग्नायाः तुलस्या गंधं सुगन्धं यस्तु मनुजो न वेदाभिघ्राय नाभिनन्देदित्यर्थः स श्वसन् जीवः प्राणयुक्तोपि शवः शवतुल्यः॥ २३॥ ❀ ❀ गृह्यमाणैः स्मरणकीर्तनादिभिर्गृह्यमाणैर्भगवन्नामभिर्यदिदं हृदयं न विक्रियेत विकारं न प्राप्नुयात्। अथ मुखे विकारः नेत्रे जलमानंदाश्रुबिंदवः गात्ररुहेषु हर्षः रोमांचश्च न स्यात् तद्धृदयमश्मसारं कार्ष्णायसं बतेति खेदे। यदा मनोविकारो भवति तदा आनंदाश्रुः रोमाञ्चश्च स्यादित्यर्थः॥ २४॥ ❀ ❀ भागवतप्रधानस्त्वं मनसोऽनुकूलं प्रियं भाषसे अथोऽतः आत्मविद्यायां विशारदः निपुणः वैयासकिः श्रीशुकः पृष्टः सन्नृपतिं प्रति यदाह तदभिधेहीत्यन्वयः॥ २५॥

**इति श्रीमद्भागवतमहापुराणे द्वितीयस्कन्धे श्रीवीरराघवाचार्यकृतटीकायां तृतीयोऽध्यायः॥ ३॥**

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

वा यदि। शावौ शवस्य विद्यमानौ॥ २१॥ ❀ ❀ बर्हायिते पिच्छनेत्रवदाचरिते निष्फले इत्यर्थः। लिंगानि प्रतिमाः द्रुमवज्जन्म भजत इति। क्षेत्राणि पुण्यस्थानानि क्षेत्रं पुरे गृहे देहे केदारे योनिभार्ययोः पुण्यस्थाने समूहे च घृतमाज्येऽम्बुसर्पिषोरिति यादवः॥ २२॥ ❀ ❀ भागवतस्य भगवद्भक्तजनस्यांघ्रयो रेणुं यद्वा भागवतयोर्भगवतो विद्यमानयोरंघ्र्यो रेणुं नाभिलषेत न कांक्षेत जीवञ्छवो जीवन्मृतः। श्रीविष्णुपद्याः श्रीविष्णुपदप्रियायाः। श्वसञ्छवः श्वासकृत्कुणपतुल्यः॥ २३॥ ❀ ❀ पुरुषस्य यद् हृदयं कथारूपेण गृह्यमाणैर्हरिनामधेयैर्न विक्रियेत तद्द्रवीभावात्मकं विकारं नाप्नोति तदिदमश्मसारवदतिकठिनमयोघनं वा अथ दैवाद्यदि विकारः तस्येदं लक्षणम्। मुखे विकासलक्षणो विकारः। नेत्रे जलं स्रवति। गात्ररुहेषु रोमसु हर्षो रोमाञ्चलक्षणः स्यादिति शेषः॥ २४॥ ❀ ❀ एवं हरिकथाश्रवणाभावे जन्मादेर्नैष्फल्यमथ तस्मान् नृपतिना साधु

पृष्टः आत्मविद्याविशारदः परमात्मविद्यायां पटुतरो वैयासकिर्नृपतिं यदाह तन्मामभिधेहि हरिकथाभिधाने मदन्यः किं न स्यादत्राह मन इति । मनोनुकूलं यथा भवति तथा प्रभाषसे हेत्वंतरमाह भागवतेति । अतस्त्वत्त एव श्रोतुमिच्छा प्रवर्तत इति ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे विजयध्वजतीर्थकृतटीकायां तृतीयोऽध्यायः ॥ ३ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

भारः परमिति । पट्टवस्त्रोष्णीषेण किरीटेन वा जुष्टमपि । अप्यर्थे वा शब्दः ॥ २१ ॥ ❀ ❀ द्रुमवज्जन्म भजेते इति वृक्षमूलतुल्यावित्यर्थः ॥ २२ ॥ ❀ ❀ अथ तत्तत्सर्व्वकारणविशेषं विना तत्तदपि न सम्पद्यते । तथा च श्रीवैष्णवचरणरजसि सर्वाङ्गस्नानमेव नमस्कारादिषु कारणं श्रीचरणतुलसीगन्धस्तु हृद्विकारकारणं हृद्विकारस्तु पुलकादिषु कारणमिति ज्ञेयम् । इत्यभिप्रायेणाह जीवन्निति । श्रीविष्णुपद्याः तत्पदलग्नायाः ॥ २३ ॥ ❀ ❀ तदश्मसारमिति । अश्मवत् सारो बलं काठिन्यं यस्य । विक्रियालक्षणम् अथेति । यदा हृद्विकारो भवेत् तदा नेत्रादौ जलादिकं भवतीत्यर्थः । इदमेव न्यायेन श्रीम[illegible] राज्ञा दृढीकरिष्यते । सा वाग् यया तस्य गुणान् गृणीते इत्याभ्याम् । तदेवं श्रीशुकवाक्यारभ्याध्यायत्रयाभिधेयत्वेन श्रीभक्तिरेव लब्धा । टीका च—तत्र तु प्रथमेऽध्याये कीर्त्तनश्रवणादिभिः । स्थविष्ठे भगवद्रूपे मनसो धारणोच्यते । द्वितीये तु ततः स्थूलधारणातो जितं मनः । सर्व्वसाक्षिणि सर्व्वेशे विष्णौ धार्य्यमितीर्य्यते ॥ तृतीये विष्णुभक्तेस्तु वैशिष्ट्यं शृण्वतो मुनेः । भक्त्युद्रेकेण तत्कर्म्मश्रवणादर ईर्य्यते ॥ इत्येषा ॥ २४ ॥ २५ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे तृतीयोऽध्यायः ॥ ३ ॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

उत्तमाङ्गं शिरः पट्टवस्त्रोष्णीषेण च किरीटेन च जुष्टमपि परं केवलं भारः । संसारसिन्धौ प्रविशन्तं तम् अधिकं निमज्जयतीति भावः । शवो मृतकस्तत्सम्बन्धिनाविति देवपित्रादयोऽपि तद्दत्तं जलादिकमशुचित्वान्न गृह्णन्तीति भावः । वा-शब्दोऽप्यर्थे ॥ २१ ॥ ❀ ❀ ये नयने विष्णोर्मूर्तीर्न निरीक्षेते ते बर्हायिते मयूरपिच्छतुल्ये इति । ताभ्यामात्मन उद्धारपदवीमपश्यन्तः संसारकण्टकक्षेत्रे एव पतन्तीति भावः । द्रुमजन्म भजेते इति तथा तौ वृक्षमूलतुल्याविति यमदूतैरेव कुठारैश्छिद्यमानौ तौ भविष्यत इति भावः ॥ २२ ॥ ❀ ❀ एकैकान्यङ्गानि निन्दित्वा समुदितानि निन्दति । नाभिलभेत अभितो न स्पृशेत् सर्व्वाङ्गेषु न धारयेदित्यर्थः । स जीवच्छवः प्रेतशरीरविशेष इव चेष्टमानः साधून् भीषयते तत् पाणिकृतसपर्य्यादिकमपि भगवान्न गृह्णातीति भावः । श्रीविष्णुपद्याः विष्णुपदलग्नत्वेन विष्णुपदीत्यभिधानायास्तुलस्या गन्धं न वेद अवघ्राय नाभिनन्देदित्यर्थः । श्वसञ्छवः पूर्व्ववत् सोऽपि जीवच्छव इत्यर्थः ॥ २३ ॥ ❀ ❀ तदेवं व्यस्तसमस्ततया बाह्यमङ्गं प्राधान्येन निन्दित्वा आभ्यन्तरमपि निन्दति तत् अश्मसारं लोहमयमेव हृदयम् । यत् खलु गृह्यमाणैः कीर्त्त्यमानैरपि बहुभिर्हरिनामधेयैर्न विक्रियेत । विक्रियालक्षणमाह अथेत्यादि । गात्ररुहेषु रोमसु हर्षः रोमाञ्चः बहुनामग्रहणेऽपि चित्तद्रवाभावो नामापराधलिङ्गमिति सन्दर्भः । किञ्चाश्रुपुलकावेव चित्तद्रवलिङ्गमित्यपि न शक्यते वक्तुम् । यदुक्तं श्रीमद्रूपगोस्वामिचरणैः—स्वभावपिच्छिलस्वान्ते तदभ्यासपरेऽपि च । सत्त्वाभासं विनापि स्युः काप्यश्रुपुलकादयः ॥ इति । तथा अतिगम्भीरमहानुभावभक्तेषु हरिनामभिश्चित्तद्रवेऽपि बहिरश्रुपुलकादयो न दृश्यन्ते इति । तस्मात् पद्यमिदमेवं व्याख्येयम् । यद् हृदयं न विक्रियेत । कदा । यदा विकारस्तदापीत्यर्थः । विकार एव कस्तत्राह नेत्रे जलमिति । ततश्च बहिरश्रुपुलकयोः सतोरपि यद् हृदयं न विक्रियेत तदश्मसारमिति वाक्यार्थः । ततश्च हृदयविक्रियालक्षणान्यसाधारणानि क्षान्तिनामग्रहणासक्त्यादीन्येव ज्ञेयानि । यदुक्तम्—क्षान्तिरव्यर्थकालत्वं विरक्तिर्मानशून्यता । आशाबन्धः समुत्कण्ठा नामगाने सदा रुचिः ॥ आसक्तिस्तद्गुणाख्याने प्रीतिस्तद्वसतिस्थले । इत्यादयोऽनुभावाः स्युर्जातभावांकुरे जने ॥ अश्रुपुलकादीनि तु साधारणान्येव । अयमर्थः—उत्तमाधिकारिणां निर्मत्सराणां नामग्रहणे सत्येव नाममाधुर्य्यस्यानुभवः स्यात्, तस्मिंश्च सति हृदयविक्रिया च स्यात्, सत्याञ्च तस्यां तद्व्यञ्जकाः क्षान्त्यादयोऽश्रुपुलकादयश्च भवन्त्येव । कनिष्ठाधिकारिणां समत्सराणान्त सापराधचित्तत्वान्नामग्रहणबाहुल्येऽपि तन्माधुर्य्यानुभवाभावे चित्तं नैव विक्रियेत, तद्व्यञ्जकाः क्षान्त्यादयोऽपि न भवन्ति, तेषामेवाश्रुपुलकादिसत्त्वेऽप्यश्मसारहृदयतया निन्द्येयम् । किञ्च तेषामपि साधुसङ्गेनानर्थनिवृत्तिनिष्ठारुच्यादिभूमिकारूढानां कालेन चित्तद्रवे सति चित्तस्याश्मसारत्वमपगच्छत्येव । येषान्तु चित्तद्रवेऽपि सति चित्तस्याश्मसारता तिष्ठेदेव ते तु दुश्चिकित्स्या एव ज्ञेयाः । तथा च वक्ष्यते तृतीये सबीजयोगध्याने—एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत् पुलकः प्रमोदात् । औत्कण्ठ्यबाष्पकलया मुहुरर्द्यमानस्तच्चापि चित्तबडिशं शनकैर्वियुङ्क्ते ॥ इति । अत्र द्रवद्धृदय इति चित्तद्रवः । तच्च चित्तबडिशमिति चित्तस्याश्मसारता, बडिशस्य लोहमयत्वात् अश्मसारस्य लोहपर्य्यायत्वात् । प्रतिलब्धो भावो येनेति भावोऽयमाभासरूप एव, चित्तद्रवोऽपि तादृश एव ज्ञेयः । यथार्थत्वे शनकैर्वियुङ्क्ते इति तस्य पुरुषार्थबुद्ध्या हृत्त्यागानुपपत्तेः । अतएव तादृशध्यानभक्त्याप्ययं भक्तशब्देन नाभिधीयते, किन्तु योगिशब्देनैव । चित्तस्य बडिशत्वेन

कठोरत्वकुटिलत्वाभ्यां तद्विषयस्य भगवदङ्गस्य दुःखदान एव पर्य्यवसेरिति। एवञ्च सा वाग् यया तस्य गुणान् गृणीते करौ च तत्कर्म्मकरौ इत्यादिवक्ष्यमाणवाक्यैरन्वयेन बिले बत इत्यादिवाक्यैर्व्यतिरेकेण च भक्तेरेव शास्त्रविधेयत्वं दृढीकृतम् ॥ २४ ॥ ❀ ❀ यस्मादेवं तस्मादभिधेहि। ननु किमभिदधामीति तत्राह। त्वं मनोऽनुकूलं प्रभाषसे तस्माद्वैयासकिराह तदेव। ततोऽधिकमन्यत् किं वक्तव्यमस्तीति भावः ॥ २५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
द्वितीयेऽत्र तृतीयोऽपि सङ्गतः सङ्गतः सताम् ॥ ३ ॥

**श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः**

पट्टशब्दः पट्टोष्णीषवाचकः पट्टोष्णीषेण किरीटेन च जुष्टमपि उत्तमांगं शिरो यदि मुक्तिप्रदं न नमेत्तर्हि परं केवलं भार एव। लसन्ती काञ्चनं कंकणं च ययोस्तावपि वा शब्दोऽप्यर्थे। हरेः सपर्यां पूजां न कुरुतः न कुर्वतौ तर्हि शावौ शवो मृतकः तत्करतुल्यौ ॥ २१ ॥ ❀ ❀ विष्णोर्लिंगानि मूर्त्तीः। नराणां ये नयनेन निरीक्षतः न निरीक्षेते चेत् तर्हि ते बर्हायिते मयूरपिच्छनेत्रतुल्ये। हरेः क्षेत्राणि श्रीमद्वृन्दावनादीनि यौ नानुव्रजतश्चरतः तौ पादौ द्रुमजन्मभाजौ द्रुमजन्म भजत इति। तथाद्रुममूलतुल्यौ ॥ २२ ॥ ❀ ❀ यस्तु भागवतानामंघ्रिरेणुं जातु कदाचिदपि नाभिलभेत अभितो न स्पृशेत् धारयेत् स जीवन् अपि शवः मृततुल्यः यस्तु श्रीविष्णुपद्याः श्रीविष्णुपादलग्नायाः गंधं न वेद अवघ्राय नाभिनंदेत स श्वसन् निश्वासान्मुंचन्नपि शवः शवतुल्यः ॥ २३ ॥ ❀ ❀ गृह्यमाणैः दैवान्निकटवर्त्तिभिर्भागवतैरुच्चार्यमाणैर्हरिनामधेयैर्यन्न विक्रियेत विकारं न प्राप्नुयात् तद्धृदयमश्मसारं कार्ष्णायसम्। विक्रियालक्षणमाह अथेति। नेत्रे विकारः। आरुण्यं जलं च गात्ररुहेषु रोमसु हर्षः उद्गमः ॥ २४ ॥ ❀ ❀ हे अंग सूत यतोऽभक्तस्य सर्वं व्यर्थम्। अथ अतः राज्ञा साधुपृष्टः सन् वैयासकिः नृपतिं प्रति यदाह। तदभिधेहि त्वं च मनोनुकूलं मनसः प्रियं भाषसे ब्रूषेऽतोऽभिधेहि ॥ २५ ॥

**इति श्रीमद्भागवतसिद्धांतप्रदीपे द्वितीयस्कन्धे तृतीयाऽध्यायार्थप्रकाशः**

**श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या**

पट्टाभिषिक्तस्य शिरः कुत्राऽपि न नमते। तादृशमपि पट्टकिरीटजुष्टं पट्टकिरीटाभ्यां प्रीत्या सेवितं, मोक्षदातारं चेन्ननमेत्तदा उत्तमाङ्गमपि भार एव। सामान्योपयोगस्याऽप्यसिद्धत्वात्। भोगजीवने तु पूर्वमेव निषिद्धे। [1]अतिभारवाहकोऽपि हि न नमति। शा[2]वौ शवसम्बन्धिनौ अन्तःप्राणरहितौ। तथाऽन्तर्भगवत्सेवारहितौ। उपरि शोभाऽपि तत्रापि शवालङ्करणैः क्रियते। अत्राऽपि काञ्चनकङ्कणौ। वेत्यनादरे। नयने पुनः मुखशोभां कुर्वती प्रयोजनान्तराभावान्मयूरपिच्छनेत्रवद्भगवतो वैचित्र्यं ज्ञापयतः[3]। न तु तत्र चैतन्यम्। भगवतो हि द्विवि[4]धा सृष्टिः। चेतना, अचेतना च भगवत्कार्यैरहिता। चैतन्यस्य भगवद्रूपत्वात्। बर्हवदाचरतीति बर्हायितम्। लिङ्गानीति। भक्ता अधिष्ठानानि च। ये न निरीक्षतः न पश्यतः। पादावपि जङ्गमस्था अपि द्रुमजन्मैव भ[5]जतः। द्रुमे जन्म द्रुमजन्म। यद्यपि पानसाधनं न भवतस्तथापि भूमिस्थितिमात्रे तदुपयोगात्तत्तुल्यता। स्वावयविनमुक्तया स्था[6]पयतः। जीवन् शवः। शवो हि द्विविधः। अर्द्धजले पतितो द्विविधस्तिष्ठति मुमूर्षुर्मृतश्च। तत्र भागवताङ्घ्रिरेणुं यो न लभेत आतिथ्येन तत्पूजां न कुर्यात्, यस्य वा गृहे ते कदापि नायान्ति, स तु केवलं मरणार्थमेव जीवतीत्यर्थः। यस्तु भगवत्प्रसादं न प्राप्नोति केनाऽपि प्रकारेण तस्य तु जीवनमपि नास्ति। जीवनरूपस्य भगवदीयरसस्याऽभावात्। परं श्वसिति। यथाऽर्द्धजले चेतनारहितः केवलं श्वसिति। अन्येषामपि कार्यं रुणद्धि। तथा श्रीविष्णुपदैकनिष्ठत्वेनैव या प्रसिद्धा तुलसी तस्या गन्धं कदापि नाऽऽघ्रातवान् भगवच्चरणाविन्दप्रसादत्वेन न गृहीतवान्। घ्राणस्य गन्धग्राहकत्वात्। तुलस्यां गन्धस्य च विद्यमानत्वात्। सर्पपुच्छच्छेदने चलनवदिन्द्रियतदधिष्ठातृदेवतापगमात्केवलं क्रियामात्रमस्तीत्याह—श्रीविष्णुपद्या इति ॥ २१,२२,२३ ॥ ❀ ❀ अन्तःकरणवैफल्यमाह—तदश्मसारमिति। बतेति खेदे। यद्यपि धैर्यं गुणः। भगवच्चरित्रमपि श्रुत्वा धीर एव वर्त्तते। तथापि लोहवत्तस्य धैर्यम्। अश्मनां सारभूतमिदमिति भक्त्यावेशात्स्वकीयमेव निन्दति। अनेन तत्र भगवच्चरणारविन्दस्थापनसम्भावना निवारिता। अतस्तत्प्रक्षालनं व्यर्थमिति भावः। यद्धृदयं गृह्यमाणैः स्वयमन्येन वा दुःखाभिनिवेशव्यावृत्त्यर्थं हरेर्नामधेयैर्वाचकैः पदैर्यदा विकारं न प्राप्नोति। यस्य हि गृहे भगवदागमनं सम्भावितं, तत्र हि मार्जननिषेचनाद्यलङ्कारा भवन्ति। यत्र तु सम्भावनैव नास्ति [7]चाण्डालगृहवत्तत्र विक्रिया नोत्पद्यते। अथ विकारा निरूप्यन्ते परिज्ञानार्थम्। यथा विकारोऽन्तःकरणे भवेत्तदा द्वयं ज्ञापकं भवेत्। नेत्रे जलं रोमाञ्चश्च। विकारो हि भगवदीयत्वेन परिणामः। तदा तदीयानां वैष्णवत्वम्। तत्र रोम्णां वृक्षत्वादुन्नतिर्वैष्णवत्वाद्युक्ता। रसस्याऽन्तपूरणाद्वा। नेत्रं च कमलं भवति सजलम्। अन्यथास्वस्थानच्युतं केवलं शुष्कमिति भावः ॥ २४ ॥ ❀ ❀

१. अतिभारवाहकोऽपि हि इति घ. ङ. २. शावौ—शवेत्यादि क. ख. ङ. ३. ज्ञापयति इति क. ख. ग. ङ. ४. द्विधा सृष्टिः इति ख. ५. भजन्ति इति ख. ग.। ६. स्थापयति इति क. ङ.। स्थापयन्ति इति ख. ग.। ७. चण्डालगृहवदिति क. ख. ग. घ.।

तस्मात्सर्वेन्द्रियाणां देहादेश्च साफल्यार्थं भगवत्कथामभिधेहीत्याह—अथाऽभिधेहीति । अङ्गेति कोमलसम्बोधनम् । अर्थाभिप्राय-विचारव्यतिरेकेणापि श्रवणमात्रेणैव त्वद्वाक्ये मनोहरताऽनुभूयते । अतस्त्वं भागवतप्रधानः । त्वद्वाक्ये भगवत्सम्बन्धात् । परं वैयासकिर्यदाह । स हि बहिर्मुखां वार्त्तां न करिष्यति । आत्मविद्यायां निपुणत्वाद्व्यासपुत्रत्वाच्च । राजानं प्रति तेनैव प्रश्ने कृते कथकत्वाच्च । अनेन लोकवेदभक्त्यविरुद्धं तद्वचनमित्युक्तं भवति ॥ २५ ॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षित-विरचितायां द्वितीयस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

पट्टेन पट्टवस्त्रोष्णीषेण किरीटेन च जुष्टमप्युत्तमाङ्गं शिरो यदि मुकुन्दं मुक्तिदातारं भगवन्तं न नमेत् नमस्कारं न कुर्यात्तदा परं केवलं भार एव । वाशब्दोऽप्यर्थे । लसन्ती काञ्चनकङ्कणे ययोस्तथाभूतावपि करौ यदि हरेर्भक्तदुःखहरणशीलस्य भगवतः सपर्यां सेवां नो कुरुतस्तदा शावौ शवो मृतकः तत्सम्बन्धिनाविव अशुद्धावेव, तद्दत्तं जलादिकं देवपित्रादयोऽपि न गृह्णन्तीत्यर्थः ॥ २१ ॥ ❀ ❀ नृणां ये नयने भगवतो विष्णोर्लिङ्गानि मूर्तीर्न निरीक्षतो न निरीक्षेते ते बर्हायिते मयूर-पिच्छगतनेत्रतुल्ये । नृणां यौ पादौ हरेः क्षेत्राणि श्रीरङ्गपुरुषोत्तमक्षेत्रादीनि नानुव्रजतस्तौ द्रुमवज्जन्म भजेते इति तथा, वृक्षमूल-तुल्यावित्यर्थः ॥ २२ ॥ ❀ ❀ यस्तु मर्त्यो मनुष्यो भागवतानामङ्घ्रिरेणुं जातु कदाचिदपि नाभिलभेत स्वगृहमागतानां पादस्पर्शपूर्वकसत्कारं कृत्वा तदङ्घ्रिरेणुमभितो न धारयेत् स जीवन्नपि शवः, मृततुल्य इत्यर्थः । यस्तु श्रीविष्णुपद्याः विष्णुपद-लग्नायास्तुलस्याः सुगन्धं न वेद अवघ्राय नाभिनन्देत् सोऽपि मनुजः श्वसन् जीवन्नपि शवः, मृततुल्य एवेत्यर्थः ॥ २३ ॥ ❀ ❀ बतेति खेदे । हरिनामधेयैर्हरिवाचकशब्दैः स्वयमन्येन वा गृह्यमाणैर्यद्धृदयं न विक्रियेत तदिदमश्मसारं अश्मवत्सारं काठिन्यं यस्य तथाभूतम् । कथं तद्विकारो ज्ञायते इत्यपेक्षायामाह—अथेति । नामश्रवणानन्तरमेव यदा नेत्रे जलमानन्दाश्रु गात्ररुहेषु हर्षः रोमाञ्चता च भवति तदा ताभ्यां तद्विकारो ज्ञायेतेति शेषेणान्वयः ॥ २४ ॥ ❀ ❀ यस्माद्भगवच्चरितश्रवणादि विनाऽस्य देहेन्द्रियादिकं सर्वं व्यर्थं प्रत्युत नरकादिहेतुश्च अथ तस्मात् साधु सम्यगादरेण पृष्टः सन् वैयासकिर्व्यासपुत्रः श्रीशुको नृपतिं प्रति यदाह तदस्माकमभिधेहीत्यन्वयः । अन्यः कश्चित्कथं न पृच्छ्यते इत्यपेक्षायामस्मदङ्गतुल्यत्वादिति हेतुं सूचयन् सम्बोधयति—हे अङ्गेति । तत्र हेतुमाह—यतस्त्वमस्माकं मनोनुकूलं हर्षकरं प्रभाषसे इति । तत्रापि हेतुमाह—भागवतेषु भगवद्भक्तेषु प्रधानः श्रेष्ठ इति । तर्हि शुकोक्तमेव किमिति पृच्छसि तत्राह—आत्मविद्यायां विशारदो निपुण इति ॥ २५ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता च द्वितीयेऽत्र हृत्प्रसादनिरूपणे । तृतीयो विवृतोऽध्यायः श्रोतुः श्रद्धानिरूपकः ॥ ३ ॥

### हिन्दी अनुवाद

जो सिर कभी भगवान् श्रीकृष्णके चरणोंमें झुकता नहीं, वह रेशमी वस्त्रसे सुसज्जित और मुकुटसे युक्त होनेपर भी बोझामात्र ही है । जो हाथ भगवान्‌की सेवा-पूजा नहीं करते, वे सोनेके कंगनसे भूषित होनेपर भी मुर्देके हाथ हैं ॥ २१ ॥ जो आँखें भगवान्‌की याद दिलानेवाली मूर्ति, तीर्थ, नदी आदिका दर्शन नहीं करतीं, वे मोरोंकी पाँखमें बने हुए आँखोंके चिह्नके समान निरर्थक हैं । मनुष्योंके वे पैर चलनेकी शक्ति रखनेपर भी न चलनेवाले पेड़ों-जैसे ही हैं, जो भगवान्‌की लीला-स्थलियोंकी यात्रा नहीं करते ॥ २२ ॥ ❀ ❀ जिस मनुष्यने भगवत्प्रेमी संतोंके चरणोंकी धूल कभी सिरपर नहीं चढ़ायी, वह जीता हुआ भी मुर्दा है । जिस मनुष्यने भगवान्‌के चरणोंपर चढ़ी हुई तुलसीकी सुगन्ध लेकर उसकी सराहना नहीं की, वह श्वास लेता हुआ भी श्वासरहित शव है ॥ २३ ॥ ❀ ❀ सूतजी ! वह हृदय नहीं, लोहा है, जो भगवान्‌के मङ्गलमय नामोंका श्रवण-कीर्तन करनेपर भी पिघलकर उन्हींकी ओर बह नहीं जाता । जिस समय हृदय पिघल जाता है, उस समय नेत्रोंमें आँसू छलकने लगते हैं और शरीरका रोम-रोम खिल उठता है ॥ २४ ॥ ❀ ❀ प्रिय सूतजी ! आपकी वाणी हमारे हृदयको मधुरतासे भर देती है । इसलिये भगवान्‌के परम भक्त, आत्मविद्या-विशारद श्रीशुकदेवजीने परीक्षित्‌के सुन्दर प्रश्न करनेपर जो कुछ कहा, वह संवाद आप कृपा करके हमलोगोंको सुनाइये ॥ २५ ॥

**तीसरा अध्याय समाप्त**

# अथ चतुर्थोऽध्यायः

## सूत उवाच

वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः । उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ॥१॥
आत्मजायासुतागारपशुद्रविणबन्धुषु । राज्ये चाविकले नित्यं विरूढां ममतां जहौ ॥२॥
पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः । कृष्णानुभावश्रवणे श्रद्धधानो महामनाः ॥३॥
संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत् । वासुदेवे भगवति आत्मभावं दृढं गतः ॥४॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तुर्ये परीक्षिता पृष्टं सृष्ट्यादिहरिचेष्टितम् शुकेन ब्रह्मतत्पुत्रसंवादेनोपवर्ण्यते ॥ १ ॥

राज्ञः प्रश्नं कथयितुं तस्य प्राक्तनीं स्थितिमाह चतुर्भिः । वैयासकेः शुकस्य इति एवंभूतमात्मनस्तत्त्वस्य निश्चयो यस्मात्तद्वच उपधार्याकलय्य सतीं कृष्ण एव सेव्यो नान्य इत्येवंभूताम् ।॥ १ ॥ ❀ ❀ आत्मा देहः । पशवो गजादयः ॥ २ ॥ ❀ ❀ इममेवार्थं हरिलीलालक्षणम् ॥ ३ ॥ ❀ ❀ संस्थां मृत्युं विज्ञाय । त्रैवर्गिकं धर्मार्थकामप्रधानम् । संन्यस्य त्यक्त्वा आत्मभावं परप्रेम्णा भगवदात्मत्वं गतः प्राप्तः सन्पप्रच्छ ॥ ४ ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

ब्रह्मपुत्रे । नारदः ॥ ( १ ) ॥ सतीं विद्यमानामेव मतिं विशेषेणाधात् । यत औत्तरेय उत्तराया गर्भे प्रविष्टं कृष्णं तदवधि सदा स्मरन्नेवेत्यर्थः । यद्वा सतीमव्यभिचारिणीम् ॥ १ ॥ ❀ ❀ जहौ यः पूर्वमेवेति ज्ञेयम् । विमर्शितौ हेयतया पुरस्तात्' इत्युक्तेः । निरूढां दृढीभूताम् ॥ २ ॥ ❀ ❀ यन्मां पृच्छथेति । 'आयुर्हरति वै पुंसाम्' इत्यादिवाक्यैर्व्यंजितां कृष्णकथां ब्रूहीति यत्पृच्छथेममेवार्थं राजा शुकं पप्रच्छेत्यन्वयः । हे सत्तमा इति । शुद्धव्यवहारप्रष्टारः संतः सामान्यतो धर्मकथाप्रष्टारः सत्तराः श्रीकृष्णकथाप्रष्टृत्वाद्यूयं सत्तमा इति भावः ॥ ३ ॥ पूर्वं सिद्धमपि तदा दृष्टं प्राप्तस्तद्वार्थं चकारेत्यर्थः ॥ ४ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

॥ ० ॥ १—१७ ॥

### श्रीमद्वीरराघवव्याख्या

एवमापृष्टः सूतो राज्ञः प्रश्नं कथयितुं तस्य प्राक्तनीं स्थितिमाह—वैयासकेरिति । वैयासकेः श्रीशुकस्यात्मनः तत्वनिश्चयं यथावस्थितस्वरूपनिश्चायकं वचः इत्युक्तप्रकारेणोपधार्य श्रुत्वौत्तरेयः उत्तरापुत्रः राजा श्रीकृष्णे सतीं मतिं व्यधादकरोत् ॥ १ ॥ ❀ ❀ किं च आत्मा देहः द्रविणं धनमात्मादिषु अविकलं निरुपद्रवे राज्ये च निरूढां नित्यरूढां ममतां स्वत्वाभिमतिं तत्याज ॥ २ ॥ ❀ ❀ हे सत्तमाः ? शौनकादयः ? इममेव हरिकथालक्षणमेवार्थं पप्रच्छ मां प्रति यत्पृच्छथ यूयं कथंभूतः पप्रच्छ श्रीकृष्णानुभावश्रवणे श्रीकृष्णलीलाश्रवणे श्रद्धधानः अतएव महायशाः ॥ ३ ॥ ❀ ❀ संस्थां मृत्युं विज्ञाय ज्ञात्वा त्रैवर्गिकं धर्मार्थकामसाधनं कर्म संन्यस्य त्यक्त्वा भगवति वासुदेवे स्वात्मभावं स्वस्यात्मत्वं ममात्मा वासुदेव इति बुद्धिविशेषं परं दृढंगतः प्राप्त इत्यर्थः । एवंविधः परीक्षित्पप्रच्छेति पूर्वेणान्वयः ॥ ४ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

संक्षेपतः श्रुतहरिचरितत्वात्तस्मिन्नेवावहितांतःकरणस्य परीक्षितो भक्त्यतिशयात्पुनर्विशेषतः श्रोतुकामस्य हरिसज्जनलीलाविलासविषयप्रश्नप्रकारः श्रीशुकाचार्यस्य गुरुदेवतानमस्कारपुरःसरं तत्प्रश्नं प्रतिवचनप्रतिज्ञाप्रकारश्चास्मिन्नध्याये प्रतिपाद्यते तत्र प्रथमतः शुकोपदेशात्तस्य प्रवृत्तविज्ञानविरक्ती अनुवदति वैयासकेरिति । आत्मनः सर्वगुणपूर्णस्य हरेस्तत्त्वस्य निश्चयो येन

---

१. प्रा० प्रा०—महायशाः । २. प्रा० प्रा०—विन्यस्य ।

तत्तथा उपधार्य हृदि निधाय सतीं मतिं भक्तिपरिप्लुताम् ॥ १ ॥ ❀ ❀ आत्मजायाराज्यादिचिंतामलकलिलांतःकरणस्य तस्य कृष्णे सन्मतिविधानं कथमत्राह आत्मेति । स औत्तरेय आत्मजायादावन्येषां नित्यं निरूढां ममतां जहावित्यन्वयः । हरेः सर्वं स्वातंत्र्यादिज्ञानविधुराणामहं ममेति नित्यनिरूढामनेन नित्यं तद्विदुषा पुरैव त्यक्तामपि तदा विशेषतस्त्यक्तवानित्यस्मिन्नर्थे च शब्दः आत्मा देहः स्वाम्यमात्यौ पुरं राष्ट्रं कोशदंडौ तथा सुहृत् सप्तैतानि समस्तानि लोकेऽस्मिन् राज्यमुच्यत इति मनुवचनादविकले सप्तप्रकृतिपूर्णे ॥ २ ॥ ❀ ❀ किमन्यत् पृष्टवानिति प्रश्नं परिहरति पप्रच्छेति ॥ ३ ॥ ❀ ❀ संस्थां मरणं यत् त्रैवर्गिकं धर्मार्थकामसाधनं यत्कर्म तच्च स्वस्यात्मा स्वामीति भावं भक्तिं गतः एवमधिकारसामग्रीमान् राजा यमर्थं यूयं मां पृच्छथ इममेवार्थं परिपप्रच्छ शुकमिति शेषः ॥ ४ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

सती विद्यमाना कृष्णे या मतिस्तामेव व्यधात् विशेषेण अधात् । अकाम इत्यादिना सामान्याकारेणोपधारितेऽपि विशेषे तात्पर्य्यावगमात् कृष्णे इति विशेषोक्तिः ॥ १ ॥ ❀ ❀ जहौ यः पूर्व्वमेवेति ज्ञेयं विमर्शितो हेयतया पुरस्तात् इत्युक्तेः ॥ २, ३ ॥ ❀ ❀ आत्मनो भावं प्रेमाणमेव दृढं यथा स्यात् तथा गतः प्राप्तः ॥ ४ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

चतुर्थे तु शुकः प्रोक्तः सृष्टिलीलां परीक्षिता । ब्रह्मनारदसंवादेनाह नत्वा गुरुं हरिम् ॥ १ ॥

आत्मनस्तत्त्वस्य निश्चयो यस्मात् तत् । कृष्णे सतीं विद्यमानामेव मतिं विशेषेण अधात् । यत औत्तरेयः उत्तराया गर्भे प्रविष्टं कृष्णं तदवधि सदा स्मरन्नेवेत्यर्थः । यद्वा सतीम् अव्यभिचारिणीम् ॥ १ ॥ ❀ ❀ आत्मा देहः ॥ २ ॥ ❀ ❀ यन्मां पृच्छथेति आयुर्हरति वै पुंसाम् इत्यादिवाक्यैर्व्यञ्जितां कृष्णकथां ब्रूहीति यत् पृच्छथ इममेवार्थं राजा शुकं पप्रच्छेत्यर्थः ॥ ३ ॥ ❀ ❀ संस्थां मृत्युम् । संन्यस्य त्यक्त्वा । आत्मनो भावं प्रमाणं पूर्व्वसिद्धमपि तदा दृढंगतः प्राप्तः ॥ ४ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

एवं मुनिना पृष्टः सूतः परीक्षिन्निश्चयनिरूपणपूर्वकं तत्प्रश्नमाह । वैयासकेरिति । सार्द्धैर्दशभिः । औत्तरेयः परीक्षिद् वैयासकेः श्रीशुकस्य इत्येवंभूतं पूर्वोक्तम् । आत्मनः स्वस्य तत्वे श्रीकृष्णे भजनीये निश्चयो यस्मात्तद्वच उपधार्य श्रुत्वा कृष्णे सतीं श्रीकृष्ण एव सेव्यो नेतर इत्येवंभूतां मतिं व्यधादकरोदित्यर्थः ॥ १ ॥ ❀ ❀ आत्मा देहः । अविकले निरुपद्रवे ममतां स्वकीयत्वबुद्धिं जहौ तत्याज ॥ २ ॥ ❀ ❀ हे सत्तमाः ! हे मुनयः ! कृष्णानुभावश्रवणे कृष्णलीलाश्रवणे श्रद्दधानः यद्यूयं मां प्रति प्रच्छथ इममेवार्थं हरिलीलालक्षणं पप्रच्छ ॥ ३ ॥ ❀ ❀ संस्थां देहविनाशं विज्ञाय ज्ञात्वा । यत् त्रैवर्णिकं धर्मार्थकामसाधनं प्रवृत्तं कर्म तत् संन्यस्य त्यक्त्वा वासुदेवेंऽशिनि । आत्मनोंऽशभूतस्य भावं स्थितितादात्म्यं दृढंगतः प्राप्तः सन् पप्रच्छ ॥ ४ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

साधनं द्वि[1]विधं प्रोक्तं क्रियाकर्त्तृविभेदतः । पूर्वाध्याये क्रियाङ्गानि वर्णितानि द्विरूपतः ॥ १ ॥
प्रश्नेऽप्युत्तरशेषत्वात् क्रियायाश्च निरूपणात् । स्वरूपतो ज्ञानतश्च कार्यसिद्धिर्यतो द्विधा ॥ २ ॥
साधनं श्रोतृवक्त्रोश्च विमर्षाधिक्रिया यतः । तदुच्यते मुख्ययोर्हि प्रश्नस्त्वाद्ये ससाधनः ॥ ३ ॥
ज्ञात्वाऽथ नमनं देवे गुरावपि विशेषतः । सामान्यमुत्तरं यद्धि तद्वक्तुरधिकारकृत् ॥ ४ ॥
अतोऽध्याये चतुर्थे तु [2]परीक्षिच्छुकयोः क्रमात् । विमर्षणाधिकारो हि विचाराङ्गं निरूप्यते ॥ ५ ॥
व्यवसायात्मिका बुद्धिर्ममतात्याग एव च । कथायाः श्रवणे श्रद्धा संन्यासो ज्ञानमेव च ।
प्रश्नाश्चतुष्टयं पूर्वं श्रोतुरङ्गमिहोच्यते ॥ ६ ॥

एवं पूर्वाध्यायान्ते राज्ञः शुकस्य च[3] सम्बन्धिनी कथा वक्तव्येति प्रश्न उक्तः । तत्रोत्तरमाह—वैयासकेरिति चतुर्भिः । प्रथमतो भगवति सती मतिरुत्पन्नेत्याह । यद्यपि पूर्वं भगवति मतिः स्थितैव तथापि श्रद्धामात्रेण सा जातेत्यज्ञानसहिता सा असतीवदेव भवति । इदानीं सामान्यतो भगवन्तं ज्ञात्वा अस्ति कश्चिद्भगवान्फलरूपो भक्तिसाध्यः श्रवणादिना सेव्य इति सर्वरूपोऽन्तरश्च । तस्मिन्ध्याते तत्सायुज्यं च फलमिति । तद्भजनार्थमेव सर्वा कामना कर्तव्या । साधनानि च तत्रैव योज[4]यितव्यानीति वैयासकेर्वचः श्रुत्वा । अनेनाऽऽत्मतत्त्वं आत्मनो भगवतः स्वस्य च तत्त्वं याथात्म्यं विनिश्चित्य, मनसि पुनर्विचार्य, तद्भ-

---

१ विविधमिति क. ङ. २ पारीक्षिच्छुकयोरिति ङ. ३ चकारो नास्ति क. ख. ङ. ४ योजितव्यानि इति क. ग.

दये स्थापयित्वा, आराध्यो भगवान् सर्वदेति सद्बुद्धिं कृतवानित्यर्थः ॥ १ ॥ ❀ ❀ पूर्वं सामान्यतो गृहं त्यक्तमपि ममताया विद्यमानत्वादत्यक्तमिव भवति। तदिदानीं वैयासकेर्वाक्यात्त्यक्तवानित्याह—आत्मेति। ममता हि व्या[1]वृत्य भगवति प्रविष्टा। अतो ममताया उत्तमं विषयं प्राप्य, पूर्वस्थामसमीचीनां त्यजति। आत्मा देहः। जायासुतागाराः भार्यापुत्रगृहाः। गावो द्रविणं बन्धवश्च। तेषु। राज्ये च ससाधने सिंहासनोपवेशनप्रभृति अद्यावधि नित्यनिरूढां ममतां जहौ ॥ २ ॥ ❀ ❀ पूर्वं यथा ममताविषये देहादावितिकृत्यचिन्तां करोति, तथेदानीं ममताविषये भगवति इतिकृत्यचिन्तापरपर्यायं सन्देहं तदुन्नतिसिद्ध्यर्थं पृष्टवानित्याह—पप्रच्छ चेति। चकारस्तूक्तसमुच्चयार्थः। जहौ पप्रच्छ च। उक्तार्थस्य च साधनतासिद्ध्यर्थं तेन पूर्वमुत्तरमुक्तमितीदानीमपि पृच्छ्यते। त्वत्पृष्टे तस्य च पृष्टे सरस्वतीसंवादो जात इत्याह। हे सत्तमाः, यन्मां पृच्छथ, इममेवार्थं स पृष्टवान्। शुकवाक्यस्य साधनत्वात्तस्य च भवतां च श्रोतृत्वेन तुल्यत्वाद्यथा भवतां तथा तस्याऽपि पृष्टे बुद्धिरुत्पन्नाः युक्तेत्यर्थः। परमवान्तरभेदः कश्चिदस्ति। भवतां तु तद्वाक्यप्रकारेण पदार्थज्ञानेच्छा। तस्य तु भगवन्माहात्म्यज्ञानमेवेष्टमिति। तदाह—कृष्णानुभावश्रवणे श्रद्दधान इति। भगवन्माहात्म्यश्रवणे तस्य द्वयं जातम्। श्रद्धा, मनसो विपुलता च श्रद्धया तद्ग्रहणम्। विपुलतया अपूर्तिः ॥ ३ ॥ ❀ ❀ शिष्टमत्रत्यं कृत्यं कृतवानित्याह—संस्थां विज्ञायेति। सप्तमेऽहनि मृत्युं विज्ञाय धर्मार्थकामोपयोगि कर्म त्यक्त्वा, तत्साधनान्यपि त्यक्त्वा, मोक्षदातरि भगवति वासुदेवे आत्मनः अन्तःकरणस्य भावं रतिं स्नेहं दृढं प्राप्य पप्रच्छेति सम्बन्धः। आत्मनः स्वरूपस्य वा सत्तामग्रे स्थितिरूपाम्। आत्मत्वं वा ॥ ४ ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ चतुर्थाध्यायविवरणं चिकीर्षवः सङ्गतिं बोधयितुं द्वाभ्यां पूर्वाध्यायार्थमनुवदन्ति साधनमित्यादि। क्रिये श्रवणकीर्त्तनरूपे, तयोः कर्त्तारौ एकशेषकृतं द्वित्वं तयोर्विभेदतः अतिवैराग्यरूपाद्वैलक्षण्यादत्र द्विविधं दृष्टादृष्टरूपं साधनं प्रकर्षेणास्मिन् प्रकरणे उक्तम्। तत्र पूर्वाध्याये क्रियाङ्गानि श्रवणाद्यङ्गानि भगवद्गतिभगवदीयसङ्गौ तदुभयसाधिका कथारतिश्चेत्येतानि साक्षात्परम्पराभेदेन द्विरूपतो वर्णितानि। न च तानि शुकोक्तावेव सिद्धानि, न शौनकोक्ताविति शङ्कनीयं, प्रश्नेपि शौनककृते उत्तरशेषत्वात्। उत्तरं प्रति कारणतया तदङ्गत्वात् क्रियायाः तदङ्गभूतायाः सत्सङ्गमक्रियाया निरूपणाच्च तानि वर्णितानि यतः कार्यसिद्धिः श्रवणसिद्धिर्यतः स्वरूपतो ज्ञानतश्च द्विप्रकारिका। तथा चैवं श्रवणस्य शब्दग्रहणेऽर्थज्ञाने चैतदुक्तसाधनैरुपकारादेतस्य पूर्वप्रकरणाङ्गत्वहेतुतासङ्गतिरित्यर्थः।

एवं पूर्वाध्यायार्थमनूद्योत्तरकरणं प्रत्यपि येन रूपेण हेतुता तद्बोधयितुं चतुर्थाध्यायार्थं सार्द्धैश्चतुर्भिराहुः साधनमित्यादि। यतो येन साधनेन मुख्ययोः श्रोतृवक्त्रोर्विमर्शाधिक्रिया विचाराधिकारस्तत्साधनमुच्यते। तत् किं क्षौमे वसानावदधीयातामितिवदुभयकर्तृकमेकम्, उत तत्तत्कर्तृकं पृथगित्याकाङ्क्षायामाद्ये श्रोतरि ससाधनः सद्बुद्ध्यादिरूपसाधनसहितः प्रश्नोऽधिकारकृत्। अथैतादृशप्रश्नान्तरं ज्ञात्वा देवगुर्वोः स्वरूपमवगत्य देवे गुरावपि विशेषतः यन्नमनं तद्धि यतो हेतो प्रश्नस्य सामान्यमुत्तरम्। अतो वक्तुरधिकारकृत्। तथा च, विशेषप्रश्नरूपत्वेन सङ्क्षिप्तोत्तररूपत्वेन चैतस्मिन्नुक्तस्य तत्तत्कृतसाधनस्योत्तरप्रकरणं प्रति हेतुतेत्यर्थः। अत्र ज्ञात्वेति पदमुपचक्रम इत्यस्यार्थसूचकम्, 'ज्ञात्वारम्भ उपक्रमः' इतिकोशात्। फलितमाहुः अत इत्यादि। सूतोक्तिसङ्गतिमाहुः व्यवसायेत्यादि। तथा चाङ्गनिरूपकत्वात्सङ्गतिरित्यर्थः। एवं व्यासोक्तिसङ्गतिमुक्त्वा व्याचिख्यासवः सूतोक्तेऽवसररूपां सङ्गतिमाहुः एवमित्यादि। इति कारिकाप्रकाशः

वैयासकेरित्यत्र अनेनेति। शुकवचसा। मूले तत्त्वनिश्चयमित्यत्र तत्त्वस्य निश्चयः इति व्यधिकरणपदो बहुव्रीहिः ॥ १ ॥ ❀ ❀ प्रपच्छेत्यत्र उन्नतिसिद्ध्यर्थमिति, उन्नतिज्ञानार्थम्। ननु राजप्रश्नानामुत्तरं सर्वं शुकेनोक्तमेवेति तदवगतौ पुनः किमिति पृच्छ्यत इति शङ्कायामाहुः उक्तार्थस्य च साधनतासिद्ध्यर्थमिति। पूर्वं शुकेनोक्तस्यार्थस्यापि प्रश्नसाधनसिद्ध्यर्थम्। तथा च, पूर्वोक्तार्थस्यापाततोवगमाद्भवद्वाक्यस्यैव सन्देहजनकतेति शुकबोधनार्थं पुनः पृच्छ्यत इत्यर्थः। साधनत्वादिति दुर्ज्ञेयत्वेन प्रश्नप्रयोजकत्वात् ॥ ३ ॥ ❀ ❀ संस्थामित्यत्र पुनश्च भूमादिति। प्रार्थनावाक्येनैव रतिदार्ढ्यस्योक्तत्वेनात्र पुनः कथनप्रयोजनाभावादात्मपदवैयर्थ्याच्च नेदं युक्तमित्यरुच्या पक्षान्तरमाहुः आत्मनः इत्यादि। अग्रे स्थितरूपामिति भावविकाराद्भिन्नाम्। अस्मिन्पक्षे गत इत्यत्रादिकर्मणि 'क्तः'। अस्य क्लिष्टत्वात् पक्षान्तरमाहुः आत्मत्वं वेति, अहंग्रहेण तदभेदमित्यर्थः ॥ ४ ॥

---

1 व्यावृत्य इति क. व्यावृत्य इति ख. ग. ङ.

### श्रीगिरिधरकृता बालप्रबोधिनी

तुर्ये राज्ञा विपृष्टस्य गुणानुकथने हरेः ॥ मङ्गलोक्त्या बृहच्छ्रद्धा[१] श्रीशुकस्य निरूप्यते ॥ १ ॥

राज्ञः प्रश्नं कथयितुं तस्य प्राक्तनीं स्थितिमाह—वैयासकेरिति चतुर्भिः । वैयासकेः शुकस्य भगवान्सर्वभूतेषु लक्षित इत्येवम्भूतमात्मनो भगवतस्तत्त्वस्य निश्चयो यस्मात्तद्वच उपधार्याऽऽकलय्य औत्तरेयः परीक्षित् श्रीकृष्ण एव सेव्य इत्येवम्भूतां सतीं संसारदुःखनिवर्त्तिकां मतिं विशेषेण अधादकरोत् ॥ १ ॥ पूर्वं सामान्यतो गृहादिकं त्यक्तमपि ममताया विद्यमानत्वात् अत्यक्तमिव भवति तदिदानीं वैयासकेर्वाक्यात्त्यक्तवानित्याह—आत्मेति । आत्मादिषु नित्यं सर्वदा विरूढां ममतां स्वकीयत्वाभिमानं जहौ तत्याजेत्यन्वयः । आत्मा देहः । आगारं गृहम् । पशवः गवाश्वादयः । द्रविणं धनम् । अविकले निरुपद्रवे ॥ २ ॥ ❀ ❀ श्रेष्ठानां भगवल्लीलाप्रश्नादिकमेव उचितमित्याशयेन सम्बोधयति–हे सत्तमा इति । यूयं यन्मां पृच्छथ तमिममेवार्थं हरिलीलालक्षणं प्रपच्छ[२] चेत्यन्वयः । तत्र हेतुमाह—कृष्णानुभावश्रवणे श्रद्दधान इति । तत्रापि हेतुमाह—महामना इति, विशुद्धबुद्धिरित्यर्थः ॥ ३ ॥ ❀ ❀ ननु धर्मादिसाधनकर्मानुष्ठानपरस्य कथं कृष्णे मतिर्देहादौ ममतात्यागश्च सम्भवतीत्याशङ्क्याह–यत् त्रैवर्गिकं धर्मार्थकामसाधने कर्म तत्सैन्यस्य त्यक्त्वेति । कथं तत्र विरक्तिर्जातेत्यत आह—संस्थां मृत्युं विज्ञायेति । ननु "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति श्रुतेः कथं तस्य कृष्णे निरुपाधिकस्नेहः सम्भवतीत्याशङ्क्याह—वासुदेवे इति । भगवदात्मत्वं गतः प्राप्तः सन् पप्रच्छेत्यन्वयः ॥ ४ ॥

### हिन्दी अनुवाद

#### राजाका सृष्टिविषयक प्रश्न और शुकदेवजीका कथारम्भ

सूतजी कहते हैं—शुकदेवजीके वचन भगवत्तत्त्वका निश्चय करानेवाले थे। उत्तरानन्दन राजा परीक्षित्ने उन्हें सुनकर अपनी शुद्ध बुद्धि भगवान् श्रीकृष्णके चरणोंमें अनन्यभावसे समर्पित कर दी ॥ १ ॥ ❀ ❀ शरीर, पत्नी, पुत्र, महल, पशु, धन, भाई-बन्धु और निष्कण्टक राज्यमें नित्यके अभ्यासके कारण उनकी दृढ़ ममता हो गयी थी। एक क्षणमें ही उन्होंने उस ममताका त्याग कर दिया ॥ २ ॥ ❀ ❀ शौनकादि ऋषियो! महामनस्वी परीक्षित्ने अपनी मृत्युका निश्चित समय जान लिया था। इसलिये उन्होंने धर्म, अर्थ और कामसे सम्बन्ध रखनेवाले जितने भी कर्म थे, उनका संन्यास कर दिया। इसके बाद भगवान् श्रीकृष्णमें सुदृढ़ आत्मभावको प्राप्त होकर बड़ी श्रद्धासे भगवान् श्रीकृष्णकी महिमा सुननेके लिये उन्होंने श्रीशुकदेवजीसे यही प्रश्न किया, जिसे आपलोग मुझसे पूछ रहे हैं ॥ ३-४ ॥

## राजोवाच

**समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ । तमो विशीर्यते मह्यं हरेः कथयतः कथाम् ॥५॥**
**भूय एव विवित्सामि भगवानात्ममायया । यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ॥६॥**
**यथा गोपायति विभुर्यथा संयच्छते पुनः । यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ॥**
**आत्मानं क्रीडयन् क्रीडन् करोति विकरोति च ॥७॥**
**नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितम् ॥८॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

मह्यं मम तमोऽज्ञानं विशीर्यते नश्यति तव कथयतः सतः अतः समीचीनम् ॥ ५ ॥ ❀ ❀ पुनश्च वेदितुमिच्छामि । इदं दुर्विभाव्यमवितर्क्यं विश्वं यथा सृजति ॥ ६ ॥ ❀ ❀ गोपायति पालयति । संयच्छते संहरते । पुरुशक्तिर्बहुशक्तिमान् । क्रीडन् यथा करोति आत्मानं ब्रह्मादिरूपिणं क्रीडयन् विकारोति विविधं करोति ॥ ७ ॥ ८ ॥

---

१. साधनं द्विविधं प्रोक्तं क्रियाकर्तृविभेदतः ॥ पूर्वाध्याये क्रियाङ्गानि वर्णितानि द्विरूपतः ॥ प्रश्नेष्युत्तरशेषत्वात्क्रियायाश्च निरूपणात् ॥ स्वरूपतो ज्ञानतश्च कार्यसिद्धिर्यतो द्विधा । साधनं श्रोतृवक्त्रोश्च विमर्षाधिक्रिया यतः ॥ तदुच्यते मुख्ययोर्हि प्रश्नस्त्वाद्ये ससाधनः । ज्ञात्वाऽथ नमनं देवे गुरावपि विशेषतः ॥ सामान्यमुत्तरं यद्धि तद्वक्तुरधिकारतः ॥ अतोऽध्याये चतुर्थे तु परीक्षिच्छुकयोः क्रमात् ॥ विसर्गाधिकारो हि विचाराङ्गं निरूप्यते ॥ व्यवसायात्मिका बुद्धिर्ममता त्याग एव च ॥ कथायाः श्रवणे श्रद्धा संन्यासो ज्ञानमेव च ॥ प्रश्नाद्यचतुष्टयं पूर्वं श्रोतुरङ्गमिहोच्यते इति वल्ल० सुबोधिनीकारिकाः २. वक्तृश्रद्धाऽत्र प्रतिपाद्यते । ३ परीक्षित् दृढं यथा तथा आत्मभावं गतः सन् पप्रच्छेत्युत्तरश्लोकेन सम्बन्धः ।

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

हे ब्रह्मन्निति । साक्षाद्ब्रह्मस्वरूप एव त्वमसीति भावः ॥ ५ ॥ ❀ ❀ भूय एवेत्यत्र राज्ञोयमभिप्रायः । म्रियमाणस्य मम कृत्यानि श्रवणकीर्त्तनस्मरणान्येवोक्तानि तेषु च विषयाः कृष्णलीलारूपगुणाद्यास्तत्र प्रथमं मायाशक्तिमतस्तस्य सृष्ट्यादिलीला जिज्ञास्यास्ततश्च चिच्छक्तिमतो गोवर्द्धनोद्धरणाद्या इति भूय एव पुनरपि विवित्सामि । इडभाव आर्षः ॥ ६ ॥ ❀ ❀ पुरवो बह्वयश्चिन्मया जीवा अंतरंगा बहिरंगाः तटस्थाभिधानाः शक्तयो यस्य सः इति विश्वनाथः । क्रीडन्मायाशक्त्या सह दीव्यन्नात्मानं करोति महदहंकारादिरूपत्वेन सृजतीति सर्गप्रश्नः । तथा क्रीडयन्ब्रह्ममरीच्यादीन्देवयन्विकरोति आत्मानं देवतिर्यग्नरादिरूपत्वेन सृजतीति विसर्गप्रश्नः ॥ ७ ॥ ❀ ❀ नन्विदं त्वं प्रायः सर्वं जानास्येव तत्किं पृच्छसीति तत्राह । नूनं निश्चितमेव भगवतश्चेष्टितमिदं सृष्ट्यादिचरितं कविभिश्चापि न्यायादिशास्त्रकृद्भिरपि दुर्विभाव्यमिव विभाति तैरपि परमाण्वादिद्वारा सृष्ट्यादिकथनाद्भवदभिप्रायाज्ञानाद्दुर्विभाव्यं दुर्ज्ञेयं ममाज्ञस्यात्र का कथेति भावः ॥ ८ ॥

## श्रीमद्वीरराघवव्याख्या

स्वबुभुत्सितमवतारयितुं मुनिवचोऽभिनंदति राजा समीचीनमिति । हे ब्रह्मन्ननघ मह्यं हरेः कथाः कथयतः सर्वज्ञस्य तव वचः समीचीनं यतस्तमोऽज्ञानं विशीर्यते नश्यति ॥ ५ ॥ ❀ ❀ बुभुत्सन्पृच्छति भूय इति । भूयः पुनः विवित्सामि वेदितुमिच्छामि । अधोश्वरैर्ब्रह्मादिभिर्दुर्विभाव्यमप्रतर्क्यं इदं विश्वं यथा सृजति ॥ ६ ॥ ❀ ❀ यथा गोपायति रक्षति यथा पुनः संयच्छति संहरति पुरुशक्तिरनंतशक्तिः परः पुमान्परमपुरुषः यां यां ब्रह्मादिरूपां शक्तिं शरीरं उपाश्रित्याधिष्ठाय आत्मानं ब्रह्मरुद्रादिरूपेण स्वात्मानं क्रीडयन्सृष्ट्यादिव्यापारविशेषाभिनिविष्टं कुर्वन् स्वयं क्रीडन्स्थित्यादिव्यापारं कुर्वन्करोति स्वयमेव तत्तदंतरात्मतया सृष्ट्यादिव्यापारं करोति विकरोति विरुद्धं करोति उपसंहरति इयं जगद्व्यापाररूपा क्रीडा स्वातंत्र्यमूला न तु बालादीनामिव कर्ममूलेत्यभिप्रायः ॥ ७ ॥ ❀ ❀ हे भगवन्नद्भुतकर्मणः विस्मयनीयव्यापारस्य हरेः । विचेष्टितं कविभिर्ज्ञानाधिकैरपि दुर्विभाव्यमप्रतर्क्यमिवाभाति प्रतीयते ॥ ८ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

स्वाभीष्टं प्रष्टुं शुकवचनं स्तौति समीचीनमिति । यदिष्टसाधनावबोधकं तत्प्रतिबंधनिवर्त्तकं च तदेव वचनं समीचीनं दृष्टमेतत्कथमत्राह तम इति । मह्यं मम तम आंतरमज्ञानं विशीर्यत इत्यनेन समूलभूतमुच्छिद्यत इत्युक्तं भवति मह्यमित्यनेन स्वेष्टसाधनं ज्ञानं च येन न दीयत इति सूचितं भवति हेतुर्वाऽनेनोच्यते मह्यं तमो विशीर्यत इति येन तस्मात्समीचीनमिति ॥ ५ ॥ ❀ ❀ आत्ममायया स्वेच्छया स्वनियतया प्रकृत्या चाऽन्यैर्दुर्विभाव्यं दुरुत्पाद्यमिदं विश्वं यथा येन प्रकारेण सृजते ॥ ६ ॥ ❀ ❀ येन प्रकारेण गोपायति रक्षति पुनर्येन प्रकारेण संयच्छते संहरति तं प्रकारं भूयः पुनरपि विवित्सामि ज्ञातुमिच्छामि पुरुशक्तिरनंतशक्तिः परः पुमान् ॥ ७ ॥ ❀ ❀ आत्मानं जीवं संसारे क्रीडयन्नवतारैश्च क्रीडन् यां यां शक्तिमुपाश्रित्य विश्वस्य यदपेक्षितं तत्सर्वं सामान्यतो विशेषतश्च करोति तदपि विवित्सामीति च शब्देन निर्विकारः सदा शुद्ध इति वाक्यं प्रमाणयति । भगवच्चेष्टाविषयस्य ज्ञानस्य वक्ता ज्ञानिष्वपि दुर्लभ इति भावेनाह नूनमिति । अज्ञैर्दुर्विज्ञेयमिति किं वक्तव्यमित्यस्मिन्नर्थे चशब्दः ॥ ८ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

यतो ममापि तमो विशीर्य्यते अतो हरेः कथां कथयतः कथयितुमारभमाणस्य सर्व्वज्ञस्य तव वचः समीचीनमित्येव योज्यम् ॥ ५ ॥ ❀ ❀ भूय इति । एतदपि ज्ञातुमिच्छामीत्यर्थः । आपाततः साक्षात् श्रीकृष्णचरितश्रवणे तद्वियोगदुःखबुद्धिः स्यादिति निजधैर्य्यापादनाय तदैश्वर्य्यविशेषप्रश्नोऽयं ज्ञेयः ॥ ६ ॥ ❀ ❀ यथेति सार्द्धद्विकम् ॥ ७ ॥ ८ ॥ ९ १० ११ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

तमः अज्ञानम् । मह्यं मम ॥ ५ ॥ ❀ ❀ भूय एवेत्यत्र राज्ञोऽयमभिप्रायः—म्रियमाणस्य मम कृत्यानि श्रवणकीर्त्तनस्मरणान्येवोक्तानि, तेषाञ्च विषयाः कृष्णलीलारूपगुणाद्याः । तत्र प्रथमं मायाशक्तिमतस्तस्य सृष्ट्यादिलीला जिज्ञास्या ततश्च चिच्छक्तिमतो गोवर्द्धनोद्धरणाद्या इति । भूय एव पुनरपि । विवित्सामि वेदितुमिच्छामि । इडभाव आर्षः । दुर्विभाव्यं ध्यातुमप्यशक्यम् ॥ ६ ॥ ❀ ❀ गोपायति पालयति । संयच्छते संहरति । पुरवो बह्वयश्चिन्मया जीवा अन्तरङ्गा बहिरङ्गा तटस्थाभिधानाः शक्तयो यस्य सः क्रीडन् मायाशक्त्या सह दीव्यन् आत्मानं करोति महदहङ्कारादिरूपत्वेन सृजतीति सर्गप्रश्नः । तथा क्रीडयन् ब्रह्ममरीच्यादीन् देवयन् विकरोति आत्मानं देवतिर्य्यङ्नरादिरूपत्वेन सृजतीति विसर्गप्रश्नः ॥ ७ ॥ ❀ ❀

नन्विदं त्वं प्रायः सर्वं जानास्येव तत् किं पृच्छसीति तत्राह। नूनं निश्चितमेव भगवतश्चेष्टितम् इदं सृष्ट्यादिचरितं कविभिश्चापि न्यायादिशास्त्रकृद्भिरपि दुर्विभाव्यमिव दुर्ज्ञेयमिव विभाति। ममाज्ञस्यात्र का वार्त्तेति भावः॥ ८॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अन्यं स्वबुभुत्सितमवतारयितुं शुकवचोभिनंदति समीचीनमिति। मह्यं मम तमोऽज्ञानं विशीर्यते नश्यति॥ ५॥ ❀ ❀ विवित्सामि वेदितुमिच्छामि। अधीश्वरैः ब्रह्मादिभिर्दुर्विभाव्यमवितर्क्यम्। यथेदं सृजति॥ ६॥ ❀ ❀ विभुः व्यापकः परः पुमान्निःसमानातिशयः पुरुशक्तिः यां यां शक्तिमुपाश्रित्याधिष्ठाय। यथा गोपायति रक्षति। यथा संयच्छते संहरते आत्मानं भक्तजनं क्रीडयन् स्वयं क्रीडन् यथा करोति। यथा विकरोति च सृष्टिस्थितिसंहारव्यापाराद्विपरीतं करोति मुक्तं करोति चेत्यर्थः॥ ७॥ ❀ ❀ एकः पुरुषरूपेण युगपद् भूरिशः सत्वनियंता स्वावतारः रजोनियंता स्वानुगृहीतः क्षेत्रज्ञो ब्रह्मा द्वितीयावतारः। तमो नियंता स्वानुगृहीतः क्षेत्रज्ञः रुद्रस्तृतीयावतारः एवं जन्मभिर्गुणावतारैः क्रमशो वा यथा प्रकृतेर्गुणान् बिभर्त्ति गृह्णाति ते चावताराः नारायणीयोपाख्याने श्रीकृष्णेनोक्ताः। तपो यज्ञश्च स्रष्टा च पुराणः पुरुषो विराट्। अनिरुद्ध इति प्रोक्तो लोकानां प्रभवाप्ययः। ब्राह्मे रात्रिक्षये प्राप्ते तस्य ह्यमिततेजसः। प्रसादात्प्रादुरभवत्पद्मं पद्मनिभेक्षणः। ततो ब्रह्मा समभवत्स तस्यैव प्रसादजः। अह्नः क्षये ललाटाच्च सुतो देवस्य वै तथा। क्रोधाविष्टस्य संजज्ञे रुद्रः संहारकारकः। एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजावुभौ। तदादेशितपंथानौ सृष्टिसंहारकारकौ। निमितमात्रं तावत्र सर्वप्राणिवरप्रदाविति॥ ८॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं प्रश्नसाधनान्युक्त्वा प्रश्नं वक्तुमभिनन्दनमाह—समीचीनमिति। यद्यपि त्वद्वचनस्याऽर्थो न ज्ञायते सर्वज्ञत्वात्तथापि त्वद्वचनं समीचीनम्। ब्रह्मन्निति सम्बोधनं वक्तुर्दोषाभावाय। अनघेत्यभिमानाद्यभावाय। तथापि मम स्वरूपाज्ञानरूपं तमस्त्वद्वाक्याद्विशीर्यते। तत्तु मदर्थमेवोक्तम्। त्रयं तु मया विनिश्चितम्। त्वद्वाक्येन ममाऽज्ञानं नष्टम्। मदर्थमेव च त्वयोक्तम्। भगवतश्च कथा कथितेति॥ ५॥ ❀ ❀ अर्थापरिज्ञानात्सन्देहादिदानीं विशेषाः पृच्छयन्त इत्याह—भूय एवेति। विवित्सामि ज्ञातुमिच्छामि। तत्र सन्देहपञ्चकम्। उत्पत्तिस्थितिलयेष्वाधारे साधनेषु च। तत्रोत्पत्तौ सन्देहमाह—यथेदमिति। इदं जगत् यथा सृजते। किं कुम्भकारवत्? आहोस्वित्सिद्धवद्वाङ्मात्रेण? आहोस्विद्योगिवन्मनसा? आहोस्वित्कल्पवृक्षवत्प्रसूते? आहोस्विदभिव्यनक्ति? इत्युत्पत्तौ पञ्च सन्देहाः। एत एव रक्षाप्रलययोरनुवर्त्तन्ते। किञ्च। दुर्विभाव्यमनीश्वरैरिति। ये मया पञ्च प्रश्नाः कृतास्ते केऽपि भगवति न सम्भवन्ति। यत उत्पाद्यमानस्य मनसाऽप्याकलयितुमशक्यत्वात्। एवमुत्तरत्राऽपि। तर्हि न करोत्येवेति किमिति न निश्चियते। न पालयति चेति। तत्राऽऽह—विभुरिति। पुनरिति। पुनः पुनर्नाशितस्य नाशनमुत्पादितस्य चोत्पादनमिति॥ ६॥ ❀ ❀ चतुर्थं प्रश्नमाह—यां यां शक्तिमिति। अत्र सृज्यः कः पदार्थः? किं केवल आत्मा, शक्तिसहितो वा? साहित्येऽपि किमात्मैवोत्पद्यते, शक्तिरेव वा? इति सन्देहे, तेष्वपि पक्षेषु कालभेदेन कृतिभेदेन वा व्यवस्थितेषु एकस्यां कृतौ यां शक्तिमुपाश्रित्य पुनर्द्वितीयकृतौ यां शक्तिमिति। एवं पञ्चस्वपि। तत्राऽप्यवान्तरभेदाः सन्ति। यतः पुरुशक्तिः। कालभेदाश्च बहवः सन्ति। यतः कालादिनियन्ता अयं पुमान्। आत्मानमेव करोति, विरुद्धमपि करोति, न करोति, विविधं वा करोति। अथवा। आत्मानमेव क्रीडयन्नन्यदेव किञ्चित्करोतीत्यादि सम्बन्धः। अथवा क्रीडन्नात्मानमेव करोतीति। चकारादन्येऽपि पक्षाः स्वयमूह्याः॥ ७॥ ❀ ❀ तर्ह्येवमनेकधा सन्देहे गुरुः प्रश्नं नाऽर्हति। अतिवादात्। अतोऽन्य एव प्रष्टव्य इत्याशङ्क्याऽऽह—नूनमिति। ब्रह्मन्नित्यतिप्रश्नेऽप्यक्षोभाय। भगवतो हरेरिति दुःखाभावसुखयोः सिद्ध्यर्थमुक्तम्। किञ्च। सामान्यत एव भगवतश्चरित्रं दुर्बोधं केन गुणेन करोतीति। तत्रापि हरेः। अन्यदुःखनिवारणार्थं करोति। तत्राऽन्येषामानन्त्याद्दुःखानां चाऽऽनन्त्यात् केन प्रकारेण कृते सर्वेषां दुःखं गच्छतीति न ज्ञायते। तत्राऽप्यद्भुतकर्मणः। अन्यत्करोत्यन्यत्सम्पद्यत इति। अत एव कविभिरपि निपुणैरप्यनेकधा कल्पकैरपि दुर्विभाव्यम्। अतो नाऽन्यः प्रश्नमर्हतीत्यर्थः॥ ८॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

**समीचीनमित्यत्र अभिनन्दनमिति**। राजकृतं तद्, अर्थाज्ञाने कथं वाक्यसमीचीनत्वमित्याकाङ्क्षयामुत्तरार्द्धस्यार्थमाहुः तथापि ममेत्यादि। तथा च कार्यबलात्तथा ज्ञायत इत्यर्थः॥ ५॥ ❀ ❀ **भूय एवेत्यत्र अर्थापरिज्ञानादिति**, भूतभव्यव्यवहारविषयत्वानन्तत्वबोधकयोर्वाक्ययोः परस्परविरोधेन तत्तात्पर्यापरिज्ञानात् आधार इति उपादाने। **नाशितस्य नाशनमित्यादि**, नष्टः पुनरुत्पन्नः पुनर्नष्ट इतिवद्वा। काष्ठादेर्वह्नित्वं ततो भस्मत्वं ततो वायुजलादिना तस्याप्यभाव इतिवद्वा तथेत्यर्थः॥ ६॥

१ वक्तृदोषाभावायेति ख. २ अभिमानाभावायेति क. ख. ३ वा कल्पवृक्षवत्प्रसूते वा अभिव्यनक्तीति क. ४ अत्र यद्वेति घ. ५ मुनीश्वरैरिति ख. मूलव्याख्ययोः, ६ पुनरिति नास्ति घ. ङ.। ७ कस्यामिति क. घ. ङ. ८ इदं नास्ति ग पुस्तके।

❀ ❀ यां यामित्यत्र अत्रेति, सृष्टिप्रक्रियायां विश्वस्मिन्वा । पञ्चस्वपीति सन्देहेषु न करोतीति चकारलभ्योऽयं पक्षः । अन्यदेवेति इन्द्रजालमिवेत्यर्थः । अन्येऽपि पक्षा इति, एकां शक्तिं क्रीडयन् आत्मानं विकरोति, शक्त्यन्तरं वा विकरोति, कालादीन् वा आत्मरूपान् करोतीत्येवमादयः ॥ ७ ॥ ❀ ❀ नूनमित्यस्याभासे अत इति, 'अतिवादांस्तितिक्षेते' तिवाक्येन ममातिवादोपेक्षकत्वात् । विवृतो, केन गुणेनेति, ऐश्वर्यादिषट्कमध्ये केन । अत एवेति, अद्भुतकर्मत्वादेव । अत इति, अब्रह्मरूपत्वात् ॥ ८ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

राजप्रश्नमेव दर्शयति—समीचीनमिति । हे ब्रह्मन् हे सर्वज्ञत्वेन ब्रह्मभूत हे अनघ काव्यादिवक्तृदोषरहित सर्वज्ञस्य तव वचः समीचीनम् । कुतः ? यतस्तव हरेः कथाः कथयतः सतो मह्यं मम तमोऽज्ञानं विशीर्यते विनश्यति ॥ ५ ॥ ❀ ❀ एवं तद्वचोऽभिनन्दनं कृत्वा [1]बुभुत्सितं पृच्छति—भूय इति । मुनीश्वरैरपि दुर्विभाव्यं अप्रतर्क्यमिदं विश्वं भगवानात्ममायया यथा सृजते यथा च गोपायति रक्षति यथा च पुनः संयच्छते संहरति तथा भूय एव विवित्सामि वेदितुमिच्छामीत्यन्वयः । पुनरित्यनेन सृष्टिसंहारादेः प्रवाहो दर्शितः ॥ ६ ॥ ❀ ❀ पुरुशक्तिरनन्तशक्तिः परः पुमान् परमपुरुषः यां यां शक्तिमुपाश्रित्याधिष्ठाय क्रीडन्नात्मानं ब्रह्मादिरूपिणं करोति तत्तद्रूपिणं चात्मानं क्रीडयन्नात्मानं विविधं[2] रामकृष्णादिरूपिणं करोति ॥ ७ ॥ ❀ ❀ हे ब्रह्मन्निति सम्बोधयन् वारंवारं प्रश्नेऽपि त्वया कोपो न कार्य इति सूचयति—भगवतश्चेष्टितं लीला कविभिरतिनिपुणैश्चापि दुर्विभाव्यमप्रतर्क्यमिवाभातीत्यन्वयः । किमर्थं भगवाँल्लीलां करोतीत्यपेक्षायां श्रवणकीर्त्तनादिना स्वभक्तदुःखनिवृत्त्यर्थमेवेत्याशयेनाह—हरेरिति, भक्तदुःखहरणशीलस्येत्यर्थः । तर्हि तच्छ्रवणादिना दैत्यादीनामभक्तानामपि दुःखनिवृत्तिः स्यादेवेत्याशङ्क्याह—अद्भुतकर्मण इति, अद्भुतं दैत्यादीनामास्वादाजनकं कर्म यस्य तस्येत्यर्थः ॥ ८ ॥

### हिन्दी अनुवाद

परीक्षित्‌ने पूछा—भगवत्स्वरूप मुनिवर ! आप परम पवित्र और सर्वज्ञ हैं । आपने जो कुछ कहा है, वह सत्य एवं उचित है । और ज्यों ज्यों भगवान्‌की कथा कहते जा रहे हैं त्यों त्यों मेरे अज्ञानका परदा फटता जा रहा है ॥ ५ ॥ ❀ ❀ मैं आपसे फिरभी यह जानना चाहता हूँ कि भगवान् अपनी मायासे इस संसारकी सृष्टि कैसे करते हैं ? इस संसारकी रचना तो इतनी रहस्यमयी है कि ब्रह्मादि समर्थ लोकपाल भी इसके समझनेमें भूल कर बैठते हे ॥ ६ ॥ ❀ ❀ भगवान् कैसे इस विश्वकी रक्षा और फिर संहार करते हैं ? अनन्तशक्ति परमात्मा किन-किन शक्तियोंका आश्रय लेकर अपने-आपको ही खिलौने बनाकर खेलते हैं ? वे बच्चोंके बनाये हुए घरौंदोंकी तरह ब्रह्माण्डों को कैसे बनाते हैं और फिर किस प्रकार बात-की-बातमें मिटा देते हैं ? ॥ ७ ॥ ❀ ❀ भगवान् श्रीहरि की लीलाएँ बड़ी ही अद्भुत—अचिन्त्य हैं । इसमें संदेह नहीं कि बड़े-बड़े विद्वानोंके लिये भी उनकी लीलाका रहस्य समझना अत्यन्त कठिन प्रतीत होता है ॥ ८ ॥

**यथा गुणांस्तु प्रकृतेर्युगपत् क्रमशोऽपि वा । बिभर्ति भूरिशस्त्वेकः कुर्वन् कर्माणि जन्मभिः ॥ ९ ॥**
**विचिकित्सितमेतन्मे ब्रवीतु भगवान् यथा । शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान्खलु ॥ १० ॥**

### सूत उवाच

**इत्युपामन्त्रितो राज्ञा गुणानुकथने हरेः । हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥ ११ ॥**

### श्रीशुक उवाच

**नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया ।**
**गृहीतशक्तित्रितयाय देहिनामन्तर्भवायानुपलक्ष्यवर्त्मने ॥ १२ ॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

एकः पुरुषरूपेण युगपत् जन्मभिर्ब्रह्माद्यवतारैः क्रमशो वा यथा प्रकृतेर्गुणान् गृह्णाति ॥ ९ ॥ ❀ ❀ विचिकित्सितं संदिग्धम् । शाब्दे ब्रह्मणि विचारेण निष्णातः परस्मिन्ननुभवेन ॥ १० ॥ ❀ ❀ उपामंत्रितः प्रार्थितः । प्रचक्रमे देवतागुरुनमस्कारादिरूपमुपक्रमं कृतवानित्यर्थः ॥ ११ ॥ ❀ ❀ तदेवाह त्रयोदशभिः परस्मै । सर्वोत्तमाय । तत्र हेतुः भूयसेऽपरिमितमहिम्ने तद्दर्शयति । सतः प्रपंचस्य उद्भवादिषु निमित्तभूता या लीला तया गृहीतं ब्रह्मादिरूपेण रजआदिशक्तित्रितयं येन तस्मै । अंतर्भवायांतर्यामिणे अत एव सर्वांतरत्वादनुपलक्ष्यं वर्त्म यस्य ॥ १२ ॥

---

१. बोद्धुमिष्टम् । २. विकरोतीत्यस्यायमर्थः । ३. प्रा० पा०—विभोः ।

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

यथैकः पुरुषरूपेण युगपत्प्रकृतेर्गुणान्बिभर्त्ति तत्रालिप्त एवेक्षणादिभिर्धारयति पालयति च। तथा जन्मभिर्ब्रह्ममरीच्यादिप्रादुर्भावैर्भूरिशो बहुरूपं क्रमशोपि वा बिभर्ति। कीदृशः कर्माणि कुर्वन्॥ ९॥ ❀ ❀ ननु कविभिश्चापि दुर्विभाव्यमिदं चेदहं जानामीति तत्त्वं कथं जानासि तत्राह। यथा भगवान् कृष्णस्तद्भक्तो भवानपि तथेत्यर्थः। तत्रापि शब्दे ब्रह्मणि वेदे परस्मिन्ब्रह्मणि कृष्णे चानुभवेन अपरे शास्त्रकर्त्तारस्तु श्रीकृष्णं नैवानुभवंतीति ते न जानन्ति 'किं विधत्ते किमाचष्टे' इत्यादिभगवदुक्तेर्भगवानेव वेदार्थं जानाति तत्कृपया तद्भक्ताश्च नान्य इति भावः। इह चिच्छक्तिप्राधान्येन कृष्णरासाद्यवतारलीला इव मायाशक्तिप्राधान्येन पुरुषाद्यवतारलीला ब्रह्मांडनिर्माणाद्या अपि वैष्णवैः श्रव्या एव नात्र कटाक्षः कार्य इति श्रोतृवक्त्रोः परीक्षिच्छुकयोरभिप्रायो वेदितव्यः॥ १०॥ ❀ ❀ हृषीकेशमिति। सर्वेंद्रियप्रवर्तकमिति। मद्वाचि स एव स्थित्वा प्रतिवदत्वित्यभिप्रायेण प्रचक्रमे इत्यर्थः इति। देवतैव गुरुरिति तन्नतिरूपं मंगलम् 'गुरुर्ब्रह्मा गुरुर्विष्णुः' इत्याद्युक्तेः। यद्वा गुरुर्व्यासो देवता परमात्मा तन्नतिरूपं वा मंगलं चकारेति भावः॥ ११॥ ❀ ❀ तदेवं मंगलमेव। तत्र सर्वोत्तमत्वे। तत् अपरिमितमहिमत्वम्। अत एवांतर्यामित्वादेव। अत्र विश्वनाथः—परस्मै पुरुषाय पुरुषोत्तमाय श्रीकृष्णायः नमः। 'यस्मात्क्षरमतीतोहम्' इत्यादि तदुक्तेः। पुरुषोत्तमत्वं तत्रैव नान्यत्रेति 'हरिर्येथैकः पुरुषोत्तमः स्मृतः' इति महाकव्युक्तेश्च। प्रथमैश्वर्यमाह–भूयसे पुरुषाद्यवतारैरपरिमितमहिम्ने। तत्र पुरुषावतारलीलामाह। देहिनां ब्रह्मादीनां समष्टिव्यष्टीनामंतर्भवाय अनुपलक्ष्यं योगिभिरपि दुर्ज्ञेयं वर्त्म भक्तियोगलक्षणं यस्य तस्मै॥ १२॥

### श्रीमद्वीरराघवव्याख्या

अन्यदपि पृच्छति यथेति। स्वयमेकः जन्मभिरवतारैर्भूरिशः कर्माणि चेष्टितानि कुर्वन्प्रकृतेर्गुणान्सत्वादीन्युगपदपि वा क्रमशः यथा बिभर्त्ति अत्र यथा सृजतीति निमित्तोपादानाधिकरणानां प्रश्नः। यथा गोपायतीत्यनेन रक्षितुः स्वस्य किं सृष्ट्यादाविव रक्षणेऽपि जीवांतर्यामित्वेनोत स्वावतारेणैव रक्षणमिति प्रश्नः। यथा संयच्छत इत्यनेन संयमाधिकरणप्रश्नः। नारदीयानां प्रश्नानां तत्रैवावतरिष्यमाणत्वात्। यथा गुणास्त्वित्यनेन भगवदवतारस्य गुणत्रयात्मकत्वमथवा त्रयाणामेव अन्यतमगुणात्मकत्वमथवाऽप्राकृतत्वमेवेति प्रश्नः। अत्र यद्यपि न तृतीयपक्षः प्रश्नारूढः तथापि प्रष्टुरभिप्रेतः। तस्यैव सिद्धान्तकोटित्वात्॥ ९॥ ❀ ❀ एतत्पूर्वोक्तं मे मम विचिकित्सितं विचारयितुमिष्टं भगवान्भवान्यथावद्ब्रवीतु। त्वमेव कथयितुं समर्थ इत्याह शाब्दे ब्रह्मणि शब्दब्रह्मात्मके ब्रह्मणि निष्णातः परिनिष्ठितः कृत्स्नशास्त्रार्थवित्। परस्मिंश्च ब्रह्मणि निष्णातः स्वल्वित्यन्वयः। अनेन परब्रह्मविषययोगजन्यज्ञानसंपत्तिरुक्ता॥ १०॥ ❀ ❀ हरेर्गुणानुकथन इत्युक्तप्रकारेणोपामंत्रितः प्रार्थितः हृषीकेशं भगवंतं सर्वेंद्रियनियंतारमनुस्मृत्य प्रवक्तुं देवतागुरुनमस्कारादिरूपमुपक्रमं कृतवान्॥ ११॥ ❀ ❀ तदेवाह त्रयोदशभिः नम इति परस्मै प्रकृतिपुरुषविलक्षणाय पुरुषाय तत्र हेतुः भूयसे स्वरूपतो गुणतश्चान्तर्बहिश्च व्याप्य वर्त्तमानाय तदेव दर्शयति सतः प्रपञ्चस्य उद्भव उत्पत्तिः स्थानं पालनं निरोधः संहारः त एव लीला तया गृहीतशक्तित्रितयाय गृहीतहिरण्यगर्भस्वावतारशंकररूपशक्तित्रितयं येन तस्मै अनेन वैलक्षण्यमुक्तं भूयस्त्वमाह अन्तर्भवायांतरात्मने "अनेन सर्वस्य स्वव्याप्यत्वात्तदपेक्षया स्वस्य व्यापकत्वमुक्तम्" अनुपलभ्यं वर्त्म यस्य तस्मै" वर्त्मशब्दः गंतव्यमार्गपरोऽप्यत्रोपासनारूपज्ञानविषयीभूतभगवत्स्वरूपरूपादिपरः उपचारात्। अनेन प्राकृतकरणागोचरत्वमुक्तं इदमपि वैलक्षण्यापादकम्॥ १२॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

अथाप्येकः प्रश्नोऽस्तीत्याह यथेति। एको हरिर्जन्मभिर्वासुदेवाद्यवतारैर्भूरिशः। सृष्ट्यादिकर्मणा कुर्वन् प्रकृतेः सत्त्वादिगुणान् बिभ्रद्यथाकथं बिभर्ति युगपत् क्रमशः क्रमेण वेति। तु शब्देन गुणानां विरुद्धस्वभावत्वेन युगपद्ग्रहणेऽनुपपत्तिं सूचयति अपिपदेन क्रमशो ग्रहणं संभावितमिति॥ ९॥ ❀ ❀ न केवलं विवित्सामि किंतु वक्तव्यमिति प्रार्थये इत्याह विचिकित्सितमिति। यथा यथावद् एतदुक्तुं तव पांडित्यं चास्तीत्याशयेनाह शब्देति। अनेनालौकिकमपि वस्तु यथा बोद्धुं शक्यं तथा वक्ता बोधयितुं त्वं समर्थ इत्युक्तं भवति॥ १०॥ ❀ ❀ परीक्षित्पृष्टः किं चकारेति सूतः शौनकस्य हार्दशंकां परिहरति इतीति। इतिशब्दप्रकारवचनः हृषीकेशमित्ययेन मुख्यतो वागादींद्रियशक्त्युद्बोधकत्वं हरेरित्यभिप्रैति प्रतिवक्तुं प्रचक्रमे प्रारब्धवान् भागवतसंहितामिति शेषः॥ ११॥ ❀ ❀ परीक्षित्प्रश्नोत्तररूपत्वेन भागवतपुराणं वक्तुकामः शुकः शिष्टाचारं परिपालयन् स्वेष्टदेवतां [प्रणमति। नमः परस्मा इत्यारभ्य नमस्तस्मा इत्यंतैः श्लोकैः। भूयस्त्वमुपपादयति सदित्यादिना। सतः सत्यस्य जगत उद्भव उत्पत्तिस्थानं पालनरूपस्थितिः निरोधो लयः एतन्निमित्तं लीलयागृहीतं शक्तीनामिच्छाज्ञानक्रियाख्यानां त्रितयं येन स तथोक्तस्तस्मै इच्छा ज्ञानं क्रिया चेति नित्याः शक्तय ईशितुरिति वचनान्नित्येति पदमध्याहार्यं नित्यं गृहीतशक्तित्रितयायेत्यर्थः वेदादिरेवात्र प्रमाणं न प्रत्यक्षमिति भावेनाह देहिनामिति। देहिनां जीवानां चक्षुरादिनानुपलभ्यवर्त्मने दुर्ज्ञेयमार्गाय दूरस्थत्वा-

दिति नेत्याह-अन्तर्भुवायेति । अंतर्यामित्वेन सततमंतःस्थिताय यो वै भूमा तत्सुखं द्वाविमौ पुरुषौ लोके इत्यादिवाक्यमत्र प्रमाणम् ॥ १२ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

तत्र प्रथमं भगवत्तत्त्वं विवृण्वन् नमस्करोति नम इति त्रयोदशभिः । परस्मै स्वयं भगवते श्रीकृष्णाय । यतः भूयसे सर्व्वतः परिपूर्णाय । अतोऽंशांशतः पुरुषादिरूपाय स्वतस्त्वनुपलक्ष्यवर्त्मने ॥ १२ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

यथा एकः पुरुषरूपेण युगपत् प्रकृतेर्गुणान् बिभर्त्ति तत्रालिप्त एव ईक्षणादिभिर्धारयति पालयति च । तथा जन्मभिः ब्रह्ममरीच्यादिप्रादुर्भावैः भूरिशः बहुरूपः क्रमशोऽपि क्रमेणापि वा बिभर्त्ति । कीदृशः कर्म्माणि सृष्ट्यादीनि कुर्वन् ॥ ९ ॥ ❀ ❀ विचिकित्सितं सन्दिग्धम् । ननु कविभिश्चापि दुर्विभाव्यमिदं चेदहं जानामीति तत्त्वं कथं जानासि तत्राह । यथा भगवान् कृष्णः तद्भक्तो भवानपि तथेत्यर्थः । तत्रापि शाब्दे ब्रह्मणि वेदे विचारेण निष्णातः परस्मिन् ब्रह्मणि कृष्णे च खल्वनुभवेनेति एवमपरे शास्त्रकर्त्तारस्तु नैवानुभवन्तीति ते न जानन्ति । किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन । इति भगवदुक्तेः इह चिच्छक्तिप्राधान्येन कृष्णरामाद्यवतारलीला इव मायाशक्तिप्राधान्येन पुरुषावतारलीला ब्रह्माण्डनिर्माणाद्या वैष्णवैः श्रव्या एव नात्र कटाक्षः कार्य्य इति श्रोतृवक्त्रोः परीक्षित्शुकयोरभिप्रायो वेदितव्यः ॥ १० ॥ ❀ ❀ हृषीकेशं सर्व्वेन्द्रियप्रवर्त्तकम् इति मद्वाचि स एव स्थित्वा प्रतिवदत्वित्यभिप्रायेण । प्रचक्रमे देवतागुरुनमस्कारपूर्व्वकमुपक्रमं कृतवानित्यर्थः ॥ ११ ॥ ❀ ❀ तमेवाह । त्रयोदशभिः । परस्मै पुरुषाय पुरुषोत्तमाय श्रीकृष्णाय नमः । प्रथमैश्वर्यमाह । भूयसे पुरुषाद्यवतारैरपरिमितमहिम्ने । तत्र प्रथमं पुरुषावतारलीलामाह सदुद्भवेति । शक्तित्रितयं रजःसत्त्वतमः । द्वितीयतृतीयपुरुषावतारलीलामाह । देहिनां ब्रह्मादीनां समष्टिव्यष्टीनाम् अन्तर्भवाय अन्तर्यामिणे । अनुपलक्ष्यं योगिभिरपि दुर्ज्ञेयं वर्त्म भक्तियोगो यस्य तस्मै ॥१२॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

एतत्पूर्वोक्तम् । विचिकित्सितं संदिग्धं यथावद्भगवान्ब्रवीतु । तत्र योग्यतामाह । शाब्दे इत्यादि ॥ १० ॥ ❀ ❀ हरेर्गुणानुकथने उपामंत्रितः हृषीकेशं सर्वेन्द्रियनियंतारं श्रोतॄणां श्रावयितुश्चेन्द्रियनैश्चल्यहेतुत्वेनोपकर्त्तारमनुस्मृत्य । प्रचक्रमे हरिगुरुनत्यादिरूपमुपक्रमं कृतवान् ॥ ११ ॥ ❀ ❀ तदेवाह । नम इति त्रयोदशभिः । परस्मै चिदचिद्भ्यां भिन्नस्वरूपाय पुरुषाय नमः । तत्र हेतुः । भूयसेऽपरिमितगुणस्वरूपाय सतः प्रपञ्चस्य उद्भवस्थाननिरोधेषु । उत्पत्तिपालनसंहारेषु निमित्तभूतया तया पाद्मस्वावताररुद्ररूपैर्गृहीतं रजःसत्वतमोलक्षणं शक्तित्रितयं येन तस्मै अन्तरात्मने अभक्तैर्नोपलक्ष्यं वर्त्म प्राप्तिमार्गो यस्य तस्मै ॥ १२ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

किञ्च । केन साधनेन भगवान्करोति । गुणैरिति चेत् । तान्गुणान्किं क्रमशो गृह्णाति । युगपद्वा । न हि सर्वे युगपदुत्पद्यन्ते लीयन्ते वा । किञ्च भूरिशो वा गृह्णाति । प्रकृतेर्गुणान्बहुविधान्कृत्वा भूरिशो राशिप्रकारेण गृह्णाति । अथवा । तु पुनः [१]स्वयमेकोऽप्यनेको भूत्वा युगपदादिभेदेन (?) गृह्णातीति । किञ्च । कर्माणि जन्मभिः कुर्वन् । नानाजन्मानि कृत्वा कर्माणि कुर्वन्करोति । कर्माधीनतया करोतीत्यर्थः ॥ ९ ॥ ❀ ❀ एवं पञ्चप्रश्नान्निरूप्य साभिलाषतया [२]प्रश्नानुपसंहरति—विचिकित्सितमेतन्म इति । [३]मह्यमेतज्ज्ञातुमिष्टं यथा यथावद्भगवान्ब्रवीतु कथयतु । कथने सामर्थ्यमाह । शाब्दे परस्मिन्नपि ब्रह्मणि तत्तत्साधनैर्भवान्निष्णातः । खल्विति प्रसिद्धे ॥ १० ॥ ❀ ❀ शुकोऽपि [४]ससाधन उत्तरमाहेत्याह—इत्युपामन्त्रित इति । उपामन्त्रणं प्रार्थना । तदाऽस्मिन्नर्थे सर्वसन्देहवारको भगवानेवेति हृषीकेशं बुद्धिप्रेरकमनुस्मृत्य प्रत्युत्तरं दातुं प्रचक्रमे । उपक्रमं कृतवानित्यर्थः । उपक्रमो नाम देवतागुरुनमस्कारः । हरेर्गुणानुकथने उपामन्त्रित इति स्कन्धादावनुपक्रमे हेतुः ॥ ११ ॥ ❀ ❀ सर्वशास्त्रार्थनिर्द्धारः सप्तभिर्नमनोक्तिभिः । पञ्चभिः प्रार्थनावाक्यैर्माहात्म्यं तस्य वर्ण्यते । एकेन व्यासनमनमेतावच्छुकभाषितम् । अन्यत्कथाप्रसङ्गेन परोक्त्या वानिरूपितम् । नमनादेव भगवान्सर्वसंशयवारकः प्रार्थितः कामनां दद्यान्नाऽन्यथेति क्षयेरणम् ॥ यद्यपि तेन पञ्च प्रश्नाः कृतास्तथापि सर्वसन्देहनिवारणार्थं भगवान्स्मृत इति तत्तत्सन्देहनिवृत्तिपूर्वकं भगवन्तमनूद्य नमस्करोति । तत्राऽऽदौ सृष्टिप्रकारे सन्दिहानं प्रति प्रकारं वदन्नमस्यति—नम इति । आदौ परः असङ्गोदासीन एक

---

१. स्वयमेको भूत्वेति क पाठः । २. पञ्च प्रश्नानिति ख. ग. घ. ङ. । ३. मेतत्सन्दिग्धं ज्ञातुमिति ख. । ४. ससाधनमिति घ.

एवेत्यर्थः। तदनु स एव पुरुषः। अनेनाऽशरीरस्य विष्णोः पुरुषशरीरस्वी'कारश्चादौ कथितः। तदनु "बहुस्यामि"ति वाञ्छया एक एव भूयान्। तदनु क्रीडार्थं जगदुत्पत्तिस्थितिसंहारैः 'स्वमायागुणभूतशक्तित्रयस्वीकारमाह—गृहीतशक्तित्रितयायेति। सदिति वचनादसतः सत्ता निवारिता। किञ्च। तस्योद्भवः स्थानं निरोधश्च लीलार्थम्। सद्रूपेण भगवानुत्पद्यते तिष्ठति लीयते चेति। अनेन क्रमोऽपि दर्शितः। सदंशस्य व्यापकत्वात्सृज्यमानस्य परिच्छेदाभावाद्युगपदेव देशभेदेन एकत्र क्रमेणैव यथा लीला सम्पद्यते तथा करोतीत्यर्थः। तदनु तत्राऽन्तर्यामितया प्रविशतीत्याह—देहिनामन्तर्भवायेति। नहि बहिःस्थितोऽन्तः प्रविशति। किन्त्वन्तरेवाऽऽविर्भवतीत्यर्थः। सृष्टेर्नामरूपभेदेन द्वैरूप्यान्नामसृष्ट्यर्थं सर्वं सृष्ट्वा। सर्वमनुप्रविश्य। सर्वैरप्यनुपलभ्यं वर्त्म यस्य तादृशो जात इत्यर्थः। तेन गुरुवेदादिभिरेव तज्ज्ञानमित्यर्थः॥ १२॥

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः**

यथा गुणानिति श्लोकं व्याकुर्वन्ति किञ्च केनेत्यादि॥ ९॥ ❋ ❋ इत्युपामन्त्रित इत्यत्र स्कन्धादावित्यादि। एतेन प्रार्थनां विना भगवद्गुणा न वक्तव्या इति भक्तिमार्गीयः सिद्धान्तः सूच्यत इत्यर्थः॥ ११॥ ❋ ❋ नमः परस्मा इत्यत्र कारिकासु एतावदिति, उपक्रमशब्दवाच्यमेतावदित्यर्थः। अन्यदिति, एतदेवेति श्लोकोऽग्रिमश्च। क्रीडार्थमिति क्रीडेच्छया। एतेन सदुद्भवस्थाननिरोधलीलापदे मयूरव्यंसकादिसमासो बोधितः। सदुद्भवस्थाननिरोधार्था लीलेति समासादरणे "स वै नैव रेमे" इत्यादिपुरुषविधब्राह्मणविरोधादिति। अत्र श्लोके भूयस इत्यादिविशेषणद्वयेन व्यष्टिरूपनिरूपणं बोध्यम्। इदञ्च पद्यं 'कुर्वन् कर्माणि जन्मभिरि' त्येतद्व्यतिरिक्तसर्वप्रश्नोत्तररूपं ज्ञेयम्॥ १२॥

**श्रीगिरिधरकृता बालप्रबोधिनी**

स्वयं त्वेको जन्मभिरवतारैर्भूरिशः कर्माणि लीलाः कुर्वन् प्रकृतेर्गुणान् सत्त्वादीन् युगपत् क्रमशोऽपि वा यथा बिभर्ति गृह्णाति तथा॥ ९॥ ❋ ❋ एतत्पूर्वोक्तं सर्वं मे मम विचिकित्सितं सन्दिग्धमतो भगवान् सर्वज्ञो भवान् यथा यथावत् ब्रवीत्विति द्वयोरन्वयः। कथमहं सर्वज्ञ इत्यपेक्षायामाह—खलु निश्चयेन भगवान् शाब्दे ब्रह्मणि वेदाख्ये निष्णातो विचारेण पारगः परस्मिन् ब्रह्मणि चानुभवेन निष्णात इति॥ १०॥ ❋ ❋ इत्येवं पूर्वोक्तप्रकारेण हरेर्गुणानुकथने राज्ञा उपामन्त्रितः प्रार्थितः शुकः मद्वचसि स्थितः सन् भगवानेवोत्तरं ददात्वित्यभिप्रायेण हृषीकेशं सर्वेन्द्रियनियन्तारमनुस्मृत्य प्रतिवक्तुं उत्तरं दातुं प्रचक्रमे देवतागुरुनमस्कारादिरूपक्रमं कृतवान्॥ ११॥ ❋ ❋ तत्र देवतानमस्कारमाह—नम इति द्वादशभिः। परस्मै पुरुषाय पुरुषोत्तमाय नम इत्येवं सर्वत्र च'तुर्थ्यन्तेन शब्देन नमःशब्दस्यान्वयः। पुरुषोत्तमत्वे हेतुमाह—भूयस इति, अपरिमितमहिम्ने इत्यर्थः। तदेव दर्शयति—सतः प्रपञ्चस्योद्भव उत्पत्तिः स्थानं पालनं निरोधः संहार एतत्त्रितयरूपा या लीला तया निमित्तभूतया गृहीतं ब्रह्मविष्णुरुद्ररूपेण रजस्सत्त्वतमोरूपं शक्तित्रितयं येन तस्मै। यद्यपि सर्वं कार्यं स एव करोति कारयति च तथापि तन्मार्गमपि दुर्ज्ञेयं तज्ज्ञानं तु सुदूरत इत्याह—अनुपलक्ष्यवर्त्मने इति। तत्र हेतुमाह—देहिनामन्तर्भवायेति॥ १२॥

**हिन्दी अनुवाद**

भगवान् तो अकेले ही हैं। वे बहुत-से कर्म करनेके लिये पुरुषरूपसे प्रकृतिके विभिन्न गुणोंको एक साथ ही धारण करते हैं अथवा अनेकों अवतार ग्रहण करके क्रमशः धारण करते हैं।॥ ९॥ ❋ ❋ मुनिवर! आप वेद और ब्रह्मतत्त्व दोनोंके पूर्ण मर्मज्ञ हैं, इसलिये मेरे इस सन्देहका निवारण कीजिये॥ १०॥ ❋ ❋ सूतजी कहते हैं—जब राजापरिक्षित्‌ने भगवान्‌के गुणोंका वर्णन करनेके लिये उनसे इस प्रकार प्रार्थना की, तब श्रीशुकदेवजीने भगवान् श्रीकृष्णका बार-बार स्मरण करके अपना प्रवचन प्रारम्भ किया॥ ११॥ ❋ ❋ श्रीशुकदेवजीने कहा—उन पुरुषोत्तम भगवान्‌के चरणकमलोंमें मेरे कोटि-कोटि प्रणाम हैं, जो संसारकी उत्पत्ति, स्थिति और प्रलयकी लीला करनेके लिये सत्त्व, रज तथा तमोगुणरूप तीन शक्तियोंको स्वीकारकर ब्रह्मा, विष्णु और शङ्करका रूप धारण करते हैं; जो समस्त चर-अचर प्राणियोंके हृदयमें अन्तर्यामीरूपसे विराजमान हैं, जिनका स्वरूप और उसकी उपलब्धिका मार्ग बुद्धिके विषय नहीं हैं; जो स्वयं अनन्त हैं तथा जिनकी महिमा भी अनन्त है॥ १२॥

**भूयो नमः सद्वृजिनच्छिदेऽसतामसम्भवायाखिलसत्त्वमूर्तये।**
**पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे॥१३॥**
**नमो नमस्तेऽस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम्।**
**निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः॥१४॥**

---

१. स्वीकार आदौ इति घ. ङ.। २. स्वमायया गुणभूतेति क. घ. ङ. ३ नमस्तस्मिन्नित्यादिमा चतुर्थी।

यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं यच्छ्रवणं यदर्हणम् ।
लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः ॥१५॥
विचक्षणा यच्चरणोपसादनात् सङ्गं व्युदस्योभयतोऽन्तरात्मनः ।
विन्दन्ति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः ॥१६॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

विचित्रफलदातृत्वमनुस्मरन्प्रणमति । भूयः पुनश्च नमः सतां धर्मवर्तिनां वृजिनच्छिदे दुःखहंत्रे । असतामधर्मशीलानामसंभवायानुद्भवहेतवे । अखिलसत्त्वमूर्तये तत्तद्देवतादिरूपेण तत्तत्फलदात्र इत्यर्थः । समग्रसत्त्वमूर्तये इति वा । पुनरिति पूर्वोक्तोभयवैलक्षण्यमाह । पारमहंस्ये प्रत्यङ्निष्ठारूपे आश्रमे व्यवस्थितानां पुंसामनुमृग्यमतन्निरसनेन पुनः पुनर्मृग्यं यदात्मतत्त्वं तस्य दाशुषे दात्रे । दाशृ दाने इति धातुः ॥ १३ ॥ ❀ ❀ सात्वतां भक्तानामृषभाय पालकाय । कुयोगिनां भक्तिहीनानां विदूरा काष्ठा दिगपि यस्य दुर्ज्ञेयायेत्यर्थः । तदेवं वैषम्यप्रतीतावपि निर्दोषत्वायाचिंत्यमैश्वर्यमाह । निरस्तं साम्यमतिशयश्च यस्य यदपेक्षयान्यस्य साम्यमतिशयश्च नास्ति तेन राधसा ऐश्वर्येण स्वधामनि स्वस्वरूपे ब्रह्मणि रममाणाय ॥ १४ ॥ ❀ ❀ सर्वसाधनेभ्यो भक्तेः श्रैष्ठ्यमनुस्मरन्प्रणमति यत्कीर्तनमिति द्वाभ्याम् । अर्हणं पूजनम् । सुभद्रं मंगलं श्रवो यशो यस्य तस्मै ॥ १५ ॥ ❀ ❀ विचक्षणा विवेकिनो यस्य चरणयोरुपसादनादुपसत्तेर्भजनात् । अन्तरात्मनो मनसः उभयत्रेह च परत्र च संगं व्युदस्य निरस्य गतक्लमाः प्रयासरहिताः ॥ १६ ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

इत्यर्थ इति । तत्तद्देवताभक्तरूपेणार्चयित्वा तत्तद्देवतारूपेण फलदातापि स एव 'यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।' इत्यारभ्य 'लभते च ततः कामान्मयैव विहितान्हितान्' इत्यन्तश्रीमुखोक्तेः । श्लेषेण तमग्रसत्त्वमूर्तये शुद्धसत्त्वमूर्तय इति । विश्वनाथः—कृपामाधुर्यमाह । सद्वृजिनच्छिदे रामकृष्णाद्यवतारैः स्वभक्तदुःखच्छिदे असतां पापिनामभक्तराक्षसासुरादीनामपि स्वकर्तृकवधेनासम्यग्भवदुःखनिवर्तकाय व्यवस्थितानां विशेषतोवस्थितानां भक्तिमिश्रज्ञानिनां शुद्धभक्तानां चानुमृग्यो ब्रह्मानंदः प्रेमानन्दश्च तस्य दात्रे । संदर्भः । सतां वेदानुवर्तिनामसतां तद्बहिर्मुखानां दैत्यादीनामप्यसंभवाय मुक्तिदाय पुंसां पुनरिति । तत्रानुमृग्यं भक्तियोगैकसाध्यं स्वचरणारविंदमेव ज्ञेयम् । तथा परमहंसानामिति–कुंतीवाक्यात् । परमहंसमहामुनीनाममलात्मनां भक्तियोगविधानार्थमिति । प्रथमे 'परमहंसमहामुनीनामन्वेषणीयचरणौ चलयन्सहश्रीः' इति तृतीये च निरूपितत्वात् ॥ १३ ॥ ❀ ❀ इत्यर्थ इति । 'दुराराध्यमसाधुभिः' इत्युक्तेरयं भावः । विश्वनाथः ऐश्वर्यमाधुर्ययोः परिपूर्णत्वमाह । नमो नम इति । वीप्सया निरन्तरमेव नम इत्यर्थः । ते तुभ्यमिति । युष्मत्प्रयोगेण साक्षात्कारात्स्वेष्टदेवत्वं ध्वनितम् । सात्वतां यादवविशेषाणां वृषभाय देवकीनंदनाय सात्वतां भक्तानां पालकायेत्यर्थस्तु पूर्वश्लोके व्यंजित एव । कुयोगिनां भक्तिहीनानां विदूरकाष्ठाय तेषां दूरे वा गुप्तो वा त्वं न च वर्तस इत्यर्थः । स्वधामनि मथुरामंडले रंस्यते रममाणाय रमणोचिततनैः सहेत्यर्थतो गम्यम् । स्वधामनि कीदृशे ब्रह्मणि ब्रह्मस्वरूपे 'तासां मध्ये साक्षाद्ब्रह्मगोपालपुरी' इति गोपालतापनीयश्रुतेः । अत्र राधसेऽत्यैश्वर्यं रंस्यत इति माधुर्यम् । यद्वा । स्वधामनि वृन्दावने राधसा राधया सह रंस्यते क्रीडते कीदृशे स्वधामनि ब्रह्मणि सर्वोत्कृष्टे 'लोकेषु पृथिवी धन्या तत्र वृन्दावनं महत्' इत्युक्तेः । किं भूतेन राधसा निरस्तौ साम्यातिशयौ तौल्याधिक्ये यस्य तेन "न राधासदृशी काचिद्देवताभ्यधिका कुतः । अनेककोटिब्रह्मांडपतिर्यस्या वशे हरिः ।" इत्यादिपुराणात् । सांतोपि राधधातुनिष्पन्नो राधःशब्दो राधावाचकः समानार्थप्रत्ययनिष्पन्नत्वात् । द्विरूपकोशे अवर्णांतासंतयोः मनश्च मनसा सह' इत्यादिप्रयोगदर्शनात् । संदर्भस्तु । अंतरंगप्रयोजनमाह—सात्वतां यादवानामृषभाय तैः सह नानाविहारार्थमवतीर्णाय तथापि कुयोगिनां तद्बहिर्मुखयोगनिष्ठानाम् । पुनश्च यथावदेव स्थितिमेव दर्शयति । ब्रह्मणि ब्रह्मस्वरूपे । स्वधामनि वैकुंठे । रंस्यते तत्पश्चाद्रममाणाय ॥ १४ ॥ ❀ ❀ यदीक्षणं यत्प्रतिमादेरवलोकनम् । एतेन तत्प्राप्तिप्रतिबंधकं कल्मषं तत्कीर्त्तनादिभिरेव नश्यतीत्युक्तम् ॥ १५ ॥ ❀ ❀ गतक्लमा इत्युक्तेरन्ये त्वभजंतः श्रममेव लभंते । "श्रेयःसृतिं भक्तिमुदस्य ते विभो" इत्याद्युक्तेः । ब्रह्मरूपा चासौ गतिस्ताम् । गतिर्गम्यो लोको वा ॥ १६ ॥

### श्रीमद्वीरराघवव्याख्या

अनुपलभ्यवर्त्मत्वेऽनुपायस्त्वं स्यादित्यत आह भूयो नम इति । सद्वृजिनच्छिदे सतां पापच्छिदे असतां दुष्कृतामसंभवाय विनाशाय । अखिलसत्वमूर्त्तयेऽखिलं पूर्णं सत्वमेव मूर्तिर्यस्य तस्मै उपात्तपूर्णसत्वदेहायेत्यर्थः । स्वतोऽनिंद्रियत्वेऽपि सौलभ्यातिशयेन साधुपरित्राणाय दुष्कृतविनाशादि कुर्वन् अखिलमनुजनयनविषयतां रामकृष्णादिरूपेण गताय इत्यर्थः । प्रकृतिपुरुषविलक्षणत्वात्

सर्वजगत्कारणत्वाद्वात्सल्यादिगुणवत्वाच्च मुमुक्षूपास्यत्वं मोक्षप्रदत्वं चाह पारमहंस्ये परमहंसानां संबंधिनि आश्रमे चतुर्थाश्रम इत्यर्थः। तस्मिन् व्यवस्थितानामिदं मुमुक्षामात्रोपलक्षणं परमहंसानां प्रायेण मुमुक्षुत्वात्तदाश्रमनिर्देशः। ब्रह्मविद्यांगत्वेन तत् स्वाश्रमप्रयुक्तधर्मानुष्ठानपराणामनुमृग्य दाशुषे अनुमृग्योलब्धुमिष्टोऽर्थः तस्य दाशुषे दानशीलाय एवंभूताय भूयो नम इति ॥ १३ ॥ ❀ ❀ सौलभ्यविशिष्टमेव नमस्करोति नम इति। सात्वतां यदूनामृषभाय श्रेष्ठायाश्रितवात्सल्यातिरेकात्सात्वतश्रेष्ठत्वेनावतीर्णायेत्यर्थः। एवंभूतोपि दुर्योगिनां दुर्लभ एवेत्याह विदूरकाष्ठायेति। कुयोगिनां कुत्सितयोगिनां भगवद्भक्तिरहितयोगनिष्ठानां विदूरकाष्ठाय विदूरे दूरत एव काष्ठा दिक् यस्य तस्मै दुर्योगिभिर्यस्य दिगपि दुर्ज्ञेया तथाविधायेत्यर्थः। तदेवं वैषम्यप्रतीतावपि निर्दोषत्वायाचिंत्यैश्वर्यमाह निरस्त इति। स्वराधसा स्वतेजसा निरस्तं साम्यमतिशयश्च यस्य तेन तेजसा उपलक्षिते स्वधामनि स्वे महिम्नि प्रतिष्ठित इति श्रुत्युक्तरीत्या स्वप्रतिष्ठिते स्वयंज्योतिषि ब्रह्मणि स्वस्मिन् रंस्यते रममाणाय ते तुभ्यं नमो नमोऽस्तु तत्तद्गुणविशिष्टकारोद्देशेन नमस्कृतेः पौनःपुन्यं निःसमाभ्यधिकस्वकीयतेजसोपलक्षिते स्वस्मिन्नेव रममाणस्य न किंचिदपि वैषम्येण प्रयोजनमिति नहि कल्पद्रुमस्य भजतामभीष्टान् ददतो वैषम्यमिति वक्तुं युक्तम् ॥ १४ ॥ ❀ ❀ यत एव विचित्रैश्वर्यवत्त्वेन वैषम्यमत एव तत्कीर्तनस्मरणादेः समस्तदुरितनिवर्तकत्वमित्याह यत्कीर्तनमिति। ईक्षणमर्चाविग्रहादि निरीक्षणमर्हणं पूजनं यत्कीर्त्तनादिकं कीर्तनादिनिष्ठस्य कश्मलं दुरितं विधुनोति सद्यो विनाशयति तस्मै सुभद्रश्रवसे सुभद्रं सुमंगलम् श्रवः कीर्त्तिः यस्य तस्मै नमः ॥ १५ ॥ ❀ ❀ न केवलं श्रवणादिभिर्दुरितनिवृत्तिरेव कीर्तनादिभिर्विशुद्धेनात्मना परिपूर्णभक्तियोगं ततो ब्रह्म प्राप्नुवंतीत्याह विचक्षणा इति। यच्चरणोपसादनाद्यच्चरणयोरुपसत्तेः भजनादित्यर्थः। तस्मादंतरात्मनो मनसः उभयतः इहामुत्र च संगं व्युदस्य गतक्लमाः निवृत्तसांसारिकतापत्रयाः ब्रह्मगतिं ब्रह्माख्यां गतिं परमं प्राप्यं विंदंति प्राप्नुवंति हीति प्रसिद्धिं द्योतयति ब्रह्मविदाप्नोति परमिति श्रुतिप्रसिद्धेः तस्मै सुभद्रश्रवसे नमो नम इत्यर्थः ॥ १६ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

सर्वस्मान्नारायणप्रसादसाधनाद्भक्तिपूर्वकं पुनः पुनर्नमनमेव तत्प्रीतिजनकमिति भावेनाह भूय इति। भूयोऽपि परस्मै पुरुषाय नम इत्यन्वयः। यत इष्टावाप्तितत्प्रतिबंधकनिवृत्ती स्यातां स एव वेद्यो दृष्टोऽस्य कथमिति तत्राह। सदिति। सतां नमनादिप्रशस्तकर्मणां पुंसां वृजिनं दुःखकारणपाशं छिनत्ति निर्मूलयतीति सद्वृजिनच्छित्तस्मै। असतामप्रशस्तकर्मणामसुरादीनामसंभवायासत्तापादकाय सुखप्रतिबंधकजननिर्मूलकायेत्यर्थः। एतत्करणसामर्थ्यमस्यास्तीति भावेनाह अखिलेति। अखिलसत्वमूर्तये पूर्णसाधुभावस्वरूपाय निःशेषगुणपूर्णत्वात्सत्त्व इत्येव तं विदुरिति वचनात् साधुभावो गुण इति ज्ञायते अनेन समस्तचराचरलक्षणप्राणिमूर्तय इत्येतन्निरस्तम्। अथाप्यसदिष्टा वाप्तिः कथमवगतेत्यत्राह पुंसामिति। परमहंससंबंधिन्याश्रमे व्यवस्थितानां संन्यासधर्मवतां पुंसामनुमृग्यदाशुषे निजानंदानुभवलक्षणमोक्षदात्रे। दाशृ दान इति धातुः अवधारणावाचिना पुनः शब्देनान्ययोगं निवारयति एतेभ्य एवानुमृग्यं ददाति नान्येभ्य इत्यर्थः ॥ १३ ॥ ❀ ❀ नन्वन्यशब्देन संन्यासीतरज्ञानिविवक्षायां तमेवं विद्वानमृत इतीदमप्रमाणं स्यादज्ञविवक्षायामज्ञानां ज्ञानदो विष्णुरिति चातः केऽत्र विवक्षिता इति मंदाशंकां परिहरिष्यन् भागवतशास्त्रोक्तविरुद्धयोगापेत इति वक्ति नमो नम इति। सात्त्वतसंहितोक्तविधिना विष्णुमर्चयंतः सात्वतस्तेषां सात्वतां ऋषं ज्ञानं भासयति दीपयतीत्यृषभः ज्ञानमुद्दीप्य मुक्तिं ददातीत्यर्थस्तस्मै सत्वं तु शोभनत्वं स्यात्तदुक्ताः सात्वता मता इति वचनात् सात्वताः शोभनत्ववंतः तेषामनुत्पन्नज्ञानानां तद्योगपुण्यवतां ज्ञानं ददातीत्यृषभः तस्मा इति वाऽनेनोक्तं वाक्यद्वयमपि प्रमाणमित्यायातमिति। यः परस्मै पुरुषायेति प्रक्रांतः ते तस्मै यद्वा स्वचित्तस्थं संबोध्यते तुभ्यं नम इति। एवंविधफलदातृत्वेन तत्स्वामीति वाक्यार्थः। भस भर्त्सनदीप्त्योरिति धातोष्टिलोपेन सलोपः शास्त्रकुत्सितो योग ऐक्यध्यानलक्षणः स एषामस्तीति कुयोगिनस्तेषां विदूरे काष्ठपरिपूर्तिरपरिच्छन्नलक्षणा यस्य स तथा तस्मै भगवदधिष्ठितदिङ्मात्रमपि न जानंतीत्यतो वा विदूरकाष्ठायेति। आशास्तु ककुभः काष्ठा इत्यमरः। स्वतस्तृप्तत्वेन स्वप्रयोजनमपेक्ष्य ज्ञानादिदातृत्वमिति भावेनाह निरस्तेति-निरस्तौ साम्यातिशयौ येन तथोक्तं तेन राधसा संसिद्धया स्वधामनि स्वयंप्रकाशे ब्रह्मणि अनवच्छिन्नचिदानंदैकरसे रंस्यते रममाणाय सदातनोऽनुभावोयमिति शतृप्रत्ययः ॥ लोकविलक्षणेयं रतिरिति द्योतयितुं परस्मैपदप्रयोगः प्रतिपदमनुसंधेयमिति नमसां बहुत्वम् ॥ १४ ॥ ❀ ❀ कीर्तनादिना विधूतकल्मषस्य नमस्क्रिया संपद्यत इति भावेनाह यत्कीर्तनमिति। सुभद्रश्रवसे सुमंगलकीर्तये सद्य इत्यनेन भक्तिपूर्वकमिति सूचयति भद्रोप्यस्त्री तु मंगल इति यादवः। ॥ १५ ॥ ❀ ❀ वैराग्येण दृढीभूतया भक्त्या भगवच्चरणनिषेवणं ब्रह्मज्ञानसाधनं भवतीति भावेनाह विचक्षणा इति। यच्चरणोपसादनाद् यच्चरणैकशरणप्राप्तिलक्षणनिषेवणादंतरात्मनोंऽतःकरणस्य। उभयत इहामुत्रविषयेषु संगं स्नेहं व्युदस्य निरस्य ब्रह्मगतिं ब्रह्मज्ञानं तेन मोक्षं च विंदंति ॥ यस्य गुरुरूपस्य हरेश्चरणोपसत्तेरंतरात्मनः क्षेत्रज्ञस्योभयतः संगं स्थूलसूक्ष्मशरीरसंगं व्युदस्यापोह्य ब्रह्मगतिं ब्रह्मस्वरूपं विंदंत्यवगच्छंतीति यन्मतं तद्धेतुवाचिना हि शब्देन निरस्तं यतो भेदः प्रत्यक्षादिप्रमाणसिद्धोऽतोऽनुपपन्न ऐक्यवादः। सुभद्रं श्रवः श्रवणं यस्य स तथा तस्मै ॥ १६ ॥ १७ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

तत्र स्वप्रयोजनं लीलावतारं दर्शयन्नाह भूय इति द्वाभ्याम् । सतां वेदमार्गानुसारिणां देवादीनां दुःखहन्त्रे । असतां तद्बहिर्मुखानां दैत्यादीनामपि असम्भवाय मुक्तिदाय । पुंसां पुनरिति । अत्रानुमृग्यं भक्तियोगैकस्वाद्यं स्वचरणारविन्दमेव ज्ञेयम् । तथा परमहंसानां मुनीनाममलात्मनाम् । भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः ॥ इति प्रथमे, परमहंसमहामुनीनाममन्वेषणीयचरणौ चलयन् सहश्रीः इति तृतीये च निरूपितत्वात् ॥ १३ ॥ ❀ ❀ तत्रान्तरङ्गप्रयोजनमाह । सात्वतां यादवानाम् ऋषभाय तैः सह नानाविहारार्थमवतीर्णाय । तथापि कुयोगिनां तद्बहिर्मुखयोगनिष्ठानां विदूरकाष्ठाय । पुनश्च यथावदवस्थितिमेव दर्शयति निरस्तेति । ब्रह्मणि ब्रह्मस्वरूपे स्वधामनि स्वकीये वैकुण्ठे रंस्यते तत्पश्चात् रममाणाय ॥ १४ ॥ ❀ ❀ न केवलमवतारसमय एव तस्य तादृशत्वं किन्त्वन्यदपीत्याह यत्कीर्त्तनमिति । यच्छब्दावृत्त्यैकवचनेन च सकृत् तत्तन्मात्रमपीत्यभिहितम् ॥ १५ ॥ ❀ ❀ शरणागतिमात्रमपि यस्य सिद्धिकरमित्याह विचक्षणा इति । तथोक्तं श्रीगीतान्ते मन्मना भव इत्यादि सर्व्वधर्म्मान् इत्यादि च ब्रह्मगतिं ब्रह्मस्वरूपा च सा गतिः गम्यो लोकश्च ताम् ॥ १६ ॥ १७ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

कृपामाधुर्य्यमाह । भूयः पुनरपि नमः । सद्वृजिनच्छिदे रामकृष्णाद्यवतारैः स्वभक्तदुःखहन्त्रे । असतां पापिनाम् अभक्तराक्षसासुरादीनामपि स्वकर्त्तृकवधेन असम्भवाय सम्यग् भवदुःखनिवर्त्तकाय । खिलं निकृष्टं प्राकृतं सत्त्वम्, अखिलं प्रकृष्टम् अप्राकृतं सत्त्वं, शुद्धसत्त्वमेव मूर्त्तिः शरीरं यस्य तस्मै । परमहंसानां भावः पारमहंस्यं तस्मिन् विषये य आश्रमः तत्र विशेषतोऽवस्थितानां भक्तिमिश्रज्ञानिनां शुद्धभक्तानाञ्च अनुमृग्यो यो ब्रह्मानन्दः प्रेमानन्दश्च तस्य तस्य दाशुषे दात्रे ॥ १३ ॥ ❀ ❀ ऐश्वर्य्यमाधुर्य्ययोः परिपूर्णत्वमाह । नमो नम इति वीप्सया निरन्तरमेव नम इत्यर्थः । ते तुभ्यम् इति युष्मत्पदप्रयोगेण साक्षात्कारात् स्वेष्टदेवत्वं ध्वनितम् । सात्वतां यादवविशेषाणाम् ऋषभाय देवकीनन्दनाय । सात्वतां भक्तानां पालकायेत्यर्थस्तु पूर्व्वश्लोके व्यञ्जित एव । कुयोगिनां भक्तिहीनानां विदूरा काष्ठा दिगपि यस्य तस्मै । न च त्वं दूरे वा गुप्तो वा वर्त्तसे इत्याह । निरस्तं साम्यमतिशयश्च यस्य यदपेक्षया अन्यस्य साम्यमतिशयश्च नास्ति तेन राधसा ऐश्वर्य्येण स्वधामनि मथुरामण्डले रंस्यते रममाणाय रमणोचितजनैः सहेत्यर्थतो गम्यम् । स्वधामनि कीदृशे ब्रह्मणि ब्रह्मस्वरूपे "तासां मध्ये साक्षात्ब्रह्मगोपालपुरी हि" इति गोपालतापनीश्रुतेः । अत्र राधसेत्यैश्वर्य्यं रंस्यत इति माधुर्य्यम् ॥ १४ ॥ ❀ ❀ तत्प्राप्तिप्रतिबन्धकं कलमषं तत्कीर्त्तनादिभिरेव नश्यतीत्याह यदिति । यदीक्षणं यत्प्रतिमावलोकनम् । सुभद्रं सुमङ्गलं श्रवो यशो यस्येति कीर्त्तिमाधुर्य्यमुक्तम् ॥ १५ ॥ ❀ ❀ वीतकल्मषा ज्ञानिनोऽपि यमेव भजन्तीत्याह विचक्षणा इति । उभयतः इह परत्र च । व्युदस्य निरस्य । अन्तरात्मनः अन्तःकरणस्य गतक्लमा इति अन्ये त्वभजन्तः श्रममेव लभन्ते श्रेयःसृतिं भक्तिमुदस्य इत्यादेः ॥ १६ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

सतां साधूनां वृजिनच्छिदे पापहंत्रे भूयः पुनश्च नमः अखिलं सम्पूर्णं सत्त्वमेव मूर्त्तिर्यस्य तस्मै पारमहंस्ये परमहंसानां मुनीनामाश्रमे व्यवस्थितानाम् अनुमृग्यं लब्धुमिष्टं निजपादपद्मद्वयं तदाशुषे दात्रे ॥ १३ ॥ ❀ ❀ सात्वतां निजोपासकानां ऋषभाय पालकाय कुयोगिनां कुत्सितयोगिनां विदूरा काष्ठा दिग् यस्य तस्मै । निरस्तं साम्यं अतिशयश्च यस्य तेन राधसा तेजसोपलक्षिते स्वधामनि स्वे महिम्नि ब्रह्मणि स्वस्मिन् रंस्यते रममाणाय ॥ १४ ॥ ❀ ❀ अर्हणं पूजनं सुभद्रं सुमंगलं श्रवो यस्य तस्मै ॥ १५ ॥ ❀ ❀ विचक्षणाः विवेकिनः यस्य चरणयोरुपसादनादुपसत्तेरुपासनात् । अन्तरात्मनः मनसः उभयतः इहामुत्र च संगं व्युदस्य निरस्य गतक्लमाः निवृत्तक्लेशाः ब्रह्मगतिं गम्यते इति गतिः ब्रह्मगतिस्तां विंदंति प्राप्नुवंति ॥ १६ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं भगवतो मूलरूपसमष्टिव्यष्टयन्तर्यामिफलरूपाणि पञ्च निरूपितानि सृष्टिस्थितिप्रलयभोगमोक्षार्थम् । इदानीमवतारप्रयोजनसन्देहं वारयन्नमस्यति—भूय इति । अन्तर्यामितया[1] करोत्येव पापादिनाशम् । बहिरपि करोतीति भूयःपदम् । अत्युपकारित्वाद्वा नमस्कारविशेषणम् । भगवतोऽवतारस्य सतां दुःखदूरीकरणमेव प्रयोजनम् । यद्यपि प्रकारान्तरेणाऽपि दुःखदूरीकरणं भवति, तथापि न सर्वात्मना तन्निवृत्तं भवति । सा दुःखसन्ततिर्भगवद्विनिर्गमनमारभ्य पुनः प्रवेशपर्यन्तमुद्धूतानुद्धूतरूपेण तिष्ठति । तां दूरीकर्तुं भगवत्सम्बन्ध एव शक्त इति मध्ये प्रादुर्भूतस्तां छिनत्ति । किञ्च । सतामसम्भवाय पुनरुत्पत्त्यभावाय । परब्रह्मणो देहग्रहणे, आविर्भावे वा नाऽन्यन्निमित्तमस्ति । सन्तो हि भगवद्धर्मसम्बन्धात्सत्त्वं प्राप्ता [2]नतु चिदानन्दत्वम् ।

---

१. अन्तर्यामितयेति क. । २. ननु इति घ. ङ. ।

पुनः सम्भवे सत्त्वसन्देहोऽपि । साधनानि तु सत्त्व एवोपक्षीणानि । अतो भगवान्स्वयमाविर्भूतस्तेषामाविर्भावाभावाय । अतो दुःखच्छेदनमल्पम् । तदीयो भावोऽपि स्वयमङ्गीक्रियत इति । किञ्च । अखिलानि सत्त्वानि सत्त्वगुणभेदा मूर्त्तौ यस्य । सत्त्वगुणः सर्वांशेन । तेन[1] साधनापेक्षायामपि स्वयमेव सर्वसाधनानि करोति । देवान्वा आविर्भावयति । एतदर्थमेव सत्त्वगुणाविर्भाव इति लोकप्रसिद्धिः । [2]अखिलानि सत्त्वानि जीवगणा मूर्त्तौ यस्येति वा । अनेनाऽनन्तजन्मसम्भवेऽपि तत्प्रतिनिधितया सर्वविधसर्वजीवानुत्पादितवान् । अतस्तेषां भगवदवतारेणैव स्वप्रतिनिधितया सर्वावतारान्नैवंविधो[3]ऽन्यो भक्तवत्सल इति भजनीयं रूपमुक्तम् । किञ्च । न केवलं भक्तानामेवोद्धारार्थे भगवानवतीर्णः किन्तु ज्ञानिनामपीत्याह—पुंसामिति । पारमहंस्ये आश्रमे व्यवस्थितानां प्रतिकल्पे संन्यासिरूपेणैव जातानां सनकादीनां ज्ञानेन पदार्थनैकत्र्यं भासमानानां दूरस्थितत्वेऽपि तथाभानरहितानां तदर्थमतिक्लेशं प्राप्नुवताम् । मृग्यं मृग्यमनु क्रममुक्तिसाक्षान्मुक्त्यवान्तरभेदानपि सामीप्यादीनपि दाशुषे दात्रे । अनुमृग्यानां दात्रे । वैदिकपदप्रयोगात्फलानां केवलवैदिकत्वम् । अनुमृग्यं विचार्यं वा । इदानीमपि जन्मकोटिभिर्विचारमेवार्हति । अतस्तेषां क्लेशनिराकरणाय स्वात्मद इत्यर्थः । न हि प्रकारान्तरेण भगवानात्मा लभ्यते । ज्ञानेनाऽप्यात्मत्वेन भासत एव । बालानां हस्ताग्रस्थचन्द्रवत् । **पुनरिति** पुनः पुनः । **पारमहंस्याश्रम** इति प्रत्यङ्निष्ठारूपे आश्रमे । तत्र प्रविष्टा अबहिर्मुखा एव भवन्तीति । हंसास्तु मानसेऽपि रमन्ते । परमहंसास्तु ततोऽप्यन्तरतमे आत्मन्येव । आत्मानात्मसङ्घाते वा आत्मविमर्शनादनुमृग्यत्वम् ॥ १३ ॥ ❀ ❀ एवमवतारसन्देहं वारयन् सर्ववर्णानामावश्यकभजनीयत्वं निरू[4]पितवान् । इदानीं प्रयोजनसन्देहं वारयन्भक्त्यैकलभ्यत्वं सोपपत्तिकमुपपादयन्नमस्यति **नमो नमस्ते**ऽस्त्विति । अत एव भक्त्युद्रेकेण बहुवारं नमस्यंस्तदेव प्रार्थयते । शास्त्रे पूर्णानां भगवद्दर्शने जाते नमस्कार एव कर्त्तव्य इति सदुपशिक्षाविचारेणाऽन्यस्य स्वतोऽकर्त्तव्यत्वात् । "**किमासनं ते गरुडासनाये**" त्यादिवाक्यात् । अतस्तथाभूतानामस्माकं भगवत्साक्षात्कारे तथा नमनमेवाऽस्त्विति प्रार्थनया एतावदेव प्रयोजनमित्युक्तं सर्वैरेव साधनैः । किञ्च । ते तुभ्यमिति प्रत्यक्षतया न तु मह्यमिति तस्मा इति वा । इतः परमधिकं प्रयोजनमुद्देश्यं नास्तीति शास्त्रसङ्ग्रहः । किञ्च । **सात्वतामृषभायेति** सात्प्रत्ययुक्तानाम् । "**तदधीनवचने सातिरि**"ति सातिप्रत्ययो व्याकरणे विहित आत्मसादिति । तत्र साद्युक्ताः सात्वन्तः कदाचिदपि न स्वतन्त्राः किन्तु भगवदधीना एवेति तेषामृषभः । एवम्भावेन भगवत्स्वामित्वमपि प्रयोजनम् । नमनमात्रेणैव स्वतः पर्यवसाने तदधीनत्वलक्षणे अधिके धर्मे सम्पन्ने स्वसेवामपि कारयतीति वन्दनानन्तरं दास्यं प्रयोजनमिति निरूपितम् । ये पुनर्योगादिना तं प्राप्स्याम इति विचारयन्ति ते कुयोगिनः पृथिव्यामेव योगिन इति । न हि भूमावेव स्थिता ब्रह्माण्डात्परतः स्थितं वस्तु प्राप्नुवन्ति । अयं च कुत्सितो योगः कुत्सितं फलं भूमिष्ठं वा प्रयच्छेत् । अत एवाऽणिमादय एव तत्फलत्वेन निरूपिताः । योगस्तु स्वाधीनः । भ[5]गवांश्च न स्वाधीनो योगेश्वरश्च । अतो योगे व्यवसितमतीनां यस्यां दिशि भगवानस्ति सा दिगपि दूरे । साधनान्यपि ततोऽपि दूरे नयन्तीति विशेषेण दूरे काष्ठा यस्येति । अनेन नाऽन्यसाधनसाध्यं प्रयोजनमित्युक्तम् । सकृत्कुयोगित्वेऽप्युत्तरत्र दिव्यादियोगश्चेत्तदा प्राप्नुयादपि । मुहुः कुयोगित्वे आशाऽपि नास्तीत्यर्थः । प्राप्त्याशाभाव एव दूरकाष्ठात्वम् । मुहुःपदेन तेषां साधनाभावः सूचितः । अतो भक्त्यैकलभ्यत्वं साधितमन्वयव्यतिरेकोक्त्या । किञ्च । **निरस्तसाम्येति** । काचिद्भगवतः सिद्धिरस्ति राधस्शब्दवाच्या । न तादृशी सिद्धिः क्वचिदन्यत्र । न वा ततोऽप्यधिका । तया सिद्ध्या भगवान्स्वगृह एव रमते । तच्चाऽक्षरात्मकं ब्रह्म । रंस्यन्निति स्वनिष्ठमेव रसं तत्सम्बन्धादभिव्यक्तं करोतीति । एतावता स्वरूपस्थितिव्यतिरेकेण नाऽन्यत्र रंस्यतीति भगवदीयो रसस्तत्रैव प्राप्तव्यः । गृहं च तस्यैव । तत्साधनं च निरस्तसाम्यातिशया सिद्धिः । अतोऽन्येषां सर्वथा तद्रसप्राप्तिर्दुर्लभा । गृहसेवकस्य तु सुलभेति । स हि स्वगृहे तां नीत्वा रंस्यतीत्यनयोपपत्त्या भक्त्यैकलभ्यत्वम् । स्वधामनीत्यनेन नह्यन्यस्तत्र गन्तुं स्थातुं वा शक्नोतीति सूचितम् । ब्रह्मत्वादहेयत्वम् । निरन्तररसप्रवाहान्न सायुज्यापेक्षा । अतस्तादृशभक्त्यभावे केवलं नमनं कर्त्तव्यमिति तादृशाय नम इत्याह—**रंस्यते नम** इति । एवं ज्ञात्वा नमनमपि प्रयोजनमिति शुकादीनां तावन्मात्रपर्यवसानं सूचितम् ॥ १४ ॥ ❀ ❀ पुनः [illegible] न[6] [illegible] नियमयन्नमस्यति—**यत्कीर्त्तनमिति** । संसारिणां बाह्यषड्विधभक्त्या तत्क्षणं पापक्षय इत्यर्थः । ईक्षणं पादसेवनसाध्यम् । अत्र पापक्षयस्य तारतम्यं निरूपयितुं भिन्नः क्रमो निरूपितः । त[7]त्र कीर्त्तनस्य स्वस्याऽन्येषां च सर्वपापनिवारकत्वाच्छ्रवणापेक्षयाऽपि महत्त्वं निरूपयितुं प्रथमं निरूपणम् । तदनु तस्याऽपि मूलभूतस्य तन्निर्वाहकस्य स्वात्ममात्रनिष्ठत्वेऽप्याध्यात्मिकपापनिराकरणादन्तःकरणशोधकत्वेन स्मरणं निरूपितम् । एवं कीर्त्तनस्मरणाभ्यां प्रेमोद्गमे जाते यद्भगवत ईक्षणं भगवदागमनेन स्वगमनेन वा । सानुभावाधिष्ठानस्य भगवत्प्रतिनिधित्वात्प्रीतेश्चाऽल्पत्वाद्भगवच्चालनाशक्तौ बहिस्तदीक्षणम् । [8]अन्तर्वा भावनया । तद्दर्शनेनाऽऽधिदैविकपापनिवृत्तिः । "**यद्देवानां चक्षुष्यागोऽस्ती**"ति श्रुतौ तत्पापं निरूपितम् । तद्भगवद्दृष्टिविषये तेषां क्रूरा दृष्टिर्निवर्त्तेत

---

१. तेनेति नास्ति ख. घ. ङ. । २. अखिलात्मनि इति घ. ङ. । ३. नैवंविधो भक्तवत्सल इति क. ग. घ. ङ. । ४. निरूपितमिति क. ग. घ. ङ. । ५. भगवांश्चाऽस्वाधीन इति क. ख. भगवांश्च स्वाधीन इति घ. ङ. ६. न किञ्चित्कर्तव्यत्वमिति क. घ. ङ. ७. अत्रेति क. ग. घ. ङ. तत्सर्वमन्तर्वा भावनयेति ख. मन्तभावनयेति ग.

इति तद्दोषनिवृत्तिः । तदनन्तरं यद्वन्दनं तद्भगवदीयापराधलक्षणदोषनिवर्त्तकम् । वस्तुतो हि जीवो भगवत्सेवको भूत्वा बहुकालं तत्सेवामकृत्वा स्थित इति स्वधर्मपरित्यागेनाऽधर्मो भवति । तद्दर्शनानन्तरं वन्दनेनैव निवर्त्तते । ततस्तदनन्तरं भगवदीयानां मुखाद्यद्भगवन्माहात्म्यश्रवणं तत्सर्ववस्तुषु याथात्म्यज्ञापकमिति तदज्ञानकृतं पापं मूलभूतमिति निवर्त्तते । ततो ज्ञाते माहात्म्ये यदनुक्षणं भगवतः अर्हणं पूजनम् । सत्कार इति यावत् । तद्भगवन्मायारूपं तद्व्यामोहनरूपं वा कल्मषं निवर्त्तयति । तदर्हणं हि प्र[1]पत्तिरूपम् । अनन्यत्वाभावात्तत्वेन न व्यपदिष्टम् । अतो भक्तिमार्गानिविष्टानामन्येषामप्येवंप्रकारेण करणात्तत्तत्पापनिवर्त्तकत्वेन सर्वपापनिवृत्तिः फलं भवति । अतो भगवत्कीर्त्तिमूलत्वात्सर्वेषां भगवत्कीर्तिः सुभद्रा भवति । भद्राभद्रयोस्तुल्यत्वादभद्रनाशिका सुभद्रा भवति । प्रथमश्रवणं तु तदानीमन्तः [2]प्रविश्याऽऽलोडनेन भूतेभ्यो देहादिभ्यः पापनिवर्त्तनासमर्थमिति प्रथमं तन्न निर्दिष्टम्, कीर्तनं तु तथात्वान्निर्दिष्टमिति विवेकः ॥ १५ ॥ ❀ ❀ एवं षड्विधभक्तेः षड्विधपापक्षयकर्त्तृत्वमुक्त्वा कीर्त्तेस्तावन्मात्रपर्यवसायित्वे मोक्षपर्यवसानाभावाच्छास्त्रविरोधः प्रसज्येतेति तस्या मुक्तिपर्यवसायित्वं प्रकारान्तरेण वदति—विचक्षणा इति । अचतुराणामेषा षड्विधा भक्तिरुक्ता । एवं षड्विधया चातुर्ये सम्पन्ने पश्चाद्विचक्षणाः सन्तो भगवच्चरणारविन्द एवाऽवसन्ना भवन्ति । न ततः पदार्थान्तरे उपयुक्ता भवन्ति । तदा तत्रैवाऽवसन्ना उभयतः सङ्गान्निवृत्ता भवन्ति । अवसादे हि सङ्गानां शैथिल्यं युक्तमेव । तत्राऽप्यन्तःकरणेन भगवत्यवसादनादन्तःकरणगैवोभयतः सङ्गव्युदासः । तदा पश्चात्कर्षकाणामभावाद्भगवता सह गमनसामर्थ्यं भवति । चरणे ह्युपसन्नाश्चरणेन सह गन्तुं समर्था भवन्ति । अतो ब्रह्मगतिं प्राप्नुवन्ति । ब्रह्मणा सह गतिः । ब्रह्मणि वा गतिः । अक्षरस्य चरणत्वे गृहत्वे वा तदुभयमुपपद्यते । अतो मार्गान्तरेणाऽप्येवं साधनेन पूर्वतुल्यता भवतीति द्वयोरप्येक एवाऽर्थ इति वक्ष्यमाणमुपपन्नं भवति । तस्य हि गतिर्ज्ञानरूपा । अत एव ज्ञानस्य क्रियात्वं धात्वर्थत्वं चोपपद्यते । ज्ञानस्य च क्रियात्वं भगवत्क्रियात्वेन । भगवत इन्द्रियाभावाज्जन्या क्रिया न सम्भवति । नित्या तु क्रिया न प्रसिद्धा । यागानां तु क्रियारूपेण भगवदाविर्भावात्पदार्थान्तरवत्क्रियाऽपि भवति भगवद्रूपम् । "तदेजति तन्नैजती"त्यादि तु विरुद्धसर्वधर्माश्रयत्वेन धर्मरूपेणाऽऽविर्भूतरूपं प्रतिपादयति । तस्मात्सच्चिदानन्दवन्न क्रिया स्वरूपभूता भवति । अतो ज्ञानमेव तेजः स्वभावं गच्छतीव प्रतिभातीति स्मरणेन मनो गच्छतीतिवद्भगवतो ज्ञानमेव क्रियारूपम् । तस्माद्भगवतो गतिं चैतन्यरूपं विन्दन्ति । अलभ्यलाभवत्प्राप्नुवन्ति । "चिति तन्मात्रेण तदात्मकत्वादि"ति प्रकारेण । अत एव मुख्यसिद्धान्ताफलेऽपि भेदः । हि युक्तश्चाऽयमर्थः । यतः कीर्तिर्मुक्तिपर्यवसायिनी । गतक्लमा इति । मार्गान्तरेणाऽपि ज्ञानादिना अक्षरोपासनया वा तदेव स्वरूपं प्राप्नुवन्ति । तथापि "क्लेशोऽधिकतरस्तेषामि"ति [3]वाक्यात्ते क्लेशयुक्ता भवन्ति । कीर्त्तनप्रणालिकया तु ये गच्छन्ति ते गतक्लमा एव गच्छन्तीति साधनान्तराद्वैलक्षण्यम् । अत एव कीर्तिपुरस्सरं तन्नमस्यति । सुभद्रश्रवस इति पूर्ववत् । बाह्यभक्त्याऽप्येवमनुग्रहं करोतीत्यादरेण नमनवीप्सोभयत्र ॥ १६ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

भूय इत्यत्र-इदानीमवतारेत्यादि । एतेन 'कुर्वन् कर्माणी' त्यस्योत्तरमिदमिति ज्ञाप्यते । इति भूयः पदमिति, अस्मिन्पक्षे भूयः सद्वृजिनच्छिदे इति मूलान्वयः । दुःखदूरीकरणमिति, वृजिनपदस्य पापवाचित्वेऽपि दुःखस्य पापजन्यत्वाद्दुःखमूलस्य पापस्य छेदेऽपि दुःखच्छेदनमेव प्रयोजनत्वेनायातीति तथोक्तम् । दुःखोच्छित्तेरेव पुरुषार्थत्वादिति । तदेतत्स्फुटीकुर्वन्ति यद्यपीत्यादि । भगवद्विनिर्गमनमारभ्येति, भगवतः सकाशाद्विभागमारभ्येत्यर्थः । ननु भूयःपदस्य नमस्कारविशेषणत्वपक्षेऽवतारस्य किं गमकमित्याकाङ्क्षायां तत्र कार्यस्यैव गमकत्वमाहुः किञ्चेत्यादि । पुनरुत्पत्त्यभावायेति । सम्भवः पुनरुत्पत्तिः तस्याभावो यस्मादित्यर्थः । देहग्रहण इति इदमावेशस्थलमादायोक्तम् । सत्त्वसन्देह इति । उत्पत्त्युत्तरकालीनस्य तस्य भावविकारत्वेनागन्तुकत्वात्तथेत्यर्थः । अत इति, साधनाभावमाकलय्य । अत इति, तदीय इत्यादिना वक्ष्यमाणाद्धेतोः । ननु साधनानां सत्व एवोपक्षयेऽवतारस्यापि तादर्थ्ये कथं चिदानन्दयोः प्राप्तिरित्यत आहुः किञ्चाखिलेत्यादि । तथा च, सत्त्वगुणादेव प्राप्तिरित्यर्थः । भूयः पदस्यावतारविशेषणत्वपक्षे कथं दुःखं दूरीकरोतीति प्रकाराकाङ्क्षायां सतामसम्भवायेति तादर्थ्यचतुर्थ्यन्तमखिलेत्यादिनान्वेतीत्याशयेन पक्षान्तरमाहुः अखिलानीत्यादि । तद्व्युत्पादयन्ति अनेनेत्यादि । अनेनेत्यस्य नैवंविधेत्यादिनान्वयः । उद्धार्याणां सतां प्रारब्धवशेनानन्तजन्मसम्भवेऽपि मुक्त्यविलम्बार्थं 'तस्य पुत्रादायमुपयन्ति सुहृदः पुण्यकृत्यां द्विषन्तः पापकृत्यामि'ति श्रुत्युक्तन्यायेनोद्धार्ये प्रतिनिधितया सर्वविधोत्पादनादुत्पादितानां भगवदवतारेणैव सम्माननहननाभ्यां स्वप्रतिनिधितया जाते भोगे उद्धार्याणां सर्वप्रारब्धादिभारावतारात्तेषां पुनरनुत्पत्तिप्रकारबोधनादेवं प्रकारेण तादृशं रूपमुक्तमित्यर्थः । ननु तादृशां सनकादितुल्यत्वात् किं मृग्यमित्याकाङ्क्षायामत्र 'पुंसामि'ति साधारणपदात्तेषां स्वरूपं तन्मृग्यञ्च स्फुटीकुर्वन्ति सनकादीत्यादि । ते हि द्विविधाः, पूर्णज्ञानाः अतादृशाश्च । तत्र द्वितीयानां दयापात्रत्वात्तेषां क्रममुक्त्यादिदात्र इत्यर्थः । अनुमृग्यमित्यत्रानुलक्षणे कर्मप्रवचनीयः, तेन द्वितीया । अनुमृग्यानां दात्र इति त्वर्थकथनं "दाशुषे" इतिपदेन सूचितमर्थमाहुर्वैदिकेत्यादि ।

---

१. प्रकृतिरूपमिति क. ख. घ. ङ. २. प्रविश्य लोडनेनेति ख. ३. वाक्यात्क्लेशेनेति ख. युक्त इति क. ग. घ.

नन्वेवं सति साधारणानामेवार्थे भववदवतारो न तु ज्ञानिनां तस्योपयोग इत्यरुच्या पक्षान्तरमाहुः विचार्य वेति। इदानीमिति पूर्णज्ञानोत्तरम्। स्वात्मद इति हंसरूपेण स्वात्मप्रकाशक इत्यर्थः। तदुपपादयाहुः न हीत्यादि, प्रकारान्तरेणेति, अवतीर्थ दानव्यतिरिक्तेन। नन्वेवं सति ज्ञानस्य वैयर्थ्यमेव स्यादित्यत आहुः ज्ञानेनापीत्यादि। तथा च, भानान्न वैयर्थ्यमित्यर्थः। व्यवस्थित-पदसूचितमर्थमाहुः पुनः पुनरिति, अन्यथा व्याख्याने व्यवेति व्यर्थं स्यादित्यर्थः। मानस इति, 'मानसं वै प्राजापत्यं पवित्रमि'ति श्रुत्युक्तेः[1]............ एवञ्च मूलेऽनुमृग्यपदे एकशेषमहिम्नार्थान्तरलाभान्न वृत्तिद्वयविरोध इति बोधितम्। ननु ज्ञाने जाते विचार्यत्वं न युज्यते इत्याकाङ्क्षायां प्रकारान्तरेणाहुः आत्मेत्यादि ॥ १३ ॥ ❀ ❀ नमो नम इत्यत्र इदानीमित्यादि। सन्देहपञ्चकनिवारणोत्तरं नमनपौनःपुन्यफलस्य वास्तविकफलस्य च सन्देहं निवारयन्नित्यर्थः। अत एवेति 'पुरुषः स पर पार्थ भक्त्या लभ्यस्त्वनन्ययेतिवाक्येऽनन्यभक्तिलभ्यत्वकथनादेव। तदेवेति भक्तिमेव, सामान्ये नपुंसकम्। सर्वैरेव साधनैरिति, सर्वसाधनप्रयोजनं भगवत्साक्षात्कारस्तस्मिंश्च जाते इदमेव कर्त्तव्यमिति सर्वेषां तेषामेतावदेव प्रयोजनमित्यर्थः। ननु सामान्यतो नमनापेक्षयात्र नमने को विशेष इत्यपेक्षायामाहुः किञ्चेत्यादि। इदं नमनं न वन्दनमात्रमिति ज्ञापनायाहुः किञ्च सात्त्वतेत्यादि अस्याधीन इति जीवानधीनः। ननु भगवतो व्यापकत्वात् कथं दूरकाष्ठत्वमित्याशङ्कायां तत्स्वरूपमाहुः प्रातीत्यादि। अत इति। विशेषणद्वयोक्त्या एतावतेति पदं इतिसूचितमित्यनेनान्वेति। एतावतेति, उत्तरार्द्धेन। अत इति, गृहसेवकत्वाभावात्। अनयेति, नहि कश्चित्कञ्चित्स्नेहव्यतिरेकेण गृह आनयतीति गृहानयनरूपयेत्यर्थः। अत इति तादृशप्रेम्णा केवलं भगवदेकतन्त्रत्वात् ॥ १४ ॥ ❀ ❀ यत्कीर्तनमित्यत्र। ननु भक्तिमध्ये ईक्षणस्य भक्तिमध्ये गणनाभावेन तत्राप्रवेशात्कथं तस्याः षड्विधत्वमित्यत आहुः ईक्षणमित्यादि। तथा च, पादसेवनसाध्यताघटितस्यैव तस्यात्र विवक्षितत्वात्तेन धर्मेण षड्विधत्वोपपत्तिरित्यर्थः। नन्वत्र बाह्यभक्तिरेव चेद्विवक्षिता स्यात्तदा श्रवणादिक्रमं न जह्यादतो नायमाशय इत्यत अत्रेत्यादि। अत्रेति संसारिकृतेषु। तथा च, प्रयोजनभेदात्क्रम-भेद इति न दोष इत्यर्थः। तर्हि कीर्तनादिक्रमे को हेतुरित्यत आहुः तत्रेत्यादि। तत्रेति पदार्थभेदे विवक्षिते। स्वस्येति। कीर्त्त-यितुः। नन्वसति क्रमे विवक्षिते क्षणमेवात्रोच्यत इत्यत्र किङ्गमकमित्यपेक्षायामीक्षणान्तरे बाधकमनुवदन्तः प्रकृतं साधयन्ति एवमित्यादि। निवृत्तिरित्यन्तम्। अन्तर्भावनयेति सानुभावाधिष्ठानस्यान्तर्भावनया किन्तदित्याकाङ्क्षायामाहुः यदित्यादि। श्रुतिस्तु तैत्तिरीयकारण्येस्ति, 'यदन्नमद्म्यनृतेनदेवादास्यन्नदास्यन्नुत वा करिष्यन्। यद्देवानां चक्षुष्यागोस्ति यदेव किञ्चित् प्रतिजग्राहमग्निर्मातस्मादनृणं कृणोतु' यद्दन्नमसि बहुधा विरूपं वासो हिरण्यमुत गामजामधिं यद्देवानामि'त्यादि। 'यन्मया मनसा वाचा कृतमेनः कदाचन, सर्वस्मात्तस्मान्मेलितमोग्धितँ हित्वेथ, यथातथमि'ति। प्रतिपत्तिरूपमिति अवान्तरविनियोगरूपम्। तत्त्वेनेति। सत्काररूपार्हणत्वेन। अत्राग्रहेणैवं भक्तीनां भेदनिरूपणे मूलस्थं लोकपदं फलकथनञ्च बीजत्वेन बोध्यम्। एवमेतत्फलकथ-नेन यत् सिद्धं तदाहुः अत इत्यादि। मूले यच्छब्दावृत्त्या भगवत्सम्बन्धेनैव तेषां फलजनकत्वबोधनात्सर्वत्र भगवत्कीर्तिरेव तथात्वं पर्यवस्यतीति सा तथेति सिद्धमित्यर्थः। ननु तर्हि प्रायश्चित्तवद्भद्रत्वमस्तु कथं सुभद्रत्वमित्यत आहुः भद्रेत्यादि। 'कर्मणा कर्मनिर्हारो न ह्यात्यन्तिक इष्यते' (६-१-११) इतिवाक्यात्प्रायश्चितानां बुद्धिस्थवासनात्मकपापनाशकत्वाभावेन। अस्यास्तु भद्रे वासनात्मक-तन्नाशकत्वेनाभद्रे चोभयविधतन्नाशकत्वेन समीचीनासमीचीनयोस्तुल्यत्वादियमभद्रस्यात्यन्तनाशिकातस्तथेत्यर्थः ॥ १५ ॥ ❀ ❀ विचक्षणा इत्यत्र षड्विधपापेति। स्वसमानाधिकरणस्वव्यधिकरणाधिभौतिकाध्यात्मिकाधिदैविकभगवदपराधजनकभगवन्माहात्म्य-ज्ञानप्रतिबन्धकमायातत्कार्यान्तरभेदेन षड्विधे पाप इत्यर्थः। उपसादनस्य निकटगतौ ज्ञापने च छान्दोग्यादिषु प्रसिद्धत्वात्, 'षद्लृ' धातोः विशरणगत्यवसादने रूढत्वादत्र मूले चरणोपसादनस्य को वार्थो विवक्षितः ? इत्यपेक्षायां प्रकारविशेषेण सर्वेप्य-पेक्षिता इति बोधयन्तो व्याकुर्वन्ति एवमित्यादि। अवसन्ना भवन्तीति। वैचक्षण्येन चरणनिकटगताः प्रथमं पूर्वावस्थानु-सन्धानेन क्लिष्टा भवन्ति, तस्यैव फलं न तत इत्यादि। तदेति, अनुपयोगदशायाम्। शैथिल्यमिति, विशरणरूपम्। उभयतः सङ्गव्युदास इति, बहिष्ठोन्तरतश्च सङ्गविशरणम्। उपसन्ना इति, निकटे प्राप्ताः। अत इति उक्तप्रकारेण गतिसामर्थ्यलाभात्। समासद्वयस्य तात्पर्यमाहुः अक्षरस्येत्यादि। एतेन 'ब्रह्मैव गतिर्ब्रह्मगतिरि'ति समासे गतिपदवैयर्थ्यं बोधितम्। सिद्धमाहुः अत इत्यादि। नन्वक्षरस्य व्यापकत्वेन गत्यसम्भवात्तेन सह गतिरनुपपन्ना इत्याशङ्कायां तद्गतेः स्वरूपं वदन्तस्तस्य गतिमुपपादयन्ति तस्य हीत्यारभ्य क्रियास्वरूपमित्यन्तेन। गतेर्ज्ञानरूपत्वे गमकमाहुः अत एवेति। अक्षरगतेर्ज्ञानरूपत्वादेव ज्ञानस्य क्रियात्वं गतिकर्मकधात्वर्थत्वं चोपपद्यते। अन्यथा ज्ञानस्य क्रियारूपत्वाभावात्तदर्थकानां जानात्यादीनां धातुत्वमेव न स्यात्, क्रियावाचित्व एव तत्सञ्ज्ञाविधानात्। 'ये गत्यर्थकास्ते ज्ञानार्था' इति च। तथा च, व्याकरणस्मृतिरेव तत्र गमिकेत्यर्थः। ननु क्रियाया यत्नोत्तरभावित्वात्तत्पूर्वभाविनो ज्ञानस्य कथं क्रियात्वं व्याकरणस्मृतेस्तु पारिभाषिकत्वाङ्गीकारेप्युपपत्तेरित्यत आहुः ज्ञानस्य चेत्यादि। तथा च, पारिभाषिकत्वस्यागतिकगतित्वाद्भगवति ज्ञानप्रयत्नादीनां नित्यत्वेन तत्पूर्वोत्तरभावस्य लौकिकत्वेन च तत्रादूषणत्वान्न ज्ञानस्य क्रियात्वाङ्गीकारे कोपि दोष इत्यर्थः। अत्र 'यस्य ज्ञानमयं तपः' इति श्रुतिरपि अनुग्राहिका ज्ञेया। नन्वेव-

1. अन्यसंवादप्रतिफलकेपि नास्ति इयं पङ्क्तिः।

माग्रहे किम्बीजमत आहुः भगवत इत्यादि । तथा चासम्भवोऽप्रसिधिश्च बीजमित्यर्थः । ननु 'यज्ञो वै विष्णुरि'ति श्रुतेरस्त्येव प्रसिद्धिरिति चेत्तत्राहुः यागानां त्वित्यादि । तथा च, सापि प्रसिद्धिराविर्भावोत्तरकाल एव, नत्वनाविर्भाव इति मोक्षाधिकरणे सा न वक्तुं शक्येत्यर्थः । ननु 'तदेजतीत्यादिषु तादृशेऽप्यस्ति प्रसिद्धिरित्यत आहुः तदित्यादि । तथाचेदमपि रूपान्तरप्रतिपादकत्वात्तत्तुल्यमेवेत्यर्थः । सिद्धमाहुः तस्मादित्यादि तस्मादिति । उक्तश्रुत्यादीनामेव चारिताथ्यात् । ननु तथापि विभागपूर्वसंयोगनाशोत्तरसंयोगानां क्रियागमकानामभावात्कथं तथात्वावगतिरित्यत आहुः अत इत्यादि, अत इति । अव्यक्ते सच्चिदानन्दातिरिक्ताभावाद्यथा विषयाद्विषयान्तरं गृह्णन्मनः मनो गच्छतीति प्रतीतिमुत्पादयति, न तु हृदयं विहाय गच्छति, हृदय एव तथाभावात् । गमनेऽमनस्कत्वापत्तेश्च । तथा ज्ञानमिव प्रकाशस्वभावमव्यक्ते ब्रह्मणि तद्रूपेण वर्त्तमानान् विषयान् प्रकाशकत्वेन क्रमाद्व्यश्नुवद् गच्छतीव प्रतिभाति, तेनालोचनात्मकं ज्ञानमेव भगवतः क्रियारूपमित्यर्थः । तथा च, यथाविर्भावदशायां 'प्राणन्नेव प्राणो भवती' त्यादिश्रुत्या तत्तत्कार्यकर्तृत्वात्प्राणादिरूपत्वं ब्रह्मणस्तथाविर्भावपूर्वदशायां ज्ञानात्मकस्य तस्यैव क्रियाकार्यकर्तृत्वात्क्रियारूपत्वमिति भावः । ननु भवत्वेवं ज्ञानरूपस्यैव क्रियात्वं, तथापि प्राप्तिः कथं, नहि तदालोचनं जीवः प्राप्नोति, अभिध्यातृत्वस्य भगवदसाधारणत्वादित्याकाङ्क्षायामाहुः तस्मादित्यादि । भगवतो ज्ञानस्यैव गतिरूपत्वाद् भगवतो ज्ञानं यथा भगवद्रूपेण भगवति वर्तमानसर्ववस्तुप्रकाशकत्वेन धर्मेण गतिरूपम्, तथा सृष्टीच्छावशगो मुख्यजीवोऽपि सृज्यमानसर्ववस्तुप्रकाशकत्वाद्गतिरूपः । गतिं चैतन्यरूपं सृष्टीच्छावशगं मुख्यजीवं विन्दन्ति, सूत्रोक्तरीत्या तदात्मका भवन्ति । तथा च, तदात्मकत्वमेव प्राप्तिरित्यर्थः । एतस्य श्लोकस्यायमेवाशय इत्यत्र गमकमाहुः अत एवेत्यादि । तथा च, मध्यमकक्षात्वादेव "नमो नमस्तेऽस्त्वि'ति श्लोके उत्तमकक्षारूपा भक्तिः दास्येन भगवद्रसं मुख्यं प्रापयति । 'यत्कीर्तनमि'ति श्लोके हीनकक्षारूपा पापनाशं करोति । अत्र श्लोके मध्यमकक्षारूपा ब्रह्मरूपतां सम्पादयति इति फलभेदविवेकः । फलभेद इति स एव गमकः इत्यर्थः । नन्वेवं सति ज्ञानमार्गात् को विशेषः इत्याकाङ्क्षायामाहुः गतक्लमा इत्यादि, वैलक्षण्यमित्यन्तम् । अत एवेति, अस्मादेव विशेषात् । उभयत्रेति, पूर्वश्लोकेऽत्र च ॥ १६ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

ननु तर्ह्यनुपकारित्वादलक्ष्यवर्त्मत्वाच्चानुपास्यत्वं स्यादित्याशङ्क्य तस्य विचित्रफलदातृत्वमनुस्मरन् प्रणमति—भूयः पुनश्च नम इति । स एव सर्वफलदातृत्वात् सर्वथोपास्य इति भूयःपुनश्शब्दाभ्यां सूचयति । सतां धर्मवर्त्तिनां वृजिनच्छिदे दुःखनिहन्त्रे । जन्ममरणादिलक्षणसंसारस्य विद्यमानत्वात् कथं सर्वथा दुःखनिवृत्तिरित्यपेक्षायामाह—सतामसम्भवाय जन्मादिनिवृत्तिहेतवे इत्यर्थः । यद्वा न केवलं सतामेव दुःखनिहन्ता किन्त्वसतां धर्मशीलानामपि दैत्यादीनां वधेन संसारदुःखनिवर्तकः स एव अन्यथा तेषां कथमप्युद्धारो न स्यादित्याह—असतामसम्भवायेति । सर्वोद्धारे हेतुत्वं तस्यैवेति कथमित्यपेक्षायामाह—अखिलं समग्रं विशुद्धं सत्वं मूर्तिर्यस्य तस्मा इति । यद्वा असतामधर्मशीलानामसम्भवाय अनुद्भवहेतवे दुःखप्रदायेत्यर्थः । तर्हि तस्य वैषम्यनैर्घृण्ये स्यातामित्याशङ्क्याह—अखिलसत्त्वमूर्तये इति, अखिलानि सत्त्वानि सर्वे प्राणिनो मूर्तिर्यस्य तस्मा इति । तस्य सर्वात्मकत्वेन द्वितीयस्याभावान्नोक्तदोषाविति भावः । क्षीरनीरविवेचका हंसाः प्रसिद्धाः तत्रापि सत्यानृतात्मानात्मविवेकस्य दुष्करत्वात् तत्कर्तारो ज्ञानयुक्ता भगवद्भक्ताः परमहंसास्तत्सम्बन्धिन्याश्रमे संन्यासाश्रमे व्यवस्थितानां पुंसां यदनुमृग्यमन्वेषणीयं स्वरूपं तस्य दाशुषे दात्रे ॥ १३ ॥ ❀ ❀ एवं विचित्रफलदातृत्वमुक्त्वा भक्तानां सुलभत्वमभक्तानां दुर्लभत्वं च प्रदर्शयन् प्रार्थयते—नमो नमस्तेऽस्त्विति । सात्वतां स्वभक्तानां यादवानां ऋषभाय भक्तवात्सल्यतया श्रेष्ठत्वेनावतीर्णाय श्रीकृष्णाय ते तुभ्यं नमो नमोऽस्तु त्वत्प्रसादेनैव निरन्तरं नमनं भवतु । नमस्कारेऽपि मम सामर्थ्यं त्वत्प्रसादं विना नास्तीति स्वदैन्यं दर्शयन्नान्यैरप्येवमेव विभावनीयमित्यन्यान् भक्तान् शिक्षयति—मुहुः पुनः पुनर्निरन्तरं कुयोगिनां भगवद्भक्तिराहित्येन विषयाविष्टचित्तानां तु विदूरा काष्ठा दिगपि यस्य तस्मै दुर्ज्ञेयायेत्यर्थः । कदाचित् कुयोग्यपि पुनर्भक्तः स्यात्तर्हि तस्यापि सुलभ एवेति मुहुःपदेन सूचितम् । ननु यदि यादवेष्ववतीर्णः कृष्ण एव साक्षाद्भगवांस्तदा बहुभिर्दृष्टः श्रुतः कीर्तितश्च कथं तस्य दुर्ज्ञेयत्वं ? सत्यं, सामान्यतो दर्शनादिविषयत्वेऽपि याथार्थ्यज्ञानाभावाद्दुर्ज्ञेयत्वं सिद्धमेवेत्याशयेनाह—निरस्तेति । निरस्तं साम्यमतिशय आधिक्यं च यस्मात् यदपेक्षयाऽन्यस्य साम्यमतिशयश्च नास्ति तेन राधसा तेजसा ऐश्वर्येण स्वधामनि निजस्वरूपे ब्रह्मणि रंस्यते रममाणाय नमः ॥ १४ ॥ ❀ ❀ तर्हि किं तद्दर्शनादेर्निष्फलत्वमेव तथा सति तदवतारस्यैव वैयर्थ्यं स्यादित्याशङ्क्य तत्त्वज्ञानाभावेऽपि साक्षात्तत्प्रतिमादेर्वा दर्शनादेः फलमनुस्मरन्नमस्यति—यदिति । यस्य कीर्तनादिकं लोकस्य कीर्तनादिकर्तुः पुरुषस्य कल्मषं पापं सद्यो विधुनोति विनाशयति तस्मै नमो नम इत्यन्वयः । तत्र हेतुं सूचयति—सुभद्रं मङ्गलरूपं श्रवो यशो यस्य तस्मा इति । कीर्त्तनस्मरणश्रवणानि लीलाविशिष्टस्येति ज्ञेयम् । ईक्षणं दर्शनम् । अर्हणं पूजनम् ॥ १५ ॥ ❀ ❀ तर्हि तज्ज्ञानं तत्प्राप्तिश्च कथं स्यादित्यपेक्षां पूरयन् प्रणमति—विचक्षणा इति । वैदिकतान्त्रिकपक्षादिकर्मभिः पूर्वोक्तभगवत्कीर्तनादिभिश्च प्रतिबन्धकस्य निरासान्निपुण-

बुद्धयो यस्य चरणोपसादनाच्चरणशरणगमनात् उभयत्र इहामुत्र च अन्तरात्मनोऽन्तःकरणसङ्गं भोगाभिलाषं व्युदस्य त्यक्त्वा अत एव कारणाभावात् गतक्लमाः निवृत्तसांसारिकतापाः सन्तः ब्रह्मगतिं भगवन्तं विन्दन्ति प्राप्नुवन्ति तस्मै सुभद्रश्रवसे नमो नमः । वीप्सा सर्वत्रादरार्था । हिशब्दः 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ ते प्राप्नुवन्ति मामेव' इत्यादावयमर्थः प्रसिद्ध इति सूचनार्थः ॥ १६ ॥

## हिन्दी अनुवाद

हम पुनः बार-बार उनके चरणोंमें नमस्कार करते हैं, जो सत्पुरुषोंका दुःख मिटाकर उन्हें अपने प्रेमका दान करते हैं, दुष्टोंकी सांसारिक बढ़ती रोककर उन्हें मुक्ति देते हैं तथा जो लोग परमहंस-आश्रममें स्थित हैं, उन्हें उनकी भी अभीष्ट वस्तुका दान करते हैं । क्योंकि चर-अचर समस्त प्राणी उन्हींकी मूर्ति हैं इसलिये किसीसे भी उनका पक्षपात नहीं है ॥ १३ ॥ ❀ ❀ जो बड़े ही भक्तवत्सल हैं और हठपूर्वक भक्तिहीन साधन करनेवाले लोग जिनकी छाया भी नहीं छू सकते; जिनके समान भी किसीका ऐश्वर्य नहीं है, फिर उससे अधिक तो हो ही कैसे सकता है तथा ऐसे ऐश्वर्यसे युक्त होकर जो निरन्तर ब्रह्मस्वरूप अपने धाममें विहार करते रहते हैं, उन भगवान् श्रीकृष्णको मैं बार-बार नमस्कार करता हूँ ॥ १४ ॥ ❀ ❀ जिनका कीर्तन, स्मरण, दर्शन, वन्दन, श्रवण और पूजन जीवोंके पापोंको तत्काल नष्ट कर देता है, उन पुण्यकीर्ति भगवान् श्रीकृष्णको बार-बार नमस्कार है ॥ १५ ॥ ❀ ❀ विवेकी पुरुष जिनके चरणकमलोंकी शरण लेकर अपने हृदयसे इस लोक और परलोककी आसक्ति निकाल डालते हैं और बिना किसी परिश्रमके ही ब्रह्मपदको प्राप्त कर लेते हैं, उन मङ्गलमय कीर्तिवाले भगवान् श्रीकृष्णको अनेक बार नमस्कार है ॥ १६ ॥

**तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः ।**
**क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ॥ १७ ॥**
**किरातहूणान्ध्रपुलिन्दपुल्कसा आभीरकङ्का यवनाः खसादयः ।**
**येऽन्ये च पापा यदपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥ १८ ॥**
**स एष आत्माऽऽत्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः ।**
**गतव्यलीकैरजशङ्करादिभिर्वितर्क्यलिङ्गो भगवान् प्रसीदताम् ॥ १९ ॥**
**श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः ।**
**पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतां पतिः ॥ २० ॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

भक्तिशून्यानां सर्वसाधनवैफल्यं दर्शयन्नमति । तपस्विन इति । मनस्विनो योगिनः । सुमंगलाः सदाचाराः यस्मिंस्तप-आद्यर्पणं विना सुभद्रश्रवस इत्यस्यावृत्तिर्यशः श्रवणादेः प्राधान्यज्ञापनाय ॥ १७ ॥ ❀ ❀ भक्तेः परमशुद्धिहेतुत्वं दर्शयन्नाह । किरातादयो ये पापजातयः अन्ये च ये कर्मतः पापरूपास्ते यदुपाश्रया भागवतास्तदाश्रयाः संतः शुद्ध्यंति । असंभावनाशंकां परिहरति । प्रभविष्णवे प्रभवनशीलायेति ॥ १८ ॥ ❀ ❀ सर्वोपास्यत्वमनुसरन्प्रार्थयते । स एष आत्मवतां धीराणामात्मा आत्मत्वेनोपास्य इत्यर्थः । त्रयीमयत्वादिविशेषणैस्तत्तन्मार्गेणोपास्यत्वं विवक्षितम् । गतव्यलीकैर्निष्कपटैर्भक्तैर्वितर्क्यमत्याश्रयेण वीक्षणीयं लिंगं मूर्तिर्यस्य सः प्रसीदतु ॥ १९ ॥ ❀ ❀ सर्वपालकत्वमनुसरन्नाह । श्रिय इति । गतिश्च सर्वापत्सु रक्षकः ॥ २० ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

किं बहुना भक्तिं विना महात्मनोपि विफलसाधना विगीता एव भवंतीत्याह । तपस्विनो ज्ञानिनः दानपराः कर्मिणः यशस्विनः कर्मिविशेषा अश्वमेधादिकर्त्तारः मंत्रविदः आगमीयाः ॥ १७ ॥ ❀ ❀ शुध्यंति निष्पापा भवंति न तु वस्तुतस्तज्जातित्यागो भवति यत्तु वैष्णवे जातिबुद्धिरिति विष्णुधर्मोक्तिः सा हि तस्यादराधिक्यमतिरस्कार्यत्वं वक्ति अन्यथा नारदविदुरादौ विप्र-

---

१. प्रा० पा०—व्यतर्क्य ।

क्षत्तरित्यादिसंबुद्धिश्रवणाद्व्यासमैत्रेयादीनामपि पातकित्वं स्यादिति । किरातायुत्पत्तिस्तु मन्वादिभ्योऽवसेया विस्तरभियात्र नोक्ता । यद्वा किरातादयो विजयध्वजेनोक्ता ग्राह्याः शबरात्पराशर्व्यां जाताः किराताः आंध्रकाः । वैदेहात्पुष्कसीजाताः हूणाः । वैश्यादूत्राह्मणीजातो वैदेहस्तत्पुत्राश्चान्ध्राः । अज्ञातविप्रादिभवा मधुपायिनः । ततः किरातीजाताः पुलिंदाः । निषादाच्छूद्राजातः पुल्कसः । ब्राह्मणाद्वैश्याजातोंबष्ठः । ब्राह्मणादंबष्ठ्यां जाता आभीराः । कंका अपि नीचजातय एव यवनान्नृपाद्वैश्यां जाता यवनाः श्मश्रुलाः । एवं खसादयः । आदिना कुरुविंदडोंबादयः । इति तीर्थः । असंभावना शंका कथं ते शुध्यंति विना तपश्चर्यादिनेत्येवंरूपा शंका ताम् प्रभविष्णवे कर्तुमकर्तुमन्यथाकर्तुं समर्थायेत्यर्थः ॥ १८ ॥ ❀ ❀ इत्यर्थ इति । आत्मैव भगवान्हरिर्न तु भिन्न इत्येवमुपास्य इति भावः । निष्कपटैर्मोक्षपर्यंतकामनाशून्यैः परमभक्तैः ॥ १९ ॥ ❀ ❀ तदेवं निजोपास्यविशेषं रहस्यत्वेनाभिव्यज्य परमप्रेमावेशेनैव व्यंजयन्नाह । श्रियः सर्वसंपदाधिष्ठात्र्याः पतिः स्वामी । अतो यज्ञानां सर्वश्रेयःसाधनानां च पतिः फलदाताऽतः प्रजानां सर्वासामेव पतिरीश्वरः । यतो धियां पतिस्तासामंतर्यामी च ततस्तत्श्च तासां ये लोकाभोग्यभुवनानि तेषामपि पतिर्भोक्ता च य एव च धरापतिः कृपयावतीर्य धरापतित्वं लीलां च व्यजितवानित्यर्थः । कोसावित्यपेक्षायामाह । पतिः पालको गतिर्नित्याश्रयश्च तत्र प्रमाणमाह । सतां तदनुभविनां पतिराश्रय इति । वस्तुतस्तु लोकपतिरित्युक्तेरेव सर्वपतित्वमायाति सर्वस्य श्र्यादेर्लोकांतःपातित्वात्तदपि पार्थक्येन पतित्ववर्णनं प्रेमावेशादेव हेत्वंतरानुपलब्धेरिति ध्येयम् ॥ २० ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

किरातेति । शबरात् पर्णशबरीजाताः किराताः आटविकाः । वैदेहकात् पुल्कसीजाताः हूणाः वैश्यात् ब्राह्मणीजातो वैदेहकः । वैदेहकपुत्रा आन्ध्राः पुतिस्वाः अज्ञातविप्रादिभाषाः मधुपायिनः । निष्ठ्यात् किरातीजाताः पुलिन्दाः व्यभिचाराज्ञातश्चेरस्तस्माज्जाता वा । शूद्रात् ब्राह्मणीजातश्चाण्डालस्तस्माज्जाताः पुल्कसाः । ब्राह्मणाद्वैश्यायां जातोऽम्बष्ठः ब्राह्मणात् तस्यामम्बष्ठस्य कन्यायां जाता आभीराः । कङ्काः कर्पराः । नृपाद् वैश्यायां जाता यवनाः श्मश्रुलाः । शंकास्तुरुष्कविशेषाः । ढोम्बुकुरुविन्दपूतिस्वपूर्वा आदिशब्दगृहीताः । तथा चानुक्तैः सह चतुःषष्टिजातयः । तथा चोक्तम्—

ब्राह्मणस्य त्रयः पुत्रा वर्णास्त्रिष्वनुलोमजाः । शूद्रस्य च त्रयः पुत्रास्तेष्वेव प्रतिलोमजाः ॥
त्रयस्त्रय क्षत्रविशो प्रतिलोमानुलोमजाः । एते द्वादश वर्णानां पुत्रा एकैकशस्तु ते ॥
चातुर्वर्ण्ये प्रसूयन्ते चतुरश्चतुरः सुतान् । ते चत्वारिंशदष्टौ च पूर्वैर्द्वादशभिः सह ॥
ब्राह्मणाद्यैश्चतुर्भिश्च चतुःषष्टिर्हि जातयः । ते सर्व्वे दस्यवो दोषैश्चौर्य्याद्यैः सद्बहिष्कृताः ॥

इति जातिविवेकाभिधाने । इति विजयध्वजः ॥ १८-२३ ॥

## श्रीमद्वीरराघवव्याख्या

भक्तिशून्यानां सर्वाण्यपि साधनानि निष्फलानीत्याह-तपस्विन इति । तपस्विनः कृच्छ्रचान्द्रायणादितपोनिष्ठाः मनस्विनः मनआदीन्द्रियनिग्रहपराः मंत्रविदः मंत्रजापपराः सुमंगलाः सदाचारपराः एते सर्व्वे तपआदिर्यदर्पणं यस्मिन् भगवति समर्पणं यदुपासनांगत्वेनानुष्ठानं विनेति यावत् क्षेमं तत्तप आदेः परमं फलं न विंदंति न लभन्ते यद्यपि यत्किंचिद् दुरतिनिवृत्त्यादिरूपं फलमाप्नुवंति तथापि नाक्षय्यं फलमाप्नुवन्ति भक्तियोगांगत्वेन तप आदिकुर्वाणास्तु निरतिशयं फलं प्राप्नुवंतीत्यभिप्रायः ॥ १७ ॥ ❀ ❀ किं वक्तव्यं भागवता आत्मानं विशोध्य ब्रह्म प्राप्नुवंतीति भागवताश्रिता हीनजातीया अपि प्राप्नुवंतीत्याह किरातेति । किरातादयो हीनजातयः अन्ये च ये पापाः पापजातयः यदुपाश्रयाश्रयाः यं परमपुरुषमुपाश्रिता यदुपाश्रया भागवतास्तदाश्रया भागवताश्रिताः शुद्ध्यंति असंभावनाशंकां परिहरति प्रभविष्णवे प्रभवनशीलाय पूर्वोक्ततप आदीनां फलप्रदायेत्यर्थः । अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति भगवद्वचनात्सर्वकर्मफलप्रदत्वेन सर्वसाधनानां तत्समर्पणमेव युक्तमिति भावः ॥ १८ ॥ ❀ ❀ एतदेवोपपादयति स इति । स प्रसिद्ध एषः आत्मा परमात्मा आत्मवतां केवलयोगनिष्ठानामधीश्वरः योगफलप्रदः त्रयीमयः पूर्वभागोक्तकर्माराध्यस्तत्फलप्रद इत्यर्थः । धर्ममयः स्मार्तदानादिधर्माराध्यः तत्फलद इत्यर्थः । तपोमय उपनिषद्भागोक्तोपासनात्मकज्ञानमयः तद्ज्ञानप्राचुर्यवेद्यस्तत्फलद इत्यर्थः । तत्तद्देवतानां तत्तत्फलदातृत्वश्रवणात्कथं तस्यैव सर्वकर्माराध्यत्वमित्यत आह गतव्यलीकैर्गतदोषैरजशंकरादिभिर्ब्रह्मरुद्रादिभिर्वितर्क्यलिंगः निश्चेतुमशक्यं लिंगं लक्षणं चिह्नं यस्य सः । ब्रह्मादयोऽपि यदिदं लक्षणं वितर्कयंति तथाभूतः तेषामप्यंतरात्मत्वेन उपास्य एव तत् तद्ब्रह्मादिरूपेण फल इति हृदयं एवंविधभगवत्प्रसादं स्वस्य प्रार्थयति भगवानिति अनेन देवताविशेषश्च विवक्षितः ॥ १९ ॥ ❀ ❀ सर्वपालकत्वं प्रभोः स्मरन्नाह श्रिय इति । श्रियः लक्ष्म्याः पतिर्भर्त्तेत्यर्थः । यज्ञपतिः

वैदिककर्ममर्यादापालकः प्रजापतिराब्रह्मस्तंबपर्यंतप्रजापालकः । धियां ध्यानानां उपासनानां पतिस्तन्मर्यादापालकः यज्ञपतिर्धियां पतिरिति भागद्वयाभिप्रायेणोक्तम् । लोकपतिः समस्तभुवनानां तदंतर्गतानां च पालकाभिप्रायेण लोकपतिः प्रजापतिरिति चोक्तम् । धरापतिः भूर्लोकपालकः धरायाः लोकांतर्गतत्वेऽप्यधर्मबाहुल्यात्पृथगुक्तिः रामकृष्णादिरूपेण भूर्लोकेऽवतीर्य दुष्कृतविनाशं कुर्वन्विशेषेण मर्यादापालक इत्यर्थः । अवतारप्रयोजनमाह पतिरिति । अंधकादयो यादवप्रभेदाः तेषामक्रूरोद्धवादीनां पतिर्गतिश्च पालकः प्राप्यश्च पतिर्गतिश्चेत्युभयोपादानेन साधुपरित्राणमेवावतारकृत्यं दुष्कृतविनाशनं त्वानुषंगिकमिति व्यंजितं न केवलं स्वकुलीनानामेव सतां पतिः किं त्वन्येषामपि सतामित्याह सतां पतिः । गतिश्चेत्यनुषज्जते एवंविधो भगवान्मे मह्यं प्रसीदतु ॥ २० ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

सज्जनसेवाया अप्येतादृशमाहात्म्यं किमुत भगवत्सेवाया इति भावेन तन्महिमा । विशिष्टं नमति किरातेति । किरातादयो येऽन्ये पापास्ते सर्वे यदपाश्रयाश्रयाच्छुध्यन्तीत्यन्वयः । यस्मादन्य आश्रयो नास्ति येषां ते यदपाश्रया विप्रादयस्तेषामाश्रयात्सेवालक्षणात् शुध्यंति विपापा भवंतीत्यर्थः । शबरात्पर्णशबरीजाताः किराताः । आटविकाः वैदेहात्पुल्कसीजाता हूणाः । वैश्याद् ब्राह्मणीजातो वैदेहकः वैदेहकपुत्रा आंध्रा पुलिंं वा अज्ञातविप्रादिभाषा मधुपायिनः । निषादात्किरातीजाताः पुलिंदाः व्यभिचाराज्जातश्चौरस्तस्माज्जाता वा । शूद्राद् ब्राह्मणीजातश्चांडालस्तस्माज्जाताः पुल्कसाः ब्राह्मणाद्वैश्यायां जातोंऽबष्ठः ब्राह्मणात्तस्यां बष्ठस्य कन्यायां जाता आभीराः कंकाः कर्पराः नृपाद्वैश्यायां जाता यवनाः श्मश्रुलाः शकास्तुरुष्कविशेषाः ढोम्बुकुरुविदपूलिंबपूर्वा आदिशब्दगृहीताः तथा चानुक्तैः सह चतुःषष्टिजातयस्तथा चोक्तम् ।

> ब्राह्मणस्य त्रय पुत्रा वर्णास्त्रिष्वनुलोमजाः । शूद्रस्य च त्रयः पुत्रास्तेष्वेवप्रतिलोमजाः ॥
> त्रयस्त्रयः क्षत्रविशोः प्रतिलोमानुलोमजाः । एते द्वादशवर्णानां पुत्रा एकैकशस्तु ते ॥
> चातुर्वर्ण्ये प्रसूयंते चतुरश्चतुरः सुतान् । ते चत्वारिंशदष्टौ च पूर्वैर्द्वादशभिः सह ॥
> ब्राह्मणाद्यैश्चतुर्भिश्च चतुःषष्टिर्हि जातयः । ते सर्वे दस्यवो दोषैश्चौर्याद्यैः सद्बहिष्कृताः ॥

इति जातिविवेकाभिधाने अन्ये पापा ब्रह्महत्यादिकर्तार तस्मै प्रभविष्णवे प्रभवनशीलाय नम इत्यन्वयः ॥ १८ ॥ ❀ ❀ य एवंविधमहिमत्वेन प्रसिद्धः स एष आत्मा परमात्मा भगवान्प्रसीदतामित्यन्वयः किंविशिष्टः । आत्मवतां भक्त्याऽपरोक्षीकृतपरमात्मतत्वानां मुक्तानां प्रशंसायां मतुबिति प्रशस्तमनसां ज्ञानिनां वाऽधीश्वरः वेदधर्मतपोनुसारिणां पुंसां वशगत्वात् । त्रयीमयो धर्ममयस्तपोमय इत्यनेन भक्तवात्सल्यं दर्शितं तदुक्तं वेदानुसारिवशगः स्वेच्छयेति । तत्र प्रमाणमाह गतेति । व्यलीकं त्वप्रियेऽनृत इत्यभिधानाद् गतव्यलीकैरजशंकरादिभिर्ब्रह्मशिवादिभिर्वितर्क्यं विशेषेणानुमेयं लिंगं जगज्जन्मादिलक्षणं यस्य स तथोक्तः ॥ १९ ॥ ❀ ❀ चित्तीकृततत्तदभीष्टसिद्धये तत्तद्गुणविशिष्टस्य हरेः प्रसादं प्रार्थयते श्रियः पतिरिति । श्रीधरयोः पतित्वकथनेन सर्वाधिपत्यं सिद्धेऽपि तदवांतरदेवतानामाधिपत्यं निवारयति वेदादिवाङ्मात्राभिमानित्वेन श्रीप्रसादोऽपि प्रार्थनीय इत्यभिप्रायेण श्रियः पतिरितीतरविशेषणान्येवमनुसंधेयानीति बहुजनाश्रयत्वेन क्षमागुणनिधित्वेन स्थिरायाः धरायाः पतिः । मन आदींन्द्रियव्यापारसाध्यस्य देहांतरभोग्यफलस्य यज्ञकर्मणः फलदातृत्वेन तत्फलपालकः फलपालने किमर्थमित्यत आह प्रजापतिरिति । कर्मण्यधिकृतस्य जनस्य जीवनहेतुत्वेन पतिः प्रजा तु जनपुत्रयोरिति प्रजापतिशब्दवाच्यत्वं मुख्यमस्येति वा प्रवृत्तेर्ज्ञानपूर्वकत्वेन संभवात्तदर्थं धियां पतिरिति लोकपतिरित्यनेन पुरंदरादीनां तत्पतित्वं निवारयति पतिर्गतिश्चेत्यादीना भक्तवात्सल्यातिशयत्वं दर्शयति निरपेक्षत्वेन सतां स्वामित्वापेक्षा नास्तीति शंकां निवारयति सतां पतिः ॥ २० ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

भक्ताश्रितानां पापजीवानामपि परमशुद्धौ हेतुत्वं दर्शयन्नाह किरातेति । अत्र यदपाश्रयाश्रयत्वं व्यवहारेच्छयैव । परमार्थेच्छुत्वे तु पूर्व्वेषामपि भगवदपाश्रयाणां तत्पूर्व्वं भक्तान्तराश्रयत्वं विद्यत एवेति न विशेषः स्यात् ॥ १८ ॥ ❀ ❀ प्रत्यक्षवत् स्फुरणात् स एष इत्युक्तम् । त्रयीमयः कर्म्मकाण्डोपास्यः । धर्म्ममयः मन्वादिधर्म्मशास्त्रोपास्यः । तपोमयः उपासनाकाण्डोपास्यः । गतव्यलीकैः प्रोज्झितकैतवैः मोक्षपर्यन्तकामनाशून्यैः परमभक्तैः ॥ १९ ॥ ❀ ❀ तदेवं निजोपास्यविशेषं रहस्यत्वेनाभिव्यज्य परमप्रेमावेशेनैव प्रकटं व्यञ्जयन्नाह । श्रियः सर्व्वसम्पदधिष्ठात्र्याः पतिः स्वामी । अतः यज्ञानां सर्व्वश्रेयःसाधनानां च पतिः फलदाता । अतः प्रजानां सर्व्वासामेव पतिरीश्वरः । यतो धियां पतिः तासामन्तर्यामी च ततस्तत्श्च तासां ये लोका भोग्यभुवनानि तेषामपि पतिर्भोक्ता । य एव च धरापतिः कृपयाऽवतीर्य्य धरापतित्वलीलाञ्च व्यञ्जितवानित्यर्थः । कोऽसौ इत्यपेक्षायामाह पतिरिति । पतिः पालकः गतिः नित्याश्रयश्च । तत्र प्रमाणमाह । सतां तदनुभविनां पति आश्रय इति ॥ २० ॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

किं बहुना भक्तिं विना महात्मानोऽपि विफलसाधना विगीता एव भवन्तीत्याह। तपस्विनः ज्ञानिनः। दानपराः कर्म्मिणः। यशस्विनः कर्म्मिविशेषाः अश्वमेधादिकर्त्तारः। मनस्विनः योगिनः। मन्त्रविदः आगमीयाः। सुमङ्गलाः सदाचाराः। सुभद्रश्रवसे इति। अस्यावृत्तिर्यशः श्रवणादेः प्राधान्यज्ञापनाय ॥ १७ ॥ ❀ ❀ भक्तिगन्धेनापि केवलेन युक्ताश्चेत् पापात्मानो विगीता अपि कृतार्था भवन्तीत्याह। किरातादयो ये जातित एव पापाः अन्ये च ये कर्म्मत एव पापाः ते च शुध्यन्ति। यदपाश्रया वैष्णवा एव गुरुत्वेनाश्रयाः येषां ते तथाभूताः सन्तः इति। सद्गुरुचरणाश्रयमात्रेणैव जातिकर्मभ्यां सकाशात् पापिनः शुध्यन्तीति प्रारब्धा प्रारब्धपापनाशकत्वं भक्तेर्व्यञ्जितम्। तथाहि किरातादीनामशुद्धौ दुर्जातिरेव कारणम्। दुर्जात्यारम्भकं यत् पापं तत्प्रारब्धमेव। शुध्यन्तीति शुद्धचन्यथानुपपत्त्या दुर्जातित्वस्य नाशान्यथाऽनुपपत्त्या च प्रारब्धपापनाशोऽवगम्यत एव। तथापि ते तज्जातित्वेन यदाख्यायन्ते तत् व्यवहारत एव, न तु तद् परमार्थत इति ज्ञेयम्। अर्च्चे विष्णौ शिलाधीगुरुषु नरमतिर्वैष्णवे जातिबुद्धिः इति तेषु जातिबुद्धेर्निषेधात्। तथाऽत्र तादृशदुर्जातयोऽपि भक्तिमुपदेष्टव्या इति विधिश्च प्राप्तः। वक्ष्यते चैकादशे— स्त्रियः शूद्रादयश्चापि तेऽनुकम्प्या भवादृशाम्। इत्यत्रादिपदेन दुर्जातय एव लभ्यन्ते। अत्रासम्भावनादिसर्व्वाक्षेपपरिहारार्थमाह प्रभविष्णवे इति। एषाप्येका भगवतः प्रभुता स्वाभाविकी नात्र युक्तिर्योजनीयेति भावः ॥ १८ ॥ ❀ ❀ एवं श्लोकद्वयेन व्यतिरेकान्वयाभ्यां भक्तिमतामेव सर्व्वोत्कर्षमभिव्यज्य परेषामप्ययमेव प्रतिस्वार्थसिद्धये उपास्य इत्याह। स प्रसिद्धः एषः अधीश्वरः आत्मवतां ज्ञानिनां योगिनाञ्च आत्मा आत्मत्वेनोपास्यः। त्रयीमयत्वादिविशेषणैस्तत्तन्मार्गेणैवोपास्यत्वम्। न च कैरप्येष ज्ञातुं शक्य इत्याह। गतव्यलीकैः निष्कपटैः वितर्क्यमेव न तु निश्चयेन ज्ञातुं शक्यं लिङ्गं लक्षणमपि किमुत लिङ्गम्यं स्वरूपं यस्य सः। सकपटानामात्मवादिनां का वार्त्तेति भावः ॥ १९ ॥ ❀ ❀ सर्व्वपालकत्वमाह श्रिय इति। तत्रापि विशेषमाह पतिः गतिश्च प्राप्यश्च अप्रकटप्रकाशे सः यादवरूपत्वेनेत्यर्थः ॥ २० ॥

## श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः

तपःस्विनः कृच्छ्रादितपोनिष्ठाः दानपरयज्ञादिमिषेण सर्वस्वत्यागिनः यशस्विनः यशोऽर्थे शुभकारिणः मनस्विनः निर्जित-करणाः मंत्रविदः मंत्रार्थज्ञानपूर्वकतज्जपपराः सुमंगलाः सदाचारपराः। यद्यस्मिन् तप आद्यर्पणं विना क्षेमं तप आदेः फलं न विंदंति न प्राप्नुवंति ॥ १७ ॥ ❀ ❀ यस्योपाश्रयाः भागवतास्तदाश्रयाः सन्तः किरातादयो ये पापाः पापजातयः अन्ये च ये कर्मतः पापास्ते शुद्ध्यंति तस्मै प्रभविष्णवे प्रभवनशीलाय नमः ॥ १८ ॥ ❀ ❀ स एष अधीश्वरः एष सर्वेश्वरः प्रधानक्षेत्रज्ञपतिर्गुणेशः इत्यादिश्रुतिप्रसिद्धः भगवान् प्रसीदताम्। कथंभूतः गतव्यलीकैर्गतदोषैः ब्रह्मशिवादिभिः वितर्क्यं उपासनार्थं लिंगं चिन्हं यस्य सः। एतदग्रे स्फुटीभविष्यति पुनः कथंभूतः त्रयीमयः तपोमयश्च केवलाश्रमधर्माराध्यः तत्तदाश्रमधर्मफलद इत्यर्थः। तत्र त्रयीमय इत्यनेन त्रयीप्रोक्ताग्निहोत्रादिगृहस्थधर्मेण धर्ममय इत्यनेन ब्रह्मचारिधर्मेण तपोमय इत्यनेनाश्रमद्वयधर्मस्य तपःप्रधानत्वात्तेन च आराध्यः तेषु ये ज्ञानभक्तिसम्पन्नास्तान् प्रति विशेषमाह-आत्मात्मवतामिति आत्मा। श्रीभगवानुपास्यतया विद्यते येषां तेषां महताम् आत्मा आश्रयः ॥ १९ ॥ ❀ ❀ पतिः पालकः गतिः सर्वापत्सु रक्षकः ॥ २० ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं ज्ञानभक्तिमार्गौ सम्यगुपपाद्य कर्ममार्गेऽपि भजनावश्यकतां वदन् तेषां स्वरूपसन्देहं वारयति—तपस्विन इति। यशस्विनः कूपारामादिकर्त्तारः। मन्त्रविदो मन्त्रोपासकाः। याज्ञिका वा। सुमङ्गलाः सदाचाराः। एते हि कर्ममार्गे षड्विधा उक्ताः। तपो हि सन्तापात्मकम्। तत्तु पाकवत्साधनपर्यवसायि न सुखं प्रयच्छति। न हि देहेन्द्रियाणि क्लिष्टानि सुखं प्रयच्छन्ति। विहितत्वात्फलदानेऽपि दातुः सम्बन्धाभावात्। आज्ञामात्रेण तथाकरणेऽपि स्वात्मसमर्पकत्वेनैव तद्बोधनाभिप्रायात्। अदृष्टद्वारा फलजनने मानाभावात्। "कर्षयन्तः शरीरस्थं भूतग्राममि"ति बाधश्रवणाच्च। "मत्त एव पृथग्विधा" इति हेतुव्यपदेशात्परम्पराकल्पनायां मानाभावाद्भगवत्क्रीडौपयिकतां सम्पादयद्देहं भगवद्योग्यं करोति। यत्तु भगवान्सर्वात्मकः क्लेशं दृष्ट्वा फलं प्रयच्छति। अन्यक्लेशनिवृत्त्यर्थं वा। तन्न क्षेमात्मकम्। न हि भगवता दत्तं स्पर्धासूयादिसहितं भवितुमर्हति। एवं बहूनां भागिनां स्वयमन्येभ्यः प्रयच्छञ्छोषणेन वस्तुशोधनवदवशिष्टानि शोधयति। दत्तद्रव्यस्य तु नानाविनियोगसम्भवान्न फलसाधकत्वं निश्चितम्। अतो भगवत्कर्त्तव्ये तत्पोषणक्रियायाः पर्यवसानात्तदसमर्पणे स्वातन्त्र्ये चौर्यापत्तेः सुतरां न क्षेमप्राप्तिः। कूपारामादिष्वपि विश्रामजनकत्वेन भगवच्चिकीर्षितकरणाद्दानवदेव तस्य निर्णयः। मनस्विनस्तु योगिन एव। ते कुयोगिविचारेणैव विचारिताः। सर्वेषामेव निरोधने तत्तदधिष्ठातृदेवद्रोहो भवत्येव। भगवत्समर्पणे तु तद्वचनेन तदुक्तमेव कृतमिति न कोऽपि दोषः सम्भवति।

१. क्रीडौपयिकतामिति ख. ङ.। २. नानाविधयोगेति क. घ. ङ. नानाविषयोगेति ख.। ३. भगवत्कर्त्तव्ये तत्पोषणेत्यादि क. ङ.। ४. भगवत्कर्तव्यतत्पोषणेत्यादि ख. भगवत्कर्तव्यतच्छोषणेत्यादि घ.।

धर्ममार्गेऽपि "धर्मः क्षरति कीर्तनादि" त्यादिना नाशसम्भवात्समर्पणं युक्तम् । लोकेऽपि महाराजसमर्पणादौ भोगो वा कालनाशो वा सम्भवति । तत्र भगवदीयानां कालनाशाभावाद्भगवद्योगे पुनस्तदीयत्वं वा प्रसादो वा भविष्यतीति पूर्ववदेव ज्ञानमार्गे भक्तिमार्गे वा प्रवेशो भविष्यतीति **सुभद्रश्रवस** इत्युक्तम् । मार्गत्रयस्था अपि भगवदीया इति भगवत्कीर्त्तिः । अन्येषां तु तत्र प्रवेशाभावादादरेण वीप्सया नमनम् ॥ १७ ॥ ❀ ❀ एवं साक्षाद्भगवत्सम्बन्धिनां भगवत्प्रवेशप्रकारमुक्त्वा साक्षात्सम्बन्धरहितानामपि तत्प्रवेशने प्रकारमाह तृतीयगतिव्यावृत्त्यर्थम् । तद्वक्ष्यति भगवान् "उदासीनोऽरिवद्वर्ज्य" [1]इति । तद्भगवदाश्रिता भगवदीयाश्रिता वा एकत्र । अन्ये द्वितीयकोटाविति निर्धारो भवति । तत आह—**किरातेति** । किरातादयस्तत्तद्देशगिरिवासिनोऽन्त्यजा जातितः कार्यतश्च दुष्टाः भक्तसमाश्रयणमात्रेण शुद्धा भवन्ति । भक्ता इव भगवत्सेवायोग्या भवन्ति । अन्येऽपि पापाः प्रायश्चित्तानधिकृता अपि । एते[2] नवविधा गणिताः । अष्टदिङ्मध्यविवक्षया भक्तद्वाराऽपि माहात्म्यात्प्रभविष्णुत्वम् । "**अपपरीवर्जन**" इति ज्ञापनादपोपसर्गोऽतिशयार्थेऽपि वर्तते । व्याप्त्यर्थे वा । परित इत्यर्थे वा । तेन विश्वाधारत्वेन दुष्टानामपि दैत्यादीनां तदाश्रयत्वं निवारितम् ॥ १८ ॥ ❀ ❀ एवं स्वरूपतः प्रमाणतश्च सर्वसन्देहवारणं कृत्वा फलतः साधनतश्च तस्य माहात्म्यमाह—**स एष इति** । तत्र प्रथमं साधननिर्धारमाह—**प्रसीदतामिति** । साधनं भगवत्प्रसाद एव । फलं स एव । उभयोरेष विनिश्चयः । तदाह—**भगवान्प्रसीदतामिति** । अन्यत्तु साधनं प्रसादोपक्षीणम् । लोकद्वारा स्वानुभवद्वारा च सर्वाणि शास्त्राणि प्रवृत्तानि । वेदस्याऽपि तत्परत्वेनाऽर्थो निरूप्यते । तत्र—**अधिकारी प्रमाणं च सन्तश्च प्रीतिहेतवः । एतेऽप्यापाततः प्रोक्तास्तस्मात्सम्प्रार्थनं वरम् । सम्प्रार्थने हि सुमहान्साधनं फलमेव वा । [3]कायादिभिः करोत्येव तस्मात्साधननिश्चयः ।** तत्राऽधिकारिणो द्विविधाः । ये हि भगवत्प्रसादयोग्यास्ते आत्मवन्तः । आत्मशब्देन हि अन्तःकरणमात्मा च । तत्र ये आत्मवन्तस्तेषामात्मत्वेनाऽयं प्रकाशते । ये पुनरन्तःकरणवन्तो यथासुखमन्तःकरणं कर्तुं सम्भवन्ति तेषामधीश्वरः स्वामी । अन्तःकरणप्रेरको वा । स्वसेवां कारयति तद्योग्यं वा करोतीति । प्रमाणं च त्रिविधं श्रुतिस्मृतिपुराणाख्यम् । तत्र प्राधान्येन वेद इति तेनाऽपि यज्ञः प्रतिपादित इति यज्ञप्रतिपादकत्वेन त्रयी प्रमाणम् । स्मृतीनां तु धर्मप्रतिपादकत्वेन तत्राऽर्थस्यैव प्राधान्याद्धर्मप्रयोगः । पुराणं तु तपःप्रतिपादकम् । यावन्ति हि फलानि निरूपयति तपसैव तानि निरूपयति । तत्त्रितयरूपोऽपि भगवानेव । अर्थतः स्वरूपतश्च । ततः किमधिकारेण किंवा प्रमाणेन ? उभयोरपि फलकोटावेव प्रवेशात् । सतामाश्रयणेऽपि तथा । यतः अजशङ्करादिभिरपि वितर्क्यमेव लिङ्गं यस्य । सतां हि पराकाष्ठा ब्रह्मा वा महादेवो वा । तच्छिष्यास्तत्पुत्राश्चाऽन्ये । तैरपि विशेषेण तर्क्यमेव लिङ्गं यस्य न त्विदमित्थतया ज्ञेयम् । तर्कितं [4]हि भवति न भवति च । तेऽपि स्वस्य माहात्म्यमेव दृष्ट्वा भगवत्कृपया तज्जनितमिति भगवत्साक्षात्कारेण च तत्स्वरूपप्रसादयोर्निर्णयं कल्पयन्ति । एतादृशो हि भगवानेवं प्रसन्नो भवतीति । तत्र प्रमाणे नानाप्रकारेण निरूपणाल्लोकतश्च तथा प्रतीतेर्न तावन्मात्रतेति निश्चीयते । ते तु "शब्दात्प्रत्यक्षं बलीय" इति विशेषेण तर्कयन्ति । तस्मादेवमवगम्यते भगवानेव प्रसादं प्रार्थनीयो नाऽन्यन्नाऽन्योऽपि ॥ १९ ॥ ❀ ❀ तस्मात्प्रार्थनायां [5]सम्भवन्त्यां नाऽन्यत्कर्त्तव्यमिति सिद्धम् । यदि प्रार्थनायां [6]भगवान्न क्रुध्येत् । लोके ह्यनधिकारी प्रार्थयन्क्रोधमुत्पादयति । यद्यपि प्रसादस्य साधारण्यादन्यस्याऽप्रार्थितत्वात्क्रोधो न सम्भवति तथापि सामान्येऽप्यनधिकारिणं प्रति तद्भवत्येव । अतस्तन्निर्णयार्थं प्रार्थनायोग्यं रूपमाह—**श्रियः पतिरिति** । पतिः प्रार्थनीय इत्यविवादम् । क्रुध्यतु मा वा । तद्येषां पतिस्तैः प्रार्थनीयः । तत्र प्रथमं षड्विधानां पतित्वं निरूपयति । प्रथमं भगवाँल्लक्ष्मीपतिः । ततो लक्ष्म्यंशैः स्त्रीभिः प्रार्थितो न क्रुध्यति । अनेन स्नेहमार्गानुवर्तिभिरन्यैरपि प्रार्थितो न क्रुध्यति । एवं यज्ञपतिः । यज्ञपुरुषैः प्रार्थितो न क्रुध्यति । अत एव "यज्ञे[7] यः कामयेते"ति बहुधावचनं भगवत्पतित्वज्ञापकम् । किञ्च । प्रजापतिः । ये केवलं लौकिकाः प्रजामात्ररूपाः प्रकर्षेण जाता वा तेषां पतिः । साधारणैरपि प्रार्थ्यः । अल्पविशेषैरपि । किञ्च । धियां पतिः । ये केचित्कामपि बुद्धिं जानन्ति क्रियायां ज्ञाने वा [8]शब्दतोऽर्थतो वा तैरपि प्रार्थनीयः । किञ्च । लोकपतिः स्वर्गादिलोकानां पतिः । अतस्तद्गतैरपि प्रार्थनीयः । ततो धरायाश्च पतिः । अतो भूमिष्ठैरपि प्रार्थनीयः । **स्त्रीभिश्च याज्ञिकैर्लौकैर्बुद्धिमद्भिः स्थितैः क्वचित् । असाधनैरपि ह्येतैः प्रार्थनीयो हरिः पतिः ।** किञ्च । अन्धकवृष्णिसात्त्वतां पतिर्गतिश्च । पूर्वं भगवत्प्रार्थनायोग्यता निरूपिता । इदानीं फलमुखता निरूप्यते । पतिः फलम् । गतिः स्वनिष्ठं साधनम् । तच्चेत्फलं स्वनिष्ठत्वे सति साधनतां भजते[9] तदा फलोपभोगो भवति । न हि स्वसुखे दूरस्थः असाधनं वा स्वतन्त्रो वा तस्यां क्रियायां हेतुर्भवति । तद्भगवान्यादवैः प्रार्थितः पतिः सन् तेषां क्रियारूपोऽपि जातः । अतोऽनेन यावत्कर्त्तुं शक्यते तावत्तेषां भवति । अतः फलमुखपतित्वमत्र सिद्धमिति क्रोधसम्भावनाऽपि दूरे । चकारात्क्रियासाध्यरूपश्च । त्रिविधा हि यादवा गणितास्तामसराजससात्त्विकपुरुषभजनीयत्वं निरूपयितुम् । किञ्च । यत्र गुणव्याप्तैरपि भगवान्प्राप्यते प्रार्थ्यते च तत्राऽस्मदादीनां का चिन्तेति प्रसीदतां म

---

१. इति वचनादिति ख २ एतेन विविधा इति घ. ङ. ३ कार्यादिभिरिति ग. कामादिभिरिति ङ. । ४ वितर्कितमिति क. ङ. ५. सम्भवत्यामिति क. ख. घ. ङ. । ६. भगवान्क्रुध्येदिति क. घ. ङ. । ७. यज्ञे यज्ञे यत्कामयते इतीति ख. ग. घ. ङ. । ८. शब्दादर्थतो वा इति ग. । ९. भजेतेति घ. भजेदिति ङ. ।

इत्याह—**मह्यं प्रसीदतामिति** । किंच । सतामयं पतिः । ये भगवत्येव सन्ति गुणेषु प्रविष्टाः गुणद्वारा भगवदाश्रयास्तेषां तु पतिरेव । अन्यान्प्रत्यौपचारिकं पतित्वम् । युक्त्या शास्त्रेण च सतामेव पतिः । अतोऽपि मह्यं प्रसीदतामिति भावः ॥ २० ॥

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः**

**तपस्विन इत्यत्र तेषां स्वरूपसन्देहमिति** । केवलकर्मैकनिष्ठाः शुद्धकर्मिणः उत भगवति कर्मार्पकाः शुद्धकर्मिण इत्येवं प्रकारकं सन्देहमित्यर्थः । विवृतौ **'कूपारामादी'** त्यादिपदेन यशोजनकानां काव्यकरणादिरूपाणां कर्मान्तराणामपि सङ्ग्रहः । ननु 'कर्मणैव हि संसिद्धिमास्थिता जनकादय' इत्यादिवाक्यैः केवलस्य कर्मण एव संसिद्धिसाधनतावगतेः समर्पणे को वा विशेष इत्याशङ्कायां समर्पणादेव संसिद्धिर्न तु केवलेन कर्मणेत्युपपादयिष्यन्तः प्रथमं तदवान्तरभेदरूपस्य तपसस्तथात्वमाहुः **तप इत्यादि** । तपः शब्दस्य सन्तापार्थकधातुनिष्पन्नत्वादर्थस्य च कृच्छ्रादिरूपत्वात्तादृशं तत्सन्तापात्मकम् । तपस्तु **पाकवत्साधनपर्यवसायि**, पाकः अन्नादिविक्लितिः, सा यथा सुखसाधनीभूते भोजने पर्यवस्यति, तथेदमपि देहेन्द्रियाणि पाचयत्सुखसाधनीभूते भोगे पर्यवस्यतीति **न सुखं प्रयच्छति** न सुखदमित्यर्थः । ननु पाकजन्यस्य तापस्यान्यनिष्ठत्वेन तपसश्च स्वनिष्ठत्वेन वैलक्षण्याद् अग्रे सुखलाभदर्शनाच्च सुखदत्वमङ्गीकार्यमित्यत आहुः **न हीत्यादि** । सुखानुभवदशायां क्लेशराहित्यदर्शनेन सन्तापात्मकस्य तपसस्तदानीमभावान्न तस्य सुखदत्वमङ्गीकर्तुं शक्यमित्यर्थः । ननु 'तपसा देवा देवतामग्र आयन्' तपसर्षयः सुवरन्वविन्दन् तपसा सपत्नान् प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितं तस्मात् तपः परमं वदन्तीत्यादिश्रुत्युन्नीतविधिभिस्तपसः फलदातृत्वस्य विहितत्वाद्देवत्वादिद्वारास्तु तपः सुखदमित्यत आहुः **विहितत्वादित्यादि** । उक्तरीत्या विहितत्वात् साक्षात्सुखददेवत्वादिलक्षणफलदानेऽपि दातुस्तपसः सम्बन्धाभावाद्देवत्वादिकं जनयित्वोपक्षयेन सुखकरणत्वस्याशक्यवचनतया सुखेन सह सम्बन्धाभावात् साधनपर्यवसायित्वमेव, न तु सुखदत्वमित्यर्थः । ननु केवलतपसः सुखसम्बन्धाभावकथने भगवदाज्ञप्ततपःफलबोधकस्य 'ब्रह्मणे दर्शयन् रूपमि'त्यादिवाक्यस्य विरोधः स्यादित्यत आहुः **आज्ञामात्रेत्यादि**, भगवदाज्ञामात्रेण । **तथाकरणेऽपि** भगवद्विचारानुरूपतपःकरणेऽपि **स्वात्मसमर्पकत्वेनैव तद्बोधनाभिप्रायात्** । 'तपोधन' इत्यादिप्रयोगेण तपोरूपं यत् स्वं धनं तेन सहित आत्मा स्वात्मा, तत्समर्पकत्वेनैव तस्या आज्ञाया बोधने तथा ज्ञापनेऽभिप्रायात् । मदीयः सन् तपः कृत्वा मामर्पयेत्येवं प्रकारकभगवत्तात्पर्यात् । न केवलं तपसा तादृक्फलम्, अपि तु समर्पिते तपसि भगवतैव तादृशं फलम्, अतो नोक्तवाक्यविरोध इत्यर्थः । स चाभिप्रायः सप्तमाध्याये 'तप्तं तप' इत्यत्र नवमे च दुस्तोषः कूटयोनिना' मित्यत्र स्फुटो भावी । ननु दृष्टद्वारा मास्तु तपसः सुखसाधनत्वमदृष्टद्वारा तत्कल्पने को दोष इत्यत आहुः **अदृष्टेत्यादि** । तथापि **फलजनने मानाभावात्**, दृष्टेन समर्पणेनैव फलसिद्धौ सम्भवत्यात्मदृष्टकल्पनस्यान्याय्यत्वात्, तत्कल्पने प्रमाणानुपलम्भात् । ग्रहीततयाऽदृष्टाङ्गीकारेऽपि 'कर्षयन्त' इतिवाक्ये भूतग्रामकर्षणरूपबाधश्रवणाच्च नादृष्टद्वारापि तत्कल्पयितुं शक्यत इत्यर्थः । नन्वेवं सति 'फलमत उपपत्तेरिति न्यायेन साक्षात्परंपरया वा भगवत एव फलदातृत्वाद् भगवदाज्ञप्तेऽपि तपसि संतापात्मकत्वतौल्येन साधनपर्यवसायित्वस्यापि तौल्यात्केवलतपस्यपि यथा **कथञ्चिद्भगवतैव यदा कदाचित्सुखसम्भव** इति को विशेषः समर्पणे इत्यत आहुः **मत्त इत्यादि करोतीत्यन्तम्** । 'सुखं दुःख' मित्यारभ्य 'मत्त एव पृथग्विधा' इत्यन्ते वाक्ये स्वस्यैव **सुखहेतुत्वव्यपदेशात् परंपराकल्पने मानाभावाद्** भगवदाज्ञप्तमपि तपः देहेन्द्रियादिपाचनेन तेषां **भगवत्क्रीडौपयिकता सम्पादयद् देहं भगवद्योग्यं करोति**, भगवद्विचारितकार्यकरणक्षमं करोति । तथा सति तदा **प्रसन्नः** स्वयं साक्षादेव सुखं प्रयच्छतीति अयमेव विशेष इत्यर्थः । ननु फलस्य तौल्ये परम्परयैव तदस्तु को दोष इत्यत आहुः **यस्त्वित्यारभ्यार्हतीत्यन्तम्** । तथा च, परम्परादृतेऽयं दोष इत्यर्थः । नन्वेवं दानेन भगवान् किं साधयतीत्यत आहुः **एवमित्यादि** । एवं तन्निर्बन्धेन अवशिष्टानि भोग आच्छिन्ने तत्करणार्थमुर्वरितानि अकृतभोगानीति यावत् । तादृशान्याच्छिन्नभोगानि देहेन्द्रियाणि शोधयति, स्वकार्यकरणक्षमानि करोतीत्यर्थः । एवं सति भगवद्विचारितानुपूर्वीकतपःकरणे भगवदीयत्वम् । विहितेन कृत्वा समर्पणे शुद्धकर्मित्वम्, असमर्पणेऽशुद्धत्वम्, अविहितकरणे चासुरत्वमिति तत्स्वरूपविवेकः । इदमेवं 'यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्' अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते 'अभिसन्धाय तु फलं' मूढग्राहेणात्मनो यदि' त्यादिवाक्यैर्भङ्ग्यन्तरेणोच्यते इति ज्ञेयम्, तेन सर्वमनवद्यम् । एवं तपसः साधयित्वा दानस्यापि साधयन्ति **दत्तेत्यादि प्राप्तिरित्यन्तेन** । ननु 'दानयज्ञानां वरूथं दक्षिणा लोके दातार सर्वभूतान्युपजीवन्ति दानेनारातीरपानुदन्त दानेन द्विषन्तो मित्रा भवन्ति दाने सर्वं प्रतिष्ठितं, तस्माद्दानं परमं वदन्ती'त्यादिश्रुत्या दानस्य परमत्वबोधनादस्तु केवलक्षेमसाधकत्वमिति पूर्वपक्षनिरासे **तुः** । तथा च, **दानस्य** तथात्वेऽपि दत्तद्रव्यस्येत्याद्युक्तरीत्या द्रव्यस्य तथात्वात् केवलदानस्य न फलसाधकत्वं निश्चितम्, अपि तु द्रव्यविनियोगसहकृतस्यैव तन्निश्चितम्, अन्यथा 'ऽर्हानर्हापरिज्ञानाद्दानधर्मोऽपि दुष्करः' अपात्रेभ्यश्च दीयते तत्तामसमुदाहृतं' 'सत्यं ब्रवीमि वध इत्सतस्य' दीयमानं रुदत्यन्नमि'त्यादीनि वाक्यानि विरुद्ध्येरन् । अतः द्रव्यविनियोगसहितस्यैव दानस्य फलसाधकत्वात्तद्विनियोगस्य च **ज्ञातुमशक्यत्वाद्** भगवत्कर्तव्यभूते तस्य **सम्प्रदानस्य** पोषणे दानक्रियायाः पर्यवसानात् । **यस्य भक्तादिरूपस्य सम्प्रदानस्य** पोषणं भगवता कर्तव्यमस्ति तत्रैव दानक्रियायाः फलजनकत्वं पर्यवस्यति । पात्रापात्रविवेकबोधकशास्त्रे तत्समर्पणे

'क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोऽपर ईश कुर्युरि'ति वाक्येन सर्वस्य भगवदीयत्वाद् दत्तस्य भगवत्यसमर्पणे स्वातन्त्र्ये दानार्थमपि ततः स्वयं ग्रहणेन स्वातन्त्र्ये सुतरां **न क्षेमप्राप्तिः** चौर्येण प्रत्युतानिष्टमिति तपोवदस्यापि व्यवस्थेत्यर्थः। एतेन 'ददासि यत्' 'दातव्यमिति यद्दानमित्यादीन्यपि पूर्ववदेव ज्ञेयानि। एवं दानस्य साधयित्वा यशोजनकेषु कूपारामादिष्वतिदिशन्ति कूपेत्यादि। **दानवदेव तस्य निर्णय** इति। कूपादौ पशुमनुजपातादिना क्षारकटुभावादिना वाऽपेयत्वे, आरामादौ शुष्कीभावे, चौरजारमद्यपादिभिरुपद्रुतत्वे तत्कर्तुः पापमेव निमित्तमन्यथा सर्वत्र यथा स्यात्। एवं सति तत्कर्मणोऽपि कूपादिविनियोगसहितस्यैव फलसाधकत्वाद्विनियोगस्य च ज्ञातुमशक्यत्वात्तदसमर्पणे स्वातन्त्र्ये पूर्वोक्तपापभावित्वम्। सद्विनियोगेऽपि स्वाम्यस्य करणादेव कुधीत्वम्। समर्पणे तु विश्रामजनकेत्याद्युक्तरीत्या तस्य कूपादिकर्मणो निर्णय इत्यर्थः। काव्येऽपि 'न तद्वचश्चित्रपदं' 'तद्वाग्विसर्गो जनता' इत्यादिवाक्यैस्तथात्वं स्पष्टम्। अत्रापि 'यत्करोषि' 'कार्यमित्येवे' त्यादीनि पूर्ववदेव ज्ञेयानि अथ योगस्य तथात्वं साधयन्ति **मनस्विन** इत्यादि। अत्र 'मनस्वी' शब्दो दानशौण्डे युद्धवीरे अन्येषु च तादृशेषु प्रयुज्यते, तत्र योगिपरामर्शे किं बीजमित्याशङ्कानिरासे तुः। **मनस्विशब्दवाच्या योगिन एव**। तत्र हेतुः, त इत्यादिः। **विचारिता** इति। तथा चाग्रे निराकार्यत्वाभावे पूर्वं न ते विचारिताः स्युः। अतो न पुनर्निराकार्यास्तिथाप्यत्र तदुक्तिस्तु 'अयं हि परमो धर्मो यद्योगेनात्मदर्शनमि'ति धर्मप्रकरणे पाठेन प्राकरणिकत्वाज्ज्ञेया। ननु 'योगेनैव दहेद्देहं धारणाभिश्च किल्बिषानि' त्यादिवाक्यैर्योगस्य पापनिवारकत्वस्मरणात्कुतो न क्षेमप्राप्तिरित्यत आहुः **सर्वेषामित्यादि, सम्भवतीत्यन्तम्**। तथा चैतान्यपि वाक्यानि समर्पणपराण्येव। एवं पूर्वत्रापि यथासम्भवं ज्ञेयानि। एवं योगस्य साधयित्वा श्रौतस्मार्तधर्मस्यापि तथात्वं साधयन्ति **धर्ममार्ग** इत्यादि। [illegible] भगवत्समर्पणहेतकमक्षयपराभवोक्तेः। सापि स्मार्यते। श्रुतिस्तु वासिष्ठोह सात्यहव्यो देवभागं पप्रच्छ यत्सृञ्जयान्बहुयाजिनोऽपि यजोयज्ञे यज्ञं प्रत्यतिष्ठिपा यज्ञपताविति सहोवाच यज्ञपतावित्ति, सत्याद्वै सृञ्जयाः पराबभूवुरिति होवाच, यज्ञे वा यज्ञः प्रतिष्ठाप्य आसीद्यजमानस्यापराभावायेती'ति। सप्तम्यन्तेन यज्ञपदेन 'यज्ञो वै विष्णुरि'ति श्रुत्युक्तो भगवानुच्यते। प्रतिष्ठाप्येत्यनेन च समर्प्य इति। अन्यथा स्वरूपेण यज्ञस्य स्वस्मिन् सत्त्वात् को वा प्रतिष्ठापदार्थः स्यादिति। तथा चोक्तवाक्यादिषु कीर्तनादसमर्पणादिभिर्नाशसम्भवोक्तेस्तदभावाय समर्पणं युक्तमित्यर्थः। सुमङ्गलपदोक्ताः सदाचारास्तु सर्वानुगाः पूर्वोक्तविचारेणैव विचारितप्राया इति पुनर्न विचारिताः। नन्वत्र कीर्त्तिपुरस्सरं नमने किं बीजमित्याकाङ्क्षायां फलोत्कर्ष एव बीजमिति सदृष्टान्तमाहुः **लोकेऽपीत्यादि**। **कालनाशः**, कालेन पदार्थनाश इत्यर्थः। **भगवदीयानां** भगवति समर्पितानां तपआदीनामित्यर्थः। ननु यत्पुरःसरं नम्यते सा कीर्त्तिः का वेत्यत आहुः **मार्गत्रयेत्यादि**। **अन्येषां** पद्यत्रयोक्तविधेभ्यो भिन्नानाम्। **तत्र** भक्तिमार्गे ज्ञानमार्गे वेत्यर्थः॥ १७॥ ❀ ❀ **किरातेत्यस्याभासे तदिति**। तस्माद् उक्तभगवद्वाक्यादित्यर्थः। अत्र कोटिद्वयकथनेन 'वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः। न शौरिचिन्ताविमुखजनसंवादवैशस मि'ति स्मारितं ज्ञेयम्, अन्यथा किरातेतिपद्योक्तिरसङ्गता स्यादित्यर्थः। विवृतौ **प्रभविष्णुत्वमिति** प्रकर्षेण सत्तासम्पादकत्वमित्यर्थः। ननु भगवदाश्रितत्वमात्रेण चेच्छुद्धिस्तदा भगवतो विश्वाधारत्वेन दुष्टदैत्यानामपि तदाश्रितत्वात्तेऽपि शुद्धयन्तामित्यत आहुः **अपेत्यादि। निवारितमित्यन्तम्**। तथा च, "अप" नामातिशयोधिकः व्याप्तो वा परितो वा आश्रयः अपाश्रयो, यो भगवानपाश्रयो येषां ते यदपाश्रयाः, तानाश्रयन्त इति **यदपाश्रयाश्रयास्ते शुद्धयन्तीति** कथनाद्येषां यथाकथञ्चिदाश्रयस्ते न शुद्धयन्तीत्यपोपसर्गेणायाति। **तेन हेतुना** तेषां शुद्ध्याश्रयत्वं निवारितमित्यर्थः॥ १८॥ ❀ ❀ **स एष** इत्यत्र। ननु प्रसादस्यैव साधनत्वे स एष भगवान् प्रसीदतामित्येव वक्तव्यं विशेषणान्तराणां किं प्रयोजनमित्यत आहुः **अन्यथेत्यादि**। तथा च, साधनान्तरोपक्षयज्ञापनमेव प्रयोजनमित्यर्थः। ननु प्रसादे कथं सर्वसाधनोपक्षय इत्यपेक्षायामाहुः **लोकेत्यादि**। तथा च, लोकादेर्भ्रान्तित्वात्प्रमाणाकुलीभावे तदुक्तसाधनानामपि तथात्वात्तत्प्रमित्याद्यर्थं प्रमेयप्रसाद एवावश्यक इति तथेत्यर्थः। ननु कथमिदं विनिगन्तव्यमित्याकाङ्क्षायां कारिकाभ्यां श्लोकार्थं सङ्गृह्य विनिगमनोपायमाहुः **तत्रेत्यादि**। एते आत्मादिपदोक्ता अधिकार्यादयोप्यापातत **प्रसादहेतवः प्रोक्तास्तस्मादापातप्रतिपन्नान्निश्चितं प्रार्थनमेव श्रेष्ठम्**। तत्र हेतुः **सम्प्रार्थने हीत्यादि**। तस्मादत्र श्लोके साधननिश्चय एव क्रियते, अन्यथा प्रसादातिरिक्तं साधनान्तरमेव प्रार्थयेदतस्तथेत्यर्थः। अत्रात्मवतामितिपदे आत्मा चात्मा चात्मानौ, तदुभयवतामित्यर्थो विवक्षित इत्यभिप्रेत्याहुः **आत्मशब्देनेत्यादि करोतीत्यन्तम्**। मयडत्र प्राचुर्य इत्यभिप्रायं स्फुटीकुर्वन्ति **तत्त्रितयेत्यादि**। तेन सिद्धमाहुः **तत इत्यादि**। तथा च 'यमैवेष' इति श्रुत्या 'अनुमृग्यदाशुष' इति पूर्वं निर्द्धारणेन च दानं विनाधिकारप्रमाणाभ्यां तत्फलं न लभ्यत इति दानं प्रसादाधीनमिति तत्रैव सर्वसाधनोपक्षयात् स एव साधनमित्यर्थः। ननु तर्हि उत्तरकाण्डोक्त्या गुरूपसत्त्या लभ्योऽस्त्विति चेत्तत्राहुः **सतामित्यादि**। तत्र हेतुः **यत इत्यादि**। 'तज्जनितामिती'त्यत्र **इति हेतौ**। ननु तेषु प्रसन्नश्चेत्प्रत्यक्षोऽभूत्तर्हि तत्तर्कितं फलजनकमिति निश्चितम्, तथा सति तदुपसादनेन तदुक्तं कर्त्तव्यं, किं प्रार्थनयेत्यत आहुः **तत्रेत्यादि**। तथा च, यथा तत्र प्रत्यक्षं गमकं तदतिरिक्तस्वरूपतत्प्रसादप्रकाराणां शब्दो गमक इति प्रमाणयोः परस्परविरोधे प्राप्ते विहितकरणेनैव तेषां तथासामर्थ्यात्तत्प्रत्यक्षस्य शब्दोपजीवकतया न तद्बाधनसामर्थ्यम्। तस्य कार्यलिङ्गकानुमानगृहीतत्वाच्छब्दो न तं बाधितुं शक्नोतीति समानबलतायामुभयसामञ्जस्यार्थं स्वरूपसाधनयोस्तावन्मात्रत्वाभावो निश्चीयत इत्यर्थः। ननु यद्येवं स्यात्ते ताव-

न्मात्रत्वाभावमवगच्छेयुस्ततश्च न कल्पयेयुरतो नैवमत आहुः ते त्वित्यादि । ( तथा च, यद्यपि ) तथापि, तेषामेकसाधनकत्वाभावात्तद्विकल्पे प्राप्ते व्यवस्थापकत्वाभावान्मम केन साधनेन प्रसाद इत्यनिश्चये प्रसादप्रार्थनमेव युक्तमित्यर्थः । तदेतद्धृदि कृत्वाहुः **तस्मादित्यादि**, **तस्मादिति**, प्रसादसाधनेषु स्वोपकारकत्वेनैकतरस्यानिश्चयात् । फलितमाहुः **तस्मात्प्रार्थनायामित्यादि** । **तस्मादिति** । एवं शास्त्रतर्काद्यालोचने प्रार्थनाया एवोपकारकत्वनिर्णयात् ॥ १९ ॥ ❀ ❀ **श्रियःपतिरित्यत्र** । प्रसादप्रार्थनायामधिकारिणं निश्चेतुं श्लोकमवतारयन्ति **यदि प्रार्थनायामित्यादि**, **साधारण्यादिति** । एतस्यैव विवरणमन्यस्याप्रार्थितत्वादिति **सामान्येपीति** प्रसाद इत्यर्थः । **रूपमिति** प्रार्थनीयस्य धर्मं **तद्येषामित्यादि** । तथा च, ये पतित्वेन भगवन्तं नानुसन्दधते त एवानधिकारिण इति तादृशैरेव प्रसादप्रार्थने क्रोधः नेतरान्प्रतीतिबोधनाय मन्दादींस्त्रिविधानधिकारिणः क्रमेण वदन् तत्र प्रथमं मन्दानां पतिरिति निरूपयतीत्यर्थः । **भगवत्पतित्वज्ञापकमिति**, भगवतः सर्वयज्ञपतित्वज्ञापकम् । तथा चैवमनुसन्धाय प्रार्थने भगवतो न क्रोध इत्यर्थः । **यत्कामयेतेति पाठे**, यत्तदोर्नित्यसम्बन्धात्तदित्यस्याध्याहारः । **अल्पविशेषैरिति**, उत्तमकुलोत्पन्नादिरूपप्रकर्षयुक्तैः । **फलमुखतेति** प्रार्थनायाः **फलमुखता स्वनिष्ठत्वे सति साधनतामिति**, उपभोज्यनिष्ठत्वे सत्युपभोगसाधनताम् । तत्र गमकं **न हीत्यादि**, **स्वतन्त्र इति** उदासीनः । **क्रियारूपोपि जात इति**, तथाभवनं च वृद्धानां युवत्यादिना भगवदवतारोत्तरं केवलानामपि सात्यकिप्रभृतीनां 'सौवीरराजमहिषीं भोजां नाम हरद्बलादि'त्यादिषु भारतीयवाक्येषु पराक्रमवर्णनाज्ज्ञेयम् । **अत इति** एवं कृपाकरणात् । **क्रियासाध्यरूप इति**, जन्यफलरूपः । **गुणेष्विति** भगवदीयेषु गुणेषु लीलासु च । **औपचारिकमिति** दूरस्थतया प्रार्थितदानादक्रोधाच्च तथेत्यर्थः ॥ २० ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

भक्तिहीनानां तत्तत्साधनैर्यत्किञ्चित्तु विनाशिफललाभेऽप्यविनाशिपरमफलस्य लाभाभावात् सर्वाण्यपि साधनानि निष्फलान्येवेति वदन् प्रणमति—तपस्विन इति । तपस्विनः कृच्छ्रचान्द्रायणादितपोनिष्ठाः, यशस्विनः कूपारामादिनिर्मातारः, मनस्विनो मनआदीन्द्रियनिग्रहपराः, मन्त्रविदो मन्त्रजपपराः मन्त्रज्ञानाद् यज्ञादिकर्मानुष्ठानपरा वा, सुमङ्गला अन्ये च स्वत्वाचारपराः, एते सर्वेऽपि स्वानुष्ठिततपआदेर्यस्मिन्नर्पणं विना क्षेमं तपआदेः परमं फलं न विन्दन्ति नैव लभन्ते तस्मै सुभद्रश्रवसे नमो नमः । सुभद्रश्रवस इत्यस्यावृत्तिर्भगवद्यशश्रवणादेः प्राधान्यद्योतनार्था ॥ १७ ॥ ❀ ❀ किं वक्तव्यं भागवता आत्मानं विशोध्य भगवन्तं प्राप्नुवन्तीति भागवताश्रिता अतिहीना अपि तथा तं प्राप्नुवन्त्येवेत्याह—किरात इति । किरातादयो जातितो दुष्टाः अन्ये च ये पापाः पापाचारतो दुष्टा येषां प्रायश्चित्तैरपि न विशुद्धिस्ते यदपाश्रयाश्रयाः यो भगवान् अपाश्रयः उपाश्रयो येषां ते भगवद्भक्ता यदपाश्रयास्ते आश्रयो येषां तथाभूताः सन्तः शुद्ध्यन्ति मुक्तिप्रतिबन्धकदोषरहिता भवन्ति विमुच्यन्ते च तस्मै नमः । असम्भावनाशङ्कां परिहर्त्तुं विशिनष्टि—प्रभविष्णवे इति, प्रभवणशीलाय सर्वं कर्त्तुं समर्थायेत्यर्थः ॥ १८ ॥ ❀ ❀ एवं भगवन्तं नमस्कृत्य तन्नमस्कारसन्ततिं सम्प्रार्थ्य राजपृष्टां कथां वक्तुं तत्प्रसादं प्रार्थयते—स इत्यादिना । स पूर्वं नमस्कृतो भगवान् मे प्रसीदतामित्यन्वयः । देवतान्तरं विहाय तमेकमेव किं प्रार्थयसे इत्याशङ्कां परिहर्त्तुं तत्तन्मार्गभेदेन तस्यैव सर्वोपास्यत्वमाह—आत्मवतां ब्रह्माभेददर्शिनामेव आत्मा आत्मत्वेनोपास्यः, योगिनामधीश्वरः परमेश्वरत्वेनोपास्यः, अध्ययनादिपराणां त्रयीमय ऋग्यजुस्सामात्मकवेदत्रयरूपेणोपास्यः, यज्ञादिपराणां धर्मरूपेणोपास्यः, तपस्विनां तपोमयत्वेनोपास्य इत्यर्थः । नन्वेकस्यैव कथमनेकरूपेणोपास्यत्वमित्याशङ्क्य तत्तत्तर्कानुसारादित्याशयेनाह—अजशङ्करादिभिरपि वितर्क्यं लिङ्गं स्वरूपं यस्य स इति । ननु वितर्कितरूपोपासनस्य निष्फलत्वं स्यात्तत्राह—गतव्यलीकैरिति, विप्रलिप्साकपटपाटवादिदोषरहितैरित्यर्थः । महतां निर्दोषाणां तर्कोऽपि प्रमाणमेवेति भावः ॥ १९ ॥ ❀ ❀ सर्वपालकस्य मय्यपि प्रसादो युक्त एवेत्याशयेन सर्वपालकत्वमनुस्मरन् प्रार्थयते—श्रिय इति । श्रियः लक्ष्म्याः पतिः पालकः, यज्ञपतिः वैदिककर्ममर्यादापालकः, प्रजापतिः आब्रह्मस्तम्बपर्यन्तप्राणिपालकः, धियाम्पतिः सर्वबुद्धिपालकः बुद्धिनियन्ता, लोकपतिः पातालादिचतुर्दशलोकपालकः । पृथिव्या लोकान्तरगतत्वेऽपि तत्रैव पुनःपुना रामकृष्णाद्यवतारतया तत्पालनाधिक्यसूचनायाह—धरापतिरिति । अन्धकादयो यादवप्रभेदास्तेषां पतिः पालकः, गतिरधिकारान्ते प्राप्यश्च । सदाचारनिष्ठानां स्वभक्तानां प्रजान्तर्गतत्वेऽपि 'परित्राणाय साधूनां सम्भवामि' इत्यादिवाक्येनावतारस्य तत्पालनार्थत्वेन तत्र विशेषसूचनार्थमाह—सताम्पतिरिति । स एवम्भूतो भगवान् मे मह्यं प्रसीदतु ॥ २० ॥

## हिन्दी अनुवाद

बड़े-बड़े तपस्वी, दानी, यशस्वी, मनस्वी, सदाचारी और मन्त्रवेत्ता जबतक अपनी साधनाओंको तथा अपने-आपको उनके चरणोंमें समर्पित नहीं कर देते, तबतक उन्हें कल्याणकी प्राप्ति नहीं होती। जिनके प्रति आत्मसमर्पणकी ऐसी महिमा है, उन कल्याणमयी कीर्तिवाले भगवान्‌को बार-बार नमस्कार है ॥ १७ ॥ ❀ ❀ किरात, हूण, आन्ध्र, पुलिन्द, पुल्कस, आभीर, कङ्क, यवन और खस आदि नीच जातियाँ तथा दूसरे पापी जिनके शरणागत भक्तोंकी शरण ग्रहण करनेसे पवित्र हो

जाते हैं, उन सर्वशक्तिमान् भगवान्‌को बार-बार नमस्कार है ॥ १८ ॥ ❀ ❀ वे ही भगवान् ज्ञानियोंके आत्मा हैं, भक्तोंके स्वामी हैं, कर्मकाण्डियोंके लिये वेदमूर्ति हैं, धार्मिकोंके लिये धर्ममूर्ति हैं और तपस्वियोंके लिये तपःस्वरूप हैं । ब्रह्मा, शङ्कर, आदि बड़े-बड़े देवता भी अपने शुद्ध हृदयसे उनके स्वरूपका चिन्तन करते और आश्चर्यचकित होकर देखते रहते हैं । वे मुझपर अपने अनुग्रहकी—प्रसादकी वर्षा करें ॥ १९ ॥ ❀ ❀ जो समस्त सम्पत्तियोंकी स्वामिनी लक्ष्मीदेवीके पति हैं समस्त यज्ञोंके भोक्ता एवं फलदाता हैं, प्रजाके रक्षक हैं, सबके अन्तर्यामी और समस्त लोकोंके पालनकर्ता हैं तथा पृथ्वीदेवीके स्वामी हैं, जिन्होंने यदुवंशमें प्रकट होकर अन्धक, वृष्णि एवं यदुवंशके लोगोंकी रक्षा की है, तथा जो उन लोगोंके एकमात्र सहारे रहे हैं—वे भक्तवत्सल, संतजनोंके सर्वस्व श्रीकृष्ण मुझपर प्रसन्न हों ॥ २० ॥

**यदङ्घ्र्यभिध्यानसमाधिधौतया धियानुपश्यन्ति हि तत्त्वमात्मनः ।**
**वदन्ति चैतत् कवयो यथारुचं स मे मुकुन्दो भगवान् प्रसीदताम् ॥ २१ ॥**
**प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि ।**
**स्वलक्षणा प्रादुरभूत् किलास्यतः स मे ऋषीणामृषभः प्रसीदताम् ॥ २२ ॥**
**भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः ।**
**भुङ्क्ते गुणान् षोडश षोडशात्मकः सोऽलङ्कृषीष्ट भगवान् वचांसि मे ॥ २३ ॥**
**नमस्तस्मै भगवते वासुदेवाय वेधसे । पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहासवम् ॥ २४ ॥**
**एतदेवात्मभू राजन् नारदाय विपृच्छते । वेदगर्भोऽभ्यधात् साक्षाद् यदाह हरिरात्मनः ॥ २५ ॥**

**इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कंधे चतुर्थोऽध्यायः**

**श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या**

ज्ञानप्रदत्वमनुस्मरन्नाह यदंघ्रीति द्वाभ्याम् । यस्यांघ्योरनुध्यानमेव समाधिस्तेन धौतया शोधितया धिया यथारुचं रुच्यनुसारेण सगुणनिर्गुणादिभेदैः । यद्वा रुक् प्रतिभा यथामतीत्यर्थः ॥ २१ ॥ ❀ ❀ किंच । पुरा कल्पादावजस्य हृदि सतीं सृष्टिविषयां स्मृतिं वितन्वता येन प्रचोदिता सती सरस्वती वेदरूपा वाक् तस्य मुखतः किल प्रादुर्भूता । स्वानि लक्षणानि शिक्षाद्युक्तानि यस्याः सा । ऋषीणां ज्ञानप्रदानामृषभः श्रेष्ठः ॥ २२ ॥ ❀ ❀ इदानीं स्ववाचं श्रोतृजनाह्लादिनीं शृंगारकरुणादिशोभां प्रार्थयते । भूतैरिति । स मे वचांसि अलंकृषीष्टालंकरोतु । अन्यस्य वचसामन्येनालंकारासंभवमाशंक्य तस्यांतर्यामितामाविष्करोति । यो महद्भिर्भूतैरिमाः पुरः शरीराणि सृष्ट्वाऽमूषु पूष्वंतर्यामितया शेते वसति अत्र पुरुषसमाख्यां प्रमाणयति यद्यस्मात्पूरुष इति । अत एव य एकादशेंद्रियपंचभूतरूपान्षोडशगुणान्कला भुंक्ते प्रकाशयति पालयतीति वा । तदा त्वात्मनेपदमार्षम् । अत्र हेतुः । यतः षोडशानामात्मा चेतयिता । स्वार्थे कः नत्वत्र जीवत्वमुच्यते प्रार्थनाविरोधात् ॥ २३ ॥ ❀ ❀ श्रीव्यासं नमस्करोति । नम इति । सौम्याः वैशंपायनादयो भक्ताः यस्य मुखांबुरुहे आसवो मकरंदस्तम् ॥ २४ ॥ ❀ ❀ इदानीं प्रश्नोत्तरतया ब्रह्मनारदसंवादं प्रस्तौति । एतदिति । उत्पत्तिसमय एव वेदा गर्भे यस्य । साक्षाद्धरिर्यदाह ॥ २५ ॥

**इति श्रीभागवते म० द्वितीयस्कंधे टीकायां चतुर्थोऽध्यायः**

**वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या**

स कृष्ण एव मे ज्ञानप्रदो भवत्विति प्रार्थनां व्यंजयति । यदंघ्रीति । चस्त्वर्थे: कवयः स्वपांडित्यबलेनैव यथारुचं स्वरुच्यनुरोधेनैवैतत्परमात्मनस्तत्त्वं स्वरूपं साकारं निराकारं वा जीवात्मस्वरूपमणुप्रमाणं सर्वगतं वा यद्वैतद्विश्वं मिथ्यैव सत्यमेव नित्यमेवेत्येवं वदंति युक्त्या प्रमाणयंति । न तु तेषां धीर्धौताऽत एवात्मनस्तत्त्वं न पश्यंतीत्यर्थः । अत्र पक्षे तु स्थानेनेति पाठ्यम् । यथारुचि कथनं हि प्रमाणं न भवतीति चेदाह-स्वामी यद्वेति । इत्यर्थ इति । अनंतमहिमत्वेन स्वमत्यनुसारेणैव वदंतीति भावः ॥ २१ ॥ ❀ ❀ अथ तद्वर्णनसामग्री मम स एव यथा ब्रह्मणो मुखाद्वेदं प्रवर्त्तयामास तथा मन्मुखात्स्वलीलाकथां स एव प्रवर्त्तयत्वित्यभिप्रेत्याह-किं चेति । स्वान्यसाधारणानि शिक्षाद्युक्तानि पाणिन्यादिप्रणीतशिक्षादिग्रंथप्रोक्तान्युदात्तादिस्वरस्थाना-

१. प्रा० पा०—वितन्वतोऽजस्य । २. प्रा० पा०—विलक्षणा । ३. प्रा० पा०—सर्वं यदाह हरिरीश्वरः । ४ प्रा० पा०—पुरुषसंख्यानुवर्णनमित्यधिकं वर्तते ।

शुपैतानि स्वरस्थानप्रयत्नादियुक्तेति यावत्। यद्वा स्वं श्रीकृष्णं लक्षयत्युपास्यत्वेन दर्शयति या सा स्वलक्षणा। तदुक्तं भगवतैव "मयादौ ब्रह्मणे प्रोक्तो धर्मो यस्यां मदात्मकः" इति ॥ २२ ॥ ❀ ❀ अत्रांतर्यामित्वे पुरुषसमाख्यां पुरुषपदनिरुक्तिम्। अत एव पुरुषत्वादेव। पूरुष इह दीर्घत्वमौणादिकत्वात्। तदा तु पालनार्थे "भुजोऽनवने" इति सूत्रात्। अत्र षोडशकलाप्रकाशकत्वे अत्र श्लेषेण मद्वचसामपि गुणानास्वादयन्प्रसीदत्विति। तेन शरीराणि निरात्मकानि वस्त्रालंकारादियुक्तान्यपि सद्भिरस्पृश्यानि यथा तथा मद्वचांसि तद्विनाभूतानि मा भवंत्विति भावः ॥ २३ ॥ ❀ ❀ ज्ञानमयं ज्ञायते भक्तितत्त्वमनेनेति ज्ञानं भक्तियोगस्तत्प्रधानं यत्र तज्ज्ञानमयं भागवतशास्त्रमित्यर्थः ॥ २४ ॥ ❀ ❀ यज्ज्ञानमयं पुराणम्। हरिः श्रीनारायणः। आत्मन इति द्वितीयार्थे षष्ठी आत्मानं स्वं ब्रह्माणं प्रति चतुःश्लोकीरूपेणाह एतदेव वेदगर्भो ब्रह्मा आत्मनः परमात्मनः सकाशाद्भवतीति तथाभूतः पृच्छते नारदायाभ्यधादभ्यभाषत। हे राजन्निति। वैराग्येण दीप्यमानस्त्वमेवास्य श्रवणाधिकारीति तुभ्यमहं वर्णयामीति भावः ॥ २५ ॥

**इति श्रीभागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कंधे चतुर्थोऽध्यायः**

**श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या**

नमस्तस्मै इति ॥ भगवते अतीतानागतादिज्ञानवते। तथा च विष्णुपुराणम्—उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यांश्च स वाच्यो भगवानिति। वासुदेवावतारत्वाद् वासुदेवः तस्मै। यद्वा वसुदेवं शुद्धसत्त्वं तद्योगाद् वासुदेवः तद्विद्यमाने चेति टण्। इति व्याख्यालेशः ॥ २४ ॥ २५ ॥

**श्रीमद्वीरराघवव्याख्या**

ज्ञानप्रदत्वेन सतां पतित्वमेव व्यक्तीकुर्वन् तत्प्रसादं प्रार्थयति यदित्यादिद्वाभ्याम्। यस्यांघ्रेरभिध्यानमेव समाधिस्तेन धौतया शोधितया धिया आत्मनः तत्वं याथात्म्यं कवयः स्वयं पश्यंति जानंति अन्येभ्यश्च यथारुचं यथामति रुक् प्रतिभा वदंति च उपदिशंति चेत्यर्थः स भगवान्मुकुंदो मे मह्यं प्रसीदताम् ॥ २१ ॥ ❀ ❀ किं च प्रचोदितेति। पुरा कल्पादौ अजस्य ब्रह्मणः हृदि स्मृतिं सृष्टिविषयां स्मृतिं वितन्वता विस्तारयता येन परमात्मना प्रचोदिता संचोदिता सरस्वती त्रयीरूपा स्वलक्षणा स्वरविशेषादिस्वसाधारणचिह्नवती आस्यतः मुखतः प्रादुरभूत्प्रादुर्भूतवती स प्रचोदयिता ऋषीणां ज्ञानप्रदानां ऋषभः श्रेष्ठः मे प्रसीदताम् ॥ २२ ॥ ❀ ❀ इदानीं भगवानेव स्ववाचां प्रतिपाद्यः स्यादिति प्रार्थयते भूतैरिति। स भगवान्मे वचांसि अलंकृषीष्टालंकरोतु प्रतिपाद्यः स्यादित्यर्थः। वाचा भगवत्प्रतिपादनमेव ह्यलंकारः यथोक्तं तद्वाग्विसर्गो जनताघविप्लव इत्यादि। ननु भवतोच्चार्यमाणानां नानाविधशब्दानां कथं स एव प्रतिपाद्यः स्यादित्यत आह महद्भिर्भूतैर्महदादिपृथिव्यं तैर्भूतैरिमाः पुरः पुराणि शरीराणि निर्माय विभुः स्वयं तत्तज्जीवांतर्व्यापनस्वभावः अमूष्वासु पुरीषु शेते अत एव पूरुषः पुरिशयनात्पुरुषशब्दवाच्यः अवतिष्ठते न केवलं शेते किंतु लीलारसमप्यनुभवतीत्याह षोडशगुणान् शब्दादिविषयान्पंच पंचवागादिव्यापारान् प्राणादिवायुवृत्तीः पंच एकं मनसो गुणं संकल्पादि एतान् षोडशगुणान्स्वयं षोडशात्मकः एकादशेंद्रियपंचभूतात्मभूतः भुंक्ते लीलारसमनुभवतीत्यर्थः जीवांतर्यामित्वेन गुणान् गृह्णता भागवता गुणग्रहणं लीलारसः जीवस्य तु कर्मायत्तभोग इति भावः। एवं च देवादिनामरूपाणां परमात्मपर्यंतत्त्वान्नतास्म सर्ववचसां प्रतिष्ठा यत्र शाश्वतीतिन्यायेन मद्वचसां स एव विषयः स्यादिति युक्ता प्रार्थना ॥ २३ ॥ ❀ ❀ एवं भगवंतं नमस्कृत्याथ स्वगुरुं पितरं च व्यासं नमस्करोति एतदेवेति। व्यासस्याऽपि वासुदेवावतारत्वाद्वासुदेवायेत्युक्तिः वेधसे सर्वज्ञाय सौम्यास्तच्छिष्याः ज्ञानमयं यन्मुखांबुरुहासवं यन्मुखांभोजे यो मकरंदः तं पपुः तस्मै नम इत्यन्वयः ॥ २४ ॥ ❀ ❀ एवं गुरुदेवते नमस्कृत्य प्रकृतप्रश्नस्य उत्तरमवतारयितुं तस्य सांप्रदायिकत्वसूचनाय नारदहिरण्यगर्भयोः प्रश्नस्योत्तरे संवादयति एतदिति। त्वया यत्पृष्टमेतदेवानुच्छते नारदाय वेदः यस्य गर्भः अंतःस्थः स वेदगर्भः चतुर्मुखः अभ्यधात्। किमित्यत आह हरिर्भगवानात्मनः स्वस्मै यदाह भगवांश्चतुर्मुखाय यदाह स च नारदाय तदेवाह भवते अभ्यधास्यामीत्यभिप्रायः ॥२५॥

**इति श्रीमद्भागवतद्वितीयस्कन्धे वीरराघवकृतटीकायां चतुर्थोऽध्यायः ॥ ४**

**श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या**

उक्तार्थजातमिदं किं प्रमाणकं कथं वा ज्ञातुं शक्यमिति तत्राह यदंघ्रीति। कार्त्स्न्येनानिवृत्तविषयसंस्कारस्मरणमभिध्यानं निवृत्तविषयसंस्कारोऽसंप्रज्ञाताख्यः समाधिः। यदंघ्रिविषयाभ्यां ताभ्यां धौतया निर्णिक्ता विद्याकाममलया धिया आत्मनः परमात्मनस्तत्त्वमनुपश्यंति हि यस्मात्तस्मात्तद्दर्शनं प्रमाणम्। दृष्ट्वा च यथारुचं यथारुचि शिष्यादिभ्यस्तत्तत्वं वदन्ति चेत्यतस्तदुपदेशशास्त्रेण ज्ञातुं च शक्यमित्यर्थः ॥ २१ ॥ ❀ ❀ ग्रन्थारंभे सरस्वतीचतुर्मुखादिप्रसादश्चाभीष्टसाधनं भवतीत्यभिप्रायेणाह-प्रचोदितेति। पुरा सर्गादौ अजस्याऽऽपरब्रह्मणो जातस्य चतुर्मुखस्य हृदि सतीं सर्वचेतनेभ्य उत्तमां स्थितिं स नियमलक्ष्णां वितन्व-

ता संस्कारोद्बोधद्वारेण विस्तारतया येन भगवता प्रचोदिता प्रेरिता स्वलक्षणस्वरूपभूता नित्यत्वाख्यलक्षणा स्वरूपनिर्णायकषडंगाख्यलक्षणा वा सरस्वती वाग् ऋगादिवेदरूपा तस्यास्यत आस्यचतुष्टयात्प्रादुरभूदभिव्यक्ताऽभूत् चत्वारो निर्गता वेदास्तव वक्त्रचतुष्टयादित्यादेश्च ऋषीणां ब्रह्मज्ञानिनामृषभो ज्ञानप्रदः परमवागीश्वरीपतिर्नारायणो मे प्रसीदतां प्रसन्नो भवत्वित्यन्वयः। किलेत्यनेन सर्वश्रुत्यादिसंवादं दर्शयति वार्तासंवादयोः किलेति यादवः। यद्वा पुरा शास्त्रप्रबन्धेऽधिकृतेनाजस्य मम पितामहस्य पराशरस्य हृदि सतीं ज्ञानोपदेशलक्षणां स्थितिं वितन्वता येन व्यासेन मम चोदिता संकलिता स्वलक्षणा स्वयोग्यसर्गादिदशलक्षणा सरस्वती भागवतसंहितारूपा यस्याऽऽस्यतः प्रादुरभूत् स ऋषीणामृषभो व्यासो मे प्रसीदतामित्यन्वय इति अजः पितामहेऽनादाविति प्रबंधे निकटेऽतीते पुराणे नागते पुरेति च छागे विष्णौ हरेश्वज इत्यतोऽजस्य विष्णोः सतीं स्थितिं वितन्वता हृदि लोकस्येति शेष इति वा ॥ २२ ॥ ❀ ❀ इदानीं देहेंद्रियादिप्रवर्तकं हरिं प्रसादयति भूतैरिति। यो विष्णुर्महद्भिर्व्यापैर्भूतैः पृथिव्यादिभिः पुरः शरीराणि निर्मायामूषु पूर्षु आत्मादिरूपैः शेते इति यत्तत एव यः पुरुषः पुरिशयनयोगेन पुरुषनामा। "तस्येदमेव शिर" इति श्रुतेः गोलकात्मकदेहव्याप्तत्वाद्वा षोडशात्मक एकादशेंद्रियपंचभूतव्यापी षोडशगुणान् शब्दादिविषयसारान् भुंक्ते न दुःखानि स भगवान् स्वविषयपुराणं व्याकर्तुकामस्य मे वचांस्यलंकृषीष्ट स्वप्रीतिजनकानि कुर्यादित्यन्वयः ॥ २३ ॥ इदानीं भक्त्यातिशयेन देवकीनंदनं कटाक्षीकृत्य नमति नम इति। सौम्या ज्ञानसोमार्हाः ब्रह्मादयो ज्ञानमयं ज्ञानात्मकं यस्य हरेर्मुखांबुरुहादुत्पन्नमासवं मधु पपुस्तस्मै वेधसे कर्त्रे वासुदेवाय भगवते नमः। सौम्या उद्धवादयो ज्ञानमयं यन्मुखांभोरुहासवं पपुस्तस्मै वेधसे कंसाद्यसुर हंत्रे वासुदेवाय शौरये नम इति वा सौम्या नारदादयो ज्ञानमयं ज्ञानप्रतिपादकं भागवतपुराणं नामयन्मुखांबुरुहासवं पपुस्तस्मै वेधसे चतुर्मुखाय नमः। कीदृशाय वासुदेवाय नारायणपुत्राय शौरेः पुत्रः शौरिरितिवत् सौम्याः व्यासादयस्तस्मै वेधसे विधिपुत्राय नारदाय वासुदेवाय वासुदेवभक्ताय। सौम्या वैशंपायनादयः तस्मै वासुदेवाय वासुदेवावताराय व्यासाय नमः वेधसे भारतादिशास्त्रकर्त्रे ॥ २४ ॥ ❀ ❀ स्वाभीष्टदेवताप्रसादं प्रार्थयित्वा सांप्रतं परीक्षित्प्रश्नं प्रतिवक्तुमुपक्रमते एतदेवेति। हरिरात्मनः स्वस्य यत्पुराणमाह आत्मभूः परमात्मपुत्रो वेदगर्भो ब्रह्मा तदेतत्सर्वमितित्वत्प्रश्नप्रकारेण पृच्छते नारदायाभ्यधादित्यन्वयः अर्थव्यत्यासौ नास्तीत्येवशब्दः एतदुक्तं भवति आदौ नारायणे न ब्रह्मणे प्रोक्तं ब्रह्मणा नारदाय नारदेन व्यासाय व्यासेन मह्यं तदहं त्वत्प्रश्नपरिहारत्वेन वक्ष्यामीति ॥ २५ ॥

इति श्रीमद्भागवतमहापुराणे द्वितीयस्कंधेविजयध्वजकृतटीकायां चतुर्थोऽध्यायः ॥ ४ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या।

तादृशानुभवे कारणमुपन्यस्यन्नाह यदङ्घ्रीति। आत्मनः भगवतः तत्त्वं याथार्थ्यम्। अन्यथा तु कवयः पण्डितम्मन्या अपि यथारुच्येव वदन्तीत्यर्थः। यद्वा तथाप्यनन्तमहिमत्वात् तेऽपि कवयो यथात्मप्रकाशमेव वदन्तीति ॥ २१ ॥ ❀ ❀ अथ तद्वर्णनसामग्री मम स एवेत्याह। प्रचोदितेति द्वाभ्याम् ॥ २२ ॥ २३ ॥ ❀ ❀ नम इति टीकायां श्रीव्यासं नमस्करोतीति। पपुरित्यादिस्वारस्यात्। उत्तरवाक्येन तु चतुःश्लोकीवक्तारमित्यायाति ॥ २४ ॥ ❀ ❀ आत्मन इति आत्मानं ब्रह्माणं प्रतीत्यर्थः ॥ २५ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे चतुर्थोऽध्यायः ॥ ४ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या।

स श्रीकृष्ण एव मे ज्ञानप्रदो भवत्विति प्रार्थनां व्यञ्जयति। यदङ्घ्र्योरभिध्यानमेव समाधिर्न तु ततोऽन्यस्तेन शोधितया। चकारस्त्वर्थे। कवयस्तु स्वपाण्डित्यबलेनैव यथारुचं स्वस्वरुच्यनुसारेण एतत् परमात्मनस्तत्त्वं स्वरूपं साकारं निराकारं वा जीवात्मस्वरूपम् अणुप्रमाणं सर्वगतं वा, यद्वा एतद् विश्वं मिथ्यैव सत्यमेव नित्यमेवेत्येवं वदन्ति युक्त्या प्रतिपादयन्ति न तु तेषां धीर्धौता अत आत्मनस्तत्वं न पश्यन्ति ॥ २१ ॥ ❀ ❀ यथा ब्रह्मणो मुखाद्वेदं प्रवर्त्तयामास तथा मन्मुखात् स्वलीलाकथां स एव प्रवर्त्तयत्वित्याशास्ते। येन प्रचोदिता प्रेरिता सरस्वती वेदरूपा अजस्य ब्रह्मणः आस्यतः प्रादुरभूत्। येन कीदृशेन पुरा कल्पादौ अजस्य तस्य हृदि सतीं स्मृतिं वितन्वता प्रकाशयता। सरस्वती कथम्भूता स्वं श्रीकृष्णं लक्षयति उपास्यत्वेन दर्शयतीति सा। यदुक्तं भगवतैव—मयाऽऽदौ ब्रह्मणे प्रोक्ता धर्म्मो यस्यां मदात्मक इति ॥ २२ ॥ ❀ ❀ इदानीं मद्वचःसु स्वसृष्टेष्वेव स्वस्थित्यैव श्रोतृजनाह्लादिनीं शृङ्गारकरुणादिरसध्वनिं गुणालङ्कारशोभां करोत्वित्याशास्ते भूतैरिति। स मे वचांसि अलङ्कृषीष्ट तेषु स्वयं निवसन्नलङ्करोतु। यथा मनुष्यादिशरीराणि सृष्ट्वा तेषु स्वयं वसन्नेव तानि सफलीकरोतीत्याह। यो महद्भिर्भूतैरिमाः पुरः शरीराणि सृष्ट्वा अमूषु पूर्षु अन्तर्यामितया शेते वसति। अत्र पुरुषमाख्यां प्रमाणयति यद् यस्मात् पुरुष इति। अत एव एकादशेन्द्रियपञ्चभूतरूपान् गुणान् भुङ्क्ते निर्लेप एव द्रष्टृत्वैवास्वादयति। अत्र दृष्टान्तेन मद्वचसामपि गुणानास्वादयन् प्रसीदत्विति भावः। षोडशात्मना चेतयिता स्वार्थे कः। तेन शरीराणि निरात्मकानि वस्त्रालङ्कारादियुक्तान्यपि तद्विरहदृश्यानि यथा तथा

मद्वचांसि तद्विनाभूतानि मा भवन्त्विति भावः ॥ २३ ॥ ❀ ❀ गुरुं श्रीव्यासं नमस्करोति। वासुदेवाय तदवताराय। वेधसे शास्त्रकर्त्रे। यन्मुखवाङ्मकरन्दम्। यद्वा वासुदेवाय कृष्णाय। सौम्याः कृष्णकान्ताः। ज्ञानमयमिति नृत्यगीतवाद्यकलावैदग्ध्य-रसालङ्कारादिज्ञानं सर्वतो विलक्षणमशिक्षितमपि यं पीत्वैव प्रापुर्वयमपि तदनुगास्तत्तदाप्नुयामेवेति भाव इति रहस्यम् ॥ २४ ॥ ❀ ❀ इदानीं प्रश्नोत्तरतया ब्रह्मनारदसंवादं प्रस्तौति एतदिति। उत्पत्तिसमये एव वेदा गर्भे यस्य। साक्षाद् हरिर्यदाह। आत्मनः आत्मानं प्रति ॥ २५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
द्वितीयेऽत्र चतुर्थोऽयं सङ्गतः सङ्गतः सताम् ॥ ४ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

यस्यांघ्र्यनुध्यानमेव समाधिस्तेन निर्मलया धिया आत्मनो भगवतस्तत्त्वं याथात्म्यं कवयः क्रांतदर्शिनः स्वयं पश्यंति एतदेव स्वदृष्टमात्मनस्तत्त्वं शिष्येभ्यः यथारुचं रुक् प्रतिभा तामनतिक्रम्य वदंति स मुकुंदः मे मह्यं प्रसीदताम् ॥ २१ ॥ ❀ ❀ पुरा कल्पादौ येन अजस्य विरंचेः हृदि सतीं पूर्ववत्सृष्टिविषयां स्मृतिं वितन्वता विस्तारयता प्रचोदिता सरस्वती वेदरूपा वाणी स्वलक्षणा स्वानि शिक्षादीनि लक्षणानि यस्याः सा आस्यतो मुखतः प्रादुरभूत्स ऋषीणां मंत्रद्रष्टॄणामृषभः श्रेष्ठः प्रसीदताम् ॥ २२ ॥ ❀ ❀ अथ स्वभावत एव भगवद्गुणस्वरूपादिप्रतिपादनरूपपरगुणयुक्तानां स्ववाचां श्रृंगारकरुणादिसौंदर्यं प्रार्थयते भूतैरिति स विभुः सर्वत्र सर्वं कर्तुं समर्थः मे वचांसि अलंकृषीष्ट अलंकरोतु विभुत्वं प्रतिपादयति महद्भिर्भूतैः महदादिविशेषांतैः इमाः पुरः शरीराणि निर्माय सृष्ट्वा अमूषु आसु पुरीषु अंतर्यामितया शेते वसति। अत एव पुरीशयनात्पुरुष इति न च केवलं शेते किंतु स्वानन्यभक्तार्पितान् एकादशेंद्रियपंचभूतरूपान् गुणान् भुंक्ते अनुभवति यतः षोडशानामात्मा अंतरात्मा स्वार्थे कः अनेन भगवतः कर्मायत्तभोक्तृत्वं नास्तीति सूचितम् ॥ २३ ॥ ❀ ❀ मुखाम्बुरुहे य आसवो मकरन्दस्तं सौम्याः स्निग्धाः शिष्याः पपुः ॥ २४ ॥ ❀ ❀ हे राजन् त्वया यत्पृष्टमेतदेव विपृच्छते नारदाय वेदा गर्भे यस्य सः आत्मभूर्ब्रह्मा अभ्यधात्। ननु तेन कुतो ज्ञातमित्यत आह साक्षाद्यदाह हरिरात्मन इति ब्रह्मणे यद्धरिरभ्यधाद्ब्रह्मा नारदाय तदहं तेऽभिधास्यामीति भावः ॥ २५ ॥

इति श्रीभागवतसिद्धांतप्रदीपे द्वितीयस्कन्धे चतुर्थाध्यायार्थप्रकाशः ॥ ४ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

ननु भगवद्गुणेषु पृष्टेषु तत्कथनं परित्यज्य भगवत्प्रार्थना कुत्रोपयुज्यते? तत्राऽऽह—यदङ्घ्र्यनुध्यानेति। केवलं भगवत्प्रार्थनाव्यतिरेकेणाऽप्यङ्घ्र्यनुध्यानमात्रेणैवाऽऽतपाद्यवस्थानेऽपि समाधौ प्रक्षालनमात्रेणैव यत्सर्वप्रमाणैरपि स्पृष्टं[1] न भवति तादृशमात्मतत्त्वं भगवत्स्वरूपयाथात्म्यं पश्यन्ति। बुद्धिः स्वभावतो वस्तुप्रकाशिका। सा स्वावरणाद्विषयावरणादुत्पन्नाऽपि न विषयं प्रकाशयति। इन्द्रियाणामावरणे नोत्पद्यत एव। विषयमात्रं बुद्ध्युत्पत्तौ कारणत्वेन मृग्यते। ननु[2] यत्प्रकारिका बुद्धिस्त-द्विशिष्टम्। रजतादिभ्रमानुपपत्तेः। अतो विषयमात्रं पुरस्कृत्य सामग्र्यन्तरवशाद्वस्तुनो याथात्म्यमयाथात्म्यं वा बोधयति। तत्र शुद्धा वस्तुनो याथात्म्यं गृह्णाति। अत्र भगवच्छास्त्रे सर्वेषां पदार्थानां नित्यत्वात्कारणत्वेनाऽभिमतैरभिव्यक्तीक्रियते। एकश्च पदार्थो न जातिव्यक्तिविभेदकल्पना। एक एव घटोऽनेकधा भवति आविर्भवति तिरोभवति च। पदार्थानां सर्वेषां भगवत्त्वात्। तथा शब्दानां नित्यता तु सर्वैरेवाऽभियुक्तैः कात्यायनादिभिर्व्यवस्थापितेति नाऽस्माभिरत्यन्तं निरूप्यते। "नित्ये शब्दार्थसम्बन्ध" इति। नित्ये शब्दे अर्थसम्बन्ध इति च विवरणम्। आश्रयाभावे च जातिसम्बन्धयोः[3]स्थितिकल्पनाऽत्यन्ताऽप्रामाणिकी दृष्टस्य पदार्थस्य याथात्म्याज्ञाने शास्त्रतस्तदवगम्यते। अत एक एव घटो भगवत्त्वादनेकधा भवतीति "स एकधा भवती" त्यादिश्रुति-बलादनुपपत्तौ निवृत्तायां स्वबुद्धिदोषादन्यथा कल्पनं न प्रामाणिकम्। बहुकल्पनापत्तिश्च। अत एकैव बुद्धिर्बहुधा परिमृज्यमाना शोधकद्रव्यसंयोगसङ्घर्षणेन निर्मला भवति दर्पणवत्। तथा भगवच्चरणारविन्दद्वयं बुद्धौ संयोज्य सङ्घर्षणे क्रियमाणे शुद्धिविशेषं प्राप्नोति। शोधकद्रव्याणां तारतम्येन मलनिराकरणं शास्त्रसिद्धम्। अञ्जनादिषु तथा प्रसिद्धेः। यथाऽञ्जनविशेषे गोलकसंयुक्ते ततो निर्गता दृष्टिर्देवानपि पश्यति, तथाऽत्राऽपीति न काऽप्यनुपपत्तिः। अन्या तु वस्तुनो याथात्म्यं न बोधयति। दोषावृतत्वात्। यथा यथा दोषनिवृत्तिस्तथा तथा वस्तुयाथात्म्यस्फूर्तिः। अत एवाऽभ्याससूक्ष्मेक्षिकादीनामुपयोगः। विषये तु दोषो नास्त्येव। सुतरां भगवद्विषये आत्मविषये च। "अ[4]पहतपाप्मत्वादि" श्रुतेः। नु इति निश्चयेन। अनुध्यानं नाम तत्परतया चिन्तनम्। तथा चिन्तनेनाऽपि तदात्मकता भवतीति समाधिः। न तु योगसम्बन्धी। किञ्च। एतदात्मतत्त्वं कविभिर्यथा[5]बुद्धि निरूप्यते। कवि-

---

१. स्पष्टमिति घ. ङ.। २. ननु यदिति ख.। ३. स्थितिकल्पनात्यन्ता प्रामाणिकादृष्टस्येति ग. थ.। ४. अपहतपापमत्वादिति ख. घ. पापमत्वादिति घ. ङ.। ५. यथाबुद्धिरिति क.।

पदेन चोत्प्रेक्षासामर्थ्यं बोधितम् । कश्चित्कथंचिदुत्प्रेक्षते वदति च तथा । अतो न वाक्याल्लौकिकाद्वस्तुयाथात्म्यस्फूर्तिः । किञ्च । भगवान्मुकुन्दो मोक्षदाता । वस्तुयाथात्म्यस्फूर्तिर्मोक्षाङ्गम् । तच्च तदैव सम्पद्यते यदा भगवान्मोक्षं दातुमिच्छति । इच्छा पुनरङ्घ्र्यनुध्यानेनैव [1]भवतीति । तस्माद्यः [2]कश्चिद्यत्किञ्चिज्ज्ञातुमिच्छति तत्र भगवान्प्रार्थनीयः सकलतत्सिद्ध्यर्थम् । गुणा अपि ज्ञाता एव वक्तव्याः । ज्ञानसाधनं चाऽङ्घ्र्यनुध्यानम् । न केवलं तावन्मात्रमेव । किन्तु प्रार्थनासहितम् । भगवतः स्वतन्त्रत्वान्नानुध्यानमात्रेण तथा कर्तुमिच्छति । अत आह—प्रसीदतामिति । यद्यपि भागवतनिर्माणे विषयप्रचारार्थं प्रसादो जात एव तथाऽप्यस्मदर्थं पुनर्भवतु स्वस्याऽपि रससिद्ध्यर्थम् ॥ २१ ॥ ❁ ❁ इदानीं सामान्यतः प्रसादं प्रार्थयित्वा प्रकृतोपयोगिप्रसादं प्रार्थयितुमस्य प्रसादावश्यकत्वमाह—प्रचोदिता येनेति । अवश्यमिन्द्रियव्यापारे कर्त्तव्ये भगवान्प्रार्थनीयः । तत्रापि वाग्विषये । तत्रापि भगवदीयपदार्थवाचके । यतो ब्रह्मणाऽपि पूर्वं भगवद्ध्यानात्प्रार्थितो भगवांस्तस्य ब्रह्मणो हृदये प्रविश्य स्वप्रकाशिकां वेदरूपां वाणीमास्यतो निष्काशितवान् । अतो भगवद्गुणेषु वक्तव्येषु नित्यवाण्यैव तद्भवतीति प्रकृते भगवत्प्रार्थना आवश्यकी । ननु योगेन पदार्थान्स्मृत्वा तद्वाचकपदानामुपनिबन्धने सम्भवति किं भगवद्ध्यानेन ? इत्यत आह—[3]अजस्य ब्रह्मणः हृदि सतीं स्मृतिं वितन्वतेति । वाक्यार्थवाक्ययोर्नित्यत्वेऽपि [4]पूर्वमनुभूतेऽपि स्मरणमावश्यकम् । स्मरणमात्रं च न प्रमाणमिति स्मृतपदार्थानुभवसहिता साऽपेक्षिता । योगवद्भगवद्ध्यानस्याऽपि प्रत्यासत्तित्वात् । अतोऽन्तःकरणे प्रथमं सतीं भगवदनुभवसहितां स्मृतिं पूर्वानुभूतानां भगवदीयानां पदार्थानां [5]निर्माणाय पश्चात्तेनैव हृदा भगवत्प्रेरितेन अन्तर्वेदप्रादुर्भावात्पुनर्भगवत्प्रेरिता वाणी आस्यतो निर्गता । नहि भगवद्वार्या स्वतो बहिर्निर्गन्तुं शक्नोति । इयमपि वार्त्ता वक्तुमयुक्तेत्याशङ्कय किलेत्याह । स्वस्य लक्षणमिव लक्षणं यस्याः । नित्यत्वं [6]ब्रह्मशब्दवाच्यत्वानन्तत्वादिरूपम् । अथवा । स्वयमेव लक्षणं यस्याः । वेदानामिदमेवाऽसाधारणचिह्नं यद्भगवानेव वाच्य इति । अतः पूर्वानुभूतस्मरणे तद्द्वारा निर्गमेऽपि सर्वेन्द्रियप्रेरको भगवान्प्रसीदताम् ॥ २२ ॥ ❁ ❁ एवं शब्दानां भगवदधीनत्वेन तत्प्रादुर्भावार्थं भगवत्प्रार्थनामुक्त्वा, अर्थोऽपि भगवदधीन इति अस्मन्मुखनिर्गतायां वाचि भगवान्पतिरलङ्करणरूपेण प्रविशतामिति प्रार्थयते—भूतैर्महद्भिरिति स्थितिर्भोगश्च सर्वत्र भगवत्कर्तृकौ यतः । अतो वाचि स्थितः कृष्णस्तां भुङ्क्तामिति कामना । यद्यपि विराट्पुरुष एव, तथा प्रक्रिया सर्वत्र प्रसिद्धा, तथापि पुरुषत्वाविशेषात्स्वस्य भगवत्त्वं भगवतैव साधितमिति ज्ञापनार्थं भगवत एवेदं शरीरमित्यभिमानाभावार्थं वा व्यष्टिष्वपि समष्टिवत्प्रक्रियामाह । भूतैर्महद्भिः पञ्चमहाभूतैः स्वनिर्मितैरेव । इमाः देवतिर्यङ्मनुष्यादिरूपाः । अमूषु [7]पूःषु स्वयमेव शेते । अन्यथा स्वस्य पुरुषत्वमेव न स्यात् । पुरि शेत इति व्युत्पत्त्या हि सः । इदं हि शयनं न निद्रारूपं किन्तु [8]सम्भोगार्थमेव । अत एव दक्षिणेऽक्षिण इन्द्र इतरत्रेन्द्राणीत्युपाख्यानमेतत्परमेव भवति । अत्र च सुप्त्वा न केवलं स्पर्शमात्रमुपभुङ्क्ते किन्तु षोडशाऽपि गुणान् । भोगेऽपि षोडशात्मको भूत्वा भुङ्क्ते । जडे शुष्के रसाभावात् । भगवान् हि[9] व्यापक आनन्दमयश्च । तत्र स्वरूपेणैव स्वरूपानुभवे तथा रसो न भवति । स्त्रीपुरुषाद्यवयवेषु तथोपलम्भात् । अतः स्वस्थितरसाविर्भावेन स्पष्टभोगार्थं भेदरूपमात्मानं विधाय तस्मिन्स्वस्मिन्प्रविष्टे बहुधा भिन्नः सन्नन्योन्यस्य रसमनुभवति । देहधारणाप्रयत्नेन भोगे व्यासङ्गो भविष्यतीति सुप्त्वा तथा भुङ्क्ते । यद्यपि विषयाः पञ्च, तथापि त्वच एव स्थानविशेषे सुखविशेषजननादिन्द्रियपुरस्सरेण यो विषयः स भिन्नतया[10] निर्दिष्ट इति षोडशत्वम् । यत्रेन्द्रियाणां गौणत्वं तत्र विषयप्राधान्यम् । भोगे क्वचिदिन्द्रियाणामप्राधान्यं, क्वचिदिन्द्रियाणामेव प्राधान्यम् । महाराजशरीरवत् । अत उभयविवक्षया षोडशेति वचनम् । एवं भगवन्माहात्म्यं सर्वत्र पूर्णमेव ज्ञातं भवति । अलङ्कृषीष्ट मे वचांसि अलङ्करोतु । छान्दसो दीर्घः । नन्वेवं नानात्वमापन्नः कथमलङ्कारार्थं प्रार्थ्यते ? तत्राऽऽह—भगवानिति । बहुवचनं [11]सप्तार्थाभिप्रायम् । मे इत्यन्यत्र सप्तार्थाभावो द्योतितः । भागवत एव सप्तार्था यतः ॥ २३ ॥ ❁ ❁ एवं प्रार्थनामुक्त्वा स्वगुरुं व्यासं भगवन्तं नमस्यति—नमस्तस्मै भगवत इति । वासुदेव इति सर्वमोक्षदानार्थमेव भगवतो व्यासस्यावतारः । शब्दरूपां सृष्टिं करोतीति वेधस इति मोक्षोपायकथनम् । व्यासनमस्कारत्वं बोधयति पपुरिति । ज्ञानमयं सर्ववस्तुयाथात्म्यज्ञानप्रकाशकं भारतादि । सौम्या इति शान्त्या ज्ञाननिष्ठयोग्यता सूचिता । यस्य मुखमेव अम्बुरुहं कमलं तत्रत्यो मकरन्द एव प्रपञ्चविस्मारकत्वादासवशब्देनोच्यते । मोक्षस्य फलत्वाद्भक्तेश्च भगवत्त्वान्मुखासवपदाभ्यां पानेच्छाप्रतिबन्धेऽपि पानं सूचितम् । कामिनीमुखामोदे तथोपलम्भात् । तस्मात्सर्वेषां गुरुत्वाद्भगवत्त्वाच्च सभायामपि व्यासनमनं युक्तम् ॥ २४ ॥ ❁ ❁ एवं देवतागुरुनमस्कारं कृत्वा महता प्रबन्धेन तन्निरूपयितुं पूर्वप्रश्ने उत्तरमाह—एतदेवेति । [12]यद्भवान्पृष्टवानेतदेव नारदेन पृष्ट आत्मभूर्ब्रह्मा प्रमेयबलपुष्टः । वेदा गर्भे यस्येति प्रमाणबलपुष्टोऽपि । प्रमेयस्य प्रमाणत्वेन विशिष्टबलपुष्टोऽपि । यदाह [13]हरिरात्मन इति वाक्यात्तादृशमुखेनैव तत्रोत्तरे सन्देह-

---

१. भविष्यतीति घ. ङ. । २. यः कश्चिदिति क. । ३. अस्येति क. ग. घ. ङ. । ४. पूर्वमनुभूतत्वेऽपीति क. ख. । ५. निर्मायेति ग. घ. ङ. । ६. ब्रह्मशब्दवाच्यानन्तत्वादिरूपमिति क. ग. घ. ङ. । ७. पूरुषु इति क. ख. । ८. सम्भोगार्थमिवेति घ. ङ. । ९. हीतिनास्ति क. ख. । १०. भिन्नया इति क. ख. । ११. समर्थाभिप्रायमिति ग. । १२. यत्त्वं पृष्टवानिति ख. ग. । १३. हरिरात्मनेति इति ग. ।

निवृत्तिर्भविष्यतीति पूर्ववत्पुनः सन्देहप्रश्नाभावाय स्वतोऽनिरूपणम् । पूर्वमेव करणानां दोषतारतम्यस्य निरूपितत्वान्नाऽत्र पुनरुक्तिः । साक्षादित्युभयत्र विशेषणम् । आत्मने ब्रह्मार्थे । परम्पराकथने तु [1]'मध्ये वक्तृदोषः' [2]प्रसज्येत । अत एव स्वतः कथनमपि निवारितम् । दोषाभावोऽपि प्रार्थनया ज्ञानेन च सूचितः । अनेन उत्पत्त्योपपत्त्या च विचारद्वयं वक्तव्यत्वेन प्रतिज्ञातमिति सूचितम् ॥ २५ ॥

**इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां द्वितीयस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥**

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः ।**

**यदङ्घ्र्यनुध्यानेत्यत्र प्रक्षालनमात्रेणेति** । बुद्धिप्रक्षालनमात्रेण । **स्पष्टं न भवतीति** अधोक्षजत्वेन लौकिकप्रमाणागम्यत्वाद्वेदे च निरुक्तत्वश्रवणात्तथेत्यर्थः । बुद्धिरत्र ज्ञानजनकं पदार्थान्तरमित्यग्रे स्फुटीभविष्यति । तत्र केन प्रकारेण पश्यन्तीत्याकाङ्क्षायामुपपादयन्ति **बुद्धिरित्यादि** । ननु बुद्धेर्वस्तुप्रकाशकस्वभावत्वे तेनैव विषययाथात्म्यस्फूर्त्तिसम्भवाद्बुद्धिक्षालनस्य को वाऽत्रोपयोग इत्याहुः **सेत्यादि**, सा उत्पन्नापीत्येवं योजना । **स्वावरणाद्विषयावरणादिति**, स्वावरणकृताद्विषयावरणात् । बुद्ध्यावरणञ्च मायाकृतव्यामोहविषयतादिकृतं ज्ञेयम्, तच्च नवमाध्याये स्फुटीभविष्यति । तथा च बुद्ध्यावरणतिरस्कारार्थं क्षालनमावश्यकमित्यर्थः । नन्विन्द्रियाणां बुद्धिजनकत्वात्तान्येव क्षालनीयानि किं तस्याः क्षालनेनेत्यत आहुः **इन्द्रियाणामित्यादि** । तथा च, क्षालितेषु तेषु बुद्धिमात्रमुत्पत्स्यते न तु यथार्थबुद्धिरिति तत्क्षालनं नात्रोपयुज्यत इत्यर्थः । ननु शुद्धेष्विन्द्रियेषु जाते च विषयसन्निकर्षे तद्विषयकबुद्धावुत्पन्नायां कुतो न याथात्म्यस्फूर्त्तिरित्यत आहुः **विषयमात्रमित्यादि** । तथा च, तादृशभ्रमदर्शनेन बुद्धिक्षालनाभावादेव न याथात्म्यस्फूर्त्तिरिति तदावश्यकमित्यर्थः । तेन सिद्धमाहुः **अत इत्यादि**, अतः बुद्धित्वेन विषयत्वेन कार्यकारणभावात् । **सामग्र्यन्तर्वशात्** स्वगतेन्द्रियग[3]तगुणदोषवशात् । **तत्र** शुद्धसामग्रीसमवधाने । ननु बुद्धेस्त्रिक्षणावस्थायित्वनियमेन क्षणान्तरे नाशात् कृतमपि क्षालनमप्रयोजकमित्यत आहुः **अत्रेत्यादि** । तथा च, तस्याः स्थिरत्वाङ्गीकारात्तदावश्यकमेवेत्यर्थः । ननु जातिव्यक्त्योर्भेदाभावे घटपटाद्यनुगताकारप्रतीतिबाधप्रसङ्ग इत्यत आहुः **एक एवेत्यादि**, यथा घटानयनापसारणपौनःपुन्ये एकेनैव प्रतीतिसिद्धिस्तथाऽनेकधा भवनेपीति प्रतीत्यबाध इत्यर्थः । न च विशिष्टज्ञानस्य विशेषणज्ञानजन्यत्वनियमेन जात्यभावे घटत्वज्ञानाभावाद् घटोयमिति ज्ञानानुदयप्रसङ्ग इति वाच्यम् इन्द्रियेण पदार्थज्ञानोत्तरं शब्दसंस्कारादिसहकृतया बुद्ध्या पृथुबुध्नोदराद्याकारे निश्चिते तमादाय सुखेनोदयसम्भवात् । न च प्रतीतौ विलम्बाभावान्नैवमिति वाच्यम्, अभ्यासादेव सिद्धेः । अत एव प्राथमिकप्रतीतौ विलम्बोपि युज्यते । केवलविशिष्टज्ञानस्थलेऽतीन्द्रियस्य विशेषणज्ञानस्य स्वीकारे मानाभावान्न तेनाविलम्बसिद्धिः । ननु जात्यभावे सामान्यप्रत्यासत्तेरप्यभावाद् घटत्वेन रूपेण सकलघटज्ञानानुत्पत्तिप्रसङ्गः, न चेष्टापत्तिः कर्तुं शक्या, धूमत्वेन वह्नित्वेन ( सामान्य ) व्याप्तिग्रहे तदुपयोगाद् इति चेन्न, एकस्यां व्यक्तौ धूमवह्निव्याप्तिग्रहे जाते तस्य ज्ञानस्य स्थिरत्वेन भूयोदर्शनाद्दार्ढ्ये सति पुनर्धूमान्तरेण तद्बोधनान्निर्वाहे सामान्यव्याप्तिग्रहस्यानावश्यकत्वात्तदावश्यकत्वेऽपि समानाकारत्वमादायैव सामान्यव्याप्तिग्रहसम्भवादपि न जात्यपेक्षेति । एवञ्च, शक्यतावच्छेदकत्वमप्याकारस्यैव ज्ञेयम् । स चाकारो ज्ञाने प्रकाशात्मा, इच्छायामाशंसात्मा, सुवर्णे विलक्षणरूपात्मा, घटे पृथुबुध्नोदराद्यात्मा, इत्येवमादिरूप ऊह्यः । तेनैव च शक्तिग्रहस्मरणमिति न काचिदनुपपत्तिः । एवञ्च, त्वप्रत्ययोप्याकारमेव वक्ति । सत्तापि सदाकार एव पदार्थोपि व्यक्त्याकृती एवेत्याद्यपि ज्ञेयम् । अत एव चित्रकेतूपाख्यानेऽङ्गिरोवचने 'देहदेहिविभागोयमविवेककृतः प्रभो । जातिव्यक्तिविभागोऽयं यथा वस्तुनि कल्पित' इत्युक्तम् । ननु शब्दोत्पत्तिनाशयोः सार्वजनीनत्वात्पदार्थमात्रनित्यत्वं त्वसम्भवि । तथा चार्द्धजरतीयापत्त्या किमन्तर्गडुना नित्यत्वेनेत्यत आहुः **तथा शब्देत्यादि** । यथान्येषामेकत्वेपि अभिव्यञ्जकतारतम्येन ह्रस्वदीर्घस्थूलसूक्ष्मगुरुलघ्वादिरूपेणाभिव्यक्तिस्तथाशब्दैक्येऽपि शब्दाभिव्यञ्जकव्यापारतारतम्येन ह्रस्वदीर्घादिकखादिरूपेणाभिव्यक्त्यान्यतिरोभाववत्तिरोभावेन ( न[4] ) च प्रतीत्युपपत्तेः । इदं यथा तथा **प्रस्थानरत्नाकरे** व्युत्पादितमस्माभिः । **शब्दानां पदार्थान्तरतुल्यानां नित्यता तु सर्वैरेवाभियुक्तैः तथेति** तत एव प्रमातव्येत्यर्थः । तदुक्तां सम्मतिमाहुः **नित्येत्यादि** । दूषणान्तरमाहुः **आश्रयेत्यादि** । नष्टायां व्यक्तौ जातिः समवायश्च व्यक्त्यन्तरे तिष्ठतः, सर्वव्यक्तिनाशे तु कलादिषु काले वा तिष्ठत इत्येतद्गमकस्य प्रमाणस्याभावाद् अनुगतप्रतीतेराकारेणैव निर्वाहाद् महाप्रलये च ज्ञानसामग्रीलयेन तत्सत्ताग्राहकाभावात्तथेत्यर्थः । ननु प्रत्यक्षापेक्षया शब्दस्य दुर्बलत्वाच्छब्दमात्रेण प्रत्यक्षविरुद्धं नाङ्गीकर्तुं शक्यमित्यत आहुः **दृष्टेत्यादि** । तथा च, यथा दृष्टस्य मण्यादेः पदार्थस्य केवलप्रत्यक्षेण याथात्म्याज्ञाने शास्त्रतस्तदवगतेः प्रत्यक्षस्य दौर्बल्यम्, तथात्रापि शब्दापेक्षया

---

१. मध्यवक्तदोष इति क. ख. घ. । २. प्रसज्जेत इति घ. । ३. 'गत' स्थाने 'तग' पाठः । ४. "ने" ति अत्र अधिकं भाति ।

प्रत्यक्षस्य दौर्बल्यमित्यर्थः। फलितमाहुः अत इत्यादि, अतः प्रमाणान्तरानपेक्षस्य शास्त्रस्य बलवत्त्वाद् इति, अस्मिन्नर्थे 'स एकधा भवति त्रिधा च नवधे'त्यादि छान्दोग्यश्रुतिबलात्तथेत्यर्थः। अनेकपदार्थकल्पने गौरवरूपं दूषणान्तरमप्याहुः बह्वित्यादि। बहुकल्पनाश्च अनेकव्यक्तितत्तद्ध्वंसप्रागभावादीनां ज्ञेयाः। सिद्धान्तमाहुः अत इत्यादि, अतः कल्पनालाघवात् प्रमाणिकत्वाच्च। नन्वेवं सति शास्त्रेणैव बुद्धिः शुद्ध्यतां किञ्चरणारविन्दानुध्यानेनेत्यत आहुः शोधकेत्यादि, तथात्रापीति, बुद्धावपि, बुद्धिर्भगवच्चरणारविन्दानुध्यानसिद्धा सती भगवत्स्वरूपयाथात्म्यं पश्यतीत्यर्थः। दोषावृतत्वादिति, दोषाश्च कामक्रोधलोभमोहमदमात्सर्याद्य आन्तरा ज्ञेयाः अत एव इति, बुद्धिशोधकत्वादेवेत्यर्थः। नन्वभ्यासादिना बुद्धिशुद्धावपि विषयदोषेण भ्रमादिदर्शनाद्विषयशोधनं विना केवलधीशोधनं नातीवोपयुज्यत इत्यत आहुः विषयेत्यादि। विषये शुक्त्यादौ दोषो भ्रमजनको नास्त्येव। यदि स स्याद्विशेषदर्शनोत्तरमपि भ्रममुत्पादयेत्। विशेषदर्शनोत्तरं भ्रमानुत्पादनान्न तत्र स दोषः, किन्तु तत्रापि बुद्धिदोष एव भ्रमोत्पादकः इति बुद्धिशोधनमुपयोग्येवेत्यर्थः। एतेनेन्द्रजाल ( कौलिच ) चमारादयोपि व्याख्याता ज्ञेयाः। ननु 'यदेवाप्रतिरूपं पश्यति' इत्यादि श्रुत्वा विषये अतिरूपत्वबोधनात् कथमेकान्ततो विषयस्य निर्दुष्टत्वमित्यत आहुः सुतरामित्यादि तथा च, ज्ञानिदशायामिन्द्रियाणां पाप्मविद्धतयाऽप्रतिरूपत्वं भासतां नाम, तथापि प्रस्तुतविषये तदापि तदसंभवाददुष्टत्वमेवेत्यर्थः। ननु कपिलादिवाक्यादपि वस्तुयाथात्म्यज्ञानसिद्धेः किमङ्घ्र्यनुध्यानेनेत्यत आहुः किञ्चेत्यादि। अतः परस्परविरुद्धत्वात् तस्मादङ्घ्र्यनुध्यानप्रतिबन्धननिवृत्तेरपि भगवत्कार्यत्वात्॥ २१॥ ❀ ❀ प्रचोदितेत्यत्र तद्भवतीति, गुणानुकथनं भवति। आवश्यकमिति, तेन विना कार्यजननादर्शनात्तथेत्यर्थः। सर्वपदार्थानां तिरोहितत्वे तद्विषयकानुभवाभावात्तत्स्मृतिर्भवतु, परन्तु, तदानीं भगवतोप्यगोचरत्वात्तदनुभवः कथं भवतीत्यपेक्षायामाहुः योगवदित्यादि। इदञ्च 'वितन्वते'त्यस्य तात्पर्यम्। वितानस्य सजातीयसंवलन एव दर्शनादिति। तेनेति सानुभवेन स्मरणेन। हृदेति मनसा। तथा चानुध्यानात्प्रार्थितेन भगवता स्मृतिविताने वाक्प्रेरणे च कृते नित्यवाणीप्रादुर्भावो ब्रह्मणोभून्न केवलयोगेनेति भगवद्ध्यानमावश्यकमिति भावः। ननु कथमेवं भगवतः प्रेरणावश्यकतेत्यत आहुः न हीत्यादि, अयमर्थः सरस्वतीपदेन सूच्यते। किलेत्याश्चर्ये। अत इति प्रेरणस्यावश्यमपेक्षितत्वादित्यर्थः॥२२॥ ❀ ❀ भूतैरित्यत्र कारिकायां सर्वत्रेति, सर्वदेहेष्वित्यर्थः। विवृतौ, सर्वत्रेति श्रुतिपुराणेषु। स्वस्येति शुकस्य। अत एवेति सम्भोगार्थत्वादेव। दक्षिणेऽक्षिण इन्द्र इत्युपाख्यानं च वाजसनेयिनां मण्डलब्राह्मणे प्रसिद्धम्। तत्र च, 'स एष एवेन्द्रो योयं दक्षिणेक्षन् पुरुषोथेयमिन्द्राणी ताभ्यां देवा एतां विधृतिमकुर्वन्नासिकां तस्माज्जायाया अन्तेनाश्नीयादि'त्यादिना वामेऽक्षिण इन्द्राणीस्थितिं बोधयित्वाऽग्रे 'तौ हृदयस्याकाशं प्रत्यवेत्य मिथुनीभूय भवतस्तौ यदा मिथुनस्यान्तं गच्छतो यह तत्पुरुषः स्वपिति तद्यथा हैवेदं मानुषस्य मिथुनस्यान्तं गत्वाऽसंविद इव भवत्येवं हि हैवैतसंविद इव भवति दैवँ ह्येतन् मिथुनं परमो ह्येष आनन्द' इत्याद्युक्तम्। तच्च, एतत्परमेव सम्भोगार्थ[1]शयनपरमेवेति यथा तत्र तद्रूपेण स्थितिस्तदर्था, तथा भगवतो हृदि स्थितिरपि भोगार्थमित्यर्थः। ननु शयनमात्रेण भोगे सम्भवति षोडशात्मकः किमिति भवतीत्यत आहुः जड इत्यादि। जडे नीरसे शब्दादिरूपे विषयपञ्चके। तथा च, तदात्मकतया तेषां सारस्यसम्पादनाय तथाभवतीत्यर्थः। सारस्यसम्पादकं रूपमाहुः भगवानित्यादि। तथा चानन्दमयत्वेन सम्पादयतीत्यर्थः। नन्वानन्दमयत्वे कुतो रसेप्सेत्यत आहुः तत्रेत्यादि। तत्र हेतुः स्त्रीत्यादि, अत इति। 'स वै नैव रेमे, तस्मादेकाकी न रमते, इत्यादिश्रुतिभिर्भेदं विना रसानाविर्भावेन भोगासम्भवात्तेन तथा भोगार्थं 'स आत्मानमेव द्वेधाऽपातयत्ततः पतिः पत्नीश्चाभवतामि'ति भेदरूपमात्मानं विधाय तस्मिन् भेदरूपे आत्मनि मूलरूपे स्वस्मिन् प्रविष्टे बहुधाभिन्न इत्यर्थः। अत एव तत्र 'तिरोसानी'त्यादि कथनं सङ्गच्छते इति ज्ञेयम्। तर्हि तत्रेवात्र देहधारणं कुतो नेत्यत आहुः देहेत्यादि। ननु गुणानां कथं षोडशत्वमित्यत आहुः यद्यपीत्यादि। स्थानविशेषे नेत्रादिगोलकरूपे। एवं मनसोप्यतीन्द्रियत्वेन तज्जनितमपि विषयध्यानादिसम्भवं सुखं हृदयरूपे गोलक एवेति त्वचो व्यापकत्वात्तस्या एव सुखजनकत्वमित्येकादशत्वमिन्द्रियप्राधान्येन पञ्चत्वं विषयप्राधान्येनेत्येवं षोडशेत्यर्थः। ननु प्राधान्याप्राधान्ययोः कथं निर्णय इत्यत आहुः भोगेत्यादि। तथा च, यथोष्णकाले बह्वम्बरालङ्कारादिपरिधाने इन्द्रियाणामरुचावपि राज्यसुखानुभवाय महाराजेन तदापि तत्क्रियते सभायां रहसि च, तथेन्द्रियरुच्युपभोगाः क्रियन्ते, तद्वदित्यर्थः। अत इति प्रत्यक्षानुमानाभ्यां तयोर्निर्णयात्। एतेन सिद्धमाहुः एवमित्यादि। षोडशात्मकत्वेनानन्दजनकत्वे विषयेन्द्रिययोः सुखोत्पत्तौ 'एष ह्येवानन्दयती'ति श्रुत्युक्तं भगवन्माहात्म्यं तथेत्यर्थः। अत्रालङ्कृषीष्टेत्यलङ्काररूपेण भगवत्प्रवेशप्रार्थनया पुरुषरूपत्वादिकथनेन च भगवतः पुरुषभूषणत्वमुक्तं भवति, तेनापि 'निगमकल्पतरोरि' तिव्यासोक्तावुपपत्तिरुच्यते। बीजनिष्ठरसस्यैव फले सत्त्वेपि बीजे तदनभिव्यक्तेरिति दिक्। नमस्तस्मा इत्यत्र ज्ञाननिष्ठयोग्यतेति। ज्ञाननिष्ठानां पानयोग्यतेत्यर्थः। ननु भारतादेः कथं प्रपञ्चविस्मारकत्वमत आहुः मोक्षेत्यादि। ननु मोक्षफलकत्वमन्यत्रापि कथ्यत इति कथमत्रैव तदाश्वास इत्यत आहुः वक्तुरित्यादि।

---

१ "शयन" स्थाने 'स्थिति' पाठः।

पानेच्छाप्रतिबन्धेपीति, अन्तरिन्द्रियनिग्रहस्य शान्तिपदार्थत्वेन सौम्यानां च तद्वत्वेन तया पानेच्छाप्रतिबन्धेपीत्यर्थः। तथा च, दृष्टान्तस्य यथा इच्छोद्बोधकत्वम्, तथा दार्ष्टान्तिकस्यापीति हेतुता बोध्यते ॥ २४ ॥ ❀ ❀ तदेवेत्यत्र तादृशमुखेनेति भगवन्मुखेनेत्यर्थः। नात्र पुनरुक्तिरिति पुनःकरणदोषोक्तिर्नेत्यर्थः। उभयत्रेति, अभ्यधादाहेति क्रियाद्वयेपीत्यर्थः। साक्षात्पदयोजनमाहुः परम्पराकथन इति परम्परया कथन इत्यर्थः। अत एवेति दोषप्रसङ्गादेवेत्यर्थः। ननु काचित्तु परम्परात्र सम्पन्नेति कथं दोषाभाव इत्यत आहुः प्रार्थनयेत्यादि। तथा च, यदि दोषः स्यान्न भगवन्तं प्रार्थयेत्। यथाकथञ्चित्प्रार्थनसम्भवेपि ज्ञानं तु न स्यादित्यर्थः। अनेनेति ब्रह्मोक्तिभगवदुक्त्योरुपक्षेपेणेत्यर्थः ॥ २५ ॥

इति श्रीद्वितीयस्कन्धसुबोधिनीप्रकाशे चतुर्थाध्यायविवरणम् ॥ ४ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

ज्ञानप्रदत्वमनुस्मरन् प्रार्थयते—यदिति द्वाभ्याम्। यस्याङ्घ्र्योरभिध्यानमेव समाधिस्तेन धौतया शोधितया धिया आत्मनो जीवात्मनः परमात्मनश्च तत्त्वं याथात्म्यं योगिनः पश्यन्ति साक्षात्कुर्वन्ति, अन्ये तु कवयोऽतिनिपुणा अपि यथारुचं स्वरुच्यनुसारेणैव एतदात्मतत्त्वं वदन्ति तद्याथार्थ्यं नैव जानन्ति स मुकुन्दः स्वभक्तानां मुक्तिदाता भगवान् मे प्रसीदताम्। "ब्रह्म वेद ब्रह्मैव भवति" इत्यादिशास्त्रप्रसिद्धोऽयमर्थ इति हिशब्देन सूचितम् ॥ २१ ॥ ❀ ❀ किञ्च पुरा कल्पादौ अजस्य ब्रह्मणो हृदि सतीं स्वविषयां स्मृतिं वितन्वता विस्तारयता येनान्तर्यामिणा प्रचोदिता प्रेरिता स्वलक्षणा स्वान्यसाधारणानि सर्वप्रमाणश्रेष्ठत्वकारणभूतानि शिक्षादिषूक्तानि लक्षणानि यस्याः सा, यद्वा स्वं भगवन्तं लक्षयतीति तथाभूता सरस्वती वेदात्मिका आस्यतो ब्रह्मणो मुखतः प्रादुरभूत् सः ऋषीणां ज्ञानप्रदानामृषभः श्रेष्ठो मे प्रसीदताम्। एवम्भूतत्वे बहुशास्त्रं प्रमाणभूतमस्त्यतो न सन्देह इत्याशयेनाह—किलेति ॥ २२ ॥ ❀ ❀ अत्र भगवत्प्रसादेन तव किं वा फलमपेक्षितमित्यपेक्षायामाह—भूतैरिति। स भगवान् मे वचांसि अलङ्कृषीष्ट श्रोतृजनाह्लादकमाधुर्ययथार्थत्वादिगुणरूपालङ्कारविशिष्टानि करोत्वित्यन्वयः। अन्येनान्यवाचामलङ्करणं कथं सम्भवतीत्याशङ्क्य तस्य सर्वान्तर्यामित्वादित्याशयेन तं विशिनष्टि भूतैर्महद्भिरिति। आकाशादिपञ्चमहाभूतैरिमाः सर्वत्र परिदृश्यमानाः पुरः शरीराणि निर्माय अमूषु आसु पुरीषु यः शेते अन्तर्यामितया निवसतीति। अत्र पुरुषसमाख्यां प्रमाणयति—यत् यस्मात् पुरि शयनात् पुरुष इत्युच्यते इति। कथमेकस्य सर्वत्र शयनं सम्भवति तत्राह—विभुरिति। किमर्थमेवं शेते इत्यपेक्षायां स्वलीलयोत्पादितानां पदार्थानां भोगार्थमेव चेतनत्वाज्जडेन भोगासम्भवादित्याशयेनाह—भुङ्क्ते इति। पञ्च शब्दादिरूपान् विषयान् पञ्च वागादिव्यापारान् पञ्च प्राणादिवायुवृत्तीरेकं सङ्कल्पादिरूपमित्येवं षोडश गुणान् भुङ्क्ते इति। नन्वेतद्भोगस्तु तत्तदिन्द्रियाणामेव प्रसिद्धः स कथं तस्येत्यत आह—षोडशात्मक इति, दशेन्द्रियाणि पञ्च प्राणा एकं मनश्चेत्येवं षोडशात्मकोऽपि स एवेत्यर्थः ॥ २३ ॥ ❀ ❀ एवं भगवन्तं नमस्कृत्य भगवदवतारं स्वपितरं गुरुं च वेदव्यासं नमस्करोति—तस्मै वेधसे वेदादिसृष्टिप्रवर्त्तकाय भगवते वासुदेवाय वासुदेवावताराय श्रीव्यासाय नम इत्यन्वयः। वेदादिप्रवर्त्तकत्वमेव स्पष्टयति—ज्ञानमयं यन्मुखाम्बुरुहासवं यस्य मुखकमलमकरन्दं सौम्याः शान्त्यादिगुणविशिष्टास्तच्छिष्याः पपुरित्यन्वयः। तदुपदिष्टज्ञानस्य संसारतापनिवर्त्तकत्वं च अम्बुरुहासवपदाभ्यां सूचितम् ॥ २४ ॥ ❀ ❀ एवं गुरुदेवते नमस्कृत्य प्रकृतप्रश्नस्योत्तरं अवतारयितुं तस्य साम्प्रदायिकत्वसूचनाय नारदहिरण्यगर्भयोः संवादमवतारयति—एतदेवेति। तत्त्वया श्रोतव्यमिति सूचयन्सम्बोधयति—हे राजन्निति। यत्तव प्रश्नस्योत्तरतया मया वक्तव्यं तदेतदेव नारदाय आत्मभूः ब्रह्माऽप्यभ्यधात् कथितवानित्यन्वयः। अनापृष्टं न वक्तव्यं तत्कथमभ्यधादित्याशङ्कानिरासायाह—विपृच्छते इति। तद्वचनस्य कथं प्रामाण्यमित्याशङ्क्याह—यदिति। साक्षाद्धरिरेव यदात्मन आत्मानं प्रति यदाह तदेवाभ्यधान्न स्वोत्प्रेक्षितमित्यर्थः। अन्यथोक्तस्यापि अन्यथाकथनं लोके दृश्यते इति शङ्कानिरासाय तव यथार्थधारणे तथाकथने च सामर्थ्यमस्तीति सूचयन्नाह—वेदगर्भ इति, वेदा गर्भे यस्य सः ॥ २५ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता च द्वितीयेऽत्र हृत्प्रसादनिरूपणे। चतुर्थो विवृतोऽध्यायो वक्तुः श्रद्धानिरूपकः ॥ ३ ॥

## हिन्दी अनुवाद

विद्वान् पुरुष जिनके चरणकमलोंके चिन्तनरूप समाधिसे शुद्ध हुई बुद्धिके द्वारा आत्मतत्त्वका साक्षात्कार करते हैं तथा उनके दर्शनके अनन्तर अपनी-अपनी मति और रुचिके अनुसार जिनके स्वरूपका वर्णन करते रहते हैं, वे प्रेम और मुक्तिके लुटानेवाले भगवान् श्रीकृष्ण मुझपर प्रसन्न हों ॥ २१ ॥ ❀ ❀ जिन्होंने सृष्टिके समय ब्रह्माके हृदयमें पूर्वकल्पकी स्मृति जागरित करनेके लिये ज्ञानकी अधिष्ठात्री देवीको प्रेरित किया और वे अपने अङ्गोंके सहित वेदके रूपमें उनके मुखसे प्रकट हुईं, वे मूलकारण भगवान् मुझपर कृपा करें, मेरे हृदयमें प्रकट हों ॥ २२ ॥ ❀ ❀ भगवान् ही पञ्चमहाभूतोंसे इन शरीरोंका निर्माण करके इनमें जीवरूपसे शयन करते हैं और पाँच ज्ञानेन्द्रिय, पाँच कर्मेन्द्रिय, पाँच प्राण और मन—इन सोलह कलाओंसे युक्त होकर इनके द्वारा सोलह विषयोंका भोग करते हैं। वे सर्वभूतमय भगवान् मेरी वाणीको अपने गुणोंसे अलङ्कृत कर दें ॥ २३ ॥ ❀ ❀ संत पुरुष जिनके मुखकमलसे मकरन्दके समान झरती हुई ज्ञानमयी सुधाका पान करते रहते हैं उन वासुदेवावतार सर्वज्ञ भगवान् व्यासके चरणोंमें मेरा बार-बार नमस्कार है ॥ २४ ॥ ❀ ❀ परीक्षित् ! वेदगर्भ स्वयम्भू ब्रह्माने नारदके प्रश्न करनेपर यही बात कही थी, जिसका स्वयं भगवान् नारायणने उन्हें उपदेश किया था ( और वही मैं तुमसे कह रहा हूँ ) ॥ २५ ॥

**चौथा अध्याय समाप्त**

# अथ पञ्चमोऽध्यायः

### नारद उवाच

देवदेव नमस्तेऽस्तु भूतभावन पूर्वज । तद् विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनम् ॥१॥
यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो । यत्संस्थं यत्परं यच्च तत् तत्त्वं वद तत्त्वतः ॥२॥
सर्वं ह्येतद् भवान् वेद भूतभव्यभवत्प्रभुः । करामलकवद् विश्वं विज्ञानावसितं तव ॥३॥
यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः । एकः सृजसि भूतानि भूतैरेवात्ममायया ॥४॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

पञ्चमे नारदेनाथ पृष्टः सृष्ट्यादि वक्त्यजः । हरेर्लीलां विराट्सृष्टिं कालकर्मादिशक्तिभिः ॥ १ ॥

नारदाय विपृच्छते वेदगर्भोऽभ्यधादित्युक्तं तत्र नारदप्रश्नमाह । देवदेवेति । हे भूतभावन अत एव सर्वेषां पूर्वज अनादे ज्ञायतेऽनेनेति ज्ञानं तत्साधनं यत्तद्विजानीहि विशेषेण ज्ञापयेत्यर्थः । कथंभूतम् आत्मतत्वं नितरां दृश्यते येन तत् ॥ १ ॥ उपलक्षणभूतं विश्वमेवात्मज्ञानसाधनमतस्तद्विशेषं पृच्छति यद्रूपं येन रूप्यते प्रकाश्यते । यदधिष्ठानं यदाश्रयम् । यतो येन सृष्टं यत्संस्थं यस्मिन् लीयते यत्परं यदधीनं यच्चेति यदात्मकं स्वतः सत्कारणतो वेत्यर्थः । तस्य तत्त्वं याथार्थ्यं तत्त्वतो वद ॥ २ ॥ ❀ ❀ न जानामीति न च वक्तव्यमित्याह । सर्वमिति । भूतं जातं भव्यं जनिष्यमाणं भवत् जायमानं तेषां प्रभुर्यतोऽतोविशिष्टेन ज्ञानेनावसितं निश्चितम् ॥ ३ ॥ ❀ ❀ आस्तामिदं आदौ तावत्त्वामेव कथयेत्याह । यतो यस्य विज्ञानम् । कस्तव विज्ञानद इत्यर्थः । यदाधारः कस्तवाश्रयः यत्परो यदधीनः यदात्मको यत्स्वरूपः । मम तु त्वमेव स्वतंत्रः परमेश्वर इति बुद्धिः । तव तपश्चरणेन तु परशंकया पृच्छामीत्याह सार्धैश्चतुर्भिः । एकोऽसहायः ॥ ४ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

सृष्ट्यादिरूपां हरेर्लीलां कालकर्मादिशक्तिभिर्विराट्सृष्टिञ्च प्रथमादिना स्थित्यादिग्रहः द्वितीयादिना स्वभावादिग्रहः ॥ १ ॥ हे देवानामिन्द्रादिदेवानामपि देवः प्रकाशकस्त्वमसीति भावः । अतस्ते नमोऽस्तु । भूतानि स्थावरजङ्गमानि भावयति सृजतीति हे तथाभूत अत एव भूतोत्पादकत्वादेव । हे पूर्वजेति । तत्साधनं ज्ञानसाधनम् । इत्यर्थ इति । धातूनामनेकार्थत्वाज्ज्ञानातेर्ज्ञापनार्थतापीति भावः ॥ १ ॥ ❀ ❀ यतो विश्वमेवात्मज्ञानसाधनमतो हेतोस्तद्विशेषं विश्वस्यैव विशेषं भेदं यद्रूपं यल्लक्षणं यत इति तृतीयार्थे तसिः । इत्यर्थ इति । सतो यत्स्वरूपं सतः कारणाद्वा यत्स्वरूपं यद्वेद' स्वत एव सत्त्वप्रतीतेः कारणतो वा कारणसत्तयावत्सदस्तीति भावः । तस्यास्य विश्वस्य तत्त्वतः परमार्थतः प्रभो इति त्वं मत्संदेहापाकरणसमर्थोसीति भावः ॥ २ ॥ ❀ ❀ "हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्" इति श्रुतौ भूतपदं भवद्भविष्ययोरप्युपलक्षणमित्यभिप्रायेणाह । भूतभव्येति । करस्थितामलकफलबाह्याभ्यंतरावयवज्ञानवत्सर्वं भवान् वेदेति । नन्वामलकस्य स्थूलांतरावयवप्रतीतावपि सूक्ष्मतरावयवा प्रतीतेर्दृष्टांते वैषम्यमिति चेत्तत्र श्लेषेणाह । अमलं निर्मलं च तत्कं जलं चेत्यमलकं करेऽमलकं करामलकं तद्वत् । यथा करस्थनिर्मलजलेऽतिसूक्ष्मरेखादेर्ज्ञानं भवति तथातिसूक्ष्ममपि वस्तु विश्वस्मिंस्तवाज्ञातं नास्तीति भावः ॥ ३ ॥ ❀ ❀ इदं विश्ववृत्तमास्तां तिष्ठतु आत्मानं स्वमेव त्वं ब्रूहीति । इत्यर्थ इति । आर्थिकोयमर्थ इति भावः । एव मग्रेपि ॥ ४ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

० ॥ १—११ ॥

### श्रीमद्वीरराघवव्याख्या

नारदाय विपृच्छते वेदगर्भोऽभ्यधादित्युक्तं तत्र नारदप्रश्नमाह देवदेवेति । हे देवदेव हे भूतभावन भूतस्रष्टः । अत एव हे पूर्वज आत्मतत्त्वस्य निदर्शने नितरां प्रकाशकं यद्ज्ञानं तद्विजानीहि अंतर्भावितणिजर्थः विशेषेण ज्ञापयेत्यर्थः ॥ १ ॥ ❀ ❀ इदं कार्यं जगद्रूपं यस्य रूपं यदात्मकमित्यर्थः । अयं निमित्तप्रश्नः यतः सृष्टं यत उपादानभूतात्सृष्टं यदुपादानकमिति यावत् ।

यदधिष्ठानं यत्संस्थं यत्परमिति च बहुव्रीहिः यः आधारो यस्य तद्यदधिष्ठानं यदाधारकमित्याधारप्रश्नः । यस्मिन् संस्थालयो यस्य तत् यत्संस्थं अयं लयाधारप्रश्नः । यत्परं य अस्मात्परो विलक्षणः तद्यत्परं यदधीनमित्यर्थः । यच्च यदप्यन्यद्यदुपकरणत्वादिकमस्ति तत्तत्त्वं याथात्म्यं तत्त्वतो वदेत्यर्थः ॥ २ ॥ ❀ ❀ न जानामीति न वक्तव्यं इत्याह सर्वमिति । यत्पृष्टं तदेतत्सर्वं भवानेव जानाति । कुत इत्यत आह-भूतभव्यभवत्प्रभुः भूतभविष्यद्वर्तमानकालीनकस्य सर्वस्य जगतः प्रभुः पालकः किं च तव त्वया विश्वं जगत् विज्ञानेन भगवत्प्रसादलभ्यज्ञानेनावसितं निश्चितं करस्थामलकवत् एव जगद्विषयः प्रश्नः कृतः ॥ ३ ॥ ❀ ❀ आस्तां तावदिदं त्वामेव त्वं कथयेत्याह-यद्विज्ञान इति । यस्मिन्विषये तव विज्ञानमस्तीति सप्तमीबहुव्रीहिः । यतो विज्ञानं यस्य यद्विज्ञानस्तव विज्ञानद क इति वा यदाधारः य आधारो यस्य सः कस्तवाश्रयः । यत्परः य परो यस्य सः कस्तव स्वामी यदात्मकः य आत्मा यस्य सः कस्त्वदात्मेत्यर्थः । मम तु त्वमेव स्वतंत्रः परमेश्वर इति भासि तपश्चरणेन तु परशंकया पृच्छामीत्याह सार्द्धैश्चतुर्भिः । एक असहायः आत्ममायया आत्मनः संकल्पेन भूतैः पृथिव्यादिभूतैर्भूतानि देवादीनि भूतानि सृजसि त्वमिति शेषः ॥ ४ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

अस्मिन्नध्याये वेदगर्भनारदाख्यायिकाकथनव्याजेन ग्रंथादौ प्रतिज्ञातं जगज्जन्मादिकारणत्वलक्षणं तदेकनिष्ठमिति सप्रपंचं प्रतिपाद्यते यत्रादौ नारदप्रश्नप्रकारमाह देवदेवेति । यद्ज्ञानमात्मनः परमात्मनस्तत्त्वं निदर्शयतीत्यात्मतत्त्वनिदर्शनं तज्ज्ञानं मह्यं विजानीहि विज्ञापय आत्मब्रह्मणोस्तत्त्वज्ञाने महान्विशेषोऽस्तीति भेदस्य परमेश्वरप्रसादमंतरेण वागादींद्रियप्रवृत्तिरपि विपरीता भवतीति तत्स्वातंत्र्यस्य ब्रह्मा कर्ताऽहंकरणमिति करस्य विवक्षया व्यत्यस्योक्तं जीवब्रह्मभेदो हरेः स्वातंत्र्यं नारदस्य करणत्वमिति त्रयं व्यत्ययार्थः तदुक्तं व्यत्ययो भेदस्वातंत्र्यकरणेष्विति ॥ १ ॥ ❀ ❀ ज्ञेयं पृच्छति यद्रूपमिति । इदं विश्वं यस्य रूपमिव रूपं न तु साक्षाद्रूपं चित्वेन सत्त्वेन च सादृश्यात्तद्वशत्वाच्च तदुक्तं तद्वशत्वादिदं रूपं हरेनैव स्वरूपत इति योऽधिष्ठानं मूलाधारो यस्य तद्यदधिष्ठानं न त्वारोप्यमाणसर्पस्य रज्जुवदधिष्ठानं अधिष्ठानमिति प्रोक्तं मूलाधारं विचक्षणैरिति । इदं यतः सृष्टं संभूतं "यतो वा इमानि भूतानि जायंत" इति श्रुतेः । पीठवद्यस्मिन्संस्था संस्थानं यस्य तद्यत्संस्थम् । यत्स्थितं दृश्यते.वस्तुसंस्थानं तदुदीरितमिति च पूर्वं पृथिवीवत् अत्र तु पीठवदिति विशेषान्न पुनरुक्तिः यः परो यस्माज्जगतस्तद्यत्परं हरिः परोऽस्य जगतो ह्यव्यक्तादेश्च कृत्स्नश इति यस्मात्संस्था मृत्युः संहारो यस्य तद्यत्संस्थं येन परं पालनं यस्य तद्यत्परं येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति वा यच्च यदधीनं च यदधीना यस्य सत्ता तत्तदित्येव भण्यत इति विभेदे विद्यमानेऽपि मिथो नित्यस्वरूपत इति च तस्य हरेस्तत्त्वत त्वत्तो यथावद्वदेत्यन्वयः ॥ २ ॥ ❀ ❀ मम वक्तव्यांशे भवतो ज्ञानसामग्रीविद्यत इत्याह सर्वमिति । हिशब्देन प्रजापते न त्वदेतान्यन्य इत्यादिश्रुतिप्रसिद्धिं द्योतयति सर्वमेतदिति प्रतिज्ञा, भूतादिप्रभुरिति हेतुः हीतिव्याप्तिदर्शनं करतलामलकवदिति निदर्शनं विज्ञानेति निगमनम् ॥ ३ ॥ ❀ ❀ नैतत्सामान्यज्ञानं किंतु विशिष्टमेव हरिप्रसादायत्तत्वादिति भावेनाह यद्विज्ञान इति । यस्य प्रसादाद्विज्ञानं यस्य तव सत्वं यद्विज्ञानः य आधारो यस्य स तथा यः परो यस्मात्स तथा य आत्मा स्वामी यस्य स यदात्मकः त्वं तं वेदेति शेषः । उक्तादधिकं ज्ञातुं पूर्वपक्षं दर्शयति एकः सृजसीत्यादिना एकस्त्वमेवात्ममायया स्वेच्छया भूतानि चराचराणि पृथिव्यादिपंचभूतैः सृजसि ॥ ४ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

० ॥ १—३॥ यद्विज्ञान इत्यादौ तं वदेति शेषः । मम तु तत्तद्रूपत्वेन त्वमेव भासीत्याह एक इति । ( अत्रास्ताम् इत्यादिटीकायां त्वामेव इत्यत्र आत्मानमेव कथयेति तु वाच्यम् । ) ॥ ४ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

पञ्चमे नारदं प्राह तत्त्वानां सृष्टिमात्मभूः । तैर्विराजश्च तत्पादाद्यङ्गैर्भूरादिकल्पनाम् ॥ ० ॥

भूतानि भावयन्ति सृजन्तीति भूतभावना मरीच्यादयः पूर्वजा अस्मद्भ्रातरो यस्मात् हे यथाभूत । आत्मना परमात्मजीवात्मनोस्तत्त्वनिदर्शनं तत्त्वज्ञापकं यत् ज्ञानं तत् विजानीहि विशेषेण जानासि लडर्थे लोट् विज्ञापयेति वा ॥ १ ॥ ❀ ❀ इदं विश्वं यद्रूपं यदस्य लक्षणं, यदधिष्ठानं योऽस्याश्रयः, यतः येन सृष्टं, यत्संस्थं यस्मिन् लीयते, यत्परं यस्याधीनं, यच्च यदात्मकं तस्य तत्त्वं याथार्थ्यं तत्त्वतो वद ॥ २ ॥ ❀ ❀ सर्वं परमात्मजीवात्मजगदिति त्रिकम् । भूतं पूर्वजातं प्राणिवृन्दम् । भव्यं जनिष्यमाणम् । भवत् जायमानम् । तेषां प्रभुर्यतः अतो विशिष्टेन ज्ञानेनावसितमवगतं करस्थम् आमलकफलमिव ॥ ३ ॥ ❀ ❀ आस्तामिदम् आदौ तावत् त्वामेव त्वं ब्रूहीत्याह । यद्विज्ञानः यतो विज्ञानं यस्य सः यस्तव विज्ञानप्रदः । यदाधारो यस्तवाश्रयः यत्परः यस्य त्वमधीनः । यदात्मकः यस्तवात्मा । मम तु त्वमेव स्वतन्त्रः परमेश्वर इति बुद्धिः । तव तपश्चरणेन पराशङ्कया पृच्छामीत्याह सार्द्धैश्चतुर्भिः । एकः असहायः ॥ ४ ॥

## श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः ।

श्रीनारदं श्रीब्रह्मोपदेशं वक्तुं तावत् श्रीनारदप्रश्नानाह देवदेवेति । आत्मनस्तत्त्वस्य निदर्शनं प्रकाशकं यद्ज्ञानं तद्विजानीहि विशेषतो ज्ञापय अंतर्भावितणिजर्थः ॥ १ ॥ ❁ ❁ इदं विश्वं यद्रूपं येन रूप्यते प्रकाश्यते यत्प्रकाश्यं यदधिष्ठानं यदाधारकं यत्सृष्टं येन निर्मितं यस्मिन्संस्थालयो यस्य तद्यत्संस्थम् ॥ यत्परं यदधीनम् यच्च यदात्मकं तत्तत्वं तस्य तत्त्वमुक्तषट्प्रश्नप्रत्युत्तर-द्वारा याथात्म्यं तत्त्वतो वदेति षट्प्रश्नाः ॥ २ ॥ ❁ ❁ तदुक्तुं भवान्क्षम इत्याह एतदस्मत्पृष्टं सर्वं भवान्वेद यतो भूत-भविष्यवर्तमानानां प्रभुस्तन्निर्णये क्षमः । तत्र हेतुः करस्थामलकवद्विश्वं तव विशिष्टेन ज्ञानेनावसितं निश्चितम् ॥ ३ ॥ ❁ ❁ किंच यतो विज्ञानं यस्य स यद्विज्ञानः कुतो विज्ञानवानसीत्यर्थः । य आश्रयो यस्य स यदाश्रयः कस्तवाश्रय आधार इत्यर्थः । यत्परः यदधीनः यदात्मकः य आत्मा यस्य स यदात्मकः कस्तवात्मेत्यर्थः । इति चत्वारः प्रश्नाः अहं तु त्वामेव परमेश्वरं जानामि यत एकः असहायस्त्वमात्ममायया स्वशक्त्याभूतैः पंचभूतैर्भूतानि देवमनुष्यादीनि सृजसि ॥ ४ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

[1]विमर्शः षड्भिरध्यायैः क्रियते स द्विधा मतः । उत्पत्त्या चोपपत्त्या च तत्राऽद्योऽपि द्विधा मतः ॥ १ ॥
स्थूलान्तर्यामिभेदेन मूर्त्तामूर्त्तविभेदतः । स्थूलोऽपि द्विविधस्तत्र स्थूलमूर्तवि[2]मर्शने ॥ २ ॥
उत्पत्त्या पञ्चमाध्यायः सोपपत्त्या निरूपकः । पुरुषः क्रमतः शक्तित्रयं गृह्णन्भवादिकृत् ॥ ३ ॥
[3]इत्युक्त्वा नारदाजाभ्यां जन्मभिर्नेति गद्यते । एकीभूते प्रवेशेन निर्गमादपि विह्वलः ॥ ४ ॥
अथवा दार्ढ्यतासिध्यै नारदः पृच्छति स्फुटम् । प्रश्नत्रयं नारदेन क्रियते तत्त्वनिर्णये ॥ ५ ॥
आत्मनो जगतश्चाऽपि निर्द्धारो भजनस्य च । द्वयोर्निर्द्धारशेषत्वं तेन प्रत्युत्तरं ततम् ॥ ६ ॥
द्वितीयस्य द्विरूपत्वं बहिरन्तर्व्यवस्थया । विराजोऽन्तर्मुखत्वाद्धि विपरीतेन वर्ण्यते ॥ ७ ॥
स्थूललिङ्गविभेदो वा तेनाऽध्यायद्वयं मतम् । प्रथमस्योत्तरं पश्चात्तदन्तर्यामिसम्भवे ॥ ८ ॥

एवं पूर्वाध्याये परीक्षिच्छुकयोः [4]फलमुखं साधनं निरूप्य [5]पूर्वोक्तस्य च साधनस्य च विचारार्थमध्यायषट्कारम्भः । तत्र पञ्चमाध्याये साधनस्य स्थूलरूपस्य चोत्पत्त्या निर्णय उच्यते । तत्र प्रथमं तत्त्वस्य दुर्ज्ञेयत्वं वदन्वक्तारं विशिनष्टि—देवदेवेति । अयं नमस्कारः प्रश्नार्थः । नारदो जिज्ञासार्थं प्रवृत्तः कथं देवनमस्कारं न कृतवानित्याशङ्क्याऽऽह । हे देवानां देव । अनेन देवता-गुरुरूपो भवानेव ममेति न पृथङ्नमस्कारः कर्त्तव्य इति सूचितम् । अस्त्विति प्रार्थना प्रमेयसमाप्तिपर्यन्तं मङ्गलानुवृत्त्यर्थम् । आत्मानमुपदेक्ष्यति निश्चयेनेति । स्वप्रवृत्तौ हेतुज्ञापकं विशेषणमाह—भूतभावनेति । भूतानि भावयत्युत्पादयति । शोधयति वा । स्वयं वेदानुदरे दिव्याग्निरूपान्निवेश्य तत्र सर्वाञ्जीवान् शुद्धान्कृत्वा पश्चान्निष्काशयतीति शोधकत्वम् । पूर्वजेति । हे पितः । सन्देहे पूर्वज एव पृच्छयते । अथवा । सर्वापेक्षया भवानेव पूर्वमुत्पन्नः । अतस्त्वत्तः कोऽप्यन्यो महान्नास्तीति त्वमेव प्रष्टव्य इत्यर्थः । एवं तं स्तुत्वा प्रष्टव्यमाह—तद्विजानीहीति । तद्विशेषाकारेण त्वं जानीहि ज्ञापय वा ज्ञानं किमिति । सर्वे हि वदन्ति ज्ञानं ज्ञानमिति । तत्किं ज्ञानं आत्मा वा, आत्मसाक्षात्कारो वा, श्रुतिसहितो वा, प्रवेशहेतुर्वा, भक्तिजनको वा, परोक्षं वा, स्मृतिरूपं वेति । तत्र निर्द्धार्य त्वया वक्तव्यमित्यर्थः । किञ्च । यत्राऽऽत्मतत्त्वस्य विमर्शनं विचारो भवति । अनेन ज्ञाने[6] अङ्गद्वयमपि पृष्टं क आत्मा किं तत्त्वमिति । तत्राऽपि लोके[7]प्रसिद्धं तन्न भवति । किन्तु विचारसाध्यमिति विचारोऽपि वक्तव्य इति सूचितम् । [8]एवं चत्वारः प्रश्नाः सम्पन्नाः ॥ १ ॥ ❁ ❁ किञ्च । तत्त्वे भेदान्पृच्छामीत्याह—यद्रूपमिति । तत्त्वमनारोपितं रूपम् । तत्सर्वस्याऽपि जगतो जन्यत्वादात्मनोऽपि प्रादुर्भूतत्वात्स[9]र्वस्यैवाऽऽरोपविषयत्वात् । अतस्तस्य रूपं वक्तव्यम् । यद्रूपं स्वरूपं यस्य । आरोपितत्वानारोपितत्वे हि साधिष्ठाने भवतः । अतस्तदधिष्ठानमपि वदेत्याह—यदधिष्ठानमिति । लोकेऽपि जगतस्तत्त्वव्यवहारा-त्तत्त्वानां च तत्त्वव्यवहारान्मू[10]लतत्त्वाभावे तन्न घटत इति जगतः कारणमपि तत्त्वं वदेत्याह—यतः सृष्टमिदमिति । वादिविप्रति-पत्तेश्च कुतो जगज्जातमिति । किञ्च । यत्संस्थम् । यस्मिन् संस्था स्थितिर्यस्य । संस्था मृत्युर्वा विमर्शशेषत्वेन जगतो वा प्रश्नः । तदा तत्त्वे प्रश्नद्वयम् । सृष्टौ प्रश्नचतुष्टयम् । उत्पत्तिस्थितिप्रलयाः स्वरूपं चेति तद्विषयाः । तस्य भावस्तत्त्वमिति भगवतो भावो जगदेव । आत्मा तु तत् । अथवा सामान्यतस्तत्त्वं विचार्यते । तेनैकमनेकं वा फलिष्यति । यत्परमिति । यः परो नियन्ता यस्य । अनेन स्थितिरुक्ता । एकपक्षे तत्तत्त्वं क[11]स्य परभूतमिति । को वा तस्य तत्त्वस्य ग्राहक इत्यर्थः । रूपं हि द्विविधं, प्रमाणतः

---

१. विमर्ष इति ग. । २. विमर्षणे इति क. ख. । ३. इत्युक्ता इति घ. ङ. । ४. साधनमुखमिति ग. । ५. पूर्वोक्तस्य साधन-स्येति क. ख. । ६. ज्ञानेनेति ग. । ७. लोके प्रसिद्धमिति घ. ङ. । ८. एते इति ग. । ९. सर्वस्यैवापरोक्षेत्यादि ग. । १० स्थूलतत्वाभावेति ग. । ११. कस्यापरभूत मिति क. ख. परिभूतमिति घ. ।

स्वरूपतश्च । तत्र यद्रूपमिति प्रमाणतः । यत्रेति स्वरूपतः । तत्त्वस्य जगद्रूपत्वे भिन्नत्वे वा षडङ्गानि पृष्टानि । एतेषां भेदानां ज्ञानं यथा तत्त्वतो ज्ञातं भवति तथा वदेत्यर्थः ॥ २ ॥ ❀ ❀ यथा त्वं जानासि तथा ज्ञानमस्माकं कुर्वित्यभिप्रायेण तस्य सर्वज्ञतामाह—सर्वं ह्येतद्भवान्वेदेति । अतीतानागतयोर्ज्ञानं न भविष्यतीति तस्य कालसाध्यत्वात्कालरूपस्तन्नियन्ता वा भवानेवेत्याह । यथा रहट्टघटिकायां केचनोद्गतामज्जन्त्युद्गच्छन्ति च, तथा काले जगन्निमज्जति ततः उद्गच्छति । ततो यः काले बहिरपि तिष्ठति स हि सर्वं जानाति । यथा जले बहिरपि स्थितिः । किञ्च । योगजधर्मेणाऽपि तव सर्वं प्रत्यक्षमित्याह—करामलकवदिति । विज्ञानावसितं विज्ञाने स्थितं निश्चितमिति वा । आवेशितमिति पाठे उत्तरकार्यार्थं सर्वमेव ज्ञाने निवेशितम् । करस्थितमामलकफलं प्रति न कोऽपि सन्दिग्धे ॥ ३ ॥ ❀ ❀ किञ्च । त्वया स्वस्वरूपमपि वक्तव्यमित्याह—यद्विज्ञान इति । यत् यतो वा विज्ञानं यस्य । तव विज्ञानदाता क इत्यर्थः । किञ्च । तव आधारः कः । तव च नियन्ता । त्वं च किमात्मक इति । एवं चत्वारः प्रश्नाः । साधारणत्वं वारयति यथा सर्वे तथाऽहमिति । एकः सृजसि । त्वमेक एव भूतानि देवतिर्यङ्मनुष्यरूपाणि भूतैस्तैरेव महाभूतैर्वा सृजसि । अतस्त्वयि चत्वारः प्रश्ना इत्यर्थः । आत्ममाययेत्यग्रिमश्लोकः स्वातन्त्र्ये हेतुप्रतिपादकः । माहात्म्यबोधको वा पूर्वशेषः । आत्ममायया । स्वस्य सर्वभवनसामर्थ्ये नैव सर्वं सृजसि ॥ ४ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः ।

अथ तृतीयप्रकरणं विवरिषवः सङ्गतिमुखेन प्रकरणप्रयोजनस्य पूर्वमेवोक्तत्वात् तत्कथनमात्रमत्र प्रतिजानन्तस्तदवान्तरप्रकरणार्थमध्यायार्थञ्च विवेक्तुं प्रकरणार्थं तद्द्वैविध्यमध्यायसङ्ख्याञ्च निरूपयन्ति विमर्श इत्यादिचरणत्रयेण । तत्र प्रथमकरणार्थद्वैविध्यमाहुः तत्राद्य इति, विमर्शाख्ये तृतीयप्रकरणे, आद्यः उत्पत्तिविमर्शप्रकरणार्थः द्विधा, स्थूलान्तर्यामिभेदेन, द्विप्रकारको मत इत्यर्थः । नन्वेवं सत्यध्यायद्वयमेवास्त्वित्यत आहुः मूर्त्तेत्यादि । तथा च, तदवान्तरप्रकरणार्थस्यापि द्विविधत्वान्नाध्यायद्वयेन प्रकरणपूर्त्तिरित्यध्यायत्रयमत्र युक्तमेवेत्यर्थः । अतः परं प्रस्तुताध्यायार्थमाहुः तत्रेत्यादि । तत्र प्रकरणद्वयमध्ये । स्थूलमूर्त्तविमर्शने स्थूलं यन्मूर्त्तं पञ्चाशत्कोटिपरिमाणकं ब्रह्माण्डम्, तस्य विमर्शने याथात्म्यविचारे सोपपत्त्या उत्पत्त्या साधकप्रमाणसहितेन विराट्जनेन पञ्चमाध्यायो निरूपकः, स्थूलमूर्त्तरूपस्य कार्यस्य कारणात्मकताज्ञापक इत्यर्थः । नन्वत्र नारदब्रह्मणोः संवादरूपेऽध्याये मूर्त्तस्य ब्रह्मत्वसाधिका का वा उपपत्तिरित्यत आहुः पुरुषः इत्यादि । नारदाजाभ्यां श्रोतृवक्तृभ्यां पुरुषः क्रमेण सत्त्वादीन् गृह्णन् उत्पत्त्यादिकृदित्युक्त्वा निमित्तमात्रत्वशङ्काव्युदासाय जन्मभिर्निमित्तत्वमात्रपरिचायकैर्न तावन्मात्रत्वेन, किन्त्वभिन्ननिमित्तोपादनत्वेन, क्रियाश्रयत्वरूपमपि कर्तृत्वमित्येवं निगद्यते । नारदेन ब्रह्मण्यूर्णनाभिदृष्टान्त उक्तः । ब्रह्मणा चाग्रे वाक्यद्वयमुक्तम् । तेनोभाभ्यामेव अभिन्ननिमित्तोपादनत्वं भगवतो निरूपितम् । तेनैव कार्यस्य भगवत्त्वम् इत्यर्थः । ऊर्णनाभिदृष्टान्तेन 'स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः' । 'इति लोकमयः पुमा'नित्यादिना च व्यक्तमुच्यते, इत्येषोपपत्तिरित्यर्थः । ननु 'भूतं भव्यं भवच्च यत्' 'न यतोस्ति किञ्चित्' 'स सर्वधीवृत्त्यनुभूतसर्वः' 'तं भजे' दित्यादिविरुद्धवाक्यश्रवणे राज्ञः सन्देहात्प्रश्न उचितः, परं नारदस्य तु सन्देहाभावात् कथं प्रश्न इत्यत आहुः एकीभूत इत्यादि । प्रलये भगवदुदरान्तः प्रवेशेनैकीभूते पदार्थजाते निर्गमात् सृष्टौ पुनर्यथासंस्थं निःसरणाद् विह्वलः, किमभेदस्तात्त्विक उत भेद इति संशयव्याकुलः पृच्छति । अथवा स्थूणाखननवद्दार्ढ्यतासिद्ध्यै कर्मणि ष्यञ् दृढस्य कर्म दार्ढ्यम्, तस्य भावो दार्ढ्यता, तत्सिद्ध्यै । एवं प्रकारकजगदुत्पत्त्यादिकरणं न सामान्यस्य कर्म, किन्त्वतिबलस्येति तादृशत्वज्ञापनायेत्युभयथापि प्रश्न उचित इत्यर्थः । ननु प्रत्युत्तरे किमिति विस्तार इत्यत आहुः प्रश्नेत्यादि, तत्त्वनिर्णये कर्त्तव्ये सति नारदेनात्मजगद्भजनानां निर्द्धारविषयकप्रश्नत्रयं क्रियते । तत्र द्वयोरात्मजगन्निर्णययोः भजननिर्द्धारशेषत्वम् । तेन हेतुना प्रत्युत्तरं ततं विस्तृतमित्यर्थः । यद्यपि त्रयोदशप्रश्नास्तथापि 'तद्विजानीहि'त्यादिज्ञापकान्मुख्यं त्रयमेवेति तथोक्तम् । ननु जगन्निर्णये किमित्यध्यायद्वयमित्यत आहुः द्वितीयस्येत्यादि । हीति निश्चयेन, विराजोन्तर्मुखत्वाद् विपरीतेन वैपरीत्येन बहिरन्तर्व्यवस्थया द्वितीयस्य जगतः द्विरूपत्वं स्थूललिङ्गविभेदो वा तेन हेतुनाध्यायद्वयं मतमित्यर्थः । ननु प्रश्नोत्तरयोः किमिति व्युत्क्रम इत्यत आहुः प्रथमस्येत्यादि । तदन्तर्यामिसम्भवे, आत्मज्ञानस्यात्मानात्मविवेकसापेक्षत्वादनात्मानौ विविच्य तदतिरिक्तत्वेन तन्नियामकत्वेन चात्मबोधने सौकर्येणात्मज्ञानसम्भवात्तद् आत्मज्ञानमन्तर्यामिप्राकट्ये सति भवति, अतस्तथोच्यते । अध्यायषट्कारम्भहेतूक्तौ पूर्वोक्तस्य साधनस्य विचारार्थमिति । भगवच्छ्रवणरूपस्य साधनस्य किं लक्षणको विषयः ? कथञ्च तस्य परीक्षेत्येतदर्थमित्यर्थः । तत्रेत्यादि, तत्र श्रवणविषये निश्चेतव्ये, षडध्यायीमध्ये वा साधनस्य विषयत्वेन श्रवणजनकस्य स्थूलरूपस्य उत्पत्त्या भगवतः सकाशाज्जननेन निर्णयः भगवदुपादानकत्वनिर्णय उच्यत इत्यर्थः ।

देवेदेत्यत्र कथं शोधयतीत्याकाङ्क्षायामाहुः स्वयमित्यादि । विजानीहीति ज्ञाधातुर्वेदनार्थकोन्तर्भावितण्यर्थो वेत्यभिप्रेत्याहुः ज्ञापयतेति । श्रुतिसहित इति, श्रुतिसहकृत आत्मादिसाक्षात्कारः । परोक्षमिति आत्मभगवदनुमितिरूपं

---

१. 'प्रकारद्वये'ति पाठः ।

तद्विषयकशाब्दरूपं वा । अत्रैको निर्विषयं पञ्चविधं सविषयं साक्षात्काररूपं शेषं स्फुटम् । अत्र प्रश्नवाक्ये उक्तविकल्पानां निवेशे ज्ञापकमाहुः किञ्चेत्यादि, अनेनेति । विशेषणेनाङ्गद्वयमिति स्वरूपं विषयश्च । एवमिति । तथा च, ज्ञानिपद प्रवृत्तिनिमित्तं ज्ञानं किमिति सामान्यप्रश्नः एकः । ततस्तत्स्वरूपं निर्विषयमात्मरूपञ्चेत्क आत्मेति द्वितीयः । सविषयं चेत्किं तस्य विषयरूपं तत्त्वमिति तृतीयः । विमर्शपदेन च लक्षणपरीक्षे इत्येवमित्यर्थः ॥ १ ॥ ❀ ❀ यद्रूपमित्यत्र, किञ्च तत्त्वमित्यादि । सविषयपक्षे तत्त्वभेदान्, तद्व्युत्पादयन्ति तत्त्वमित्यादि । अत इति दुर्ज्ञेयत्वात् । यदधिष्ठानमिति पदं मायावादिवत्पूर्वपक्षस्य ज्ञापकमित्याशयेनाहुः आरोपितेत्यादि । अग्रिमे प्रश्ने बीजमाहुः लोक इत्यादि । तत्र घटत इति तत्त्वव्यवहारविषयत्वं न युज्यते । कारणे प्रश्ने हेत्वन्तरमप्याहुः वादीत्यादि । कुत इति कस्मात् किंरूपाच्च । अत्र कालः स्वभावो नियतिर्यदृच्छाभूतानि योनिः पुरुष इति चिन्त्यम् । 'संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतोरि'ति श्रुतिरनुसन्धेया । 'एवञ्च यतः सृष्टं यत्संस्थमि'त्युभाभ्यां जगदुत्पत्तिस्थितिभङ्गकर्तुः प्रश्न इति सिद्ध्यति । पूर्वं विवर्त्तोपादानप्रश्नस्य सिद्धत्वादिति । अतोत्र पञ्च प्रश्नाः । पक्षान्तरमाहु विमर्शेत्यादि । तत्प्रकारमाहुः तदेत्यादि । तद्विषया इति तेषां प्रश्नानां विषयाः । तथा च, यद्रूपमित्यादितत्त्वे प्रश्नद्वयं, यतः सृष्टमित्यादिना जगतः, तत्रापि यत इत्यनेनोपादानबोधनात् स्वरूपस्य प्रश्न इत्येवं षडित्यर्थः । ब्रह्मवादेन विशिष्टाद्वैतवादेन वाऽयं प्रश्न इत्याशयेनाहुः तस्य भाव इत्यादि । अस्मिन् पक्षे यद्रूपमित्यनेन तत्पदार्थरूपस्यात्मनः स्वरूपप्रश्नः शेषैर्भावपदार्थभूतस्य जगतः प्रश्नः । अस्मिन्नपि पक्षे चत्वारः पञ्च वा प्रश्ना भवन्ति । अत्रावान्तरवादगमकस्याभावान्नैवं व्याख्यानं युक्तमित्यरुच्या पक्षान्तरमाहुः अथवेत्यादि । तथा च, यदिति सर्वत्र भिन्नं पदम्, तथा सति रूप्यत इति रूपं जगत्, तद्वा, तदधिष्ठानं वा, तज्जनकं वा, यद्वा सम्यक् तिष्ठति तत् । एवञ्चैतेष्वन्यतममेकं वा सर्वं वेति प्रश्नः फलिष्यतीत्यर्थः । नियन्तेति स्थापकः । पञ्चभिरेव प्रश्नपूर्त्तेर्येचेति षष्ठस्य किं प्रयोजनमत आहुः रूपमित्यादि । एतेषामित्यादि । एतेन तत्तत्वमित्यत्र तेषां तत्त्वं तत्तत्त्वमिति वा, तत् तत्, त्वमिति भिन्नं पदत्रयं वेति बोधितम् ॥ २ ॥ ❀ ❀ सर्वमित्यत्र न भविष्यतीति । इत्याशङ्क्येति शेषः । आहेति 'भूतभव्यभवत्प्रभुरि'ति विशेषणेनाहेत्यर्थः । अत्र कालरूपत्वपक्षे भूतादिभिर्व्यवहारैः प्रकर्षेण भातीति भूतभव्यभवत्प्रभुरित्येवमर्थो ज्ञेयः । नियन्तृपक्षे सर्वज्ञतां व्युत्पादयन्ति यथा रहङ्गेत्यादि । तत्र दृष्टान्तः, यथाजलेत्यादि । शयने जागरणे च यथा यदुभयविषयकं, तव ज्ञानं तथेत्यर्थः ॥ ३ ॥ ❀ ❀ यद्विज्ञान इत्यत्र क्रियात्मक इति । जीवेश्वरयोर्मध्ये कस्यां कोटौ । आत्मन्नित्यत्र स्वयमित्यस्य द्वितीयान्तत्वमभिप्रेत्य पक्षान्तरमाहुः आत्मनं वेत्यादि ॥ ४ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

हृत्प्रसादं निरूप्याथ मननं विनिरूप्यते । तत्र तु प्रथमेऽध्याये जननं विनिरूप्यते ।

'नारदाय विपृच्छते वेदगर्भोऽभ्यधात्' इत्युक्तं तत्र नारदप्रश्नमाह—देवदेवेति । अनेन प्रश्नादौ गुरुदेवतापितृनमस्कारात्मकं मङ्गलं कृतम् । कथं देवदेवत्वमित्याकाङ्क्षायां तत्र हेतुत्वेन सम्बोधनान्तरमाह—हे पूर्वजेति, सर्वेभ्यो देवादिभ्यः पूर्वमेव जातेत्यर्थः । तत्रापि हेतुत्वेन सम्बोधनान्तरमाह—हे भूतभावनेति, भूतानि प्राणिनो भावयति उत्पादयतीति तथा । आत्मतत्त्वस्य निदर्शनं नितरां प्रकाशकं यज्ज्ञानं ज्ञायतेऽनेनेति ज्ञानं शास्त्रं तद्विशेषेण जानीहि ज्ञापयेत्यर्थः ॥ १ ॥ ❀ ❀ एवं सामान्यतः पृष्ट्वा तद्विशेषतः पृच्छति—यद्रूपमिति । इदं विश्वं यद्रूपं येन रूप्यते प्रकाश्यते इति प्रकाशकप्रश्नः, यदधिष्ठानं यदाश्रयमित्याधारप्रश्नः, यतो येन सृष्टमिति कर्त्तृप्रश्नः, यस्मिन् संस्था लयो यस्य तद्यत्संस्थमिति लयाधारप्रश्नः, यत्परं यदधीनमिति स्वामिप्रश्नः, यच्च यदात्मकं च, तस्यैतस्य तत्त्वं तत्त्वतो यथार्थतो वद । एतज्ज्ञाने कथने च त्वं समर्थोऽसीत्याशयेन सम्बोधयति—हे प्रभो इति ॥ २ ॥ ❀ ❀ न जानामीति न वक्तव्यमित्याह—सर्वमिति । यन्मया पृष्टं तदेतत्सर्वं भवान् वेद जानात्येव । तत्र हेतुमाह—करामलकवत्सर्वमपि विश्वं तव विशिष्टेन ज्ञानेनावसितं निश्चितम् । तत्रापि हेतुमाह—हि यस्माद्भूतं भव्यं जनिष्यमाणं भवज्जायमानं तेषां प्रभुः त्वमेवोत्पादक इत्यर्थः ॥ ३ ॥ ❀ ❀ एवं जगद्विषयकप्रश्नं कृत्वा इदानीमास्तां तावदिदं त्वमेवं कथयेत्याह—यद्विज्ञान इति । यतो विज्ञानं यस्य स यद्विज्ञानः, तव विज्ञानदः क इत्यर्थः । य आधारो यस्य स यदाधारः, तवाधारः क इत्यर्थः । यः परः स्वामी यस्य स यत्परः, तव स्वामी क इत्यर्थः । य आत्मा यस्य स यदात्मकः, तवात्मा क इत्यर्थः । मम तु त्वमेव स्वतन्त्रः परमेश्वर इति प्रतिभाति परन्तु तव तपश्चरणेन परशङ्कया पृच्छामीत्याह—एक इति सार्धैश्चतुर्भिः । एकोऽसहाय एवं भवा[1]नात्ममायया स्वसङ्कल्पमात्रेण सृष्टैर्भूतैः पृथिव्यादिपञ्चमहाभूतैर्भूतानि देवतिर्यङ्मनुष्यादिरूपाणि सृजति ॥ ४ ॥

---

१. भवानित्यध्याहृत्य तदनुसारत एव व्याख्यानं कृतमेतत् ।

## हिन्दी अनुवाद

नारदजीने पूछा—पिताजी ! आप केवल मेरे ही नहीं, सबके पिता, समस्त देवताओंसे श्रेष्ठ एवं सृष्टिकर्ता हैं । आपको मेरा प्रणाम है । आप मुझे वह ज्ञान दीजिये, जिससे आत्मतत्त्वका साक्षात्कार हो जाता है ॥ १ ॥ ❀ ❀ पिताजी ! इस संसारका क्या लक्षण है ? इसका आधार क्या है ? इसका निर्माण किसने किया है ? इसका प्रलय किसमें होता है ? यह किसके अधीन है ? और वास्तवमें यह है क्या वस्तु ? आप इसका तत्त्व बतलाइये ॥ २ ॥ ❀ ❀ आप तो यह सब कुछ जानते हैं; क्योंकि जो कुछ हुआ है, हो रहा है या होगा, उसके स्वामी आप ही हैं । यह सारा संसार हथेलीपर रक्खे हुए आँवलेके समान आपकी ज्ञानदृष्टिके अन्तर्गत ही है ॥ ३ ❀ ❀ पिताजी ! आपको यह ज्ञान कहाँसे मिला ? आप किसके आधारपर ठहरे हुए हैं ? आपका स्वामी कौन है और आपका स्वरूप क्या है ? आप अकेले ही अपनी मायासे पञ्चभूतोंके द्वारा प्राणियोंकी सृष्टि कर लेते हैं, कितना अद्भुत है ! ॥ ४ ॥

**आत्मन् भावयसे तानि न पराभावयन् स्वयम् । आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ॥५॥**
**नाहं वेद परं ह्यस्मिन्नापरं न समं विभो । नामरूपगुणैर्भाव्यं सदसत् किञ्चिदन्यतः ॥६॥**
**स भवानचरद् घोरं यत् तपः सुसमाहितः । तेन खेदयसे नस्त्वं पराशङ्कां प्रयच्छसि ॥७॥**
**एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर । विजानीहि यथैवेदमहं बुद्ध्येऽनुशासितः ॥८॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

आत्मनि भावयसे पालयसि स्वयमेव पराभवमप्राप्नुवन्नक्लमः श्रमरहितः यथोर्णनाभिरात्मन एव शक्तिमवष्टभ्य सृजति तद्वत् ॥ ५ ॥ ❀ ❀ तस्मादहं त्वस्मिन्विश्वस्मिन्परमुत्तममपरमधमं समं मध्यमं च तत्रापि नाम मनुष्यादिरूपं द्विपदत्वादि गुणः शुक्लत्वादि तैर्भाव्यं साध्यं तत्रापि सदसत्स्थूलं सूक्ष्मं च किंचिदप्यन्यतो न वेद किंतु त्वत्त एव सर्वं भवतीति मन्ये ॥ ६ ॥ ❀ ❀ स तथाविधोऽपि भवांस्तपोऽचरदिति यत्तेन नोऽस्मान्खेदयसे मोहयसि यतः पराशंकाम् ईश्वरान्तराशंकाम् प्रयच्छसि । त्वत्तपो दृष्ट्वा त्वदपेक्षयाऽन्यो महानस्तीति शंका भवतीत्यर्थः ॥ ७ ॥ ❀ ❀ यथैवाहं त्वयानुशासितः शिक्षितः सन्बुद्ध्ये बुद्ध्येयं तथा विजानीहि विशेषेण ज्ञापय ॥ ८ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

आत्मनि भावयसे न पराभावयन्निति च स्ववैभवाधिक्येपि सतीति शेषः सूर्यादौ विद्यमाने दीपादेः पराभवदर्शनात् । अत उपादानकरणत्वमेव भवत आयाति सूर्यादौ विद्यमाने रश्म्यादेस्तददर्शनादिति भाव इति संदर्भः । भावयसे पालयसि तानि न पराभावयन्नन्यतः पराभवमप्रापयन् ॥ ५ ॥ ❀ ❀ यस्मात्त्वमेव सर्वेश्वरस्तस्माद्धेतोः तत्रापि उत्तमाधमादिरूपत्वेपि हे विभो इति अहो सर्वेश्वरो भूत्वाऽयमपि कंचन ध्यायतीति तव विभुत्वेपि संदेहोस्तीति भावः ॥ ६ ॥ ❀ ❀ तेन तपआचरणेन ॥ ७ ॥ ❀ ❀ सर्वज्ञेति । सर्वज्ञत्वान्मम बुद्धिमपि जानास्येवेति भावः । सकलेश्वरेति । सकलजगतस्त्वमेव बुद्धिदाता सकलेश्वरत्वान्मम तु पुत्रस्य तद्दाने का वार्त्तेति भावः ॥ ८ ॥

### श्रीमद्वीरराघवव्याख्या

तानि सृष्टानि भूतान्यात्मन्नात्मनि स्वास्मिन्नित्यर्थः । स्वयं न पराभावयन्स्वात्मानं परिभवमप्रापयन् अमोघवांछ इत्यर्थः । भावयसे पालयसि । ऊर्णनाभिः सूत्रनाभिः[1] कीटविशेषस्तद्वदात्मानं शक्तिं प्रकृतिं अवष्टभ्याक्लम अस्पृष्टश्रमः सृजसि पासि संहरसीत्यर्थः ॥ ५ ॥ ❀ ❀ एतदेवोपपादयति नाहमिति । अहं त्वस्मिन्[2]कारणविषये परमुत्कृष्टमवरं निकृष्टं समं मध्यमं देवादिनामद्विपदादिरूपशुक्लादिगुणैर्भाव्यं सदसदात्मकं चेतनाचेतनात्मकं किंचिदपि वस्त्वन्यतो न वेद किंतु त्वत्त एव जानामीत्यर्थः यद्वा अस्मिन्कार्यावस्थं नामरूपाभ्यां सत्त्वादिगुणैश्चोपलक्षितत्वेनानिष्पाद्यं चेतनाचेतनात्मकं किञ्चिदपि वस्त्वन्यतो न वेद किन्तु त्वत्त एव जानामीत्यर्थः । यद्वाऽस्मिन्कार्यावस्थे नामरूपाभ्यां सत्वादिगुणैश्चोपलक्षितत्वेनानिष्पाद्यं चेतनाचेतनात्मकं किंचिदपि वस्तु इदमनेन सममिदं निकृष्टमिदमुत्कृष्टमिति न जानामीत्यर्थः ॥६॥ ❀ ❀ यत्परस्त्वमित्यादिप्रश्नः कुतः प्रसक्त इत्यत्राह स इति । घोरमितरैश्चर्तुमशक्यं महत्तपः स भवान् जगत्स्रष्टा भगवानिति पाठान्तरं तदा पूज्यत्वमित्यर्थः । अचरदाचरति कृतवान् तेन तपश्चरणेन किमस्मादपि परमस्तीति शंकां प्रयच्छसि ततस्त्वं नः खेदयसे परशंकाप्रदानेन चित्तविक्षेपं जनयसीत्यर्थः ॥ ७ ॥

---

1. प्रा० पा०—सूत्रनाभि० । 2. प्रा० पा०—तस्मि० ।

❀ ❀ प्रश्नमुपसंहरति एतदिति। हे सर्वज्ञ सकलेश्वर त्वयाऽनुशासितः शिक्षितोऽहं इदं भवतोपदेक्ष्यमाणं यथैव बुध्ये जाने तथैतत्सर्वं पृच्छतो मे मह्यं विजानीहि विशेषेण ज्ञापय ॥ ८ ॥

**श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या**

कुलालादेः कालाद्यधिष्ठानं दृष्टं किमस्याधिष्ठानमत्राह आत्मन्निति। अक्लमस्त्वं तानि भूतानि सूत्रनाभिरूर्णनाभिरिवात्मशक्तिं निजसामर्थ्यमवष्टभ्यात्मन्नात्मनि भावयसे उत्पादयसि पालयसि च पराकृत्वत्तो बहिर्न भावयेः ॥ ५ ॥ ❀ ❀ भावयसे वर्धयसे च इति यत्तस्मादस्माद्भवतो विश्वस्य परमुत्तमं कारणमहं न वेद अवरं हीनं समं कारणं च न वेद तु शब्देनोक्तार्थमवधारयति। निगमयति। नामेति। नाम्ना वाचकेन रूपेण शुक्लादिना गुणैः सत्त्वादिभिः सत्स्थूलमसत्सूक्ष्मञ्च किंचिद्वस्तु यद् भाव्यमुत्पाद्यं तत्त्वदन्यत इत्यपि गर्हितं निंदितं अतस्त्वमेव सर्वकारणमित्यर्थः ॥ ६ ॥ ❀ ❀ ज्ञाततत्त्वेन त्वया प्रश्नः किमिति कृत इति तत्कारणमाह स भवानिति। तपाऽचरदिति यत्तेन हेतुना त्वं नोऽस्मान्खेदयसे त्वय्यनलंबुद्धिं प्रापयसि त्वदितरकर्तृसद्भावे परां शंकां च प्रयच्छसीत्यन्वयः। तस्मात्प्रश्नः कृत इति भावः ॥ ७ ॥ ❀ ❀ एतन्मे पृच्छतः सर्वं सर्वज्ञसकलेश्वरेति विशेषणद्वयमुक्तार्थस्थिरीकरणायोक्तं यथाबुद्धे जानामि तथेति शेषः। त्वदधीनायतः सत्ता ह्यवरस्यापि केशवेत्यनेन पूर्वपक्षोऽयमिति ज्ञायते ॥ ८ ॥

**श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या**

आत्मनि भावयसे न पराभावयन्निति च स्ववैभवाधिक्येऽपि सतीति शेषः। सूर्यादौ विद्यमाने दीपादेः पराभवदर्शनात्। अत उपादानकारणत्वमेव भवत आयाति। सूर्यादौ विद्यमाने रश्म्यादेस्तददर्शनादिति भावः ॥ ५ ॥ ❀ ❀ तदेवाह नाहमिति। तदेतत् तथोत्तरवाक्यञ्च तन्मुखेनैव अन्यान् शिक्षयितुमुक्तम् ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

**श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या**

आत्मन् आत्मनि अधिष्ठाने भावयसे पालयसि। तानि न पराभावयन् अन्यतः पराभवमप्रापयन्। यथोर्णनाभिरात्मन एव शक्तिमवष्टभ्य सृजति तद्वत्। अक्लमः श्रमरहितः ॥ ५ ॥ ❀ ❀ तस्मादहन्तु अस्मिन् जगति, परमम् उत्तमम्, अपरम् अधमं, समं, मध्यमञ्च, तत्रापि नाम मनुष्यादि, रूपं द्विपदत्वादि, गुणः शुक्लत्वादिः, तैर्भाव्यं साध्यं, तत्रापि सदसत् स्थूलं सूक्ष्मञ्च किंचिदपि अन्यतो न वेद, किन्तु त्वत्त एव सर्व्वं भवतीति मन्ये ॥ ६ ॥ ❀ ❀ स तथाविधोऽपि। पराशङ्काम् ईश्वरान्तरशङ्कां प्रयच्छसि ॥ ७ ॥ ❀ ❀ पृच्छतो ममैतत् सर्व्वमभिप्रेतं वस्त्वित्यर्थः। विशेषेण जानीहि स्वयं परामृश ततो वदेत्यर्थः। किञ्च यथैवेदम् अनुशासितः सन् अहं बुध्ये सम्यगवगच्छामि तथा विजानीहि तेनास्योत्तरमबाधितं देहीति व्यञ्जितम् ॥ ८ ॥

**श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः**

तानि सस्वसृष्टानि भूतानि आत्मन आत्मनि विराट्शरीरे भावयसे पालयसि न पराभावयन् स्वयम् स्वात्मानं परिभवमप्रापयन् अक्लमः श्रमरहितः यथोर्णनाभिः आत्मन एव शक्तिमवष्टभ्य सृजति तद्वत् ॥ ५ ॥ ❀ ❀ अतोऽहमस्मिँलोके परमुत्कृष्टमपरं निकृष्टं समं मध्यमं च सत् स्थूलमसन्नामरूपगुणैः संज्ञया आकृत्या धर्मेण च भाव्यं निष्पाद्यं किंचिदप्यन्यतो न वेद न जानामि किंतु त्वत्त एव सर्वं भवतीति जानामि ॥ ६ ॥ ❀ ❀ ननु तर्हि यद्विज्ञानो यदाधार इत्यादिः तव प्रश्नो निरर्थक इत्यत्राह स इति स उक्त प्रकारोपि भवान्यद्यतस्तपोऽचरत् तेन हेतुना नोऽस्मान खेदयसे मोहयसि अतः पराशंकामीश्वरांतरशंकां प्रयच्छसि ॥ ७ ॥ ❀ ❀ हे सर्वज्ञ अहमनुशासितस्त्वदनुशिष्टः इदं प्रस्तुतं तथैव बुध्ये जाने तथैव एतत्सर्वं पृच्छतो मे मह्यं विजानीहि विशेषेण ज्ञापय ॥ ८ ॥

**श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या**

आत्मन्येव भावयसि पालयसि। तान्येव स्वयमेव पराभावयन् नाशयन्। न पराभावयन्निति पाठे पराभवमप्रापयन्। यस्मात्त्वमेव स्वशक्त्यैव जगदुत्पत्तिस्थितिनाशं करोषीत्यर्थः। आत्मानं वा पराभवमप्रापयन् सृष्टिस्थिती[1] करोषीत्यर्थः। द्वयोरेव कथनं तथा दर्शनात्। असहायकरणे दृष्टान्तमाह—आत्मशक्तिमिति। स्वस्यैव सामर्थ्यमवलम्ब्य आकाशगमने पक्षिण इव। ऊर्णनाभः कीटविशेषः। स हि ऊर्णां सूत्ररूपां स्वमुखतो निष्कास्य तेन विहारस्थानं कृत्वा विहृत्य पुनर्ग्रसति[2]। तथाऽपि क्लमरहितश्च भवति। एवं भवानित्यर्थः ॥ ५ ॥ ❀ ❀ एतादृशं तव सामर्थ्यं स्वत एव न परत इति मम मतिरित्याह—नाऽहं वेदेति। अस्मिन्संसारे सर्वं त्वत्त एव भवतीत्यहं जाने। परमुत्कृष्टम् अपरं हीनम्। समं वा अन्योऽन्यम्। एवं करणे सामर्थ्यमाह—हे विभो

---

१ सृष्टिं स्थिरीकरोषीति ग, २ गिलतीति ग. गच्छतीति घ.

इति । किञ्च । नाम वेदाः । रूपं जगत् । गुणा ब्रा[1]ह्मणादयः । तैर्भाव्यमुत्पाद्यम् । सदुत्कृष्टम् । असदपकृष्टम् । कार्यकारणरूपं वा । किंचिदप्यन्यस्मात्त्वद्व्यतिरिक्ताद्भाव्यमित्यहं न जाने ॥ ६ ॥ ❀ ❀ किमतो यद्येवम् ? तत्राऽऽह—**स भवानचरदिति** । नहि स्वतन्त्रो घोरं तपः करोति । घोरशब्देन भगवत्तपोऽप्युदासः नरनारायणादिभिः क्रियमाणं शान्तं तपः । यद्यस्मात् । सुसमाहित इत्यतिसावधानः । स्वाभाविकतपोऽप्युदासः । **"तपो मे हृदयमि"**ति वाक्या **"यस्य ज्ञानमयं तप"** इति च स्वभावत एव भवति । न हि स सावधानान्तःकरणः करोति । तेन ज्ञायत एतस्मादन्योऽस्ति महान्यमाराधयितुं तपः करोतीति । किञ्च । तेन तपःकरणेन कर्मणा नः अस्मान्खेदयसि । अस्माकमयमभिमानः स्थितोऽस्मत्पिता सर्वोत्तम इति । तपसि क्रियमाणे तद्गच्छति । परोऽन्योऽप्यस्तीत्याशङ्काऽप्युत्पद्यते । अतः सन्देहः । किं त्वत्तोऽन्यः कश्चिदस्ति न वेति ॥ ७ ॥ ❀ ❀ एतत्सर्वं कथयेत्याह—**एतन्म इति** । अत्र त्रयोदश प्रश्ना भवन्ति । ज्ञानप्रश्नः । आत्मप्रश्नः । तत्त्वप्रश्नाः षट् । ब्रह्मविषयकाश्चत्वारः । अयमन्तिमश्चेति । सर्वं विजानीहि विशेषेण विचार्य वद, बोधय वा । यथा अनुशासितः सन् शिक्षितः सन्नहं बुद्ध्ये । सर्वज्ञत्वात्कथनसामर्थ्यम् । सर्वेश्वरत्वान्मद्बोधजननसामर्थ्यम् । प्रश्नमात्रेण न वदेदिति तस्य भगवद्भावबोधनम् । अज्ञानादयं प्रश्नो न भवति किन्तु यथा पिता कथयेत्तदर्थमेवं प्रक्रियया प्रश्न इत्युत्प[2]त्तौ वक्ष्यते । अनेन प्रश्नोत्तरे अप्यग्रे विचारमर्हत इति ज्ञापितम् । [3]अहं यथा बुद्ध्य इति वचनात्सर्वेषां पदार्थानामुत्पत्तितः स्वरूपं वक्तव्यमित्युक्तं भवति । अन्यथा भगवतोत्पत्तेरनुक्तत्वाद्ब्रह्माऽपि न वदेत् । अतो यथाधिकारं पदार्था वक्तव्या इति निर्द्धारितम् ॥ ८ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

द्वयोरिति सृष्टिस्थित्योः केवलं स्वसामर्थ्यं कुत्र दृष्टमित्याशङ्क्य दृष्टान्तमाहुः **आकाश इत्यादि** । **'नाहं वेदे'ति** श्लोक उत्तरश्लोकशेषत्वेन ज्ञेयः ॥ ५ ॥ ❀ ❀ **स भवानित्यत्र** स्वाभाविकं तपः किमित्याकाङ्क्षायामाहुः **तपो म इत्यादि** ॥ ७ ॥ ❀ ❀ **एतन्म इत्यत्र त्रयोदशप्रश्ना इति**, यद्यपि पूर्वग्रन्थविचारे पञ्चदश भवन्ति । तथापि किं तत्त्वमिति सामान्यप्रश्नस्य तद्विशेषप्रश्नेऽन्तर्भावाद् विमर्शनस्योपकारकत्वेन प्रवेशान्मुख्याः त्रयोदशेत्यर्थः । सम्बुद्धिद्वयतात्पर्यमाहुः **प्रश्नमात्रेत्यादि** । इत्युपपत्तौ वक्ष्यत इति । इतीदं ब्रह्मवाक्यगते कारुणिकपदे वक्ष्यत इत्यर्थः । **अनेनेति** सर्वज्ञकर्तृकत्वेन । ननु 'विजानीही' त्यन्तेन प्रश्नेनैव ज्ञातापेक्षा स्वस्य ज्ञापिता भवत्येवेति यथैवेदमित्यस्य किं प्रयोजनमत आहुः **अहमित्यादि** । **अन्यथेति** प्रकाराकाङ्क्षानुक्तौ । ननु तथाज्ञानस्य किं प्रयोजनमत आहुः **अत इति** । एवमधिकारभेदसूचनात् ॥ ८ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

आत्मन् आत्मनि स्थितानि तानि स्वसृष्टानि भूतानि भावयसे पालयसि । नन्वेवं सति स्वपराभवः स्याल्लोके तथादर्शनादित्याशङ्क्याह—स्वयमात्मानं न पराभावयन् पराभवमप्रापयन्नित्यर्थः । एवं कथं सम्भवतीत्यपेक्षायां दृष्टान्तेन साधयति—ऊर्णनाभिः कीटविशेषः स यथा आत्मशक्तिमवष्टभ्य अक्लम आयासरहित एक एव तन्तून् सृजति अवति आत्मपराभवरहित एव तत्र विहरति तथेत्यर्थः ॥ ५ ॥ यत एवं अतोऽहं त्वयि विश्वस्मिन् परमुत्तममपरमधमं समं मध्यमं तत्रापि नाम देवमनुष्यादिरूपं द्विपदत्वादिगुणाः शुक्लादयः तैर्भाव्यं साध्यम् । तत्रापि सदसत्स्थूलं सूक्ष्मं च यद्वस्तु तत्किञ्चिदप्यन्यतो न वेद, किन्तु सर्वं त्वत्त एव भवतीति मन्ये ॥ ६ ॥ ❀ ❀ स एवंविधोऽपि भवान् यतः सुसमाहितोऽतिसावधानः सन् घोरमन्यैर्दुश्चरं तपोऽचरत्तेन तपश्चरणेन नोऽस्मान् पुत्रानस्मत्पिता सर्वतो महानित्यभिमानोत्पाटनेन त्वं खेदयसे यतः परस्य परमेश्वरान्तरस्याशङ्कां प्रयच्छसीति ॥ ७ ॥ ❀ ❀ प्रश्नमुपसंहरति—एतदिति । हे सर्वज्ञ हे सकलेश्वरेति सम्बोधनद्वयं कोपाभावपूर्वकप्रश्नोत्तरप्रदानार्थम् । त्वयाऽनुशासितोऽनुशिक्षितोऽहमिदं भवतोपदेक्ष्यमाणं यथैव बुद्ध्ये जानीयां तथैतत्सर्वं पृच्छतो मे मम विजानीहि विशेषेण ज्ञापयेत्यन्वयः ॥ ८ ॥

### हिन्दी अनुवाद

जैसे मकड़ी अनायास ही अपने मुँहसे जाला निकालकर उसमें खेलने लगती है, वैसे ही आप अपनी शक्तिके आश्रयसे जीवोंको अपनेमें ही उत्पन्न करते हैं और फिर भी आपमें कोई विकार नहीं होता ॥ ५ ॥ ❀ ❀ जगत्में नाम, रूप और गुणोंसे जो कुछ जाना जाता है, उसमें मैं ऐसी कोई सत्, असत्, उत्तम, मध्यम या अधम वस्तु नहीं देखता, जो आपके सिवा और किसीसे उत्पन्न हुई हो ॥ ६ ॥ ❀ ❀ इस प्रकार सबके ईश्वर होकर भी आपने एकाग्र चित्तसे घोर तपस्या की, इस बातसे मुझे मोहके साथ-साथ बहुत बड़ी शङ्का भी हो रही है कि आपसे बड़ा भी कोई है क्या ? ॥ ७ ॥ ❀ ❀ पिताजी ! आप सर्वज्ञ और सर्वेश्वर हैं । जो कुछ मैं पूछ रहा हूँ, वह सब आप कृपा करके मुझे इस प्रकार समझाइये कि जिससे मैं आपके उपदेशको ठीक-ठीक समझ सकूँ ॥ ८ ॥

---

१ ब्रह्मादय इति ग. २. च हीनः ख पाठः । ३. इत्युपपत्ताविति क, ग. घ. । ४. यदहमिति ख. ।

## ब्रह्मोवाच

सम्यक् कारुणिकस्येदं वत्स ते विचिकित्सितम् । यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ॥ ९ ॥
नानृतं तव तच्चापि यथा मां प्रब्रवीषि भोः । अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥१०॥
येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम् । यथार्कोऽग्निर्यथा सोमो यथर्क्षग्रहतारकाः ॥११॥
तस्मै नमो भगवते वासुदेवाय धीमहि । यन्मायया दुर्जयया मां ब्रुवन्ति जगद्गुरुम् ॥१२॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

प्रश्नमभिनंदति । वत्स हे पुत्र तवेदं विचिकित्सितं संदेहः तत्पूर्वकः प्रश्नोऽयं सम्यगित्यर्थः । यतः कारुणिकस्य तवायं प्रश्नः । अत्र हेतुः । यद्यतो भगवद्वीर्यप्रकाशने धर्मे प्रवर्तितोऽस्मि अतस्त्वं जिज्ञासुरपि मयि कृपामेव कृतवानित्यर्थः ॥ ९ ॥ ❀ ❀ ननु त्वमेव भगवानित्युक्तं त्वया 'एकः सृजसि भूतानि' इत्यादिना । सत्यम् । यथा मामीश्वरत्वेन प्रभाषसे तदपि तव भाषणं नात्यंतमनृतं यतः कारणादेतावत्प्रभावस्य भाव एतावत्त्वं मेऽस्ति किंतु मत्तः परमीश्वरमविज्ञाय ब्रूषे अतः सादृश्यात्तवेयं भ्रांतिर्न तु बुद्धिपूर्वमनृतमित्यर्थः । यत ईश्वरान्ममैतावत्त्वं तमविज्ञायेति वान्वयः ॥ १० ॥ ❀ ❀ तर्हि कोऽसावीश्वर इत्यपेक्षायां भक्त्या नमस्कुर्वन्नेव तं कथयति त्रिभिः । येन स्वप्रकाशेन रोचितं प्रकाशितमेव प्रकाशयामि सृष्ट्याभिव्यक्तं करोमि । यथार्कादयश्चैतन्यप्रकाश्यमेव प्रकाशयंति । तथा च श्रुतिः । "न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निः । तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥" इति ॥ ११ ॥ ❀ ❀ तस्मै नमो धीमहि चिंतयेम मनसैव नमस्कुर्महे इत्यर्थः । यस्य मायया विमोहिताः संतो युष्मदादयो मां जगद्गुरुं जगत्कारणं वदंति तस्मै ॥ १२ ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

हे वत्सेति स्नेहाधिक्यद्योतनाय । तत्पूर्वकः संदेहपूर्वकः । इत्यर्थ इति । "प्रष्टव्या गुरवो नित्यं ज्ञातमर्थमपि स्वयम्" इत्युक्तेर्निःसंदेहार्थस्यापि प्रश्नविधेः संदिग्धस्य प्रश्नस्तु सर्वथैव शोभनो भवतीति भावः । कुतः सम्यगिति । तत्राह—यत इति । अत्र कारुणिकत्वे यतोहं परमधर्मे प्रवर्त्तितोस्मि अतोः हेतोः इत्यर्थः । इति "वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि । वक्तारं प्रच्छकं श्रोतॄंस्तत्पादसलिलं यथा ॥" इति श्रीदशमोक्तन्यायेन प्रश्नोत्तरदानेनाऽहमपि परमपावनो भविष्यामीति भावः । भगवद्वीर्यञ्च विश्वसृष्ट्यादिमयं तस्य दर्शने ॥ ९ ॥ ❀ ❀ अत्राशंकते । नन्विति । भोः पुत्र । इत्यर्थ इति । बुद्धिपूर्वकानृतसंभाषण एव दोषो न त्वबुद्धिपूर्वकेपि तस्य सत्यप्रायत्वादिति भावः । इत्यर्थ इति । एतावत्त्वमीश्वरोयं साक्षादिति भ्रांतिजनकवैभवं स्यात्तमज्ञात्वैवैतत्कथनोपपत्तेरिति भावः ॥ १० ॥ ❀ ❀ भगवानेव स्वप्रकाशस्तदितरत्सर्वं तत्प्रकाशितमेवेत्यत्र प्रमाणमाह—तथा चेति । तत्रात्मस्वरूपे तमात्मानं भ्रांतं स्वतः प्रकाशमानमनुपश्चात्सर्वं सूर्यादि विभातीति श्रुतिपदार्थः । ऋक्षाण्यश्विन्यादीनि । ग्रहा भौमादयः । तारका ध्रुवागस्त्याद्याः ॥ ११ ॥ ❀ ❀ ननु जगद्गुरुर्ब्रह्मा विश्वं सृजतीति सर्वत्र ख्यातिस्तवास्ति तत्र स विस्मयः । सोत्प्रासमाह । तस्मा इति । यद्वः बुभूषुणा दुर्मतश्रवणापराधो भगवन्नमनेन परिहर्त्तव्य इत्यभिप्रेत्य वा भगवन्तं नमति—नम इति । तस्मै नमो वयं तं धीमहीति योज्यम् । अनेन पद्येन "ओं नमो भगवते वासुदेवाय नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात्" इति द्वादशाक्षरी चतुर्विंशत्यक्षरी चेति द्वे विद्ये हिरण्यगर्भेण नित्यं सेव्ये इति दर्शितम् ॥१२॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

नमो धीमहीति । मनसा नमनं कुर्व्वीमहीत्यर्थः । एवमेव भगवतो स्वामिना प्रथमस्कन्धीयपञ्चमाध्यायस्य सप्तविंशच्छ्लोकटीकायामुक्तमिति ॥ १२ ॥

### श्रीमद्वीरराघवव्याख्या

अथ ब्रह्मा यथाप्रश्नमुत्तरयिष्यंस्तावत्प्रश्नमभिनन्दति सम्यगिति । हे वत्स पुत्र कारुणिकस्य मयि करुणावतः ते त्वया इदं सम्यग्विचिकित्सितं ज्ञातुमिष्टं कुत इत्यत आह यद्यस्मादहं भगवद्वीर्यदर्शने भगवत्प्रभावज्ञापनरूपे धर्मे प्रवर्त्तितः ॥ ९ ॥ ❀ ❀ अभिमतार्थजिघृक्षया प्रश्नं विविनक्ति नानृतमिति । भो नारद मां प्रति यथा प्रब्रवीषि एकः सृजसि भूतानीत्यादिना यत्पृच्छसि तच्चापि तव त्वदीयं वचः नानृतमतीव नासत्यं किंतु मत्तः परं भगवन्तमज्ञात्वा ब्रवीषीति । अज्ञानहेतुमाह मम एतावत्त्वं एतावन्महिमवत्वं यतः परमकारणाद्भवति तं मत्तः परमज्ञात्वा ब्रवीषीत्यर्थः ॥ १० ॥ ❀ ❀ तर्हि कोऽसावीश्वर इत्यपेक्षायां भक्त्या नमस्करिष्यन्नाह येनेति । अर्कादयो भगवत्तेजसा रोचितं विश्वं तत्तेजोलेशमुपजीव्य स्वयं रोचयंतीति स्वात्मानमभि-

---

१. प्रा० प्रा०—तत्त्वमेतावत्त्वं । २. प्रा० प्रा०—दुर्जयया मां वदन्ति ।

मन्यंते एवमहमपीत्यर्थः । न तत्र सूर्यो भातीति श्रुतिरत्रानुसंधेया ॥ ११ ॥ ॐ ॐ तस्मै वासुदेवाय नमो धीमहि नमः कुर्महे यद्वा धीमहीत्यत्र तमिति शेषं जेतुमशक्यया यस्य भगवतो मायया मां जगद्गुरुं वदंति ब्रह्माद्याः सकला देवा मनुष्याः पशवस्तथा विष्णुमायामहावर्त्तमोहांधतमसावृता इति न्यायेन मायया मोहिता मां जगद्गुरुं वदंति न तु तत्त्वविद इत्यर्थः ॥ १२ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

नारदप्रश्नं परिहरिष्यन् तज्जिज्ञासितं स्तौति सम्यगिति । अहं भगवतो हरेर्वीर्यस्य सृष्ट्यादिलक्षणस्य दर्शने ख्यापने चोदित इति यद्यस्मादतस्ते चिकित्सितं सम्यक् समीचीनमित्यन्वयः । कारुणिकस्येत्यनेन लोकोपकारकं चेदमिति लक्षयति ॥ ९ ॥ ॐ ॐ तत्र प्रथमतः पूर्वपक्षांशमाक्षिपति । नानृतमिति त्वमेकः सृजसीति यथा मां प्रब्रवीषि तथा तदनृतं न किम् ? अनृतमेव बत त्वद्वचनं श्रुत्वाऽहं खिन्नः खेदानुकंपासंतोषविस्मयामंत्रणे बतेति वचनात् । यच्च मत्तः परमधिकमीश्वरमविज्ञाय नाहं वेदपरं त्वस्मादिति मामात्थ तच्चानृतं तदप्यनृतमेव कुत इति तत्राह अपीति । अतिगर्हितत्वात् । अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेष्विति सूत्रात् गर्हासमुच्चयप्रश्नशंकासंभावनास्वपीत्यभिधानाच्च कस्मान्मदुक्तमाक्षिपसीति तत्राह एतावत्त्वमिति । हि शब्द एवार्थे मे एतावत्त्वं तद्रोचिषा रोचित रोचकत्वं ह्येव नातोऽधिकमिति तस्मादिति शेषः ॥ १० ॥ ॐ ॐ एतदेव स्पष्टयति येनेति । तत्र प्रमाणमाह यथेति । तमेवाभातमनुभाति सर्वं यदादित्यगतं तेजो जगद्भासयतेऽखिलमित्यादेः ॥ ११ ॥ ॐ ॐ बुभूषणादुर्मतश्रवणप्राप्तापराधो भगवन्नमनेन परिहर्त्तव्य इति भावेन भगवन्तं नमति नम इति तस्मै वासुदेवाय भगवते नमः वयं तं धीमहीत्यन्वयः । अनेन नमो भगवते वासुदेवाय नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् इति द्वादशाक्षरीचतुर्विंशत्यक्षरीचेति द्वे विद्ये हिरण्यगर्भेण नित्यं सेव्ये इति दर्शितं यद्वा मत्तः परमविज्ञाय यथा एकः सृजसीत्यादि प्रकारं मां ब्रवीषि तच्च तत्प्रकारविषयवचनमेवानृतं नान्यद् यद्रूपमित्यादि । तदेवानृतं कुत इत्यत आह नेति प्रमाणविरोधात् । नाभावान्यविरोधेष्विति वचनाद् अयं पक्षः संभावित इत्याह अपीति । बत संतोषहेतुत्वात् कुतोऽनृतमिति तत्राह एतावत्त्वमिति । यतो यस्माद्विष्णोर्मे एतावत्त्वं परिच्छिन्नप्रभावत्त्वं हि प्रसिद्धं कथं प्रसिद्धमित्यत उक्तमेव विशिनष्टि येनेति । अनेन हरेः करणत्वं तव कर्तृत्वं प्रतीतं न तु हरेः स्वातंत्र्यकर्तृत्वमित्याशंक्य दासभावकथनेन तत्स्पष्टयति नम इति । रामेण मुक्तः शरो रावणमवधीदित्यादाविवकरणत्वमपि मुख्यकर्तृत्वं प्रयोजयतीत्यतः करणत्वप्रयोगो न किंचित्करः नन्वेवं चेत्तवकर्तृत्व प्रवादः कथमत्राह यन्माययेति । त्रिविधा माया एका हरेरिच्छा मुख्या द्वितीयाऽमुख्या प्रकृतिस्तृतीयाऽमुख्यतमा जीवानां बंधकशक्तिरिति तत्र यस्य विष्णोरिच्छाधीनया दुर्जयया हरिभजनवर्जितैर्जेतुमशक्यया ॥ १२ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

किं वा तवेदमज्ञानमेवेति खिद्यमान आह नानृतमिति ॥ १० ॥ ॐ ॐ यथार्कादयस्तत् प्रकाशितास्तच्छत्तथैव तत्तत् प्रकाशयन्तीत्यर्थः ॥ ११ ॥ ॐ ॐ तस्मा इति द्वयम् । तमआदिमत्त्वेन स्वस्य सदोषत्वात् सच्चिदानन्दघनत्त्वेन यस्य निर्दोषस्य नेत्रगोचरे स्थातुं विलज्जमानतया अमुया मायया विमोहिता । अस्मदादयो दुर्धियः विकत्थन्ते आत्मानं श्लाघन्ते ॥ १२ ॥ १३ ॥ १४ ॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

प्रश्नमभिनन्दति । हे वत्स पुत्र । विचिकित्सितं सन्देहः । सम्यगिति समीचीनम् । कारुणिकस्येति सर्व्वज्ञेनापि त्वयैवं पृच्छता मयि पितरि करुणैव कृता । यदहं विजानीहि इति परामर्शार्थकपदेन भगवतो वीर्य्यस्य विश्वसृष्ट्यादिमयस्य दर्शने विषये प्रेरितः । तदहं क्षणं मनसैव तत् पश्यामीत्यानन्दः ॥ ९ ॥ ॐ ॐ किञ्च भोः पुत्र एकः सृजसि भूतानि इत्यादिना मामीश्वरत्वेन यथा ब्रवीषि तच्चापि नानृतं न मिथ्या । यतो मत्तः सकाशादपि परं परमेश्वरम् अविज्ञाय मत्तः परस्मिन् परमेश्वरे अविज्ञाते सतीत्यर्थः, मम एतावत्त्वं स्यादित्यनेककर्तृकत्त्वेऽपि क्त्वाप्रत्यय आर्षः । यद्वा मत्तः परमविज्ञाय मम एतावत्त्वं लोका ब्रुवन्तीति शेषः । त्वन्तु सर्व्वज्ञोऽपि तानेव ज्ञापयितुं ताननुकृत्या ब्रूषे इति भावः । त्वं मत्तः परम् अविज्ञाय ब्रवीषीति व्याख्याने तु नारदस्याज्ञत्वं ब्रह्मणा ज्ञातुमनुचितम् ॥ १० ॥ ॐ ॐ वस्तुतस्तु अहं को वा वराक इत्याह । येन स्वरोचिषा स्वप्रकाशेन परमेश्वरेणैव प्रकाशितमहं पिष्टपेषन्यायेन प्रकाशयामि सृष्ट्या अभिव्यक्तं करोमि । यथाऽर्कादयस्तत्प्रकाशितमेव प्रकाशयन्ति । तथाच श्रुतिः—न तत्र सूर्य्यो भाति न च चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्व्वं तस्य भासा सर्व्वमिदं विभाति ॥ इति ॥ ११ ॥ ॐ ॐ ननु जगद्गुरुर्ब्रह्मा विश्वं सृजतीति सर्व्वत्रैव तव ख्यातिः तत्र सविस्मयं सोत्प्रासमाह तस्मै नमो धीमहीति ॥ १२ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

उत्तरं वक्तुं प्रश्नमभिनंदति सम्यगिति । हे वत्स पुत्र ते तव कारुणिकस्य सर्वत्र करुणावतः इदं विचिकित्सितं निःसंदेहार्थं प्रश्नरूपं चेष्टितं सम्यक् यतोऽहं भगवद्वीर्यदर्शने भगवत्प्रभावज्ञापने चोदितः प्रवर्त्तितः ॥ ९ ॥ ❀ ❀ भो वत्स तत्रापि तव एकः सृजतीत्यादि वचोऽपि नानृतम् तत्र हेतुः अविज्ञायेति । यतो भगवतः मे ममैतात्त्वं स्रष्टृत्वादियुक्तत्वं मत्तः परमविज्ञाय यथा यथेष्टं परमेश्वरत्वेन मां प्रब्रवीषि ॥ १० ॥ ❀ ❀ तमेव स्वस्मात्परं कथयति येनेति त्रिभिः । अहं येन परमेश्वरेण स्वकीयेन धर्मभूतेन रोचिषा प्रकाशेन रोचितं प्रकाशितमेव रोचयामि प्रकाशयामि न तु स्वातंत्र्येण किंचिदपि कर्तुं शक्नोमीत्यर्थः यथाऽर्कादयो भगवत्प्रकाश्यमेव प्रकाशयंति अनेन यद्रूपमित्यस्योत्तरमुक्तम् "न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निस्तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती" ति श्रुतेः ॥ ११ ॥ ❀ ❀ तस्मै वासुदेवाय नमः धीमहि यस्य मायया योगिभिरपि तत्कृपां विना दुर्जयया मायया मोहिताः मां जगद्गुरुं वदंति ब्रह्माद्याः सकला देवा मनुष्याः पशवस्तथा विष्णुमायामहावर्त्तमोहांधतमसावृता इति स्मृतेश्च ॥ १२ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

इदानीं प्रथममन्तिमप्रश्नोत्तरं वक्तुं सर्वेषां प्रश्नानां एकपरत्वमाह—सम्यगिति । सर्वेषां प्रश्नानामुत्तरं भगवानेव । स एव ज्ञानादिः । तत्रैवान्तरभेदा द्वादश भवन्ति । त एव स्कन्धार्थत्वेन पर्यवसानं प्राप्स्यन्ति । तत्कथमित्यपेक्षायामाह । यदहं प्रेरितः भगवद्वीर्यस्य दर्शने ज्ञानार्थमिति । यदि सर्वैरेव प्रश्नैर्भगवानेवोत्तरत्वेन वक्तव्यो भवति तदैवं सङ्गच्छते । परं केनचित्केनचिद्रूपेण तत्तत्प्रश्नोत्तररूपो भगवान् । तानि रूपाण्यग्रे वक्तव्यानि । अत एव तस्य प्रश्नस्याऽभिनन्दनम् । अन्यथा कोपः कर्त्तव्यः स्यात् । भगवद्वीर्याणां वक्तव्यत्वेनोपस्थितत्वाच्च तदभावः । यत्तवाऽयं प्रश्नः स कारुणिकस्य तव । अनेन व्याजेन सर्वे संसारान्मोचनीया इत्यहं च कृतार्थः कर्त्तव्य इति च । अन्यथा परमभागवतस्य तवाज्ञानं न सम्भवतीत्यभिप्रायः । वत्सेति । स्नेहेन सम्बोधनम् । मातुरौधसं पय इव ब्रह्मणो हृदयाद्भगवच्चरित्रमुद्गतमस्तीति ज्ञापयति । विचिकित्सितं विचारितं ज्ञातुमिष्टं वा ॥ ९ ॥ ❀ ❀ एवं प्रश्नाभिनन्दनमुक्त्वा सन्तोषेण वक्तृत्वाधिकारं च निरूप्याऽन्तिमप्रश्नस्योत्तरमाह—नाऽहं वेदेत्यस्य—नाऽनृतमिति । यत्तव वचनं त्वत्तोऽन्यो महान्नास्तीति । तदनृतं न भवति । अनृतं नामाऽन्यथा ज्ञात्वा[1]ऽन्यथावचनम् । न त्वज्ञानात् । तदज्ञवचनमित्येव लोकप्रसिद्धिः । अप्रामाण्यस्य तुल्यत्वेऽप्येवंवचने अनृतवाददोषो नाऽस्तीत्यर्थः । यथा मां प्रब्रवीषि त्वमेव महानिति । सत्यं तु न भवतीत्याह—अविज्ञाय परं मत्त इति । मत्तः परमुत्कृष्टं मन्नियन्तारमविज्ञायैतद्वचनमित्यर्थः । कोऽसावित्यपेक्षायामाह—एतावत्त्वं यतो हि म इति । यावन्त उत्कृष्टा मयि धर्मास्त्वयोदितास्ते हि सर्वे यत्सम्बन्धान्मयि जाताः स भगवानित्यर्थः ॥ १० ॥ ❀ ❀ एवमन्तिमप्रश्नोत्तरमुक्त्वा प्रथमप्रश्नोत्तरमाह—येनेति । [2]भगवान् ज्ञानं भवति येन रूपेण तद्रूपमुच्यते । ज्ञानं हि स्वप्रकाशं सर्वमेव प्रकाशयति, दीपमपि प्रकाशयति यतः, तस्मात्स[3]र्वप्रकाशकं स्व[4]प्रकाशं यच्चैतन्यं भगवद्रूपं तज्ज्ञानमित्यर्थः । येन भगवता । स्वरोचिषा स्वप्रकाशेन स्वयमेव रोचते, स्वात्मानं वा रोचयतीति स्वरोचिः । विश्वं तेनैव रोचितं प्रकाशितम् । अव्यक्ते लीनं विश्वं तद्रोचिषा प्रकाशितं जातम् । तदा स्थूलतया ब्रह्माऽभिव्यनक्ति । तदाह—रोचयाम्यहमिति । यथा महाकाष्ठस्थितो वह्निर्मथनेनाऽभिव्यक्त एव तृणादिभिरभिव्यज्यते न तु सहसा तृणादिभिरभिव्यक्तुमर्हति । तत्र श्रुतिसिद्धं दृष्टान्तमाह—यथाऽर्कोऽग्निरिति । अन्ये तु जडा न स्वप्रकाशाः । तेजस्तु स्वप्रकाशमेव । तदपि चेद्भगवता प्रकाश्यं तदा कः सन्देहोऽन्यस्य तत्प्रकाश्यत्वे । तत्र श्रुतिः—"न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती"ति । तत्र विद्युतां कादाचित्कत्वान्न तद्ग्रहणम् । यथाऽर्को ज्ञानेन प्रकाशितमेव स्वयं प्रकाशयति । स्वयं च प्रकाशितः । "यदादित्यगतं तेज" इति वाक्यात्तत्रापि भगवत्तेज एव प्रकाशकम् । तथा मय्यपीत्यर्थः । एवमग्न्यादयः ऋक्षाण्यश्विन्यादीनि । ग्रहा बुधादयः अन्यास्तारकाः ॥ ११ ॥ ❀ ❀ एवं ज्ञानस्वरूपं भगवन्तं प्रतिपाद्य तत्कर्त्तव्यान्तराभावाद्भक्त्या नमस्यति— तस्मै नमो भगवत इति । लोकवेदप्रसिद्धस्तच्छब्देनोच्यते । भगवत इति तस्य ज्ञानस्य न धर्मत्वं नांऽशत्वम् । प्रयोजनं तु मोक्षः । तदाह—वासुदेवायेति । भक्तिर्नमनम् । निदिध्यासनमन्तरङ्गं साधनम् । तदाह—धीमहीति । तन्नमो वा । एवं ज्ञानं निरूप्य सर्वेषां तदज्ञानं युक्तमेवेति विरोधाभावायाऽऽह—यन्माययेति । [5]यस्य भगवतो ज्ञानरूपस्य वशवर्त्तिनी काचिच्छक्तिर्मायेति । सा जगत्क[6]र्तुर्मायातो भिन्ना । एतस्या व्यामोह एव फलम् । तस्यास्तु जगतः करणत्वं कर्तृत्वं वा भगवदाज्ञया । तत्र मायायाः सामर्थ्यमाह—दुर्जययेति । तस्या जयः प्राणिमात्रस्याऽशक्यः इयमेव माया वेदस्तुतौ मारणीयत्वेन वेदैः प्रार्थितः । ते हि ज्ञानं बोधयन्ति । एषा तु मोहयति । तस्याः फलं महत्स्वपि दृश्यत इत्याह—मां ब्रुवन्ति जगद्गुरुमिति । क्रियाशक्तेरन्याधीनत्वाज्जगद्गुरुमित्युक्तम् ॥ १२ ॥

---

१. ज्ञानाऽन्यथेति ख. घ. । २. भगवद्दानमिति ग. । ३. सर्वप्रकाशस्वप्रकाशमिति ग. । ४. स्वप्रकाशकमिति घ. । ५. तस्येति क. ख. घ. । ६. जगत्कर्तृमायात इति क. ।

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

सम्यगित्यत्र अन्यथेति, अतिवादाज्ज्ञात्वा प्रश्नप्रकरणाच्च ॥ ९ ॥ ❀ ❀ येनेत्यत्र एवमिति । भगवत परत्वोक्त्यैव तपःकरणस्याप्युत्तरप्राप्त्या । तस्मात्सर्वैत्यादि । एतेन ज्ञानिपदप्रवृत्तिनिमित्तभूतं ज्ञानं चिद्रूपो भगवानेव, स येष्वेव स्वेच्छयाविर्भवति केनचित्प्रकारेण, तान् माया न व्यामोहयति, तदा ते लब्धात्मानो ज्ञानिन इत्युच्यन्त इति ज्ञापितम् ॥ ११ ॥ ❀ ❀ तस्मै नम इत्यत्र भक्त्येति, माहात्म्यज्ञानपूर्वकस्नेहेनेत्यर्थः । विवृतौ भक्तिरितिबाह्यभक्तिरित्यर्थः । निदिध्यासनमिति विशिष्टालम्बनरूपं ज्ञानमित्यर्थः । तन्नमो वेति । 'नमो धीमहि' तन्नमनमेव ध्यायेमेत्यर्थः । इतिविरोधाभावायेति, अस्मिन्नर्थे विरोधाभावायेत्यर्थः । विवृत्तौ, वेदानुसरणे सा पराजिता भविष्यतीत्याशङ्कायामाहुः इयमित्यादि । अत्र यन्माययेति सार्द्धेन 'दैवी ह्येषे' ति व्याकृतं ज्ञेयम् । महत्स्वपीति तादृशेष्वपीत्यर्थः । जगद्गुरुमिति ज्ञानदातारम्, न तु स्वीयक्रियासमक्रियादातारमित्यर्थः । एतेन मयि तादृक्क्रियादानसामर्थ्याभावं जानतोपि ते या मयि परत्वबुद्धिः सा तत्कार्यमिति ज्ञापितम् । ॥ १२ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

अथ ब्रह्मा यथा प्रश्नमुत्तरयिष्यंस्तावत्प्रश्नमभिनन्दति—सम्यगिति । स्वस्नेहं सूचयन् सम्बोधयति—हे वत्सेति । ते तवेदं विचिकित्सितं सन्देहः तत्पूर्वकः प्रश्नोऽयं सम्यगित्यर्थः । अनेन तव प्रश्नेन भगवन्माहात्म्यं वर्णितं भविष्यति तेन बहवोऽपि संसाराद्विमुच्येरन् अहं च कृतार्थः स्यामित्याशयेनाह—कारुणिकस्येति । एतदेव स्पष्टयति—यदिति । यस्मादहं भगवतो वीर्यदर्शने माहात्म्यवर्णने त्वया चोदितः प्रवर्तितोऽस्मीति । अतस्त्वमतिप्रियदर्शनोऽसीति सूचयन् सम्बोधयति—हे सौम्येति ॥ ९ ॥ ❀ ❀ एवं प्रश्नमभिनन्द्य 'एकः सृजसि' इति यदुक्तं तत्राह—नेति । अनुद्वेगेन सम्यगवधारणार्थं सम्बोध'यति—भोरिति, भो नारद 'एकः सृजसि भूतानि' इत्यादिना मां प्रति यथा यन्ममेश्वरत्वनिरूपकं वचनं प्रब्रवीषि तत्रापि तव वचनमनृतं न भवतीत्यन्वयः । कुत इत्यपेक्षायामनृतं नाम अन्यथा ज्ञात्वाऽन्यथाकथनम्, अज्ञात्वा कथने तु नानृतमिति व्यवहारः, किन्त्वज्ञवचनमित्येतावन्मात्रलोकप्रसिद्धिरतस्तव वचनं नानृतमित्याशयेनाह—हि यस्मात् यतः परमेश्वरान्मे ममैतावत्त्वं एतावन्महिमवत्त्वमस्ति तं मत्तः परं अविज्ञाय मां परमेश्वरतया प्रब्रवीषीत्यन्वयः ॥ १० ॥ ❀ ❀ तर्हि कोऽसावीश्वर इत्यपेक्षायां भक्त्या तं नमस्कुर्वन् यद्रूपमित्यस्योत्तरमाह—येनेति त्रिभिः । येन भगवता स्वरोचिषा स्वप्रकाशेन रोचितं प्रकाशितमेव विश्वमहं रोचयामि प्रकाशयामि तस्मै नम इत्युत्तरेणान्वयः । तत्प्रकाशितप्रकाशने दृष्टान्तमाह—यथेति । अर्कादयो यथा भगवत्तेजसा प्रकाशितमेव विश्वं प्रकाशयन्ति तथाऽहमपीत्यर्थः । तथाच श्रुतिः "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः ॥ तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति,, इति । ऋक्षाणि अश्विन्यादीनि । ग्रहा बुधादयः ॥ ११ ॥ ❀ ❀ यस्य मायया विमोहिता युष्मदादयो मां जगतः गुरुं स्वामिनं पूज्यं वदन्ति तस्मै भगवते वासुदेवाय नमो धीमहि कुर्महे इत्यन्वयः । ननु नारदादीनामपि कथं मायया मोह इत्याशङ्क्य तां विशिनष्टि—दुर्जयेति, 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' इति वाक्याद्भगवच्छरणं तत्कथां च विना निवर्त्तयितुमशक्यत्येर्थः ॥ १२ ॥

## हिन्दी अनुवाद

ब्रह्माजीने कहा—बेटा नारद ! तुमने जीवोंके प्रति करुणाके भावसे भरकर यह बहुत ही सुन्दर प्रश्न किया है; क्योंकि इससे भगवान्‌के गुणोंका वर्णन करनेकी प्रेरणा मुझे प्राप्त हुई है ॥ ९ ॥ ❀ ❀ तुमने मेरे विषयमें जो कुछ कहा है, तुम्हारा वह कथन भी असत्य नहीं है । क्योंकि जबतक मुझसे परेका तत्त्व—जो स्वयं भगवान् ही हैं—जान नहीं लिया जाता, तबतक मेरा ऐसा ही प्रभाव प्रतीत होता है ॥ १० ॥ ❀ ❀ जैसे सूर्य, अग्नि, चन्द्रमा, ग्रह, नक्षत्र और तारे उन्हींके प्रकाशसे प्रकाशित होकर जगत्‌में प्रकाश फैलाते हैं, वैसे ही मैं भी उन्हीं स्वयंप्रकाश भगवान्‌के चिन्मय प्रकाशसे प्रकाशित होकर संसारको प्रकाशित कर रहा हूँ ॥ ११ ॥ उन भगवान् वासुदेवकी मैं वन्दना करता हूँ और ध्यान भी, जिनकी दुर्जय मायासे मोहित होकर लोग मुझे जगद्‌गुरु कहते हैं ॥ १२ ॥

**विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया । विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ॥१३॥**
**द्रव्यं कर्म[१] च कालश्च स्वभावो जीव एव च । वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्त्वतः ॥१४॥**
**नारायणपरा वेदा देवा नारायणाङ्गजाः । नारायणपरा लोका नारायणपरा मखाः ॥१५॥**
**नारायणपरो योगो नारायणपरं तपः । नारायणपरं ज्ञानं नारायणपरा गतिः ॥१६॥**

१ 'परशङकामि'त्यपि पाठः । तत्रार्थस्त्वेक एव ।

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

यन्माययेति मायासंबंधोक्तेस्तस्य दुर्जयत्वोक्तेश्च तस्यापि किमस्ति संसारो नैवेत्याह मत्कपटमसौ जानातीति यस्य दृष्टिपथे स्थातुं विलज्जमानयैव तस्मिन्स्वकार्यमकुर्वत्याऽमुया मायया विमोहिता अस्मदादयो दुर्धियोऽविद्याऽऽवृतज्ञाना एव केवलं विकत्थंते श्लाघंते। अनेन यद्रूपमित्यस्य प्रश्नस्योत्तरमुक्तं भवति ॥ १३ ॥ ❋ ❋ तदेवं स्वस्मादन्यं परमेश्वरं निरूप्येदानीं यदधिष्ठानमित्यादिनवप्रश्नानां स एवाधिष्ठानादिकं सर्वमित्युत्तरं वक्तुं तद्व्यतिरेकेणान्यस्यासत्त्वमाह। द्रव्यमिति। द्रव्यं महाभूतान्युपादानरूपाणि कर्म जन्मनिमित्तं कालस्तत्क्षोभकः स्वभावस्तत्परिणामहेतुः जीवो भोक्ता वासुदेवात्परोऽधिकोऽन्योऽर्थो नास्ति कारणाव्यतिरेकात्कार्यस्य ॥ १४ ॥ ❋ ❋ तत्प्रपंचयति द्वाभ्याम्। नारायणः परः कारणं येषां ते। नारायणः परः तात्पर्यविषयो येषामिति वा। अनेनैव शास्त्रयोनित्वप्रतिपादनेनेश्वरे प्रमाणं सर्वज्ञत्वादिकं चोक्तम्। देवाश्च तदंगाज्जाता अतो न तद्व्यतिरिक्ताः। लोकाः स्वर्गादयस्तदानंदांशाः मखास्तत्साधनभूताः ॥ १५ ॥ ❋ ❋ योगः प्राणायामादिः तपस्तत्साध्यं चित्तैकाग्र्यं ज्ञानं तत्साध्यं गतिस्तत्फलम्। अनेनैव सर्वं यदधीनमित्युक्तम् ॥ १६ ॥

### श्री वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अत्र विश्वनाथः—जगद्गुरुर्विश्वस्रष्टा त्वं भवस्येवेति तुभ्यमादरदायिनः संतः किं मायामोहिताः सत्यं भगवत्संबंधं विना ये आदरदायिनो ये च तेभ्य आदरग्राहिणश्च ते उभयेऽपि बहिर्दर्शिनो भगवतः पृष्ठदेशस्थया मायया मोह्यंत एवेत्याह—विलज्जेति। अत्र तद्विमुखतैव तत्पृष्ठदेशो ज्ञेयः। तद्वै मुख्ये सत्येव तस्याः प्रभावो न सांमुख्य इति अनेन प्रबंधेन भगवतैवेदं प्रकाश्यत इत्युत्तरमुक्तम् ॥ १३ ॥ ❋ ❋ अनेन कारणस्यैव कार्याधिष्ठानत्वात्सर्वस्य भगवानेवाधिष्ठानमित्युक्तम् ॥ १४ ॥ ❋ ❋ तत्कारणानन्यत्वम्। "तस्यैवानंदस्य सर्वे मात्रामुपजीवंति" इति श्रुतेः। स्वर्गादिलोकानंदस्यापि भगवदानंदांशत्वमेव ॥ १५ ॥ ❋ ❋ आदिना यमनियमादिसप्तांगग्रहः "चित्तैकाग्र्यं परं तपः" इति स्मृतेः। तत्साध्यं चित्तैकाग्र्यसाध्यम्। तत्फलं ज्ञानफलम्। ब्रह्मापि तत्परमतत्सामान्याकारप्रकाशत्वेन तदधीनाविर्भावत्वात्। तदुक्तं श्रीमत्स्यदेवेन सत्यव्रतं प्रति। "मदीयं महिमानं च परं ब्रह्मेति शब्दितम् ॥ वेत्स्यस्यनुगृहीतं मे संप्रश्नं विवृतं हृदि" इति अनेनैव पद्यद्वयेन सर्वं वेदादिकं तदधीनमेवेत्युक्तमेवकारेण तदधिष्ठानत्वमप्युक्तम् ॥ १६ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

तस्यापीति परमेश्वरस्यापीत्यर्थः ॥ १३—१८ ॥

### श्रीमद्वीरराघवव्याख्या

इतरेषां मायाया दुर्जयत्वं भगवतस्तदसंस्पर्शं चाह विलज्जमानयेति। यस्य भगवत ईक्षापथे दृष्टिपथे स्थातुं विलज्जमानया तस्मिन्स्वकार्यमकुर्वत्याऽमुया मायया विमोहिताः संतो ममाहमिति दुर्द्धियः विकत्थंते ॥ १३ ॥ ❋ ❋ विकत्थनमेवाह द्रव्यमिति। द्रव्यं पृथिव्यादिभूतमेव कारणं इति केचित् कर्मैव कारणमिति केचित् काल इत्यन्ये स्वभाव इत्यपरे कर्माधीनत्वाज्जीव एव कारणमित्यपरे एवं यन्मायया मोहिता विकत्थंते इत्यर्थः। एवं तैः स्वतंत्रतयाऽभिमताः पदार्था भगवदधीना इत्याह वासुदेवादिति। हे ब्रह्मन्द्रव्यादिष्वर्थेषु वासुदेवात्परोऽन्योऽर्थो नास्ति यथा वासुदेवात्परो नास्ति तद्वदतदात्मकमतत्परतंत्रं च नास्तीत्युक्तं वक्ष्यमाणेषु सूचितम् ॥ १४ ॥ ❋ ❋ एतदेवोपपादयति नारायणपरा इति। वेदाः नारायणः परं कारणं येषां ते तथोक्ताः "तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद" इत्यादिश्रुतेः। यद्वा नारायणः परं प्रतिपाद्यं येषां ते तथोक्ताः "सर्वे वेदा यत्पदमामनंती"तिश्रुतेः। देवा इंद्रादयः नारायणः नारायणस्यांगाज्जातास्तच्छरीरभूताश्चेत्यपि विवक्षितं "चन्द्रमा मनसो जातः स आत्माङ्गान्यन्या देवता" इत्यादि श्रुतेः। लोका नारायणपराः परः स्वामी येषां ते तथोक्ता मखाः क्रतवः नारायणः पर आराध्यो येषां ते तथोक्ताः ॥ १५ ॥ ❋ ❋ योगो विवेकादिजन्यउपासनात्मको योगो नारायणपरः नारायणः परो गन्तव्यो यस्य स तथोक्तः तपः विद्यांगभूतं कर्म नारायणपरं नारायणः पर्यवसानभूमिर्यस्य तथोक्तं ज्ञानं शास्त्रजन्यज्ञानं योगस्य पूर्वमुक्तेः तदपि नारायणः परो ध्येयो यस्य तत्तथोक्तं गतिर्योगफलमर्चिरादिका साऽपि नारायणः परो गंतव्यो यस्यास्तथाभूता ॥ १६ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

यस्य हरेरीक्षापथे दृष्टिमार्ग स्थातुं विलज्जमानया चित्प्रकृत्याऽभिमन्यमानया शैवल्याख्यया जीवस्वरूपाच्छादिकयाऽमुया मायया मोहिता अन्यथाज्ञानमाप्ता अतएव दुर्धियो जना मम वशे विश्वमस्ति। सर्वस्याहं कर्त्तेति विकत्थन्ते तं धीमहीत्यन्वयः मुख्या माया हरेः शक्तिरमुख्या प्रकृतिर्मतेत्यादिना त्रैविध्यावगमान्नेंद्रजाललक्षणा मायाऽत्रोच्यते ॥ १३ ॥ ❋ ❋ ननु विष्णोरितरत्कारणं नास्तीति कथमुच्यते। पृथिव्यादीनां प्रातिस्विककारणत्वप्रतीतेरिति तत्राह द्रव्यमिति। द्रव्यं पृथिव्यादि कर्म

पुण्यपापलक्षणं पृथिव्यादीनां परिणामविशेषो वा कालः परिणामहेतुः त्रुटिर्लवात्मकः स्वभावः सात्त्विकादिः जीवः सुखदुःखाश्रयः द्रव्यं पुरोडाशादि कर्म ऋत्विगादिव्यापारः कालो वसंतादिः स्वभावो ब्राह्मणत्वादिः जीवो यजमानसंज्ञ इति वा द्रव्याद्यन्यतरोऽन्योऽर्थो वासुदेवात्परोऽधिको नास्ति तर्हि तत्समः कश्चित्स्यादत्राह तात्त्वत इति । नेत्यनुवर्तते तात्त्वतः तद्वदेव स्थितः समोऽपि नास्तीत्यर्थः तद्वदेव स्थितं यत्तु तात्वतं तत्प्रचक्षत इति वचनात् अनेन द्रव्यादीनां प्रातिस्विककारणत्वस्वभगवदेकनियतत्वेन हरेरखण्डकर्तृत्वं सुस्थिरमिति सिद्धम् ॥ १४ ॥ ❀ ❀ ननु "हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य गोप्ता भुवनस्य कर्त्ते" त्यादिश्रुतयस्त्वद्गुणप्रतिपादनपराः कथमन्यविषयाः स्युरित्याशंक्य यदंतश्यस्य मन्नाम्ना हरेर्गुणप्रतिपादका इत्याशयेनाह नारायणपरा इति । स्वप्रतिपाद्येषु वस्तुषु नारायण एव प्रतिपाद्यत्वेन परोऽधिको येषां ते तथोक्ताः सर्वस्मादुत्कृष्टनारायणमेव प्रतिपादयंतीति तत्राह देवा इति । नारायणस्य चक्षुराद्यवयवेभ्यो जाता इत्यनेन देवतानामवरत्वं नारायणस्योत्कृष्टत्वमुक्तमिति ज्ञायते नारायण एव पालकत्वेन परो येभ्यस्ते तथोक्ताः अहं हि सर्वयज्ञानामित्यादेरिज्येष्विंद्रादिष्वयं पर इति कृत्वा नारायणपरा मखा इत्युक्तम् ॥ १५ ॥ ❀ ❀ अष्टांगयोगेन योज्यमानेष्वपि परो हरिरेव कृच्छ्रचांद्रायणादितपसां विषयोऽपि स एव अत्रापि तपसा युज्यमानानां पर इत्यर्थः । नारायणपरं ज्ञानं ज्ञानेन परमज्ञेयो हरिः नारायणपरा गतिराश्रयेषु गम्येषु वा मुख्याश्रयो मुख्यगम्यश्चायमेव तदुक्तं गम्येज्यज्ञेयवाच्येषु योज्येषु चापरो हरिरित्यादि अनेन हिरण्यगर्भादिशब्दानां चतुर्मुखादिविषयत्वमपहस्तितं "सर्वे वेदा यत्पदमामनंती"ति ॥ १६ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

सर्व्वशास्त्रसमन्वयेन नारायणपरा इति द्वयम् । श्रीनारायण एव उपास्यत्वेन परः तात्पर्य्यविषयो येषां ते वेदाः । नन्वन्येऽपि देवास्तत्रोपास्यत्वेनाभिधीयन्ते । सत्यम् तेऽपि नारायणाङ्गप्रभवत्वेनैव तथा वर्ण्यन्ते इत्यर्थः । येऽपि तदाश्रया लोकास्तेऽपि, तत्पदप्राप्तिहेतवो मखाश्च तत्परा एव । तदानन्दांशाभासरूपत्वात् तत्साधनत्वाच्चेति भावः ॥ १५ ॥ ❀ ❀ तथा योगोऽष्टाङ्गः सांख्यञ्च । तत्साध्यं तपः चित्तैकाग्र्य तद्साध्यं ब्रह्मज्ञानञ्च तत्परम् । तदीयसामान्याकारप्रकाशकत्वात् तज्ज्ञानस्य योगतपसोस्तत्साधनत्वादिति भावः । किं बहुना गतिस्तत्प्राप्यं ब्रह्मापि तत्परा तत्सामान्याकारप्रकाशत्वेन तदधीनाविर्भावत्वात् । तदुक्तं श्रीमत्स्यदेवेन सत्यव्रतं प्रति—मदीयं महिमानञ्च परब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ॥ इति । अत्र मखादयस्तत्शक्त्यंशरूपाः गतिस्तु तत्तत्फलत्वात् तदानन्दांशभूतैव ॥ १६ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

जगद्गुरुर्विश्वस्रष्टा त्वं भवस्येवेति तुभ्यमादरदायिनः सन्तः किं मायामोहिताः । सत्यम् । भगवत्सम्बन्धं बिना ये आदरदायिनो ये च तस्मादादरग्राहिणश्च ते उभे अपि बहिर्दर्शिनो भगवतः पृष्ठदेशस्थया मायया मोह्यन्त एवेत्याह । विलज्जमानया मत्कपटमसौ जानातीति कपटिन्या स्त्रिया इव यस्य दृष्टिपथे स्थातुं विलज्जमानया अर्थात् तत्पृष्ठदेशे एव स्थितवत्या अमुया मायया विमोहिता विकत्थन्ते । अत्र तद्वैमुखतैव तत्पृष्ठदेशो ज्ञेयः । तद्वैमुख्ये सत्येव तस्याः प्रभावो न साम्मुख्ये इत्यर्थः ॥ १३ ॥ ❀ ❀ यद्रूपमित्यादिप्रश्नदशकस्योत्तरं वक्तुं प्रथमं भगवद्व्यतिरेकेणान्यस्यासत्त्वमाह द्रव्यमिति । द्रव्यं महाभूतानि उपादानरूपाणि । कर्म्म जन्मनिमित्तम् । कालः गुणक्षोभकः । स्वभावस्तत्परिणामहेतुः । जीवो भोक्ता । वासुदेवात् परोऽन्योऽर्थो नास्तीति द्रव्यादीनां मायाकार्य्यत्वात् मायया जीवस्य च तच्छक्तित्वादिति विश्वस्य वासुदेवरूपत्वमिति यद्रूपमित्यस्योत्तरमुक्तम् ॥ १४ ॥ ❀ ❀ नारायणः परः कारणं येषां ते । अनेनैव शास्त्रयोनित्वप्रतिपादनेन ईश्वरे प्रमाणं सर्व्वज्ञत्वादिकञ्चोक्तम् । तथा वेदादयो नारायणे स्थितत्वान्नारायणाधीनत्वाच्च नारायणपरा इति यदधिष्ठानमित्यस्य चोत्तरमुक्तम् ॥ १५ ॥ ❀ ❀ गतिर्मोक्षः ॥ १६ ॥

### श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः

न केवलं भगवन्मायया मोहिता मामेव जगद्गुरुं ब्रुवंत्यपि त्वहमीश्वरोऽस्मि ममैवेदमिति विकत्थंते इत्याहुः । विलज्जमानयेति । यस्य प्रधानक्षेत्रज्ञपतिरित्यादि श्रुतेः चेतनाचेतनस्वामिनः ईक्षापथे स्थातुं विलज्जमानयाऽमुया मायया विमोहिताः अत एव दुर्धियः ममाहमिति विकत्थंते श्लाघंते ॥ १३ ॥ ❀ ❀ एवं स्वस्मात्परं परमेश्वरं निरूप्य अथ यदधिष्ठानमित्यादिनवप्रश्नानां विश्वस्य भगवानेवाधिष्ठानादिकमित्युत्तरं वक्तुं सर्वस्य स्वरूपतो भिन्नत्वेऽपि चिदचिच्छक्तिमतः कारणाद्भगवतः सकाशात्पृथगवस्थानाभावेनाऽभिन्नत्वमाह द्रव्यमिति । हे ब्रह्मन्, द्रव्यं प्राकृतम् महदादिशरीरांतम् कर्मजन्मनिमित्तम् कालः क्षोभकः स्वभावः परिणामहेतुः जीवः क्षेत्रज्ञः एवमुक्तानुक्तः अर्थः अन्यो वेदरूपः शब्दश्च वासुदेवात्परः अवासुदेवात्मकस्तत्त्वतो नैवास्ति "सर्वं खल्विदं ब्रह्म" ति श्रुतेः वासुदेवः सर्वमितीति स्मृतेश्च ॥ १४ ॥ ❀ ❀ एत देव प्रपंचयति नारायणपरा इति

द्वाभ्याम्। नारायणः परः कारणं येषां ते नारायणपरः "तस्य वा महतो भूतस्य निःश्वसितमेतद्यदृग्वेद" इति श्रुतेः देवाः अस्मदादयः नारायणांगाज्जाताः "नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते एको ह नारायणः" इत्यादिश्रुतेः नारायणः परः आश्रयो येषां ते तथोक्ताः नारायणः परः फलं येषां ते मखाः क्रतवः॥ १५॥ ❀ ❀ योगः पूर्वोक्तः तपः कृच्छादि ज्ञानं वेदांतजन्यम्। गतिरर्चिरादिः॥ १६॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

तर्हीयं शक्तिर्मोहकस्वरूपत्वात्स्वाश्रयमपि व्यामोहयेदित्याशङ्क्याऽऽह—**विलज्जमानयेति**। सा हि भगवतो भार्या स्वस्य भगवता सह निरन्तररमणार्थमन्येषां बुद्धिं मोहयति। तस्यास्तथात्वं भगवान् जानाति। अतो विलज्जमाना ईक्षापथेऽपि स्थातुं विलज्जते। अत एव ये तत्सन्मुखास्तान्न व्यामोहयति। पृष्ठतः प्रवृत्तानेव व्यामोहयति। तदेवाऽऽह। अमुया विमोहिताः ममाहमिति विकत्थन्ते। मोहने द्वारमाह—**दुर्धिय इति**। यतो धियमेव व्यामोहयति॥ १३॥ ❀ ❀ एवं ज्ञानं सपरिकरं निरूप्य आत्मनिरूपणार्थं प्रथमतस्तत्त्वं निरूपयति—**द्रव्यमिति**। इदं हि तत्त्वं न नाना। किन्तु सर्वेषामेकमेव तत्त्वम्। तत्र सर्वं पञ्चाङ्गम्। तेषां पञ्चानां यदि भगवानेन तत्त्वं तदा तत्कार्याणां सुतरामेव तदेव तत्त्वं भवति। तानि पञ्च गणयति। द्रव्यं अधिभूतं समवायिकारणं महाभू[1]तादि। कर्म जगतो जन्मनिमित्तं साधारणम्। चकाराद्भूतसंस्काररूपं च। कालो गुणक्षोभकः। चकारान्निमित्तभूतश्च। यस्त्वाधारत्वेन सर्वत्र प्रतीयमानः। स्वभावः परिणामहेतुः। जीवो भोक्ता भगवदंशः। चकारात्तत्तदभिमानिनी देवता च। तत्र कालकर्मस्वभावा निबन्धे सम्यङ् निरूपिताः जीवोऽपि पृथङ्निरूपितः द्रव्यं त्वत्रैव। सर्वं प्रकृतिकार्यमग्रे निरूपयिष्यते। एते सर्वे वासुदेवादन्ये न भवन्ति एतेषां देवरूपत्वात्सत्त्वमूर्तिर्भगवान्निर्दिष्टस्तत्त्वनिरूपणे। तत्त्वत इति प्रतीयमानतया अन्यत्वेऽपि परमार्थतो नाऽन्यत्वम्। यतोऽस्तित्वं तस्यैव। **ब्रह्मन्निति** सम्बोधनं निरूपितेऽर्थे असम्भावनाव्यावृत्त्यर्थम्। यतस्त्वमेव ब्रह्म। अतोऽन्यस्य ब्रह्मत्वे कः सन्देह इति भावः। चकाराद्भेदोऽपि नास्तीत्यर्थः। अन्यत्वेन स्वरूपभेदो निराक्रियते। परत्वेनाऽधिष्ठातृभेदः। अर्थ इति युक्तिरुक्ता। नित्यो हि शब्दार्थसम्बन्धः। तत्र श[2]ब्दा अर्थाश्च नि[3]त्याः। ते यदि भगवद्रूपा एव भवन्ति तदेव सदेकरूपं नित्यत्वं सिद्ध्यतीति॥ १४॥ ❀ ❀ एवं सर्वेषां तत्त्वं भगवानित्युत्तरमुक्त्वा वि[4]मर्शनं यत्पृष्टं तत्रोत्तरमाह—**नारायणपरा वेदा इति**। यदि भिन्नार्थत्वं सम्भवति तदा भूयान्विचारः कर्त्तव्यो भवेत्। तत्र स्वरूपतोऽर्थतः फलतः साधनतः [5]परम्परातः द्वितीयकाण्डेऽपि साधनतः कार्यतः फलतश्च भगवानेवेति कस्मिन्नप्यंशे विवादाभावाद्भगवानेव तत्त्वमिति विमर्शः। तत्र वेदानां भगवन्निःश्वासान्निर्गतानां पुनस्तत्रैव प्रवेक्ष्यमाणानां तात्पर्यं नारायण इति निर्विवादम्। मध्येऽपि ते स्वार्थं प्रत्याययन्तस्तदर्थस्य भगवद्रूपत्वाद्भगवत्परा एव भवन्ति। किञ्च। वैदिकानि चतुर्विधान्यपि पदानि भगवद्बुद्ध्यवस्थितमर्थं व्याप्नुवन्ति सन्ति लोके पुरुषप्रयत्नोद्यतास्तमर्थमभिधाय कृतार्थानि सन्ति निवर्त्तन्ते। भगवद्बुद्ध्यवस्थितानर्थान् जानन्त्विति हि तेषां प्रयासः। ततो भगवदभिप्रेतार्थसाधकत्वादपि भगवत्परा एव। एवं शब्दतोऽर्थतोऽभिधानतश्च भगवत्पराः। ननु संसर्गरूपो वाक्यार्थस्तेषामभिप्रेतोऽर्थो भवति। स च चतुर्विधो विध्यर्थवादमन्त्रना[6]मधेयात्मकः। तत्र वि[7]ध्यर्थस्य पुरुषप्रयत्नप्रेरणालक्षणस्य पुरुषप्रयत्ने तात्पर्यम्। पुरुषप्रयत्नाभि[8]व्यङ्ग्ये भावे वा। विधेयार्थस्तवने त्वर्थवादाः। मन्त्रा अपि याज्याव्यतिरिक्ता देवताप्रतिपादनस्तुत्यादावुपयुक्ताः। याज्यास्तु देवतोद्देशद्रव्यत्यागे। नामधेयान्यपि धात्वर्थावच्छेदने तात्पर्ययुक्तानि। तस्मात्तत्तदर्थे [9]उपक्षीणानि कथं भगवति तात्पर्यमावहिष्यन्ति। तत्राऽऽह—**देवा नारायणाङ्गजाः। नारायणपरा लोका नारायणपरा मखा इति**। सर्वो हि वेदः प्रवर्त्तमानश्चतुर्विधोऽपि यागे उपयुज्यते। महावाक्यार्थत्वाद्यागस्य। तत्र हि यागः करणम्। स्वर्गादिः साध्यम्। तत्र साम्प्रतं पुरुषप्रयत्नेनाऽभिव्यक्ता यागाः स्वव्यापारं देवताप्रीतिं मध्ये जनयन्ति। अन्यथा व्यापाराभावे करणभावादेव प्रच्यवन्ते। अदृष्टादिकं तु न व्यापाराः। यागेनाऽजन्यत्वात्। कल्पनायां मानाभावात्। दृष्टस्य व्यापारस्य विद्यमानत्वाच्च। ते हि देवतोद्देशेन द्रव्यत्यागं कुर्वन्तः स्वर्गं साधयन्ति। देवता चाऽन्यदीयं हविर्विधानेन गृहीत्वा किञ्चिदुपकर्तुमुचिता भवति। लोके तथोपलब्धेः। अन्यथा तदुद्देशद्रव्यत्यागत्वं यागस्य न स्यात्। द्रव्यसंस्कारकत्वेनाऽपि देवतोपयोगस्य वक्तुं श[10]क्यत्वात्। निर्वापादारभ्य तत्सम्बन्धवचनस्य च[11] प्रोक्षणादिव[12]त्संस्कारपरत्वं घटते। यद्यपि देवतापदेषु विद्यमाना चतुर्थी न भवति। उपपदविभक्तित्वात्। प्रीतिरप्यानत्या। कालान्तरस्मारकस्याऽप्यभावात्। तत्कल्पनायां गौरवम्। तथापि चतुर्थ्या निरर्थकत्वदोषानिवृत्त्यर्थमवश्यमर्थो वक्तव्यः। स चाऽन्यत्र सिद्धत्वात्सम्प्रदान एव भवति। देवतोद्देशप्रसिद्धेश्च। "**यस्यै देवतायै हविर्गृहीतं स्या**"दित्यत्र "**अग्नये जुष्टं निवपामी**" त्यादौ च चतुर्थ्यास्ता[13]दर्थ्यार्थत्वम्। नहि तत्र नमः स्वस्त्यादिपदानि सन्ति। यागे तु पुनः स्वर्गः फलत्वेनाऽभिमत इति

---

१ महाभूतानि इति घ. २ शब्दार्थाश्चेति क. ग. घ. ङ. ३ अनित्या इति ग. ४ विमर्षणमिति क. ग. ङ. ५ परम्परां गत इति क. ख. ६ नामधेयार्थात्मक इति घ. ङ. ७ विध्यर्थस्य तु इति ख. ङ. ८ अभिव्यङ्ग्ये इति क. ख. ग. ङ. ९ उपज्ञायमानानीति ग. १० कल्पनायां मानाभावादित्यधिको ग्रन्थः ग. ११ चेति नास्ति ग. घ. १२ तत्संस्कारेति ख.। १३ तादर्थ्यत्वमिति क. ख. ग. ङ. तदर्थत्वमिति घ.।

केवलं देवताया उद्देश्यत्वाभावादवान्तरव्यापारविवक्षार्थं "नमःस्वस्तिस्वाहे"त्युपपदविभक्त्यनुशासनम् । न च प्रीतिर्व्यापारः । तस्या अन्यधर्मत्वेन स्वर्गजनकत्वाभावात् । देवता तु स्वर्गादावधिकृता फलं दातुं शक्नोति । अतो द्रव्येण प्रीता देवता व्यापारः । सा च नित्या चेतना च । यथानुरूपं च फलं नि[१]यमयितुं शक्ता । परं तस्या अपुरुषार्थत्वात्पुरुषस्याऽभिप्रेता न भवतीति न तावन्मात्रेण यागस्याऽन्यथासिद्धिः । अतो मध्ये व्यापाररूपदेवतापरत्वेऽपि भगवत्परत्वम् । यतो देवा नारायणस्याऽङ्गेभ्यो बाह्वादिभ्यो जाताः । न ह्यङ्गसेवार्थं प्रवृत्ता अङ्गे तात्पर्ययुक्ता भवन्ति । किन्त्वङ्गिनि । यद्यप्य[२]ङ्गान्येव वक्तव्यानि तथापि तेषां विग्रहस्यैवाङ्गत्वात्तत्र जाता अङ्गजा भवन्ति । प्रीतिपक्षेऽपि दृष्टत्वात्प्रामाणिकत्वाच्च पुनः स्मरणादिकल्पनं न गौरवाय । किञ्च । यत्र देवता व्यापारत्वेन गृहीता स स्वर्गादिरुद्देश्यो भवति । तस्य लोकत्वे सुखत्वे वा भगवदीयत्वं न व्यभिचरति । स्वर्गादिलोकानां "इदा स्व[३]र्गादिलोक" इत्यादिना तदवयवत्वेन प्रतिपादनात् । "अस्यैवाऽऽनन्दस्याऽन्यानि [४]भूतानि मात्रामुपजीवन्ती"ति श्रुत्या [५]भगवदानन्दांशत्वात्स्वर्गादीनां यागकर्तुः स्वसम्पादने भगवदानन्दोपजीवकत्वात्फलदातृभगवत्क्रियानिष्पादकत्वाद्भगवत्परत्वं सुखस्याऽपि । एवमवान्तरमहाफलयोर्भगवदीयत्वे तदर्थं प्रवृत्ता मखा अपि भगवत्परा इत्यविवादम् । अतो वाक्यार्थविवक्षायामपि भगवत्परत्वमविवादमिति वेदानां भगवत्परत्वविमर्शः सिद्धः । अतःपरं पुराणानां भगवत्परत्वविमर्शः कर्त्तव्यः । पाक्षिकोऽपि दोषः परिहरणीय इति । तत्र पुराणेऽर्थचतुष्टयं साङ्ख्यं योगः पशुपतिमतं वैष्ण[६]वं प्रतिपाद्यम् । तत्राऽन्तिमस्यैतत्प्रवेशान्न विरोधशङ्का । योगो हि चित्तवृत्तिनिरोधात्मकः स्वतोऽपुरुषार्थभूतः पुरुषार्थसाधनं भवितुमर्हति । न च वेदविरुद्धार्थं कल्पयितुं शक्नोति । अप्रामाणिकत्वप्रसङ्गात् । न चाऽणिमादयस्तस्य मुख्यं फलम् । मोक्षपर्यवसायित्वाभावे अशास्त्रत्वापत्तेः । सिद्धयस्त्वन्तरायरूपाः काल[७]क्षपणहेतव इत्यग्रे वक्ष्यते । अतो मोक्षं साधयन्नपि योगो भगवति चित्तैकाग्र्यं साधयन्नेव साधयति । सबीजनिर्बीजध्यानयोर्भगवच्चरणारविन्दविषयत्वात् । अतस्तस्याऽप्यवान्तरविवक्षया पूर्ववद्भगवत्प्रीतिरेवावान्तरव्यापार इति कल्पनीयम् । चित्तसंस्कारपरत्वेऽपि फलं भगवदधीनमेवेति भगवन्मुखनिरीक्षकत्वमवश्यं कल्पनीयम् । योगा इति बहुवचनेन सर्वे योगभेदा भगवत्परा एव । एतस्य भगवत्परत्वमग्रे विस्तरेण वक्ष्यते । भगवत्प्राप्त्युपायत्वात्सामान्यतस्तत्परत्वमविवादम् । तपस्तु भगवदुपयोगि देहेन्द्रियसम्पादकत्वेन तत्परमेव । अन्यथा क्लेशात्मकस्य तस्य पुरुषार्थपर्यवसानं न स्यात् । पशुपतिमतं तु तपस्येवोपक्षीणम् । ज्ञानं द्विविधं—औपनिषदं साङ्ख्यसिद्धं च । तच्च यद्यपि परस्परं विरुद्धम् । औपनिषदं हि सर्वस्याऽऽत्मत्वप्रतिपादनेनाऽऽत्मत्वेन सर्वविषयकं भवति । इदं तु सर्वव्यावृत्तत्वेनाऽऽत्मविषयकम् । तथापि प्रथमप्रवृत्तस्याऽऽत्मानात्मसंस्कारात्पृथक्कृत्याऽऽत्मावगमनं मुख्यम् । अन्यथा सर्वस्यात्मत्वं [८]प्रतिपद्यमानमात्माज्ञानादशक्यमेव स्यात् । ज्ञानस्य च ज्ञेय एव तात्पर्यम् । ज्ञेयस्तु नारायण एव । आत्मत्वात्सर्वत्वाद्ब्रह्मत्वाच्च । गतिरपि पूर्वोक्ता भगवत्परैव । सा हि ब्रह्मज्ञानफलं भवति । तदुक्तं "विन्दन्ति हि ब्रह्मगतिमि" त्यत्र ॥ १५ ॥ १६ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अत एव संमुखे स्थातुमशक्तत्वादेवेत्यर्थः ॥ १३ ॥ ❀ ❀ द्रव्यमित्यस्याभासे सपरिकरमिति, तादृशज्ञानस्यासार्वत्रिकत्वसमर्थको यो मोहादिरूपः परिकरस्तत्सहितमित्यर्थः । विवृत्तौ भूतसंस्काररूपमिति अदृष्टरूपमित्यर्थः । एतेषामित्यादि, अत्रोच्यमानानां कालादीनां देवतारूपत्वात् सात्विकशरीरवत्त्वात्सत्त्वमूर्तिः, सतो भावो धर्मः सत्त्वं, न तु प्रकृतिगुणभूतं, तन्मूर्तिः शरीरं यस्य, तादृशो भगवान्निर्दिष्टः, कारणतया बोधितोऽनागन्तुकानारोपितरूपनिरूपण इत्यर्थः । तस्यैवेति मूलभूतसत एव । त्वमेव ब्रह्मेति 'ब्रह्मदशा' इत्यादिश्रुतेरित्यर्थः । धर्मभेदोपि नेति । उपादानत्वनिमित्तत्वक्षोभकत्ववैजात्यजनकत्वभोक्तृत्वादयो धर्मा अपि भगवदीया एवेति धर्मतोपि भेदो नेत्यर्थः । नन्वत्र परान्यशब्दयोरैकार्थ्यादन्यतरवैयर्थ्यमायातीत्यत आहुः अन्यत्वेनेत्यादि । अधिष्ठातृभेद इति भिन्नाधिष्ठातृकत्वम् । तथा च वासुदेवात्परो न किन्त्वपरस्तन्निम्य इत्यर्थः । एवं सति जीवादीनां भगवदात्मकत्वेपि न भगवत्त्वं, किन्तु, ततो न्यूनत्वमित्युक्तं भवति । अयमर्थो दशमाध्याये 'यदनुग्रहतः सन्ति न सन्ति यदुपेक्षये' त्यत्र स्फुटो भावीत्यनवद्यः । नन्वपकृष्टत्वेन भिन्नधर्मकत्वे बोधिते, सत्तामात्रं न स्वरूपान्यत्वसाधकं, द्रव्यादिकं वासुदेवात्मकं, सद्रूपत्वादित्यत्र न तदात्मकं भिन्नधर्मकत्वादिति सत्प्रतिपक्षसत्त्वादित्याशङ्क्यापकृष्टत्वेपि स्वरूपानन्यत्वसाधकं युक्त्यन्तरमाहेत्याहुः अर्थ इति । युक्तिरुक्ता अर्थ अभिधेय इत्यर्थः ननु अर्थपदस्य कथं युक्तित्वमित्यत आहुः नित्यो हीत्यादि । शब्दार्थसम्बन्धः, द्रव्यादिशब्दैः सहार्थस्य द्रव्यादेः सम्बन्धो वाच्यवाचकत्वरूपो, हि यतो हेतोः नित्यः, यथा लौकिकैः साङ्केतिकैः नरसिंहादिशब्दैः पुरुषा अभिधीयन्ते, तथा न, किन्तु, तत्र नित्यसम्बन्धवादे शब्दा वाचका अर्था अभिधेयाश्च नित्याः । अतो

---

१. नियन्तुमिति घ. नियमितुमिति ख. ङ. । २. अङ्गा एव वक्तव्या इति ग. । ३. स्वर्गलोक इति क. स्वर्गादिर्लोक इति ख. । ४. भूतानीति नास्ति क. ख. । ५. भगवदंशत्वादिति क. । ६. वैष्णवप्रतिपाद्यमिति ख. । ७. कालक्षेपणहेतव इति क. । ८. प्रतिपाद्यमानमिति ग घ ङ. ।

भिन्नधर्माणो द्रव्यादयो भगवदात्मकाः, नित्यत्वात्, नित्या अर्थत्वात्, यन्नैवमिति । तथा च, 'सदेव सौम्येदमि' तिश्रुत्या सर्वस्य सदात्मकतयैव नित्यत्वाद्विकल्पानां वाचारम्भणमात्रत्वाद्भगवद्रूपत्वेनैवार्थत्वमित्यर्थपदस्य युक्तित्वमित्यर्थः ॥ १४ ॥ ❀ ❀ नारायणेत्यत्र **विमर्शनमिति** । येन विचारेण सर्वेषामिदमेवानारोपितरूपमिति ज्ञाते तादृशो विचार ऊहापोहरूपः । ननु वेदादीनां नारायणपरत्वे कथं **पूर्वोक्ततत्त्वज्ञानसिद्धिरित्याकांक्षायां** तदुपपादयितुं तर्कमाहुः **यदीत्यादि** । **भूयानिति** । अर्थतत्त्वस्य नानात्वेन तद्विषयकतया भूयान् तथा च, श्रुतौ यतो **नैवमतो** भिन्नार्थत्वं नेत्यर्थः । सिद्धवत्कारेणाहुः **तत्र स्वरूपत इत्यादि** । तत्रेति पूर्वकाण्डे **भगवानेवेति** प्रतिपाद्य इति शेषः **स्वरूपतो भगवत्परत्वं** दर्शयन्ति **तत्र वेदानामित्यादि** । 'एतस्यैव महतो भूतस्य निःश्वसितं यदृग्वेदो यजुर्वेदः सामवेद' इत्यादिश्रुतेः **तादृशानां वेदानां तात्पर्यम्** , सः परो नियन्ता यस्यासौ तत्परः, तस्य भावस्तात्पर्यम्, नियम्यत्वमिति यावत् । तथा च, तद्बोधितं नियामकत्वं नारायण इति स्वरूपतस्तत्प्रतिपादकत्वमुक्तम् । अर्थतो दर्शयन्ति **मध्येपीत्यादि** । **मध्य** इति । बहिःस्थितिदशायां साधनतो दर्शयन्ति **किञ्चेत्यादि** । **चतुर्विधानीति** नामक्रियानिपातोपसर्गरूपाणि व्याप्नुवन्तीति वदन्ति । **पुरुषप्रयत्नोद्यतास्तमिति** । पुरुषप्रयत्नेन उद्यतमाविर्भावः अस्तं तिरोभावे यस्य द्रव्यगुणक्रियादेस्तादृशम् । **एवमिति**, वेदत्वेनार्थाभिधायकत्वे चेत्यर्थः । परम्पराऽङ्गतस्तथात्वं दर्शयन्ति **नन्वित्यादि** । **चतुर्विध** इति निषेधानां निवृत्तिविधायकत्वेन विधौ पर्युदासानां चार्थव्युदासद्वारा नामधेये पर्यवसानात्तथेत्यर्थः । **भावे** इति धात्वर्थरूपायां क्रियायाम् । **तत्र हीति** वाक्ये हि । तत्रेति स्वर्गसाधने । **अदृष्टादिकमिति**, आदिपदेनापूर्वम् । ननु देवताप्रीतेः व्यापारत्वे किं मानमित्याकांक्षायां 'सहयज्ञा प्रजा सृष्ट्वे' त्यादिगीतास्थसन्दर्भस्य प्रमाणत्वेपि मीमांसकादीनामपरितोषात्कुतर्कसम्भव इत्यतस्तदुपपादयन्ति **ते हीत्यादि** । **त** इति यागकर्त्तारः । **तथोपलब्धेरिति** प्रीत्या प्रत्युपकारस्य दर्शनात् । **अन्यथेति** प्रीतेर्व्यापारत्वाभावे । कुतो न स्यादित्यत आहुः **द्रव्येत्यादि** । तथा च संस्कारस्य उद्देश्यत्वाभावात्तथेत्यर्थः । ननु संस्कारत्वेऽप्युद्देश्यत्वे बाधकाभावान्न यागलक्षणस्य प्रीतिसाधकत्वमित्यपेक्षायां देवतापदेषु श्रूयमाणायाश्चतुर्थ्यास्तत्साधकत्वं व्युत्पादयन्ति **यद्यपीत्यादि** । **तत्कल्पनायामिति** स्मारककल्पनायाम् **स चेत्यादि** सोर्थः **अन्यत्र** 'विप्राय गां ददाती' त्यादौ केवलचतुर्थ्यां सिद्धत्वात् सम्प्रदाननिष्ठ **एव भवतीत्यर्थः** । तादर्थ्यत्वमिति तादर्थ्यवाचकत्वम् । नन्वेवं निर्वाहे उपपदचतुर्थ्यानुशासनवैयर्थ्यप्रसक्तेर्नेदं युक्तमित्यस्तदभिप्रायकथनेन सार्थकत्वं साधयन्ति **यागे त्वित्यादि** । तथा चैवं स्वहायोगेनुशिष्टायाश्चतुर्थ्या व्यापारविवक्षया सार्थकत्वे सिद्धे व्यापारविवक्षया देवताया उद्देश्यत्वसिद्धिः, तया च प्रीतेर्व्यापारत्वसिद्धिरित्यर्थः । ननु लोकन्यायेन देवताप्रीतेर्व्यापारत्वमयुक्तमन्यधर्मकत्वात्फलजनकस्य करणधर्मस्यैव लोके छिदादौ व्यापारताया दृष्टत्वादिति शङ्कायां तदुक्तमुपगच्छन्ति **न चेत्यादि**, मास्त्वित्यर्थः । तर्ह्यन्यथानुपपत्त्या सिद्धमदृष्टादिकल्पनमित्यत आहुः **देवता त्वित्यादि** । अतःशक्तत्वेपि सर्वेभ्यस्तददानात्प्रीत्यैव सा तथा न तूदासीना । तथा च, प्रीतेर्यागजन्यत्वात्तद्द्वारा प्रीतत्वेन रूपेण देवताया अपि तथात्वात् फलजननशक्तत्वाच्च व्यापारलक्षणसमन्वयेनुपपत्त्याभावान्नादृष्टादिकल्पनं साधीयः लोकेपि प्रत्युपकरादिस्थले तथोपलब्धेः, अतो मध्ये चेतनस्य यत्र प्रवेशः तत्रान्यधर्मस्य व्यापारत्वम् यत्र च न चेतनप्रवेशः, तत्र तु तथैवेति सर्वं समञ्जसमित्यर्थः । नन्वेवं सति यागस्य करणत्वं हीयेत, तथैव फलस्य सम्भवे यागस्य प्रीतिं जनयित्वोपक्षीणतायाः शक्यवचनत्वादित्याशङ्कायामाहुः **परमित्यादि** । तेन प्रकृतसिद्धिमाहुः **अत इत्यादि** । **अत** इति, एवं यागस्यानुपक्षयात् । भगवत्परत्वमिति । यागस्याङ्गं देवता, तस्या अङ्गं प्रीतिरिति परम्पराङ्गतो भगवत्परत्वम् । तत्र हेतुमाहुः **तत इत्यादि** । **तत्र जाता** इतिविग्रहे समागता प्रविष्टा इति यावत् । नन्वेवं सति प्रीतिपक्षः पूर्वं किमित्यादृतः इत्यत आहुः **प्रीतीत्यादि**। तथा च, देवेषु योगसत्त्वेन योगजधर्मस्य स्मारकत्वकल्पनेपि दोषाभावात् सोप्यादृत इत्यर्थः फलतस्तथात्वं साधयन्ति **किञ्चेत्यादि**, **क्रियानिष्पादकत्वादिति** अत्र क्रियानिष्पादितत्वादिति पाठः प्रतिभाति **क्रियाया** इति पदभेदपाठो वा सिद्धमाहुः **एवमित्यादि** । अत्र द्वितीयकाण्डस्थसाधनकार्यफलानां तपोज्ञानब्रह्मगतीनां पुराणविमर्शेनैव भगवत्परत्वसिद्धेः न तस्य पृथङ्निरूपणमिति ज्ञेयम् । **पाक्षिकोपि दोष** इति, 'इतिहासपुराणं वेदानां पञ्चमो वेदानां इतिश्रुतेस्तस्यापि वेदत्वात्तस्य भगवत्परत्वाभावे पाक्षिको दोष इत्यर्थः । **अत** इति ध्यानस्य नश्वरत्वात् । **अग्र** इति तृतीस्कन्धे । **तपस्येवोपक्षीण**- [illegible] च तपोरूपत्वात्तथेत्यर्थः ॥ १५ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

ननु यन्माययेति भगवतोऽपि मायासम्बन्धोक्तेस्तस्या व्यामोहकत्वदुर्जयत्वोक्तेश्च सा स्वाश्रयं भगवन्तमपि व्यामोहयेत् तर्हि तस्यापि संसारित्वं स्यादित्याशङ्क्य तरदुर्जयत्वेऽपि भगवति तस्या अकिञ्चित्करत्वमेवेत्याह—विलज्जमानयेति । मत्कपटमसौ जानातीति मत्वा यस्य भगवतः ईक्षापथे दृष्टिपथे स्थातुमपि विलज्जमानया अमुया मायया मोहिता अतएव दुष्टा विषयाभिनिविष्टा धीर्येषां ते भगवत्कर्तृके भगवद्रूपे देहादौ ममाहमिति विकत्थन्ते[1] ॥ १३ ॥ ❀ ❀ तदेवं स्वस्मादन्यं परमेश्वरं निरूप्य यद्रूपमिति प्रश्नस्योत्तरं चोक्त्वेदानीं यदधिष्ठानमित्यादिनवप्रश्नानामपि स एवाधिष्ठानादिकं सर्वमित्युत्तरं वक्तुं तद्व्यतिरिक्तं किञ्चिन्नास्तीत्याह—द्रव्यमिति । द्रव्यं महाभूतानि उपादानरूपाणि, कर्म जन्मनिमित्तं, कालो गुणकर्मादिक्षोभकः, स्वभावः

---

१. प्रजल्पन्तीत्यर्थः ।

तत्तत्परिणामहेतुः, जीवो भोक्ता, अन्यश्चानुक्तः सर्वोऽपि पदार्थो वासुदेवात्परो भिन्नो नास्त्येवेत्यन्वयः । कुतो नास्ति दृश्यमानत्वादित्याशङ्क्याह—तत्त्वत इति, परमार्थत इत्यर्थः । कटककुण्डलादीनां सुवर्णाव्यतिरेकवत् कार्यमात्रस्य कारणाव्यतिरेकनियमस्य सर्वसिद्धत्वाद्द्रव्यादेः कार्यस्य वासुदेवकारणकत्वात् तदव्यतिरेक इति भावः । सन्ति बहवोऽपि पक्षाः परन्तु त्वयाऽत्रैव विश्वासः कर्त्तव्य इत्याशयेन सम्बोधयति—हे ब्रह्मन्निति ॥ १४ ॥ ❀ ❀ उक्तमेव प्रपञ्चयति—नारायणेति द्वयेन । नारायणः परः कारणं येषां ते तथोक्ताः "तस्य वा एतस्य महतो भूतस्य निश्वसितमेतदृग्वेदः" इत्यादिश्रुतेः । अनेनैव शास्त्रयोनित्वप्रतिपादनेनेश्वरे प्रमाणं तस्य सर्वज्ञत्वादिकं चोक्तम् । देवाश्च नारायणस्याङ्गाज्जाता अतो न तद्व्यतिरिक्ताः "चन्द्रमा मनसो जातः" इत्यादिश्रुतेः । लोकाः स्वर्गादयो नारायणपरास्तदानन्दांशा इत्यर्थः । मखाः यज्ञाः नारायणपराः स्वर्गादिप्राप्तिसाधनत्वेन वेदद्वारा तेनैव प्रवर्तिता इत्यर्थः ॥ १५ ॥ ❀ ❀ योगाः प्राणायामाद्यष्टाङ्गा नारायणपरा नारायणेनैव स्वाराधनरूपेण प्रवर्त्तिता इत्यर्थः । तपः कृच्छ्रचान्द्रायणादिरूपं नारायणेन प्रवर्त्तितं चित्तविशुद्ध्यादिद्वारा तत्प्राप्तिसाधनं च । ज्ञानं भगवत्तत्त्वविज्ञानं नारायणाधीनं सकलसाधनसम्पत्तावपि तत्कृपां विना नैव भवतीत्यर्थः । गतिः तत्तल्लोकगमनं भगवत्प्राप्तिश्च नारायणपरा तदधीना तत्तत्साधने प्रवर्त्त्य तदनुसारेण फलं च स एव ददातीत्यर्थः ॥ १६ ॥

## हिन्दी अनुवाद

यह माया तो उनकी आँखोंके सामने ठहरती ही नहीं, झेंपकर दूरसे ही भाग जाती है । परन्तु संसारके अज्ञानी जन उसीसे मोहित होकर 'यह मैं हूँ, यह मेरा है' इस प्रकार बकते रहते हैं ॥ १३ ॥ ❀ ❀ भगवत्स्वरूप नारद ! द्रव्य, कर्म, काल, स्वभाव और जीव—वास्तवमें भगवान्‌से भिन्न दूसरी कोई भी वस्तु नहीं है ॥ १४ ॥ ❀ ❀ वेद नारायणके परायण हैं । देवता भी नारायणके ही अङ्गोंमें कल्पित हुए हैं, समस्त यज्ञ भी नारायणकी प्रसन्नताके लिये ही हैं और उनसे जिन लोकोंकी प्राप्ति होती है, वे भी नारायणमें ही कल्पित हैं ॥ १५ ॥ ❀ ❀ सब प्रकारके योग भी नारायणकी प्राप्तिके ही हेतु हैं । सारी तपस्याएँ नारायणकी ओर ही ले जानेवाली हैं, ज्ञानके द्वारा भी नारायण ही जाने जाते हैं । समस्त साध्य और साधनोंका पर्यवसान भगवान् नारायणमें ही है ॥ १६ ॥

**तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः । सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः ॥१७॥**
**सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः । स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥१८॥**
**कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः । बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥१९॥**
**स एष भगवाँल्लिङ्गैस्त्रिभिरेभिरधोक्षजः । स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः ॥२०॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तर्हि त्वं किं करोषीत्यपेक्षायामाह । तस्य सृज्यमपि तेन सृष्टोऽहं सृजामि ईक्षया कटाक्षेण तत्र हेतवो द्रष्टुरित्यादयः ॥ १७ ॥ ❀ ❀ ननु कुतोऽयं जीवेश्वरविभागो यतस्त्वं प्रेर्यः स च प्रेरकः स्यादित्यपेक्षायां जीवेश्वरविभागहेतुमाह त्रिभिः । सत्त्वमिति । निर्गुणस्यापीश्वरस्यैते त्रयो गुणा बध्नंतीत्युत्तरेणान्वयः । कथंभूताः । तेनैव स्वातंत्र्येण स्थित्याद्यर्थं मायया गृहीताः ॥ १८ ॥ ❀ ❀ वस्तुतः सर्वदा मुक्तमपि मायिनं मायाविषयं पुरुषं जीवं बध्नंति कार्यमधिभूतं कारणमध्यात्मं कर्ताधिदैवतं तेषां भावस्तत्त्वं तस्मिन् । द्रव्यं महाभूतानि ज्ञानशब्देन देवताः क्रिया इन्द्रियाणि तदाश्रयास्तेषां कारणभूतास्तत्तदभिमानेन बध्नंति ॥ १९ ॥ ❀ ❀ अतः स एष वक्ष्यमाय एभिर्गुणैर्लिंगैर्जीवानामावरकैरुपाधिभिः सुष्ठलक्षिता गतिस्तत्त्वं यस्य सः स्वैर्भक्तैरेव लक्षिता गतिस्तत्त्वं यस्येति वा ॥ २० ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

तर्हीत्याक्षिपति—किं स्वेच्छया नहि नहि ईक्षया तस्याज्ञयैवेत्यर्थः । द्रष्टुरिति । मम तस्य साक्षित्वे ईश्वरत्वे सर्वांतर्यामित्वे कूटस्थत्वे सत्येव नान्यथेति स्वस्य जीवत्वं तस्य चेश्वरत्वं व्यंजितम् । तथा च श्रुतयः । "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा ॥ सर्वाध्यक्षः सर्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च" इति । "एष भूताधिपतिरेष लोकेश्वरो लोकपालः" इति । ब्रह्मादिपिपीलिकापर्यंतसर्वप्राणिबुद्धिष्ववशिष्टतयोपलभ्यमानः सर्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते इति च ॥ १७ ॥ अत्राक्षिपति नन्विति—निर्गुणस्य सत्त्वादिगुणास्पृष्टस्यापि त्रयो गुणा भवन्ति केन प्रकारेणेत्यपेक्षायामाह । विभोर्मायया स्थित्याद्यर्थं

---

१ प्रजल्पन्तीत्यर्थः ।

गृहीता इति तच्छक्तिगुणत्वेन तद्गुणत्वमित्यर्थः । तत्र मायाया नित्यमेव तद्गुणरूपत्वेपि गृहीता इति प्रयोगो नित्यनरविग्रहत्वेपि कृष्णस्य "तस्येच्छयात्तवपुषः' इतिवत् । प्राकृतलोकोक्त्यनुकारेण ज्ञेयः ॥ १८ ॥ ❀ ❀ नित्यमुक्तं बध्नंतीति विरुद्धमुक्तं तत्राह—मायिनमिति । मायात्र मायाकृतो मोह उच्यते स चानादितगुणावेशविमुखस्य तस्य मायापारवश्यादेव तेन गुणावेश एव बंधः साक्षाद्बंधाभावान्नित्यमुक्तत्वमपि युज्यतः इति भावः । चित्सुखस्तु—द्रव्यं स्थूलं कार्यं ज्ञानमंतःकरणं प्रमातृक्रिया इंद्रियाणि तदाश्रयाः संतो देहाध्यासेन कार्यत्वे इंद्रियाध्यासेन कारणत्वेऽन्तःकरणाध्यासेन कर्तृत्वे निबध्नन्ति निर्विकारस्यैव चितो मायाश्रयत्वेनेश्वरत्वं तथा तद्विषयत्वेनाध्यासाज्जीवत्वमिति भावः ॥ १९ ॥ ❀ ❀ एभिर्लिंगैः करणैः स्वैर्ज्ञानिभक्तैः कर्तृभिर्लक्षिता गतिर्यस्य । 'गुणप्रकाशैरनुमीयते भवान्' इत्याद्युक्तेः ॥ २० ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

[ गुणाः शुक्लादयः इत्यमरकोषविधानात् गुणाः शुक्लरक्तकृष्णवर्णा इति पूर्वश्लोकोक्तस्य त्रयो गुणा इति वाक्यस्य विशेषणम् । यद्वा गुणोऽप्रधानमिति मेदिनीकोषात् स्थित्याद्यर्थं मायया गृहीता अप्रधानरूपा इति पूर्वश्लोकेनैव सम्बन्धः । अतः स्वामिकृतटीका सम्मतपूर्वश्लोकेनान्वितस्य बध्नन्तीति परश्लोकस्यान्तर्गतगुणा इतिपदस्य न पौनरुक्तिशङ्केति ॥ ] अधिभूतं गोलकम् । अध्यात्मम् इन्द्रियम् । अधिदैवम् इन्द्रियप्रवर्त्तकदेवता ॥ १९ ॥ २० ॥

## श्रीमद्वीरराघवव्याख्या

एवं सर्वं तदधीनमिति कथनेन नाहं वेदपरं त्वस्मिन्नित्यंशस्योत्तरमुक्तं भवति । तर्हि त्वं किंकरोषीत्यपेक्षायामाह तस्येति । अखिलांतरात्मन सर्वांतर्यामिणः अभिद्रष्टुः सर्वज्ञस्य ईशस्य सर्वं स्ववशीकृत्य नियंतुः कूटस्थस्य निर्विकारस्येक्षयैव संकल्परूपज्ञानेनैव सृष्टोऽहं तेन चोदितः सृज्यं सृजामी त्यन्वयः । सतु प्रयो कोहेतुप्रयोज्य इति भावः । ॥ १७ ॥ ❀ ❀ ननु कुतोयं नियोज्यनियोजकभावः कुतो वा तस्य सर्वज्ञत्वादयो धर्माः स्वस्य तु तद्विपरीता इत्यपेक्षायां मायीश्वरत्वमायावश्यत्वाभ्यामित्याह सत्वमिति । निर्गुणस्य हेयगुणरहितस्य कल्याणगुणानां समनंतरमेवोक्तत्वाद्विभोर्व्यापकेन भगवतो मायया प्रकृतिद्वारास्थितिसर्गनिरोधेषु निमित्तेषु स्थित्याद्यर्थं सत्वादयस्त्रयो गुणा गृहीताः स्वनियम्यत्वेन परिगृहीताः सृष्टिस्थितिसंहाररूपलीलापरिकत्वेन सत्त्वादय ईश्वरेण परिगृहीता इत्यभिप्रायः ॥ १८ ॥ ❀ ❀ एवं गुणानामीश्वरलीलापरिकरत्वमुक्त्वा जीवबंधनत्वमाह कार्येति । कार्यं शरीरं कारणमिन्द्रियं ताभ्यां कर्तृत्वे निमित्ते पुण्यपापनिष्पादनार्थं गुणाः सत्त्वादयः स्वरूपतोऽव्ययं मायिनं मायावश्यं संबंधमात्रेण नित्यं पुरुषं जीवं बध्नंतीत्यन्वयः । गुणान्विशिनष्टि द्रव्येति । मोहनप्रकाशनप्रवर्त्तनस्वभावाः द्रव्यशब्दस्य मोहनवाचित्वं पारिशेष्यादवगम्यते अत एवास्मिन्नध्याये बहुशः प्रयोगाश्च "सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः । निबध्नंति महाबाहो देहे देहिनमव्ययम् । तत्र सत्वं निर्मलत्वात्प्रकाशकमनामयं सुखसंगेन बध्नाति ज्ञानसंगेन चानघ । रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवं तन्निबध्नाति कौंतेय कर्मसंगेन देहिनम् । तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनां । प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारतेति । गीतावचनान्यत्र स्मारितानि ॥ १९ ॥ ❀ ❀ एवं गुणानां जीवबंधकत्वमुक्तमथ स्वलीलापरिकरीकृतमायः परमेश्वरः सर्वेषां मम चेश्वर इत्याह स इति । लिंगैः सत्त्वादिगुणैः शरीरभूतप्रकृतिस्थैरुपलक्षितः स्वलक्षितगतिः स्वलक्षिता स्वच्छन्दा गतिर्यस्य स तथोक्तः । न तु तदा दर्शितपंथानाविति वदन्यदर्शितमार्गः स एष एवंविधैश्वर्यसंपन्नो भगवान् हे ब्रह्मन्नारद सर्वेषां मम चेश्वरः नियंता ॥ २० ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

ननु भवतः स्रष्टृत्वाभावे कथं त्वन्नामलोके ख्यातं वर्त्तत इत्यतस्तं प्रकारं दर्शयति तस्यापीति । तद्दृष्टिं प्रतिलब्धुं कोऽपिसमर्थो नास्तीति ईशस्येति । ईशित्वं च वरादिप्राप्तं नेति निर्विकारस्येति । एतदपि बलवत्प्रतिबंधकेनान्यथा न भवतीत्यखिलस्वामिन इति एवंविधस्य तस्य हरेरपि शब्दात् श्रियश्च ईक्षयैव कटाक्षवीक्षणेनैवा भिचोदितस्तेन सृष्टोऽहं सृज्यं जगत् सृजामीत्यन्वयः । एवशब्देन सृष्टौ प्रयोजकांतरं निवारयति ॥ १७ ॥ ❀ ❀ एवं हरेर्मुख्यकर्तृत्वं प्रदर्श्याधुना युगवत्क्रमशोऽपि वेति प्रश्नं परिहरति सत्त्वं रजस्तम इति । तेन हरिणा नित्यं गृहीता अपि सत्त्वंरजस्तम इति त्रयोगुणा निगुणस्य सततं सत्त्वादिगुणरहितस्य विभोर्माय येच्छया स्थित्यादिषु निमित्तभूतेषु क्रमशो युगपच्च गृहीता इत्यन्वयः माययेति । विशेषणान्मूलसृष्ट्यादिषु क्रमशो दैनंदिनसृष्ट्यादिषु युगपद् गृहीता इति विशेषः तदुक्तं नित्यं गृहीताः स्थित्यादिषु विशेषतः युगपत्क्रमशश्चैवेति ॥ १८ ॥ ❀ ❀ रजोगुणमुपादानीकृत्य सृष्टिंवक्ष्यन् हरेः सत्त्वादिगुणैर्जीवबंधकत्वमहिमानमाह कार्येति । पुरुषमिति जातावेकवचनं द्रव्यज्ञानक्रियाश्रयाः द्रव्यं तामसाहंकारकार्यं शरीरं ज्ञानं वैकारिकाहंकारकार्यं मनः श्रोत्रेंद्रियाणि च क्रिया तैजसाहंकारकार्यं वागादीन्द्रियजातं आश्रयो येषां ते तथोक्ताः एवंविधाः प्रकृतेः सत्त्वादयो गुणा अभिमानमंतरेण नित्यदा मुक्तं प्रकृतिसंबंधविधुरं मायिनं स्वतो ज्ञानिनं पुरुषं जीवसमुदायं कार्यकारणकर्तृत्वे च बध्नंतीत्यन्वयः । तत्रायं विभागः तमोगुणः । कार्ये शरीरे तद्गततदुःखाद्यनुभवेन बध्नाति रजोगुणः

कर्मकारणैरिंद्रियैः कारणेषु कर्मसु बध्नाति सत्त्वगुणस्तु मनसा ज्ञानेंद्रियैश्चांतरं यत्सुखमनुभवतीति तत्र कर्तृत्वे बध्नाति इदमुक्तं भवति शरीरगतदुःखाद्यनुभवे तमोगुणः कर्मसु रजोगुणोऽहं सुखीति सुखानुभवे सत्त्वगुणः कारणं गुणानामचेतनत्वेन स्वतः प्रवृत्त्यनुपपत्तेः तन्नियमने कारणमीश्वरेच्छेति तदुक्तं ज्ञानेंद्रियैश्च मनसा सत्त्वं बध्नाति पुरुषं रजःकर्मेन्द्रियैर्नित्यं शरीरेण तमस्तथेत्यादि ॥ १९ ॥ ❀ ❀ न केवलमेतानि देहेंद्रियमनांसि बंधकानि । हरिप्रसादसामग्रीयोग्यानां मुक्तिसाधकानि चेत्याह स एष इति । योगेन स्वरोचिषा विश्वमित्यारभ्य कार्यकारणकर्तृत्वमित्यंतेन ग्रंथेन प्रतिपादितः स एषोऽधोक्षजो भगवानेतैस्त्रिभिर्देहेन्द्रियमनोभिर्लिंगैर्ज्ञानोपायलक्षणैर्यमादिसाधनैर्यतमानैरेतैर्जीवैः स्वलक्षितगतिः प्रदर्शितस्वरूपो भवति तदुक्तं भवति देहेंद्रियमनोजयिनस्तैरेव साधनैर्भगवद्विषयैस्तं पश्यंतीति स्वप्रसादादिमं जीवः पश्येत्तेन स्वलक्षितमिति च अधःकृतेंद्रियजन्यज्ञानत्वेन मुक्तोऽप्यधोक्षजः स्यादित्यतः सर्वेषामिति । सर्वेषां मुक्तानां स्वस्य सर्वांतर्भावेऽपि नारदस्य विशेषशंकापरिहाराय मम चेति विशेष्योक्तम् ॥ २० ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

सृज्यं स्रष्टुं योग्यमपि ॥ १७ ॥ ❀ ❀ ननु जीवेश्वरयोः प्रेर्य्यप्रेरकत्वं कुतस्तत्राह सत्त्वमिति त्रिभिः । निर्गुणस्य गुणास्पृश्यस्य विभोः स्वाभाविकशक्त्या व्याप्तसर्व्वस्य मायया विलज्जमानया यस्येत्याद्यनुसारेण बहिरङ्गया शक्त्या स्थित्यादिषु निमित्तेषु सत्त्वादयस्त्रयो गुणा गृहीता भवन्ति ॥ १८ ॥ ❀ ❀ त एव गुणाः कार्य्यादित्वे तत्तत्तादात्म्ये पुरुषं जीवं बध्नन्तीति पृथगनुषङ्गः द्विःपाठात् । तत्र कार्य्यं गोलकम् अधिभूतम् । कारणमिन्द्रियमध्यात्मम् । तत्प्रवर्त्तकतया कर्त्री देवताऽधिदैवम् । कीदृशमपि बध्नन्ति तत्राह नित्यदामुक्तमपि । नन्विदं विरुद्धं तत्राह मायिनमिति । मायाऽत्र मायाकृतो मोह उच्यते । स चानादिरिति एवेशविमुखस्य तस्य मायापारवश्यादेव । तेन च गुणावेश एव बन्ध इति साक्षाद्बन्धाभावान्नित्यमुक्तत्वमपि युज्यत इति भावः ॥ १९ ॥ ❀ ❀ त्रिभिर्लिङ्गैर्द्वारभूतैः सुष्ठु अलक्षिता यत्किञ्चिदेवानुमिता गतिर्यस्य सः । गुणप्रकाशैरनुमीयते भवानित्यादेः । यद्वा भगवान् सर्व्वभूतेष्वित्यादिरित्यनुमानेन त्रिभिर्लिङ्गैः कारणादितयोपलक्षितो भगवान् भक्तैरेवानुभूतस्वरूप इत्यर्थः । अत्रेत्थम्भूतलक्षणे तृतीया ॥ २० ॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

तर्हि त्वं किं करोषीत्यत आह । तस्य सृज्यमपि तेन सृष्टोऽहं सृजामि । किं स्वेच्छया न हि न हि ईक्षया तस्याज्ञयैवेत्यर्थः । द्रष्टुरिति । तत्रापि मम तस्य साक्षित्वे ईश्वरत्वे कूटस्थत्वे सर्व्वान्तर्यामित्वे सत्येव नान्यथेति स्वस्य जीवत्वं तस्य चेश्वरत्वं व्यञ्जितम् । तथा च श्रुतयः—एको देवः सर्व्वभूतेषु गूढः सर्व्वव्यापी सर्व्वभूतान्तरात्मा । सर्व्वाध्यक्षः सर्व्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च । इति एष भूताधिपतिरेष लोकेश्वरो लोकपाल इति । ब्रह्मादिपिपीलिकापर्य्यन्तसर्व्वप्राणिबुद्धिष्वविशिष्टतयोपलभ्यमानः सर्व्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते इति च ॥ १७ ॥ ❀ ❀ ननु कुतोऽयं जीवेश्वरविभागो यतस्त्वं प्रेर्य्यः स प्रेरकः स्यादित्यपेक्षायां जीवेश्वरविभागहेतुमाह सत्त्वमिति त्रिभिः । निर्गुणस्य सत्त्वादिगुणरहितस्यापि त्रयो गुणा भवन्ति केन प्रकारेणेत्यपेक्षायामाह । विभोर्मायया स्थित्याद्यर्थं गृहीता इति तच्छक्तिगुणत्वेन तद्गुणत्वमित्यर्थः । तत्र मायया नित्यमेव तद्गुणरूपत्वेऽपि गृहीता इति प्रयोगो नित्यनरविग्रहत्वेऽपि कृष्णस्य तस्येच्छयात्तवपुष इतिवत् प्राकृतलोकोक्त्यनुकारेण ज्ञेयः ॥ १८ ॥ ❀ ❀ अतएव गुणाः पुरुषं जीवं भगवतस्तटस्थशक्तिवृत्तिरूपं बध्नन्ति । मायिनं मायासङ्गसहितं पूर्व्वोक्तयुक्त्या भगवतः पृष्ठदेशस्थानां जीवानां पृष्ठदेशस्थया मायया स्वत एव सङ्गसम्भवादिति भावः । नित्यमुक्तमिति जीवस्य यथा अनाद्यज्ञानं तथा अनादिज्ञानमप्यस्तीति सप्तमान्ते व्यक्तीभविष्यति । क बध्नन्ति । कार्य्यमधिभूतं कारणमध्यात्मं कर्त्ता अधिदैवं तेषां भावस्तत्त्वं तस्मिन् । द्रव्यं भूतानि ज्ञानशब्देन देवताः क्रिया इन्द्रियाणि तदाश्रयास्तेषां कारणभूतास्तत्तदभिमानेन बध्नन्ति । अत्र ज्ञानक्रिययोर्वैपरीत्येन यथासंख्यं ज्ञेयम् ॥ १९ ॥ ❀ ❀ अतः स मायाशक्तिमान् एतैर्गुणैर्लिङ्गैर्जीवानामावरकैरुपाधिभिर्हेतुभिः सुष्ठु अलक्षिता अर्थात् तैर्जीवैरज्ञाता गतिस्तत्त्वं यस्य सः यद्वा एतैर्लिङ्गैः करणैः स्वैर्ज्ञानिभक्तैः कर्तृभिर्लक्षिता गतिर्यस्य गुणप्रकाशैरनुमीयते भगवानित्यादेः ॥ २० ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अहं तु नैव सृष्टः उत्पादितः तस्य भगवतः अभिद्रष्टुः सर्वज्ञस्य ईशस्य सर्वनियंतुः कूटस्थस्य सर्वकारणत्वेऽपि निर्विकारस्वरूपस्य अखिलानां चिदचित्पदार्थानामात्मनः ईक्षया दृष्ट्याऽभिचोदितः प्रवर्त्तितः सृज्यं सृजामि तत्कृतमेव करोमि न तु स्वातंत्र्येण किंचित्कर्तुं शक्नोमीत्यर्थः ॥ १७ ॥ ❀ ❀ न केवलमसदादीनां तत्प्रेर्यत्वमात्रमपि तु प्रकृतेस्तद्गुणानां च तन्नियम्यत्वमिति तन्मायागुणैः सर्वे जीवा बद्धास्तद्बंधननिवृत्तिपूर्वकतत्प्राप्तये तद्भजनं कर्त्तव्यमिति चाह सत्त्वमिति त्रिभिः । विभोः चेतनाचेतनरूपस्य प्रकृतिद्वयव्यापकस्वरूपस्य सत्त्वं रजस्तम इति त्रयो गुणाः सन्ति ते स्वरूपगुणाः नेति ज्ञापयितुं विभुं विशिनष्टि निर्गुणस्येति । सत्वाद्यऽस्पृष्टस्वरूपस्येत्यर्थः । ननु कथं तर्हि विभोः गुण इत्युक्तमित्यत्र तदचेतनप्रकृतिगुणत्वेन तस्यैव गुणा इत्याह

माययाऽचेतनात्मिकया गुणमय्या स्वप्रकृत्या कार्यार्थं विभुना गृहीताः कार्याभिमुखीकृता इत्यर्थः। ननु किं तत्कार्यमत्राह स्थितिसर्गनिरोधेष्विति। स्थित्याद्यभिमुखीकृता इत्यर्थः। ननु किं तत्कार्यमत्राह स्थितिसर्गनिरोधेष्विति स्थित्याद्यभिमुखीकृता इत्यर्थः॥१८॥ भगवतो मायानियंतृत्वमुक्त्वा जीवस्यपराप्रकृतिलक्षणस्य मायावश्यत्वमाह कार्येति। पुरुषं जीवात्मानं नित्यदा ते गुणा बध्नन्ति जन्ममरणप्रवाहविषयं कुर्वंति कथं भूतम् अमुक्तम् "जहात्येनां भुक्तभोगामजोऽन्य" इति भगवत्या श्रुत्योक्तो यो मुक्तस्तद्भिन्नम् कस्तर्हि बद्ध इत्याकांक्षायां "अजोऽह्येको जुषमाणोऽनुशेते" इत्येवंभूतश्रुतेः पूर्वं भागमुपबृंहयन्नाह मायिनमिति। मायाभोग्यत्त्वे न प्रेष्ठतमं यस्यास्ति न तूपास्यत्त्वादिना भगवान्स मायी तम्। कथंभूताः द्रव्यज्ञानक्रियाश्रयाः द्रव्यं महाभूतानि ज्ञानशब्देन देवताः क्रिया इंद्रियाणि तेषां हेतवः अत एव स्वकार्येष्वधिभूतादिषु तं बध्नंतीत्याह कार्यकारणकर्तृत्वे इति। कार्यमधिभूतं भोग्यभोगायतनादिरूपम्। कारणमध्यात्मं जीवस्य भोक्तुः रूपादिभोगे चक्षुरादिकरणम्। कर्ताऽधिदैवतं जीवस्य चक्षुरादिना रूपादिभोगकर्तृरूपकार्यस्योपकर्तृभूतं चक्षुराद्यधिष्ठातृदैवतम् तेषां भावस्तत्त्वं तस्मिन् ॥ १९॥ ❀ ❀ स एष मायाधिपतिः भगवान् अधोक्षजः त्रिभिः सत्त्वादिभिर्लिंगैरावरकैरुपलक्षितानां तन्मायागुणावृतानां सर्वेषां जीवानां मम चकारान्मायागुणवियुक्तानां च ईश्वरो नियंता स च सर्वैर्न ज्ञातगतिर्भवति अपि तु स्वानन्यशरणैरित्याह स्वलक्षितगतिरिति। स्वेनान्यभक्तेन लक्षिता गतिर्यस्य॥ १०॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं विमर्शं निरूप्य यद्रूपमित्यादि षट्प्रश्नानग्रे विस्तरेण निरूपयिष्यन् यद्विज्ञानमित्यादि प्रश्नचतुष्टयस्य चतुर्भिः श्लोकैरुत्तरमाह—तस्याऽपीति। तत्र प्रथमं यद्विज्ञान इत्यस्योत्तरम्। इदं हि ज्ञानं जगत्कार्यौपयिकमिति[1] न पूर्वेण गतार्थता। यतो विज्ञानं यस्येति प्रश्नात्प्रथमं तस्य विज्ञानं वक्तव्यम्। तथा च उपादानगोचरापरोक्षज्ञानं तत्साधकप्रकारेण साधनज्ञानं[2] च प्रथमं भगवतोऽस्तीत्याह। तस्यैव कर्तृत्वात्। तस्याऽपि यत्सृज्यं तत्तेनैवाऽभिचोदितः सृजामीति सम्बन्धः। तस्य सृज्यत्वे हेतु—द्रष्टुरिति। विश्वं कार्यं भगवतः सृज्यम्। तस्यैव द्रष्टृत्वात्। द्रष्ट्वा[3] हि कार्यं कर्तुं शक्यम्। न हि ज्ञानमात्रेण कर्तुं शक्यमित्यत आह—ईशस्येति। ईशः समर्थः सर्वं कर्तुमिति। ननु क्रियाज्ञानशक्तिमत्त्वेऽपि व्यापारावेशे लौकिकवत्क्लेशसम्भवादात्मनो विकृतत्वापत्तेर्भगवतः कर्तृत्वं न सम्भवतीत्याशङ्क्याऽऽह—कूटस्थस्येति। स हि सर्वं करोति कूटस्थ एव न तु विक्रियते। यथा कामधेनुः कल्पवृक्षश्चिन्तामणिर्वा। योगी वा यथा मनसा सृजति। अतः कूटस्थस्यैव कर्तृत्वसम्भवान्न काऽप्यनुपपत्तिः। ननु भगवान् सृष्टिं नाऽर्हति कर्तुम्। प्रयोजनविरोधात्। स हि स्वार्थं वा जीवार्थं वा करोति। स्वार्थं करणे जीवानामनुत्पादनं स्यात्। ततो भक्तिमार्गो विरुध्येत। सर्वेऽपि मार्गा विरुध्येरन्। बन्धमोक्षाद्यभावाद्वैचित्र्यमज्ञानं च न स्यात्। अत उभयार्थं[4] जीवार्थं वा कर्त्तव्यमिति मन्तव्यम्। तत्र स्वांशे स्वस्याऽऽनन्दपूर्णत्वं भज्येत। परार्थत्वे वैषम्यनैर्घृण्ये प्रसज्ज्येयाताम्। अत आह—अखिलात्मन इति। अखिलानामात्मा। आत्मसृष्टेर्न वैषम्यादि। आनन्दादिविरोधस्तु[5] नास्ति। अखिलत्वात्। यथा खिला आत्मानो न भवन्ति केनाऽप्यंशेन। तेषां चाऽर्थे सृष्टिश्च क्रियते। उपभोगश्च सम्पाद्यते। एवं स्वस्य यः पूर्ण आनन्दस्तस्याऽप्यात्मा। भोगादिना तस्याऽप्युपचयं करोति। तथापि न[6] तस्याऽनित्यत्वं न्यूनत्वं वा। तस्मादुभयविधाऽपि सृष्टिर्भगवतः कर्तुं युक्ता। तथापीश्वरत्वाद्भक्तिमार्गव्यवस्थापनाय मां सृष्ट्वा ईक्षयैवाऽऽज्ञाप्य मद्रूपेणैव सर्वं सृष्ट्वा स्वयं कूटस्थ एव स्थितः। तदा अहं तत्सृज्यं सृजामि तत एव ज्ञानशक्तिं क्रियाशक्तिं च लब्ध्वा। तदाह—ईक्षयैवेति। दृष्ट्या प्रेरणादभयप्राप्तिः॥ १७॥ ❀ ❀ अनेन सामान्यतः स एवाऽऽधारः स एव नियन्ता। तदात्मकश्चाऽहमित्युक्तमेव। परमेतस्य हेतुर्विचार्यते—कथमयं भगवांस्त्वामन्यान्वा सृजति? कथं वा एकात्मनि नियम्यनियामकभावः? तत्राऽऽह—सत्त्वं रजस्तम इति द्वाभ्याम्—"अवस्थितेरिति काशकृत्स्न" इति मतमत्र सिद्धं भविष्यति। यथोर्णनाभिः सृष्ट्यर्थमेकामूर्णामुद्गमते तथा भगवानपि त्रिविधसृष्ट्यर्थं त्रीन्गुणानुद्गमते। गुणरूपत्वाच्च गुणशब्दव्यवहारः। सद्रूपेण निर्गतं सत्त्वमित्युच्यते। केवलचिद्रूपेण निर्गतं क्रियाशक्तिप्रधानत्वात्सदानन्दाभावाच्च रज इत्युच्यते। आनन्दांशाच्च तमः। ते भगवद्रूपा एव भगवता सृष्टाः। न च भगवति ते पूर्वं स्थिताः। तथा सति भगवदात्मकास्ते न भवेयुः। यथा कार्पासे नहि सूत्रम्। तद्देव हि पश्चात्स्वावयवैः पौर्वापर्यमापद्यमानं सूत्रतामापद्यते। अत एव भगवान्निर्गुणः। ते गुणाः पुनः स्थितिसर्गनिरोधेषु उत्पत्तिस्थितिलयार्थं ते (?) गृहीताः[7]। तेषामपि ग्रहणं मायया। एषा हि माया जगत्कर्त्री न तु व्यामोहिका। तदाह—विभोरिति। समर्थस्य जगत्कर्तुरित्यर्थः। सा हि तच्छक्तिः सर्वरूपभगवत्सम्बन्धात्सर्वप्रतिकृतिरूपा। सा जगत्करणे करणरूपा। अतः करणांशस्य तदीयत्वात्करणरूपेणैव निर्गता गुणा इति माययैव गृहीताः। ते मायावशे तिष्ठन्ति तत्पुत्रा इव। अतो य एव भगवदंशो जीवस्तस्यां रन्तुमिच्छति। तत्कार्ये वा। तं ते गुणा बध्नन्तीत्याह—कार्यकारणकर्तृत्व-

१. जगत्कार्योपयिकमिति क. ख. घ. ङ. २. साधनं ज्ञानं चेति घ. ङ. ३. दृष्ट्वा इति ग. घ. ङ. ४. स्वार्थं इति क. ५. आनन्दविरोध इति ग. घ. ङ. ६. नकारो नास्ति ग. घ. ङ. ७. उत्पत्तिस्थितिप्रलयार्थत्वेन गृहीता इति ग.

इति । कार्यमधिभूतं देहः । कारणमध्यात्ममिन्द्रियाणि । कर्त्ता आधिदैविकः अन्तःकरणम् । एतेषां भावः कार्यकारणकर्तृत्वम् । सङ्घातमिति यावत् । जीवस्य सङ्घातत्वनिमित्तम् । यथा केवलो जीवः सङ्घातरूपो भवति । ते हि मायया गृहीताः स्वकार्ये स्थापिताः । तदाह—**द्रव्यज्ञानक्रियाश्रया इति** । द्रव्यमधिभूतम् । ज्ञानमधिदैवम् । क्रिया आध्यात्मिकी । तत्रयं तेषामाश्रयः प्रत्येकमेकस्य । अतः स्वस्वाश्रये ते बध्नन्ति । आध्यात्मिकादिभावं परित्यज्य केवलं भवितुं न प्रयच्छन्ति । सर्वदा ब[1]ध्नन्ति । बन्धने माया-सम्बन्ध एव हेतुः । न च सम्बन्धमात्रमेव हेतुः । अन्यथा भगवतोऽपि बन्धनं स्यात् । किन्तु तत्र स्वातन्त्र्यं योऽभिमन्यते तस्याः पतिरहमिति । तदाह—**पुरुषमिति** । न तु तां करणत्वेन कार्यार्थं यो गृह्णाति । अतो गुणबद्धो नियोज्यो गुणकर्त्ता नियोजक इत्येकस्मिन्नेव रूपद्वयमुपपद्यते ॥ १८ ॥ १९ ॥ ❀ ❀ एवं जीवब्रह्मभावभेदं निरूप्य सामान्यत उत्तरितमपि यदाधारा-युत्तरं विशेषाकारेणाऽऽह—**स एष इति** । मायातत्कार्याणां द्रव्यादीनां विशेषाधारत्वं भगवतश्च सामान्याधारत्वमिति तत्रोत्तर-मु[2]क्त्वा मायित्वेन विशेषात्मत्वं च बोधितमिति यत्पर इत्येतदेव शिष्यते । नियामकस्य दर्शने पूर्वमात्मत्वात्तज्ज्ञानेऽपि नियमनं न सम्भविष्यतीति त्रिभिरेव एतैर्लिङ्गैः सत्त्वादिभिः सुष्ठु अलक्षिता गतिर्यस्य । यद्यपि स एवैषः । यः स्रष्टा स एव बद्धः । तथापि स्रष्टा भगवान् । एते च गुणा भगवतो लिङ्गभूता ज्ञापका बहिर्निर्गता धूमवद्दूरादेव पुरुषं ज्ञापयन्ति । न तु तं वेष्टयन्ति । अन्यैर्बन्ध-शङ्कां वारयति—**एतैरिति** । एतावन्त एव ते । तर्हि बद्धैः कथं न [3]बध्यते ? तत्राऽऽह—**अधोक्षज इति** । ते चेत्तं पश्यन्ति क्रियया वा प्राप्नुवन्ति । तदा बध्नन्ति । तत्तु तेषामसम्भावितमिति । अत एव सुष्ठु अलक्षिता गतिर्यस्य । स्वैर्वा बद्धातिरिक्तैर्मुक्तैर्वा लक्षिता गतिर्यस्य । वस्तुतस्तु भक्ताः भगवता सह पश्चाद्वा समायान्तीति सर्वत्र निश्चयः । अत एव हे ब्रह्मन् [4]त्वं तादृशः । तथापि सर्वेषां मम चकारात्तव च[5] भगवानीश्वरो नियन्ता ॥ २० ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तस्यापीत्यत्र पूर्वेणेति मोक्षोपयिकेनात्मरूपेण तस्येति विज्ञानवातुः । तत इत्यादि । जीवानुत्पादनात्स्मरणाद्यधिकारा-भावेन स्नेहस्याप्याधाराभावादभावेन भक्तिमार्गो विरुध्येत, तत एव सर्वेऽपि विरुद्धयेरन्नित्यर्थः । अत इति, दृश्यमानानां तेषामुपपादनीयत्वात् । नन्वखिलपदस्य वस्तुपरत्वं जीवपरत्वं वा उभयथापि भगवतोऽखिलत्वाभावात्कथं नानन्दादिविरोध इत्याशङ्कायां तस्यार्थमाहुः **यथाखिलेत्यादि** । तथा च, सर्वादिपदान्यनुक्त्वा यदखिलपदमुक्तम्, तेनायमर्थः खिलपदं न्यूने रूढम् । न्यूनता च द्वेधाऽऽन[6]न्दाभावात् सर्वत्वाभावाच्च । नञा तदुभयं पर्युदस्यते । तथा सति 'न खिलं न्यूनं येषां तेऽखिला' इति । तथा सत्यखिलपदस्य वस्तुपरत्वेऽप्यवयवशक्तया तेषु तथात्वबोधनात्तेषामात्मत्वे स्वस्याखिलत्वमर्थादेव सिद्धमतो नानन्दादि-विरोध इत्यर्थः । तदेतदभिसन्धायाहुः एवमित्यादि । **दृष्ट्वे**त्यादि, तदैक्षते'त्यादावीक्षाया आलोचनार्थकत्वादत्रेक्षापदोक्ताया दृष्टेर्ज्ञानजनकत्वात्प्रेक्षणस्य च क्रियारूपत्वात्तथेत्यर्थः ॥ १७ ॥ ❀ ❀ **सत्त्वमित्यस्याभासे अनेनेति** । ईदृशाद्भगवतः स्वज्ञानप्राप्त्यादेः कथनेन । **एतस्येति** आधाराधेयभावस्य नियम्यनियामकभावस्य तदात्मकत्वस्य चेत्यर्थः । **विवृतौ, इति मतमिति** । तत्तदवस्थयावस्थितं ब्रह्मैव तत्तच्छब्दवाच्यमिति काशकृत्स्नाचार्यमतम् । एतेन 'यथेदं सृजत' इत्यस्य व्याख्याने, किं कुम्भकारवत् ? उत कामधेन्वादि-वत् ? अथ योगिवन्मनसा ? इत्यादिनोद्भावितेषु पक्षेषु कोपि नादृत इति बोधितम्, दुर्विभाव्यत्वं च समर्थितम् । **कार्पासे न हीत्यत्र कार्पास इति** सप्तम्यन्तम् । तदिति कार्पासम्, हिर्हेतौ, **अत एवेति**, पौर्वापर्यावस्थायाः पाश्चात्यत्वादेव । विभुपदेनैव कर्तृत्वे प्राप्ते षष्ठ्याः सम्बन्धमात्र एवार्थ इत्याशयेन मूले **विभोर्मायया गृहीता इति** समभिव्याहारसूचितमर्थं वदन्तस्तस्याः स्वरूपं कार्यञ्चाहुः **साहीत्यादि, गृहीता** इत्यन्तेन । तथा च, भगवतः कूटस्थत्वेन सर्वस्वरूपत्वेन च प्रयोजकत्वाद्भगवदपेक्षया तस्याकरणत्वेपि[7] स्वस्वकरणस्वरूपं धर्मं तेषु न्यस्य तद्ग्रहणेन स्वयं कर्त्री जातेत्यर्थः । एवञ्च, 'सा वा एतस्य सन्द्रष्टुः शक्तिः सदसदात्मिके'ति वक्ष्य-माणत्वात्तस्याः स्वरूपं मूलसदंशभूतविकृतसदात्मकं सिद्ध्यतीति ज्ञेयम् । गुणानां कार्यान्तरमाहुः त इत्यादि, स्वकार्ये इति, द्रव्यज्ञानक्रियारूपे मायायाः कार्ये । **स्वस्वाश्रये ते बध्नन्तीति**, द्रव्याभिमाने तमो बध्नाति, ज्ञानाभिमाने सत्त्वं, क्रियाभिमाने रजः, इत्येवं बध्नन्तीत्यर्थः । कुतो बध्नन्तीत्यपेक्षायां बन्धनहेतुं स्फुटीकुर्वन्ति बन्धन इत्यादि । **अत** इति मायातत्कार्याभिमानान-भिमानाभ्याम् ॥ १८,१९ ॥ ❀ ❀ **स एष** इत्यत्र **एवमिति**, नियम्यनियामकभावे हेतुकथनेन । **उत्तरितमिति**, अखिलात्मन इत्यनेनोक्तम् । **मायेत्यादि**, एतेन गृहपीठन्याय उक्तो भवति गृहे पीठं तदुपर्यास्तरणम्, तत्रोपविष्टस्य यथा गृहं सामान्याधारोन्यो विशेषाधारः, तथात्र भगवति माया, तस्यां द्रव्यादिकं तत्कार्यम्, तत्र बद्धोंशो जीव इति भगवत्सामान्याधारो मायादिविशेषाधारो मुक्तानां तु साक्षादाधार इति बोधितत्वात्तत्रोत्तरमनुक्त्वा **मायित्वेन विशेषात्मत्वम्**, माया हि करणभूता शक्तिस्तद्वत्त्वेन सृष्टिव्यापारविशेषयुक्तात्मत्वं बोधितम् । तेन स्वस्य तदात्मकतापि सिद्धेति हेतोः 'यत्पर' इत्येतदनुत्तरितमवशिष्यते, तत्रोत्तर-माहेत्यर्थः । तदुपपादयन्ति **नियामकस्येत्यादि**, दृष्ट्या प्रे रणस्य दर्शनोत्तरभावित्वेन[8] नियामकविषयस्य दर्शनदशायां पूर्वं तदभिन्न-त्वात्प्रथमत आत्मत्वेन ज्ञानमप्यभेदज्ञानत्वाद्बन्धप्रतिबन्धकमिति **तज्ज्ञानेपि नियमनं** बन्धनात्मकं **न सम्भविष्यतीति**

---

१. न बध्नन्तीति ग. २. त्तरमनुक्त्वेति क. ख. ३. बाध्यते इति क. ४. त्वमिति नास्ति ख. ५. चकारो नास्ति क. ख. ग. ६. 'आनन्दाद्यभावात्' 'सर्वत्वाद्यभावात्' इति पाठौ । ७. "करणत्वरूपम्" पाठः । ८. "विषयक" पाठ ।

एतैस्तादृशो जातः, तज्ज्ञानं तिरोधापितवान्। तथा चैवं योंशस्तिरोहिततादृग्ज्ञानः स नियम्य इत्यहमपि तादृशसाक्षात्कारतिरोधानान्नियम्यः, पूर्णज्ञानत्वाद्भगवान्नियामकः इति 'यत्पर' इत्यस्यौत्तरमित्यर्थः। तदेतदाहुः यद्यपीत्यादि। ननु सम्बन्धस्य तुल्यत्वात्ते भगवन्तं कुतो न बध्नन्तीत्याकाङ्क्षायां लिङ्गपदस्यार्थमाहुः एते चेत्यादि। अधः नीचैरक्षज इन्द्रियजन्ये ज्ञानक्रिये यस्मादित्यधोक्षजपदनिरुक्त्या तेनैव तद्विषयकाज्ञानप्राप्तेः स्वलक्षितगतिरित्यस्य वैयर्थ्यमायातीत्यरुच्या पक्षान्तरमाहुः स्वैर्वेत्यादि। केवलजीवात्मज्ञानवतां जीवन्मुक्तानामपि भगवज्ज्ञानाभावात् परममुक्तानाञ्च विषयविषयिभावनिवृत्त्या गतिज्ञानाभावात्तेऽत्र न युज्यन्त इत्यतः सिद्धान्तमाहुः वस्तुत इत्यादि। तथा च, अतस्त एव गतिज्ञातारः इत्यर्थः। एतेन मोचनहेतुरपि स्वपदेन ज्ञापित इत्यपि बोधितम्। अत एवेति ऐकात्म्यादेव। तथापीति अधोक्षजत्वेन॥ २०॥

## श्रीगिरिधरकृता बालप्रबोधिनी

एवं सर्वं तदधीनं चेत्तर्हि त्वं किं करोषीत्यपेक्षायामाह—तस्यापीति। सृष्ट्यर्थं तेन सृष्ट उत्पादितोऽभिचोदितश्चाहमपि तस्य सृज्यं सृजामि, सृष्टिकरणे प्रवर्त्तितस्तत्करणेन तदाज्ञां पालयामीत्यर्थः। ननु तत्तत्कार्ये त्वं स्वयमेव प्रवृत्तो दृश्यसे स तु कदापि प्रवर्त्तकतया न दृश्यते इत्याशङ्क्याह—ईक्षयैवेति। सङ्कल्पमात्रेणैवं प्रेरणे कथं सामर्थ्यमित्याशङ्क्याह—ईशस्येति, सर्वान्तर्यामित्वेन सर्वथा सर्वकरणसमर्थस्येत्यर्थः। तत्रापि हेतुमाह—द्रष्टुरिति, सर्वं साक्षात् पश्यत इत्यर्थः। ननु भगवान् सृष्टिं स्वार्थं करोति जीवार्थं वा? [1]आद्ये पूर्णकामता भज्येत, [2]अन्त्ये च सृष्टेर्दुःखसुखादिविशिष्टनानाविधत्वेन। भगवता वैषम्यनैर्घृण्यादिदोषप्रसक्तिरित्याशङ्क्याह—कूटस्थस्येति, वैषम्यादिविकाररहितस्येत्यर्थः। तत्र हेतुमाह—अखिलात्मन इति। नह्यनन्तरूपेण एकस्यैव वैषम्यादि सम्भवति द्वितीयस्यैवाभावादिति भावः। न केवलमहमेव तदाज्ञां पालयामि किन्त्वन्येऽप्यधिकारिणस्तेन सृष्टास्तत्तदधिकारे नियुक्ताश्च तदाज्ञां पालयन्तीत्यपिशब्देन सूचितम् "भीषास्माद्वातः पवते, भीषोदेति सूर्यः" इत्यादि श्रुतेः॥ १७॥ ❀ ❀ ननु भगवानेवैको यदि निखिलात्मा तदा कुतोऽयं नियोज्यनियोजकभावः? कुतो वा तस्य सर्वज्ञत्वादयो धर्माः? अन्यस्य तु तद्विपरीता इत्यपेक्षायां मायेशत्वमायावश्यत्वाभ्यामेवेत्याशयेनाह—सत्त्वमिति। विभोः सृष्ट्यादिलीलायां समर्थस्य निर्गुणस्य गुणाधीनतारहितस्य भगवतो वशीभूताः सत्त्वं रजः तम इति त्रयो गुणाः सन्तीति शेषेणान्वयः। निर्गुणे गुणाः कथं प्राप्ता इत्यपेक्षायामाह—माययाऽन्तरङ्गशक्त्या इच्छापरपर्यायया, तेन स्वयमेव गृहीताः कार्यार्थं स्वकीयत्वेनाङ्गीकृता इत्यर्थः। किं तत्कार्यमित्यत आह—स्थितिसर्गेति। स्थितिः पालनं तदर्थं सत्त्वं, सर्गः उत्पत्तिस्तदर्थं रजः, निरोधः संहारः तदर्थं तमश्च गृहीतमित्यर्थः॥ १८॥ ❀ ❀ ते च गुणाः भगवदंशभूतत्वान्मुक्तं प्रथमतो बन्धरहितमपि ततो मायिनं पश्चान्मायावशवर्तिनं पुरुषं जीवं नित्यदा सर्वदा बध्नन्ति। क बध्नन्तीत्यपेक्षायामाह—कार्यमधिभूतं देहः, कारणमध्यात्ममिन्द्रियाणि, कर्त्ता अधिदैवतं देवताः, तेषां भावः सङ्गतस्तत्त्वं तस्मिन्। तत्र हेतुमाह—द्रव्येति। द्रव्यं महाभूतानि, ज्ञानशब्देन देवताः, क्रियाशब्देनेन्द्रियाणि, तेषामाश्रयाः कारणतया आश्रयभूताः। अतः प्रत्येकं ते स्वस्वकार्ये तत्तदभिमानेन नित्यदा बध्नन्ति, भगवत्कथां विना तु कदापि देहाद्यभिमानं परित्यज्य केवलं भवितुमवसरं न प्रयच्छन्तीत्यर्थः। बन्धनप्रकारविशेषस्तु भगवद्गीतायामुक्तो ज्ञेयः, तथाहि—'सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः॥ निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥ तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्॥ सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥ रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्॥ तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥ तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्॥ प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत' इति॥ १९॥ ❀ ❀ एवं जीवेश्वरविभागं निरूप्य यदधीनं विश्वं यदधीनश्च त्वमिति प्रश्नद्वयस्योत्तरमाह—स इति। स पूर्वोक्तः एष वश्यमायो जगत्स्रष्टा अधोक्षजः अधः अक्षजमिन्द्रियजन्यं ज्ञानं यस्माद् इन्द्रियजन्यज्ञानाविषयोऽपि एभिस्त्रिभिः सत्वादिभिर्गुणैर्लिङ्गैर्जडत्वेऽपि तत्तत्कार्ये प्रवृत्तत्वेन वह्नेर्धूमवच्चेतनभगवज्ज्ञापकैः साधनभूतैः स्वैः ज्ञानिभक्तैरेव लक्षिता अनुमिता गतिस्तत्त्वं यस्य स भगवान् सर्वेषां स्थावरजङ्गमानां मम-चकारात्तव च-ईश्वरो नियन्तेत्यन्वयः। त्वमपि भक्तकोटौ प्रविष्टोऽसीति सूचयन् सम्बोधयति—हे ब्रह्मन्निति॥ २०॥

## हिन्दी अनुवाद

वे द्रष्टा होनेपर भी ईश्वर हैं, स्वामी हैं; निर्विकार होनेपर भी सर्वस्वरूप हैं। उन्होंने ही मुझे बनाया है और उनकी दृष्टिसे ही प्रेरित होकर मैं उनके इच्छानुसार सृष्टि-रचना करता हूँ॥ १७॥ ❀ ❀ भगवान् मायाके गुणोंसे रहित एवं अनन्त हैं। सृष्टि, स्थिति और प्रलयके लिये रजोगुण, सत्त्वगुण और तमोगुण—ये तीन गुण मायाके द्वारा उनमें स्वीकार किये गये हैं॥ १८॥ ❀ ❀ ये ही तीनों गुण, द्रव्य, ज्ञान और क्रियाका आश्रय लेकर मायातीत नित्यमुक्त पुरुषको ही मायामें स्थित होनेपर कार्य, कारण और कर्तापनके अभिमानसे बाँध लेते हैं॥ १९॥ ❀ ❀ नारद! इन्द्रियातीत भगवान् गुणोंके इन तीन आवरणोंसे अपने स्वरूपको भलीभाँति ढक लेते हैं, इसलिये लोग उनको नहीं जान पाते। सारे संसारके और मेरे भी एकमात्र स्वामी वे ही हैं॥ २०॥

---

१. स्वार्थं करोतीत्याद्ये पक्षे। २. जीवार्थं करोतीत्यपरस्मिन् पक्षे।

**कालं कर्म स्वभावं च मायेशो मायया स्वया। आत्मन् यदृच्छया प्राप्तं विबुभूषुरुपाददे ॥२१॥**
**कालाद् गुणव्यतिकरः परिणामः स्वभावतः। कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥२२॥**
**महतस्तु विकुर्वाणाद्रजःसत्त्वोपबृंहितात्। तमःप्रधानस्त्वभवद् द्रव्यज्ञानक्रियात्मकः ॥२३॥**
**सोऽहङ्कार इति प्रोक्तो विकुर्वन् समभूत्त्रिधा। वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा।**
**द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो ॥२४॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तस्य सृष्टिप्रकारमाह। कालमिति। कालं क्षोभकं सृष्टिकाल इति व्यवहारहेतुम्। कर्म जीवादृष्टम्। स्वभावं तत्परिणामहेतुम्। आत्मन्नात्मनि यदृच्छया स्वैरितया प्राप्तम्। विबुभूषुर्विविधं भवितुमिच्छन्॥ २१॥ ❀ ❀ गुणानां व्यतिकरः क्षोभः साम्यत्यागः स्वभावतः परिणामो रूपांतरापत्तिः महतो महत्तत्त्वस्य पुरुष ईश्वरस्तेनाधिष्ठितत्वं त्रयाणां विशेषणम्॥ २२॥ ❀ ❀ महत्तत्त्वाद्विकुर्वाणाद्विक्रियमाणात्। तस्य च क्रियाज्ञानशक्तित्वात्त्रिगुणत्वेऽपि रजःसत्त्वाभ्यामुपबृंहितत्वम् अहंकारस्य त्वावरकत्वात्तमःप्रधानत्वम्। अत एवाहंकारकार्येषु तामसमाकाशादिकं बहु राजसं सात्त्विकं चाल्पम् एवं तदुपाधिकेषु जीवेष्वपि तथैव तामसयोन्याधिक्यम्। द्रव्यज्ञानक्रियात्मको महाभूताधिदैवतेन्द्रियात्मकः॥ २३॥ ❀ ❀ स च विकुर्वन्रूपांतरं गच्छन्। त्रैविध्यमेवाह। वैकारिकः सात्त्विकस्तैजसो राजसः यद्भिदा यस्य भेदः द्रव्यशक्तिरित्यादीनि प्रातिलोम्येन त्रयाणां लक्षणानि। द्रव्ये महाभूताख्ये शक्तिर्यस्य क्रियास्विन्द्रियेषु शक्तिर्यस्य ज्ञानेषु देवेषु शक्तिर्यस्येति विग्रहः। हे प्रभो बोद्धुं शक्त॥ २४॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

स्वमायाशक्तैर्गुणैर्जगत्कर्तृत्वं भगवतो वदन् यतः सृष्टमित्यस्योत्तरं प्रपंचयति—कालमिति। कालमात्मन्स्वस्मिन्प्राप्तं लीनत्वेन स्थितं स्वप्रयोजनाभावेपि स्वस्मिन्स्वमायाकल्पितं यदृच्छया स्वैरितयोपाददे सृष्ट्यर्थमंगीकृतवान्। तत्र न स्वतः किन्तु माययैव विबुभूषुः॥ २१॥ ❀ ❀ कालादीनां प्रयोजनमाह। कालादिति। अधिष्ठितत्वं तदिच्छया प्रवृत्तत्वम् ॥ २२॥ ❀ ❀ तमःप्रधानः पदार्थविशेषः। यद्वा य इत्यध्याहार्यं परेण स इत्यनेन योजयितव्यत्वात्। तस्य च महत्तत्त्वस्य च अत एव तमःप्रधानत्वादेव तदुपाधिकेषु तमउपाधिकेषु ॥ २३॥ ❀ ❀ शक्तिरुत्पादनसामर्थ्यम्। हे प्रभो इति। ब्रह्मकर्तृका नारदं प्रति संबुद्धिस्तु त्वमेवात्र प्रभवसि विरक्तत्वान्न हि गृहस्थाः प्रायस्तत्त्वविचारे प्रभवंतीत्यभिप्राया बोध्या। अत्र साम्यावस्थं गुणत्रयमेव प्रधानं तस्य कालेन सत्त्वांशस्योद्रेको महत्तत्त्वं रजोंशस्योद्रेको महत्तत्त्वभेदः सूत्रतत्त्वम्। तमोंशस्योद्रेकोहंकारतत्त्वम् अतः अहंकारकार्येषु तामसाधिक्यमस्तीत्युक्तं स्वामिचरणैः। करणं कारः कारकचेष्टाविक्षेप इति यावत्। विगतः कारो विक्षेपो यस्मात्तच्छांतस्वभावं सत्त्वं विकारस्तेन चरति प्रवर्त्तत इति वैकारिकः तेजःक्षोभकत्वाद्रजस्तत्र भवस्तैजसः। तामसस्तु

॥ तान्-
ति भारत'
इति। स
भिस्त्रिभिः
व लक्षिता
भक्तकोटौ

...प्रकाशकमनामयम्॥ सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥ रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् बध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥ तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्॥ प्रमादालस्यनिद्राभिस्तन्निबध्नाति इति॥ १९॥ ❀ ❀ एवं जीवेश्वरविभागं निरूप्य यदधीनं विश्वं यदधीनश्च त्वमिति प्रश्नद्वयस्योत्तरमाह—स पूर्वोक्तः एष वश्यमायो जगत्स्रष्टा अधोक्षजः अधः अक्षजमिन्द्रियजन्यं ज्ञानं यस्माद् इन्द्रियजन्यज्ञानाविषयोऽपि ए सत्वादिभिर्गुणैर्लिङ्गैर्जडत्वेऽपि तत्तत्कार्ये प्रवृत्तत्वेन वह्नेर्धूमवच्चेतनभगवज्ज्ञापकैः साधनभूतैः स्वैः ज्ञानिभक्तैरे अनुमिता गतिस्तत्त्वं यस्य स भगवान् सर्वेषां स्थावरजङ्गमानां मम-चकारात्तव च-ईश्वरो नियन्तेत्यन्वयः। त्वमपि प्रविष्टोऽसीति सूचयन् सम्बोधयति—हे ब्रह्मन्निति॥ २०॥

### हिन्दी अनुवाद

र उनकी
वं अनन्त
ये गये हैं
यामें स्थित
णोंके इन
: मेरे भी

वे द्रष्टा होनेपर भी ईश्वर हैं, स्वामी हैं; निर्विकार होनेपर भी सर्वस्वरूप हैं। उन्होंने ही मुझे बनाया है औ दृष्टिसे ही प्रेरित होकर मैं उनके इच्छानुसार सृष्टि-रचना करता हूँ ॥ १७॥ ❀ ❀ भगवान् मायाके गुणोंसे रहित ए हैं। सृष्टि, स्थिति और प्रलयके लिये रजोगुण, सत्त्वगुण और तमोगुण—ये तीन गुण मायाके द्वारा उनमें स्वीकार कि ॥ १८ ॥ ❀ ❀ ये ही तीनों गुण, द्रव्य, ज्ञान और क्रियाका आश्रय लेकर मायातीत नित्यमुक्त पुरुषको ही मा होनेपर कार्य, कारण और कर्तापनके अभिमानसे बाँध लेते हैं॥ १९॥ ❀ ❀ नारद! इन्द्रियातीत भगवान् गु तीन आवरणोंसे अपने स्वरूपको भलीभाँति ढक लेते हैं, इसलिये लोग उनको नहीं जान पाते। सारे संसारके और एकमात्र स्वामी वे ही हैं॥ २०॥

---

१. स्वार्थं करोतीत्याक्षेपपक्षे। २. जीवार्थं करोतीत्यपरस्मिन् पक्षे।

समानां विषमत्वापत्तिः यद्वा गुणानां व्यतिकरो यस्मिन्निति बहुव्रीहिः अव्यक्तादित्यर्थः ॥ २२ ॥ ❀ ❀ महतोऽहंकारोत्पत्तिमाह महतस्त्विति । विक्रियमाणाद्रजः सत्त्वोपबृंहितान्महतः द्रव्यज्ञानं क्रियात्मकः मोहनप्रकाशनप्रवर्त्तनस्वभावः तमःप्रधानः तमोगुणप्रधानः अभवत् । महतस्त्रिगुणात्मकत्वेऽपि क्रियाशक्तिज्ञानशक्तिप्रधानत्वाद्रजः सत्त्वोपबृंहितादित्युक्तं एवमहंकारस्य तमःकार्यप्रधानत्वात्तमःप्रधान इत्युक्तिः । अत एवाहंकारकार्येषु तामसं बहुराजसं सात्त्विकं चाल्पमेवं महत्कार्येषु तामसमल्पं तदितरदुभयं बह्विति मन्तव्यम् ॥ २३ ॥ ❀ ❀ तमःप्रधानस्य किंनामधेयमित्यत आह स इति । तस्य त्रैविध्यमाह विकुर्वन् रूपांतरं गच्छन्नहंकारस्त्रिधा समभूत्सम्यगभूत् यद्भिदा यस्याहंकारस्य भिदा वैकारिकस्तैजसश्च तामसश्चेति सात्त्विकराजसतामसाहंकाराणां क्रमेण नामानि तेषां प्रतिनियतस्वभावानाह द्रव्यशक्तिरिति । प्रातिलोम्येन त्रयाणां स्वभावप्रदर्शनं द्रव्यशक्तिः । विमूढा महाभूताख्यद्रव्योत्पादने शक्तिः सामर्थ्यं यस्य स तथोक्तः सात्त्विकाहंकारानुग्राहकत्वरूपा या क्रिया तस्यां शक्तिर्यस्य स तथोक्तः । प्रवर्तनमेव हि रजःकार्यं ज्ञानशक्तिः शब्दादिविषयज्ञानसाधनेंद्रियोत्पादने शक्तिर्यस्य स तथोक्तः [एकादशानामिंद्रियाणां सात्त्विकाहंकारकार्यत्वाद्राजसस्य तु तदनुग्राहकत्वात् ॥ २४ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

सृज्यं सृजामि सृष्टोऽहमितीममर्थं स्पष्टयितुं सृष्टिप्रकारमाह कालमिति । ब्रह्मज्ञाने मुख्यलक्षणं जगज्जन्मादि कारणत्वमेवेति ज्ञापयितुमित्यतो वा सृष्टिप्रकारमाह कालमिति । मायेशो लक्ष्मीपतिः परनामस्वनिमेषांते सृष्टिकाले प्राप्ते विबुभूषुः बहुधा भवितुकामः अनादित एवात्मन्नात्मनि यदृच्छया स्वेच्छया प्राप्तमेव कालं कर्मजीवानां नानाविधादृष्टं स्वभावं सात्त्विकादिलक्षणं च शब्दात् सगुणत्रयां प्रकृतिं स्वमायया स्वशक्त्या विशेषत उपाददे इत्यन्वयः । प्रकृतिं प्रविश्य स्वशक्त्या क्षोभयामासेत्युक्तं भवति यत्रान्यहेत्वभावः स्यादीश्वरेच्छादिना विना तदिच्छा हि यदृच्छा स्यादतस्तत्र यदृच्छयेति । कालकर्मस्वभावादिनियेशेच्छया सदाप्राप्तमेव विशेषेण सृष्ट्यादावुन्नयत्यज इति च ईशो बह्वीः पुरः सृष्ट्वा तत्रैव बहुरूपतां तत्तन्नियामकतया प्राप्तं कालाद्युपपादेतिवचनेभ्यो न मायामयीसृष्टिरत्रोच्यत इति सिद्धम् ॥ २१ ॥ ❀ ❀ गुणव्यतिकरात्मकमूलप्रकृतेर्महत्तत्त्वोत्पत्तिप्रकारमाह कालादिति । यदा सिसृक्षुर्विष्णुः कालकर्मस्वभावरजोगुणानाविश्य सृष्टये प्रेरकस्तमोगुणो रजोगुणे न च संयुक्तोऽभूत् सः गुणवैषम्यात्मको गुणव्यतिकरः तस्मात्कालादिति पंचमीतृतीयार्थे कालेन सृष्टिहेतुना कर्मणः कर्मणा हिरण्यगर्भादृष्टेन तदुपकृतात् परिणामः स्वभावत इति तसिः । स तृतीयार्थे विकारस्वभावया मूलप्रकृत्या च सहितात्पुरुषाधिष्ठितादिति पुरुषेण विष्णुनाधिष्ठाय क्षोभमाणान्महतो महत्तत्त्वस्य चतुर्मुखदेहस्थानीयस्य जन्माभूदित्यन्वयः । गुणानां व्यतिकरो विषमावस्था यस्मिन् तस्मादव्यक्तादिति वा तदुक्तं गुणकालस्वभावेभ्य ईशेनाधिष्ठतत्त्वतः जगदादिर्महत्तत्त्वमभूतस्येच्छाया हरेरिति ॥ २२ ॥ ❀ ❀ तु शब्देन कालादिकमनुकर्षति कालकर्मस्वभावेभ्यो विकुर्वाणाद्रजः सत्त्वोपबृंहितात् सत्त्वेनानुस्यूतरजोगुणेन प्रवृद्धान्महत्तत्त्वात्तमः प्रधानस्तत्त्वविशेषोऽभवदित्यन्वयः । द्वितीयस्तुशब्दो महत्तत्त्वमपेक्ष्य तमःप्रधानत्वं नेतरापेक्षया तदपेक्षया सत्त्वप्रधान एवेत्यस्मिन्नर्थे इतोऽपि तमः प्रधानत्वमौपचारिकमिति भावेनाह द्रव्येति । द्रव्याणि भूतानि ज्ञानं ज्ञानेंद्रियाणि क्रिया कर्मेन्द्रियाणि चात्मा स्वरूपं यस्य स तथा ॥ २३ ॥ ❀ ❀ किंनामकोऽसौ पदार्थ इति । तत्राह सोऽहंकार इति । तद्विभागमाह कुर्वन्निति । त्रीणि दर्शयति वैकारिक इति । यस्याहंकारस्य भिदा भेदः ॥ २४ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

आत्मनि प्राप्तं लीनं सन्तम् । यदृच्छया स्वैरितया उपाददे सृष्ट्यर्थमङ्गीकृतवान् । तच्च न स्वतः किन्तु माययैव ॥ २१ ॥ ❀ ❀ ईश्वरस्य प्रभावरूपत्वेन आदौ लीनत्वात् कालः स्वयमेव प्रथमं कारणम् । ततः स्वभावे परिणामहेतौ कर्म्मण एव धर्म्मविशेषे समुद्बुद्धे तद् द्वारा कारणम् ततश्च कर्मण्यप्युद्बुद्धे तद् द्वारा कारणमिति ज्ञेयम् । पुरुषाधिष्ठिताद् ईश्वरेच्छया प्रवृत्तात् ॥ २२ ॥ ❀ ❀ विकुर्व्वाणात् विशिष्टं क्रियमाणादित्यर्थः । तमःप्रधानस्त्वभवदित्यत्र य इत्यध्याहार्य्यम् । परेण स इत्यनेन योजयितव्यत्वात् ॥ २३ ॥ ❀ ❀ सोऽहमिति सार्द्धकम् । करणं कारश्चेष्टा विक्षेप इति यावत् । विगतः कारो विक्षेपो यस्मात् तत्, शान्तस्वभावं सत्त्वमित्यर्थः, तेन चरति प्रवर्त्तते वैकारिक इत्यर्थः तैजस इति । क्षोभकत्वात् तेजो रजस्तत्र भवस्तैजसः । तामसस्तु स्पष्टार्थः । किन्तु रजस एव विकारहेतुत्वात् सत्त्वे तमसि च कार्य्योत्पत्तये तदंशसमवायो ज्ञेयः ॥ २४ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

स्वमायाशक्तेर्गुणैर्जगत्कर्तृत्वं भगवतो वदन् यतः सृष्टमिदमित्यस्य प्रश्नस्योत्तरं प्रपञ्चयति कालमिति । कालम् आत्मन् स्वस्मिन् प्राप्तं लीनत्वेन स्थितं कर्म्मजीवादृष्टं स्वभावञ्च आत्मनि जीवे लीनत्वेन स्थितं यदृच्छया स्वैरितया उपाददे सृष्ट्यर्थमङ्गीकृतवान् । तच्च न स्वतः किन्तु माययैव । विबुभूषुः । विविधं भवितुमिच्छुः ॥ २१ ॥ ❀ ❀ कालादीनां प्रयोजनमाह । गुणानां व्यतिकरः क्षोभः स चेह साम्यत्यागः परिणामो रुपान्तरापत्तिः । महतो महत्तत्त्वस्य । पुरुषाधिष्ठितादिति त्रयाणां विशेषणम् ॥२२॥

विकुर्वाणात् कालादिभिर्विक्रियमाणाद् रजःसत्त्वाभ्यामुपबृंहिताद् वर्द्धितादिति महत्तत्त्वस्य त्रिगुणत्वेऽपि क्रियाज्ञानशक्तित्वाद् रजःसत्त्वयोराधिक्यम् । तथाभूतान्महतः सकाशात् तमःप्रधानः पदार्थविशेषः कश्चिदभवत् । यद्वा य इत्यध्याहार्य्यं परेण स इत्यनेन योजयितव्यत्वात् । द्रव्यमधिभूतं ज्ञानमधिदैवं क्रिया अध्यात्मं तदात्मकस्त्रितयकारणमित्यर्थः ॥ २३ ॥ ❀ ❀ त्रिधेति । त्रैविध्यमाह । वैकारिकः सात्त्विकः । तैजसो राजसः । यद्भिदा यस्य भेदः । द्रव्यशक्तिरित्यादीनि प्रातिलोम्येन त्रयाणां लक्षणानि । द्रव्येषु महाभूतेषु आकाशादिषु शक्तिरुत्पादनसामर्थ्यं यस्य सः । एवं क्रियासु इन्द्रियेषु तथा ज्ञानेषु देवेषु शक्तिर्यस्य सः । हे प्रभो नारद त्वमत्र प्रभवसि सर्व्वं जानास्येवेत्यर्थः । अत्र साम्यावस्थं गुणत्रयमेव प्रधानम् । तस्य कालेन सत्त्वांशस्योद्रेको महत्तत्त्वम् । रजोंऽशस्योद्रेको महत्तत्त्वभेदः सूत्रतत्त्वम् । तमोंऽशस्योद्रेकोऽहङ्कारस्त्वम् । अतोऽहङ्कारकार्य्येषु तामसमाकाशादिकं बहु, राजसं सात्त्विकञ्चाल्पम् । एवं तदुपाधिकेषु जीवेष्वपि तामसाधिक्यम् ॥ २४ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ सृष्टिप्रकारमाह कालमिति । मायेश इत्युपलक्षणं क्षेत्रज्ञादीनां "प्रधानक्षेत्रज्ञपतिर्गुणेशः" ज्ञः कालकालः गुणि-सर्वविद्यः एकमेवाद्वितीयं ब्रह्मेत्यादिश्रुतिवेद्यो भगवान्पुरुषोत्तमोऽनंतशक्तिः मायया स्वशक्तिभूतया विबुभूषुः विविधं भवितु-मिच्छन् आत्मन् नानाशक्तिमति स्वस्मिन् यदृच्छया स्वेतरनिमित्तं विनाकालं स्वशक्तिभूतं गुणक्षोभहेतुम् । कर्मजीवादृष्टम् स्वभावं मायादीनां परिणामित्वादिरूपम् उपाददे ॥ २१ ॥ ❀ ❀ कालाद्युपादानफलमाह कालादिति । पुरुषाधिष्ठितादिति त्रयाणां विशेषणं कालात् गुणानां व्यतिकरः क्षोभः साम्यत्यागः स्वभावतः परिणामः रूपांतरापत्तिः कर्मणो जीवादृष्टात् महतो महत्तत्त्वस्य जन्माभूत् । एवं मायया विबुभूषोर्जगत्कारणात्पुरुषोत्तमान्महदुत्पत्तिरभूदित्यर्थः ॥ २२ ॥ ❀ ❀ अहंकारोत्प-त्तिमाह महत इति । महतः पुरुषाधिष्ठितादिति विशेषणमत्रापि बोध्यम् । कथंभूताद्रजः सत्त्वोपबृंहितात् । तस्य त्रिगुणत्वेऽपि क्रियाशक्तिज्ञानशक्तिप्रधानत्वेन गुणद्वयोपबृंहितत्वम् । विकुर्वाणाद् विक्रियमाणाद् द्रव्यज्ञानक्रियात्मकः महाभूतदैवतेंद्रियमूलभूतः तमःप्रधानः आवरकस्वभावतया तमोबहुलः अभवद् अत एव तत्कार्येष्वपि तामसं बहु राजसं सात्त्विकं चाल्पम् ॥ २३ ॥ ❀ ❀ तस्य नामकथनपूर्वकं त्रैविध्यमाह स इति । सार्द्धेन स तमःप्रधानः अहंकार इति प्रोक्तः स च विकुर्वन् रूपांतरं गच्छन् त्रिधा सम्यगभूत् तदेवाह यद्यस्य वैकारिकः सात्त्विकः तैजसो राजसः तामसश्चेति भिदा भेदः प्रातिलोम्येन तानेवाह द्रव्ये उत्पाद्ये महाभूताख्ये शक्तिरुत्पादनसामर्थ्यं यस्य स तथा क्रियासु इन्द्रियेषु शक्तिर्यस्य स तथा ज्ञानेषु देवेषु शक्तिर्यस्य स तथा हे प्रभो उपदिष्टार्थावधारणसमर्थ ॥ २४ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं प्रश्नचतुष्टयं परिहृत्य यद्रूपमित्यादि षट्प्रश्नानुत्तरयितुमारभते—कालं कर्म स्वभावमिति । त्रयाणामत्राऽध्याये उत्तरम् त्रयाणामग्रिमाध्याये तत्र प्रथमं यद्रूपमित्यस्योत्तरमाह । स्वभावतो यत्तदग्रे वक्ष्यते । परिदृश्यमानरूपतो यत्तदिदं कालकर्मस्वभावरूप-मिति । अधिष्ठानं तु तत्त्वानि । तत्सहिताद्भगवतः सृष्टिरेषामिति । तत्र सर्वस्यापि जगतः कालकर्मस्वभावत्वे पूर्वं भगवता कालकर्म-स्वभावानां ग्रहणं हेतुः । एते हि कालकर्मस्वभावा भगवतो रूपविशेषा अक्षरभेदाः सर्वत्र परिभ्रमन्ति । ते यदृच्छया भगवन्निकटेऽपि समागतास्तदा भगवता ते गृहीताः । तेऽपि[1] पुनः करणकोटावेव निविष्टा इति माययैव गृहीताः । परमत्र माया करणं न तु कर्त्री । साऽपि न व्यामोहिका । किन्तु स्वकीया । मायायाश्चाऽयं नियामको न तु मायाभावं प्राप्तः । अस्यां सृष्टौ जीवानां बन्धने उत्पत्तिस्थितिप्रलयेषु च गुणानामुपयोगो न तु स्वस्य नानात्वे । अत एव विशेषेण बुभूषुः नानारूपो भविष्यामीति तान् गृहीतवान् । मायया पुनर्गृहीतास्तेऽपि नियोज्या जाताः ॥ २१ ॥ ❀ ❀ अतस्तेषां नियोगमाह—कालाद्गुणव्यतिकर इति । पूर्वं मायया गुणा गृहीताः । पश्चात्कालादयः । अतस्ते गुणेषु प्रविष्टाः । तत्र कालाद्गुणानां व्यतिकरो जातः सम्पर्को जातः । तदनु स्वभाव-सम्बन्धात्सम्पृक्ता गुणाः परिणता जाताः । तत्रापि कर्म जन्मनिमित्तं तत्र पतितमिति परिणतं तद्वस्तु गुणत्रयकार्यं कर्मसम्बन्धा-ज्जन्मरूपं जातम् । अनेन त्रैविध्यं सृष्टेरुक्तम् । यत्र कालाद्गुणव्यतिकर एव स भूतभविष्यद्वर्त्तमानात्मकः संवत्सररूपः काल एव जातः । तत्रापि स्वभावे अधिके प्रविष्टे परिणतं तत् जडादिरूपं घटरूपं भवति । ततोऽपि कर्म चेदधिकं प्रविशति तदा जीवाधिष्ठितदेहादिसंघातस्य जन्म भवति । तदिदमाह—जन्म महतः पुरुषाधिष्ठितादभूदिति । पुरुषाधिष्ठानं सर्वत्र । तथापि परिणतं वस्तु पुरुषाधिष्ठिताद्धेतोर्महतो जन्म जातम् । तस्य हि नामान्तराभावात्प्रथमं स्थूलतयोत्पन्नं महदित्युच्यते ॥ २२ ॥ ❀ ❀ एवमेकस्य जीवस्य कालकर्मस्वभावैर्देहसम्बन्धो निरूपितः । इदानीं भगवत्प्रेरणया ते गुणा महत्तत्व एव लग्ना इत्याह—महत-स्त्विति । कालकर्मस्वभावैः स्वस्मिन्गुणव्यतिकरादिकार्ये कृते सोऽपि विकुर्वाणो जातः तत्र गुणद्वयं[2] सहायत्वेन[3] प्रविशति । तमस्तु प्राधान्येन । तदाह—रजःसत्वोपबृंहितात्तमःप्रधानादिति । कश्चित्त्रिगुणात्मकः पदार्थो जातः । त्रयाणामनुप्रवेशात् । तदाह—

---

१. अपीति नास्ति घ. ङ. । २. उपपन्नमिति क. ख. घ. । ३. स्वभावत्वेनेति ग. ।

द्रव्यज्ञानक्रियात्मक इति ॥ २३ ॥ ❋ ❋ तस्य¹ नामाऽऽह—सोऽहङ्कार इति प्रोक्त इति । पूर्वं तु स्थूलमेकं कार्यमुत्पन्नमिति भगवता महानिति²संज्ञा धृता । अस्य तु पिता महान् । स तु विशेषतो नामान्तरमजानन्नात्मानं ²प्रकृतिं च पश्यन्नुभयं नामत्वेन निर्दिशति—अहङ्कार इति । पित्रैव प्रोक्तः । सोऽपि पूर्ववत् कालादिसम्बन्धं प्राप्य विकुर्वन् । गुणानां प्रधानगुणभावे³ नियामकाभावात्स्वतन्त्राः सन्तः स्वाधिकरणमहङ्कारं त्रेधा कृतवन्त इत्याह—समभूत्त्रिधेति । तेषां भेदानाह—वैकारिक इति । वैकारिकः सात्त्विकः । तैजसो राजसः । चकारादवान्तरभेदा अपि तयोः सन्तीत्युक्तं भवति । एवं तामसश्चेत्यत्राऽपि । यद्भिदा यस्याऽहङ्कारस्यैवं त्रिरूपो भेद इत्यर्थः । एतेषां स्वस्वकार्यकरणे सामर्थ्यमाह—द्रव्यशक्तिरिति । तन्मध्ये तामसोऽहङ्कारो द्रव्यजननसामर्थ्ययुक्तः स द्रव्यमेव जनयति । अतस्तस्य गौणं नाम द्रव्यशक्तिरिति द्रव्ये शक्तिर्यस्येति । एवं राजसोऽहङ्कारः क्रियाशक्तिः । सात्त्विकस्तु ज्ञानशक्तिरिति । तत्र प्रभो इति सम्बोधनं तवाऽहङ्कारो ज्ञानशक्तिरूप इति बोधनार्थम् ॥ २४ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

कालं कर्मेत्यत्र अधिष्ठानमिति, जगतोधिष्ठानम् । तत्र हेतुः तत्सहितादित्यादि, कालादित्रयसहिताद्भगवतः । तत्त्वानां सृष्टिरिति । जगत्पूर्ववर्त्तित्वात्तत्त्वानि तथेत्यर्थः । तर्हि कालादीनां कुतो न तथात्वमित्यत आहुः तत्रेत्यादि । तथा च करणकोटिनिविष्टत्वात्तथेत्यर्थः । अत्रेति, कालकर्मस्वभावानां ग्रहणे । अत्र मायायाः करणत्वेनोक्त्या. कालादिग्रहणे तस्या न स्वातन्त्र्यमिति ज्ञाप्यते । अत एवेति । अत्र नानात्वे गुणानुपयोगादेव । तथा चास्यां सृष्टौ यथेच्छं कालेन कर्मणा स्वभावेन भगवान् नाना भवतीति ज्ञापितम् ॥ २१ ॥ ❋ ❋ कालादित्यत्र अत इति, पश्चाद् गृहीतत्वादेव । सर्वत्रेति गुणव्यतिकरादावपि हेतुरित्यर्थः । एवमित्यादि, अत्रैतद्बोध्यम्, कालेन गुणानां सम्पर्कोऽशतो जायते । ततः सम्पृक्तांशस्य स्वभावेन परिणामे विकृतिरिति विपरिणामाद्विकृतित्वं कार्यत्वञ्च । तस्य च स्वकार्यापेक्षया प्रकृतित्वमिति [illegible] कर्मणा जन्मनि जायमानोपि इन्द्रियाणां मात्रादीनां चानुत्पन्नत्वात्पिण्डीभूतस्यैव जन्म भवतीति तस्य स्थूलतयोपपत्तिः । अनेन प्रकारेण तादृशदेहसम्बन्ध उक्त इत्यर्थः । महत इत्यत्र ते गुणा इति सम्पृक्तशिष्टाः । त्रयाणामनुप्रवेशादिति, पश्चात्पुनः संवलनात् । अत एव महत्तत्त्वापेक्षयैतद्देहे गुणसम्बन्धाधिक्यादस्य स्वकार्यापेक्षया प्रकृतित्वं त्रितयात्मकत्वञ्चेत्यर्थः ॥ २३ ॥ ❋ ❋ सोहङ्कार इत्यत्र नियामकाभावादित्यादि, पुरुषाधिष्ठानाभावात् कर्तृत्वाभिमानिनस्तं तथा कृतवन्त इत्यस्माद्धेतोस्तस्य त्रिव्यूहत्वमाहेत्यर्थः । तेषामिति देहानाम् । द्रव्यशक्तिरित्यत्र एतेषामिति भेदानाम् । गौणमिति गुणकृतम्, पाचकः पाठकः इत्यादिवत् ॥ २४ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

अवशिष्टानां प्रश्नानामुत्तरं वदंस्तस्य सृष्टिप्रकारमाह—कालमिति । मायेशो मायानियामको भगवान् स्वया मायया प्रकृत्यात्मिकया द्वारभूतया विबुभूषुर्नानानामरूपभाग्भवितुमिच्छुः यदृच्छया अनायासेन सङ्कल्पमात्रेण आत्मनि प्राप्तं लीनं कालं कर्म स्वभावं च कारणतयोपादद्दे स्वीकृतवानित्यन्वयः । कालो गुणानां वैषम्यरूपक्षोभहेतुः । कर्म जीवादृष्टं पुण्यपापरूपम् । स्वभावः परिणामहेतुः । कालाद्युपादानं नाम तेषां स्वस्वकार्योन्मुख्यापादानम् ॥ २१ ॥ ❋ ❋ तदुपादानफलं दर्शयन् महतः सृष्टिमाह—कालादिति । पुरुषः परमेश्वरस्तदधिष्ठितात् प्रेरितादिति सर्वेषां पञ्चम्यन्तानां विशेषणम् । कालाद्गुणानां सत्त्वादीनां व्यतिकरः क्षोभः साम्यावस्थात्यागः परस्परमेलनं चाभूत् । स्वभावतो गुणानां परिणामो रूपान्तरापत्तिरभूत् । कर्मणः निमित्तभूतात् साधारणाज्जीवानामदृष्टात् महतो महत्तत्त्वस्य जन्माभूत् ॥ २२ ॥ ❋ ❋ महत्तत्त्वादहङ्कारोत्पत्तिमाह—महतस्त्विति । पुरुषाधिष्ठितात् अतएव विकुर्वाणात् विक्रियमाणात् अतएव रजस्सत्त्वाभ्यामुपबृंहितात् संवर्द्धितात् रजस्सत्त्वप्रधानादपि महतो द्रव्याणि पृथिव्यादिमहाभूतानि ज्ञानशब्देन मनोदेवताश्च क्रिया इन्द्रियाणि च तदात्मकः तेषां कारणभूतः तमःप्रधानस्तु यः पदार्थोऽभवत्सोऽहङ्कार इति प्रोक्त इत्युत्तरेणान्वयः ॥ २३ ॥ ❋ ❋ सोऽपि विकुर्वन् रूपान्तरं गच्छन् त्रिधा समभूत् । त्रैविध्यमेव दर्शयति—वैकारिकः सात्त्विकः तैजसः राजसः तामसश्चेति यद्भिदा एवं यस्याहङ्कारस्य भेदोऽस्तीति । द्रव्यज्ञानक्रियात्मक इति यदुक्तं तदेव स्पष्टयति—द्रव्यशक्तिरित्यादीनि प्रातिलोम्येन त्रयाणां विशेषणानि, द्रव्ये पृथिव्यादिपञ्चमहाभूतोत्पादने शक्तिः सामर्थ्यं यस्य स तामसः, क्रियाशब्देन दशेन्द्रियाणि तेषामुत्पादने शक्तिर्यस्य सः राजसः, ज्ञानशब्देन तत्कारणमन्तःकरणं देवताश्च तदुत्पादने शक्तिर्यस्य स सात्त्विक इति योज्यम् । हे प्रभो इति सम्बोधनेन यतस्त्वं बोद्धुं समर्थोऽस्यतः सूक्ष्ममप्यर्थं वदामीति सूचयति ॥ २४ ॥

### हिन्दी अनुवाद

मायापति भगवान्‌ने एकसे बहुत होनेकी इच्छा होनेपर अपनी मायासे अपने स्वरूपमें स्वयं प्राप्त काल, कर्म और स्वभावको स्वीकार कर लिया ॥ २१ ॥ ❋ ❋ भगवान्‌की शक्तिसे ही कालने तीनों गुणोंमें क्षोभ उत्पन्न कर दिया, स्वभावने उन्हें रूपान्तरित कर दिया और कर्मने महत्तत्त्वको जन्म दिया ॥ २२ ॥ ❋ ❋ रजोगुण और तमोगुणकी

---

1. अस्येति घ. ङ । २. आत्मानं कृतिचेति ख. ग । ३. गुणभावेपीति ग ।

वृद्धि होनेपर महत्तत्त्वका जो विकार हुआ, उससे ज्ञान, क्रिया और द्रव्यरूप तमःप्रधान विकार हुआ ॥ २३ ॥ ❀ ❀ वह अहंकार कहलाया और विकारको प्राप्त होकर तीन प्रकारका हो गया । उसके भेद हैं—वैकारिक, तैजस और तामस । नारदजी ! वे क्रमशः ज्ञानशक्ति, क्रियाशक्ति और द्रव्यशक्तिप्रधान हैं ॥ २४ ॥

**तामसादपि भूतादेर्विकुर्वाणादभून्नभः । तस्य मात्रा गुणः शब्दो लिङ्गं यद् द्रष्टृदृश्ययोः॥२५॥**
**नभसोऽथ विकुर्वाणादभूत् स्पर्शगुणोऽनिलः । परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलम् ॥२६॥**
**वायोरपि विकुर्वाणात् कालकर्मस्वभावतः । उदपद्यत तेजो वै रूपवत् स्पर्शशब्दवत् ॥२७॥**
**तेजसस्तु विकुर्वाणादासीदम्भो रसात्मकम् । रूपवत् स्पर्शवच्चाम्भो घोषवच्च परान्वयात् ॥२८॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

भूतादेरिति तामसस्य विशेषणम् । ननु तामसात्प्रथमं शब्दो भवतीति प्रसिद्धम् सत्यम् । स तु तस्य नभसो मात्रा सूक्ष्मं रूपं गुणश्चासाधारणो व्यावर्तको धर्मः शब्दद्वारा नभ उत्पद्यत इत्यर्थः । एवमेव स्पर्शादिष्वपि द्रष्टव्यम् । शब्दस्य लक्षणं लिंगमिति । कुड्याद्यंतरितेन केनचिदुच्चैर्गजो गज इत्युक्ते यो गजद्रष्टा यश्च तेन दृश्यो गजस्तयोर्लिंगं बोधकम् । लिंगविशेषणत्वाद्यच्छब्दस्य क्लीबत्वम् ॥ २५ ॥ ❀ ❀ परस्य नभसः कारणत्वेनान्वयाच्छब्दवांश्च वायुस्तस्यैव लक्षणं प्राणो देहधारणम् । ओजः सहोबलानींद्रियमनःशरीराणां पाटवानि तेषां हेतुरित्यर्थः ॥ २६ ॥ ❀ ❀ उदपद्यत उत्पन्नं स्वभावतो विकुर्वाणात्स्वयं रूपवत्तेजो वायुनभसोः कारणभूतयोरन्वयात्स्पर्शवच्छब्दवच्च । एवमंभसः पृथिव्याश्च परान्वयाधिक्याद्गुणाधिक्यम् ॥ २७ ॥ ❀ ❀ घोषः शब्दः ॥ २८ ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अत्राक्षिपति । नन्विति । इत्यर्थ इति । शब्दादीनामाकाशादिसूक्ष्मरूपत्वेन कारणत्वं सत्येवाकाशे शब्दानुभवात्कार्यत्वमपीति भावः । विश्वनाथस्तु पुरावृत्तेषु परोक्षोपि यो वसुदेवदशरथादिर्द्रष्टा यश्च तेन दृश्यः कृष्णरामादिस्तयोर्द्वयोरपि यल्लिंगं य एवशब्दो ज्ञापकः इत्याह ॥ २५ ॥ ❀ ❀ इत्यर्थ इति । प्राणस्य देहधारणे ओजआदीनां च कारणे लक्षणा कार्यार्थानुपपत्त्येति भावः । यद्वा प्राणादिरूपोऽनिल इत्यर्थः ॥ २६,२७,२८ ॥

### श्रीमद्वीरराघवव्याख्या

एवमहंकारस्य त्रैविध्यमुक्तमथ तामसाहंकाराच्छब्दादितन्मात्रक्रमेणाकाशादिभूतस्य सृष्टिमाह तामसादिति । भूतादिरिति तामसाहंकारस्यैव नामांतरं विक्रियमाणाद्भूतादिनामकात्तामसाहंकारान्नभ अभूत् शब्दद्वारा नभः उदपद्यतेत्यर्थः । एवमेव स्पर्शादिष्वपि द्रष्टव्यं एतदेव शब्दस्वभावत्वं कथयन्नुपपादयति लिंगमिति । तस्य नभसो मात्रासूक्ष्मं रूपं गुणः व्यावर्त्तकोऽसाधारणो धर्मश्च यः शब्दः सोऽप्यभूदित्यर्थः । यद्वा तस्य नभसः मात्रागुणः असाधारणगुणः शब्दस्य लक्षणं द्रष्टृदृश्ययोरात्मनोर्लिंगं प्रमाणं यत्स शब्द इत्यर्थः । शब्दो हि शास्त्रात्मना आत्मानात्मनोः प्रमाणं यदाह सूत्रकारः "शास्त्रयोनित्वादिति" यदिति नपुंसकत्वं लिंगापेक्षया ॥ २५ ॥ ❀ ❀ विकुर्वाणाद्रूपांतरं गच्छतः नभसः स्पर्शगुणोऽनिलो वायुरभूत् स्पर्शतन्मात्रद्वाराऽभूदित्यर्थः । परान्वयात्कारणनभोऽनुवृत्तेः । शब्दवांश्च वायुरित्यर्थः । सस्पर्शस्य वायोर्लक्षणमाह प्राणः अवस्थाविशेषोपपन्नो वायुर्हि प्राणः ओजः सहो बलमिति धर्मिप्रधानो निर्देशः ओजआदिविशिष्ट इत्यर्थः । ओजः प्रवृत्तिशक्तिः सहो वेगो बलं धारणसामर्थ्यं ओजः सहोबलानींद्रियमनःशरीराणां पाटवानि तेषां हेतुरिति केचित् ॥ २६ ॥ ❀ ❀ कालकर्मस्वभावतो हेतोर्विकुर्वाणाद्वायो रूपवत् कारणभूताकाशवायुगुणानुवृत्तेः स्पर्शशब्दवच्च तेज उदपद्यत कालकर्मस्वभावत इति सर्वत्रानुसंधेयम् ॥ २७ ॥ ❀ ❀ विक्रियमाणात्तेजसः रसात्मकं परान्वयाद्रूपस्पर्शशब्दवच्चांभ आसीत् । घोषः शब्दः ॥ २८ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

प्रकारान्तरेण तद्भेदमाह द्रव्यशक्तिरिति । द्रव्यनामकपंचभूतोत्पादकशक्तिमत्त्वात्क्रियानामककर्मेन्द्रियजननशक्तिमत्त्वात्तथा ज्ञाननामकज्ञानेन्द्रियजननशक्तिमत्त्वान्मनोदिग्गादिदेवानां चोत्पत्तिशक्तिमत्त्वात्तस्याहंकारात्मनः प्रभो रुद्रस्य द्रव्यशक्तिरित्यादिभेदोऽवगंतव्यः तथाचोक्तं "भूतानि द्रव्यनामानि ज्ञानं ज्ञानेन्द्रियाणि च" त्यादि द्रव्याद्युत्पादनशक्तिमत्त्वात् द्रव्यादिशक्तिरित्युक्तम् । तं प्रकारमाह तामसादपीति । अपिशब्दः कालकर्माद्यनुकर्षणार्थः भूतादेर्भूतानां मूलकारणात् ॥ २५ ॥ ❀ ❀ तस्याकाशस्य मात्रागुणः पञ्चेन्द्रियैर्मेयत्वान्मात्रागुणः शब्दोऽभूत्तस्मान्नभोऽप्यभूदित्युत्पत्तिविशेषोऽत्र ज्ञातव्यः । तथा वक्ष्यमाणत्वात् तत्प्रयोजनमाह लिंगमिति । यच्छब्दरूपं द्रष्टृदृश्ययोर्द्रष्टुर्हरेर्दृश्यस्य विश्वस्य च लिंगं ज्ञापकं प्रमाणं तदुक्तं "पञ्चेन्द्रिया-

भिमेयत्वान्मात्रागुण इतीरितः शब्देनैव परो द्रष्टा ज्ञायते जगदेव चे" ति च शब्दः क्वचिदाश्रितो गुणत्वादिति च स्पर्शाख्यो गुणस्त्वगिंद्रियैकग्राह्यो यस्य स तथा ॥ २६ ॥ ❀ ❀ परस्याकाशस्यान्वयात् संसर्गात् शब्दवान् शब्दगुणोपेतः । वायोरौत्पत्तिकगुणानाह प्राण इति । सर्वचेष्टयितृत्वात्प्राणः अभिभवशक्तित्वात्ओजोऽवष्टंभशक्तिर्वा । अनभिभाव्यत्वात्सहः स्वेच्छाकरणशक्तिस्वरूपत्वाद्बलं तदुक्तं "सर्वचेष्टयितृत्वात्तु प्राणो" भिभवशक्तितः ओजस्त्वित्यादि ओजोऽवष्टंभबलयोरिति यादवः । कालकर्मस्वभावतो विकुर्वाणाद् वायोस्तेज उदपद्यत उत्पन्नमभूत् । तेजः स्वतो रूपवत् कारणानुस्यूतत्वात्स्पर्शादिगुणवत् उपाधिवशात्स्पर्शादिगुणवत्त्वं न स्वत इति वैशेषिककल्पितं स्वकपोलकल्पितमिति दर्शितं वेत्यनेन ॥ २७ ॥ ❀ ❀ विकुर्वाणात्तेजस इत्यादौ कालकर्मस्वभावत इत्येतदनुवर्तनीयं तदन्वयात्कारणपरंपरान्वयात् । रसगुण आत्मा स्वरूपं यस्य तत्तथा रसगुणोत्पत्तिपूर्वकमिति भावः । घोषवच्छब्दवत् ॥ २८ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या ।

कारणाश्रयायामुद्भवावस्थायां तदात्मकः सन् मात्रा । कार्य्याश्रयायामुद्भूतावस्थायां स्वतस्तु गुणः । द्रष्टृदृश्ययोर्यत् लिङ्गं बोधकं तदेव चशब्द इत्यर्थः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या ।

भूतादेरिति तामसस्य विशेषणम् । ननु तामसाहङ्कारात् प्रथमं शब्दो भवतीति प्रसिद्धम् । सत्यम् स तु तस्य नभसो मात्रा सूक्ष्मं रूपं गुणश्चासाधारणो व्यावर्त्तको धर्म्मः । शब्दद्वारा नभ उत्पद्यते इत्यर्थः । एवमेव स्पर्शादिष्वपि द्रष्टव्यम् । शब्दस्य लक्षणमाह लिङ्गमिति । पुरावृत्तेषु परोक्षोऽपि यो वसुदेवदशरथादिर्द्रष्टा यश्च तेन दृश्यः कृष्णरामादिस्तयोर्द्वयोरपि यत् लिङ्गं य एव शब्दो ज्ञापकः । लिङ्गविशेषणत्वात् यच्छब्दस्य षण्डत्वम् ॥ २५ ॥ ❀ ❀ परस्य नभसः कारणत्वेनान्वयात् शब्दवांश्च वायुः । वायोश्च लक्षणम्—प्राणो देहधारणम् ओजःसहोबलानि इन्द्रियमनःशरीराणां पाटवानि तेषां हेतुरित्यर्थः ॥ २६ ॥ ❀ ❀ स्वतो रूपवत् तेजः वायुनभसोः कारणभूतयोरन्वयात् स्पर्शशब्दवच्च ॥ ॥२७॥ ❀ ❀ एवमम्भसः पृथिव्याश्च परान्वयाधिक्याद्गुणाधिक्यम् । घोषः शब्दः ॥ २८ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ तामसाहंकाराच्छब्दतन्मात्रादि क्रमेणाकाशाद्युत्पत्तिमाह तामसात्तस्य नामांतरमाह भूतादेरिति । विकुर्वाणाद्विक्रियमाणात् नभः अभूत् तस्य नभसः शब्दः मात्रा सूक्ष्मं रूपम् गुणश्चासाधारणो व्यावर्त्तको धर्मः । तामसादहंकारात् शब्दतन्मात्रं ततः शब्दगुणं नभः ततः स्पर्शगुणो वायुरित्येवंक्रमोऽग्रेऽपि द्रष्टव्यः । शब्दस्य लक्षणमाह लिंगं यद् द्रष्टृदृश्ययोरिति । अरुंधतीं पश्यामीति यद्वचनं तद्द्रष्टृदृश्ययोर्लिंगं ज्ञापकम् ॥ २५ ॥ ❀ ❀ स्पर्शतन्मात्रद्वारा नभसोऽनिलो वायुरभूत् स्पर्शः गुणो यस्य सः इत्यसाधारणगुणोक्तिः । साधारणं गुणं दर्शयति परान्वयादिति । परस्य नभसः कारणत्वेनान्वयाच्छब्दवांश्चानिलः एवंगुणभेदोऽग्रेऽपि बोध्यः । स एवावस्थाविशेषापन्नोऽनिलः प्राणः तच्च भूतम् ओजः सहो बलानीन्द्रियमनः शरीरपाटवानि यस्मात्तत् ॥ २६ ॥ ❀ ❀ स्वरूपवत्कारणभूतयोर्वाय्वाकाशयोरन्वयात्स्पर्शवच्छब्दवच्च ॥ २७ ॥ ❀ ❀ स्वतः रसात्मकम् । रसवत् परान्वयात् कारणानुवृत्तेस्तु रूपवत्स्पर्शवत् शब्दवच्च ॥ २८ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

इदानीं त्रयाणामपि कालादि[1]सम्बन्धत्वात्सृष्टिकर्तृत्वात्प्रथमं तामसस्य तथात्वमाह—तामसादपि भूतादेरिति । तामसस्य भूतादिरित्यपरं नाम यौगिकम् । पृथिव्याद्याकाशान्तानां सामान्यं नाम भूतमिति । जातमित्यर्थः । भूतानि च तामसानि । अतस्तामसं यज्जातं तद्भूतमित्युच्यते । तस्य आदिः [2]कारणं भूतादिरहङ्कारः । सोऽपि यदा विकुर्वाणः कार्यजननार्थमुद्यतस्तदा पूर्ववत्कालादिसम्बन्धान्नभो नाम किञ्चित्कार्यं जातम् । अत्यन्ततामसत्वात्प्रकाशप्रवृत्तिरहितत्वान्न विद्यते भाः यस्येति । भा दीप्तावित्यस्य असप्रत्यये कृते आकारलोपे च कृते नभ इति भवति । ननु तस्य सर्वात्मना भानराहित्ये कथं तत्प्रतीतिः ? तत्राऽऽह—**तस्य मात्रा गुण** इति । तस्य शब्दः मात्रा गुणश्च । मा निषेधात्मिका माया । तां त्रायत इति मात्रा भगवदावरणरूपां मायां हि पालयति । अत एव मात्रास्वासक्तो न भगवन्तं प्राप्नोति । अनेन वर्णात्मकः शब्दो व्युदस्तः । किञ्च । गुणः सः । आत्मबन्धक इत्यर्थः । पूर्वं गुणानां बन्धकत्वोक्तेः । मात्रा[3] नाम परिणामविशेषः । आकाशः सर्वोऽपि व्यवहारे शब्दमात्रो भवतीति शब्दमात्रेणाऽऽकाशव्यवहारः । किञ्च । लिङ्गं यद्द्रष्टृदृश्ययोरिति । [4]मात्रात्वं गुणत्वं च शब्दगतधर्ममात्रम् । नत्वसाधारणो धर्मः । तस्माच्छब्दस्य न तल्लक्षणम् । किन्तु द्रष्टृदृश्यलिङ्गत्वं शब्दत्वमिति । गजोगज इत्युक्ते स्वरेण गृहस्थितः पुरुषो बहिःस्थितमनुमिमीते

१. सम्बन्धादिति क. लोकादिसम्बन्धादिति ग. । २. करणमिति क. ग. । ३. मात्राणामपरिणामविशेष इति घ. ।
४. मात्रत्वमिति ख. घ. ।

द्रष्टारं दृश्यं च देवदत्तो गजं पश्यतीति ॥ २५ ॥ ❀ ❀ एवं तामसाहङ्कारादाकाशोत्पत्तिमुक्त्वा आकाशाद्वाय्वादीनामुत्पत्तिं क्रमेणाऽऽह—**नभसोऽथ विकुर्वाणादिति**।[1] स्पर्शो गुणो यस्य । अनिलो वायुः । वायोर्गुणद्वयम्—स्वाभाविकः स्पर्शः कारणान्वयाच्छब्दश्च । कार्यद्वयं[2] च तस्याऽधिकमित्याह[3] । प्राणो दशविधः । ओज इन्द्रियशक्तिः । सहो मनःशक्तिः । बलं शरीरशक्तिः । यद्यपि प्राणो राजसाहङ्कारकार्यमिति वक्ष्यते तथापि घ्राणेन्द्रियसहकारी गन्धग्राहकः प्राणोऽत्र गृहीतः । "बुद्धिः प्राणश्च तैजसादि"ति मतान्तरं वा । प्राणादिरूपो वायुरित्यर्थः । यत्राऽपि कालकर्मस्वभावत[4] इति नोच्यते तत्राप्यनुषङ्गः कर्त्तव्यः । अथवा अहङ्काराकाशयोः कालकर्मकार्यत्वाभावाल्लोकप्रतीत्या तन्नोक्तम् ॥ २६ ॥ ❀ ❀ वायोस्तु साधनविजातीयं कार्यमुत्पद्यत इति निमित्तमात्रं मा भवत्विति विशेषेण निरूपयति—**वायोरपीति** । उदपद्यत उत्पन्नम् । वैशब्देन नाऽत्र सन्देहः कर्त्तव्यः । गुणाधिक्यादेव वैलक्षण्यप्रतीतिः । न तु वायोः कार्यं न भवतीति । "**वायोरग्निरि**"ति श्रुतेः । तेजसो गुणत्रयमाह । रूपवत्, स्पर्शवत्, शब्दवत् । त्रयोऽपि गुणास्तत्र प्रतीयन्ते । येषां कार्यकारणभावो नाऽस्ति तेषां परं विवादः । स च श्रुतिविरोधात्सिद्धान्ते उपेक्षणीयः । यत्तु विजातीयं न विजातीयस्याऽऽरम्भकमिति । तत्तु तन्तुपटयोरेव व्यभिचारि । न हि तन्तुपटयोरेका जातिः । तन्तुत्वं पटत्वं वा एकम् । नाऽपि पृथिवीत्वादयोऽत्र जातयो विवक्ष्यन्ते । नियामकाभावात् । स्थूलाग्नौ कारणत्वेन वायोरेवोपलम्भात् । न च तदवयवास्तत्रोपलभ्यन्ते पटे तन्तव इव । तस्माच्छ्रुतिप्रत्यक्षाभ्यां बाधितं शास्त्रमुपेक्षणीयम् । रसात्मकं रसतन्मात्रायुक्तम् । परान्वयाद्रूपवत्स्पर्शवद् घोषवच्च । घोषो ध्वन्यात्मकः शब्दः ॥ २७ ॥ २८ ॥

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः**

**तामसादित्यत्र अनेनेत्यादि** । **तस्य मात्रा शब्द इति** । शब्दस्य मात्रात्वविधानेन वर्णात्मकशब्द आकाशगुणव्यतिरिक्तत्वेन बोधित इत्यर्थः । युक्तं चैतत्, सर्वतः पिहितमहाबिलादेरनुपलब्धस्य भूगर्भगृहादेश्च क्वास्तीति सन्देहे भूमेरुपरि तत्र तत्र पादाघाताकरणेन यत्रैव विलक्षणध्वन्युत्पत्तिस्तत्रैव तादृशध्वनिना शून्यमिदमवकाशोत्रेत्याकाशानुमितिरुत्पद्यते, तेन स ध्वनिराकाशगुणरूपः शब्दः । अत एव प्रतिध्वनिरप्याकाशगुण एव, न तु शब्दप्रतिबिम्बः । वर्णस्तु स्वरव्यञ्जनान्यतमो नित्यः । तेन "ताल्वोष्ठपुटव्यापाराभिव्यञ्जितशब्दत्वम्", न तस्य लक्षणम्, कुशलवादकवादितवीणामृदङ्गादिशब्दे वर्णप्रतीत्यपलापापत्तेः । फूत्कारादौ तदापत्तेश्च । वर्णानाञ्च नित्यत्वं **सर्वनिर्णयनिबन्धानुसारेण प्रस्थानरत्नाकरे** व्युत्पादितमस्माभिः । **मात्राशब्दः** शब्दादिषु योगरूढ इति ज्ञापयितुं योगमुक्त्वा मात्रास्वरूपं बोधयन्ति **मात्रानामेत्यादि** । भूतपूर्वावस्थारूपः परिणाम इत्यर्थः । **परिणामो** नाम उपादानसमसत्ताककार्यापत्तिः । शब्दादिपञ्चके मात्रात्वस्य तौल्येप्यत्रैव तदुक्तेस्तत्सूचितमर्थमाहुः **आकाश इत्यादि** । तथा चाकाशे स्थूलावस्थायाः प्राधान्यज्ञापनाय **मात्रपदमत्र** प्रयुक्तमित्यर्थः । एवं **शब्दमात्रगुणमाकाशमित्याकाशलक्षणं** सूचयित्वा **शब्दस्य** बोधाय तल्लक्षणं व्याकुर्वन्ति **किञ्चेत्यादि** । तथा च, स्वरस्य ध्वन्यात्मकत्वाद् ध्वनिरूपः **शब्द आकाशगुण** इत्येवं लक्षणकस्य शब्दस्य प्रत्यक्षत्वात्तल्लक्षक आकाशोपि तदवयववानस्तीति स विरलावयवो न तु निरवयव इत्यर्थः ॥ २५ ॥ ❀ ❀ **नभस इत्यत्र अत्र गृहीत इति** वायुत्वेनोक्तः शब्दस्य तुल्यत्वात् स एव गृह्यते इति निर्णेतुं न शक्यत इत्यरुच्या पक्षान्तरमाहुः **बुद्धिरित्यादि** । तथा चाकारतौल्येपि प्राणापानसमानोदानव्याननागकूर्मकृकलदेवदत्तधनञ्जयाख्यभेदभिन्नस्याध्यात्मपवनस्य कार्यभेदात् सोतिरिक्त इति कार्यभेदमादाय तन्मतस्वरूपतौल्यमादायेदं मतमित्यर्थः । **कर्त्तव्य इति**, यद्रूपमित्येतदुत्तरत्वेनास्य ग्रन्थस्य प्रवृत्तत्वात्तदनुषङ्गाभावे एतयोस्तत्र प्रवेशाभाव आपद्येतेत्यतः कर्त्तव्य इत्यर्थः । नन्वेवं सत्यग्रिमश्लोके तदुक्तिवैयर्थ्यं स्यादित्याशङ्क्य पक्षान्तरमाहुः **अथवेत्यादि**, अहङ्कारोत्पत्तौ कालकार्ये गुणव्यतिकरे सत्यहङ्कारस्य त्रिव्यूहत्वं न स्यादतस्तत्र कालस्य न कारणता, नभसोप्यत्र[6] प्रकाशमानतया तामसत्वेन व्यतिकरस्यानुपलभ्यात्तत्रापि तथा लोकेऽहङ्कारस्य सिद्धवदेवाहम्बुद्ध्या प्रतीतेर्जन्माप्रतीत्या आकाशस्यापि जन्माप्रतीत्योभयत्र कर्मणोपि न कारणता (न प्रतीयत) इति **लोकप्रतीत्या** तयोस्तथाभावान्मुख्यतस्तन्नोक्तम् । वस्तुतस्त्वहङ्कारोत्पत्तौ गुणानां[7] प्राधान्योपसर्जनभावकथनादेवाल्पव्यतिकरस्याहङ्कारे सिद्धत्वात् सात्त्विकाहङ्कारकार्ये मनसि '**गुणैश्चाशयसम्भवैरि**'ति गुणत्रयजननकथनात्तत्प्रेर्याणामिन्द्रियाणामपि त्रिविधकार्यदर्शनान्नभसोपि वायुरूपचञ्चलकार्यजननदर्शनाद्रजोव्यतिकराभावे तदसम्भवादल्पव्यतिकरस्य तत्रापि सिद्धत्वात् **समभूदित्यादिनोत्पत्तेः** कण्ठत उक्तत्वाच्च कालकर्मकार्यत्वं तत्रापि निर्बाधम्, परिणामस्तु प्रतिपादित एवेति सर्वत्र त्रितयकार्यत्वमित्यर्थः ॥ २६ ॥ ❀ ❀ **वायोरपीत्यत्र** । नन्वनुषङ्गेन त्रितयात्मकत्वसिद्धौ पुनस्तत्कथनस्य किं प्रयोजनमत आहुः **वायोरित्यादि** । **निमित्तमात्रमिति**, कालः कर्म चेति शेषः । तथा च, विपरिणामे न स्वभावस्योपादानतया प्रवेशो भवतु, न तु कालकर्मणोरित्याशङ्कानिवृत्त्यर्थं पुनस्त्रितयग्रहणमित्यर्थः । **येषामिति** नैयायिकादीनाम् । ननु वायोर्निमित्तत्वाङ्गीकारेपि श्रुतेरुपपद्यमानत्वेनाविरोधात्कथमुपेक्षणीयमित्यतस्तन्मतमनुवदन्ति **यत्त्वित्यादि**, **इतीति** । एवं

१. नभसस्तु विकुर्वाणादिति ख. । २. कार्यत्रयमिति ख. । ३. अधिकारमिति क. । ४. कालकर्मस्वभाव इति क. ।
५. प्रतिबन्ध इति पाठः । ६. नमसोऽप्यप्रका. पाठः । ७. प्रधानोपसर्जन० पाठः ।

नियमाक्रान्तं मतम्। तद्दूषयन्ति तस्विल्यादि। ननु कथं व्यभिचारीत्यत आहुः न हीत्यादि। अतो व्यभिचार इत्यर्थः। नन्ववान्तरजातिविचारेण व्यभिचारशङ्कायामपि पृथ्वीत्वादीनां व्यापकजातीनां नियामकत्वान्न व्यभिचार इत्यत आहुः नापीत्यादि, अत्रेति, व्यभिचारभङ्गे। विवदयन्त इति नियामकत्वेन विवक्ष्यन्ते। नियामकाभावादिति, पृथिवीत्वस्य घटादावपि सत्त्वेन तादृशविवक्षानियामकस्यानुपलम्भात्। तथा च, सूक्ष्माग्नेः स्थूलाग्न्युत्पत्तौ वायोरेव कारणत्वेनोपलम्भात्। वायोः सूक्ष्मवह्न्यवयवाङ्गीकारस्य प्रत्यक्षविरुद्धत्वेनासङ्गतत्वाच्च न व्यभिचारभङ्ग इत्यर्थः। न च पार्थिवात् पार्थिवस्य तैजसात्तैजसस्य कार्पासात्कार्पासस्येति सजातीयादेव सजातीयोत्पत्तिदर्शनात् विजातीयाद्विजातीयोत्पत्त्यदर्शनाच्च स्थूलाग्निस्थलेऽपि नियामकः कश्चिज्जातिविशेषः कल्प्य इति वाच्यम्, प्रत्यक्षविरोधेन निर्वक्तुमशक्यत्वात्। गोमयाद्वृश्चिकस्य, देवात् मनुष्यस्य, वासराद्वृक्षस्य चोत्पत्तेर्लोकशास्त्रसिद्धत्वेन नियमस्याप्रयोजकत्वाच्च। न चैवमतिप्रसङ्गः, पटत्वेन तन्तुत्वेन घटत्वेन कपालत्वेनेत्येवं विशेषकार्यकारणभावेनैव तद्वारणादिति फलितमाहुः तस्मादित्यादि, तस्मादिति नियमस्याप्रयोजकत्वात्॥ २७॥

## श्रीगिरिधरकृता बालप्रबोधिनी

भूतानामाकाशादीनामादिः कारणं भूतादिस्तस्मात् तामसादपि विक्रियमाणान्नभ आकाशोऽभूत्। तस्याकाशस्य मात्रा सूक्ष्मं रूपं गुणः असाधारणो व्यावर्तको धर्मश्च शब्दद्वारा आकाश उदपद्यतेत्यर्थः। एवमेव स्पर्शादिष्वपि द्रष्टव्यम्। शब्दस्य लक्षणमाह—लिङ्गमिति। कुड्याद्यन्तरितेनापि केनचिद्गजो गज इत्युच्चैरुक्ते यो गजद्रष्टा यश्च तेन दृश्यो गजस्तयोर्लिङ्गं बोधकम्॥ २५॥ ❀ ❀ अथानन्तरं विकुर्वाणाद्रूपान्तरं गच्छतो नभसः सकाशात् स्पर्शगुणः स्पर्शतन्मात्रद्वारो अनिलो वायुरभूत्। स च वायुः परस्य स्वोपादानकारणस्य अन्वयात् अनुवृत्तेः शब्दवांश्चाभूत्। स एव वायुः शरीरान्तस्सञ्चारी प्राण इत्यभिधीयते 'बुद्धिः प्राणश्च तैजसौ' इति वक्ष्यमाणं तु मतान्तरम्। तत एव ओज इन्द्रियाणां शक्तिः, सहोऽन्तःकरणशक्तिः, बलं देहसामर्थ्यं च भवति॥ २६॥ ❀ ❀ कालकर्मस्वभावत इत्यपि यत्र नोक्तं तत्र सर्वत्र द्रष्टव्यम्। कालादितो विकुर्वाणात् विक्रियमाणाद्वायोरपि सकाशात् रूपतन्मात्रद्वारा खतो रूपवत् कारणभूतयोः वाय्वाकाशयोरन्वयात् स्पर्शशब्दवच्च तेज उदपद्यतेत्यन्वयः॥ २७॥ ❀ ❀ विक्रियमाणात्तेजसः सकाशात् रसात्मकं रसतन्मात्रद्वारा रसगुणकं परान्वयाच्च रूपस्पर्शशब्दवदम्भो जलमासीदित्यन्वयः। घोषः शब्दः॥ २८॥

## हिन्दी अनुवाद

जब पञ्चमहाभूतोंके कारणरूप तामस अहंकारमें विकार हुआ, तब उससे आकाशकी उत्पत्ति हुई। आकाशकी तन्मात्रा और गुण शब्द है। इस शब्दके द्वारा ही द्रष्टा और दृश्यका बोध होता है॥ २५॥ ❀ ❀ जब आकाशमें विकार हुआ, तब उससे वायुकी उत्पत्ति हुई; उसका गुण स्पर्श है। अपने कारणका गुण आ जानेसे यह शब्दवाला भी है। इन्द्रियोंमें स्फूर्ति, शरीरमें जीवनशक्ति, ओज और बल इसीके रूप हैं॥ २६॥ ❀ ❀ काल, कर्म और स्वभावसे वायुमें भी विकार हुआ। उससे तेजकी उत्पत्ति हुई। इसका प्रधान गुण रूप है। साथ ही इसके कारण आकाश और वायुके गुण शब्द एवं स्पर्श भी इसमें हैं॥ २७॥ ❀ ❀ तेजके विकारसे जलकी उत्पत्ति हुई। इसका गुण है रस; कारण-तत्त्वोंके गुण शब्द, स्पर्श और रूप भी इसमें हैं॥ २८॥

**विशेषस्तु विकुर्वाणादम्भसो गन्धवानभूत्। परान्वयाद् रसस्पर्शशब्दरूपगुणान्वितः॥२९॥**
**वैकारिकान्मनो जज्ञे देवा वैकारिका दश। दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः॥३०॥**
**तैजसात् तु विकुर्वाणादिन्द्रियाणि दशाभवन्। ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणश्च तैजसौ।**
**श्रोत्रंत्वग्घ्राणदृग्जिह्वा वाग्दोर्मेढ्राङ्घ्रिपायवः॥३१॥**
**य³दैतेऽसङ्गता भावा भूतेन्द्रियमनोगुणाः। यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम॥३२॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

विशेषः पृथ्वी। पृथिव्याश्च परान्वयाधिक्याद्गुणाधिक्यम्॥ २९॥ ❀ ❀ मनःशब्देनैव तदधिष्ठाता चन्द्रोऽपि द्रष्टव्यः। अन्ये च दश देवा वैकारिकाः सात्त्विकाहंकारकार्याः। तानाह। दिशश्च वातश्च अर्कश्च प्रचेताश्च अश्विनौ च एते पञ्च श्रोत्रत्वक् चक्षुर्जिह्वाघ्राणानामधिष्ठातारः। वह्निश्च इंद्रश्च उपेंद्रश्च मित्रश्च कश्च प्रजापतिः एते पंच वाक्पाणिपादपायूपस्थाना-

---

१. सिद्धत्वेन पाठः। २. प्रा. प्रा. य एते।

मधिष्ठातारः ॥ ३० ॥ ❀ ❀ यतो ज्ञानशक्तिर्बुद्धिः क्रियाशक्तिः प्राणश्च तैजसाहंकारकार्यौ अतो ज्ञानक्रियाविशेषरूपाणीन्द्रियाण्यपि तैजसाद्भवन्नित्यर्थः । तान्याह । श्रोत्रमिति । दोः पाणिः । मेढ्रमुपस्थः । क्रमस्त्वत्र न विवक्षितः ॥ ३१ ॥ ❀ ❀ एवं कारणसृष्टिमुक्त्वा कार्यसृष्टिमाह । यदा एते असंगता अमिलिता आसन् अत एव यदा आयतनस्य शरीरस्य निर्माणे न शेकुः ॥ ३२ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

विशेषेण शेषाः स्वगुणगंधेतराः सर्वे भूतगुणाः शब्दादयोपि यत्र सविशेषो विशिष्यते सर्वभूतगुणधारणेनोत्कर्षं प्राप्नोतीति वा विशेषः ॥ २९ ॥ ❀ ❀ वैकारिकात्सात्त्विकाहंकारात् ॥ ३० ॥ ❀ ❀ इत्यर्थ इति । अत्र तामसाहंकारकार्योप्यनिलः प्राणरूपेण तैजसाहंकारकार्योपि भवतीति भावः ॥ ३१ ॥ ❀ ❀ असंगता अमिलिताः ॥ ३२ ❀

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

[ वैकारिकान्मन इति । अस्य तात्पर्य्येण चन्द्रमा मनसो जात इत्येक ऋचोऽर्थो . दर्शितः ॥ ३० ॥ ❀ ❀ क्रमस्त्विति । क्रमस्तु श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि वाक्पाणिपादपायूपस्थाः ॥ ३१–३४ ॥

### श्रीमद्वीरराघवव्याख्या

अथ विकुर्वाणादंभसो गंधवान्परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितश्च विशेषः पृथिव्यभूत् ॥ २९ ॥ ❀ ❀ सर्वेषामिंद्रियाणां सात्त्विकाहंकारादुत्पत्तिमाह वैकारिकादिति । वैकारिकनाम्नः सात्त्विकाहंकाराद्दिगादयः श्रोत्राद्यधिष्ठानदेवताः ताभिरधिष्ठितानींद्रियाणि मनश्च जज्ञिरे इत्यर्थः । अग्निर्वाग्भूत्वेत्यादिवदधिष्ठात्रधिष्ठेययोरभेदोपचारात् सामानाधिकरण्याद्देवा वैकारिका इत्युक्तम् । देवता गणयति दिशश्च वातश्चाश्विनौ चैते पंच श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः वह्निश्चेंद्रश्चोपेंद्रश्च मित्रश्च कश्च प्रजापतिः एते पंच वाक्पाणिपादपायूपस्थानामधिष्ठातारः । मनसस्त्वधिष्ठाता चंद्रमाः । एभिर्दशभिरधिष्ठितानि श्रोत्रादीनि जातानीत्यभिप्रायः ॥ ३० ॥ ❀ ❀ तैजसाहंकारकार्यमाह तैजसादिति । तैजसात्तैजससंबंधिनः राजसाहंकारानुगृहीतात्सात्त्विकाहंकारादित्यर्थः । अन्यथा पूर्वग्रंथव्याघातात् । पूर्वग्रंथेऽभिमानिदेवतासृष्टिरिति चेन्न । इंद्रियैर्विना देवतादेहारंभायोगाच्चतुर्मुखसृष्टत्वेनात्र वक्ष्यमाणानामादित्येंद्रादीनामंडसृष्टेः प्राक् सृष्टययोगाच्च न चासृष्टानामेवाधिष्ठातृत्वमप्यनुपपन्नमिति वाच्यं परमाकाशस्थानां भगवत्संकल्पानुगृहीतानामधिष्ठातृत्वोपपत्तेः कोऽयं परमाकाश इति चेद्वैकुंठाख्यो लोकः अत एव वृतं चतुः षोडशपंचशक्तिभिरिति वक्ष्यते । नच परमाकाशस्थाभिरेवाधिष्ठानोपपत्तेश्चतुर्मुखकर्तृकादिगादिसृष्टिर्व्यर्थेति वाच्यम् व्यष्टींद्रियाधिष्ठानार्थं दिगादिसृष्टेरावश्यकत्वात् । अत परमाकाशे सत्येवैत्यवगंतव्यम् । अत एवैभिरधिष्ठातृभिः परमात्मानं प्रति क्रियमाणा स्तुतिरप्युपपद्यते अन्यथांडोत्पत्त्यनंतरं स्रक्ष्यमाणानामेषामंडोत्पत्तेः पूर्वमभावात्तत्कर्तृका स्तुतिरनुपपन्ना स्यात् । नन्वेषां सर्वेंद्रियाधिष्ठातृत्वे तदिंद्रियाणां केऽधिष्ठातार इति चेदुच्यते तदिंद्रियाणामपि दशानामधिष्ठातारः संत्येव । एकैकमिंद्रियं त्वधिष्ठातृशून्यमवतिष्ठते तत्र स्वपरनिर्वाहकत्वन्यायेन स्वेनैव वा परमात्मना वाऽधिष्ठीयते इति नानवस्थाप्रसंग इति । यद्वा तैजसात्त्विति पक्षांतरोक्तिः पक्षद्वयस्याविरोधमाह ज्ञानशक्तिरिति । प्राणशब्द इंद्रियपरं ज्ञानशक्तिः प्राणः ज्ञानेन्द्रियगणः क्रियाशक्तिश्च प्राणः कर्मेंद्रियगणः बुद्धिरन्तःकरणचतुष्टयं च तैजसौ राजसाहंकारान्वितसामग्रीप्रसूतज्ञानकर्मेन्द्रियाणामंतःकरणस्य च स्वकार्यप्रवृत्तिमत्वात्कारणेनापि रजोगुणान्वितेनापि भवितव्यमित्येतत्तात्पर्यकत्वात्तैजसत्त्वादस्य सर्वेन्द्रियाणां राजसाहंकारानुगृहीतसात्त्विकाहंकारकार्यत्वमेवेति न पक्षद्वयविरोध इत्यर्थः । एवंभूतादेरपीन्द्रियसृष्टावनुग्राहकस्तैजस इति वेदितव्यम् । इंद्रियाणि गणयति श्रोत्रमिति । दोः पाणिः मेढ्रमुपस्थः क्रमस्त्वत्र न विवक्षितः ॥ ३१ ॥ ❀ ❀ यदैते भूतानींद्रियाणि मनश्च तेषां गुणाः तन्मात्राणि विषयाः शब्दादय एते सर्वेऽसंहताः अमिलिताः आसन् । अतएव यदायतनस्य ब्रह्मांडस्य भगवच्छरीरस्य निर्माणे हे ब्रह्मवित्तम न शेकुर्नाशक्नुवन् ॥ ३२ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

सर्वे गुणाः पृथिव्यां विशिष्यंत इति । विशेषः पृथिवी गंधवतीति । गंधतन्मात्रागुणोत्पत्तिपूर्वकमित्यर्थः । परान्वयात्कारणसंसर्गात् ॥ २९ ॥ ❀ ❀ वैकारिकाहंकारात् सृष्टिप्रकारमाह वैकारिकादिति । वैकारिकाहंकारात्सात्त्विकांशान्मनोऽतःकरणं शब्दज्ञानादिविशिष्टकार्यशक्तित्वाद्वैकारिकनामानो देवाः ते अपि तस्माज्जज्ञिर इति शेषः । तदुक्तं विशिष्टकार्यशक्तित्वाद्देवा वैकारिकाः स्मृता इति । न्यूनाधिकसंख्याव्यवच्छेदार्थं दर्शति । तेषां नामसंकीर्तनं करोति दिग्वातेति । प्रचेता वरुणः अश्वी इत्यश्विनौ उपेंद्रो विष्णुस्तस्य न पादाभिमानित्वं किंतु पादाभिमानो यज्ञनाम्नो देवस्यांतर्यामित्वेन पादांगुष्ठमधिष्ठाय शरीरधारकत्वात्तन्नामकीर्तनं अनायनंतोऽपि हरिर्वैकारिकगुणष्वजः अवतीर्णः पदांगुष्ठमध्यास्ते विश्वभुग्विभुरित्यादेः । को दक्षप्रजापतिः ॥३०॥ ❀ ❀ तैजसाहंकारकार्याणि किमिति नोच्यत इति पक्कं भक्षयेति भावेनाह तैजसादिति । अत्रापि कालाद्यनुकर्षः कर्त्तव्यः । तेषां शक्तिवैषम्यात्कोडीकारेण विभागमाह ज्ञानशक्तिरिति । अचेतनानामिंद्रियाणां ज्ञानादिजनकत्वं कथं घटत इति तत्राह बुद्धिरिति । ज्ञानेंद्रियाणां ज्ञाने ज्ञानजनने

शक्तिर्यस्याः सा ज्ञानशक्तिः बुद्ध्यभिमानिन्युमा बुद्धिः। कर्मेंद्रियाणां क्रियायां क्रियाजनने शक्तिर्यस्य स क्रियाशक्तिः प्राणोऽहंकारिकश्च तैजसः तैजसाहंकारादुत्पन्नावित्यर्थः। ज्ञानेंद्रियाणां देवानां ज्ञानशक्तिरुदाहृतेत्यादावुदीर्यमाणदेवानां ज्ञानादिशक्तिरपि बुद्धिप्राणयोः प्रसादादित्यवगंतव्यम्। इंद्रियाणां तैजसाभिधानमतिजाज्वल्यमानत्वात् भूतानां तामसत्त्वं च ज्ञानक्रियाशक्त्योरभावात् तदुक्तं अतिजाज्वल्यमानत्वात्तैजसानींद्रियाण्यपीत्यादि भूतानां द्रव्यत्वं च प्रवणप्राप्यनिमित्तं अहं पूर्वमहंपूर्वमिति विवदमानयोरिव स्थितयोर्द्वयोः पृथिव्यपोर्वायुतेजसोर्वा वेगलक्षणसंस्कारसंपर्कान्मिथो द्रवणं युज्यते आकाशस्य व्याप्तत्वेन द्रवणाभावेऽपि प्रदेशात्मना तत्संभवात् द्रव्यत्वं युक्तं तदुक्तं द्रव्यं तु द्रवणप्राप्यं द्वयोर्विवदमानयोः पूर्ववेगादिसंबंधादाकाशश्च प्रदेशत इति॥ ३१॥ ❀ ❀ इंद्रियाणां विशेषनामान्याह श्रोत्रमिति। श्रोत्रं त्वक्त्वगिंद्रियं दोषौ हस्तौ। मेढ्रं गुह्येन्द्रियम्। बाह्यसृष्टिमुक्त्वा तेभ्यस्तत्त्वेभ्यो ब्रह्मांडसृष्टिप्रकारमाह य एते इति। य एते कथिता भूतेंद्रियमनोगुणा इत्युपलक्षणं पञ्चभूतदशेंद्रियतैजसबुद्धिप्राणमनःशब्दादिसत्त्वादिगुणमहदहंकारादयो भावाः पदार्थाः तेऽन्योन्यमसंगता असंश्लिष्टाः यदायतननिर्माणे ब्रह्मांडकरणे न शेकुः शक्तिमंतो नासन्॥ ३२॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

मनसश्च सात्त्विकत्त्वं चित्तात् नातिभिन्नावस्थायां ज्ञेयम्। चित्तन्तु यथा कापिलेये—स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतस इति। उपेन्द्रोऽयं तदावेशो देवताविशेषः तदेते इत्यादिना वक्ष्यमाणेन तस्यापि भगवदधीनशक्तित्वेनावगमात्॥ ३०॥ ❀ ❀ तैजसादिति सार्द्धकम् [ प्राणस्य तैजसत्वात् तदीयक्रियाशक्तिमतामिन्द्रियाणां तैजसत्त्वं तथाबुद्धेस्तैजसत्वात् तदीयज्ञानशक्तिमतामिन्द्रियाणां तैजसत्वमित्यर्थः। संशयोऽथ विपर्य्यासो निश्चयः स्मृतिरेव च। स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक्॥ इति तृतीयोक्तेः। ]॥ ३१॥ ❀ ❀ यदेति युग्मकम्। सदसत्त्वं मुख्यगौणत्वम्। भगवतः तत्त्ववर्गप्रविष्टभगवदंशप्रथमपुरुषस्य शक्त्या संहननकारिण्या चोदिताः प्रयोजिताः॥ ३२॥ ३३॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

विशेषः पृथिवी॥ २९॥ ❀ ❀ वैकारिकात् सात्त्विकाहङ्कारात्। मनःशब्देनैव तदधिष्ठाता चन्द्रोऽपि द्रष्टव्यः। देवानेवाह दिशश्च वातश्च अर्कश्च प्रचेता वरुणश्च अश्विनौ च एते पञ्च श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः। वह्निश्च इन्द्रश्च उपेन्द्रश्च मित्रश्च कः प्रजापतिश्च एते वाक्पाणिपादपायूपस्थानाम्॥ ३०॥ ❀ ❀ तैजसात् राजसाहङ्कारात् दशाभवन्। तत्र पञ्च ज्ञानशक्तिर्बुद्धिः। पञ्च क्रियाशक्तिः प्राणः। बुद्धिप्राणौ तु तैजसौ। अतः पञ्च श्रोत्रादयो बुद्धिविशेषाः पञ्च वागादयः प्राणविशेषा इत्यर्थः। तत्र तामसाहङ्कारकार्य्योऽनिल एव प्राणरूपेण तैजसाहङ्कारकार्य्योपि भवतीति ज्ञेयम्। दोः पाणिः। मेढ्र उपस्थः। पायुर्गुदम्। क्रमस्त्वत्र न विवक्षितः॥ ३१॥ ❀ ❀ एवं कारणसृष्टिमुक्त्वा कार्य्यसृष्टिमाह। यदा एते असङ्गता अमिलिता आसन् अतएव यदा आयतनस्य शरीरस्य निर्म्माणे न शेकुः॥ ३२॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

स्वतो गंधवान्परान्वयाद्रसाद्यन्वितो विशेषः पृथिव्यभवत्॥ २९॥ ❀ ❀ मनोंऽतःकरणचतुष्टयम्। देवाः दिगादयः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानां वह्न्यादयो वाक्पाणिपादपायूपस्थानामधिष्ठातारः वैकारिकाः सात्त्विकाहंकारादुत्पन्नाः॥३०॥ ❀ ❀ ज्ञानशक्तिः बुद्धिः ज्ञानेंद्रियवर्गः क्रियाशक्तिः प्राणः कर्मेंद्रियगणः तौ बुद्धिप्राणौ तैजसौ एतदेव विवृणोति तैजसात्तु विकुर्वाणादिंद्रियाणि दशाभवन्निति। श्रोत्रत्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्रांघ्रिपायव इति च॥ ३१॥ ❀ ❀ ब्रह्मांडोपादानभूतमहदाद्युत्पत्तिमुक्त्वाथ ब्रह्मांडोत्पत्तिमाह यदेति द्वाभ्याम्। हे ब्रह्मवित्तम, भूतानि आकाशादिमहाभूतानि उभयेंद्रियाणि च मनश्च गुणाः तन्मात्ररूपाः एते भावाः पदार्थाः यदा असंहताः असंयुता आसन्। अतएव यदा आयतनस्य ब्रह्मांडस्य निर्माणे न शेकुः॥ ३२॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

अम्भसो विकुर्वाणाद्विशेषस्त्वभूत्। विशेषः पृथिवी। तुशब्देन सर्ववैलक्षण्यमस्याः। गन्धवानिति। गन्धो मुख्यो गुणः। परान्वयादन्येऽपि चत्वारः॥ २९॥ ❀ ❀ एवं तामसाहङ्कारसृष्टिमुक्त्वा सात्त्विकाहङ्कारसृष्टिमाह—वैकारिकादिति। सत्त्वलक्षणो गुणः सद्रूपस्य प्रथमविकारभूत इति तस्य वैकारिकसंज्ञा। वैकारिकात्सात्त्विकाहङ्कारान्मनः दश[1] इन्द्रियाधिष्ठातारो देवाश्च जाताः। अस्मिन् सिद्धान्ते मनसो देवता ना पेक्ष्यते[2]। आत्मनैकत्वादात्मैव देवता। ते देवा दिगादयः अग्रे श्रोत्रादीनीन्द्रियाणि वक्ष्यति। तेषामेते क्रमेण देवाः आश्विशब्देनाऽश्विनीकुमारौ। मि त्रश्च कश्च[3]॥ ३०॥ ❀ ❀ राजसाहङ्कारकार्यमाह—

१. दशेन्द्रियेति ख. २. नापेक्षिता इति घ. ३. मित्रः कश्चेति ख. मित्रकश्चेति क. घ. ङ.।

तैजसादिति। इन्द्रियाणि इन्द्र आत्मा ईयते अनेनेतीन्द्रियम् आत्मा हि न चाक्षुषः। नाऽप्यन्येन्द्रियग्राह्यः। व्यवह्रियते च देवदत्तस्त्वं यज्ञदत्तस्त्वमिति। स च पश्यति शृणोतीत्येव प्रतीयते। तानीन्द्रियाणि दश। ननु ज्ञानेन्द्रियाणि ज्ञानप्राधान्यात्सात्त्विकानि भवितुमर्हन्ति। कर्मेन्द्रियाणि च जडपर्यवसानात्तामसानि भवितुमर्हन्ति। तत्कथमुभयं परित्यज्य दशाऽपीन्द्रियाणि राजसानीत्युच्यन्त इत्यत आह—ज्ञानशक्तिरिति। अत्रेन्द्रियाणां राजसत्वे निमित्तमन्यदस्ति। बुद्धिः प्राणश्च राजसाहङ्कारकार्यौ। नन्वेतदप्यसङ्गतम्। बुद्धिर्ज्ञानरूपा "सत्त्वात्सञ्जायते ज्ञानमि" ति सात्त्विकी भवितुमर्हति। प्राणश्च वायुरेव। श्वासोच्छ्वासाभ्यां वायुत्वप्रतीतेः। तत्राऽऽह—ज्ञानशक्तिः क्रियाशक्तिरिति। न ह्यस्मिन्मते बुद्धिर्ज्ञानं किन्तु ज्ञानशक्तिः। ज्ञानजनिका शक्तिर्यस्येति। यो बुद्धिमांस्तस्य पदार्थज्ञानं भवतीति, सुबुद्धिरयं पदार्थान् जानातीति च ज्ञानकारणत्वेन बुद्धिर्व्यपदिश्यते। कार्यकारणयोरभेदोपचाराच्च बुद्धिज्ञानयोः पर्यायत्वव्यवहारः। अन्यथा बुद्ध्यभावे बालस्य न पदार्थज्ञानं भवति सम्यक्। तन्न स्यात्। प्राणोऽपि वायोर्भिन्न एव। "अथ हैनमासन्यं प्राणमूचुरि" ति प्राणरूपां देवतां विलक्षणामाह श्रुतिः। "यो वायुः स प्राण" इति तु भगवत्प्राणस्य वायुत्वात्तत्परम्। तस्माज्ज्ञानजननसामर्थ्यवत्त्वाज्ज्ञानाद्बुद्धिर्भिन्ना। नच सा सात्त्विकी इन्द्रिय[1]मात्रासाध्यत्वात्। सा हि बुद्धिर्ज्ञानेन्द्रियोपष्टम्भकत्वेन मृग्यते। यत्सात्त्विकमद्रव्यं तदिन्द्रियसाध्यमिति व्याप्तेः। अतो ज्ञानजनने शक्तिर्यस्य क्रियाजननेशक्तिर्यस्येति च तयोर्भिन्नधर्मत्वात्तावुभौ राजसाहङ्कारकार्यौ। अतस्ताभ्यां परिगृहीतानि द्विविधान्यपीन्द्रियाणि राजसाहङ्कारकार्याण्येव। तुशब्दः पूर्वपक्षं व्यावर्त्तयति। तानीन्द्रियाणि गणयति-श्रोत्रमिति। मेण्ढ्राङ्घ्र्योः कोपेन्द्रौ देवते। मित्रश्च पायोः। अन्ये तु क्रमेणैव। तत्र दिग्वातौ श्रोत्रत्वचोः घ्राण[2]दृशोर्वैपरीत्यम्। इन्द्रो बाह्वोः। वह्निर्वाचः। अश्विनौ नासिकयोः। प्रचेता जिह्वायाः। अर्को दृशोः। एवं क्रमः॥ ३१॥ ❀ ❀ एवं सर्वेषां सृष्टिमुक्त्वा त[3]दधिष्ठानत्वं वदन् सत्त्वानां कार्यसृष्टिमाह—यदैव इति। यदा एते असंहताः गुणत्रयकार्यत्वात्। न हि तामसादयो भिन्नस्वभावा एकत्र मिलन्ति। अत एव यदा आयतननि[4]र्माणे न शेकुः न समर्था जातास्तदा भगवत्प्रेरिता अण्डं ससृजुरिति सम्बन्धः। भूतानि, इन्द्रियाणि, मनो गुणाश्च। गुणा देवाः शब्दादयो वा। तामसानामाद्यन्तनिवेशनं भूयस्त्वाय। आयतनं भगवच्छरीरं ब्रह्माण्डम्। ब्रह्मवित्तमेत्यस्मिन्नर्थे सर्वज्ञत्वात्संवादार्थं सम्बोधनम्। तमप्प्रत्ययस्तु भगवदुत्कर्षज्ञानार्थम्॥ ३२॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः।

तैजसादित्यत्र ईयत इति अनुमीयते। कथं अनुमीयत इत्याकाङ्क्षायां तदृव्युत्पादयन्ति आत्मा हीत्यादि। तथाच, देवदत्तदेह आत्मवान्, इन्द्रियवत्त्वाद् इन्द्रियवान्, तत्तदिन्द्रियकार्यकारित्वात्, यदेवं तदेवं मद्देहवत्, यन्नैवं तन्नैवं मृतकवद्, इत्यनुमानात्तथेत्यर्थः। जडपर्यवसानादिति वाय्वादौ जडेपि क्रियादर्शनात् कर्मेन्द्रियजन्यक्रियाया अपि जडे तामसे पर्यवसानात्। अन्यदिति बुद्धिप्राणाधीनत्वम्। तद्व्युत्पादयितुमाहुः बुद्धिरित्यादि। अत्राशङ्कते नन्वित्यादि। तथा च, बुद्धिः सात्त्विकी ज्ञानरूपत्वात्, यन्नैवं तन्नैवं क्रियादिवत्, प्राणस्तामसो वायुत्वात्, बहिर्वायुवत्, इत्यनुमानाभ्यां तयोस्तथात्वसिद्धे राजसत्वमसङ्गतमित्यर्थः। अत्र समादधते न हीत्यादि। ज्ञानजनिका शक्तिर्यस्येति ज्ञाने शक्तिर्यस्येति व्यधिकरणपदे बहुव्रीहौ ज्ञानपदगतायाः सप्तम्या अर्थो वैषयिकाधारता। सा च जनने पर्यवस्यतीति तथेत्यर्थः। बुद्धेः कथं ज्ञानजनकत्वमित्यपेक्षायां तद्व्युत्पादयन्ति य इत्यादि। अभेदे बाधकमाहुः अन्यथेत्यादि। बुद्धेर्ज्ञानकारणत्वाभावे कारणान्तरसमवधानस्य विद्यमानत्वात्तु बुद्धेरिव तस्यापि ज्ञानं स्यात्, तच्च न जायत इत्यन्वयव्यतिरेकाभ्यां कार्यकारणभावनिश्चिते ज्ञानबुद्ध्योर्भेदो निर्बाध इत्यर्थः। ननु वायुप्राणयोः स्वरूपतौल्ये कार्यादिभेदो न स्वरूपभेदापादकः इत्याशङ्कायां तस्य भिन्नत्वे प्रमाणमाहुः अथेत्यादि। विलक्षणामिति, अपहतपाप्मत्वेन वायुदेवतातो विलक्षणाम्। श्रुत्यन्तर्विरोधं परिहरन्ति य इत्यादि। तथा चात्राप्यनूद्यो वायुः न भूतरूप इति न तस्या अपि विरोध इति सिद्धे आसन्यस्य वायुभेदे कार्यभेदेन प्राणान्तरस्यापि वायुभेदो निर्बाध इत्यर्थः। सिद्धमाहुः तस्मादित्यादि। बुद्धिर्न सात्त्विकी ज्ञानभिन्नत्वात्, क्रियादिवत्। प्राणो न तामसः वायुभिन्नत्वेन श्रुतिसिद्धत्वात्। वायुभिन्नो भिन्नकार्यकत्वात्, यन्नैवं तन्नैवं वायुवदिति प्रतिसाधनाभ्यां बुद्धिप्राणयोस्तथात्वस्य निरासे समानाकारत्वस्याप्रयोजकत्वात्तथेत्यर्थः। नन्वस्तु ज्ञानबुद्ध्योर्भेदस्तथापि ज्ञानेन्द्रियजन्यत्वात्तस्याः सात्त्विकत्वे किं बाधकमित्याकाङ्क्षायामाहुः, न चेत्यादि। तथा च, सात्त्विकी ज्ञानेन्द्रियजन्यत्वाज्ज्ञानवदिति। अत्रापि न सात्त्विकी ज्ञानेन्द्रियमात्रसाध्यत्वात्, यन्नैवं तन्नैवं ज्ञानवदिति, प्रत्यनुमानमेव बाधकमित्यर्थः। तदुपपादयन्ति सा हीत्यादि। तथा च, यदि ज्ञानेन्द्रियमात्रसाध्या स्यात् ज्ञानेन्द्रियोपष्टम्भकत्वेन मृग्या न स्याद् इति तर्केण तथा निश्चीयत इत्यर्थः। तर्के मूलशैथिल्यं परिहर्तुं व्याप्तिं प्रदर्शयन्ति यदित्यादि। अतो ज्ञानक्रिययोरेवेन्द्रियमात्रसाध्यत्वे, नेतरस्य, न शब्दादीनामद्रव्याणाम्–इन्द्रियसाध्यत्वाभावाद् व्यभिचारः शङ्क्यः। तेषां द्रव्यसूक्ष्मावस्थारूपत्वेन तद्विशेषाणामपि द्रव्यान्तःपातित्वेनादोषात्। अतः सा क्वचिदौत्पत्तिकी क्वचिच्चाभ्याससूक्ष्मेक्षिकादिजन्या, न तु

---

१. इन्द्रियमात्रत्वासाध्यत्वादिति घ.। इन्द्रियमात्रसाध्यत्वादिति ग. २. प्राणदृशोरिति ग. घ्राणदृश्योरिति घ.। ३. यदाधिष्ठानत्वमिति क. ग. घ.। ४. निर्माणैरिति घ.।

ज्ञानेन्द्रियमात्रसाध्येत्यर्थः। अत इति उक्तानुमानेभ्यः। ननु कैश्चिदाकाशादिपञ्चसात्विकांशेभ्यो बुद्ध्युत्पत्तिरिष्यते, तथा सति कथं न सात्विकत्वमत आहुः तुरित्यादि। तथा च, तद्यदि प्रामाणिकं तदा कल्पान्तराभिप्रायमित्यर्थः॥ ३२॥

### श्रीगिरिधरकृता बालप्रबोधिनी

अम्भसस्तु विक्रियमाणात् गन्धतन्मात्रद्वारा गन्धवान् परान्वयाच्च रसस्पर्शशब्दरूपगुणान्वितो विशेषः पृथिव्यभूदित्यन्वयः॥ २९॥ ❀ ❀ एवं तामसाहङ्कारकार्यमाह—वैकारिकादिति। वैकारिकात् सात्त्विकाहङ्कारान्मनो जज्ञे। मनश्शब्देनैव तदधिष्ठाता चन्द्रोऽपि ज्ञेयः। अन्ये च दशेन्द्रियाधिष्ठातारो दश देवा वैकारिकाः सात्त्विकाहङ्काराज्जाता इत्यर्थः। के ते इत्यपेक्षायां तान्दर्शयति—दिशश्च वातश्च अर्कश्च प्रचेता वरुणश्च अश्विनौ च एते पञ्च श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः, वह्निश्च इन्द्रश्च उपेन्द्रश्च मित्रश्च कश्च प्रजापतिश्च एते पञ्च वाक्पाणिपादपायूपस्थानामधिष्ठातारः॥ ३०॥ ❀ ❀ राजसाहङ्कारकार्यमाह—तैजसादिति। विक्रियमाणात्तु तैजसाद्राजसाहङ्कारात् ज्ञानकर्मजनकानि दशेन्द्रियाण्यभवन्। ननु ज्ञानेन्द्रियाणि ज्ञानप्राधान्यात् 'सत्त्वात् सञ्जायते ज्ञानम्' इति वाक्यात् सात्त्विकानि भवितुमर्हन्ति, कर्मेन्द्रियाणि च जडपर्यवसानात्तामसानि भवितुमर्हन्ति, तत्कथमुभयं परित्यज्य दशापीन्द्रियाणि राजसादभवन्नित्युच्यते इत्याशङ्क्य तत्र हेतुमाह—ज्ञानशक्तिरिति। ज्ञाने शक्तिर्यस्याः सा ज्ञानशक्तिर्बुद्धिः क्रियायां गमनादानादौ तत्तत्कर्मणि शक्तिर्यस्य स क्रियाशक्तिः प्राणश्च यतस्तैजसौ राजसाहङ्कारकार्यौ अतस्तदधीनप्रवृत्तिमन्तीन्द्रियाणि उभयविधान्यपि राजसाहङ्कारकार्याणीत्यर्थः। तानि दर्शयति—श्रोत्रमिति। दोः पाणिः। मेढ्रमुपस्थः। क्रमस्त्वत्र न विवक्षितः॥ ३१॥ ❀ ❀ उक्तविश्वासार्थमादरेण सम्बोधयति—हे ब्रह्मवित्तमेति। यदैते भूतानीन्द्रियाणिमनश्च गुणागुणकार्यरूपा भावाः पदार्थाः तत्कारणगुणभेदेन पृथग्विरुद्धस्वभावत्वादसङ्गतां अमिलिता आसन्, अतएव च यदा आयतनस्य ब्रह्माण्डाख्यस्य भोगायतनस्य समष्टिव्यष्ट्यात्मकस्य शरीरस्य निर्माणे रचनाया न शेकुः समर्था न जाताः॥ ३२॥

### हिन्दी अनुवाद

जलके विकारसे पृथ्वीकी उत्पत्ति हुई, इसका गुण है गन्ध। कारणके गुण कार्यमें आते हैं—इस न्यायसे शब्द, स्पर्श रूप और रस–ये चारों गुण भी इसमें विद्यमान हैं॥ २९॥ ❀ ❀ वैकारिक अहंकारसे मनकी और इन्द्रियोंके दस अधिष्ठातृ-देवताओंकी भी उत्पत्ति हुई। उनके नाम हैं—दिशा, वायु, सूर्य, वरुण, अश्विनीकुमार, अग्नि, इन्द्र, विष्णु, मित्र और प्रजापति॥ ३०॥ ❀ ❀ तैजस अहंकारके विकारसे श्रोत्र, त्वचा, नेत्र, जिह्वा ओर नासिका—ये पाँच ज्ञानेन्द्रियाँ एवं वाक्, हस्त, पाद, गुदा और जननेन्द्रिय–ये पाँच कर्मेन्द्रियाँ उत्पन्न हुईं। साथ ही ज्ञानशक्तिरूप बुद्धि और क्रियाशक्तिरूप प्राण भी तैजस अहंकारसे ही उत्पन्न हुए॥ ३१॥ ❀ ❀ श्रेष्ठ ब्रह्मवित्! जिस समय ये पञ्चभूत, इन्द्रिय, मन और सत्व आदि तीनों गुण परस्पर संगठित नहीं थे, तब अपने रहनेके लिये भोगोंके साधनरूप शरीरकी रचना नहीं कर सके॥ ३२॥

**तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः। सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः॥३३॥**
**वर्षपूगसहस्रान्ते तदण्डमुदकेशयम्। कालकर्मस्वभावस्थो जीवोऽजीवमजीवयत्॥३४॥**
**स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः। सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवान्॥ ३५॥**
**यस्येहावयवैर्लोकान् कल्पयन्ति मनीषिणः। कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः॥ ३६॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तदा सदसत्त्वं प्रधानगुणभावमुपादाय स्वीकृत्य उभयं समष्टिव्यष्ट्यात्मकं शरीरम्॥ ३३॥ ❀ ❀ कालकर्मस्वभावानाधिष्ठाय स्थितो जीवयतीति जीवः परमात्माऽजीवमचेतनमजीवयच्चेतयति स्म॥ ३४॥ ❀ ❀ निर्भिद्य पृथक्कृत्य स्थित इत्यर्थः॥ ३५॥ ❀ ❀ तदवयवैर्लोकरचनामाह। यस्येति। कटिरित्यूरुमूलयोः पश्चाद्भागः जघनं तु पुरोभागः अधः सप्तलोकानतलादीन्। ऊर्ध्वं भूरादीन्सप्त॥ ३६॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

सदसत्त्वं मुख्यगौणत्वं शरीरं ब्रह्मांडाख्यं समष्टिः प्रतिजीवं व्यष्टिः भगवतस्तत्त्ववर्गप्रविष्टभगवदंशप्रथमपुरुषस्य शक्त्या संहननकारिण्या चोदिताः यद्वा न्यूनाधिकभावमादाय अर्द्धमर्द्धमाकाशादेरात्मीयभागोऽर्द्धेर्द्धे त्वन्यभूतचतुष्टयाष्टमाष्टमभागमादायेति पञ्चीकरणं सूचितम्॥ ३३॥ ❀ वर्षपूगैर्वर्षसमूहैर्यत्सहस्रं तदंते सहस्रवर्षांते इत्यर्थः। जीवो हिरण्यगर्भांतर्यामी पुरुषः जीवयतीति व्युत्पत्तेः। अजीवमनभिव्यक्तजीवत्वादचेतनं तदंडम्॥ ३४॥ ❀ ❀ स एव हिरण्यगर्भांतर्यामी पुरुषस्तस्मादिति ल्यब्लोपे पञ्चमी। तं हिरण्यगर्भं प्रविश्य स्थितोप्यंडं निर्भिद्य निर्गतस्तद्बहिः स्थित इति भावः। इत्यर्थ

इति । कीदृशः सन्नित्यपेक्षायां कारणार्णवस्थं तस्य स्वीयस्वरूपमाह । सहस्रेति । 'सहस्रशीर्षा' इति श्रुत्यंतरात् ॥ ३५ ॥ इह ब्रह्मांडाभ्यंतरे यस्य गुणमयरूपस्यावयवैर्लोकान्कल्पयंति स लोकमयः पुमान् विराट् पुरुष इति षट्श्लोकस्थेनान्वयः । कटिरिति ऊरुमूलयोः पश्चाद्भागो जघनं पुरोभागः ॥ ३६ ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

सहस्रोर्वङ्घ्रिबाह्वक्ष इति अनेन सहस्रशीर्षेत्यर्द्धर्चस्यार्थ उक्तः ॥ ३५ ॥ ३६ ॥

## श्रीमद्वीरराघवव्याख्या

तदा भगवच्छक्त्या चोदिताः प्रेरिताः संहत्य पंचीकरणोक्तप्रकारेण परस्परं मिलित्वा सदसत्त्वं तत्त्वं पंचीकरणेन स्थूलत्वं असत्त्वं सूक्ष्मत्वम् नोभयमनुभयं पूर्वोक्तकालकर्मस्वभावांश्च उपादायाऽदः ब्रह्माण्डं ससृजे । यद्वा अनुभयमित्यदःशब्दनिर्दिष्ट-ब्रह्माण्डविशेषणं अनुभयं कार्यकारणभावानन्वितमंडं ब्रह्मांडं ससृजुरित्यर्थः । कार्यमप्यंडं ह्याकाशकार्यवायुवन्न तत्त्वांतरं न च तत्त्वांतरारंभकमतस्तत्त्वांतरतया कार्यतत्त्वांतरापेक्षया कारणं च न भवतीत्यनुभयं ब्रह्मांडमुक्तं चतुर्मुखोत्पत्त्यादिकमन्यत्र विस्तरेण वक्ष्यमाणमत्राप्यर्थसिद्धमनुसंधेयम् ॥ ३३ ॥ ❀ ❀ वर्षपूगसहस्रांते प्रलयकालावसाने इत्यर्थः । अन्यथा न क्रमेण विवृद्धं तज्जलं बुद्बुदवत्सममिति विरोधात् । जीवः देवाद्यपेक्षया समष्टिपुरुषब्रह्माख्यजीवशरीरकः परमपुरुषः कालकर्मस्वभावाश्रितः सन् तं जीवमचेतनमुदकेशयमंडं ब्रह्माण्डमजीवयच्चेतयति स्म । अत्रोदके शयमित्यनेनांडसृष्टेः पूर्वं गर्भोदकसंज्ञिका सृष्टिरर्थसिद्धाऽनुसंधेया परोक्षनिर्देशश्चतुर्मुखांतरसाम्याभिप्रायः ॥ ३४ ॥ ❀ ❀ स एव पुरुषश्चतुर्मुखस्वरूपेणोपस्थितः परमपुरुषः अंडं निर्भिद्य तस्मान्निर्गतः अंडभेदेनावकाशलाभादनुपरुद्धसंचारादिमानभूदित्यर्थः । चतुर्मुखस्य भगवदात्मकत्वे सामानाधिकरण्येनाह सहस्रेति । यश्चतुर्मुखशरीरकत्वेनावस्थितः स एव सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखं । सर्वतः श्रुतिमल्लोक इत्यादिनोक्तः सर्वतः पाणिपादादिकार्यकर्ता परमपुरुष इत्यर्थः ॥ ३५ ॥ ❀ ❀ यस्य सर्वतः पाणिपादादिकार्य-कर्तुर्वैराजपुरुषस्यावयवैः पादतलाद्यवयवैर्लोकानतलादीन्मनीषिण उपासकाः कल्पयंति लोकान् । यदवयवत्वेन रचयंतीत्यर्थः । तत्तदवयवप्रभवानां तत्तदवयवत्वेनोपासनं युक्तं तदवयवैर्लोकरचनामाह कट्यादिभिरिति । कटिरूरुमूलयोः पश्चाद्भागः जघनं-पुरोभागः अधः सप्तलोकानतलादीनूर्ध्वं भूरादीन्सप्त कल्पयंतीत्यन्वयः ॥ ३६ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

तदा भगवन्तमभिष्टूय शरणंगताः ततः स्तुतिप्रसन्नस्य तस्य चेष्टकरूपेण तं गणं प्रविष्टस्य हरेः शक्त्या चोदिता मिथः संहत्य संश्लिष्य सदसत्त्वं व्यक्ताव्यक्तत्वधर्मवत्पृथिव्यादिभूतत्रयमाकाशवाय्वाख्यभूतद्वयं चोपादाय उपादानीकृत्य नोऽस्माकं संसारभयजनकमदो ब्रह्मांडं ससृजुरित्यन्वयः । नोभयं सदसद्विलक्षणमित्येतदयुक्तं यतः सत्यत्वं प्रत्यक्षादिप्रमाणसिद्धमत इति । हेतुवाचिनो हिशब्दाद्ब्रह्मांडे संसारे नोभयकारणमिति भयहेतुत्वं वा प्रतीयते तदुक्तं ब्रह्मांडं हि वदंतीति जीवानां भयकारणं तत्राह संसृतिरिति । आकाशवायू त्वव्यक्तौ इतरेऽप्रकाशिता इत्यादेर्भूतानां सदसत्त्वं युक्तम् ॥ ३३ ॥ ❀ ❀ ब्रह्मांडांतः सृष्टिं वक्तुं हरेस्तत्र व्यक्तिप्रकारमाह वर्षपूगेति । कालाद्युद्बोधकत्वेन कालकर्मस्वभावस्थो जीवः संसारव्यतिरिक्तः परमेश्वरः सहस्रवत्सरमुदके शयमावरणजलमध्यस्थितं तदंडं वर्षपूगसहस्रांते तैस्तत्त्वैः सह प्रविश्य तदंडं यदा स्वात्मानं प्रसूत तदा परि-वृत्त्य जीवं स्वात्मानं तत्राजीजनत् व्यंजयामास । यः प्राणधारणे प्राणप्रसादात्कुरुतेऽनिशं स जीव इति संदिष्ट इत्यादरजीव इत्येव पदच्छेदः कालकर्मस्वभावस्थो वासुदेवः परः पुमान् अकरोदंडमुद्बुद्धमात्मप्रसवकारणमिति वचनात् । अजीवमित्येव यद्वा जीवः प्राणधारकः परमात्मा जीवं तथाविधार्थं स्वात्मानं तत्राजीजनदिति । प्राणान् धारयते यस्मात्स जीवः परमेश्वर इति च जीवादत्युद्रिक्ततेजस्त्वादजीवो जगज्जीवहेतुत्वाज्जीव इति हेतुद्वयादिदं युक्तञ्च अजीवोऽपि महातेजास्त्वथवा जीवयज्जगदिति-वचनात् । यद्वा अजीवः परमेश्वरो जीवं सर्वजीवप्रधानं चतुर्मुखमुत्पाद्य तदंतर्यामित्वेन प्राणधारकं स्वात्मानमजीजनत् । विरिंच-स्यापि विराडाख्यांडांतर्वर्त्तिरूपजननस्यात्राभिप्रेतत्वात् तदुक्तम् । अंडे जातौ पुमांसौ द्वौ हरिर्ब्रह्म तथैवचेत्यादि ॥ ३४ ॥ ❀ ❀ तामेवाभिव्यक्तिं स्फुटीकरोति स एष इति । अयमर्थः यो महदादितत्त्वानि सृष्ट्वा तदंतर्विष्टस्तदुपादानतयांडं निर्माय तदन्तः प्राविशत्स एष पुरुषः करचरणाद्यवयवत्वेन पुरुषनामा हरिरंडं निर्भिद्य बृंहयित्वा तस्मादंडान्निर्गतः प्रकाशितोऽभूत्पुरुषत्वेऽपि लोकविलक्षणोऽयमिति भावेन विशिनष्टि सहस्रेति । अत्र सहस्रशब्दस्य यथासंभवमर्थो वक्तव्यः ॥ ३५ ॥ ❀ ❀ पुरुषाख्यविष्णोरवयवेभ्य एव चतुर्दशभुवनसृष्टिरन्येभ्यस्त्वमुख्येति भावेनाह यस्येति । इह पंचाशत्कोटिविस्तीर्णब्रह्मांडे आयामतो विस्तारतस्तावद्विपुलानन्दादिदेहत्वेनावतीर्णस्य चतुर्दशभुवनेभ्योऽप्यभिन्नस्य पुरुषाख्यस्य हरेरवयवैर्निमित्त-कारणैर्मनीषिणश्चतुर्दशलोकान् सृष्टान् कल्पयंतीति । यत् यस्मात्तस्मात्तत्सृष्टेर्ज्ञानिप्रत्यक्षसिद्धत्वात् अन्यतः सृष्टिमुख्येति भावः । हरेरवयवैः सृष्टा लोका इति विकल्पनमित्यादेश्च तत्सृष्टिकल्पनाप्रकारमाह ऊर्वादिभिरिति । ऊर्वादिभिः पादतलांतैरवयवैरतलादि-पातालांताः सप्त लोका निर्मिताः जघनादिभिर्मूर्धांतैरवयवैरूर्ध्वं पृथिव्यादिसत्यांताः सप्त लोका सृष्टा इति ॥ ३६ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

ततश्च वर्षेति । अजीवमनभिव्यक्तजीवत्वादचेतनं तदण्डम् । यः पूर्वं सृष्टिकार्ये कालकर्मस्वभाव निवोपायीकृत्य स्थितः पुरुष स एव जीवो जीवनहेतुः स्वांशेन तत् प्रविश्य जीवसमष्ट्यभिव्यञ्जकः सन् अजीवयत् ॥ ३४ ॥ ❀ ❀ स तत्तत् कर्त्तैव पुरुषः । अण्डं निर्भिद्य तस्मान्निर्गत इति । तदन्तर्बहिर्व्याप्य स्थित इत्यर्थः । तस्य स्वीयं रूपमाह सहस्रेति । पुरुषेण नारायणेनाभिष्टौति सहस्रशीर्षा पुरुष इति श्रुत्यन्तरात् ॥ ३५ ॥ ❀ ❀ कल्पितं रूपमाह यस्येति ॥ ३६ ॥ ३७ ॥ ३८ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

तदा भगवतः तेष्वेव प्रविष्टस्य शक्त्या संहननकारिण्या चोदिताः योजिताः सन्तः सदसत्त्वं मुख्यगौणभावम् उपादाय स्वीकृत्य उभयं समष्टिव्यष्ट्यात्मकम् अदः अण्डरूपं शरीरं ससृजुः ॥ ३३ ❀ ❀ वर्षपूगैर्वर्षसमूहैर्यैत् सहस्रे तदन्ते सहस्रवर्षान्ते इत्यर्थः । जीवो हिरण्यगर्भान्तर्यामी पुरुषः जीवयतीति व्युत्पत्तेः । यस्यात्मा शरीरमिति श्रुतेः । अजीवमचेतनमण्डमजीवयत् चेतयति स्मेति परमेश्वरस्यान्वय उक्तः ॥ ३४ ॥ ❀ ❀ सर्वव्यापकत्वादव्यतिरेकमाह । स एव हिरण्यगर्भान्तर्यामी पुरुषः तस्मादिति ल्यब्लोपे पञ्चमी । तं हिरण्यगर्भं प्रविश्य स्थितोऽपि अण्डं निर्भिद्य निर्गतः तद्बहिःस्थितः । कीदृशः सन्नित्यपेक्षायां कारणार्णवस्थं तस्य स्वीयं निर्गुणं स्वरूपमाह सहस्रेति ॥ ३५ ॥ ❀ ❀ इह ब्रह्माण्डाभ्यन्तरे यस्य गुणमयरूपस्यावयवैर्लोकान् कल्पयन्ति स लोकमयः पुमान् विराट्पुरुषः इति षष्ठश्लोकस्थेनान्वयः । कटिरिति ऊरुमूलयोः पश्चाद्भागः । जघनं पुरोभागः । अधः सप्त लोकान् अतलादीन् । ऊर्ध्वं भूरादीन् ॥ ३६ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

तदा भगवच्छक्त्या चोदितः प्रेरितः संहत्य पंचीकरणप्रकारेण मिलित्वा सदसत्त्वं स्थूलसूक्ष्मभावमुपादाय अत एवोभयं स्थूलसूक्ष्मरूपम् अदः आयतनम् ब्रह्मांडं ससृजुः ॥ ३३ ॥ ❀ ❀ जीवयतीति जीवः परमात्मा कालादीनधिष्ठाय स्थितः अजीवमचेतनम् अजीवयच्चेतयति स्म ॥ ३४ ॥ ❀ ❀ स एव ब्रह्मांडचेतयिता पुरुषः अंडं निर्भिद्य तस्मान्निर्गतः पृथक्स्थितः अप्राकृतं तच्छरीरं दर्शयति सहस्रोर्वंघ्रिबाह्वक्षः सहस्राननशीर्षवानिति । तथा च श्रुतिः "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादि"ति ॥ ३५ ॥ ❀ ❀ यस्य भगवतः अवयवैः विराट्शरीरावयवैः मनीषिणो बुद्धिमन्तः लोकान् कल्पयंति तदेवाह कट्यादिभिरिति । कटिरूरुमूलयोः पश्चाद्भागःजघनं पुरोभागः कट्यादिभिरधः सप्त लोकानतलादीन् जघनादिभिरूर्ध्वं सप्त लोकान् भूरादीन् ॥ ३६ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

अन्योन्यं संहत्य मिलित्वा । चकाराद्गुणभावमप्याश्रित्य । भगवच्छक्तिराज्ञाशक्तिः तया चोदिताः प्रेरिताः । सदसत्त्वं उच्चनीचत्वं कार्यकारणभावं वा । सद् ब्रह्म । असज्जगत् । प्रकाशाऽप्रकाशभावं वा चकारादन्यान् जीवगणांश्च । तदुद्दिष्टानि वा तत्संस्कृतभूतानि वा । उभयं समष्टिव्यष्ट्यात्मकम् । स्थूललिङ्गशरीरे वा । अदः तत् प्रसिद्धम् । हि युक्तोऽयमर्थः । अस्मिन्नर्थे तृतीयस्कन्धे उपपत्तिर्वक्ष्यते ॥ ३३ ॥ ❀ ❀ तैरण्डं सृष्टम् । तस्य भगवदायतनत्वार्थं भगवानागत इति वक्तव्यम् । तत्कस्य हेतोरित्याकाङ्क्षायामाह—वर्षपूगसहस्रान्त इति । वर्षपूगानां सहस्रम् । पञ्चविधा अपि वर्षाः सहस्रं जाताः तेषामन्ते सहस्रवर्षपर्यन्तमुदक एव स्थितमण्डमजीवं च । जीवस्तत्र भोक्ता न कोऽपि प्रविष्टः । एतदर्थमेव भगवता विलम्बः कृतः । अतः परमुदके स्थितं विलीनं भविष्यतीत्यजीवो जीवव्यतिरिक्तो भगवान् अजीवं जीवरहितं अजीवयज्जीवयुक्तं कृतवान् । स्वयं प्रविश्य प्राणानपि तत्र योजितवानित्यर्थः । तदा भगवता प्राणेन चाऽधिष्ठितो विराट् पुरुषशब्दवाच्यो जातः । तदा स एव पुरुषः । तस्मादेव हेतोः । जलाद्वा । अण्डं निर्भिद्य । कटाहं भित्त्वेति केचित् । केचित्तत्रैव कटाहाद्गोलकं पृथक्कृत्य निर्गतः । अण्डकटाहमात्मानं च पृथक्कृतवानित्यर्थः इति[1] । वस्तुतोऽण्डभावं परित्यज्य पुरुषो भूत्वा यथासुखं परिवर्त्तत इति युक्तम् । तस्य तद्रूपं वर्णयति—सहस्रोर्वङ्घ्रिबाह्वक्ष इति । सहस्रं ऊरवः अङ्घ्रयः बाहवः अक्षीणि[2] च यस्य । सहस्रमाननानि येषु तादृशशीर्षैर्युक्तः । "सहस्रशीर्षा पुरुष" इत्यर्धर्चस्याऽर्थरूपः स सम्पन्नः ॥ ३४ ॥ ३५ ॥ ❀ ❀ तस्य सर्वाधारत्वमाह— यस्येहाऽवयवैरिति । एतावता यतः सृष्टं यद्रूपमिति द्वयस्योत्तरमुक्तम् । यस्याऽवयवैः पादादिभिः । लोकान् पातालादीन् । मनीषिण इति ध्यानार्थमेषा कल्पना । कट्यादिभिः पश्चाद्भागव्यवस्थया । अधः अधोभागे । सप्त अतलादयः । जघनादिभिः अग्रिमभागादारम्भः । अधोभागस्तूपरिभागाद्विमुखः । अतः कट्यादेर्जघनादेश्च न विरोधः ॥ ३६ ॥

---

१. इतीति नास्ति क. ग. घ. ङ । २. अक्षाणीति ख. ग. ङ ।

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

स एव पुरुष इत्यत्र तस्मादिति पुरिशयनात् । अत्र तालव्यशकाराप्रतीतिरित्यरुच्या पक्षान्तरमाहुः जलाद्वेति । प्रथमपक्षे पुरुष इति परोक्षेण कथनं निघण्टव इत्यादिवद् द्वितीये रूढमिति विशेषः । अत्रा'ण्डमि'त्यादिनोक्तयोः पक्षयोराद्येण्डस्य जले विलयादिकल्पनाय द्वितीये पुरुषस्य नारायणत्वे क्लेशः 'आत्मनोऽयनमन्विच्छन्नि'त्यग्रिमवाक्यविरोध इत्यरुच्या तृतीयं पक्षमाहुः वस्तुत इत्यादि ॥ ३५ ॥ ❀ ❀ यस्येत्यत्र एतावदित्यादि । यद्वैत इत्यारभ्यान्तेन सन्दर्भेणायतनार्थं सृष्टं पुरुषरूपमित्युत्तरमुक्तमित्यर्थः ॥ ३६ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

तदा भगवत इच्छारूपया शक्त्या चोदिताः सदसत्त्वं प्रधानगुणभावं उपादायाङ्गीकृत्य अन्योन्यं संहत्य पञ्चीकरणोक्तप्रकारेण मिलित्वा चोभयं हि प्रसिद्धं समष्टिव्यष्ट्यात्मकमदः ब्रह्माण्डाख्यं शरीरं ससृजुरित्यन्वयः ॥ ३३ ॥ ❀ ❀ तत्पूर्वोक्तमण्डं ब्रह्माण्डाख्यं शरीरं अजीवं चेतनारहितं अतएवोदकेशयं वर्षसमूहस्य वत्सरसंवत्सरादिभेदेन पञ्चविधस्य सहस्रान्ते कालकर्मस्वभावानां नियन्ता जीवयन्तीति जीवो भगवान् अजीवयत् सजीवमकरोदित्यर्थः ॥ ३४ ॥ ❀ ❀ स एवं विराट्पुरुषोऽण्डं निर्भिद्य तस्मान्निर्गतः अण्डभावं परित्यज्य पुरुषस्वरूपेण स्थितः । तं पुरुषरूपं वर्णयति—सहस्रेति । सहस्रमुखः अङ्घ्रयः बाहवः अक्षीणि च यस्य सः, सहस्रमाननानि शीर्षाणि च तद्वान् ॥ ३५ ॥ ❀ ❀ तस्य सर्वाधारत्वं प्रदर्शयन् तदवयवैर्लोककल्पनामाह—यस्येति । इह लोके ये मनीषिणः विशुद्धबुद्धयस्ते ध्यानार्थं यस्यावयवैः शरीरावयवैर्लोकान् कल्पयन्तीत्यन्वयः । कल्पनामेव विशदयति—कट्यादिभिरिति । कट्यूरुजानुजङ्घागुल्फप्रपदपादमूलैः अतलवितलतलातलमहातलरसातलपातालसंज्ञान् अधस्स्थितान् सप्त लोकान् कल्पयन्ति । तथा जघनादिभिर्जघननाभ्युरोग्रीवावदनललाटशिरोभिः भूर्भुवस्स्वर्महर्जनस्तपस्सत्याख्यानूर्ध्वं स्थितान् सप्त लोकान् कल्पयन्ति ॥ ३६ ॥

### हिन्दी अनुवाद

जब भगवान्ने इन्हें अपनी शक्तिसे प्रेरित किया, तब ये तत्त्व परस्पर एक दूसरेके साथ मिल गये और उन्होंने आपसमें कार्यकारणभाव स्वीकार करके व्यष्टि-समष्टिरूप पिण्ड और ब्रह्माण्ड दोनोंकी रचना की ॥ ३३ ॥ ❀ ❀ वह ब्रह्माण्डरूप अण्डा एक सहस्र वर्षतक निर्जीवरूपसे जलमें पड़ा रहा; फिर काल, कर्म और स्वभावको स्वीकार करनेवाले भगवान्ने उसे जीवित कर दिया ॥ ३४ ॥ ❀ ❀ उस अण्डेको फोड़कर उसमेंसे वही विराट् पुरुष निकला, जिसकी जङ्घा, चरण, भुजाएँ, नेत्र, मुख और सिर सहस्रोंकी संख्यामें हैं ॥ ३५ ॥ ❀ ❀ विद्वान् पुरुष ( उपासनाके लिए ) उसीके अङ्गोंमें समस्त लोक और उनमें रहनेवाली वस्तुओंकी कल्पना करते हैं । उसकी कमरसे नीचेके अङ्गोंमें सातों पातालकी और उसके पेड़ूसे ऊपरके अङ्गोंमें सातों स्वर्गकी कल्पना की जाती है ॥ ३६ ॥

**पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः । ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रोऽभ्यजायत ॥ ३७ ॥**
**भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः । हृदा स्वर्लोक उरसा महर्लोको महात्मनः ॥३८॥**
**ग्रीवायां जनलोकश्च तपोलोकः स्तनद्वयात् । मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ॥ ३९ ॥**
**तत्कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः । जानुभ्यां सुतलं शुद्धं जङ्घाभ्यां तु तलातलम् ॥ ४० ॥**
**महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलम् । पातालं पादतलत इति लोकमयः पुमान् ॥ ४१ ॥**
**[1]भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः । स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ॥४२॥**

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कन्धे [2]पञ्चमोऽध्यायः ।

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

वर्णानां तत उत्पत्तिं दर्शयति । पुरुषस्येति । ब्रह्म ब्राह्मणो मुखमिति कार्यकारणयोरभेदविवक्षयोक्तम् । बाहव इति क्षत्रं क्षत्रियः ॥ ३७ ॥ ❀ ❀ इदानीमुपासनार्थं लोककल्पनाभेदान्दर्शयन्सप्तलोकपक्षमाह द्वाभ्याम् । भूर्लोकः पातालमारभ्य पद्भ्यां कटिपर्यंताभ्याम् ॥ ३८ ॥ ❀ ❀ स्तनद्वयादित्युपासनार्थत्वदूर्ध्वाधोभाववैपरीत्यं न दोषः । यद्वा । स्तनच्छब्दं

---

१. प्राचीने पाठे नास्त्ययं श्लोकः । २. अतः पूर्वं "पुरुषसंस्थानुवर्णनम्" इतिपाठाधिक्यम् ।

कुर्वंद्यदोष्ठद्वयं तस्मादित्यर्थः । ब्रह्मलोको वैकुंठाख्यः स तु सनातनो नित्यः । न तु सृज्यप्रपंचांतर्वर्तीत्यर्थः ॥ ३९ ॥ ❀ ❀ इदानीं चतुर्दशलोकपक्षं दर्शयति । तत्र जघनादिभिर्भूरादयः पूर्वोक्ता एव सप्त । कट्यादिभिरधः सप्त लोकानाह तत्कट्यामिति द्वाभ्याम् । शुद्धं हरिभक्तनिवासत्वात् ॥ ४० ॥ ४१ ॥ ❀ ❀ त्रिलोकपक्षमाह भूर्लोकः पातालादिसहितः ॥ ४२ ॥

**इति श्रीभा० म० द्वितीयस्कन्धे टीकायां पंचमोऽध्यायः ॥५॥**

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

"ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः" इति श्रुतिभेद एवेति ॥ ३७ ॥ ३८ ॥ ❀ ❀ सति गत्यंतरे वैपरीत्यं दोषायेति । तत्राह । यद्वेति । इत्यर्थ इति । अंडमध्यवर्त्तित्वेपि भगवानिव नित्य इति भावः । ब्रह्मणो भगवतो लोको ब्रह्मरूपो वा लोक इति ॥ ३९ ॥ ❀ ❀ तत्र चतुर्दशलोकपक्षे हरिभक्ताः प्रह्लादबल्यादयस्तेषां निवासत्वात् । यत्र यत्र च मद्भक्ताः स देशः श्रेयसां पदमित्युक्तत्वात् ॥ ४० ॥ ❀ ❀ स्वर्लोकोऽप्यत्र ब्रह्मलोकपर्य्यन्तो ज्ञेयः ॥ ४१ ॥

**इति श्रीभागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कन्धे पंचमोऽध्यायः ॥ ५ ॥**

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

[ पुरुषस्य मुखमित्यादिना ब्राह्मणोऽस्य मुखमासीदित्येकऋचोऽर्थ उक्तः ॥ ३७ ॥ ] ❀ ❀ भुवर्लोक इति । भुव इत्यव्ययम् अन्तरिक्षलोकस्य नाम ॥ ३८—४१ ॥ ❀ ❀ [ भूर्लोक इत्यादिना नाभ्या आसीदन्तरिक्षमित्येक ऋचोऽर्थः ॥ ४२ ॥

## श्रीमद्वीरराघवव्याख्या

वर्णानां तद्विभूतित्वाय चतुर्मुखरूपेणावस्थितात्तत उत्पत्तिं दर्शयति पुरुषस्येति । ब्रह्म ब्राह्मणः मुखमिति । कार्यकारणयोरभेदविवक्षयोक्तं बाहव इति च क्षत्रं क्षत्रियः ॥ ३७ ॥ ❀ ❀ इदानीमुपासनार्थं लोककल्पनाभेदं दर्शयंश्चतुर्दशलोकपक्षमाह भूरित्यादिचतुष्टयेन । भूर्लोकः पातालमारस्य पद्भ्यां कटिपर्यन्ताभ्यां कल्पितः । भुवर्लोकः नाभितः नाभिमारभ्य स्तनद्वयात् हृदय कमलाकारं तदूर्ध्वभाग उरः ब्रह्मलोकः सनातन इति । सत्यलोकविशेषणं सनातनत्वं च भूराद्यपेक्षया यद्वा ब्रह्मलोको वैकुंठाख्यलोकः सनातनः न तु सृज्यप्रपचांतर्वर्तीत्यर्थः ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ❀ ❀ इदानीं संग्रहेण लोकत्रयकल्पनामाह भूर्लोकः कल्पित इति । पादतलमारभ्य नाभितः भूर्लोकः नाभिमारभ्य मूर्द्धतः भुवर्लोकः मूर्धा स्वर्लोकः कल्पितः । अतलादीनां भूरादिष्वंतर्भावात् ॥ ४२ ॥

**इति श्री मद्भागवते महापुराणे द्वितीयस्कन्धे वीरराघवकृतटीकायां पञ्चमोऽध्यायः ॥ ५ ॥**

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

इदानीं पुरुषस्य मुखाद्यंगेभ्यो ब्राह्मणादिजातिजनिमाह पुरुषस्येति । ब्राह्मणो मुखमित्येव मुखाज्जातत्वहेतुत इत्यादेर्मुखमित्यादिप्रथमापंचम्यर्थे प्रमाणांतरगवेषणायासो न कर्त्तव्योऽत्रैव दर्शनादिति भावेनाह ऊर्वोरिति । अनेन पुरुषनाम्नो हरेर्यथा मुखाद्यंगेभ्यो ब्राह्मणादिजात्युत्पत्तिरेवं लोकसृष्टिरपि तदंगेभ्यः सिद्धा नान्यतः ॥ ३७॥ ❀ ❀ तामेव सृष्टिं प्रपंचयति भूर्लोक इति भूमिरिति । भूमेरव्ययं नामांतरं भूर्लोकः पद्भ्यां जात इति । कल्पित । इति अन्वेतव्यं भुव इत्यंतरिक्षलोकः इदमव्ययं जघनपादयोः सामीप्याज्जघनादिभिरित्यनेन न विरोधः ॥ ३८ ॥ ३९ ॥ ❀ ❀ कट्योर्जघनांतर्भावेऽप्यूर्वोस्तत्सामीप्यादूर्वादिभिरित्यस्याविरोध इति ॥ ४० ॥ ❀ ❀ उपसंहरति इती त । यत एवं हरेर्लोकनिमातृत्वं लोकाधारत्वं लोकव्याप्तत्वं लोकोत्तमत्वं च अतो वैराजाख्यो विष्णुर्लोकमय इति उपासीतेति शेषः ॥ ४१ ॥ ❀ ❀ प्रकारांतरेण पुरुषावयवेभ्यो लोकसृष्टिप्रकारमाह भूर्लोक इति । अत्रातलादीनां भूम्यंतर्भावेन महरादीनां स्वर्लोकांतर्भावेन त्रिलोकविवक्षा ज्ञेया । अतो नोक्तविरोधः । अत्रेदं तात्पर्येमुक्तं भवति चतुर्दशलोकपक्षस्त्वेकः, सप्तलोकपक्षस्त्वपरः, त्रिलोकपक्षस्त्वन्योऽधिकारभेदेन ध्यानार्थत्वात्कल्पनायास्ततो विकल्प उपपन्न इति ॥ ४२ ॥

**इति श्री भा० म० द्वि० विज० टी० पंचमोऽध्यायः ॥ ५ ॥**

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

स्तनद्वयमारभ्य ग्रीवापर्य्यन्तेऽवयवे यथाक्रमं जनलोकस्तपोलोकश्चेत्यर्थः । ब्रह्मणो भगवतो लोकः ब्रह्मस्वरूपो लोक इति वा ॥ ३९ ॥ ❀ ❀ तत् कट्यामिति युग्मकम् ॥ ४० ॥ ४१ ॥ ❀ ❀ पद्भ्यां कटिपर्य्यन्ताभ्याम् । नाभितः उदरपर्य्यन्ते इत्यर्थः । मूर्ध्ना हृदादिमूर्द्धपर्य्यन्तेन ॥ ४२ ॥

**इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे पंचमोऽध्यायः ॥ ५ ॥**

---

१. ज्ञातः ।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

प्रसङ्गेन वर्णानां परमेश्वरादुत्पत्तिमाह । ब्रह्म ब्राह्मणो मुखमिति कार्य्यकारणयोरभेदविवक्षयोक्तम् । क्षत्रं क्षत्रियम् । ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृत इति श्रुतेः ॥ ३७ ॥ ❀ ❀ इदानीमुपासनार्थं लोककल्पनाभेदान् दर्शयन् सप्तलोकपक्षमाह द्वाभ्याम् । भूर्लोकः पातालमारभ्य पद्भ्यां कटिपर्य्यन्ताभ्याम् ॥ ३८ ॥ ❀ ❀ स्तनद्वयादिति उपासनार्थत्वात् उद्ध्वाधोभाववैपरीत्ये न दोषः । यद्वा स्तनन् शब्दं कुर्व्वत् यत् ओष्ठद्वयं तस्मादित्यर्थः । सत्यलोकः सप्तमः । तदुपरि ब्रह्मणो भगवतो लोकः वैकुण्ठः । स तु विराडङ्गत्वेन न ध्येयः यतः सनातनः अण्डमध्यवर्त्तित्वेऽपि भगवानिव नित्यः ॥ ३९ ॥ ❀ ❀ चतुर्दशलोकपक्षं दर्शयति । तत्र जघनादिभिर्भूरादयः पूर्व्वोक्ता एव सप्त । कट्यादिभिरधः सप्त लोकानाह तत् कट्यामिति द्वाभ्याम् । शुद्धं प्रह्लादबलिप्रभृतिहरिभक्तनिवासत्वात् ॥ ४० ॥ ४१ ॥ ❀ ❀ त्रिलोकपक्षमाह । भूर्लोकः पातालादिसहितः ॥ ४२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ॥ द्वितीये पंचमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः

अथ वर्णानामुत्पत्तिमाह पुरुषस्येति । ब्रह्म ब्राह्मणः पुरुषस्य मुखं मुखजं क्षत्रं क्षत्रियः बाहवः बाहुजम् । कार्यकारणयोर्भेदाभेदसंबंधान्मुखं ब्रह्मेत्यादिवाक्यद्वयं सूपपन्नम् । तथा च श्रुतिः ब्राह्मणोऽस्य मुखमासीदित्यादिः ॥ ३७ ॥ ❀ ❀ अथोपासनार्थं लोककल्पनाभेदं दर्शयन्सप्तलोकपक्षमाह भूर्लोक इति द्वाभ्याम् । भूर्लोकः पातालमारभ्य पद्भ्यां कटिपर्यंताभ्यां कल्पितः संपादितः ॥ ३८ ॥ ❀ ❀ जनलोकश्च स्तनद्वयात् ग्रीवायां तपोलोकः पाठक्रमादर्थक्रमो बलीयान् सप्तलोकस्य सनातनत्वं भूराद्यपेक्षया बोध्यम् । भूरादयोऽल्पकालस्थायिनः सत्यलोकश्चिरकालस्थायीति विवेकः यद्यपि वैकुंठलोकः सनातनस्तथापि प्राकृतलोकगणनायां तदन्वयासंभवात् स नेह गृह्यते ॥ ३९ ॥ ❀ ❀ अथ चतुर्दशलोकपक्षमाह तत्र जघनादिभिर्भूरादयः प्राक्प्रदर्शिताः एव सप्तकट्यादिभि रधः सप्त लोकान् दर्शयति तदिति द्वाभ्याम् । शुद्धं हरिभक्तनिवासत्वात् ॥ ४० ॥ ❀ ❀ इतीत्थं लोकमयः चतुर्दशभुवनमयः पुमान् पुरुषः देहदेहिनोरभेदविवक्षया पुंसो लोकमयत्वोक्तिर्युक्तैव ॥ ४१ ॥ ❀ ❀ अथ लोकत्रयपक्षमाह भूर्लोकः पातालादिसहितः पद्भ्यां कल्पितः भुवर्लोकः नाभितः स्वर्लोकः सत्यलोकान्तः मूर्ध्ना कल्पितः ॥ ४२ ॥

इति श्रीमद्भागवतसिद्धांतप्रदीपे द्वितीयस्कंधे पञ्चमाध्यायार्थप्रकाशः ॥ ५ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं सामान्यत उद्देशमुक्त्वा भगवतो बाहुमुखादीनामवयवमध्यपातेऽपि मुख्यत्वात्तानग्रे निरूपयति—**पुरुषस्य मुखं ब्रह्मेति**। ऊर्वोरिति भेदेन निर्देशो भगवद्भावापत्तिनिषेधार्थः। वैश्यशूद्रयोर्मुक्त्यभावाय। पद्भ्यां शूद्रः। पद्भ्यामिति। पञ्चमी। एते ब्राह्मणादयोऽधिकारिपुरुषास्तत्तज्जात्यधिष्ठातृदेवतारूपाः ॥ ३७ ॥ ❀ ❀ इदानीं लोककल्पनामाह—**भूर्लोक इति**। पद्भ्यां सप्तलोकपक्ष उच्यते। पादादिकटिपर्यन्तं भूर्लोकः। भुवर्लोकस्तस्य नाभितः। हृदयं गर्त्तस्थानम्। उरस्तदुपरि उच्चस्थानम्। **महात्मन इति**। ततः परं ज्ञानिनामेव वासात्। महान्तः आत्मानो[1] यत्रेति। स्तनद्वयात् नासिकाद्वयात्। "स्तन शब्दे" इति व्युत्पत्त्या। मूर्द्धभिः सत्यलोकः। तुशब्देन मतान्तरे तत्राऽन्ये लोका उक्तास्ते निवारिताः॥ ३८ ॥ ३९ ॥ ❀ ❀ इदानीं चतुर्दशलोकपक्षं वक्तुं पूर्वोक्ता एवैते उपरितना लोकाः। [2]अधस्तनान्सप्राऽऽह—**तत्कट्यामिति**। उपरितनलोकानामुत्तमत्वाद्भगवदवयवानां कारणत्वमुक्तम्। अतलस्य तु मयपुत्रनिवासान्मो[3]हकबाहुल्याच्च भगवदवयवस्याऽऽधारत्वमात्रम्। कृप्तमिति पूर्वमेव। तामसत्वाद्विशेषध्याने तस्याऽनुपयोगात्। वितते महादेवस्य विद्यमानत्वाद्भगवतो महत्त्वमाह—**विभोरिति**। यस्तु महादेवस्याऽपि सुखप्रद इत्यर्थः। सुतलं शुद्धं भगवतो विद्यमानत्वात् **लोकमय इति**। अवयवैः कृप्तानां लोकानां तत्रैव विद्यमानत्वाल्लोकमयत्वम्। **पुमानिति** नेदमुपासनार्थमुक्तं किन्तु पुमानेव तादृशः ॥ ४० ॥ ४१ ॥ ❀ ❀ त्रिलोकपक्षमाह—**भूर्लोक इति**। पद्भ्यां कटिपर्यन्ताभ्याम्। नाभितः कट्यादिग्रीवापर्यन्तात्। मूर्ध्ना ग्रीवादिब्रह्मरन्ध्रपर्यन्तेन। **इति वा लोककल्पनेति**। कल्पना ह्यत्र त्रिविधा। गुणतः, विद्यातः, यज्ञतश्चेति। यथाधिकारं व्यवस्था। सात्त्विकानां चतुर्दशलोकपक्षः। राजसानां सप्त। तामसानां त्रिलोकपक्ष इति ॥ ४२ ॥

**इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां द्वितीयस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥**

---

१. आत्मा यत्रेति इति क. । २. अधस्तनानिति क. ग. । ३. मोहबाहुल्यादिति ख ।

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

भूर्लोक इत्यत्र पद्भ्यामित्यादि । तथा चायं चरण एव सप्तलोकपक्षज्ञापक इत्यर्थः । पक्षत्रयस्यापि काल्पनिकत्वे वस्तुयाथात्म्यज्ञानं केनापि न स्यादिति तन्निवारणमाहुः पुमानित्यादि ॥ ३८ ॥ ❀ ❀ इति वा लोकेत्यत्र गुणत इत्यादि । गुणास्त्रयो विद्याश्चतुर्दश, यज्ञाः सप्तसंस्थाकाः इति तत्तदर्थं तथेत्यर्थः ॥ ४२ ॥

इति श्रीद्वितीयस्कन्धसुबोधिनीप्रकाशे पञ्चमाध्यायविवरणम् ॥ ५ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

वर्णानामपि तत उत्पत्तिमाह—पुरुषस्य मुखं ब्रह्म ब्राह्मण इति कार्यकारणयोरभेदविवक्षया सामानाधिकरण्यम्, मुखाद्ब्राह्मणो जात इत्यर्थः । क्षत्रं क्षत्रियः एतस्य पुरुषस्य बाहवः, बाहुभ्यो जाता इत्यर्थः । ऊर्वोः ऊरुभ्यां वैश्यो जातः । भगवतः पद्भ्यां शूद्रोऽभ्यजायत ॥ ३७ ॥ ❀ ❀ इदानीमुपासनार्थं लोककल्पनाभेदान् दर्शयन् सप्तलोकपक्षमाह—भूर्लोक इति द्वयेन । पातालमारभ्य भूर्लोकः पद्भ्यां कटिपर्यन्ताभ्यां कल्पितः । तथाऽस्य महात्मनः स्थूलतरस्य पुरुषस्य नाभितो भुवर्लोको हृदा स्वर्लोक उरसा महर्लोकश्च कल्पित इत्यन्वयः ॥ ३८ ॥ ❀ ❀ अस्य ग्रीवायां च जनलोकः, स्तनत् शब्दं कुर्वत् यद्द्वयं ओष्ठद्वयं तस्मात्तपोलोकः, मूर्द्धभिः सत्यलोकश्च कल्पित इत्यनुषङ्गेणान्वयः । ब्रह्मणो भगवतो लोको वैकुण्ठाख्यस्तु सनातनो न तु सृज्यान्तर्वर्तीत्यर्थः ॥ ३९ ॥ ❀ ❀ इदानीं चतुर्दशलोकपक्षं दर्शयति, तत्र जघनादिभिर्भूरादयः सप्त पूर्वोक्ता एव ज्ञेयाः, कट्यादिभिरधः सप्त लोकानाह—तत्कट्यामिति द्वयेन । तस्य विभोः पुरुषरूपस्य कट्यामित्याद्यन्वयः । सुगममन्यत् । शुद्धमिति, बलिप्रभृतिभगवद्भक्तनिवासत्वाच्छुद्धमित्यर्थः ॥ ४० ॥ ❀ ❀ इत्येवं पुमान् पुरुषो लोकमयो लोकमयत्वेन ध्येय इत्यर्थः ॥ ४१ ॥ ❀ ❀ त्रिलोकपक्षमाह—भूर्लोक इति । अस्य पुरुषस्य पद्भ्यां कटिपर्यन्ताभ्यां पातालादिसहितो भूर्लोकः कल्पितः, नाभितश्च भुवर्लोकः कल्पितः, मूर्ध्ना तु ब्रह्मलोकपर्यन्तः स्वर्लोकः कल्पित इति वा लोककल्पना ज्ञेया ॥४२॥

इति श्रीवल्लभाचार्यवंश्यगोपाल सूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता च द्वितीयेऽत्र मननस्य निरूपणे । विवृतः पञ्चमोऽध्यायो जननस्य निरूपकः ॥ ३ ॥

## हिन्दी अनुवाद

ब्राह्मण इस विराट् पुरुषका मुख हैं, भुजाएँ क्षत्रिय हैं, जाँघोंसे वैश्य और पैरोंसे शूद्र उत्पन्न हुए हैं ॥ ३७ ॥ ❀ ❀ पैरोंसे लेकर कटिपर्यन्त सातों पाताल तथा भूलोककी कल्पना की गयी है; नाभिमें भुवर्लोककी, हृदयमें स्वर्लोककी और परमात्माके वक्षःस्थलमें महर्लोककी कल्पना की गयी है ॥ ३८ ॥ ❀ ❀ उसके गलेमें जनलोक, दोनों स्तनोंमें तपोलोक और मस्तकमें ब्रह्माका नित्य निवासस्थान सत्यलोक है ॥ ३९ ॥ ❀ ❀ उस विराट् पुरुषकी कमरमें अतल, जाँघोंमें वितल, घुटनोंमें पवित्र सुतल और जङ्घाओंमें तलातलकी कल्पना की गयी है ॥ ४० ॥ ❀ ❀ एड़ीके ऊपरकी गाँठोंमें महातल, पंजे और एड़ियोंमें रसातल और तालुओंमें पाताल समझना चाहिये । इस प्रकार विराट् पुरुष सर्वलोकमय है ॥ ४१ ॥ ❀ ❀ विराट् भगवान्के अङ्गोंमें इस प्रकार भी लोकोंकी कल्पना की जाती है कि उनके चरणोंमें पृथ्वी है, नाभिमें भुवर्लोक है और सिरमें स्वर्लोक है ॥ ४२ ॥

पाँचवा अध्याय समाप्त

# अथ षष्ठोऽध्यायः

## ब्रह्मोवाच

वाचां वह्नेर्मुखं क्षेत्रं छन्दसां सप्त धातवः । हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च ॥ १ ॥
सर्वासूनां च वायोश्च तन्नासे परमायने । अश्विनोरोषधीनां च घ्राणो मोदप्रमोदयोः ॥ २ ॥
रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी । कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः ॥
तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनम् ॥ ३ ॥ त्वगस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि ॥
रोमाण्युद्भिज्जजातीनां यैर्वा यज्ञस्तु सम्भृतः ॥ ४ ॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

षष्ठे विराड्विभूतिश्च प्रोक्ताध्यात्मादिभेदतः । दृढीकृतं च पूर्वोक्तं सर्वं पुरुषसूक्ततः ॥

इदानीं वैराजस्य विभूतिः सप्रपंचमनुवर्ण्यते वाचामस्मदादिवागिंद्रियाणां तदधिष्ठातुर्वह्नेश्च तस्य मुखं क्षेत्रमुत्पत्तिस्थानम् । छंदसां गायत्र्यादीनां सप्तानां तस्य सप्त धातवस्त्वगादयः क्षेत्रम् । हव्यं देवानामन्नं कव्यं पितृणाम् अमृतं तदुभयशेषो मनुष्याणां तेषामन्नानां तथा सर्वरसस्य मधुरादेः षड्विधस्य चकारादस्मदादिरसनेंद्रियस्य तदधिष्ठातुर्वरुणस्य चैतस्य जिह्वा क्षेत्रमुत्पत्तिस्थानम् । एवं सर्वत्रानुक्तमुन्नेयम् ॥ १ ॥ ❋ ❋ ससर्वासूनामस्मदादिप्राणानां तस्य नासे नासारंध्रे परमायने उत्तमक्षेत्रे मोदप्रमोदयोश्च सामान्यविशेषगंधयोर्घ्राणो घ्राणेंद्रियं परमायनम् ॥ २ ॥ ❋ ❋ रूपाणां तेजसां रूपप्रकाशकानां चक्षुरिंद्रियम् अक्षिणी नेत्रगोलके सर्वत्र षष्ठ्यन्तानां प्रथमांतं क्षेत्रं द्रष्टव्यम् । कर्णौ तस्य श्रोत्राधिष्ठाने श्रोत्रमिन्द्रियं तस्य गात्रं शरीरं वस्तूनां ये सारांशास्तेषां भजनं स्थानम् ॥ ३ ॥ ❋ ❋ अस्य त्वक् स्पर्शस्य वायोश्चेत्यर्थः । सर्वस्य मेधस्य यज्ञस्य उद्भिज्जजातीनां सर्ववृक्षाणाम् । यैर्वृक्षैर्यज्ञः सम्यक् साधितस्तेषामेव वा ॥ ४ ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

पुरुषसूक्तत इति । पुरुषसूक्तं 'सहस्रशीर्षा' इत्यादिषोडशमंत्रात्मको वेदभागस्तद्व्याख्यानरूपत्वादस्याध्यायस्य व्याख्येयव्याख्यानयोरभेदोक्तिरौपचारिक्येव ॥ १ ॥ ❋ ❋ एवं मायाशक्तिसहितात्परमेश्वरात्समष्टिविराडजायतेति प्रतिपादितम् । तत्र "भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इंद्रियाणि । सर्वेन्द्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोंगभूताः" इत्यक्रूरोक्तेः । परमेश्वरस्य कस्मात्कस्मादंगाद्विराजः किंकिमंगमभूदित्यपेक्षायामाह—वाचामिति । सप्तमश्लोकस्थेन हरेरित्यनेन मुखमित्यादेः संबंधः मायिकाहंकारकार्यभूता अप्यमी वाग्वह्न्यादयः सच्चिदानंदमयस्य भगवतो मुखाद्यंगानां विभूतिरूपत्वात्तेभ्यो मुखादिभ्य एवामी उत्पद्यंते इत्युच्यते मायायास्तच्छक्तित्वाच्छक्तिशक्तिमतोरभेदाच्छक्तेः कार्यं शक्तिमतोपि भवतीति न्यायात् । यथाग्निशक्तिर्दाहस्तेन दग्धोऽग्निर्दग्ध इत्युच्यते तद्वदत्रापीति । वैकुंठस्था वाग्वह्न्यादयस्तत्तदंशभूताश्चिन्मया नित्या एव तेषां चिद्विलासत्वात् । जगद्वर्त्तिनस्त्वमी तत्तद्विभूतयो मायिका अनित्या एवेति व्यवस्थितिः । एतस्य हरेः ॥ १ ॥ ❋ ❋ वायोर्मुख्यवायोः घ्राण इति पुंस्त्वमार्षम् । 'क्लीबे घ्राणं गंधवहो घोणा नासा च नासिका"इत्यमरः ॥ २ ॥ ❋ ❋ तीर्थानां पुष्करादीनामागमानां च "तीर्थं मंत्राद्युपाध्यायशास्त्रेष्वंभसि पावने" इत्यभिधानात् ॥ ३ ॥ ❋ ❋ स्पर्शेन सहितो वायुः स्पर्शवायुस्तस्येति समासः कार्यः । आर्षत्वाश्रयणेन वलोपे तु गौरवमेवेति भावः । त्वगिन्द्रियाधिष्ठातृवायुरत्र ज्ञेयः । पूर्वं तु सामान्यवायुरुक्त इत्यपौनरुक्त्यम् । वृक्षैः पालाशादिभिर्जुह्वादिपात्रनिर्माणेन यज्ञसंसिद्धेः तेषामेव यज्ञसाधकानामेव वृक्षाणां क्षेत्रं नान्येषामित्यर्थः । अन्यवृक्षाणामुत्पत्तिस्तेभ्य एव वर्णसंकरन्यायेन बोध्या । यद्वा । "याज्ञिका रोममूलस्था रोमांतस्थाश्च तत्परे" [illegible] रोमप्रांतभागत इति ध्येयम् । वाशब्दस्य व्यवस्थार्थकत्वादिति पूर्वं तथोक्तेः । 'ईशस्य केशान्विदुरंबुवाहान्' इत्युक्तेः क्षेमकर्मणां सर्वहितकर्तॄणाम् ॥ ४ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

गायत्र्यादीनामिति । आदिना उष्णिक्त्रिष्टुब्जगतीपंक्तिबृहतीनां ग्रहणम् । विशेषः तृतीयस्कंधीयद्वादशाध्याये वक्ष्यति ॥ त्वगादय इति । आदिना चर्ममांसरुधिरमेदोमज्जाऽस्थ्नां ग्रहणं दशमाध्याये उक्तञ्च ॥ मधुरादेरिति । आदिना कटुतिक्तकषायाम्ललवणानां ग्रहणम् ॥ १ ॥ २ ॥ ❋ ❋ [ दिव इति ] दिवो ज्योतिश्चक्रस्येत्यर्थः ॥ ३ ॥ ४ ॥

## श्रीमद्वीरराघवव्याख्या

एवं कृत्स्नप्रपंचस्य महदादिक्रमेण सृष्टस्य वैराजविभूतित्वमभिधाय तदेव पुरुषसूक्तसंवादेन दृढीकुर्वंन्यद्रूपमित्यादेरुत्तरमाह वाच इति । वाचो वागिंद्रियस्य तदधिष्ठातृदेवताभूताग्नेश्च भगवन्मुखं स्थानमाश्रयः गायत्र्युष्णिग्बृहतीपंक्तिजगतीत्रिष्टुबनुष्टुभां सप्तानां छंदसां सप्त धातवः त्वगादिसप्तधातुस्थानीया भगवद्विग्रहावयवाः स्थानं हव्यं देवानामन्नं कव्यं पितॄणाममृतं तदुभयशेषो मनुष्याणां एषामन्नानां सर्वरसस्य मधुरादेः षड्विधस्य चकारादस्मदादिरसनेंद्रियस्य तदधिष्ठातुर्वरुणस्य च तस्य जिह्वाक्षेत्रं एवं सर्वत्रानुक्तमुन्नेयम् ॥ १ ॥ ❀ ❀ सर्वासूनामस्मदादिप्राणानां वायोश्च तस्य नासे नासारंध्रे परमायने उत्तमक्षेत्रे औषधीनामश्विनोर्मोदप्रमोदयोश्च तद्घ्राणेंद्रियं स्थानं मोद अनुकूलवस्तुदर्शनजसुखविशेषः प्रमोदस्त्वनुकूलवस्तुनः स्वीयत्वबुद्धिजसुखविशेष इति भेदः ॥ २ ॥ ❀ ❀ रूपाणां शुक्लादीनां तेजसां रूपप्रकाशकानां च चक्षुः तच्चक्षुरिंद्रियं स्थानं दिवः सूर्यस्य चाक्षिणी तन्नेत्रगोलकौ स्थानं सर्वत्र षष्ठ्यंतनिर्दिष्टानां प्रथमांतनिर्दिष्टं क्षेत्रं द्रष्टव्यम् । दिशां तीर्थानां तत्कर्णौ कर्णबिले स्थानमाकाशशब्दयोस्तच्छ्रोत्रम् ॥ ३ ॥ ❀ ❀ वस्तूनां ये सारांशास्तेषां सौभगस्य स्पृहणीयतायाश्च तद्गात्रं तच्छरीरं भाजनं स्थानं स्पर्शवायोः सर्वमेधस्य समस्तयज्ञस्य चास्य त्वक् स्थानम् ॥ ४ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

आध्यात्मिकाधिदैवाधिभौतिकादिरूपस्य जगतो हरेर्मुखादिभ्य उत्पत्तिस्तस्य ततो भिन्नत्वं तदुत्तमत्वं प्रतिमादिस्वरूपत्वं च प्रतिपाद्यतेऽस्मिन्नध्याये तत्र प्रथममध्यात्मेंद्रियतदभिमानिदेवतादिसर्वपदार्थानां तदंगेभ्य उत्पत्तिप्रकारमाह वाच इत्यादिना । वाचो वागेंद्रियस्य वक्तव्यस्य च तदभिमानिनो वह्नेरग्निदेवस्य च पुरुषस्य मुखं क्षेत्रं योनिः करणमुत्पादकमित्यर्थः । क्षेत्रं पुरे गृहे देहे केदारे योनिभार्ययोरिति । योनिः स्त्रीणां भगे स्थाने कारणे ताम्रके पण इति यादवः । गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीसंज्ञानां सप्तानां छंदसामस्य पुरुषस्य त्वङ्मांसरुधिरमेदोमज्जास्थ्याख्याः सप्त धातवः क्षेत्रमित्यनुवर्त्तते । अत्र तदुत्पन्नत्वं तदाश्रितत्वं चेति तात्पर्यमुत्तरत्राप्यनुसंधेयं हव्यादिसर्वान्नानां जिह्वेंद्रियस्य च कषायमधुरादिसर्वरसस्य च तस्य पुरुषस्य जिह्वा क्षेत्रम् ॥ १ ॥ ❀ ❀ सर्वासूनां सर्वमरुतां मुख्यवायोश्च तन्नासे तस्य हरेर्नासापुटे क्षेत्रे परमायने चोत्तमाश्रयणे च अभिमानिनोरश्विनोर्व्रीह्याद्यौषधीनां च घ्राणेंद्रियस्य गंधस्य च सुरभ्यसुरभिलक्षणस्य च तस्य घ्राणे क्षेत्रं नपुंसकस्य घ्राणस्य पुंशक्तिमत्त्वद्योतनाय घ्राण इत्युक्तं क्लीबे घ्राणे गंधवहो घोणा नासा च नासिकेत्यमरः ॥ २ ॥ ❀ ❀ चक्षुरिंद्रियस्य तद्विषयाणां च रूपाणां विषयप्रकाशानां तेजसां ज्योतिषां च हरेश्चक्षुः क्षेत्रं दिवो द्युलोकस्याभिमानिनः सूर्यस्य हरेरक्षिणी चक्षुर्गोलके क्षेत्रमिति शेषः । दिशां दिग्देवतातीर्थानां शास्त्राणां च हरेः कर्णौ क्षेत्रं तीर्थं मंत्राद्युपाध्याये शास्त्रेष्वंभसि पावन इत्यभिध्यानं श्रोत्रेंद्रियस्य तद्विषयस्य शब्दस्याकाशस्य हरेः श्रोत्रेंद्रियं कारणम् ॥ ३ ॥ ❀ ❀ वस्तुसाराणां वस्तुश्रेष्ठानां वस्तुबलानां वा सौभाग्यस्य तस्य हरेर्गात्रमुत्पादकं भाजनं निधानं निधानपात्रं च त्वगिंद्रियस्य स्पर्शगुणस्य स्पर्शाभिमानिनो वायोः सर्वमेधस्य सर्वज्ञस्य चास्य हरेस्त्वगिंद्रियं क्षेत्रम् ॥ ४ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

सुखमिति समष्टिसात्त्विकराजसाहङ्काररूपम् । प्राधान्यान्मुखमेवेत्यर्थः । एवमुत्तरत्रापि ॥ १ ॥ २ ॥ ❀ ❀ तीर्थानाम् आगमानाम् ॥ ३ ॥ ❀ ❀ वायोर्नेतृत्वप्रधानत्वाद् वाय्वाश्रये तु त्वच्येव मुख्यं नेतृत्वं वर्त्तते । तस्मात् तत्तल्लोकनेतुर्यज्ञस्यापि सैवाश्रय इत्यर्थः ॥ ४ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

षष्ठे भगवदास्यादेर्विराड्वागाद्यभूदिति । तथा त्रिपादेकपादविभूत्यादिकमुच्यते ॥ ❀ ॥

एवं मायाशक्तिसहितात् परमेश्वरात् समष्टिविराड्जायतेति प्रतिपादितम् । तत्र भूस्तोयमग्निः परतः खमादिर्महानजादिर्मन इन्द्रियाणि सर्वेन्द्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोऽङ्गभूताः इत्यक्रूरोक्तेः परमेश्वरस्य कस्मात् कस्मात् अङ्गात् विराजः किं किमङ्गमभूदित्यपेक्षायामाह । वाचां समष्टिविराजो व्यष्टीनाञ्च वाचां वागिन्द्रियाणां, तदधिष्ठातुर्वह्नेश्च, मुखमितिसप्तमश्लोकस्थेन हरेरित्यनेन सम्बन्धः, क्षेत्रम् उत्पत्तिस्थानमिति । मायिकाहङ्कारकार्य्यभूता अप्यमी वाग्वह्न्यादयः सच्चिदानन्दमयस्य भगवतो मुखाद्यङ्गानां विभूतिरूपत्वात् तेभ्यो मुखादिभ्य एवामी उत्पद्यन्त इत्युच्यते । मायायास्तच्छक्तित्वात् शक्तिशक्तिमतोरभेदात् शक्तेः कार्य्यं शक्तिमतोऽपि भवतीति न्यायात् । वैकुण्ठस्था वाग्वह्न्यादयस्तदंशभूताश्चिन्मया नित्या एव, तेषां चिद्विलासत्वात्, जगद्वर्त्तिनस्त्वमी तत्तद्विभूतयो मायिका अनित्या एवेति व्यवस्थितिः छन्दसां गायत्र्यादीनां सप्तानां तस्य धातव स्त्वगादयः क्षेत्रम्, तस्य त्वगादिभ्यः सप्तच्छन्दांस्यभूवन्नित्यर्थः । एवमेव सर्व्वत्र षष्ठ्यन्तानां प्रथमान्तं क्षेत्रम् । प्रथमान्ताश्च षष्ठ्यन्ता बभूवुरिति तेषां विवरणञ्च द्रष्टव्यम् । हव्यं देवानामन्नम् । कव्यं पितॄणामन्नम् । अमृतम् उभयशेषो मनुष्याणाम् । तेषामन्नानां सर्व्वस्य मधुरादेः षड्विधरसस्य च जिह्वेन्द्रियं क्षेत्रम् । चकाराद्वरुणस्य तालु जिह्वेन्द्रियगोलकं क्षेत्रम् ॥ १ ॥ ❀ ❀

तन्नासे तदीयनासारन्ध्रे अश्विनोरोषधीनाश्चैतयोः पूर्व्वेणैवान्वयः । मोदप्रमोदयोः सामान्यविशेषगन्धयोर्घ्राणः तदीयं घ्राणेन्द्रियम् ॥ २ ॥ ❀ ❀ चक्षुस्तदीयचक्षुरिन्द्रियम् । अक्षिणी तदीयनेत्रगोलके । कर्णौ तदीयश्रोत्राधिष्ठाने । श्रोत्रं तदीयश्रोत्रेन्द्रियम् ॥ ३ ॥ ❀ ❀ त्वगिन्द्रियाधिष्ठानञ्च तन्त्रेणोक्तम् । क्रमेण स्पर्शस्य वायोश्च बलोपश्छान्दसः । सर्व्वस्य मेधस्य यज्ञस्य । वस्तुसाराणां वस्तुशक्तीनाम् ॥ ४ ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं सावर्णचतुर्दशभुवनात्मकविराट्शरीरस्योत्पत्तिः प्राक् दर्शिता तदेव समष्टिशरीरम् । तन्मुखाद्युत्पत्तिप्रकारो दशमेऽध्याये वक्ष्यते अत्र तु तन्मुखादितो व्यष्टिवागादिरूपां विभूतिमाह वाचामिति । वाचामस्मदादिवागादीन्द्रियाणां वह्ने र्वागधिष्ठातुर्वैराजस्य मुखं क्षेत्रमुत्पत्तिस्थानम् । गायत्र्युष्णिग्बृहतीपंक्तिजगतीत्रिष्टुबनुष्टुभां सप्तछन्दसाम् । तस्य सप्तधातवस्त्वगादयो क्षेत्रम् । हव्यं देवानां कव्यं पितॄणामुभयशेषभूतममृतं मनुष्याणां च क्षुन्निवारकं वस्तु तान्येवान्नानि तेषां हव्यान्नकव्यामृतान्नानां सर्वरसस्य षड्विधस्य मधुरादेः चकारात् अस्मदादिरसनेन्द्रियस्य तदधिष्ठातुर्वरुणस्य च तस्य जिह्वा क्षेत्रम् । एवं सर्वत्रानुक्तमनूह्यम् ॥ १ ॥ ❀ ❀ सर्वासूनामस्मदादिप्राणापानादीनाम् । वायोश्च तस्य नासं नासारंध्रे परमायने उत्कृष्टक्षेत्रे अश्विनोः नासत्यदस्रयोः औषधीनां मोदप्रमोदयोः सामान्यविशेषगंधयोश्च तस्य घ्राणः घ्राणेन्द्रियं क्षेत्रम् ॥ २ ॥ ❀ ❀ रूपाणां शुक्लादीनां प्रकाश्यानां तेजसां तत्प्रकाशकानां चक्षुः तच्चक्षुरिंद्रियं क्षेत्रं अक्षिणी चक्षुर्गोलके दिवः सूर्यस्य च क्षेत्रम् । दिशां तीर्थानां कर्णच्छिद्रे क्षेत्रम् । श्रोत्रमिंद्रियं आकाशशब्दयोः क्षेत्रम् । तस्य गात्रं शरीरम् । वस्तूनां ये सारांशास्तेषां सौभाग्यस्य स्पृहणीयतायाश्च भाजनं स्थानम् ॥ ३ ॥ ❀ ❀ अस्य वैराजस्य त्वक्स्पर्शस्य वायोश्च सर्वमेधस्य समस्तयज्ञस्य क्षेत्रम् । तस्य रोमाणि उद्भिज्जजातीनां सर्ववृक्षाणां यैर्वृक्षैर्यज्ञः संभृतः सम्यक्साधितस्तेषामेव वा ॥ ४ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

अनित्ये जननं नित्ये परिच्छिन्ने समागमः । नित्यापरिच्छिन्नतनौ प्राकट्यं चेति सा त्रिधा ॥ १ ॥
उत्पत्तिः स्थानसम्बन्धरूपा षष्ठे निरूप्यते । स्थूलस्याऽमूर्त्तरूपस्य तद्भेदद्दर्शिः फलम् ॥ २ ॥
नारायणपरा वेदा इत्यनेन निरूपितम् । सामान्येन तदेवाऽत्र विस्तरेण निरूप्यते ॥ ३ ॥
पौरुषेण च सूक्तेन निर्धारितमिहोदितम् । कार्यस्य वस्त्वभेदोऽपि माहात्म्यं परतस्तथा ॥ ४ ॥
अमूर्त्तरूपं साधर्म्यं सर्वत्रैव हरेर्वृहत् । तेन सिद्धो वस्त्वभेदः स्थूलं ध्यानं च सिध्यति ॥ ५ ॥

पूर्वाध्याये पूर्वमुद्दिष्टानां मूर्त्तानां जननरूपोत्पत्तिर्निरूपिता । अनुद्दिष्टानामपि कालादीनां भगवत्त्वं स्पष्टतयैवोक्तम् । इदानीममूर्त्तानां जीवानां मूर्त्तेन सह सम्बन्धो निरूप्यते । येऽपि पूर्वं देवादय उत्पन्ना इत्युक्तास्तेऽपि विशिष्टा एवोत्पन्ना इति । तत्र यदमूर्त्तं रूपं तदिदानीं पृथक्कृत्य स्थूलरूपे भगवत्यमूर्त्ते सर्वत्र विराजि प्रविष्टरूपे सम्बन्धो निरूप्यते । जीवप्रकरणत्वादस्य साधनं फलं चोत्पत्त्या निरूपणीयम् । माहात्म्यं च भगवतः अमूर्त्तमिति । तदप्यत्र निरूप्यते । ततश्च चत्वारोऽत्र पदार्था निरूप्याः । अमूर्त्तत्वसाधर्म्यादेकस्मिन्नध्याये निरूपणम् । प्रथमतः सर्वेषां जीवानां लिङ्गशरीरसामग्री भगवतो लिङ्गशरीरे सम्बद्धेति निरूप्यते—तत्र वाचामस्मदादिवागिन्द्रियाणां तदधिष्ठातुर्वह्नेश्च भगवतो मुखं विवरात्मकं क्षेत्रं स्थानम् । भगवतो हि मुखद्वयम् । इन्द्रियरूपं गोलकरूपं च । तत्र गोलकरूपे ब्राह्मणरूपत्वं पूर्वं निरूपितं तत्त्वोत्पादितत्वनिरूपणाय । तथा पातालादीनामपि भगवदवयवेभ्य उत्पत्तिर्भगवति च स्थितिरतः पातालादिरूपो भगवानिति निरूपितम् । अत्र तु तद्विपरीतं जगदुद्दिश्य भगवत्त्वं विधीयते । तत्र तु भगवन्तमुद्दिश्य जगत्त्वं विहितम् । आधारत्वेन च निरूप्यत इत्यमूर्त्तानां छन्दसां ये भगवदवयवा अमूर्त्ता आधिदैविकास्ते छन्दसां स्थानमित्याह—छन्दसामिति । गायत्री, जगती, उष्णिक्, त्रिष्टुप्, अनुष्टुप्, पंक्तिः, बृहती च । सप्त धातवस्त्वङ्मांसरुधिरमेदोमज्जास्थ्यावस्थिदेवतारूपाः । एवं भगवन्मुखे मुखसम्बन्धिसर्वपदार्थानां शब्दार्थरूपाणां सम्बन्धं निरूप्य तत्र रसनेन्द्रियस्य विद्यमानत्वात्तत्सम्बन्धिनामपि तत्र सम्बन्धमाह—हव्येति । हव्यं देवानामन्नम् । अस्मिन्नेवाऽन्ने मन्त्रेण तद्धव्यमारोप्यते तदा पुरोडाशादीनां लौकिकानां हव्यत्वं भवति । एवं कव्यं पितॄणामन्नम् । अमृतमतिथ्याद्यन्नम् । अयाचितप्राप्तं वा व्रतहेतुभूतम् । अन्नं ब्राह्मणभुक्तशेषम् । प्राणादिद्वारा ज्ञानसाधनं वा । तेषां भगवतो जिह्वा । रसानां च षड्विधानां हव्यादिषु सर्वत्र विद्यमानानाम् । चकारादस्मद्रसनेन्द्रियतदधिष्ठात्रोश्च स्थानम् । अनेन हव्यादिव्यतिरिक्तरसानां भगवज्जिह्वास्थानं न भवतीति विमर्शः । सर्वपदप्रयोगाद्भवतीत्यन्ते ॥ १ ॥ ❀ ❀ तथा सर्वेषामस्मदादीनामसूनां प्राणानां

१. उत्पत्तिस्थानेति क. ग. घ. ङ. २. निरूपिता इति क. ख. ङ. ३. तन्त्रेति क. ख. ङ. । ४. तत्त्वोपपादिततत्त्वेति क. ख. ङ. ५. येन इति ङ. ये इति नास्ति घ. ६. येऽमूर्त्ता इति घ. ७ तदिति नास्ति घ. ।

तदधिष्ठातुर्वायोः । चकाराद्घ्राणसम्बन्धिता सर्वेषाम् । नासे नासापुटे आधिदैविके । परमत्वमाधिदैविकत्वमेव । अयनं स्थानम् । पुटद्वयमपि सर्वेषां स्थानम् । तत्र घ्राणेन्द्रियं त्वश्विनादीनां स्थानम् । ओषधीनां च व्रीह्यादिरूपाणां । "तस्माल्लोमशा अन्तरतः प्राणा" इति श्रुतेः । बर्हिस्तुल्यत्वाचोषधीनां भगवतो घ्राणे । घ्राणमिति वक्तव्ये आध्यात्ममपि घ्राणमन्तर्निवेश्य घ्राणे इति । मोदप्रमोदौ सुगन्धविशेषौ । मोदो हि दूरायो वाति सुगन्धः । प्रमोदो हि सर्वगन्धाभिभावकः ॥ १ ॥ ❀ ❀ रूपाणामनेकविधानाम् । तेजसां नक्षत्रादीनाम् । भगवतश्चक्षुर्गोलकरूपम् । दिवः स्वर्गस्य सूर्यस्य च । चकारात्तत्सम्बन्धिनाम् । अक्षिणी पूर्ववत् । गोलकभेदेनेन्द्रियांशभेदो वा । कर्णौ गोलकरूपौ । दिशामस्मदादिश्रोत्रेन्द्रियदेवतानाम् । चकरादिन्द्रियाणां च । तीर्थानां गङ्गादीनाम् । कर्णौ स्थानमित्यर्थः । श्रोत्रमिन्द्रियमाकाशशब्दयोः । कर्णशष्कुल्यवच्छिन्ने नभस्युत्पन्नानां शब्दानां श्रोत्रेण ग्रहणाद्विषयाधारयोर्भगवदिन्द्रियं स्थानम् । वस्तूनां मध्ये ये सारभूताः सुवर्णादयः । उत्कृष्टरूपा वा देवतापरमार्थरूपाः । सौभगस्य सौन्दर्यस्य च । तत्सम्बन्धिनामन्येषां च । भगवद्गात्रं शरीरं स्थानम् । भाजनमिति । सर्वदा स्थानरूपं व्यवहारदशायामपि । अस्य भगवतस्त्वक्स्पर्शादीनां स्थानम् । मेधस्य पवित्रस्य । सर्वेषामेव पवित्र्यं भगवत्त्वगिन्द्रिये वर्त्तते । लोके हि जलाच्छुद्धिर्भवति । तत्र भगवतः प्रस्वेदरूपम् । अतो मेधस्य भगवत्त्वचोऽधिष्ठानत्वे सन्देहो न कर्तव्य इत्याह—चैव हीति । चकारेण मेधाश्रया गृहीताः । एवकारेण च त्वगेव स्थानं नाऽन्यदिति । हीति युक्तत्वम् ॥ ३ ॥ ४ ॥

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः**

अथ षष्ठाध्यायं विवरिषवः पूर्वापरभावनियामिकामध्यायसङ्गतिं वक्तुं प्रकरणार्थरूपामुत्पत्तिं विभजन्तस्तां वदन्ति अनित्य इत्यादिसार्द्धेन । तथा च, समागमस्य स्थानसापेक्षत्वात्तज्जननं समागमस्योपजीव्यमिति तत्पूर्वं निरूप्य समागमेन स्थानसम्बन्ध आधेयानामत्र निरूप्यत इत्युपजीव्योपजीवकभावः पौर्वापर्यनियामक इत्यर्थः । ननु पूर्वत्र स्थानजननं सप्तदशश्लोकोत्तरमुक्तम्, अत्र च तत्सम्बन्धो नवभिरेवोच्यते, न तु सर्वत्रेति । कथं जननसमागमयोरध्यायार्थत्वमित्यत आहुः स्थूलेत्यादिसार्द्धम् । तथा च, तेषु फलार्थं विचाररूपशेषिबोधनेनाध्यायार्थस्य शेषता स्फुटीक्रियत इति सर्वत्र तादर्थ्यात्तयोरध्यायार्थत्वं निर्बाधमित्यर्थः ॥ १ ॥ २ ॥ ३ ॥ कथं निरूप्यत इत्याकाङ्क्षायां तत्प्रकारं स्फुटीकुर्वन्ति पौरुषेत्यादि । चकाराच्छान्दोग्यसौबालादिभिर्मुण्डकादिभिश्च । परत इति परत्वात्, भावप्रधानो निर्देशः । तथा च, सर्ववेदान्तविचारपूर्वकं तन्निर्धारितप्रकारेण निरूप्यत इत्यर्थः ॥ ४ ॥ ननु वस्त्वभेदमात्रत्वनिरूपणमात्रावश्यकप्रस्तुतत्वात् श्रुतिनिर्द्धारितोर्थो माहात्म्यञ्चाप्रष्टत्वान्नात्यावश्यकमिति तत्किमित्युच्यते इत्याकाङ्क्षायामाहुः अमूर्त्तेत्यादि । सर्वत्रात्र निरूप्यमाणेषु हरेः सम्बन्धिषु सर्वेषु पदार्थेष्वमूर्त्तत्वरूपं बृहत्साधर्म्यं तेन वस्त्वभेदः सिद्धो भवति । तथा च, तदुपपादकत्वेन ब्रह्मणा निरूप्यते, शुकेन च स्थूलध्यानोपपादनार्थं निरूप्यत इतीदमप्यावश्यकमित्यर्थः ।

एवं सङ्गत्यादिकं निरूप्य मूर्त्तामूर्त्तपदार्थं विवेक्तुमेतदेव व्याकुर्वन्ति पूर्वेत्यादि । विशिष्ट इति, देहादिविशिष्टाः । पृथक्कृत्येति देहात्पृथक्कृत्य । सम्बन्ध इति आधेयत्वरूपः । तेन मूर्त्तत्वं नामानित्यत्वे सति परिच्छिन्नपरिमाणत्वम्, न तु परिच्छिन्नपरिणाम[3]त्वमात्रम् । अमूर्त्तत्वञ्च नित्यत्वे सति परिच्छिन्नत्वम् । इदमेव मूर्त्तामूर्त्तब्राह्मणे सिद्ध्यति, इदं साधर्म्यं यत्र तान्याहुः जीवेत्यादि, अस्य जीवप्रकरणत्वादिति योजना । साधनमित्याधिकारिस्वरूपम् । फलमिति चतुर्विधसुखात्मकम् । माहात्म्यमिति विरुद्धधर्माश्रयत्वादिरूपम् । चत्वार इति सम्बन्धः साधनं फलं माहात्म्यं चेत्यर्थः ।

वाचामित्यत्र पूर्वमिति 'पुरुषस्य मुखं ब्रह्म'त्यत्र पूर्वाध्याये । विधीयत इति 'अहं भवानि' त्यादि २-६-१२ सार्धपद्यत्रयेण विधीयत । विहितमिति इति 'लोकमयः पुमान्' २-६-४१ इत्यनेन विहितम् । इतीति एवं प्रकारेण विरुद्धधर्माश्रयत्वात् । देवतारूपा इति अस्मदाद्यं तद्धातुदेवतारूपाः । मुखमुपक्रम्यात्र सप्तधातूनामुक्तत्वात् । तत्सूचितमर्थमाहुः एवमित्यादि । आरोप्यत इति आवाह्य स्थाप्यते, न तु प्रसज्यते । प्राणादिद्वारेत्यादि । 'तस्मादन्नं ददत्सर्वाण्येतानि ददातीत्यादिश्रुत्युक्तम् । यद्यपि हव्यकव्यव्यतिरिक्तेषु मन्त्रेण नारोपः, तथाप्यभिसन्धिना तेषु बोध्यः । अन्य इति, हव्यव्यतिरिक्तरसस्यापि स्थानत्वाङ्गीकारे तुल्यन्यायेन लौकिकान्नस्यापि तत्स्थानत्वस्य सम्भवदुक्तिकत्वात्परिसङ्ख्यावैयर्थ्यापत्तिरिति सर्वपदेऽर्थसङ्कोचाभावो न युक्त इत्यस्वरसबीजं बोध्यम् ॥ १ ॥ ❀ ❀ आधिदैविकत्वं न स्फुटमित्यतः स्फुटीकुर्वन्ति परमत्वमित्यादि । ओषधीनामिति । अत्रापि प्रोक्षणसंस्कृता एव ते बोध्याः ॥ २ ॥ ❀ ❀ पूर्ववदिति, आध्यात्मिकमन्तर्निवेश्य द्विवचनमुक्तमित्यर्थः । क्लिष्टत्वात्पक्षान्तरमाहुः गोलकेत्यादि, तत्सम्बन्धिनामिति सुन्दराणाम् ॥ ३ ॥

---

१. अश्विनादीनामिति क. ख. घ. । २. लोमशान्तरत इति क. ख. । लोमशा इति ग. लोमरात् इति ङ. ३.परिमाणमात्रं पाठः ।

श्रीगिरिधरकृता बालप्रबोधिनी

लोका'नां जननं चोक्त्वा वह्न्यादीनां समागमः सूक्तोक्तेन प्रकारेण षष्ठेऽध्याये निरूप्यते ॥ १ ॥

अनित्ये जननं नित्ये परिच्छिन्ने समागमः ॥ नित्यापरिच्छिन्नतनौ प्राकट्यं सत्त्वतः स्वतः इत्युत्पत्तौ त्रिविधव्यवहारात् समागमस्य स्थानसापेक्षत्वात् पूर्वाध्याये महदादिक्रमेण लोकानां जननकथनेन स्थानं निरूप्य अस्मिन्नध्याये वह्न्यादीनां तत्र समागमो निरूप्यते—वाचामिति । वाचामस्मदादिवागिन्द्रियाणां तदधिष्ठातुर्वह्नेश्च तस्य भगवतो मुखं गोलकं क्षेत्रं स्थानम् । छन्दसां गायत्र्युष्णिग्बृहतीपङ्क्तिजगतीत्रिष्टुबनुष्टुपां सप्तानां तस्य सप्त त्वङ्मांसरुधिरमेदोमज्जास्नाय्वस्थिरूपा धातवः क्षेत्रम् । हव्यं देवानामन्नं, कव्यं पितॄणामन्नं, अमृतं तदुभयशेषो मनुष्याणामन्नं एषामन्नानां सर्वस्य मधुरतिक्ताम्लकटुकषायक्षारभेदेन षड्विधस्य रसस्य-चकारादस्मदादिरसनेन्द्रियस्य तदधिष्ठातुर्वरुणस्य च-तस्य जिह्वा रसनेन्द्रियगोलकं क्षेत्रम् । एवं सर्वत्रानुक्तमप्युन्नेयम् ॥ १ ॥ ❀ ❀ सर्वासूनां अस्मदादिप्राणानां तदधिष्ठातुर्वायोश्च तस्य नासे नासारन्ध्रे परमायने उत्तमक्षेत्रे । अश्विनोः अश्विनीकुमारयोः औषधीनां यवव्रीह्यादीनां मोदप्रमोदयोः सामान्यविशेषगन्धयोश्च तस्य घ्राणेन्द्रियं क्षेत्रम् ॥ २ ॥ ❀ ❀ रूपाणां शुक्लपीतहरितादीनां तेजसां रूपप्रकाशकानां च तस्य चक्षुरिन्द्रियं क्षेत्रम् । दिवः स्वर्गस्य सूर्यस्य च तस्याक्षिणी नेत्रगोलके क्षेत्रम् । दिशां तीर्थानां गङ्गादीनां च तस्य कर्णौ कर्णबिले स्थानम् । आकाशशब्दयोस्तु तस्य श्रोत्रमिन्द्रियं स्थानम् । एवं सर्वत्र षष्ठ्यन्तनिर्दिष्टानां प्रथमान्तनिर्दिष्टं क्षेत्रं द्रष्टव्यम् ॥ ३ ॥ ❀ ❀ वस्तूनां ये सारभूता सुवर्णादयस्तेषां सौभगस्य सौन्दर्यस्य च तस्य गात्रं शरीरं भाजनं स्थानम् । स्पर्शस्य वायोश्च सर्वमेधस्य समस्तयज्ञस्य च अस्य त्वक् स्थानम् । त्वगेव नान्यदित्येवकारार्थः । "यज्ञो वै विष्णुः" इति श्रुतिसिद्धत्वं तत्र हेतुं सूचयति—हीति ॥ ४ ॥

## हिन्दी अनुवाद

### विराट् स्वरूपकी विभूतियोंका वर्णन

**ब्रह्माजी कहते हैं**—उन्हीं विराट् पुरुषके मुखसे वाणी और उसके अधिष्ठातृदेवता अग्नि उत्पन्न हुए हैं । सातों छन्द❀ उनकी सात धातुओंसे निकले हैं । मनुष्यों, पितरों और देवताओंके भोजन करनेयोग्य अमृतमय अन्न, सब प्रकारके रस, रसनेन्द्रिय और उसके अधिष्ठातृदेवता वरुण विराट् पुरुषकी जिह्वासे उत्पन्न हुए हैं ॥ १ ॥ ❀ ❀ उनके नासाछिद्रोंसे प्राण, अपान, व्यान, उदान और समान—ये पाँचों प्राण और वायु तथा घ्राणेन्द्रियसे अश्विनीकुमार, समस्त ओषधियाँ एवं साधारण तथा विशेष गन्ध उत्पन्न हुए हैं ॥ २ ॥ ❀ ❀ उनकी नेत्रेन्द्रिय रूप और तेजकी तथा नेत्र-गोलक स्वर्ग और सूर्यकी जन्मभूमि हैं । समस्त दिशाएँ और पवित्र करनेवाले तीर्थ कानोंसे तथा आकाश और शब्द श्रोत्रेन्द्रियसे निकले हैं । उनका शरीर संसारकी सभी वस्तुओंके सारभाग तथा सौन्दर्यका खजाना है ॥ ३ ॥ ❀ ❀ सारे यज्ञ, स्पर्श और वायु उनकी त्वचासे निकले हैं; उनके रोम सभी उद्भिज्ज पदार्थोंके जन्मस्थान हैं, अथवा केवल उन्हींके, जिनसे यज्ञ सम्पन्न होते हैं ॥ ४ ॥

**केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युताम् । बाहवो लोकपालानां प्रायशः क्षेमकर्मणाम् ॥ ५ ॥**
**विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य च । सर्वकामवरस्यापि हरेश्चरण आस्पदम् ॥ ६ ॥**
**अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः । पुंसः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृतेः ॥ ७ ॥**
**पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद । हिंसाया निर्ऋतेर्मृत्योर्निरयस्य गुदः स्मृतः ॥ ८ ॥**

श्रीधरस्वामिविरचिता भावार्थदीपिकाव्याख्या

केशा मेघानां क्षेत्रं पूर्वं तथोक्तेः श्मश्रूणि विद्युतां पादकरनखानि शिलालोहानामिति सादृश्यादूह्यम् । क्षेमकर्मणां पालनकर्तॄणाम् ॥ ५ ॥ ❀ ❀ विक्रमः पादन्यासो भूरादिलोकानामास्पदमाश्रयः । भूरादिशब्दानामव्ययत्वात्षष्ठ्या लुक् । क्षेमो लब्धरक्षणं शरणं भयाद्रक्षणम् । सर्वेषां कामानां वरस्य वरणस्यापि हरेरंघ्रिरास्पदम् ॥ ६ ॥ ❀ ❀ वीर्यस्य

१. अनित्ये जननं नित्ये परिच्छिन्ने समागमः । नित्यापरिच्छिन्नतनौ प्राकट्यं चेति सा त्रिधा ॥ उत्पत्तिस्थानसम्बन्धरूपा षष्ठे निरूप्यते । स्थूलस्यामूर्तरूपस्य तदभेददृशिः फलम् ॥ नारायणपरा वेदा इत्यनेन निरूपितम् । सामान्येन तदेवात्र विस्तरेण निरूप्यते ॥ पौरुषेण च सूक्तेन निर्धारितमिहोदितम् । कार्यस्य वस्त्वभेदोऽपि माहात्म्यं परतस्तथा ॥ अमूर्तरूपं साधर्म्यं सर्वत्रैव हरेर्हृत् । तेन सिद्धो वस्त्वभेदः स्थूलं ध्यानं च सिद्ध्यति—इति श्रीमद्वल्लभाचार्याः स्वसुबोधिन्यां कारिका आहुः ।

❀ गायत्री, त्रिष्टुप्, अनुष्टुप्, उष्णीक्, बृहती पङ्क्ति जगती ये सात छन्द हैं ।

शुक्रस्य शिश्नोऽधिष्ठानं उपस्थस्त्विन्द्रियं प्रजापत्यानंदः संतानार्थः संभोगस्तेन या निर्वृतिस्तापहानिस्तस्याः ॥ ७ ॥ ❀ ❀ परिमोक्षस्य मलत्यागस्य पायुरिंद्रियं गुदस्थानम् । निर्ऋतेरलक्ष्म्याः ॥ ८ ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

यद्वा शरणं मोक्षः । 'मोक्षः शांतिश्च शरणं निर्वाणं निर्वृतिस्तथा' इत्यभिधानात् । 'भेजे खगेंऽद्रध्वजपादमूलम्' इत्युक्तेर्मोक्षस्यापि पादमूलमेव क्षेत्रम् ॥ ५ ॥ ६ ॥ ❀ ❀ 'उपस्थो हि सर्वेषामानंदानामवधिः' इति श्रुतेः ॥ ७ ॥ ❀ ❀ नारदेति । एतत्कथनं मंदमतीनां सुबोधार्थमेव त्वं त्वन्येषामपि नारमज्ञानं वसीति भावः अत्र यद्यपि 'वह्नींद्रोपेंद्रमित्रकाः' इति क्रमप्राप्तेर्मित्रस्यैवाधिष्ठातृदेवत्वं लभ्यते तथापि 'गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट्' इति वक्ष्यमाणवाक्यप्रामाण्येन मृत्युरेवाधिष्ठातृत्वेन विवक्षितः । पायुर्यमस्य मित्रस्येत्येतदुपकारकत्वमेवाभिप्रेतम् । अधिष्ठातुर्मित्रस्य पायुरिंद्रियं क्षेत्रमिति व्याख्यानं तु प्रक्रमभंगापत्तेरुपेक्षितम् । पराभूतेः पराभवस्य ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

पूर्वमिति ईशस्य केशान् विदुरम्बुवाहानिति ह्येतत्स्कन्धीयप्रथमाध्यायस्य चतुस्त्रिंशश्लोके तथोक्तत्वादित्यर्थः ॥५-१२॥

## श्रीमद्वीरराघवव्याख्या

उद्भिज्जजातीनां सर्ववृक्षाणां यैर्वृक्षैर्यज्ञः संभृतः साधितः तेषामेव तद्रोमाणि स्थानं शिलालोहाभ्रविद्युतामस्य केशश्मश्रुनखानि स्थाने नखानि शिलालोहयोः स्थानमभ्रविद्युतोः केशश्मश्रूणीति विवेकः ॥ ५ ॥ ❀ ❀ क्षेमकर्मणां रक्षाकारिणां लोकपालानां इंद्रादीनां तद्बाहवः स्थानं भूर्भुवः स्वरिति षष्ठीबहुवचनांतं भूरादीनां त्रयाणां लोकानां विक्रमस्तस्य त्रिविधपादविन्यासः स्थानं क्षेमस्य प्राप्तरक्षणस्य शरणस्य चानिष्टनिवारणस्य सर्वेषां कामानां वरस्य श्रेष्ठस्यापि हरेश्चरणं पाद आस्पदं आश्रयः ॥ ६ ॥ ❀ ❀ अपां वीर्यस्य शुक्रस्य सर्गस्य सृष्टेः पर्जन्यस्य प्रजापतेश्च पुंसो भगवतः शिश्न उपस्थेंद्रियाधिष्ठानमास्पदमित्यर्थः । प्रजात्यानंदः संतानार्थं संभोगस्तेन या निर्वृतिस्तापहानिस्तस्यास्तदुपस्थेन्द्रियमाश्रयः ॥ ७ ॥ ❀ ❀ यमस्य मित्रस्य परिमोक्षस्य मलत्यागस्य च तस्य पाय्विंद्रियमाश्रयः हिंसादीनां तद्गुद आश्रयः ॥ पायुरिंद्रियं गुदमधिष्ठानम् ॥ ८ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

यैरुद्भिज्जातिविशिष्टैः पालाशादिवृक्षैर्यज्ञः संभृतः संपादितः यज्ञकारिभिरिति शेषः । तेषामुद्भिज्जजातीनां वृक्षाणां रोमाणि हरे रोममूलानि क्षेत्रीयैर्यज्ञैः संभृतो यज्ञादन्यः कार्यविशेषः साधितस्तेषां हरेरोमांतर्भागाः अयं विकल्पो वाशब्दसूचितात् याज्ञिकारोममूलस्था रोमांतस्थास्तु तत्पर इति वचनात् ज्ञायते तु शब्द उक्तार्थावधृतौ वर्त्तते । अस्य हरेः केशा अभ्राणां श्मश्रूणि विद्युतां शिलालोहानां नखानि क्षेत्रं पुनर्भवः कररुहोनखोऽस्त्रीनखरोस्त्रियामित्यमरः । हरेः श्मश्रवाश्रया विद्युच्छिला लोहा नखाश्रया इति वचनात् ॥ ५ ॥ ❀ ❀ ब्राह्मणवैश्यादीन् वर्जयितुं प्रायश इत्युक्तं भूर्भुवः स्वरिति । भुवनत्रयमस्य हरेर्विक्रमः पादविक्षेपस्थानं क्षेमस्य मंगलस्य प्राप्तरक्षाया वा शरणस्य मोक्षस्य च ॥ ६ ॥ ❀ ❀ सर्वकामवरस्य च सर्वाभिमतलाभस्य च हरेश्चरणमास्पदं दातृत्वेनेति शेषः । मोक्षः शांतिश्च शरणं निर्वाणं चाभिधीयत इति वचनात् शरणमोक्षः भेजे खगेंद्रध्वजपादमूलमित्यतो मोक्षोऽपि पादमूलमिति भावः स्वोत्पत्त्यंगेषु देवानामन्येषां पादमूलतः मुक्तिस्तु विहिता विष्णोर्निर्दिष्टेषु यथावच इति वचनाच्च शब्दसूचितान्नोक्तविरोधः ॥ ७ ॥ ❀ ❀ अपां जलस्य वीर्यस्य रेतसः सर्गस्य सृष्टेर्जलाभिमानिनः पर्जन्यस्य सर्गाभिमानिनो दक्षप्रजापतेः शिश्नस्य च परमपुंसः शिश्नं क्षेत्रं प्रजापतिः जननमानंदः सुखं ताभ्यां सहिता या निर्वृतिः अथवा प्रजापतिर्मैथुनक्रिया तन्निमित्तादानंदाद्या निर्वृतिस्तस्याः हरेः उपस्थं गुह्येंद्रियं तु शब्दाद् गुह्येंद्रियस्य च क्षेत्रं मित्रनाम्नो देवस्य पाय्विंद्रियस्य तद्विषयस्य परिमोक्षस्य गुदक्रियाविषयस्य यमनाम्नो देवस्य च पुंसः पाय्विंद्रियं क्षेत्रमित्येतन्मंदमतीनां सुबोधनार्थमन्वीयते ॥८॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

यैर्वेति वा शब्दः समुच्चये । यैर्द्रव्यैर्घृतादिभिर्यज्ञः सम्भृतस्तेषां चेत्यर्थः । तु पादपूरणे ॥ ५ ॥ ❀ ❀ बाहव इत्यर्द्धकम् । बाहवः प्रायशः प्राचुर्य्येण लोकपालानां क्षेत्रम् । अन्येषामपि क्षेमकर्म्मणां पालनकर्तॄणामित्यर्थः ॥ ६ ॥ ❀ ❀ विक्रम इति परमात्मविराजोरभेदेनोक्तिः ॥ ७ ॥ ❀ ❀ प्रजात्यानन्दाभ्यां या निर्वृतिस्तस्याः ॥ ८ ॥ ९ ॥ १० ११ ॥ ॥ १२ ॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

उद्भिज्जजातीनां सर्व्ववृक्षाणां, यैर्वृक्षैर्यज्ञः सम्भृतस्तेषामेव नान्येषामिति वा । केशा अभ्राणां मेघानां क्षेत्रम्, ईशस्य केशान् विदुरम्बुवाहानिति पूर्व्वोक्तेः । श्मश्रूण्यपि मेघानामेव, वर्णसाम्यात् । नखानि महाकान्तिमन्ति विद्युतां श्वेतरक्तशिलालोहानामित्यपि सादृश्यादूह्यम् ॥ ५ ॥ ❀ ❀ क्षेमकर्म्मणां पालनकर्तॄणाम् ॥ ६ ॥ ❀ ❀ विक्रमः पादन्यासो भूर्भुवः

स्वरिति भूरादिलोकानाम् अव्ययत्वात् षष्ठ्या लुक् । क्षेमस्य कल्याणस्य । शरणस्य रक्षकवस्तुनः । सर्व्वेषां कामानां वरस्य ॥ ७ ॥ ❀ ❀ वीर्य्यस्य शुक्रस्य । पर्जन्यस्य वृष्यमाणस्य । शिश्नोऽधिष्ठानम् । उपस्थ इन्द्रियम् । प्रजात्यानन्देन सन्तानार्थसंप्रयोगेण निर्वृतिस्तापहानिस्तस्याः ॥ ८ ॥

## श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः

अस्य केशश्मश्रुनखानि शिलालोहाभ्रविद्युतां क्षेत्रम् । तत्र केशा अभ्राणां मेघानां श्मश्रूणि विद्युतां पादकरनखानि शिलालोहानामिति विवेकः । तस्य बाहवः प्रायशः क्षेमः प्रजापालनमेव कर्म येषां तेषां लोकपालानामिंद्रादीनां क्षेत्रम् । कचिदाऽऽपदि पालनं न कुर्वन्ति इंद्रारिव्याकुलं लोकमित्युक्तेः । अतः प्रायश इत्युक्तम् ॥ ५ ॥ ❀ ❀ हरेर्विक्रमः पादन्यासः भूरादिलोकानामास्पदमाश्रयः भूरादीन्यव्ययानि अतः षष्ठ्या लुक् । क्षेमस्य प्राप्तरक्षणस्य शरणस्यानिष्टाद्रक्षणस्य किंबहुना सर्वेभ्यः कामेभ्य ऐहिकामुष्मिकेभ्यः वरस्य श्रेष्ठस्य मोक्षस्यापि हरेश्चरणमास्पदम् ॥ ६ ॥ ❀ ❀ पुंसः वैराजस्य शिश्नः उपस्थेंद्रियाधिष्ठानम् अपां वीर्यस्य शुक्रस्य सर्गस्य सृष्टेः पर्जन्यस्य प्रजापतेश्च आस्पदम् । पुंसः उपस्थस्तु प्रजात्यानंदेन संतानहेतुकभोगेन या निर्वृतिः तापहानिस्तस्या आस्पदम् ॥ ७ ॥ ❀ ❀ हे नारद पुंसः पायुरिंद्रियं यमस्य मित्रस्य परिमोक्षस्य मलत्यागस्य च आस्पदम् । तस्य गुदं पायुरिंद्रियस्थानम् हिंसादीनास्पदम् ॥ ८ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

तत्र लोमानि सन्ति तान्युद्भिज्जादीनां स्थानानि । ऊर्ध्वं भिनत्तीत्युद्भिद् अङ्कुरादि[1]तस्माज्जाता उद्भिजा वृक्षादयः । तेषां [illegible] । सर्वे वृक्षा इति यावत् । अथवा ये पापवृक्षा विभीतकादयस्तेषां न तानि स्थानानीत्याह—यैर्वेति । यैः पलाशादिभिर्यज्ञः सम्भृतो निष्पादितः । सम्भारहेतवो वा अश्वत्थादयः । भगवतः केशश्मश्रुनखानि शिलालोहाभ्रविद्युतां स्थानानि । तत्र शिलाया नखानि लोहस्य च । अभ्राणां केशाः । विद्युतां श्मश्रूणि । हिरण्यश्मश्रुत्वात् । बाहवो भगवत इन्द्रियरूपाः पालनकर्त्तारो देवा इन्द्रादयः तेषां स्थानानि । अन्येषामपि धर्मकर्तॄणां भगवद्बाहवः स्थानम् । जगद्रक्षकत्वात् । "सप्तभिर्धार्यते मही" ति वाक्यात् । प्रायश इति सकामधर्मकर्त्तृव्युदासार्थमुक्तम् ॥ ५ ॥ ❀ ❀ भगवतो विक्रमः पादविक्षेपो भूरादीनां स्थानम् । भूरादिशब्दा अव्ययानि । तेन षष्ठ्यन्तेऽप्येतदेव रूपम् । लोके क्षेमपदार्थस्य लब्धपरिपालनात्मकस्य । शरणपदार्थस्य चाऽऽश्रितरक्षणरू[2]पस्य । चकारात्प्रपत्तिभक्त्योश्च भगवद्विक्रमः स्थानम् । यद्यपि पादावेव स्थानं तथापि क्रियासहिताविति विक्रम उक्तः । सर्वकामवरस्य सर्वेषां का[3]मानामाशिषां वरस्य च देवप्रसादनिरूपकस्य । अपिशब्दादणिमादीनां मोक्षस्य च हरेश्चरण आस्पदं स्थानम् ॥ ६ ॥ ❀ ❀ अपां जलानाम् । वीर्यस्य रेतसः । सर्गस्य सृष्टेः । पर्जन्यस्य मेघस्य । प्रजापतेर्ब्रह्मणस्त[4]स्य वक्तुः । इदानीं सृष्ट्यभिनिवेशाभावान्ममेति नोक्तम् । शिश्नो गोलकम् । उपस्थ इन्द्रियम् । तुशब्दः पूर्वव्यावृत्त्यर्थो लोकप्रसिद्धव्यावृत्त्यर्थो वा । प्रजापतिनिमित्तो य आनन्दः स्वभार्यायां ऋतुकाले सम्भोगजनितो य आनन्दः । निर्वृति[5]ः कामस्य उभयोः । अथवा । प्रजातिः सेकः । आनन्दः सुखं स्पर्शनिमित्तम् । निर्वृतिः कामशान्तिः । त्रयाणां भगवदिन्द्रियं स्थानम् ॥ ७ ॥ ❀ ❀ भगवतः पायुः स्थानं यमादीनाम् । यमः पितृराजः । मित्रः पा[6]य्वधिष्ठातृ[7]देवता । परिमोक्षस्य मलत्यागलक्षणस्य सव्यापारस्येन्द्रियस्य । नारदेति सम्बोधनं ये ये कलहकर्त्तारस्तेषामपि तत्स्थानमिति सूचनार्थम् । अथवा । नारदो हरीतकीरूपः । अनुद्भूतकलहानां कलहमुद्भाव्य तद्द्वारा तेषां निवारकत्वात् । हिंसायाः प्राणिवधस्य । निरृतेर्दिक्पतिरूपायाः । मृत्योर्मारकस्य । निरयस्य नरकस्य । भगवतो गुदः स्थानम् । असमीचीनानां तत्स्थानं वदन् भीतः सन्नाह—स्मृत इति । एवं हि स्मर्यते । पायुगुदयोर्गोलकेन्द्रियरूपत्वम् ॥ ८ ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः ।

लोमान्युद्भिज्जजातीनामित्यत्र जातिपदं व्यवहारमालम्ब्योक्तम् । प्रकरणादिति ज्ञापनायाहुः जातय इति ॥ ५ ॥ ❀ ❀ इदानीमिति सृष्टिकरणाभिनिवेशे यद्यपि तदेव स्थानम्, तथाप्यभिनिवेशाभावान्नोक्तमित्यर्थः । लोकप्रसिद्धव्यावृत्त्यर्थो वेति । उपशब्दोक्त्यैव पूर्वव्यावृत्तेः सम्भवादयं पक्ष उक्तः । नारदस्याग्रे स्थानान्तरकथनात्पक्षान्तरमाहुः । अथवा नारदेत्यादि ॥ ७ ॥ ८ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

यैस्तु यज्ञः सम्भृतः सम्पादितो भवति तेषामुद्भिज्जजातीनां वृक्षाणां तस्य रोमाणि स्थानम् । शिलालोहाभ्रविद्युतामस्य केशश्मश्रुनखानि स्थानम् । तत्र केशा अभ्राणां मेघानां स्थानम् । 'ईशस्य केशान्विदुरम्बुवाहान्' इति पूर्वमुक्तत्वात् । श्मश्रूणि

१. दङ्कुरादिः तस्मादिति क. । २. रूपपास्येति क. ख । ३. कामनानामिति क. ख. ङ । ४. स्वस्येति घ । ५. निवृत्तेरिति घ. ङ । ६. पायोरिति घ. ङ । ७. अधिष्ठात्री इति ग. ङ ।

विद्युतां स्थानं हिरण्यश्मश्रुत्वात् । पादकरनखानि शिलालोहानां स्थानमिति विवेकः ॥ ५ ॥ ❀ ❀ लोकपालानामिन्द्रादीनां तस्य बाहवः स्थानम् । तत्र ज्ञापकमाह—प्रायशः क्षेमकर्मणां पालनकर्तॄणामिति । वृष्ट्यादिना पिपीलिकादिविनाशस्यापि सम्भवात् प्रायोग्रहणम् । भूर्भुवस्स्वरिति षष्ठीबहुवचनान्तमव्ययत्वात्तस्यालुक् । भूरादीनां त्रयाणां लोकानां विक्रमस्तस्य त्रिधा पादविन्यासः स्थानम् । क्षेमस्य प्राप्तसंरक्षणस्य शरणस्यानिष्टनिवारणस्य सर्वेषां कामानां कामयमानानां पदार्थानां वरस्य वरणस्यापि हरेश्चरण आस्पदमाश्रयः ॥ ६ ॥ ❀ ❀ अपां वीर्यस्य शुक्रस्य सर्गस्य सृष्टेः पर्जन्यस्य वृष्ट्यभिमानिदेवस्य प्रजापतेश्च पुंसो विराट् पुरुषस्य शिश्न उपस्थेन्द्रियाधिष्ठानं स्थानम् । प्रजात्यानन्दः सन्तानार्थं सम्भोगस्तेन निर्वृतिस्तापहानिस्तस्यास्तदुपस्थेन्द्रियमाश्रयः ॥ ७ ॥ ❀ ❀ नारदेति सम्बोधनं सावधानतया श्रवणार्थादरद्योतकम् । यमस्य मित्रस्य परिमोक्षस्य मलत्यागस्य च तस्य पाय्विन्द्रियं स्थानम् । हिंसायाः प्राणिपीडायाः निर्ऋतेः निर्ऋतिनामराक्षसस्य मृत्योर्मारकस्य देवस्य निरयस्य नरकस्य च स्थानतया तस्य गुदः पाय्विन्द्रियाधिष्ठानं स्मृतस्तत्त्वज्ञैः कथित इत्यर्थः ॥ ८ ॥

## हिन्दी अनुवाद

उनके केश, दाढ़ी-मूँछ और नखोंसे मेघ, बिजली, शिला एवं लोहा आदि धातुएँ तथा भुजाओंसे प्रायः संसारकी रक्षा करनेवाले लोकपाल प्रकट हुए हैं ॥ ५ ॥ ❀ ❀ उनका चलना-फिरना भूः भुवः स्वः—तीनों लोकोंका आश्रय है। उनके चरणकमल प्राप्तकी रक्षा करते हैं और भयोंको भगा देते हैं तथा समस्त कामनाओंकी पूर्ति उन्हींसे होती है ॥ ६ ॥ ❀ ❀ विराट् पुरुषका लिङ्ग जल, वीर्य, सृष्टि मेघ और प्रजापतिका आधार है, तथा उनकी जननेन्द्रिय मैथुनजनित आनन्दका उद्गम है ॥ ७ ॥ ❀ ❀ नारदजी! विराट् पुरुषकी पायु-इन्द्रिय यम, मित्र और मलत्यागका तथा गुदाद्वार हिंसा, निर्ऋति, मृत्यु और नरकका उत्पत्तिस्थान है ॥ ८ ॥

**पराभूतेरधर्मस्य तमसश्चापि पश्चिमः । नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः ॥ ९ ॥**
**अव्यक्तरससिन्धूनां भूतानां निधनस्य च । उदरं विदितं पुंसो हृदयं मनसः पदम् ॥१०॥**
**धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च । विज्ञानस्य च सत्त्वस्य परस्यात्मा परायणम् ॥११॥**
**अहं भवान् भवश्चैव त[1] इमे मुनयोऽग्रजाः । सुरासुरनरा नागाः खगा मृगसरीसृपाः ॥१२॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तमसोऽज्ञानस्य पश्चिमः पृष्ठभागः । गोत्राणां गिरीणामस्थिसंघातः ॥ ९ ॥ ❀ ❀ अव्यक्तं प्रधानं रसोऽन्नादिसारः सिंधवः समुद्रास्तेषां निधनस्य लयस्य उदरं पदं स्थानं विदितं ज्ञानिभिः । मनसोऽस्मदादिलिंगशरीरस्य ॥ १० ॥ ❀ ❀ तुभ्यं तव कुमाराणां सनकादीनां भवस्य श्रीरुद्रस्य आत्मा चित्तं परमयनम् ॥ ११ ॥ ❀ ❀ एवं तावत्परमेश्वराज्जातं विश्वं ततो न भिन्नम् । यथा कुंडलं सुवर्णान्न पृथक् । स तु सर्वनियंता सर्वप्रकाशको नित्यमुक्त इत्यर्थादुक्तम् । एतदेव पुरुषसूक्तार्थकथनेन दृढयति । तत्र सहस्रशीर्षेत्यर्धर्चस्य ब्राह्मणोऽस्य मुखमासीदित्यादेश्च ऋक्त्रयस्यार्थः पूर्वाध्याय एव दर्शितः । पुरुष एवेदं सर्वमित्यस्यार्थं दर्शयति अहं भवानिति सार्धैस्त्रिभिः । ते अग्रजा इमे सनकादयो मरीच्यादयश्च । नागा गजाः ॥१२ ॥१३॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

निधनस्येति । प्रलयस्येत्यर्थः । तदानीं सर्वेषां तत्र लयादिति व्याख्यालेशः ॥ ११ १२ ॥

## श्रीमद्वीरराघवव्याख्या

पराभूतेरलक्ष्म्याः अधर्मस्य तमसोऽज्ञानस्यापि पश्चिमः तत्पृष्ठभाग आश्रयः नदनदीनां तन्नाड्यः स्थानं गोत्राणां गिरीणां तदस्थिसंघः स्थानम् ॥ ९ ॥ ❀ ❀ अव्यक्तं प्रधानं रसोऽन्नादिरसः सिंधवः समुद्राः तेषां भूतानां निधनस्य लयस्य च तदुदरं स्थानं विदितं मनसः सर्वदेहिमनस्तत्त्वस्य पुंस ईश्वरस्य यद्धृदयं तत्पदं स्थानम् ॥ १० ॥ ❀ ❀ धर्मस्य मम चतुर्मुखस्य तुभ्यं तव कुमाराणां सनकादीनां भवस्य रुद्रस्य विज्ञानस्य च तत्त्वस्य महत्तत्त्वस्य परस्य भगवतः आत्मान्तःकरणं परायणं श्रेष्ठस्थानम् ॥ ११ ॥ ❀ ❀ एवं परमात्मनो जातं कृत्स्नं जगत्तद्विभूतिभूतं तच्छरीरत्वेन ततो न विविक्तमित्युक्तं एतदेव पुरुषसूक्तार्थकथनेन प्रथयति तत्र सहस्रशीर्षेत्यर्द्धर्चस्य ब्राह्मणोऽस्य मुखमासीदित्यादेश्चार्थः पूर्वाध्याये कथितः । पुरुष एवेदं सर्वमित्यस्यार्थमाह अहमित्यादिभिः सार्द्धैस्त्रिभिः । अहं चतुर्मुखः भवान्नारदः भवो रुद्रः अग्रजाः मुनयः सनकादयः ॥ १२ ॥

---

१. प्रा० पा.—य इमे ।

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

हिंसादीनां पुंसो गुदो गुदमपानद्वारं क्षेत्रं पराभूतेः पराजयस्याऽलक्ष्म्या याऽधर्मस्य पापस्य तदभिमानिनोऽधर्मस्य कलेश्च तमसस्तमोगुणस्य च पश्चिमः पृष्ठभागः क्षेत्रम् ॥ ९ ॥ ❀ ❀ नदनदीनां शोणगंगादीनां तु शब्दादितरनदीनां च पुंसो नाड्यः क्षेत्रम् । गोत्राणां पर्वतानां हरेरस्थ्नां संहतिः क्षेत्रम् । अव्यक्तस्य मूलप्रकृतेः रसादीनां मधुरादीनां सिंधूनां समुद्राणां भूतानां जीवानां निधनस्य संहारस्य च ॥ १० ॥ ❀ ❀ पुंस उदरं क्षेत्रमिति विदितं मनसः परस्य हृदयं पदं क्षेत्रं धर्मस्य सुकृतस्य तदभिमानिनो धर्माख्यदेवस्य चतुर्मुखनाम्नो मम तुभ्यं तव कुमाराणां सनकादीनां चतुर्णां भवस्य रुद्रस्य च विज्ञानस्य तत्त्वस्य च तदभिमानिन्याः सरस्वत्याश्च परस्य पुंस आत्मा मध्यदेहः परायणं कुमारब्रह्मरुद्राद्या हरेर्मध्यात्समुद्गता इत्यनेनात्मा जीवे धृतौ देहेत्याद्यभिधानेनापि सिद्धं सृजामि तन्नियुक्तोऽहमिति यत्सर्वस्वातंत्र्यं हरेरुक्तं तत्पुरुषसूक्तसंवादेन विवृणोति । अहं भवानित्यादिना अग्रजा मुनयः सनकादयः ॥ ११ ॥ १२ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

पायुरिन्द्रियम् । परिमोक्षस्य मलत्यागस्य । गुदः पायुर्गोलकम् । निर्ऋतेरलक्ष्म्याः । मृत्योरिन्द्रियाधिष्ठातुः । तत्र यद्यपि वह्नीन्द्रोपेन्द्रमित्रकाः इति क्रमप्राप्तेर्मित्रस्यैवाधिष्ठातृदेवत्वं लभ्यते, तथापि गुदं मृत्युरपानेन नोदतिष्ठत्ततो विराडिति वक्ष्यमाण-वाक्यप्रामाण्येन मृत्युरेवाधिष्ठातृत्वेन विवक्षितः । पायुर्यमस्य मित्रस्येति मित्रस्य तदुपकारकत्वमेवाभिप्रेतम् । अधिष्ठातुर्मित्रस्य पायुरिंद्रियं क्षेत्रमिति व्याख्यानं तु प्रक्रमभङ्गापत्तेरुपेक्षितम् ॥ ९ ॥ ❀ ❀ तमसोऽज्ञानस्य । पश्चिमः पृष्ठभागः । गोत्राणां पर्वतानाम् ॥ १० ॥ ❀ ❀ अव्यक्तं प्रधानम् । रसोऽन्नादिसारः । भूतानां निधनस्य प्राणिमात्रलयस्य ॥ ११ ॥ ❀ ❀ तुभ्यं तव । कुमाराणां सनकादीनां भवस्य श्रीरुद्रस्य । विज्ञानस्य बुद्धेः । सत्त्वस्य चित्तस्य । आत्मनः कारणम् ॥ १२ ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पराभूतेः पराभवस्य अधर्मस्य अनृतादेः तमसः अज्ञानस्य च पश्चिमः पृष्ठिभागः आस्पदम् । नदनदीनां नाड्यः गोत्राणां गिरीणां च तस्य अस्थ्नां संहतिः संघातः आस्पदम् ॥ ९ ॥ ❀ ❀ अव्यक्तस्य प्रधानस्य रसस्य अनादिसारस्य सिंधूनां समुद्राणां भूतानां निधनस्य लयस्य च पुंसः उदरं पदं स्थानं विदितम् । पुंसः हृदयं मनसः पदम् ॥ १० ॥ ❀ ❀ परस्य परमात्मनः आत्मा चित्तम् । धर्मस्य मम चतुराननस्य तुभ्यं नारदस्य कुमाराणां सनकादीनां भवस्य शिवस्य विज्ञानस्य जीवमात्रस्य सत्त्वस्य प्राणिमात्रस्य परायणमुत्कृष्टमयनम् ॥ ११ ॥ ❀ ❀ एवं तावद्भगवतः उत्पन्नं विश्वं कार्यत्वेन भिन्नमपि कारणनिरपेक्ष-स्थितिप्रवृत्त्याद्यभावात्तदभिन्नं यथा पृथिव्याः ओषधयः भिन्नस्वरूपा अप्यभिन्नाः एतदेव पुरुषसूक्तार्थकथनद्वारा दृढयति तत्र सहस्रशीर्षेत्यर्द्धर्चस्य ब्राह्मणोऽस्य मुखमासीदित्यादेश्चार्थः पूर्वाध्याये प्रकाशितः । इदानीं पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यमित्य-स्यार्थमाह अहमिति सार्द्धैस्त्रिभिः । ते अग्रजाः मुनयः सनकादयः ॥ १२ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

पराभूतेः पराजयस्य । अधर्मस्य पापस्य । तमसः अज्ञानस्य । अन्धकारस्य वा । पश्चिमः [1]पृष्ठिभागः आश्रयः । चकारात्सं-सारस्याऽपि । भगवतो नाड्यो नदनदीनामाश्रयः । नदाः शोणभद्रादयः । नद्यो यमुनाद्याः । गोत्राणां पर्वतानाम् । अस्थिसंहतिर-स्थिसंघात आश्रयः ॥ ९ ॥ ❀ ❀ अव्यक्तं प्रकृतिः । रससिन्धूनां क्षारादिसमुद्राणाम् । भूतानां पृथिव्यादिपञ्चभूतानाम् । अस्मदादीनां च । निधनस्य प्रलये प्रवेशस्य । चकारात्प्रलयानाम् । उदरं भगवतः स्थानम् । तथात्वे प्रमाणम्—विदितमिति । पुंस उदरमिति सम्बन्धः । अग्रेऽपि भगवतो हृदयमस्मदादीनां मनसः पदं स्थानम् ॥ १० ॥ ❀ ❀ धर्मस्य [2]ब्रह्मणः स्तनाज्जातस्य । मम वक्तुश्चतुर्मुखस्य । तुभ्यं तव । अथवा । तव यत्प्रयोजनं रूपं भक्तिजनकं तस्य । चकारादन्येषां भक्तानाम् । कुमाराणां सनका-दीनाम् । भवस्य महादेवस्य । चकाराज्ज्ञानिनां शुकादीनाम् । विज्ञानस्य । तत्त्वस्य महत्तत्त्वस्य । चकारात्सूत्रस्य । परमात्मा परमस्य आत्मा अन्तःकरणम् । परायणं स्थानमित्यर्थः ॥ ११ ॥ ❀ ❀ एवं सर्वेषां परिच्छिन्नानामुत्पत्तिमुक्त्वा तदर्थमेतदुक्तं तदाह—अहमिति सार्द्धैस्त्रिभिः-ब्रह्मादयः सर्वे भगवत्स्वरूपाः । समुदायो भगवान् । प्रत्येकं त एवेत्यपरे । अतः परं फलनिरूपणार्थ-मधिकारिणं साधनं च[3] निरूपयत् पुरुषसूक्ते तन्निरूपितत्वात्तत्प्रकारेणैव निरूपयति । "पुरुष एवेदं सर्व[4]" मिति वाक्ये इदं गुणत्रयकार्यं श्लोकत्रयेणोच्यते । तत्र अहं ब्रह्मा । भवान्नारदः भवो महादेवः । चका[5]रात् ये सम्बन्धिनः । एवं[6] कारेण तेषु सन्देहाभाव उक्तः । विशेषरूपेणाऽपि ते भगवन्त इत्यर्थः । ये इमे मरीच्यादयः । अन्येऽपि मुनयः । ते अग्रजास्तव ज्येष्ठभ्रातरः

---

१. पृष्ठभाग इति घ. । २. ब्रह्मणस्तनादित्यविसर्गः पाठः सर्वेषु पुस्तकेषु । ३. चकारो नास्ति घ । ४. सर्वमितीति ग. घ. ङ । ५. चकारात्रयसंबन्धिन इति क० । ६. एवं कारेणेति ग. ङ० ।

सनकादयः । एते शुद्धसत्त्वकार्याः । सुरा मिश्रसत्त्वकार्याः । असुरा रजोमिश्रकार्याः । नगादयस्तमोमिश्रकार्याः । नागाः पर्वताः । नागा गजाः । खगा पक्षिणः । मृगा हरिणादयः । सरीसृपाः सर्पाः । एते शुद्धतामसाः ॥ १२ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः

सम्बन्धसामान्ये चतुर्थी न सङ्गतेत्यतः पक्षान्तरमाहुः अथवेत्यादि । तव यत्प्रयोजनं रूपमिति, एतस्यैव विवरणं भक्तिजनकमिति ॥ ११ ॥ ❀ ❀ अहं भवानित्यस्याभासे एवमित्यादि । 'यत्संस्थं' २-५-२ इत्यस्योत्तरभूतेन 'वाचां' २-६-१ इत्यादिश्लोकनवकोक्तप्रकारेण सर्वेषां नित्यपरिच्छिन्नानामुत्पत्तिं समागमरूपामुक्त्वा यदर्थमेतत्सर्वेषां स्थानविभजनमुक्तं तत् 'यत्र' २-५-२ इति प्रश्नस्योत्तरमाहेत्यर्थः । विभूतौ, सार्द्धपद्यमर्थमाहुः भगवत्स्वरूपा इति । मतान्तरमाहुः समुदाय इत्यादि । अत्रास्वरसबीजं तु 'अहमेवासमेवे'ति २-९-३२ पद्यविरोधो ज्ञेयः । अतः परमित्यादि । यत्संस्थं २-५-२ इत्यस्योत्तरनिरूपणानन्तरत्रिविधसुखात्मकफलनिरूपणार्थमधिकार्यादिकं वदन् पुरुषसूक्ते तयोर्निरूपितत्वात्तथेत्यर्थः । ननु पुरुषसूक्ते'ऽहं भवान्' २-६-१२ इति प्रकारेणानिरूपितत्वात् कथं तथेत्यत आहुः पुरुष इत्यादि । इदमिति उक्तश्रुताविदं पदेनोक्तम् । तथा च, तस्यैवेदं विवरणमिति न प्रकारभेदः इत्यर्थः ॥ १२ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

पराभूतेर्दारिद्र्यस्य पराजयस्य च अधर्मस्य पापस्य तमसः अज्ञानस्य-अपिशब्दात्संसारस्य च-पश्चिमस्तस्य पृष्ठभागः स्थानम् । नदाः शोणभद्रादयः नद्यो गोमत्यादयस्तेषां तु तस्य नाड्यः स्थानम् । गोत्राणां पर्वतानां तस्यास्थिसंहतिः अस्थिसङ्घातः स्थानम् ॥ ९ ॥ ❀ ❀ अव्यक्तं प्रधानं रससिन्धवः क्षारादिरसवन्तः समुद्रास्तेषां-केवलरसस्य तु 'जिह्वा सर्वरसस्य च' इत्याश्रयतया जिह्वाया उक्तत्वात्-भूतानां पृथिव्यादिपञ्चमहाभूतानां अस्मदादिप्राणिनां च सर्वेषां निधनस्थान्ते लयस्य च पुंसः पुरुषरूपस्य भगवत उदरं स्थानतया 'यस्मिंश्च प्रलयं यान्ति' इत्यादिशास्त्रेषु विदितमेव, अतो नात्र प्रमाणं वक्तव्यमित्यर्थः । अस्मदादिमनसश्च तस्य हृदयं पदं स्थानम् ॥ १० ॥ ❀ ❀ धर्मस्य मम चतुर्मुखस्य तुभ्यं तव कुमाराणां सनकादीनां च भवस्य महादेवस्य च विज्ञानस्य सत्त्वस्य सत्त्वगुणस्य-तत्त्वस्येति पाठे तु महत्तत्त्वस्य-परस्य परमेश्वरस्यात्माऽन्तःकरणं परायणमुत्तमस्थानम् ॥ ११ ॥ ❀ ❀ एवं तावत्परमेश्वराज्जातं विश्वं ततो भिन्नं न भवति, यथा सुवर्णाज्जातं कुण्डलादि सुवर्णात्पृथक् न भवति, स तु सर्वनियन्ता सर्वप्रकाशको नित्यमुक्तः स्वतन्त्रश्चेत्यर्थादुक्तमेतदेव पुरुषसूक्तार्थकथनेन द्रढयति, तत्र "सहस्रशीर्षा" इत्यर्धर्चस्य "ब्राह्मणोऽस्य मुखमासीत्" इत्यादेश्च ऋक्त्रयस्यार्थः पूर्वाध्याये एव दर्शितः, इदानीं तु "पुरुष एवेदं सर्वं" इत्यस्यार्थं दर्शयति—अहमित्यादिसार्धैस्त्रिभिः । अहं ब्रह्मा, भगवान्नारदः, भवो रुद्रः, ये चेमे मरीच्यादयः ते तवाग्रजा मुनयः सनकादयश्च, सुरा इन्द्रादयो देवाः, हिरण्यकशिप्वादयोऽसुराश्च, नागा गजाः, नरा मनुष्याः, खगा आकाशचारिणः पक्षिणः, मृगा हरिणादयो वनचारिणः, सरीसृपा वृश्चिकादयः ॥ १२ ॥

### हिन्दी अनुवाद

उनकी पीठ से पराजय, अधर्म और अज्ञान, नाड़ियोंसे नद-नदी और हड्डियोंसे पर्वतोंका निर्माण हुआ है ॥ ९ ॥ ❀ ❀ उनके उदरमें मूल प्रकृति, रस नामको धातु तथा समुद्र, समस्त प्राणी और उनकी मृत्यु समायी हुई है । उनका हृदय ही मनकी जन्मभूमि है ॥ १० ॥ ❀ ❀ नारद ! हम, तुम, धर्म, सनकादि, शङ्कर, विज्ञान और अन्तःकरण—सब-के-सब उनके चित्तके आश्रित हैं ॥ ११ ॥ ❀ ❀ ( कहाँतक गिनायें— ) मैं, तुम, तुम्हारे बड़े भाई सनकादि, शङ्कर, देवता, दैत्य, मनुष्य, नाग, पक्षी, मृग, रेंगनेवाले जन्तु ॥ १२ ॥

**गन्धर्वाप्सरसो यक्षा रक्षोभूतगणोरगाः । पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः ॥१३॥**
**अन्ये च विविधा जीवा जलस्थलनभौकसः । ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः ॥१४॥**
**सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत् । तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति ॥१५॥**
**स्वधिष्ण्यं प्रतपन् प्राणो[1] बहिश्च प्रतपत्यसौ । एवं विराजं प्रतपंस्तपत्यन्तर्बहिः पुमान् ॥१६॥**

### श्रीधरस्वामिविरचिता भावार्थदीपिका व्याख्या

जलं च स्थलं च नभश्चौकांसि येषां ते । नभौकस इति संधिरार्षः । ऋक्षाणि अश्विन्यादीनि केतवो धूमकेतुप्रभृतय औत्पातिकाः ॥ १४ ॥ ❀ ❀ सर्वं पुरुष एव न ततः पृथगित्यर्थः । प्रपंचेन तस्यापरिच्छेदं वक्तुं स भूभिमित्यस्यार्थमाह ।

१. प्रा० पा०—प्रातपत्प्राणो ।

तत्पदं विभक्तिव्यत्ययेन व्याचष्टे। तेनेति। तेन पुरुषेण विश्वमिति भूमिपदस्यार्थः। वितस्तिमिति दशांगुलपदस्य अधीत्यतिशब्दस्य आवृतमिति वृत्वेत्यस्य स च वितस्तिमधिकं व्याप्य तिष्ठतीत्याधिक्यमात्रं विवक्षितं न तु परिमाणम्। अनुपयोगादपरिच्छिन्नत्वाच्च॥ १५॥ ❀ ❀ एतत् सदृष्टांतमाह। असौ प्राण आदित्यः। "असौ वा आदित्यः प्राणः" इति श्रुतेः। स्वधिष्ण्यं मंडलं प्रकाशयन्यथा बहिश्च प्रकाशयति एवं विराड्देहं प्रकाशयन् ब्रह्मांडमंतर्बहिश्च प्रकाशयति॥ १६॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

'नभश्च नभसा सार्द्धम्' इति द्विरूपकोशाददंतोपि नभशब्दोस्तीति ज्ञेयम्॥ १३॥ १४॥ ❀ ❀ संदर्भस्तु—दश दशगुणिता अंगुलिप्रमाणदेशा यस्मिंस्तत् दशोत्तरावरणकुलं तदभिप्रायेणात्यल्पत्वादशांगुलशब्देन निर्देशः वितस्तिशब्दोपि तदभिप्रायकः। तदतिक्रम्य तिष्ठतीत्यर्थः॥ १५॥ ❀ ❀ विराजं प्रतपन् विराट्प्रकाशत्वेन प्रस्तूयमानः पुमान् श्रीभगवत्तत्त्वमप्येवांतरंगं त्रिपाद्विभूतिरूपं बहिर्बहिरंगं पादविभूतिरूपं प्रतपति तद्विभूतयः। पाद्मोत्तरखंडे-"त्रिपाद्विभूतेर्लोकास्तु असंख्याः परिकीर्त्तिताः॥ शुद्धसत्त्वमयाः सर्वे ब्रह्मानंदसुखाह्वयाः॥ सर्वे नित्या निर्विकारा हेयरागविवर्जिताः। सर्वे हिरण्मयाः शुद्धाः कोटिसूर्यसमप्रभाः। सर्ववेदमया दिव्याः कामक्रोधविवर्जिताः। नारायणपदांभोजभक्ताकरसुसेविताः। निरंतरं सामगानपरिपूर्णसुखं श्रिताः। सर्वे पंचोपनिषदस्वरूपा वेदवर्चसः" इत्यादिना तत्र त्रिपाद्विभूतिशब्देन प्रपंचातीतलोकोऽभिधीयते पादविभूतिशब्देन तु प्रपञ्च इति यथोक्तं तत्रैव "त्रिपाद्व्याप्तिः परे धाम्नि पादस्येहाभवत्पुनः। त्रिपाद्विभूतिर्नित्यास्यादनित्यं पादमैश्वरम्॥ नित्यं तद्रूपमीशस्य परे धाम्नि स्थितं शुभम्। अच्युतं शाश्वतं दिव्यं सदा यौवनमाश्रितम्॥ नित्यं संभोग्यमीश्वर्या श्रिया भूम्या च संवृतम्" इति। अत एव द्वितीयस्कंधेऽप्येवमेवोक्तम्। तथाहि सोऽमृतस्येति। अमृतादिद्वयं तु तृतीयत्वेन वक्ष्यमाणस्य क्षेमस्याप्युपलक्षणम्। श्रुतौ च"उतामृतत्वस्येशानः" इत्यत्रामृतत्वं तद्युगोपलक्षणम्। अत्र धर्मिप्रधाननिर्देशः। श्रुतौ तु तत्र धर्ममात्रनिर्देशस्यापि तत्रैव तात्पर्यं तत्रामृतम्—'स्वदृष्टवद्भिः पुरुषैरभिष्टुतम्' इति। परं न यत्परम् इत्याद्युक्तानुसारेण परमानंदः। अत एवामृतं विष्णुमंदिरमिति तत्पर्यायः। 'अभयं न च कालविक्रमः' इत्याद्युक्तानुसारेण भयमात्राभावः। अत एव धर्मोऽकुतोभयमित्युक्तम्। 'क्षेमं न यत्र माया' इत्याद्युक्तानुसारेण भगवद्बहिर्मुखताकारगुणसंबंधाभावाद्भगवज्जनमंगलाश्रयत्वं ज्ञेयम्। तथा च नारदीये। "सर्वमंगलमूर्द्धन्या पूर्णानंदमयी सदा। द्विजेंद्र तव मय्यस्तु भक्तिरव्यभिचारिणी॥"इति। अत एव। 'क्षेमं विदंति मत्स्थानम्' इत्युक्तम्। तत्र तत्तच्छब्देन लक्षणामयकल्पनया जनलोकादिवाच्यतानिषेधेन हेतुं न्यस्यति। मर्त्त्यम्—'ब्रह्मणोपि भयं मत्तद्विपरार्द्धपरायुषः' इत्यादिन्यायेन मरणधर्म्मकमन्नं कर्मादिफलं विलोक्यादिकं यस्मादत्यगात् अतिक्रम्यैव तत्र विराजत इति। एषः अमृताद्यैश्वर्यरूपो दुरत्ययः ब्रह्मचर्यादिभिः केनचिन्मनसाप्यसर्वभूतानि रोद्धुं न शक्य इति संदर्भः। विश्वनाथस्तु–स्वधिष्ण्यमित्यादिपद्यद्वयमेव व्याचख्यौ तथा हि असौ प्राणः प्राणवायुः स्वधिष्ण्यं देहांतः प्रतपन् श्वासेन प्रतापयुक्तं कुर्वन् बहिश्च प्रतपति प्रभवति एवं विराजमंतर्यामित्वेन स्थित्वा प्रतपन्प्रभावंतं ज्ञानक्रियादिशक्तिमंतं कुर्वन्नंतर्बहिश्च प्रतपति प्रभवति॥ १६॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

सहस्रशीर्षेत्यर्द्धर्चस्येति। सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् (१) इति अर्द्धा ऋक् अस्याः सायणभाष्यं यथा-सर्व्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराडाख्यो यः पुरुषः सोऽयं सहस्रशीर्षा। सहस्रशब्दस्य उपलक्षणत्वात् अनन्तैः शिरोभिः युक्त इत्यर्थः। यानि सर्व्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपतितत्वात् तदीयान्येवेति सहस्रशीर्षत्वम्। एवं सहस्राक्षत्वं सहस्रपात्त्वञ्च (१)॥ ऋक् त्रयस्येति। ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत (१२)॥ चन्द्रमा मनसो जातश्चक्षोः सूर्योअजायत। मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत (१३) नाभ्या आसीदन्तरिक्षं शीर्ष्णोद्यौः समवर्त्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकां अकल्पयन् (१४)॥ इति हि ऋक्त्रयम्। अस्य सायणभाष्यं यथा प्रजापतेर्ब्राह्मणो ब्राह्मणत्वजातिविशिष्टः पुरुषो मुखमासीत् मुखादुत्पन्न इत्यर्थः। योऽयं राजन्यः क्षत्रियत्वजातिविशिष्टः स बाहू कृतो बाहुत्वेन निष्पादितः बाहुभ्यामुत्पादित इत्यर्थः। तत् तदानीमस्य प्रजापतेर्यत् यौ ऊरू तद्रूपो वैश्यः सम्पन्नः ऊरुभ्यामुत्पादित इत्यर्थः। तथास्य पद्भ्यां पादाभ्यां शूद्रः शूद्रत्वजातिमान् पुरुषोऽजायत। ❀ ❀ ❀ (१२)। यथा दध्याज्यादिद्रव्याणि गवादयः पशवः ऋगादिवेदा ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्ना एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह। प्रजापतेर्मनसः सकाशात् चन्द्रमा जातः। चक्षोश्चक्षुषः सूर्योऽप्यजायत। अस्य मुखादिन्द्रश्चाग्निश्च देवावुत्पन्नौ। अस्य प्राणात् वायुरजायत (१३)॥ यथा चन्द्रादीन् प्रजापतेर्मनसः प्रभृतयोऽकल्पयन् तथान्तरिक्षादींल्लोकान् प्रजापतेर्नाभ्यादयो देवा अवयवा अकल्पयन् उत्पादितवन्तः। एतदेव दर्शयति। नाभ्याः प्रजापतेर्नाभेरन्तरिक्षमासीत्। शीर्ष्णः शिरसो द्यौः समवर्त्तत उत्पन्ना। अस्य पद्भ्यां पादाभ्यां भूमिरुत्पन्ना। अस्य श्रोत्रात् दिशः उत्पन्नाः॥ (१४)॥ पूर्वाध्याये एव दर्शित इति। पञ्चमाध्याये यथाक्रमं ३५। ३७। ३०। ४२ श्लोकेषु दर्शित इति यावत्॥ पुरुष एवेदं सर्व्वमित्यस्येति। पुरुष एवेदं सर्व्वं यद्भूतं यच्च भव्यम् (२) इत्यस्येत्यर्थः।

सायणभाष्यं यथा—यदिदं वर्त्तमानं जगत् सर्व्वं तत् पुरुष एव। यच्च भूतम् अतीतं जगत् यच्च भव्यं भविष्यत् जगत् तदपि पुरुष एव। यथाऽस्मिन् कल्पे वर्त्तमाना प्राणिदेहाः सर्व्वेऽपि विराट्पुरुषस्य अवयवास्तथैव अतीतागामिनोरपि कल्पयोर्द्रष्टव्यमित्यभिप्रायः। (२)॥

[ नागा इति। नागाः निर्विषसर्पा इति भगवद्गीतायां दशमाध्यायस्य ऊनविंशश्लोकटीकायां स्वामी। यद्वा वासुक्यादयः प्रसिद्धा अष्टौ नागा इति। अथवा कद्रुसन्ततिजा नागा इति चतुर्थस्कन्धीयाष्टादशाध्यायस्य द्वाविंशश्लोकटीकायां स्वामी। यद्वा नागा गजा इति बालप्रबोधिनी॥ सरी सृपा इति। सविषसर्पा इत्यर्थः॥ गन्धर्वा इति। स्वर्गनायका उपदेवा इत्यर्थः॥ अप्सरस इति। स्वर्गवेश्या इत्यर्थः॥ यक्षाः गुह्यका धनरक्षका देवयोनिविशेषा इति यावत्॥ रक्षः राक्षसो निशाचर इति यावत्। भूतगणा देवयोनिविशेषाः॥ उरगाः सर्पजातिभेदाः। सर्पसिद्धान्तग्रन्थे विशेषो द्रष्टव्यः॥ पितरः अर्यमादयः॥ सिद्धा अणिमाद्यष्टगुणोपेताः। विश्वावसुप्रभृतयः विद्याध्रा विद्याधराः पुष्पदन्तादिकामरूपिखेचराः देवयोनिविशेषाः॥ चारणा देवयोनिविशेषाः ]॥ १३॥ १४॥ ❀ ❀ ग्रहेति। ग्रहाश्च रव्यादयः। ऋक्षाणि चाश्विन्यादीनि। केतवश्च धूमकेतुप्रभृतय औत्पातिका ग्रहविशेषाः। स्तयनयित्नवो मेघाः॥ १५॥ ] स भूमिमित्यस्येति। भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् (१) इत्यर्द्धर्चस्य अस्य सायणभाष्यं यथा—स पुरुषो भूमिं ब्रह्माण्डगोलकरूपां विश्वतः सर्वतः वृत्वा परिवेष्टय दशाङ्गुलपरिमितदेशमत्यतिष्ठत् अतिक्रम्य व्यवस्थितः। दशाङ्गुलमित्युपलक्षणम्। ब्रह्माण्डात् बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः (१) ॥१६॥१७॥

### श्रीमद्वीरराघवव्याख्या

विद्याध्रा विद्याधराः॥ १३॥ ❀ ❀ जलं स्थले नभश्चौकांसि स्थानानि येषां ते जलस्थलनभौकस इति संधिरार्षः। ग्रहाः सूर्यादयः ऋक्षाणि नक्षत्राणि तारा अपि नक्षत्रस्यैव भिदा तडितः विद्युतः स्तनयित्नवो मेघाः गर्जितानि वा॥ १४॥ ❀ ❀ किंबहुना यच्च कालत्रयवर्ति वस्तुजातं तदिदं सर्वं पुरुष एव परमपुरुष एव कालत्रयवर्तिकृत्स्नवस्तु जातशरीरकत्वादपुरुषशरीरभूतं स्वतंत्रं वस्तु नास्तीत्यर्थः। नामरूपविभागानर्हातिसूक्ष्मप्रकृतिपुरुषकालशरीरकस्य परमपुरुषस्यैव विभक्तनामरूपप्रकृतिपुरुषशरीरकं परमात्मात्मकजगदाकारेणावस्थानादयमैक्योपदेश उपपन्नः। सर्वत्रवेदांतेष्वेवमेव ह्यैक्यं सर्वं खल्विदं ब्रह्म अयमात्मा ब्रह्म तत्त्वमसीत्यादिभिरुपदिश्यते पुरुष एवेदमिति। सामानाधिकरण्यस्य व्याप्तिनिबंधनत्त्वमाह तेनेति। अधोनिष्ठ्याविवितस्त्यांतेनाभ्यामुपरि तिष्ठति हृदयं तद्विजानीयाद्विश्वस्यायतनं महदिति श्रुत्युक्तदिशा नाभ्या उपरि वितस्तिपरिच्छिन्नप्रदेशांते स्थितं हृदयमधितिष्ठता तेन परमात्मनेदं विश्वमावृतं व्याप्तम्॥ १५॥ ❀ ❀ असौ हृदयांतर्वर्ती प्राणः परमात्मा स्वधिष्ण्यं स्वावासस्थानं शरीरं प्रतपन् अंतर्व्याप्तं प्रशासनाधीनं कुर्वन् बहिश्च स्वधिष्ण्याद्बहिष्ठमपि वस्तुजातं प्रशासनाधीनं यथा करोति—एवं विराज विराट्शब्दवाच्यानिरुद्धकार्यं प्रपञ्चप्रशासनाधीनं कुर्वन्नतर्बहिश्च प्रशासनाधीनं करोतीत्यर्थः। अत्र कार्ये कारणोपचाराद्विराट्शब्दो ब्रह्मांडपरः एतेनापरिच्छिन्नत्वप्रतिपादकं स भूमिं विश्वतो वृत्वेत्यर्द्धर्चं व्याख्यातं भवति। स परमात्मा भूमिं ब्रह्मांडरुपं प्रपंचं विश्वतः सर्वतः वृत्वा व्याप्य भूमिं दशांगुलमात्रमतिक्रम्य स्थितः अत्यतिष्ठद्दशांगुलमित्याधिक्यमात्रं विवक्षितं न प्रमाणं अनुपयोगादपरिच्छिन्नत्वाच्चेति तस्या अर्थः॥ १६॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

घटादिवन्न भातीति नभ आकाशोऽकारान्तोऽप्यस्ति॥ १४॥ ❀ ❀ यदेदमस्मदादिकमातृणं भूतं भव्यं भवज्जगदेतस्माद्धरेरुत्पन्नं तदिदं सर्वं पुरुष एव पुरुषाधीनसत्तायेव त्रिकालमपि तदधीनमेव न तु ते नैकीभूतं यदधीना यस्य सत्ता तत्तदित्येव भण्यत इति वचनात्। यद्वा पुरुष एवेदं पुरुषेणैवेदं व्याप्तं पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यमिति पुरुषेणैवेदं व्याप्तमातृणादाकरीषात् सर्वं भगवानिति मिथ्यादृष्टिरेवेति श्रुतेः। तामेव व्याप्तिं स्पष्टीकरोति तेनेदमिति। वितस्तिमात्रं जीवहृदयमधितिष्ठता तेन पुरुषेण सर्वं पुरुष एवेति भण्यते भेदवज्जगत् वितस्तिमात्रं हृदयमास्थाय व्याप्नुते जगदित्यादेः सर्वं सिद्धम्॥ १५॥ ❀ ❀ हृदयोपाध्यवच्छिन्नस्य हरेर्जीववैलक्षण्यमाह स्वधिष्ण्यमिति तप संतापदर्शनयोरिति धातोः स्वधिष्ण्यं स्वस्थानं हृदयमधिष्ठायांतः सर्वं प्रतपन् पश्यन् असौ प्रकृष्टचेष्टायोगात् प्राणनामा परमात्मा देहाद्बहिश्च बहिष्ठान् विषयानपि प्रतपति पश्यति॥ १६॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

अहमिति त्रिकम्॥ १३॥ १४॥ १५॥ ❀ ❀ एवं प्रपञ्चतत्कारणात्मकत्वेन दर्शयित्वा तदतीतत्वेनाप्याह तेनेदमित्यादि। तत्र स भूमिं सर्व्वतः स्पृष्ट्वा अत्यतिष्ठद्दशाङ्गुलमिति मन्त्रार्थमाह तेनेत्यर्द्धेन। तेन पुरुषरूपेण। विश्वमिति भूमिपदार्थः। वितस्तमिति दशाङ्गुलपदार्थः। अधि इत्यतिशब्दस्य। दशाङ्गुलं दशदशगुणिता अङ्गुलिप्रमाणदेशा यस्मिन् तत् दशोत्तरावरणकूलम्। तदभिप्रायेणात्यल्पत्वात् दशाङ्गुलशब्देन निर्देशः। वितस्तिशब्दोऽपि तदभिप्रायकः तदतिक्रम्य तिष्ठतीत्यर्थः॥ १६॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

एवं मायाशक्तिमतः परमेश्वराज्जातं जगत् न ततो भिन्नमिति पुरुषसूक्तार्थकथनेन द्रढयति। तत्र सहस्रशीर्षेत्यर्द्धर्चस्य ब्राह्मणोऽस्य मुखमासीदित्यादेश्च ऋक्त्रयस्यार्थः पूर्व्वाध्याये एव दर्शितः। पुरुष एवेद सर्व्वमित्यस्यार्थं दर्शयति अहं भवानिति सार्द्धत्रिभिः॥ १३॥ १४॥ १५॥ ❀ ❀ एवं प्रपञ्चकारणत्वं परमेश्वरस्य दर्शयित्वा तस्य प्रपञ्चातीतत्वं वदन् प्रपञ्चस्य तत्परिच्छेद्यत्वमाह। तेन परमेश्वरेण इदं विश्वमावृतं यतोऽधि विश्वस्मादधिकं वितस्ति वितस्तिप्रमाणं देशं व्याप्य तिष्ठतीत्या-धिक्यमात्रं विवक्षितं, न प्रमाणम्। तस्य अपरिच्छिन्नत्वेनाप्रमाणत्वात्। एवं स भूमिं सर्व्वतः स्पृष्ट्वा अत्यतिष्ठतीति अत्यतिष्ठ-द्दशाङ्गुलमित्यस्यार्थो विवृतः। तत्र भूमिमित्यस्यार्थो विश्वमिति। दशाङ्गुलमित्यस्यार्थो वितस्तिमिति अत्यतिष्ठदित्यस्यार्थोऽ-धितिष्ठतीति॥ १६॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

विद्याध्रा विद्याधराः॥ १३॥ ❀ ❀ जलादीनि ओकांसि स्थानानि येषां ते तथा नभौकस इति संधिरार्षः॥ १४॥ ❀ ❀ भूतं भविष्यं वर्तमानं चेदं सर्वं चिदचिदात्मकं शक्तिशक्तिमतोः कार्यकारणयोर्भेदाभेदसंबंधस्य सर्वशास्त्रसंमतत्वात्पुरुष एव ऐतदात्म्यमिदं सर्वमित्यादिश्रुतेः तदनन्यत्वमारंभणशब्दादिभ्य इति न्यायाच्च विश्वे न तस्यापरिच्छेदं दर्शयितुं सभूमिं सर्वतो वृत्त्वात्यतिष्ठद्दशांगुलमित्यस्यार्थमाह तेनेदमिति। तेन पुरुषेण इदं विश्वमावृतं व्याप्तं स च पुरुषो वितस्तिमधि अधिकं व्याप्य तिष्ठति वितस्तिशब्देनाधिक्यमात्रं विवक्षितं न तु परिमाणं स इति। कर्तृपदं तेनेत्यनेन व्याख्यातं विश्वमिति भूमिपदस्यार्थः वितस्तिमिति। दशांगुलपदस्यार्थः अधीत्यतिशब्दस्यार्थः॥ १५॥ ❀ ❀ एतदेव सदृष्टान्तमाह स्वधिष्ण्यमिति असौ वा आदित्यः प्राण इति। श्रुतिप्रसिद्धोऽसौ प्राण आदित्यः स्वधिष्ण्यं स्वकीयं मंडलं प्रतपन्प्रकाशयन् बहिः प्रतपति प्रकाशयति यथा एवं पुमान् विराजं विराट्शरीरं प्रकाशयन् बहिश्च प्रकाशयति॥ १६॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

गन्धर्वाप्सरसो रजोमिश्राः य[1]क्षरक्षआदयस्तमोश्रिताः। उरगा जातिसर्पाः। पशुप्रभृतयः सत्त्वमिश्राः। पशवो गवादयः। सिद्धादयस्त्रयः अन्तरिक्षे सत्त्वादिगुणप्रधानाः। द्रुमाः केवलतामसाः॥ १३॥ ❀ ❀ तामसानाह—अन्ये चेति। विविधा मत्स्यादयः। जलौकसः स्थलौकसो नभौकसश्च। ग्रहा बुधादयः। ऋक्षा अश्विन्यादयः। केतवो धूमकेतुप्रभृतः। तारा अन्यानि नक्षत्राणि। तडितो विद्युतः। स्तनयित्नवो गर्जितानि॥ १४॥ ❀ ❀ सर्वानुद्देशतो निरूप्य तेषां पुरुषत्व-माह—सर्वं पुरुष एवेति। पूर्वोक्तं निरूपितं सर्वं पुरुष एव। इदमपि परिदृश्यमानं जडात्मकं सर्वं पुरुष एव। कालत्रयाधीनस्य पुरुषत्वाभाभावमाशङ्क्यमाह—भूतं भव्यं भवदिति। चकारात्तत्रोत्पन्नानामपि ग्रहणम्। यदिति प्रसिद्धम्। तेन श्रुतिसिद्धत्वा-न्नाऽत्र युक्तिर्वक्तव्येत्यर्थः। अनेन "पुरुष एवेदं स[2]र्वमि" त्यर्द्धर्चार्थः कथितः। भगवतो विश्वमात्रत्वे तेन परिच्छेद-सम्भवादपरिच्छिन्नताव्याहतिरित्याशङ्क्याऽऽह—तेनेदमिति। विश्वेन न भगवानावृतः परिच्छिन्नः किन्तु विश्वमेव तेन आवृतं परिच्छिन्नम्। जातिवत्परिच्छेदं वारयति—वितस्तिमधितिष्ठ[3]तीति। जातिर्हि तावन्मात्रे स्थिता तं प्राप्नोति। अयं तु वितस्तिमधितिष्ठति। "अत्यतिष्ठद्दशाङ्गुलमि" ति सूक्ते दशाङ्गुलमुक्तम्। वितस्तिस्तु द्वादशाङ्गुलम्। तथापि क्षुद्राङ्गुलिमा-नेन तदुपपद्यते। दशाङ्गुला वा वितस्तिः। अङ्गुष्ठदेशिनीमध्यं तावदेव। अनेनोभयध्याने सम्पूर्णो भगवान् ज्ञातो भवति। अतो विश्वात्मकः स्थूलः। वितस्त्यात्मकोऽतिरिक्तः। तुल्यश्च प्रमाणतोऽपि भवति। अष्टवितस्त्यात्मकः पुरुषः। ततः सर्वतो वितस्त्यात्मकोऽष्टवितस्त्यात्मकोऽपि भवत्यधिकोऽपि भवति। तस्माद्यावान् भगवान् सर्वं तावानधिकस्ततो-ऽप्यधिक इति न परिच्छेदः सम्भवति। किञ्च। नाऽयं वितस्तिमात्रे तिष्ठति किन्तु ततोऽप्यधिकं तिष्ठति। अतः सुतरां न[4] परिच्छेदः॥ १५॥ ❀ ❀ तत्र स्थितस्य ततोऽप्यधिकव्याप्तौ दृष्टान्तमाह—स्वधिष्ण्यमिति। यथा प्राणः सूर्यः स्वधिष्ण्यं मण्डलं प्रतपन् बहिरपि सम्पूर्णं ब्रह्माण्डं प्रतपति। प्राणो वा आसन्यः स्वधिष्ण्यं शरीरं प्रतिपन् सजीवं कुर्वन् बहिश्च फूत्कारनिः-श्वासैः प्रतपति काष्ठादीनग्नियुक्तान्करोति। एवं पुरुषोऽपि विराजं प्रतपंस्तद्बहिरपि तपति। प्राणादीनां मध्यप्रकाशकत्वाभावात्सं-घट्टितया तत्र विवराभावान्मण्डलमध्यं न प्रकाशयति। अयं तु ब्रह्माण्डमध्यमपि प्रकाशयति। तदाह—अन्तरिति। पुरुषो हि स्वयं सर्वतः प्रकाशति॥ १६॥

---

१. यक्षरक्षादयः इति ग. घ.। २. सर्वमर्द्धर्चार्थं इति क. ग. घ.। ३. मधितिष्ठतेति ख। ४. अपरिच्छेद इति ग. घ. ङ। ५. ब्रह्माण्डस्य मध्यमिति क. ख.।

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अन्तरिक्ष इत्यादि। एतेनेतः पूर्वोक्ता दिव्यास्तादृशा इतिबोधितम्। अनेनेति सार्द्धपद्यत्रयेण ॥ १३ ॥ ❀ ❀ तेनेदमित्यत्र आहेति। परत्वं बोधयितुपरिच्छेदमाहेत्यर्थः। जातिर्हीत्यादि, इदमत्र परप्रसिद्ध्या तद्बोधनायोक्तम्, सिद्धान्ते जातेः पदार्थान्तराभावात्। अधितिष्ठतीति। अधिकं यथा स्यात्तथा तिष्ठतीत्यर्थः। एतेनाधिकस्थितौ विश्वस्य कर्तृताभ्रमो वारितः। सूक्ते 'स भूमिं विश्वतो वृत्वे'त्यत्र तच्छब्दपरामृष्टस्य 'सहस्रशिरसादिगुणकस्य पुरुषस्यैव कर्तृत्वबोधनात् तेनेदं भिन्नं वाक्यमिति बोधितम्। 'परिमाणांशे सूक्तविरोधं परिहरन्ति अतीत्यादि। रूपद्वयकथनप्रयोजनमाहुः अनेनेत्यादि। अनेनेति, विश्वात्मक-तदतिरिक्तरूपयोः कथनेन। अत इति। उभयरूपत्वाद्विरुद्धधर्माश्रयत्वाच्च। अतिरेकेपि यथा तुल्यत्वं तथा व्यक्तीकुर्वन्ति अष्टेत्यादि। श्रुतावत्र च वितस्त्यधिकत्वकथनात् सप्तवितस्त्यात्मकविश्वपुरुषापेक्षया वितस्तिमात्रमधिक इत्यष्टवितस्त्यात्मकः। तादृशस्य सर्वतस्तद्व्याप्तिकथनाच्च तावन्मात्र एव सर्वतो वितस्त्यधिकः। अन्यथा 'न्यूनाधिकपरिमाणापत्त्या दशाङ्गुलशब्दसर्वतोव्याप्त्यो-रन्यतरदुपरुध्येतेति तथेत्यर्थः। सिद्धमाहुः तस्मादित्यादि, तस्मादिति शब्दबलात्। तत इति अधिकात्। नन्वेवमपि वितस्ति-मात्रतया परिच्छेद एवापततीति शङ्कायां तदपि निवारयन्ति किञ्चेत्यादि। तथा च, श्रुतौ दशाङ्गुलाधिक्यबोधनं स्थितिप्रकार-बोधनार्थं, न तु ततोधिकव्याप्तिनिवारणार्थमित्यर्थः ॥ १५ ॥ ❀ ❀ स्वधिष्ण्यमित्यत्र प्राणः सूर्यः इति। सूर्यस्य प्राणपद-वाच्यत्वं न प्रकाशयतीति अर्थात् प्राणः। प्रकाशे प्रकारं वदन्तः पुमानिति पदस्य तात्पर्यमाहुः पुरुष इत्यादि, 'स एव वासुदेवोयं साक्षात्पुरुष उच्यते'। स्त्रीप्रायमितरत्सर्वं जगद्ब्रह्मपुरःसर'मिति नृसिंहपुराणाद् भगवानेव पुरुषः। अतः प्राकृतत्वाद्विराडपि स्त्रीप्राय इति तथेत्यर्थः ॥ १६ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

गन्धर्वाः, अप्सरसः, यक्षाः, रक्षो राक्षसाः, भूतगणाः, उरगाः सर्पाः, पशवो गवाश्वादयः, पितरः अर्यमादयः, सिद्धाः, विद्याध्राः विद्याधराः, चारणाः, द्रुमा वृक्षाः ॥ १३ ॥ ❀ ❀ जलं स्थलं नभश्च ओकांसि स्थानानि येषां तथाभूता अन्ये च विविधप्रकारा जीवाः। सन्धि'रार्षः। ग्रहा बुधादयः, ऋक्षाणि नक्षत्राणि अश्विन्यादीनि, केतवो धूमकेतुप्रभृतयः, ताराः, तडितो विद्युतः, स्तनयित्नवो मेघाः ॥ १४ ॥ ❀ ❀ किं बहुनोक्तेन ? यच्चेदं भूतं भव्यं भवच्च कालत्रयवर्त्ति वस्तुजातं तत्सर्वं पुरुष एव, न ततो भिन्नं किञ्चिदित्यर्थः। ननु पुरुषस्य प्रपञ्चात्मकत्वे प्रपञ्चस्य परिच्छिन्नत्वं स्यादित्याशङ्कया "स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम्" इत्यस्यार्थमाह—तेनेति। तेन पुरुषेणेदं विश्वमावृतं व्याप्तम्। ननु नाभ्या उपरि वितस्तिमात्रं हृदयकमलं तन्निवासिनः पुरुषस्य कथं विश्वव्यापकत्वमित्याशङ्क्याह—वितस्तिमधितिष्ठतीति, ततो वितस्तितोऽ धिकमपि व्याप्य तिष्ठतीत्यर्थः। अत्र भूमिमित्यस्यार्थो विश्वमिति, दशाङ्गुलमित्यस्यार्थो वितस्तिमिति, अत्यतिष्ठदित्यस्यार्थोऽधिति-ष्ठतीति ज्ञेयम् ॥ १५ ॥ ❀ ❀ एतत् सदृष्टान्तमाह-स्वेति। असौ प्राणः "असौ वा आदित्यः प्राणः इति श्रुतेः आदित्यो यथा स्वधिष्ण्यं मण्डलं प्रतपन् प्रकाशयन् बहिश्च सर्वमपि प्रतपति प्रकाशयति एवमेव पुमान् वैराजपुरुषो विराजं विराड्देहं प्रतपन् प्रकाशयन्नपि ब्रह्माण्डमन्तर्बहिश्च प्रतपति प्रकाशयति ॥ १६ ॥

### हिन्दी अनुवाद

गन्धर्व, अप्सराएँ, यक्ष, राक्षस, भूत-प्रेत, सर्प, पशु, पितर, सिद्ध, विद्याधर, चारण, वृक्ष और भी नाना प्रकारके जीव—जो आकाश, जल या स्थलमें रहते हैं—ग्रह, नक्षत्र, केतु ( पुच्छल तारे ), तारे, बिजली और बादल—ये सब-के-सब विराट् पुरुष ही हैं। यह सम्पूर्ण विश्व—जो कुछ कभी था, है या होगा—सबको वह घेरे हुए है और उसके अन्दर यह विश्व उसके केवल दस अंगुलके❀ परिणाममें ही स्थित है ॥ १३–१५ ॥ ❀ ❀ जैसे सूर्य अपने मण्डलको प्रकाशित करते हुए ही बाहर भी प्रकाश फैलाते हैं, वैसे ही पुराणपुरुष परमात्मा भी सम्पूर्ण विराट् विग्रहको प्रकाशित करते हुए ही उसके बाहर-भीतर—सर्वत्र एकरस प्रकाशित हो रहा है ॥ १६ ॥

---

१. "स्वादि" पाठः। २. परिणामांशे पाठः। ३. 'परिणामा' पाठः। ४. मूले 'नभौकस' इत्यत्र। ❀ ब्रह्माण्डके सात आवरणोंका वर्णन करते हुए वेदान्त-प्रक्रियामें ऐसा माना है कि— पृथ्वीसे दसगुना जल है, जलसे दसगुना अग्नि, अग्निसे दसगुना वायु, वायुसे दसगुना आकाश, आकाशसे दसगुना अहंकार, अहंकारसे दसगुना महत्तत्त्व और महत्तत्त्वसे दसगुनी मूल प्रकृति है। वह प्रकृति भगवान्के केवल एक पादमें है। इस प्रकार भगवान्की महत्ता प्रकट की गयी है। यह दशाङ्गुलन्याय कहलाता है।

सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात्। महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः ॥१७॥
पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः। अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु ॥१८॥
पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः। अन्तस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः ॥१९॥
सृती विचक्रमे विष्वङ् साशनानशने उभे। यदविद्या च विद्या च पुरुषस्तूभयाश्रयः ॥२०॥

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

नित्यमुक्तत्वं दर्शयितुमुतामृतत्वस्यार्थमाह। स इति। अभयस्येति मंत्रगतामृतपदव्याख्या। अन्नेनेतिपदं विभक्तिव्यत्ययेन व्याचष्टे। मर्त्यं मरणधर्मकमन्नं कर्मफलं यस्मादत्यगादतिक्रांतवान्। अतो न केवलं सर्वात्मकः किंतु अमृतत्वस्य निजानंदस्यापीश्वर इत्यर्थः। ननु प्रपंचात्मकस्य कुतो नित्यमुक्तत्वमित्याशंक्य तत्परिहाराय एतावानस्येत्यस्यार्थमाह। महिमेति। प्रपंचात्मकस्याप्यमृतेशत्वमित्येष महिमा दुरत्ययोऽपारः प्रपंचानभिभूतत्वादिति भावः। मंत्रेण च एतावानस्य महिमा विभूतिः स तु ज्यायान् महत्तर इति वदताऽयमेवार्थ उक्तः॥ १७॥ ❀ ❀ तदेवमीश्वरो नित्यमुक्त इत्युक्तं तदाश्रितानां भूतानां बंधमोक्षौ व्यवस्थयेति दर्शयन् पादोऽस्य विश्वा भूतानीत्यस्यार्थमाह। पादेष्विति। तिष्ठंत्यत्रेति त्रितयो भूरादिलोकास्ते पादा इव पादा अंशा यस्य स स्थितिपात्तस्य पादेष्वंशभूतेषु लोकेषु सर्वभूतानि जीवान् विदुः। मंत्रे तु पादोऽस्य विश्वा भूतानीति सामानाधिकरण्यमधिष्ठानाधिष्ठेयाभेदविवक्षया पाद इत्येकवचनं च सामान्याभिप्रायेणेति व्याख्यातं भवति। भूतेषु फलवैचित्र्यं दर्शयंस्त्रिपादस्यामृतं दिवीत्यस्यार्थमाह। अस्येश्वरस्य संबंधि त्रिपादमृतं नित्यसुखं दिव्यूर्ध्वलोकेषु न तु त्रिलोक्यामित्यर्थः। तदेव त्रिपाच्छब्दोक्तं त्रैविध्यं दर्शयन्नाह। त्रयाणां लोकानां मूर्धा महर्लोकस्तस्य मूर्धानस्तदुपरितनलोका जनस्तपःसत्यमिति तेषु यथाक्रममममृतादिकमधायि निहितम्। तत्र त्रिलोक्यां नश्वरमेव सुखम्। महर्लोकस्य क्रममुक्तिस्थानत्वेऽपि कल्पांते तत्रत्यानां स्थानत्यागान्नाविनाशि सुखम्। जनलोके त्वमृतमविनाशि सुखं यावज्जीवं स्वस्थानापरित्यागात्। किन्तु महर्लोकवासिनां कल्पांते त्रिलोकदाहोष्मपीडितानां तदा तत्र गमनादक्षेमदर्शनमस्ति तपोलोके तस्याभावात्क्षेममेव। वक्ष्यति हि। "त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना। यात्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः॥" इति। सत्यलोके त्वभयं मोक्षः। तत्प्रत्यासत्तेः॥ १८॥ ❀ ❀ एतदेव वैचित्र्यमधिकारिभेदेनोपपादयंस्त्रिपादूर्ध्व इत्यस्यार्थमाह। न प्रजायंते पुत्रादिरूपेणेत्यप्रजा नैष्ठिकब्रह्मचारिवानप्रस्थयतयस्तेषामाश्रमास्त्रिलोक्या बहिरासन् गृहमेधस्त्वंतः यस्मादबृहद्व्रतो ब्रह्मचर्यव्रतरहितः॥ १९॥ ❀ ❀ अयं चाधिकारभेद एकस्यैवावस्थाभेदेन नत्वत्यंतभिन्नविषय इति दर्शयंस्ततो विष्वङ्ङित्यस्यार्थमाह। सृती इति। विविधं सुष्ठु अंचतीति विष्वङ् पुरुषः क्षेत्रज्ञः सृती मार्गौ दक्षिणोत्तरौ विचक्रमे चलति स्म। कथंभूते सृती। साशनानशने भोगापवर्गप्राप्तिसाधनभूते। अत्र हेतुत्वेन पुनर्विशेषणम्। यद्यतः अविद्याकर्मरूपा एका विद्या च तत्साधनोपासनारूपाऽन्या॥ २०॥

## वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

स परमेश्वरोऽमृतस्येशः प्रभुर्भोक्ता भोजयिता दाता वेत्यर्थः। स्वर्गीयसुधाव्यावृत्त्यर्थमाह—अभयस्य संसारभयरहितस्यामृतस्येशत्वे हेतुः मर्त्यं मरणधर्मकमन्नं वैषयिकं सुखं यद्यतोऽत्यगादतिक्रांतवान्। न ह्यमृतभोजिने चणकचर्वणं रोचते इत्यभिप्रायः। यदि च कौतुकवशात्कदाचिच्चर्वयति तदनासक्तस्यैव एवमेवांतर्यामिणोपि। "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इत्यादिदृष्टेः क्वचिद्भोक्तृत्वव्यपदेशोपि तदनतिक्रम एव द्रष्टव्यः। "एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोपि बलेन भूयान्" इति श्रुतौ निरन्नत्वं नामासक्तिराहित्यं व्याख्यातम्। एवञ्च "उतामृतत्वस्येशानो यदन्नेनातिरोहति" इत्यस्यार्थो विवृतः॥ अमृतत्वस्येति स्वार्थे त्वश्छांदसः॥ "सुपां सुपो भवंति" इत्यन्नमित्यर्थेऽन्नेनेति पदम्। अतिरोहति अत्यक्रामत्। ततो हेतोः पुरुषस्य परमेश्वरस्यैष महिमा दुरत्ययोऽपारः। एवञ्च "एतावानस्य महिमातो ज्यायांश्च पूरुषः" इत्यस्यार्थो विवृतः॥ १७॥ ❀ ❀ तदेवममर्त्यमैश्वर्यं त्रिपात् मर्त्यमेकपादिति। तस्य चतुष्पादैश्वर्यं पुनर्विवृणोति। पादेषु सर्वभूतानीति स्थितयो मर्त्यामर्त्यैश्वर्याणि तानि पदा इवाधिष्ठानभूतानि यस्य तस्य स्थितिपदश्चतुर्षु पादेष्वैश्वर्यभोगेषु सर्वभूतानि पार्षदपर्यंतानि पादा इवाधिष्ठानभूतानि पादान् दर्शयति। त्रयाणां सात्त्विकादिपदार्थानां मूर्द्धेव मूर्द्धा प्रकृतिस्तस्या मूर्द्धसु तदुपरि विराजमानेषु श्रीवैकुंठलोकेषु अमृतं क्षेममभयं चाधायि नित्यं धृतमेव तिष्ठतीत्यर्थः। ततः पूर्वस्य मर्त्यान्नमात्रात्मकत्वादेकपात्त्वमुत्तरस्यामृतादित्रयात्मकत्वात्त्रिपात्त्वमिति भावः। तदनेन "पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" इत्यस्यार्थो दर्शितः। अस्य पादस्तथैवास्यैव दिवि वैकुंठे यदमृतात्मकं

---

१. प्रा० पा०—वापि। २. प्रा० पा०—बहिस्त्वासन् प्रजाना त्रय आश्रमाः। ३. प्रा० पा०—महद्व्रतम्। ४. प्रा० पा०—विष्वक्।

त्रिपात् तच्च विश्वाभूतानीत्यर्थः। अत्राधिष्ठानाधिष्ठेययोरैक्योक्तिरिति संदर्भः। विश्वनाथस्तु—अथ तस्य मायिकीरमायिकी-विंभूतीर्विभज्य दर्शयति द्वाभ्याम्। स्थितिः सर्वलोकपालनं पादाब्जरणारविंदाद्यस्य स स्थितिपात् तस्य पुंसः पादेष्वंशभूतेषु मायिकामायिकदेशेषु सर्वभूतानि बद्धमुक्तजीवान्विदुः। तत्र च त्रिमूर्ध्नः त्रिगुणमयस्थानानामुपरिष्टो भागो यत्प्रकृत्यावरणं तस्य मूर्धसूपरितनस्थानेषु परमव्योमस्वित्यर्थः। अमृतं मरणाभावः क्षेमं रोगाभावोऽभयं परस्परहेतुकस्य भगवदपराधहेतुकस्य च भयस्याभावः। कालहेतुकभयस्यामृतशब्देनैव वारणं ज्ञेयम्। अधायि स्थापितम्। तेन त्रिगुणमयस्थानेषु तद्विपरीतं मृतमक्षेमं भयञ्च निहितमिति। त्रिगुणप्रपंचस्यानित्यत्वं त्रिगुणातीतस्य परव्योम्नो नित्यत्वं बोधितं वक्ष्यते चाग्रे तद्धामवर्णने 'न च कालविक्रमः' 'न यत्र माया' इत्यादि। एवं च पादोस्येत्यादेरर्थो विवृतः। अत्र 'पादोस्य विश्वा भूतानि" इति सामानाधिकरण्यमधिष्ठानाधिष्ठेययोरभेदविवक्षया पाद इत्येकवचनं सामान्याभिप्रायेण दिवि सर्वस्योर्ध्वप्रदेशेऽमृतमस्य त्रिपात्रिपादविभूतिस्थमित्यर्थः। इत्यर्थ इति। त्रिगुणात्मकत्वात्तस्या इति भावः। तत्र सप्तलोकेषु तत्प्रत्यासत्तेः मोक्षस्य प्रत्यासत्तेः सन्निहितत्वात्। यथा गंगातटेप्यागतो गंगागतः कथ्यते तद्वदत्रापि मोक्षसन्निहितोपि मोक्ष इति कथ्यत इति। सत्यलोकगतानां स्वयंप्रभातवेदविचारेण मोक्षोस्तीत्यर्थः। यद्वा "ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यांते कृतात्मानः प्रविशंति परं पदम्" इति स्मृतेरपि तेषां मोक्षश्रवणात्। अत्र संदर्भः॥ १८॥ ❀ ❀ अथ चतुष्पात्त्वे त्रिलोकीव्यवस्थावत्पक्षांतरं दर्शयति। पादा इति। चशब्द उक्तसमुच्चयार्थः। प्रपञ्चाद्बहिः पादास्त्रय आसन्नेव प्रपञ्चात्मकस्यैव च चतुर्थपादस्य विभागविवक्षायां तु त्रिलोक्या बहिश्चान्ये पादास्त्रय आसन्नित्येवं मंत्रेपि तथैव पुनः शब्दः ते केऽप्रजानां ब्रह्मचारिवानप्रस्थयतीनामाश्रमाः प्राप्या ये लोकाः। अत एव धर्मत्रयप्राप्यत्वाच्चतुर्णामपि त्रिपात्त्वम्। अपरस्तु चतुर्थः। पादस्त्रिलोक्या अंतरिति गृहमेधस्तत्प्राप्यः यस्मान्न बृहद्व्रतं यस्य स तथा ब्रह्मचर्यरहित इत्यर्थः। विश्वनाथः। "पादेषु सर्वा भूतानि" इत्यस्यार्थं विशिष्य दर्शयति। बहिस्त्रिमूर्द्ध शब्दोक्तात्प्रकृत्यावरणात्परत्र त्रयः पादाः परमव्योमशब्देनाभिधीयमाना आसन्। चकारात्क्वचित्क्वचित्प्रपञ्चमध्यवर्त्तिनोपि मथुरायोध्यादिनामानः ये पादाः अप्रजानां न प्रकर्षेण जायंत इत्यप्रजा संसारमुक्ता जीवास्तेषामाश्रमाः स्थानानीति। आश्रमाणामाश्रमस्थानं च तेषां नित्यत्वं बोधितम्। "अमृतं क्षेममभयम्" इति पूर्वोक्तेः। त्रिलोक्यास्त्रिगुणलोकमय्याः प्रकृतेरंतस्तु अपरश्चतुर्थः पाद इत्यर्थः। यत्र गृहमेधः कर्मिजन इत्यर्थः। कीदृशोऽबृहद्व्रतः भगवद्व्रतरहितो भगवद्भक्तिरहित इत्यर्थः। तेन स चापि कदाचिद्भक्तः स्यात्तदा तस्यापि त्रिपाद्विभूतिरेव स्थानमिति भावः। एवं च "त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः" इति श्रुत्यर्थो विवृतः। स्मृतिश्च 'त्रिपाद्विभूतेः' इत्यारभ्य 'श्रिया भूम्या च संवृतम्। इत्यंता संदर्भधृताऽत्रानुसंधेया॥ १९॥ ❀ ❀ उक्तलक्षणेनैकपादत्रिपाद्विभूतीर्जीव एव प्राप्नोतीत्याह विश्वमंचतीति विश्वङ् जीवः। सृती एकपादत्रिपादविभूत्योः पंथानौ विचक्रमे चलति लडर्थे लिट्। कीदृश्यौ साशनानशने भोगापवर्गप्राप्तिसाधनभूते तत्र योग्यतामाह। यद्यस्य जीवस्यैवाविद्या विद्या च। अविद्यादशायामेकपादविभूतिं विद्यादशायां त्रिपाद्विभूतिं प्राप्नोति। किंतु विद्याया उपरमे लब्धया एकया भक्त्यैव 'भक्त्याहमेकया ग्राह्यः' इति भगवदुक्तेः। पुरुषः परमेश्वरस्तूभयस्याविद्याविद्यावृत्तिकमाया आश्रय इति सृतिद्वयं तत्स्वामिकत्वात्तदधीनमेवेति भावः। एवं च "ततो विष्वङ् व्यक्रामत्साशनानशने अभि" इत्यस्यार्थो विवृतः॥ २०॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

उतामृतत्वस्येत्यस्येति उतामृतत्वस्येशानोयदन्नेनातिरोहति (२) इत्यर्द्धर्चस्य। सायणभाष्यं यथा उत अपि च। अमृतत्वस्य देवत्वस्य अयमीशानः स्वामी। यत् यस्मात् कारणात् अन्नेन प्राणिनामन्नेन भोग्येन निमित्तेन अतिरोहति स्वकीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति। तस्मात् प्राणिनां कर्म्मफलभोगाय जगदवस्थास्वीकारान्नेदं तस्य वस्तुत्वमित्यर्थः (२)॥ एतावानस्येत्यस्येति एतावानस्य महिमातो ज्यायांश्च पूरुषः (३) इत्यर्द्धर्चस्य। सायणभाष्यं यथा—अतीतानातगवर्त्तमानरूपं जगत् यावत् अस्ति एतावान् सर्वोऽप्यस्य पुरुषस्य महिमा स्वकीयसामर्थ्यविशेषः न तु तस्य वास्तवं स्वरूपम्। वास्तवस्तु पुरुषः अतो महिम्नोऽपि ज्यायान् अतिशये नाधिकः। (३)॥ १८॥ ❀ ❀ पादोऽस्य विश्वा भूतानीति (३) अस्य सायणभाष्यं यथा—अस्य पुरुषस्य विश्वा सर्वाणि भूतानि कालत्रयवर्त्तीनि प्राणिजातानि पादश्चतुर्थांशः (३)॥ त्रिपादस्यामृतं दिवीति (३)। अस्य सायणभाष्यं यथा—अस्य पुरुषस्यावशिष्टं त्रिपात् स्वरूपम् अमृतं विनाशरहितं सत् दिवि द्योतनात्मकं स्वप्रकाशस्वरूपे व्यवतिष्ठते इति शेषः। यद्यपि सत्यं ज्ञानमनन्तं ब्रह्मेत्याम्नातस्य वरब्रह्मण इयत्ताया अभावात् पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मस्वरूपापेक्षयाल्पमिति विवक्षितत्वात् पादत्वोपन्यासः (३)॥ तदुपरितनलोका इति॥ जनतपःसत्यलोका इत्यर्थः। तदा तत्र गमनादिति तत्र जनलोके इत्यर्थः। त्रिलोक्यामिति तृतीयस्कन्धीयैकादशाध्यायस्यैकोनत्रिंशच्छ्लोकः॥ १९॥ ❀ ❀ त्रिपाद्दूर्ध्व इत्यस्येति। त्रिपाद्दूर्ध्व उदैत् पुरुषः पादोऽस्येहा भवत् पुनः (४) इत्यर्द्धर्चस्य। सायणभाष्यं यथा—योऽयं त्रिपात् पुरुषः संसारस्पर्शरहितो बहुलस्वरूपः (ब्रह्मस्वरूप) सोऽयमूद्र्ध्व उदैत्। अस्मात् अज्ञानकार्य्यात् संसारात् बहिर्भूतोऽ-

त्रयैर्गुणदोषैरस्पृष्ट उत्कर्षेण स्थितिवान् तस्य योऽयं पादो लेशः सोऽयम् इह मायायां पुनरभवत् । सृष्टिसंहाराभ्यां पुनःपुनरागच्छति । अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तम् । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति । ❀ ❀ ❀ (४) ॥ नैष्ठिकब्रह्मचारीति । ब्रह्मचारी तु द्विधः यथा—ब्रह्मचार्य्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः । योऽधीत्य विधिवद्वेदान् ग्रहस्थाश्रममाव्रजेत् । उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तकः ॥ इति कौर्म्मे २ अध्यायः ॥ गृहमेध इति । गृह एव मेधा बुद्धिर्यस्य स गृहमेधः इति बालप्रबोधिनी ॥ २० ॥

### श्रीमद्वीरराघवव्याख्या

जीवान्तरात्मत्वेन वसतोऽपि परमपुरूषस्याभोक्तृत्वं मोक्षप्रदत्वं च प्रतिपादयन् उतामृतत्वस्येत्यस्यार्थमाह स इति । न विद्यते भयं यस्मात्तस्यामृतस्य मोक्षस्येशःप्रदाता यद्यस्मात्मर्त्यमनित्यमन्नं भोग्यं कर्मफलमत्यागादतिक्रम्य स्थितः अनश्नन्यो अभिचाकशीति श्रुत्युक्तरीत्याऽसंभावितकर्मफलसंबंधत्वात्परमात्मा मोक्षद इत्यर्थः । श्रुतावन्तेनेति व्यत्ययेन द्वितीयार्थे तृतीया शरीरांतरावस्थितिजीववैलक्षण्यं चानुपपन्नमित्याशङ्कायां एतावानस्य महिमेत्यस्यार्थमाह महिमेति । पुरुषस्य कृत्स्नचिदचिदात्मकप्रपञ्चान्तर्बहिश्च व्याप्य सर्वं स्वप्रशासनाधीनं कुर्वतः परमात्मन एष महिमा अमृतस्येशानत्वरूपमहिमा दुरत्यय अपारकृत्स्नप्रपञ्चात्मकत्वेनावस्थितस्यापि प्रपञ्चगतदोषांस्पर्शितत्त्वममृतेशितृत्वंचेत्येतदनुपपद्यमानमपि तस्य महिम्ना उपपद्यत इत्यभिप्रायः ॥ १७ ॥ ❀ ❀ अपारमहिमत्वमेव प्रतिपादयतः पादोऽस्य विश्वाभूतानीति वाक्यस्यार्थमाह पादेष्विति । तिष्ठन्त्यत्रेति स्थितयो भूरादयो लोकास्ते पाद इव पादा अंशा यस्य स स्थितिपात् तस्य पादेष्वंशभूतेषु लोकेषु सर्वभूतानि देवादिचतुर्विधभूतानि विदुः एतेन मंत्रेऽपि पादोस्य विश्वभूतानीति सामानाधिकरण्यमधिष्ठानाधिष्ठेययोरभेदविवक्षया पाद इत्येकवचनं च सामान्याभिप्रायेणेति व्याख्यातं भवति । बद्धमुक्तयोरसांकर्येण प्राप्यस्थानानां तद्विभूतित्वप्रतिपादकस्य त्रिपादस्यामृतं दिवीत्यादरार्थमाह अमृतमिति । अस्येश्वरस्य संबंधित्रिपात्त्रिविधममृतमक्षय्यसुखं दिवि प्रकृतिमण्डलाद्बहिरिति श्रुत्यर्थः । अत्र त्रिपाच्छब्दोक्तत्रिविधत्वं दर्शयन्नाह अमृतं मरणादिविकारराहित्यमभयं तत्कार्यभयराहित्यं क्षेमं इष्टप्राप्तिरूपलक्षणं निरतिशयानंदरूपप्रापणमित्यर्थः । अपहतपाप्मत्वादिगुणाष्टकाविर्भावरूपमुक्तैश्वर्यं कोटित्रयेऽत्र संगृहीतं अमृतमिति । विरजावमृत्युशब्दार्थ उक्तः क्षेममिति । सत्यकामत्वाद्यनुवृत्तिरुक्ता अभयमित्यपहतशोकादिशब्दार्थ उक्तः पाप्मना हि भयहेतुः । भयमिति शोकादिसर्वदुःखप्रदर्शनं एवं त्रिमूर्धा त्रिविधं मुक्तैश्वर्यं मूर्धनि उपरिष्टादित्यर्थः । तमसः परस्तादितिवल्लीलाविभूतेः परस्तादमृतं क्षेममयं चाधायि निहितमित्यर्थः । मूर्धस्विति पाठे उपरिष्टाद्वर्त्तमानेषु त्रिषु पादेष्वित्यर्थः ॥ १८ ॥ ❀ ❀ बद्धेभ्यो मुक्तानां जीवानां बहुत्वं तत्प्राप्यस्थानानंत्यमुभयोस्तद्विभूतित्वं बद्धानामल्पीयस्त्वं प्राप्य स्थानं तस्यापि तद्विभूतित्वं च प्रतिपादयतस्त्रिपादूर्ध्वेत्यादेरर्थमाह पादा इति । त्रयः पादा यस्य स त्रिपात्पुरुषः परमपुरुषः ऊर्ध्वं प्रकृतिप्राकृतेभ्यः उपरिष्टादुदेदुदयं गतः स्वेच्छोपात्तदिव्यमंगलविग्रहः समस्तनित्यमुक्तभोग्य आस्त इत्यर्थः । अत्र पाच्छब्दः पादवदंशत्वेनावस्थितमुक्तानां तत्प्राप्यस्थानस्य च भागानाह एवं च त्रयः पादाः मुक्तजीववर्गस्य तत्प्राप्यस्थानस्य च भागा विभूतित्वेन यस्य स त्रिपाद्बद्धजीवस्तत्स्थानापेक्षया मुक्तस्तत्प्राप्यस्थानानां त्रिभागवत्वकथनं अनंतत्वतात्पर्यकं अस्य परमपुरुषस्य पादः विभूतिभूत एको भाग इह प्रकृतिमंडलेऽभवद्बद्धाः तत्प्राप्य स्थानानि चैकांशेन स्थितो जगत्तस्यायुतायुतशतैककलांशकांशे विश्वं विचित्रविदचित्प्रविभागवृत्तमित्युक्तप्रकारेण तद्विभूत्येकदेश इति श्रुत्यर्थः । एतदेव व्याचष्टे पादा इति । त्रयः पादास्तु बहिः प्रकृतिप्राकृतेभ्यो बहिरासन् ये तस्य पादास्तेऽप्रजानां जन्मरहितानां मुक्तानामाश्रयाः प्राप्या इत्यर्थः । एकस्यावहिष्ठत्वमाह अत इति । अवरः सांसारिकक्षेत्रज्ञवर्गप्राप्यस्थानरूपः पादः त्रिलोक्याः अंतरित्यर्थः । तमेव पादं विशिनष्टि गृहमेधः अहंकारममकारादिमान्वर्णाश्रमान्वितश्चेत्यर्थः । बृहद्व्रतः कर्मवश्यः उपचारात्प्राप्यप्राप्तधर्मव्यपदेशः ॥ १९ ॥ ❀ ❀ एवमपारमहिमत्वमुपपाद्यार्थप्रसंगाद्बुभुक्षुमुमुक्षूणां च भगवल्लीलाविभूतित्रिपाद्विभूतिगतिहेतुमार्गद्वयप्रतिपादकं ततो विश्वङिति वाक्ये व्याचष्टे सृतीति । विविधं सुष्ठु अचतीति विश्वङ् क्षेत्रज्ञः सृतीधूमार्चिरादिमार्गो विचक्रमे आक्रमदाक्रांतवानित्यर्थः । कथंभूते सृती साशनानशनेऽशनं भोगः भोगार्थत्वतदभावाभ्यां मार्गयोः साशनानशनत्वे साशनानशनलक्षणमार्गद्वयप्राप्त्युपायमाह यदिति । यद्यत्र मार्गद्वयमध्ये अविद्याकर्म अविद्याकर्मसंज्ञान्येत्याद्युक्तं कर्मरूपाऽविद्या धूमादिमार्गप्राप्त्युपायभूता एका विद्या अर्चिरादिप्राप्त्युपायभुता परमात्मोपासनरूपाऽपरा पुरुषो जीवस्तूभयाश्रयः साधनद्वयनिष्ठः ते विद्याकर्मणी समन्वारभेत इति श्रुतेः समन्वारभेते संगते इत्यर्थः ॥ २० ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

एवं विराजं विराडाख्यांडांतःस्थानबहिर्ब्रह्माण्डाद्बहिष्ठान् विशेषादिमूलप्रकृत्यंतान् सर्वान् पदार्थानशेषविशेषाकारेण तपति पश्यति पश्यन् स्वधिष्ण्यदेहः स बहिष्ठान्विषयानपि एवमण्डान्तरं पश्यन् बहिः सर्वं च पश्यतीति वचनात् । नन्वस्त्वमुक्तप्रपंचाद्वैलक्षण्यं मुक्तप्रपंचवैलक्षण्यं कुत इति तत्राह स इति । स पुरुष अभयस्य जननादिभयरहितस्यामृतस्यानंतमुक्त-

समुदायस्य ईशः स्वामी सर्वाभीष्टदानेनेति शेषः। आत्मनोन्नं भोग्यं नित्यमुक्तलक्ष्मीतत्त्वं तदभिमन्यमानमव्यक्तजडं तत्कार्यं मर्त्यं देहनाशादिना विनाशिनं महदादितत्त्वाभिमानिनं ब्रह्मादिसर्वजीवसमुदायं तानि तत्त्वादीने चानाद्यनंतकालतोऽत्यगादिति शेषः॥ १७॥ ❀ ❀ नानैकांतोऽयं हेतुरिति भावेनाह महिमेति। ब्रह्मादितत्त्वं पक्षान्तर्भूतमिति यत्तत इति। अव्यक्तमात्मनोन्नं महदादिविनाशि च यदतीतः परो विष्णुः स एवातो विमोक्षद इति स्मृतेः जीवानां परमांशत्वात्कथं दुरत्ययत्वं महिम्न इति तत्राह पाद इति। स्वरूपांशो भिन्नांश इति द्विविधोंऽशो हरेरास्ते तत्र सर्वभूतानि सर्वजीवा अस्य पुरुषस्य पादो भिन्नांश इति स्थितिविदः सर्वस्य यथावत् स्थितिज्ञा विदुरतः खद्योतस्य कालाग्न्यंशत्वेपि तन्महिमात्ययत्वं यथा नास्ति प्रमाणविरुद्धत्वादेवं जीवानामपीति भावः॥ १८॥ ❀ ❀ तर्हि स्वरूपांशाः के कुत्र संतीति तत्राह अमृतमिति। अमृतमनंतासनाख्यं क्षेमं वैकुंठाख्यमभयं श्वेतद्वीपाख्यमिति पुरत्रयं त्रिमूर्ध्नोहरेस्त्रिपु मूर्धस्वधायि धृतं रूपान्तरेणेति शेषः। नन्वनेन प्रश्नपरिहारःकथमागत इत्यस्यापीदमेवोत्तरं तथाहि त्रिविधमुरोजीवास्तान् धत्त इति त्रिमूर्धा तस्य हरेरमृतमनंतगतरूपमनंतासनमिति यावत् अनते ऋतं गतं रूपमिति। अमनंतं विदुर्बुधा इत्येकाक्षरमालायाम्। विकुंठनास्नापमृत्युलक्षणं क्लेशं क्षिणोतीति क्षेमवैकुंठाख्यं भादीप्ताविति धातोर्दीप्तिविरोधित्वादभानि जलानि यात्याप्नोति आश्रयत्वेनेत्यभयं नारायणाख्यमिति रूपत्रयम्। एषु त्रिषु मूर्धसूत्तमेषु बहुलक्षाच्छ्रितेषु पुरेष्वधायि निहितं तस्मादनंतासनवैकुण्ठनारायणाः स्वरूपांशा येषु लोकेषु वसंतीति भावः। तदुक्तं स्वरूपांशो विभिन्नांश इति द्वेधांश इष्यत इत्यादि त्रिमूर्धा सन् हरिर्धत्ते पुत्रयमूर्धभिस्त्रिभिरित्यादिना ब्रह्मविष्णुमहेश्वरात्मना त्रयो मूर्धानो यस्य स त्रिमूर्धा तस्य मूर्धसु सत्यवैकुण्ठकैलासाख्यस्थानेषु तेषामेव नामांतरविशिष्टममृतमित्यादिरूपत्रयमधाथीत्यपव्याख्यानमपास्तम्। ते च लोकास्त्रिलोक्या बहिरेवासन्नित्याह पादा इति। पादयंति प्रापयंतीत्यात्मानमिति पादाः ये लोका ये च तेषु वसन्तः स्वरूपांशा अप्रजानामपुत्राणां मदाद्यादीनां ब्रह्मादिदेवानामाश्रयास्ते भूम्यादित्रिलोक्या बहिरेवासन्नित्यन्वयः। अत्र तु नासूचितमिदं प्रमाणं अनंतासनवैकुंठनारायणपुराणि त्वित्यादि॥ १९॥ ❀ ❀ तस्यैव त्रिधाम्नो विष्णोस्त्रिलोकान्तर्गतस्वरूपांशांतरमाह अंतरिति। बृहदिते। भावप्रधानः स एव विष्णुस्त्रिलोक्या अंतरपरो यज्ञपुरुषाख्यः गृहमेधैर्गृहस्थैः। बृहत्त्वेन ब्रह्मत्वेन ब्रह्मार्पणबुद्ध्येति यावत् हुतोवसतीति शेषः। तुना तस्य स्थानस्य शक्रलोकसामीप्यं सूचयति तदुक्तं स एवान्यस्वरूपेण शक्रलोकसमीपग इत्यादि॥ न केवलं शक्रलोकनिकटवर्तिलोकस्थ एव पूज्यते अपि तु त्रिलोक्या अंतर्ध्रुवादिलोकस्थोपीति। समर्थमपि तु शब्देनाह तदुक्तं यतीनां ध्रुवलोकस्थोऽवनिनां मेरुमध्यग इत्यादि एतत्रयोपि स्वरूपांशा इति निर्णयाय मूलरूपवद्भिन्नांशेषु देवादिसर्वजीवेषु तेषां व्याप्तिप्रकारमाह सृती इति। अनंतासनवैकुंठनारायणाख्यस्त्रिपादभगवान्विद्या ब्रह्मविद्या तदविद्या च आश्रिते ते विरुद्धलक्षणत्वादुभे देवमनुष्यसंज्ञे सृती सरणीमार्गौ विष्वक् सर्वतो विचक्रमे अपि देवमनुष्यसंज्ञे कुतोवगते इति तत्राह साशनानशने इति। साशना मनुष्या अनशना देवास्तद्विषव्यवस्त्वात्तथोक्ते यद्वा ये विद्यावाविद्या चैते सृती इत्यनेन तद्वंतः पुरुषा लक्ष्यंते तेषु विक्रम्य स्थितः तदुक्तं त्रिपात्स एव भगवान्सर्वप्राणिषु संस्थितः निरन्नेषु च विद्वत्सु त्रिदशेष्वितरेषु चेति ननु हरेराधेयत्वेन पारतंत्र्यमागतमत्राह पुरुष इति। पुरुषो विष्णुरुभयोराश्रय आधारः तुशब्देनान्ये मत्स्यादयः स्वरूपांशा अपि सर्वव्याप्तिमंत इति सूच्यते अण्डव्याप्तचतुर्मुखोत्पत्तिमाह तस्मादिति। पूर्वमहदादितत्त्वोत्पादनाय हरिणा यदण्डं निरमाथि तस्मादण्डाद्ब्रह्मनामा विराट् जज्ञे अण्डव्यापिनं तं विशिनष्टि भूतेति। भूतानां पृथिव्यादीनां जीवानां वा इंद्रियाणां श्रोत्रादीनां गुणानां शब्दादिविषयाणां विषयवृत्तौ सहकारिणां दिगादिदेवानां वाऽऽश्रय आधारः यद्वा स्वसृष्टात्तस्मादण्डाद्विश्वासौ राट् चेति विराट् विष्णुः जज्ञे शेषशायित्वेन प्रादुर्भूतः। किंचाण्डादभिव्यक्तात् तस्माच्छेषशायिनो हरेर्नाभिपद्मात् रूपांतरेण भूतेंद्रियगुणाश्रयो विराट् ब्रह्मा जज्ञ इत्यन्वयः। तस्माद्धरेरण्मभूदंडादपि चतुर्मुख इत्यादेरुक्तार्थः एवायं श्लोकः॥ २०॥ २१॥

**श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या**

विराजं प्रतपन् विराट् प्रकाशकत्वेन प्रस्तूयमानः पुमान् श्रीभगवत्तत्वमपि एवम् अन्तः अन्तरङ्ग त्रिपाद्विभूतिरूपम्बहिः बहिरङ्गपादविभूतिरूपं प्रतपति प्रकाशयति॥ १७॥ ❀ ❀ तद्विभूतयः पाद्मोत्तरखण्डे—त्रिपाद्विभूतेर्लोकास्तु असंख्याः परिकीर्त्तिताः। शुद्धसत्त्वमयाः सर्व्वे ब्रह्मानन्दसुखाह्वयाः॥ सर्व्वे नित्या निर्व्विकारा हेयरागविवर्ज्जिताः। सर्व्वे हिरण्मयाः शुद्धाः कोटिसूर्य्यसमप्रभाः। सर्व्वे वेदमया दिव्याः कामक्रोधादिवर्ज्जिताः। नारायणपदाम्भोजभक्त्येकरससेविताः॥ निरन्तरं सामगानपरिपूर्णसुखं श्रिताः। सर्वे पञ्चोपनिषदस्वरूपा वेदवर्च्चसः। इत्यादि। अत्र त्रिपाद्विभूतिशब्देन प्रपञ्चातीतलोकोऽअभिधीयते पादविभूतिशब्देन तु प्रपञ्च इति। यथोक्तं तत्रैव—त्रिपाद्व्याप्तिः परं धाम्नि पादोऽस्येहाभवत् पुनः। त्रिपाद्विभूतिर्नित्यं स्यादनित्यं पादमैश्वरम्। नित्यं तद्रूपमीशस्य परं धाम्नि स्थितं शुभम्। अच्युतं शाश्वतं दिव्यं सदा यौवनमाश्रितम्। नित्यं सम्भोग्यमीश्वर्य्या श्रिया भूम्या च संवृतम्॥ इति॥ अतएवात्र द्वितीयस्कन्धेऽप्येवमेवोक्तम्। तथाहं सोऽमृतस्येति। अमृतादिद्वयं तु तत्तृतीयत्वेन वक्ष्यमाणस्य क्षेमस्याप्युपलक्षणम्। श्रुतौ च उतामृतत्वस्येशान इत्यत्रामृतत्वं तदयुगलोपलक्षणम्। अत्र धर्म्मिप्रधाननिर्देशः। श्रुतौ तु तत्र धर्म्ममात्र निर्देशस्यापि तत्रैव तात्पर्य्यम्। तत्रामृतं—स्वदृष्टवद्भिः पुरुषैरभिष्टुतमिति परं न यत्परमित्याद्युक्तानुसारेण परमानन्दः। अतएव अमृतं विष्णुमन्दिरमिति तात्पर्य्यार्योऽपि। अभयं—

न च कालविक्रम इत्याद्युक्तानुसारेण भयमात्राभावः। अतएव द्विजा धामाकुताभयमित्युक्तम्। क्षेमं—न यत्र मायेत्याद्युक्तानुसारेण भगवद्बहिर्मुखताकरगुणसम्बन्धाभावाद्भगवद्भजनमङ्गलाश्रत्वं ज्ञेयम्। तथा च नारदीये—सर्व्वमङ्गलमूर्द्धन्या पूर्णानन्दमयी सदा। द्विजेन्द्र! तव मय्यस्तु भक्तिरव्यभिचारिणी इति। अतएव क्षेमं विन्दन्ति मत्स्थानमित्युक्तम्। तत्र तत्तच्छब्देन लक्षणामयकष्टकल्पनया जनलोकादिवाच्यतां निषेधन् हेतुं न्यस्यति। मर्त्त्यं ब्रह्मणोपि भयं मत्तो द्विपरर्द्धं परायुष इत्यादिन्यायेन मरणधर्म्मकम् अन्नं कर्म्मादिफलं त्रिलोक्यादिकं यस्मात् अत्यगात् अतिक्रम्यैव तत्र विराजते इति। एष अमृताद्यैश्वर्य्यरूपः। दुरत्ययः ब्रह्मचर्य्यादिभिः केनचिन्मनसाप्यवरोद्धुमशक्यः॥ १८॥ ❀ ❀ तदेवम् अमर्त्यमैश्वर्य्यं त्रिपात् मर्त्त्यमेकपादिति तस्य चतुष्पादैश्वर्य्यं पुनर्विवृणोति पादेषु सर्व्वभूतानीति। तिष्ठन्त्यत्र सर्वभूतानीति स्थितये मर्त्याद्यैश्वर्य्याणि तानि पादा इवाधिष्ठानभूतानि। पादान् दर्शयति। त्रयाणां सात्त्विकादिपदार्थानां मूर्द्धेव मूर्द्धा प्रकृतिः तस्य मूर्द्धसु तदुपरि विराजमानेषु श्रीवैकुण्ठलोकेषु अमृतं क्षेमम् अभयञ्च अधायि नित्यं धृतमेव तिष्ठतीत्यर्थः। ततः पूर्वस्य मर्त्यान्नमात्रात्मकत्वात् एकपात्त्वम्। उत्तरस्यामृतादित्रयात्मकत्वात् त्रिपात्त्वमिति भावः। तदनेन पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि इत्यस्यार्थो दर्शितः अस्य पादस्तथास्यैव दिवि वैकुण्ठे यत् अमृताद्यात्मकं त्रिपात् तच्च विश्वा भूतानीत्यर्थः। अत्राधिष्ठानाधिष्ठेययोरैक्योक्तिः॥ १९॥ ❀ ❀ अथ चतुष्पात्त्वे त्रिलोकीव्यवस्थावत्पक्षान्तरं दर्शयति पादा इति। च शब्द उक्तसमुच्चयार्थः प्रपञ्चाद्बहिः पादास्त्रय आसन्नेव प्रपञ्चात्मकस्य चतुर्थपादस्यैव विभागविवक्षायान्तु त्रिलोक्या बहिश्चान्ये पादास्त्रय आसन्निति। एवं मंत्रेऽपि हि दर्शनैव पुनः—शब्दः। ते के? अप्रजानां ब्रह्मचारिवानप्रस्थयतीनाम् आश्रमाः आश्रयाश्च लोकाः। [illegible] चतुर्णामपि त्रिपात्वम् अपरस्तु चतुर्थः पदस्त्रिलोक्या अन्तरिति। गृहमेधस्तत्प्राप्यः। यस्मात् अबृहद्व्रतो ब्रह्मचर्य्यरहित इति॥ २०॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

एतत् सदृष्टान्तमाह। असौ प्राणः प्राणवायुः स्वधिष्ण्यं देहान्तः प्रतपन् श्वासेन प्रतापयुक्तं कुर्वन् बहिश्च प्रतिपति प्रभवति एव विराजम् अन्तर्यामित्वेन स्थित्या प्रतपन् प्रतापवन्तं ज्ञानक्रियादिशक्तिमन्तं कुर्व्वन् अन्तर्बहिश्च प्रतपति प्रभवति॥ १७॥ ❀ ❀ स परमेश्वरः अमृतस्य ईशः प्रभुर्भोक्ता भोजयिता दाता चेत्यर्थः। स्वर्गीयसुधाव्यावृत्यर्थमाह अभयस्य संसारभयरहितस्य। अमृतस्येशत्वे हेतुः मर्त्यं मरणधर्म्मकम् अन्नं वैषयिकं सुखं यत् यस्मात् अत्यगात् अतिक्रान्तवान्। न ह्यमृतभोजिने चणकचर्व्वणं रोचते इति भावः। यदि च कौतुकवशात् कदाचित्तांश्चर्व्वयति तदनासक्त्यैव। एवमेवान्तर्यामिणेऽपि अहं हि सर्व्वयज्ञानां भोक्ता च प्रभुरेव च इत्यादिदृष्टः कचिद्भोक्तृत्वव्यपदेशोऽपि तदन्नातिक्रम एव दृष्टव्यः। एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयानिति श्रुतौ निरन्नत्वं नाम अन्नासक्तिराहित्यं व्याख्यातम्। एवञ्च उतामृतत्वस्येशानो यदन्नेनातिरोहतीत्यस्यार्थो विवृतः। अमृतत्वस्येति स्वार्थो त्वश्छान्दसः। सुपां सुपो भवन्ति इत्यन्नमित्यर्थे अन्नेनेति पदम्। अतिरोहति अत्यक्रामत्। ततो हेतोः पुरुषस्य परमेश्वरस्य एष महिमा दुरत्यय अपारः। एवञ्च एतावानस्य महिमातो ज्यायांश्च पूरुष इत्यस्यार्थो विवृतः॥ १८॥ ❀ ❀ अथ तस्य मायिकीरमायिकीश्च विभूतीर्विभज्य दर्शयति द्वाभ्याम्। स्थितिः सर्व्वलोकपालनं पादाश्चरणारविन्दाद्यस्य स स्थितिपात् तस्य पुंसः पादेषु अंशभूतेषु मायिकामायिकदेशेषु सर्व्वभूतानि बद्धमुक्तजीवान् विदुः। तत्र च त्रिमूर्द्धः त्रिगुणमयस्थानां मूर्द्धा इव उपरिस्थानेषु परमव्योमस्वित्यर्थः। अमृतं मरणाभावः क्षेमं रोगाद्यभावः। अभयं परस्परहेतुकस्य भगवदपराधहेतुकस्य च भयस्याभावः। कालहेतुकमस्यामृतशब्देनैव वारणं ज्ञेयम्। अधायि स्थापितम्। तेन त्रिगणमयस्थानेष तद्विपरितं मतम अक्षेमं भयञ्च निहितमिति त्रिगणप्रपञ्चस्यानित्यत्वं त्रिगणातीतस्य परव्योम्नो नित्यत्वं बोधितम्। यद्यपि चात्र तद्विलक्षणत्वं न च कालविक्रमः न यत्र मायेत्यादि। एवञ्च पादोऽस्य विश्वा भूतानीति सामानाधिकरण्यम्। अधिष्ठानाधिष्ठेयाभेदविवक्षया पाद इत्येकवचनं सामान्याभिप्रायेण दिवि सर्वोर्द्धप्रदेशे अमृतम् अस्यात्रिपात् त्रिपात्विभूतिस्थमित्यर्थः॥ १९॥ ❀ ❀ पादेषु सर्व्वभूतानित्यस्यार्थं विशिष्य विवृणोति। बहिस्त्रिमूर्द्धशब्दोक्तात् प्रकृत्यावरणात् परत्र त्रयः पादाः परव्योमशब्देनाभिधीयमाना आसन्। चकारात् कचित् कचित् प्रपञ्चमध्यवर्त्तिनोऽपि मथुरायोध्यादिनामानः। ये पादा अप्रजानां प्रकर्षेण न जायन्ते इत्यप्रजाः संसारमुक्ता जीवास्तेषाम् आश्रमाः स्थानानीति आश्रमाणामाश्रमस्थानाञ्च तेषां नित्यत्वं बोधितम् अमृतं क्षेममधायीति पूर्वोक्तेः त्रिलोक्यः त्रिगुणलोकमय्याः प्रकृतेरन्तस्तु अपरश्चतुर्थः पाद इत्यर्थः। यत्र गृहमेधः कर्म्मिजन इत्यर्थः। कीदृशः अबृहद्व्रतः भगवद्व्रतरहितो भगवद्भक्त इत्यर्थः। तेन स चापि यदि कदाचिद्भक्तः स्यात् तदा तस्यापि त्रिपाद्विभूतिरेव स्थानमिति भावः। एवञ्च त्रिपादूर्द्ध उदैत् पुरुषः पादोऽस्ये हाभवत् पुनिरिति श्रुत्यर्थो निवृतः। स्मृतिश्च यथा—त्रिपाद्विभूतेर्लोकास्तु असंख्या परिकीर्त्तिताः। शुद्धसत्त्वमयाः सर्वे ब्रह्मानन्दसुखाह्वयाः। सर्व्वे नित्ये निर्विकारा हेयरागविवर्जिताः। सर्व्वे हिरण्मयाः शुद्धाः कोटिसूर्य्यसमप्रभाः॥ सर्वे वेदमया (देवमाया) दिव्याः कामक्रोधादिवर्जिताः। नारायणपदाम्भोजभक्त्यैकरससेविताः॥ निरन्तरं सामगानपरिपूर्णसुखं श्रिताः सर्व्वे प्रपञ्चोपनिषत्स्वरूपा वेदवर्च्चसः (देववर्च्चसः)

इत्यादि। तत्र त्रिपाद्विभूतिशब्देन प्रपञ्चातीतलोकोऽभिधीयते। पादविभूतिशब्देन तु प्रपञ्च इति। यथोक्तं तत्रैव त्रिपाद्व्याप्तिः परं धाम्नि पादोऽस्येहाभवत् पुनः। त्रिपाद्विभूतिर्नित्यं स्यादनित्यं पादमैश्वरम॥ नित्यं तद्रूपमीशस्य परं धाम्नि स्थितं शुभम्। अच्युतं शाश्वतं दिव्यं सदा यौवनमाश्रितम् नित्यं सम्भोग्यमीश्वर्या श्रिया (भूम्या) च संवृतमिति सन्दर्भभूतं पाद्मोत्तरखण्डम्। तत्र त्रिमूर्द्धा महर्लोकस्तस्य मूर्द्धसु जनतपःसत्येषु क्रमेण अमृतं क्षेममभयं निहितं त एव त्रयः पादा ब्रह्मचारिवानप्रस्थयतीनाम् आश्रमा महर्लोकात् अधस्त्रिलोक्यां गृहस्थो ब्रह्मचर्य्यरहितस्तिष्ठतीति स्वामिचरणाः॥ २०॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

मोक्षप्रदत्वं कर्मफलानपेक्षत्वं च भगवतो दर्शयन् उतामृतत्वस्येशानो यदन्नेनातिरोहतीत्यस्यार्थमाह सोऽमृतस्येति। सः पुमान् न विद्यते भयं यतस्तस्याभयस्यामृतस्य मोक्षस्य ईशः मोक्षदाने स एव समर्थ इत्यर्थः। मुक्तिप्रदाता सर्वेषां विष्णुरेव न संशय इति स्मृत्यन्तरा यत् यस्मात् मर्त्यं जीवानुरूपमनित्यम्। अन्नं भोग्यम् कर्मफलम् अत्यगात् अतिक्रांतवान् कर्मफलभोक्तृजीवात्तन्नियंता परमात्मा कर्मफलानपेक्ष इत्यर्थः। द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिसस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति श्रुतेः। तेनेदमावृतं विश्वं वितस्तिमधितिष्ठतीत्यनेनोक्तस्य विश्वान्तर्बहिरवस्थितस्य सोमृतस्याभयस्येश इत्यादिनोक्तं मोक्षप्रदत्वं कर्मफलापेक्षत्वं च कुतः स्यादित्याशंक्य तद्व्याख्याय एतावानस्य महिमा ततोज्यायांश्च पुरुष इत्यस्यार्थमाह महिमेति। हे ब्रह्म नारद! बंधविमोचकत्वं कर्मफलास्पृष्टत्वादि इत्येष पुरुषस्य महिमा ततः तस्माद्धेतोर्दुरत्ययः अपारः ज्यायानित्यर्थः पुरुष इति शेषः अस्येति मंत्रस्य पदस्य पुरुषस्येतिव्याख्या ज्यायानिति पदस्य दुरत्यय इति व्याख्या पुरुष इति विशेष्यपदं तु मंत्रादेवाध्याहृत्य योज्यम्॥ १७॥ ❀ ❀ ज्यायस्त्वमेव दर्शयन् पादोऽस्य विश्वा भूतानीत्यस्यार्थमाह पादेष्विति। तिष्ठंत्यत्रेतिस्थितयो भूरादयो लोकाः ते पादा इव पादा अंशाः यस्य स स्थितिपात् तस्य स्थितिपदः भूरादिलोकपदः पुंसः पादेषु भूरादिलोकेषु सर्वभूतानि विदुः मंत्रे तु पाद इति जातावेकवचनम्। पादोऽस्य विश्वा भूतानीति समानाधिकरण्यं च भगवत्पादाभिन्नतया मंत्रेणोक्तेषु भूतेषु स्पर्द्धा रूपादिकं न कर्तव्यमित्यभिप्रायेण बोध्यम्। आश्रमधर्माः द्विविधाः पुनरावृत्तिलोकप्रापकाः परमपदप्रापकाश्च ते च श्रीपराशरेण प्राजापत्यं ब्राह्मणानामित्यारभ्य ब्राह्मं संन्यासिनां स्मृतमित्यंतेन पुनरावृत्तिलोकप्रापकाः एकांतिनः सदा ब्रह्मध्यायिनो योगिनो हि ये तेषां तत्परमं स्थानं यद्वै पश्यंति सूरय इत्यनेन परमपदप्रापकाश्च प्रदर्शिताः ततः पुनरावृत्तिलोकप्रापकानामाश्रमधर्माणां फलं दर्शयन् त्रिपादस्यामृतं दिवीत्यस्यार्थं दर्शयति। अस्य पुरुषसूक्तोदितस्य पुरुषस्य संबंधित्रिपादत्रिविधममृतं स्वर्गसुखापेक्षयानित्यं सुखं दिवि जनादित्रिकेऽस्तीति श्रुत्यर्थः एतदेवाह त्रयाणां भूरादीनां मूर्द्धामहर्लोकस्तन्मूर्द्धानो जनादयो लोकाः तेष्वेकैकक्रमेणामृतं क्षेममभयमधायि निहितम्। तथाहि जनलोके अमृतं नैष्ठिकब्रह्मचारिधर्मसाध्यं सुखं त्रिलोक्यपेक्षया स्थिरत्वाच्चिरजीवि भोग्यम्। श्रीकुमारास्तु तत्र मुमुक्षुजनानुग्रहाय स्थिताः। यथा श्वेतद्वीपेऽनिरुद्धः न तु कर्मफलभोगायेत्यन्यत्र विस्तरः तपोलोके क्षेमं निहितं त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना। यांत्यूष्णामहर्लोकाज्जनं भृग्वादयोर्दिता इति। वक्ष्यमाणरीत्या भृग्वादिगमनेन जनलोके अक्षेमदर्शनमस्ति तपोलोके तस्याप्यभावात् सत्येऽभयं त्रयोदशलोकसुखाभिमानिकृतपराभवाभावः तपोलोके तु अभयं न सत्यस्थभूतकृतभयसंभवात् सत्यस्थानामपि पुनरावृत्तिः आब्रह्मभुवनाल्लोका पुनरावर्तिनोऽर्जुनेति भगवतोक्तो ब्रह्मा च तत्र लोकहितायैवास्ते तस्य भगवत्पुत्रत्वेन पातानर्हत्वादित्यलं विस्तरेण॥ १८॥ ❀ ❀ एतदेव त्रैविध्यमुपपादयन् त्रिपादूर्द्ध्व उदैत्पुरुष इत्यस्यार्थमाह त्रयो जनतपःसत्याख्याः पादा इव पादा अंशाः यस्य स त्रिपात्पुरुषः नैष्ठिकवानप्रस्थसंन्यासिधर्मफलदः स उर्ध्वलोकत्रये तेन पादत्रयाख्येनांशेनोदैदुपस्थितः इति श्रुत्यर्थः। एतदेवाह न प्रजायते पुत्रादिरूपेणेत्यप्रजा उर्ध्वरेतसः नैष्ठिकवानप्रस्थसंन्यासिनः तेषां ये आश्रमा वासस्थानानि स्वाश्रमधर्मफलभोगभूमयः ते त्रिलोक्या बहिः आसन् चतुर्थं पादं गृहस्थाश्रमधर्मफलभोगायतनभूतं दर्शयन् पादोऽस्येहा भवत्पुन इत्यस्यार्थमाह अंत इति। अस्य पुरुषस्य इह भूरादिरूपः पादः अंशः अभवदिति। श्रुत्यर्थः अपरः अप्रजेभ्यः अन्य सप्रजः कथंभूतः अबृहद्व्रतः ब्रह्मचर्यव्रतरहितः गृहमेधः गृहे एव मेधो यज्ञो यस्य सः त्रिलोक्याः चतुर्थपादभूतायाः अंतर्मध्ये एव गृहस्थस्त्रिलोक्यामेव स्वाश्रमधर्मफलं अल्पकालस्थायि स्वर्ग्यं सुखं प्राप्नोतीत्यर्थः। वर्णधर्माणामप्येषैव गतिरिति बोध्यम्॥ १९॥ ❀ ❀ एवं द्वितीयस्कंधस्य प्रथमाध्यायमारभ्य अबृहद्व्रत इत्यंते ग्रन्थे उपादेयत्वेन मुमुक्ष्वधिकारः तस्माद्भारतसर्वात्मा भगवान् हरिरीश्वरः श्रोतव्य इत्यादिना विस्तरतः प्रतिपादितः हेयत्वेन बुभुक्ष्वधिकारश्च श्रोतव्यादीनि राजेंद्र नृणां संति सहस्रशः इत्यादिना विस्तरतः प्रतिपादितः सृती चोभयाधिकारिविषये एते सृती ते नृप! वेदगीते इत्यनेनोपपादिते फले चोभयाधिकारियोग्ये तेनात्मनाऽत्मानमुपैति शांतमानंदमयोऽवसाने न पादेषु सर्वभूतानामिति श्लोकद्वयेन च वर्णिते तत्रानंदप्राप्तिरूपमर्चिरादिमार्गेण गतस्य मुमुक्षोर्भूरादिसत्यांतलोकेषु स्वर्ग्यामृतक्षेमामयाख्यानि फलानि धूममार्गेण गतानां बुभुक्षूणामिति विवेकः। स चाधिकारभेदः एकस्यैवावस्थाभेदेन ज्ञेयः। तथा च श्रुतिः तं विकर्मणी समन्वारभेते इति तं पुरुषं विद्याकर्मणी भुक्तिमुक्तिसाधने अवस्थाभेदेन सम्यक् अन्वारभेते संगते भवतः जातायां मुमुक्षायां विद्यासंगता भवति बुभुक्षायां तु जातायां कर्मसंगतं भवतीति श्रुत्यर्थः एतदेव दर्शयन् ततो विश्वगित्यस्यार्थमाह सृतीति। विविधं सुष्ठु अंचतीति

विष्वक् क्षेत्रज्ञः सृती धूमाद्यर्चिरादिमार्गौ । कथंभूते सृती साशनाऽनशने भोगमोक्षप्राप्तिसाधनभूते विचक्रमे चलति सन्मार्गद्वयप्राप्तौ साधनद्वयमाह यदाविद्या च विद्या चेति यद् ययोः सृत्योः क्रमेण अविद्याकर्मलक्षणा अविद्याकर्मसंज्ञान्येति वाक्यात् विद्या संवेदनोपासनाद्यपरपर्यायरूपा च क्रमेण साधनमित्यर्थः । अधिकारी तु अवस्थाभेदेन एक एव इत्याह पुरुषस्तूभयाश्रय इति ॥ २० ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवमपरिच्छेदं स्व[1]प्रकाशत्वं चोक्त्वा तेन ब्रह्मत्वं साधयित्वा तस्य प्रपञ्चनिःप्रपञ्चफलदातृत्वं साधयितुमुभयस्वा[2]मित्वमाह—सोऽमृतस्येति । स हि पुरुषः अमृतस्य नित्यसुखस्य अभयस्य मोक्षसुखस्य च ईशः स्वामी । उभयं दातुं शक्त इत्यर्थः । उभयदाने सामर्थ्यमाह—मर्त्यमन्नमिति । मर्त्यं मरणात्मकं विराट्शरीरं यद्यस्मादत्यगात् अतिक्रम्य स्थितः । अतोऽमृतं दातुं शक्तः । अन्नं अद्यते अत्ति च भूतानीति मृत्यं कर्मफलं वा । यस्मादतिक्रम्य स्थितस्तस्मादभयस्येशः । अनेन "उताऽमृतत्वस्येशान" इत्यर्धचार्थः कथितः । तत्र "अन्नेनाऽतिरोहती"ति अन्ने न हेतुना तिरोभावं न[3] प्राप्नोति । सर्वे हि मृत्युना कर्मणा वा तिरोभावं प्राप्नुवन्ति । अयं तु न तथेत्यर्थः । ननु यः सर्वो न स सर्वातिरिक्तः । यो वाऽसर्वः यो वाऽतिरिक्तः स न सर्वः । [4]प्रपञ्चस्याऽर्द्ध-परिच्छेदकत्वं नाऽस्ति । तथा सति निजानन्दस्येशो न भवेत् । तस्मादविरोधप्रकारेण समर्थनानुपपत्तेः परस्परविरुद्धधर्माश्रयत्वेनाऽभेदो न स्यादित्याशङ्क्याऽऽह—महिमैष ततो ब्रह्मन्निति । ततो विरुद्धोभयधर्माश्रयत्वाद्भगवतो महिमा । न हि वि[5]रुद्धधर्माभ्यां स्वाश्रयभेदः कर्तुं शक्यते । एकस्मिन्नेवाश्रये उभयोर्जातत्वात् । किन्तु धर्माणां परस्परं विरोधो लोकवत्कार्यं कर्तुमसमर्थः स्वाश्रयस्य महिमानं बोधयति । सर्वत्र समर्थस्तत्र देहसमर्थस्तदा तस्मिन् कश्चिन्महिमा वर्तते येन प्रतिबद्धः स्वकार्यं कर्तुं न शक्नोतीति सिद्धम् । तस्मादेष एव महिमा यद्विरुद्धधर्माश्रयत्वमिति । तस्य धर्मस्याऽनन्यसिद्धस्य कार्यसाधकत्वं न क्वचित्सिद्धमिति महिम्नः प्रतिबन्धकता न युक्ता । असमोदूर्ध्वत्वाच्च धर्मस्य न वा अविरोधः । उक्तिमात्रविरुद्धत्वात् । अतो विरुद्धधर्माश्रयत्वमेव महिमा । अलौकिकत्वात् । स च महिमा दुरत्ययः केनाऽप्यतिक्रान्तुमशक्यो बुद्ध्या कृत्या वा । अविरोधं वा एकधर्मनिराकरणं वा देशकालादिभेदेन व्यवस्थां वा न[6] कश्चिदपि कर्तुं शक्तः लोके उभयकार्यदर्शनात् ब्रह्मन्निति सम्बोधनं भगवन्माहात्म्यबोध[7]-नार्थम् । सूक्ते तु महिम्न एतावत्त्वं प्रतिपाद्य तेन पुरुषमाहात्म्यमाह—[8]महत्त्वेन हि माहात्म्यमतिशयितं भवति । स एव हि दुरत्ययार्थः ॥ १७ ॥ ❀ ❀ एवं भगवतोऽपरिच्छेदनिरूपणेन माहात्म्यं निरूप्योभयफलेशत्वं निरूपितम् । लोके तस्याऽप्रकटने कृते व्यर्थं भवेदिति तत्प्रकटनार्थं पुरुषभेदं फलभेदं च निरूपयति—पादेषु सर्वभूतानीति । पादेषु भूरादिलोकेषु सर्वाणि भूतानीत्यर्थः । अनेन स्थानभेदात्फलभेदो भविष्यतीति सूचितम् । ननु सर्वावयवेषु लोकत्वनिरूपणात्कथं पादेष्वेव सर्वे-लोका इत्यत आह—पुंसः स्थितिपद इति । तिष्ठन्त्यस्मिन्निति स्थाः भूरादिलोकाः स्थितिशब्दवाच्या भवन्ति । स्थितयः पादा यस्येति स्थितिपात् सर्वे हि लोका अवयवा अप्य[9]वयविनं भगवन्तं प्रति पादा एव । तत्तत्स्थानमधिष्ठाय यतो भगवांस्तिष्ठतीति । अत्र प्रमाणमाह—विदुरिति । "पादोऽस्य [10]सर्वा भूतानी"ति भगवन्माहात्म्यार्थं सर्वाण्यपि भूतान्येकः पाद इत्युक्तम् । अथवा । पादाः पादस्थिताः पुरुषाश्च । "तात्स्थ्यात्तद्व्यपदेश" इति न्यायेन पादा एव सर्वाणि भूतानि । एकवचनं तु जात्यभिप्रायम् । एवं भगवदवयवेषु सर्वेषां जीवानां स्थितिमुक्त्वा तद्भोग्यस्य फलस्य स्थितिमाह—अमृतमिति । भगवति सुखचतुष्टयमस्ति । अनित्यमेकं, नित्यं त्रिविधमिति । तस्य त्रिविधस्याऽप्यमृतं क्षेममभयमिति नामत्रयम् । तेषां स्थानमाह—त्रिमू[11]र्ध्नोऽधायि मूर्द्धस्विति । त्रयाणां लोकानां मूर्द्धा महर्लोकः । तस्य मूर्द्धसु जनस्तपःसत्यलोकेषु त्रिविधमपि सुखं स्थापितमित्यर्थः । अत्रैवं व्यवस्था । त्रिलोक्यामनित्यमेव सुखम् । महर्लोकेऽपि स्थानत्यागलक्षणस्य दुःखस्य विद्यमानत्वात् । "यान्त्यूष्मणा महर्लोकमि"ति वाक्यात्तत्राऽप्यनित्यप्रायं सुखम् । अतो [12]जनलोके अमृतं सुखम् । तस्य स्वरूपतः स्थानतश्च नाशाभावात् । तपोलोके तु क्षेमम् । अक्षेमदर्शनाभावात् । जनलोके तु महर्लोकात्पलाय्य आगतानां दुःखितानां दर्शनरूपमक्षेमदर्शनमस्ति । जनलोकस्थितास्तु नैव तपोलोके गच्छन्तीति तत्रत्यं सुखं क्षेममेव । सत्यलोके त्वभयं सुखम् । मोक्षप्रत्यासन्नत्वात् । अतो नित्यं सुखं त्रिष्वेव लोकेषु । इदमेवाऽभयं सुखं ज्ञानिनः प्राप्नुवन्ति [13]न्यासिनः । तदग्रे वक्ष्यते । "त्रिपादस्याऽमृतं दिवी"त्यस्याऽप्ययमेवाऽर्थः । अस्य त्रिपादमृतं दिवि । उपरितनलोकेष्वित्यर्थः । त्रिलोकपक्षाभिप्रायेण दिवीत्युक्तम् ॥ १८ ॥ ❀ ❀ एतेषां सुखानां भोक्तॄनाह—पादास्त्रयो बहिश्चाऽऽसन्निति । चत्वारो वर्णा भगवतश्चत्वारः पादाः । यतो भगवांस्तानधितिष्ठति । तत्र त्रयः पादाः—ब्रह्मचारी, वानप्रस्थः, संन्यासी च । ते त्रयोऽपि त्रिलोक्या बहिश्चाऽऽसन् चकारात्स्वेच्छया [14]अन्तरपि । तेषां व्युत्क्रान्तानां त्रयाणामेकं

१. स्वप्रकाशकत्वमिति ख. ग. घ. ङ. । २ स्वाम्यमिति ग. घ. । ३ नाप्नोतीति इति ग. ङ. । ४. प्रपञ्चस्योदूर्ध्वमपरिच्छेदकत्वमिति क. ख. । ५. विरुद्धोधर्माभ्यामिति ख. ङ. । ६. नकारो नास्ति क. ग. घ. ङ. । ७. बोधार्थमिति ङ । ८. महिम्नेनेति ङ । ९. अवयविन इति क. ख. ग. । १०. विश्वाभूतानीति ग. । ११. त्रिमूर्ध्नाऽधायीति ग. । १२. जनलोको अमृतमिति ख. । १३. संन्यासिन इति ग. घ. । १४. अन्तरेऽपीति ग. घ. ।

साधर्म्यमाह—**अप्रजानां य आश्रमा इति**। न प्रजायन्ते पुत्रादिरूपेणेत्यप्रजा गृहस्थव्यतिरिक्ताः। तेषां य आश्रमाः। आश्रमधर्मत्वेन ते न प्रजायन्ते न तु बन्ध्याः। अर्थात्ते सुखत्रयस्य भोक्तारः। अनित्यसुखभोक्तारमाह—**अन्तस्त्रिलोक्यास्त्वपर इति**। त्रिलोक्या अन्तः अपरो हीनः स गृहस्थः। गृह एव मेधा बुद्धिर्यस्येति बाह्यो दोषः। अबृहद्व्रत इत्यान्तरः। बृहत्स्थूलमूर्ध्वरेतोरूपं व्रतं यस्य नास्ति स तथोक्तः॥ १९॥ ❀ ❀ एवं वर्णचतुष्टयस्य स्वरूपं फलं चोक्त्वा तेषां वैलक्षण्ये[1] हेतुमाह—**सृती विचक्रमे विश्वङिति**[2]। न हि स्वभावत एव ते तथा जाताः। किन्तु भगवानेव मार्गद्वयेन गच्छति। तदनुरोधेन तेऽपि लोकास्तमनुगच्छन्ति। तदाह। सृती मार्गौ। विचक्रमे विशेषेणाऽऽक्रान्तवान्। विष्वङ् परितः। एकस्मिन्नपि मार्गे एकोऽप्यंशोऽनाक्रान्तो नास्तीत्यर्थः। तत्र भेदकमाह—**साशनानशने उभे इति**। एकः साशनमार्गः। अशनेन सहितं साशनं कर्मफलभोगसहितम्। एकस्त्वनशनमार्गः कर्मफलभोगरहितः। ते उभे। नत्वन्ययोरत्र निरूपणम्। ननु भगवान्[3]किमिति मार्गद्वयेन गच्छति? तत्राऽऽह—**यदविद्या च विद्या चेति**। भगवतो गमने शक्तिद्वयमविद्या विद्या च। तत्राऽविद्या साशनमार्गे एव चलति। विद्या त्वनशनमार्गे। भगवांस्तूभयाश्रितस्तदनुरोधेनोभयत्र चलति। अन्यथा भगवच्छक्तित्वं तयोर्न स्यात्। चकारात्तत्कार्यं सामग्री च न मार्गान्तरे गच्छतीत्यर्थः॥ २०॥

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः**

**सोऽमृतस्येत्यत्र उभयस्वामित्वमाहेति**, यत्परमित्यस्योत्तरत्वेनाहेत्यर्थः। **इतीति**। अनया श्रुत्या बोधितम्। कथं **कथित इत्याकाङ्क्षायामाहुः तत्रेत्यादि** तत्रेत्यर्द्धेर्चे। तथा च, श्रौतस्योतशब्दस्याप्यर्थकत्वेन तद्बोधितस्यार्थस्य कण्ठोक्तस्य च हेतुपूर्वकं बोधनात् कथित इति भावः। पूर्वार्द्धे यदुक्तं तत्राशङ्कते **नन्वित्यादि**। **तथासतीति**। प्रपञ्चरूपत्वेनोर्ध्वापरिच्छेदकत्वे सति। **तस्मादिति** प्रपञ्चापेक्षयोर्द्ध्वस्य स्वानन्दस्यैशत्वकथनात्। **न स्यादिति** न युज्यत इत्यर्थः। **लोकवत्कार्यमिति** लोक इवाश्रयभेदम्। **इति सिद्धमिति, इति** हेतोर्महिमवत्त्वं सिद्धमेवमेतेना'**तो ज्यायांश्च पुरुष**' इति व्याख्यातम्। अतः **परमेतावानस्य महिमे**' ति भागं व्याकुर्वन्ति **तस्मादेष, इत्यादि**। एतस्य महिमत्वं व्युत्पादयन्ति **तस्येत्याति**। **महिम्नः प्रतिबन्धकता न युक्तेति** विरुद्धधर्माश्रयत्वकृतस्य महिम्नो विरोधप्रतिबन्धकता न युक्ता। **असमोर्ध्वत्वादि**। यथा कमलमुकुलं मूले विस्तीर्णं प्रान्ते स्वल्पं यथा चन्द्रज्योत्स्नाग्रे स्वल्पा मूले विस्तीर्णा, तथा विरुद्धधर्माश्रयत्वमपि प्रापञ्चिकेषु स्वल्पं, तदुपरि ततोपि महदिति तथात्वात्। तथा च, नीचैर्भागे धर्मस्य विरुद्धत्वाभावेन तत्कृतमहिम्नोभावादपि तथेत्यर्थः। **उक्तिमात्रविरुद्धत्वादिति**, उक्तिमात्रेणैव विरुद्धत्वादित्यर्थः। **अत्र इति**, अविरोधस्याशक्यवचनत्वात्। **उभयकार्यदर्शनादिति, सदिति** ज्ञानविषयत्वस्य सर्वरूपत्वकार्यस्य ध्यानादिभिः फलप्राप्तिरूपस्यातिरिक्तरूपत्वकार्यस्य च सर्वानुभवगोचरत्वात्। **स एवेति**, अपरिच्छेदानिर्वाच्यत्वादिमहत्स्वरूपमेतावत्त्वमेवेत्यर्थः॥ १७॥ ❀ ❀ **पादेष्वित्यत्र सर्वे लोका** इति सर्वे प्राणिनः। **स्था इति** अत्राधिकरणे घञ्। **स्थितिशब्दवाच्या भवन्तीति**। तेन स्थितिशब्दो लोकेषु रूढ इति बोधितम्। **अवयवा अप्यवयविन इत्यादि**। पुंसः सर्वरूपस्यावयविनः तत्तदवयवरूपा अपि भगवन्तमतिरिक्तं प्रतिपाद्या इत्यर्थः। नन्वत्र भूतानां पादाधिकरणकत्वमुच्यते, प्रमाणे भूतानामेव पादत्वमुक्तमिति विरोध इत्याशङ्कायां तत्तात्पर्यमाहुः **भगवन्माहात्म्येत्यादि**। **विरुद्धधर्माश्रयत्वबोधनार्थम्**। तत्र भूतानां पादत्वमुच्यतेऽन्यथापाद इत्येकवचनं न वदेत्, अतो न विरोध इत्यर्थः। ननु मन्त्रवर्णादित्यस्य विषयवाक्यमिदम्, तत्र जीवानामंशत्वाय पादत्वमङ्गीकृतमिति तद्विरुद्ध्यत इत्यरुच्या व्याख्यानान्तरमाहुः **अथवेत्यादि**। तथा च, पादस्थानां रेखादीनामिवांशत्वस्याविरुद्धत्वाद्वक्ष्यमाणरीत्या तानधिष्ठाय भगवतः स्थितत्वाच्च लक्षणया योगेन गौण्या च देहविशिष्टजीवानामपि पादत्वमतो न विरोध इत्यर्थः। उक्तार्थस्य परोक्षत्वादत्र लक्षणा न दोषाय स्वार्थत्यागाभावाच्च। **त्रिपादमृतमिति**। त्रिभिः पद्यते प्राप्यत इति **त्रिपात्**, न विद्यते मृतं नाशो यस्येत्यमृतम्॥ १८॥ ❀ ❀ **पादा इत्यत्र त्रिपादूर्ध्वं इत्यर्द्धर्चं** विवृणोतीत्याहुः **एतेषामित्यादि**। **त इति** आश्रमविशिष्टा जीवाः। **व्युत्क्रान्तानामिति** त्यक्तभौतिकशरीराणाम्। तथा च, त्रिपादाश्रमत्रयात्मकः पुरुष ऊर्ध्वं उपरितनामृतसुखार्थमुदैत्, उपरितनेषु जनस्तपःसत्येषु गतवान्, अस्य पादः गृहस्थाश्रमी इह त्रिलोकीसुखार्थं पुनरभवत् पुनः पुनरुत्पन्न इति श्रुत्यर्थः॥ १९॥ ❀ ❀ **सृती इत्यत्र वैलक्षण्यहेतुमाहेति** ततो **विश्वं व्यक्रामत् साशनानशने अभी**त्यर्द्धर्चं व्याकुर्वन् सर्वेषां जीवानां चिदंशत्वेन तौल्येपि फलभेदहेतुभूतस्वभाववैलक्षण्ये प्रयोजकमित्यर्थः। **ते उभे इत्यादि** श्रौतस्याभिपदस्यायमर्थः। **तत्राहेति**—ईदृश्यामाशङ्कायां श्रौतस्य तत इति पदस्यार्थमाहेत्यर्थः। **उभयाश्रित इति** उभयमाश्रितं यत्र स तथेत्यर्थः। एतेनाविद्याविद्ययोश्चरणशक्तित्वं बोधितम्। तेन च जीवानां चरणांशत्वाद् एतन्नैकस्थ्येन 'एकस्यैव ममांशस्ये' ति भगवद्वाक्योक्तबन्धमोक्षयोरुपपत्तिरपि सूचिता। **अन्यथेति**' भगवदनाश्रितत्वमित्यर्थः॥ २०॥

---

१. वैलक्षण्यहेतुमिति क.। २. विष्वङिति सर्वत्र पुस्तकेषु पाठः। ३. भवानिति ख.।

### श्रीगिरिधरकृता बालप्रबोधिनी

तस्य मोक्षप्रदत्वं प्रतिपादयन् "उतामृतत्वस्य" इत्यस्यार्थमाह—स इति । न विद्यते भयं यत्र तस्याभयस्यामृतस्य मरणजन्मादिसंसारदुःखनिवृत्तिपूर्वकपरमानन्दस्वरूपस्य मोक्षस्य सः परमेश्वर एवेशो दातेत्यर्थः । कुत इत्यपेक्षायामाह—यत् यस्मात् मर्त्यं मरणधर्मकं विनाशि अन्नं कर्मफलमत्यगात्, अतिक्रान्तवानित्यर्थः । ननु प्रपञ्चात्मकस्य भगवतः कुतो नित्यमुक्तत्वं मोक्षदातृत्वं चेत्याशङ्कां परिहरन् "एतावानस्य महिमा विभूतिः स तु ज्यायान् महत्तरः" इति मन्त्रार्थमाह—महिमेति । त्वयाऽपि भगवन्माहात्म्यं ज्ञायत एवेति सूचयन् सम्बोधयति—हे ब्रह्मन्निति, यतः प्रपञ्चात्मकोऽपि प्रपञ्चानभिभूतस्ततः पुरुषस्यैष विरुद्धधर्माश्रयत्वरूपो महिमा दुरत्ययः अपारः, केनापि ज्ञातुमन्यथाकर्तुं चाशक्य इत्यर्थः ॥ १७ ॥ ❀ ❀ तदेवमीश्वरो नित्यमुक्तः स्वतन्त्रो जीवेभ्यो मोक्षादिफलदाता चेत्युक्तम्, तत्रापि जीवानां बन्धमोक्षादिफलवैचित्र्यं स्थानभेदव्यवस्थया भवतीति दर्शयन् "पादोऽस्य विश्वा भूतानि" इत्यस्यार्थमाह—पादेष्विति । तिष्ठन्ति जीवा अत्रेति स्थितयो भूरादिलोकास्ते पादा इव पादाः अवयवत्वेनोक्ता यस्य स स्थितिपात्तस्य पुंसः पादेषु अवयवभूतेषु लोकेषु सर्वभूतानि सर्वान् जीवान् स्थितान् मन्त्रज्ञा विदुः । मन्त्रेषु "पादोऽस्य विश्वा भूतानि" इति सामानाधिकरण्यमधिष्ठानाधिष्ठेयाभेदविवक्षया पाद इत्येकवचनं च सामान्याभिप्रायेणेति व्याख्यातं भवति । भूतेषु फलवैचित्र्यं दर्शयन् "त्रिपादस्यामृतं दिवि" इत्यस्यार्थमाह—अमृतमिति । अस्येश्वरस्य सम्बन्धि त्रिपादमृतं नित्यसुखं दिवि ऊर्ध्वलोकेषु वर्त्तते, न त्रिलोक्यामिति हि मन्त्रार्थः, तदेव त्रिपाच्छब्दोक्तं त्रैविध्यं दर्शयन्नाह—त्रयाणां भूरादिलोकानां मूर्द्धा महर्लोकस्तस्य मूर्द्धानस्तदुपरितना लोकास्तेषु यथाक्रममभृतादिकमधायि भगवता निहितमित्यन्वयः । तत्र त्रिलोक्यां नश्वरमेव सुखं, महर्लोकस्य क्रममुक्तिस्थानत्वेऽपि कल्पान्ते तत्रत्यानां त्रिलोकदाहोष्मपीडितानां स्थानत्यागान्नाविनाशिसुखं, जनलोके त्वमृतमविनाशि सुखमस्ति यावज्जीवस्वस्थानापरित्यागात्, परन्तु महर्लोकवासिनां त्रिलोकदाहोष्मपीडया तदा तत्र गमनादक्षेमदर्शनमस्ति, तपोलोके तु तस्याप्यभावात् क्षेममेव । वक्ष्यति हि—'त्रिलोक्यां दह्यमानायां शक्त्या सङ्कर्षणाग्निना ॥ यान्त्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः' इति । सत्यलोके त्वभयसुखं मोक्षप्रत्यासन्नत्वादिति भावः ॥ १८ ॥ ❀ ❀ एवं स्थानभेदेन फलवैचित्र्यमुक्त्वाऽधिकारभेदेनापि तदुपपादयन् "त्रिपादूर्ध्व" इत्यस्यार्थमाह—पादा इति । ये पूर्वोक्तास्त्रयः पादा जनस्तपस्सत्यलोकास्त्रिलोक्याश्च बहिरासंस्ते अप्रजानां पुत्रादिरूपेण न प्रजायन्ते अप्रजा नैष्ठिकब्रह्मचारिवानप्रस्थयतयः तेषामाश्रमाः स्थानानि गृह एव मेधा बुद्धिर्यस्य स गृहमेधो गृहस्थस्तु त्रिलोक्या अन्तर्मध्ये एव तिष्ठतीति शेषः । तत्र हेतुमाह—अपर इति, यतस्तेभ्यो हीन इत्यर्थः । तत्रापि हेतुमाह—अबृहद्व्रत इति, ब्रह्मचर्यादिव्रतरहित इत्यर्थः ॥ १९ ॥ ॥ ❀ ❀ अयं चाधिकारभेद एकस्यैवावास्थाभेदेन नत्वत्यन्तभिन्न विषय इति दर्शयन् "ततो विष्वक्" इत्यस्यार्थमाह—सृती इति । विविधं सुष्ठु अञ्चति गच्छतीति विष्वङ् पुरुषः क्षेत्रज्ञ उभे सृती मार्गौ विचक्रमे चलतिस्म । कथम्भूते सृती इत्यपेक्षायां ते विशिनष्टि—साशनानशने इति । साशना अशनेन कर्मफलभोगेन सहिता दक्षिणमार्ग इत्यर्थः । एका त्वनशना कर्मफलभोगरहिता उत्तरमार्ग इत्यर्थः । तत्रापि हेतुं प्रदर्शयन् "तं विद्याकर्मणी समन्वारभेते" इत्यस्यार्थमाह—यदिति । यत् यस्मात् अविद्याकर्मरूपैका सृतिः विद्या च तत्साधनोपासनारूपाऽन्या सृतिः । पुरुषो जीवस्तूभयाश्रयः, साधनद्वयनिष्ठ इत्यर्थः ॥ २० ॥

### हिन्दी अनुवाद

मुनिवर ! जो कुछ मनुष्यकी क्रिया और सङ्कल्पसे बनता है, उससे वह परे है और अमृत एवं अभयपद ( मोक्ष ) का स्वामी है । यही कारण है कि कोई भी उसकी महिमाका पार नहीं पा सकता ॥ १७ ॥ ❀ ❀ सम्पूर्ण लोक भगवान्के एक पादमात्र ( अंशमात्र ) हैं तथा उनके अंशमात्र लोकोंमें समस्त प्राणी निवास करते हैं । भूलोक, भुवर्लोक और स्वर्लोकके ऊपर महर्लोक है । उसके भी ऊपर जन, तप और सत्यलोकमें क्रमशः अमृत, क्षेम एवं अभयका नित्य निवास है ॥ १८ ॥ ❀ ❀ जन, तप और सत्य—इन तीनों लोकोंमें ब्रह्मचारी, वानप्रस्थ एवं संन्यासी निवास करते हैं । दीर्घकालीन ब्रह्मचर्यसे रहित गृहस्थ भूलोक, भुवर्लोक और स्वर्लोकके भीतर ही निवास करते हैं ॥ १९ ॥ ❀ ❀ शास्त्रोंमें दो मार्ग बतलाये गये हैं—एक अविद्यारूप कर्म-मार्ग, जो सकाम पुरुषोंके लिए है और दूसरा उपासनारूप विद्याका मार्ग, जो निष्काम उपासकोंके लिए है । मनुष्य दोनोंमेंसे किसी एकका आश्रय लेकर भोग प्राप्त करानेवाले दक्षिण-मार्गसे अथवा मोक्ष प्राप्त करानेवाले उत्तरमार्गसे यात्रा करता है; किन्तु पुरुषोत्तम भगवान् दोनोंके आधारभूत हैं ॥ २० ॥

**यस्मादण्डं विराड् जज्ञे भूतेन्द्रियगुणात्मकः[1] । तद् द्रव्यमत्यगाद् विश्वं गोभिः सूर्य इवातपन्[2] ॥२१॥**
**यदास्य नाभ्यान्नलिनादहमासं महात्मनः । नाविदं यज्ञसम्भारान् पुरुषावयवादृते ॥२२॥**
**तेषु यज्ञस्य[3] पशवः सवनस्पतयः कुशाः । इदं च देवयजनं कालश्चोरुगुणान्वितः ॥२३॥**
**वस्तून्योषधयः स्नेहा रसलोहमृदो जलम् । ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम ॥२४॥**

---

१. प्रा० पा०—गुणाश्रयः । २. प्रा० पा०—इवातपत् । ३. प्रा० पा०—यज्ञेषु ।

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तदेवं विराडंतर्वर्तिनां फलवैचित्र्यमुक्त्वा तत्कारणस्येश्वरस्य तद्वैलक्षण्यं दर्शयितुं तस्माद्विराडजायतेत्यस्यार्थमाह । यस्मादंडं जज्ञे तत्र च भूतेंद्रियगुणात्मको विराट् च जज्ञे स ईश्वरस्तद्विश्वं विराड्देहं द्रव्यमंडं चातिक्रांतवान् । सूर्य इवेति पूर्वोक्त एव दृष्टांतः ॥ २१ ॥ ❀ ❀ नन्वेवं पुरुष एव चेत्सर्वं तर्हि यज्ञस्य तत्साधनानां चापृथग्भावाद्यज्ञैः पुरुषाराधनं न सिद्ध्येदित्याशंक्य तत्परिहाराय यत्पुरुषेण हविषेत्यादिमंत्रार्थं संगृह्य दर्शयति यदेत्यादिना । अस्येति विराडंतर्यामिणः तस्यैव प्रकृतत्वात् नाभौ भवं नाभ्यं तस्मात्कमलादहमासम् । यज्ञसंभारान् साधनानि पशुयूपादीनि पुरुषावयवं विना नापश्यम् ॥ २२ ॥ ❀ ❀ तदा तेषु संभारेषु साध्येषु सत्सु पुरुषावयवैरेते संभाराः संभृता इति चतुर्थेनान्वयः । वनस्पतयो यूपाः । देवयजनं यज्ञभूमिः । इदं चेति वचनाद्यज्ञार्हे स्थाने उपविष्टः कथयतीति गम्यते । बहुगुणान्वितो वसंतादिकालः ॥ २३ ॥ ❀ ❀ वस्तूनि पात्रादीनि ओषधयो व्रीह्यादयः । स्नेहा घृतादयः । रसा मधुरादयः । लोहानि सुवर्णादीनि । मृदश्च चातुर्होत्रं होत्रादिकं कर्म ॥ २४ ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

तत्र त्रिपाद्विभूतिरंतरंगायाश्चिच्छक्तेर्विलास इति चिन्मय्यां तस्यामासक्त एव पादविभूतिस्तु बहिरंगाया मायाशक्तेर्विलास इति मायामय्यां तस्यामनासक्त एव परमेश्वरस्तां केवलमुपकरोतीत्याह । यस्मात्पुरुषादंडं विराट् च जज्ञे । कीदृशः भूतेन्द्रियगुणात्मकः स पुरुष ईश्वरः तदंडं द्रव्यं विराट् शरीरं चात्यगात् तत्प्रविशन्प्रकाशयन्नपि तत्रानासक्तत्वादतिक्रम्यागात् गत्वा च स्वांतरंगस्थाने त्रिपादविभूतावेव सदा स्थित इति भावः । तत्रानुरूपो दृष्टांतः गोभिः किरणैर्विश्वमातपन्प्रकाशयन्सूर्य इव स्वमंडले स्थितः ॥ २१ ॥ ❀ ❀ अत्राक्षिपतीत्थं पुरुष एव चेत्सर्वं तर्हि तदुपासकानां तत्पूजोपचारद्रव्याणां च ततः पृथक्त्वाभावात्तत्प्राप्तिसाधनं तत्परिचरणं कीदृगिति चेत्सत्यम् । तं विना वस्तुतो वस्त्वंतराभावात्तस्य परिचरणस्यावश्यकत्वाच्च पार्थिवैर्गंधपुष्पादिभिः पृथिव्या आराधनमिव तदात्मकैरेव वस्तुभिस्तदाराधनं सिध्येदत्र तदाज्ञैव प्रमाणमिति प्रदर्शयन्स्वं दृष्टान्तयति । यदास्येति ॥ २२ ॥ २३ ॥ ❀ ❀ सत्तमेति सत्पुरुषत्वात्तुभ्यमिदं कथयामीति भावः ॥ २४ ॥ २५ ॥ २६ ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

ततो विष्वङ इत्यस्येति । ततो विष्वङ व्याक्रामत् साशनानशने अभि ( ४ ) इत्यर्द्धर्चस्य । सायणभाष्यं यथा—ततो मायायामागत्यानन्तरं विष्वङ देवतिर्यगादिरुपेण विविधः सन् व्याक्रामत् व्याप्तवान् किं कृत्वा ? साशनानशने अभि अभिलक्ष्य साशनं भोजनादि व्यवहारोपेतं चेतनं प्राणिजातम् । अनशनं तद्रहितमचेतनं गिरिनद्यादिकम् । तदुभयं यथा स्यात् तथा । स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः ( ४ ) ॥ २१ ॥ ❀ ❀ तस्माद् विराड् जायतेत्यस्येति । तस्माद् विराडजायत विराजो अधि-पुरुषः । सजातो अत्यरिच्यत पश्चाद् भूमिमथोपुरः ( ५ ) इत्यस्येत्यर्थः सायणभाष्यं यथा—विष्वङ्व्यत्कामदिति यदुक्तं तदेवात्र प्रपंचयते तस्मादिति । तस्मादादिपुरुषात् विराड् ब्रह्मांडदेहोऽजायत उत्पन्नः । विविधानि राजन्ते वस्तून्यत्रेति विराट् । विराजो अधि विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा पुरुषस्य देहाभिमानी कश्चित् पुमान् अजायत । सोऽयं सर्ववेदान्तवेद्यः परमात्मा । स एव । स्वकीयया मायया विराड् देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरुपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् एतच्चाथर्वणिका उत्तरतापनीये विस्पष्टमामनन्ति । स वा एव भूतानीन्द्रियाणि विराजं देवताः । कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यहरन्नास्ते माययैवेति । सजातो विराट्पुरुषः अत्यरिच्यत अतिरिक्तोऽभूत् देवतिर्यङ्मनुष्यादिरुपोऽभूत् पश्चात् देवादिजीवभावात् ऊर्द्ध्वभूमिं ससर्ज्जेति शेषः । अथ । भूमेः सृष्टेरनन्तरं तेषां जीवानां पुरःससर्ज्ज पूर्य्यन्ते सप्तभिर्धातुभिरिति पुरः शरीराणि ( ५ ) सूर्य्य इवेति । स्वस्मात् प्रकाशमानं मण्डलं विश्वञ्च । मण्डलमध्यवर्त्ती सूर्य्यः किरणैः सर्व्वतः प्रकाशयन् तदुभयम् अत्येति यथेत्यर्थः २२ यत् पुरुषेण हविषेत्यादिमन्त्रेति । यत् पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तो स्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ( ६ ) ॥ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये ( ७ ) तस्माद्यज्ञात् सर्व्वहुतः सम्भृतं पृषदाज्यम् । पशून् तांश्चक्रे वायव्यान् आरण्यान् ग्राम्यांश्च ये ( ८ ) ॥ तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ( ९ ) तस्मादश्वा अजायन्त ये के चोभयादतः । गावोह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ( १० ) ॥ इत्यादयोपि मन्त्राः । एषां सायणभाष्यं यथा—यत् यदा पूर्वोक्तक्रमेणैव शरीरेषूत्पन्नेषु सत्सु देवा उत्तरसृष्टिसिद्ध्यर्थं बाह्यद्रव्यस्यानुत्पन्नत्वेन हविरन्तरासम्भवात् पुरुषस्वरूपमेव मनसा हविष्ट्वेन सङ्कल्प्य पुरुषेण पुरुषाख्येन हविषा मानसं यज्ञम् अतन्वन् अन्वतिष्ठन् । तदानीमस्य यज्ञस्य वसन्तो वसन्तर्त्तुरेवाज्यमासीदभूत् । तमेवाज्यत्वेन सङ्कल्पितवन्त इत्यर्थः । एवं ग्रीष्म इध्म आसीत् । तमेव इध्मत्वेन सङ्कल्पितवन्त इत्यर्थः । तथा शरत् हविरासीत् । तामेव पुरोडाशादिहविष्ट्वेन सङ्कल्पितवन्त इत्यर्थः । एवं पूर्वं पुरुषस्य हविः सामान्यरूपत्वेन सङ्कल्पः । अनन्तरं वसन्तादीनामाज्यादिविशेषरुपत्वेन सङ्कल्प इति द्रष्टव्यम् ( ६ ) । यज्ञं यज्ञसाधनभूतं तं पुरुषं पशुत्वभावनया यूपे बद्धं बर्हिषि

मानसे यज्ञे प्रौक्षन् प्रोक्षितवन्तः। कीदृशमित्यत्राह। अग्रतः सर्व्वसृष्टेः पूर्व्वं पुरुषं जातं पुरुषत्वेनोत्पन्नम्। एतच्च प्रागेवोक्तम्—तस्माद् विराडजायत विराजो अधि पुरुष इति तेन पुरुषरूपेण पशुना देवा अयजन्त मानसयागनिष्पादितवन्त इत्यर्थः। के ते देवा इत्यत्राह साध्याः सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः तदनुकूला ऋषयो मंत्रद्रष्टारश्च ये संति ते सर्व्वेऽपि अयजन्तेत्यर्थः (७)। सर्वहुतः सर्व्वात्मकः पुरुषो यस्मिन् यज्ञे हूयते सोऽयं सर्व्वहुत् तादृशात् तस्मात् पूर्वोक्तात् मानसात् यज्ञात् पृषदाज्यं दधिमिश्रमाज्यं संभृतं सम्पादितम्। दधि च आज्यञ्च इत्येवमादि भोग्यजातं सम्पादितमित्यर्थः। तथा वायव्यान् वायुदेवताकान् तान् लोकप्रसिद्धान् आरण्यान् पशून् चक्रे उत्पादितवान्। आरण्या हरिणादयः। तथा ये च ग्राम्या गवाश्वादयस्तानपि चक्रे। पशूनामन्तरिक्षद्वारा वायुदेवतात्वं यजुर्ब्राह्मणे समाम्नायते। वायव्यस्थेत्याह। वायुर्वा अन्तरिक्षस्याध्यक्षो अन्तरिक्षदेवत्याः खलु वै पशवः। वायव एवैनान् परिददातीति (८)। सर्व्वहुतस्तस्मात् पूर्व्वोक्तात् यज्ञात् ऋचः सामानि जज्ञिरे उत्पन्नाः। तस्मात् यज्ञात् छन्दांसि गायत्र्यादीनि जज्ञिरे। तस्मात् यज्ञात् यजुरजायत '९'। तस्मात् पूर्वोक्तात् यज्ञात् अश्वा अजायन्त उत्पन्नाः। ये के चाश्वव्यतिरिक्ता गर्दभा अश्वतराश्च उभयादतः ऊर्द्धाधोभागयोर्दंतयुक्ताः सन्ति तेऽप्यजायंत। तथा तस्मात् यज्ञात् गावश्च जज्ञिरे किञ्च तस्मात् यज्ञात् अजा अवयश्च जाताः। '१०'॥ २३॥ ❀ ❀ देवयजनमिति दिवा इज्यन्ते अस्मिन्निति देवयजनं यज्ञभूमिः॥ २४॥

### श्रीमद्वीरराघवव्याख्या

एवं बुभुक्षुमुमुक्ष्वधिकारिभेदेन तद्गंतव्यमार्गद्वयं तदुपायं चोक्त्वाऽथ भगवतः स्वविभूतिभूतप्रपंचाद्वैलक्षण्यं भगवत्प्रपंचाकारेण परिणामतद्गतदोषासंस्पर्शित्वं च प्रतिपादकं तस्माद्विराडजायतेत्यादिवाक्यं व्याचष्टे यस्मादिति। विराड्अण्डकारणभूतोविराट्पुरुषोऽनिरुद्धः अंडादिति ल्यब्लोपे पंचमी। यस्मात्स्वशरीरभूतात्प्रधानाद्यदंडं सृष्ट्वा स्वयमपि भूतेंद्रियगुणात्मकः देवादिव्यष्टिप्रपंचरूपो जज्ञे तत्प्रधानं तदंडरूपं च सर्वं द्रव्यमत्यगाञ्च तत्र परिच्छिन्नः बहिरपि व्याप्तवानित्यर्थः। तत्र दृष्टांतः आश्रयाद्घटपटादिपदार्थजाताद्गोभिः किरणैरादित्य इव त्यगात् वेदांतेषु सत्कार्यवादस्याभिहितत्त्वात्कारणभूतो विराडेव व्यष्टिरूपेण जज्ञे सूक्ष्मचिदचिच्छरीरको भगवानेव स्थूलचिदचिच्छरीरको जातः जातश्च स्वयं शरीरभूतचेतनाचेतनगतदोषैरस्पृष्टः स्वकार्यभूतकृत्स्नप्रपंचमंतर्बहिश्च व्याप्य स्थित इत्यर्थः। नामरूपविभागानर्हसूक्ष्मप्रकृतिपुरुषशरीरकस्य परमपुरुषस्य जगदुपादानत्वादुपादानत्वस्यावस्थाश्रयत्वरूपत्वात्प्रकृतिपुरुषेश्वराणां त्रयाणामप्यवस्थाश्रयत्त्वमस्त्येव तत्राचेतनस्यावस्थाश्रयत्त्वं स्वरूपान्यथाभावरूपचेतनस्य तु स्वभावान्यथाभावरूपं ईश्वरस्य तु कार्यावस्थचेतनाचेतननियंतृत्त्वरूपं न हि कारणावस्थचेतनाचेतननियमनात्कार्यावस्थचेतनाचेतननियमनमभिन्नमिति वक्तुं शक्यं किंचेश्वरस्य सद्वारकावस्थाश्रयत्त्वमस्त्येव एवमसांकर्येणावस्थानां प्रतिनियतत्त्वाच्छुक्लनीलादितंत्वारब्धे पटे शौक्ल्यादेस्तत्तत्प्रदेशगतत्त्ववच्चेतनाचेतनगता धर्मा अज्ञत्त्वपरिणामित्वादयस्तत्रैवावतिष्ठंते न परमात्मानं स्पृशंति परमात्मा तु स्वयंनिरस्तनिखिलदोषोऽनवधिकातिशयासंख्येयकल्याणगुणगणः स्वशरीरभूतचेतनाचेतनगतस्वपर्यंतनामरूपनिर्वाहिकः कारणावस्थकार्य्यावस्थचेतनाचेतनशरीरकत्त्वेन तद्वाचिभिः शब्दैरभिधीयमानः सर्ववस्तुसमानाधिकृतोऽवतिष्ठत इत्ययं मंत्रसंग्रहः। श्रुत्यर्थस्तु तस्मात्परमप्रस्तुतकारणपुरुषाद्विराडनिरुद्धो जज्ञेऽवतीर्णः विराजोऽनिरुद्धाद्वैराजो ब्रह्मांडशरीरकः पुरुषो जज्ञे जातश्च स वैराजः भूमिं विश्वं पश्चादुपरिष्टादधः अंतश्चाऽत्यतिरिच्यते तद्विलक्षणो व्याप्तवानित्यर्थः॥ २१॥ ❀ ❀ नन्वेवं पुरुष एव चेत्सर्वं तर्हि यज्ञस्य तत्साधनानां चापृथग्भावाद्यज्ञैः पुरुषाराधनं न सिध्येदित्याशंक्य तत्परिहाराय यत्पुरुषेत्यादि मंत्रार्थं संगृह्य दर्शयति यदेति। महात्मनः अस्य विराडाख्यानिरुद्धस्य नाभौ भवंनाभ्यं तपोभूतान्नलिनात्कमलादहं चतुर्मुखः यदा आसमभूवं तदा पुरुषावयवाद्विना यज्ञसंभारानन्यानि यज्ञसाधनानि नाविंदम् नापश्यम्॥ २२॥ ❀ ❀ तेषु पुरुषावयवेषु यज्ञस्य साधनान्यासन्निति शेषः तान्याह पशव इति। वनस्पतयो यूपादयो देवयजनं देवा इज्यंतेऽस्मिन्निति देवयजनं यागभूमिः इदं वेति वचनाद्यज्ञार्हे स्थाने उपविष्टः कथयतीति गम्यते बहुगुणान्वितः कालो वसंतादिः॥ २३॥ ❀ ❀ वस्तूनि पुरोडाशादीनि तदर्था ओषधयः व्रीह्यादयः स्नेह आज्यादिः रसः सोमादिरसः लोहः सुवर्णादिः मृदः कपालादीनि चातुर्होत्रं चतुर्होतृशब्दवाच्यैर्मंत्रैः प्रकारयं कर्म हे सत्तम सतां श्रेष्ठ॥ २४॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

एतस्माद्गुणयोगात्परमेष्ठिनामचास्याभूदिति भावेनाह तद्द्रव्यमिति। यदा ब्रह्मांडाच्छर्वपूर्वादिविश्वमुत्पन्नं तद्द्रव्यं गोभिर्भक्तिज्ञानादिगुणलक्षणादिभिरत्यगादुद्रिक्तोऽभूत् कथमिव यथा सूर्यो दिगंतविश्रांतैरश्मिभिरंतरिक्षाद्याश्रयमत्येति तथेत्यन्वयः। तदुक्तं यदोभयात्मको जज्ञे ब्रह्मा लोकपितामह इत्यादि। प्रथमरूपस्य विरिंचस्यापि स एष पुरुष इत्युक्तस्य वैराज पुरुषाभिधस्य हरेर्मुख्याधिष्ठानत्वाद्यस्येहावयवैरित्याद्युक्तलक्षणं चतुर्मुखे संभवति तत्परिहारायाह यदेति। यदास्य नाभ्यान्नाभिप्रदेशाज्जातान्नलिनादहमासद्वितीयरूपेणोत्पन्नोऽभवं महात्मन इत्यनेन तन्माहात्म्यात्स्वमाहात्म्यस्यात्यंतर्वाचीनत्वं सूचयति॥ २२॥ ❀ ❀ तदा भक्त्या तं यियक्षुरहं पुरुषावयवानृते अंडस्य पुरुषप्रतिमात्वात् लोकादियागसंभाराणामुक्तप्रकारेण तदवयवोत्पन्नत्वात्तदवयवव्याप्तत्वात्तदाश्रितत्वाच्च पुरुषावयवान्विहाय लोकादियज्ञसंभारान्नाविदम् लब्धवानित्यन्वयः। अनेन

यज्ञकर्मणा भगवद्विषयेण शुद्धांतःकरणस्य पुंसः समुद्रिक्तभक्तिज्ञानादिभिस्तत्प्रसादातिशयो भवतीत्युक्तं भवति पुनर्ब्रह्मणा किमकारीत्याशंक्य तदर्थत्वेन तत्सृष्टत्वेन तत्सन्निधानविशिष्टैस्तैस्तैर्हरियजनाद्धरिप्रीतिर्भवतीति विमृश्य यज्ञसंभरणप्रकारमाह तेष्विति । तेषु पुरुषावयवेषु तदाश्रितयज्ञसंभारो मया संभृतः साधित इत्यन्वयः । यज्ञा अग्निष्टोमादयः पशवोऽजादयः वनस्पतयोऽश्वत्थादयः यैररण्यादिनिर्माणं क्रियते ॥ २३ ॥ ❀ ❀ देवयजनं यागभूमिः कालो वसंतादिः तस्य गुणा धर्मा वा वसूनि कांचनादीनि ओषधयो व्रीह्यादयः स्नेहा आज्यादयः, रसाः क्षीरगुडा लोहा अयःप्रभृतयः मृदो वल्मीकमृदिष्टिकादयः जलं गंगादिगतम् ॥ २४ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

अतएवोभयथापि पुरुषश्चतुष्पादित्याह सृती इति । विश्वङ् सर्व्वव्यापि, पुरुषः पुरुषोत्तमः, एते सृती ते प्रपञ्चलक्षणे जीवस्य गती, विचक्रमे आक्रम्य स्थितः । कथम्भुते साशनानशने कर्म्मादिफलभोगतदतिक्रमयुक्ते । तस्यैव तत्तदा क्रमेण हेतुः । यत् ययोः जीवस्य सृत्योः अविद्या मायैकेत्र, विद्या चिच्छक्तिरन्यत्राश्रय इत्यर्थः । पुरुषोत्तमस्तु तयोर्द्वयोरप्याश्रयः । वक्ष्यते च— यस्मादण्डं विराडजज्ञे इत्यादिना । तस्मात् सर्व्वैश्वर्य्येणैकदेशैश्वर्य्येण च चतुष्पात्त्वमिति भावः ॥ २१ ॥ ❀ ❀ यस्मादिति । यस्मात् पूर्व्वोक्तात् पुरुषोत्तमात् ॥ २२ ॥ ❀ ❀ अस्य गर्भोदकशायिरूपस्य सतः । पुरुषावयवादृते इति तदानीं पश्वाद्यनुत्पत्तेः ॥ २३ ॥ २४ ॥ ❀ ❀ चत्वारो होत्रा उपलक्षिता उद्गातृब्रह्मऋत्विजश्चतुर्होतारस्तेषां कर्म्म चातुर्होत्रम् ॥ २५ ॥ २६ ॥ २७ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

उक्तलक्षणे एकपादत्रिपाद्विभूती जीव एव प्राप्नोतीत्याह । विष्वं (विश्वम्) अञ्चतीति विष्वङ् (विश्वङ्) जीवः सृती एकपात्त्रिपाद्विभूत्योः पन्थानौ विचक्रमे चलति लडर्थे लिट् । सृती कीदृश्यौ साशनानशने भोगापवर्गप्राप्तिसाधनभूते । तत्र योग्यतामाह । यत् यस्य जीवस्यैव अविद्या च विद्या च । अविद्यादशायाम् एकपादविभूतिं विद्यादशायां त्रिपादविभूतिं प्राप्नोति, किन्तु विद्याया उपवासे लब्धया एकया भक्त्येव, भक्त्याहमेकया ग्राह्य इति भगवदुक्तेः । पुरुषः परमेश्वरस्तु उभयस्य अविद्याविद्यावृत्तिकमायाया आश्रय इति सृतिद्वयं तत् स्वामिकत्वात् तदधीनं भवेदिति भावः । एवञ्च ततो विष्वङ् व्यक्रामत् साशनानशने अभीत्यस्यार्थो विवृतः ॥ २१ ॥ ❀ ❀ तत्र त्रिपाद्विभूतिरन्तरङ्गायाश्चिच्छक्तेर्विलास इति चिन्मय्यां तस्यामासक्त एव पादविभूतिस्तु बहिरङ्गाया मायाशक्तेर्विलास मायामय्यां तस्यामनासक्त एव परमेश्वरस्तां केवलमुपकरोतीत्याह । यस्मात् पुरुषात् अण्डं विराट् च जज्ञे । कीदृशः भूतेंद्रियगुणात्मकः । स पुरुष ईश्वरः तत् अण्डं द्रव्यं विराटशरीरञ्च अत्यगात् तत् प्रविशन् प्रकाशयन्नपि तत्र नासक्तत्वात् अतिक्रम्यागात् गत्वा च स्वान्तरङ्गस्थाने त्रिपाद्विभूतावेव सदा स्थित इति भावः । तत्रानुरूपो दृष्टांतः गोभिः करणैर्विश्वम् आतपन् प्रकाशयन् सूर्य इव स्वमण्डले स्थितः ॥ २२ ॥ ❀ ❀ नन्वेवं पुरुष एव चेत् सर्व्वं तर्हि तदुपासकानां तत् पूजोपचारद्रव्याणाञ्च ततः पृथक्त्वाभावात् तत् प्राप्तिसाधनं तत् परिचरणं नाम कीदृगिति चेत् । सत्यम् । तं विना वस्तुनो वस्त्वन्तराभावात् तस्य परिचरणस्यावश्यकत्वाच्च पार्थिवैर्गन्धपुष्पादिभिः पृथिव्या आराधनमिव तदात्मकैरेव वस्तुभिस्तदाराधनं सिद्ध्येदत्र तदाज्ञैव प्रमाणमिति प्रदर्शयन् स्वदृष्टान्तयति । यदाऽस्य नाभ्यात् नाभिभवात् नलिनात् आसम् अभूवम् ॥ २३ ॥ ❀ ❀ तेषु सम्भारेषु साध्येषु सत्सु पुरुषावयवैरेते सम्भाराः सम्भृता इति चतुर्थेनान्वयः । वनस्पतयो यूपाः । देवयजनं यज्ञभूमिः । इदञ्चेति वचनात् यज्ञार्हे स्थाने उपविष्टः कथयतीति गम्यते । बहुगुणान्वितः वसन्तादिकालः ॥ २४ ॥

### श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः ।

जीवस्य विद्याऽविद्याश्रयस्य भोगापवर्गार्हत्वेनोपासकत्वं द्योतितं भगवतः सर्वकारणत्वादिगुणनिधेर्भुक्तिमुक्तिप्रदत्वेनोपास्यत्वं द्योतयन् ततो विराडजायतेत्यस्यार्थमाह यस्मात्परमेश्वरात् अंडं ब्रह्मांडं जज्ञे तदेव भूतेंद्रियगुणात्मकः विराट्पुरुषदेहः स परमेश्वरः तद्विश्वं सर्वं द्रव्यमत्यगात् अतिक्रांतवान् तत्र दृष्टांतमाह गोभिः सूर्यः स्वधिष्ण्यं प्रतपन् यथा बहिश्च प्रतपति तद्वत् ॥ २० ॥ ❀ ❀ स एव ममापि जनकः अस्मदादिभिः सेव्य इति दर्शयन् यत्पुरुषेण हविषेत्यादि मंत्रार्थं संगृह्य दर्शयति यदेत्यादिना । अस्य महात्मनः विराड्देहाभिमानिनः आत्मनः क्षेत्रज्ञस्य मम स्वामित्वान्महात्मा पुरुषावतारः प्रस्तुतस्तस्य नाभौ भवं नाभ्यं तस्मान्नलिनात् कमलादहं चतुराननः यदा आसमभवं यदा च पुरुषावयवादृते यज्ञस्य संभारान् साधनानि नाविदम् नापश्यम् ॥ २१ ॥ ❀ ❀ तदा तेष्वेव पुरुषावयवेषु दृश्यमानेषु सत्सु तैरेव पुरुषावयवैरेते संभाराः संभृता मयेति चतुर्थेनान्वयः वनस्पतयो यूपाद्याः । इदमक्षिगोचरा देवाः इज्यते यस्मिन्निति देवयजनं यज्ञस्थलम् । कालो यज्ञार्हः वसंतादिः ॥ २२ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं मार्गभेदेन भोक्तृभेदात्फलभेदं निरूप्य, तस्मात्पुरुषादयं विराट्पुरुषो भिन्न इति वक्तुं तत उत्पन्नत्वमाह—तस्मादिति । तस्मात्परमपुरुषान्नारायणादण्डं ब्रह्माण्डं जातम् । तस्मादधिदैवादिदमा[1]ध्यात्मिकमण्डं जातमित्यर्थः । तस्मादण्डाद्विराड् जज्ञे ।

१. अध्यात्मिकमिती ङ ।

स च भूतेन्द्रियगुणात्मकः । भूतान्यधिभूतं द्रव्यम् । इन्द्रियाण्यध्यात्मम् । गुणा अधिदैवमिति । अथवा । महाभूतानि, इन्द्रियाणि, शब्दादयश्च विषयाः । शरीरेन्द्रियैर्विषयभोगकर्तेत्यर्थः । सोऽपि पितृवदाक्रमणं कृतवानित्याह—**तद्द्रव्यमत्यगा**दिति । तद्विश्वात्मकं द्रव्यं ब्रह्माण्डरूपं स्वशरीरमत्यगात् । अतिक्रम्य दशाङ्गुलवृद्ध्या स्थित इत्यर्थः । न केवलमपरिच्छेदसाम्यं किन्तु स्वप्रकाशकमपीत्याह—**गोभिः सूर्य इवाऽतपन्निति** । गोभिः स्वकिरणैर्यथा सूर्यः स्वधिष्ण्यमपि तपति बहिरपि, तद्वत् अयमपि स्वशरीरं बहिरपि प्रकाशितवानित्यर्थः ॥ २१ ॥ ❀ ❀ एवं द्विविधं विश्वं प्रतिपाद्य, नियम्यनियामकभावार्थं पुरुषद्वयं च प्रतिपाद्य, अमूर्त्तानां समागममुक्त्वा, यज्ञरूपस्याऽपि भगवतः सर्वपदार्थसम्बन्धश्रवणात्तत्साधनभूतानां पदार्थानां भगवद्भिन्नत्वे पूर्वोक्तसर्वत्वं विरुध्येतेत्याशङ्क्य, तदीयपदार्थानामपि भगवानेव तत्त्वमित्याह—**यदाऽस्य नाभ्यान्नलिना**दिति । यदेतन्न निरूप्यते तदा जैमिनिसिद्धान्तन्यायेन पदार्थक्लृप्तौ पूर्वोक्तभगवत्स्वरूपवाचकानां वाक्यानामर्थवादत्वं स्यात् । अतो महता कष्टेन निरूपितमप्यनिरूपितं भवेत् । तस्माद्यज्ञोपयोगिपदार्थानां भगवदवयवत्वं निरूपयति । तत्र ब्रह्मा स्वयमाह—'यदा अहं (१) अस्य नाभ्याः यन्नलिनं कमलं तस्मादहमासम् , तदा मया विचारितमयमाराधनीय इति । यतोऽयं महान् । महानात्मा स्वरूपमन्तःकरणं वा यस्य । अयं ह्याराधितो महत्फलं दास्यतीति । तदा केनाऽऽराधनीय इति जिज्ञासायां योगजधर्मेण यज्ञमपश्यम् । स कथं कर्त्तव्य इत्याकाङ्क्षायां वेदपर्यालोचनेन सम्भारैः पशुपुरोडाशादिभिः कर्त्तव्य इति ज्ञातम् । तत्र क ते पशुपुरोडाशादय इति जिज्ञासायां यद्योगजधर्मेण ज्ञातवांस्तदाह—**नाऽविदं यज्ञसम्भारानि**ति । पुरुषावयवव्यतिरेकेण अहं यज्ञस्य सम्भारान्नाऽविदं न ज्ञातवानस्मि । तदा स एव पुरुषो यज्ञरूपेण प्रादुर्भूत इत्यर्थः । अनेन साधनरूपः स इत्युक्तं भवति ॥ २२ ॥ ❀ ❀ तत्र के के सम्भारास्तेष्ववयवेषु दृष्टा इत्याकाङ्क्षायामाह—**तेष्वि**ति । तेष्ववयवेषु यज्ञस्य सम्बन्धिनः पशवः अजादयः । सवनस्पतयो वनस्पतिसहिता यूपसहिताः । सवनस्पतयः कुशा इति वा सम्बन्धः । तदा वनस्पतयोऽश्वत्थादयः । कुशा बर्हीरूपाः । इदं च देवयजनम् । देवा इज्यन्ते अस्मिन्निति यज्ञभूमिर्देवयजनम् । इदमित्यङ्गुल्या प्रदर्शितम् । अनेन यज्ञभूमौ स्थित्वा भागवतं कथयतीति ज्ञापितम् । चकाराद्देवयजनान्तरमपि । कालो वसन्तादिः । चकाराद्योगविशेषो नैमित्तिकः । **उरुगुणान्वित** इति । यदि तस्मिन्काले सूर्यो नाऽऽविः स्यात्-पुरस्ताच्चन्द्रमा अभ्युदियात्-सस्यसम्पत्तिर्भवेत् । अन्येपि गुणाः कालस्य बहवो वेदे उक्ताः । स उरुगुणान्वितः कालः । वस्तूनि पात्रादीनि । ओषधयो व्रीहियवादयः । स्नेहा घृतादयः । रसा दधिमध्वादयः । लोहा स्वधित्यादयः मृदो महावीराद्यर्थाः । जलं वसतीवरीप्रभृतयः । ऋचो यजूंषि सामानि वेदत्रयमन्त्राः । चातुर्होत्रं होत्रादि चतुर्गुणसाध्यं कर्म । चतुर्होतृनिदानकं वा । अत्र **सत्तमे**ति सम्बोधनमुक्तार्थविश्वासाय ॥ २३, २४ ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

**तस्मादित्यत्र आहेति** । **तस्माद्विराडजायत** इति ऋचं व्याकुर्वन्नाहेत्यर्थः । **तस्मादण्डमिति** । एतेन सुबालादिश्रुत्यर्थोपि सङ्गृहीतः । तत्र हि किं तदासीत्तस्मै स होवाच न सन्नासन्न सदसदिति तस्मात्तमः सञ्जायते तमसो भूतादिर्भूतादेराकाशमाकाशाद्वायुः वायोरग्निरग्नेरापः अद्भ्यः पृथिवी तदण्डं समभवदिति श्रावणात् तदग्रे च मध्ये 'पुरुषो दिव्यः सहस्रशीर्षे' त्यादिश्रावणाच्च **गुणा** इति दिगादयो देवाः । अशनमार्गविक्रमणेन कर्मफलभोक्तृत्वं भगवतो वक्तव्यं, तत्केन रूपेणेत्याकांक्षायां तद्रूपमत्रोच्यते इत्याशयेन व्याख्यानान्तरमाहुः **अथवेत्यादि** । **सोपीति** विराट्पुरुषोऽपि ॥ २१ ॥ ❀ ❀ **यदास्येत्यत्र द्विविधमिति** । अण्डात्मकं विराडात्मकञ्च । **पुरुषद्वयमिति** । विराड्रूपमतिरिक्तञ्च । **अमूर्त्तानामिति** नित्यपरिच्छिन्नानां आधिदैविकानां वागाद्यभिमानिजीवानाम् । **यज्ञरूपस्येत्यादि** । अयमर्थः, यज्ञो हि द्रव्यादिनिष्पाद्यः, तस्य च प्रोक्षणादिव्यतिरेकेण तत्तत्स्मारकमन्त्रादिव्यतिरेकेणापि सिद्धौ ते संस्कारा मन्त्राश्च नोक्ताः स्युरतो ज्ञायते तैरतीन्द्रियः पदार्थः कश्चित्सिद्ध्यतीति । स चेजन्यः स्यान्मीमांसकप्रतिपन्नापूर्ववत्तदा तत्साध्यस्य यज्ञस्यापि जन्यत्वा 'यज्ञो वै विष्णुरि' ति तस्य भगवत्त्वं नोच्येतातः श्रुतविष्णुत्वार्थापत्त्या तस्य तत्साधकानाञ्च नित्यत्वं तेन प्रकारेणाविर्भावमात्रं च यज्ञस्येति वाच्यम् । ते पदार्थाश्च यदि पूर्वोक्तपुरुषाद्भिन्नाः स्युस्तदा 'पुरुष एवेदँ सर्वमि' ति पूर्वं श्रावितं पुरुषस्य सर्वत्वं विरुद्ध्येतेत्याशङ्क्य प्रोक्षणमन्त्रादिभिः सन्निधाप्यमानानां यज्ञीयपदार्थानामपि भगवानेवानारोपितानागन्तुकरूपमित्याहेत्यर्थः । एतदेव विवृण्वन्ति **यदैतदित्यादि** । अत्र 'अहमासमि' त्यनेन यजमानस्य भगवदवयवत्वं सूचितमत एवाच्छिद्रे श्राव्यते य एवास्मि स सन्यज इति एवमग्रेपि सर्वत्र बोध्यम् । महत्वं विवृण्वन्ति **महानात्मेत्यादि** । **स एवेति** । 'सहस्रशीर्षा' मूलपुरुष एव यज्ञरूपेण दर्शनगोचरोऽभवदित्यर्थः ॥ २२ ॥ ❀ ❀ **तेषु यज्ञस्येत्यादेर्विवृतौ बर्हीरूपा इति** असंस्कृतरूपाः, बर्हिराज्याधिकरणे तथा सिद्धत्वात् । **महावीराद्यर्था** इति । महावीरो धर्मपात्रम् । आदिपदेन द्रोणकलशादयस्तदर्था इत्यर्थः । **वसतीवरीति** प्रोक्षणविशेषोपयोगि जलम् । **चातुर्होतृनिदानकमिति** पृथिवीहोतेत्यादिरुपवक्तेत्यन्तोमन्त्रश्चतुर्होताख्यः, स एव सर्वयज्ञनिदानं चतुर्होतृभ्यो यज्ञो निर्मित' इति ब्राह्मणे श्रावणात् अतस्तथेत्यर्थः ॥ २३ ॥

१. यदा हेति ख. ङ. ।

## श्रीगिरिधरकृता बालप्रबोधिनी

तदेवं विराडन्तर्वर्तिनां जीवानां फलवैचित्र्यमुक्त्वा तत्कारणपरमेश्वरस्य तद्वैलक्षण्यं दर्शयन् । "तस्माद्विराडजायत" । इत्यस्यार्थमाह यस्मादिति । यस्मादण्डं जज्ञे तत्र च भूतानि पृथिव्यादिपञ्चमहाभूतानि वागादीन्येकादशेन्द्रियाणि गुणाश्च शब्दादयः पञ्च तदात्मको विराड् जज्ञे स ईश्वरस्तत्र प्रविष्टोऽपि तद्विराट्शरीरात्मकं द्रव्यमत्यगात् । अतिक्रम्य ततो बहिरपि व्याप्तवानित्यर्थः । तत्र पूर्वोक्तमेव दृष्टान्तमाह—विश्वमित्यादि । सूर्यो यथा स्वमण्डलं प्रतपन् प्रकाशयति तथा भगवानपि विराट्-शरीरात्मकं विश्वं प्रकाशयन्नेव ततो बहिरपि प्रकाशयतीत्यर्थः ॥ २१ ॥ ❀ ❀ नन्वेवं पुरुष एव चेत्सर्वं तर्हि यज्ञस्य तत्साधनानां च पृथक्त्वाभावाद्यज्ञैः पुरुषाराधनं न सिद्ध्येदित्याशङ्क्य तत्परिहाराय "यत्पुरुषेण हविषा" इत्यादि मन्त्रार्थं सङ्गृह्य प्रदर्शयन् पार्थिवैः गन्धपुष्पादिभिः पृथिव्या आराधनमिव पुरुषात्मकैरेव यज्ञादिसाधनैः पुरुषाराधनं सिद्ध्यति तत्रास्मदादय एव तत्कर्त्तार इत्याह—यदेत्यादिना । महानात्मा स्वरूपमन्तःकरणं वा यस्य तस्यास्य विराडन्तर्यामिणो भगवतो नारायणस्य नाभौ भवं नाभ्यं तस्मान्नलिनात् कमलात् यदाऽहमासमभूवं तदा मया विचारितं महात्मत्वादयं ह्याराधितो महत्फलं दास्यतीत्यवश्यमयमाराधनीय इति । तदा केनाराधनीय इति जिज्ञासायां योगजधर्मेण यज्ञं तत्साधनमपश्यं स कथं सम्पादनीय इत्याकाङ्क्षायां वेदपर्यालोचनेन पशुपुरोडाशादिभिः साधनैरिति ज्ञातवान् । के ते पशुपुरोडाशादय इति जिज्ञासायां पुरुषस्य यज्ञपुरुषस्य भगवतोऽवयवादृते अवयवाद्भिन्नान् यज्ञस्य सम्भारान् साधनान्यहं नाविदं न ज्ञातवान् ॥ २२ ॥ ❀ ❀ तदा यज्ञस्य तेषु सम्भारेष्ववश्यं साध्येषु सत्सु पुरुषावयवैरेवैते सम्भारा मया सम्भृताः सम्पादिता इति चतुर्थे-नान्वयः । के ते सम्भारा इत्यपेक्षायां तान्दर्शयति—पशवः अजादयः । वनस्पतयो यूपाद्यर्थाः खदिरादयस्तत्सहिताः कुशाश्च । देवा इज्यन्तेऽस्मिन्निति देवयजनं यज्ञभूमिः । इदं चेति निर्देशात्तत्रैवोपविष्टः कथयतीति गम्यते । बहुगुणान्वितो वसन्तादि-कालश्च ॥ २३ ॥ ❀ ❀ वस्तूनि पात्रादीनि, ओषधयो व्रीहियवादयः, स्नेहा घृतादयः, रसा मधुरादयः, लोहाः स्वधि-त्यादयः, मृदः कपालादीनि, जलं च, ऋचो यजूंषि सामानीति वेदत्रयोक्ता मन्त्राः । चातुर्होत्रं होत्रादिभिश्चतुर्भिरनुष्ठेयं कर्म । हे सत्तमेति सम्बोधनेन सत्तमस्य भक्त्यादिमत्त्वेन श्रेष्ठस्यैवात्र सन्मार्गे विश्वासो भवति त्वं च सत्तमोऽतस्त्वया विश्वसनीयमिति सूचयति ॥ २४ ॥

## हिन्दी अनुवाद

जैसे सूर्य अपनी किरणोंसे सबको प्रकाशित करते हुए भी सबसे अलग हैं, वैसे ही जिन परमात्मासे इस अण्डकी और पञ्चभूत, एकादश इन्द्रिय एवं गुणमय विराट्की उत्पत्ति हुई है—वे प्रभु भी इन समस्त वस्तुओंके अंदर और उनके रूपमें रहते हुए भी उनसे सर्वथा अतीत हैं ॥ २१ ॥ ❀ ❀ जिस समय इस विराट् पुरुषके नाभिकमलसे मेरा जन्म हुआ, उस समय इस पुरुषके अङ्गोंके अतिरिक्त मुझे और कोई भी यज्ञकी सामग्री नहीं मिली ॥ २२ ॥ ❀ ❀ तब मैंने उनके अङ्गोंमें ही यज्ञके पशु, यूप ( स्तम्भ ), कुश, यह यज्ञभूमि और यज्ञके योग्य उत्तम कालकी कल्पना की ॥ २३ ॥ ❀ ❀ ऋषिश्रेष्ठ ! यज्ञके लिए आवश्यक पात्र आदि वस्तुएँ, जौ, चावल आदि ओषधियाँ, घृत, आदि स्नेहपदार्थ, छः रस, लोहा, मिट्टी, जल, ऋक् यजुः, साम, चातुर्होत्र ॥ २४ ॥

**नामधेयानि मन्त्राश्च दक्षिणाश्च व्रतानि च । देवतानुक्रमः कल्पः सङ्कल्पस्तन्त्रमेव च ॥२५॥**
**गतयो मतयः श्रद्धा प्रायश्चित्तं समर्पणम् । पुरुषावयवैरेते[1] सम्भाराः सम्भृता मया ॥२६॥**
**इति सम्भृतसम्भारः पुरुषावयवैरहम् । तमेव पुरुषं यज्ञं तेनैवायजमीश्वरम् ॥२७॥**
**ततस्ते भ्रातर इमे प्रजानां पतयो नव । अयजन् व्यक्तमव्यक्तं पुरुषं सुसमाहिताः ॥२८॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

नामधेयानि ज्योतिष्टोमादीनि । ऋगादीनामुक्तत्वान्मंत्रा इति स्वाहाकारादयः । देवतानामनुक्रम उद्देशः । कल्पो बौधाय-नादिकर्मपद्धतिग्रंथः । अनेनाहं यक्ष्य इति संकल्पः तंत्रमनुष्ठानप्रकारः ॥ २५ ॥ ❀ ❀ गतयो विष्णुक्रमाद्याः । मतयो देवताध्यानानि । प्रायश्चित्तं भूर्भुवः स्वरादिकृतस्य भगवति समर्पणम् ॥ २६ ॥ ❀ ❀ संभृताः संपादिताः संभारा येन सोऽहं तेनैव यज्ञेनैव । अनेन यज्ञेन यज्ञमयजंतेति मंत्रार्थः सूचितः ॥ २७ ॥ ❀ ❀ तेन देवा अयजंतेत्यस्यार्थं सप्रपंचं दर्शयति तत इति द्वाभ्याम् । व्यक्तमिंद्रादिरूपेण अव्यक्तं स्वतः । अनेन पुरुषं जातमग्रत इत्यस्यार्थो दर्शितः ॥ २८ ॥

---

१. प्रा० पा०—रेतैः ।

### श्री वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

यज्ञं विष्णुम् । "यज्ञो वै विष्णुः" इति श्रुतेः । "यत्पुरुषेण हविषा" इत्यस्यार्थो ध्वनितः ॥ २७ ॥ २८ ॥ २९ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

[ ऋचो यजूंषि सामानीति वेदत्रयोक्ता मन्त्रा इत्यर्थः ॥ २५ ॥ ] ❀ ❀ देवतानामिति । अग्न्यादीनामित्यर्थः ॥ २६ ॥ ❀ ❀ विष्णुक्रमाद्या इति विष्णुक्रमः यज्ञावान्तरकर्म्मविशेषः विष्णुप्रदक्षिणां वा । [ एते इति । सम्भारा साधनानि मया सम्भृताः सम्पादिता इत्यर्थः ] ॥ २७ ॥ ❀ ❀ यज्ञेन यज्ञमयजन्तेति मन्त्रेति । यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् । तेह नाकं महिमानः सचन्त यत्र पूर्व्वे साध्याः सन्ति देवाः [ १६ ] इति हि मंत्रः अस्य सायणभाष्यं—पूर्व्वं प्रपञ्चेनोक्तमर्थं संक्षिप्यात्र दर्शयति । देवाः प्रजापतिप्राणरूपाः यज्ञेन यथोक्तेन मानसेन सङ्कल्पेन यज्ञं यथोक्तं यज्ञस्वरूपम्प्रजापति-मयजन्त पूजितवन्तः । तस्मात् पूजनात् तानि प्रसिद्धानि धर्म्माणि जगद्रूपविकाराणां धारकाणि प्रथमानि मुख्यानि आसन् । एतावता सृष्टिप्रतिपादकसूक्तभागार्थः संगृहीतः । अथोपासनतत्फलानुवादक भागार्थः संगृह्यते । यत्र यस्मिन् विराट्प्राप्तिरूपे नाके पूर्व्वे साध्याः पुरातना विराडुपास्तिाधकसा देवाः सन्ति तिष्ठन्ति तेनाकं विराट् प्राप्तिरूपं स्वर्गं ते महिमानं तदुपासका महात्मानः सचन्त समवयन्ति प्राप्नुवन्ति [ १६ ] ॥ २८ ॥

### श्रीमद्वीरराघवव्याख्या

नामधेयानि ज्योतिष्टोमादीनि ऋगादीनामुक्तत्वान्मंत्राः स्वाहाकारादयः व्रतं पयोभक्षणादिकं देवतानुक्रमः देवतानाम-नुक्रमः उद्देशः यद्वा देवतेति पृथक्पदं सा च अनुक्रम अनुपाठः आनुपूर्वी वा । कल्पः प्रयोगविधिः संकल्पः कर्त्तव्याध्यवसायः तंत्रं क्रियाकलापः ॥ २५ ॥ ❀ ❀ गतयो विष्णुक्रमाद्याः मतयः देवताध्यानानि श्रद्धाकर्त्तव्यविषया त्वरा प्रायश्चितं वैकल्यसमाधानं समर्पणं देवताः प्रतिहविषोऽर्पणं मयापुरुषावयवैः संभारा यज्ञसाधनानि संभृताः संपादितानि ॥ २६ ॥ ❀ ❀ इत्थं सम्भृताः संपादिताः संभारा येन सोऽहं तमेव पुरुषं नियन्तारं यज्ञं विष्णुं तेनैव यज्ञेनैवायजं इष्टवानस्मि अनेन यज्ञेन यज्ञमयजन्तेति मंत्रार्थ उक्तः ॥ २७ ॥ ❀ ❀ तेन देवा अयजंतेत्यस्यार्थं स प्रपंचं दर्शयति तत इति द्वाभ्याम् । ते तव भ्रातरः मरीच्यादयो नवप्रजापतयः सुसमाहितचित्ताः व्यक्तं इंद्रादिरूपेणाव्यक्तं स्वतः पुरुषं परमपुरुषमयजन्निष्टवंतः ॥ २८ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

नियतपादबद्धा ऋचः अनियतच्छंदोबन्धोपेतानि यजूंषि गानप्रधानानि सामानि चतुर्भिरध्वर्य्वादिभिः क्रियमाणं कर्म चातुहोत्रं नामधेयानीन्द्र इत्यादीन्यग्निहोत्रदर्शादीनि वा मंत्रा द्विविधा बीजात्मका मालात्मकाः विंशद्वर्णादर्वा-ग्बीजमन्त्राः ततोऽधिका मालाख्याः ते च देवताद्रव्यादिप्रकाशकाः चन्द्रकलावत् बिन्दुमंडितशिरसोवर्णा बीजाख्याः चतुर्थ्यंता इंद्रादिनामविशिष्टा नमःस्वाहाफडंता मालामंत्राः उभये च जपाधिका न्यूनजपा इति । कर्म दक्षयंतीति दक्षिणाः होत्रादिभ्यो द्रव्यदान-संबंधाः । व्रतानि ब्रह्मचर्यादीनि ॥ २५ ॥ ❀ ❀ देवतास्तत्तन्मंत्रवाच्या अग्न्यादिकाः अनुक्रमस्तासां तारतम्यं पौर्वापर्यलक्षणा-मनुपाठो वा कर्मक्रमो वा कल्पः प्रयोगविधिप्रतिपादको बौधायनादिः संकल्प इदं करिष्ये इति मनोवाग्भ्यां स्मरणकीर्तनलक्षणः । सूत्रं मीमासासूत्रं च शब्दात्कर्म दैवमीमांसासूत्रे च गृहीते गतयः स्वर्गादिफलानि मतयो ज्ञानानि ऋषिमतभेदभिन्नानि वा श्रद्धा आस्तिक्यबुद्धिः इदं सत्यमस्त्यप्रयोजनमस्तीत्येवंरूपां प्रायश्चित्तमंतरालावाप्तांतरायपरिहारत्वेन यथोक्तकर्मफलसाधनं कर्मसमर्पणं ब्रह्मणीति शेषः ॥ २६ ॥ ❀ ❀ इतिशब्द आदिवचनः एवमादिसंपादितयज्ञसाधनोऽहं पुरुषावयवैः कल्पितैः पश्वादिभिस्तमेव यज्ञपुरुषं तेन मय्यनुविष्टेन प्रेरितो देशकालपश्वादिसाधनेषु चाहिते नमदृष्टिर्विषयेण वाऽयजमित्यन्वयः । ईश्वरमित्यनेन स्वेन यष्टव्यमाहात्म्यं सूचयति ॥ २७ ॥ ❀ ❀ तत्र स्वकृतयज्ञस्य व्याप्तिं कथयति तत इति । अनेन स्वस्य सर्वस्मात् श्रैष्ठ्यं स्वकर्मणः प्रामाण्यं च दर्शितं ते तव भ्रातरो मरीच्यादयः न सनकादय इति परिच्छिनत्ति प्रजानां पतय इति । व्यक्तं गम्यमव्यक्तमगम्यं अनेन साधनसामाग्र्यसामग्रीभ्यां हरेः कश्चन स्वभावो दर्शितः । पुरुषबहुफलप्रदं समाहिता इदमेव श्रेयोनातोऽन्यदित्येकाग्र्यंचित्तगुणाः ॥ २८ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

इति पूर्व्वोक्तपश्वादिरूपेण सम्भृतः सम्भारो येन सोऽहम् । कैः पुरुषावयवैः तत्तद्यज्ञसम्भारकारणभूतेभ्यस्तेभ्य एवोपासितेभ्यस्तत्तद्रूपेणाविर्भावितैः ॥ २८ ॥ २९ ॥ ३० ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

वस्तूनि पात्रादीनि । ओषधयो व्रीह्यादयः । स्नेहा घृतादयः । रसा मधुरादयः । लोहानि सुवर्णादीनि । चातुर्होत्रं हौत्रादिकं कर्म्म ॥ २५ ॥ ❀ ❀ नामधेयानि ज्योतिष्टोमादीनि ॥ देवतानामनुक्रम उद्देशः कल्प बौधायनादिकर्म्मपद्धतिग्रन्थः ।

अनेनाहं यक्ष्ये इति सङ्कल्पः । तन्त्रमनुष्ठानप्रकारः ॥ २६ ॥ ❀ ❀ गतयो विष्णुक्रमाद्याः मतयो देवताध्यानानि । कृतस्य भगवति समर्पणम् ॥ २७ ॥ ❀ ❀ यज्ञं विष्णुं यज्ञो वै विष्णुरिति श्रुतेः एवञ्च यत् पुरुषेण हविषेत्यादेः यज्ञेन यज्ञमयजन्तेत्यादेश्च मन्त्रस्यार्थः सूचितः ॥ २८ ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

वस्तूनि पात्रादीनि ओषधयः पुरोडाशाद्यर्था व्रीह्याद्याः स्नेहः आज्यादिः रसः सोमादिरसः लोहः सुवर्णादिः मृतश्चातुर्होत्रं चतुर्होतृसंस्कृतैर्मंत्रैः प्रकाश्यं कर्म ॥ २५ ॥ ❀ ❀ नामधेयानि ज्योतिष्टोमादीनि मृगादीनामुक्तत्वान्मंत्रा इति स्वाहाकारादयः दक्षिणाश्च व्रतानि पयोभणक्षादीनि देवतानामनुक्रम उद्देशः कल्पः प्रयोगविधिः संकल्पः कर्त्तव्यतासंकल्पः तं तं क्रियाप्रकारः ॥ २६ ॥ ❀ ❀ गतयो विष्णुक्रमाद्याः मतयो देवताध्यानानि प्रायश्चितं वैकल्यसमाधानम् । समर्पणं कृतस्य भगवति समर्पणम् संभृता संपादिताः ॥ २७ ॥ ❀ ❀ इत्येवं संभृताः संपादिताः संभारा येन सोऽहं तमेवपुरुषं पद्मनाभं यज्ञं विष्णुं तेनैव यज्ञेनैव अयजे पूजितवानस्मि । अनेन यज्ञेन यज्ञमयजंतेति मंत्र उपबृंहितः ॥ २८ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

नामधेयानि ज्योतिष्टोमादीनि । मन्त्राः स्वाहाकारादयः । चकारान्निगदाः[1] । दक्षिणा गावः । चकाराद्वराः व्रतानि दीक्षादयः । चकारान्मांसभक्षणादिनिषेधादयः । देवतानुक्रम इज्यानां देवतानामानुपूर्वी आग्नेयः कृष्णग्रीव इत्यादिरूपा[2] । कल्पः कल्पसूत्रम् । सङ्कल्पः कामनाविषयः सूत्रं न्यायसूत्रम् । पद्धतिर्वा । गतयो विष्णुक्रमाद्याः । मतयो देवताध्यानानि । चकारादाचतुर्थात्कर्मणोऽभिसमीक्षणादि । प्रायश्चित्तं अनाज्ञातमित्यादि । समर्पणं संस्था । निवेदनं वा । एतावन्तो हि यज्ञे सम्भाराः । ते पुरुषावयवैरेव कृता इत्याह—पुरुषावयवैरिति । अत्राऽवयवादिव्यवस्था तृतीयस्कन्धे वक्ष्यते । एते सम्भाराः पुरुषावयवैरेव सम्भृताः । मयेति साधारणाधिकारिणा नैवं कर्त्तुं शक्यत इति सूचितम् ॥ २५ ॥ २६ ॥ ❀ ❀ ततः किमत आह—इति सम्भृतसम्भार इति । इत्यमुना प्रकारेण पुरुषावयवैरेव सम्भृतसम्भारो भूत्वा तेन यज्ञेन तमेव पुरुषमयजम् । फलार्थं न यागः किन्त्वीश्वरार्थमिति । तदाह—ईश्वरमिति । यथा मया यागः कृत एवमेव करणमुचितम् । यज्ञीयान्पदार्थान् भक्त्या भगवदवयवाविर्भावं कृत्वा तत उत्पाद्य भगवत्प्रीत्यर्थमेव तैर्भगवत्कर्मकरणम् । भगवतो ह्यस्ति किञ्चित्कार्यं स्वार्थम् । यथा पुरुषस्य स्वप्रयोजनार्थं सर्वाणि कर्माणि तथा भगवतः प्रयोजनार्थं सर्वे यागाः । ततश्च ते यदि भगवदवयवैरेवोत्पादितैः पश्वादिभिर्भगवत्कार्यं कुर्युस्तदा भगवदर्थं तत्फलं भवति । नाऽन्यथा । यद्यपि लौकिका अपि पदार्थास्तथैवोत्पन्नास्तथापि ते सर्वार्था इति । नैकान्ततो यागफलसाधकत्वम् । मध्यमाधिकारिणस्तु यज्ञार्थमेव तथा ज्ञात्वा तान्पदार्थान् सम्पाद्य यज्ञकरणे फलं भवति । परं तत्फलं समर्पणीयम् । यदा पुनस्तथा अज्ञानात्तैः पदार्थैर्यागं करोति तदा तत्फलं भगवान् न गृह्णाति । [illegible] कृतं भगवान् गृह्णाति[3] । [illegible] पदार्थाः सम्पादिताः किन्तु साधारणास्ते । तैस्तु फलमेव नोत्पद्यते । उत्पद्यमानं वा काकतालीयन्यायेनोत्पद्यते[4] चेत्ते पदार्थास्तदर्थं भवेयुः । एवं यागाश्चतुर्धा निष्पद्यते[5]-उत्तम-मध्यम-निकृष्ट-निष्फलभेदेन । तत्र पशवो भगवत ऊरुदेशादुत्पन्नाः । लोमभ्यो वृक्षाः । स्वेदसहितेभ्यः कुशाः । देवयजनं पद्भ्याम् । कालः पक्ष्मभ्यः । वस्तून्योष्ठादिभिः । स्नेहा दृष्ट्या । रसा जिह्वातः । मृदो घ्राणात् । जलानि नाडीभ्यः । ऋचो यजूंषि । सामानि कर्णाभ्यां मस्तकाच्च । चातुर्होत्रं कर्म बाहुभ्यः । नामधेयानि मुखात् । मन्त्राश्च शिरोऽवयवेभ्यः । दक्षिणा गावो वामोरुप्रदेशात् । व्रतानि मनसः । देवताऽनुक्रमः पर्वभ्यः। कल्पो बलात् । सङ्कल्पो बुद्धेः । सूत्रं प्राणात् । विहारयोगरूपं वा । गतयो विक्रमात् । मतयो ज्ञानेन्द्रियेभ्यः । प्रायश्चित्तं कर्मेन्द्रियेभ्यः । समर्पणमात्मनः । अन्येऽपि यज्ञियाः[6] पदार्था यथायथमूह्याः । अत एव वेदे सर्वे यज्ञियाः पदार्था भक्तिमद्भिः साक्षात्क्रियन्ते । पश्चात्ततोऽवयवात्तेषां पदार्थानामाहरणं क्रियते । तदनन्तरं यागः । अन्यथा—अपश्यत्, आहरत्, अयजतेति वैयर्थ्यापत्तिः ॥ २७ ॥ ❀ ❀ एवं यथा मया कृतं तथैव तत्करणानन्तरं ते इमे भ्रातरो मरीच्यादयः । प्रजानां पतयः । नवविधप्रजानां नवविधा स्वयम् । अयजन्[7] । ततः सात्त्विकासात्त्विकेषु व्यक्तो भगवान् । तामसातामसेष्वव्यक्तः । मध्यमेषु द्वयम् । तदाह—व्यक्तमव्यक्तमिति । सुसमाहिताः सावधानाः । अन्यार्थपदार्थैरमेलनार्थं ज्ञानार्थमुत्पादनार्थं वा ॥ २८ ॥

---

१. चकारान्निविन्निगदा इति क. । २. इत्यादिरूपाः इति ग. ङ. । ३. गृह्णातीति इति क. ख. ङ. । ४. उत्पद्यतेति ङ. ५. निष्पाद्यते इति ग. । ६. यज्ञीया इति ख. घ. । ७. अजयन्निति क. ख. ग. । ८. गृहीतेत्याद्युत्तरार्धस्य व्याख्यानुपलम्भाच्छ्रीमदाचार्याभिमतत्वं सन्दिग्धम् ।

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

इति सम्भृत इत्यत्र फलार्थं नेति । आराधनविचारदशायां फलार्थं तद्विचारेपि सम्भारदर्शनोत्तरं तादृशबुद्धिनिवृत्तेस्तथेत्यर्थः । एवं प्रकारेण करणस्य मुख्यत्वं विशदयन्ति यथेत्यादि । अन्यथेश्वरपदं न वदेदिति भावः । उचितप्रकारमेव विशदयन्ति यज्ञीयामित्यादि । पदार्थानित्यन्तम् । उत्पाद्येत्यनेन सम्बद्ध्यते । अस्ति किञ्चित्कार्यमिति । तत्किमित्याकाङ्क्षायां स्वावयवरूपदेवाप्यायनेन सकलजगदाप्यायनमिति प्रतिभाति, 'सर्गादौ कल्पितो देवैर्यज्ञभुग्भगवान् हरिः । यज्ञभागभुजो देवास्ततस्तेनैव कल्पिता' इत्यादिवाक्येभ्यः । ते इति जीवाः । द्वितीयं प्रकारमाहुः मध्यमाधिकारिण इति । षष्ठ्यन्तः प्रयोगोयम् । तथाज्ञात्वेति पदार्थनिर्माणं ज्ञात्वा । तृतीयं प्रकारमाहुः यदा पुनरित्यादि । तथा अज्ञानादिति पदार्थानां यज्ञार्थत्वाद्यज्ञानात् । चतुर्थं प्रकारमाहुः यत्पुनरित्यादि । एवं चतुरः प्रकारानुक्त्वा साधारणपदार्थेभ्यो यज्ञीयानां भेदं दर्शयितुं श्रुतिपुराणान्तरानुसारेण तेषां स्थानभेदं निर्दिशन्ति तत्रेत्यादि । यथायथमूह्या इति । उक्तप्रकारमवगत्य ये यत उचितास्ते तत ऊह्या इत्यर्थः । अत्र मुख्यप्रकारस्य श्रौतत्वबोधानायाहुः अत एवेत्यादि । वैयर्थ्यापत्तिरित्यन्तम् । अत्रोदाहरणं संहितां दृष्ट्वा लेख्यमस्ति । तथा च, श्रुतार्थापत्तिसिद्धोयं प्रकार इत्यर्थः ॥ २७ ॥ ❀ ❀ ततस्त इत्यत्र । एतेषां प्रकाराणां परम्परया प्रचारमाहुः एवमित्यादि । अन्यथेत्यादि । इदमपि त्रयं क्रमेण सात्त्विकादिषु बोध्यम् ॥ २८ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

नामधेयानि ज्योतिष्टोमादीनि । ऋगादीनामुक्तत्वान्मन्त्राः स्वाहाकारादयः । दक्षिणा गवादयः । व्रतानि पयोभक्षणादीनि । देवतानामनुक्रमः आनुपूर्व्योद्देशः । कल्पः बौधायनादिकृतकर्मपद्धतिग्रन्थः । अनेनैतदर्थमहं यक्ष्ये इति सङ्कल्पश्च । तन्त्रमत्रानुष्ठानप्रकारः ॥ २५ ॥ ❀ ❀ गतयो विष्णुक्रमाद्याः । मतयो देवताध्यानानि । प्रायश्चित्तं विघ्नसमाधानम् । कृतस्य भगवति समर्पणं च ॥ २६ ॥ ❀ ❀ इत्येवं पुरुषावयवैरेव सम्भृताः सम्पादिताः सम्भाराः यज्ञसाधनानि येन स तथाभूतोऽहं तेनैव सम्पादितसम्भारेण यज्ञेन तमेव यज्ञात्मकं पुरुषमयजमिष्टवानित्यन्वयः । तद्यजन-मावश्यकमीश्वरत्वादित्याशयेनाह—ईश्वरमिति । अनेन "यज्ञेन यज्ञमयजन्त" इति मन्त्रार्थः सूचितः । तत्र पशूनां भगवत ऊरुप्रदेशात्, वृक्षाणां लोमभ्यः, कुशानां स्वेदसहितेभ्यो लोमभ्यः, देवयजनस्य पद्भ्यां, कालस्य पक्ष्मभ्यः, वसूनामोष्ठादिभ्यः, ओषधीनामपि लोमभ्यः, स्नेहानां दृष्टिभ्यां, रसानां जिह्वातः, लोहानां नखेभ्यः, मृदां घ्राणात्, जलानां नाडीभ्यः, ऋगादीनां कर्णाभ्यां चातुर्होत्रस्य बाहुभ्यः, नामधेयानां मुखात्, मन्त्राणां शिरोवयवेभ्यः, दक्षिणानां गवां वामोरुप्रदेशात्, व्रतानां मनसः, देवतानुक्रमस्य पर्वभ्यः, कल्पस्य बलात्, सङ्कल्पस्य बुद्धेः, तन्त्रस्य प्राणात्, गतीनां विक्रमात्, मतीनां ज्ञानेन्द्रियेभ्यः, प्रायश्चित्तस्य कर्मेन्द्रियेभ्यः, समर्पणस्यात्मनः, एवमन्येषामपि यज्ञियानां पदार्थानां यथायथमवयवेभ्यः सम्पादनमूह्यम् ॥ २७ ॥ ❀ ❀ "तेन देवा अयजन्त" इत्यस्यार्थं सप्रपञ्चं दर्शयति—तत इति द्वाभ्याम् । ततः तदनन्तरमिमे ते तव भ्रातरो मरीच्यादयो नव प्रजापतयः सुसमाहितचित्ताः सन्तः प्रजासंवृद्ध्यर्थं तासु यज्ञप्रचारार्थं च इन्द्रादिरूपेण व्यक्तं स्वतश्चाव्यक्तं पुरुषं भगवन्तमयजन्नित्यन्वयः ॥ २८ ॥

### हिन्दी अनुवाद

यज्ञोंके नाम, मन्त्र, दक्षिणा, व्रत, देवताओंके नाम, पद्धतिग्रन्थ, सङ्कल्प, तन्त्र ( अनुष्ठानकी रीति ), गति, मति, श्रद्धा, प्रायश्चित्त और समर्पण—यह समस्त यज्ञ-सामग्री मैंने विराट् पुरुषके अङ्गोंसे ही इकट्ठी की ॥ २५–२६ ॥ ❀ ❀ इस प्रकार विराट् पुरुषके अङ्गोंसे ही सारी सामग्रीका संग्रह करके मैंने उन्हीं सामग्रियोंसे उन यज्ञस्वरूप परमात्माको यज्ञके द्वारा यजन किया ॥ २७ ॥ ❀ ❀ तदनन्तर तुम्हारे बड़े भाई इन नौ प्रजापतियोंने अपने चित्तको पूर्ण समाहित करके विराट् एवं अन्तर्यामीरूपसे स्थित उस पुरुषकी आराधना की ॥ २८ ॥

**ततश्च मनवः काले ईजिरे ऋषयोऽपरे । पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुम् ॥२९॥**
**नारायणे भगवति तदिदं विश्वमाहितम् । गृहीतमायोरुगुणः सर्गादावगुणः स्वतः ॥३०॥**
**सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥३१॥**
**इति तेऽभिहितं तात यथेदमनुपृच्छसि । नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकम् ॥३२॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

काले स्वस्वावसरे ॥ २९ ॥ ❀ ❀ यदधिष्ठानमित्येतत्प्रश्नोत्तरार्थमुपसंहरति । नारायण इति । आहितमधिष्ठितम् । भगवत्त्वे हेतुः ॥ यः स्वतोऽगुणः । सर्गादौ गृहीता मायया उरवो गुणा येन सः तस्मिन् ॥ ३० ॥ ❀ ❀ यत्पर-

---

१. पशवादीनां यज्ञसाधनानामुपपत्तिक्रमोऽयं सुबोधिन्यां प्रदर्शितः । २. प्रा० पा०—कालमीजिरे ।

स्त्वमित्येतत्प्रश्नोत्तरं यदुक्तं स एष भगवान्सर्वेषां मम चेश्वर इति तदुपसंहरति । सृजामीति । पालनं तु स्वयमेव करोतीत्याह । विश्वमिति । पुरुषरूपेण विष्णुरूपेण त्रिशक्तिर्माया तां धारयतीति तथा सः ॥ ३१ ॥ ❀ ❀ यच्चेदं विश्वं यदात्मकश्च त्वमित्येवमादिसर्वप्रश्नानां सामान्योत्तरम् । यदुक्तम् । "वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्त्वतः" इति । पुरुष एवेदं सर्वमिति श्रुत्या च यद्दृढीकृतं तदुपसंहरति । इतीति । सदसदात्मकं कार्यकारणात्मकं भाव्यं सृज्यं भगवतः सकाशादन्यत् पृथक् न भवतीत्यभिहितम् ॥ ३२ ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

गृहीता ब्रह्मादिरूपेण गुणा येन ॥ ३० ॥ ३१ ॥ ❀ ❀ प्रकरणमुपसंहरति । इतीति । सदसदात्मकं त्रिपादेकपादात्मकञ्च भगवतः सकाशादन्यत्त्वया न भाव्यं न चिंतनीयम् ॥ हे तातेति तनोतीति । तात इति व्युत्पत्तेस्त्वयैतद्विस्तार्यमिति भावः ॥ ३२ ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

तेन देवा अयजन्निति । अत्र २० श—श्लोकदीपनी द्रष्टव्या ॥ पुरुषं जातमग्रत इति । अत्रापि २३श—श्लोकदीपनी द्रष्टव्या ॥ [ नवेति मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः भृगुर्वशिष्ठो दक्षश्चेति नव । ] ॥ २९ ॥ ३० ॥ ❀ ❀ यदधिष्ठानेति । एतत्स्कन्धीयपञ्चमाध्यायस्य द्वितीयश्लोकः ॥ ३१ ॥ ❀ ❀ यत् परस्त्वमिति । एतत्स्कन्धीय पञ्चमाध्यायस्य चतुर्थश्लोकैकदेशः ॥ उक्तमिति । एतत्स्कन्धीयपञ्चमाध्यायस्य विंशश्लोके इति शेषः ॥ ३२ ॥

## श्रीमद्वीरराघवव्याख्या

काले स्वे स्वे कालेऽवसरे मन्वादयः क्रतुभिर्विभुं विष्णुं ईजिरे इत्यर्थः ॥ २९ ॥ ❀ ❀ एवं यद्रूपमित्यादिप्रश्नानां पुरुषसूक्तसंवादेनोत्तराण्यभिधाय यदधिष्ठानमित्येतत्प्रश्नोत्तरार्थमुपसंहरति नारायण इति । आहितमवस्थितं एवं स्वस्मिन्नेव सूक्ष्मरूपेणावस्थितं विश्वं शरीरभूतेन मया सृजति, रुद्ररूपेण हरति, पुरुषरूपेण तु पातीत्युपसंहरति गृहीतेत्यादिना । स्वत अगुणः सत्वादिरहितगुणोऽप्यहं गृहीता मायया उरवो गुणा येन तथाभूतः सर्गादौ तन्नियुक्तस्तन्नियोज्यं संसृजामि हरो रुद्रः तद्वशः तदधीनः विश्वं हरति पुरुषरूपेणेत्यत्र तदप्रतीतेश्च सृष्टिसंहारौ ब्रह्मरुद्राख्यजीवांतर्यामित्वेन करोति पालनं तु स्वयमेव करोतीति वेदितव्यम् । अतस्त्रिशक्तिधृक् सृष्टिस्थितिसंहाररूपशक्तित्रययुक्त एक एवेत्यर्थः ॥ ३० ॥ ३१ ॥ ❀ ❀ यद्रूपमित्यादिप्रश्नानां यदात्मकस्त्वमित्यादिप्रश्नानां च सामान्येनोत्तरं यदुक्तं वासुदेवात्परो ब्रह्मन्नचान्योर्थोऽस्ति तत्वत इति । पुरुष एवेदं सर्वं इति श्रुत्या च तद्दृढीकृतं तदुपसंहरति इतीति । हे तात इदं विश्वं प्रति यथा अनुपृच्छसि विश्वविषयप्रश्नं करोषि तस्य प्रश्नस्योत्तरं चेतनाचेतनात्मकं कृत्स्नं जगत्किंचिदपि भगवतः अन्यत्पृथगिति न भाव्यं नानुसंधेयमिति ते तुभ्यमभिहितं कथितमित्यर्थः ॥ ३२ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या ।

काले वसंतादिसमये अपरे मरीच्यादिव्यतिरिक्ताः पितरोऽग्निष्वात्तादयः विबुधा इंद्रादयः, दैत्याः प्रह्लादादयः, मनुष्याः प्रियव्रतप्रभृतयः क्रतुभिर्यागैः । अत्राहं भवानित्यारभ्य ततश्च मनव इत्यंतैग्रंथैः पुरुषसूक्तार्थो विवृत इति ज्ञातव्यं तथाहि सर्वं पुरुष इत्यनेन पुरुष एवेदं सर्वमित्यस्यार्थः प्रदर्शितः । तेनेदमित्यनेन सहस्रशीर्षेत्यस्य सोऽमृतस्येत्यनेन उतामृतत्वस्येशान इत्यस्य महिमैष इत्यनेन एतावानस्येत्यस्य पादास्त्रय इत्यनेन त्रिपादूर्ध्व इत्यस्य सृती इत्यनेन ततो विष्वङ्ङित्यस्य तस्मादंडादित्यनेन तस्माद्विराडजायतेत्यस्य तत् द्रव्यमित्यनेन सजात इत्यस्य तेषु यज्ञादय इत्यनेन ब्राह्मणोऽस्य मुखमासीदित्यस्य इति संभृतेत्यनेन यत्पुरुषेणेत्यस्य ततस्ते भ्रातर इत्यनेन यज्ञेन यज्ञ इत्यादेः ॥ २९ ॥ ❀ ❀ तद् द्रव्यमत्यगादित्यनेन भक्त्यादिभिरेवोत्तमत्वमुच्यते न तु स्वरूपत इत्युक्तमेवार्थं स्फुटयन्नुपसंहरति नारायण इति । श्रीमत्पुंडरीकाक्षकटाक्षप्रेक्षणप्राप्तसर्वप्रभावोऽहं तमेव नारायणं यज्ञादिभिरयजमिति यस्मात्तस्मादिदमस्मादीति विश्वं तस्मिन्नारायणे एवाहितं तदाधारतया तदधीनतया तद्व्याप्ततयाऽवस्थितमित्यन्वयः । आहितत्वेहेतुमाह गृहीतेति । सत्त्वादि गुणाधीनं सर्वं ते चानेन गृहीताः अतः सर्वं तस्मिन्नाहितं ग्रह उपादान इति धातोः सर्गादावुपादानीकृतप्रकृत्युरुगुणे अन्यदासमीपावाप्तमायोरुगुणे ननु हरेर्जीववजडवद्गुणसंबंधः किं न स्यादिति तत्राह अगुण इति । जीवस्य स्वतो गुणराहित्येऽपि मिथ्याभिमानाज्जडस्य तु तन्मयत्वाद्गुणित्वं युक्तं हरेस्तदुभयाभावादगुणित्वं गुणस्वातंत्र्यात्बहिः समीप एव सदावस्थानात् गृहीतगुणत्वं युक्तं उर्वित्यनेन हरेरतिशायितमाहात्म्यं सूचयति । नित्यं गृहीताः सत्त्वाद्या जीववज्जडवन्न तु मिथ्यामानात्स्वरूपत्वात्स्वातंत्र्याद्बहिरेव त्वित्येतदत्र मानम् ॥ ३० ॥ ❀ ❀ येन स्वरोचिषा विश्वमित्याद्युक्तमुपसंहरन् हरस्य संहारस्वातंत्र्यं मंदमतीनां प्रतीयमानं परिहरति सृजमीति । पुरुषरूपेण विष्णुरूपेण त्रिशक्तिधृक् सृष्टिपालनसंहारशक्तिधरो ज्ञानलवक्रियाशक्तिधरो वा ॥ ३१ ॥ ❀ ❀ प्रश्नप्रतिवचनमुपसंहरति इतीति । अथ कुत्रापि

कदाचिदपि मे जगतः स्वातंत्र्यबुद्धिं न कुर्विति भावेनाह नान्यदिति। सदसदात्मकं व्यक्ताव्यक्तात्मकं ज्ञेयाज्ञेयस्वरूपत्वात्तत्तस्व-भावं भाव्यमुत्पाद्यं महदहंकारादि यज्जगत् किंचिदपि हरेरन्यत् स्वतंत्रं न भवति किंतु तदधीनसत्ताकमत युज्यते तदनन्यदि-त्यर्थः। तदुक्तं सदिति। व्यक्तमुद्दिष्टमसदव्यक्तमुच्यत इत्यादि॥ ३२॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

नारायणे इति। स्वतो मायागुणस्पृष्टोऽपि सर्गादौ कार्य्ये यादृच्छिकदृष्टिमात्रेणानुगृहीतमायोरुगुणो यस्तस्मिन् भगवति मायागुणातीतषड्गुणैश्वर्य्ये विश्वमाहितं माययैवारोपितं तत् सृष्टत्वेन प्रत्यायितमित्यर्थः॥ ३१॥ ❀ ❀ आत्मनो हरस्य च तन्नियम्यत्वमुक्त्वा विष्णोस्तु साक्षात्तद्रूपत्वं दर्शयति पुरुषरूपेणेति। पुरुषः परमात्मा साक्षात्तद्रूपेणैव विष्णुनामावतारेण त्रिशक्ति-धृक् पुरुष एव परिपाति न तु सर्गसंहारयोरिव तत्र तत्राविष्टांशेनेत्यर्थः॥ ३२॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

व्यक्तमिन्द्रादिरूपेण। अव्यक्तं स्वतः। एवञ्च तेन देवा अयजन्तेत्यस्य पुरुषं जातमग्रत इत्यस्य चार्थो दर्शितः॥ २९॥ ❀ ❀ काले स्वस्वावसरे॥ ३०॥ ❀ ❀ यदधिष्ठानमित्येतत्प्रश्नोत्तरार्थमुपसंहरति। आहितमधिष्ठितम्। सर्गादौ ब्रह्मरुद्रा-दिरूपेण गृहीता मायया उरवो गुणा येन सः। स्वतोऽगुण एव॥ ३१॥ ❀ ❀ सर्गादावित्येतत् स्पष्टयन् यत् परस्त्वमित्येतत् प्रश्नोत्तरमुपसंहरति सृजामीति। आत्मनो हरस्य च तन्नियम्यत्वेन रजस्तमोयोगहेतुकं ततः पार्थक्यमुक्त्वा विष्णोस्तु सत्वगुणयुक्तत्वे-ऽपि शुद्धसत्त्वे सत्त्वस्योपकारकत्वाभावेनौदासीन्यरूपत्वेन च वस्तुतस्त्वयोग एवेति निर्गुणस्यैव फलितत्वात् साक्षादेव पुरुषरूपत्वं दर्शयति। पुरुषरूपेण पुरुषः परमात्मा त्रिशक्तिधृक् त्रिगुणमायाशक्तिधरः। अन्तरङ्गबहिरङ्गतटस्थशक्तिधरो वा॥ ३२॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तेन देवा अयजंत साध्या ये ऋषयश्च ये इत्यस्यार्थमाह तत इति द्वाभ्याम्। नव मरीच्यादयः व्यक्तमिंद्रादिरूपेण अव्यक्तं स्वतः अयजन् पूजितवन्तः॥ २९॥ ❀ ❀ मनवश्चतुर्दश काले स्वस्वावसरे विभुं विष्णुम्॥ ३०॥ ❀ ❀ यदधिष्ठान-मित्येतत्प्रश्नस्योत्तरार्थमुपसंहरति नारायण इति। स्वतो योऽगुणः प्राकृतगुणशून्यः सर्गादौ गृहीताः मायया स्वशक्तिभूतायाः गुणा येन तस्मिन् इदं विश्वमाहितं संस्थितम॥ ३१॥ ❀ ❀ एतदेव विवृणोति रजसा युक्तः तेन नारायणेन नियुक्तः अहं सृजामि तमसा युक्तः तद्वशः हरः हरति संहारं करोति स तु पुरुषरूपेण परिपाति न च केवलं रजस्तमोऽधिष्ठातृभूतब्रह्महरनियंतृत्त्वेनैव तस्य श्रेष्ठत्वमपितु निखिलप्रकृतिस्वामीत्वेनापीत्याह त्रिशक्तिधृगिति। त्रिशक्तिः त्रिगुणा प्रकृतिस्तद्धृक् अत एवोक्तं प्रथमे स्कंधे सत्वं रजस्तस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते स्थित्यादये हरिविरंचिहरेति संज्ञाः श्रेयांसि तत्र खलुसत्त्वतनोर्नृणां स्युरिति॥ ३२॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

तदनन्तरं बहुकालव्यवधानेन मनवः केवलमीजिरे। ऋषयश्चाऽपरे च। एते सत्त्वादिभेदा द्वितीयकक्षायाम्। ततस्तृतीयकक्षायां पितरो विबुधा दैत्या राजसाः सात्विकास्तामसाश्च। मनुष्यास्तु चतुर्थकक्षायाम्। अतस्ते सन्निपातरूपा एकविधा एव। तथापि भ्रमादपि कुर्वाणाः कामिकं किञ्चित्फलं प्राप्नुवन्ति समर्थत्वाद्भगवतः। तदाह—विभुमिति। क्रतुभिरिति द्वादशाहादिभिः॥ २९॥ ❀ ❀ एवं सर्वपदार्थानामुत्पत्तिं भगवतः सकाशादुक्त्वा स्थितिमाह—**नारायण इति**। विश्वा-धारत्वेन भगवदाधारत्वव्युदासार्थं नारायण इत्युक्तम्। "**आपो नारा इति प्रोक्ता**" इति प्रकारेण पुरुष एव नारायणः। **तदिदमिति** लौकिकं वैदिकं च। अहितं स्थापितम्॥ ३०॥ ❀ ❀ ननु भगवतैव चेदुत्पत्तिस्थिती क्रियेते, अर्थात्प्रलयश्च, तदा भवतां कोपयोगः? तत्राऽऽह— **सृजामि तन्नियुक्तोऽहमिति**। भगवान् हि प्रकारप्रदर्शनार्थं सर्वानेव पदार्थान् कृतवान्। ततः परम्परानिष्पत्त्यर्थं मामाज्ञापयति। संहारार्थं च महादेवम्। अतो ये भगवतोत्पादितास्तद्वंश्या वा ते भगवतैव मारणीया न महादेवादिशक्त्या[1]। अतो भगवदवतारः। पालनं तु भगवानेव करोतीत्याह—**विश्वमिति**। स हि पुरुषरूपेण विश्वं परिपालयति। अत एव तदनुरोधेनैव हरः संहरतीति तद्वशत्वमुक्तम्। यद्यप्येतावुत्पत्तिप्रलयौ[2] कुरुतस्त[3]थापि तत्करणसामर्थ्यं भगवदधीनमेवेत्याह—**त्रिशक्तिधृगिति**॥ ३१॥ ❀ ❀ एवमंशत्रयं निरूप्य माहात्म्यं वक्तुं पूर्वोक्तमुपसंहरति—**इतीति**। पृष्टं तु त्वयैतावदेव। माहात्म्यकथनं त्वर्थादायाति। तदग्रे कथयिष्यामीति भावः। किमुक्तमित्यपेक्षायामाह—**नाऽन्यद्भगवत इति**। यावन्तः प्रश्ना कृताः स्वरूपतः प्रकारतो वा। तत्र सर्वत्र उत्तरं भगवानेव। यतो भगवद्व्यतिरिक्तं किमपि नास्ति। ननु सर्वाधारत्वेन [4]वस्तुतत्त्वरूपेण च मन्तान्तरस्थैरपि सर्वं भगवानित्यङ्गीक्रियते। ततोऽस्मिन्मार्गे को विशेष इत्याकाङ्क्षायामाह—**भाव्यमिति**। यत्क्रियया निष्पाद्यम्। यत्र हि क्रिया व्यापृता भवति तद्भगवानित्यर्थः। ननु ब्रह्मवादेऽपि सर्वं ब्रह्म। ततोऽस्मिन्मार्गे को विशेषस्तत्राऽऽह—**सदसदात्मक-**

१. शक्त्या इति ख. । २. यदापीति क. ख. ङ. । ३. तदापीति ख. । ४. वस्तुत्वरूपेणेति ख. ङ. ।

मिति । सदसद्व्यवहारयोग्यं घटादिकं शशशृङ्गादिकमपि । [1]भ्रमविषयश्च । तस्माद्यत्राऽपि मिथ्याप्रत्ययस्तद्विषयोऽपि भगवान् । अन्यथा तस्य भानं ज्ञानं च नोत्पद्येत । अनुव्यवसायश्च न भवेत् ॥ ३२ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

द्वितीयकक्षाप्रकारमाहुः **तदनन्तरमित्यादि** ॥ २९ ॥ ❀ ❀ **नारायण** इत्यत्र । ननूपादानत्वे भगवतः सम्यगुक्ते तत्रैव सर्वस्य स्थितिरर्थादेव सिद्धेति पुनः स्थितिकथनस्य किं प्रयोजनमत आहुः **विश्वेत्यादि** ॥ तथा च, स्वतो विश्वं निर्माय तदन्तः स्वयं प्रविश्य तत्स्थापक इति प्रकारान्तरबोधनं प्रयोजनमित्यर्थः । अत्र यद्यप्युत्तरार्द्धं न व्याख्यातं, तथापि **ननु भगवते**त्यादिनाग्रिमाभासेन तदस्तीति निश्चीयते इति बोध्यम् ॥ ३० ॥ ❀ ❀ **इति त** इत्यस्याभासे **अंशत्रयमिति** । गुणावतारत्रयात्मकं तत्त्रयम् । विवृतौ **मन्तातरस्थैरि**ति, भेदवादिभिर्विशिष्टाद्वैतवादिभिश्च । अत्र यथायथं पूर्वोक्तं हेतुद्वयं योजनीयम् । **अस्मिन् मार्गे** इति विवक्षिते भक्तिमार्गे । **यत्र हीत्यादि** । तथा च भेदवादिमते 'अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोसि सर्व इति वाक्यस्वारस्यात् पारिभाषिकं सर्वत्वं, विशिष्टाद्वैतवादिमते यस्य, पृथिवी शरीरं यः पृथिवीमन्तरे सञ्चरन् यं पृथिवी न वेद' त्यारभ्याप्तेजोवाय्वाकाशमनोबुद्ध्यहङ्कारचित्ताव्यक्ताक्षरमृ-त्वान्तान् शरीरत्वेन पूर्ववदुक्त्वा 'स एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण' इति सुबालोपनिषदि श्रावणेन तत्स्वारस्याच्छरीरित्वेन सर्वत्वम् । अत्र तूपादेयस्यावयवस्य चोपादानावयविभेदाभेदात्तद्रूपेणापि सर्वत्वमिति विशेष इत्यर्थः । न च पूर्वश्रुतिविरोधः । तत्रैव पूर्वं प्रलयप्रकरणे पृथिव्यप्सु प्रलीयत इत्यारभ्यापस्तेजसि तेजो वायौ वायुराकाश आकाशमिन्द्रियेष्विन्द्रियाणि तन्मात्रासु तन्मात्राणि भूतादौ भूतादिर्महति महानव्यक्तेऽव्यक्तमक्षरेऽक्षरं तमसि विलीयत इत्यन्तं शब्दाभ्यासेन लयमुक्त्वाग्रे 'तम एकीभवति परस्मिन् परस्तान्नसन्नासन्नसदसदित्येतन्निर्वाणमनुशासनमिति वेदानुशासनमि'ति पृथिव्याद्यक्षरान्तानां सूक्ष्मरूपतापत्त्या कारणेन सह श्लेषः तमसस्त्वेकीभावेन कारणभूतपरात्मत्वे सदसद्विलक्षण-ब्रह्ममात्रसत्ताबोधनेन तमआदिपृथिव्यन्तानां सञ्चरक्रमेण ब्रह्मोपादेयता तत्रापि सिद्ध्यतीत्यविरोधात् । ब्रह्मवादादत्र विशेषं व्युत्पादयन्ति **तस्मादित्यादि** । **भानं शुक्तिरजतादेः ज्ञानं शशशृङ्गादेः** । तथा च, प्रतिभासरूपेण वचनरूपेणानु व्यवसायविषयरूपेण च या तत्सत्ता सा तेषां ब्रह्मरूपत्वं विना नोपपद्यत इति तेषामपि तेन रूपेण ब्रह्मत्वमित्येष ब्रह्मवादादपि विशेष इत्यर्थः । ब्रह्मवादे हि 'तदनन्यत्व' सूत्रोक्तरीत्या कारणरूपेण 'उभयव्यपदेश' सूत्रोक्तरीत्या व्यवहारयोग्यसद्रूपेण च ब्रह्मरूपत्वबोधनेन सदसद्व्यवहारयोग्यरूपेण तथात्वाबोधनादिति ॥ ३१ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

ततस्तदनन्तरं च काले स्वेऽवसरे मन्वादयः क्रतुभिर्यज्ञैर्विभुं सर्वेश्वरं तमीजिरे इत्यन्वयः ॥ २९ ॥ ❀ ❀ एवं 'यद्रूपं' इत्यादिप्रश्नानां पुरुषसूक्तसंवादेनोत्तराण्यभिधाय 'यदधिष्ठानं' इत्येतत्प्रश्नोत्तरार्थमुपसंहरति—नारायण इति । तत्पूर्ववर्णितोत्पत्तिकमिदं दृश्यमानं विश्वं भगवति ज्ञानवैराग्यैश्वर्यादिषड्गुणपूर्णे नारायणे आहितसवस्थितमित्यर्थः । ननु तस्य निर्गुणत्वश्रवणात् कथं विश्वाधारत्वमित्याशङ्क्याह—स्वतः अगुणोऽपि सर्गादौ सृष्ट्याद्यर्थं गृहीता मायया स्वेच्छया उरवः गुणाः सत्त्वादयो येन स तथा तस्मिन्नित्यन्वयः ॥ ३० ॥ ❀ ❀ यदि सृष्ट्यादि सर्वं भगवानेव करोति तदा भवतां कोपयोग इत्यपेक्षायामाह—सृजामीति । तन्नियुक्तस्तेनाज्ञप्तोऽहं विश्वं सृजामि, तद्वशस्तदधीन एव हरो विश्वं हरति, उपसंहरति, पुरुषरूपेण विष्णुस्वरूपेण विश्वं स्वयमेव परिपाति । नन्वेवं तदाज्ञाधीनत्वेपि सृष्ट्युपसंहारयोर्युवयोः स्वातन्त्र्येण शक्तिरस्त्युत तच्छक्तेरपि तदधीनत्वमेवेत्याकाङ्क्षायामावयोः स्वरूपेण सृष्टिसंहारावपि स एव करोतीत्यावयोः शक्तिरपि तदधीनैवेत्याशयेनाह—त्रिशक्तिधृगिति । सृष्ट्यर्थं रजोगुणं धृत्वा ब्रह्मा भवति, पालनार्थं सत्त्वगुणं धृत्वा विष्णुर्भवति, संहारार्थं च तमोगुणं धृत्वा हरो भवतीत्यर्थः ॥ ३१ ॥ ❀ ❀ यच्चेदं विश्वं यदात्मकश्च त्वमित्येवमादिसर्वप्रश्नानां 'वासुदेवात् परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्त्वतः' इति यत्सामान्यत उत्तरमुक्तं पुनश्च "पुरुष एवेदं सर्वं" इति श्रुत्या तदेव दृढीकृतं तदुपसंहरति—इतीति । स्नेहं सूचयन् सम्बोधयति—हे तातेति । इदं यद्रूपं यदधिष्ठानमित्यादिकं यथा त्वमनुपृच्छसि तथा तस्योत्तरमित्युक्तप्रकारेण ते तुभ्यं मयाऽभिहितं कथितमित्यन्वयः । कथितमेव स्पष्टयति—सदसदात्मकं कार्यकारणात्मकं स्थूलसूक्ष्मात्मकं वा किञ्चिदपि वस्तु भगवतः सकाशादन्यदिति न भव्यं त्वया नानुसन्धेयमित्यर्थः ॥ ३२ ॥

### हिन्दी अनुवाद

इसके पश्चात् समय-समयपर मनु, ऋषि, पितर, देवता, दैत्य और मनुष्योंने यज्ञोंके द्वारा भगवान्‌की आराधना की ॥ २९ ॥ ❀ ❀ नारद ! यह सम्पूर्ण विश्व उन्हीं भगवान् नारायणमें स्थित है, जो स्वयं तो प्राकृत गुणोंसे रहित हैं,

---

१. भ्रमविषयं चेति ग. । २. द्वादशाह्वादिभिरिति सुबो० ।

परन्तु सृष्टिके प्रारम्भमें मायाके द्वारा बहुत-से गुण ग्रहण कर लेते हैं ॥ ३० ॥ ❀ ❀ उन्हींकी प्रेरणासे मैं इस संसारकी रचना करता हूँ। उन्हींके अधीन होकर रुद्र इसका संहार करते हैं और वे स्वयं ही विष्णुके रूपसे इसका पालन करते हैं। क्योंकि उन्होंने सत्त्व, रज और तमकी तीन शक्तियाँ स्वीकार कर रक्खी हैं ॥ ३१ ॥ ❀ ❀ बेटा! जो कुछ तुमने पूछा था, उसका उत्तर मैंने तुम्हें दे दिया; भाव या अभाव, कार्य या कारणके रूपमें ऐसी कोई भी वस्तु नहीं हैं, जो भगवान्से भिन्न हो ॥ ३२ ॥

न भारती मेऽङ्ग मृषोपलक्ष्यते न[1] वै क्वचिन्मे मनसो मृषा गतिः।
न मे हृषीकाणि पतन्त्यसत्पथे यन्मे हृदौत्कण्ठ्यवता धृतो हरिः ॥३३॥
सोऽहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवन्दितः पतिः।
आस्थाय योगं निपुणं समाहितस्तं नाध्यगच्छं यत आत्मसम्भवः ॥३४॥
नतोऽस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमङ्गलम्।
यो[2] ह्यात्ममायाविभवं स्म पर्यगाद् यथा नभः स्वान्तमथापरे कुतः ॥३५॥
नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुतापरे सुराः।
तन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं चा[3]त्मसमं विचक्ष्महे ॥३६॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

यदुक्तं 'एतावत्त्वं यतो हि मे' तमविज्ञाय मामीश्वरं प्रब्रवीषि। इति तदुपपाद्योपसंहरति। न भारतीति। यद्यस्मान्मे मया औत्कंठ्यं भक्त्युद्रेकस्तद्युक्तेन हृदा हरिर्धृतो ध्यातः। अंग हे नारद अतो मे वाङ्मनइन्द्रियाणां वृत्तयः सत्यार्था न तु मत्प्रभावेनेत्यर्थः ॥ ३३ ॥ ❀ ❀ अत्र स्वानुभवमेवान्वयव्यतिरेकाभ्यां प्रमाणयति द्वाभ्याम्। सोऽहं समाम्नायादिभिः [illegible]
पद्मोद्भवे वक्ष्यते ॥ ३४ ॥ ❀ ❀ तदा समीयुषां शरणागतानां भवच्छिदं संसारनिवर्तकं स्वस्त्ययनं मंगलावहं सुमंगलं सुसेव्यं च तस्य चरणं नतोऽस्मि। ततोऽचिंत्यमहिमत्वेन ज्ञातवानस्मीति कैमुत्यन्यायेनाह। यो हीति स्वमायाविस्तारं यः स्वयमपि पर्यगात्। परिशब्दो निषेधे। एतावानिति न ज्ञातवानित्यर्थः। अपरे कुतो जानीयुः। तस्य चरणं नतोऽस्मीति पूर्वेण संबंधः। ननु सर्वज्ञः कथं न जानाति अंताभावादिति दृष्टांतेनाह। यथा स्वस्यांतं नभो नाप्नोति तद्वत्। नहि खपुष्पादर्शनं सार्वज्ञं विहंतीति भावः। तथाच वक्ष्यति "द्युपतय एव ते न ययुरंतमनंततया त्वमपि यदंतरांडनिचया ननु सावरणाः" इत्यादि श्रुतिश्च। "यो अस्याध्यक्षः परमे व्योमन्त्सो अंग वेद यदि वा न वेद" इति ॥ ३५ ॥ ❀ ❀ एतत्प्रपंचयति नाहमिति द्वाभ्याम्। वामदेवो रुद्रः यस्य ऋतां गतिं परमार्थस्वरूपम्। किंतु इदं प्रपंचरूपं तस्य मायया विनिर्मितं विचक्ष्महे विद्मः। तदपि आत्मसमं स्वज्ञानानुरूपमेव न तु कृत्स्नम्। मोहितबुद्धय इत्ययं तदज्ञाने प्रपंचज्ञाने च हेतुः ॥ ३६ ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

ननु त्वम अमृतक्षेममभयं त्रिमूर्ध्नोऽधायि मूर्ध्नोसु' इत्यादिना त्रिगुणातीतायास्त्रिपाद्विभूतेर्नित्यत्वं ब्रूषे तथा पादविभूतेस्त्रिगुणमयप्रपञ्चस्यापि भगवतो विलज्जमानयेत्यादेर्बहिरंगमायाशक्तिकार्यत्वेनानित्यत्वेप्यमिथ्यात्वमेव प्रतिपादयसि तथा मायिकवस्तूनां च तद्यागसाधनत्वेन सत्यत्वं व्यंजयसि। अन्ये शास्त्रविदस्तु सर्वमिदं मनोरथं विलसितत्वान्मिथ्यैव भगवतः खलु भगवत्त्वमपि तटस्थलक्षणत्वादनित्यमेव तद्धाम्नस्त्रिपाद्विभूतेः का वार्त्तेति व्याचक्षते तत्राहं कुत्र विश्वसिमि त्वद्वाचि तेषां वाचि वेत्यत आह। न भारतीति। ममेयं तुभ्यमुक्ता वाक् न मृषा तत्र हेतुः—न वा इति। सर्वत्र हेतुः औत्कंठ्ययुक्तेन मनसा मया हरिर्धृत इति। यत्र हरिस्तत्रैव सर्वं सत्यमिति मद्वाच्येव विश्वसिहि तैरन्यैः शास्त्रविद्भिरपि हरिर्मनसा न धृतोऽतोमनसस्तस्य मृषैव गतिरतस्तेषां वागपि मृषैव। मिथ्यावादिनां तेषां मतमंगीकृता इति भावः। अत एव स्वामिचरणैरपीत्यर्थ इत्यंतं व्याख्यातं मत्सामर्थ्यं मत्प्रभावकृतं न किं तु हरिप्रभावकृतमिति भावः। हे अंगेति। अतीवप्रियत्वादेतद्गुह्यं मया प्रोक्तमिति भावः। वाण्यनुगमनावसरे त्वौत्कंठ्यवता हृदा हरिर्न धृतस्तत एवेंद्रियासत्पथानुगमनं जातमिति प्रतीयते "भगवद्ध्यानपूतेन मनसान्यांस्ततो सृजेत् इति" तत्रैव वक्ष्यमाणत्वात् ॥ ३३ ॥ ❀ ❀ अत्र वृत्तिसत्यार्थत्वे नमनादिना ध्यानस्य सत्त्वे सत्यार्थसत्त्वमन्वयः। ध्यानाभावे सत्यार्थभावोत्र व्यतिरेकः। एतच्च भगवज्ज्ञानाभावाच्च। अत्र विश्वनाथः—

---

१. प्रा० पा०—न कर्हिचिन्मे। २. प्रा० पा०—यस्त्वात्ममायाविभवं स्वयं गतो यथा। ३. प्रा०पा०—त्वात्म०।

ननु ते वयमेव सर्ववेदशास्त्रतात्पर्यं विद्वांसः परमेश्वरस्वरूपं जानीमह इत्यभिमन्यंते तथैवान्यानपि युक्त्या बोधयंति चेति तत्राह—सोहं पूर्वश्लोकोक्तलक्षणः सोत्कंठहृदयदरीधृतहरिरप्यहम् । समाम्नायमय इति । प्रथममाम्नाया ममैव मुखेभ्यो निःसृता येषामर्थं मन्यतेऽद्यापि जिज्ञासुरेवेति । तपोमय इति । "स्पर्शेषु यत्षोडशमेकविंशं निष्किञ्चनानां नृप यद्धनं विदुः" इति भगवदादिष्टं तपः प्रथमं मयैव तप्तमिति स्वस्य ज्ञानाविज्ञाने दर्शिते भगवद्दत्तमैश्वर्यं चाह प्रजेत्यादिः । तथा योगेश्वरत्वमपि मम नास्तीति न वक्तव्यमित्याह—आस्थायेति । समाहित एकाग्रीकृतचित्तोपि तं भगवंतं नाध्यगच्छं न ज्ञातवानस्मि तत्र हेतुर्यत आत्मनो मम संभवः सृष्टिरिति । हंतहंत मत्सृष्टसृष्टसृष्टा अन्ये विज्ञंमन्यास्तं कथं जानीयुर्ये तु भगवत्त्वं तटस्थलक्षणं ब्रुवते ते त्वंधा एवेति भावः ॥ ३४ ॥ ❀ ❀ अहो अर्वाचीना वराका भगवत्त्वं वयं ब्रूमहे इति प्रलपंति यतो भगवानपि स्वयं स्वतत्त्वं वेदितुं न प्रभवतीति भक्त्युद्रेकेण तं प्रणमति—नत इति । समीयुषां भवच्छिदं संसारदुःखच्छेदकमित्यननुसंहितं फलं स्वस्त्ययनं स्वप्रेमसुखदायकमित्यनुसंहितम् । सुष्ठु मंगलं यस्मात्तं सुमंगलम् । अन्येषामपि कर्मिज्ञानियोगिनां तद्भक्तिमिश्रत्वं विना मांगल्याभावादिति भावः । यो हि आत्ममायाविभवं स्वयोगविस्तारं स्वयमपि पर्यगात् । परिशब्दो निषेधे एतावानिति न ज्ञातवानित्यर्थः । अपरेऽस्मदादयः कुतो जानीयुः । अत्राक्षिपति नन्विति । नभः कर्तृ इति भाव इति । खपुष्पसत्त्वे तदज्ञानं तु सर्वज्ञत्वनाशकमस्तीत्याशयः । स्वस्यापि स्वाज्ञाने प्रमाणमाह । श्रुतिश्चेति । यः परमेश्वरोऽस्य जीवस्याध्यक्षः साक्षी परमे व्योमन् तिष्ठन् अंगेति संबुद्धिर्नाचिकेतं प्रति वेदात्मानमेतावानहमिति । तर्हि ज्ञानविषयत्वमागतमिति चेदाह यद्वेति ॥ ३५ ॥ ❀ ❀ ऋतां गतिं त्रिपादेकपाद्विभूतिमिति चक्रवर्ती ॥ ३६ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

सर्व्वप्रश्नानामिति । एतत्स्कन्धीयपञ्चमाध्यायोक्तानामिति शेषः ॥ वासुदेवादिति । एतत्स्कन्धीयपञ्चमाध्यायस्य चतुर्दशश्लोकः ॥ ३३ ॥ ❀ ❀ यदुक्तमिति एतत्स्कन्धीयपञ्चमाध्यायस्य दशमश्लोके इति शेषः ॥ ३४ ॥ ३५ ॥ ❀ ❀ पूर्व्वेणेति । पूर्व्वपादोक्तेनेत्यर्थः । द्युपतय इति । दशमस्कन्धीयसप्ताशीतितमाध्यायस्यैकचत्वारिंशश्लोकः ॥ ३६—३९ ॥

### श्रीमद्वीरराघवव्याख्या

यदुक्तमेतावत्त्वं यतो हि मे तमविज्ञाय मामीश्वरं प्रब्रवीषीति तदुपपादयितुमुपसंहरति न भारतीति । मे भारती वाग्मृषा मिथ्या न दृश्यते मे मनसो गतिः वृत्तिः न मृषा । हृषीकाणि इंद्रियाणि असत्येऽसद्विषये न पतंति न प्रवर्त्तंते यस्मान्मयौत्कण्ठ्यं आशातद्वता हृदयेन हरिर्धृतः ध्यातः । अंग, हे नारद, अतो मे वाङ्मनइंद्रियाणां वृत्तयः सत्यार्था न तु मत्प्रभावेनेत्यर्थः ॥ ३३ ॥ ❀ ❀ अतो ममापि ज्ञानप्रदो मदचिंत्यस्वरूपस्वभावः सर्वेश्वरो मत्तोन्योऽस्तीत्याह सोऽहमिति । समाम्नायः समाम्नायप्रचुरः तपोमयः तपःप्रचुरः विद्यातपोभ्यां सर्वोत्कृष्ट इत्यर्थः । प्रजापतीनां मरीच्यादीनामभिवंदितः तैर्नमस्कृतः तेषां पतिश्चात्मनः परमात्मनः संभव उत्पन्नः तत्कृपालब्धज्ञानसंपन्नोऽहं समाहितः सन्निपुणं निर्विघ्नं योगं समास्थाय यः स्वमायाविभवं स्वयं गतस्तं परमात्मानं नाध्यगच्छं स्वरूपतो गुणतश्चैतावानिति न ज्ञातवान् ॥ ३४ ॥ ❀ ❀ अतस्तच्चरणं प्रति केवलं नतोऽस्मि । कथंभूतं चरणं समीयुषां शरणागतानां भयच्छिदं संसृतिनिवर्त्तकं स्वस्त्ययनं मंगलानामाश्रयं सुमंगलं सुसेव्यं अनवगमे दृष्टांतः यथेति । दोषास्पर्शाय दुर्ग्रहणाय च नभस्त्वद्दृष्टांतः दुःस्पर्शः पाणिना वायुरिति । महाभारतोक्तेः स्वमायाविभवं स्वयंगत इत्यनेन जवनिकांगत इतिवदन्याऽनुपलभ्यत्वमुक्तं न तु मायावश्यत्वं आत्ममायाविभवेनान्यानुपलभ्यत्वं गत इत्यर्थः । एवंविधपरमात्मा न मुक्तविधोप्यहमेव नाध्यगच्छमन्ये नाधिगच्छंतीति । किमु वक्तव्यमित्याह यथेति । अपरे जीवाः कुतो हेतोर्विदुरित्यर्थः ॥ ३५ ॥ ❀ ❀ एतदेवोपपादयति नेति । यूयमिति सनकाद्यभिप्रायेण बहुवचननिर्देशः वासुदेवो नाम कश्चिदृषिः शंकरो वा न चाहं न च शंकरश्च जानंतीति । श्रीवैष्णवीयचतुर्मुखवाक्यान्तरात् यद्वतां यस्य परमात्मन ऋतां सत्यां गतिं स्वरूपरूपयथावस्थितिं बत तद्गतिं इति पाठांतरं अस्मदादयो न विदुः कैमुत्यन्यायेनाह किमुतेति । कुतो न विदुरित्यत आह तन्माययेति । तस्य भगवतो मायया दैवी ह्येषा गुणमयीत्युक्तविधमायया मोहिता बुद्धिर्येषां ते तन्मायामोहितबुद्धित्वादेते न विदुरित्यर्थः । तर्हि किं विदुरित्यत आह तेनैव विनिर्मितमिदमचेतनं शरीरं स्वात्मसममात्मानं देहाकारं मन्यामह इत्यर्थः । देहात्मविभागमप्यजानतां कथं परमात्मन वेदनामिति भावः ॥ ३६ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

एवंविधमाहात्म्यस्य हरेः प्रसादः कस्य स्यादित्याशंक्य भक्तिनदीस्नानेन विधूतमनोमलस्य सदा भगवदेकविषयेंद्रियव्यापारस्य स्यादिति भावेनाह नेति । हृषीकाणींद्रियाणि अत्र हेतुमाह यन्म इति । औत्कंठ्यं प्रियवस्तुनि मनोवृत्तिविशेषः स्नेहलक्षणभक्तिस्तद्वता हृदा मनसा धृत इति यत्तस्मादित्यर्थः । अनेन भगवत्प्रसादसामग्रीसंपादने भक्तिरंगमित्युक्तं भवति ॥ ३३ ॥ ❀ ❀ इतोऽपि पुंसां भक्तिरेव साध्या तत्प्रसादजननी अन्यथाऽसौ दुर्ज्ञेय इति भावेनाह सोऽहमिति । मद्भक्तिविषयो यो विष्णुस्तस्यानुग्रहेण तमंतरेणाम्नायमयो वेदप्रतिपाद्येषु प्रधानः समीचीनज्ञानसंप्रदायप्राचुर्यो वा तपोमयस्तपस्विषु प्रधानः दक्षादिप्रजापतीनां

पतिस्तैरभिवंदितश्च समाहित एकाग्रतया निश्चलमना भूत्वा निपुणं चतुरतमं योगध्यानलक्षणमुपायमास्थाय यत आत्मनो मम संभवस्तं भगवन्तं नाध्यगच्छम् । अधीतिविशेषणादनंतत्वेनाधिगतविशेषस्याधिक्यात् नाज्ञासिषमित्यर्थः ॥ ३४ ॥ ❀ ❀ नारदार्यैर्विविधं हरिमहिमानं व्याचक्षाणः स्मारस्मार भक्तिप्रसरासिंधुनिमग्नः तन्नतिं करोति नतोऽस्मीति । यो विष्णुः [illegible] स्वरूपभूतमहिम्नो विभवं विविधभवनमनंततां स्वयंगतः स्वयमेव जानाति विशेषोक्तौ निमित्तमाह नाहमिति । नभस्वान्वायुः अपरे वाणीशेषाद्याः अथ शब्दात्साकल्यज्ञानमेव निषिध्यते न तु तद्विषयज्ञानमात्रं सर्वजीवनिकायेषु ब्रह्मवायुहरेर्विदाविस्य । दिवाक्यसूचकादयं विशेषो बोद्धव्यः प्रेक्षावतेति ॥ मंगलानंतरारंभ प्रश्नकार्त्स्न्यैष्वथो अथेत्यमरः । अथातो नंतराप्यर्थ-विकल्पारंभ मंगले इति च समीयुषां शरणं प्राप्तानां स्वस्त्ययनमलंबुद्धिगोचरस्वानंदानुभवप्रदं सुमंगलं मंगलानां मंगलं तच्चरणं तस्य हरेश्चरणं नतोऽस्मीत्येतावदेव सुशकमिति भावः । मंगलानां च मंगलमिति च ॥ ३५ ॥ ❀ ❀ इदानीं स्वात्मानं निदर्शनीकृत्य कस्यापि साकल्यज्ञानं नास्तीत्याह नाहमिति । लुप्तोपममिदं यथाहं साकल्ये न तद्गतिं न वेद्मि तथा यूयं भवंतोऽपि न विदुः । अत्रापि व्यत्ययात् साकल्यज्ञानमेव निषिध्यते उत्तरखंडेन स्वयोग्यज्ञानस्योक्तत्वादिति ज्ञातव्यम् । त्रिपुरांतकः सर्वज्ञ इत्यज्ञरूढिरेव न विद्वद्रूढिरिति भावेनाह न वामदेव इति । वामो निर्दोषो देवो नारायणो यस्य मते स तथोक्तः वामं तु शुभं पेशलमित्यभिधानं अनेनैवान्यस* द्भावं सिद्धमुद्धलयति किमुतेति । अत्र हेतुमाह यन्माययेति । यस्य हरेर्माय्या बंधकशक्त्या मोहितबुद्धित्वादित्यर्थः । तत्फलमाह इदमिति । विनिर्मितमिदं जगत् स्वात्मसमं परमात्मसदृशं विचक्षते । ननु भवंतोप्येष्वेके किमित्याशंक्य सत्यं विशेषोऽस्तीत्याह इदमिति । वयं तु येनेदं निर्मितं तं स्वात्मसमं स्वयोग्यतानुसारं विचक्ष्महे नातोऽधिकं तदपि तत्प्रसादायत्तमतो न विदुरिति ब्रूम इत्ययं विशेषस्तु तशब्दादवगंतव्य इति । तुःस्याद्भेदेऽवधारण इति । स्वाप्नसममिति पाठे स्वाप्नपदार्थवदनित्यमस्वतंत्रमिदमत एव तन्नियामकेन स्वतंत्रेण परमनित्येन भवितव्यमिति विचक्ष्मह इति भावः ॥ ३६ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

तथाभूतश्चासौ मम भक्त्युद्रेकेणैव स्फुरतीत्याह न भारतीति ॥ ३४ ॥ ❀ ❀ एतादृशीं भक्तिं विना तु पूर्वं मम नानासाधनवतोऽपि नास्फुरदित्याह सोऽहमिति ॥ ३५ ॥ ❀ ❀ अतो नमस्कारादिमयतद्भक्तिरेव तस्मिन्नुपयुक्ता न तु ज्ञान-प्रयास इत्याह नतोऽस्म्यहमिति । यतः यो हीति । आत्ममायाऽत्र स्वरूपशक्तिः । नभोदृष्टान्तश्रुतिस्तव—श्रुतीनामुदाहृतानां तत्रैव स्वारस्यलब्धेः । नभोदृष्टान्तस्त्वापातबोधनार्थं एव वस्तुतस्तु तस्यापि परिच्छिन्नत्वात् ॥ ३६ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

प्रकरणमुपसंहरति इतीति । सदसदात्मकं कार्यकारणात्मकं त्रिपादेकपादात्मकञ्च भगवतः सकाशादन्यत् त्वया न भाव्यं न चिन्तनीयम् ॥ ३३ ॥ ❀ ❀ ननु त्वममृतं क्षेममृतं क्षेममभयं त्रिमूर्द्ध्नोऽधायि मूर्द्धस्वित्यादिना त्रिगुणातीतायास्त्रिपा-द्विभूतेर्नित्यत्वं ब्रूषे । तथा पादविभूतेस्त्रिगुणमयप्रपञ्चस्यापि भगवतो विलज्जमानयेत्यादेर्बहिरङ्गमायाशक्तिकार्यत्वेनानित्यत्वेऽप्यमिथ्यात्वमेव प्रतिपादयसि तथा मायिकवस्तूनाञ्च तद्यागसाधनत्वेन सत्यत्वं व्यञ्जयसि । अन्ये शास्त्रविदस्तु सर्वमिदं मनोविलसितत्वान्मिथ्यैव, भगवतः खलु भगवत्त्वमपि तटस्थलक्षणत्वादनित्यमेव तद्धाम्नस्त्रिपाद्विभूतेः का वार्तेति व्याचक्षते, तत्राहं कुत्र विश्वसिमि, त्वद्वाचि तेषां वाचि वेत्यत आह, न भारतीति । मम इयं तुभ्यमुक्ता वाङ् न मृषा । तत्र हेतुर्न वै इति । सर्वत्र हेतुरौत्कण्ठ्ययुक्तेन मनसा मया हरिर्धृत इति । यत्र हरिस्तत्रैव सर्वं सत्यमिति मद्वाच्येव विश्वसिहि । तैरन्यैः शास्त्रविद्भिरपि हरिर्मनसा न धृतोऽतो मनस्तस्य मृषैव गतिरतस्तेषां वागपि मृषैवेति । मिथ्यावादिनां तेषां मतं माङ्गीकृथा इति भावः ॥ ३४ ॥ ❀ ❀ ननु ते वयमेव सर्ववेदशास्त्रतात्पर्यं विद्वांसः परमेश्वरस्वरूपं जानीमहे इत्यभिमन्यन्ते तथैवान्यानपि युक्त्या बोधयन्ति चेति । तत्राह—सोऽहं पूर्वश्लोकोक्तलक्षणः सोत्कण्ठहृदयदरीधृतहरिरप्यहं समाम्नायमत इति । प्रथममाम्नाया ममैव मुखेभ्यो निस्सृता येषामर्थमन्ये ते अद्यापि जिज्ञासन्त एवेति भावः । तपोमय इति स्पर्शेषु यत् षोडशमेकविंशंनिष्किञ्चनानां नृप यद्धनं विदुरिति भवादिष्टं तपः प्रथमं मयैव तप्तमिति स्वस्य ज्ञानविज्ञाने दर्शिते भगवद्दत्तमैश्वर्यञ्चाह प्रजेत्यादि । तथा योगेश्वरत्वमपि मम नास्तीति न वक्तव्यमित्याह आस्थायेत्यादि । समाहित एकाग्रीकृतचित्तोऽपि तं भगवन्तं नाध्यगच्छं न ज्ञातवानस्मि । तत्र हेतुर्यत आत्मनो मम संभवः सृष्टिरिति । हन्त मत्सृष्टसृष्टसृष्टा अन्ये विज्ञम्मन्यास्तं कथं जानीयुर्ये तु भगवत्त्वं तटस्थलक्षणं ब्रुवते ते त्वन्धा एवेति भावः ॥ ३५ ॥ ❀ ❀ अहो अर्वाचीना वराका भगवत्तत्त्वं वयं ब्रूमहे इति प्रलपन्ति यतो भगवानपि स्वयं स्वतत्त्वं वेत्तुं न प्रभवतीति भक्त्युद्रेकेण तं प्रणमति नत इति । समीयुषां शरणं गतानां भक्तानां भवच्छिदं संसारदुःखच्छेदकमित्य-ननुसंहितं फलं स्वस्त्ययनं स्वप्रेमसुखदायकमित्यनुसंहितम् । सुमङ्गलं सुष्ठु मङ्गलं यस्मात्तमन्येषामपि कर्मिज्ञानियोगिनां तद्भक्ति-

---

* साकल्येन ज्ञानासद्भावमित्यर्थः

मित्रत्वं विना माङ्गल्याभावादिति भावः। यो हि आत्ममायाविभवं स्वयोगमायाविस्तरं स्वयमपि पर्यगात्। परिशब्दो निषेधे। एतावानिति न ज्ञातवानित्यर्थः। अपरे अस्मदादयः कुतो जानीयुः। ननु सर्वज्ञः कथं न जानाति अन्तभावादिति। दृष्टान्तेनाह यथा स्वस्यान्तं नभः कर्तुं नाप्नोति तद्वत्। न हि स्वपुष्पादर्शनं सर्वज्ञत्वं निहन्तीति भावः। तथाच वक्ष्यति-द्युपतय एव तेन ययुरन्तमनन्ततया त्वमपि यदन्तराण्डनिचया ननु सावरणा इत्यादि। श्रुतिश्च॥ योऽस्याध्यक्षः परमे व्योमन् सो अङ्ग वेद यदि वा न वेदेति॥ ३६॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यदधिष्ठानमित्यादिप्रश्नानां यदात्मकस्त्वमित्यादिसर्वप्रश्नानाञ्च सामान्यतो यदुत्तरमुक्तं वासुदेवात्परो ब्रह्मन्न चान्योऽस्ति तत्त्वत इति। पुरुष एवेदं सर्वमिति श्रुत्या च तद् दृढीकृतं तदुपसंहरति। इतीति। इदं सदसदात्मकं स्थूलसूक्ष्मात्मकं भगवतः सकाशादन्यत्पृथङ् न भाव्यं नानुसन्धेयम्। दातत्कार्यत्वात्तदाधेयत्वात्तदधीनस्थितिप्रवृत्तिमत्वाच्च तदपृथक्त्वेनानुसन्धेयमिति ते तुभ्यं यथात्वमनुपृच्छसि तथाऽभिहितं मया कथितमनेन सर्वात्मना भगवान् ध्येय इत्युपदिष्टम्॥ ३३॥ ❀ ❀ तद्ध्यानं तस्य स्वानुभवेन फलञ्च दर्शयति हे अङ्ग, पुत्र, यद्यतो मे मयौत्कण्ठ्यं भक्त्युद्रेकस्तद्युक्तेन हृदा हरिर्धृतो ध्यातोऽतो मे मम भारती भाषा मृषा निरर्थिका न लक्ष्यते न दृश्यते मे मनसो गतिर्वृत्तिर्मृषा कचित् कस्यांचिदप्यवस्थायां न भवति। हृषीकाणीन्द्रियाण्यसत्पथे निन्दिते विषये न पतन्ति॥ ३४॥ ❀ ❀ धृत इत्यनेनैतावत्त्वं प्रतीयमानं निराकरोति सोऽहमिति। सोऽहं प्रसिद्धः समाम्नायमयो वेदप्रचुरः तपोमयश्च विद्यातपोभ्यां सर्वश्रेष्ठोऽपि प्रजापतीनामुभयप्रजापतीनां महर्षयः सप्तपूर्वे चत्वारो मनवस्तथा। मद्भावा मानसा जाता येषां लोक इमाः प्रजा इति श्रीमुखेनोक्तानां सनकादीनां चतुर्णां मरीच्यादीनां सप्तानां चतुर्दशमनूनाञ्च शिष्यरूपाश्च प्रजायाः पतीनामभिवंदितः तैरभिवादितस्स्तुतो वा योगं ध्यानयोगमास्थायाश्रित्यापि यतो भगवत आत्मनो मम सम्भवः उत्पत्तिः तत्तं नाध्यगच्छदेतावानिति न ज्ञातवान्॥ ३५॥ ❀ ❀ एतदेव दृढयितुं भगवतो भुक्तिमुक्तिप्रदत्वं सर्वज्ञत्वं मायाधिपतित्वमन्येषां तु तन्मायामोहितत्त्वं च तच्चरणनतिपूर्वकमाह नतोऽस्मीति द्वाभ्यां। तस्य भगवतः चरणं सुमङ्गलं नतोऽस्मि कथंभूतम्? समीयुषां शरणागतानां मुमुक्षूणां भवच्छिदं संसारनिवर्तकं बुभुक्षूणां स्वस्त्ययनं यथा नभो नभोऽधिष्ठात्री देवता स्वान्तं नभोवैपुल्यं जानाति तथाऽऽत्मनः शक्तिभूताया भावायाः प्रकृतेर्विभवं द्वि शब्दाच्च तनानां स्वभावं च पर्यगात् परितः सर्वतो ज्ञातवान्। अथ अपरे जीवाः साकल्येन तं तन्मायाविभवादिकं च कुतो जानीयुर्न कुतोऽपीत्यर्थः॥ ३६॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं पूर्वोक्तमुपसंहृत्य तस्य माहात्म्यं वदन् तद्धर्माणां माहात्म्यं प्रथममाह—**न भारती मेऽङ्गेति**। हृदये तिरोहितो भगवानसद्बुद्धिमुत्पादयति। अतो मयौत्कण्ठ्यवता प्रेमोद्गमवता हृदा भगवान् धृतः। तत्र च भारती वर्त्तते। सा हि भगवन्तमालिङ्ग्य मन्मुखात्तेन सह निःसरतीति कदाचिदपि मृषा नोपलक्ष्यते। भा[1]विनाऽपि न बा[2]धितविषया भवतीत्यर्थः। तथा मनोव्यापारोऽपि। न यः पदार्थो भावी तद्विषयको न भवतीत्याह—**न वै कचिन्मे मनस इति**। परम्परासम्बन्धेऽपि माहात्म्यम्। भगवता सहाऽहं सम्बद्धः। मम चाऽभिमानमात्रेण मनःप्रभृतयः सम्बद्धा इति ज्ञापनार्थं सर्वत्र म इत्युक्तम्। हृषीकाणि इन्द्रियाणि। असत्पथे निन्दितमार्गे। वाक्संबन्धे तु भगवान्न हृदये स्थापित इति न तेन व्यभिचारः। ननु धृतो भगवान् कथमिष्टं कृतवान्? तत्राऽऽह—**हरिरिति**। औत्कण्ठ्यवता हृदेत्यनेनाऽयमर्थो निरूपितः—चित्ते भगवत्प्रेम सम्पादनीयम्। ततः प्रेमसंवलितं चित्तं सर्वत्र विद्यमानं भगवन्तं वि[3]षयीकरिष्यति। यथा रसनेन्द्रियसहिता जिह्वा द्रव्येषु विद्यमानान् रसान् स्वयमेव गृह्णाति। तु तद्रसज्ञानं पूर्वमपेक्षते[4]। तथा भक्त्याविष्टं चित्तं स्वयमेव भगवन्तं गृह्णाति। प्रतिनियतेन्द्रियवद्भगवद्भक्तिः॥ ३३॥ ❀ ❀ भगवान् केवलभक्त्यैकलभ्यः। ;न च तत्र प्रमाणान्तरमस्तीति बोधयितुमाह—**सोऽहमिति**। भगवज्ज्ञाने प्रथमं वेदाः प्रमाणम्। साधनं तपः। प्रमाणाभिज्ञानं मननिदिध्यासनरूपम्। अन्तरङ्गं साधनं योगः। तत्फलं चित्तैकाग्र्यम्। तस्मिन् जाते उत्तमाधिकारिणो भगवत्साक्षात्कारो भवतीति न मन्तव्यमित्याह—**सोऽहमिति**। समाम्नायः पुनः पुनरावर्त्यमानो वेदः। स[5]माङुपसर्गाभ्यां सहितो म्नाधातुरभ्यासार्थोऽर्थविधानसहितं वेदाभ्यासं बोधयति। तन्मयः तद्विकारस्तद्व्याप्तो वा। तपोमय इति साधनपरता। सहजं तप इति ज्ञापनार्थमुक्तम्। प्रजापतीनामभिवन्दित इति सर्वोपदेष्टृत्वेनाऽर्थविचार उक्तः। प्रजापतिशब्देन च तस्य ज्ञानस्य परम्पराऽपि सूचिता। ते च न प्रतारिता इत्याह—**पतिरिति**। न हि प्रजा-

१. भावेनाऽपीति ख. घ. ङ.। २. बाधितविषय इति ग. घ. ङ.। ३. विषयी करोतीति ग.। विषयी करिष्यतीति ख. ङ.। ४. अपेक्षिते इति ख. घ. अपेक्ष्यते इति ग.। ५. समाङुपसर्गाभ्यामिति क. ख. ङ. समोपसर्गाभ्यामिति ग.।

पतीनां पतिस्तान्वञ्चयति। एवं साङ्गं प्रमाणं निरूपितम्। प्रमाणं हि भगवत्साक्षात्कारे मनसः सहकारि। अतो मनसोऽपि भगवद्ग्रहणयोग्यतामाह—**आस्थाय योगमिति। निपुणमिति**। न सिद्ध्यादिभिर्भ्रामकमित्यर्थः। एवं साधनसहितोऽपि तं नाऽध्यगच्छम्। यत **आत्मसम्भव** इति स्वस्याऽधिकार उत्कृष्टो निरूपितः। तस्माद्भक्त्यैव वशो भवति ज्ञातश्च नाऽन्यथेति निश्चयः॥ ३४॥ ❀ ❀ तर्हि तत्र किं विधेयं भक्त्यर्थं सर्वैरित्याकाङ्क्षायामाह—**नतोऽस्म्यहमिति**। तच्चरणमहं नतोऽस्मि। नमनातिरिक्तं मयाऽपि साधनं न ज्ञायते। कुतोऽन्ये ज्ञास्यन्तीति भावः। ननु नमनेन किं स्यात्? तत्राऽऽह—**समीयुषां भवच्छिदमिति**। तच्चरणं ये सं सम्यक् ईयुषस्तत्प्राप्त्यर्थं कामपि तत्रत्यां क्रियां कुर्वाणास्तेषां संसारं दूरीकरोति। पुनः संसारप्राप्त्यभावाय भवं छिनत्तीत्युक्तम्। मूलतश्छिन्ने[1] प्रवाहे अग्रे[2] निवृत्तिः स्वत एवेति तथोक्तम्। न केवलं दुःखमेव दूरीकरोति किन्तु कल्याणमपि प्रयच्छतीत्याह—**स्वस्त्ययनं सुमङ्गलमिति**। स्वस्ति कल्याणस्यैहिकस्य अयनं स्थानम्। आमुष्मिकस्याऽपि सूचकं सुमङ्गलम्। अतश्चरणनमनमेव कर्त्तव्यम्। तेनैवाऽर्थसिद्धिः। ननु[3] भगवान् भगवद्गुणा वा इदमित्थतया ज्ञातुं शक्याः। तत्र गुणानां ज्ञाने अशक्यतामाह—**यो हीति**। यो भगवान् आत्मनो मायायाः साधनभूताया विभवमैश्वर्यं स्वयमेव पर्यगात्। परीति निषेधार्थे। न ज्ञातवानित्यर्थः। स्मेति प्रसिद्धे। अनेन तथा वचने[4]स्वस्य दोषो निराकृतः[5]। ननु मायाया विभवं भगवदीयमेवेति कथं भगवान् स्वसम्बन्धिनं पदार्थं न जानाति? तत्र दृष्टान्तमाह—**यथा नभः स्वान्तमिति**। विद्यमाने अन्ते यस्त्वन्तं न जानाति स न सर्वज्ञः। न त्वविद्यमानेऽपि। न हि शशशृङ्गाज्ञानं सार्वज्ञ्यप्रतिबन्धकम्। यथा नभः स्वान्तं न जानाति। व्यापकत्वादन्ताभावाच्च। तथा भगवानपीत्यर्थः॥ ३५॥ ❀ ❀ एवं गुणानामज्ञानं निरूप्य स्वरूपस्याऽप्यज्ञानं निरूपयति—**नाऽहमिति**। भगवन्तं कश्चिज्ज्ञास्यतीति न मन्तव्यम्। यतो वयमेव महान्तोऽधिकारिणः सर्वप्रकारेण चेन्न जानीमः कथमन्यो ज्ञास्यतीति। तत्र अहं ब्रह्मा। यूयं सनकाद्यन्ताः सर्वे मत्पुत्राः। यस्य ऋतां सत्यरूपां गतिं न विद्मः। भगवज्ज्ञानं दूरे। किन्तु येन मार्गेण भगवान् गच्छति तां गतिमपि न जानीमः। यथा देवानां मनुष्या न जानन्ति तथा वयमपि भगवत इत्यर्थः। महादेवस्तु गुणावतारः सर्वगुरुः। "ईश्वराज्ज्ञानमन्विच्छेदि"ति वाक्याच्च स ज्ञास्यतीत्याशङ्क्याऽऽह—**न वामदेव इति**। वामदेवो महादेवः। अपरे ततो हीनाः। अज्ञाने उपपत्तिमाह—**यन्माययेति**। पूर्ववज्ज्ञानसम्बन्धिन्या मायया मोहिता बुद्धिर्येषाम्। बुद्ध्या गृहीतानि ज्ञानेन्द्रियाणि हि ज्ञानं जनयन्ति। तत्र बुद्धिश्चेन्मुग्धा ज्ञानवार्त्ता दूरे। तर्हीन्द्रियाणां वैफल्यं स्यात्तत्राऽऽह—**इदं विनिर्मितं आत्मसमं विचक्ष्महे इति**। भगवतैव विनिर्मितमिदं कार्यं जगद्रूपं स्वबुद्ध्यनुसारेण विचक्ष्महे। अनेन कार्यस्य प्रदर्शितत्वाद्भगवान्नास्तीति पक्षो निराकृतः। **आत्मसममिति** वचनात्तदपि न सम्यक् ज्ञायते। अन्यथा विशेषानुमानैर्भगवतः सर्वे विशेषा ज्ञाता भवेयुः। सर्वगुणप्रसिद्धिरूपत्वाज्जगतः॥ ३६॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः।

**न भारतीत्यत्र भावेनेति** अत्र **भाविनेति** पाठः प्रतिभाति। ननु ब्राह्मे, नीतिशास्त्रे हिंस्रप्रयोगानां कामशास्त्रे च पारदारिकसुखसुरतादीनां ब्रह्मणा कथनस्य भारते वात्स्यायनीये चानुवादात् ब्रह्मवाचां निन्दितमार्गे पातः इति 'नमे ऋषीकाणि' इत्युक्तिः कथं सङ्गच्छतः इत्यत आहुः **वाक्सम्बन्ध इत्यादि**। इदं मनः सम्बन्धस्याप्युपलक्षकम्। तथा च तयोः सम्बन्धेऽपि चेद्भगवद्विस्मरणं स्यात्तदा भारतीत्यर्धेन सत्यनिर्गमनरूपमात्रमेव कार्यं न वदेत्, अतो निर्गम एवाविस्मरणम्। न तु तयोः सम्बन्धेऽपीति न तेन व्यभिचार इत्यर्थः। **धृत इति** प्रेम्णा बद्ध इत्यर्थः। **प्रतिनियतेन्द्रियवद्भक्तिरिति**। मनसा रूपरसादिग्रहणे चक्षुरसादिवन्मनसा भगवद्ग्रहणे भक्तिरित्यर्थः॥ ३३॥ ❀ ❀ **सोऽहमित्यत्र तत्रेति**। भगवद्ज्ञाने,**प्रमाणाभिज्ञानमिति** वेदतात्पर्यज्ञानम्। **अन्तरङ्गमिति** निदिध्यासनजनकम्। **सोहमिति** उत्तमाधिकारी। साधनसम्पत्तिं विशदयन्ति **समाम्नायेत्यादि**। उक्तमिति मयडन्तमुक्तम्। एतेन 'तं त्वौपनिषदं पुरुषमि' ति 'मनसैवानुद्रष्टव्य' इत्येवं जातीयकानां तात्पर्यं निर्द्धारयन्तीत्याहुः **प्रमाणहीत्यादि**॥ ३४॥ ❀ ❀ **नतास्मीत्यत्र आहेति**, । श्लोकत्रयेणोत्तरमाहेत्यर्थः। **अर्थसिद्धिरिति** भगवद्विचारितरीतिकाभीष्टसिद्धिः॥ ३५॥ ❀ ❀ **नाहमित्यत्र ज्ञानसम्बन्धि न्येति** चिदंशशक्त्या। **अनेनेति** विनिर्मितपदेन। **तदपीति** कार्यरूपं जगदपि। **अन्यथेति** कार्यस्य सम्यक्परिच्छेदे॥ ३६॥

## श्रीगिरिधरकृता बालप्रबोधिनी

यदुक्तं 'एतावत्त्वं यतो हि मे' 'तमविज्ञाय मामीश्वरं प्रब्रवीषि' इति तदुपपाद्य मम वाङ्मनइन्द्रियाणां प्रवृत्तयो यथार्था भगवदनुग्रहेण न मत्प्रभावेणेत्युपसंहरति—**नेति**। पुत्रत्वेन स्नेहविषयत्वात्त्वं ममाङ्गतुल्योऽस्यतो यथार्थमेव वदामि न प्रतारया-

---

१. भगवद्ग्रहणेऽयोग्यता मिति क. ख.। २. छिन्ने वा प्रग्रहे निवृत्तिरिति ङ.। ३. नन्विति ग. ङ.। ४. वचनेनेति ग.।
५. निवारित इति ङ.।

मीति सूचयन्सम्बोधयति—हे अङ्गेति। यत् यस्मात् मे मया औत्कण्ठ्यं प्रेमोद्रेकस्तद्वता हृदयेन हरिर्धृतो ध्यातस्तस्मान्मे मम भारती वाणी क्वचिदपि विषये मृषा नोपलभ्यते न दृश्यते। मे मम मनसो गतिः सङ्कल्पोऽपि क्वचिद्विषये मृषा नैव भवति। मे मम हृषीकाणीन्द्रियाणि क्वचिदप्यसत्पथे निन्दितविषये नैव पतन्तीत्यन्वयः॥ ३३॥ ❀ ❀ नन्वेवम्भूतो भगवानस्ति चेत्तदा सर्वैः कुतो न ज्ञातो भवतीत्याशङ्क्य भक्त्यभावादित्यत्र स्वानुभवमेवान्वयव्यतिरेकाभ्यां प्रमाणयति—सार्द्धेन। स भगवन्नाभिकमलादुत्पन्नः समाम्नायमयः वेदाभ्यासपरः तपोमयो निरन्तरं तपोनिष्ठः प्रजानां पतिः सन्मार्गोपदेष्टा अतएव सर्वैरभिवन्दितचरणः एवं सर्वोत्कृष्टोऽपि निपुणं साङ्गं योगमाश्रित्य समाहितः सावधानोऽपि अहं यत आत्मनो मम सम्भवो जन्म तं भगवन्तं नाध्यगच्छं न ज्ञातवान्। एतच्च तृतीयस्कन्धे पद्मोद्भवे स्पष्टं भविष्यति॥ ३४॥ ❀ ❀ तदा तस्य चरणं नतोऽस्मि ततोऽचिन्त्यमहिमत्वेन यथा कथञ्चिज्ज्ञातवानिति शेषः। तच्चरणनतिमात्रेण कथं ज्ञानमित्यपेक्षायां न केवलं ज्ञानप्रदं किन्तु समीयुषां शरणागतानां भवच्छिदं जन्मादिसंसारदुःखनिवर्त्तकं स्वस्त्ययनमिह जन्मनि धनपुत्रवृद्ध्यादिकल्याणकरं सुमङ्गलं परलोके परमानन्दप्रदं चेत्यर्थः। एवं स्वानुभूतमुक्त्वा ये तु वदन्ति वयं शास्त्राभ्यासवन्तः सर्वज्ञा इति तानुपहसन्निव कैमुत्यन्यायेन भगवतो गुणानां दुर्ज्ञेयत्वमाह—य इति। यो भगवान् स्वयमपि आत्ममायाविभवं स्वमायाया विस्तारं पर्यगात्—परिशब्दोऽत्र निषेधे—नागात्, एतावानिति न ज्ञातवानित्यर्थः। अपरे कुतो जानीयुः ?। तस्य चरणं नतोऽस्मीति पूर्वेण सम्बन्धः। ननु सर्वज्ञः कथं जानातीत्याशङ्क्यान्ते विद्यमाने यस्त्वन्तं जानाति सो सर्वज्ञो न त्वविद्यमानशशशृङ्गाद्यजानन्न सर्वज्ञो भवतीत्याशयेनान्ताभावं दृष्टान्तेन साधयति—यथेति। नभो यथा स्वस्यान्तं न प्राप्नोति यथा भगवानपीत्यर्थः। स्मेति नात्र सन्देहः।❀ तथा च वेदस्तुतौ वक्ष्यति—"द्युपतय एव ते न ययुरन्तमनन्ततया त्वमपि यदन्तराण्डनिचया ननु सावरणाः" इत्यादिशब्देन "योऽस्याध्यक्षः परमे व्योमन्॥ सो अङ्ग वेद यदि वा न वेद" इत्यादिश्रुतिरप्यत्र प्रमाणमिति सूचयति॥ ३५॥ ❀ ❀ एवं भगवान् मायागुणानां दुर्ज्ञेयत्वमुक्त्वा तत्स्वरूपस्यापि दुर्ज्ञेयत्वमाह—नाहमिति। अहं ब्रह्मा यूयं नारदसनकादयः वामदेवो महादेवश्च यद्येते वयं महत्त्वेन ज्ञानित्वेन च प्रसिद्धा अपि यस्य ऋतां यथार्थरूपां गतिं स्वरूपं न विदुः न जानीमस्तर्ह्यपरेऽस्मदपेक्षया हीनाः सुराः अन्ये देवा न जानन्तीति किमु वक्तव्यं ? ते तु न जानन्त्येवेत्यर्थः। किं बहुनोक्तेन ? तद्विनिर्मितमिदं जगदपि आत्मसमं स्वबुद्ध्यनुरूपमेव विचक्ष्महे जानीमः, न परमार्थतः। चकारोऽप्यर्थे। तस्य जगतश्च परमार्थतो ज्ञाने हेतुमाह—तस्य मायया मोहिता बुद्धिर्येषां तथाभूता यतो वयमिति। मोहं विना यथावत्तज्ज्ञाने सर्वविमुक्त्या संसार एव विलीयेतेति भावः॥ ३६॥

### हिन्दी अनुवाद

प्यारे नारद! मैं प्रेमपूर्ण एवं उत्कण्ठित हृदयसे भगवान्के स्मरणमें मग्न रहता हूँ, इसीसे मेरी वाणी कभी असत्य होती नहीं दीखती, मेरा मन कभी असत्य संकल्प नहीं करता और मेरी इन्द्रियाँ भी कभी मर्यादाका उल्लङ्घन करके कुमार्गमें नहीं जातीं॥ ३३॥ ❀ ❀ मैं वेदमूर्ति हूँ, मेरा जीवन तपस्यामय है, बड़े-बड़े प्रजापति मेरी वन्दना करते हैं और मैं उनका स्वामी हूँ। पहले मैंने बड़ी निष्ठासे योगका सर्वाङ्ग अनुष्ठान किया था, परंतु मैं अपने मूलकारण परमात्माके स्वरूपको नहीं जान सका॥ ३४॥ ❀ ❀ (क्योंकि वे तो एकमात्र भक्तिसे ही प्राप्त होते हैं) मैं तो परम मङ्गलमय एवं शरण आये हुए भक्तोंको जन्म-मृत्युसे छुड़ानेवाले परम कल्याणस्वरूप भगवान्के चरणोंको ही नमस्कार करता हूँ। उनकी मायाकी शक्ति अपार है, जैसे आकाश अपने अन्तको नहीं जानता, वैसे ही वे भी अपनी महिमाका विस्तार नहीं जानते। ऐसी स्थितिमें दूसरे तो उसका पार पा ही कैसे सकते हैं॥ ३५॥ ❀ ❀ मैं मेरे पुत्र तुमलोग और शङ्करजी भी उनके सत्य स्वरूपको नहीं जानते; तब दूसरे देवता तो उन्हें जान ही कैसे सकते हैं! हम सब इस प्रकार मोहित हो रहे हैं कि उनकी मायाके द्वारा रचे हुए जगत्को भी ठीक-ठीक नहीं समझ सकते, अपनी-अपनी बुद्धिके अनुसार ही अटकल लगाते हैं॥ ३६॥

**यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः। न यं विदन्ति तत्त्वेन तस्मै भगवते नमः॥ ३७॥**
**स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः। आत्माऽऽत्मन्यात्मनाऽऽत्मानं संयच्छति च पाति च॥ ३८॥**
**विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितम्। सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम्॥ ३९॥**
**ऋषे विदन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः। यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतम्॥ ४०॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

ननु सर्वेऽपि तं वर्णयंतो दृश्यंते तत्राह। यस्येति॥ ३७॥ ❀ ❀ अवतारकर्माणि संक्षेपतो दर्शयंति स एष आद्यो भगवान् यः पुरुषावतारः सन् सृष्ट्यादि करोति आत्मात्मन्यात्मनात्मानमिति कर्ता अधिकरणं साधनं कर्म च स्वयमेवेत्यर्थः।

❀ स्कंधः १०, अध्यायः ८७, श्लोक: ४१। १. प्रा०पा०—ऽसृजत्प्रजाः। २. प्रा०पा०—समं गच्छति पाति।

पुरुषावतारः सृष्ट्यादीनि च कर्माणीति संक्षेपोक्तिः ॥ ३८ ॥ ❀ ❀ न यं विदंति तत्त्वेनेत्युक्तं किं तत्तत्त्वमित्यपेक्षायामाह। ज्ञानं केवलं सत्यं तत्त्वम्। घटाद्याकारवृत्तिज्ञानव्यवच्छेदार्थं विशेषणानि। विशुद्धं विषयाकारशून्यम्। यतः प्रत्यक् सर्वांतरम् अत एव सम्यक् संदेहादिरहितम् अवस्थितम्। स्थिरं यतो निर्गुणम्। गुणकार्यं हि गुणव्यतिकराच्चंचलं भवति। यद्यपि वृत्तिज्ञानमपि स्वरूपज्ञानमेवेति न चांचल्यादिदोषयुक्तं तथाप्यंतःकरणवृत्तिदोषैस्तथातथा भवतीति व्यवच्छिद्यते। एभिरेव विशेषणैः सत्यत्वमपि समर्थितम्। किंच यद्विकारवत्तदसत्यं दृष्टम्। न चास्य जन्मादयः षड्विकाराः संतीत्याह। अनाद्यंतं जन्मनाशरहितम्। अत एव जन्मानंतरास्तित्वलक्षणोऽपि विकारो नास्ति वृद्धिविपरिणामापक्षयाश्च न संति। यतः पूर्णम्। सर्वत्र हेतुः नित्यमद्वयम्। नित्यं सर्वदा द्वैतप्रतीतिसमयेऽपि परमार्थतोऽद्वयमिति ॥ ३९ ॥ ❀ ❀ अत्र विद्वदनुभवं प्रमाणयति। हे ऋषे नारद प्रशांतात्मेंद्रियाशयाः प्रसन्नदेहेंद्रियमनसो यदा भवंति तदा विदंति। अन्यदा तदज्ञाने कारणमाह। यदा तु तदेव प्रकाशमानमेवासतां तर्कैर्विप्लुतं स्यात्तदा तिरोधीयेतेति ॥ ४० ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अत्राक्षिपति—नन्विति। तत्त्वेन शक्तिस्वरूपाभ्यां याथार्थ्येन ॥ ३७ ॥ ❀ ❀ कल्पेकल्पे प्रतिमहाकल्पारंभे। इत्यर्थ इति। कर्त्ता ईश्वरः सृज्यं पाल्यं संहार्यं विश्वं तन्निमित्ता माया तदधिष्ठानं हरिरेव सर्वं तथातथा भवतीति भावः ॥ ३८ ॥ ❀ ❀ अत एव सर्वांतरत्वादेव। अत एव जन्मनाशरहितत्वादेव। अत्र संदर्भः। पुनश्च सर्वविलक्षणां शक्तिं लक्षयितुं तस्यैकस्यैव युगपत्कर्तृत्वादिकं योजयन्स्वरूपमपि तथैव लक्षयति। विशुद्धमिति—युग्मकम्। तत्र ज्ञानमिति विशेष्यं तच्च सुखस्वरूपमेव 'विज्ञानमानंदंब्रह्म' इति श्रुतेः। तस्य जीवस्वरूपविलक्षणताज्ञापकानि विशेषणान्याह—विशुद्धं केवलं विशेषेण शुद्धमेव नत्वाविद्यकमित्यर्थः। "अयमात्माऽपहतपाप्मा" इतिश्रुतेः। "यतः प्रत्यकः सर्वतोऽप्यांतरं यः पृथिव्यां तिष्ठन्" इत्यारभ्य "य आत्मानमंतरो यमयतीति श्रुतेः। अतः सम्यगक्षुभिततरैवासमंताद्व्याप्य स्थितं न त्वावृतविक्षिप्तं न वायुपरिमाणमित्यर्थः। 'एको देवः' इत्यादिश्रुतेः। किञ्च। सत्यं सर्वसत्ताप्रदस्वरूपत्वासत्यपदार्थानां मुख्यं न तु तदितरदित्यर्थः। "सत्यं चामृतञ्च सत्यमेवाभवत्" इति श्रुतेः। पूर्णं भगवत्तया संभृतं न तु तया हीनमित्यर्थः। अतः एवानाद्यनंतस्वरूपवैभवं निर्गता गुणेभ्यस्सत्त्वादिभ्यो गुणा ऐश्वर्यादयः षट् यस्य तादृशं च मध्यमपदलोपी बहुव्रीहिः। 'न तस्य कार्यं करणं च विद्यते' इत्यादि श्रुतेः। अनेन तादृशस्वरूपवत्त्वं चायातम्। "न संदृशे तिष्ठति रूपमस्य यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्" इति श्रुतेः। सर्वसत्ताप्रदस्वरूपत्वान्नित्यमेवाद्वयं पृथग्वस्तुरहितत्वाद्वयरहितं चेत्यर्थः। 'एकमेवाद्वयं ब्रह्म' 'द्वैताद्वै भयं भवति' इति श्रुतेः। तदेवं सर्वेषां तन्मूलत्वेप्यस्ति भिन्नं स्वरूपवैलक्षण्यमन्यथा न यं विदंति तत्त्वेनेति विशेषोक्तिर्व्यर्थी स्यात् अन्यपक्षपातितानामवेद्यत्वे हेतुमाह—प्रशांता भगवन्निष्ठा आत्मादयो येषां त एव तद्विदंति असत्तर्कैः। "योऽनाहतो नरकभाग्भिरसत्प्रसंगैः" इति वक्ष्यमाणतृतीयगतमदुक्तदिशा तादृशतद्रूपादिकुतर्कैश्च विप्लुतं सद्य तिरोधीयेत्तेति तदेवमनेन पद्यचतुष्केण तादृशस्वरूप एव भगवांस्तादृशशक्त्या तद्रूपः सन्नवतारादिकं करोति तत्र तत्तज्ज्ञास्तत्तद्गायंतोपि न सुखं प्राप्नुवंति यतस्तत्तद्विज्ञाने चाधिकृत्य 'परिनिष्ठितोपि नैर्गुण्ये' इत्यादिकं बहुतरं गीयत इति व्यंजितम्। विश्वनाथस्तु—ननु—'न यं विदंति तत्त्वेन' इति भगवंतं युष्मदादयो न विदंति किंतु तस्य यन्निर्विशेषस्वरूपं श्रूयते तद्विदंति न वेति जिज्ञासायामाह—विशुद्धमिति। तत्र ज्ञानमिति विशेष्यं तच्च सुखरूपमेवं 'विज्ञानमानंदं ब्रह्म' इति श्रुतेः। केवलमद्वितीयमत एवोपाध्यभावाद्विशुद्धं तत एव सर्वांतरत्वात्प्रत्यक् तदपि समंताद्व्याप्यैव स्थितत्वात्सम्यगवस्थितं, व्याप्तिरपि सर्वत्र सत्तारूपेणैवेति सत्यं, तारतम्याभावात्पूर्णं, जन्मादिविकाराभावादनाद्यनंतं, सत्त्वादिगुणसंसर्गाभावान्निर्गुणं, सर्वकालमेकरूपतयैव स्थायित्वान्नित्यं, द्वितीयाभावादद्वयम्। ऋषे हे नारदेति। एतादृग्ज्ञानवत एवर्षित्वं भवतीति भावः। मुनयो मननशीला यदा प्रशांतात्मेंद्रियाशया भवंति तदा तद्विदंति अन्यथाऽसत्तर्कैर्विप्लुतं तदेव वस्तु तिरोधीयेत एतेन तस्य निर्विशेषस्वरूपं यद्ब्रह्म तत्कथंचिदपि ज्ञातुं शक्यं न तु सविशेषस्वरूपमित्युक्तम्। एवमेव 'विबोद्धुमर्हत्यमलांतरात्मभिः' इत्यादिना दशमस्कंधेपि वक्ष्यते इति ॥ ३९ ॥ ४० ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

घटादिवृत्तिज्ञानेति। यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा घटादि विषयदेशं गत्वा घटादिविषयाकारेण परिणमते। स एव परिणामो वृत्तिरित्युच्यते। इति वेदान्तपरिभाषा ॥ षड् विकारा इति। जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यतीति षड्भावविकाराः ॥ ४० ॥

## श्रीमद्वीरराघवव्याख्या

तर्हि मायातरणे क उपाय इत्यत आह यस्येति। यस्य भगवतोऽवताराणां कर्माणि चेष्टितान्यस्मदादयश्चतुर्मुखादयो गायन्ति यं तत्त्वेन याथात्म्येन न विदंति न जानन्ति किन्तु तस्मै भगवते नमस्कुर्वंति तस्य गुणकर्मानुकीर्तनमेव मायातरणोपाय

इत्यभिप्रायः ॥ ३७ ॥ ❀ ❀ केऽवताराः कानि चेष्टितानि च यदनुकीर्त्तनेन मायां तरंतीत्याशङ्कायामवतारांस्तत्कर्माणि च वक्ष्यन् यद्रूपमित्यादिप्रश्नानामुत्तराण्युपसंहरति स एष इति । अजः कर्माधीनजन्मरहित एष आद्यः कारणभूतः परमपुरुषः कल्पे कल्पे प्रतिकल्पमात्मन्येवाधारे आत्मना परमात्मभूते नात्मानमुपादानमात्मैव कर्त्ता सृजति संयच्छति संहरति पाति च ॥ ३८ ॥ ❀ ❀ नन्वयं जगद्व्यापारो भगवतः किं कर्माधीन इत्याशङ्क्य नेत्याह—विशुद्धमिति । पुण्यपापरूपकर्मरहितमतो न जगद्व्यापारः कर्माधीन इत्यर्थः । एवञ्च कर्माधीनव्यापारजीवस्वरूपाद्वैलक्षण्यमुक्तं भवति । जीवविलक्षणं चेत्तर्हि किं जडमित्यत आह केवलं ज्ञानं कचिदप्यजडमित्यर्थः । तर्हि किं घटपटाद्याकारवृत्तिज्ञानमित्यत आह प्रत्यक् स्वस्मै भासमानं ननु जीवोऽप्येवंरूपोऽत आह सम्यगवस्थितमर्थान्तरानपेक्षस्थितम् । जीवस्तु परमात्मधार्य इत्यभिप्रायः । अन्यानपि चेतनाचेतनविलक्षणाकारानाह सत्यं स्वरूपतो धर्मतश्च निर्विकारमनेन स्वरूपतो विकार्यचेतनद्रव्यं स्वभावतो विकाराचेतनश्च व्यावृत्तः पूर्णमवाप्तसमस्तकामं निर्गुणं सत्वादिरहितमनाद्यन्तमुत्पत्तिनाशरहितमत एव नित्यं कालाद्यनवच्छिन्नमद्वयं समाभ्यधिकरहितम् । एते यथा संभवं चेतनाचेतनव्यावर्तकत्वेनानुसंधेयाः ॥ ३९ ॥ ❀ ❀ अत्र विद्वदनुभवं प्रमाणयति ऋषे इति । हे ऋषे, नारद, आत्मा अन्तःकरणमाशयो वासना प्रणेता आत्मेन्द्रियाशया येषान्ते कवयः उक्तविधं परमात्मस्वरूपं जानंति । कवयः समीचीनतर्कैर्विविच्य तत्स्वरूपं चेतनाचेतनविलक्षणं शोधयन्ति । कुतर्कैर्दुर्ज्ञेयत्वमाह—असत्तर्कैरसतामेव वा हेतुवादैर्वा विलुप्तमुपद्रुतं स्यात्तदा तिरोधीयेतेत्यर्थः ॥ ४० ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

इतोऽपि तत्स्वरूपसाकल्यज्ञानमेव निषिध्यते ननु तद्विषयज्ञानमात्रमन्यथा वागिन्द्रियप्रवृत्तिस्तद्विषया नोपपद्यते सा चास्ति तस्मादुक्तं युक्तमिति भावेनाह—यस्येति । एकदेशज्ञानमपि स्वातन्त्र्येणेत्यभिमाने तदपि न स्यादिति भावेन पौनः पुन्येन नमनमिति भावः ॥ ३७ ॥ ❀ ❀ युक्तं चानन्तरूपबाहुल्यं तन्नियमनलक्षणकर्म चान्तरेणान्यावताराणां तत्कार्याणाञ्च सद्भावे किं प्रमाणमित्याशङ्क्य संक्षिप्य तदाह स एष इति । योऽस्मदादिभिः सर्वैः साकल्येनाविज्ञातः स एष पुरुषः श्रीनारायण आत्मा स्वयमेव कल्पे कल्पे आत्मना स्वेच्छया नियतमनसाऽऽत्मनि स्वाधारतयाऽऽत्मानं मत्स्यादिरूपेण सृजति दीपाद्दीपान्तरवद्व्यक्तं करोति । देवदत्तवन्न जायत इत्यज इति, आद्य उपजीव्य इति व्यक्तीकरणम् । उपजीव्यत्वमेवाह—स संयच्छतीति । तैरवतारैः देवादिस्वजनं पाति हयग्रीवादिदैत्यान्संयच्छति । चशब्द उक्तार्थसमुच्चये व्यासाद्यवतारान्तरसूचने च वर्तते । तथा च व्यासाद्यवतारैर्मणिमदादितामसजनवचनेन तिरोहितस्वरूपं शास्त्रप्रवर्तनेन प्रकाशयतीति ज्ञायते । तथाचोक्तं स्वयमेव स्वरूपाणि मत्स्यकूर्मादीन्यजः स्वात्मन्येवेच्छया सृष्ट्वा तैर्देवादीन्प्रपात्यसावित्यादि ॥ ३८ ॥ ❀ ❀ शास्त्रतः कीदृशं प्रकाशितमत्राह—विशुद्धमिति । विशुद्धं निर्दोषत्वात् केवलमद्वितीयं ज्ञानं विषयनिरपेक्षसंविद्रूपं प्रत्यक् सर्वेषामन्तराभिमुखत्वेन स्थितं स्वतः शुद्धस्यापि परतो दुष्टं स्यादित्यतः सम्यगवस्थितं दुष्टांशरहितत्वात् सत्यं निर्दुःखनित्यनिरतिशयानन्दानुभवरूपं पूर्णं देशतः कालतो गुणतश्चापरिच्छिन्नमनाद्यन्तमादिविनाशवर्जितम् निर्गुणं सत्त्वादिगुणरहितम् अत एव नित्यं परिणामस्वभाववर्जितमद्वयं स्वागतभेदवर्जितम् ॥ ३९ ॥ ❀ ❀ स्वतो विकाराभावेऽपि निमित्तेन स्यादित्यतः ऋतं शश्वदेकप्रकारं तदुक्तं ऋतं तदात्मता ज्ञप्तेः सत्वं साधुत्वतः परमित्यादि । एतज्ज्ञानस्य मोक्षैकफलहेतुत्वादिदमेव शास्त्रेण प्रकाशितं नान्यदित्याशयेनाह विन्दन्तीति । प्रकर्षेण शान्ता मङ्गलीभूतात्मानः श्रोत्रादीन्द्रियाण्याशयो बुद्धिर्येषान्ते तथोक्ताः । यदा भगवदेकनिष्ठया निर्मलीभूतमनआदीन्द्रियप्रवृत्तयो मुनयः सर्वज्ञा ब्रह्मादय एवंविधगुणोपेतं ब्रह्मापरोक्षीकृत्य विन्दन्ति स्वानन्दं लभन्ते । तदैवासत्तर्कैर्विमतं मिथ्यादृष्टत्वादिकैर्विप्लुतमुहतमन्यथाभूतं बाह्यान्तःकरणे संसारबीजभूतं तिरोधीयते दग्धबीजवद्भवतीत्यन्वयः । अनेनावतारकर्मकीर्तनश्रवणादीनां किं फलमिति चोद्यमपि निरस्तम् किञ्च मूलरूपस्य यादृशं रूपं यादृशं कर्म यादृशो गुणस्तत्सर्वमवताराणामस्तीति । अतस्तत्स्वरूपत्वं युक्तमिति च ज्ञापितं यद्वाऽसत्तर्कैर्यदि गुणवांस्तर्हि दोषवान् यदि कर्ता तर्हि श्रान्तः स्याद् देवदत्तादौ दृष्टत्वादित्यादिरूपैस्तिरोहितं विरुद्धत्वादिलक्षणं रूपं व्यासादिप्रणीतशास्त्रनिशितया बुद्ध्या यदा सम्यग् विंदन्ति मुनयस्तदैव दुष्टत्वादिरूपं तिरोधीयेत तत्तद्विषया बुद्धिर्निवर्तत इति कदावतारप्रसङ्ग इत्यत आह स एष इति । यदा बौद्धाद्यसत्तर्कैर्विप्लुतं धर्मशास्त्रं तिरोधीयतेऽधर्मशास्त्रमुज्जृम्भते च तदात्मानं सृजतीत्यन्वयः । कीदृशमात्मानमित्यत उक्तं विशुद्धमित्यादि । तत्र किं प्रमाणमत्राह विन्दन्तीति । मत्स्याद्यवतारा विष्णोः स्वरूपांशा इत्यत्र तेषां प्रत्यक्षं प्रमाणमवतारप्रसङ्गे चेत्यर्थः ॥ ४० ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या ।

तत्र सदैन्यमाह नाहमिति । ऋतां गतिं श्रीवैकुण्ठम् । न विदुर्न विद्मः । आस्तां सा । तन्मायया विनिर्मितमिदं विश्वमप्यात्मोचितमेव विचक्ष्महे । तत्र हेतुः तन्माययैव मोहितबुद्धय इति ॥ ३७ ॥ ❀ ❀ किञ्च न यमिति । तत्त्वेन शक्तिस्वरूपाभ्यां याथार्थ्येन ॥ ३८ ॥ ❀ ❀ तत्र सर्वविलक्षणां शक्तिं यत्किञ्चिल्लक्षयति स एव ( एव ) इति ॥ ३९ ॥ ❀ ❀ ( पुनश्च प्रकारान्तरेण तामेव यथा लक्षयितुं तस्यैकस्यैव युगपत्कर्तृत्वादिकं योजयन् ) स्वरूपमपि तथैव सर्ववैलक्षण्येन लक्षयति विशुद्धमिति

युग्मकम् । तत्र ज्ञानं विशेष्यम् तच्च सुखस्वरूपमेव, 'विज्ञानमानन्दं ब्रह्मे'ति श्रुतेः । तस्य जीवस्वरूपविलक्षणताज्ञापकानि विशेषणान्याह विशुद्धं केवलं, विशेषेण शुद्धमेव, न त्वविद्याविद्धमित्यर्थः ।' अयमात्माऽपहतपाप्मे'ति श्रुतेः । यतः प्रत्यक् सर्वतोऽप्यन्तरम् । "यः पृथिव्यां तिष्ठन्नित्यारभ्य य आत्मनि तिष्ठन् आत्मानमन्तरो यमयती'ति श्रुतेः । अतः सम्यगक्षुभिततयैव अव समन्तात् व्याप्य स्थितं, न त्वावृतविक्षिप्तं, न वाऽणुपरिमाणमित्यर्थः । "एको देवः" इत्यादि श्रुतेः । किञ्च सत्यं सर्वसत्ताप्रदस्वरूपत्वात् सत्यपदार्थानां मुख्यं न तु तदितर इत्यर्थः । "सत्यञ्चामृतञ्च सत्यसत्यमेवाभवदि"ति श्रुतेः । पूर्णं भगवत्तया सम्भृतं, न तु तया हीनमित्यर्थः । अत एव अनाद्यन्तस्वरूपवैभवम् । निर्गता गुणेभ्यः सत्वादिभ्यो गुणा ऐश्वर्यादयः षडयस्य न तस्य कार्यं करणञ्च विद्यत इत्यादिश्रुतेः । अनेन तादृशरूपवत्त्वमायातम् । "न सन्दृशे तिष्ठति रूपमस्य, यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वामि"ति श्रुतेः । सर्वसत्ताप्रदस्वरूपत्वान्नित्यमेवाद्वयं पृथग्वस्तुरहितत्वाद्भयरहितञ्चेत्यर्थः । एकमेवाद्वितीयं ब्रह्म द्वितीयाद्वै भयं भवतीति श्रुतेः । तदेवं सर्वेषां तन्मूलत्वेऽप्यस्ति । भिन्नं स्वरूपवैलक्षण्यम् । अन्यथा न यं विन्दन्ति तत्वेनेति विशेषोक्तिर्व्यर्था स्यात् ॥ ४० ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या ।

तत्र सदैन्यमाह नाहमिति द्वाभ्याम् । वामदेवो रुद्रः । यस्य ऋतां सत्यां गतिं त्रिपादेकपाद्विभूतिं न विदुर्न जानीमः । तत्र च तन्मायया विनिर्मितमेकपाद्विभूतिरूपमिदन्तु विचक्ष्महे ब्रूमहे । तदप्यात्मसमं स्वज्ञानानुरूपमेव न तु कृत्स्नम् ॥ ३७ ॥ ❀ ❀ तत्कीर्तनादिभक्तिस्तु तत्स्वरूपाज्ञानेऽपि सम्भवतीति दर्शयन्नाह यस्येति । अतस्तस्यावतारांस्तत्कर्माणि च ब्रूमहे त्वं [illegible] ॥ ३८ ॥ ❀ ❀ [illegible] कल्पान्तरे । आत्मात्मन्यात्मनात्मानमिति कर्ताऽधिकरणं साधनं कर्म च स्वयमेवेत्यर्थः ॥ ३९ ॥ ❀ ❀ ननु न यं विदन्ति तत्त्वेनेति भगवन्तं युष्मदादयो न विदन्ति किन्तु तस्य यन्निर्विशेषं स्वरूपं श्रूयते तत्विदन्ति न वेति जिज्ञासायामाह विशुद्धमिति । तत्र ज्ञानमिति विशेष्यम् । तच्च सुखरूपमेव, "विज्ञानमानन्दं ब्रह्मे ति" श्रुतेः । ज्ञानञ्च जानातेः कर्तृकर्मकरणाभावात् केवलम् । अत एवोपाध्यभावाद्विशुद्धम् । तत एव सर्वान्तरत्वात्प्रत्यक् । तदपि समन्ताद् व्याप्यैव स्थितत्वात्सम्यगवस्थितम् । व्याप्तिरपि सर्वत्र सत्तारूपेणैवेति सत्यम् । तारतम्याभावात्पूर्णम् । जन्मादिविकाराभावाद्यनाद्यन्तम् । सत्वादिगुणसंसर्गाभावान्निर्गुणम् । सर्वकालमेकरूपतयैव स्थापित्वान्नित्यम् । द्वितीयाभावादद्वयम् ॥ ४० ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अहं ब्रह्मा यस्य भगवत ऋतां सत्यां गतिमेतावत्त्वं न वेद्मि वामदेवः शिवो न वेद यूयं मम पुत्राः त्वत्प्रभृतयो न विदुरपरे सुराश्च न विदुरिति किमुत तत्र हेतुः तदिति । तस्य भगवतो मायया प्रकृत्या मोहिता बुद्धिर्येषान्ते वयं तेन विनिमितमिदं स्वस्वानुरूपं देहगेहादिकमात्मसमं स्वबुद्ध्यनुरूपमेव विचक्ष्महे विद्मः ॥ ३७ ॥ ❀ ❀ मुक्त्यर्थं तु तदवतारकर्माणि शास्त्रद्वारा विद्म इत्याह अन्येऽपि यस्य परमेश्वरस्यावताराणां कर्माणि मोक्षसिद्धयेऽस्मदादयो गायन्ति तत्त्वेन साकल्येन तु यं न विदन्ति न जानन्ति गुणतः स्वरूपतश्च यत्ताभावात् तस्मैऽनंतगुणस्वरूपाय कार्त्स्न्येन ज्ञातुमशक्याय भगवते निरतिशयैश्वर्यवते केवलं नमः ॥ ३८ ॥ ❀ ❀ यस्यावतारकर्माणि गायन्तीत्युक्तं तत्र तस्य विश्वसृष्ट्यादिलीलां स्वरूपमवतारादिकञ्च संक्षिप्य दर्शयति यावदध्यायसमाप्ति स इति । स भगवान् एवं मम हृदि ध्येयतया प्रकाशमान आद्यो जगत्कारणभूतः पुरुषः प्रकृतिप्रेरकोऽजो जन्मशून्यः कल्पे कल्पे सृष्ट्याद्यवसरे आत्मा कर्ता आत्मन्यधिकरणे आत्मना करणेनात्मानं कर्मभूतं सृजति स्वयमात्मानम कुरुतेति श्रुतेः पाति रक्षां करोति संयच्छति संहरति च ॥ ३९ ॥ ❀ ❀ जगज्जन्मादिहेतुत्वेऽपि विशुद्धं वैषम्यनैर्घृण्यादिदोषरहितं तथाह भगवान् सूत्रकारः वैषम्यनैर्घृण्येन कर्मसापेक्षत्वादिति तत्प्रधानं किन्नेत्याह निर्गुणमिति । सत्वादिगुणरहितं यतो ज्ञानमिति क्षणिकविज्ञानपक्षं वारयति सत्यमिति । ननु पुरुषाधिष्ठितं प्रधानं भवतु ज्ञानशब्दवाच्यमित्यत्राह केवलमिति । तर्हि जीवत्वं किं नेत्याह प्रत्यक् सम्यगवस्थितमिति प्रत्यंचिजीवे सम्यगवस्थितं यो विज्ञाने तिष्ठन् इति श्रुतेः । एकस्य सर्वं जीवेषु वासः कथमत्राह पूर्णमिति । कालतः पूर्णत्वमाह अनाद्यन्तमिति । कालत्रयेऽपि तस्य निःसमानाधिकत्वमाह नित्यमद्वयमिति ॥ ४० ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं ज्ञानमार्गस्य दुर्ज्ञेयत्वमुक्त्वा भक्तिमार्गस्याऽप्यशक्यतामाह—यस्याऽवतारकर्माणीति । साक्षाद्भक्तिर्नास्त्येव । परम्पराभक्तिः कथमपि केनचित्कर्त्तव्या । तत्र परम्पराभक्तिमध्ये गुणकीर्त्तनमुत्तममित्यस्मदादयोऽवतारकर्माणि गायन्ति । अवतारपदेन तस्य कर्माण्यपि न जानन्तीति सूचितम् । कर्मपदेन गुणास्तु न ज्ञायन्त एव । गुणा ह्युत्कर्षाधायकाः । के वा भगवतो धर्मा भगवतः सर्वोत्तमत्वमन्यं वोत्कर्षं साधयन्तीति ज्ञानं दुर्लभम् । अवतारपदेन च शरीरेणाऽऽकृत्या वा गूढो भगवानिति कार्यज्ञानवद्भक्तिरपि सोपाधिका निरूपिता । तर्हि किमर्थं कथयन्तीत्याशङ्क्याऽऽह—गायन्तीति । गानेन सुखं जायत इतीतरगानापेक्षया भगवद्गुणगाने सुखाभिव्यक्तेरुद्दृष्टत्वात्तदेव कुर्वन्तीत्यर्थः । हिंशब्दस्त्विममेवाऽर्थमाह । तत्त्वमिदमित्थमेवंरूपम् । तथापि ज्ञानाऽ-

ज्ञानाभ्यामुपलक्षितो भगवान् कश्चिदस्तीति विनिश्चित्य मार्गद्वयेऽपि तत्र कर्त्तव्यान्तराभावान्नमनमेव कर्त्तव्यमित्याह—**तस्मा इति**। यद्यपि सर्वप्रमाणातीतस्तथापि सर्वत्र प्रसिद्धः। तत्र च नमनमेव कर्त्तव्यं नाऽन्यदिति। नमनञ्च—"**यादृशोऽसि हरे कृष्ण तादृशाय नमो नम**" इति ॥ ३७ ॥ ❀ ❀ एवं भगवतो माहात्म्यं निरूप्य पूर्वोक्तां सृष्टिमुपसंहरन् तत्त्वमुपसंहरति—**स एष इति**। योऽस्माभिर्न ज्ञायते स एवैष इदानीमस्मद्बुद्धौ स्थित्वा सर्वं करोतीति। तस्यैव स्रष्टृत्वे हेतुः **आद्य इति**। **पुरुष इति** साधनम्। **कल्पे कल्प इति** सकृत्सृष्टिर्निवारिता। **अज इति** स्वस्य सदैकरूपत्वम्। उपादानत्वं करणत्वं कर्तृत्वं स्वस्यैवेत्याह। आत्मा स्वयमेव कर्त्ता। आत्मनि स्वस्मिन्नेवाऽधिकरणे। आत्मना स्वेनैव करणेन। आत्मानं विश्वरूपं स्वयमेव कर्म। अनेनाऽन्येऽपि विभक्त्यर्था ज्ञातव्याः। न केवलमुत्पादयति। अपि तु संयच्छति मारयति। पाति रक्षति[1]। चकारौ तु भिन्नविषयत्वव्युदासकौ। यदाऽपि हरति तदा ऽप्युत्पादयति। एवमन्यस्मिन्नप्यन्यसम्बन्धनिरूपणार्थं वा। युक्तिस्त्वत्र महायोगसिद्धो बाह्यसाधनव्यतिरेकेणैव स्वेच्छया [2]बहुरूपो भवति। भगवति तु योगादिकमपि नाऽपेक्ष्यते। सर्वसामर्थ्ययुक्तं स्वरूपमेव तथाभूतं यतः ॥ ३८ ॥ ❀ ❀ ननु नाऽयं भगवन्मार्गः साधीयान्। एतदपेक्षया ज्ञानमार्ग एव ब्रह्मात्मस्वरूपभूत उत्तमः। स हि ज्ञातुं शक्यत इत्याशङ्क्य तं पक्षमनूद्य दूषयति—**विशुद्धमिति** द्वाभ्याम्—एते हि द्वादश धर्मा देहादात्मनो वैलक्षण्यप्रतिपादकाः। तैर्ज्ञातैर**हंममेत्यसद्भावं देहादौ मोहजं त्यजे**दिति फलिष्यति। तत्र देहस्त्वत्यन्तं मलिनो मलमूत्रादिपूर्णत्वादशुद्धश्च। आत्मा तु विशेषेण शुद्धः। न हि शुद्धाशुद्धयोरैक्यम्। अनेनाऽऽत्मनः संस्काराः केऽपि नाऽपेक्ष्यन्त इत्युक्तं भवति। देहे [3]कृतः संस्कारो व्यर्थ एव। अनेन प्रथमं सर्वसाधनपरित्यागः सूचितः। किञ्च। केवलोऽयमात्मा। एक एवाऽसहायः। देहस्तु पुत्रादिसर्वसहितः। आत्मनस्त्वेकत्वे ज्ञाते पुत्रादिचिन्ता दूरे गच्छति। तेन वैराग्यं सिद्धं भवति। एवं परित्यागो वैराग्यं च निरूपितम्। किञ्च। अयमात्मा ज्ञानरूपः। देहस्तु ज्ञेयः। अनेन ज्ञानार्थमपि यत्नो निराकृतः। न ह्यात्मा ज्ञेयो भवति। शास्त्राणि तु दूरात्परिचायकानि। तेन आत्मना स्वयं [4]ज्ञातानि लब्धसत्ताकानि भवन्ति। अतस्तानि प्रमाणानि स्वात्मानमेव तत्सम्बन्धात्प्रमाणमिति बोध[5]यन्त्यात्मबोधकानीत्युपचर्यन्ते। तस्मादेवम्भावे आत्मनो ज्ञाते ज्ञानार्थमपि प्रयत्नस्त्यक्तव्य इत्युक्तं भवति। किञ्च। अयमात्मा प्रत्यक् प्रत्यक्त्वेन वेद्यः। देहस्तु पराक्। अत आत्मन एवम्भावे ज्ञाते योगोऽपि व्यर्थः। तेन हि स्ववृ[6]त्तावात्मस्फूर्त्तिं कृत्वा पराक्त्वं सम्पाद्यत आत्मनः। यथा मथनेनाऽग्नेर्बाह्यत्वम्। ननु गूढं प्रकटीक्रियत इति योगोपयोगोऽस्तीत्यत आह—**सम्यगिति**। यथाऽऽत्मा वर्त्तते तथैव सम्यक्। न तु प्रकटितः। देहवैलक्षण्यं च। देहस्त्वसम्यक्। न हि यादृशोऽस्ति तादृश एव स्थापनीयः, किन्तु संस्कारैरुत्तमः कर्त्तव्यः। किञ्च। अयमात्मा अवस्थितः अचलः। तस्मात्तत्स्थिरीकरणार्थमावापोद्वापनरूपं मननं [7]न कर्त्तव्यम्। अनवस्थितस्य हि युक्त्या अवस्थापनम्। देहवैलक्षण्यं च सिद्धमेव। देहस्य सर्वथाऽनवस्थितत्वात्। अनेन नाडीशोधनादिना देहसिद्धिप्रयासोऽपि व्यर्थ इत्युक्तम्। किञ्च। अयमात्मा सत्यः सदैकरूपः। देहस्तु न तथेति स्पष्टमेव। अनेन कालान्तरे आत्मनोऽन्यथाभावो भविष्यतीति शङ्कया योगादिभिः प्रयत्नकरणं निवारितम्। किञ्च। अयमात्मा पूर्णः। देहस्तु परिच्छिन्नः। अनेनाऽऽत्मनो न्यूनतापरिहारार्थमपि यत्नो न कर्त्तव्य इति सूचितम्। स्वत एव पूर्णत्वात्। ननु पूर्णस्याऽपि सदैकरूपस्याऽप्याकाशादेरावरणनिराकरणेन विशालता सम्पाद्यते। तथाऽऽत्मनोऽप्युपाधिनिराकरणार्थं यत्नः कर्त्तव्य इत्याशङ्क्य निराकरोति—**अनाद्यन्तमिति**। यस्य ह्याद्यन्तावुत्पत्तिप्रलयौ स्तः। स हि सजातीये घटपटादौ अन्वेतीति तस्योपाधयः सम्भवन्ति। नह्यन्तःकरणं शरीरमन्यद्वा आत्मन आवरकं सम्भवति। अ[8]विकारित्वादसङ्गत्वादव्यवहार्यत्वाच्च। तस्मात्केनाऽप्यंशेन उत्पत्तिप्रलययोरभावादुपाधिनिराकरणार्थमपि न यत्नः कर्त्तव्यः। देहादयस्तु तत्प्रकाशेन भासन्ते। न तु तदुपाधयः। अत आत्मन एवम्भावेऽवगते देहनिराकरणार्थमपि प्रयत्नो व्यर्थः। ननु गुणैः क्षोभसम्भवादेवम्भावस्थित्यनुपपत्तेः सर्वदा तथास्थित्यर्थं गुणक्षोभनिराकरणाय यत्नः कर्त्तव्य इत्याशङ्क्याऽऽह—**निर्गुणमिति**। नह्यात्मनो गुणाः सन्ति। एते हि सत्त्वादयः प्रकृतेर्गुणाः। न ह्यन्यदीयैरसम्बद्धैरात्मनः क्षोभो भवितुमर्हति। तस्मात्तदर्थमपि न यत्नः कर्त्तव्यः। किञ्च। 'एतादृशस्वभाव[9][10] आत्मा सर्वदा न तु कदाचिदित्याह—**नित्यमिति**। यावन्त आत्मनो धर्मा निरूपिताः परिचायकत्वेन तैः सहित आत्मा नित्यो न तु ते तत्रोत्पाद्यन्ते। तस्मात्तादृशत्वसिद्ध्यर्थमपि न यत्नः। किञ्च। यद्ययमात्मा [11]अनानन्दमयो भवेत्तदा भगवत्सायुज्यं ब्रह्मता वा सम्पादनीया स्यात्। किन्त्वयमेव ब्रह्म भगवानिति। "**अयमात्मा ब्रह्म विज्ञानमयः**" इति श्रुतेः। "**अहमात्मा गुडाकेश**" इति च। तस्माद्भगवत्सायुज्यार्थं ब्रह्मभावार्थं वा न यत्नः कर्त्तव्य इत्याह—**अद्वयमिति**। न ह्यात्माद्वयरूपः। पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि। "**मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती**"ति। "**अन्योऽसावन्योऽहमस्मी**"ति निन्दाश्रवणात्। नह्यात्मनि नानात्वमस्ति। वैलक्षण्यं तु दूरे। [12]सर्वत्र चैकरूपः सर्वत्राऽक्षोभ्यः सर्वत्रोत्पत्ति-

---

१. रक्षति चेति घ. ङ.। २. तावद्रुप इति क. ग. च. तद्रुप इति घ.। ३. देहकृत इति क. ख.। ४. ज्ञाता लब्धसत्ताका इति पुम्प्रयोगः क. ग. घ. ङ.। ५. बोधयन्त इति घ. ङ.। ६. स्ववृत्तौ वा इति ग. घ. ङ.। ७. नकारो नास्ति ग. घ. ङ.। ८. अधिकारित्वादिति घ. ङ.। ९. एतादृशः इति क.। १०. स्वभावात्मेति क. घ.। ११. नाऽऽनन्दमय इति ग.। १२. सर्वत्र स चैकरूप इत्यादि ग.।

विनाशधर्मरहितः सर्वत्र परिच्छेदरहितः सर्वत्रैकरूपः सर्वत्र निश्चलः सर्वत्र समीचीनः सर्वत्र प्रत्यक्स्फूर्तिरूपः सर्वत्र ज्ञानरूपः सर्वत्राऽसङ्गोदासीनः शुद्धश्चेति परिचायकप्रकारेणाऽऽत्मन्यवगते कृतार्थो भवति। न किञ्चित्कृत्यमिति ॥ ३९ ॥ ❀ ❀ एवमात्मज्ञानमार्गं निरूप्य तं पक्षं दूषयति—ऋष इति। हे ऋषे नारद। त्वं हि मन्त्रद्रष्टा सर्वसिद्धान्तं जानासि। किमेतावता आत्मा एतादृश इति। प्रतीयमानस्याऽनर्थस्य निवृत्तिरपेक्ष्यते। यद्यात्मन्येतादृशेऽपि संसारः[1] स्यात्तदा अनिर्मोक्षः। भ्रमात्प्रतीतावपि भ्रमो निवर्त्तनीयः। एवं भावज्ञानादेव निवर्त्तनपक्षेऽपि ज्ञानं प्रमाणतः सम्पादनीयम्। तत्प्रमाणं वेदो भवितुं नाऽर्हति। बहुवादिविप्रतिपन्नत्वात्। किन्तु प्रमाणसहितं योगयुक्तं मन एवाऽऽत्मनस्तथात्वं बोधयति। तं पक्षमङ्गीकृत्य दूषयति। मुनयः यदा[2] मननशीलाः। प्रशान्त[3] आत्मा इन्द्रियाणि च येषाम्। शुद्धान्तःकरणा जितेन्द्रियाः तैर्मनने क्रियमाण ए[4]वाऽऽत्मा भासते। तदेव गुणस्वरूपमसत्तर्कैः कुयुक्तिभिर्विप्लुतं सत्तिरोभूयेत तिरोभावं प्राप्नुयात्। सर्वदा एतादृश आत्मानुसन्धाने कदाचिदपि संसारस्फूर्त्तिर्न स्यात्। तथात्वे वा संसारस्फूर्त्तावनिर्मोक्षप्रसङ्गः शास्त्रवैफल्यञ्च। तस्माद्दृष्टानुपपत्त्या एतदभ्युपगन्तव्यम्। ये मुनयः प्रशान्तात्मेन्द्रियाशयास्तेषामात्मा तथाविधः स्फुरति तदा न संसारः। अन्यान्प्रति न स्फुरति तदा तेषां संसार इति। एवमपरोक्षकथापरोक्षकथायामपि प्रमाणेन वेदादिना सत्तर्कसहितेन तत्स्फुरत्यसत्तर्कैर्विप्लुतं सत्तिरोभवतीति। अतः परमेतन्नियमनार्थं किञ्चिदङ्गीकर्त्तव्यम्। यस्मिन् क्रियमाणे असत्तर्कादिकमप्यभिभूय ज्ञानमुदेतीति प्रशमादयस्तु प्रथमतो न सम्भवन्ति। तेषां साधनाभावात्। साधनाऽभावेऽपि यदि जायेरंस्तदा सर्वदैव स्युः। तस्मात्तादृशमेकं साधनं वक्तव्यं यदव्यभिचारि भवति। भक्तिश्चोक्तमात्मनिरूपणेन। भक्तेः स्वातन्त्र्येणैव मोक्षदानात्। भगवतस्तादृशस्या[5]ऽऽत्मत्वाच्च। अतो भक्तिरहितः स मार्गो न सिद्ध्यति। भक्तौ च जातायां किं तेन मार्गेण ? अत उभयथाऽप्यप्रयोजकं तत्। तस्माद्भगवतस्तदेकं रूपमात्मभूतमिति भगवन्माहात्म्यमेतत्। विभूतिर्वा तस्माद्बालानां हस्ताग्रे चन्द्रबुद्धिवदात्मबुद्धिरिति न तच्छ्रवणमात्रेण कार्यसिद्धिरिति भावः ॥ ४० ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

यस्यावतारेत्यत्र तस्येति मूलरूपस्य पुरुषोत्तमस्य। एवं श्लोकत्रयेणेदं सिद्धम्, ज्ञानभक्ती दुर्लभे, केवलं दैन्यमेव तोषसाधनमिति तेन भगवद्विचारानुरूपा जीवाभीष्टसिद्धिरिति नमनमेव कर्त्तव्यमिति ॥ ३७ ॥ ❀ ❀ स एष इत्यत्र अन्यस्मिन्नित्यादि, उत्पादकेपि मारकेपि स्थापकत्वमेवं निरूपणमित्यर्थः। तथाभूतमिति साधनभूतम्। तथा च, वस्तुस्वभाव एव युक्तिरित्यर्थः। एवं विरुद्धधर्माश्रयत्वनिगमनेन माहात्म्यं भगवतो निरूपितम् ॥ ३८ ॥ ❀ ❀ विशुद्धमित्यत्र ब्रह्मात्मस्वरूपभूत इति, ब्रह्म आत्मनः स्वरूपभूतं यत्र तादृश इत्यर्थः। फलिष्यतीति, तथा चैवं फलिते ज्ञाते स्वाश्रया मुक्तिः सिद्धैवेति सुगममुपायमपहाय दुर्गमो भगवन्मार्गः किमर्थमन्वेषणीयः इत्यर्थः। एतस्य प्रतिपत्तिसाधनाभ्यां सुकरत्वं व्याख्यानेन व्युत्पादयन्ति तत्रेत्यादि। ज्ञानार्थमिति आत्मज्ञानार्थम्। ननु ज्ञानार्थप्रयत्नवैयर्थ्याङ्गीकारे शास्त्रेष्वात्मबोधकत्वप्रसिद्धिर्व्याहन्येतेत्यत आहुः शास्त्राणीत्यादि। त्यक्तव्य इति। तथा च, कपिलादिवत्सिद्धतया स्थातव्यमित्यर्थः। 'प्रत्यक्' 'सम्यगिति' विशेषणद्वयेन योगपक्षं निराचक्षते किञ्चेत्यादि। न हीत्यादि। एतेनेदं बोधितम्। इयं देहस्यासम्यक्त्वापराक्त्वप्रयुक्ता, तथा सति, स्ववृत्तावात्मस्फोरणेनात्मनि पराक्त्वसम्पादकस्य योगस्याप्यात्मन्यसम्यक्त्वसम्पादकत्वमेवेति तस्याप्यनुपयोग इत्यर्थः। अवस्थितमिति विशेषणेन श्रौतं साधनं मननात्मकं निराचक्षते। किञ्चेत्यादि। एतस्य प्रवृत्तोपयोगमाहुः देहेत्यादि। तात्त्विकोपाधिवादिमतीयसाधननिराकरणायाहुः ननु पूर्णेत्यादि। ननूक्तं आकाशस्येव सम्भवतीत्याकाङ्क्षायां तद्वैलक्षण्यायोक्तविशेषणसूचितं हेतुत्रयमाहुः अविकारित्वादित्यादि। आकाशो हि शब्दरूपेण विक्रियते इति तेन रूपेणाद्यन्तवान्, आत्मा तु 'अविनाशी वा अरे अयमात्मे' तिश्रुतेस्तद्विलक्षणः। अर्द्धवैनाशिकमते यद्यपि विकारो नाङ्गीक्रियते, तथापि, घटाद्यवयवकर्मजसंयोगोङ्गीक्रियते इति संयोगात्मकः सङ्गस्त्वस्ति, आत्मा 'त्वसङ्गोह्ययं पुरुष' इति श्रुतेः सङ्गराहित्यात्तद्विलक्षणः। यन्मते संयोगः स्पर्शभेदस्तन्मते आकाशे तदभावेप्यवकाशरूपेण व्यवहार्यत्वमस्त्येव। आत्मा तु 'यन्न स्पृशन्ति न विदुरि' तिवाक्याद्दुर्ज्ञेयत्वेनाव्यवहार्य इति तद्विलक्षण इत्यर्थः। केनाप्यंशेनेति, विकारांशेन कार्यांशेन व्यवहारांशेन चेत्यर्थः। ननु तर्हि देहादीनामुपाधित्वप्रसिद्धिः कथमित्यत आहुः देहादय इत्यादि। तथा च, तत्प्रकाश्यतया तेषु तथा व्यवहार इत्यर्थः। यावन्त इत्यादि। तथा च, पूर्वं स्वरूपनित्यत्वं सत्पदेनोक्तम्। इदानीं 'मनुच्छित्तिधर्मे' त्यादिश्रुत्यनुसारेण धर्मनित्यत्वमुच्यत इत्यर्थः। ब्रह्मत्वोपपादनाय भगवानित्युक्तम्। तत्र कथं भगवानित्यपेक्षायां श्रुतिगीतावाक्यं चोच्यते। तत्र श्रुतौ 'विज्ञानमय' इति ब्रह्मत्वोपपादकम्, गीतावाक्ये च 'सर्वभूताशयस्थित' इत्यन्तः स्थितिर्भगवत्त्वोपपादिका, 'उत्तमः पुरुषस्त्वन्य' इति पुरुषोत्तमलक्षणवाक्ये 'यो लोकत्रयमाविश्य बिभर्ती' तिलक्षणत्वे कथनादित्याशयेनाहुः अयमात्मेत्यादि। इदञ्च साङ्ख्याभिमतमिति ज्ञापन्तयाहुः

१. यदि संसार इति ग. घ. ङ.। २. सदेति ग.। ३. प्रशान्ता इति क. ख. घ.। ४. एवमात्मेति क. ख.। ५. आत्मतत्त्वाच्चेति क. घ. ङ.।

पुरुषेश्वरयोरित्यादि । एतान् द्वादशानपि धर्मान्निगमयितुं प्रातिलोम्येन वदन्तः अद्वयत्वस्य व्याख्यातत्वेन नैकल्यानित्यत्वादीनामर्थं स्मारयन्ति सर्वत्रेत्यादि ॥ ३९ ॥ ❀ ❀ ऋषय इत्यत्र दूषयतीति अभ्युपगम्य दूषयतीत्यर्थः । तदेव स्फुटीकुर्वन्ति किन्तावतेत्यादिना । भ्रमो निवर्त्तनीय इति । तथा च, तन्निवृतेर्विशेषदर्शनसापेक्षत्वेन तदर्थं यत्ने अवश्यं कार्ये आगत एव ज्ञानार्थं प्रयास इत्यात्मश्रवणमात्राज्ज्ञानमिति पक्षो न युक्त इत्यर्थः । मननपक्षं मनसि निधाय योगपक्षं दूषयितुमुपक्षिपति एवमित्यादि । क्रियमाण इति मनने क्रियमाणे तदेव गुणस्वरूपमिति मननसाधितं गुणात्मकवृत्तिस्वरूपम् । एतत्तिरोधायकयुक्तीराहुः सर्वदेत्यादि । तस्मादिति । एतद्दूषणपरिहारस्यावश्यकत्वात् । व्यवस्थायामिष्टापादने दोषमाहुः एवमित्यादि । तिरोभवतीति स्फुरितमपि तादृशरूपं साधनदौर्बल्यात् प्रतिहन्यमानं तिरोभवतीति पुनः संसारपात इत्यर्थः । अतः परमेतन्नियमनार्थमिति साधनदौर्बल्यानुसन्धानोत्तरमसत्तर्ककृतप्रतिघातवारणार्थम् । साधनाभावादिति नित्यानित्यवस्तुविवेकवैराग्याद्यभावात् । कृतमात्मनिरूपणेनेति व्यर्थं तदित्यर्थः, तृतीयान्तसहितः कृतशब्दः समभिव्याहृतवैयर्थ्यबोधकतया लोके प्रसिद्धः । तस्मादिति साधनासम्भवेन ज्ञानस्य दौर्घट्यात् । अत इति तर्कविप्लुतत्वात् । अत इति आवश्यकत्वाभावात् । ननु यद्येवं तदा 'यमात्मा ब्रह्म' त्यादावात्मनो ब्रह्मत्वम्, गीतायां च स्वस्य सर्वात्मत्वं यदुच्यते तस्य विरोधः कथं निवर्त्तेत इत्यत आहुः तस्मादित्यादि । तस्य मतस्याप्रयोजकत्वेपि विरोधपरिहारस्यावश्यकत्वाच्छारीरब्राह्मणस्थश्रुतावुक्तं भगवत एकं रूपं भोक्तृभूतमिति विरुद्धधर्माधारत्वारूपमाहात्म्यबोधनायोच्यते गीतायां प्रश्नानुरोधाद्विभूतिरूपं तदर्थमुच्यत इति तेन चन्द्रदृष्टान्तन्यायेन परोक्षज्ञानस्यैवोत्पादनाय तथा कथनमतो न विरोध इत्यर्थः ॥ ४० ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

ननु तर्ह्यधिकारिणामपि युष्मदादीना कथं विमुक्तिरित्याशङ्क्य परमार्थतस्तज्ज्ञानाभावेऽपि तद्गुणश्रवणकीर्तनादिभक्त्या संसारविमुक्तिः स्यादेवेति स्वाशयं द्योतयन् भगवन्तं प्रणमति—यस्येति । यस्यावतारांस्तत्कर्माणि चरितानि चास्मदादयो गायन्ति यं च तत्त्वेन परमार्थस्वरूपेण न विदन्ति न जानन्ति तस्मै भगवते नम इत्यन्वयः । गानं चास्मदादिकृतं प्रसिद्धमेव नात्र सन्देह इति सूचयन्नाह—हीति ॥ ३७ ॥ ❀ ❀ संक्षेपतोऽवतारकर्माणि दर्शयति—स एष पूर्वोक्त आद्यः पुरुषो भगवान् आत्मना स्वरूपेणैव साधनभूतेन आत्मन्येवाधिकरणे आत्मा स्वयमेव कर्त्ता सन्नात्मानमेव कर्मभूतं जगदाकारेण कल्पे सृजति जगदाकारं पाति च संयच्छति अन्ते संहरति चेत्यन्वयः । जगज्जनकत्वेन तस्याद्यत्वेऽपि तस्य जन्मान्यतो भवति न वेत्यपेक्षायामाह—अज इति ॥ ३८ ॥ ❀ ❀ इदमित्थन्तया भगवत्तत्त्वज्ञानं मा भवतु परन्तु यथा कथञ्चित् ज्ञानं तु भवतोऽप्यस्त्येव तद्भवतस्तत्त्वं कीदृशं सम्मतमित्यपेक्षायामाह—विशुद्धमिति । विशुद्धं ज्ञानं भगवतस्तत्त्वम् । कथं तस्य विशुद्धिरित्यपेक्षायामाह—केवलमिति । केवलत्वमेव स्पष्टयति—निर्गुणमिति, प्राकृतगुणवश्यत्वरहितमित्यर्थः । असौ क्वास्तीत्यपेक्षायामाह—प्रत्यगिति, सर्वान्तरमित्यर्थः । तर्हि तस्य विकारित्वं स्यादित्याशङ्क्याह—नित्यमिति, सर्वदैव विद्यमानमित्यर्थः । तथापि किं मिथ्येत्याशङ्क्याह—सत्यमिति । एतदेव स्पष्टयति—सम्यगवस्थितमिति, कालत्रये बाधादिविकाराहित्येनावस्थितमित्यर्थः । विकारराहित्यमेव स्पष्टयति—अनाद्यन्तमिति, जन्मविनाशरहितमित्यर्थः । अतएव जन्मान्तरास्तित्वलक्षणोऽपि विकारो नास्तीति ज्ञेयम् । परिच्छिन्नत्ववृद्धिविपरिणामापक्षयलक्षणाश्च विकारा न सन्ति । तत्र हेतुमाह—पूर्णमिति । तत्र हेतुमाह—अद्वयमिति । देशकालादिसर्वमूलकारणतया तद्व्यतिरेकस्यैवाभावादित्यर्थः ॥ ३९ ॥ ❀ ❀ एतत्तत्त्वज्ञानं केषां भवतीत्याकाङ्क्षायामाह—ऋषे इति । सम्बोधनेन तवाप्येतज्ज्ञानं न दुर्लभमिति सूचयति । तदा प्रशान्तात्मेन्द्रियाशयाः वशीकृतदेहेन्द्रियमनसो मुनयो मननशीलाश्च भवन्ति तदैवैतत्तत्त्वं विदन्ति जानन्ति । यदा तु तदेव तत्त्वमसतां भगवद्विमुखानां वेदविरोधिभिः कुतर्कैर्विप्लुतं व्याप्तं भवति तदा तिरोधीयेत तिरोहितं भवति, न प्रकाशते इत्यर्थः ॥ ४० ॥

## हिन्दी अनुवाद

हमलोग केवल जिनके अवतारकी लीलाओंका गान ही करते रहते हैं, उनके तत्त्वको नहीं जानते—उन भगवान्‌के श्रीचरणोंमें मैं नमस्कार करता हूँ ॥ ३७ ॥ ❀ ❀ वे अजन्मा एवं पुरुषोत्तम हैं । प्रत्येक कल्पमें वे स्वयं अपने आपमें अपने आपकी ही सृष्टि करते हैं, रक्षा करते हैं और संहार कर लेते हैं ॥ ३८ ॥ ❀ ❀ वे मायाके लेशसे रहित, केवल ज्ञानस्वरूप है और अन्तरात्माके रूपमें एकरस स्थित हैं । वे तीनों कालमें सत्य एवं परिपूर्ण हैं; न उनका आदि है न अन्त । वे तीनों गुणोंसे रहित, सनातन एवं अद्वितीय हैं ॥ ३९ ॥ ❀ ❀ नारद ! महात्मालोग जिस समय अपने अन्तःकरण, इन्द्रिय और शरीरको शान्त कर लेते हैं, उस समय उनका साक्षात्कार करते हैं । परंतु जब असत्पुरुषोंके द्वारा कुतर्कोंका जाल बिछाकर उनको ढक दिया जाता है, तब उनके दर्शन नहीं हो पाते ॥ ४० ॥

आद्योऽवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च ।
द्रव्यं विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः ॥४१॥
अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च ।
स्वर्लोकपालाः खगलोकपाला नृलोकपालास्तललोकपालाः ॥४२॥
गन्धर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः ।
ये वा ऋषीणामृषभाः[1] पितॄणां दैत्येन्द्रसिद्धेश्वरदानवेन्द्राः ।
अन्ये च ये प्रेतपिशाचभूतकूष्माण्डयादोमृगपक्ष्यधीशाः ॥४३॥
यत्किंच लोके भगवन्महस्वदोजःसहस्वद् बलवत् क्षमावत् ।
श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवदस्वरूपम् ॥४४॥
प्राधान्यतो यानृष आमनन्ति लीलावतारान् पुरुषस्य भूम्नः ।
आपीयतां कर्णकषायशोषाननुक्रमिष्ये त इमान् सुपेशान् ॥४५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
द्वितीयस्कन्धे [2]षष्ठोऽध्यायः ।

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

कल्पे कल्पे आत्मानं सृजतीत्युक्तं के तेऽस्य सृज्यमाना अवतारास्तानवतारान् विस्तरेणाह । आद्य इत्यादि यावत्समाप्ति । परस्य भूम्नः पुरुषः प्रकृतिप्रवर्तकः यस्य सहस्रशीर्षेत्युक्तो लीलाविग्रहः स आद्योऽवतारः । लक्ष्यति हि । भूतैर्यदा पञ्चभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् । स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः । यथोक्तम् । विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः । प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् । तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते ॥ इति । यद्यपि सर्वेषामविशेषेणावतारत्वमुच्यते तथापि कालश्च स्वभावश्च सदसदिति कार्यकारणात्मिका प्रकृतिश्चैताः शक्तय मनआदीनि कार्याणि ब्रह्मादयो गुणावताराः दक्षादयो विभूतयः इति विवेक्तव्यम् । मनो महत्तत्वं द्रव्यं महाभूतानि । क्रमोऽत्र न विवक्षितः । विकारोऽहङ्कारः । गुणः सत्वादिः । विराट् समष्टिशरीरं स्वराट् वैराजः स्थास्नु स्थावरं चरिष्णु जंगमं च व्यष्टिशरीरम् ॥ ४१ ॥ ❀ ❀ अहं ब्रह्मा भवो रुद्रः यज्ञो विष्णुः दक्षादयो य इमे प्रजेशाः तललोकपालाः पातालाधिपतयः ॥ ४२ ॥ ❀ ❀ गंधर्वादीनामीशाः यक्षादीनां नाथाः । रक्षोरगेति संधिरार्षः । ऋषीणां पितॄणां च श्रेष्ठाः प्रेतादीनामधीशाः ॥ ४३ ॥ ❀ ❀ किं बहुना यत्किंचिद्भगवदादि तत्सर्वं परमेव तत्त्वमित्यन्वयः । भगवदैश्वर्ययुक्तं महस्वत्तेजोयुक्तम् ओजःसहसी इंद्रियमनःशक्ती तद्युक्तं बलं दाक्ष्यं श्रीः शोभा ह्रीरकर्मजुगुप्सा विभूतिः संपत्तिः आत्मा बुद्धिस्तद्युक्तमर्णो वर्णः अद्भुतार्णमाश्चर्यवर्णमित्यर्थः । रूपमेव स्वरूपं रूपवत्प्रशस्तरूपयुक्तम् । स्वरूपं यत्तत्सर्वं परं च तत्त्वं तद्विभूतिरित्यर्थः ॥ ४४ ॥ ❀ ❀ शुद्धसत्त्वावतारान्वक्तुमाह । प्राधान्यत इति । असत्कथाश्रवणैर्ये कर्णयोः कषाया मलास्तान् शोषयंतीति तथा तान् । सुपेशान् सुंदरान् । सकारलोपश्चार्षः । हे ऋषे ते तुभ्यमनुक्रमिष्ये तदनुक्रमेणामृतं त्वया पीयतामित्यर्थः । यद्वा पीयतामिति शत्रंतम् । आपिबता कर्णकषायशोषानित्यर्थः ॥ ४५ ॥

इति श्रीमद्भागवते द्वितीयस्कंधे टीकायां षष्ठोऽध्यायः

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

'स एष आद्य पुरुषः' इत्येकेन श्लोकेनोक्तं पुरुषावतारं तत्कर्म च विवृणोति सार्धैः चतुर्भिः । परस्य परव्योमाधिनाथस्य भगवत आद्यः प्रथमोऽवतारः पुरुषः प्रकृतीक्षणकर्ता कारणार्णवशायी । 'जगृहे पौरुषं रूपं भगवान्' इति प्रथमोक्तेः । कालस्वभावादयश्च तस्य कर्मोच्यते । कल्पे कल्पे सृजत्यजः । आत्मात्मन्यात्मनात्मानम् । इत्युक्तेः । स एकोऽपि मायाशक्त्या नाना भवेदित्यर्थः । सदसत्कार्यकारणात्मकं सर्वं विश्वमेव तदेव विवृणोति मन इत्यादि । क्रमोऽत्र न विवक्षितः ॥ ४१ ॥ ४२ ॥ ४३ ॥ ❀ ❀ रूपवत्साकारमस्मदादिपरम् अरूपवन्निराकारं कालादिकं चेति द्विविधं भगवद्रूपमपि अस्वरूपं न भगवतः स्वरूपं तस्य स्वरूपशक्तिविलासत्वाभावादित्यर्थः । एवं कालादीनां पुरुषावतारस्य कर्मरूपत्वेपि ते शक्तयः ब्रह्मादयो गुणावताराः प्रजापत्यादयो

---

१. प्रा० पा०—मृषयः । २. प्राचीने पाठे इतः पूर्वं 'पुरुषसंस्थानुवर्णनमिति' पाठाधिक्यम् ।

विभूतयोऽन्ये केचिज्ज्ञानिनो योगिनः कर्मिणो मूढाश्च स्थावरजंगमाश्च सर्वे पुरुषावतारस्य सृष्ट्यादिलीलापरिकरा ज्ञेया इति विश्वनाथः । परस्य भूम्नस्स्वरूपेण शक्त्या सर्वातिशायिनः अवतारः प्राकृतवैभवे स्वेच्छयाविर्भावः कालादयः परमेव तत्त्वमिति सार्द्धैश्चतुर्भिरन्वयः । यज्ञस्य साक्षादवतारत्वेन ब्रह्मभवयोरावेशावतारत्वेनान्येषां शक्तितत्कार्यरूपत्वेन तदवतारतारत्वमिति संदर्भः ॥ ४४ ॥ ❀ ❀ सुपेशश्शब्दे सलोपश्चार्ष इत्यर्थः । केचित्तु ललोपमार्षमाहुस्तन्मते सुपेशलशब्दोऽस्तीत्यर्थः । हे ऋष इति । तवर्षित्वसंपादनायैव तुभ्यं वदामि त्रिकालज्ञस्यैवर्षिशब्दवाच्यत्वप्रसिद्धेरिति भावः । इत्यर्थ इति । पा पाने इत्यस्मात्कर्मणि लोट् संभवत्वादन्यदप्याह । यद्वेति । पीङ् पाने इति दैवादिकाच्छतृप्रत्यय आर्ष इत्यर्थ इत्यस्यायं भावः । संदर्भः किं बहुना एतदर्थमेवास्य महापुराणस्याविर्भाव इति । 'भवतानुदितप्रायं यशो भगवतोमलम्' इत्यादौ 'समाधिनानुस्मर तद्विचेष्टितम्' इत्यादौ च दर्शितम् । सा च भगवतो लीला द्विविधा सृष्ट्यादिरूपा लीला विनोदरूपा च तयोरुत्तरा तु प्रशस्ततरेत्याशयेनाह । प्राधान्यतो यान्नृष इति । यद्यपि पूर्वम् 'आद्योवतारः पुरुषः परस्य' इत्यादिग्रंथेन पुरुषं कालादितच्छक्ति मनआदि तत्कार्यं ब्रह्मादि तद्गुणावतारान् दक्षादितद्विभूतीश्चोक्तवानस्मि तेन च सृष्ट्यादिलीलास्तथापि यान् हे ऋषे पुरुषस्य भूम्नो लीलावतारान् प्राधान्येनामनंति तानेव ते इमान्मम हृदयाधिरूढान् कर्णकषायशोषान् तदितरश्रवणरागहंतॄन् किञ्च सुपेशान् परममनोहरान् अनुक्रमिष्ये तदनुक्रमणं सम्यक्पीयताम् ॥ ४५ ॥

इति श्रीभागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कंधे षष्ठोऽध्यायः ॥ ६ ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

विप्लुतं व्याप्तमित्यर्थः ॥ ४१ ॥ ❀ ❀ भूतैर्यदेति । एकादशस्कन्धीयचतुर्थाध्यायस्य तृतीयश्लोकः । विष्णोस्तु त्रीणि रूपाणीति सात्वततन्त्रवचनमिति तृतीयस्कन्धीयपञ्चमाध्यायस्य सप्तविंशश्लोकटीकायां स्वामी ॥ ४२ ॥ ४३ ॥ ❀ ❀ दैत्येन्द्रो दैत्यानां प्रधानः । दानवेन्द्रा दनुनाम्नि दक्षकन्यायां कश्यपाज्जाता एकषष्टिसंख्याका असुराः तेषु प्रधानाद्विमूर्धादयो ह्यष्टादश ते । प्रेतपिशाचादयो भूतजातिभेदाः तत्पिशाचेशा घण्टाकर्णादयो भूतेशा भैरवादयः कूष्माण्डेशा भृङ्ग्यादयो यदांसि जलजन्तवः तदधीशास्तिमिङ्गिलादयः ॥ ४४-४५ ॥

## श्रीमद्वीरराघवव्याख्या

अथावतारास्तत्कर्माणि च विवक्षुरादिममवतारमाह आद्य इति । पुरुषो विराट् पुरुषः परस्य विष्णो राद्योऽवतार इत्यर्थः । आद्यत्वं मत्स्यकूर्माद्यपेक्षया । अस्य विभूतीराह काल इत्यादिभिः । कालादयो रूपवतः स्वरूपमित्युत्तरेणान्वयः । रूपवतोऽकर्मकृतरूपस्य स्वरूपं स्वीयं रूपं शरीरं कालादयस्तन्नियाम्यं वर्गरूपविभूतिरिति परं तत्वं कालादीनां परं याथात्म्यमित्यर्थः । स्वभावः प्रकृतिगतपरिणामस्वभावः सदसच्चेतनमचेतनं स्थूलं सूक्ष्मं वा द्रव्यं पृथिव्यादिविकारो महदहंकारादिर्गुणः सत्वादिरिन्द्रियाणि ज्ञानकर्मात्मकानि विराडंतरिक्षं स्वराट् स्वर्गोऽयं लोकस्तु वै सम्राडंतरिक्षं विराट्स्मृतं स्वराडसौ स्मृतो लोक इत्युक्तेः स्थाष्णु स्थावरं चरिष्णु जङ्गमं भूम्नो भूमवतो भगवतः ॥ ४१ ॥ ❀ ❀ किं बहुनां संक्षेपेण शृण्वित्याह-अहमिति । अहं ब्रह्मा भवो रुद्रो यज्ञो विष्णुः यद्यप्ययं विभूतिमध्ये पठितस्तथापि न विभूतिरर्थान्तराभावात् । पालनाधिकृतविष्ण्ववतारगतपालना तु गुणं यत्सामर्थ्यं तस्य विभूतित्वद्योतनाय यज्ञोऽपि विभूतिषु पठितो विभूतित्वं नाम नियाम्यत्वं सर्वभूतानां प्रवर्तनरूपं नियमनमात्मतयाऽवस्थानात् । आत्मा हि नाम शरीरस्य सर्वात्माऽऽधारो नियंता शेषी च भगवतः स्वविभूतिभूतेषु सर्वेष्वात्मतयाऽवस्थानमेव क्वचित्तच्छन्दसामानाधिकरण्यनिर्देशहेतुर्भगवत्यात्मतयाऽवस्थिते हि सर्वे शब्दाः तस्मिन्नेव पर्यवस्यन्ति यथा देवमनुष्यपक्षिवृक्षादयः शब्दाः शरीराणि प्रतिपादयन्तस्तत्तदात्मनि पर्यवस्यन्ति दक्षादयो ये इमे प्रजेशा भवदादयो नारदप्रभृतयः सनकादयः स्वर्गलोकपालाः पक्षिश्रेष्ठाः तललोकपालाः पातालेश्वराः ॥ ४२ ॥ ❀ ❀ गन्धर्वादीनामीशा उरगाः सर्पा नागा गजाः, यक्षादीनां ये नाथाः रक्षो रगेति सन्धिरार्षः । ऋषीणां पितॄणां ये श्रेष्ठाः, दैत्या दितिपुत्राः तेषामिन्द्राः ॥ ४३ ॥ ❀ ❀ अन्ये च ये प्रेतादीनामधीशाः ॥ ४४ ॥ ❀ ❀ किं बहुना यदिति । यत्किञ्चिद् भगवदादि तत्सर्वं रूपवतः स्वरूपमित्यन्वयः । भगवदैश्वर्यवन्महस्वत्तेजस्वदोजस्वदुत्साहवत्सहस्वद्वेगवद्धैर्यवद् बलवद् धारणसामर्थ्यवत् क्षमावत्सहनवत् श्रीः शोभा ह्रीर्लज्जा विभूतिर्नियाम्यवर्गः आत्मा बुद्धिस्तद्युक्तमद्भुतार्णमद्भुतशब्दवाच्यं एतत्सर्वं रूपवतः प्रशंसायामतुम् । अकर्मकृत् । स्वेच्छोपात्तदिव्यमङ्गलास्पदविग्रहस्य भगवतो विराट्पुरुषस्य स्वीया विभूतिरित्यर्थः । अवताराणामानन्त्यात्तत्र प्रसिद्धान्वक्ष्यामीत्याह प्राधान्यत इति । असत्कथाश्रवणैर्ये कर्णयोः कषायाः तान्शोषयन्तीति तथा तान्सुपेशान्सुन्दरान् हे ऋषे, वदन्ति मुनय इति शेषः । ऋषय इति पाठे ऋषयो वदन्तीत्यन्वयः । तान्ते तुभ्यमनुक्रमिष्ये क्रमेण वर्णयिष्यामि तदनुक्रमेणामृतं त्वया आपीयतां यद्वा आपीयतामिति शत्रन्तमापिबतां कर्णकषायशोषानित्यर्थः ॥ ४५ ॥

इति श्रीमद्भागवतमहापुराणे द्वितीये स्कन्धे वीरराघवकृतटीकायां षष्ठोऽध्यायः

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

तत्र प्रथमावतारः क इत्याशंक्य तमाह आद्य इति । परस्य परायणस्य हरेराद्योऽवतार पुरुष इति वदंतीति शेषः । प्रलयोदके शयानो महाकृतिर्नराणामाश्रयत्वेन नारायणः शून्यनामाभूत् सिसृक्षोस्तस्य द्वीपाद्द्विपांतरं यथा तथा द्वितीयं रूपमभूत तत्तत्त्वविदो जनास्तद्रूपं नाम्ना पुरुष इतिसम्बध्यते–ते स पुरुषः प्रकृतिनाम्न्या रमाया द्वितीये रूपे स्ववीर्यमाधत्त तस्माद्वीर्यान्नाम्ना महानभूत् यं हिरण्यगर्भः पुरुष इति च संगिरंते तत्पत्नीश्रद्धेति तौ प्रलये स्थूलशरीररहितत्वाद् विश्लिष्टौ पुरुषादेहं प्राप्य संयोगं[३] कृत्वा जगदंकुरं महत्तत्त्वं पुनरुद्भावयतां स्वस्यैव पुत्रतां यातान्महतत्त्वादहंतमजीजनदितीतिहासमाचक्षते यः शेते प्रलये विष्णुशून्यनामा महाकृतिरित्यादिवाक्यसिद्धं सन्निधानविशेषाधिष्ठानत्वादंशत्वं ब्रह्मादीनां न साक्षादितीममर्थं स्पष्टमाह काल इत्यादिना । यद्यत्कालाद्यद्भुतार्णीतं तत्परं विशिष्टं सर्वं नारायणस्य रूपवत्प्रतिमावदधिष्ठानं तत्प्रीतिहेतुत्वात्स्वतोऽस्वरूपं प्राकृतत्वात्पुरुषाद्या हरेरूपं ब्रह्माद्यास्तत्प्रियाः स्मृताः प्रधानत्वेन सर्वस्मान्मत्स्यकूर्मादयो हरेः अवताराः श्रुतौ ख्याताः स एवैते ततः स्मृता इत्यादेः कालः परमाण्वादिपरमहदेतः, स्वभावो वस्तुभावः सत्प्राणः असत् सूक्ष्मत्वान्मूलप्रकृतिः मनोमनस्तत्त्वं कालो वस्तुस्वभावश्च प्रकृतिः प्राण एव चेत्यादेः सदिति प्राण इति श्रुतेश्च द्रव्यं पंचभूतानि विकारोंऽहं गुणः सत्त्वादिः विराट्गरुडः स्वराडिंद्रः द्रव्यं तु पंचभूतानि विकारोंऽहमुदाहृतं विराजं गरुडं प्राहुः स्वराडिंद्रं उदाहृतं इति च स्थास्नु चरिष्णु स्थावरं जंगमं च भूम्ने इत्यनेन स्थावरादिव्यापित्वं युक्तमित्याह ॥ ४१ ॥ ❀ ❀ अहमिति अहं चतुर्मुखः भवः शर्वः यज्ञो यज्ञाभिमानी रुद्रश्छिन्नः यज्ञशब्दोदितौ द्वौ तु देवौ लोकपुरस्कृतावित्यादेः भवदादयः परमहंसाः स्वर्लोकपाला इंद्रादयः खगलोकपाला गरुडादयः नृलोकपालाः प्रियव्रतादयः तललोकपालाः अनंतबल्यादयः ॥ ४२ ॥ ❀ ❀ गंधर्वेशा विश्वावस्वादयः चारणेशाः पुष्पदंतादयः यक्षनायकाः कुबेरादयः रक्षोनाथा निऋत्यादयः उरगनाथा वासुक्यादयः नागनाथा अनंतादयः पूर्वोक्तोऽनंत एककुंडलः ऋषीणामृषभा वसिष्ठादयः पितृणामृषभो यमः दैत्येंद्राः प्रह्लादादयः सिद्धेशाः सनकादयः दानवेंद्रा वृषपर्वादयः ॥ ४३ ॥ ❀ ❀ प्रेतेशोपि यमः रूपांतरविवक्षया पुनर्वचनं व्यासवासुदेववत् पिशाचेशा घंटाकर्णादयः भूतेशा भैरवादयः कूष्मांडेशा भृंगीरुक्मादयः यादसामीशास्तिमिंगिलादयः मृगाणामीशाः सिंहादयः पशूनामीशा नंदिकेश्वरादयः भगवद्यशोज्ञानादिमत् महस्वत्स्वतः महत्ववत् ओजस्वत् अवष्टंभवत् सहस्वत् सहनगुणवत् बलवत् इच्छाकारणशक्तिमत् क्षमावत् क्रोधसमुत्थितिमत् ह्रीमत् योग्यलज्जावत् श्रीमन्लक्षणान्नाह विभूतिमत् विशेषप्राप्तिशक्तिता विभूतिर्लक्षणान्नाह लक्ष्मीशब्देन भण्यत इति । आत्मवत् धृतिमत् मनोजववद्वा अद्भुतार्तमाश्चर्यं समुद्रं स्वेच्छयैषां विशिष्टत्वं कुरुते तत्तथास्मृतमित्यतो मिथ्याविभूतित्वं प्रत्युक्तम् ॥ ४४ ॥ ❀ ❀ पुरुषनामक एव स्वरूपांशावतारो नान्य इति शंकां परिहरन्निव तदवतारानुक्रमेण प्रतिजानीते प्राधान्यत इति । ऋषयो ब्रह्मादिज्ञानिनो भूम्न आनन्दादिगुणपूर्णस्य पुरुषस्य यान् लीलाववतारानामनंति पठंति अध्यासेनोपासते च तांस्ते तव प्राधान्यतोऽनुक्रमिष्ये गणयिष्यामीत्यन्वयः । भवता तदनुक्रमणरसः कर्णपुटेनापीयतामभिगम्यतां यद्वा पीयतां गायतां ध्यायतां पश्यतां पिबतां जनानां कर्मकषायो देहारंभहेतुः कर्माख्यरसस्तस्य शोषो यैस्ते तथोक्तास्तान् । पेयत्वे गुणमाह सुपेशलामिति । मधुरेभ्योप्यतिमधुरानिमानिति स्वमनसि प्रकाशितत्वेन कालक्षेपं क्षिपति ॥ ४५ ॥

इतिश्रीभागवते द्वितीयस्कंधे विजयध्वजकृतटीकायां षष्ठोऽध्यायः ॥ ३ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

अन्यपक्षपातितानामवेद्यत्वे हेतुमाह । प्रशांता भगवन्निष्ठा आत्मादयो येषां त एव तद् विदन्ति असत्तर्कैर्या नाहता नरकभागभिरसत्प्रसङ्गैरिति वक्ष्यमाणतृतीयोक्तदिशा तादृशतद्रूपादिषु कुतर्कैस्तु विप्लुतं सत् यत् तिरोधीयेत इति तदेवमनेन पद्यचतुष्केण तादृशस्वरूप एव भगवांस्तादृशस्वरूपशक्त्यातत्तद्रूपः सन् अवतारादिकं करोति, तत्र तत्तदज्ञास्तत्तदगायन्तोऽपि न सुखं प्राप्नुवन्ति, यतस्तत्तद्विज्ञाने चाधिकृत्य परिनिष्ठितोऽपि नैर्गुण्ये इत्यादिकं बहुतरं गीयते, इति व्यञ्जितम् ॥ ४१ ॥ ❀ ❀ पूर्वार्थमेव स्पष्टयति आद्योऽवतार इत्यादिभिः । परस्य भूम्नः स्वरूपेण शक्त्या च सर्व्वातिशायिनः । अवतारः प्राकृतवैभवे स्वेच्छाविर्भावः । कालादयश्च परमेव तत्वमिति सार्द्धैश्चतुर्भिरन्वयः । यज्ञस्य विष्णोः साक्षादवतारत्वेन, ब्रह्मभवयोरावेशावतारत्वेन, अन्येषां शक्तितत्कार्यरूपत्वेन, तदनन्यत्वमित्यर्थः ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ❀ ❀ किं बहुना एतदर्थमेवास्य महापुराणस्याविर्भाव इति भवतानुदितप्रायं यशो भगवतोऽमलमित्यादौ समाधिनाऽनुस्मर तद्विचेष्टितमित्यादौ च वर्णितम् । सा च भगवतो लीला द्विविधा । सृष्ट्यादिरूपा लीलावतारविनोदरूपा च । तयोरुत्तरा तु प्रशस्ततरेत्याशयेनाह प्राधान्यतो यानृष इति । यद्यपि पूर्व्वम् आद्योऽवतार पुरुषः परस्येत्यादिग्रन्थेन पुरुषं कालादितच्छक्तिं मन-आदि तत्कार्यं ब्रह्मादि तम् । गुणावतारान् दक्षादितद्विभूतीश्चोक्तवानस्मि तेन च सृष्ट्यादिलीलाः तथापि यान् हे ऋषे पुरुषस्य भूम्नो लीलावतारान् प्राधान्येनामनन्ति तानेव इमान् मम हृदयाधिरूढान् । कर्णकषायशोषान् तदितरश्रवणरागहर्तॄन् किञ्च सुपेशान् परममनोहरान् अनुक्रमिष्ये तदनुक्रमणं सम्यक् पीयताम् ॥ ४५ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

ऋषे हे नारद मुनयो मननशीलाः यदा प्रशान्तात्मेन्द्रियाशया भवन्ति तदा तद्विविदन्ति । अन्यथा असत्तर्कैर्विप्लुतं तदेव वस्तु तिरोधीयेत । एतेन तस्य निर्विशेषं स्वरूपं यद्ब्रह्म तत् कथञ्चिदपि ज्ञातु शक्यं, न तु सविशेषस्वरूपमित्युक्तम् । एवमेव विबोद्धुमर्हत्यमलान्तरात्मभिरित्यादिना दशमस्कन्धेऽपि वक्ष्यते ॥ ४१ ॥ ❀ ❀ स एव आद्यः पुरुष इत्यनेन श्लोकेनोक्तं पुरुषावतारं तत्कर्म्म च विवृणोति सार्द्धैश्चतुर्भिः । परस्य परव्योमाधिनाथस्य भगवत आद्यः प्रथमोऽवतारः पुरुषः प्रकृतीक्षणकर्त्ता कारणार्णवशायी । जगृहे पौरुषं रूपं भगवानिति प्रथमोक्तेः । कालस्वभावादयश्च तस्य कर्म्मोच्यते कल्पेकल्पे सृजत्यजः आत्मात्मन्यात्मनात्मानमित्युक्तेः । स एकोऽपि मायाशक्त्या नाना भवेदित्यर्थः । सदसत् कार्य्यकारणात्मकं सर्व्वं विश्वमेव । तदेवं विवृणोति मन इत्यादि । क्रमोऽत्र न विवक्षितः । द्रव्यं महाभूतानि । विकारोऽहङ्कारः । गुणः सत्त्वादिः । विराट् समष्टिशरीरं पातालादि स्वराट् समष्टिजीवो हिरण्यगर्भ्भः स्थावरं चरिष्णु जङ्गमं व्यष्टिशरीरम् । भूम्नः परमेश्वरस्य सम्बन्धि ॥ ४२ ॥ ❀ ❀ तथा अहं ब्रह्मा तदादयस्त्रयो गुणावताराः । खं भुवर्लोकस्तद्गतलोकपालाः । तमलोकपालाः पातालाधिपतयः ॥ ४३ ॥ ❀ ❀ रक्षोरगेति सन्धिरार्षः ॥ ४४ ॥ ❀ ❀ किं बहुना यत् किञ्चिद्भगवदादि । भगं श्रीकाममाहात्म्यवीर्य्ययत्नार्ककीर्त्तिष्वित्यमरः । महस्वत् तेजोयुक्तम् । ओजःसहोबलानि इंद्रियमनशरीरपाटवानि । ह्रीः अकर्म्मजुगुप्सा । विभूतिः सम्पत्तिः आत्मा बुद्धिः । अद्भुतार्णम् । आश्चर्य्यवर्णम् तत् सर्व्वं तत्त्वं रूपवत् साकारम् अस्मदादिकं परम् अरूपवत् निराकारं कालादिकं चेति द्विविधं भगवद्रूपमपि अस्वरूपं, न भगवतः स्वरूपं, तस्य स्वरूपशक्तिविलासत्वाभावादित्यर्थः । एवञ्च कालादीनां पुरुषावतारस्य कर्म्मरूपत्वेऽपि ते शक्तयो ब्रह्मादयो गुणावताराः प्रजापत्यादयो विभूतयो ऽन्ये केचिद् ज्ञानिनो योगिनः कर्म्मिणो मूढाश्च स्थावरजङ्गमाश्च सर्व्वे पुरुषावतारस्य सृष्टयादिलीलापरिकराः ज्ञेयाः ॥ एवं मायाशक्तिप्राधान्येन पुरुषावतारमुक्त्वा चिच्छक्तिमयान् लीलावतारान् वराहयज्ञादीन् वक्तुमाह । प्राधान्यत आमनन्तीत्युपास्यत्वेन अंशेन इति व्यञ्जयति । कर्णयोः कषायान् वार्त्तान्तरश्रवणवासनाः शोषयन्तीति तान् हे ऋषे ते तुभ्यम् अनुक्रमिष्ये क्रमेण कथयिष्ये । तत् कथामृतं त्वया पीयताम् ॥ ४५ ॥

इति भावार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठोऽध्यायो द्वितीयेऽस्मिन् सङ्गतः सङ्गतः सताम् ॥ ६ ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

हे ऋषे देवर्षे तदेव उक्तलक्षणं भगवत्स्वरूपं प्रशांता यथोक्तसाधनभाविताः आत्मेंद्रियाशयाः देहेंद्रियांतःकरणानि येषां ते मुनयः वेदांतार्थमननशीलाः विदंति जानंति असतां तर्कैर्यदा तु विप्लुतमाच्छन्नं स्यात्तदा तिरोधीयेत अविदितं भवेत् ॥ ४१ ॥ ❀ ❀ परस्परं भूम्नः परमपुरुषस्यविभोः पुरुषः प्रकृतिप्रवर्तकः यस्य सहस्रशीर्षेत्युक्तो लीलाविग्रहः स आद्योऽवतारः स एव समष्टिशरीरग्रहणेन वैराजः पुरुष इत्युच्यते भूतैर्यदा पंचभिरात्मसृष्टैःपुरं विराजं विरचय्य तस्मिन्स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेव इति वक्ष्यमाणात् पुरुषादीनां तत्त्वं परमित्यनेनान्वयः । कालः भगवच्छक्तिभूतः अचेतनपदार्थविशेषः स्वभावः भगवत्शक्तिभूतायाः प्रकृतेः परिणामित्वलक्षणो धर्मः सदसत्कारणात्मिका प्रकृतिः गुणाः सत्वादिः इंद्रियाणि ज्ञानेंद्रियाणि कर्मेन्द्रियाणि च विराट् समष्टिशरीरम् स्वराट् वैराजः पुरुषः स्वावतारः स्थास्नु स्थावरम् चरिष्णु जंगमं चेति व्यष्टिशरीरम् ॥ ४२ ॥ ❀ ❀ सृष्टौ अहं ब्रह्मा संहारे भवो रुद्रश्च गुणावताराः पालने यज्ञो विष्णुः स्वावतारः दक्षादयो ये इमे प्रजेशाः रजोगुणविशिष्टविभूतिभूता भवदादयो नारदादयः अवतारविशेषाः स्वर्लोकपालाः इंद्रादयः सत्वगुणावशिष्टविभूतिभूताः यत्सत्वतः सुरगणाः रजसः प्रजेशा इति वक्ष्यमाणात् खगलोकपालाः खेचरलोकाधीशाः नृलोकपालाः नृपतयः तललोकपालाः पातालपतयः ये गंधर्वादीनामीशाः ये च यक्षादीनां नाथाः उरगनागो सर्पभेदो रक्षोरगेति संधिरार्षः । ये च ऋषीणां पितॄणां च ऋषभाः श्रेष्ठाः दैत्येंद्राः सिद्धेश्वराः दानवेंद्राश्च ये चान्ये प्रेतादीनामधीशाः ॥ ४३ ॥ ❀ ❀ लोके यत्किंचित् इति सर्वत्र योजनीयम् । भगवत् ऐश्वर्ययुक्तम् । महस्वत् तेजोयुक्तम् । ओजःसहसी इंद्रियमनःशक्ती तद्युक्तम् । बलवत् दाक्ष्यसंयुक्तम् । क्षमावदपराधसहनशीलम् । श्रीह्रीविभूत्यात्मवत् श्रीयुक्तम् । ह्रीयुक्तम् । विभूतिः संपत्तिस्तद्युक्तम् । आत्मबुद्धिस्तद्युक्तम् । अद्भुतार्णमाश्चर्यवर्णम् । किंबहुना रूपवत्रूपयुक्तम् । अस्वरूपं नीरूपम् । सर्वं खल्विदं ब्रह्म तज्जलानीति श्रुतेः । तत्र पुरुषादीनां स्वरूपतोऽभेदः अन्येषां चेतनाचेतनपदार्थानां भगवतः सकाशात्तत्तत्स्वरूपभेदेन भिन्नत्वेऽपि तत्पृथक्स्थितिप्रवृत्त्याद्यभावात्तज्जत्वादिना चाभेद इति विवेकः ॥ ४४ ॥ ❀ ❀ यदुक्तमाद्योऽवतारः पुरुषस्येति तत्र येषामपेक्षया स आद्यः तान् किंच भवदादयश्चेत्यत्रादिशब्देनोद्दिष्टांस्तान्सर्वान्गृहीत्याकाङ्क्षायामवतारान्वक्तुमाह प्राधान्यत इति । हे ऋषे नारद पुरुषस्य भूम्नः आपीयतामिति शत्रंतमापिबताम् भक्तानां कर्णयोः असत्कथाश्रवणैर्ये कषायाः तान् शोषयंतीत्येवं भूतान् सुपेशान् सुन्दरान् यान् लीलावतारान् अनंतानां साकल्येन निरूपणासंभवात् प्राध्यान्यतः आमनन्ति मुनय इति शेषः । तान् ते तुभ्यम् अनुक्रमेण वर्णयिष्यामीत्यन्वयः ॥ ४५ ॥

इति श्रीमद्भागवतसिद्धान्तप्रदीपे द्वितीयस्कंधीये षष्ठाध्यायार्थप्रकाशः ॥ ६ ॥

**श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या**

एवं मतान्तरं परिहृत्याऽवतारकर्माणि गायन्तीत्युक्तत्वात् के ते अवतारा इत्यपेक्षायामाह—आद्योऽवतार इति। वरस्य ब्रह्मणः पुरुषोत्तमस्याद्योऽवतारः पुरुषः प्रकृतिभर्त्ता। द्वितीयः कालः। तृतीयः स्वभावः सदसत् कर्म प्रकृतिर्वा। मनसा इदं मन आधिदैविकं यत्सङ्कल्पद्वारा कामजनकम्। यतः सृष्टिः। तदनन्तरमन्येऽप्यवतारा इत्याहि द्रव्यं पञ्चमहाभूतानि। विकारः अहङ्कारः। गुणास्त्रयः। पञ्च वा तन्मात्राः इन्द्रियाणि दश विराट् ब्रह्माण्डदेहः। स्वराट् तदभिमानी। स्थास्नु[1] स्थावरम्[2]। चरिष्णु जङ्गमम्। एतत्सर्वं भूम्नः अतिसमर्थस्यैते सर्वेऽवताराः। अवतारो नाम अवतरणं मूलस्थानादिहाऽऽगमनम्। तत्परमार्थतो भगवानेक एव तत्र स्थितः सर्वरूपेण इहाऽऽगत इति सर्वमेवाऽवताररूपम्॥ ४१॥ ❀ ❀ यथ पुरुषोत्तमत्वाद्भगवतः स जातीयेभ्य उत्कर्षलक्षणगुणवत्त्वं चेत्तदा इमे अग्रे वक्ष्यमाणा इति तान् गणयति अहमिति। स्वहीनेभ्यः स्वसेवकेभ्य उत्कर्षो बहूनां वर्त्तत इति ते सर्वे भगवदवताराः। तत्र प्रथमम्—अहं ब्रह्मा। भवो महादेवः। यज्ञो यज्ञनारायणः। इमे प्रजेशा मरीच्यादयः। तत्र दक्षो मुख्यः कल्पान्तरे। अतो दक्षादयः। भवानादिर्येषां ते भवदादयो भक्ताः। चकारात्सनकादयः। एवं स्वभावत उत्कृष्टानुक्त्वा अधिकारेणोत्कृष्टानाह—भूलोकपाला इति। पाठान्तरे भूर्लोकपालाः। तदा भूरित्याद्यव्ययम्। भूलोकपालाः पृथिवीलोकपालाः। [3]भूवर्लोकपाला अन्तरिक्षलोकपालाः। स्वर्लोकपाला उपरितनलोकपालाः। तललोकपाला अधस्तनलोकपालाः। गन्धर्वादीनां ये ईशाः। यक्षादीनां ये नाथाः। रक्षोरगेति सन्धिरार्षः। गन्धर्वादयो राजसाः। यक्षादयस्तामसाः। ऋषीणामृषभाः सात्त्विकाः। पितृणां सन्निपाताः। एवं [4]पूर्वत्राऽपि। दैत्येन्द्रादयो राजससात्त्विकतामसाः। इदानीं तमोमिश्रतामसानाह—प्रेतपिशाचेति। एतेषां स्वरूपं तृतीयस्कन्धे वक्ष्यते। प्रेतादीनां ये अधीशाः। किञ्च। यः कश्चनोत्कृष्टधर्मो [5]भगादिः। भाग्यमैश्वर्यादि वा। तद्युक्तं यत्किञ्चिद्वस्तुमात्रं प्राणिमात्रं वा। महस्तेजः। ओज इन्द्रियशक्तिः। [6]सहो मनःशक्तिः। ओजसा सहितं सहः। मनसश्चेन्द्रियाणां चाऽन्योन्योपकारात्तच्छक्तिद्वयमेकत्वेनोक्तम् ओजःसहस्वदिति। बलं देहशक्तिः। क्षमा सहिष्णुता। एते भगादयः [7]पदार्था उत्कृष्टा एवाऽत्र विवक्षिताः। श्रीः शोभा। ह्रीर्लज्जा। विभूतिर्लक्ष्मीः। आत्मा बुद्धिः। श्रिया( ? )द्यात्मपर्यन्तं चतुष्टयं यस्याऽस्ति स यथोक्तः। किञ्च। अद्भुतार्णम् अद्भुतवर्णरूपम्। विचित्ररूपम्। [8]गवादिकं वा। किं बहुना। यत्किञ्चिद्रूपवत् मूर्त्तम्। प्रकाशमानमिति यावत्। तत्सर्वं परमेव तत्त्वम्। यदप्यस्वरूपं अमूर्तमाकाशादि। तदपि तत्त्वमित्यर्थः। अस्वरूपत्वेन रूपव[9]त्त्वेन च तस्याऽपि प्रसिद्धेः॥ ४२,४३,४४॥ ❀ ❀ एवमुत्कृष्टधर्मवत्त्वेन यदेव किञ्चिल्लोके प्रसिद्धं तदेव भगवदवताररूपमित्युक्त्वा यत्साक्षात्सच्चिदानन्दरूपमैश्वर्यादिस[10]षड्गुणसहितं तन्मुख्यं भगवदवताररूपं ते कथयिष्यामीत्याह—प्राधान्यत इति। ऋषे इति सम्बोधनं तादृशश्रवणे अधिकारिद्योतकम्। यद्यपि भगवत्सृष्टौ सर्वमेवाऽवताररूपमिति मुख्यः पक्षस्तथापि तादृशस्याऽवतारत्वेन लोकप्रसिद्ध्यभावाल्लोके यानवतारान्प्राधान्येन मुख्यतया वदन्ति तेषां लीलावतारेति नाम। ते च पुनरवताराः। कस्येत्यपेक्षायां यस्तु भूमा पुरुषो ब्रह्माण्डादधिकोऽन्तर्यामिरूपो द्वितीयध्यान उक्तस्तस्याऽवताराः। सच्चिदानन्दरूपा हि देहजीवान्तर्यामिणः। तत्र क्रमेण देहजीवरूपा उक्ताः। इदानीमन्तर्यामिरूपा उच्यन्त इति। आपीबताम्। ते हि न बहिःस्थापनयोग्याः। नाऽपि मध्ये। किन्तु सर्वान्तराः कर्तव्या इत्यासमन्तात्पीयताभित्यर्थः। तेषां श्रवणस्य विशेषफलमाह— कर्णकषायशोषानिति। यद्यपि सर्वं चरित्रं भगवतस्तथापि लौकिकदोषेण कर्णयोर्दुष्टत्वाद्भगवच्चरित्रे न रुचिरुत्पद्यते। तत्रैतद्विशेषचरित्रं कर्णमलनिवारकमित्यस्मिच्छ्रुते सर्वत्र रुचिरुत्पत्स्यत इत्यर्थः। अत एवाऽनुक्रमिष्ये आनुपूर्व्येण कथयिष्यामि। ते तुभ्यम्। विशेषेण त्वमेवाऽधिकारीति। इमान् बुद्धिस्थितान्। महता आडम्बरेण कथने हेतुः सुपेशानिति। अतिसुन्दरान् मनोहरान्। कथनप्रतिज्ञाभिन्नप्रक्रमेण कथने हेतुः॥ ४५॥

**इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां द्वितीयस्कन्धे षष्ठोऽध्यायः॥ ६॥**

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः**

आद्योवतार इत्यत्र आधिदैविकमिति, 'असतोधिमनो सृज्यत मनः प्रजापतिमसृजते'त्यादिश्रुत्युक्तम्॥ ४१॥ ❀ ❀ अहमित्यत्र चेदिति लोकप्रसिद्ध्याऽवतारस्य लक्षणान्तरं चेदित्यर्थः। ते सर्व इति। तथा च, लक्ष्यकुक्षौ तेषां निवेशान्नातिव्याप्तिरित्यर्थः॥ ४२॥

**इति श्रीद्वितीयस्कन्धसुबोधिनीप्रकाशे षष्ठाध्यायविवरणम्।**

१. स्थाष्णिवति क. ख. ग. २. स्थविरमिति घ। ३. भुवर्लोकपाला इति क. ख.। ४. सर्वत्राऽपीति ग.। ५. भगादीत्यविसर्गः पाठा क. ख.। ६. सह इत्याद्यंशो नास्ति ख. घ.। ७. पदार्था इति ख. ८. गवादिकमिति क. ख. ग. घ.। ९. अमूर्तरूपत्वेनेति ग. रूपत्वेनेति घ. ङ.। १० सर्वेति नास्ति क. ख.।

## श्रीगिरिधरकृता बालप्रबोधिनी

के ते अवतारा यान् गायन्तीत्यपेक्षायां विस्तरेण तान् दर्शयति आद्य इत्यादि यावत्समाप्ति। परस्य भूम्नो ब्रह्मणः पुरुषः प्रकृतिप्रवर्तको यस्य सहस्रशीर्षेति लीलाविग्रह उक्तः स आद्योऽवतारः। यदुक्तं प्रथमे—'जगृहे पौरुषं रूपम्' इति। वक्ष्यति च—'भूतैर्यदा पञ्चभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन्। स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः। इति। यद्यपीह सर्वेषामविशेषेणावतारत्वमुच्यते तथापि कालश्च स्वभावश्च सदसदिति कार्यकारणात्मिका प्रकृतिश्च एताः शक्तयः मनआदीनि कार्याणि ब्रह्मादयो गुणावताराः दक्षादयो विभूतय इति विवेक्तव्यम्। मनश्च महत्तत्वम्। द्रव्यं पृथिव्यादिमहाभूतपञ्चकम्। क्रमोऽत्र न विवक्षितः; विकारोऽहङ्कार; गुणः सत्वादिः, एकादशेन्द्रियाणि च, विराट् ब्रह्माण्डात्मको देहः। स्वराट् तदभिमानी जीवः। स्थास्नु स्थावरम्। स चरिष्णु जङ्गमं व्यष्टिशरीरम् ॥ ४१ ॥ ❀ ❀ अहं ब्रह्मा, भवो महादेवः, यज्ञो विष्णुः। दक्षादया च इमे प्रजेशाः, भवानादिर्येषान्ते भवदादयोः भक्ताश्च, स्वर्लोकपाला इन्द्रादयः, खगलोकपाला गरुडादयः, नृलोको भूलोकस्तत्पाला राजानः, तललोकपालाः तलातलाद्यलौकाधिपतयः ॥ ४२ ॥ ❀ ❀ गन्धर्वादीनामीशाः, यक्षादीनां नाथाः पालकाः। रक्षोरगेति सन्धिरार्षः। ये च ऋषीणां पितृणां च ऋषभाः श्रेष्ठाः तथा ये दैत्यादीनामिन्द्राः पालकाः अन्ये च ये प्रेतादीनामधीशाः पालकाः ॥ ४३ ॥ ❀ ❀ किं बहुना ? यत्किञ्चिद्‌भगवदादि तत्सर्वं परमेव तत्त्वं परब्रह्मणो विभूतिरूपमेवेत्यन्वयः। भगवज्ज्ञानैश्वर्यवैराग्यादियुक्तम्, महस्वत्तेजोयुक्तम्, ओजस्सहसी इन्द्रियमनश्शक्ती तद्युक्तम्, बलं शरीरशक्तिस्तद्वत्, क्षमा परापराधसहिष्णुता तद्वत, श्रीः शोभा, ह्रीरकर्मजुगुप्सा, विभूतिः सम्पत्तिः आत्मा यथार्थबुद्धिस्तद्वत्। अर्णो वर्णः, अद्‌भूतार्णमाश्चर्यवर्णम्, रूपवत् मूर्त्तम्, अस्वरूपमरूपम्, अमूर्त्तमित्यर्थः ॥ ४४ ॥ ❀ ❀ एवं शक्त्यादिरूपान् भगवदवतारानुक्त्वा साक्षात्तदवतारान् वक्तुं साकल्येन तत्कथनस्याशक्यत्वात् प्राधान्येन तत्कथनं प्रतिजानीते—प्राधान्यत इति। साकल्येन भगवदवतारकथनस्याशक्यत्वं तु तवापि सम्मतमेव ऋषित्वेन विचारे समर्थत्वादिति सूचयन् सम्बोधयति—हे ऋष इति। भूम्नः पुरुषस्य पुरुषोत्तमस्य यान् लीलार्थकृतान् अवतारान् प्राधान्यतो विवेकिन आमनन्ति कथयन्ति तानिमान् मम बुद्धावुपस्थितानहं ते तुभ्यमनुक्रमिष्ये अनुक्रमेण कथयिष्यामीत्यन्वयः। तदनुक्रमेणामृतं त्वयाऽऽपीयतां पानवत्स्वान्तःकरणे स्थाप्यताम्। तत्पानस्य किं फलमित्यपेक्षायामाह—कर्णेति। असत्कथाश्रवणेन ये कर्णयोः कषायाः 'या वै श्रुता हतभगैर्नृभिरात्तसारास्तांस्तान् क्षिपन्ति निरयेषु तमस्सु हन्त' इति वक्ष्यमाणानुसारेण नरकहेतुभूतदुरदृष्टरूपास्तान् शोषयन्तीति तथा तानित्यर्थः। सुपेशान् सुन्दरान् मनोहरान्। लकारलोप आर्षः। यद्वा आपीयतामिति शत्रन्तम्, अपिबतां कर्णकषायशोषानित्यन्वयः ॥ ४५ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
द्वितीये रचिता तत्र मननस्य निरूपणे ॥ षष्ठश्च विवृतोऽध्यायः समागमनिरूपकः ॥ ३ ॥

## हिन्दी अनुवाद

परमात्माका पहला अवतार विराट् पुरुष है; उसके सिवा काल, स्वभाव, कार्य, कारण, मन, पञ्चभूत, अहंकार तीनों गुण, इन्द्रियाँ, ब्रह्माण्ड, शरीर, उसका अभिमानी, स्थावर और जङ्गम जीव—सब-के-सब उन अनन्त भगवान्‌के ही रूप हैं ॥ ४१ ॥ ❀ ❀ मैं, शङ्कर, विष्णु, दक्ष आदि ये प्रजापति, तुम और तुम्हारे जैसे अन्य भक्तजन, स्वर्गलोकके रक्षक, पक्षियोंके राजा, मनुष्यलोकके राजा, नीचेके लोकोंके राजा; गन्धर्व, विद्याधर और चारणोंके अधिनायक, यक्ष, राक्षस, साँप और नागोंके स्वामी; महर्षि पितृपति, दैत्येन्द्र, सिद्धेश्वर, दानवराज; और भी प्रेत-पिशाच, भूत-कुष्माण्ड, जल-जन्तु, मृग और पक्षियोंके स्वामी; एवं संसारमें और भी जितनी वस्तुएँ ऐश्वर्य, तेज, इन्द्रियबल, मनोबल, शरीरबल या क्षमासे युक्त हैं अथवा जो भी विशेष सौन्दर्य, लज्जा, वैभव तथा विभूतिसे युक्त हैं; एवं जितनी भी वस्तुएँ अद्‌भुत वर्णवाली, रूपवान् या अरूप हैं—वे सबके-सब परमतत्त्वमय भगवत्स्वरूप ही हैं ॥ ४२-४४ ॥ ❀ ❀ नारद ! इनके सिवा परम पुरुष परमात्माके परम पवित्र एवं प्रधान-प्रधान लीलावतार भी शास्त्रोंमें वर्णित हैं। उनका मैं क्रमशः वर्णन करता हूँ। उनके चरित्र सुननेमें बड़े मधुर एवं श्रवणेन्द्रियके दोषोंको दूर करनेवाले हैं। तुम सावधान होकर उनका रस लो ॥ ४५ ॥

**छठवाँ अध्याय समाप्त**

# अथ सप्तमोऽध्यायः

ब्रह्मोवाच

यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत् क्रौडीं तनुं सकलयज्ञमयीमनन्तः ।
अन्तर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार ॥ १ ॥
जातो रुचेरजनयत् सुयमान् सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायाम् ।
लोकत्रयस्य महतीमहरद् यदार्तिं स्वायम्भुवेन मनुना हरिरित्यनूक्तः ॥ २ ॥
जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ।
ऊचे ययाऽऽत्मशमलं गुणसङ्गपङ्कमस्मिन् विधूय कपिलस्य गतिं प्रपेदे ॥ ३ ॥
अत्रेरपत्यमभिकाङ्क्षत आह तुष्टो दत्तो मयाहमिति यद् भगवान् स दत्तः ।
यत्पादपङ्कजपरागपवित्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ॥ ४ ॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

सप्तमे भगवल्लीलावतारा ब्रह्मणोदिताः । नारदाय तु तत्कर्मप्रयोजनगुणैः सह ॥ १ ॥

यत्र यदा क्षितितलोद्धरणार्थं वाराहीं तनुं बिभ्रत्सन्नुद्यतोऽनंतः तदा तं सुप्रसिद्धं हिरण्याक्षं दंष्ट्रया ददार ॥ १ ॥ ❋ ❋ यज्ञावतारमाह । रुचेः प्रजापतेः सकाशात्तद्भार्याया आकूतेः सूनुः सुतः सुयज्ञो नाम जातः स च स्वभार्यायां दक्षिणायां सुयमाख्यान्देवानजनयत् । स एवेंद्रः सन्यदार्तिमहरत्तदा पूर्वं सुयज्ञ इत्युक्तोऽप्यनु पश्चान्मनुना मातामहेन हरिरित्युक्तः । अनेन देवोत्पादनं लोकत्रयार्तिहरणं च तस्य कर्म दर्शितम् । एवं सर्वत्रावतारस्तत्कर्म च ज्ञेयम् ॥ २ ॥ ❋ ❋ कपिलावतारमाह । कर्दमस्य

[illegible]

साऽऽत्मनः शमलं मलिनीकरणं गुणसंगरूपं पंकमस्मिन्नेव जन्मनि विधूय कपिलस्य गतिं मुक्तिं प्राप्तवती ॥ ३ ॥ ❋ ❋ दत्तात्रेयावतारमाह । मया अहमेव तुभ्यं दत्त इति यद्यत आह ततः स नाम्ना दत्तो जातः । स्वभक्तेभ्यो योगैश्वर्यदानं तच्चरितं दर्शयति । यस्य पादपंकजयोः परागस्तेन पवित्रा देहा येषां ते उभयीमैहिकीमामुष्मिकीं च भुक्तिमुक्तिरूपां वा ॥ ४ ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

तेषामवताराणां कर्मगुणप्रयोजनैः ॥ १ ॥ विरोधपरिहाराय व्याख्यांतरमाह । यद्वेति । तत्र करेण कर्णमूलेहन्नित्यत्र चक्रवर्ती तु प्रथमं करेण ततो दंष्ट्रया च ददारेति ज्ञेयम् । वराहावतारप्रमाणमाह । "यस्य रूपं बिभ्रदिमामविंदद्गुहां प्रविष्टां शरीरस्य मध्यतः" इत्याधाने वराहसंभारेण विनियुक्तान्मंत्रतः प्रतीयते । यस्य वराहस्य रूपं बिभ्रदीश्वरः इमां पृथिवीं गुहां गूढस्थाने सलिलस्य मध्ये प्रविष्टामविन्दल्लब्धवानिति श्रुतेरर्थः ॥ १ ॥ २ ॥ ❋ ❋ यथाहमपि ब्रह्मोद्भूतत्वात्तादृशोस्म्यहो श्रीकपिलो हि क्षीरशंखन्यायेन ब्राह्मणत्वे सति भगवदवतारत्वादतीवोत्कृष्टोस्तीति संभावयमानं नारदं प्रति ब्रह्माह त्वमपि तादृशएवेति द्विजपदेन ध्वनितं यद्यपि द्विजपदं त्रिवर्णे शक्तं तथापि 'द्विजराजश्शशधरः' इत्यत्र द्विजपदस्य ब्राह्मण एव मुख्या शक्तिरस्ति "सोमोऽस्माकं ब्राह्मणानां राजा" इति श्रुतिबलात् ॥ ३ ॥ ❋ ❋ दत्तात्रेयावतारप्रतिपादिका श्रुतिरपि । "यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः अत्र यस्तमन्वविंदन्नह्यन्ये शक्नुवन्" इति । अस्या अर्थः सूर्यमात्मानं स्वर्भानुर्मायया तमसा विपर्ययेणाविध्यत् जीवत्वमनयत् । अत्रेरपत्यान्यत्रयो दत्तात्रेयः बहुत्वं पूजार्थमग्रे स्पष्टम् । तेषां मध्ये हैहयं तु प्राप्तयोगर्द्धिकमपि महापराधत एव हेतोः कुर्यंल्छ्रीपरशुरामो जघानेति ज्ञेयम् ॥ ४ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

[ यत्रोद्यत इति । पाद्मकल्पोपाख्यानमेतत् । एतन्मते षष्ठमन्वन्तर एव पृथिव्युद्धारे हिरण्याक्षवधः । वराहकल्पे तु वराहद्वयं वराह प्रादुर्भावः पृथिव्युद्धारश्च । एतत् तृतीयस्कन्धे त्रयोदशाध्याये सप्रमाणं दर्शितमिति व्याख्यालेशः ॥ ] उद्यत इति । समुद्रे निमज्ज्य रसातलगतां महीम् उद्धृत्य दंष्ट्राग्रे निधाय उदूर्ध्वगत इत्यर्थः । इति केचित् ॥ १—४ ॥

### श्रीमद्वीरराघवव्याख्या

एवं प्रतिज्ञयावताराँस्तत्कर्माणि तत्तत्प्रयोजनानि तद्गुणाँश्चाह ब्रह्मा यत्रेत्यादिना । यत्र यदाकाले क्षितितलोद्धरणार्थं समस्तयज्ञावयवां क्रौडीं वाराहीं तनुं बिभ्रत्सन्नुद्यतोऽनन्तो परिच्छिन्नस्वरूपभावो भगवान् दंष्ट्रया तं महार्णवे समुद्रस्यांतः उपागतं समागतं हिरण्याक्ष इति प्रसिद्धमादिदैत्यं दितेः प्रथमं पुत्रं ददार विदारितवान् । तत्र दृष्टांतः वज्रधरः इंद्रः अद्रिमिवेत्यर्थः ।। १ ।। ❀ ❀ सुयज्ञावतारमाह जातमिति । रुचेः प्रजापतेः सकाशात्तद्भार्याया आकूतेः सूनुः सुयज्ञो नाम जातः स च स्वभार्यायां दक्षिणायां यमाख्यगुणयुक्तान्यामान्देवानित्यर्थः । यज्ञस्य दक्षिणायां तुदैत्रा द्वादश जज्ञिरे यामा इति समाख्याता इति वचनात् स एवेंद्रः सन्नार्तिं यदा अहरत्तदा पूर्वं सुयज्ञ इत्युक्तोऽप्यनुपश्चान्मातामहेन मनुना हरिरित्युक्तः । अनेन देवोत्पादनं लोकत्रयार्तिहरणं च कर्मदर्शितं एवं सर्वत्रावतारस्तत्कर्म च ज्ञेयम् ।। २ ।। ❀ ❀ कपिलावतारमाह जज्ञ इति । कर्दमप्रजापतेर्गृहे तद्भार्यायां देवहूत्यां हे द्विज नारद, नवभिः स्त्रीभिर्भगिनीभिः सह जज्ञे जातः स च स्वमात्रे आत्मगतिमात्मज्ञानं मोक्षमार्गं वा उक्तवान् यथा आत्मगत्या सा देवहूतिरात्मशमलं आत्मनो मलिनीकरणमस्मिन्देहे जातं गुणसंगपंकं गुणत्रयसंग एव पंकस्तं विधूय कपिलस्य गतिं कपिलोक्तगतिं प्राप्तवती ।। ३ ।। ❀ ❀ दत्तात्रेयावतारमाह अत्रेरिति । अपत्यं पुत्रमभिकांक्षतोऽभिकांक्षमाणादत्रेः तुष्टः मयाऽहमेव तुभ्यं दत्त इति यद्यत आह ततः स भगवान्नाम्ना दत्त इति जातः । स्वभक्तेभ्यो योगैश्वर्यदानं तच्चरित्रं दर्शयति । यस्य पादपंकजयोः परागस्तेन पवित्रिताः देहा येषां ते हैहयाद्याः सहस्रार्जुनप्रभृतयः यद्यतः दत्तात्रेयादुभयीमैहिकामुष्मिकीं योगर्द्धिं योगैश्वर्यम् अणिमाद्यष्टैश्वर्यरूपामैहिकीं मुक्तिरूपामामुष्मिकीं च योगर्द्धिमापुः प्रापुः उ प्रसिद्धौ यद्वा यदुर्ययाति पुत्र इति ।। ४ ।।

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

अस्मिन्नध्याये प्रतिज्ञातान् परमपुरुषस्यावतारांस्तच्चरितादि च वक्ति । तत्र प्रथमतो वराहकल्पमनुसृत्य वराहावतारं तत्कर्मचाह यत्रेति । अत्र दंष्ट्राशब्देन सुदर्शनं गदा चोपलक्ष्यते सकलयज्ञमयीं स्रुवादिसर्वयज्ञोपकरणजनीं तदाधारां क्रौडीं क्रोडस्य वराहस्य विद्यमानां तनुं बिभ्रत् ब्रह्मादिभिः स्तुतोऽनन्तो यत्र यदा क्षितितलोद्धरणाय उद्यतः समुद्रे निमज्ज्य रसातलगतां महीमुद्धृत्य दंष्ट्राग्रे निधायोर्ध्वं गतो भवति तदांतर्महार्णवे तद्रोधायोपागतं तमादिदैत्यं हिरण्याक्षं वज्रधर इन्द्रो वज्रेणाद्रीन् यथा तथा दंष्ट्रया ददार गदया विदीर्णगात्रं मुष्टिभिः कर्णमूले हत्वा गतासुमकरोदित्यर्थः । दृवि दारण इति धातोः येनांतर्महार्णवे भूर्नीता तमिति वा ।। १ ।। ❀ ❀ सुपूज्यो यशो यस्य सुयशाः उत्तमश्लोकशिखामणिः स्वार्पणबुद्ध्या क्रियमाणः शोभमानो यज्ञो यस्य स सुयज्ञः क्रियाभिमानी यज्ञनामेन्द्रसूनुः शोभनो यस्मात्स इति वा स नारायणो रुचेः प्रजापतेः सकाशात् यज्ञ इति नाम्नाऽऽकूत्यां रुचिपत्न्यां जातोऽभूत् अथेन्द्रपदस्थ आकूतिसूनुर्यज्ञो दक्षिणायां रमावतारायां स्वपत्न्यां स्वायंभुवमन्वंतरे तुषिताख्यानमरानजीजनत् यो राक्षसैरत्तुं प्राप्तेन स्वायंभुवेन मनुना संसारक्लेशसंहरणाद्धरिरिति ज्ञात्वा ईशावास्यमित्यादिनाऽनूक्तो वेदवचनेन स्तुतः त्रयीश्रुतिर्नित्यवाक्यंवेदोऽनुवचनं तथेत्यभिधानं किंच यश्चासुरजनादुत्पन्नां लोकत्रयस्य महतीमार्तिमहरदिति । यस्मात्तस्माद्धरिरिति ज्ञात्वाऽनूक्त इति वा क्रियाभिमानाद्यज्ञोऽसाविंद्रसूनुः प्रकीर्तितः यज्ञेशत्वात् स्वयं विष्णुर्यज्ञो रुचिसुतः स्मृत इत्यादेरयं यज्ञो हरिरेवेति ।। २ ।। ❀ ❀ च शब्द आनंतर्यार्थे हे द्विज ! अथ स विष्णुः कर्दमप्रजापतिपत्न्यां नाम्ना देवहूत्यां नवभिर्मरीच्यादिपत्नीभिः समं सह कपिलनामा जज्ञ इत्यन्वयः । तच्चरितमाह आत्मगतिमिति । यः कपिलः स्वमात्रे आत्मगतिं तत्त्वसंख्यानरूपामात्मविद्यामूचे स कपिलोऽस्मिन् सात्त्विकप्रकृतिचेतनगणे विद्यमानं गुणसंगपंकं शब्दादिगुणानां संगात् निरन्तरनिषेवणादुत्पन्नां विद्याकामकर्माख्यं पंकमात्मशमलमतः कल्मषं सांख्यशास्त्रश्रवणजातज्ञानवारिणा विधूय प्रक्षाल्य स्वगतिं दत्त्वा स्वलोकं प्रपेदे इत्यन्वयः ।। ३ ।। ❀ ❀ हरिणा स्वयमपत्यमभिकांक्षत इच्छतोऽत्रेर्मुनेस्तपसा तुष्टो भगवांस्तपसा प्रसन्नेन मयाऽहं तव पुत्रत्वेन दत्त इत्याहेति । यस्मात्स हरिरत्रेरनुसूयायामवतीर्णो नाम्ना दत्त इति प्रसिद्धोऽभूत् । यस्य दत्तस्य पादपंकजपरागनिषेवया पवित्रदेहा यदुःकार्तवीर्यस्य पूर्वजः हैहयः कार्तवीर्यार्जुनः तौ आद्यौ येषां ते तथा अमयीं विष्णुप्रधानां योगर्द्धिमणिमादियोगसिद्धिमापुरित्यन्वयः । अ इति ब्रह्मेति श्रुतेः । मयटोऽपि प्राधान्येनप्रयोगदर्शनात् उभयीमिति पाठे इह लोकपरलोकविषयां सगुणनिर्गुणविषयां चेति व्याख्यानं च नाम्ना यज्ञानामिति ज्ञातव्यम् ।। ४ ।।

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

करेण कर्णमूलेऽहन्निति वक्ष्यमाणात् प्रथमं करेणाहन् पश्चाद्दंष्ट्रया च ददारेति ज्ञेयम् ।। १ ।। २ ।। ❀ ❀ जज्ञे चेति आत्मनो भगवद्रूपस्य गतिं ज्ञानम् । कपिलस्य गतिं तदीयं नित्यावासवैकुण्ठांशविशेषम् ।। ३ ।। ४ ।।

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

अवताराः सप्तमेस्मिन् क्रोडाद्याःसह कर्मभिः । विभूतयश्च भक्ताश्च निरूप्यन्ते समासतः ।। ० ।।

वराहावतारमाह । यत्र क्षितितलस्य भूतलस्य उद्धरणाय उद्यतः गत्वा उद्यमं चक्रे । तत्रैवान्तर्महार्णवे उपागतं हिरण्याक्षं दंष्ट्रया करेण कर्णमूलेऽहन्निति वक्ष्यमाणात् प्रथमं करेण ततो दंष्ट्रया च ददारेति ज्ञेयम् ।। १ ।। ❀ ❀ यज्ञावतारमाह । रुचेः

प्रजापतेः सकाशाज्जातः सन् सुयमान् देवान् अजनयत् । नाम्ना सुयज्ञः आकूतेः स्वायम्भुवपुत्र्याः सूनुः दक्षिणायां स्वभार्यायाम् । स एवेन्द्रः सन् यदा आर्त्ति पीडाम् अहरत् तदा पूर्वं सुयज्ञ इत्युक्तोऽपि अनु पश्चात् मातामहेन मनुना हरिरित्युक्तः एवमग्रेऽपि सर्व्वत्र जन्मकर्म्म पित्रोः स्वस्य च नाम यथायोग्यं ज्ञेयम् ॥ २ ॥ ❀ ❀ कपिलावतारमाह । जज्ञे जातः । द्विज हे नारद ! नवभिः स्त्रीभिर्भगिनीभिः समं सह । यया आत्मगत्या आत्मनः शमलं मलिनीकरणं गुणसंगरूपं पङ्कं विधूयास्मिन् जगति वर्त्तमानो जनः कपिलस्य गतिं त्रिपाद्विभूतिस्थं कपिलवैकुण्ठं प्रपेदे प्राप्तवान् ॥ ३ ॥ ❀ ❀ दत्तात्रेयावतारमाह । अत्रेरिति । चतुर्थ्यर्थे षष्ठी । मया अहमेव तुभ्यं दत्त इति यदाह ततः स नाम्ना दत्तो जातः । योगर्द्धिं योगसम्पत्तिम् । उभयीम् ऐहिकीम् आमुष्मिकीञ्च भुक्तिमुक्तिरूपां वा । तेषाञ्च मध्ये हैहयन्तु प्राप्तयोगर्द्धिकमपि महदपराधत एव हेतोः कुप्यन् श्रीपरशुरामो जघानेति ज्ञेयम् ॥ ४ ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पूर्वाध्यायांते लीलावतारान् तुभ्यं वर्णयिष्यामीत्युक्तं तानेवावतारान् तेषां गुणकर्माणि प्रयोजनानि चाह श्रीब्रह्मा श्रीनारदंप्रति यत्रेत्यादिना । यत्र यस्मिन्काले दंष्ट्रया क्षितितलोद्धरणाय सकलयज्ञमयीं समस्ताध्वराकाराम् क्रौडीं वाराहीं तनुं बिभ्रत्सदनंतोऽपरिमितगुणस्वरूपो भगवान् उद्यतः तदा अंतर्महार्णवे महार्णवमध्ये उपागतं प्राप्तम् । तं प्रसिद्धम् आदिदैत्यं हिरण्याख्यम् ददार दारितवान् । तत्र दृष्टांतः वज्रधरः अद्रिमिव वराहावतारस्यादिदैत्यं ददारेति कर्मदर्शितं क्षितितलोद्धरणायेति प्रयोजनमुक्तमुपकर्तृत्वलक्षणो गुणोऽर्थादुक्तः । एवमग्रेऽपि यथासंभवं ज्ञेयम् ॥ १ ॥ ❀ ❀ यज्ञावतारमाह जात इति । रुचेः प्रजापतेः सकाशात् आकूतिसूनुः रुचेर्भार्याया आकूतेः सुतः जातः । अथानंतरं स सुयज्ञः स्वपत्न्यां दक्षिणायां सुयमान् अमरान् अजनयत् । स एवेंद्रः सन् यदा लोकत्रयस्य महतीमन्यैर्दुर्निवार्यामार्तिमहरत् तदा पूर्वं सुयज्ञ इत्युक्तोपि अनु पश्चान्मातामहेन मनुना हरिरित्युक्तः ॥ २ ॥ ❀ ❀ कपिलावतारमाह जज्ञ इति । हे द्विज नारद ! कर्दमस्य प्रजापतेर्गृहे तत्पत्न्यां देवहूत्यां नवभिः स्त्रीभिर्भगिनीभिः समं सह जज्ञे जातः स च स्वमात्रे आत्मगतिं आत्मनः स्वस्य भगवतः विद्याम् ऊचे उक्तवान् ययात्मगत्या तन्माता आत्मनः शमलं मलिनीकरणं गुणसंगरूपं पंकम् अस्मिन्नेव जन्मनि विधूय कपिलस्य भगवतो गतिं तद्भावप्राप्तिं प्रपेदे प्राप्तवती ॥ ३ ॥ ❀ ❀ दत्तात्रेयावतारमाह अत्रेरिति । यतस्तदाराधनेन तुष्टः सन्मयाऽहमेव तुभ्यं दत्त इत्याह । तस्माद्धेतोः अपत्यमभिकांक्षतः अभिकांक्षमाणात् अत्रेः सकाशात्स भगवान्नाम्ना दत्त इति जातः । स्वचरणचिंतकेभ्यो भुक्तिमुक्तिदानं तच्चरित्रं दर्शयति । यस्य पादपंकजयोः परागेन पवित्राः पवित्रिता देहा येषां ते यदुकार्तवीर्यप्रभृतयः योगर्द्धिं ध्यानसिद्धिम् उभयीमैहिकीमामुष्मिकीं च भुक्तिमुक्तिरूपामापुः ॥ ४ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवमात्मातिरिक्तानामुत्पत्त्या निर्णयः कृतः । आत्मनोऽपि हरेरत्र [1]निर्णयो विनिरूप्यते ॥ १ ॥
सूक्ष्मध्यानं पूर्वमुक्तं तस्याऽत्र विवृतिः स्फुटा । सप्तमे क्रियते येन तद्धर्मा वस्तुतो मताः ॥ २ ॥
उपासनायां सर्वस्य हरेर्धर्मस्य निर्णयः । स्वरूपगुणभेदेन बोधनार्थमिहोच्यते ॥ ३ ॥
मुख्यस्य च फलं त्वत्र निर्णीतं विनिरूप्यते । माहात्म्यादि तदङ्गं च विशिष्टं तेन सिद्ध्यति ॥ ४ ॥

एवं जडजीवयोरुत्पत्त्या निर्णयमुक्त्वा अन्तर्यामिणोऽपि सर्वधर्मसहितस्य खण्डश उत्पत्तिरुच्यते । तथा सत्येकैकस्य धर्मस्य तादृशमाहात्म्यावगतौ विशिष्टस्य परममाहात्म्यं सेत्स्यतीति । अन्तर्यामिस्वरूपे "प्रादेशमात्रं पुरुषं वसन्तमि"त्यादिपदैर्यन्निरूपितं भगवत्स्वरूपम् तस्याऽत्र पदशोऽवतारा उच्यन्ते । तत्र प्रथमं प्रादेशमात्रत्वधर्मस्योत्पत्त्या यद्रूपं तत्प्रथममाह—यत्रोद्यत इति । ब्रह्मणो हि भूम्युद्धारे चिन्ता काचिदुत्पन्ना कथमेनां समुन्नेष्य इति । तदा भगवद्ध्यानादन्तर्यामी भगवान् यः प्रादेशमात्रः स आविर्भूतः । प्रादेशमात्रोऽपि नासापुटनिर्गमनार्थमङ्गुष्ठशिरोमात्रो भूत्वा पश्चात्स्थूलो जात इति प्रादेशमात्रत्वं [2]स्थानसापेक्षं न तु स्वाभाविकमिति व्याख्यातम् । यत्रैव स्थितो भगवाननन्तो देशकालाद्यपरिच्छिन्नः क्षितितलोद्धरणायोद्यतः । यदैव भगवानिति विचारितवान् भूमिमुन्नेष्यामीति [3]तदैव रूपमबिभ्रत् । नहि तस्य रूपग्रहणे देशकालवस्त्वाद्यपेक्षा । यतोऽन्तःकरण एव ब्रह्मणः स्थित्वा भूम्युद्धारेच्छयैव [4]तत्रैव रूपं गृहीतवान् । अतोऽन्तर्यामिणो रूपग्रहणे न काऽप्यपेक्षेति सूचनार्थं प्रथममेव वराहावतार [5]उक्तः । [6]यत्रैवोद्यतस्तत्रैव बिभ्रत् धृतवानिति योजना । क्षितितलस्योद्धरणम् । तलपदेन कृत्रिमा भूमिरुक्ता समा च । पूर्वं हि ब्रह्मा पुष्करपर्णे स्थितो वराहरूपं कृत्वा काञ्चिन्मृत्तिकां तत उद्धृत्य पुष्करपर्णे [7]प्रथनं कृतवान् । सा पृथिवी पुनर्निमग्ना । तदा तदुद्धारार्थमुद्यतस्तदेव रूपं धृतवान् । "सोऽपश्यत्पुष्करपर्णं तिष्ठत् सोऽमन्यत । अस्ति वैतत् यस्मिन्निदमधितिष्ठतीति ।

१. हरेस्तत्रेति घ. । २. स्थानसापेक्ष्यमिति घ. ङ. । ३. तदैव रूपं बिभ्रदिति घ. ङ. । ४. तत्रैवमिति ग. । ५. उच्यत इति क. ख. ग. । ६. हृदय एवेति क. ख. ग. । ७. प्रथममिति ख. ग. ङ. ।

स वराहो रूपं कृत्वोपन्यमज्जत् । स पृथिवीमधः[1] आच्र्छत् । तस्या उपहत्योदमज्जत् । तत्पुष्करपर्णेऽप्रथयत् । यदप्रथयत्त-[2]त्पृथिव्यै पृथिवीत्वमि"ति श्रुतेः । अतो भगवताऽपि क्रोडसम्बन्धिनी वराहसम्बन्धिनी तनुः कृता । जलात्पदार्थोद्धरणे तस्यैव सामर्थ्यात् । किञ्च । **सकलयज्ञमयीमिति** । यज्ञो हि मृगः । स वनगोचरः । स्रुगादिपदार्थानां तत्तुण्डरूपतुल्यत्वान्मृगत्वेऽपि वराहत्वम् । मन्युशब्दवाच्यत्वाच्च । यतः शतमन्युरिन्द्रः । अत्राऽपि "**पशूना वा एष मन्युर्यद्वराह**" इति श्रुतेर्वराहस्य मन्युत्वा-त्सकलयज्ञमयी तनुः सा भवति । यथेयं तनुः सकलयज्ञमयी तथोत्तरत्र वक्ष्यते । अत्र रूपग्रहणेनैव तत्कार्यस्योक्तत्वात्का[3]र्यान्तर-मस्तीति तस्य निरूपकमाह । यज्ञे हि त्रयीद्विषो हन्तव्याः । भूमिश्च तैरेव तत्र नीता । **असुरा वा उत्तरतः पृथिवीं पर्याचिकीर्षन्नि**"ति श्रुतेः । अतस्तद्वधे कर्त्तव्ये "**मुख्ये कार्यसम्प्रत्यय**" इति न्यायेनाऽऽदौ दैत्यत्वं प्राप्तमादिदैत्यं तं प्रसिद्धं ददार विदीर्णं कृतवान् । तस्य [4]विदारणे हेतुरूपो दृष्टान्तः **अद्रिमिव वज्रधर इति** । यथा पर्वताः पक्षैरुद्यताः सर्वामेव पृथिवीं नाशयन्ति । तत्प्रतिपक्ष-तयेन्द्रेण च ते च्छिन्नपक्षाः कृतास्तथा भगवता हिरण्याक्षोऽपि भूम्यनिष्टकर्त्ता हत इत्यर्थः । तस्य च हननं समुद्र एव । तदाह—**अन्तर्महार्णव इति** । आगतमात्रत्वं वा । **दंष्ट्रयेति** तस्य न मुक्तिः । यमत्वाद्दंष्ट्रायाः । यदग्रे करेण हतवानित्यादि तन्न विदारण-रूपम् ॥ १ ॥ ❀ ❀ एवं प्रादेशमात्रस्याऽवतारमुक्त्वा पुरुषरूपस्याऽवतारमाह—**जातो रुचेरिति** । भगवतो हि यज्ञस्य [5]ध्यानरूपकर्माधिष्ठातृ रूपमेकत्र नाम चैकत्र । तत्र रूपं वराहे । नाम यज्ञनारायणे । स हि पुरुषरूपः । भगवान् पुरुषरूपाणि स्वरुच्या कृतवानिति रुचिनाम्नो ब्रह्मपुत्राज्जातः । तस्य भगवदवतारत्वे नियामकं रूपमाह—**अजनयत् सुयमानिति** अन्यो हि जातः कियता कालेन भार्यया सम्बद्धः पुत्रान् जनयति । स हि दक्षिणया भार्यया सहित एव जातः । सुयमान्देवांस्तन्मन्वन्तराधि-कारिणोऽजनयत् । सुयज्ञ इति नाम यस्य । शोभना यज्ञा यस्मात् । वराहो हि यज्ञरूपः । अयं देवतारूपः । आकूतिरिति मनो-र्ज्येष्ठकन्या । आकूतिर्बाह्यः प्रयत्नः । यज्ञो हि तेनैवाऽभिव्यज्यते । **अमरानथ दक्षिणायामिति** । पूर्वं यज्ञभुजो देवान् सृष्ट्वा पुनर-धिकारिणोऽपि देवान्सृष्टवानित्यथशब्दादवगम्यते । [6]अथ अमरान् देवान् सृष्टवान् स्वत एव । अथ दक्षिणायां बाह्यान् देवानि-त्यर्थः । अवतारस्य प्रयोजनमाह—**लोकत्रयस्येति** । महती आर्त्तिर्वृष्टियज्ञकर्माभावेन । तत्त्रितयसम्पादनेन अहरत् । दैत्योपद्रवेण वा । तद्धनेन । तस्मिन्मन्वन्तर इन्द्राधिकारिणोऽन्यस्याऽभावात्स्वयमेवेन्द्रो जात इत्याह—**स्वायम्भुवेनेति** । स हि स्वायम्भुवमनोः पुत्रिकापुत्रः । एको हि ब्राह्मणरूपः क्षत्रियरूपोऽपि जातः । न हि भगवदवतारव्यतिरेकेण द्वयं भवति कश्चित् । अत एव स्वयम्भुवेन ब्रह्मपुत्रेण तन्मातामहेन मनुना पूर्वं यज्ञ इत्युक्तोऽप्यनु पश्चाद्धरिरितीन्द्र इत्युक्तः । न ह्येकोऽधिकारद्वयं कर्त्तुं शक्तः । तस्माद्यज्ञशब्दप्रयोगाद्धरिशब्दप्रयोगाच्च पुरुषद्वयरूपो भगवान्निरूपितः । अलौकिको हि यज्ञः सर्वलोकात्मको हरिरिति ॥ २ ॥ ❀ ❀ "**वसन्तमि**"ति भगवद्ध्याने भगवद्विशेषणमुक्तम् । तस्य स्वरूपं निर्द्धार्यते केवलवासलक्षणम् । न हि कश्चिदपि किञ्चि-दप्यकृत्वा क्वचिदपि स्थातुं शक्नोति । "**न हि कश्चित्क्षणमपी**"ति वाक्यात् । अतः केवलस्थित्यर्थं स्वयं तथा स्थितः अन्यान् शिक्ष-यितुमेकं साङ्ख्यलक्षणं शास्त्रं कृतवान् । तदाह—**जज्ञे च कर्दमगृह इति** । केवलस्थितिनिरूपणार्थमाविर्भूतो जातोऽपि यथा सर्वं कुर्वन्नपि न करोतीति बोधयिष्यति, तथा सर्वत्र जातोऽपि न जात इति ज्ञापनार्थं जज्ञे चेत्युक्तम् । कर्दमस्य गृहे । "**छायायाः कर्दमो जज्ञ**" इति ब्रह्मणश्छायात उत्पन्नोऽप्यनुत्पन्नप्राय इति तद्गृहे जातस्तथा प्रदर्शनार्थम् । किञ्च । कर्दमस्य गृहं जलं भवती-त्यतिशुद्धे उत्पत्तिरुक्ता । पुष्करपलाशवन्निर्लेपत्वज्ञापनार्थं वा । कृधातोः कर्त्रर्थे[7] विच् प्रत्यये कृते गुणे लोपे च कृते करिति भवति । कृतिकर्त्ता भूत्वा यो दमरूपः । दमस्त्विन्द्रियसंयमः । तेन करोति न करोति चेति तस्य स्वरूपमेव । तादृशे हि जातः साङ्ख्य-प्रवर्तको भवति । **द्विजेति** सम्बोधनं तथात्वाभान्नारदस्याऽधि[8]क्षेपबोधकम् । **देवहूत्यां** मनोर्द्वितीयकन्यायाम् । देवानां हूतिर्यस्यामिति सर्वदेवतामयी सा निरूपिता । अनेनाऽतिसौन्दर्यं तस्या निरूपितम् । **स्त्रीभिः समं नवभिरिति** । प्रकृतेर्गु[9]ण-त्रयाभिमानिन्यो देवताः कर्तृत्वनिमित्तं सहैवाऽऽनीताः स्वयमकर्ता ताः कर्त्र्य इति । तासां भगिनीत्वख्यापनात्ता यत्र सम्बध्यन्ते स एव कर्त्ता, न तु सर्वथा असम्बद्ध इति साङ्ख्यसिद्धान्ते नियमो द्योतितः । अवतारस्य प्रयोजन-माह—**आत्मगतिमित्यादिना** । [10]यस्य हृदयात्साङ्ख्यशास्त्रमुत्पद्यते स एव हि तत्र मुख्योऽधिकारी । [11]स्वोत्पादकत्वबुद्धि-निवृत्त्यर्थं चाऽऽत्मतत्त्वरूपं साङ्ख्यं मात्रे उक्तवान् । आसुरिरपि साङ्ख्यं पठितवान् । तथापि तस्य प्रचारकत्वेनोपयोगान्न मुख्याधिकारित्वम् इयं तु मुख्याधिकारिणी । यतस्तदैव आत्मशमलं गुणसङ्गपङ्कलक्षणं तस्मिन्नेव [12]क्षणे विधूय यथा कपिलस्तथैव जाता । अतः स्त्रीजातिमत्त्वेऽपि मातृत्वेऽप्यात्मोपदेशः । आत्मनो गतिर्ज्ञानम् । स्वमात्र इत्युपदेशावश्यकता । भगवदवतारत्वाच्च न गुरुभ्य उपदेशो दोषाय । इदं हि ज्ञानं नित्यसिद्धम् । किन्त्वन्तः करणदोषान्न भासते । अतोऽन्तःकरणस्य

---

१. अधार्च्छदिति क. अध्यर्च्छदिति ग. अध आर्च्छदिति ङ. । २. पृथिवीत्वमिति क. ख. ङ. । ३. कार्यान्तरं तस्येति क. । ४. विदीर्णने इति क. ग. ङ. । ५. ध्यानरूपकर्माधिष्ठानरूपमिति क. घ. ङ. । ६. अथेति नास्ति घ. । ७. क्विप् प्रत्यय इति क. ग. ङ. । ८. अविक्षेप इति क. ङ. । ९. गुणाभिमानिन्य इति ख. । १०. यस्य हीति क. ख. ग. । ११. स उत्पादकेति क. । १२. लवण इति ब. ङ. ।

शमलं मोहजनकं पापम् । अस्मिन्नेवोपदेशे वा । कपिलस्य गतिं साङ्ख्यसिद्धान्तसिद्धानुभवम् । प्रपेदे प्राप्तवती ॥ ३ ॥ ❀ ❀ एवं भगवतो निश्चलस्थितिरूपं कपिलं निरूप्य चतुर्भुजत्वं भगवतो निरूपयति—अत्रेरिति । न विद्यन्ते त्रयो यस्य । पुत्रत्रयमवश्यभाव्यम् । तद्[1]भावाद्भगवत्प्रार्थना । अथवा । भार्या स्वयं च । पुत्राभावादत्रित्वम् । तस्य हि पुत्रत्रयसहिते स्वस्मिन्सम्पन्ने चतुर्भुजत्वं भवति । चतस्रः क्रियाशक्तयो भवन्त्युत्पत्तिस्थितिप्रलयास्तपश्चेति । योगस्तपश्च वंशश्च भगवद्भक्तिरेव च । एताः क्रियाश्चतस्रो हि भगवद्बाहुषु स्थिताः । अथवा [2]दातृदेयत्वमात्मनो बोधयत्यसौ । अत आत्मप्रदः कृष्णश्चतुर्भुज इतीरितः । तदाह—अपत्यमभिकाङ्क्षत । अपगतिं त्याजयतीत्यपत्यं दुर्गतिनिवारकम् । तत्र [3]पुत्रान्तरेण तेन वा पितृलोकप्रापणे परमार्थतो दुर्गतिरेव भवति । अतो भगवानेवं विचारितवान् । अयमपत्यं वाञ्छति तस्यापत्यार्थसिद्ध्यर्थमहमात्मानमेव दास्यामि । नाऽन्यथाऽपत्यत्वसिद्धिः । अभितः काङ्क्षणमेकेनैवाऽभ्युदयनिःश्रेयसोभयजननाय । अत एव श्रयमेवाऽऽह अत्रेस्तुष्टः सन् । भगवतो दत्तनामनिरुक्तिः न [4]दत्तः पुत्रत्वेन किन्त्वात्मप्रदत्वेनेति । तदाह—दत्तो मयाऽहमिति । मया अहमेव दत्तः । एकस्य कर्मकर्तृभावो न भगवद्व्यतिरिक्तस्य भवति । धर्मशास्त्रे अदेयत्वेनाऽऽत्मादयो गणिताः । ' धर्मदासो ज्येष्ठपुत्रो भार्या स्वात्मा तथैव च । सर्वस्वं गुरुवर्गश्च नैव देयमिति स्थितिरि'' ति वाक्यात् । अतः कथं भगवानात्मानं दत्तवानित्याशङ्क्याऽऽह—यद्भगवानिति । यस्मादयं भगवान् । जीवधर्मा एवैते । भगवांस्त्वात्मप्रदः । अन्यथा भजनीय एव न स्यात् । अत एव स दत्तः दत्तनामा जातः । दत्तात्रेय इति पितृनाम्ना सह नाम । अवतारप्रयोजनमाह—यत्पादपङ्कजेति । पूर्ववत्पादपङ्कज[5]परागसंस्कृतानि भगवदीयदेहजनकानि भूतानि । तैः शुद्धो देहो येषाम् । अत एवोभयीं योगर्द्धिमापुः सद्योमुक्ति-क्रममुक्तिरूपाम् । अणिमादयस्तु । क्रममुक्तावेव । ज्ञानभक्तिरूपां वा । यदुगुरुरवधूतोऽयम् । हैहयः सहस्रार्जुनः । स हि यादवः । तेन ऐहिकी सिद्धिः सहस्रबाहुरूपा प्राप्ता मोक्षश्च । एतेषां पुष्टिमार्गनिष्ठत्वान्न मर्यादाविरोधो दोषाय । आदिशब्देन प्रह्लादादयः । अतो भगवद्बाहूनां सङ्ख्यायामेवंरूपत्वमित्युक्तम् ॥ ४ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ सप्तमाध्यायं विवरिषवः पूर्वप्र[6]करणसङ्गतिं वक्तुं पूर्वोक्तार्थसङ्ग्रहपूर्वकं प्रस्तुताध्यायार्थमाहुः एवमित्यादि । अतति व्याप्नोतीत्यात्मा भगवान्, तदतिरिक्तानां अनित्यनित्यपरिच्छिन्नभेदभिन्नानां सर्वेषामुद्दिष्टपृष्टपदार्थानां उत्पत्त्या जननसमागमरूपया, एवं वस्तुत ऐक्येपि नियम्यतेतिनिर्णयः पूर्वाध्यायद्वयेन कृतः, अत्रास्मिन्नध्याये आत्मनो व्यापकस्यापि हरेर्निर्णयः तत्तद्धर्मरूपेण मूलरूपेण च प्राकट्यरूपोत्पत्तिनिर्णयो विनिरूप्यते सोपपत्तिक उच्यते । तथा च, नारदेन मुख्यतयाऽऽत्मन एव पृष्टत्वात्तन्निर्द्धारार्थमेव तद्व्यतिरिक्तनिर्णयोक्तेः स्थूलसूक्ष्मोत्पत्तिप्रकरणयोः शेषशेषिभावः सङ्गतिरित्यर्थः ॥ १ ॥ ❀ ❀ ननु स्थूलप्रकरण उद्दिष्टविमर्शस्य स्फुटत्वादत्र चावतारकथामात्रदर्शनादस्य कथं विमर्शेन्तर्भाव इत्याकाङ्क्षायामाहुः सूक्ष्मेत्यादि । तथा च, विवृतिस्फुटीकरणाद्विमर्शेन्तर्भाव इत्यर्थः । ननु स्थूलप्रकरण उद्दिष्टविमर्शस्य स्फुटत्वादत्र जडजीवयोर्ब्रह्मस्वभाववैलक्षण्येन तयोस्तद्भिन्नत्वभ्रमात्तद्वारणायोत्पत्त्या निर्णय उचितः । सूक्ष्मध्याने तु भगवतो गुणाभरणादयो भगवदविनाभूता एवोक्ता इति तन्निर्णयस्य किं प्रयोजनमत आहुः येनेत्यादि वस्तुत इति । वास्तवा अनागन्तुकास्तथा च तेषामनागन्तुकत्वेनाभेदाय निर्णय आवश्यक इत्यर्थः ॥ २ ॥ ❀ ❀ ननु कथामात्रेण कथं तद्धर्मविवृतिस्तवावगम इत्यत आहुः उपासनायामित्यादिद्वाभ्याम् । उपासनायां निदिध्यासने सर्वस्य हरेर्धर्मस्य स्वरूपगुणभेदेन बोधनार्थं निर्णयः यथावस्थितस्वरूपनिश्चयः इहास्मिन्नध्याय उच्यते, श्रुतौ तावत्पर्यन्तस्यैव साधनस्य कथनादुच्यते ॥ ३ ॥ ❀ ❀ तु पुनः मुख्यस्य 'वासुदेवे भगवती'त्यादिना २।२।३३ द्वितीयाध्यायोक्तस्यात्मादिनिरूपणशेषिणो भक्तिमार्गस्य निर्णीतं 'भगवान् ब्रह्मकार्त्स्न्येन' २।२।३४। इत्यनेन निर्द्धारितं फलं प्रेमभक्तिरूपं विनिरूप्यते सोपपत्तिकमुच्यते । तदङ्गं प्रेमभक्त्यङ्गं माहात्म्यादि च सोपपत्तिकमुच्यते । तेन हेतुत्रयेण विशिष्टं तत्तद्धर्मविशिष्टमन्तर्यामिस्वरूपं सिद्ध्यतीति योजना । अत्रायमर्थः स्थूलसूक्ष्मध्यानश्रवणोत्तरं राज्ञा'भूय एव विवित्सामि' २।४।६। इत्यादिना कृतेषु प्रश्नेषु श्रीशुकैरुत्तरस्य प्रमाणत्वाय 'एतदेवात्मभू राजन्' २।४।२५। इत्यादिना ब्रह्मनारदसंवाद उपक्षिप्तः । तेन द्वयोः प्रश्नयोस्तदुत्तरयोश्चैकविषयकत्वं ज्ञायते । तत्र चोत्तरे स्थूलध्यानोद्दिष्टाः पदार्था विवृत्योत्तरिता इति विवरणरूपता स्फुटा । अतः 'कुर्वन् कर्माणि जन्मभिः' २।४।९। इत्यवतारप्रयोजनसन्देहगर्भः प्रश्नोनुत्तरितो योवशिष्टस्तं नारदानुयुक्तात्मतत्त्व प्रश्नोत्तरभूतेनानेनाध्यायेन सूक्ष्मध्यानोद्दिष्टपदार्थविवरणरूपतयावतारकथां वदन्नुत्तरयतीति ज्ञायते । अन्यथा 'विशुद्धं' 'केवलं' २।६।३९। मि'त्यादिश्लोकद्वयेन मतान्तरनिरासपर्यन्तमात्मस्वरूपं निश्चाय्य 'आद्योवतार' २।६।४१। इत्यादिना रूपवद्स्वरूपमित्यन्तेन तदवताराणामुक्तत्वात् ब्रह्मा न लीलावतारान् स्मरेत्तेन

---

१. तद्भावादिति क. ग. । २. मातृदेयत्वमिति ख. । ३. पुत्रान्तरे इति क. ग. ङ. । ४. दत्तपुत्रत्वेनेति घ. ङ. । ५. परागःसंस्कृतानीति क. ख. ङ. । ६. प्रकारेति पाठः ।

ज्ञायतेऽतिरिक्तात्मस्वरूपमिदानीमेतेन पूर्णं ज्ञापितं भविष्यतीति तथैव शुकोक्तमन्तर्यामिस्वरूपमपीत्यन्तर्यामिण अतिरिक्तात्मनश्चैक्येऽतिरिक्तात्मावतारा अन्तर्यामिण एव स्वरूपविमर्शायेति द्वितीयाध्यायोक्तं भक्त्यादिकं च विमृष्टमतोऽस्य तद्विवरणरूपतेति ॥ ४ ॥

एवं कारिकाभिरर्थं सङ्गृह्य तदनु व्याकुर्वन्ति एवमित्यादि । यत्रोद्यत इत्यत्र आहेति ब्रह्मोक्तिमुखेन शुक आह । एवं सर्वत्र बोध्यम् । अन्तर्याम्यवतारत्वे गमकमत्र वदन्तो विवरणत्वं स्फुटीकुर्वन्ति ब्रह्मण इत्यादि । तथा च, प्रेरकस्यैवायमवतारोऽतोपि ज्ञायते तस्यैवेदं विवरणमिति । ननु परिमाणविरोधात् कथमेवमत आहुः स प्रादेशेत्यादि । तथा चास्वाभाविकत्वान्न विरोधो दोषायेत्यतस्तस्य तद्धर्मावतारत्वव्युत्पत्तिरित्यर्थः । प्रादेशमात्रमित्यत्र अङ्गुष्ठशिरोमात्रत्वमिति पाठः प्रतिभाति, (जाबाल) श्रुत्या निबन्धेन च तथा निश्चयादिति । मूलस्थलस्य यत्रेतिपदस्य तात्पर्यमाहुः यदैवेत्यादि गृहीतवानित्यन्तम् । 'सोपश्यदि'ति 'पशूनां वे'ति च श्रुतिद्वयं तैत्तरीयब्राह्मणस्थम् । उत्तरत्रेति तृतीयस्कन्धे, तत्कार्यस्येति जलाद्वस्तूद्धारस्य । 'असुरा वे'तिश्रुतिस्तैत्तरीयसंहिताषष्ठाष्टकथा । विदीर्णत इति, अत्र विदारण इति पाठः प्रतिभाति । यदग्र इति, यत्तृतीयस्कन्धे तेन सा कल्पान्तरकथेति प्रतिभाति । अथवा करेण तत्पराजयमात्रं, मारणं तु दंष्ट्रयेति ॥ १ ॥ ❀ ❀ जात इत्यत्र पुरुषधर्मावतारत्वं व्युत्पादयन्ति स हीत्यादि । तथा च, रूपादेवात्र तद्व्युत्पत्तिरित्यर्थः । स्वरुच्या कृतवानिति, अत्र च 'तेषां मे पौरुषीप्रिये'ति वाक्यं ज्ञापकं बोध्यम् । द्वयमिति युगपद्द्वयम् । एतेन विश्वामित्रादिवैलक्षण्यं ज्ञापितम् ॥ २ ॥ ❀ ❀ जज्ञे चेत्यत्र अत इत्यादि । तथा च, तादृशशास्त्रप्रणयनात्तस्य तदवतारत्वनिश्चय इत्यर्थः । क्विप्प्रत्यय इति अत्र विच् प्रत्यय इति पाठः प्रतिभाति । स्वोत्पादकबुद्धिनिवृत्त्यर्थमिति स्वस्यामुत्पादबुद्धिनिवृत्त्यर्थम् । अत इति अधिकारोत्कर्षात् । पाठान्तरमभिप्रेत्याहुः अस्मिन्निति ॥ ३ ॥ ❀ ❀ अत्रेरित्यत्र पुत्रत्रयस्यावश्यभाव्यत्वेपि त्रितयाकाङ्क्षाया अत्र चतुर्थस्कन्धे चास्फुटत्वान्नात्र बहुव्रीहिर्युक्त इत्यरुच्या नञ्समासेन व्याख्यानान्तरमाहुः अथवेति । तस्येति भगवतः । स्वस्मिन्निति अत्रौ । अयञ्च न सङ्ख्यामात्रस्यावतारः किन्तु तत्सहितानां बाहूनामिति ज्ञापनमाहुः चतस्र इत्यादि । ब्रह्मविष्णुशिवांशैरवतारादत्रेस्तपःपरत्वाच्च तथेत्यर्थः । अवतारेष्वेता न स्फुटा इत्यरुच्या पक्षान्तरं कारिकयाहुः योग इत्यादि । तपो दुर्वाससि, भगवद्भक्तिरत्रौ । ननु सोमदुर्वाससोरत्रेश्च परम्परितत्वाद्भगवदवतारत्वाप्रसिद्धेश्च नेदमपि युक्तमित्यरुच्या कारिकान्तरेण मुख्यं पक्षमाहुः अथ वेत्यादि । बोधयतीति चतुर्भिर्भुजैर्बोधयति । अत इति अवस्थाद्वयभेदेन तथात्वात्, तथा च, क्रियाशक्तयो नात्र प्रधानाः, किन्तु, स्वरूपधर्मस्यैव प्राधान्यम्, तेनैव तत्र तदवतारव्युत्पत्तिरित्यर्थः । पूर्ववदित्यादि । तथा च, यथा भगवानदेयमपि ददाति तथा संस्कृतभूतरूपं तच्च रजःसाधनाभावेपि देहं पवित्रयतीति तथेत्यर्थः । अणिमादीनां योगर्द्धित्वाङ्गीकारे तस्याः क्रममुक्तावेव सत्त्वेनोभयीति विशेषणं न सामञ्जस्येन युज्यत इत्यरुच्या पक्षान्तरमाहुः ज्ञानभक्तिरूपां वेति । तथा चोभयत्र योगपद्प्रयोगादेतदेव युक्तमित्यर्थः । मर्यादाविरोध इति पितृनिदेशाग्रहणहविर्धानीग्रहणकृतः स इत्यर्थः ॥ ४ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

देवादौ भक्तरक्षार्थं स्वैरं विहरतः प्रभोः ॥ प्राधान्येन तु प्राकट्यं सप्तमे विनिरूप्यते ॥ १ ॥

प्रथमं वाराहावतारमाह—यत्रेति । अनन्तो देशकालवस्तु-परिच्छेदरहितो भगवान् यत्र यदा क्षितितलोद्धरणार्थं क्रोडीं वाराहीं तनुं बिभ्रदुद्यतः उद्योगं कृतवांस्तदा अन्तर्महार्णवे महार्णवमध्ये उपागतं तं सुप्रसिद्धमादिदैत्यं हिरण्याक्षं दंष्ट्रया ददार विदारितवानित्यन्वयः । दृष्टान्तमाह—वज्रधर इन्द्रो यथाऽद्रिं ददार तथेति । न च करेण कर्णमूलेऽहन्निति वक्ष्यमाणेन विरोध इति शङ्कनीयम्, तत्र करस्य हननसाधनत्वमुक्तं, अत्र तु दंष्ट्राया विदारणसाधनत्वमिति । भेदस्य स्पष्टत्वात् । वाराहतनोर्निकृष्टत्वमाशङ्क्योत्तमत्वमाह—सकलयज्ञमयीमिति । यज्ञमयत्वं च तृतीयस्कन्धे स्पष्टं भविष्यति ॥ १ ॥ ❀ ❀ यज्ञावतारमाह—जात इति । रुचेः प्रजापतेः सकाशात्तद्भार्याया आकूतेः सूनुः सुतः सुयज्ञो नाम जातः । अथ च स्वभार्यायां दक्षिणायां सुयमान् अमरान् देवान् अजनयत् । स एव यदा इन्द्रः सन् दैत्यवधादिना लोकत्रयस्य महतीं आर्तिं पीडामहरत्तदा पूर्वं सुयज्ञ इत्युक्तोऽपि अनु पश्चात् स्वायम्भुवेन मनुना मातामहेन हरिरित्युक्तः । अनेन देवोत्पादनं लोकार्तिहरणं च तस्य कर्म दर्शितम् । एवं सर्वत्रावतारस्तत्कर्म च ज्ञेयम् ॥ २ ॥ ❀ ❀ कपिलावतारमाह—जज्ञे इति । हे द्विज नारद कर्दमस्य प्रजापतेर्गृहे च तद्भार्यायां देवहूत्यां नवभिः स्त्रीभिर्भगिनीभिः समं सह जज्ञे । स च स्वमात्रे आत्मगतिं ब्रह्मविद्यामूचे उक्तवान् । यया ब्रह्मविद्यया सा आत्मनः शमलं मलिनीकरणं गुणसङ्गरूपं पङ्कमस्मिन्नेव जन्मनि विधूय दूरीकृत्य कपिलस्य गतिं कपिलोक्तमात्मतत्त्वं प्रपेदे प्राप्तवती ॥ ३ ॥ ❀ ❀ दत्तात्रेयावतारमाह—अत्रेरिति । न पतति नरके पिता यस्मादित्यपत्यं पुत्रमभिकाङ्क्षतः कामयमानस्यात्रेस्तुष्टः सन् मयाऽहमेव तुभ्यं दत्त इति यत् यस्मादाह तस्मात्स भगवान् दत्त इति नाम्ना जातः । स्वभक्तेभ्यो योगैश्वर्यदानं तच्चरित्रं दर्शयति—यस्य दत्तस्य पादपङ्कजयोर्यैः परागस्तेन पवित्रा देहा येषां ते यदुहैहयाद्याः यदुः प्रसिद्धः हैहयः सहस्रार्जुनः तत्प्रभृतय उभयीमैहिकीमणिमाद्यैश्वर्यरूपामामुष्मिकीं मुक्तिरूपां च योगर्द्धिमापुः प्राप्तवन्तः ॥ ४ ॥

### हिन्दी अनुवाद

ब्रह्माजी कहते हैं—अनन्त भगवान्‌ने प्रलयके जलमें डूबी हुई पृथ्वीका उद्धार करनेके लिये समस्त यज्ञमय वराह-शरीर ग्रहण किया था। आदिदैत्य हिरण्याक्ष जलके अन्दर ही लड़नेके लिये उनके सामने आया। जैसे इन्द्रने अपने वज्रसे पर्वतोंके पंख काट डाले थे, वैसे ही वराह भगवान्‌ने अपनी दाढ़ोंसे उसके टुकड़े-टुकड़े कर दिया॥ १॥ ❀ ❀ फिर उन्हीं प्रभुने रुचि नामक प्रजापतिकी पत्नी आकूतिके गर्भसे सुयज्ञके रूपमें अवतार ग्रहण किया। उस अवतारमें उन्होंने दक्षिणा नामकी पत्नीसे सुयम नामके देवताओंको उत्पन्न किया और तीनों लोकोंके बड़े-बड़े सङ्कट हर लिये। इसीसे स्वायम्भुव मनुने उन्हें 'हरि' के नामसे पुकारा॥ २॥ ❀ ❀ नारद! कर्दम प्रजापतिके घर देवहूतिके गर्भसे नौ बहिनोंके साथ भगवान्‌ने कपिलके रूपमें अवतार ग्रहण किया। उन्होंने अपनी माताको उस आत्मज्ञानका उपदेश किया, जिससे वे इसी जन्ममें अपने हृदयके सम्पूर्ण मल तीनों गुणोंकी आसक्तिका सारा कीचड़ धोकर कपिल भगवान्‌के वास्तविक स्वरूपको प्राप्त हो गयीं॥ ३॥ ❀ ❀ महर्षि अत्रि भगवान्‌को पुत्ररूपमें प्राप्त करना चाहते थे। उनपर प्रसन्न होकर भगवान्‌ने उनसे एक दिन कहा कि 'मैंने अपने आपको तुम्हें दे दिया।' इसीसे अवतार लेनेपर भगवान्‌का नाम 'दत्त' ( दत्तात्रेय ) पड़ा। उनके चरणकमलोंके परागसे अपने शरीरको पवित्र करके राजा यदु और सहस्रार्जुन आदिने योगकी भोग और मोक्ष दोनों ही सिद्धियाँ प्राप्त कीं॥ ४॥

तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात् स्वतपसः स चतुःसनोऽभूत्।
प्राक्कल्पसम्प्लवविनष्टमिहात्मतत्त्वं सम्यग् जगाद मुनयो यदचक्षतात्मन्॥५॥
धर्मस्य दक्षदुहितर्यजनिष्ट[1] मूर्त्यां[2] नारायणो नर इति स्वतपःप्रभावः[3]।
दृष्ट्वाऽऽत्मनो भगवतो नियमावलोपं देव्यस्त्वनङ्गपृतना घटितुं न शेकुः॥६॥
कामं दहन्ति कृतिनो ननु रोषदृष्ट्या रोषं दहन्तमुत ते न दहन्त्यसह्यम्।
सोऽयं यदन्तरमलं प्रविशन् बिभेति कामः कथं नु पुनरस्य मनः श्रयेत॥७॥
विद्धः सपत्न्युदितपत्त्रिभिरन्ति राज्ञो बालोऽपि सन्नुपगतस्तपसे वनानि।
तस्मा अदाद् ध्रुवगतिं गृणते प्रसन्नो दिव्याः स्तुवन्ति मुनयो यदुपर्यधस्तात्॥८॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

कुमारावतारमाह। मे मयादौ यत्तपस्तप्तं तस्मात्स्वतपसो मत्तपसो हेतोः स हरिश्चतुःसनोऽभूत् सनत्कुमारः सनकः सनन्दनः सनातन इति चत्वारः सनशब्दा नाम्नि यस्य सः। कथंभूतात्स्वतपसः सनादखण्डितात्। यद्वा। स्वतपसः सनाद्दानात् समर्पणादित्यर्थः। षणु दाने धातुः। स च पूर्वकल्पस्य संप्लवे प्रलये विनष्टमुच्छिन्नसम्प्रदायमात्मतत्त्वमिहास्मिन्कल्पे सम्यग्जगादोक्तवान्। सम्यक्त्वं दर्शयति। यदुदितमात्रमेव मुनय आत्मन् आत्मनि मनस्यचक्षत साक्षादपश्यन्॥ ५॥ ❀ ❀ नरनारायणावतारमाह। धर्मस्य पत्न्यां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नर इति मूर्तिद्वयेन जातः। कथंभूतः? स्वोऽसाधारणस्तपः प्रभावो यस्य। तदेवाह। अनंगस्य पृतना देव्योऽप्सरसो भगवतः सकाशादात्मनः स्वप्रतिरूपा उर्वश्याद्याः स्त्रीर्दृष्ट्वा तस्य नियमावलोपं व्रतभंगं घटितुं साधयितुं न शेकुः। यद्वा। आत्मनः स्वस्य यो नियमस्तपोनाशरूपस्तस्यावलोपं तत्र दृष्ट्वा भगवतस्तं घटयितुं न शेकुरिति। एतद्व्याख्यानमेकादशे भविष्यति॥ ६॥ ❀ ❀ यत्र कामविजयी क्रोधोपि बिभेति तत्र कामो न प्रभवतीति किं वक्तव्यमित्याह। काममिति। कृतिनः श्रीरुद्रप्रमुखा रोषयुक्तया दृष्ट्या कामं दहंति। रोषं त्वात्मनं दहंतमपि तेऽपि न दहंति क्रोधेन नाभिभूयंत इत्यर्थः। नु अहो सोऽयं रोषो यदंतरं यन्मध्यं प्रविशन्नलं बिभेति। यद्वा। यस्यांतर्मनः। कथंभूतम्। अमलं निर्मलं शुद्धसत्त्वात्मकं प्रविशन्निति॥ ७॥ ❀ ❀ चरित्रेणैव कमप्यवतारं सूचयति। मातुः सपत्न्याः उदितान्युक्तानि वाक्यान्येव पतत्रिणो बाणास्तैर्विद्धो ध्रुवो राज्ञ उत्तानपदोऽतिसमीपे तपसे तपस्तप्तुं ध्रुवगतिं ध्रुवपदम्। यत यामुपरि स्थितामधस्तात्स्थिताः। दिवि भवा दिव्याः सप्तर्षयः स्तुवंति। यद्वा उपरि भृग्वादयः अधस्तात्सप्तर्षय इति॥ ८॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

सनशब्दस्याखण्डितार्थी प्रसिद्धिं मत्वाह। यद्वेति। संदर्भस्तु—आदौ प्रथमं सनात् तन्नामाऽभवत् 'सनात्सनातनतमः' इति विष्णुसहस्रनामसु श्रवणात्॥ ५॥ ❀ ❀ अवलोपमित्यत्र भागुरिमतेऽवेत्यस्याकारलोपे पुनर्नञा समासेऽवलोपमिति

---

1. प्रा० पा० य। 2. पा० या भवत्स्वमूर्त्या। 3. प्रा० पा प्रभावात्।

सिद्धम्। संभवत्वादर्थांतरमाह। यद्वेति। तत्र भगवति तं नियमावलोपम् ॥ ६ ॥ ❀ ❀ इत्यर्थ इति। क्रोधः कामाद्बलीयानिति भावः ॥ ७ ॥ ❀ ❀ अत्र विश्वनाथः—पृश्निगर्भावतारमाह। विद्ध इति। ध्रुवगतिं नित्यस्थलविशेषमित्यर्थः। मुनिशब्दो न केवलं सप्तर्षिपरमेवेति तत्राह—यद्वेति। वासुदेवावतारोयं पृश्निगर्भो ज्ञेयः। "त्वमेव पूर्वसर्गे भूः पृश्निः स्वायंभुवे सति। तदायं सुतपा नाम प्रजापतिरकल्मषः ॥ अहं सुतो वामभवं पृश्निगर्भ इति स्मृतः" इति दशमे कर्माश्रवणादत्र तु जन्माश्रवणात् जन्मकर्मणोः परस्परसापेक्षत्वादेकत्र संगतेरौचित्यात् तदुक्तं भागवतामृते "अस्यात्र चरितानुक्त्या नामानुक्त्या च तत्र वै ॥ परस्परमपेक्षित्वाद्युक्ता चैकत्र संगतिः" इति। न चात्र ध्रुवार्थं वैकुंठान्नारायण एवागतस्तेन पृथगेवायं ध्रुवप्रियोऽवतार इति वाच्यं, तदुक्तं तत्रैव—"तत्रागमनमात्रेण यदि स्यादवतारता। अन्यत्रापि प्रसज्जेत यथेष्टं तत्प्रकल्पना" इति। केचित्तु श्रीवासुदेवोयं ध्रुवार्थमवतीर्णः। यः खलु ध्रुवलोकाधिष्ठातेति गम्यते तस्य तु द्वादशाक्षरविद्योपासनया तल्लोकप्राप्तेस्तद्भक्तत्वमेव "ययोत्तानपदः पुत्रो ध्रुवः कृष्णपरायणः" इत्याद्युक्तेरित्याहुः ॥ ८ ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

सनात् अखडितादिति। अत्र सनात् इत्यव्ययम् ॥ ५—७ ॥ ❀ ❀ कमप्यवतारमिति। या ध्रुवाय प्रसन्नः सन् ध्रुवपदम् अदात् तम् अवतारमित्यर्थः। ध्रुवप्रियोऽयं वासुदेवावतारः पृश्निगर्भ इति ज्ञेयम्। तदुक्तं श्रीमद्रूपगोस्वामिचरणैः श्रीभागवतामृते—स्वायंभुवेऽवतारोक्तेर्नाम्नश्चाकथनादिह। यज्ञादीनाञ्च तत्रोक्त्या पारिशेष्यप्रमाणतः। प्रसिद्ध्या पृश्निगर्भेति तदाख्याऽस्य निगद्यते ॥ इति ॥ ८ ॥

## श्रीमद्वीरराघवव्याख्या

कुमारावतारमाह तप्तमिति। नानाविधलोकानां स्रष्टुमिच्छया मे मया यत्तपस्तप्तं तस्मात्सुतपसः महत्तपसो हेतोः स हरिरादौ सनात् दीर्घ आर्षः सनाख्यनामकः कथंभूतः चतुः सनः चतुर्थः सनः सनको यस्य स चतुः सनः अभूत्सनातनसनंदनौ द्वितीयतृतीयौ अभूतामित्यभिप्रायः। चतुः सनः चत्वारः सनशब्दा नामसु यस्य स चतुः सनः अस्मिन्पक्षे आदौ कल्पादौ सनादिति तपोविशेषणमखंडितादित्यर्थः। यद्वा तपस इति षष्ठ्यंतं तपसः सनात्समर्पणादित्यर्थः। षणुदाने। स च जातो हरिः पूर्वकल्पसंप्लवे प्रलये विनष्टं विच्छिन्नसंप्रदायं आत्मतत्वं इहास्मिन्कल्पे सम्यग्जगाद उक्तवान् सम्यक्त्वं दर्शयति यद्वदितमात्रमेव। मुनयः आत्मन्यात्मनि मनसि साक्षादपश्यन् यद्वा यद्वदितमेवात्मनि तत्वं मुनयः अचक्षत अन्येभ्योऽप्युक्तवंत इत्यर्थः ॥ ५ ॥ ❀ ❀ नरनारायणावतारमाह धर्मस्येति। धर्मस्य पत्न्यां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नर इति मूर्तिद्वयेन स हरिरभवज्जातः कथंभूतः स्व असाधारणस्तपः प्रभावो यस्य सः। यद्वा स्वविषयकं यत्तपस्तस्य प्रभावो यस्य सः। उपायांतराभावात् प्रभावमेवाह अनंगपृतना मन्मथसेना देव्यः अप्सरसः आत्मनः परमात्मनो भगवतः अनियमावलोपं नियमालोपाभावं दृष्ट्वा घटितुं स्ववशीकर्तुं न शक्नुवंत्यः ॥ ६ ॥ ❀ ❀ किंच काममिति रोषदृष्ट्या कामं दहंति ते रोषं त्वात्मानं दहन्तमसह्यं सोढुमशक्यं न दहंति नाभिभवंति किंतु तेनैवाभिभूयंते इत्यर्थः। सोयं रोषः यदंतरं भगवतो मनः प्रति प्रविशन्नलं बिभेति प्रवेष्टुमधिकं बिभेतीत्यर्थः। यस्य मनः कामः मन्मथः कथं नु श्रयेत न कथमपीत्यर्थः। कामजेत्राप्यजेयं रोषं जितवतो मनः कामः कथं श्रयेदित्यर्थः ॥ ७ ॥ ❀ ❀ चरित्रेणैव कमप्यवतारं सूचयति विद्ध इति। राज्ञ उत्तानपद अंति अंतिके मातुः सपत्न्याः सुरुचेः उदितान्येव वाक्यान्येव पत्रिणो बाणास्तैर्विद्धः ताडितः बालोऽपि सन् तपसे तपश्चर्तुं वनानि यो ध्रुवो गतः तस्मै गतवते ध्रुवाय गृणते स्तुवते प्रसन्नो हरिः ध्रुवगतिं स्थायिपदम् अदात् सोऽप्येक अवतार इत्यर्थः। ध्रुवगतिं विशिनष्टि यदुपरि यद्ध्रुवगतेरुपरि अधः अधस्ताच्च दिव्या मुनयः सप्तर्षिप्रभृतयः स्तुवंति ध्रुवगतिप्रभावं प्रशंसंतीत्यर्थः ॥ ८ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

आदावित्युभयत्र संबध्यते अत्रादौ मया विविधलोकसिसृक्षया तपस्तप्तं कृतं तदा मे मम तपतः तपः कुर्वतः [१]सुतपसः सर्वपूज्यतपसः सनादादौ सनोत्पत्तेः पूर्वं नोऽस्माकमर्थे स विष्णुनामाऽभूदित्यन्वयः। अवतीर्य च यत्तत्वं मुनय आत्मन्नात्मनि हृदयपद्मकर्णिकायामचक्षत। प्राक्कल्पस्य संप्लवेन जलीभावेन प्रलयेन इह जगति विनष्टं तिरोहितमात्मतत्त्वं सम्यग् जगाद ममोपदिदेशेत्यन्वयः। ब्रह्मणस्तपः पूर्वं विष्णुर्जात उरुक्रम इत्यादिवाक्यं चेममर्थमनुवदति। सनोत्संभाजनात्समाराधनलक्षणात् सुतपसः साधनात् ज्ञानभक्तिरूपात् करणादिति यावत् स आराधितो देवः चतुःसनोऽभूत् सनकः सनंदनः सनातनः सनत्कुमार इति चतुर्मूर्तिरभवदितीदं पूर्वोक्ततु[२]ल्यमिति अस्याऽवतारस्य प्रयोजनं जगद्रक्षणमात्मतत्त्ववचनं प्रासंगिकमिति ज्ञातव्यं तदभिप्रायेणोक्तमाचार्यैः सर्वज्ञैः यश्च पाति सदा लोकानजितो जयतां वर इत्यादेः ॥ ५ ॥ ❀ ❀ धर्मस्य सकाशात् दक्षदुहितरि दक्षपु[३]त्र्यां स्वमूर्त्या सचिदा-

१. सतः। २. नाम्ना यज्ञनामिति। ३. इदमुपलक्षणं हरिः कृष्ण इति च। तथा च चत्वारो धर्मतनया इत्यर्थः।

नंदलक्षणस्वदेहेन नारायणो नर इति नाम्ना ऽजनि । कीदृशः स्वतपसः स्वज्ञानस्य प्रभावो माहात्म्यं यस्मिन्स स्वतपःप्रभावः प्रतापमाहात्म्ययोः प्रभावः स्यादित्यतो लोकशिक्षार्थं स्वतपसः प्रभावः प्रतापवान् वा अत्रेदं तात्पर्यं नारायणो हरिः कृष्ण इति त्रयो विष्णोः साक्षादवतारा नरनाम्न्यंतर्यामितया नरनामाऽवतीर्ण इति । तत्र लोकशिक्षार्थं तपः कुर्वाणो बदर्यां वसंतौ सहैव तिष्ठत इति नारायणो नर इत्येतावेवोक्ताविति ज्ञातव्यं नरो नारायणश्चैव हरिः कृष्णस्तथैव चेत्यादिवचनात् । स्वतपःप्रभाव इत्युक्तं विवृणोति दृष्टात्मन इति । दृष्टात्मनो नित्यमपरोक्षीभूतनिजस्वरूपस्य नरनारायणात्मनो भगवतो नियमावलोपं तप आदेर्भंगं अनंगस्य पृतनाः सेनास्थानीया देवस्त्रियो घटितुं कर्तुं न शेकुरित्यन्वयः । किंच स्वतोप्यधिकसौंदर्यमंदिराणां भगवता तत्क्षणसृष्टानां स्त्रीणां दर्शनाल्लज्जितास्ततोन्ववर्तंतेत्यस्मिन्नर्थे तु शब्दः यद्यप्यनंगपृतनास्तथापीत्यस्मिन्नर्थे वा ॥ ६ ॥ ❀ ❀ क्रोधवत एव मनसि कामः पदं लभते हरेस्तु स एवपदं न प्राप्नोति नितरां कामोतस्तत्साधनं कार्यक्षममभूदित्याह काममिति । कृतिनो महात्मानो शंकरादयो रोषाविष्टदृष्ट्या कामं दहन्ति ननु प्रसिद्धोऽयमर्थः । उतशब्दोऽप्यर्थे तेऽपि दहंतं रोषं न दहंति तत्र हेतुगर्भं विशेषणमाह असह्यमिति । सोऽयं रोषो मधुसूदने अंतः मनोनिविशन् निवेष्टुमिच्छन् अलं बिभेति । अत्र हेतुरमलमिति वा क्रोधनिवेशनसहकारिरागद्वेषलक्षणमलविधुरत्वादित्यर्थः । कामोऽस्य हरेर्मनः कथं नु श्रयेत न कथमपि सहकारिणः क्रोधस्य प्रवेशसंदेहादित्यर्थः । कंचनावसरमासाद्यापीत्यस्मिन्नर्थे पुनरिति ॥ ७ ॥ ❀ ❀ यदुत्तानपादनाम्नो राज्ञोंतिके सुरुच्या सपत्न्या उदितपत्रिभिर्वाग्बाणैर्विद्धः सन् बालोऽपि पुरादुपगतो निर्गतस्तपसेवनायाऽगमदिति शेषः । तत्र नारदोपदिष्टविधिना तपश्चरते प्रत्यक्षं दृष्ट्वा गृणते स्तुवते तस्मै ध्रुवाय तपसा प्रसन्नो हरिर्वासुदेवनामविग्रहविशेषं गृहीत्वा ध्रुवगतिं नित्यस्थानमदादित्यन्वयः । वैकुंठाद्यन्यतममदात्किमित्याशंक्यत तद्विशिनष्टि दिव्या इति । यदुपर्यधस्तात् यस्या ध्रुवगतेरुपर्यधस्तात् स्थिता अंबरचारिणो मुनयो यां स्तुवंति तमिति शेषः । अवतारो महाविष्णोर्वासुदेव इतीरित इत्यादेः । किंनामायमवतार इति शंका निरस्तेति ॥ ८ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

सनादिति । तन्नामा भगवानित्यर्थः, सनात् सनातनतम इति सहस्रनामस्तोत्रात् ॥ ५ ॥ ६ ॥ ७ ॥ ❀ ❀ विद्ध इति । श्रीवासुदेव एवायं ध्रुवार्थमवतीर्णः यः खलु ध्रुवलोकाधिष्ठातेति गम्यते । तस्य द्वादशाक्षरविद्योपासकत्वात् तल्लोकप्राप्तेश्च ॥ ८ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

कुमारावतारमाह । मे मया आदौ यत् तपस्तप्तं तस्मात् स्वतपसो हेतोः सहरिः चतुःसनोऽभूत् । सनकसनन्दनसनातनसनत्कुमारा इति चत्वारः सनशब्दा नाम्नि यस्य सः । अतएव सनादिति च नाम, सनं सनशब्दम् अतति व्याप्नोतीति सः, सनात् सनातनतम इति सहस्रनामस्तोत्रात् इह अस्मिन् कल्पे आत्मतत्त्वं सम्यक् जगाद यत् गदितमात्रमेव मुनयः आत्मन् स्वमनसि अचक्षत साक्षादपश्यन् ( ५ ) नरनारायणावतारमाह । धर्म्मस्य पत्न्यां मूर्त्यां नारायणो नर इति स्वरूपद्वयेन जातः । स्वः असाधारणः तपः प्रभावो यस्य सः । अनङ्गस्य पृतना देव्यः अप्सरसः तपोभङ्गार्थमागता आत्मन इति जात्यैकत्वम् । आत्मभ्यो हेतुभ्यो नियमावलोपं तपोभङ्गाभावं दृष्ट्वा घटितुं न शेकुः । शापभयस्तब्धा बभूरित्यर्थः । भागुरिमते अवेत्यस्याकारलोपे नञा अवलोप इति सिद्धम् । यद्वा भगवतः सकाशात् आत्मनः स्वप्रतिरूपा उर्व्वश्याद्या स्त्रीर्नियमावलोपं व्रतभङ्गाभावञ्च दृष्ट्वा घटितुं न शेकुर्विस्मयेन स्तब्धा बभूवुरित्यर्थः ॥ ६ ॥ ❀ ❀ भगवतः कामविजयोऽयं नाद्भुतः यतस्तत्र क्रोधमकुर्व्वाणः क्रोधजयमप्यन्यैर्दुष्करं कृतवानित्याह काममिति । कृतिनः श्रीरुद्रप्रमुखा रोषयुक्तया दृष्ट्या कामं दहन्ति रोषं त्वात्मानं दहन्तमपि न दहन्ति रोषेणाभिभूयन्ते इत्यर्थः । ननु अहो सोऽयं रोषः यदन्तरं यन्मध्यं प्रविशन्नलं बिभेति । यद्वा यस्यान्तः मनः । कथम्भूतम् अमलम् ॥ ७ ॥ ❀ ❀ पृश्निगर्भावतारमाह विद्ध इति । मातुः सपत्न्या सुरुचेः उदितानि वाक्यान्येव पत्रिणो बाणास्तैर्विद्धो ध्रुवः राज्ञः उत्तानपदोऽन्ति समीपे । तपसे तपस्तप्तुम् । गृणजे स्तुवते । ध्रुवपदं नित्यस्थलविशेषमित्यर्थः । यत् याम् उपरिस्थिताम् अधस्तात् स्थिता दिवि भवाः दिव्याः सप्तर्षयः स्तुवन्ति । यद्वा उपरिस्थिता भृग्वादयः अधस्तात् सप्तर्षयः । वासुदेवावतारोऽयं पृश्निगर्भो ज्ञेयः । त्वमेव पूर्व्वसर्गेऽभूः पृश्निः स्वायम्भुवे सति तदायं सुतपा नाम प्रजापतिरकल्मषः । अहं सुतो वामभवं पृश्निगर्भ इति स्मृतः । इति दशमे कर्म्माश्रवणात् अत्र तुजन्माश्रवणात् जन्मकर्म्मणोः परस्परसापेक्षत्वादेकत्र सङ्गतेरौचित्यात् । यदुक्तं श्रीभागवतामृते—अस्यात्र चरितानुक्त्या नामानुक्त्या च तत्र वै । परस्परमपेक्षित्वाद्युक्ता चैकत्र सङ्गतिः । इति । न चात्र ध्रुवार्थं वैकुण्ठान्नारायण एवागतः तेन पृथगेवायं ध्रुवप्रियोऽवतार इति वाच्यम् । यदुक्तं तत्रैव—तत्रागमनमात्रेण यदि स्यादवतारता । अन्यत्रापि प्रसज्जेत यथेष्टं तत्प्रकल्पना इति ॥ ८ ॥

---

१. मूर्तिसंज्ञायाम् ।

## श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः

चतुःसनावतारमाह तप्तमिति । विविधलोकसिसृक्षया मे मया यत्तपस्तप्तम् तस्य स्वतपसः सनात् षणुदाने भगवति दानात्समर्पणाद्धेतोः स भगवानेव आदौ चतुः सनः सनत्कुमारः सनकः सनंदनः सनातन इति चत्वारः सनशब्दा नाम्नि यस्य स अभूत् नानालोकाचार्येभ्यः प्राक्तपोऽर्पणतुष्टो भगवानेव मोक्षशास्त्राचार्यतया जात इत्यर्थः । मोक्षधर्मे मरीचिरंगिरात्रिश्च पुलस्त्यः पुलहः क्रतुः वशिष्ट इति सप्तैते मानसा निर्मिता हि ते । एते वेदविदो मुख्या लोकाचार्याश्चकल्पिता इति । प्रवृत्तिमार्गाचार्यानभिधाय सनः सनत्सुजातश्च सनकः ससनंदनः सनत्कुमारः कपिलः सप्तमश्च सनातनः सप्तैते मानसाः प्रोक्ता ऋषयो ब्रह्मणः सुताः । स्वयमागतविज्ञाना निवृत्तिधर्ममास्थिताः । एते योगविदो मुख्याः सांख्यज्ञाना विशारदाः । आचार्या मोक्षशास्त्रेषु मोक्षधर्मप्रवर्त्तका इति । मोक्षधर्मप्रवर्तका आचार्या दर्शिताःयद्यपि ते स्वयमागतविज्ञानास्तथापि स्वसंप्रदायस्य परमाभ्यर्हितत्वसिद्धये भगवतः पुरुषोत्तमस्य एतावान् योग आदिष्टो मच्छिष्यैः सनकादिभिरित्यादिवचनात्शिष्या भूत्वा छांन्दोग्यादिप्रसिद्धदेवर्ष्यादिशिष्यद्वारा ज्ञानभक्तिप्रधानं निवृत्तिधर्मसंप्रदायं उक्तवान् । प्रवर्तयामासुः एतदेव संप्रदायप्रवर्तनरूपं तत् कर्म दर्शयति प्रागिति । स चतुः सन भगवान् प्राकल्पस्य संप्लवे प्रलये बिनष्टमुच्छिन्नसंप्रदायं इह अस्मिन्कल्पे आत्मनो भगवतः तत्त्वं गुणसरूपयाथात्म्यं सम्यक् जगाद स्वशिष्येभ्य तेपि मुनयः श्रुतं ह्येव भवत ऋषिभ्यस्तरति शोकमात्मविदिति सोहं भगवः शोचामि तं मां भगवान् शोकस्य पारं तारयतु इत्यादि श्रुतिप्रसिद्धाः तच्छिष्याः श्रीनारदादयः यद्गदितमात्रमेव आत्मन् आत्मनि मनसि अचक्षत साक्षादपश्यन् ॥ ५ ॥ ❀ ❀ नरनारायणावतारमाह धर्मस्येति । धर्मस्य दुहितरि मूर्त्यां स भगवान् नारायणो नर इति युगलस्वरूपोऽजनिष्ट प्रादुरभूत् कीदृशः स्वतपःप्रभावः स्वकीययजनतपसि प्रकृष्टोभावस्तप आचरणाऽभिप्रायो यस्य सः स्वकीयान् एवं तपः कर्तव्यमिति बोधयितुं तपोनिष्ठमूर्तिद्वयमाविष्कृतवानित्यर्थः । स्वकीयजनशिक्षार्थं तस्य तपोनिष्ठां दर्शयति । अनंगस्य कामस्य पृतनाः सेना देव्योऽप्सरसः आत्मनो नियमस्य तपोनाशनरूपस्यावलोपं दृष्ट्वा भगवतः नियमावलोपं व्रतभंगं घटितुं न शेकुः न शक्ता बभूवुः । तच्चैकादशे स्कंधे स्फुटीभविष्यति ॥ ६ ॥ ❀ ❀ कामविनाशकस्य क्रोधस्यापि यत्र स्पर्शलेशो नास्ति तत्र कामस्य सलेशस्य का कथेत्याह काममिति । कृतिनः कामस्तु वासुदेवांशो दग्धः प्राग्रुद्रमन्युनेति वक्ष्यमाणाद् रुद्रप्रमुखाः रोषदृष्ट्या कामं दहंति असह्यं सोढुमशक्यं रोषं त्वात्मानं दहंतमपि न दहंति ननु अहो सोऽयं कामजयिनामपि विजेता रोषः यस्य भगवतः अतरं मनः प्रति प्रविशन्नलमधिकं बिभेति बिभ्यति अस्य भगवतो मनः कामः पुनः कथं नु श्रयेत प्रवेष्टुं शक्नुयान्न कथमपीत्यर्थः ॥ ७ ॥ ❀ ❀ ध्रुववरदावतारमाह । राज्ञः स्वपितुः अन्ति समीपे एव तत्रापि बाल एवेति स्त्रीणां स्त्रैणानां च दौरात्म्यद्योतनेन मुमुक्षुभिस्तत्संगो हेय एवेति सूचयति । मातुः सपत्न्याः सुरुच्या उदितानि वाक्यान्येव पत्रिणो बाणाः तैर्विद्धः ताडितः बालोऽपि सन् ध्रुवः तपसे तपश्चरितुं वनानि उपगतः तस्मै गृणते स्तुवते प्रसन्नः भगवान् ध्रुवगतिं स्थायिपदमदात् । यत् यां दिव्याः दिवि भवाः उपरिस्थिताः भृग्वादयः अधस्थिताः सप्तर्षयः स्तुवन्ति ॥ ८ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

"कञ्जरथाङ्गशङ्खगदाधर" मित्यस्य विशेषणस्य स्वरूपमाह—तप्तमिति । एते हि सनकादयश्चत्वारो भगवदायुधरूपाः । ते[1] हि यद्यपि तत्त्वरूपाः । मुख्यतत्त्वं गदा, अपां तत्त्वं शङ्खः, तेजस्तत्त्वं सुदर्शनं[2], कार्यतत्त्वं पद्ममिति । तेजोऽबन्नानि प्राणाश्चेत्युक्तं भवति । तेषां स्वरूपेणैव तत्त्वता । कार्यवत्त्वेन[3] यद्रूपं तदिहोच्यते । न केवलं तत्त्वमात्रेण कार्याऽऽवेशरहितेनाऽऽयुधभावः सम्पद्यते । ते हि येन तथा भवन्ति तदुच्यते । "तपो मे हृदयं साक्षादि"ति वाक्याद्भगवतः साधनं तप एव । तद्धि क्रियया व्याप्तमिति । हस्तैः पद्मादिधारणम् । तप सोऽपि[4] वैलक्षण्य माह—मया पूर्वं चतुर्विधभूतनिकायसृष्ट्यर्थं तप्तं तपः । आदौ सृष्टे पूर्वम् । ततोऽपि न किञ्चिज्जातं यदा तदा तत्तपो भगवते दत्तं समर्पितम् । तस्य तपसः सनात् दानात् । षणु[5] दाने । अतो दानाद्धेतोः स भगवानेव चतुः सनो जातः सनक-सनन्दनसनातन-सनत्कुमाररूपेण । आवेशपक्षेऽप्येतदुपपद्यते । मूर्त्तिचतुष्टये एक एव भगवानाविष्ट इति । अवतारप्रयोजनमाह—प्राक्कल्पसम्प्लवविनष्टमिति[6] । यज्ञः साङ्ख्यं च योगश्च ज्ञानं त्वत्र निरूप्यते । पूर्वकल्पे आत्मज्ञानस्य सम्पूर्णो नाशो जातः । तत्पुनरिह अस्मिन्कल्पे सम्यग्जगाद । अनुभवपर्यन्तं यथा भवति । येनैव सनकाद्युक्तेन मुनयो मननशीलाः श्रौतप्रकारेण मननमपि कुर्वाणा न तेन मार्गेणाऽऽत्मानं दृष्टवन्तः, किन्तु सनकोक्तमार्गेण । यस्मादात्मानमेवाऽचक्षत दृष्टवन्तः । आत्मन्निति द्वितीयाया लोपः । सप्तम्या वा । तदा स्वात्मनि भगवन्तं दृष्टवन्त इत्यर्थः । साधारणा भक्तिमार्गाधिकारिणो "ये ये हताश्चक्रधरेण राजन्" ति न्यायेनाऽनेन मार्गेण मुक्ता भवन्तीत्युक्तं भवति । ते हि पूर्वमपि भगवद्वैकुण्ठस्थितियोग्यास्तस्मात्प्रच्युता इति पुनस्तत्र

---

१. तर्हि यद्यपीति ख. । २. सुदर्शनः इति ख. । ३. कार्यत्वेनेति ख. कार्यत इति ग. । ४. तपसो वैलक्षण्यमिति ख. तपस्तोपि ग. । ५ षन दान इति क. षण् दान इति ख. ग. । ६. सम्प्लवे इति क. ख. ।

नयनम् । अनेन स्मरणार्थोऽपि कथितः ॥ ५ ॥ ❀ ❀ "प्रसन्नवक्त्रमि"ति भगवद्धर्ममुत्पत्त्या निरूपयति—धर्मस्येति द्वाभ्याम् । प्रसाद-वक्त्रधर्मभेदात् । कीदृशो हि भगवत्प्रसादः कीदृशं वक्त्रमिति तदुभयमत्र ज्ञातं भविष्यति—भगवतः प्रसादो मुखं च धर्म एव प्रकटीभवति । तत्रापि पितुरंशः प्रसादो यज्ञांशो मुखम् । तदाह । धर्मस्य दक्षदुहितरि मूर्तिनाम्न्यामवतीर्ण इति । दक्षो हि यज्ञे तत्र हि या क्रियाशक्तिः श्रद्धादिभ्योऽतिरिक्ता साक्षान्मूर्त्तिभूता सा मूर्तिः । तत्र तस्य रूपद्वयमाह—नारायणो नर इति । "आपो नारा" इति व्युत्पत्त्या भगवन्मुखं जले प्रतिष्ठितम् । नर इति सूत्रात्मा जीवो जलपिता । एकस्यैव नामद्वयं जलाधारत्वेन जलजनकत्वेन च । मुखं च तद्विध[1]म् । अतो जलाधारत्वेन सर्वरसग्रहणं सूत्रत्वेन च वाग्व्यवहारः । एवमुभयात्मकं वक्त्रं नरनारायणरूपेण प्रकटं जातम् । वक्त्रस्यैवं प्रकटने यो गुणस्तमाह—स्वतपःप्रभाव इति । तपो हि वक्त्रस्यैव तप इति । "तपोनाऽनसनात्परमि"ति श्रुतेः । अतोऽवयवान्तरेण कृतं तपो नोत्कृष्टं भवति । वाक्कृतमनशनकृतं च तपः । तस्य वक्त्रस्यानुभावो यत्र । एक गुणस्तपः । द्वितीयस्तत्संस[2]र्गी अनुभावः । स च सहजदोषाभावरूपः । तपसो हि सहभावी औत्पत्तिको दोषः क्रोधः । तस्याऽत्यन्ताभावसाहित्यं तपसोऽनुभावः । सकामत्वं बाह्यो दोषः । तदभावस्तु गुण एव नत्वनुभावः । तत्र हि प्रसादो दोषकर्तृषु वरदानम् । तदेकादशस्कन्धे विस्तरेण वक्ष्यते । इह दोषाभावमात्रमाह । तत्र प्रथमं बाह्यदोषाभावं वदति—दृष्ट्वाऽत्मन इति । अयं हि भगवानात्मा । न हि स्वस्य स्वदर्शने कामो भवति । अत आत्मन एव भगवतः सकाशान्नियमस्य स्वसहजधर्मस्य अवलोपं दृष्ट्वा । विपरीततया नाशोऽवलोपः । आत्मनः सकाशादेव सहजबन्धकान्यपि कर्माणि मोक्षप्रदानि भवन्ति । तथाप्येता अप्सरसो भगवत्सान्निध्यात्स्वात्मन्येव चरितदोषा मोहिकाः क्रुद्धाश्च जाताः । अत एतासां संकल्पो नष्टः । नत्वेता अप्रयोजकाः किन्तु देव्यः देवतारूपा अपि एता व्रतत्यागिन्यो जाताः । दूरे एतासामुपासनया व्रतसिद्धिः । एतासां क्रियाशक्तिमाह—अनङ्गपृतना इति । तुशब्देन स्त्रियोऽबला अप्रयोजका इति पक्षो निराकृतः अङ्गरहितस्य पृतनाः सेनाः । न[3] तस्य शरीरनाशाद्भिभ्यति । अमूर्तप्रकारेण च घातयन्ति । तादृशा[4] अपि संबन्धपात्रमपि प्राप्तुं न शेकुः । स्वीकृतो भगवति न कोऽपि क्षोभो जात इत्यर्थः ॥ ६ ॥ ❀ ❀ एवं बाह्यदोषं परिहृत्य [5]आन्तरिकं दोषं कैमुतिकन्यायेन निराकरोति—कामं दहन्तीति । एताः स्त्रियो देहं वा पातयामः कार्यं वा साधयाम इति समागताः । आद्ये अनङ्गपृतनात्वं सेत्स्यति । द्वितीये पृतनात्वमिति । तदुभयमपि न जातम् । तत्राऽऽश्चर्ये जाते ब्रह्मा स्वयं समाधत्ते । मया एवं ज्ञायते । कामादीनां जेतारो नाऽन्ये । किन्तु कामादय एव । तत्र यथा यथा तेषु कनिष्ठास्तथा तथा पूर्वजेतारः । अत एव ये कामं दहन्ति ते रोषदृष्ट्या दहन्ति । [6]रोषेणैव तु कामो दह्यते नतु तैः । कृतिन इति साभिप्रायं वचनम् । कामस्य स्थानमदत्वा क्रोधस्य हि स्थानं दत्तवन्तः । नन्विति सम्बोधनं सम्मत्यर्थम् । रोषसहितया दृष्ट्या । कामस्तु हृदयं व्याप्नोति । क्रोधस्तु ज्ञानम् । अतो ज्ञाननाशे महती[7] क्षतिरिति तेषां न कृतित्वम् । उभयोः परलोकनाशकत्वे तुल्येऽपि क्रोधस्त्वात्मानं दहति । अतो दाहकं न दहन्त्यदाहकं दहन्तीत्यतिभ्रान्तास्ते । दाहोऽपि न स्वल्पः । स कामविजयी क्रोधो यस्य अन्तरं निविशन् बिभेति । अहमपि कामवदशरीरो भविष्यामीति । तत्र कामः कथं तस्य हृदयं श्रयेत । क्रोधस्तु मलयुक्ते प्रविशति । भगवतस्त्वन्तर[8]मलम् । अत एव निविशन् बिभेति । स हि मलक्षणमपि मलं नाशयिष्यतीति । अनेन कामक्रोधकृताः पदार्था न भगवन्मुखं प्रविशन्ति । न प्रसादहेतवो भवन्तीति निरूपितम् । किं बहुना । यावानर्थो नरनारायणयोस्तावान्मुखप्रसादयोरिति ज्ञातव्यम् ॥ ७ ॥ ❀ ❀ एवं प्रसन्न[9]वक्त्रे निरूप्य नलिनायतेक्षणे[10] निरूपयति—विद्ध इति । नलिनवदायते ईक्षणे यस्येति सदृष्टान्तं दीर्घत्वं नेत्रे च निरूपणीये । तत्र तत्र वैकुण्ठस्थितो भगवान्नेत्रम् । तस्य दीर्घता ज्योतिश्चक्रम् । स हि तत्र स्थितः सर्वान् पश्यति । तस्य हि नलिनवदायतत्वं विचारणीयम् । तद्धि विकसितमेवाऽऽयतं भवति । तत्र विकासस्तपस[11] इव । यथा जलस्थितमेव कमलं सूर्येण विकासमेति । तथोत्तमाधिकारिणि वन एव स्थितं भगवन्नेत्रं विकासयति । तदा हि स पश्यतीत्यर्थः । तत्राऽपि भगवदिच्छया तथाभूतं सकाममेव बहिः पश्यति । कामोऽपि क्लेशकृतश्चेत्तपोऽपि जगत्प्रकाशकं चेत्तदैवंरूपतेति ध्रुवकथा निरूप्यते—सपत्न्युदितपत्रिभिरिति[12] तत्राऽऽसह्यवेदना निरूपिता । मातुः सपत्नी । तया राज्ञः समीपे बाणलक्षणा बाणाः प्रयुक्ताः "न वत्स नृपतेर्धिष्ण्यमि"त्यादयः । तैश्चाऽयं विद्धः । कर्मभेदिनो हि बाणा विध्यन्ति । पत्रिपदाच्च अप्रतीकारा उड्डीय विध्यन्तीति बोधितम् । अनेन विवेका[13]दिना तस्य प्रतीकाराभाव उक्तः । बाह्योपायाभावमाह—राज्ञः अन्तीति । अतः परं राजाऽपि न वक्तव्यः । बेधस्य तेनैव दृष्टत्वात् । अनेन [14]दीनत्वमुक्तम् । इदं हि भगवद्दर्शने बीजम् । द्वितीयं बीजमाह—बाल इति । तपसे तपःकरणार्थं वनान्युपगत इत्यधिकारः । वनानीति बहुवचनं फलसिद्ध्यर्थं सर्वेष्वेव वनेषु तपः करिष्यामीति दृढप्रतिज्ञाज्ञापनार्थम् । तस्मा अदादिति दृष्टिविकासः ।

---

१. तद्विविधं चेति ख. । २. संसर्ग्यनुभाव इति ख. । ३. नत्वस्येति ख. । न स्वशरीर ग. । ४. तादृश्येपीति ख. ग. । ५. आन्तरिकरोषमिति क. घ. । ६. रोषेणत्विति ख. । ७. महाक्षतिरिति ख. ८. त्वन्तरममलमिति ख. ग. । ९. वक्त्रमिति ख. ग. । १०. वतेक्षणमिति ख. ग. ११. स्तपस एवेति ख. ग. । १२. रित्यसह्येति ख. ग. । १३. विवेकिनेति ख. । १४. निदानमिति ग. ।

ध्रुवगतिमिति फलस्य निश्चलता। **गृणते प्रसन्न इति** किरणानामन्तःप्रवेशनम्। स हि तपसा न सन्तुष्टः किन्तु बालः स्तोत्रं करोतीति। अन्यथा **"निवर्त्तयिष्ये प्रतियात स्वधामे"** इति वचनमनुपपन्नं स्यात्। न हि भगवानन्यथा निवर्त्तयितुं न शक्नोतीति किन्तु शक्त एव। स्तोत्रेण सन्तुष्टो बालाय ध्रुवगतिं दत्तवान्। ननु स्तोत्रस्य ध्रुवगतेश्च कः संबन्धः। तपस्तु भोगफलत्वात्तथा भवितुमप्यर्हतीत्याशङ्कयाऽऽह—**दिव्याः स्तुवन्तीति**। स हि निन्दावचनेन खिन्नस्तथा कृतवानिति सर्वदा स्तोत्रस्थानं दत्तवान्। यत्स्थानं दिव्याः सप्तर्षयोऽपि उपरिस्थितं अधःस्थिताः सन्तः स्तुवन्ति। यदिदं स्थानं प्रसादेन न प्राप्तं स्यात्। तपसा निर्बन्धेन वा प्राप्तं स्यात्तदा भगवदीयैः स्तोत्रं न क्रियेत। तत्रापि मुनयः स्तुवन्ति। तत्राऽप्युपरिस्थितं स्वयं चाधःस्थिताः ईर्ष्यामेव कर्तुं योग्याः। प्रसादकरण एव ध्रुवस्य पश्चात्तापोऽपि ॥ ८ ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः

**तत्तमित्यत्र** ते इति कन्नादयोर्थाः। **मुख्यतत्त्वमिति** आसन्यतत्त्वम्। **तथा भवन्तीति** कार्याविष्टा भवन्ति। ननु प्रथमस्कन्ध एतेषां भगवदवतारत्वमुक्तमित्यायुधावतारत्वं कथं युज्यत इत्यत आहुः **आवशेत्यादि, एतदिति** आयुधरूपत्वम्। तथा चायुधेषु धरणस्योद्देशे बोधितत्वाद्धरणार्थमावेशस्यापेक्षितत्वात्तस्मिन्नपि पक्ष आयुधावतारत्वमुपपद्यत इत्यर्थः। **यज्ञः साङ्ख्यश्च योगश्चेति** पूर्वश्लोकचतुष्टय एतत्त्रयमुक्तमिति शेषः। **पूर्वकल्पे आत्मज्ञानस्येति** पूर्वकल्पीयात्मज्ञानस्य। मूलस्थयत्पदस्यार्थमाहुः **यस्मादिति**। नन्वत्र **सनकाद्युक्तमार्गेण** स्वात्मदर्शनं स्वस्मिन् भगवद्दर्शनं वावतारकार्यत्वेनोक्तं, न तु शत्रुहननादिकम्, तथा सत्यायुधावतारत्वं कथमवगन्तुं शक्यत इत्यत आहुः **साधारणा इत्यादि**। तथा च, देहत्याजनेन मुक्तिसम्प्रापणात् तथात्वमित्यर्थः। नन्वायुधानि **शत्रूंस्तथा** सम्पादयन्त्येते तु भक्तानिति कथं तथात्वमत आहुः **ते हीत्यादि**। तथा च, बुद्धिप्रकारभेदेपि साधारणानाञ्च शत्रूणाञ्च स्थानप्रच्युतरूपात्सामान्यात्तेषां तथात्वसम्पादने यष्ट्यादिवदायुधत्वं सुघटमेवेत्यर्थः। **स्मरणार्थ इति** मुनिपदोक्तं तन्मार्गीयस्मरणस्वरूपम् ॥ ५ ॥ ❀ ❀ **धर्मस्येत्यत्र प्रसादकधर्मभेदादिति**, प्रसादस्य वक्त्रस्य च यो धर्मस्तद्भेदात्। **यज्ञांशो मुखमिति** भोजनक्रियारूपत्वाद्यज्ञस्य तद्विशेषांशो मुखमित्यर्थः। यज्ञांशत्वं व्युत्पादयन्ति **दक्ष इत्यादि**। **तत्रेति** मूर्त्याम्। तथा चैतदर्थमेव दक्षपदद्वयमन्यथा दक्षदुहितरीति न वदेदित्यर्थः। **तद्विधमिति** जलाधारञ्जलजनकञ्च। **सूत्रत्वेन** वाग्व्यवहार इति 'स एव जीवो विवरप्रसूतिरि' त्येकादशस्कन्धे वाग्व्यवहारस्य तत्कार्यत्वेनोक्तत्वात्तथेत्यर्थः। **तपो हीति** तापजनकान्तरक्रियात्मकं पूर्वश्लोके त्वालोचनात्मकमुक्तमिति भेदः। अनुभावद्वितीयत्वं गुणविजातीयत्वेनेति ज्ञापनायाहुः **स चेत्यादि**। **गुण एवेति**, अनशनवद्बाह्यदोषाभावरूपत्वान्निष्कामत्वमपि तपोरूपमेवेति तपःप्रभावाभ्यां धर्माभ्यां तयोर्मुखत्वनिश्चय इत्यर्थः। **तत्रेति** मुखरूपे नारायणे। दोषाभावे प्रयोजकं स्फुटीकुर्वन्ति **अयमित्यादि**। एवञ्च दृष्ट्वा दर्शनेनात्मरूपस्य भगवतो **नियमावलोपं घटितुं न शेकुरिति** मूलयोजना। भगवत्त्वादेवात्मत्वस्यार्थसिद्धत्वादात्मपदस्य स्वार्थकत्वमभिप्रेत्य तत्सिद्धं प्रयोजनान्तरमाहुः **अत इत्यादि**। **अत इति** भगवतो विविक्तदृष्टित्वात्। **स्वसहजधर्मस्येति** इतरमोहकत्वरूपस्य। **विपरीततया नाश इति** उक्तस्य धर्मस्य स्वमोहकत्वं विपरीतता, तथात्वापत्त्या पुनः पूर्ववद्दर्शनाभावो नाशः। तथा च, तेन कृत्वा पुनः संस्रष्टुं न शेकुरित्यर्थः। ननु भगवत आत्मत्वादस्तु नियमानवलोपः परमेतासां स्वनियमलोपे को हेतुरित्यत आहुः **आत्मन इत्यादि**। **तथाप्येता इति** तथा एता अपि इति योजना। तथा चात्रापि स एव हेतुरित्यर्थः। **व्रतत्यागिन्य इति** सत्यवाक्त्वरूपदेवव्रतत्यागिन्यः। इन्द्रसन्निधौ कार्यं वा साधयिष्यामः शरीरं वा पातयिष्याम इत्युक्त्वागतास्तत्र कृतवत्यः इत्यर्थः। यथा चात्मसन्निधानेन स्वाभावपरावर्त्तनाद्व्रतत्यागरूपाद्दोषाच्च। एतासां गीतरूपभगवदुपासनयापि व्रतसिद्ध्यभावात्तल्लोप इति वः **तादृशा इति** वष्टिभागुरिरल्लोपमिति वैकल्पिक आप्, तादृश्योपि भागवतः स्त्रीत्वेनापि न भाता इत्यर्थः। **काममित्यत्र आन्तरिकदोषमिति** आनन्तरं मनस्तदीयं दोषम् ॥ ६ ॥ ❀ ❀ **तैरिति** क्रोधापूर्वभाविभिः सङ्कल्पादिभिः कामेन वा क्रोधो दह्यत इत्यर्थः। **न स्वल्प इति** किन्तु तच्छरीरनाशकः। अलम्पदस्यार्थमाहुः **अहमित्यादि**। प्रकारान्तरेण व्याकुर्वते **क्रोधस्त्वित्यादि**। तयोस्तदवतारत्वगमकमाहुः **अनेनेत्यादि**, तथा चैवं तयोः प्रसादावतारत्वनिश्चयः इत्यर्थः ॥ ७ ॥ ❀ ❀ **विद्ध इत्यत्र**। तदवतारूपतां व्युत्पादयन्ति **सहीत्यादि**। **स हि तत्र स्थित इति** वैकुण्ठवासी ज्योतिश्चक्रे स्थितः। **तपस इवेति**, यथा तपसो विकास उपभोगजनकस्तथेत्यर्थः। **विकाशयतीति** नामधातुप्रयोगोयम्, विकाशं करोतीत्यर्थः। तत्रापि भगवदिच्छया तथाभूतमिति, वनस्थितावपि तथाक्लिष्टं सकामम्। **एवं रूपतेति** नलिनायतेक्षणप्राकट्यसमर्थता। **किरणानामिति** अत्र प्रसादः किरणस्थानीयो बोध्यः। **अन्यथेति** तपस एव प्रसादहेतुत्वे। **दत्तवानिति**। तथा च, तादृशस्थानदानमेतद्दातुस्तदवतारत्वगमकमित्यर्थः। प्रसादकारण इति प्रसादः कारणं यस्येत्यर्थः ॥ ८ ॥

---

१. कारण एवेति क. ग. कारणमेवेति ख.। २. नाशक इति पाठः।

### श्रीगिरिधरकृता बालप्रबोधिनी

कुमारावतारमाह—तप्तमिति, विविधलोकं स्रष्टुमिच्छया कल्पादौ यन्मया तपस्तप्तं तस्य स्वतपसः सनात् दानात् तस्मिन् समर्पणात्– षणु दाने– स हरिश्चतुस्सनोऽभूत् सनत्कुमारः सनकः सनन्दनः सनातन इति चत्वारः सनशब्दा नाम्नि यस्य तथाविधो जातः । तत्कर्माह— प्रागिति । स च पूर्वकल्पस्य सम्प्लवे प्रलये विनष्टमुच्छिन्नसम्प्रदायं आत्मतत्त्वमिह अस्मिन् कल्पे सम्यग् जगाद उपदिष्टवान् । सम्यक्त्वमेव दर्शयति—यद्गदितमात्रमेव आत्मतत्त्वं मुनयो मननशीला आत्मन् स्वस्मिन्नेवाचक्षत साक्षादपश्यन्नित्यर्थः ॥ ५ ॥ ❀ ❀ नरनारायणावतारमाह—धर्मस्येति । धर्मस्य भार्यायां दक्षस्य दुहितरि मूर्त्यां मूर्तिसञ्ज्ञायां नारायणो नरश्चेति मूर्तिद्वयेनाजनिष्ट जातः । तत्प्रभावमाह—स्वेति, स्वः असाधारणस्तपःप्रभावो यस्य तथाभूतः । तदेव दर्शयति— दृष्टेति । अनङ्गस्य कामदेवस्य पृतनाः सेनारूपाः सर्वप्राणिनो विमोहयितुं समर्था अपि देव्यः अप्सरसः आत्मनः स्वभगवन्तं मोहयितुं प्रवृत्ता अपि आत्मनः स्वस्य यो नियमस्तपोविनाशनरूपस्तस्यावलोपं दृष्ट्वा भगवतस्तं घटितुं घटयितुं कर्त्तुं न शेकुः, समर्था न जाता इत्यर्थः । एतच्चैकादशस्कन्धे स्पष्टं भविष्यति ॥ ६ ॥ ❀ ❀ यत्र कामविजयी क्रोधोऽपि बिभेति तत्र कामो न प्रभवतीति किं वक्तव्यमिति कैमुत्यन्यायमाह—काममिति । ननु निश्चितमेवैतत् कृतिनो योगिनो रुद्रादयो रोषयुक्तया दृष्ट्या कामं दहन्ति रोषं त्वात्मानं दहन्तमुत अपि ते न दहन्ति तदाहे समर्था नैव भवन्ति, किन्तु क्रोधेनैवाभिभूयन्त इत्यर्थः । तत्र हेतुमाह—असह्यमिति, सोढुमशक्यमित्यर्थः । नु अहो आश्चर्यम् । सोऽयं रोषो यस्यान्तर्मनः प्रविशन् बिभेति । तत्र हेतुमाह— अमलमिति । रागलोभादिमलयुक्ते हि प्राणिमनसि क्रोधस्यापि प्रवेशो भवति, भगवन्मनस्तु निर्मलमतस्तत्प्रविशन् स्वस्यापि मलरूपत्वान्मामपि विनाशयेदिति बिभेतीत्यर्थः । यद्येवं तर्हि कथं पुनः कामोऽस्य मनः श्रयेत, प्रविशेदित्यर्थः ॥ ७ ॥ ❀ ❀ चरित्रेणैव कमप्यवतारं सूचयति— विद्ध इति । राज्ञः उत्तानपदः अन्ति समीप एव मातुः सपत्न्याः सूरुचेः उदितानि उक्तानि वाक्यान्येव पतत्रिणो बाणाः तैर्विद्धस्ताडितो बालोऽपि सन् यो ध्रुवस्तपसे तपः कर्त्तुं वनान्युपगतस्तस्मै गृणते स्तुवते प्रसन्नः सन् ध्रुवगतिं स्थायिपदमदात् । ध्रुवगतिं विशिनष्टि— यदिति । यां ध्रुवगतिं दिव्याः दिवि भवाः मुनयः उपरि स्थिता भृग्वादयः अधस्ताच्च स्थिताः सप्तर्षयः स्तुवन्ति प्रशंसन्तीत्यर्थः ॥ ८ ॥

### हिन्दी अनुवाद

नारद ! सृष्टिके प्रारम्भमें मैंने विविध लोकोंको रचनेकी इच्छासे तपस्या की । मेरे उस अखण्ड तपसे प्रसन्न होकर उन्होंने 'तप' अर्थवाले 'सन' नामसे युक्त होकर सनक, सनन्दन, सनातन और सनत्कुमारके रूपमें अवतार ग्रहण किया । इस अवतारमें उन्होंने प्रलयके कारण पहले कल्पके भूले हुए आत्मज्ञानका ऋषियोंके प्रति यथावत् उपदेश किया, जिससे उन लोगोंने तत्काल परम तत्त्वका अपने हृदयमें साक्षात्कार कर लिया ॥ ५ ॥ ❀ ❀ धर्मकी पत्नी दक्षकन्या मूर्तिके गर्भसे वे नर-नारायणके रूपमें प्रकट हुए । उनकी तपस्याका प्रभाव उन्हींकेजैसा है । इन्द्रकी भेजी हुई कामकी सेना अप्सराएँ उनके सामने जाते ही अपना स्वभाव खो बैठीं ! वे अपने हाव-भावसे उन आत्मस्वरूप भगवान्‌की तपस्यामें विघ्न नहीं डाल सकीं ॥ ६ ॥ ❀ ❀ नारद ! शङ्कर आदि महानुभाव अपनी रोषभरी दृष्टिसे कामदेवको जला देते हैं, परंतु अपने आपको जलानेवाले असह्य क्रोधको वे नहीं जला पाते । वही क्रोध नर-नारायणके निर्मलःहृदयमें प्रवेश करनेके पहले ही डरके मारे काँप जाता है । फिर भला, उनके हृदयमें कामका प्रवेश तो हो ही कैसे सकता ॥ ७ ॥ ❀ ❀ अपने पिता राजा उत्तानपादके पास बैठे हुए पाँच वर्षके बालक ध्रुवको उनकी सौतेली माता सुरुचिने अपने वचन-बाणोंसे बेध दिया था । इतनी छोटी अवस्था होनेपर भी वे उस ग्लानिसे तपस्या करनेके लिये वनमें चले गये । उनकी प्रार्थनासे प्रसन्न होकर भगवान् प्रकट हुए और उन्होंने ध्रुवको ध्रुवपदका वरदान दिया । आज भी ध्रुवके ऊपर-नीचे प्रदक्षिणा करते हुए दिव्य महर्षिगण उनकी स्तुति करते रहते हैं ॥ ८ ॥

> यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतन्तम् ।
> त्रात्वार्थितो जगति पुत्रपदं च लेभे दुग्धा वसूनि वसुधा सकलानि येन ॥ ९ ॥
> नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृग् जडयोगचर्याम् ।
> यत्पारमहंस्यमृषयः पदमामनन्ति स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः ॥ १० ॥
> सत्रे ममास भगवान् हयशीरषाथो[1] साक्षात् स यज्ञपुरुषस्तपनीयवर्णः ।
> छन्दोमयो मखमयोऽखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥ ११ ॥

---

१. प्रा० प०—शीर्षशीर्षा ।

मत्स्यो युगान्तसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः ।
विस्रंसितानुरुभये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान् ॥ १२ ॥

**श्रीधरस्वामिविरचिता भावार्थदीपिकाव्याख्या**

पृथ्ववतारमाह । यद्यदा ऋषिभिरर्थितः अवतरितुं प्रार्थितस्तदा वेनदेहादवतीर्णः तं त्रात्वा अन्वर्थं तत्पुत्र इति पदं नाम लेभे । "पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः ॥ तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ॥" इति हि पुत्रपदव्युत्पत्तिः । कथंभूतम् । द्विजानां शापवाक्यमेव वज्रं तेन विप्लुष्टं दग्धं पौरुषं भगमैश्वर्यं च यस्य तम् । चरित्रांतरमाह । येन च जगति जगदर्थे वसूनि अन्नादिद्रव्याणि दुग्धा ॥ ९ ॥ ❀ ❀ ऋषभावतारमाह । असौ हरिर्नाभेराग्नीध्रपुत्रात्सुदेव्याः सूनुरास । नाभेर्भार्याया मेरुदेव्याः एव सुदेवीत्यपि संज्ञा । जडवद्योगेन नित्यसमाधिना चर्याम् । यदिति । यां चर्यां पारमहंस्यं परमहंसप्राप्यं पदम् । तत्र हेतुः । समदृक् । तत्रापि हेतुः । स्वस्थः स्वस्वरूपे स्थितः । यतः प्रशांतेंद्रियः । तत्कुतः । यतः परितो मुक्तसंगः ॥ १० ॥ ❀ ❀ हयग्रीवावतारमाह । सत्र इति । अथो इत्यर्थांतरे । स एव साक्षाद्भगवान्मम ब्रह्मणः सत्रे यज्ञे हयशीर्षा आस । तपनीयं सुवर्णं तद्वद्वर्णो यस्य । छंदोमयो वेदमयस्तद्विधेया ये मखास्तन्मयः अमृतमय इति वा पाठः । मखैर्यजनीया अखिला देवतास्तदात्मा च । अस्य श्वसतः श्वासं मुंचतो नस्तो नासापुटादुशतीरुशत्यः कमनीया वेदलक्षणा वाचो बभूवुः ॥ ११ ॥ ❀ ❀ मत्स्यावतारमाह । मत्स्यो भाविना वैवस्वतेन मनुना दृष्टः क्षोणीमयः पृथ्वीप्रधानः तदाश्रय इत्यर्थः । अत एव निखिलजीवनिकायानामाश्रयः मे मुखाद्विस्रंसितान् गलितान्वेदस्य मार्गान्वेदानादाय तत्र युगांतसलिले विजहार । ह हर्षेण ॥ १२ ॥

**श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या**

पुद्भ्यः पुन्नामकेभ्यो नरकेभ्यो यतः पितरं त्रायतेऽतः पुत्र इति । पुन्नामका नरका विंशतिसंख्याका वामनपुराणे प्रोक्तास्तथाहि—परदाराभिगमनं पापिसंगः पारुष्यं सर्वत्रेति प्रथमो नरकः । अत्र नरकपदं नरकसाधनपरम् । परदाराभिगमनादिजन्यनरकेभ्यस्तत्प्रसूर्यादिभ्यः पातीति पुत्र इति भावः । एवमग्रेपि एषां पवर्गमारभ्य मातृकास्थदीर्घौकारपर्यंतगणनात्पुन्नामकत्वमिति । फलस्तेयफलहीनाटनवृक्षजातीयच्छेदनं द्वितीयः ॥२॥ वर्ज्यादानावध्यावधबंधनबांधववादस्तृतीयः ॥३॥ भूतमात्रभयदानं भूतिनाशनं भ्रंशनं निजधर्मतश्चतुर्थः ॥४॥ मारणमित्रकौटिल्यमिथ्योक्तिमिष्टैकाशनानि पञ्चमः ॥५॥ योगनाशनयवादिफलहरणयानयुग्महरणानि षष्ठः ॥६॥ राजभागहरण—राजस्त्रीसंग—गताहितचिंतनानि सप्तमः ॥७॥ लुब्धत्व—लोलुपत्व—लब्धधर्मार्थनाशनान्यष्टमः ॥८॥ वेदब्राह्मणनिंदन—ब्रह्महरण—विप्रोत्कर्षासहन—विरुद्धाचरणानि नवमः ॥९॥ शिष्टाचारविनाश—शिष्टद्वेष—शिशुवधशास्त्रस्तेयानि दशमः ॥१०॥ षडंगवेदानंगीकार—षाड्गुण्यनीतिपरित्यागावेकादशः ॥११॥ सन्निन्दा—सदाचारलंघनपुरस्सरानाचारस्वीकारसंस्कारत्यागा द्वादशः ॥ १२॥ हानिश्चतुर्वर्गविवेर्दैयसंग्रहादिस्त्रयोदशः ॥१३॥ क्षपणकसंग—तन्मतस्वीकारः—क्षयाहत्यागक्षेत्रहरणादिश्चतुर्दशः ॥१४॥ अज्ञसंगासत्योक्त्यसूयाशोचाशुभावहप्रवृत्तयः पंचदशः ॥१५॥ आलस्यासत्कर्मत्यागार्यावर्त्तीयधर्मानंगीकाराचार्यासेवनानिंदाश्रमधर्मत्यागादिः षोडशः ॥१६॥ इच्छा परदारधनादेः सप्तदशः ॥१७॥ ईर्ष्या शास्त्रेष्वष्टादशः ॥१८॥ उद्धतत्वमेकोनविंशः ॥१९॥ ऊर्द्ध्वं स्थितिर्गुरुपित्रादेरूतिर्वृद्धिर्विंशः ॥२०॥ एते पुन्नामकाः पुदित्यत्र तपरकरणमदिदुदित्यादिवत् ऊतिर्वासना सा चेह मंदा ज्ञेया "पुन्नामनरकं घोरं विनाशयति सर्वतः । एतस्मात्कारणात्साध्यस्ततः पुत्रेति गद्यते । "शेषेभ्यो रक्षणाच्छिष्यः पापेभ्यः परिकीर्त्तितः । घृतादिविक्रयो घोरश्चांडालादिपरिग्रहः ॥ स्वदोषाच्छादनं पापं परदोषप्रकाशनम् । इत्यादीनि च पापानि शेषसंज्ञानि वै विदुः ॥ यो गुरुं रक्षते तेभ्यः स शिष्यः परिकीर्त्तितः । तस्माच्छिष्यश्च पुत्रश्च विधातव्यौ प्रयत्नतः ॥ शिष्याच्छ्रेष्ठतरः पुत्रः सुमार्गनिरतो यदि । विमार्गगावुभौ त्याज्यौ यदुक्तनिरयप्रदौ ॥ विष्णुभक्तियुतौ कार्यौ प्रयत्नेन सुधीमता ॥" इति सर्वं वामनपुराणे विततमस्तीति । वाराहे तु "ऐहिकामुष्मिकं दुःखं पुदिति प्रोच्यते ततः । त्राति पुत्र इति ज्ञेयः पुद्दः प्रोक्तस्ततोन्यथा" ॥ ऐहिकं क्षुत्पिपासाशीतोष्णज्वरादि । आमुष्मिकं नरकपातादीति विवेकः । जगति भूलोके पुत्रप्रदं मथितवेनभुजोत्पन्नत्वात्पुत्रेण प्राप्यं राज्यं लेभे इति तीर्थः । जगतीति निमित्ते सप्तमी अत आह । जगदर्थमिति । संदर्भस्तु 'भगवन्निंदया वेनो द्विजैस्तमसि पातितः' इति सप्तमस्कंधोक्तेर्वेनस्य पितुर्नारदात्कदाचिन्नरकभोगोत्तरं कुष्टिम्लेच्छत्वप्राप्तिं श्रुत्वा तमानीय कुरुक्षेत्रांतर्गतपृथूदकतीर्थे स्नपनादिना विशोध्य यातनाभोगादुद्धारेति वामनपुराणीयकथामप्याह ॥ ९ ॥ ❀ ❀ तत्र पारमहंस्यपदत्वे । तत्रापि समदृक्त्वेपि । तत्प्रशांतेन्द्रियत्वम् ॥ १० ॥ ❀ ❀ 'तपनीयं रूप्यहेम्नोः' इत्यभिधानात् । तद्विधेया वेदविहिताः "अस्य वै महतो भूमस्य निश्वसितं यदृग्वेदः" इत्यादिश्रुतेः ॥ ११ ॥ ❀ ❀ इत्यर्थ इति । पृथ्वी-

---

१. प्रा० पा—मखात्मा ।

रूपनौधारणात्तदाश्रयो "नाव्यारोप्य महीमय्याम्" इत्युक्तेरिति भावः । अत एव पृथिव्याश्रयत्वादेव मृग्यंते जलेऽन्विष्यंते श्रीहरिणा मुनिभिर्वेति मार्गाः । वेदाश्च ते मार्गाश्चेति वेदमार्गास्तान् । अत एव स्वामिचरणैर्वेदानिति व्याख्यातम् । मृग्यते परमात्मा येषु ते मार्गा वेदाः "यद्दर्शनं निगम आत्मरहःप्रकाशम्" इति मार्कंडेयोक्तेः ॥ १२ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

अन्वर्थमिति । अन्वर्थम् अनुगतावयवार्थं यौगिकार्थमिति यावत् ॥ ९ ॥ ❀ ❀ यामिति । यां जडयोगचर्या-मित्यर्थः ॥ १० ॥ ११ ॥ ❀ ❀ पृथिवीप्रधान इति आश्रितानां मध्ये पृथिवी प्रधानं यत्र स इत्यर्थः । वृक्षमयो ग्राम इतिवत् ॥ १२—१६ ॥

### श्रीमद्वीरराघवव्याख्या

पृथ्ववतारमाह य इति । यः पृथुः ऋषिभिरर्थितः वेनं त्रात्वा जगति पुत्रपदं लेभे सोऽप्येकोऽवतार इत्यर्थः । पुत्रपदं पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति व्युत्पत्तिस्मरणात् । पुदाख्यान्नरकात्पितरं वेनं संरक्ष्य पुत्रपदवाच्यतां प्राप्तवानित्यर्थः । कथंभूतं वेनं निरये नरके पतंतं तत्कुतः द्विजानां मुनीनां शापवाक्यमेव वज्रं तेन विप्लुष्टं विशेषेण दग्धं पौरुषं भगमैश्वर्यं च यस्य तं द्विजशापः कुत इत्यत आह—उत्पथगतसन्मार्गवर्तिनं एतदाख्यानं चतुर्थे स्फुटं एतस्यैव चरित्रांतरमाह वेनं पृथुना वसुधा भूमिः सर्वाणि वसून्यन्नादिद्रव्याणि दुग्धाऽदुह्यत दुहधातुर्द्विकर्मकः ॥ ९ ॥ ❀ ❀ ऋषभा-वतारमाह नाभेरिति । यद्ब्रह्म पारमहंस्यं परमहंसप्राप्यं पदं स्वरूपं ऋषयो वेदा आमनंति तदसौ हरिः कपिलादिवत्स्वांशेन ऋषभाख्यो राजा नाभेराग्नीध्रपुत्रात्सुदेव्याः सूनुरास मेरुदेव्या एव सुदेवीत्यपि संज्ञा । यो जातो ऋषभः जडवद्योगचर्यां चचार तत्र हेतुः समदृक् सर्वस्यापि स्वात्मकत्वेन समदर्शनः तस्यान्यात्मकत्वं व्यावर्तयति स्वस्थः "स्वे महिम्नि प्रतिष्ठित" इति श्रुतेः । स्वस्मिन्नेव स्थितः नत्वात्मांतरधार्यः जडयोगचर्यां चरणे हेत्वंतरमाह प्रशांतकरणः प्रशांतेंद्रियः तत्कुतः परिमुक्तसंगः परितः शब्दादिषु मुक्तस्त्यक्तः संग आसंगो येन सः ॥ १० ॥ ❀ ❀ हयग्रीवावतारमाह सत्र इति । स एव साक्षाद्भगवान्मम ब्राह्मणः सत्रे हयशीर्ष आस कथंभूतः तपनीय सुवर्णं तद्वद्वर्णो यस्य छंदोमयः वेदमयः वेदोत्पादकत्वेन तत्प्रचुर इत्यर्थः । मखमयः यज्ञाराध्यः अखिलदेवतानामात्मा "स आत्मा अंगान्यन्या देवता" इति श्रुतेः श्वसतःनिश्वसतः अस्य हयग्रीवस्य नस्तः नासिकातः उशतीः शुद्धाः वाचः वेदवाचः बभूवुः "तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद" इति श्रुतेः वेदानां तद्विहितानां कर्मणां तदाराध्यदेवतानां तत्प्रवर्तकत्वतदाराध्यत्वतदात्मकत्वान्युक्तानि इति ॥ ११ ॥ ❀ ❀ मत्स्यावतारमाह मत्स्य इति । मत्स्यो भाविना वैवस्वतेन मनुनोपलब्धः दृष्टः क्षोणीमयः आगामिसृष्ट्युपयोगिपार्थिवद्रव्याश्रय इत्यर्थः । अतएव निखिलजीवनिकायानां समस्तजीवसमूहानां निकेतः निलयः मे मम मुखाद्विस्रंसितान्वेदमार्गान्वैदिकप्रमाणान्यादाय समर्प्य मह्यमिति शेषः । वेदरूपप्रमाणप्रदानमेवास्यावतारस्य कृत्यं यत्र उरुभये अतिभयं करे युगांतसलिले विजहार विहृतवान् इति हर्षे एतदाख्यानमष्टमे स्पष्टम् ॥ १२ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

अथोत्पथगतं मामेव यजध्वं मत्तोन्यद्दैवं नास्तीत्यद्वैतमार्गवर्तिनमत एव द्विजवाक्यवज्रेण निष्पिष्टपौरुषभगं विनाशितपुरुषाकारभागधेयं मृत्वा निरये पतंतं वेनं ज्ञात्वा परमर्षिभिर्जगत्पालनायार्थितो जगति भूलोके पुत्रपदं मथितवेनदक्षिणभुजोत्पन्नपृथ्वाख्यमहाराजस्थानं लेभ इत्यन्वयः । स्वयं च पृथुनामा तत्र विष्णुरित्यर्थं च शब्देनानुवदति । पृथुर्नामा महाराजस्तत्र विष्णुः स्वयं विभुरित्यादेः तत्कर्माह । दुग्धेति येन । पृथ्वाविष्टेन पृथुनाम्ना हरिणा वसुधा भूमिः सकलानि वसूनि अमृतादिद्रव्याणि च दुग्धेत्यन्वयः ॥ ९ ॥ ❀ ❀ असौ नारायणो नाभेराज्ञः सकाशात् सुदेवीसूनुरासेत्यन्वयः । मेरुदेव्याः सुदेवीति नामांतरं राजकृतं तदवतारप्रयोजनमाह यो वा इति । ऋषभनामा यो वै हरिः समदृक् सर्वांतर्हृदि स्थितं समं ब्रह्म पश्यतीति नित्यापरोक्षीकृतस्वरूप इत्यर्थः । योगचर्यां परमहंसधर्मं चचार ऋषयो यद्रूपं पारमहंस्यं परमहंसप्राप्यमामनंति यश्च स्वस्थः स्वाधारः प्रशांतकरणः प्रकृष्टसुखात्मदेहेंद्रियः अत एव परिमुक्तसंगो बाह्यसुखानपेक्षः विधिनिषेधविमुक्तस्य योगचर्याकरणं किमर्थमित्याशंका वा इत्यनेन निरस्ता लोकसंग्रहार्थत्वेन तदाचरणप्रसिद्धेरिति । स्वस्थ इत्यादिविशेषणबाहुल्याच्च प्राप्यप्रयोजनांतरं नास्ति ॥ १० ॥ ❀ ❀ साक्षात्तुर्यः एष यज्ञ पुरुषो मम सत्रे यज्ञे नाम्नाहयशीर्ष आसेत्यन्वयः । तिर्यग्योनित्वेप्यैश्वर्यादिगुणसामग्रीमानित्याह—भगवानिति । तपनीयं रूप्यहेम्नोरित्यभिधानान्मूलावताररूपापेक्षयोभयवर्णत्वं युक्तं अनेन साक्षान्नारायण एवेति निरणायि "हिरण्यश्मश्रु" रित्यादिश्रुतेः इतोप्ययं नारायण एवेत्याह छंदोमय इति छंद आदीनामाधारत्वात् विषयत्वादुद्देश्यत्वादंतर्यामित्वात्तन्मयत्वं तत्कर्म चाह—वाच इति । अस्य हयग्रीवस्य श्वसतः श्वासं कुर्वतो नस्तः नासिकाया उशतीर्भगवद्गुणप्रतिपादकत्वेन शुद्धाः श्वासरूपा वाचो

वेदादिलक्षणा बभूवुरित्यन्वयः । छंदांसि च मखाश्चैव देवा लोकाश्च सर्वश इत्यादिना मयटो विकारार्थत्वं प्रयुक्तम् ॥ ११ ॥ ❁ ❁ मे मुखाद्विस्रंसितान्निर्गतान्वेदमार्गान्हयग्रीवदैत्येनापहृतान् दृष्ट्वा मत्स्योऽवतीर्य तं हत्वा तान् समादाय स्थितः पुनर्युगांतसमये मन्वंतरप्रलये सप्तऋषिभिः सह स्तुवता वैवस्वतमनुनोपलब्धो दृष्टः क्षोणीमयः । क्षोणीमय नावाश्रयत्वादत एव निखिलजीवनिकायानां केत आश्रय तत्रोरुभये महाभयंकरे सलिले प्रलयसमुद्रजले विजहारेत्यन्वयः ॥ १२ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

निरये पतन्तमिति पुनः पुनः पतनाय सज्जमानं त्रात्वा पुत्रपदञ्च लेभे इति न केवलं त्रातवान् अपि तु पुत्रपदं पुत्रत्वमपि लेभे इत्यर्थः । व्यक्त्या तत्रोद्यतेषु मुनिषु कारुण्यविशेषव्यक्तिः । क्त्वाप्रत्ययस्तु त्राणावश्यकताविवक्षया भाविनि भूतवन्निर्देशात् । किन्तु सप्तमस्कन्धे भगवन्निन्दया वेणो द्विजैस्तमसि पातित इत्यनुसारेण एकदा श्रीपृथुराजेन ( ? ) श्रीनारदात् स्वपितुर्नरकभोगानन्तरं कुष्ठिम्लेच्छत्वप्राप्तिं श्रुत्वा तमानीय पृथूदकाख्यकुरुक्षेत्रतीर्थे स्नपनादिना क्रमेण तदपरिच्छेद्य यातनाभोगादुद्धारेति वामनपुराणाद् विषयो ज्ञेयः ॥ ९ ॥ १० ॥ ११ ॥ ❁ ❁ मत्स्य इति । मनुना वैवस्वतमनुतया भाविना सत्यव्रतेनेत्यर्थः । अत्र सन्यासुरवधस्त्वतिप्रसिद्धत्वान्नोक्तः ॥ १२ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

पृथ्ववतारमाह । यत् यदा ऋषिभिरर्थितस्तदा वेणं त्रात्वा अन्वर्थं तत् पुत्र इति पदं नाम लेभे । पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः । तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवेति पुत्रपदव्युत्पत्तेः । कथम्भूतं द्विजानां शापवाक्यमेव वज्रं तेन विप्लुष्टं ( निष्प्लुष्टं ) दग्धं पौरुषं भगमैश्वर्य्यञ्च यस्य तम् । श्रीपृथुराजेन ( ? ) श्रीनारदात् स्वपितुर्नरकभोगान्तरं कुष्ठिम्लेच्छत्वप्राप्तिं श्रुत्वा तमानीय पृथूदकाख्ये कुरुक्षेत्रतीर्थे स्नपनादिना तदपरिच्छेद्ययातनाभोगादुद्धारेति वामनपुराणकथा ज्ञेया । चरित्रान्तरमाह । येन च वसूनि अन्नादिद्रव्याणि वसुधा पृथ्वी दुग्धा ॥ ९ ॥ ❁ ❁ ऋषभावतारमाह । नाभेः सकाशात् आस अभूत् । सुदेव्या मेरुदेव्याः सूनुः । जडवद्योगचर्य्याम् । यस्य पारमहंस्यं पदं चिह्नम् । ऋषय आमनन्ति अभ्यस्यन्ति । ऋषभः कीदृशः । स्वस्मिन्नेव तिष्ठतीति स्वस्थ इत्यादि । अत्र समाप्तपुनरात्ततादोषश्चेदेवं व्याख्येयम् । यस्य पारमहंस्यम् ऋषय आमनन्ति तेषु ऋषिषु परिमुक्तसङ्ग इमे मत्पारमहंस्यं न जानन्त्विति तेषु प्रीतिरहितः । अतएव ते भ्रष्टा बभूवुरिति तत्र कथा द्रष्टव्या ॥ १० ॥ ❁ ❁ हयग्रीवावतारमाह । सत्रे यज्ञे आस आविर्बभूव । अस्य हयशीर्ष्णः श्वसतो निश्वसतः नस्तः नासापुटात् उशतीः कमनीया वेदलक्षणा वाचो बभूवुरुदपद्यन्त । अत्र छन्द इति विशेषणत्रयेण कर्म्मकाण्डज्ञानकाण्डदेवताकाण्डसम्बन्धिन्यः श्रुतय इति गम्यते । अमृतमय इत्यत्र मखमय इत्यपि पाठः क्वचित् ॥ ११ ॥ ❁ ❁ मत्स्यावतारमाह । मत्स्यो भाविना वैवस्वतेन मनुना दृष्टः । क्षोणीमयः पृथ्वीप्रधानः तदाश्रय इत्यर्थः । निखिलानां चतुर्विधानामेव जीवसंघानां केत आश्रयः । उरुभये प्रलयसलिले ये मुखाद् विस्रंसितान् विगलितान् वेदमार्गानादाय विजहार ॥ १२ ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पृथ्ववतारमाह यदिति । यदा ऋषिभिः प्रार्थितस्तदा उत्पथगतमसन्मार्गवर्तिनम् असन्मार्गवर्तित्वादेव द्विजानां मुनीनां शापवाक्यमेव वज्रं तेन विप्लुष्टं विशेषेण दग्धं पौरुषं भगमैश्वर्यं च यस्य तमत एव निरये नरके पतंतं वेणं त्रात्वा अन्वर्थं तत्पुत्र इतिपदं नाम लेभे । पुन्नाम्नो नरकाद्यस्तु पितरं त्रायते सुतः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति व्युत्पत्तिस्मरणात् । चरित्रांतरमाह येन पृथुना जगति जगदर्थे वसुधा सकलानि द्रव्याणि दुग्धाऽदुह्यत ॥ ९ ॥ ❁ ❁ ऋषभावतारमाह नाभेरिति । असौ भगवान् नाभेः सकाशात् सुदेव्याः मेरुदेव्यपरपर्यायाः सूनुर्नामतः ऋषभः आस यः ऋषभः जडवद्योगेन नित्यसमाधिना चर्यां चचार यस्यां जडयोगचर्याम् ऋषभः पारमहंस्यं पदं भगवत्प्राप्तिमार्गमामनंति यत्पारमहंस्येन पथाऽधिगम्यत इत्यादिनाऽग्रे निरूप्यमाणः स च पारमहंस्यमार्गं नित्यध्यानादिवशादलब्धाश्रमकृत्यावसरस्य श्रेष्ठाधिकारिणः ब्रह्मचारिप्रभृतिष्वेकतमस्यैव ब्रह्मचारिगृहस्थश्च वानप्रस्थस्तथाऽऽश्रमी परिव्राट्च चतुर्थोऽत्र पंचमो नोपपद्यते वर्णाश्रमाचारवता पुरुषेण परःपुमान् विष्णुराराध्यते पंथानान्यत्तत्तोषकारणमिति वैष्णवे चतुर्णामेवाश्रमाणां स्वीकारात् नित्यध्यानादिति । स्पष्टं श्रेष्ठ्यमपि तत्रैवोक्तं न चलति भगवत्पदारविंदात्पलनिमेषार्द्धमपि स वैष्णवाग्र्य इत्यादिना जडयोगचर्याचरणहेतुः समदृक्सर्वस्य भगवदात्मकत्वात्समदर्शनः अतएव स्वस्थः स्वस्मिन्रूपे सर्वात्मभूते स्वावतारिणि वासुदेवे स्थितः अतएव प्रशांतकरणः अविचलेंद्रियः अत एव परिमुक्तसंगः ॥ १० ॥ ❁ ❁ हयग्रीवावतारमाह सत्र इति । अथो इत्यर्थान्तरे साक्षाद्भगवान् मम सत्रे यज्ञे हयशीर्षा आस । कीदृशः तपनीयं सुवर्णं तद्वद्वर्णो यस्य सः छंदोमयः वेदमयः मखमयः अध्वराकारः तदाराध्यो वा अखिलानां देवतानामात्मा "स आत्मा अंगान्य न्या देवता" इति श्रुतेः अस्य हयग्रीवस्य श्वसतः निश्वसतः नस्तः नासापुटात् उशतीः उशत्यः कमनीयाः वाचः वेदरूपाः बभूवुः ॥ ११ ॥ ❁ ❁ मत्स्यावतार-

---

१. सर्वे विष्णौ स्थिता यस्मादतः सर्वमयो ह्यसौ इति महासंहितायाम् ॥ २. अनेन मत्स्यावतारो द्विवारमिति ज्ञायते ॥

माह मत्स्य इति । मनुना वैवस्वतेन पूर्वजन्मनि युगांतसमये सत्यव्रताख्येन राज्ञा मत्स्य उपलब्धः दृष्टः कीदृशः क्षोणीप्रधानः आगामिसृष्ट्युपयोगिपार्थिवद्रव्याश्रय इति यावत् अत एव निखिलजीवानां यो निकायः समूहस्तस्य केतो निलयः स च मे मम मुखाद्विस्रंसितान् विगलितान् वेदमार्गान् वेदोक्तधर्मान् यद्वा वेदरूपान् मार्गान्सर्वपुरुषार्थोपायान् आदाय उरुभये युगांतकाले हेति हर्षेण विजहार विहृतवान् ॥ १२ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं नलिनायतेक्षणं निरूप्य कदम्बकिञ्जल्कपिशङ्गवाससं निरूपयति—अत्र हि पीताम्बरं कदम्बतुल्यता च निरूपणीया । कदम्बस्य वर्षाकाले हि किञ्जल्का भवन्ति । वर्षा च भूमिसन्तापे । यथा संतप्ते वृष्टिर्भवति । यथा वृष्टिः सर्वसन्तापहारिका । एवं पृथुकृतो दोहः सर्वसन्तापहारकः । पृथुश्च छन्दोमयः सर्ववेदार्थप्रतिपादकः पीताम्बररूपः । राजा हि स्वभावतो भूमेराच्छादको भवति । तदाज्ञया भूमिर्गुप्ता तिष्ठति । किन्त्वयं यथास्थितभूमिगोप्ता न भवतीति भूमेर्विच्छायकरणात्पीतत्वम्[1] । [2]अयं पृथुः पुत्रपदं लेभे । "पुन्नाम्नो[3] नरकात्त्रायते पितरं सुत" इति पुत्रशब्दो व्युत्पाद्यते । तत्रान्ये नरकात्त्रायन्ते न वेति सन्देहो भवत्यदृष्टत्वात् । अयं [4]तु नरकात्त्रायत एव । नरकाणां पायुस्थानत्वात्तदाच्छादकत्वेनैवास्य पीताम्बरत्वम् । रक्षणं हि प्राप्ते दुःखे । तदर्थमस्य पितुर्दुःखप्राप्तिमाह—यद्वेनमुत्पथगतं अन्यायिनां मार्गे प्रवृत्तम् । अत एव ब्राह्मणानामपकारित्वात्तद्वाक्यवज्रेण नितरां प्लुष्टं पौरुषं भाग्यं च[5] यस्य । अतो भाग्येन पौरुषेण[6] चाऽनिस्तारः । नवा प्रजापा[7]लनलक्षणधर्मेण । उत्पथगतत्वात् । तस्माद्गुणाभावाद्दोषस्य च विद्यमानत्वान्नरके पतति । तस्मिन्समये तस्य करान्मथनेन निर्गतस्तं पालितवान् तैरेव ब्राह्मणैरभ्यर्थितः । अत एव पुत्रो जातः । अवतारचरित्रमाह । दुग्धा वसूनि । सर्ववसूनि दुग्धा । वसूनि वस्तूनि । वसुधा पृथिवी । अनेन वसूनि वसुधा दुग्धा । यद्यप्यन्यानि वस्तून्यन्यैरेव दुग्धानि तथाप्येतन्मूलकत्वात् सकलानि येनेत्युक्तम् । अनेन वेदरूपस्य पीताम्बरस्यैवं सर्वकामपूरकत्वं नरकात्पालकत्वं च निरूपितम् । पीतत्वेन च सर्वदुःखानिवृत्तिः प्रासङ्गिकी । प्रजननगोपनं तु स्वभावादेव । तस्य[8] रेखाकारत्वं सर्वगुणसद्भावात् ॥ ९ ॥ ❀ ❀ एवं पीताम्बरत्वं निरूप्य लसन्महारत्नहिरण्मयाङ्गदत्वं निरूपयति—नाभेरसाविति । नाभिर्ब्राह्मणान्प्रार्थयित्वा यज्ञे आविर्भूतं भगवन्तं प्रार्थयित्वा भगवन्तं पुत्रत्वेन प्रार्थितवान् । नाभेर्भार्या सुदेविसंज्ञा तस्याः सूनुः । असाविति बुद्धिस्थः । ऋषभ इति नाम । अवतारस्य प्रयोजनं यो वै चचारेति जडानां संबन्धिनी यागचर्या लोके प्रदर्शिता । समदृगिति ब्रह्मदृष्टिः तस्या जडयोगचर्यायाः सद्ग्राह्यं रूपमाह । यत्पारमहंस्यं पदमामनन्ति । तस्य मार्गस्य निर्वाहकावश्यकसाधनान्युपदिशन् स्वयं तादृशो जात इत्याह । प्रथमं परिमुक्तसङ्गः सर्वसङ्गपरित्यागं कृतवान् । तेन प्रशान्तकरणः प्रशान्तानि कारणानि इन्द्रियाणि यस्य । तेन स्वस्थः स्वरूपस्थित इति दोषनिवृत्तिः कथिता । गुणस्तु समदृगिति सर्वत्र गुणदोषदृग्रहितः । सर्वभूतेषु वासुदेवदृष्टिर्वा । देवताक्रियामध्ये ह्यङ्गदनिवेशनम् । तत्रापि देवताभागे । अयं च ब्रह्मवित् कर्माणि त्यक्तवान् । हिरण्यत्वं नाभिपुत्रत्वात् । महारत्नानि तु तत्पुत्राः । स हि ज्ञानकर्ममध्ये स्थितः । अतोऽङ्गदत्वम् । स्वस्थत्वादयो वा रत्नानि । समदृक् सुवर्णम् । जडयोगचर्या आकृतिः । इदं हि परमहंसानां पदम् । रत्नानि तु ते । अत ऋषभस्य यत्किञ्चित्कार्यं तदेवाऽङ्गदस्येति ज्ञातव्यम् । अध्यायत्रयेण च तच्चरित्रं वक्ष्यते । तत्र शोभा प्रथमाध्यायार्थः । महारत्नानि तद्वाक्यानि द्वितीयाध्यायार्थः । हिरण्मयत्वं ब्रह्मभावस्तृतीयाध्यायार्थः ॥ १० ॥ ❀ ❀ एवमङ्गदं निरूप्य स्फुरन्महारत्नकिरीटकुण्डलं निरूपयति—सत्रे ममासेति । हयग्रीवो हि किरीटकुण्डलात्मकः । सद्युभयात्मको भवति । ब्रह्मविद्याप्रवर्त्तकत्वात् । किरीटं हयशिरः । कुण्डले देहः प्रवृत्तिनिवृत्तिरूपः । साऽङ्गद्वययोगयोराधारभूतो नृदेहः । स हि कर्मणि प्रादुर्भूतोऽग्निसाध्ये । कुण्डलादिकमपि तथा । तदेवाऽऽह रूपत्रयम् । छन्दोमयो मखमय इति कुण्डले । अखिलदेवतात्मा मुकुट[9]ः । अखिला न न्यूना ये देवा ब्रह्मादयस्ते भगवन्मस्तके पारमेष्ठ्ये स्थिताः । यद्धयग्रीवेण क्रियते[10] तत्सर्वं कुण्डलमुकुटकार्यम् । तस्य स्वरूपं ब्रह्मा निरूपयति । मम सत्रे यागे । आस आविर्भूतः । स प्रसिद्धो हयग्रीवो भगवानेव । दैत्यहयग्रीवनिराकरणार्थं भगवानिति । किंपुरुषा[11]दिरूपव्युदासार्थं च । नह्यन्यः सत्रे आविर्भावमर्हति । यतो हयशीर्ष एव साक्षाद्यज्ञपुरुषः सर्वयज्ञाधिष्ठात्री देवता । यतस्तपनीयवर्णः तपनीय[12]वद्वर्णो यस्य । तपनीयं सुवर्णम् । यज्ञोऽप्यग्निसाध्य इति तपनीयो वर्णो यस्य । छन्दोमय वेदात्मकः । मखमयो यज्ञात्मकः । अखिलदेवतात्मा । प्रमाणप्रमेयसाधनफलभूत इत्यर्थः । अखिलदेवताः साधनम् आत्मा फलमिति । अवतारप्रयोजनमाह—वाचो बभूवुरिति । उशतीर्वाचो वेदलक्षणाः अस्य नस्तो नासिकातः । श्वसतः श्वासं विमुञ्चतः । अस्य भगवतो जाताः । स्फुरन्महारत्नान्येव उशतीर्वाचः ॥ ११ ॥ ❀ ❀ एवं मुकुटकुण्डले

---

१. त्वणत्वमिति ख. । २. अयमित्यारभ्य पीताम्बरत्वमित्यन्तं नास्ति क. घ. । ३. पुत्रो हि पुन्नाम्न इति क. ग. । ४. अयं तु त्रायते एवेति क. । ५. चकारो नास्ति ख. । ६. पौरुषेण वा न निस्तारः ख. ग. । ७. पालनरत्तयेति ग. घ. । ८. तस्या रेखेति ख. ग. । ९. मुकुटमिति ख. । १०. क्रियतेति ख. । ११. पुरुषादिव्युदासार्थमिति ख. । १२. तपनीयवर्ण इति ख. ।

निरूप्य उन्निद्रहृत्पङ्कजकर्णिकालये योगेश्वरास्थापितपादपल्लवं रूपं निरूपयति—मत्स्य इति । मत्स्यो हि पल्लवरूपः । सत्यव्रतादीनां शिष्यत्वाद्गुरोस्तस्य भगवतः पादपल्लवं ज्ञानात्मकं हृदये स्थापितमेव । युगान्तसमये प्रलये । मनुना सत्यव्रतेन द्रविडेश्वरेण । मनुनेति भाविनी संज्ञा । तत्कृपयैव मनुत्वस्य भावित्वात् । तेन लब्धः । प्रथमं तदञ्जलिजले प्रादुर्भूतः । तस्य मत्स्यस्य उत्पत्तेर-निरूपितत्वाद्दृष्ट इत्युक्तम् । तस्य पादत्वार्थमाह क्षोणीमय इति । स हि पृथिवीमयः । अत एव आध्यात्मिकीं पृथिवीं वहति । नौका-रूपा हि पृथिवी तारिका अत एव चरणः पोतः । किञ्च । भगवच्चरणो हि सर्वेषां भक्तानामाश्रयः । तदाह—निखिलजीवनिकायकेत इति । निखिला ये जीवाः संपूर्णा जीवा न विषयैः खण्डिताः तेषां निकायः समूहस्तस्य केतः स्थानम् । सर्वाणि बीजानि ऋषयश्च तदा नौकायां स्थिता इति । एतदेव हि रूपं चरणस्य । अत एव संसारसमुद्रतरणे पोतः । तस्याऽवतारचरित्रमाह—उरुभये विस्रंसितान् ब्रह्मणो भयात् मुखाद्विगलितान् वेदान् हयग्रीवो नाम दानवेन्द्रः अन्तिकेऽहरत् । तं हत्वा तत आदाय तत्र जले विजहार ह । वेदमार्गानिति अन्येऽपि ज्ञानभक्तिप्रतिपादका वेदास्तत एवोद्धृताः । हेति प्रसिद्धे । । आश्चर्ये वा । अत एव शिष्याणां हृदयानि वेदमार्गैः कृत्वा विकसितानि भवन्ति । यज्ञोपयोगिवेदा हयग्रीवेणोद्धृताः, सर्वोपयोगिनस्तु मत्स्येनेति विशेषः ॥ १२ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

**यद्वेनमित्यत्र** । पृथोः पीताम्बरावतारत्वं व्युत्पादयन्ति **कदम्बस्येत्यादि** । तथा च, दोहरूपकार्ये पृथुनाकृते तदुत्तरं यद्दोहान्तरं तत्कदम्बकिञ्जल्कसमं तज्जन्यत्वाद्बहुत्वाच्च । तथा राज्ञः स्वभावो जनरञ्जनं तेनारक्तत्वम् । **पीतत्वमिति** पृथोः पीतत्वम्, यदाच्छादके पीतत्वं न स्यात्तदाच्छाद्ये भूरूपे जघने तत्कृतं विच्छायत्वमपि न स्यात्, अतस्तस्य तदवतारत्वं कार्यान्निश्चेय-मित्यर्थः । एवं व्युत्पाद्य श्लोकं व्याकुर्वते **रक्षणमित्यादि** । **स्वभावादेवेति** । 'मातृबुद्धिः परस्त्रीष्वि'ति वाक्येन जितेन्द्रियत्वस्व-भावादेवेत्यर्थः । प्रजापतीनामपि गोपनाद्वा ॥ ९ ॥ ❀ ❀ **नाभेरित्यत्र** विवक्षिताङ्गदावतारत्वं व्युत्पादयन्ति **देवतेत्यादि** । **देवताभाग इति** प्रगण्डे कपोणेरुपरिभागः प्रगण्डः, बाहुर्देवता इन्द्रस्तस्य भागो बलाधारभागस्तत्रेत्यर्थः । **अयञ्चेत्यादि** । तथा च, क्रियात्यागादुपरिभागोक्तिः नाभिपुत्रत्वादिति नाभियज्ञे हिरण्मयरूपेण प्रादुर्भूतत्वादिति, अथ तमाविष्कृतभुजयुगलद्वयं हिरण्मयं पुरुषविशेषमि'ति पञ्चमस्कन्धवाक्यात् तत्पुत्रा इति । नव योगेश्वराः **अतोऽङ्गदत्वमिति** । 'दो'ऽवखण्डने, तथा च, मर्यादा-गिरिवदुभयविभाजकत्वादङ्गदत्वमित्यर्थः । इदञ्च पञ्चमस्कन्धानुसारेणोक्तम् । व्याख्येयश्लोकानुसारेण प्रकारान्तरमाहुः **स्वस्थे-त्यादि** । अयमपि प्रकारो न पञ्चमस्कन्धाद्विरुध्यत इति ज्ञापयन्ति **अध्यायेत्यादि** । **सत्रेत्यत्र** हयग्रीवे किरीटाद्यवतारत्वं व्युत्पाद-यन्ति **हयग्रीव इत्यादि** । **उभयात्मक इति**, हयनरात्मकः । **अखिला इत्यादि** । तथा चाखिलदेवतानामात्मत्वेन तत्स्वरूपत्वे तत्फलभूतत्वे तेषां तादृशां तत्र स्थितेरपि सत्त्वात्सा किरीटत्वबोधिकेत्यर्थः । अत्रापि तपनीयवर्ण इति हिरण्मयत्वं कण्ठोक्तम् । रत्नानि त्वग्रे वाच्यानि । तेन तथात्वमित्यर्थः ॥ ११ ॥ ❀ ❀ **मत्स्य इत्यत्र** । मत्स्यस्य चरणरूपत्वं क्षोणीमयत्वात्स्फुटमिति तस्य पल्लवरूपत्वसाकारसाम्यादाहुः **मत्स्यो हीत्यादि** । निष्क्रान्ताः खिलेभ्यो निखिला इति मूलार्थं बोधयन्ति **न विषयैः खण्डिता इति** । **विकसितानि भवन्तीति** । तथा च, तच्चरित्रमुन्निद्रत्वगमकमित्यर्थः । **सर्वोपयोगिन इति** तथा च, वेदमार्गानिति बहुत्व-बोधितमार्गसम्बन्धिबहुत्वम् । **कर्णिका गमकमिति** मत्स्यस्य तादृशधर्मविशिष्टचरणावतारत्वमित्यर्थः ॥ १२ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

पृथ्ववतारमाह—यदिति । यदा ऋषिभिरर्थितः प्रार्थितस्तदा निरये नरके पतन्तं वेनं त्रात्वा अन्वर्थं तत्पुत्र इति पदं नाम लेभे इत्यन्वयः 'पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः ॥ तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा' इति पुत्रपदव्युत्पत्ति-स्मरणात् । नरकपतने हेतुमाह—द्विजेति । द्विजानां शापरूपं वाक्यमेव वज्रं तेन विप्लुष्टं सन्दग्धं पौरुषं भगं सौभाग्यं च यस्य तम् । द्विजशापे हेतुमाह—उत्पथगतमिति, असन्मार्गवर्तिनमित्यर्थः । एतच्च चतुर्थे स्फुटं भविष्यति । एतस्य चरितान्तरमप्याह—येन च पृथुना जगति सर्वप्राणिनिमित्तं सकलानि वसूनि अन्नादिवस्तूनि वसुधा पृथ्वी दुग्धा अदुह्यतेति ॥ ९ ॥ ❀ ❀ ऋषभा-वतारमाह । नाभेरिति । असौ हरिर्नाभेराग्नीध्रपुत्रात् सुदेव्याः सूनुः ऋषभाख्य आस । नाभेर्भार्याया मेरुदेव्या एव सुदेवीत्यपि सञ्ज्ञा ज्ञेया । तत्कर्माह—य इति । यो वै प्रसिद्ध ऋषभो लोकसङ्ग्रहार्थं जडवद्योगचर्यां चचार । जडपदेन तदाचरणस्य निन्दित-त्वमित्याशङ्क्य विशिनष्टि—यदिति । यत् यां योगचर्यामृषयः पारमहंस्यं परमहंसानां परमविवेकिनां सम्बन्धि पदमाश्रममामनन्ति कथयन्ति । कथं स योगचर्यायां शक्त इत्यपेक्षायामाह—परितो देहापत्यकलत्रादौ मुक्तस्त्यक्तः सङ्गः आसक्तिर्येन स इति । सर्वतो विरक्तत्वादिति भावः । तदपि कथं सम्भवतीत्यपेक्षायामाह—प्रशान्तकरण इति, वशीकृतान्तःकरणेन्द्रिय इत्यर्थः । तत्रापि हेतुमाह स्वस्थ इति, निजानन्दनिष्ठ इत्यर्थः । तत्रापि हेतुमाह—समदृगिति, समं परं ब्रह्मैव सर्वं पश्यतीत्यर्थः ॥ १० ॥ ❀ ❀ श्रीहयग्री-वावतारमाह—सत्र इति । यो यज्ञपुरुषो यज्ञादिभिः समाराध्यतया प्रसिद्धः पुरुषो भगवान् स एव साक्षान्मम सत्रे सत्रसञ्ज्ञके यागे हयशीर्ष आस हयग्रीवरूपेण प्रकटो जात इत्यन्वयः । हयग्रीवत्वेन तस्य हीनत्वं न मन्तव्यमित्याशयेन तस्योत्तमत्वं वर्णयन् विशिनष्टि— छन्दोमय इति, वेदप्रचुर इत्यर्थः । कथं तस्य वेदमयत्वं निश्चितमित्यपेक्षायामाह—अस्य हयग्रीवस्य श्वसतः श्वासान्

विमुञ्चतो नस्तो नासिकातः उशतीः उशत्यः सर्वोपकारकत्वेन अतिकमनीया वेदलक्षणा वाचो बभूवुरिति । किञ्च मखमय इति, यज्ञात्मक इत्यर्थः । द्रव्यदेवतात्मको हि यज्ञो भवति तस्य कथं तदात्मकत्वमित्याशङ्क्याह— अखिलदेवतात्मेति, सर्वदेवतानां आत्माऽन्तर्यामीत्यर्थः । वर्णतोऽपि तस्योत्तमत्वमाह—तपनीयवर्ण इति, तपनीयं सुवर्णं तद्वद्वर्णो यस्य तथाभूत इत्यर्थः ॥ ११ ॥ ❋ ❋ मत्स्यावतारमाह—मत्स्य इति । युगान्तसमये मनुना वर्तमानेन वैवस्वतेन पूर्वजन्मनि सत्यव्रतसञ्ज्ञकेन मत्स्य उपलब्धो दृष्टः । सत्यव्रतानुग्रहार्थं भगवान् मत्स्यरूपेणाविरासीदित्यर्थः । एतच्चाष्टमस्कन्धे स्पष्टं भविष्यति । मत्स्यरूपत्वेनापकृष्टत्वमाशङ्क्योत्कृष्टत्वमाह— निखिलजीवनिकायकेत इति, समस्तजीवसमूहानां आश्रयभूत इत्यर्थः । तत्र हेतुमाह—क्षोणीमय इति, समुद्रे नौकारूपेण वर्त्तमानायाः पृथिव्या आश्रय इत्यर्थः । एतदवतारप्रयोजनमाह— विस्रंसितानिति । मे मम मुखाद्विस्रंसितान् विगलितान् हयग्रीवनामकेन दानवेनापहृतान् वेदमार्गान् वेदानुसारिस्मृतिपुराणादीन् तं हत्वा तत आदाय मह्यं समर्प्यैति पुराणान्तराज्ज्ञेयम् । सत्यव्रतं चोपदिशंस्तत्रोरुभये अतिभयङ्करे युगान्तसलिले हेति हर्षेण विजहार विहारं कृतवान् ॥ १२ ॥

### हिन्दी अनुवाद

कुमार्गगामी वेनका ऐश्वर्य और पौरुष ब्राह्मणोंके हुङ्काररूपी वज्रसे जलकर भस्म हो गया। वह नरकमें गिरने लगा। ऋषियोंकी प्रार्थनापर भगवान्ने उसके शरीरमन्थनसे पृथुके रूपमें अवतार धारणकर उसे नरकोंसे उबारा और इस प्रकार 'पुत्र'❋शब्दको चरितार्थ किया। उसी अवतारमें पृथ्वीको गाय बनाकर उन्होंने उससे जगत्के लिये समस्त ओषधियोंका दोहन किया ॥ ९ ॥ ❋ ❋ राजा नाभिकी पत्नी सुदेवीके गर्भसे भगवान्ने ऋषभदेवके रूपमें जन्म लिया। इस अवतारमें समस्त आसक्तियोंसे रहित रहकर, अपनी इन्द्रीयों और मनको अत्यन्त शान्त करके एवं अपने स्वरूपमें स्थित होकर समदर्शीके रूपमें उन्होंने जड़ोंकी भाँति योगचर्याका आचरण किया। इस स्थितिको महर्षिलोग परमहंसपद अथवा अवधूतचर्या कहते हैं ॥ १० ॥ ❋ ❋ इसके बाद स्वयं उन्हें यज्ञपुरुषने मेरे यज्ञमें स्वर्णके समान कान्तिवाले हयग्रीवके रूपमें अवतार ग्रहण किया। भगवान्का वह विग्रह वेदमय, यज्ञमय, और सर्वदेवमय है। उन्हींकी नासिकाके श्वासके रूपमें वेदवाणी प्रकट हुई ॥ ११ ॥ ❋ ❋ चाक्षुष मन्वन्तरके अन्तमें भावी मनु सत्यव्रतने मत्स्यरूपमें भगवान्को प्राप्त किया था। उस समय पृथ्वीरूप नौकाके आश्रय होनेके कारण वे ही समस्त जीवोंके आश्रय बने। प्रलयके उस भयंकर जलमें मेरे मुखसे गिरे हुए वेदोंको लेकर वे उसीमें विहार करते रहे ॥ १२ ॥

क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धय आदिदेवः ।
पृष्ठेन कच्छपवपुर्विदधार गोत्रं निद्राक्षणोऽद्रिपरिवर्तकषाणकण्डूः ॥१३॥
त्रैविष्टपोरुभयहा स नृसिंहरूपं कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रम् ।
दैत्येन्द्रमाशु गदयाभिपतन्तमारादूरौ निपात्य विददार नखैः स्फुरन्तम् ॥१४॥
अन्तःसरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरम्बुजहस्त आर्तः ।
आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रवणमङ्गलनामधेय ॥१५॥
श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः ।
चक्रेण नक्रवदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान् कृपयोज्जहार ॥१६॥
ज्यायान् गुणैरवरजोऽप्यदितेः सुतानां लोकान् विचक्रम इमान् यदथाधियज्ञः ।
क्ष्मां वामनेन जगृहे त्रिपदच्छलेन याच्ञामृते पथि चरन् प्रभुभिर्न चाल्यः ॥१७॥
नार्थो बलेरयमुरुक्रमपादशौचमापः शिखा धृतवतो विबुधाधिपत्यम् ।
यो वै प्रतिश्रुतमृते न चिकीर्षदन्यदात्मानमङ्ग शिरसा हरयेऽभिमेने ॥१८॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

कूर्मावतारमाह । क्षीरोदधौ कच्छपवपुः सन्गोत्रं मंथनार्थं मंदरगिरिं पृष्ठेन विधृतवान् । कदा अमृतलब्धये क्षीराब्धिमुन्मथ्नतां सताम् । निद्रायाः क्षणोऽवसर उत्सवो वा यस्य सः । निद्रावसरः कुतस्तत्राह । अद्रेः परिवर्तः परिभ्रम एव कषाणः

१. दुहधातोर्द्विकर्मकत्वाद्वसुधयोः । २. चतुर्विंशेऽध्याये । ❋ पुत्र शब्दका अर्थ ही है 'पुत्' नामक नरकसे रक्षा करनेवाला । ३. प्रा० पा—निद्रे० । ४. प्रा० पा०—हरिः स्वम० । ५. प्रा० पा०—मनसा ।

कषणं घर्षणं सुखप्रदो यस्यां सा कंडूर्यस्य सः । यद्वा । अद्रिपरिवर्त एव कषः कषणं तेन अणति अपयातीति कषाणा कंडूर्यस्य ॥ १३ ॥ ❀ ❀ श्रीनृसिंहावतारमाह । त्रैविष्टपा देवास्तेषामुरुभयं हंतीति तथा स भगवान् । यद्वा । त्रैविष्टपा देवास्तेषामप्युरुभयं यस्मात्तादृशो हासो यस्य तन्नृसिंह रूपम् अथवा हिरण्यकशिपो राज्यकाले त्रैविष्टपा दैत्यास्तेषामुरुभयजनको हासो यस्मिंस्तत्त्रैविष्टपोरुभयहासं तच्च तन्नृसिंहरूपं कृत्वा । कथंभूतं भ्रमंत्यौ भ्रुकुट्यौ दंष्ट्राश्च यस्मिंस्तत् करालं वक्त्रं यस्मिंस्तत् दैत्येंद्रं स्फुरंतमारात्समीप एव गदयोपलक्षितमभिपतंतं तं नखैर्विददार ॥ १४ ॥ ❀ ❀ हरिसंज्ञकावतारमाह । अंतरिति युगलेन । गजयूथस्य पतिः तीर्थरूपं श्रवो यशो यस्य स तीर्थश्रवाः हे तीर्थश्रवः । श्रवणेनैव मंगलं नामधेयं यस्य सः ॥ १५ ॥ ❀ ❀ तद्वचनं श्रुत्वा शरणार्थिनं तं हस्ते शुंडायां प्रगृह्य । किं कृत्वा नक्रस्य ग्राहस्य वदनं विनिपात्य विदार्य तस्मात्तद्वदनात् ॥ १६ ॥ ❀ ❀ वामनावतारमाह । अदितेः सुतानां द्वादशादित्यानां मध्ये अधियज्ञः यज्ञाधिष्ठाता विष्णुः अवरजः कनीयानपि गुणैर्ज्यायाञ्ज्येष्ठः । गुणानेवाह । यद्यत इमाँल्लोकान्विचक्रमे पादन्यासैः क्रांतवान् । अथ प्रतिश्रुतानंतरमेव । तत्र हेतुः । बलेः क्ष्मां वामनरूपेण जगृहे । नन्वीश्वरः स्वयं किमिति दुर्बलवत्तथा चक्रे तत्राह । याञ्चां विना धर्ममार्गे वर्तमानो न चाल्यः ऐश्वर्यान्न भ्रंशनीय इति ॥ १७ ॥ ❀ ❀ ननु तर्हि याञ्चयापि चालनमनुचितमेवेत्याशङ्क्य ततोऽप्यधिकं स्वसालोक्यादि दास्यामीत्याशयेन हृतवानित्याह । नार्थ इति । यद्विबुधाधिपत्यमिदानीं बलात्प्राप्तमग्रे दीयमानं चायं बलेः पुरुषार्थो न भवति । कुत इत्यत आह । आप इति । आ अप इति छेदः । उरुक्रमस्य पादशौचं चरणक्षालनरूपाः अपः आ सर्वतो धृतवतः । क । शिखां शिखायां मूर्ध्नि इत्यर्थः । किं च शुक्रेण वारितः शप्तोऽपि अंग हे नारद यः प्रतिश्रुतं विनाऽन्यन्न चिकीर्षत् कर्तुं नैच्छत् । अडागमाभावस्त्वार्षः । किं तु प्रतिश्रुतं दातुमेवैच्छत् । यश्च तृतीयपादपूरणार्थं हरये आत्मानं देहमध्यभिमेनेऽङ्गीकृतवान् एवं सदेहं त्रैलोक्यं श्रद्धया दत्तवतो विबुधाधिपत्यमर्थो न भवतीत्यर्थः ॥ १८ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

निद्रावसरे हेतुं पृच्छति—कुत इति । कषणशब्दस्य सुखप्रदत्वार्थेऽप्रसिद्धेराह—यद्वेति । अपयाति नश्यति ॥ १३ ॥ ❀ ❀ श्लेषेणार्थांतरमाह । यद्वेति ननु । देवास्तु जानंत्येवास्मत्प्रार्थनयैवैतादृग्रूपं धृतं तत्राह—अथ वेति ॥ १४ ॥ ❀ ❀ आदिपुरुषेति । त्वन्तु आदित एव पुरुषाकारोऽहं तु पुरुषोपि संप्रति पापाद्गजाकार एवेति भावः । अखिललोकनाथस्य ते ममापि नाथत्वान्मां पातुमर्हसीति भावः । तीर्थं पावनं यशो यस्येति दुर्जात्यारंभकात्पापान्मामपि पवित्रीकर्तुमर्हसीति भावः । श्रवणमंगलेति । गुरुमुखात्त्वन्नाम मयापि श्रुतमेव तदप्येतदमंगलं कथमिति भावः । यद्वा । हे तीर्थश्रव इति । तीर्थस्नानादिना यथा निवृत्ताघस्य दुःखं नोचितं तथा तव यशःश्रवणादिनापि तथा च तव यशो वर्णयितुर्ममापि तन्नोचितमिति भावः । एतत्समर्थकसंबुद्ध्यंतरमाह—श्रवणेन मंगलं यस्मात्तादृङ्नामधेयं यस्य तादृशोसि श्रवणापेक्षया वर्णनस्य प्राधान्यात्तत्कर्तुर्मम तु तत्सर्वथैव नोचितमिति भावः ॥ १५ ॥ ❀ ❀ शरणार्थिनं रक्षकं प्रार्थयंतं हरिशब्दस्यार्थांतरव्यावृत्तयेऽप्रमेयः इयत्तारहितः तादृगाकाशादिरप्यस्तीति तद्वारणाय चक्रायुधः तादृग्योद्धाप्यस्ति तद्वारणाय पतगेति भुजस्कंधयोरतीव सामीप्यादेवमुक्तिः ॥ १६ ॥ ❀ ❀ "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्" इत्यादिश्रुतेः "यस्योरुषु त्रिषु विक्रमेष्वधिक्षिपति भुवनानि विश्वा" इति श्रुतेश्चार्थमाह—त्रिपदच्छलेनेति । तत्र पादन्यासे अत्राक्षिपति । नन्विति ॥ १७ ॥ ❀ ❀ पुनराक्षिपति । ननु तर्हीति । इत्यर्थ इति । अत्राधेयेनाधारग्रहणं समासेन शिखायां धृतवान् शिखां धृतवांस्तस्य तथा अन्यन्महत्त्वमाह । किं चेति । अन्यत् ततः परावर्त्तनं न चिकीर्षत् अत्राडागमाभावस्त्वार्षः नाचिकीर्षदित्यर्थः । इत्यर्थ इति न हि भगवद्भक्तानां कैवल्यमपि पुरुषार्थः कुतः स्वर्गादीति भावः । अंगेति । प्रियत्वात्तुभ्यं हरिभक्तचरितमुक्तमिति भावः ॥ १८ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

तत्र हेतुरिति । तत्र आक्रमणे हेतुरित्यर्थः ॥ १७—२५ ॥

### श्रीमद्वीरराघवव्याख्या

कूर्मावतारमाह क्षीरोदधाविति । क्षीरसमुद्रेऽमृतलब्धयेऽमृतलाभार्थममरदानवयूथपानां सुरासुरश्रेष्ठानां उन्मथ्नतां मथनं कुर्वतां सतामादिदेवो भगवान्कच्छपवपुः धृतकूर्मतनुः पृष्ठेन पृष्ठभागेन गोत्रं मंदरपर्वतं विदधार विधृतवान् । कथंभूतो विदधार निद्राक्षणः निद्रायाः क्षणः अवसर उत्सवो यस्य स अद्रिपरिवर्तकषाणकंडूरद्रेर्मंदरस्य परिवर्त्तः परिभ्रम एव कषाणं कषणं यस्यां साऽद्रिपरिवर्तकषाणा तथाविधा कंडूतिर्यस्य स तथोक्तः कषाण इति । दीर्घ आर्षः मंदरभ्रमणसंघर्षितकंडूरित्यर्थः ॥ १३ ॥ ❀ ❀ नृसिंहावतारमाह त्रैविष्टपेति । सः त्रिविष्टपे स्वर्गे भवास्त्रैविष्टपा देवास्तेषामुरुभयं तद्धन्तीति त्रैविष्टपोरुभयहं तथाविधं नृसिंहरूपं कृत्वा धृत्वा कथंभूतं भ्रमंत्यौ भ्रुकुट्यौ दंष्ट्राश्च यस्मिंस्तथाभूतं करालं भयंकरं वक्त्रं यस्मिँस्तथाविधं तदारात्समीपे आशु शीघ्रं गदया उपलक्षितं अभिमुखमापतंतं तं दैत्येंद्रं हिरण्यकशिपुं स्वौरौ स्वस्यौरौ निपात्य पातयित्वा नखैर्विददार विदारितवान् स्फुरंतं परितो गच्छंतं भयहासनृसिंहरूपमिति पाठे हासेनैव सर्वभयनिवर्तकमित्यर्थः ॥ १४ ॥ ❀ ❀ हरिसंज्ञकावतारमाह

अंतरिति । द्वाभ्यां यूथपतिः गजयूथस्य पतिः गजेंद्रः अन्तःसरसि सरोमध्ये उरुबलेनाधिकबलेन ग्राहेण मकरेण पदे गृहीतः अत एवार्तः दुःखित अंबुजं हस्ते यस्य स धृताम्बुजोच्छ्रितहस्तःसन्निदमाह । किमित्यत आह । हे आदिपुरुष कारणपुरुष हे तीर्थश्रवः तीर्थं विशुद्धं श्रवः कीर्तिर्यस्य सः तस्य संबुद्धौ हे तीर्थश्रवः हे श्रवणमंगलनामधेय श्रवणेनैव मंगलं कल्याणसंपादकं नामधेयं यस्य स ईदृशस्त्वं रक्षिता भवेत्याहेत्यर्थः ॥ १५ ॥ ❀ ❀ तच्छ्रुत्वा गजेंद्रस्य वचः श्रुत्वा ऽरणार्थिनं शरणार्थिनं हस्ते शुंडायां प्रगृह्य भगवान्कृपया तस्माद्ग्राहादुज्जहार उद्धृतवान् । किं कृत्वा चक्रेण सुदर्शनेन नक्रस्य ग्राहस्य वदनं विनिपाट्य विदार्य कथंभूतो भगवान्पतगानां पक्षिणां राजा गरुडः तस्य भुजयोरधिरूढः आरूढ चक्रायुधधरः अप्रमेयः अपरिच्छिन्नस्वरूपस्वभावः ॥ १६ ॥ ❀ ❀ वामनावतारमाह ज्यायानिति । अदितेः सुतानां द्वादशादित्यानां मध्येऽधियज्ञः यज्ञाधिपतिर्भगवानवरजः कनीयानपि गुणैर्ज्यायान् श्रेष्ठः गुणानेवाह यद्यतः इमान् लोकान्विचक्रमे पादविन्यासैः क्रांतवान् अथ प्रतिश्रुतानंतरमेव तत्र हेतुः बलेश्चक्रवर्तिनः सकाशाद्भूमिं यक्ष्मां वामनेन रूपेणेति शेषः । वामनेन रूपेण जगृहे गृहीतवान् नन्वीश्वरः स्वयं दुर्बलवत्किमिति तथा चक्रे तत्राह याञ्चामृते याञ्चां विना पथि चरन् धर्ममार्गे प्रवर्तमानः प्रभुभिरसमर्थैरपि न चाल्यः ऐश्वर्यान्न भ्रंशनीय इत्यर्थः ॥ १७ ॥ ❀ ❀ ननु तर्हि याञ्चयापि चालनमनुचितमेवेत्याशंक्य प्रबुद्धस्य बलेर्लौकिकस्वीयैश्वर्यभ्रंश इष्ट एवेत्याशयेनाह नार्थ इति । उरुक्रमस्य विस्तृतपादविन्यासस्य हरेः पादक्षालनं प्रत्युपयुक्ता आप आ अप इति च्छेदः आसमन्तात् शिखायां मूर्द्धिन धृतवतः सुप्सुपेति समासः यद्वा सप्तम्या आर्षो लुक् विबुधाधिपत्यं नार्थः न सदृशं प्रयोजनमित्यर्थः । एतदेवोपपादयति यो बलिः प्रतिश्रुतमृते प्रतिज्ञातार्थं विनाऽन्यत्र चिकीर्षत्कर्तुं नैच्छदडभावः आर्षः । किंतु स्वात्मानं अंग हे नारद हरये शिरसाऽभिमेने भगवच्छेषभूतमात्मानं हरये समर्पितवान् । शुक्रेण वारितः शप्तोऽपि अन्यथा कर्तुं नैच्छत्किंतु तृतीयपादपूरणार्थमात्मानमपि शिरसा समर्पितवानित्यर्थः ॥ १८ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

अमृतलब्धयेऽमरदानवयूथपानां क्षीरसमुद्रमुन्मथ्नतां सतामतिभारेण क्षीरोदधौ मज्जंतं गोत्रं पर्वतं स आदिदेवः कच्छपवपुर्भूत्वा पृष्ठेन विदधारेत्यन्वयः । उपर्यधो नेत्रगोत्रयोरित्यर्थद्योतको वीत्युपसर्गः तज्जातिस्वभावमाह निद्रेक्षण इति । निद्रेषन्मीलितनेत्रः निद्राहेतुमाह अद्रीति । मंदराद्रेः परिवर्तः परिभ्रमणं तेन कषाणं विलेखनं तेन जातः कंडू कंडूयनं यस्य स तथा ॥१३॥ ❀ ❀ त्रिविष्टपानां देवानां दैत्याद्युरुभयं तद्धारित्द्वननशीलं भ्रमंत्या स्फुरन्त्या भ्रुकुट्या दंष्ट्राभ्यां च करालं भयंकरं च वक्त्रं यस्य तत्तथा नृसिंहयोर्नरस्य सिंहस्य च रूपमिव रूपं कृत्वा स हरिरारात् दूराद्गदयाभिपतंतं स्फुरंतं दैत्येंद्रं हिरण्यकशिपुं वेगेनोरौ निपात्य नखैर्विददारेत्यन्वयः । दृवि दारण इति धातोः ॥ १४ ॥ ❀ ❀ यदा यूथपतिर्गजेंद्रः सरस्युरुग्राहेण पदे गृहीत आर्तः सन्नंबुजहस्तः हे आदिपुरुष, अखिललोकनाथ, तीर्थश्रवः, पावनकीर्ते, श्रवणमात्रेण मंगलप्रदनारायणाद्यभिधानत्वमस्माद्रक्ष इतीदमाह ॥ १५ ॥ ❀ ❀ तदा तापसो नाम भगवानरणार्थिनं शरणार्थिनं स्मृत्वा तत्रागत्य कृपया तं हस्ते प्रगृह्योज्जहार भगवच्छब्दवाच्यत्वमृष्यादीनामप्यस्तीति ततो व्यावर्तयेति अप्रमेय इत्यादिना । अप्रमेय इयत्तारहितः एतदाकाशस्याप्यस्तीत्यतश्चक्रायुध इति नन्वनेन योद्धाप्युच्यत इति तत्राह पतगेति । पतगराजो गरुणस्तस्य भुजमधिरुढः भुजस्कंधयोरतिसामीप्यादेवमुक्तं किं कृत्वा चक्रेण सुदर्शनेन नक्रस्य ग्राहस्य वदनं विनिपाट्यच्छित्त्वा हरिस्तापसऽसौजातस्तपसि वै मनुरित्यादेः कोऽयमवतारो नामेति शंका निरस्ता ॥ १६ ॥ ❀ ❀ वामनत्रिविक्रमावतारौ तत्कर्मचाह ज्यायानित्यादिश्लोकद्वयेन । अत्र यत्तच्छब्दावध्याहार्यौ । तथाहि योऽधियज्ञो भगवान्गुणैर्ज्यायानप्यदितेः सूतानामवरजोऽभूत्तेन भगवता दैत्यानां गर्वं वामयति उद्गारयतीति वामनः तेन वामनरूपेण त्रिपदच्छलेन क्ष्मां जगृहे इति यत्तदथो तस्मात्स एव वामन इमान् स्त्रीं लोकांस्त्रीभिः पदैर्विचक्रमे तस्मात् त्रिविक्रमश्चाभूदिति वाक्यशेष इत्यर्थः । किमर्थमेवं हरिणा कृतमत्राह याञ्चामिति । मार्गवर्ती पुमान् प्रभुभिरप्युपायैर्विना न चाल्य इति न्यायदर्शनार्थमेवं कृतमिति भावः । यद्वा अधियज्ञः क्ष्मायामुर्व्यां वामनेन ह्रस्वतरेण रूपेण जगृहे त्रिलोकीमिति शेषः । कथं त्रिपदच्छलेन इमान् लोकान्विचक्रमे इति यत्तस्माददितेः सुतानां जन्मना ऽवरजोऽपि ज्यायान् गुणैः सममन्यत ॥१७॥ ❀ ❀ त्रिपदच्छलेन त्रैलोक्यं दत्तवतो बलेर्दानफलमिन्द्रपदावाप्तिरिति संगिरंते केचित्तन्न किंतु हरितोषणद्वारा मुक्तावानंदोद्रेकता एव ऐंद्रं पदं नांतरीयं फलं तु हरितोषणमित्यादेरित्याशयेनाह नार्थ इति । अंग नारद प्रतिश्रुतं पदत्रयमृतेपि चात्मन्यं स्वसंबंधि शीर्षमाणं शीर्षाख्यमानं मनसा मनःपूर्वकं हरयेऽभिमेने समर्पयामास तस्यास्योरुक्रमपादशौचमंभः शिवं शिरसा धृतवतो बलेर्यद्विबुधाधिपत्यलक्षणं फलमयमर्थो न साक्षात्फलं न भवति तन्नांतरीयकमेवेत्यन्वयः वा इत्यनेनास्यार्थस्यानन्यथात्वं वक्ति ॥ १८ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

अद्रेः परिवर्त्तः परिभ्रमः स एव कषाणः कषन् हिंसको यस्यां सा कण्डूर्यस्य सः ॥ १३ ॥ १४ ॥ ❀ ❀ आहेदमिति । अस्य वाक्यस्य नारायणाखिलगुरो भगवन्नमस्ते इत्यष्टमस्कन्धवाक्येन समाप्तिर्ज्ञेया ॥ १५ ॥ ❀ ❀ भुजा भुजयो-

मध्यभागः पृष्ठमित्यर्थः॥ १६॥ ❀ ❀ लोकान् विचक्रमे इति गुणज्यायस्त्वे हेतुः सर्वातिक्रमिगुणो हि सर्व्वमाक्रमितुं शक्नोति। क्ष्मामिति तदुपलक्षितं त्रैलोक्यमित्यर्थः॥ १७॥ १८॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

कूर्म्मावतारमाह क्षीरोदधाविति। अमृतलब्धये क्षीराब्धिमुन्मथतां या अमृतलब्धिस्तस्यै गोत्रं मन्दरगिरिं दधार। निद्रायां क्षणः अवसर उत्सवो वा यस्य सः। तत्र हेतुः अद्रेः परिवर्त्तेन परिभ्रमणेन कषाणा कष्यमाणा दूरीक्रियमाणा कण्डूर्यस्य सः। कष हिंसायां यगभाव आर्षः॥ १३॥ ❀ ❀ श्रीनृसिंहावतारमाह। त्रैविष्टपानां देवानाम् उरुभयं हन्तीति तथा स प्रसिद्धो भगवान्। भ्रमन्त्यो भ्रुकुट्यो दंष्ट्राश्च यत्र तथाभूतं करालं भीषणं वक्त्रं यत्र तत्। दैत्येन्द्रं हिरण्यकशिपुं आरात् समीपत एव गदया सह अभिपतन्तम्॥ १४॥ ❀ ❀ हरिसंज्ञकावतारमाह अन्तरिति द्वाभ्याम्। इदं नाम चतुष्टयम्। आह तत्रादिपुरुषेति त्वमादित एव पुरुषाकार एव अहन्तु जीवत्वात् पुरुषोऽपि सम्प्रति पापात् गजाकार एवेति भावः। अखिललोकानां नाथेति ममापि नाथस्त्वं भवितुमर्हस्येवेति भावः। तीर्थं पावनं श्रवो यशो यस्येति दुर्ज्जात्यारम्भकात् पापात् मामपि पवित्रीकर्त्तु-मर्हस्येवेति भावः। श्रवणमङ्गलेति श्रीगुरुमुखात् त्वन्नाम मया श्रुतमेव तदप्येतदमङ्गलं कथमिति भावः॥ १५॥ ❀ ❀ अरणार्थिनं शरणार्थिनम्॥ १६॥ ❀ ❀ वामनावतारमाह अदितेः सुतानां द्वादशादित्यानाम् अवरजोऽपि गुणैर्ज्यायान् अधियज्ञः यज्ञाधिष्ठाता विष्णुः। वामनेन वामनरूपेण नन्वीश्वरः किमिति तथाच्छलेन याचते तत्राह याञ्चां विना धर्म्ममार्गे वर्त्तमानः प्रकारान्तरेण न चालयितुमर्हः॥ १७॥ ❀ ❀ ननु तर्हि याञ्चयापि चालनमनुचितमेवेत्याशङ्क्य ततोऽधिकं स्वसालोक्यादि दास्यामीत्याशयेन हृतवानित्याह नार्थ इति। यत् विबुधाधिपत्यम् इदानीं बलात् प्राप्तम्। अग्रे दास्यमानञ्च अयं बलेः पुरुषार्थो न भवति। कुत इत्यत आह। आ अप इति च्छेदः उरुक्रमस्य पादशौचं चरणक्षालनरूपा अपः आ सम्यक् प्रकारेण धृतवतः। क शिखा शिखासु मूद्‌र्ध्नीत्यर्थः। किञ्च शुक्रेण वारितः शप्तोऽपि अङ्ग हे नारद प्रतिश्रुतं विना अन्यत् न चिकीर्षत् कर्त्तुं नैच्छत्। अडागमाभाव आर्षः। यत्तृतीयचरणपूरणार्थं हरये आत्मानम् अहन्तास्पदं देहमप्यभिमेने अभिमतीकृत्य ददावित्यर्थः॥ १८॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

कूर्मावतारमाह क्षीरोदधाविति। आदिदेवः भगवान् कच्छपवपुः सन् क्षीरोदधौ क्षीरार्णवे अमृतलब्धये अमरदानवयूथपानाम् उन्मथ्नतां मथनं कुर्वतां सतां पृष्ठे न गोत्रं मंदरगिरिं विदधार विधृतवान्। कथंभूतो निद्राक्षणः निद्राया क्षणः अवसरः उत्सवो वा यस्य स तथोक्तः तत्र हेतुगर्भं विशेषणम् अद्रिपरिवर्तकषाणकंडूरिति। अद्रेः परिवर्तः परिभ्रमः स एव कषः कषणं तेन अणिति अपयातीति अद्रिपरिवर्तकषाणा एवं विधा कंडूर्यस्य स तथोक्तः॥ १३॥ ❀ ❀ नृसिंहावतारमाह त्रैविष्टपोरुभयहेति। स एव भगवान् त्रिविष्टपे स्वर्गे भवास्त्रैविष्टपा सुराः तेषामुरुभयमपहंतीति तथा भ्रमंत्यौ भ्रुकुट्यौ दंष्ट्राश्च यस्मिन् तत् करालं वक्त्रं यस्मिन् तत् तथाविधं नृसिंहरूपं कृत्वा स्फुरंतं क्रोधवशात्कंपमानम् आरादंतिके गदयोपलक्षितम् अभि पतंतमभिमुखमापतंतं दैत्येंद्रं हिरण्यकशिपुम् ऊरौ स्वोरौ निपात्य नखैर्विददार॥ १४॥ ❀ ❀ हरिसंज्ञकावतारमाह अंतरिति द्वाभ्याम्। अंतःसरसि सरोमध्ये उरुबलेन बहुबलेन ग्राहेण पदे गृहीतः अतएव आर्तः यूथपतिः गजयूथनाथः अंबुजमुपायनभूतं हस्ते यस्य सगृहीतांबुजः सन् इदमाह हे आदिपुरुष सर्वजनक हे अखिललोकनाथ सर्वप्राणियाच्यतीर्थरूपाणि श्रवांसि यशांसि यस्य स तीर्थश्रवाः तस्य संबोधने हे तीर्थश्रव इति श्रवणमात्रेणापि मंगलानि मंगलावहानि नामधेयानि यस्य स तथा तस्य संबोधने हे श्रवणमंगलनामधेय॥ १५॥ ❀ ❀ हरिः स्वानन्यभक्तक्लेशहरणस्वभावः तद्वचनं श्रुत्वा तमरणार्थिनं हस्ते शुंडायां प्रगृह्य चक्रेण श्रीसुदर्शनेन नक्रस्य वदनं विनिपाट्य विदार्य तस्मान्नक्रवदनात् कृपया उज्जहार उद्धृतवान्॥ १६॥ ❀ ❀ वामनावतारमाह ज्यायानिति। अदितेः सुतानां मध्ये अधियज्ञ यज्ञाधिष्ठाता भगवदवतारः अवरजोऽपि पश्चाज्जातोपि द्वादशानामदितिपुत्राणां मध्ये कनिष्ठभ्राताऽपीत्यर्थः गुणैस्तु दातृप्रतिगृहीत्रोर्बलिवामनयोर्यशोवहैः आदित्यानां सुखावहैश्च ज्यायानेव ज्येष्ठ एव तान् दर्शयति। यत् यतः इमान् लोकान् विचक्रमे क्रांतवान् अथ प्रतिश्रुतानंतरमेव तत्र हेतुः बलेः क्ष्मां त्रिपदच्छलेन त्रिपदप्रमितभूमियाञ्चामिषेण वामनेन रूपेण जगृहे गृहीतवान् याञ्चामिषेण क्ष्मादाने हेतुमाह पथि चरन् धर्मवर्त्मनि वर्तमानः प्रभुभिरीश्वरैरपि याञ्चां विना न चाल्य न वृथोद्वेजनीय इत्यर्थः॥ १७॥ ❀ ❀ एवं स्वभक्तानां देवानामैश्वर्यसाधकेन भक्तवत्सलेन भगवता बलेः स्वभक्तस्य याञ्चाक्ष्मापहारेण यशोमात्रमेव स्थापितं यद्यपि तथापि तस्य विबुधाधिपत्यापहारेणानुपकार एव कृत इत्याशंकां निवारयितुमाह नार्थ इति। यद्विबुधाधिपत्यम् अयं बलेः पुरुषार्थो न भवति कुत इत्यत आह उरुक्रमपादशौचमापः शिखाधृतवत इति। आ अप इति च्छेदः। शिखा इत्यत्र सप्तम्या आर्षो लुक् उरुक्रमस्य विपुलचरणविन्यासस्य भगवतः पादशौचं चरणक्षालनरूपा आपः आ सर्वतः शिखायां मूर्ध्नि धृतवतः किंच अंग हे नारद भार्गवेण सर्वस्वं विष्णवे दत्त्वा मूढवत्वर्त्स्यसे कथमित्यादिना वारितोऽपि प्रतिश्रुतमृते अन्यन्न चिकीर्षत् कर्त्तुं नैच्छत्। अडभाव आर्षः किंतु यः तृतीयपादपूर्त्यर्थं हरये आत्मानमप्यभिमेने समर्तिपवान्। एवं चरणशौचेन मूद्‌र्ध्नश्च धिकृतेन आत्मसमर्पणेन स सकृतार्थ आसीदित्यर्थः॥ १८॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

श्रीलक्ष्मणं निरूपयति—**क्षीरोदधाविति**। कूर्मेण हि सुधया सह लक्ष्मीर्निष्पादिता। यावत्कार्यं कूर्मस्य तावच्छ्रीवत्सस्य। यथा ब्राह्मणपादस्य स्पर्शस्तथा मन्दरस्य। यथा सर्वैर्ब्राह्मणैर्विचार्य स निरूपितस्तथा सर्वैर्देवदानवैर्मन्दरः कूर्मे निरूपितः। यथा घर्षणं तथा शास्त्रार्थनिर्णयः। क्षीरोदधौ ये अमरदानवानां यूथपा मथनं कुर्वन्ति तेषामुन्मथनतामममृतप्राप्त्यर्थम् आदिदेवः आधिदैविको दे[1]वो देवपक्षपाती कच्छ[2]पवपुः कूर्मावतारो भगवान् पृष्ठेन गोत्रं मन्दरं दधार। ननु किमिति मन्दरं स्थूलं भाररूपं धृतवान्? तत्राऽऽह। निद्राक्षणः निद्रायां क्षणो यस्य। निद्रार्थं धृतवानित्यर्थः। ननु विपरीतमिदमुच्यते। निद्रालुर्हि सर्वमेव भारं दूरी[3]करोति? तत्राऽऽह—**अद्रिपरिवर्त्तकषाणकण्डूरिति**। अद्रेः परिवर्त्तनेन कषाणा घर्षिता कण्डूर्यस्य। अतो घर्षणार्थमद्रिं धृतवानित्यर्थः। घर्षणेन हि सुखे जाते निद्रा भवति। यथा पर्वतधारणं सर्वेषां देवानाममृतपानसिद्ध्यर्थम्। एवं सर्वेषां भ्रान्तानां प्राणिनां सर्वपुरुषार्थसिद्ध्यर्थं परीक्षकब्राह्मणचरणधारणम् ॥ १३ ॥ ❀ ❀ कौस्तुभरत्नकन्धरं निरूपयति—**त्रैविष्टपोरुभयहेति**। नृसिंहः कौस्तुभरत्नकन्धरो भवति। यथा कौस्तुभस्य कण्ठे स्थापितस्य रश्मयः स्कन्धे निर्गता केसरप्राया भवन्ति। एवमेव हि नृसिंहो भगवत्कौस्तुभरूपः। कौस्तुभं यद्भगवान्कण्ठे बिभर्ति तद्दैत्यानां वधार्थे भक्तजनोद्धारार्थे। सर्वे हि भगवदीया जीवाः कौस्तुभरूपम्। "**चैत्यस्य तत्त्वममलं मणिमस्य कण्ठे**" इति वाक्यात्। अतो भगवांस्तांश्चेद्धृदये न स्थापयेत्तदा मृत्युसाधनैः कर्मभिर्मृत्युग्रस्ता एव भवेयुः। अतो मृत्युगजनिवारको नृसिंहः प्रह्लादरक्षकस्तत्प्रतिपक्षहिरण्यकशिपुघाती। त्रैविष्टपा देवास्तेषां यदुरुभयं तद्धन्तीति तथा। स भगवान्नृसिंहरूपं कृतवान्। ग्रामारण्यवासिनो हि द्विविधा भक्ताः। उभयेषामुद्धरणार्थमुभयरूपम्। कौस्तुभोऽपि तथा। भ्रमयुक्ते ये भ्रुकुटी तत्सहिता दंष्ट्राः ता[4]भिः करालं वक्त्रं यस्य। भ्रुकुटिपरिभ्रमणं ग्रासार्थमागतस्य कालस्य वक्रीकरणम्। तत्सहिता यदि दंष्ट्रा। यमोऽपि पराभूतः। अत एव करालं वक्त्रम्। अनेन ये केचिद्भ[5]क्तप्रतिपक्षास्ते तादृशं मुखं दृष्ट्वा सर्वथा न स्वकार्यं करिष्यन्तीति सूचितम्। अत एव [6]भक्तप्रतिपक्षं दैत्येन्द्रम्। आशु शीघ्रं अन्यस्य सावधानताभावाय आभिमुख्येन पतन्तम्। गदया प्रहारसमर्थया। आराद्दूरादेव। ऊरौ निपात्य। स्फुरन्तं तं नखैर्विददार। नखैर्विदारणं मुक्त्यभावाय। ऊरौ निपातनं कामोद्भवाय। एवमेव हि कौस्तुभो भक्तप्रतिपक्षं संसारे कामे वा योजयति। स्फुरन्तमितस्ततः सर्पन्तम् ॥ १४ ॥ ❀ ❀ अम्लानलक्ष्म्या वनमालयाङ्कितं निरूपयति—**अन्तःसरस्युरुबलेनेति** द्वाभ्याम्। यो हरिः स वनमाला। भक्ता हि गजेन्द्रमोक्षणरूपां भगवत्कीर्त्तिं श्रुत्वा सर्वथा प्रवर्त्तन्ते। वनमाला च कीर्त्तिमयी। अम्लाना हि तस्य कान्तिः। न तत्र देवादीनां सहायो वरो वा। [7]गजेन्द्रः केवलं भगवतैव मोचितः। न वा देवादीनां प्रार्थना। न वा तस्य लौकिका गुणा भगवत्प्रीतियोग्याः। तस्मात्केवलकृपयैव मोचित इत्यम्लानत्वम्। विलम्बासहिष्णुत्वाय विशेषणानि। अन्तःसरसि सरोमध्ये। उरुबलेन। देव[8]लाच्छापेन तादृशरूपस्य देवलकृपयैव महाबलत्वम्। **पदे गृहीत इति**। क्रियाशक्तिः कुण्ठिता। ग्राह[9]पदेन चाऽनिवार्यप्रतिबन्धकत्वम्। **यूथपतिरिति** तस्मिन्मृते सर्व एव मरिष्यन्तीति। अन्येषामसमर्थता वा। **अम्बुजहस्त इति** पूर्वक्रूरभावो निवारितः। भगवदाभिमुख्यार्थं च। भगवत्पूजार्थं वा अम्बुजग्रहणम्। आर्त्तत्वेन सर्वसाधनाभावः। नह्यन्ये तादृशे कृपां कुर्वन्ति। इदं चाऽऽह—हे आदिपुरुष। अनेन तवाऽऽव[10]श्यपालनीयोऽहम्। मूलपुरुषत्वात्। अन्यो वा न वक्तव्यः। **अखिललोकनाथेति** सर्वलोकपालने त्वमेवाऽधिकृतः। अतो नाऽन्यो वक्त[11]व्योऽस्ति। ननु तव दुःखानुभवहेतुप्रत्यग्रपापस्य विद्यमानत्वान्मया किं कर्त्तव्यमित्याशङ्का[12]यामाह—हे तीर्थश्रवः। तीर्थरूपं श्रवः कीर्त्तिर्यस्य। तव कीर्त्तिस्मरणेनैव वयं धौतपापाः। ननु केवलमोचने न कश्चित्पुरुषार्थः। किन्तु वैकुण्ठयोग्यो देहः सम्पादनीयः। तदर्थं च शुभाऽदृष्टाभावात्किं मया विधेयमित्याशङ्क्याऽऽह—**हे श्रवणमङ्गलनामधेयेति**। श्रवणमात्रेणैव मङ्गलं सर्वशुभदायि नामधेयं यस्य। अनेन त्वन्नाममात्रेणैव सर्वशुभहेतुभाग्यं सिद्धम्। एवं पदचतुष्टये निरूपिते वैकुण्ठस्थितो भगवान् श्रुत्वा दूरादेव तं शरणार्थिनं ज्ञात्वा। केनाऽपि न ज्ञातः अयं गजेन्द्रोद्धारार्थं गच्छतीति। तथा सति कश्चिद्देवोऽन्यो वा स्वप्रतिष्ठार्थं हस्ते तं धृत्वा बहिः क्षिपेत्? अत आह **अप्रमेय इति**। **चक्रायुध इति** मुक्तिदानार्थम्। पतगराजभुजादधिरूढ उत्तीर्णः। अनेन तस्य कालग्रासानन्तरं मुक्तिदानं निवारितम्। न हि गजेन्द्रो देहत्यागं ज्ञातवान्। "**कालात्मकः सोऽथ सुपर्ण**" इति वाक्याद्गरुडस्य कालत्वम्। आगतस्य कृत्यमाह—**चक्रेण नक्रवदनमिति**। प्रतिबन्धकाभावं कृत्वेत्यर्थः। [13]ननु तेन सहोद्धरणम्। तस्मात्सङ्कटात्। हस्ते शुण्डादण्डे प्रकर्षेण गृहीत्वा। स्पर्शमात्रेणैव चतुर्भुजं रूपं संपाद्य तं गृहीत्वेत्यर्थः। भगवतोद्धृतत्वाद्ब्राह्मणानां शापलक्षणः प्रतिबन्धकोऽकिञ्चित्करः। **कृपयोज्जहारेति** जीवस्य साधनाभावो निरूपितः। परदुःखप्रहाणेच्छा कृपा। एवं हि भगवत्कीर्त्तिर्भक्तानुद्धरति। इदमेव चरित्रमुत्तरत्र भक्तिहेतुत्वेन विचारयिष्यते प्रह्लादवाक्येषु। ततः कीर्त्त्यैव प्रेमेति सिद्धं भविष्यति ॥ १५ ॥ १६ ॥ ❀ ❀ एवं वनमालां निरूप्य तेनाऽङ्कितत्वं च प्रेमजनकत्वेन सूचयित्वा

---

१. देव इति नास्ति ख.। २. कच्छपरूप इति ख.। ३. दूरीकरोतीति क. घ.। ४. तैः करालमिति क. घ.। ५. केचिद्भगवत्प्रतीति ख.। ६. भक्तिप्रतीति क.। ७. गजेन्द्रे। केवलं इति क. ख.। ८. देवलशापेनेति शोधः क.। ९. ग्राहबलेनेति घ.। १०. ऽवश्यं पालनीय इति ख.। ११. वक्तव्येतीति ख.। १२. मित्याकाङ्क्षायामिति ख.। १३. नन्वित्यारभ्य स्पर्शमात्रेणैवेत्यन्तं नास्ति ख.।

विभूषितं मेखलयेति निरूपयति—**ज्यायान्गुणैरिति** द्वाभ्याम्। वामनो हि भगवतो मेखलारूपः। मेखला हि कटिस्थानबन्धिका भवति। '**स जघनादसुरानसृजत**'ेति श्रुते "**जंघने आत्ममुख्यानि**"ति च वाक्यात्। दैत्यबन्धकत्वेन मायामप्यन्तः पातयित्वा शोभां जनयतीत्याकुञ्चनप्रसारणधर्मवत्त्वाच्च वामनः कटिसूत्रमेव। अत एव गुणप्राधान्येन निरूपणम्। अदितेः सुतानां मध्ये अवरजोऽपि। अदितिर्हि भूमिरूपा। यद्यपि सर्वरूपत्वेन निरूप्यते तथापि तस्याः स्तुतिपरत्वादियं वा अदितिरित्येव मुख्या। तस्याः सुतास्तत्कीर्तिं रक्षां वा जनयन्ति। अतो रक्षाकीर्त्तिरूपं पीताम्बरं भवति। तां च दृढां करोति मेखला। गुणैर्ज्यायान् पुष्टः स्थूलो महानित्यर्थः। तस्य गुणानेवाह। गुणा ह्युत्कर्षाधायकाः। भगवतो जगत्कर्तुः सर्वप्रेरकस्य सर्वनियन्तुः कालचेष्टारूपस्य के वा ते धर्मा ये उत्कर्षमादधतीत्याशङ्क्य वामनस्य गुणास्तथा भवन्तीति मेखलागुणप्रस्तावे तान्निरूपयति—**लोकान्विचक्रम इति**। भगवतो ब्रह्माण्डरूपस्य उरःकण्ठादिरूपेण उपरितनलोकानां निरूपणात्। तत्र स्वेनैवाऽऽक्रमणं न [1]युक्तिसहितां बुद्धिमारोढुमर्हति। अतो भगवतोऽन्ये धर्मा बुद्ध्या परि[2]कलितुं शक्यन्ते। सर्वरूपेणैव भगवतः स्वाक्रमणं न बुद्धिगम्यमिति गुणत्वम्। बलिं प्रति पादस्याऽग्रे [3]नयनप्रदर्शनं ममेच्छयैव भवन्तः स्वर्गादिलोकभोक्तारो जाताः। वस्तुतस्तु चरणावयवलोकभोक्तारः। तेषामुपर्याक्रमणं न नित्यम्। मेखला ह्युभयपरिच्छेदकर्त्री "**उर्ध्वं वै पुरुषस्य [4]नाभ्यै मेध्यमवाचीनममेध्यं यन्मध्यतः संनह्यति मेध्यं चैवाऽस्याऽमेध्यं च व्यावर्त्तयती**" ति श्रुतेर्मेखलायास्तदुभयपरिच्छेदकत्वम्। ततो दैत्यानां स्वर्गाऽऽक्रमणं न युक्तमिति व्यावर्त्तकेन व्यावृत्तिः क्रियते। अतो युक्त्या परमार्थतश्चाऽऽक्रमणं न[5] संभावितम्। किञ्च। विशेषेण चङ्क्रमणं सुतरामसंभावितम्। विशेषो हि विक्रमणेन पततां लोकानां तेनैव स्तम्भनम्। पातिकैव क्रिया पा[6]तयन्ती पालयतीत्याश्चर्यम्। किञ्च। अतः परमन्यो विशेष उच्यते भिन्नक्रमेणेत्याह—**अथेति**। लोकपरमार्थाभ्यां पूर्वमलौकिकं निरूपितम्। अधुना स्वयं यज्ञरूपो यज्ञस्थापनां कुर्वन् यज्ञविघ्नं करोतीति वेदेऽप्यलौकिकम्। तदाह—**यदथाधियज्ञ इति**। यस्मादयमधियज्ञः। एवं सर्वप्रकारेण बुद्ध्यगोचरत्वं विनिरूप्य रूपस्वभावविरुद्धं करोतीत्याह—**क्ष्मां वामनेन जगृहे त्रिपदच्छलेनेति**। वामनो हि स्वल्पामपि भूमिं देहेनाऽपि नाऽऽक्रमति। तेन सर्वभूमिग्रहणं सुतरामयुक्तम्। नमनेनैव हि मेखलया कटिराक्रम्यते। किञ्च। **त्रिपदच्छलेनेति**। न हि भगवतः पदत्रयमस्ति। छलं हि भ्रमजनकम्। मानं हि तत्र व्याप्तमेव तद्गृह्णाति। न[7] हि भगवान् बुद्ध्या मानमुक्तवान् चरणस्तु निष्काशितो न मानं भवति। अतो भगव[8]ता तृतीयः पादः कल्पनीय इति ज्ञातव्यम्। वामनवाक्या[9]नुसन्धानेन तद्भ्रामकपदैर्लोके अन्यथा प्रतीतिजनकैर्भूमियाचनं [10]छलो भवति। "**मायेत्यसुरा**" इति तेषां मायारूपेणैव भगवान् भवतीति भगवता सत्यतया निरूपितमपि छलत्वेन पर्यवसितमिति तथोच्यते। एवं भगवतो महद्गुणान्विनिरूप्य तत्र जातं दोषं याचनलक्षणं निराकरोति—**याञ्चामृत इति**। याञ्चा हि द्विविधा। सेवककर्तृका प्रभुकर्तृका च। तत्र सेवककर्तृका प्रभोर्दोषावहा न प्रभुकर्तृका। वस्तुतस्तु इयं याञ्चा प्रभुकर्तृका। वस्तुतः प्रभोरपि धनं अन्येषु स्थापितं नीतिमार्गेण तस्य याचनमेवोचितम्। स्वेनैव तत्र स्थापितत्वात्पथि चरणम्। अनङ्गीकार एव हि बलाद्ग्रहणम्। न चाल्प इति स्थानान्न निष्कासनीयः। याञ्चां कृत्वा तु निष्कासनीयस्तदनङ्गीकारे। **क्ष्मामिति** भूमिमेव गृहीतवान् याञ्चयाऽपि। दैत्यानां हि तत्रोत्पन्नानां तत्स्वामित्वमेव। अतो हि बन्धनम्। अन्यथा पातालादिषु कचिदपि तत्स्वामित्वे ग्रहणं न स्यात् अबद्धश्च स्वाम्यं सर्वथा करिष्यत्येवेति बन्धनम्। अनेनाऽपि च्छ[11]लः समर्थितो भवति। एकस्यांऽशस्य याचनम्। अंशद्वयस्य त्याजनम्। त्रयाणां तु याचनं च्छ[12]लः। सन्नियोगशिष्टत्वात्त्रयाणां याचनम्। अन्यथा शेषाभ्यनुज्ञा स्यात्। क्रियाद्वयं वा आपद्येत। तस्मान्मेखलया भूमिग्रहणमुचितमेव ॥ १७ ॥ ❀ ❀ ननु भगवान् भक्तिमार्गविरुद्धं कथं कृतवान्। गुणा हि भक्तिजनकाः भक्तैरेव ग्राह्या आदरणीयाश्च। न च भगवान् भक्तिविरुद्धमपि करोतीति शास्त्रार्थो भवति। तस्मादस्य चरित्रस्य गुणत्वेऽपि न प्रकृतोपयोगिगुणत्वमित्याशङ्क्याऽऽह—**नार्थो बलेरयमिति**। भक्तिविरोधस्तदाऽऽपतति यदि भक्त्या[13]भिप्रेतः स्यात्। नहि मेखलया कटिबन्धनं कटिस्थानस्याऽनभिप्रेतं भवति। नहि भक्तस्य धनं भगवतोपभुज्यमानं तस्य दुःखाय भवति। तदीयस्य सर्वस्याऽपि तदर्थत्वात्। लोकप्रती[14]त्या तु यो विरोधः स गुण एव। भक्तैश्चेद्विरोधो मतः स्यात्तदापि परिहरणीयः। अभिमानव[15]तामपि भक्तानामनभिप्रेतत्याजनं सुखकरमेव। तदाह। अस्य भक्तस्य कलेर्भगवत्पूजारूपस्य विबुधाधिपत्यम् अर्थः फलं पुरुषार्थो वा न भवति। पूजा ह्यसम्बद्धा न भगवत्प्रीतिं जनयतीति दैत्यानां सम्बन्धनिराकरणार्थं मंत्रैस्तत्परिच्छेदकरणं युक्तमेव। अयं च लोकत्रयात्मको विषयो बलेर्नाऽर्थः। तर्हि कथं पूर्वं तेन गृहीतमित्याशङ्क्याऽऽह—**उरुक्रमपादशौचमिति**। स हि भगवच्चरणाविन्दे समर्पणार्थं पूर्वं गृहीतवान्। अधुना चरणप्रक्षालनं कृत्वा तत्तस्मिन्निवेद्य तच्चरणारविन्दोदकं शिखायां धृतवतो भगवदीयत्वं प्राप्तस्तादृशशरीरप्राप्तियोग्यतां वा प्राप्तः। कक्षात्रयमुपरिगतस्तादृशस्य प्रथमकक्षा न पुरुषार्थाय। न हि भगवता

१. युक्तिसाध्यां ग.। २. परिकल्पितुमिति क. घ.। ३. नमनमिति ग.। ४. नाभेर्मध्यं ग.। ५. न संभवतीति ख.। ६. पातयन्तीति नास्ति ग.। ७ न भगवानिति ख.। ८. भगवतस्तृतीय ग.। ९. वाक्यार्थानुसंधानेनेति ख.। १०. छलमिति ख.। ११. छलं समर्थितमिति ख. ग.। १२. छलमिति ख. ग.। १३. भक्तानभीति क. भक्त्यनभिप्रेतं इति घ.। १४. प्रतीत्या च इति ख. १५. मानवतां भक्तानां ग.।

बलादयं कक्षात्रये नीतः । नह्ययं प्रत्याक्रमणेच्छुः । भगवांस्तु बलिस्थाने स्थितः श्रुत्य[1]र्थपरिपालनाय । "[2]स वै विष्णुक्रमान्क्रमेत य इमान् लोकान् भ्रातृव्यस्य संवि[3]ज्य पुनरिमं लोकं प्रत्यवरोहेदि" ति श्रुतेः । "ये यथा मां प्रपद्यन्त" इति वाक्यात् । दानस्य साफल्याच्च । अनन्तगुणं हि पा[4]त्रे दत्तं भवति । अतोऽनन्तब्रह्माण्डाधारो भगवांस्तस्य सिद्धः । अतः पूर्वस्वीकृतत्रैलोक्यं नार्थः । किञ्च । पूर्वं महादेवाय त्रैलोक्यं दत्तं भगवतैव । पश्चाच्चरणोदकं मस्तके स्थापयित्वा ऐश्वर्यादौ विरक्तः सन् पुनश्चरणमेव ध्यायति । अयं च तथा । उरुक्रमस्यैव पादशौचं चरणारविन्दोदकं महा[5]देवस्याऽस्याऽपि तुल्यम् । विबुधाधिपत्यं चाऽस्य नाऽर्थो यथा महादेवस्य । दास्यार्थं ह्येवं कृतवानिति ज्ञापनार्थं चरणारविन्दोदकधारणमेव हेतुत्वेनोक्तम् । नतु दानादि । अन्यशेषत्वात् । किञ्च । यो वै प्रतिश्रुतमृते न चिकीर्षदन्यदिति । यस्तु स्वसङ्कल्पनिर्वाहार्थं बहुविचारितवान् पश्चात्तृतीयपादार्थं स्वशिरो दत्तवान् । ह्येतादृशः पूर्वदत्तं कामयते । भगवतस्त्वेवंकरणं दैत्यत्वत्याजनार्थम् । देवेषु सत्यं दैत्येषु चाऽनृतं प्रतिष्ठितम् । तदशक्यमपि प्रतिश्रुतमनेन सत्यं चेत्कृतं तदा सत्ये प्रतिष्ठितो भगवद्धर्ममेव प्राप्तवान् । अन्यदिति रूपभेदोऽपि निवारितः । आत्मानं देहम् । अङ्गेति स्नेहसम्बोधनं तस्मिन्भगवतः स्नेहसूचनार्थम् । शिरसेति प्रधानेन सहाऽऽत्मसमर्पणं ब्रह्मज्ञानेन सहितं कृतमिति सूचितं भवति । अयमात्मानं शिरसा सह हरये अभितो मेने । अनेन शरीरेण भगवत एव कार्यं न वा मम नान्येषामित्यभिशब्दार्थः । यथा हि तस्य मनोरथस्तथैव च सिद्धिः । यथा भगवते दत्तं वस्तु तदर्थं बध्वा स्थाप्यते तथा बलिः स्थापित इति न भक्तिविरोधः । अत एव तेषां गुणत्वात्तस्य महती भक्तिर्जाता । अन्यथामात्सर्यादिकमुत्पद्येत जयविजयवत् । तस्मादेतेषां गुणत्वाद्वामनो मेखला । तेन च[6] विभूषितत्वं सर्वत्र भक्तावुपयोगात् । माहात्म्यज्ञाने स्नेहे च फले चेति ॥ १८ ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

क्षीरोदधावित्यत्र कूर्मस्य श्रीवत्सावतारत्वं कार्येण व्युत्पादयन्ति कूर्मेणेत्यादि । स्पष्टमन्यत् ॥ १३ ॥ ❀ ❀ त्रैविष्टपेत्यत्र एवमेवेति रश्मिकेसरयोः स्कन्धनिर्गमतौल्येनैव । एवं कन्धरयोस्तौल्येऽपि कार्यं विना न तस्य तदवतारत्वं सम्भवतीत्यतस्तद् व्युत्पादयन्ति कौस्तुभमित्यादि, न स्थापयेदिति कण्ठे धारणोपायेन न स्थापयेत् । तथेति, एकस्मिन् प्रकरणे । चैत्यस्ये'ति "कण्ठे च कौस्तुभमणेरधिभूषणार्थमि" ति वाक्यद्वयसत्वादुभयरूप इत्यर्थः । भ्रमयुक्त इत्यादि । इदं न विग्रहवाक्यं, तेन तादृशी दंष्ट्रा यस्मिन् तादृशं च तत्करालश्चेति विग्रहः ॥ १४ ॥ ❀ ❀ अन्तःसरसीत्यत्र । हरेर्वनमालावतारत्वं व्युत्पादयन्ति भक्ता हीत्यादि । विशेषणानीति गजेन्द्रविशेषणानि द्वितीये । ननु मास्तु दृष्टं प्रतिबन्धकं, तथापि ब्रह्मदण्डस्य दुरत्ययत्वाद्गजदेहसत्त्वेन्धन्तमःप्रवेशस्यानिवार्यत्वं शापजन्यदुरदृष्टनाशकस्यात्रानुक्तत्वादिति शङ्कायामाहुः भगवतेत्यादि । तथा च, तत्सत्त्वेप्युद्धरणमम्लानत्वपोषकमित्यर्थः । परदुःखेत्यादि, अत्रेच्छाविशेषस्य कृपात्वं कार्यभेदोपचाराद्बोध्यम् । एतदेव ज्ञापयितुमाहुः इदमेवेत्यादि ॥ १५ ॥ ❀ ❀ ज्यायानित्यत्र वामनस्य मेखलावतारत्वं धर्मत्रयेण व्युत्पादयन्ति मेखला हीत्यादि । इति च वाक्यादिति दैत्यानां जघनस्थतयेति शेषः । मायामिति तदुपास्यदेवतारूपाम् । एवं तत्सिद्धिसारूप्याभ्यां तथात्वं साधयित्वा समानशब्दादपि बोधयन्ति अत एवेत्यादि । 'तद्वामनं रूपमवर्द्धताद्भुतं हरेरनन्तस्य गुणत्रयात्मकमि'तिवाक्येन तथात्वादेव प्रकृतश्लोकेपि गुणपदोक्त्या तत्प्राधान्येनैव कथनमित्यर्थः । नन्वत्रोत्कर्षाधायका धर्मा एव गुणत्वेन विवक्षिता न तु प्राकृता इति शङ्कायामाहुः अदितेरित्यादि । अवरज इति मैत्रावरुणीयोपनिषदि 'तमो वा इदमग्र आसीदि'त्युपक्रम्य 'तद्रससंरूवाद्रजस्तस्यापि रसः सत्त्वमि'ति श्रावणाच्छुद्धसत्त्वावतारात्तेषामप्यवरज इत्यर्थः । एतेनैकं गुणप्राधान्यमुक्तम् , आच्छादकविक्षेपकदृढीकर्तृत्वेनेतरयोरप्याहुः अदितिरित्यादि । ननु तत्र सर्वरूपत्वं ब्रह्मधर्मो निरूप्यत इति कथं एवम् ? अत आहुः यद्यपीत्यादि । इत्येव मुख्येति, एतच्छ्रुतिनिरूपितत्वात्सैव मुख्या । तामिति रक्षां कीर्त्तिं च । तथा च रजस्तमसोरपि प्राधान्यमित्यर्थः । तर्हि तत्र प्राकृतत्वमेव स्यान्न ब्रह्मतेति मायाया अन्तःपातनमसङ्गतमिति शङ्कायां ब्रह्मप्राधान्याय गुणैर्ज्यायस्त्वं व्याकुर्वन्ति गुणैरित्यादि । के इति जगत्कर्तृत्वादिधर्मवैशिष्ट्येनैव सिद्धे उत्कर्षे तादृशस्य ततोतिरिक्ता क इत्यर्थः । अत इति अन्य इत्यनेन सम्बन्धः, स्वेन स्वाक्रमणादितर इत्यर्थः । गुणत्वमिति सर्वदोपसर्जनतया प्रतीयमानत्वाद्गुणत्वं, न तूत्कर्षाधायकत्वमपीत्यर्थः । ननु रूपवर्द्धनेनैव सर्वलोकाक्रमणे बलिसम्बन्धिपदार्थस्यावशिष्टस्याभावात्तत एव कार्यसिद्धेर्लोकविक्रमणस्य किं प्रयोजनमत आहुः बलिं प्रतीत्यादि । न नित्यमिति न स्वाभाविकम् । तथा च, तेषां स्वरूपं स्वेच्छां च बोधनमेव प्रयोजनमित्यर्थः । वामनावतारेणैवैतत्करणे प्रयोजनमाहुः मेखलेत्यादि । ननु मेखलारूपत्वादस्तु वामनावतारेणैतत्करणं तावतोत्कर्षाधायकत्त्वस्य कथं सिद्धिरित्यत आहुः अत इत्यादि । तथा च, लोकतः परमार्थतश्चासंभावितस्य करणादुत्कर्षाधायकत्वसिद्धिरित्यर्थः । उत्कर्षान्तरस्यापि सिद्धिमाहुः किञ्चेत्यादि । अत्रैवं बोध्यम् , उपर्युत्क्षिप्तश्चरणः स्वर्लोकं व्याप्य वेगेनोपरितनान् लोकान् पातयंस्तेनैव स्थापयन् ब्रह्माण्डपर्यन्तं गत इति तेन तथेत्यर्थः । ततोप्यन्यमाहुः किञ्चेति इत्यादि । ततोप्यन्यमाहुः एवमित्यादि । एतेनापि मेखलात्वं दृढीभवतीत्याहुः नमनेनेत्यादि ।

१. श्रुत्यर्थश्च पालनीय इति ग. । २. स वै विष्णुरिति क. ख. घ. । ३. संविध्य क. संवियुज्य ग. । ४. पात्रे दत्ते इति ग. । ५. महादेवस्यापीति ख. । ६. चो नास्ति ख. ।

ततोप्यन्यदाहुः किञ्च त्रिपदच्छलेनेति। भगवता हि "तस्मात्त्वत्तो महीमीषद्वृणेहं वरदर्षभात्। पदानि त्रीणि दैत्येन्द्र सम्मितानि पदा मम"त्युक्तं, तत्र त्रीणीत्यादिपदेषु यच्छलस्तेनेत्यर्थः। कथमत्र छल इत्याकाङ्क्षायां तं व्युत्पादयन्ति नहीत्यादि। तथा च, तदभावेपि तादृशपदोच्चारणं भ्रमजनकमतस्तच्छलरूपमित्यर्थः। ननु तत्र पदानीत्यनेन क्रमात्मकं मानमुक्तं, तत्र च त्रित्वं सङ्गतमेवेति कथं छलत्वमत आहुः मानमित्यादि। मानं वितस्तिहस्तादिकं, हि यतो हेतोः 'तत्र वस्तुनि व्याप्तमेव वृत्तिमदेव भूत्वा तद्वस्तु गृह्णाति, स्वामितत्वेन ज्ञापयति' इति मानस्वभावः, हि निश्चयेन भगवान् क्रमपदमनुचारयन् क्रमरूपं मानं नोक्तवान्। निष्काशितः स्थितिस्थानादन्यत्र निक्षिप्तश्चरणस्तु निष्काशनधर्मेण मानस्वभावं विरुन्धन् मानं न भवति। अतो हेतोरुक्तवाक्यस्य न तद्बोधने तात्पर्यम्, किन्तु, पदा पातालात्मकत्वेन सम्मितानि समानानि मम त्रीणि पदानि मानसाचलमिता भूरसातलं नाकपृष्ठञ्चेति स्थानानि, तस्माद्धेतोरीषन्महीं त्वत्तोहं वृणे वाञ्छामीति, तथा सति तस्माद्वाक्याद्भगवता वामनपादाभ्यामन्यस्तृतीयः पादः कल्पनीय इति ज्ञातव्यम्। तच्च बलिना वाक्यानुसन्धाने सति न ज्ञातम्, तत्तस्माद्धेतोर्भ्रामकपदैस्तथेत्यर्थः। ननु भगवता कुतो वाक्यार्थो न प्रत्यायितः? क्लिष्टं कुतः कृतवान्? इत्यत आहुः मायेत्यादि। तथा च तज्जातिदोषादेव तथेति न क्लिष्टक्लेशो पीत्यस्यापि गुणत्वं निर्बाधमित्यर्थः। याच्ञारूपे दोषेत्र प्रसक्तेऽस्य गुणस्योत्कर्षाधायकता न स्यादित्यत आहुः एवमित्यादि। कथं प्रभुकर्तृकतेत्याहुः वस्तुतःप्रभोरित्यादि। नन्वैन्द्रं पदं बलेन गृहीतवतः कथं मार्गवर्तित्वमित्यत आहुः स्वेनेत्यादि। 'यज्ञो वै विष्णुरि' ति श्रुतेर्यज्ञात्मना स्वेनैव स्थापितत्वात् तथेत्यर्थः। 'तदनङ्गीकार इति। याच्ञानङ्गीकारे चास्य इत्यर्थः। ननु तथापि बन्धनं क्लिष्टकर्मत्वमादधातीति चेत्तत्राहुः दैत्यानामित्यादि। तत्र जघनरूपायां भूमावुत्पन्नानां तत्स्वामित्वं वास्तवम्, "भूमिर्वस्तुतो दैत्यानां यावदासीनः परापश्यति तावद्देवानामि"ति श्रुतेः। अतो हेतोर्बन्धनमित्यर्थः। एतदेव स्फुटीकुर्वन्ति अन्यथेत्यादि। अन्यथेति वास्तवस्वामित्वाभावे, ग्रहणमिति याच्ञया ग्रहणं करिष्यत्येवेति मनसा करिष्यति। तथा च 'क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोपर ईश कुर्युरि' तिवाक्यात्कुधीत्वे पूर्णा कृपा न स्यादिति न तेन क्लिष्टकर्मत्वमित्यर्थः। एतस्यानुषङ्गिकं प्रयोजनान्तरमाहुः अनेनेत्यादि, अनेनेति बन्धनेन। तद्व्युत्पादयन्ति एकस्येत्यादि। नन्वेवं दोषापादकं छलेन याचनं कुतः कृतवानित्यत आहुः सन्नियोगेत्यादि। स हि लोकत्रयमिष्टे, अतस्तथेत्यर्थः। ननु "नैनः प्राप्नोति वै विद्वान् यावदर्थपरिग्रहः" इति भगवता वामनेनोक्तत्वाद् भगवतः स्वापेक्षितयाचनमेव युक्तमेतच्छलप्रयोजनं न पश्याम इति शङ्कायामाहुः अन्यथेत्यादि। एकमात्रयाचने शेषाभ्यनुज्ञापत्तौ कुधीत्वं पुनः प्रसज्येत, पुनस्तदर्थे यत्ने कर्तव्ये पुनर्याचनं चापद्येत, अतः कृतार्थं क्रियासौकर्यार्थं तत्परीक्षार्थं तत्सत्यख्यापनार्थञ्च छल इत्यर्थः। सिद्धमाहुस्तस्मादित्यादि ॥१७॥ ❀ ❀ नार्थ इत्यत्र भक्तिमार्गविरुद्धमितिभक्तबन्धनादिकम्, कटिस्थानस्येति कटिः स्थानमस्येत्यर्थः। ननु धनग्रहणं तु तथा भविष्यतीत्यत आहुः न हीत्यादि, युक्तमेवेत्यन्तम्। मन्त्रैरिति, अदितिं प्रति बलिं प्रति वा गुप्तभाषणरूपैर्भगवद्वाक्यैः। अयमिति। पुल्लिङ्गप्रयोगानुसारेणाहुः अयञ्चेत्यादि। कक्षात्रयमिति प्रथमेध्याये केवलं तमो रजस्तमः केवलं रज इत्यादिना प्रतिपादितं पातालादिस्वर्लोकपर्यन्तं भागत्रयम्। नन्वेवं सति भगवता किमिति सुतले स्थापितोग्रे भावीन्द्रत्वं च किमिति कृतमिति शङ्कायामाहुः न हीत्यादि। तथा च, यद्युपरितनकक्षास्वयोग्यः स्यात् प्रसादेन कक्षात्रये न नीतः स्यात् यदि वा प्रत्याक्रमणेच्छुः स्या 'न्नूनं बतायं भगवानर्थेषु न निष्णातो योसाविन्द्र' इत्यादीनि भगवद्दासस्य प्रशंसावाक्यानि न वदेदतो न तथेति तदुभयं प्रसादरूपमेव तत्स्वरूपज्ञापनाय भगवता दत्तमित्यर्थः। ननु निर्बन्धेन न नीतः स्यात्तत्र भगवान् किमिति तिष्ठेत्तत्राहुः भगवानित्यादि। तथा च, तत्राभस्थितौ प्रत्यवरोहश्रुतिर्विरुध्येतेति तदर्थपरिपालनाय तथेत्यर्थः। हेत्वन्तरमाहुः ये यथेत्यादि। यथा स भगवदधीनो जातस्तथा भगवानपि इति प्रतिज्ञापूर्त्त्येपि तथेत्यर्थः। तृतीयो हेतुस्तु व्याख्यायत एव। उरुक्रमेत्यादेस्तात्पर्यान्तरमाहुः किञ्च पूर्वमित्यादि। रूपभेद इति भावभेदः॥ १८॥

## श्रीगिरिधरकृता बालप्रबोधिनी

कूर्मावतारमाह—क्षीरोदधाविति। अमरदानवयूथपानां सुरासुरश्रेष्ठानामृतस्य लब्धये लाभार्थं क्षीरोदधिं उन्मथ्नतां सतां तत्रादिदेवो भगवान् कच्छपवपुः धृतकूर्मतनुः पृष्ठेन गोत्रं कृतमन्थानरूपं मन्दराचलं विशेषेण हर्षेण दधारेत्यन्वयः। ननु परेषां देवादीनाममृतलाभार्थं स्वयं किं भाररूपं पर्वतं धृतवानित्याशङ्क्याह— निद्राक्षण इति, निद्रायां क्षण उत्सवो यस्य सः। न केवलममृतार्थं पर्वतं धृतवान् किन्तु स्वनिद्रार्थमपीति भावः। नन्विदमपि विपरीतमेवोच्यते निद्रा तर्हि सर्वमपि भारं दूरीकरोति भारग्रहे तु कथं निद्रा सम्भवतीत्याशङ्क्याह—अद्रिपरिवर्तकषाणकण्डूरिति, अद्रेः परिवर्तः परिभ्रमणं स एव कषः कषणं सङ्घर्षणं तेन अणिति अपयातीत्यद्रिपरिवर्त्तकषाणा कण्डूर्यस्य सः। कण्डूमतां तद्घर्षणेन निद्रा भवतीति प्रसिद्धम्॥ १३॥ ❀ ❀ नृसिंहावतारमाह त्रैविष्टपेति। त्रिविष्टपे स्वर्गे भवास्त्रैविष्टपा देवास्तेषामुरुभयं हन्तीति तथा स स्वभक्तदेवपक्षपाती भगवान् तेषां भयनिवारणार्थं भ्रमन्त्यो भ्रुकुट्यो दंष्ट्राश्च यस्मिंस्तथाभूतं करालं भयङ्करं वक्त्रं मुखं यस्मिंस्तथाभूतं नृसिंहयोर्मिश्रं रूपं कृत्वा धृत्वा आरात् स्वसमीपे स्वमारणार्थं गदया सहाभिपतन्तं सम्मुखमागच्छन्तं दैत्येन्द्रं हिरण्यकशिपुं स्वस्योरौ निपात्य स्फुरन्तमितस्ततश्चेष्टन्तं तं नखैराशु शीघ्रमेव विददारेत्यन्वयः॥ १४ ❀ ❀ हरिसञ्ज्ञकावतारमाह—अन्तरिति द्वयेन। यूथपतिः गजयूथपतिः गजेन्द्र अन्त-

स्सरसि सरोमध्ये उरुबलेन महाबलेन ग्राहेण मकरेण पदैर्गृहीतः अतएव आर्त्तः पीडितः सन् ततो विमुक्त्यर्थं यदेदं नामचतुष्टयमाह तदा भगवांस्तच्छ्रुत्वा चक्रायुधश्चक्रं प्रगृह्य गरुडमारुह्य तत्रागत्य पतगराजभुजाद्गरुडस्कन्धाद् अधिरूढः अवतीर्णः सन्शरणार्थिनं मम रक्षको भगवान् भवत्वित्याकाङ्क्षावन्तं तं गजं हस्ते शुण्डायां प्रगृह्य चक्रेण नक्रस्य ग्राहस्य वदनं विनिपात्य च्छित्त्वा तस्माद्ग्रहवदनादुज्जहार उद्धृतवानिति द्वयोरन्वयः। रिक्तहस्तेन भगवत्प्रार्थनाया अनुचितत्वं मत्वाऽम्बुजहस्तः शुण्डयोद्धृतकमल इत्यर्थः। तदुक्तं सम्बोधनचतुष्टयं दर्शयति, तत्र सर्वलोकपालकस्य तव ममापि रक्षोचितैवेत्याशयेन सम्बोधयति—हे अखिललोकनाथेति। तत्र हेतुं सूचयन् पुनः सम्बोधयति—हे आदिपुरुषेति। ननु तव दुरितमेवेदं दुःखं ददाति तत्र मया किं कर्तव्यमित्याशङ्क्य तव कीर्त्त्यैव तन्निवृत्तेरित्याशयेन पुनः सम्बोधयति—हे तीर्थश्रव इति, तीर्थं सर्वदुरितनिवर्त्तकं श्रवो यशो यस्य स तीर्थश्रवास्तत्सम्बोधनम्। न केवलं दुरितनिवर्त्तकं किन्तु भगवत्प्रापकत्वेन परमानन्दजनकं चेत्याशयेन पुनः सम्बोधयति— श्रवणमङ्गलनामधेयेति। ननु तर्हि किं पूजास्तुतिसापेक्ष एव तदुद्धारं कृतवानित्याशङ्क्याह—कृपयेति। तत्र हेतुं सूचयन्नाह— हरिरिति, भक्तदुःखहरणशील इत्यर्थः। तथात्वेप्यसमर्थश्चेत् कथं तत्कुर्यादित्याशङ्क्याह—अप्रमेय इति। अप्रमेयबलपराक्रम इत्यर्थः॥ १५॥ ॥ १६॥ ❀ ❀ वामनावतारमाह— ज्यायानिति। अदितेः सुतानां द्वादशादित्यानां मध्ये अधियज्ञः यज्ञाधिपतिर्भगवान् विष्णुरवरजः कनीयानपि गुणैर्ज्यायान् ज्येष्ठः। गुणानेवाह—यदिति। यत् यस्मात् अथ प्रतिश्रुतानन्तरमेवमान् त्रींल्लोकान् विचक्रमे पादविन्यासैः क्रान्तवान्। कुतः क्रान्तवानित्यपेक्षायामाह—क्ष्मामिति। चक्रवर्तिनो बलेः सकाशात् त्रिपदच्छलेन वामनेन रूपेण क्ष्मां सर्वामेव भूमिं जगृहे। ननु स्वयमीश्वरः सन् किमिति दुर्बलवद्याच्ञां चक्रे तत्राह—याच्ञामृते विना पथि चरन् सन्मार्गे प्रवर्तमानः प्रभुभिः समर्थैः स्वामिभिर्न चाल्यः ऐश्वर्यान्न भ्रंशनीय इत्यर्थः॥ १७॥ ❀ ❀ ननु तर्हि याच्ञयाऽपि ततश्चालनमनुचितमेवेत्याशङ्क्य ततोऽधिकं स्वसालोक्यादि दास्यामि किमेतेनेत्याशयेन दत्तवानिति सूचयन्नाह—नार्थ इति। यदिदानीं तेन बलात्प्राप्तमग्रे च तत्सन्तोषार्थं भगवतो दीयमानं विबुधानामाधिपत्यं ऽयं तदयं बलेरर्थः पुरुषार्थो न भवति किन्तु भगवत्सालोक्यादिरेव। तत्कुत इयत आह—उरुक्रमेति। आ अप इति च्छेदः। उरुक्रमस्य विस्तृतपादविन्यासस्य भगवतः पादशौचं चरणक्षालनरूपा अपः आ आदरेण शिखा धृतवतः। सप्तम्या आर्षो लुक्। तत्र हेत्वन्तरमपि दर्शयति—यो वा इति। यो वै महादानित्वेन प्रसिद्धो बलिर्गुरुणा शुक्रेण वारितः शप्तोऽपि प्रतिश्रुतमृते प्रतिज्ञातार्थं विनाऽन्यन्न चिकीर्षत् कर्तुं नैच्छत्। अडभाव आर्षः। किन्तु तृतीयपादपूरणार्थं शिरसा अत्यादरेण हरये आत्मानमभिमेने समर्पितवानित्यर्थः। छलतया प्रतीयमानमपि त्रिलोकीहरणं वस्तुतोऽनुग्रह एवेत्यद्भुतरूपा भगवल्लीला तव स्नेहवशात्कथ्यते इति सूचयन् सम्बोधयति—हे अङ्गेति॥ १८॥

## हिन्दी अनुवाद

जब मुख्य-मुख्य देवता और दानव अमृतकी प्राप्तिके लिये क्षीरसागरको मथ रहे थे, तब भगवान्ने कच्छपके रूपमें अपनी पीठपर मन्दराचल धारण किया। उस समय पर्वतके घूमनेके कारण उसकी रगड़से उनकी पीठकी खुजलाहट थोड़ी मिट गयी, जिससे वे कुछ क्षणोंतक सुखकी नींद सो सके॥ १३॥ ❀ ❀ देवताओंका महान् भय मिटानेके लिये उन्होंने नृसिंहका रूप धारण किया। फड़कती हुई भौंहों और तीखी दाढ़ोंसे उनका मुख बड़ा भयावना लगता था। हिरण्यकशिपु उन्हें देखते ही हाथमें गदा लेकर उनपर टूट पड़ा। इसपर भगवान् नृसिंहने दूरसे ही उसे पकड़कर अपनी जाँघोंपर डाल लिया और उसके छटपटाते रहनेपर भी अपने नखोंसे उसका पेट फाड़ डाला॥ १४॥ ❀ ❀ बड़े भारी सरोवरमें महाबली ग्राहने गजेन्द्रका पैर पकड़ लिया। जब बहुत थककर वह घबरा गया, तब उसने अपनी सूंड़में कमल लेकर भगवान्को पुकारा—'हे आदिपुरुष! हे समस्त लोकोंके स्वामी! हे श्रवणमात्रसे कल्याण करनेवाले!'॥ १५॥ ❀ ❀ उसकी पुकार सुनकर अनन्तशक्ति भगवान् चक्रपाणि गरुड़की पीठपर चढ़कर वहाँ आये और अपने चक्रसे उन्होंने ग्राहका मस्तक उखाड़ डाला। इस प्रकार कृपापरवश भगवान्ने अपने शरणागत गजेन्द्रकी सूँड़ पकड़कर उस विपत्तिसे उसका उद्धार किया॥ १६॥ ❀ ❀ भगवान् वामन अदितिके पुत्रोंमें सबसे छोटे थे, परन्तु गुणोंकी दृष्टिसे वे सबसे बड़े थे। क्योंकि यज्ञपुरुष भगवान्ने इस अवतारमें बलिके संकल्प छोड़ते ही सम्पूर्ण लोकोंको अपने चरणोंसे ही नाप लिया था। वामन बनकर उन्होंने तीन पग पृथ्वीके बहाने बलिसे सारी पृथ्वी ले तो ली, परन्तु इससे यह बात सिद्ध कर दी कि सन्मार्गपर चलनेवाले पुरुषोंको याचनाके सिवा और किसी उपायसे समर्थ पुरुष भी अपने स्थानसे नहीं हटा सकते, ऐश्वर्यसे च्युत नहीं कर सकते॥ १७॥ ❀ ❀ दैत्यराज बलिने अपने सिरपर स्वयं वामनभगवान्का चरणामृत धारण किया था। ऐसी स्थितिमें उन्हें जो देवताओंके राजा इन्द्रकी पदवी मिली, इसमें कोई बलिका पुरुषार्थ नहीं था। अपने गुरु शुक्राचार्यके मना करनेपर भी वे अपनी प्रतिज्ञाके विपरीत कुछ भी करनेको तैयार नहीं हुए। और तो क्या, भगवान्का तीसरा पग पूरा करनेके लिये उनके चरणोंमें सिर रखकर उन्होंने अपने आपको भी समर्पित कर दिया॥ १८॥

तुभ्यं च नारद भृशं भगवान् विवृद्धभावेन साधुपरितुष्ट उवाच योगम् ।
ज्ञानं च भागवतमात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरञ्जसैव ॥१९॥
चक्रं च दिक्ष्वविहतं दशसु स्वतेजो मन्वन्तरेषु मनुवंशधरो बिभर्ति ।
दुष्टेषु राजसु दमं व्यदधात् स्वकीर्तिं सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः ॥२०॥
धन्वन्तरिश्च भगवान् स्वयमेव कीर्तिर्नाम्ना नृणां पुरुरुजां रुज आशु हन्ति ।
यज्ञे च भागममृतायुरवावरुन्ध आयुष्य वेदमनुशास्त्यवतीर्य लोके ॥२१॥
क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्तिलिप्सु ।
उद्धन्त्यसाववनिकण्टकमुग्रवीर्यस्त्रिःसप्तकृत्व उरुधारपरश्वधेन ॥२२॥
अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे ।
तिष्ठन् वनं सदयितानुज आविवेश यस्मिन् विरुध्य दशकन्धर आर्तिमार्च्छत् ॥२३॥
यस्मा अदादुदधिरूढभयाङ्गवेपो मार्गं सपद्यरिपुरं हरवद् दिधक्षोः ।
दूरे सुहृन्मथितरोषसुशोणदृष्ट्या तातप्यमानमकरोरगनक्रचक्रः ॥२४॥

### श्रीधरस्वामिविरचिता भावार्थदीपिकाव्याख्या

हंसावतारमाह । तुभ्यमिति । भृशं विवृद्धेन भावेनात्युद्रिक्तया भक्त्या परितुष्टः सन् भक्तियोगं साधु यथा तथोवाच । ज्ञानं चेति ज्ञानसाधनं किं तत् भागवतं नाम कथंभूतं तत्त्वमेव सतत्त्वमात्मसतत्त्वदीपकम् । विवृद्धभावेनेति विशेषणस्य फलमाह । यदिति ॥ १९ ॥ ❀ ❀ तत्तन्मन्वंतरावतारमाह । चक्रमिति । स्वतेजो निजं प्रभावमेव चक्रं सुदर्शनं बिभर्ति । चक्रवद्प्रतिहतं प्रभावं बिभर्तीत्यर्थः । तदेवाह । मनुवंशपालकः सन् त्रयाणां लोकानां पृष्ठे उपरि स्थिते सत्यलोकेऽपि कमनीयां स्वकीर्तिं विस्तारयन् राजसु दंडं विधत्ते ॥ २० ॥ ❀ ❀ धन्वन्तर्यवतारमाह । लोकेऽवतीर्य धन्वंतरिः सन् पुरुरुजां महारोगिणां स्वनाम्नैव रुजो रोगान् हंति । स्वयमेव कीर्तिरिति कीर्त्यतिशयोक्तिः । अमृतं मरणशून्यमायुर्यस्मात्सः । अव अवसन्नं पूर्वं दैत्यैः प्रतिबद्धं यज्ञे भागमवरुंधे लभते । अवाप रुद्धमिति पाठेऽप्ययमेवार्थः । आयुर्विषयं वेदं चानुशास्ति प्रवर्तयति ॥ २१ ॥ ❀ ❀ परशुरामावतारमाह । जगतः क्षयाय विधिना दैवेनोपभृतं संवर्धितं मृत्यवे समर्पितमिति वा । ब्राह्मणेभ्यो द्रुह्यतीति तथा अतः उज्झितः पंथाः वेदमार्गो येन । अत एव नरकार्तिं लिप्सतीव एवंभूतमवनेः कंटकतुल्यं क्षत्रमसौ महात्मा हरिरुद्धत्युत्पाटयति । दीर्घतीक्ष्णधारेण परशुना ॥ २२ ॥ ❀ ❀ श्रीरामावतारमाह त्रिभिः । अस्मदिति । अस्माकं ब्रह्मादीनां प्रसादे सुमुखः कलया भरतादिरूपया सह कला माया तस्या ईशो गुरोर्दशरथस्याज्ञायां तिष्ठन् सीतालक्ष्मणाभ्यां सहितो वनमाविवेश । यस्मिन् विरोधं कृत्वा रावणो नाशं प्राप्तः ॥ २३ ॥ ❀ ❀ यस्मै रामायोदधिमार्गं ददौ । सपदि शीघ्रं हरो यथा त्रिपुरं दिधक्षुस्तद्वदरिपुरं लंकां दग्धुमिच्छोः । षष्ठी चतुर्थ्यर्थे । यद्वा पंचमीयम् । दिधक्षोः रामाद्यद्भयं प्राप्तं तेनांगे कंपो यस्येति । कथंभूत उदधिः ऊढं प्राप्तं यद्भयं तेनांगेषु वेपः कंपो यस्य । अत्र हेतुः । दूरे वर्तमाना सुहृत्सीता तया निमित्तभूतया मथितः क्षुभितो रोषस्तेन सुशोणात्यरुणा दृष्टिस्तयात्यंतं तप्यमानं मकराणामुरगाणां नक्राणां च चक्रं यस्मिन् ॥ २४ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

तुभ्यं चेति । चकारात्स नकादिभ्यश्च । यद्वा । सनकादिद्वारा तुभ्यमपि ज्ञानसाधनं श्रीभागवतं नामेत्यर्थः । स्वार्थेऽत्र तत्त्वशब्दात्सप्रत्ययो बहुचप्रत्ययवत्प्रागेव जात इति ज्ञेयम् । अत एव स्वामिचरणैर्व्याख्यातं तत्त्वमेव सतत्त्वमिति । यद्वा । तत्त्वसतत्त्वशब्दौ पर्यायौ । नारदेति । तत एवोपदेशात्त्वं नारमज्ञानं तत् द्यतिच्छेदयतीत्यन्वर्थनामासीति भावः । अत्र विश्वनाथः—विवृद्धभावेन प्रेम्णा योगं भक्तियोगं ज्ञानञ्च भक्तिविषयस्य भक्त्याश्रयस्य द्विविधं विशेषणद्वयेनाह भागवतं भगवत्सौंदर्यसौरभ्यसौस्वर्यमाधुर्यसाद्गुण्याद्यनुभवरूपं प्रेमगम्यमित्यर्थः । तथात्मनो भक्त्याश्रयस्य जीवस्य यत्सत्त्वं तत्त्वमेव ज्ञानानंदादिकं तस्य दीपमविद्यावरणनिवर्तकत्वात्प्रदीपं प्रकाशकं यदिदं द्विविधं ज्ञानं वासुदेवशरणा ऐकांतिकभक्ता अंजसा सुखेनैव विदुः सर्वत्रैव शास्त्रेषु ज्ञानादिशब्दा विशेषणविशेष्यविनाभूतत्वेन प्रयुक्ता ब्रह्मज्ञानादिष्वेव रूढा यथा पंकजादिशब्दाः पद्मादिषु, अन्यथा तु यथायोगमेव वर्त्तन्ते इति यौगिका एवं यथा "ज्ञानं परं तन्महिमावभासं यत्सूरयो भागवतं वदंति" इति । ज्ञानं

---

१. प्रा० पा०—रवाप दुःखमायुश्च । २. प्रा० पा०—उद्धसाव० ।

च यदहैतुकम्'' इति । "यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनम्'' इति । यथा च "पंकजं वर्त्म दुर्गमम्'' इति । "मंडपं भोजये द्विजम्'' इति विष्णुधर्मेपि हंसावतारेण नारदाय भक्तियोग एवोक्तः । यत्तु "यदा तु सनकादिभ्यो येन रूपेण केशव । योगमादिष्टवानेतद्रूपमिच्छामि वेदितुम्'' इति सनकादिभ्यो ज्ञानोपदेष्टा हंसः स त्वन्य एव तुभ्यं चेति चकारेण तुभ्यमवतारायापि भक्तिमुवाच इत्युक्तिभंग्यैव नारदावतारोऽप्युक्त इति ॥ १९ ॥ ❀ ❀ इत्यर्थ इति । चक्रनाम्ना स्वासाधारणं तेज एव "त्वं तेजः पौरुषं परम्'' इत्यंबरीषोक्तेर्धारयतीति भावः ॥ २० ॥ ❀ ❀ अमृतमिवायुर्लोके प्राकट्यं यस्य स तथा सर्वलोकनैरुज्यदानादिति विश्वनाथः । 'स्मृतमात्रार्त्तिनाशनः' इति वक्ष्यमाणत्वान्नाम्नैवम् । 'ॐ श्रीधन्वंतरये नमः' इति नाममंत्रेणैवेत्यर्थः । अत एव स्वयमेव कीर्तनं तु केनचित्कृतमिति भावः । आयुर्वेदमंगाष्टकयुतं तदुक्तं—"कायबालग्रहोद्ध्वांगशल्यदंष्ट्राजरावृषान् । अष्टावंगानि तस्याहुश्चिकित्सा येषु संश्रिता''इति हरिवंशे । तस्यायुर्वेदस्य कायचिकित्सा, बालचिकित्सा ग्रहो भूतप्रेतादिः, ऊर्ध्वांगं शिरोनेत्रादि, शल्यं शस्त्रघातादि, दंष्ट्रा स्थावरजंगमात्मकं विषं तेषां चिकित्सा, जरा रसायनादिना जराया दूरीकरणं, वृषो वाजीकरणतंत्रमित्यर्थः ॥ २१ ॥ ❀ ❀ दैववर्द्धितस्य नाशाऽसम्भवादाह । मृत्यवे समर्पितमिति वेति । "ब्रह्म सत्यतपो विप्रविधातृपरमात्मसु'' इति धरणिः । अतो वैदिकशुभमार्गप्रदर्शकब्राह्मणद्रोग्धृत्वात् । अत एव त्यक्तवेदमार्गत्वादेव । उग्रः शंकरस्तत्समवीर्यः ॥ २२ ॥ ❀ ❀ चक्रवर्ती तु—कलेशः परिपूर्णः "चिन्मयेस्मिन्महाविष्णौ जाते दाशरथे हरौ'' इति श्रुतेः । नृसिंहरामकृष्णेषु षाड्गुण्यं परिपूरितम्'' इति स्मृतेश्च ॥ २३ ॥ ❀ ❀ चतुर्थ्यर्थे षष्ठ्याः कल्पने गौरवादाह । यद्धेति । अत्रांगवेपे ॥ २४ ॥

## श्रीमद्वीरराघवव्याख्या

हंसावतारमाह तुभ्यमिति । भृशं विवृद्धस्नेहेन त्वया परिपृष्टः साकल्येन पृष्टो भगवान्हंसरूपेणेति शेषः । योगमनभिसंहितफलकर्म योगं ज्ञानं भागवतं साधनसप्तकानुगृहीतभगवदुपासनात्मकं ज्ञानम् । प्रकृतिविविक्तात्मनः सुतत्वं याथात्म्यं तस्य दीपवत् प्रकाशकं ज्ञानं योगं च साधु यथा तथा तुभ्यमुवाच एतदाख्यानमेकादशे स्फुटं यदेव हंसोक्तयोगादिकं वासुदेवशरणा बहूनां जन्मनामंत इत्युक्तरीत्या उपायत्वेन वासुदेवं शरणं गताः अंजसा सुखेन विदुः हंसोक्तमेव ज्ञात्वाऽनुतिष्ठंतीत्यर्थः ॥ १९ ॥ ❀ ❀ तत्तन्मन्वंतरावतारमाह चक्रमिति । मनुवंशधरः मनुवंशपालकः सन्मन्वंतरेषु दशसु दिक्ष्वप्रतिहतमनभिभाव्यं स्वतेजः स्वप्रतापोपबृंहितं चक्रमाज्ञारूपं चक्रं बिभर्ति किंच दृप्तेषु गर्वितेषु राजसु दमं दंडं व्यदधाद् व्यधत्त । कथंभूतः सन् त्रिपृष्ठे तृतीयस्यां दिवि सत्ये सत्यलोके स्वचरित्रैः उशतीं कमनीयां कीर्तिं प्रथयन्विस्तारयन्नप्यदधादित्यर्थः ॥ २० ॥ ❀ ❀ धन्वंतर्यवतारमाह धन्वतरिरिति । भगवान् लोके धन्वंतरिरूपेणावतीर्य पुरुरुजां भूरिदुःखानां महारोगिणां नृणां स्वनाम्नैव रुजः रोगान् हंति कथंभूतः स्वयमेव कीर्तिरिति । कीर्त्यतिशयोक्तिः अमृतं मरणशून्यमायुर्यस्मात्संरुद्धं पूर्वं दैत्यैः प्रतिषिद्धं यज्ञे भागमवाप । लेभे आयुर्विषयं वेदं चानुशास्ति प्रवर्तयति ॥ २१ ॥ ❀ ❀ परशुरामावतारमाह क्षत्रमिति । विधिना दैवेन क्षयाय मृत्यवे उपभृतं समर्पितं ब्रह्मध्रुग्ब्राह्मणेभ्यो द्रुह्यतीति तथा अतः उज्झितस्त्यक्तः पंथा वेदमार्गो येन अत एव नरकार्तिं नारकं दुःखं लिप्सुः लब्धुमिच्छुरेवंभूतमवनेः कंटकं कंटकतुल्यं क्षत्रं क्षत्रियकुलमसौ महात्मा भार्गवरामरूपो हरिरुरुधारपरश्वधेन दीर्घतीक्ष्णधारेण परशुना त्रिःसप्तकृत्व एकविंशतिवारम् । उग्रवीर्यः असह्यवीर्यः सन्नुद्धन्ति उत्पाटयति ॥ २२ ॥ ❀ ❀ रामावतारमाह अस्मदिति त्रिभिः । अस्मदनुग्रहे सुमुख अस्मद्दत्तवराविरोधेनावतीर्ण इति भावः । कलेशः प्रकृतिपुरुषयोरधिपतिः कलया भरतादिकरूपया सह त्रिभिः इक्ष्वाकुकुलेऽवतीर्य गुरोर्दशरथस्य पितुर्निदेशे आज्ञायां तिष्ठन्नाज्ञां पालयन्नित्यर्थः । सदयितानुजः सीतालक्ष्मणाभ्यां सहितः वनं दंडकारण्यं यो विवेश यस्मिन् रामे विरुध्य विरोधं कृत्वा दशकंधरो रावणः आर्तिं नाशमाछेत्प्राप ॥ २३ ॥ ❀ ❀ यस्मै श्रीरामाय उदधिः समुद्रः मार्गमदाद्दत्तवान् कथंभूतोऽदात् सपदि शीघ्रं हरो रुद्रः यथा त्रिपुरं दिधक्षुर्दग्धुमिच्छुस्तद्वदरिपुरं लंकां दिधक्षोतस्माच्छ्रीरामाद्रेतोरूढभयांगवेपः ऊढं प्राप्तं यद्भयं तेनांगवेपः कंपो यस्य सः हरिः वर्त्तमाना सुहृत्सीता तया निमित्तभूतया मथितः क्षुभितः यो रोषस्तेन सुशोणा दृष्टिः श्रीरामसंबंधिनी तया तातप्यमानं मकराणां नक्रांणां उरगाणां च चक्रं समूहो यस्मिन्स एवं भूतोऽब्धिः मार्गमदादित्यर्थः ॥ २४ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

महिदासनाम्नो हरेरवतारस्य चरित्रमाह तुभ्यमिति विवृद्धभावेन समुद्रिक्तभक्त्या साधुपरितुष्टो नाम्ना महिदासो भगवांस्तुभ्यमस्मदादिभ्यश्च भगवद्विषय कर्मयोगं ज्ञानयोगं चोवाचेत्यन्वयः । आत्मेत्यनेन भागवतत्वं स्पष्टयति । अत्र प्रमाणमाह यदिति । यद् ज्ञानं वासुदेवशरणा ब्रह्मादयः अवैष्णवनिषेधार्थ एव शब्दः तदुक्तं ऐतरेयो हरिः प्राह नारदाय स्वकां तनुं यत्प्रापुर्वैष्णवा नान्ये तद्दत्ते न सुखं परमिति ॥ १९ ॥ ❀ ❀ राजराजेश्वरावतारं तच्चरितं चाह चक्रं चेति । राजराजेश्वर इति नाम्नाऽवतीर्णो हरिः स्वायम्भुवादिमनुवंशधरः सन दुष्टेषु राजसु दमं विदधत् सत्ये धर्मे सत्यसंधाने वा निविष्ट उशतीं कमनीयां स्वकीर्तिं चरित्रैः प्रथयन् प्रख्यापयन् मन्वंतरेषु भगवान् प्रियव्रतादिचक्रवर्तिष्वप्यास्थितो दशसु दिक्षु अविहतमप्रतिहतं तेजः स्वरूपभूतप्रभावं

चक्रत्राणलक्षणं बिभर्तीत्यन्वयः। मन्वंतरेषु भगवांश्चक्रवर्तिषु संस्थित इत्यादिकमत्र मानम् ॥ २० ॥ ❀ ❀ यो भगवान्स्वयमेव विशेषावेशमंतरेण धन्वंतरिश्चासाववतीर्णश्च पुरुरुजां बहुरोगाणां रुजो रोगान् नाम्नोच्चारितेन हंति स एवा मृतायुर्नित्यमुक्तः सन्नद्धा यज्ञभागं चावाप आयुर्वेदं च वा 'हटं शास्त्रं चानुशास्ति कृत्वा लोके प्रवर्तयति ॥ २१ ॥ ❀ ❀ भार्गवरामावतारं तत्कर्म च संक्षिप्याह क्षत्रमिति। उं रुद्रं ग्रसतीति उग्रं वीर्यं यस्य स उग्रवीर्यः। आत्मभ्यः पुरुषेभ्यो महान् पुरुषोत्तमोऽसौ उर्वी धारा निशिताग्रं यस्य स उरुधारः स चासो परश्वधः परशुः तेनावनिकंटकमत एव नरकार्तिलिप्सुर्नरकदुःखलब्धुकामं उज्झितपथं त्यक्तसन्मार्गं ब्रह्मध्रुक् ब्राह्मणद्रोहि अतएव विधिना दैवेन क्षयायोपहृतं समर्पितं क्षत्रं क्षत्रियकुलं उद्वृंत्युन्मूलयतीत्यन्वयः। त्रिः सप्तकृत्व एकविंशतिवारम् ॥ २२ ॥ ❀ ❀ रामावतारे तद्विक्रमं च श्लोकत्रयेणाह कृत्स्नप्रसादेति। दशकंधरो रावणो यस्मिन्विरुद्धयातिमरणलक्षणामार्च्छत् प्राप स कलेशः प्राणः श्रद्धावायुरित्यादिश्रु त्युक्तानां कलानां स्वकार्यशक्तिप्रदः कृत्स्नः पूर्णः प्रसाद आनंदो यस्य स तथा कार्येण कारणोपलक्षणं सु सुंदरं मुखं यस्य स तथा कृत्स्नप्रसादश्चायं सुमुखश्चेति समासः इक्ष्वाकुवंशे कलया स्वरूपांशेनावतीर्य गुरोर्दशरथस्य निंदेशे नियोगे तिष्ठन् स दयितानुजः सीतालक्ष्मणाभ्यां सहितो रामो वनमाविशेशेत्यन्वयः ॥ २३ ॥ ❀ ❀ दूरे स्थिता सुहृत्सीता यस्य सः तस्य रामस्योज्ज्वलितो रोष एव सुशोषोऽग्निः तेन युक्तया दृष्ट्या अग्निः सुशोषः कक्षधनस्तिमिरारिर्हिरण्यद इति मकराश्च उरगाश्च नक्राश्च मकरोरगनक्राः तातप्यमानानां पुनः पुनः पच्यमानानां मकरोरगनक्राणां चक्राणि यस्मिन् स तथा ऊढं भयं ये न स तथा अंगे वेपः कंपो यस्य स तथा ऊढभयश्च एवंविध उदधिस्त्रिपुरं हरवदरिपुरं लंकां दिधक्षोर्दग्धुकामाय तस्मै रामाय सपदि मार्गमदादित्यन्वयः ॥ २४ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

तुभ्यञ्चेति। विष्णुधर्मोत्तरे हंसरूपेण तस्मै तत्कथनात् ॥ १९—२५ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

हंसावतारमाह तुभ्यमिति। विवृद्धभावेन प्रेम्णा। योगं भक्तियोगं ज्ञानञ्च। तच्च ज्ञानं भक्तिविषयस्य भक्त्याश्रयस्येति द्विविधं विशेषणद्वयेनाह। भागवतं भगवत्सौन्दर्य्यस्य सौरभ्यसौश्वर्य्यसौकुमार्यमाधुर्य्यसाद्गुण्याद्यनुभवरूपं प्रेमगम्यमित्यर्थः। तथा आत्मनो भक्त्याश्रयस्य जीवस्य यत् सतत्त्वं तत्त्वमेव ज्ञानानंदादिकं तस्य दीपम् अविद्यावरणनिवर्त्तकत्वात् प्रदीपं प्रकाशकमित्यर्थः। यत् इदं द्विविधं ज्ञानं वासुदेवशरणा ऐकान्तिकभक्ता अञ्जसा सुखेनैव विदुः। सर्व्वत्रैव शास्त्रेषु ज्ञानादिशब्दा विशेषणविशेष्यभावं विनाभूतत्वेन प्रयुक्ता ब्रह्मज्ञानादिष्वेव रूढाः यथा पङ्कजादिशब्दाः पद्मादिषु। अन्यथा तु यथायोगमेव वर्त्तन्त इति यौगिका एव यथा—ज्ञानं परं मन्महिमावभासं यत् सूरयो भागवतं वदन्तीति ज्ञानञ्च यदहैतुकमिति यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनमिति। यथाच पङ्कजं वर्त्म दुर्गममिति, मण्डपं भोजयेज्जनमित्यादि अत्र विष्णुधर्मोत्तरे नारदाय हंसरूपेण भक्तियोग एव उक्तः। यत्तु यदा त्वं सनकादिभ्यो येन रूपेण केशवः। योगमादिष्टवानेतद्रूपमिच्छामि वेदितुमिति सनकादिभ्यो ज्ञानोपदेष्टा हंसो वक्ष्यते स त्वन्यो हंसो ज्ञेयः। अत्र तुभ्यञ्चेति चकारेण तुभ्यमवतारायापि भक्तियोगमुवाचेत्युक्तिभङ्ग्यैव नारदावतारोऽप्युक्तः ॥ १९ ॥ ❀ ❀ तत्तन्मन्ववतारमाह। दशसु दिक्षु अविहतं तेजो बिभर्त्ति चक्रञ्च सुदर्शनं चक्रमिवेत्यर्थः। मनुवंशधरो मनुवंशपालकः। तत एव दुष्टेषु दमं दण्डम्। कीदृशः त्रयाणां लोकानां पृष्ठे उपरि स्थिते सत्यलोकेऽपि उशतीं कमनीयां कीर्त्तिं विस्तारयन् ॥ २० ॥ ❀ ❀ धन्वन्तर्य्यवतारमाह। कीर्त्तिः कीर्त्तिस्वरूप एव साक्षादिति कीर्त्त्यतिशय उक्तः। नाम्नैव धन्वन्तरिरिति शब्देनैव। भागं पूर्वं दैत्यरुद्धम् अवाप। अमृतमिवायुर्लोके प्राकट्यं यस्य सः सर्वलोकनैरुज्ज्यदानादिति भावः। अवावरुन्ध इति पाठे अव अवसन्नं भागम् अवरुन्धे लभते स्म। आयुर्विषयं वेदम् अनुशास्ति प्रवर्त्तयति ॥ २१ ॥ ❀ ❀ परशुरामावतारमाह। क्षत्रियं हन्ति। कीदृशं क्षयाय नाशार्थं विधिनैव उपभृतम् उपढौकितम् रौद्ररसमयाय यस्मै उपायनत्वेन समर्पितमित्यर्थः। क्षत्रं कीदृशं ब्रह्मध्रुगित्यादि। स च हनने हेतुरुक्तः ॥ २२ ॥ ❀ ❀ श्रीरामावतारमाह त्रिभिः अस्मासु ब्रह्मादिस्तम्बपर्यन्तेषु यः प्रसादस्तेन सुमुख इत्यवतारस्यास्य कृपातिशयो द्योतितः। कलया लक्ष्मणादिरूपया सह। स्वयन्तु कलानामीशः पूर्ण इत्यर्थः चिन्मयेऽस्मिन् महाविष्णौ जाते दशरथे हराविति श्रुतेः। नृसिंहरामकृष्णेषु षाण्गुण्यं परिपूरितमिति स्मृतेश्च आर्त्तिम् आर्च्छत् नाशं प्राप्तः ॥ २३ ॥ ❀ ❀ ऊढो भयेनाङ्गवेपः कम्पो येन सः उदधिर्यस्मै मार्गं ददौ। त्रिपुरं दिधक्षोर्हरस्येव अरिपुरं लङ्कां दिधक्षोः। चतुर्थ्यर्थे षष्ठी। कीदृशः दूरे वर्त्तमाना सुहृत् सीता तया निमित्तभूतया मथितः क्षुभितो रोषस्तेन सुशोणा अत्यरुणा दृष्टिस्तया अत्यन्तं तप्यमानं मकराणाम् उरगाणां नक्राणाञ्च चक्रं यस्मिन् सः ॥ २४ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

हंसावतारमाह तुभ्यमिति। हे नारद स भगवान् आत्मआत्मा सर्वांतरात्मा दीर्घाभाव आर्षः। भृशं विवृद्धभावेन अतिप्रेम्णा परितुष्टः तुभ्यं च तव पूर्वेभ्यः सनत्कुमारेभ्यः योगं भक्तियोगं ज्ञानम् आत्मपरमात्मगुणस्वरूपयाथात्म्यं चकारात्तत्साधनं

१. तन्नामकं वैद्यशास्त्रम्। २. षष्ठी चतुर्थ्यर्थे।

कर्मयोगम् । तत्त्वदीपमुक्तानुक्तानां भक्तभजनीयज्ञानज्ञेयादीनां सर्वेषां तत्वानां दीपवत्प्रकाशकं भागवतं च साधु यथा तथोवाच यदेव श्रीहंसोक्तं योगादिकं वासुदेवशरणा अंजसा सुखेन विदुः ॥ १९ ॥ ❀ ❀ मन्वंतरेषु येऽवतारास्तानाह चक्रमिति । स एव भगवान् मनुवंशधरः मनुवंशपालकः सन् दशसु दिक्षु अविहतमप्रतिहतं स्वतेजः निजं प्रभावमेव चक्रमाज्ञारूपं बिभर्ति किंच त्रिपृष्ठे त्रयाणां लोकानामुपरि स्थिते सत्यलोकेऽपि उशतीं कमनीयां कीर्त्तिं प्रथयन् विस्तारयन् दुष्टेषु दुर्वृत्तेषु राजसु दमं दंडं व्यदधात् व्यधत्त ॥ २० ॥ ❀ ❀ धन्वंतर्यवतारमाह धन्वंतरिरिति । भगवान् लोकेऽवतीर्य धन्वंतरिः सन् पुरुरुजां भूरिरोगाणां रुजः रोगान् नाम्नैव आशु हंति कथंभूतः स्वयमेव कीर्त्तिः स्वरूपेणैव कीर्तिभूतः अमृतायुः अमृतं मरणविपरीतमायुर्यस्मात्सः रुद्धं पूर्वं दैत्यैः प्रतिरुद्धं यज्ञे भागं च अवाप लेभे यद्वा समुद्रजेन धन्वंतरिणा यज्ञे भागो न लब्धः स तं रुद्धं भागं विष्णुवरेण सोमवंशेऽवतीर्य देवत्वं प्राप्यावापेति हरिवंशे स्थितम् । आयुश्च वेदं आयुर्वेदं चानुशास्ति प्रवर्त्तयति ॥ २१ ॥ ❀ ❀ परशुरामावतारमाह क्षत्रमिति । क्षयाय मृत्यवे विधिना दैवेन उपभृतं समर्पितम् । ब्राह्मणेभ्यो द्रुह्यतीति ब्रह्मध्रुक् उज्झितः पंथा वेदमार्गो येनेत्युज्झितपथम् अत एव नरकार्तिलिप्सु नरकदुःखं लब्धुमिच्छु ईदृग्विधम् अवनेः कंटकं पीडाकरं क्षत्रं क्षत्रियकुलम् । असौ महात्मा हरिः उग्रवीर्यः असह्यवीर्यः सन् उरुधारपरस्वधेन बहुतीक्ष्णाग्रपरशुना उद्धंति उत्पाटयति ॥ २२ ॥ ❀ ❀ श्रीरामावतारमाह अस्मदिति त्रिभिः । अस्माकं ब्रह्मादीनां प्रसादेऽनुग्रहे सुमुखः कलानां प्रकृतिपुरुषकालादीनामीशः "एष सर्वेश्वर" इति श्रुतेः कलया भरतादिरूपया सह इक्ष्वाकुवंशे अवतीर्य गुरोः पितुः श्रीदशरथस्य निदेशे आज्ञायां तिष्ठन् सदयितानुजः सीतालक्ष्मणाभ्यां सहितः वनं दंडकारण्यमाविवेश । यस्मिन् रामे दशकंधरो रावणः विरुद्धय विरोधं कृत्वा आर्तिं मरणांतं दुःखमार्छत्प्राप्तः ॥ २३ ॥ ❀ ❀ तस्मै श्रीरामाय उदधिर्मार्गं ददौ । कथंभूतः ? सपदि शीघ्रं हरो यथा त्रिपुरं दिधक्षुः तद्वद्दूरे रावणस्य पुरं लंकां दग्धुमिच्छोः श्रीरामस्य दूरे सुहृन्मथितरोषसुशोणदृष्ट्या उरुभयांगवेपः परोक्षभूतेन सीतारूपेण सुहृदा निमित्तभूतेन मथितो विकृतो यो रोषस्तेन सुशोणात्यरुणादृष्टिस्तया ऊढं प्राप्तं यद्भयं तेनांगेषु वेपः कंपो यस्य सः पुनः कथंभूतः ? श्रीरामस्योक्तप्रकारया दृष्ट्या तातप्यमानानि मकराणामुरगाणां नक्राणां च चक्राणि समूहाः यस्मिन्सः ॥ २४ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

अङ्गुलीयकैर्विभूषितत्वमाह—तुभ्यं च नारदेति । अङ्गुलीयकानि दश विंशतिर्वा भवन्ति । तावन्ति । हि भगवद्रूपाणि यावन्ति नारदेन दृष्टानि । अन्यैरपि । नारदं प्रति भगवदवतारा "दर्शनं यान्ति चेतसी" ति वाक्यादनन्ता एव । अङ्गुलयश्चतुर्भुजे विंशतिर्भवन्ति । अनन्त[1]भुजत्वेऽनन्ताः । नारदेन तत्सदृशैरन्यैश्च परिदृश्यमाना हि मूर्त्तयो भवन्तोऽनन्ताः । अत एव तुभ्यं चेति चकारः । तेषामङ्गुलीयकत्वमवयवान्तोपयोगात् । ते हि भक्ताः संसारान्ते भवन्ति । अनेन सर्वात्मकस्य भगवतो भक्ता अङ्गुलय इति निरूपितम् । ते हि सर्वशरीरोपकारिणः सर्वक्रियाहेतवः । महाधनैरिति विशेषात्तेषु बहुधनमस्तीति ज्ञापितम् । तानि धनान्यग्रे वक्ष्यामः । तुभ्यं नारदाय । त्वदुपयोगार्थं चकारादन्योपयोगार्थं च योगमुवाचेति सम्बन्धः । तत्र साधुपरितुष्ट इति हेतुः । तस्य योगस्य मूल्यरूपत्वात् । नहि केनाऽप्यंशेनाऽपरितुष्टः स्वमूल्यं वदति । चतस्रो ह्यङ्गुलय एकश्चाऽङ्गुष्ठः स च [2]समावद्वीर्यो ( ? ) भवति ताभिः । सा हि भक्तिरङ्गुष्ठमूल्यं भवति । तेन परितुष्टो वा भगवान् । योगो ज्ञानं परिचर्या [3]शरीरज्ञानं चाऽङ्गुलीस्थानीयाः । चतुर्भिरपि भक्तहितो भगवान् प्राप्यते भक्त्या च । तदाह । भृशमत्यर्थम् । प्रवृद्धभावेन निरन्तरश्रवणादिना तत्तन्मार्गे उत्पन्ना प्रीतिः [4]सर्वं हृदयं पूर्णं विधाय यदोच्छलिता भवति । [5]यथा बहिः स्पष्टतया प्रेमाऽनुभूयते स प्रवृद्धो भावः । तेनैव भगवान् परितुष्यति । गुणानां भगवतश्चाऽवगाहनयोग्यत्वात् । अत एव साधुपरितुष्टः । परितोषानन्तरमपि भक्तिपूरस्य विद्यमानत्वात्परितोषस्य साधुत्वम् । अपरितोषासहभावः स्वनियता च । परितस्त्वं तु तदीयानामप्युद्धारकत्वेन । तदा हि योगमाह । तथोपायमुक्तवान् येनोपायेन भगवान् दृश्यत एव । बहिर्दर्शने भक्तिरेव हेतुः । अन्तर्दर्शने योगः विद्यमानस्य दर्शने द्वयं भगवतो ज्ञानं जीवानामात्मतत्त्वप्रदर्शनं च । चकाराद्ब्रह्मज्ञानं च । ब्रह्म[6]स्वरूपज्ञानं ब्रह्ममीमांसायां निरूपितम् । निर्धर्मकः सर्वधर्मादिरूपेण स्वयमेवाऽऽविर्भवतीति । भागवतं पुरुषोत्तमज्ञानम् । आत्मनो जीवस्य तत्त्वं शुद्धचैतन्यरूपम् । तत्प्रकाशो वृत्तिफलनेन स्वतो वा आविर्भावेन । तज्ज्ञानं दीपस्तेन सहितं आत्मसतत्त्वदीपम् । ब्रह्मात्मतत्त्वज्ञानं वा । चकारात्क्रियायोगः । तस्य फलं भक्तिरित्यग्रे वक्ष्यते । ननु योग[7]यज्ञज्ञानादीनां पूर्वमेव सिद्धत्वाद्बहुभिश्च प्राशितत्वात्तदर्थं किं भगवदवतारेणेत्यत आह—यद्वासुदेवशरणा इति । यस्मान्नारदार्थं प्रोक्तपञ्चरात्रादेः । वासुदेवशरणाः मोक्षदातुः [8]सत्त्वाधिष्ठात्रीदेवतारूपस्य शरणगमनमात्रेणैव तपआदीनामभावेऽपि । अञ्जसा सामस्त्येनैव सुगममार्गेणैव विदुर्ज्ञानवन्तः । आश्रयमात्रेणैव सुगमतया परिज्ञानं पुनःकथने हेतुः । अथवा भगवद्भक्ता भगवत्पराः कर्म वा योगं वा ज्ञानानि वा न मन्यन्त एवेति

---

१. भुजे त्वनन्ताः क. घ. २. । समानवदिति ख. ग. । ३. शरीरेति घ. । ४. सर्वंहृदयमिति ख. । ५. यदा बहिरिति ख. ग. । ६. स्वरूपं ज्ञानं क. घ. । ७. योगज्ञानादीनां ख. । ८. सर्वाधिष्ठातृदेवतेति ख. ।

तदर्थं भगवतैतान्युक्तानि । अतःपरं भगवदुक्तानीति परमश्रद्धया तेषु प्रवर्त्तन्ते [1]मार्गगताश्च भवन्ति कृतार्थाश्च । अन्यथा उत्पथा उन्मादाश्च भवेयुः भक्तेर्मादकत्वात् । एतदर्थं भगवान् भक्तिसाध[2]कान्युक्तवानित्यर्थः ॥ १९ ॥ ❀ ❀ नूपुरकंकणादिभिर्विभूषितं निरू[3]पयति—चक्रं चेति । अत्राऽऽदिशब्देन द्वादशाङ्गोपयोग्याभरणान्युच्यन्ते । तत्र पादयोर्हस्तानां च नूपुरकङ्कणादिभिर्विभूषितं निरूपयति—चक्रं चेति । अत्रादिशब्देन द्वादशाङ्गोपयोग्याभरणान्युच्यन्ते । तत्र पादयोर्हस्तानाञ्च नूपुरकङ्कणादिभिर्ध्येयत्वम् । एवं कण्ठाभरणानि मुकुटादीनि च । सर्वाण्येतानि द्वादशाङ्गविभागेन द्वादशविधानि । तानि मन्वन्तरावतारेणोच्यन्ते । यद्यपि मेखलाया वनमालायाश्चैतन्मध्य एव वचनमुचितम् । तथा सति चतुर्दशत्वं मन्वन्तरावतारसङ्ख्या चोपपद्यते । तथापि तयोर्विशेषप्रयोजनस्य विद्यमानत्वात्पृथङ्निरूपणमुक्तम् । एतेषामपि विशेषणं महाधनानीति [4]सर्वमन्वन्तरेषु भगवान् योगादिकमुपदिशतीति सूचितम् । तदाह—चक्रमिति । मन्वन्तरेषु भगवान्स्वतेजो बिभर्त्ति पालनसामर्थ्यं बिभर्त्ति । [5]सर्वं मन्वन्तरं साङ्गं परिपालयतीत्यर्थः । ननु मनुवंश्यानां विद्यमानत्वात्सर्वांशेन भगवत्परिपालनं किम[6]र्थमित्याशङ्क्याह—मनुवंशधर इति । मनोर्वंशमयमेव बिभर्त्ति । मन्वन्तरमेकसप्ततियुगात्मकम् । तत्र कलौ सर्वेषां नाशः शूद्रादिभावात् । अतो भगवतैव परिपाल्यन्ते यथा देवापिनम् । ननु ऋष्यादीनां विद्यमानत्वात्तेषां नाशशङ्काभावात्किं भगवता तदंशकार्यं कर्त्तव्यं ? तत्राऽऽह—चक्रमिति । ते हि चतुर्विधाः मन्वृषिदेवतेन्द्ररूपाः । ते स्वरूपतो विद्यमाना अप्याज्ञारूपेण न वर्त्तन्ते । तदर्थमाह—चक्रं बिभर्तीति । तानेव ऋषीनाज्ञारूपान्कृत्वा बिभर्त्तीत्यर्थः । "सर्वे पुरुषशासना" इति वाक्यात् । चकरात्स्वतंत्रतया । आज्ञां सेनां च बिभर्त्ति नियमानार्थं सहायार्थं च । तेषामाज्ञाकरणे हेतुः दिक्ष्ववहितमिति । दशसु दिक्षु अवहितं स्थापितं सावधानं वा । यथा यो यत्र स्थापनीयस्तं तथा स्थापयतीत्यर्थः । विशेषकार्यमाह—दुष्टेषु राजसु दमं व्यदधात् । पालकानां दुष्टत्वे तद्दण्डकरणं विशेषकार्यम् । अनेन लोकरक्षा निरूपिता । एवं लोक[7]वेदरक्षां निरूप्य भक्तिरक्षां निरूपयति—स्वकीर्त्तिं सत्ये त्रिपृष्ठ प्रथयन्निति । यथा पातालादुद्धृत्य भूमिः पुष्करपर्णे प्रथिता, एवं त्रैलोक्ये स्थितां कीर्त्तिं त्रयाणां लोकानां पृष्ठभूते सत्यलोके स्थापितवान् । इत उद्धरणेन तत्र स्थापने हेतुः उशतीमिति । कमनीयाम् । अत्र हि प्राकृतधर्मैः प्राकृतबुद्धिभिश्च संबद्धा जललग्नेव कीर्तिः । सा हि वस्तुतः शुद्धा भवति । तां सत्यलोके प्रथितवान् । सत्यलोकस्थानामुपकारजननाज्ज्ञानभक्त्य[8]र्थं भगवच्चरित्राणि तत्र गीयन्ते । ततस्तत्र स्थिताः सर्व एव भगवन्तं जानन्तीति सर्वलोकविख्यातो भगवांस्तत्तदवयवाभरणभूत इत्यर्थः । आदिशब्दस्याऽपरिच्छिन्नत्वान्मन्वन्तरेषु बहून्यवा[9]न्तरावतरणानि सूचयति ॥ २० ॥ ❀ ❀ स्निग्धामलैः कुञ्चितनीलकुन्तलैर्विरोचमानाननहासपेशलं भगवन्तं निरूपयति—धन्वन्तरिरित्यादिपञ्चभिः । कुन्तलानां धर्मैः कुन्तलैश्च विरोचमानमाननम् । तादृश आनने हासेन पेशलो भवति भगवान् । तत्र हासपेशलो रघुनाथो हास्यरूपो भवति सर्वमोहनरूपः परमसुन्दरः । तस्य कार्यं गूढमित्यग्रे वक्ष्यते । कुञ्चितनीलकुन्तलरूपः परशुरामः । बहुधा चरित्रकरणादनेकरूपत्वं तस्य । तद्गतधर्मः स्निग्धामलरूपो धन्वन्तरिः । तेन ह्यमृतेन शास्त्रेण च सर्वे स्निग्धा अमलाश्च कृताः देवा हि रूक्षा अमृतेन भगवति स्निग्धा कृताः वैद्यकशास्त्रेण चाऽमला भवन्तीत्यविवादम् । उभयोः कार्ये भूमौ विद्यमान एव रघुनाथोऽवतीर्ण इति तादृशे मुखारविन्दे हास्य[10]रूपत्वं भगवतः । [11]यद्भगवद्धास्येन कार्यं तद्रघुनाथेन कार्यमिति । तत्र आननं भगवतो धर्माधारब्राह्मणाः । तत्र आरोग्ये धर्मसिद्धिः स्याद्रक्षा च धनुषो भवेत् । अतो धर्मसिद्ध्यर्थं धन्वन्तरिरवतीर्ण इति तच्चरित्रमाह—धन्वन्तरिश्चेति । दृष्टोप[12]कारत्वात्स स्वयमेव कीर्त्तिभूतः । चकारात्स्त्रीरूपं च । उभयमपि भगवान् । तस्य धर्मः कीर्त्तिर्भवत्येव । तथापि कीर्त्तिरूपताऽप्युच्यते । तत्र हेतुर्नाम्नैव पुरुरुजां महारोगग्रस्तानां [13]रुजमाशु हन्ति । धन्वन्तरिनामस्मरणेनैव सर्वे रोगा गच्छन्तीत्यर्थः । नृणामिति रोगसम्भावनयोक्तम् । नामोच्चारयितृत्वाद्वा । वस्तुतस्तु शास्त्रद्वारा सर्वेषामेव रोगान्हन्ति । नाम च तस्य शास्त्रम् । सर्वेषामुपकारिणां यज्ञे भागा निरूपिता वाय्वादीनाम् । तथा अनेनाऽपि आरोग्यलक्षणं धर्मं विधाय यज्ञे भागं च प्राप्तवान् । "बर्हिरनुप्रहरतीति वाचि स्वाहे"ति मन्त्रेण समिष्टयजुषि बर्हिषोऽनुप्रहरणं क्रियते । तत्र वाचो देवतात्वं शान्त्या इति फलान्न संभवतीति सर्वशा[14]न्तिकरी या वाक् धन्वन्तरिप्रोक्ता सा भागमर्हतीति यज्ञे धन्वन्तरिभागः रुद्धमिति पूर्वं बर्हिषोऽनुप्रहरणाभावः प्रायेण सूचितः । "न बर्हिरनुप्रहरेदि"त्यग्नि[15]होत्रे तस्य निषेधात्संस्थायामेव बर्हिषोऽनुप्रहरणम् । सम्यक् स्थितिश्चाऽऽरोग्यकार्यमिति बर्हिरेव तस्य भागः । अन्यद्वा चिन्त्यम् । शाखान्तरीये वा स्पष्टम् । किञ्च । आयुर्वेदं च कृतवान् । पूर्वं मथने प्रादुर्भूतस्तत्रैव तिरोहितः । पुनश्च काशिराजगृहेऽवतीर्य धन्वन्तरिर्दैर्घ्यत[16]म" इति वाक्यादायुर्वेदं प्रवर्त्तितवान् । चकारादन्यदपि । अस्याऽवतारस्य धर्मरूपत्वमेव न धर्मिरूपत्वम् । तेनौष[17]धादिद्वारा परम्परोपयोगः ॥ २१ ॥ ❀ ❀ कुन्तलानां स्वरूपमाह—

---

१. शरणं गताश्चेति ग. । २. साधनान्येतान्युक्तवानिति क. ख. । ग. ३. वर्णयतीति ख. ग. । ४. सर्वत्रेति क. । ५. सर्वमन्वन्तरं क सर्वमेवेति ख. ग. । ६. किमर्थमित्याह क. घ. । ७. वेदलोकरक्षामिति क. ख. । ८. भक्त्यर्थं इति ग. । ९. न्तरावरणानीति ख. वताराणि ग. । १०. हासरूपत्वं ख. । ११. यद्वदिति ख. । १२ दृष्टोपयत्वादिति ग. । १३. रुज आश्विति ग. १४. शान्तिकरेति घ. १५. होत्रेतरनिषेधात् ख. ग. १६. दैर्घ्यतमस इति ख. ग. । १७. तेन तु औषधेति ग. ।

क्षत्रमिति । कुञ्चितनीलत्वं धर्मः कुञ्चितत्वं कुटिलता । नीलत्वं च श्यामता । क्षत्रियहन्तृत्वात्कुटिलता । भूमिकण्टकोद्धारकत्वाच्छ्यामतेति । अथवा । चतुर्भिर्विशेषणैः [1]सहितानि कुन्तलानि धन्वन्तरिः । अमृतोद्गमत्वात् स्त्रीत्वात् यज्ञभागभुक्त्वात् अवतीर्णत्वाच्च । तत्र श्यामत्वं मथनान्निर्गतस्य । कुटिलत्वं स्त्रीरूपस्य । अमलत्वं यज्ञभुजः । आयुर्वेदकरणात्सर्वस्निग्धत्वम् । [2]स्वस्याऽवतारबाहुल्याद्ब[3]हुवचनम् । मुखत्वं परशुरामस्य । स हि वैश्वानरस्याऽवतारः । अत एव [4]सर्वक्षत्रियभक्षकः । विशेषेण रोचमानत्वं धर्मरक्षाकरणात् । क्षत्रं क्षत्रियाः । क्षयायैव विधिना उपभृतं वृद्धम् । उप समीपे धृतं वा । यथा पशुर्ध्रियते । "भवाय नाशाये"ति वाक्यात् । वधे हेतुः ब्रह्मध्रुगिति । ननु क्षत्रस्य कथं ब्रह्मद्रोहजनकत्वम् । तत्राऽऽह— उज्झितपथमिति । उज्झितः पन्था येन सन्मार्गपरित्यागाद्ब्रह्मद्रोहे मतिः । तर्हि सन्मार्गबोधनेन [5]कथं न व्याव[6]र्त्यते ? तत्राऽऽह- नरकार्त्तिलिप्स्वति । नरकलक्षणामेवाऽऽर्त्तिं वाञ्छति परलोकदुःखमङ्गीकृत्योत्पथेन प्रवृत्तमतो न बोधनेन निवर्त्तते । अत एवोद्धान्त ऊर्ध्वमुत्क्षिप्य तान् दूरीकरोति । अनेन यदेवाऽस्याऽमेध्यं तदपहन्तीति सूचितम् । महात्मेति अल्पद्रोहः प्रयोजनार्थं क्रियमाणो न तद्धृदयं बाधते । मूढा एव हि दृष्टप्रत्ययाः । महात्मानस्तु पर्यवसानबुद्धयः । असाविति [7]यज्ञकर्त्ता । उद्धननं हि तेनैव क्रियते । किञ्च । एतत्क्षत्रं मारणीयमेव । अवनिकण्टकत्वात् । भूमिर्हि भगवतः पादौ । सर्वो हि स्वपादकण्टकोद्धारं करोति । यद्यपि सर्वात्मत्वात्तस्य व्यथा भवति तथाप्युग्रवीर्यः । न हि क्रौर्यावलम्बनव्यतिरेकेण कण्टकोद्धारो भवति । अनेन नैर्घृण्यमपि निवारितम् । त्रिःसप्तकृत्व इति । सप्तधा हननेनैकवारं भूमेर्निष्कण्टकता जाता । पुनर्ब्राह्मणादुत्पन्नाः सप्तधा हताः । पुनरेवमिति त्रिः । उरुधारपरश्वधेनेति । शस्त्रेण हननं परलोकार्थम् । परश्वधः परशुः । उरुधारत्वाद्बहुधा हननेऽपि न कुण्ठता । अनेन वधे क्लेशाभावो निरूपितः ॥ २२ ॥ ❀ ❀ हासपेशलत्वं निरूपयति—अस्मत्प्रसादसुमुख इति । हासो हि त्रिविधः । इतरगर्वनिवारक इतरव्यामोहकः प्रसादहेतुश्च । तत्र प्रथमं प्रसादहेतुमाह । यद्यपि रघुनाथचरित्रस्याऽनन्तत्वं तथापि हासत्वमात्रोपयोगाद्गुणत्रयकार्यं चरित्रत्रयमेवोपलक्षणत्वेन निरूप्यते । तत्र प्रथमं सात्त्विकं चरित्रमाह—अस्मत्प्रसादसुमुखः । ब्रह्मादीनां प्रसादार्थं सुमुखः प्रसन्नवदनः । अनेन ब्रह्मप्रार्थनया भगवानवतीर्ण इत्युक्तम् । कलया परमकान्त्या सीतया वा । कलया वा कलेशः । यस्तु सर्वकलानिधिर्वैकुण्ठवासी विष्णुः स यस्य कलया । हासो हि कार्यस्याऽल्पत्वे भवति । तस्माद्रक्षाऽल्पं कार्यम् । तदर्थं भगवतः काचित्कला या वैकु[8]ण्ठे स्थिता पालयति । अनेन भगवान्पूर्ण एव रघुनाथोऽवतीर्ण इति सूचितम् । कला वा ऋष्यादयः । अतस्तेषां सङ्कटे तत्पतित्वादनेनैव निस्तारः कर्तव्य इति सूचितम् । कलानां वा सङ्कर्षणादीनामीशो वासुदेवः सर्वकलानिपुणो वा लक्ष्म्या सहावतीर्णः । तदैव पेशलो भवति । स भगवानिक्ष्वाकुवंशेऽवतीर्य । इक्ष्वाकुर्भक्त इति नृसिंहपुराणे प्रसिद्धिः । यदर्थं श्रीरङ्गो ब्रह्मसदनात्समानीतः । तस्योद्धारार्थं तद्वंशेऽवतीर्णः । देवहितकार्यकर्तृत्वं धर्मज्ञानादिसाहित्यं स्वाव[9]तरणेन भक्तोद्धारो गुर्वाज्ञाकरणं वनवास एतावत्सात्त्विककार्यम् । अनुभावस्तु विरोधेन दशकन्धरार्त्तिः । सत्त्वविरोधे तमसो लयो युक्त एव । गुरोर्दशरथस्याऽऽज्ञा तस्यां स्थितः । व्रतमिव [10]तत्पालनं कृतवानित्यर्थः । वनमाविवेश । ननु वने तस्य किञ्चित्कार्यम् । अपि तु [11]वास एव कार्यमिति वनस्य कर्मता । दयिता सीता अनुजो लक्ष्मणस्ताभ्यां सहितः । अनेन कलया कलेश इति यावानागतस्तावान्वनं गत इति सूचितम् । इतरसहायाभावार्थं वा । आसमन्तात्प्रवेशो बहुकालस्थित्यर्थः । अत एव यस्मिन्रघुनाथे विरोधनिमित्तत्वमेव भगवतो ननु विरोधहेतुत्वम् । विरुध्य विरोधं कृत्वा । दशकन्धरो रावणः । अनेन महत्त्वं वा बहुत्वं वा न निस्तारहेतुरिति सूचितम् । आर्त्ति पीडां चिन्ताशोकादिकम् । त्रयाणां वनवास आरब्धः । देवानां कामनया तथा सङ्कल्पः कृतः । तत्र भार्यया सह स्थितस्य न मुख्यो वनवासो भवति । न भर्तृसहितायाः स्त्रियः । अत उभयोर्वियोगेन वनवासः प्रदर्शितः । वियोगजननादि[12]रूपमेव विरोधः । प्रथमाऽऽर्त्तिस्तु खरादिमारणेन ॥ २३ ॥ ❀ ❀ एवंसात्त्विकचरित्रं भगवत उक्त्वा राजसमाह—यस्मा अदादिति । उदधिः समुद्रः यस्मै मार्गमदात् । ऊढभयाङ्गवेगः । ऊढं भयं येन । समुद्रशरीरस्य भयं भार्येव [13]हृदये निविष्टम् । तादृशाङ्गस्य अङ्गे वा वेगः कम्पो यस्य । अथवा । ऊढं यद्भयं मृत्युरूपं तस्याऽङ्गानि शोषणादीनि तेषां वेगो यस्य । मृतप्रायो जात इत्यर्थः । सपदि तत्क्षणमेव । अरिपुरं लङ्काम् । हरवत् हरस्येव । महादेवस[14]हितं वा पुरम् । दि[15]धक्षोः दग्धुमिच्छोः । दूरे सुहृद्भार्या यस्य भ्राता वा भरतोऽन्ये वा सुहृदः । मथितो यो रोषस्तेन सुशोणा या दृष्टिस्तया तातप्यमानाः अतिशयेन तप्यमाना मकरादयस्तेषां चक्रं यस्मिन् । एवं ह्याख्यायिका रावणेन सीतायां हृतायां दशकन्धरवधार्थं प्रवृत्तस्य रघुनाथस्य मध्येऽन्तरायभूतः समुद्रः स्थितः । स स्वीकीयैः पुरुषैः कृत इति तत्र पदाक्र[16]मणमकृत्वा प्रायोपवेशनं कृतवान् । स ह्यस्मदीयवंशेऽवतीर्णोऽस्मदवतारणेऽप्युपायं न जानाति स कथं रक्षांसि हन्यादिति । परमत्रैवाऽयं तिष्ठत्विति मार्गं न दत्तवान् । तदा भगवान् स्वबाणं सन्धितवान् । तदा तस्य नेत्रयोरारक्तिमा जाता तेन समुद्रस्य क्षोभो जात इति । मार्गदानं न प्रीत्येति भगवन्माहात्म्यज्ञापनार्थं भयादयस्तस्मिन्प्रविष्टास्तदा मार्गं दत्तवानिति । यदि महादेवः

---

१. सहिताः कुन्तला इति ख. । २. तस्येति ख. । ३. द्बहुत्वं ग. । ४. सर्वत्रेति क. ५. कथं तेनेति ख. । ६. व्यावर्त्यन्ते घ. । ७. यज्ञ हर्ता ख. । ८. वैकुण्ठस्थितेति ख. ग. ९. स्वावतारणेन क. घ । १०. तत्परिपालनं ख. ग । ११. वनवास इति ग. घ. १२. दिकरूपमेव ग. १३. हृदयनिविष्टं ख. ग । १४. संज्ञितं वा ख । १५. दिधिक्षोरिति क. घ. १६. क्रममकृत्वा ख. ग ।

सहायमपि कुर्यात्स्वभक्तस्य स्वयं वा पुरे तिष्ठेत्तदा तेन सह पुरं ज्वालनीयमिति। रावणवधस्त्वल्पः। पुरमेव ज्वालनीयमितीच्छा। यस्मिन्पुरे दुःखिता सीता तिष्ठतीति। भगवतो रोषे दूरे स्थितानां सुहृदां दुःखं हेतुः। अमथिते हि ¹दधनि क्वचिद्दृढता क्वचिज्जलं क्वचिन्मध्यभावो भवति। मथिते त्वेकरूपता। तथा परीक्षार्थं हितार्थं परमार्थतो वा विघ्ने कृते पूर्वं बहुधा विचारितत्वात्सीतोद्धारस्य अवश्यं कर्त्तव्यत्वान्न रोषप्रतिबन्धको विवेकादिर्जात इति सूचनार्थं मथितपदम्। दृष्टिमात्रेणैव समुद्रताप इति माहात्म्यम्। राजसचरित्रत्वाद्रोषकथा॥ २४॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तुभ्यमित्यत्र। अङ्गुलीयावतारत्वं नारदादिदृष्टेषु व्युत्पादयन्ति **अङ्गुलीयकेत्यादि**। ननु मूले गुरुत्वेनैक एव भगवान्निर्दिष्ट इति स एव दृष्टः तथा सति कथं बहुत्वमित्यत आहुः **नारदं प्रतीत्यादि**। तत्तद्गुणक्रियाविशिष्टरूपाणां बहुत्वं 'बहूनि सन्ति नामानी' त्यत्र सन्तीतिप्रयोगाद् व्युत्पादयिष्यते, तद्रीत्यानन्तत्वमुपपन्नमित्यर्थः। ननु दशादिसङ्ख्योक्तेत्यनन्तत्वे कथमङ्गुलीयकत्वमित्यत आहुः **अङ्गुलय इत्यादि**। अन्यदृष्टानां सङ्ग्रहे मानमाहुः **अत एवेत्यादि**। **भक्तानामङ्गुलित्वं साधर्म्येण गमयन्ति ते इत्यादि**। तेष्विति दृष्टेषु स्वरूपेषु। मूल्यरूपत्वादिति प्राप्त्युपायरूपत्वात्। तदेव व्युत्पादयन्तो धनानि वदन्ति **चतस्र इत्यादि**। **भक्तया चेत्यन्तम्**। तथा च, लीलावताराणामेवानुक्रान्तत्वादत्रोपदेष्टृभूतं मूलरूपं नाङ्गुलीयकत्वेन विवक्षितम्, किन्तु, परितुष्टोक्तसाधनदृश्यानि रूपाणि, अत एवात्रावतारनाम नोक्तमिति तस्मात्तथेत्यर्थः। ननु 'भक्तया त्वनन्यये' तिवाक्ये दर्शनस्य भक्तिसाध्यत्वमतः कथं योगदर्शनमित्यत आहु **बहिरित्यादि**। **तत्प्रकाशो वृत्तिफलनेनेत्यादि**। ज्ञानप्रसादेन श्रुतो ध्यायमान इति पदात्तादृशप्रत्यग्वृत्तावात्मनः प्रतिफलेन कश्चिद्धीर इति श्रुत्युक्तेन स्वत आविर्भावेन वेत्यर्थः। **तज्ज्ञानमिति** आत्मविषयप्रकाशरूपं ज्ञानम्। तथा चात्मयुक्तं सतत्त्वदीपं आत्मसतत्त्वदीपमिति समास इत्यर्थः। एतस्य पक्षस्य क्लिष्टत्वात् पक्षान्तरमाहुः **ब्रह्मात्मत्वं ज्ञानं** वेति सतत्त्वशब्द एवानागन्तुकरूपवाचकत्वे प्रागुभिराद्रियते, तथा सत्यात्मनः सतत्त्वदीपमिति समास इत्यर्थः। परिचर्यासङ्ग्रहायाहुः **चकारादित्यादि**। **अग्र इति** 'भक्तियोगं स लभते एवं यः पूजयेत मामि'त्येकादशस्कन्धे॥ १९॥ ❀ ❀ **चक्रञ्चे**त्यत्र। अत्राप्यवताराणामस्फुटत्वात् सङ्ख्यादिविरोधस्य प्रसज्यमानत्वाच्च तान् विशदीकुर्वन्त उपपादयन्ति **अत्रादीत्यादि**। **एवमिति** उचितमिति। हरेर्वामनस्य च मन्वन्तरावतारत्वादुचितम्। नूपुरादिवदवयवध्यानोपयोगीनि, महाधनानीति। **इति** हेतौ। **इत्याहेति** इत्याशङ्कायामाह। कथं बिभर्तीत्यत आहुः **मन्वन्तरमित्यादि**। **सर्वेषामिति** मनुवंश्यानाम्। **तदंशकार्यमिति** मन्वन्तरांशकार्यम्। त इति मन्वन्तराख्यसद्धर्मांशाः। येनापदं चक्रपदस्य व्याख्यानं, 'चक्रञ्चानीकमस्त्रियामि'ति कोशात्। **भगवानिति** मन्वन्तरावताररूपः **आदिशब्दस्येति**। नूपुरकङ्कणादिभिरित्यत्रोक्तस्य॥ २०॥ ❀ ❀ **धन्वन्तरिरित्यत्र**। **शास्त्रद्वारेति** पक्षे शास्त्रलाभ प्रकारमाहुः **नामेत्यादि**। तथा च, नाम्ना नामसृष्ट्यात्मकेन वैद्यकशास्त्रेणेत्यर्थः। **अनेनेति** नाम्नेत्यर्थः। **न सम्भवतीति** शान्ताशान्तत्वयुक्तत्वान्न सम्भवति। **शाखान्तरीय इति**, याग इति शेषः॥ २१॥ ❀ ❀ **क्षत्रमित्यत्र** ब्राह्मणानां विराडाननत्वेन लीलावतारेषु प्रवेशस्य घटमानतया तदसंबद्धकेवलनिराधारस्य धर्मस्यावतारो न सम्भवतीत्यरुच्या पक्षान्तरमाहुः **अथवेत्यादि** भवायेति। इदं **पञ्चमस्कन्धे** प्रियव्रतं प्रति ब्रह्मवाक्यम्। अल्पद्रोह इत्यादिनरकीर्तिनिवारको मारणलक्षणो द्रोहो न निर्दयतां जनयतीत्यर्थः। **असत्प्रसादेत्यत्र** पेशलत्वं व्युत्पादयन्ति **कलयेत्यादि**। अत्र सर्वेषां पक्षाणां समुच्चय एव न तु विकल्पः, वाशब्दस्त्वेवकारार्थो वाक्यालङ्कारे। **यस्त्वित्यादि**, इदं ब्रह्मवैवर्त्ते स्फुटम्। **पालयतीति**, एतेन गुणावतारत्वं वैकुण्ठवासिनः सूचितम्। तेन सिद्धमाहुः **अनेनेत्यादि**। **स्थित इति** तिष्ठन्नित्यस्येदं विवरणम्। आदिकर्मणि क्तः। **निमित्तत्वमिति**, आधारतया प्रयोजकत्वम्। त्रयाणां वनवासे हेतुमाहुः देवानामिति। सपरिवारो रावणो नश्यत्विति हि देवानां कामना, सा तदैव पूर्यते, यदा विरोधे प्रयोजको वधे सहायश्च भवतीत्यतो विरोधप्रयोजकतया दयितानयनस्येन्द्रजिद्वधार्थं चानुजनयनस्य सङ्कल्पः इत्यर्थः प्रतिभाति॥ २३॥ ❀ ❀ **यस्मा इत्यत्र**। **अस्मदीयवंश** इति अस्मत्कर्तृवंशे॥ २४॥

### श्रीगिरिधरकृता बालप्रबोधिनी

हंसावतारमाह—तुभ्यमिति। भगवद्भक्तत्वात्तस्मिन् स्वप्रेम सूचयन्सम्बोधयति—हे नारद भृशमत्यन्तं विवृद्धभावेन प्रवृद्धस्नेहेन साधु सम्यक् परितुष्टः सन् भगवांस्तुभ्यं च योगं भक्तियोगं आत्मनोर्जीवपरमात्मनोस्तत्त्वं याथात्म्यमेव सतत्त्वं तस्य दीपं प्रकाशकं ज्ञानं ज्ञानसाधनं भागवतं च हंसरूपेणोवाचेत्यन्वयः। यदा त्वं सनकादिभ्यो येन रूपेण केशवयोगमादिष्टवानेतद्रूपमिच्छामि वेदितुमित्यत्रैकादशे सनकादीत्यादिपदेन नारदोऽपि ज्ञेयः। नारदाय हंसरूपेण भक्तियोगमुवाच हेति विष्णुधर्मोत्तरे स्पष्टत्वात्। भक्तिं विना तु भागवतं दुर्लभमित्याशयेनाह—यदिति। यद्धंसोक्तं भक्तिज्ञानादिकं वासुदेवशरणाः भगवद्भक्ता एवाञ्जसा सुखेन विदुर्जानन्ति, नान्ये इत्यर्थः॥ १९॥ ❀ ❀ तत्तन्मन्वन्तरावतारमाह—चक्रमिति। मनुवंशधरः मनुवंशपालकः सन् भगवान् मन्वन्तरेष्ववतीर्य दशसु दिक्षु अविहतमप्रतिहतं 'तेजस्तत्त्वं सुदर्शनम्' इति वाक्यात् स्वतेजोरूपं चक्रं

१. दधिनीति क. घ.।

विभर्त्ति, तेन च दुष्टेषु राजसु दमं दण्डं व्यदधात् विधत्ते । नन्वन्तर्यामिणः सङ्कल्पमात्रेणैव दुष्टत्वनिवर्त्तने शक्तस्यावतारे विशेषतः किं प्रयोजनमित्यपेक्षायां स्वयशोविस्तारणेन भक्तिमार्गप्रवर्त्तनमेवेत्याशयेनाह—अन्यैश्च विविधैश्चरित्रैस्त्रयाणां लोकानां पृष्ठे उपरि वर्त्तमाने सत्ये सत्यलोकपर्यन्तामुशतीं मनोहरां स्वकीर्तिं प्रथयन् विस्तारयन् ॥ २० ॥ ❀ ❀ धन्वन्तर्यवतारमाह—धन्वन्तरिश्चेति । भगवान् धन्वन्तरिरूपेण लोकेऽवतीर्य स्वयमेव कीर्तिः कीर्त्त्यतिशयवान् सन् पुरुरुजां महारोगिणां नृणां रुजो रोगान् स्वनाम्नैव आशु शीघ्रं हन्ति आयुर्विषयकं वेदं वैद्यशास्त्रं चानुशास्ति प्रवर्त्तयति । अतएवामृतं मरणरहितमायुर्यस्मात्तथाभूतः सन् रुद्धं पूर्वं प्रतिषिद्धमपि यज्ञे स्वभागमवापेत्यन्वयः ॥ २१ ॥ ❀ ❀ परशुरामावतारमाह—क्षत्रमिति । असौ महात्मा भगवान् उग्रवीर्यः असह्यवेगः परशुरामरूपेण अवतीर्ण उरुधारपरश्वधेन दीर्घतीक्ष्णधारेण परशुना त्रिःसप्तकृत्व एकविंशतिवारं क्षत्रं क्षत्रियमात्रमुद्धन्ति उत्पाटयतीत्यन्वयः । एवं क्षत्रियहननेन भगवतो नैर्घृण्यमाशङ्क्याह—क्षयाय मृत्यवे विधिना तत्प्रारब्धेनोपभृतं समर्पितमिति । न तद्धनने भगवतो नैर्घृण्यमिति भावः । तत्र हेतुमाह—नरकेति, नरकार्त्तिर्नारकं दुःखं, तल्लिप्सु लब्धुमिच्छु । तत्र हेतुमाह—अवनिकण्टकमिति । 'अवनेः पादौ मही' इति वक्ष्यमाणत्वाद्भगवत्पादरूपायाः कण्टकतुल्यमित्यर्थः । स्वपादकण्टकत्वेन तदुत्पाटनं भगवत उचितमेव । कण्टकत्वे हेतुमाह—ब्रह्मध्रुगिति, ब्राह्मणेभ्यो द्रुह्यतीति तथा । तत्रापि हेतुमाह—उज्झितपथमिति, उज्झितस्त्यक्तः पन्था वेदमार्गो येन तत् ॥ २२ ॥ ❀ ❀ श्रीरामावतारं तच्चरितं चाह—अस्मदिति । अस्माकं ब्रह्मादीनां प्रसादे कार्ये सुमुख उद्युक्तः कलानामीशः 'नृसिंहरामकृष्णेषु षाड्गुण्यं परिपूरितम्' इति वाक्यादैश्वर्यादिगुणपरिपूर्णो भगवान् कलया भरतादिरूपया सह इक्ष्वाकुवंशेऽवतीर्य गुरोर्दशरथस्य निदेशे आज्ञायां तिष्ठन् सदयितानुजः सीतालक्ष्मणाभ्यां सहितो वनमाविवेश । यस्मिन् श्रीरामे विरुध्य विरोधं कृत्वा दशकन्धरो रावण आर्त्तिं दुःखं नाशमार्च्छत् प्राप्तः ॥ २३ ॥ ❀ ❀ यस्मै श्रीरामाय उदधिः समुद्रः मार्गमदात् दत्तवान् । तत्र हेतुमाह—सपदि शीघ्रमेव अरिपुरं लङ्कां दिधक्षोर्दग्धुमिच्छोः श्रीरामाद्धेतोः ऊढभयाङ्गवेपः ऊढं प्राप्तं यद्भयं तेनाङ्गे वेपः कम्पो यस्य सः । तत्र दृष्टान्तमाह—हरवदिति । हरो यथा कोपेन त्रिपुरदिधक्षुर्जातस्तथेत्यर्थः । श्रीरामस्य लङ्कादाहेच्छायां समुद्रभये च हेतुमाह—दूरे इति । दूरे लङ्कायां वर्त्तमाना या सुहृत् सीता तया निमित्तभूतया मथितः क्षुभितो यो रोषस्तेन सुशोणा आरक्ता या श्रीरामस्य दृष्टिस्तया अत्यन्तं तप्यमानं मकराणामुरगाणां नक्राणां च चक्रं समूहो यस्मिन् सः ॥ २४ ॥

## हिन्दी अनुवाद

नारद ! तुम्हारे अत्यन्त प्रेमभावसे परम प्रसन्न होकर हंसके रूपमें भगवान्‌ने तुम्हें योग, ज्ञान और आत्मतत्त्वको प्रकाशित करनेवाले भागवतधर्मका उपदेश किया । वह केवल भगवान्‌के शरणागत भक्तोंको ही सुगमतासे प्राप्त होता है ॥ १९ ॥ ❀ ❀ वे ही भगवान् स्वायम्भुव आदि मन्वन्तरोंमें मनुके रूपमें अवतार लेकर मनुवंशकी रक्षा करते हुए दसों दिशाओंमें अपने सुदर्शनचक्रके समान तेजसे बेरोक-टोक—निष्कण्टक राज्य करते हैं । तीनों लोकोंके ऊपर सत्यलोकतक उनके चरित्रोंकी कमनीय कीर्ति फैल जाती है और उसी रूपमें वे समय-समयपर पृथ्वीके भारभूत दुष्ट राजाओंका दमन भी करते रहते हैं ॥ २० ॥ ❀ ❀ स्वनामधन्य भगवान् धन्वन्तरि अपने नामसे ही बड़े-बड़े रोगियोंके रोग तत्काल नष्ट कर देते हैं । उन्होंने अमृत पिलाकर देवताओंको अमर कर दिया और दैत्योंके द्वारा हरण किये हुए उनके यज्ञ-भाग उन्हें फिरसे दिला दिये । उन्होंने ही अवतार लेकर संसारमें आयुर्वेदका प्रवर्तन किया ॥ २१ ॥ ❀ ❀ जब संसारमें ब्राह्मणद्रोही आर्य-मर्यादाका उल्लङ्घन करनेवाले नारकीय क्षत्रिय अपने नाशके लिये ही दैववश बढ़ जाते हैं और पृथ्वीके काँटे बन जाते हैं । तब भगवान् महापराक्रमी परशुरामके रूपमें अवतीर्ण होकर अपनी तीखी धारवाले फरसेसे इक्कीस बार उनका संहार करते हैं ॥ २२ ॥ ❀ ❀ मायापति भगवान् हमपर अनुग्रह करनेके लिये अपनी कलाओं—भरत, शत्रुघ्न और लक्ष्मणके साथ श्रीरामके रूपसे इक्ष्वाकुके वंशमें अवतीर्ण होते हैं । इस अवतारमें अपने पिताकी आज्ञाका पालन करनेके लिये अपनी पत्नी और भाईके साथ वे वनमें निवास करते हैं । उसी समय उनसे विरोध करके रावण उनके हाथों मरता है ॥ २३ ॥ ❀ ❀ त्रिपुर विमानको जलानेके लिये उद्यत शङ्करके समान, जिस समय भगवान् राम शत्रुकी नगरी लङ्काको भस्म करनेके लिए समुद्रतटपर पहुँचते हैं, उस समय सीताके वियोगके कारण बढ़ी हुई क्रोधाग्निसे उनकी आँखें इतनी लाल हो जाती हैं कि उनकी दृष्टिसे ही समुद्रके मगरमच्छ, साँप और ग्राह आदि जीव जलने लगते हैं और भयसे थर-थर काँपता हुआ समुद्र झटपट उन्हें मार्ग दे देता है ॥ २४ ॥

**वक्षःस्थलस्पर्शरुग्णमहेन्द्रवाहदन्तैर्विडम्बितककुब्जुषऊढहासम् ।**
**सद्योऽसुभिः सह विनेष्यति दारहर्तुर्विस्फूर्जितैर्धनुष उच्चरतोऽधिसैन्ये ॥२५॥**

---

१. प्रा० पा० भग्नमहे० । २. प्रा० पा० विलम्बित० । ३. प्रा० पा० जयरूढ । ४. प्रा० पा० तोऽरिं० ।

भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः ।
जातः करिष्यति जनानुपलक्ष्यमार्गः कर्माणि चात्ममहिमोपनिबन्धनानि ॥२६॥
तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोऽपवृत्तः ।
यद् रिङ्गतान्तरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथार्जुनयोर्न भाव्यम् ॥२७॥
यद् वै व्रजे व्रजपशून् विषतोयपीथान् पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या ।
तच्छुद्धयेऽतिविषवीर्यविलोलजिह्वमुच्चाटयिष्यदुरगं विहरन् ह्रदिन्याम् ॥२८॥
तत् कर्म दिव्यमिव यन्निशि निःशयानं दावाग्निना शुचिवने परिदह्यमाने ।
उन्नेष्यति व्रजमतोऽवसितान्तकालं[1] नेत्रे पिधाप्य सबलोऽनधिगम्यवीर्यः ॥२९॥
गृह्णीत यद् यदुपबन्धममुष्य माता शुल्बं सुतस्य न तु तत् तदमुष्य माति ।
यज्जृम्भतोऽस्य वदने भुवनानि गोपी संवीक्ष्य शङ्कितमनाः प्रतिबोधिताऽऽसीत् ॥३०॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

किं च युद्धे रावणस्य वक्षःस्थलस्पर्शेन रुग्णा भग्ना महेंद्रवाहस्यैरावतस्य दंतास्तैर्विद्राविताः स्वधवलिम्ना धवलीकृताः । तत्तद्दिक्षु पतितैः प्रकाशिता इत्यर्थः । या एवंभूताः ककुभो दिशस्ताः जुषते सेवते पालयतीति वा । तथा तस्य दारहर्तू रावणस्य । अहो मत्समः कोऽन्योऽस्तीति महागर्वेणोढं प्राप्तं हासमसुभिः प्राणैः सह सद्यः शीघ्रं विनेष्यत्यपनेष्यति । कैः । धनुषो विस्फूर्जितैष्टंकारघोषैरेव । कथंभूतस्य । अधिसैन्ये स्वपरसैन्यमध्ये उच्चरत उत्कर्षेण विचरतः ककुब्जयरूढहासमिति पाठे दंतैरुज्ज्वलितानां ककुभां जयेन यो रूढहासः संजातगर्वस्तमपनेष्यतीत्यर्थः ॥ २५ ॥ ❀ ❀ श्रीकृष्णावतारमाह । भूमेरिति दशभिः । सुरेतरा असुरांशसंभूता राजानस्तेषां वरूथैः सैन्यैर्विमर्दितायाः भारेण पीडितायाः कलया रामेण सह जातः सन् । ननु कोऽसौ जातः । सितकृष्णौ केशौ यस्य भगवतः स एव साक्षात् । सितकृष्णकेशत्वं शोभैव न तु वयःपरिणामकृतं अविकारित्वात् । यत्तूक्तं विष्णुपुराणे । 'उज्जहारात्मनः केशौ सितकृष्णौ महामुने ।'' इति ॥ यच्च भारते । ''स चापि केशौ हरिरुच्चजहे शुक्लमेकमपरं चापि कृष्णम् ॥ तौ चापि केशावाविशेतां यदूनां कुले स्त्रियौ रोहिणीं देवकीं च ॥ तयोरेको बलभद्रो बभूव योऽसौ श्वेतस्तस्य देवस्य केशः ॥ कृष्णो द्वितीयः केशवः संबभूव केशो योऽसौ वर्णतः कृष्ण उक्तः ॥'' इति तत्तु । न केशमात्रावताराभिप्रायं किंतु भूभारावतारणरूपं कार्यं कियदेतन्मत्केशावेवैतत्कर्तुं शक्ताविति द्योतनार्थं रामकृष्णयोर्वर्णसूचनार्थं च केशोद्धरणमिति गम्यते अन्यथा तत्रैव पूर्वापरविरोधापत्तेः । ''कृष्णस्तु भगवान्स्वयम्'' इत्येतद्विरोधाच्च । कथंभूतः परमेश्वरतया जनैरनुपलक्ष्यो मार्गो यस्य । तर्हीश्वरत्वे किं प्रमाणम् । अतिमानुषकर्मान्यथानुपपत्तिरेवेत्याह । आत्मनो महिमोपनिबद्ध्यतेऽभिव्यज्यते येषु तानि ॥ २६ ॥ ❀ ❀ एतदेव प्रपंचयति तोकेनेत्यादिना । बालेन पूतनाया जीवहरणं यत् रिंगता जानुभ्यां गच्छतांतरगेन मध्यं प्राप्तेन दिविस्पृशोरत्युच्चयोः इतरथानीश्वरत्वे तन्न भवितव्यम् ॥ २७ ॥ ❀ ❀ विषतोयपीथान् विषमयतोयस्य पीथं पानं येषां तान् पालान् गोपांश्च कृपादृष्टिसुधावृष्ट्या जीवयिष्यतीति यमुनायां क्रीडन्नुरगं कालियमुच्चाटयिष्यदुच्चाटयिष्यति । तच्छुद्धये तस्या ह्रदिन्या निर्विषत्वाय अतिविष वीर्येण विलोलातिचंचला जिह्वा यस्य ॥ २८ ॥ ❀ ❀ दिव्यमलौकिकमिवेति लोकोक्तिः । उन्नेष्यत्युद्धरिष्यति । शुचिर्ग्रीष्मस्तत्संबंधिनि वने शुष्क इत्यर्थः । अतो दावाग्नेर्हेतोरवसितो निश्चितोऽतकालो यस्य तम् । सबलः सरामः अनधिगम्यं दुर्ज्ञेयं वीर्यं यस्य । तत्र निशि निःशयानमिति कालियदमने रात्र्यां यमुनातीरे नेत्रे पिधाप्य पिहिते कारयित्वेति मुंजाटव्यामिति ज्ञेयम् ॥ २९ ॥ ❀ ❀ उपबद्ध्यतेऽनेनेत्युपबंधं तत्साधनम् । शुल्बं दाम अमुष्य माता यशोदाऽग्रहीत् अमुष्य उदरे न माति बंधनसंमितं न भवति न पूर्येत इत्यर्थः । गोपी यशोदा संवीक्ष्य दृष्ट्वा प्रतिबोधिता निजैश्वर्यं ज्ञापितासीदिति यत् तच्च कर्म दिव्यमिति वेति सर्वत्र पूर्वेणैवान्वयः ॥ ३० ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अन्यत्प्रतापाधिक्यमाह । किञ्चेति । इत्यर्थ इति । एतेन दंतानामतिश्वैत्यं तेजोमयत्वं महत्त्वं चोक्तम् । इत्यर्थः । इत्थं व्याख्येयः । ''हासः स्याद्धास्यगर्वयोः'' इति धरणिः ॥ २५ ॥ ❀ ❀ तयोर्द्वयोः केशयोर्मध्ये बलभद्रोऽस्याश्रयत्वेन

1. प्रा० पा० काले ।

यस्य श्वेतवर्णस्य स बलभद्रः एवं कृष्णोस्याश्रयत्वेन यस्य स कृष्ण उभयत्र मत्वर्थीयोप्रत्ययः। केशौ केशवन्ताविति पूर्वार्द्धेपि व्याख्येयम्। अन्यथैतद्व्याख्यानंगीकारे। तत्रैव विष्णुपुराणे भारते चापि तथा हि विष्णुपुराणे "एवं संस्तूयमानस्तु भगवान्परमेश्वरः। उज्जहारात्मनः केशौ सितकृष्णौ महामुने॥ उवाच च सुरानेतौ मत्केशौ वसुधातले। अवतीर्य्य भुवो भारक्लेशहानिं करिष्यतः॥" इत्यस्यायं भावः। 'सुरास्समस्ताः सुरनाथ कार्यमेभिर्मया यच्च तदीश सर्वम्। आज्ञापयाज्ञाः परिपालयंतः सदैव तिष्ठाम ह्यपास्तदोषाः॥" इति सुरैरुक्तो भगवान्मम दुष्करं चेत्तदा साहाय्यं कार्यं स्यान्नत्वेवमस्ति भूभारहरणादौ कर्त्रंतरापेक्षया महत्यपि कार्य्ये मत्केशयोरपि शक्तत्वादिति। न तु केशमात्रावतार इति भ्रमितव्यम् "ततः क्षयमशेषास्ते दैतेया धरणीतले। प्रयास्यंति न संदेहो मद्दृक्पातविचूर्णिताः॥ कृष्णाष्टम्यामहं भाद्र उत्पत्स्यामि न संशयः॥" इत्यादिषु तत्रैव स्वावतारोक्तेर्विरोधात्। भारतेति "अहं ब्रह्म परं धाम" इति श्रीगीतायामर्जुनं प्रति स्वस्य स्वयमेव परब्रह्मत्वोक्तेर्विरोधात्। "कृष्णस्तु भगवान्स्वयम्" इति पूर्वोक्तिविरोधाच्च। अजरामरस्येशस्यार्द्धपलितत्वासंभवादेककेश ईशेच्छया रामस्य श्वेतरूपज्ञापनार्थं तदैव श्वेतोऽभूदिति गम्यते। एतेनैव भारतवाक्यमप्येतत्तुल्यं व्याख्यातं तथा श्रीगोपालतापिन्युपनिषद्यपि "मुनयो ह वै ब्रह्माणमूचुः कः परमो देव" इत्यादिप्रश्नेषु। "तदुहोवाच ब्राह्मणः श्रीकृष्णो वै परमं दैवतम्" इत्याद्युत्तरश्रवणाच्छ्रीकृष्णोऽवतार्येव न त्ववतारोऽन्ये नृसिंहादयोऽवतारा एव 'जयंति कृष्णस्य दशावताराः' इति मुकुटाचार्योक्तेः। यत्तु श्रीदशमे "कृष्णावतारोत्सवसंभ्रमोस्पृशत्" इति श्रीकृष्णेत्यवतारोक्तिः सा चाविर्भावपरेति ज्ञेयम्। किञ्च विष्णुनामान्युक्त्वा "वसुदेवोस्ति जनकः" इत्यनेनामरसिंहेनावैदिकेनापि श्रीकृष्णस्यैव विष्णुपदवाच्यब्रह्मत्वं ध्वनितम्। अन्यथा कश्यपो ह्यस्य जनक इत्यादि उदेत्। तथा च "सहुलाभ्यो हि यो योधः स शूरः परिकीर्तितः" इति न्यायोऽप्यत्र नानमनुसंधेयम्। किञ्चाक्षराणां कामधेनुत्वादत्रार्थांतराश्रयणे विरोधः सर्वथैव नोदयते। तथाहि—हे कलयांशेन सित वृद्ध हे कलावतार नारद कृष्णकेशः जातः सन् कर्म्माणि करिष्यतीत्यन्वयः। को ब्रह्मा तस्येशः केशः कृष्णश्चासौ केशश्चेति तथा। यद्वा। कलया रक्षया हेतुना जात इति योज्यम्। सिता बद्धाः कृष्णाः केशा येन स तथा बद्धशिखंड इत्यर्थः। यद्वा। सितो बद्धः कृष्णो यया सा सितकृष्णका यशोदा तस्या ईश ऐश्वर्यं येन स सितकृष्णकेशः कृतयशोदानंद इत्यर्थः। यद्वाऽसितशब्दोपलक्षितोऽधर्मस्तस्य श्यामरूपत्वात्तं कर्षत्याकर्षतीत्यसितकृष्णो धर्मः स एवासितकृष्णकः स्वार्थे कः तस्येशः पालकः "संरक्षणाय धर्मस्य संभवामि युगे युगे" इत्यादिपुराणात्। यद्वा। के जले लीयत इति कलया भूमिः "अप्सु प्रलीयते भूमिः" इति वक्ष्यमाणत्वात्। तस्यां सितो बद्धो भूषणे मणिरिव कलया सितो गोवर्द्धनस्तं कर्षत्युद्धरतीति कलयासितकृष्णः। के जले शेत इति केशः कलयासितकृष्णश्चासौ केशः कलयासितकृष्णकेशः गोवर्द्धनधरो विष्णुरित्यर्थः। यद्वा। कलया बलदेवेन सह सितकृष्णकेशः। यद्वा। कलयोपास्त्या सितो बद्धः कृष्णो येन स नारदसंबुद्धिः। कं मोक्षसुखं लाति ददातीति कला ब्राह्मणजातिः "भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि केवलम्" इति मुचुकुंदं प्रति श्रीकृष्णोक्तेः। तया तद्धेतोः हेतौ तृतीयाऽसितो मुक्तः सत्यभामार्पितः कृष्णो येन स चासौ केशो मदीश इति हरिवंशे प्रसिद्धम्। यद्वा। सितः शिवः कृष्णो विष्णुः को ब्रह्मा तेषामीशः। कृष्णं कायंति गायंति "जयतु तेधिकम्" इत्यादिनेति कृष्णका गोप्यस्तासामीशः कृष्णकेशः। वा। कृष्णेन कं सुखं येषां ते कृष्णकाः पांडवादिभक्तास्तेषामीशः। न सितः स्वीकृतः कृष्णो यैस्तेऽसितकृष्णा दैत्यास्तान् क्लिश्नाति विबाधते इत्यसितकृष्णकेशः। 'क्लिशू विबाधने' लस्य लोपेनौणादिकः केशशब्दः। यद्वा। सिता गंगा च कृष्णा यमुना चेति सितकृष्णे ते एव सितकृष्णके स्वार्थके पुंवद्भावः तयोरीशः सितकृष्णकेशः। सितं च कृष्णञ्च सितकृष्णे सितकृष्णे के जले ययोस्ते सितकृष्णके गंगायमुने तयोरीशः सितकृष्णकेशः। यद्वा। कलया चातुर्येण सिता बद्धाः कृष्णाया राधायाः केशा येन स तथेत्यलं पल्लवितेन। अन्यथानुपपत्तिर्विनेश्वरं तद्भवनम्। आत्ममहिमेश्वरत्वम्। संदर्भस्तु कोसौ कलयांशेन सितकृष्णकेशो यः "सितकृष्णकेशौ देवैर्दृष्टौ" इति शास्त्रांतरप्रसिद्धेः। सो (ताव) पि यस्यांशेन स एव भगवान्स्वयमित्यर्थः। तदविनाभावाच्छ्रीबलदेवस्यापि ग्रहणं द्योतितम्। ननु पुरुषादपि पुराणोऽसौ भगवान्कथं भूभारहरणमात्रार्थं स्वयमवतरिष्यतीत्याशंक्याह—आत्मनो महिमानः परममाधुरीसंपदः उपनिबध्यंते निजभक्तैरधिकं वर्ण्यंते येषु तानि कर्माणि च करिष्यति च। यद्यपि निजांशेनैव निजेच्छाभासेनैव वा भूभारहरणमीषत्करं तथापि निजचरणारविंदजीवातुवन्दमानंदयन्नेव लीलाकादंबिनीनिजमाधुरीवर्षणाय विहरिष्यमाणोऽवतरिष्यतीत्यर्थः॥ एतदेव व्यक्तीकरिष्यते "तोकेन जीवहरणम्" इत्यादौ इतरथा स्वमाधुरीसंपत्प्रकाशनेच्छामंतरेण मधुरतरं लोकादिभावं दधताऽनेन पूतनादीनां जीवहरणादिकं कर्म न भाव्यं न संभवनीयं तदंशतदिच्छाभासादिमात्रेणैव तत्सिद्धेरिति वाक्यार्थः। तथा च "यथायं चावतारस्ते भूभार"—इत्यादौ स्वामिचरणैरपि व्याख्यातम्। किं भूभारहरणं मदिच्छामात्रेण न संभवति तत्राह स्वानामिति। "जयति जननिवासः" इत्यत्र च इच्छामात्रेण निरसने समर्थोपि क्रीडार्थे 'दोर्भिरस्यन्नधर्मम्' इति। एवमादिभिः श्रीकृष्णस्यैव सर्वाद्भुततावर्णनाभिनिवेशः प्रपंचो ब्रह्मणि स्पष्ट एव। अस्तु तावत्तद्भूरिभाग्यमित्यादि सितकृष्णकेश इत्यत्र तात्पर्यं श्रीस्वामिभिरेव विवृतम्। इदमप्यत्र तात्पर्यं संभवति। ननु देवाः किमर्थं मामेवावतारयितुं भवद्भिरागृह्यते अनिरुद्धाख्यपुरुषप्रकाशविशेषस्य क्षीरोदश्वेतद्वीपधाम्नो मम यौ केशाविव शिरोधार्यभूतौ श्रीवासुदेवसंकर्षणौ स्वयमेवावतरिष्यतः ततश्च भूभारहरणं ताभ्यामीषत्करमेवेति "अथोज्जहारात्मनः केशौ" इत्यस्यैव

शब्दार्थोपि मुक्ताफलटीकायां केशौ सुखस्वामिनौ सितो रामः आत्मनः सकाशादुज्जहारोद्धृतवानित्यादि यैर्यथाश्रुतमेवेदं व्याख्यातं ते तु न सम्यक्परामृष्टवंतः यतः सुरमात्रस्यापि निर्जरत्वं प्रसिद्धम्। अकालकलिते भगवति जरानुदयने केशशौक्ल्यानुपपत्तिर्न चास्य केशस्य नैसर्गिकसितकृष्णतेति प्रमाणमस्ति अत एव नृसिंहपुराणे श्रीकृष्णावतारप्रसंगे शब्द एव युज्यते न तु केशशब्दः "वसुदेवस्य देवक्यामवतीर्य यदोः कुले। सितकृष्णे च मच्छक्ती कंसाद्यान्घातयिष्यतः" इत्यादि। अस्तु तर्हि अंशोपलक्षणः केशशब्दः न अविप्लुततर्कशक्तित्वेन साक्षादादिपुरुषस्यैव निश्चेतुं शक्यत्वात्। कृष्णविष्ण्वादिशब्दानामविशेषतः पर्यायप्रतीतेः। नैवमवतारांतरस्य जन्मदिनं जयत्याख्ययाऽतिप्रसिद्धम्। अत एवं महाभारते "भगवान्वासुदेवश्च कीर्त्यतेऽत्र सनातनः। शाश्वतं ब्रह्म परमं योगिध्येयं निरंजनम् इति। तस्याकालकलितत्वं "योयं कालस्तस्य ते व्यक्तबंधो चेष्टामाहुः" इत्यादौ द्वारकावासिवाक्ये च प्रसिद्धं तस्मान्न केशावतारत्वेपि न तात्पर्यं, वैष्णवादिपद्यानां शब्दानामर्थं त्वेवं पश्यामः। "अंशवो ये प्रकाशंते मम ते केशसंज्ञिताः। सर्वज्ञाः केशवं तस्मान्मामाहुर्मुनिसत्तम॥" इति सहस्रनामभाष्यस्थापितभारतवचनात्केशशब्दे नांशुरुच्यते तत्र च सर्वत्र च। केशेतरशब्दाप्रयोगान्नानावर्णांशूनां श्रीनारददृष्टतया मोक्षधर्मप्रसिद्धेश्च। तथाचांशुत्वे लब्धे तौ चांशू वासुदेवसंकर्षणावतारसूचकतया निर्दिष्टाविति तयोरेतौ स्यातामिति गम्यते। तदीययोरपि तयोरनिरुद्धरूपत्वेऽभिव्यक्तिश्च युज्यत एव। अवतारितेजोंतर्भूतत्वादवतारस्य ततश्चोज्जहारेत्यस्यायमर्थः आत्मनः सकाशात्। श्रीवासुदेवसकर्षणांशभूतौ केशावंशू उज्जहारोद्धृतवान्प्रकटीकृत्य दर्शितवानित्यर्थः। अत्रायं सुमेरुरित्येकदेशदर्शनेनैवाखंडसुमेरुनिर्देशवत्तद्दर्शनेनापि पूर्णस्यैवाविर्भावनिर्देशो ज्ञेयः। अथ स चापिकेशावित्यादिकव्याख्या उद्धवर्हयोगबलेनात्मनः सकाशाद्विच्छिद्य दर्शयामास। स चापीति चशब्दः पूर्वमुक्तं देवकर्तृकं निवेदनरूपमर्थं समुपक्षिणोति। अतिशब्दस्तदुद्धरणे श्रीभगवत्संकर्षणयोरपि हेतुकर्तृत्वं सूचयति। तौ चापीति। चशब्दोऽनुक्तसमुच्चयार्थत्वेन भगवत्संकर्षणौ स्वयमेव विविशतुः पश्चात्तौ तत्तादात्म्येनापि विविशतुरिति बोधयति। अपिशब्दो यत्रानुस्यूतौ चामू सोपि तदंशेपीति गमयति। 'तयोरेको बलभद्रो बभूव' इत्यादिकं तु "नरो नारायणो भवेत्, हरिरेव भवेन्नरः" इत्यादिवत्तदैक्यावाप्त्यपेक्षया। केशवः केशवनाम्ना श्रीमथुरायां केशवस्थानाख्यमहायोगपीठाधिपत्वेन प्रसिद्धः स एव कृष्ण इति। नृसिंहपुराणे तु "सितकृष्णे च मच्छक्ती" इति तद्वर्णनिर्देशेनांशवाचक एव शक्तिशब्द इति। चक्रवर्ती तु "स तं वयसि कैशोरे" इत्याद्युक्तेर्नित्यकैशोरावस्थावतः सितकेशत्वं न युज्यते। विष्णुपुराणीयवाक्यस्थकेशाविति पदस्य तु केशौ सुखरूपावीश्वरौ सितकृष्णौ उज्जहार बहुस्तुतिभिः प्रसाद्य बहिरभ्युद्गमयामास हे महामुने इति। मननेनैवास्यार्थस्यावगम्यतेति भावः। "सुखशीर्षजलेषु कम्" इति नानार्थवर्गात्। सर्वत्र विष्णुपुराणादौ केशशब्दप्रयोगस्तु "परोक्षवादा ऋषयः परोक्षं मम च प्रियम्" इति भगवत्संमतौ स्थितानां शास्त्राकाराणामृषीणां तत्तद्वचनमाकूतमेवेति ज्ञापनार्थ एव। यद्वा। सितो रुद्रः कृष्णो विष्णुः को ब्रह्मा तेषामपीशः "स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या" इत्युक्तेः आत्मनः स्वस्य महिम्नि उपाधिक्येन नितरां बंधनं येभ्यस्तानि यत्कर्माणि सर्वलोकमनांसि माधुर्येण बध्नन्तीत्यर्थः। यद्वात्मनो महिमा महैश्वर्यं तस्याप्युपाधिक्येन निर्बंधनमावृतीकरणं येषु तानि यत्कर्मसु माधुर्येणावृतमेव'महैश्वर्यं तिष्ठतीत्यर्थः। यद्वा। कलया नैपुण्येन। सिता बद्धाः कृष्णाः श्यामा केशा येन स तथा। यद्वा। कलया वेदरक्षया हेतुना सितेन बलदेवेन सह कृष्णः केशः सुखरूप ईशः माधुर्यैश्वर्यमयः इति व्याचकार॥ २६॥ ❀ ❀

एतदेव प्रपंचयति उलूकिकायाः पूतनाया यज्जीवहरणं तोकेनैव बालकेनैव रूपेण न त्वतिविकटाकाराया अतिविस्तृतस्वरूपाया अतिबलिष्ठायास्तस्या वधोपयोगिनी तादृशैश्वर्यमयी वामनावतारस्य त्रिविक्रममूर्त्तिरिव काचिन्मूर्त्तिराविष्कृतेति भावः। त्रैमासिकस्यैव पदातिसुकोमलेत्यर्थः। यत् अपवृत्तः विपर्यस्ततया पातितः न तु हिरण्यकशिपुविदारणार्था नृसिंहमूर्त्तिरिव काचित्पदस्य विकटकठोरताविष्कृतेति भावः। रिंगता जानुभ्यां गच्छतैवांतरं तेन तयोर्मध्यंगतेनैवोलूखलनिबंधनेनैवार्जुनयोर्द्व योर्यदुन्मूलनं न तु पृथिव्युद्धरणोपयोगिना वराहरूपेणैव कोपि प्रयत्नः कृत इति भावः। तत्सर्वमात्ममहिमोपनिबंधनमेव। निजबाल्यमहामाधुर्येण स्वमहैश्वर्यस्यावृतीकरणमेवेति पूर्वेणानुषंगः। इतरथा न भाव्यमन्यथा न भाव्यमेतत्त्रिकेणेदृशेन भवितव्यं नाभविष्यतेत्यर्थं इति विश्वनाथः। "तोकोल्पांगे शिशौ सुते" इत्यभिधानात्। (शरीरोत्थानादिप्रवृत्तिहेतुत्वादयः प्राणस्ताँल्लुंपतीत्युलूपिका तस्या इति तीर्थः।) उलूकिकात्वमत्र बक्या अपि यस्या अरिष्टकर्तृत्वसाधारण्यात् "अहो बकीयम्" इत्याद्युक्तेस्तस्या बकीत्वं प्रसिद्धमेव। जानुघर्षणपूर्वकं गमनं रिंगणं, दिविस्पृशोः सहस्रधनुषोप्यूर्द्ध्वदेशं स्पृशतोः सहस्रधनुषस्तूर्ध्वं द्युशब्देनापि भण्यत इति तीर्थः। त्रयो मासा वयोलक्षणा निर्वृता यस्य स त्रैमासिकस्तस्य॥ २७॥ ❀ ❀ विषेण सहितं तोयं विषतोयं तदेव पीथं येषां ते विषतोयपीथास्तांस्तथा यद्व्रजपश्वादीनजीवयत्तदितरथा न भाव्यमिति योज्यम्॥ २८॥ ❀ ❀ इत्यर्थ इति। ग्रीष्मर्तौ हि स्वभावत एव सूर्यतापेन सार्द्रमपि निरार्द्रं भवतीति भावः दावाग्नितो रक्षणं श्रीकृष्णेन द्विः कृतं तत्र द्वयोर्मध्ये मुञ्जाटव्यां तु दिवैव रक्षणं कृतमिति। इवोत्रेवार्थे बोध्यः लोकोक्तिरेव न शास्त्रोक्तिः। शास्त्रं तु "जन्म कर्म च मे दिव्यम्" इत्याह॥ २९॥ ❀ ❀ इत्यर्थ इति। व्यापकस्य व्याप्येन बंधनं न भवतीति भावः। "शुल्बं स्याद्दामतान्त्रयोः" इत्यभिधानात्॥ ३०॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

कृष्णस्त्विति प्रथमस्कन्धीयतृतीयाध्यायस्य २८ श्लोकैकदेशः ॥ २६—२८ ॥

मुञ्जेति । मुञ्जाटव्याम् ईषिकाटव्यां दशमस्कन्धीयोनविंशाध्यायोक्तायामिति यावत् ॥ २९—३२ ॥

### श्रीमद्वीरराघवव्याख्या

किंच युद्धे रावणस्य वक्षस्थलस्पर्शेन रुग्णाः भग्ना ये महेन्द्रवाहस्यैरावतस्य दंतास्तैर्विडंबिताः स्वधवलिम्ना धवलीकृताः तत्तद्दिक्षु पतितैः वक्षश्चूर्णितसुरगजदंतचूर्णैः प्रकाशिता इत्यर्थः । एवंभूता याः ककुभः दिशस्तासां यो जयस्तेन रूढः उत्पन्नः यो हासः अहो मत्समः कोऽन्योऽस्ती ति गर्वेण प्राप्तहासस्तं सैन्यमध्ये उत्कर्षेण चरतो दारहर्तू रावणस्यासुभिः प्राणैः सह सद्यः शीघ्रं विनेष्यति वपनेष्यति कैर्धनुषो विस्फूर्जितैर्विशेषेण स्फूर्ज्जितैः स्फुरितैः शरैरित्यर्थः ॥ २५ ॥ ❀ ❀ कृष्णावतारमाह भूमेरिति । सुरेतरा आसुरसंपत्त्या जाता राजानस्तेषां वरूथैः सैन्यैर्विमर्दिताया भारेण पीडिताया भूमेः क्लेशव्ययाय भरापहारायेत्यर्थः । सितकृष्णकेशः भगवान् कलया बलभद्रेण साकं जातः अवतीर्णः सितकृष्णौ केशौ यस्य सः शोभार्थं हि भगवता सितकृष्णकेशौ धृतौ अविकारित्वेन वयःपरिणामासंभवात् यत्तु विष्णुपुराणे उज्जहारात्मनः केशौ सितकृष्णौ तथा मुने इति भारतेऽपि स चापि केशौ हरिरुच्चजहे शुक्लं चैकमपरं चापि कृष्णं तौ चापि केशौ विशतां यदूनां कुले स्त्रियौ रोहिणीं देवकीं च तयोरेको बलभद्रो बभूव योऽसौ श्वेतस्तस्य देवस्य केशः कृष्णो द्वितीयः केशवः संबभूव केशो योऽसौ वर्णतः कृष्ण उक्तः इति । तत्तु न केशवमात्रावताराभिप्रायं किंतु भूभारावतारूपं कार्यं कियदेतन्मत्केशावपि कर्तुं शक्ताविति द्योतनार्थं रामकेशवयोर्वर्णस्तवनार्थं च केशोद्धरणमिति गम्यतेऽन्यथा तत्रैव पूर्वापरविरोधापत्तेः कृष्णस्तु भगवान्स्वयमित्येतद्विरोधाच्च जातश्च भगवान् जनैरनुपलक्ष्यः मार्गो गतिर्यस्य सः तथाभूतः आत्मनः स्वस्य महिमा उपनिबध्यते ऽभिव्यज्यते येषु तानि स्वमाहात्म्यप्रकाशकानीत्यर्थः । कार्याणि चेष्टितानि करिष्यत इति ॥२६॥ ❀ ❀ कर्मणां परमेश्वरत्वप्रकाशकत्वमेव प्रपञ्चयति नवभिः । तोकेनेत्यादिना तोकेन बालेन सता उलूकिकायाः पूतनायाः जीवहरणं यत् पूतना उलूकरूपेणागतेति पुराणांतरप्रसिद्धिः त्रैमासिकस्य त्रिमासवयस्कस्य पदा पादेन शकटरूपेणागतस्यासुरस्य उपवृत्तिः विपरिवर्त्तनं यत् रिङ्गता उलूखलमाकर्षता दिविस्पृशोरत्युच्चयोः अर्जुनयोः अर्जुनाख्यवृक्षयोः अन्तरगतेन मध्यंप्राप्तेन तयोरुन्मूलनमुत्पाटनं तत् तदितरथा न भाव्यं न भवितव्यमनीश्वरत्वे तत्सर्वमनुपपन्नमित्यर्थः ॥ २७ ॥ ❀ ❀ किंच व्रजे वसन् विषतोयपीतान् विषजलस्य पीतं पानं येषां तान् व्रजपशून्पाँलाश्चानुग्रहदृष्टिः कृपादृष्टिः तस्या दृष्टयाः सुधावर्षेणाजीवयदिति यत् ह्रदिन्यां यमुनायां विहरन् तच्छुद्धये ह्रदिन्यानिर्विषयत्वायाति विषवीर्येण विलोला चंचला जिह्वा यस्य तं उरगं कालियाख्यं सर्पमुच्चाटयिष्यत् पलाययिष्यदिति यत् ॥ २८ ॥ ❀ ❀ तदपि कर्म दिव्यमिवामानुषमिवेति लौकिकोक्तिः किंच दावाग्निना शुचिवने शुष्कवने परिदह्यमाने सति अतो दावाग्नेर्हेतोरवसितो निश्चितोऽतकालो यस्य तं निशि रात्रौ निःशयानं नितरां स्वपंतं व्रजं नेत्रे पिधाय्य पिहिते कारयित्वा अनेन व्रजस्य पश्चाज्जागरणं सूचितं बलभद्रेण सहितः अनधिगम्यवीर्यः अनधिगम्यं दुर्विज्ञेयं वीर्यं यस्य तथाभूतः अग्निं पीत्वा व्रजमुद्धरिष्यतीत्यर्थः ॥ २९ ॥ ❀ ❀ किंच गृहीतेति अमुष्य श्रीकृष्णस्य माता यशोदा यद्यदुपबंधं बंधनसाधनं शुल्वं मुंजादिनिर्मितरज्जुं गृह्णीत ग्रहीष्यति तत्तछुल्बममुष्य श्रीकृष्णस्योदरे न माति न व्याप्नोति न पर्याप्तमित्यर्थः । किंच जृंभतोऽस्य भगवतो वदने मुखे भुवनानि चतुर्दशभुवनानि संवीक्ष्य दृष्ट्वा गोपी यशोदा शंकितमना किमिदमिति शंकितचित्ता सती पश्चात्प्रतिबोधिता ज्ञापितैश्वर्याऽऽसीदिति यत्तच्च कर्म दिव्यं इवेति पूर्वेणान्वयः ॥ ३० ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

वक्षस्थलस्पर्शेन रुग्णा भग्ना महेंद्रवाहस्यैरावतस्य दंता वक्षस्थलस्पर्शरुग्णमहेंद्रवाहदंतास्तैर्विलंबितः ककुभां जयः विलंबितककुब्जयस्तेन रूढः उत्पन्नो हासोऽट्टहासो यस्य स तथा सैन्येन सहितो रावणस्तस्य दारहर्तुः दारान् सीतामाहर्तुकामस्य रामस्य धनुष उच्चरितैर्निर्गतैःविस्फूर्जितैरसुभिः सह विनेष्यति विनयं मदविनाशमेष्यति पुनः सद्यस्तत्क्षण एव राममुक्तैः शरैर्विनेष्यति विनाशं प्राप्नोतीत्यन्वयः । धनुर्विस्फूर्जितैर्नष्टो रावणः पूर्वमेव तु पुनः शरैराममुक्तैः सानुबंधो विनेष्यतीत्यनेन धनुर्विस्फूर्जितैर्विनाशः कथमभूदितीयमाशंका निरस्तेति । ससैन्य इत्यस्य विवरणं सानुबंध इति ॥ २५ ॥ ❀ ❀ कृष्णावतारमनन्यसाध्यं तत्कर्म च संगृह्य कथयति भूमेरित्यादिश्लोकदशकेन स हरिः सितकृष्णकेश इति नाम कलया जातः कर्मणि करिष्यतीत्यन्वयः । कर्मणा तत्त्वज्ञानं कस्मान्नोदेत्यत उक्तं जनेति । प्राकृताज्ञेयमार्गत्वादित्यर्थः । अवतारप्रयोजनमाह सुरेतरेषामसुराणां वरूथेन समूहेन सेनया वा विमर्दितायाः पीडिताया भूमेः क्लेशव्ययायेति । कीदृशानि कर्माणि आत्ममहिमोपनिबंधनानि स्वमहिमनिमित्तानि पूतनावधादीनि हरेः कर्माणि परकर्मनिबंधनानि न भवंति अन्येषां कर्माणि तन्महिमनिबंधनानीति चार्थः । तदुक्तं विष्णोर्नान्येन कर्माणि परेषां तन्निबंधनमिति अत्रानंतांशे रौहिणेये रामे शुक्लकेशात्मकरामाभिधानेन हरिस्तिष्ठन् जगद्रक्षयतीत्येतद्राम एको ह्यनंतांशस्तत्र

रामाभिधो हरिरित्यादिनोक्तम् अतएव ग्राह्यमिति भावः ॥ २६ ॥ ❀ ❀ तोकेनेत्यणुना बालेनानिर्देशेनेत्यर्थः । शरीरोत्थानादिप्रवृत्तिहेतुत्वाज्जीवः प्राणास्तान्लुंपतीत्युलूपिका तस्याः स्तनपानेन जीवहरणं यत्कर्म त्रैमासिकस्य त्रयोमासा वयोलक्षणा निवृत्ता यस्य स तथा तस्य कृष्णस्योत्क्षिप्तेन पादेन शकटोऽपवृत्तः व्यत्यस्याक्षेण शकटेन शकटाख्यो हत इति । यच्च उलूखलबद्धेन रिंगता क्रीडतांतरगतेन मध्यगतेन बालेन दिविस्पृशोः सहस्रधनुमात्रोर्ध्वदेशं स्पृशतोः तावदुच्छ्रययोरित्यर्थः । यमलार्जुनयोर्वृक्षयोरुन्मूलनं च यत्सर्वं कर्म इतरथा विष्णुर्न चेत्स्वमहिमोपनिबंधनत्वेन सहस्रधनुषस्तूर्ध्वं द्युशब्देनापि भण्यत इति च ॥ २७ ॥ ❀ ❀ विषतोयपीतान् विषमिश्रजलं पीतवतः जीवयत् अजीवयत् अनुग्रहलक्षणदृष्टिवृष्ट्या तच्छुद्धये यमुनाह्रदजलशुद्धये ह्रदिन्यां यमुनानद्यां विहरन् कालीयनागमुच्चाटयिष्यन् उच्चाटितं करिष्यति च विषजले विहरणं दुर्गस्थानह्रदादुच्चाटनं च नान्यसाध्यं तदनेन कृतमितरथा भाव्यमित्यर्थः ॥ २८ ॥ ❀ ❀ आशु आशुना विष्वग्व्यापिना दावाग्निना विपिने दंदह्यमाने सति निशि सर्वात्मज्ञाने यत्तु सर्वात्मनाज्ञानं निशा सा परिकीर्तितेति वचनात् निःशयाना नितरां शयानं कर्त्तव्यमूढं तर्हि अचेतनं किं नेत्याह अवसितांतकालं निश्चितमरणकालं व्रजं तेषां नेत्रे पिधाय्य पिहिते कारयित्वा इतो दावाग्नेरुष्यतीति यत्कर्म तदन्येषां दिव्यमेव स्तुत्यमेव । कुत इति तत्राह अनधिगम्येति । नित्यसमाहितैर्ब्रह्मादिभिरप्यविज्ञेयमाहात्म्यत्वादित्यर्थः । सबल इत्यनेन बलस्याप्येतादृशी शक्तिर्नास्तीति लक्ष्यते ॥ २९ ॥ ❀ ❀ अमुष्य कृष्णस्य मातासुतमुपबद्धुं यच्छुल्वं दाम गृह्णीत गृह्णाति तत्तु दामामुष्य सुतस्य न माति न पूर्यते इत्यमेयलक्षणं माहात्म्यं यद्गोपीप्रतिबोधितस्य निद्राया उत्थितस्य जृंभतो मुखं व्यादायालस्यं परिहरतोऽस्य कृष्णस्य वदने चतुर्दशभुवनानि सम्यग्वीक्ष्य शंकितमना भीतमना अभवदिति यच्च तदपि ॥ ३० ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या ।

भूमेरिति । सुरेतरा असुरभावया ये राजानः तेषां वरूथैः सैन्यैः निपीडिताया भुवः क्लेशमपहर्त्तुं परमात्मनोऽपि परत्वात् जनैरस्मदादिभिरनुपलक्ष्यमार्गोपि प्रादुर्भूतः सन् कर्म्माणि च करिष्यति । कोऽसौ कलया अंशेन सितकृष्णकेशो यः, यत्र सितकृष्णकेशौ देवैर्दृष्टाविति शास्त्रान्तरप्रसिद्धिः, सोऽपि यस्यांशेन स एव भगवान् स्वयमित्यर्थः । तदविनाभावित्वात् श्रीबलदेवस्यापि ग्रहणं द्योतितम् । ननु पुरुषादपि परोऽसौ भगवान् कथं भूभारावतारणमात्रार्थं स्वयमवतरिष्यतीत्याशङ्क्याह । आत्मनो महिमानः परममाधुरीसम्पदः उपनिबध्यन्ते निजभक्तैरधिकं वर्ण्यन्ते येषु तानि कर्माणि च करिष्यति । यद्यपि निजांशेनैव वा निजेच्छाभासेनैव वा भूभारहरणमीषत्करं तथापि निजचरणारविंदजीवातुवृन्दमानन्दयन्नेव लीलाकादम्बिनीर्निजमाधुरीवर्षणाय वितरिष्यमाणोऽवतरिष्यतीत्यर्थः । ( विष्णुपुराणादिवचनं तु तत्र पूर्व्वमेव व्याख्यातमस्ति ) ॥ २६ ॥ ❀ ❀ एतदेव व्यक्तीकृतं तोकेन जीवहरणमित्यादौ । इतरथा स्वमाधुरीसम्पत्प्रकाशनेच्छामन्तरेण मधुरतरं लोकादिभावं दधता तेन पूतनादीनां जीवहरणादिकं कर्म्म न भाव्यं न सम्भावनीयम् । तदंशतदिच्छाभासादिमात्रेणैव तत्सिद्धेरिति वाक्यार्थः । तथाच तथायञ्चावतारस्ते भुवो भारेत्यादौ तैरेव व्याख्यातम्—किं भूभारहरणं मदिच्छामात्रेण न भवति तत्राह, स्वानामितीति । जयति जननिवास इत्यत्र च—इच्छामात्रेण निरसनसमर्थोऽपि कीडार्थं दोर्भिरेवाधर्म्मम् अस्यन्निति । तदेवमादिभिः श्रीकृष्णस्यैवसर्व्वाद्भुततावर्णनाभिनिवेशप्रपञ्चो ब्रह्मणि स्पष्ट एव । अस्तु तावत् तद्भूरिभाग्यमिहजन्म किमप्यटव्याम् इत्यादि । ( सितकृष्णकेश इत्यत्र तात्पर्य्यं श्रीस्वामिभिरेव विवृतम् । इदमप्यत्र तात्पर्य्यं सम्भवति । ननु देवाः किमर्थं मामेवावतारयितुं भवद्भिराग्रह्यते । अनिरुद्धाख्यपुरुषप्रकाशविशेषस्य क्षीरोदश्वेतद्वीपधाम्नो मम यौ केशाविव स्वशिरोधार्य्यभूतौ तावेव श्रीवासुदेवसङ्कर्षणौ स्वयमेवावतरिष्यतः । ततश्च भूभारहरणं ताभ्यामीषत्करमेवेति । अथ उज्जहारात्मनः केशावित्यस्यैवशब्दार्थोऽपि मुक्ताफलटीकायाम्—केशौ सुखस्वामिनौ । सितो रामः । आत्मनः सकाशात् उज्जहार उद्धृतवानित्यादि । यैस्तु यथाश्रुतमेवेदं व्याख्यातं ते न सम्यक् परामृष्टवन्तः । यतः सुरमात्रस्यापि निर्ज्जरत्वप्रसिद्धिः, अकालकलिते भगवति जरानुदयेन केशशौक्ल्यानुपपत्तिः । न चास्य केशस्य नैसर्गिकसितकृष्णतेति प्रमाणमस्ति । अतएव नृसिंहपुराणे श्रीकृष्णावतारप्रसङ्गे शक्तिशब्द एव प्रयुज्यते, न तु केशशब्दः । तथाहि—वसुदेवाच्च देवक्यामवतीर्य्य यदोः कुले । सितकृष्णे च मच्छक्ती कंसाद्यान् घातयिष्यत इत्यादिना । अस्तु तर्हि अंशोपलक्षणः केशशब्दः, न, अविप्लुतसर्व्वशक्तित्वेन साक्षादादिपुरुषत्वस्यैव निश्चेतुं शक्यत्वात् । कृष्णविष्ण्वादिशब्दानामविशेषतः पर्य्यायप्रतीतेः । नैवमवतारान्तरस्य कस्य वाऽन्यस्य जन्मदिनं जयन्त्याख्ययाऽतिप्रसिद्धम् अतएवोक्तम् भारते—भगवान् वासुदेवश्च कीर्त्त्यतेऽत्र सनातनः । शाश्वतं ब्रह्म परमं योगिध्येयं निरञ्जनम् इतीति । तस्याऽकालकलितत्वम्—योऽयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुरित्यादौ श्रीदेवकीदेवीवाक्ये, नताः स्म ते नाथ सदाङ्घ्रिपंकजं विरिञ्चवैरिञ्च्यसुरेन्द्रवन्दितम् । परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत् परप्रभुः ॥ इत्यादौ श्रीद्वारकावासिवाक्ये च प्रसिद्धम् । तस्मान्न केशावतारत्वेऽपि तात्पर्य्यम् । अतो वैष्णवादिपद्यानां शब्दोत्थमर्थमेवं पश्यामः—अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः । सर्वज्ञाः केशवं तस्मान्मामाहुर्मुनिसत्तमेति । सहस्रनामभाष्योत्थापितभारतवचनात् केशशब्देनांशुरुच्यते । तत्र च सर्व्वत्र केशेतरशब्दाप्रयोगात् नानावर्णांशूनां श्रीनारददृष्टतया मोक्षधर्म्मप्रसिद्धेश्च तथा चांशुत्वे लब्धे तौ चांशू वासुदेवसंकर्षणावतारसूचकतया

निर्दिष्टाविति तयोरेव स्यातामिति गम्यते । तदीययोरपि तयोरनिरुद्धेऽभिव्यक्तिश्च युज्यत एव, अवतारितेजोऽन्तर्भूतत्वात् अवतारस्य । ततश्चोज्जहारेत्यस्यायमर्थः—आत्मनः सकाशात् श्रीवासुदेवसंकर्षणांशभूतौ केशावंशू उज्जहार उद्धृतवान् , प्रकटीकृत्य दर्शितवानित्यर्थः ॥ अत्रायं सुमेरुरित्येकदेशदर्शनेनैवाखण्डसुमेरुनिर्देशवत् तदंशांशुदर्शनेनैव पूर्णस्यैवाविर्भावनिर्देशो ज्ञेयः । अथ स चापि केशावित्यादिकव्याख्या—उद्ववर्हे योगबलेनात्मनः सकाशाद्विच्छिद्य दर्शयामास ॥ स चापीति चशब्दः पूर्व्वमुक्तं देवकर्त्तृकं निवेदनरूपमथ समुच्चिनोति । अपिशब्दस्तदुद्वर्हणे श्रीभगवत्संकर्षणयोरपि हेतुकर्तृकत्वं सूचयति ॥ तौ चापीति । चशब्दोऽनुक्तसमुच्चयार्थत्वेन भगवत्संकर्षणौ स्वयमाविविशतुः पश्चात्तौ च तत्तादात्म्येनाविविशतुरिति बोधयति ॥ अपिशब्दो यत्रानुस्यूतावम् सोऽपि तदंशा अपीति गमयति । तयोरेको बलभद्रो बभूवेत्यादिकन्तु नरो नारायणो भवेत् हरिरेव भवेन्नर इत्यादिवत् तदैक्याव्याप्त्यपेक्षया ॥ केशवः श्रीमथुरायां केशवस्थानाख्यमहायोगपीठाधिपत्वेन प्रसिद्धः स एव कृष्ण इति ॥ श्रीनृसिंहपुराणे तु सितकृष्णे च मच्छक्ती इति तद्वर्णनिर्देशेनांशुवाचक एव शक्तिशब्द इति ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

किंच युद्धे रावणस्य वक्षःस्थलस्पर्शेन रुग्णा भग्ना ये महेन्द्रवाहस्य ऐरावतस्य दन्ताः तैर्विडम्बिताः स्वधवलिम्ना धवलीकृताः, तत्तद्दिक्षु पतितैस्तैः प्रकाशिता इत्यर्थः, या एवम्भूताः ककुभो दिशस्ता जुषते सेवते पालयतीति तथा तस्य, दारहर्त्तुः रावणस्य ऊढं प्राप्तं हासम् अहो मत्समः कोऽप्यन्यो नास्तीति गर्वम् असुभिः प्राणैः सह सद्यो विनेष्यति अपनेष्यति । कैर्धनुषो विस्फूर्जितैः टङ्कारघोषैरेव । कथम्भूतस्य तस्य अधिसैन्ये स्वपरसैन्यमध्ये उत्कर्षेण चरतः । ककुब्जयरूढहासमिति पाठे तथाभूतानां ककुभां जयेन रूढं गर्व्वम् ॥ २५ ॥ ❀ ❀ श्रीकृष्णावतारमाह, भूमेरिति दशभिः । सुरेतरा असुरस्वरूपा ये राजानस्तेषां वरूथैः सैन्यैर्विमर्दितायाः भुवः पृथिव्याः क्लेशव्ययाय भारापनोदनाय भूतलस्थानां संसारदुःखक्षयाय च तत्रैव केषाञ्चित् सोत्कण्ठभक्तानां स्वायोगदुःखोपशमाय च जातः कर्म्माणि करिष्यति । ननु कोऽसौ जातस्तत्राह जनैरस्मदादिभिरप्यनुपलक्ष्य उपलक्ष्यितुमशक्यो मार्गो वर्त्मापि यस्य सः । नन्वविदिततत्त्वोऽपि पदार्थो लोके स्वबुद्ध्यनुसारेण नामरूपे कल्पयित्वा अयमयमिति निश्चीयते, यथा कौस्तुभोऽपि पद्मराग एवायमिति पद्मरागोऽपि प्रवालमणिरेवायमिति, तथाऽयमवतारोऽविज्ञातस्वरूपोऽपि पुराणादिषु कीदृशतया पठ्यत इत्यत आह कलयेति । सितकृष्णौ केशौ यस्य स एवातिपुरातनः पुरुषः यस्य कलया जात इति । यत्तु विष्णुपुराणे—उज्जहारात्मनः केशौ सितकृष्णौ महामुने इति यच्च भारते—स चापि केशौ हरिरुच्चकर्त्त एकं शुक्लमपरञ्चापि कृष्णम् । तौ चापि केशावाविशेतां यदूनां कुले स्त्रियौ रोहिणीं देवकीञ्च ॥ तयोरेको बलभद्रो बभूव श्वेतस्य देवस्य केशः । कृष्णो द्वितीयः केशवः सम्बभूव केशो योऽसौ वर्णतः कृष्ण उक्तः ॥ इति तत्र प्रकटेऽर्थे विचार्य्यमाणे बाधैव लभ्यते, न तु कापि सङ्गतिः । तथाहि त्रिगुणातीतस्याविकारिणः चिदानन्दघनवपुषो नारायणस्यापि वयः परिणामकृतं शुक्लकृष्णकेशत्वम् , अथच सन्तं वयसि कैशोरे इति नित्यकिशोरत्वञ्च, तथा कृष्णस्तु भगवान् स्वयमिति कृष्णावतारस्य स्वयं भगवत्त्वं चेति, अतस्तत्र विद्वांसो व्याचक्षते यथा—सितकृष्णकेशत्वं शोभैव, न तु वयःपरिणामकृतं, भारावतारणरूपं कार्य्यं कियदेतत् मत्केशावेव कर्त्तुं समर्थाविति द्योतनार्थं रामकृष्णयोर्वर्णसूचनार्थञ्च केशोद्धरणमिति गम्यते । अन्यथा तत्रैव विरोधापत्तेः कृष्णस्तु भगवान् स्वयमित्येतद्विरोधाच्च । कलया रामेण सह स्वयं सितकृष्णकेशो भगवानेव जात इति स्वामिचरणाः । कलया शिल्पनैपुण्यविशेषविधिना सिताः बद्धाः कृष्णा अतिश्यामाः केशा येनेति विग्रहः । स एवेत्यस्य वैदग्धीविशेषात् कृष्ण ईरितः ॥ किंवा यः कलयांशेन स्यात् सितश्यामकेशकः । इति भगवतामृते श्रीरूपगोस्वामिचरणाः । अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिता इति स्मृतेर्मच्छिरोधार्य्यौ सितकृष्णकिरणौ द्वौ प्रभू अवतरिष्यत इति सूचनार्थं केशद्वयोद्धरणमिति सन्दर्भे श्रीजीवगोस्वामिचरणाः । किञ्चात्र विष्णुपुराणे भारते च सर्व्वत्र केशशब्दस्यैव प्रयोगात् । चिकुरकुन्तलाद्यप्रयोगात् , परोक्षवादा ऋषयः परोक्षञ्च मम प्रियमिति भगवत्सम्मतौ स्थितानां शास्त्राणामृषीणां साकूतमेव तत्तद्वचनमिति गम्यते । तत्र उज्जहारेति ॥ आत्मनः स्वान्तःकरणात् सकाशात् केशौ सुखरूपावीश्वरौ सितकृष्णौ उज्जहार बहुस्तुतिभिः प्रसाद्य बहिरपि उद्गमयामास । हे महामुने मननेनैवास्यार्थोऽवगम्यतामिति भावः । सुखशीर्षजलेषु कमिति नानार्थवर्गात् । एवमेव भारतीयं पद्यद्वयमपि व्याख्येयम् । तथैव कलया एकांशेन भुवः क्लेशव्ययाय सितेन सह कृष्णः केशः सुखरूपः ईशः माधुर्य्यैश्वर्य्यमयः, बलदेवेन सह कृष्णो जात इत्यर्थः । श्लेषेण सितो रुद्रः कृष्णो विष्णुः को ब्रह्मा तेषामपीश्वरः । स यावदुर्व्व्या भरमीश्वरेश्वर इत्यग्रिमोक्तेः । कर्म्माणि कीदृशानि आत्मनो महिमा महैश्वर्य्यं तस्यापि उप आधिक्येन निबन्धनम् आवृतीकरणं येषु तानि, यत्कर्म्मसु माधुर्य्येणावृतमेव महैश्वर्य्यं तिष्ठतीत्यर्थः । यद्वा आत्मनः स्वस्य महिम्नि उप आधिक्येन नितरां बन्धनं येभ्यस्तानि, यत्कर्म्माणि स्वमाधुर्य्येण सर्व्वलोकमनांसि बध्नन्तीत्यर्थः । तत्र जनानुपलक्ष्यमार्ग इति पदेन रहस्या रागानुगा भक्तिरपि द्योतिता ॥ २६ ॥ ❀ ❀ एतदेव प्रपञ्चयति । उलूकिकायाः पूतनाया यज्जीवहरणं तोकेनैव बालकेनैव रूपेण, न त्वतिविकटाकारया अतिविस्तृतशरीराया अतिबलिष्ठायास्तस्या वधोपयोगिनी तादृशैश्वर्य्यमयी वामनावतारस्य त्रिविक्रम-

मूर्त्तिरिव काचिन्मूर्त्तिराविष्कृतेति भावः । त्रैमासिकस्यैव पदा अतिसुकोमलेनैवेत्यर्थः । यत् अपवृत्तः विपर्य्यस्ततया पातितः, न तु हिरण्यकशिपुविदारणार्थो नृसिंहमूर्त्तिरिव पदस्य विकटकठोरता काप्याविष्कृतेति भावः । रिङ्गता जानुभ्यां गच्छतैव अन्तरं तेन तयोर्मध्यं गतेनैव उलूखलनिबद्धेनैव अर्ज्जुनयोर्द्वयोर्यदुन्मूलनं, न तु पृथिव्युद्धरणोपयोगिना वराहरूपेणैव कोऽपि प्रयत्नः कृत इति भावः । तत् सर्व्वम् आत्ममहिमोपनिबन्धनमेव निजबाल्यमहामाधुर्य्येण स्वमहैश्वर्य्यस्य आवृतीकरणमेवेति पूर्व्वेणानुषङ्गः । इतरथा अन्यथा न भाव्यम् , एतत्त्रिकेण ईदृशेन न भवितव्यं नाभविष्यदित्यर्थः ॥ २७ ॥ ❀ ❀ विषमयतोयस्य पीतं पानं येषां तान् पालान् गोपांश्च कृपादृष्टिसुधावृष्ट्या अजीवयत् जीवयिष्यतीति यत् तदपि आत्ममहिमोपनिबन्धनमेवेति पूर्व्वेणानुषङ्गः । ह्रदिन्यां यमुनायां विहरन् विहर्त्तुं तच्छुद्धये तस्या निर्विषत्वाय उरगं कालियम् उच्चाटयिष्यति ॥ २८ ॥ ❀ ❀ दिव्यमिवेति लोकोक्तिरीत्यैवोक्तिः । वस्तुतस्तु सर्व्वं कर्म्म तस्याप्राकृतमेव जन्म कर्म्म च मे दिव्यमिति भगवदुक्तेः निशि कालियदमनरात्रौ शुचिर्ग्रीष्मस्तत्सम्बन्धिनी वने । उन्नेष्यति उद्धरिष्यति । अवसितो निश्चितोऽन्तकालो येन तम् । तथा मुञ्जाटव्यां नेत्रे पिधाप्य पिहिते कारयित्वा ॥ २९ ॥ ❀ ❀ उपबध्यतेऽनेनेत्युपबन्धं शुल्वं दाम अमुष्य माता श्रीयशोदा यत् यत् गृह्णीत गृह्णाति तत् अमुष्य न माति बन्धने सम्मितं न भवति न पूर्य्येत इत्यर्थः । गोपी यशोदा आदौ, किं स्वप्न एतदुत देवमायेत्यादिना विस्मितमनास्ततो बोधिता, अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोग इति निजैश्वर्य्यं ज्ञापिता अमुना कृष्णेनैवेत्यर्थः । तदनन्तरं प्रतिबोधिता ऐश्वर्य्यज्ञानप्रतिरूपं पुत्रस्नेहमाधुर्य्यमेव बोधिता, प्रणतास्मि तत् पदं स एव नारायणो मत्पुत्रस्यारिष्टं नाशयत्विति तत्र द्योतनात् ॥ ३० ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

स चेंद्रावणयोर्युद्धे रावणस्य वक्षस्थलस्पर्शेन उग्रा भग्ना ये महेंद्रवाहस्य ऐरावतस्य दंताः तैर्विडंबिताः स्वधवलिम्ना धवलीकृताः याः ककुभः दिशः ताः जुषते सेवते पालयतीति तथा तस्य दारहर्तुः रावणस्य अधिसैन्ये स्वपरसैन्यमध्ये उच्चरत उत्कर्षेण विचरतः अहो मत्समः कोऽन्योस्तीति गर्वेण दृढमुत्पन्नं हासम् असुभिः प्राणैः सह धनुषो विस्फूर्जितैः टंकारघोषैरेव सद्यः शीघ्रं विनेष्यति ॥ २५ ॥ ❀ ❀ श्रीकृष्णावतारमाह भूमेरिति दशभिः । सिताः शुभाचाराः ब्रह्मादयः कृष्णकाः अशुभकर्माणः असुरा; तेषामीशः उत्पत्तिस्थित्यादिहेतुः तथाच महाभारते ऋषय ऊचुः पिनाकिन्भगनेत्रघ्न सर्वलोकनमस्कृतं माहात्म्यं वासुदेवस्य श्रोतुमिच्छाम शंकर । शिव उवाच पितामहादपि वरः शाश्वतः पुरुषो हरिः हिरण्यकेशः श्रीकृष्णः व्यभ्रे सूर्य इवोदितः श्रीवत्सांको हृषीकेशः सर्वदैवतपूजितः ब्रह्मा तस्योदरभवस्तथाहं च ललाटजः शिरोरुहेभ्यो ज्योतींषि रोमभ्यश्च सुरासुराः ऋषयो देहसंभूतास्तथालोकाश्च शाश्वताः पितामहगृहं साक्षात् सर्वदेवगृहं च सः सोऽस्याः पृथिव्याः कृत्स्नायाः स्रष्टा त्रिभुवनेश्वरः संहर्ता सर्वभूतानां स्थावरस्य चरस्य च स देवरिपुजित्साक्षाद्देवनाथः परंतपः । सर्वज्ञः सर्वसंश्लिष्टः सर्वगतः सर्वतो मुखः परमात्मा हृषीकेशः सर्वव्यापी महेश्वरः न तस्मात्परमं भूतं वेदे लोके च किंचनेत्यादि यद्वा सिता हिरण्यकेश इति सुतिप्रोक्ताः प्रकाशरूपाः कृष्णाः केशा यस्य सः साक्षाद्भगवान् सुरेतरवरूथैः राजन्यरूपासुरसैन्यैः विमर्दितायाः भूमेः क्लेशव्ययाय भारापनयनाय कलया संकलया संकर्षणेन सह जातः सन् कर्माणि करिष्यति अनेन तादृक्केशोपलक्षितस्वासाधारणश्रीविग्रहवानाविर्भूत इति सूचितम् । यद्वा सितकृष्णा गौरश्यामौ कानां सहस्रसंख्याकशिरसामीशः संकर्षणश्च कस्य ब्रह्मण ईशः ब्रह्मोपलक्षितसर्वजगज्जनकश्च केशौ संकर्षणपरवासुदेवाख्यमूर्तिभेदौ यस्य सः सकया स्वसंकल्पेन जात इत्यर्थः । अनेन स चापि केशौ हरिरुद्बबर्हशुक्लमेकमपरं चापि कृष्णं तौ चापि केशौ निर्विशेतां यदूनां कुले स्त्रियौ देवकीं रोहिणीं चेति महाभारतस्थं जनव्यामोहकरं कूटवाक्यं व्याख्यातम् । हरिः केशौ उक्तव्युत्पत्त्या संकर्षणब्रह्मोपलक्षितसर्वजगत्कारणात्मकमूर्तिभेदौ उद्वहं आविश्चकार स संकर्षण आविर्भवितुमुद्यत इति फलितोर्थः । अन्यत्स्पष्टमिति कूटवाक्यार्थः । तस्य सर्वाविषयत्वं सूचयन् तद्विशिनष्टि जनानुपलक्ष्यमार्ग इति स्वानन्यभक्तविज्ञेयत्वं सूचयन् तत्कर्माणि विशिनष्टि आत्ममहिमोपनिबंधनानीति आत्मनः भगवतः महिमा गुण स्वरूपादि याथात्म्यम् उपनिबध्यते व्यक्तीक्रियते येषु तानि ॥ २६ ॥ ❀ ❀ ननु भूमिक्लेशव्ययमन्यः कश्चित्करिष्यति किं भगवत्प्रादुर्भावेनेति शंकां निवारयन् तत्कर्मणां तन्महिमोपनिबंधनत्वं प्रपंचयति तोकेनेत्यादिना । तोकेन बालेन उलूकिकायाः पूतनायाः जीवहरणं यत् त्रैमासिकस्य त्रिमासावस्थस्य च पदा पादेन यत् शकटः उपवृत्तः यच्च दिविस्पृशोरत्युच्चयोरर्जुनयोः वृक्षविशेषयोः रिंगता जानुभ्यां गच्छता अंतर्गतेन मध्यंप्राप्तेन भगवता उन्मूलमुत्पाटनं इतरथा भगवदवतारं विना तत्सर्वं न भाव्यं न भवितव्यम् ॥ २७ ॥ ❀ ❀ किंच यद्व्रजे विषतोयस्य पीतं येषां तान् व्रजपशून्पालांश्च अनुग्रहदृष्टेः कृपादृष्टेर्वृष्ट्या सुधावृष्ट्या अजीवयत् । यच्च ह्रदिन्यां श्रीयमुनायां विहरन् तच्छुद्धये ह्रदिनीनिर्विषत्वाय अतिविषवीर्येण विलोला चपला जिह्वा यस्य तमुरगं कालियसंज्ञं सर्पम् उच्चाटयिष्यत् तदपीतरथा न भाव्यमित्यन्वयः ॥ २८ ॥ ❀ ❀ किञ्च अनधिगम्यं कार्त्स्न्येन दुर्ज्ञेयं वीर्यं यस्य सः सबलः सरामः शुचिवने ग्रीष्मकालिके वने शुष्के वने दावाग्निना परिदह्यमाने सति अतो दावाग्नेर्हेतोः अवसितो निश्चितः अंतकालो यस्य तं निशि निःशयानमिति कालियदमने रात्र्यां यमुनातीरे नेत्रे पिधाप्य पिहिते कारयित्वेति मुञ्जाटव्याः

व्रजमुन्नेष्यति उद्धरिष्यतीति यत् तदपि कर्म दिव्यममानुषं भगवन्माहात्म्यद्योतकमित्यर्थः । इवेति पादपूरणार्थकमव्ययम् ॥ २९ ॥ ❀ ❀ किंच अमुष्य भगवतः माता श्रीयशोदा यद्यदुपबध्यते अनेनेति उपबंधं शुल्वं दाम गृहीत गृहीष्यति तत्तत् अमुष्य भगवतः न माति बंधसंमितं न भवति न पूर्यते इत्यर्थः । किंच गोपी श्रीयशोदा अस्य भगवतः जृंभतः वदने मुखे भुवनानि चतुर्दशलोकान् सम्यक् वीक्ष्य दृष्ट्वा शंकितमनाः सती प्रतिबोधिताऽऽसीत् निजैश्चर्यं ज्ञापिता आसीत् इति यत् तदपि कर्म दिव्यमिति सर्वत्र पूर्वेणान्वयः ॥ ३० ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं राजसचरित्रमुक्त्वा तामसमाह—वक्षस्थलस्पर्शेति । स भगवान् रघुनाथस्तस्य रावणस्य असुभिः प्राणैः सह हासं गर्वं विनेष्यति दूरीकरिष्यति । दूरीकरणे हेतुः दारहर्त्तुरेति । प्राणहरणेऽप्येतदेव हेतुः । आततायित्वात् । नहि तन्मारणार्थे बाणा अपेक्ष्यन्ते किन्तु धनुषो विस्फूर्जितैरेव । धनुषो विशेषणम् अधिसैन्ये उच्चरत इति । ऊर्ध्वं चरतः । बाणरूपं मलं वा त्यजतः । अनेन तस्य गतिर्निवारिता । धनुषो माहात्म्यार्थं हासं विशिनष्टि । वक्षस्थलस्पर्शेन[1] भग्ना ये महेन्द्रवाहस्यैरावतस्य दन्तास्तैर्विडम्बितो यः ककुब्जयो दिग्जयस्तेन रूढो यो हासः । तस्य हि सामर्थ्यद्वयं रावणस्य शरीरं शत्रुजयकृतं च । तत्र शरीरेण सामर्थ्येन शत्रुजय उपहस्यते । यतस्तस्य वक्षस्थलस्पर्शमात्रेणैवैरावतदन्ता भग्नाः । तादृशस्य दिग्विजयो नोत्कर्षहेतुः । तेन दिग्विजयिनां सामर्थ्यादप्यस्य महत्सामर्थ्यमिति महान् गर्वः । स गर्वो गच्छन् महाभिमानिनः प्राणैः सह गतः । न हि भगवतो हासस्याग्रेऽन्यो हसति । तस्मात्तदपगमनमुचितमेवेति भावः । एवं रघुनाथचरित्रमुपलक्षणविधया निरूप्य हासत्वं समर्थितम् ॥ २५ ॥ ❀ ❀ एवं हासपेशलं निरूप्य अदीनलीलाहसितेक्षणोल्लसद्भ्रूभङ्गसंसूचितभूर्यनुग्रहं निरूपयति—भूमेः सुरेतरेति दशभिः । यद्यप्येकैकस्मिन्नवतारे अपरिमिता[2]नि चरित्राणि सन्ति तथापि वि[3]मर्शे येषामुपयोगस्ते निरूप्य[4]न्ते । यत उद्देशे दशैव पदार्था निरूपिताः—अदीनत्वं, हसितत्वम्, लीलात्वं, ईक्षणत्वं, उल्लसत्त्वं भ्रूत्वं, भङ्गत्वं संसूचितत्वं, भूरित्वं, अनुग्रहत्वं चेति । अनेन दशविधा अपि ली[5]ला अस्मिन्नवतारे सन्तीति यावान्वा अयमात्मा तावानयमिति सूचितम् । अनेन दशविधलीलानामेकमुखत्वेनैकार्थत्वं च सूचितम् । तदुपपत्त्या निरूपणे उद्देशतो निरूपयिष्यति । तत्राऽदीनत्वं सर्गः । दीनो हि वस्त्वभावात् । यथासुखं वस्तुरूपेण स्वयमेव प्रादुर्भावाददीनत्वम् । अभिलषितवस्तुप्राप्तौ दीनत्वं गच्छति । न विद्यन्ते दीना यस्मादिति परार्थसृष्टावपि जीवानां दीनत्वं गच्छति सृष्टावेव । विसर्गो हि लीला स्पष्टा ॥ हसितं स्थानम् । स हि भगवान्नाट्य इव प्रहसनरूपेण तत्तन्मर्यादया तांस्तान् स्थापयति स्वस्य हासार्थमेव । अन्यथा परमार्थे भगवत्स्वरूपे का मर्यादा । ईक्षणं पुष्टिः । भगवदीक्षिता एव हि पुष्टा [6]भवन्ति । भ्रूरूपा ऊतिः । यथाऽन्तःकरणे वासना तथा भ्रुवोश्चलनम् । भङ्गो हि सद्धर्मः । स हि सर्वान् स्वस्थानाद्भञ्जयति । तदग्रे विस्तारयिष्यामः । उल्लसत्त्वमीशानुकथा स हि वंशो भगवदुल्लासो भवति । यथाक्रमो वा । तत्तदा ऊतिरुल्लासः । यथा प्रह्लादो धर्मश्च प्रमेयप्रमाणोल्लासौ । तदा सद्धर्मो भ्रूरूपो भवति । भङ्गश्च वंशः । आत्मा हि तत्र भग्नो भवति । संसूचनं निरोधः । तदग्रे उपपादयिष्यामः । भूरित्वं मुक्तिः । एको हि भगवानेव मुक्तः । अन्येऽपि तथा भवन्तीति । अनुग्रह आश्रयः । न हि सर्वथा अन[7]नुगृहीतः स्वस्मिन्कमपि स्थापयति । इयं च दशवि[8]धलीला कृष्णस्यैवेत्यवतारोऽप्ययं भगवानवतारी । अतः सर्गरूपमदीनत्वं प्रथमतो निरूपयति—सर्गो ह्यशरीरस्य शरीरस्वीकारः । तत्र न दीनो यस्मादिति द्वितीयोऽर्थो हेतुत्वेन प्रविशति । तत्र त्रिविधा भक्ता दीनाः भगवदवतारे हेतवस्तदाह । भूमेः पृथिव्याः । सुरेतरा दैत्या दानवा राक्षसाश्च । सुरेतरत्वेनैव धर्मप्रतिपक्षाः क्रोडीकृ[9]ताः । तैर्विमर्दि[10]ताः । **प्रकटः परमानन्दो** यदा भूमेस्तदैव हि । मर्दनक्लेशहानिः स्यादित्यानन्दः समागतः । तस्याः क्लेशव्ययाय । कलया बलभद्रेण सह । सितकृष्णौ केशौ यस्य स वैकुण्ठस्थित एव समागत इति कश्चित् । वस्तुतस्तु यः सितकृष्णकेशः स गोविन्दस्य कलया । सङ्कर्षणरूपत्वात् । संहाररूपतामसशक्त्या सितकृष्णरूपस्य सङ्कर्षणस्य कलया कृष्णकेशरूपेणाऽऽपीति वक्ष्यते । इदमप्येकं प्रयोजनं कृष्णः केशो यथाऽवतीर्णो भवतीति । नतु तावन्मात्रम् । मर्दनक्लेशदूरीकरणासमर्थत्वात् । "ताविमौ वै भगवतो हरेरंशाविहाऽऽगताविति" ति वाक्यविरोधात् । "तदा वां परितुष्टोऽहममुना वपुषे" ति वाक्यविरोधश्च । तस्मान्मर्दनक्लेशाभावार्थं साक्षादानन्दमयः । पुत्रत्वेन वंशजननार्थं प्रद्युम्नः । धर्मरक्षार्थमनिरुद्धो नारायणांशः । भूमिभारनिराकरणार्थं सितकृष्णकेशांशः । जनानुपलक्ष्यमार्ग इति प्रद्युम्नो वंशकृत् । कर्माणि करिष्यतीत्यनिरुद्धः । चतुर्णामपि कार्यचतुष्टयं भारव्ययाय चेति चकारेण सूचितम् । तेनैक[11]रूपेणैव चतुर्मूर्त्तेरपि चरित्रं निरूप्यते । एकमेव चरित्रं मोक्षभक्ती निरूपयति ।

---

१. स्पर्शेन स्पर्शमात्रेण ख. । २. अपरिमितान्येवेति क. ख. ग. । ३. विमर्शोपयोगित्वेन दशधर्मा इति ग. । ४. अत्र तथा कृष्णावतारेऽप्यपरिमितानि चरित्राणि सन्ति तथापि विमर्शोपयोगित्वेन दश धर्मा निरूप्यन्ते इत्यधिकः पाठः ख. । ५. लीला निरूपिता अस्मिन् ख. ग. । ६. भवन्तीति ख. । ७. अनुग्रहः स्वस्मिन्निति ख. । ८. दशविधा ख. । ९. क्रीडीभूताः ग. । १०. विमर्दितायाः ग. । ११. नैजरूपेणैवेति ग. ।

भूमिभारहरणं, वसुदेवदेवकीकामनापूरणं, धर्मरक्षा चेति। विस्तरे तु प्रकरणभेदेन वक्ष्यति। एवं चतुर्मूर्तिर्भगवान् जातः। अनेन सर्वाण्येव वाक्यानि यथाश्रुतं समर्थितानि। अन्यथा प्रत्येकवाक्यानि तयोरेको बलभद्रो बभूवेत्यादीनि विरुद्धानि भवेयुः। जन्म कर्म च स्वस्य संपादयिष्यति त्रिविधदुःखदूरीकरणाय। **भूमिर्माता तथा चाऽन्ये दुःखभाजो हरिप्रियाः। कंसादेः कालतो ज्ञानात्रिधा दुःखं च तद्गतमिति** वक्ष्यते। भूमिस्तु कार्यरूपापि भवतीति विचारे सैवोक्ता। अदितिर्मातेति तस्या भूमित्वं स्पष्टमेव। अन्येऽपि भूमिसंबन्धादेव दुःखिताः। जनैरनुपलक्ष्यो मार्गो यस्य। जनाः साधारणाः। भगवन्मार्गस्य उपलक्षणमपि ते न जानन्ति। मार्ग एवंप्रकारेण भगवदागमनम्। कर्माणि च करिष्यतीति। चकाराज्ज्ञानं भक्तिं च कथयिष्यति। कर्माण्यनिरुद्धचरित्रत्वाय विशिनष्टि। [1]आत्ममहिम्न उपनिबन्धनं येषु। आत्मत्वाज्ज्ञानजनकत्वात्। महिमपदाद्भक्तिः। उप समीपे नितरां बन्धनाद्धर्मः। त्रिभिस्त्रिविधं दुःखं गच्छति। एवं भगवच्चरित्रं भगवन्माहात्म्यमेव सूचयति। एतावता सर्वे अदीना भवन्ति ॥ २६ ॥ ❀ ❀ लीलां निरूपयन् पूर्वोक्तस्य हेतुमपि निरूपयति विमर्शमध्यपातात्—**तोकेन जीवहरणमिति**। यद्ययं भगवान् चतुर्मूर्तिर्न भवेत्[2]तदैव तच्चरित्रचतुष्टयं न सङ्गच्छेत। पूतनाऽसुपयःपानेन तन्मोक्षः। शकटोपमर्दः। यमलार्जुनमध्यगमनम्। तदुन्मूलनं च। न हि वासुदेवादन्यो मोक्षं दातुं शक्तः। न हि सङ्कर्षणादन्यः स्पर्शमात्रेण नाशकः। न ह्यनिरुद्धादन्यो नारदशापविमोक्षार्थं सान्निध्यनिरूपणेन वृक्षयोरन्तरा गच्छति। न हि प्रद्युम्नादन्यः शापजन्ममूलोच्छेदपूर्वकं पूर्वस्थितदेवताजन्म संपादयति। भगवत्त्वं चैतैरेव स्थाप्यते। यतस्तोकेन बालकेन उलूकिकायाः पूतनायाः जीवहरणम्। यत्र हि कार्यं तत्र साधनमवश्यं भावि। यत्र पुनः साधनव्यतिरेकेणैव साध्यमुत्पद्यते तत्परब्रह्मस्वरूपमित्येवाऽवगन्तव्यम्। सर्वभवनसमर्थरूपत्वात्तस्य। किञ्च। उलूकस्य भार्या उलूकिका उलूकदुहिता वा। उलूकरू[3]पैव वा। सा हि दिवाभीतरूपा भवति। सन्मार्गविमुखा प्रतिपक्षा च। अनेन प्रमाणबलं तस्या[4] मुक्तौ निवारितम्। तस्याः जीवानां हरणं स्वस्मिँल्लयप्रापणम्। हृतं हि स्वस्मिन्नाऽऽनीयते। "**इहैव समवनीयन्ते प्राणा**" इति। मुक्तिश्चैषा। तस्मात्प्रमेयबलेन सा मुक्तेति मन्तव्यम्। प्रमेयं च शुद्धं परब्रह्म। न केनाऽप्यंशेन न्यूनम्। तथासति तादृशस्य मुक्तिदानसमर्थत्वं न सम्भवति। अतः साधनव्यतिरेकेणैव साध्यकरणान्मुक्तिदानाच्च साक्षात्पुरुषोत्तमः कृष्णः। किञ्च। **त्रैमासिकस्येति** मासत्रयपरिमितः। कालावयवास्त्रय एव भगवतः परिच्छेदका जाताः ते हि स्वभावतोऽसमर्था मूर्तिभेदं संपादयन्ति। तेन शकटं निर्माय शकटे विहृत्य शकटं नाशितवानिति त्रिमूर्तिरुक्तो भवति। त्रयाणामपि नाशने हेतुत्वव्युदासाय पदेत्युक्तम्। संकर्षणेन योग्यत्वात्। अपवर्त्तो विरुद्धतया पतनम्। अनेन महाबलनिरूपणेन पूर्णा क्रियाशक्तिरुक्ता। "प्रवालमृद्वङ्घ्रिहतमि" ति वाक्यात्साधनाभावः सूचितः। पूर्ववत्[5]परब्रह्मत्वं पूर्णक्रियाशक्तिं च सूचयति। एवं ज्ञानक्रियाशक्ती प्रतिपाद्य भक्तिमार्गसमर्थनायाऽऽचिन्त्यसामर्थ्यं--प्रतिपादयति। यद्रिङ्गताऽन्तरगतेनेति। यदेतत्त्रयमितरथा न सम्भाव्यमित्यर्थः। रिङ्गता हस्तपा[6]दैश्चलता। तयोरन्तरगतेन तयोरुन्मूलनं परब्रह्मत्वबोधकम्। पूतनायां मुखसम्बन्धोऽपि स्थितः। शकटे पादाग्रमात्रम्। अर्जुनयोस्तदपि न। किन्तु परम्परया दूरसम्बन्धः। उलूखलेन वृक्षयोः सम्बन्धः। रज्ज्वा चोलूखलस्य। भगवता च रज्ज्वाः। यदि बलेन कृतं स्याद्रज्जुत्रोटनं प्रथमं भवेत्। अल्पबलत्वात्। उलूखलस्य वा। भगवत्सम्बन्धे विचारिते सर्वेषां वा। तत्राऽप्युन्मूलनं न सम्भावितम्। तिर्यगञ्चनस्य दृढभूमौ मध्यभङ्गहेतुत्वात्। इदमपि पूर्ववत्परब्रह्मत्वसाधकमिच्छाशक्तिसाधकं च। एषा हि भगवतो लीला ज्ञानक्रिये इच्छा च। इतर[7]था न भाव्यमिति सर्वत्राऽग्रिमश्लोकेषु केचिद्योजयन्ति। वस्तुतस्त्वत्रैव। अग्रे सम्बन्धबोधकपदाभावात्॥ २७॥ ❀ ❀ एवं लीलां विनिरूप्य हसितं निरूपयति--**यद्वै व्रजे व्रजपशूनिति**। यद्यस्मात्कारणाद्व्रजे गोष्ठे व्रजपशून् व्रजरूपान्बालकान् पशूंश्च। स्वकीयान्वा। विषतोयपीथान् विषतोयस्य पीथं पानं येषाम्। यथा सोमपीथेन मृत्युग्रस्ता अमरा भवन्ति। तथा विषतोयपीथानप्यजीवयत्। पशून्बालांश्चाऽजीवयदित्येकः पक्षः। **अनुग्रहदृष्टिवृष्ट्येति** साधनम्। तस्या यमुनायाः शुद्धये। अतिविषवीर्येण विलोला जिह्वा यस्य। तं [8]कालियं विहरन्नेवोच्चाटयिष्यन्। अत्रेकारलोपश्छान्दसः। उच्चाटयिष्यतीत्यर्थः। नुमभावो वा। विहरन्नुच्चा[9]टयिष्यन्नजीवयदिति सम्बन्धः। अत्र पशुपालजीवनमनुग्रहदृष्टिवृष्ट्या साधनेन कार्यं निरूपितम्। इदं त्वल्पालौकिकम्। विहरणं च गरुडादिभिरपि सिद्धं भवति। योगिनोऽपि[10] हि दृष्ट्या जीवयन्ति। उपसर्गनिपातसहितादटधातोर्वा आटयिष्यदिति लङ्क्रियातिपत्तौ। यदा तं दूरीकरिष्यति तदा अजीवयत्। अन्यथा जीवितमप्यजीवितमेव। हास्यार्थमिदं चरित्रं भवति। वयं कृष्णं पालयिष्याम इत्येषां बुद्धिः। तदद्य स्पष्टमेव तान् पालयित्वा स्वयं तत्र प्रविष्टः कथमेते पालयिष्यन्तीति। पश्चात्तानकिञ्चित्करान् दृष्ट्वा हसतीति। अथवा। पशून्पालानिति ये पशुरूपाः पाला आधिदैविकास्तानजीवयत्। ते ह्यपरा[11]धिनः कालेन हताः। भगवद्भक्तानां विषपानहेतुत्वात् विषतोयस्य पीथं पानं येभ्य इति। कालस्तानेव ग्रसति नतु भगवदीयान्निरपराधिनः। मण्डू-

---

१. आत्मनो महिम्न इति ग.। २. तदैतच्चरित्रेति ख. ग.। ३. रूपेव वेति ख.। ४. तस्य मुक्ताविति ख.। ५. पूर्ववद्ब्रह्मपरत्वं ख.। ६. हस्तपादाभ्यां ख.। ७. इतरथर्जुनेति ख.। ८. कालीयं घ.। ९. न्नुच्चाटयन्निति ख. ग.। १०. पि दृष्ट्येति ख. ग.। ११. अपराधिना कालेन ख.।

काद[1]यो मृतप्राया वृष्ट्योऽ[2]च्छन्तीति दृष्टैर्वृष्टित्वम् । तेष्वनुग्रहो ब्रह्मत्वबोधकः । न ह्यन्य आधिदैविकेष्वनुग्रहकरणसमर्थः । यदेतन्न भाव्यमिति च संयोजना सङ्ग[2]च्छते । लौकिकसाधनेषु मन्त्रादिना विषं दूरीकृत्य पश्चाज्जीवनं प्रसिद्धम् । अत्र सविषाणामेव जीवनं भगवत्कार्यमिति कश्चित् । हास्यमात्रत्वे न काचिच्चिन्ता ॥ २८ ॥ ❀ ❀ हसितं निरूप्य ईक्षणं निरूपयति—तत्कर्म दिव्यमेवेति । तस्य भगवतः कर्म दिव्यमिव । दिवि भवं दिव्यं अलौकिकम् । इवेतीन्द्रादीनामप्यशक्यम् । यद्दावाग्निना ग्रीष्मसम्बन्धिनि वने परिदह्यमाने सति तन्मध्ये निशि निःशयानं व्रजमुन्नेष्यति [3]ततोऽन्यत्र स्थापयिष्यति । इतः अस्मात्स्थानात् । इतो हेतोर्वा । अवसितः अन्तकालो येन । अस्माकमयमन्तकाल इति व्रजस्थैर्विचारितम् । इदं हि चरित्रं दावाग्निविमोचकं वारद्वयनिष्पन्नम् । कालीयह्रदसमीपे, मुञ्जाटव्यां च [4]तत्रैकत्र नेत्रे पिधाय्य मुञ्जाटवीं त्याजयित्वा समानीताः अन्यत्र तु निशि निःशयानमिति । अन्यानि [5]साधारणपदान्युभयत्र । ईक्षणमपि द्विरूपं नेत्रद्वयेन जन्यते । तस्मात्सङ्कटादुन्नेष्यतीत्युभयत्र साधारणम् । उन्नयनं हि देवार्थं पृथक्करणम् । तथैते स्वार्थं रक्षिताः । अग्निपानं ब्रह्मधर्मः अन्यत्र नयनं च । यदत्राऽग्निपानं न निर्दिष्टं[6] तत्पुनः प्रश्नव्यावृत्त्यर्थम् । अन्यथा कथमग्निं पीतवानिति प्रश्नः स्यात् । अत एव दिव्यमिवेत्युक्तवान् । न तु स्वरूपम् । देवगुह्यं चैतत् ॥ २९ ॥ ❀ ❀ एवमीक्षणं विनिरूप्य उल्लसत्त्वं निरूपयति—गृह्णीतेति । इदं हि चरित्रं भगवतो ब्रह्मत्वबोधकम् । अन्यत्तु योगमन्त्रमण्यादिभिरपि सिद्ध्य[7]तीति नैकान्तिकं भगवत्त्वसाधकम् । यथैतच्चरित्रद्वयं भगवत्त्वं साधयति तथा भाष्ये निरूपितमधिकरणद्वयेन । न हि यः सर्वात्मको न भवति येन रूपेण स हि तेन बन्धनं नाऽर्हतीति युक्तम् । यदेव बन्धनार्थं उपबन्धं रज्जुं गृह्णीत गृह्णाति तत्तदेव अमुष्य बन्धने न माति । भगवत एवाऽऽ[8]द्यन्तयोर्विद्यमानत्वाद्बहवोऽपि योजिता [9]एकमिव भवन्ति । तस्य च परिदृश्यमानमुदरं सर्ववस्तुषु वस्तुस्वरूपमेव । आद्यन्तयोश्च विद्यमानम् । तस्मादमानं युक्तम् । किञ्च । यस्य भगवतो जृम्भमाणस्य मुखे भुवनानि संवीक्ष्य शङ्कितमनाः प्रतिबोधिताऽप्यासीत् इदं हि चरित्रद्वयं विश्वाधारत्वमनुभवमोहकत्वं च । यः सर्वेषु भूतेषु तिष्ठन् सर्वाणि भूतान्यन्तरयतीत्यन्तरः । स हि गोकुले तिष्ठन् गोकुलमन्तः स्थापयति । न चैतन्मायिकम् । श्रुतिसिद्धत्वात् । यशोदायाश्च तत्राऽप्यनुभवात् । विचारेणाऽपि "अथो अमुष्यैव ममाऽर्भकस्ये"ति वाक्याद्ब्रह्मधर्म एवाऽयम् । अस्तु वा तत् । तदानीमेव शङ्किता प्रतिबोधिताऽप्यासीत् । पुत्र एवाऽयं ममेति ज्ञातवती । नह्यनुभवस्य स्मृतिसंस्काराजनकत्वं भगवन्मायाव्यतिरेकेण सम्भवति । अयमेव हि भगवत उल्लासः । जृम्भा च भगवतैव जनिता मुखविकासहेत्वर्थम् । अतो निमित्तान्तरेऽपि मुखविकासे जगत्प्रदर्शनं तदैव हि प्रतिबोधनम् ! प्रथम[10]प्रदर्शने तु सुविस्मितेत्येवाऽध्यायसमाप्तिः । वैष्णवीं व्यतनोन्मायामि"ति तत्रैवोक्तत्वात् । एवं चतुर्भिः श्लोकैः चतुर्मूर्तेर्भगवतः सङ्कर्षणा-निरुद्ध-प्रद्युम्न-वासुदेवनिर्णय उक्तः । सर्वे वा सर्वत्र ॥ ३० ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

वक्षःस्थलेत्यत्र । उच्चरत इत्युभयार्थप्रयोगतात्पर्यमाहुः अनेन तस्य गतिर्निवारितेति धनुषो मलत्यागनिरूपणेन रावणस्य मोक्षप्राप्तिर्निवारितेत्यर्थः ॥ २५ ॥ ❀ ❀ भूमेरित्यत्र ते इति धर्माः । एकार्थत्वमिति एकप्रयोजनकत्वम् । नदित्यादि तद्दशविधलीलानामेकार्थत्वं दशमाध्याये 'अत्र सर्गो विसर्गश्च' त्यादिनोद्देशतो निरूपयिष्यतीत्यर्थः । तत्र को धर्मः केन रूपेणास्तीत्यपेक्षायामाहुः तत्रेत्यादि । नन्विदमदीनत्वं परार्थसृष्टौ नायातीति तत्सङ्ग्रहायाहुः अभिलषितेत्यादि । यथेति यथाक्रमम् । अत्र प्रह्लादस्य भगवत्स्मृतित्वेन वासनाजन्यत्वाद्दूतित्वं जयविजयपातनप्रयुक्तसनकादिजन्मान्तररूपत्वाद्वा । तस्य चोल्लासत्वं भगवत्प्रादुर्भावहेतुत्वादिति ( सेत्स्यति ) स्मृतिधर्मस्य तथात्वं तु स्फुटम् । अननुगृहीत इति अननुगृही, इत, इति पदच्छेदः, इतः संसारान्निष्काष्येत्यर्थः । अशरीरस्येत्यादि प्राकृतशरीररहितस्य प्राकृतशरीरस्वीकारः । तथा चैतेनावतारता शेषैरवतारित्वमित्यर्थः । त्रिविधा इति 'भूमिर्माता तथा चान्ये दुःखभाजो हरिप्रियाः' इति निरोधविवृतौ वक्ष्यमाणा इत्यर्थः । नन्वत्र पूर्णस्य प्रादुर्भावे किम्मानमत आहुः प्रकट इत्यादि । तथा च, प्रादुर्भावमात्रेण भूमिक्लेशनिवारकत्वं स्वविचारितभक्तमात्रनिष्ठयावत्क्लेशनिवारकत्वञ्च नान्येष्ववतारेषु दृष्टमिति तदेतदुभयं पूर्णत्वानुमापकमित्यर्थः । एवञ्चास्य पद्यस्य सर्गलीलानिरूपकत्वात् अस्मिन् पद्ये जातपदमेव विशेष्यसमर्पकं ज्ञेयम् । क्लेश इति पूर्वानुषङ्गश्च । मतान्तरमनूद्य सिद्धान्तमाहुः वस्तुत इत्यादि । सङ्कर्षणरूपत्वादिति, एतेन पूर्वोक्ते मतेऽस्वरसंसूचितं ज्ञेयम् । यदि सितकृष्णकेश एव पूर्णः स्यात्तदा वक्ष्यमाणोपयोगी स धर्मः स्निग्धामलैः कुञ्चितनीलकुन्तलैरितिवदुद्देश[11]निरूपितोपि स्यादिति न तावन्मात्रावतारोत्रेत्यर्थः । वैकुण्ठस्थितस्य चांशत्वं ब्रह्मवैवर्ते स्फुटम् । ननु यद्येवं तदा प्रकृतस्य विशेषणस्य किं प्रयोजनं ( ? ) कथञ्च सङ्कर्षणस्य तादृशत्वमत आहुः संहारेत्यादि । वक्ष्यत इति निरोधस्कन्धे वक्ष्यते । तथा चैतदुभयं ततः स्फुटीभविष्यतीत्यर्थः । सङ्कर्षणस्योभयरूपत्वं 'गुणेन तमसाच्छन्नो विष्णुः सत्त्वगुणं बुधाः ।

---

१. मण्डूकादयो हीति ख. ग. । २. सङ्गच्छन्ते ख. ग. । ३. तान्यत्र घ. । ४. तत्रैव नेत्रे क. घ. । ५. साधारणानि पदानि ख. । साधारणान्युभयत्र ग. । ६. निर्दिष्टं पुनः ख. ग. । ७ सिध्यति नैकान्तिकं ख. ग. । ८. द्यन्तयोर्वा विद्येति क. ग. घ. । ९. एकमेवेति ख. ग. । १०. प्रथमदर्शने ख. । ११. "उद्देश" इति पाठः ।

अधिष्ठाय भवेत्सर्वजगतः पालकः प्रभुरि'ति सूतसंहितादिवाक्याज्ज्ञेयम् । ननु तावन्मात्रस्य प्रयोजनत्वाभावे किङ्गमकमित्याकाङ्क्षायां वासुदेवानिरुद्धप्रद्युम्नांशानां गमकं हेतुत्रयमाहुः मर्दनेत्यादि । तथा चैवं तत्र तत्रोच्यमानस्य कार्यभेदस्याग्रे स्फुटत्वात्केवलं सङ्कर्षणत्वं न वक्तुं युक्तमित्यर्थः । फलितमाहुः स तस्मादित्यादि । विद्यमानेपि मर्दने तज्जन्यक्लेशाभावार्थमित्यर्थः । नन्वयमत्रार्थो विवक्षित इत्यत्र किङ्गमकमत आहुः जनेत्यादि । ननु जनेत्यादिविशेषणेन प्रद्युम्नादिपरामर्शे किङ्गमकमत चतुर्णामित्यादि । तथा च, चतुर्थस्कन्धीयवाक्यस्थचकारेणैकस्मिन्नेव रूपे सूचितम् , तच्च कार्यचतुष्टयमत्राग्रिमश्लोके स्फुटमतस्तदेव गमकमित्यर्थः । ननु वासुदेवादिव्यूहगमकस्यात्राभावात्कथं तदवधृतिरित्यत आहुः एकमेवेत्यादि । तथा च, मूलचरित्रमेव तद्गमकमित्यर्थः । नन्वेकरूपेणैकचरित्रेणैव कार्यद्वयकरणे तथैव कार्यान्तरस्यापि सिद्धेर्न चतुर्मूर्त्त्यवतारनिश्चय इत्यत आहुः विस्तरे त्वित्यादि । सिद्धमाहुः एवमित्यादि । एवं निर्बन्धेन चतुर्व्यूहसहितपूर्णप्राकट्याङ्गीकारे साधकं वैपरीत्ये बाधकं च तर्कमाहुः अनेनेत्यादि । अन्यथेत्यादि च । ननु मूलरूपजन्ममात्रेणैव भूमिदुःखनिवृत्तौ किमिति व्यूहजन्मकर्मकथनमित्यत आहुः जन्मेत्यादि । त्रिविधदुःखेति त्रिविधानां त्रिविधदुःखेत्यर्थः । वक्ष्यत इति दशमे वक्ष्यते । ननु त्रिविधानां दुःखनिवारणाय भगवत्प्रादुर्भावाङ्गीकारे मूलस्थं भूमेरित्येकवचनं कुप्येतेति तदभावायाहुः भूमिरित्यादि । कार्यरूपेति शरीररूपा । तथा च, भूमिपदेन त्रयाणां सङ्ग्रहान्न तथात्वाङ्गीकारेप्येकत्वविरोध इत्यर्थः ॥ २६ ॥ ❀ ❀ तोकेनेत्यत्र' जीवपदेन यथा भगवत्त्वं स्थाप्यते तदाहुः तस्या जीवेत्यादि । अयमर्थः, जीवशब्दो हि चिदंशस्य जीवोपाधेरपि वाचकः । 'भागो जीवः स विज्ञेयः' इति व जीवो जीवं विहाय मामि' त्यादौ तदुपाधावपि तत्प्रयोगदर्शनात् जीवोपाधिश्च मनः, तच्च प्राणबन्धनम् , तथा सति प्राणस्य स्वस्मिन्नयने सर्वविशेषवत्कृते ते जीवा अपि तद्द्वारा तत्रागता इति तस्याः सकाशात्तेषां ग्रहणमपि तथेत्यर्थः । तादृशस्येति न्यूनस्य बालस्य वा । सूचयतीति 'प्रवालमृद्वङ्घ्रिग्रहतमि' तिवाक्यमेव सूचयति ॥ २७ ॥ ❀ ❀ यद्वै व्रज इत्यत्र आधिदैविका इति पश्वाधिदैविकाः । भगवद्भक्तानामिति गवादीनाम् । सङ्कच्छत इति तद्बोधकपदाभावेपि भगवदेककर्तृकत्वस्य बुबोधयिषितत्वात्सङ्कच्छत इत्यर्थः । न काञ्चिच्चिन्तेति काप्यनुपपत्तिरूपा सा नेत्यर्थः ॥ २८ ॥ ❀ ❀ तत्कर्मेत्यत्र । एकजातीययोर्विभिन्नकालयोर्द्वयोर्लीलयोर्यौगपद्येन कथने बीजमाहुः ईक्षणमित्यादि । तथा च, दर्शनरूपत्वज्ञापनार्थं यौगपद्यमित्यर्थः । ननु पुनः प्रश्ने को दोषः इत्यत आहुः देवगुह्यं चैतदिति ॥ २९ ॥ ❀ ❀ गृहीतेत्यत्र अधिकरणद्वयेनेति । 'वैश्वानरः साधारणशब्दः विशेषादि' त्यनेन 'आमन्ति चैनमस्मिन्नि'त्यनेन च । येन रूपेणेति । न भवतीति पूर्वेणास्याप्यन्वयः । इदमिति उत्तरार्द्धोक्तं चरित्रद्वयम् । अनुभवमोहकत्वञ्चेति बोधयतीति शेषः । मोहकद्वयमिति तु न पाठः प्रतिभाति । अन्तः स्थितस्यान्तःस्थापकत्वेन्तर्यामिब्राह्मणं प्रमाणत्वेन वदन्तो दामबन्धनादिलीलायास्तदनुमापकत्वं स्फुटीकुर्वन्ति य इत्यादि । उत्तरार्द्धोक्तव्यादानलीलासिद्धदर्शनादेरमायिकत्वे हेत्वन्तरमाहुः विचारेणेत्यादि । ननु व्यादानलीलायामग्रे 'वैष्णवीं व्यतनोन्मायामि' त्यनेन मायावितानस्योक्तत्वात्तत्र दृष्टस्य मायिकत्वे कथं ब्रह्मत्वबोधकत्वमित्याशङ्कायां तदुपगम्यापि तथात्वं साधयन्ति अस्तु वेत्यादि । अत्र शङ्कितमना इति कथनेन तत्रत्यो विचारः सर्वः स्मारितः । तथा सति, तादृग्विचारदृढीकृतस्यानुभवस्योपेक्षान्यसंशयान्यत्वात्तेन स्मृतिर्वा संस्कारो वा आवश्यकः, स चेन्न, तथा सति कारणसद्भावे कार्याजननं भगवन्मायया । माया च सामर्थ्यरूपा शक्तित्वात् । तथा चात्राकर्तुं सामर्थ्यमेव ब्रह्मत्वबोधकमित्यर्थः । एवं लीलात्रयस्य ब्रह्म ( त्व ) बोधकत्वं समर्थयित्वा तस्योल्लासत्वायाहुः अयमित्यादि । तत्र पूर्वार्द्धोक्तबन्धनामानस्य भावाद्वैतप्रतिपादकत्वात्तस्य चोतिलीलासमाप्तावुक्तत्वात् । तेन च सूक्ष्मस्य व्यापकत्वं स्फुटीक्रियत इति प्रमाणोल्लासत्वम् , एवं च कर्मवासनारूपाया ऊतेः भावाद्वैतादिजनकत्वे एव भगवल्लक्षणत्वमिति विमृष्टं भवतीति ज्ञाप्यते । उत्तरार्द्धोक्तव्यादानादेस्तु विकासरूपत्वात्प्रमेयोल्लासत्वं स्फुटमिति ज्ञापनायायमित्युक्तम् । न ह्यनुल्लसितः प्रार्थनादिव्यतिरेकेप्येवं प्रदर्शयेदतोयमेव स इत्यर्थः । एतस्य ऊतित्वं बोधयितुं कर्मजत्वं स्फुटीकुर्वन्ति जृम्भेत्यादि । विकासहेत्वर्थमिति विकासजनककर्मोत्पादनाय । अत उल्लासेन भगवत्कृतत्वान्निमित्तान्तरे मृत्स्नाभक्षणसामयिकव्यादानेपि जगत्प्रदर्शनं तदेवोल्लासप्रबोधनम् । तथा चेदमपि तस्य चरित्रस्योल्लासत्वगमकमित्यर्थः । तत्रैवेति द्वितीयदर्शन एव । एवञ्च जगद्रूपस्य स्वसन्तानस्य प्रदर्शनाद्वंशस्याप्युल्लासत्वं स्फुटीकृतं बोध्यम् । एवमित्यादि । अत्र प्रथमश्लोके जीवहरणोपवर्त्तोन्मूलनानां सङ्कर्षणकार्यस्य स्पष्टत्वात्प्रथमः पक्षः । द्वितीयस्तु स्वयमेव व्याख्यातः । एवं द्वितीयश्लोके पशूनां पालनाञ्च जीवनेन धर्मरक्षाया उरगोच्चाटनेन जीवरक्षायाश्चानिरुद्धकार्यत्वस्य स्पष्टत्वात्प्रथमः पक्षः । अनुग्रहदृष्टिवृष्ट्या तथाभूतानां निःसाधनानां जीवनं वासुदेवस्य ह्रदिनीशुद्धिः प्रद्युम्नस्योरगोच्चाटनं सङ्कर्षणस्येति द्वितीयः पक्षः । तृतीयश्लोकेप्युन्नयनं स्थापकत्वात्प्रद्युम्नकार्यत्वात्प्रथमः पक्षः । दावाग्नेर्नाशः सङ्कर्षणस्य मृत्युवारणसामर्थ्यं वा वासुदेवस्येति तद्धारणं तस्य नेत्रपिधाने तत्करणं तेषां धर्मरक्षणायेति तदनिरुद्धस्येति द्वितीयः पक्षः । चतुर्थश्लोके वासुदेवचरित्रस्य स्फुटत्वात्प्रथमः पक्षः । पुत्रत्वबुद्ध्युत्पादनं प्रद्युम्नस्य मनःशङ्कावेपथुजननं सङ्कर्षणस्य व्यादानेन मात्राज्ञाकरणमनिरुद्धस्येति द्वितीयः पक्षः । येनैव त्रिविधा जीवा इति न्यायेन तत्तच्चरित्रस्य भक्तिजनकत्वात् सर्वस्यापि पुरुषोत्तमकार्यत्वमिति सर्वं सुस्थम् ॥ ३० ॥

---

१. वाहरण पाठः ।

## श्रीगिरिधरकृता बालप्रबोधिनी

यदुक्तं 'दशकन्धर आर्त्तिमार्च्छेत्' इति तत्स्पष्टयति—वक्ष इति । अधिसैन्ये स्वपरसैन्यमध्ये उच्चरत उत्कर्षेण विचरतो दारहर्त्तू रावणस्य य इन्द्रेण सह युद्धे स्ववक्षस्स्थलस्य स्पर्शेन रुग्णा भग्ना ये महेन्द्रवाहस्य ऐरावतस्य दन्ताः तैर्विडम्बिताः स्वधवलिम्ना धवलीकृतास्तत्तद्दिक्षु पतितैः प्रकाशिताः ककुभो दिशस्तासां जयेन रूढो यो हासो मम समः कोऽन्योऽस्तीति सञ्जातो यो महागर्वस्तमसुभिस्तत्प्राणैः सह सद्यः शीघ्रमेव धनुषो विस्फूर्जितैः निस्सृतैः प्रकाशमानैः शरैर्विनेष्यति अपनेष्यति विनाशयिष्यतीत्यन्वयः । 'ककुब्जुष ऊढहासम्' इति पाठे तु ककुभो जुषते सेवते विजित्य भुङ्क्ते इति तथा तस्य ऊढं प्राप्तं हासमित्यर्थः ॥ २५ ॥ ❀ ❀ श्रीकृष्णावतारं तच्चरितं चाह—भूमेरिति । सुरेतरा आसुरसम्पत्त्या जाता धर्मप्रतिपक्षिणो राजानस्तेषां वरूथैः सैन्यैर्विमर्दिताया भारेण पीडितायाः भूमेः क्लेशव्ययाय भारावतारणेन क्लेशनाशाय सितकृष्णकेशः सितो महादेवः कृष्णः कृष्णवर्णो विष्णुः को ब्रह्मा तेषामपीशो मूलभूतः पुरुषोत्तमः कलया सङ्कर्षणप्रद्युम्नानिरुद्धरूपया सह जातोऽवतीर्णो जनैरनुपलक्ष्यो ज्ञातो मार्गं एतदर्थमेवमवतीर्णो भगवानेवायमिति गतिर्यस्य तथाभूतश्च सन् कर्माणि करिष्यतीत्यन्वयः । तर्हि तस्य भगवत्त्वे किं प्रमाणमित्यपेक्षायां अतिमानुष्यकर्माण्यथानुपपत्तिरेवेत्याशयेन कर्माणि विशिनष्टि—आत्मेति । आत्मनः स्वस्य महिमा उपनिबध्यते अभिव्यज्यते येषु तानि, स्वमाहात्म्यप्रकाशकानीत्यर्थः । यत्तूक्तं विष्णुपुराणे—'उज्जहारात्मनः केशौ सितकृष्णौ महामुने' इति । यच्च भारते—'स चापि केशौ हरिरुच्चबर्ह[1] शुक्लमेकमपरं चापि कृष्णम् ॥ तौ चापि केशावाविशतां यदूनां कुले स्त्रियो रोहिणीं देवकीं च ॥ तयोरेको बलभद्रो बभूव योऽसौ श्वेतस्तस्य देवस्य केशः ॥ कृष्णो द्वितीयः केशवः सम्बभूव केशो योऽसौ वर्णतः कृष्ण उक्तः' इति । तत्तु न केशमात्रावताराभिप्रायकं किन्तु भूभारावतारणरूपं कार्यं कियदेतत् मम केशावेव तत्कर्त्तुं शक्ताविति द्योतनार्थं रामकृष्णयोर्वर्णसूचनार्थं च कल्पान्तरविषयकावतारपरं वेति गम्यते । अन्यथा 'कृष्णस्तु भगवान् स्वयं' 'तदा वां परितुष्टोऽहममुना वपुषाऽनघे' इत्यादिबहुवाक्यविरोधापत्तेरिति ज्ञेयम्[2] ॥ २६ ॥ ❀ ❀ कर्मणां परमेश्वरत्वप्रकाशकत्वमेव प्रपञ्चयति—तोकेनेति । यत्तोकेन बालेनैव सता उलूकिकाया उलूकवन्निशाचर्याः पूतनाया जीवहरणम्, यच्च त्रैमासिकस्य त्रिमासवयस्कस्य अतिकोमलेन पदा पादेन शकटः अपवृत्तः विपर्यस्ततया पातितः, यच्च रिङ्गता हस्तपादैर्गच्छताऽन्तरगतेन मध्यं प्राप्तेन दिविस्पृशोः अत्युच्चयोरर्जुनवृक्षयोः उन्मूलनमुत्पाटनं, तदेतत्त्रितयमितरथा तस्यानीश्वरत्वे सति न भाव्यं नोपपन्नं भवतीत्यन्वयः ॥ २७ ॥ ❀ ❀ यद्वै व्रजे व्रजपशून् गोवृषादीन् पालान् बालकांश्च विषसम्मिश्रिततोयस्य जलस्य पीथं पानं येषां तान् अर्थान्मृतान् अनुग्रहदृष्टिरूपसुधावृष्ट्या अजीवयत्, यच्च ह्रदिन्यां यमुनायां विहरन् तस्या यमुनायाः शुद्धये निर्विषत्वाय अतिविषवीर्येण विलोला चञ्चला जिह्वा यस्य तमुरगं कालियाख्यं सर्पं उच्चाटयिष्यत् ततो निष्कासयिष्यति तदपीतरथा न भाव्यमिति सम्बन्धः । इकारलोपश्छान्दसः ॥ २८ ॥ ❀ ❀ यच्च शुचिर्ग्रीष्मस्तत्सम्बन्धिनि शुष्के वने मुञ्जाटवीरूपे दावाग्निना परितो दह्यमाने सति अतो दावाग्नेर्हेतोरवसितो निश्चितोऽन्तकालो मरणसमयो यस्य तं व्रजं गोपालादिरूपं व्रजवासिनं नेत्रे पिधाप्य पिहिते कारयित्वा सबलः बलेन सह वर्त्तमानः श्रीकृष्णस्तत उन्नेष्यति उद्धरिष्यति । तथा कालियदमनानन्तरं यमुनातीरे निशि रात्र्यां निश्शयानं दावाग्निना वनदाहे दह्यमानं व्रजमग्निं पीत्वा तत उन्नेष्यति तदुभयमपि कर्म दिव्यमिव अलौकिकमेव तदपीतरथा न भाव्यमिति सम्बन्धः । सोऽप्यग्निपानादि कर्तुं कथं समर्थ इत्यपेक्षायामाह—अनधिगम्यं दुर्ज्ञेयं वीर्यं प्रभावो यस्य स इति ॥ २९ ॥ ❀ ❀ यच्च अलौकिकममुष्य कृष्णस्य माता यशोदाऽस्य बन्धनार्थं यद्यदुपबन्धमुपबध्यतेऽनेनेत्युपबन्धं बन्धनसाधनं शुल्वं रज्जुं गृह्णीत गृह्णाति तत्तदमुष्य सुतस्य न तु माति बन्धनसम्मितं न भवति नैव पूर्यते इति, यच्च जृम्भतोऽस्य कृष्णस्य वदने चतुर्दशभुवनानि संवीक्ष्य दृष्ट्वा गोपी यशोदा आदौ 'किंस्वप्न मेतदुत देवमाया' इत्येवं शङ्कितमनाः सती पुनरनेनैव अथोऽमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोग इति निजैश्वर्यज्ञापनेन प्रतिबोधिताऽऽसीत्तच्च कर्म दिव्यमिवेतरथा न भाव्यमित्यन्वयः[3] ॥ ३० ॥

## हिन्दी अनुवाद

जब रावणकी कठोर छातीसे टकराकर इन्द्रके वाहन ऐरावतके दाँत चूर-चूर होकर चारों ओर फैल गये थे, जिससे दिशाएँ सफेद हो गयी थीं, तब दिग्विजयी रावण घमंडसे फूलकर हँसने लगा था, वही रावण जब श्रीरामचन्द्रजीकी पत्नी

---

१. उत्पाटितवान् । 'उज्जहे' इति श्रीधरस्वामिसम्मतपाठः । अयमेवार्थतः सुसङ्गत इति भाति । २. कलया रामेण सह स्वयं सितकृष्णकेशो भगवानेव जातः । कलया शिल्पनैपुण्यविशेषविधिना सिता बद्धाः कृष्णा अतिश्यामाः केशा येनेति विग्रहः । 'अंशवो मे प्रकाशन्तेत्र मम ते केशसञ्ज्ञिताः' इति स्मृतेः । मतशिरोधायो सितकृष्णकिरणौ द्वौ प्रभू अवतरिष्यते इति सूचनार्थं केशयोरुद्धरणमिति सन्दर्भे किञ्चात्र विष्णुपुराणे च भारते च सर्वत्र केशशब्दस्यैव प्रयोगात् । चिकुरकुन्तलाद्यप्रयोगात् । इति क—पुस्तके टिप्पणाकारेण दृश्यतेऽधिकमेतत् ।
३. दशमस्कन्धसप्तमाध्यायस्य चत्वारिंशच्छ्लोकोऽयम् ।

सीताजीको चुराकर ले जाता है और लड़ाईके मैदानमें उनसे लड़नेके लिए गर्वपूर्वक आता है, तब भगवान् श्रीरामके धनुषकी टङ्कारसे ही उसका वह घमंड प्राणोंके साथ तत्क्षण विलीन हो जाता है ॥ २५ ॥ ❀ ❀ जिस समय झुंड-के-झुंड दैत्य पृथ्वीको रौंद डालेंगे, उस समय उसका भार उतारनेके लिये भगवान् अपने सफेद और काले केशसे बलराम और श्रीकृष्णके रूपमें कलावतार ग्रहण करेंगे। ❀ वे अपनी महिमाको प्रकट करनेवाले इतने अद्भुत चरित्र करेंगे कि संसारके मनुष्य उनकी लीलाओंका रहस्य बिल्कुल नहीं समझ सकेंगे ॥ २६ ॥ ❀ ❀ बचपनमें ही पूतनाके प्राण हर लेना, तीन महीनेकी अवस्थामें पैर उछालकर बड़ा भारी छकड़ा उलट देना और घुटनोंके बल चलते-चलते आकाशको छूनेवाले यमलार्जुन वृक्षोंके बीचमें जाकर उन्हें उखाड़ डालना—ये सब ऐसे कर्म हैं, जिन्हें भगवान्‌केसिवा और कोई नहीं कर सकता ॥ २७ ॥ ❀ ❀ जब कालियनागके विषसे दूषित हुआ यमुना-जल पीकर बछड़े और गोप बालक मर जायँगे, तब वे अपनी सुधामयी कृपा-दृष्टिकी वर्षासे ही उन्हें जीवित कर देंगे और यमुनाजलको शुद्ध करनेके लिये वे उसमें विहार करेंगे तथा विषकी शक्तिसे जीभ लपलपाते हुए कालियनागको वहाँसे निकाल देंगे ॥ २८ ॥ ❀ ❀ उसी दिन रातको जब सब लोग वहीं यमुना-तटपर सो जायँगे और दावाग्निसे आस-पासका मूँजका वन चारों ओरसे जलने लगेगा, तब बलरामजीके साथ वे प्राणसङ्कटमें पड़े हुए व्रजवासियोंको उनकी आँखें बंद कराकर उस अग्निसे बचा लेंगे। उनकी यह लीला भी अलौकिक ही होगी। उनकी शक्ति वास्तवमें अचिन्त्य हैं ॥ २९ ॥ ❀ ❀ उनकी माता उन्हें बाँधनेके लिये जो-जो रस्सी लायेंगी। वही उनके उदरमें पूरी नहीं पड़ेगी, दो अंगुल छोटी ही रह जायगी तथा जँभाई लेते समय श्रीकृष्णके मुखमें चौदहों भुवन देखकर पहले तो यशोदा भयभीत हो जायँगी, परन्तु फिर वे सम्हल जायँगी ॥ ३० ॥

नन्दं च मोक्ष्यति भयाद् वरुणस्य पाशाद् गोपान् बिलेषु पिहितान् मयसूनुना च ।
अह्न्यापृतं निशि शयानमतिश्रमेण लोकं विकुण्ठमुप[1]नेष्यति गोकुलं स्म ॥३१॥
गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेऽभिवर्षति पशून् कृपया रिरक्षुः ।
धर्तोच्छिलीन्ध्रमिव सप्त दिनानि सप्तवर्षो महीध्रमनघैककरे सलीलम् ॥३२॥
क्रीडन् वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्च्छितेन ।
उद्दीपितस्मररुजां व्रजभृद्वधूनां हर्तुर्हरिष्यति शिरो धनदानुगस्य ॥३३॥
ये च प्रलम्बखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः ।
अन्ये च शाल्वकपिबल्वलदन्तवक्त्रसप्तोक्षशम्बरविदूरथरुक्मिमुख्याः ॥३४॥
ये वा मृधे समितिशालिन आत्तचापाः काम्बोजमत्स्यकुरु[2]कैकयसृञ्जयाद्याः ।
यास्यन्त्यदर्शनमलं बल[3]पार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयम् ॥३५॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

वरुणस्य पाशाद्भयं तस्मान्मोचयिष्यति मयसूनुना व्योमनाम्ना अह्नि आपृतं व्यापृतं व्यापारयुक्तं निशि शयानमिति च वैकुंठप्राप्तिसाधनानुष्ठानाभावो दर्शितः। उपनेष्यति प्रापयिष्यति गोकुलवासिनं जनम्। स्मेत्याश्चर्ये ॥ ३१ ॥ ❀ ❀ देवे इन्द्रे पशून् रिरक्षुः रिरक्षिषुरित्यर्थः। अनघे श्रमरहिते एकस्मिन्नेव करे सलीलं यथा तथा महीध्रं गोवर्धनं धर्ता धारयिष्यति। उच्छिलींध्रमुद्गतं छत्राकमिव। सप्तवर्षाणि वयो यस्य सः ॥ ३२ ॥ ❀ ❀ निशि रात्रौ निशाकररश्मिभिर्गौर्यां धवलायाम्। वने क्रीडन् कलानि मंजुलानि पदानि यस्मिन् तच्च तदायतं दीर्घं मूर्च्छितमालापविशेषयुक्तं गीतं तेनोद्दीपितः स्मर एव रुक् यासां तासां गोपीनां हर्तुः शंखचूडस्य शिरो हरिष्यति ॥ ३३ ॥ ❀ ❀ ये च प्रलंबादयस्ते सर्वे हरिणा हेतुभूतेन तदीयं निलयदर्शनं दर्शनायोग्यं वैकुंठमलं यास्यंतीत्युत्तरेणान्वयः। खरो धेनुकः। दर्दुर इव दर्दुरो बकः। इभः कुवलयापीडः। कुजो नरकः। कपिर्द्विविदः ॥ ३४ ॥ ❀ ❀ ये च मृधे आत्तचापाः समितौ संग्रामे शालंते श्लाघंते ते समितिशालिनः। ननु

---

❀ केशों के अवतार कहनेका अभीप्राय यह है कि पृथ्वीका भार उतारनेके लिए तो भगवान्‌का एक केश ही काफी है। इसके अतिरिक्त श्रीबलरामजी और श्रीकृष्णके वर्णोंकी सूचना देनेके लिये भी उन्हें क्रमशः सफेद और काले केशोंका अवतार कहा गया है। वस्तुतः श्रीकृष्ण तो पूर्णपुरुष स्वयं भगवान् हैं—कृष्णस्तु भगवान् स्वयम्। १. प्रा० पा०—उपधास्यति। २. प्रा० पा०—कुरुसृञ्जयकैकयाद्याः। ३. प्रा० पा०—युधि पार्थभीमव्या०।

प्रलंबखरकपिबल्वलरुक्मिप्रमुखा बलभद्रेण निहताः । कांबोजादयश्च भीमार्जुनादिभिः, शंबरः प्रद्युम्नेन यवनो मुचुकुंदेन न तु हरिणा तत्राह । बलो भीमः पार्थ इत्यादयो व्याजाह्वयाः कपटनामानि यस्य तेन सप्तोक्षाणस्तु दमिताः कालांतरे यास्यंतीति भावः । एतच्च सर्वमपि कर्म दिव्यमिव तच्चान्यथा न भाव्यमिति पूर्वेणैव संबंधः ॥ ३५ ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

"ते तु ब्रह्महदं नीताः" इति वक्ष्यमाणरीत्याऽक्रूरतीर्थं यद्वा नित्यमेव श्रीकृष्णप्रेमचेष्टत्वं तदर्थं नानाप्रयासानन्तरं तदेकसमाधित्वं च "यद्धामार्थसुहृत्प्रियार्थतनयप्राणाशयास्त्वत्कृते" इति ब्रह्मवाक्यात् । "इति नंदादयो गोपाः कृष्णरामकथां मुदा कुर्वंतो रममाणाश्च नाविंदन्भववेदनाम् ॥" इति वाक्याच्च । ब्रह्मसमाधिपक्षे श्रीमन्नन्दान्वेषणार्थ एव तद्दिने व्यापारश्रमेण निशि निद्रायामेव तद्दर्शनमिति भक्तेच्छादायित्वं दर्शितम् । अत्र सर्वांते यद्गोलोकप्रापणं तदप्यनेनैव सूचितं दावाग्निपानलीलावत् ॥ ३१ ॥ ❀ ❀ इत्यर्थ इति । वर्णलोपश्छांदसः । सर्वत्र यत्तदोरध्याहारेणान्वयः कार्यः ॥ ३२, ३३ ॥ ❀ ❀ बके दर्दुरसाम्यं हि नेत्रसंमीलनपूर्वकस्थितिरेव आद्यपदेन पीठादयो ग्राह्याः ॥ ३४ ॥ ❀ ❀ अत्राक्षिपति नन्विति । कालांतरे यास्यंतीति तेषां दमनमेव हरिणा कृतं न तु ते मारिता अतो हरिस्पर्शप्रभावादेव कालांतरे देहपातेपि तेषां हरिपदप्राप्तिरेव भविष्यतीति तात्पर्य्यम् ॥ ३५, ३६ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

रासोन्मुख इति रासो नाम बहुनर्त्तकीयुक्तो नृत्यविशेष इति दशमस्कन्धीयत्रयस्त्रिंशाध्यायस्य द्वितीयश्लोकटीकायां स्वामिनः । तत्क्रीडोन्मुख इत्यर्थः । व्रजभृद्वधूनामिति । व्रजभृत् गोष्ठपालकस्तेषां वधूनामित्यर्थः । [ शङ्खचूडस्येति । शङ्खचूडवधो दशमे । चतुस्त्रिंशाध्याये वर्णितः ॥ ३३ ॥ ❀ ❀ दर्दुर इति । दर्दुरो बकः जलवाससाम्यात् । [ अरिष्टेत्यादि । अरिष्टो वृषभासुरः । मल्लाश्चाणूरादयः । यवनः कालयवनः ॥ पौण्ड्रकः मिथ्यावासुदेवः । आदिपदेन काशिराजादयः ॥ शम्बरेत्यादि । शम्बरो दैत्यः विदूरथः दन्तवक्त्रभ्राता रुक्मी श्यालको मुख्यो येषां विन्दानुविन्दादीनां ते च । ] ॥ ३४ ॥ ❀ ❀ सप्तोक्षाण इति । सप्त वृषभा इत्यर्थः । कालान्तरे इति मरणानन्तरमित्यर्थः । यद्यप्येते कालान्तरे मृतास्तथापि तत्सम्बन्धप्रभावादेव मरणानन्तरं वैकुण्ठं यास्यन्तीति भावः ॥ ३५ ॥ ३६ ॥

### श्रीमद्वीरराघवव्याख्या

अपि च वरुणस्य पाशाद्यद्भयं तस्मान्नन्दं स्वपितरं मोचयिष्यति मयसूनुना व्योमासुरेण बिलेषु पिहितात् तिरोधापितान् गोपांश्च मोक्ष्यतीत्यर्थः । किंचान्हि दिवसेऽतिश्रमेणाप्तं व्यापारग्रस्तं निशि शयानं गोकुलं गोकुलवासिजनं दृष्ट्वा तेषु स्वानुवृत्तिजनितकृपया विकुण्ठं नित्यं लोकं निरतिशयानंदलोकं उपनेष्यति प्रापयिष्यतीत्यर्थः । स्मेत्याश्चर्ये ॥ ३१ ॥ ❀ ❀ मखे इन्द्रयागे प्रतिहते सति मखविप्लवाय गोवर्द्धनपर्वतयागनाशार्थं देवे इन्द्रेऽभिवर्षति सति पशून्कृपया रिरक्षुः रक्षितुमिच्छुः सप्तवर्षः सप्तवर्षाणि वयो यस्य तथाभूतः । अनघैककरेऽनघेऽघरहिते एकस्मिन्नेव करे अनघेति नारदसंबोधनं वा सलीलं यथा तथा महीध्रं गोवर्द्धनाख्यमद्रिं सप्तदिनानि उच्छिलींध्रमिव धर्ता धरिष्यति । उच्छिलींध्रं उद्गतछत्राकमिवेत्यर्थः ॥ ३२ ॥ ❀ ❀ निशाकरश्चन्द्रः तस्य रश्मिभिर्गौर्यां धवलायां रात्रौ वने क्रीडन् विहरन् कलानि मधुराणि पदानि यस्मिंस्तदायतं दीर्घं मूर्छितमालापविशेषयुक्तं गीतं तेन उद्दीपितः स्मरः काम एव रुक् रोगो यासां तासां व्रजं बिभ्रतीति व्रजभृतः गोपाः तेषां वधूनां गोपीनां हर्तुश्चोरयतो धनदानुगस्य कुबेरभृत्यस्य शंखचूडाख्यस्य शिरो हरिष्यति ॥ ३३ ॥ ❀ ❀ ये च प्रलंबादयः ते सर्वे हरिणा हेतुभूतेन तदीयं हरिसंबंधि अदर्शनं,प्राकृतेन्द्रियाविषयं वैकुंठनिलयं लोकं यास्यंति अलं तद्वर्णनेन तच्चेष्टितानामनंतत्वान्न तद्वर्णने मम सामर्थ्यमस्तीति भावः । खरो धेनुकः दर्दुरो बकः इभः कुवलयापीडः कुजो नरकः कपिर्द्विविदः सप्तोक्षाणः बलीवर्दाः ॥ ३४ ॥ ❀ ❀ मृधे युद्धे ये वा आत्तचापाः धृतधन्वानो राजानः समितिशालिनः समितौ संग्रामे शालंते श्लाघंते इति समितिशालिनः कांबोजादिदेशाधिपतयः ननु प्रलंबादयो बलभद्रेण हताः कांबोजादयो भीमार्जुनादिभिश्च शंबरः प्रद्युम्नेन यवनो मुचुकुंदेन न तु हरिणा तत्राह बलभीमपार्थ इति व्याजाः कपटा आह्वयाः नामानि यस्य तेन बलभीमादिरूपेण च स एव हरिः सर्वसंहर्तेत्यर्थः । सप्तोक्षाणस्तु तेन दमिताः कालांतरे यास्यंतीति भावः । एतच्च सर्वमपि कर्म दिव्यमिव तच्चान्यथा न भाव्यमिति पूर्वेणान्वयः ॥ ३५ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

पाशाद्भयान्निरयविद्यायां शयानं जल्प्या अन्यथाज्ञानहेतुवाचावृतं अन्यथाज्ञानहेतुर्यावाक् सा जल्पिः प्रकीर्तितेति च अतएवातिश्रमेण संसारक्लेशेन पीडितं गोकुलं विकुंठे लोके उपधास्यतीति यत्तदपि ॥ ३१ ॥ ❀ ❀ मखे आत्मोद्देशे यज्ञे देवे इन्द्रे व्रजविप्लवाय जलौघेन गोष्ठनाशाय । गोष्ठा ध्वनिवहा व्रजा इति रिरक्षुः रक्षितुकामः महीध्रं गोवर्धनगिरिम । सलीलं धर्ता धारयिष्यतीति उच्छिलींध्रं छत्राकम् ॥ ३२ ॥ ❀ ❀ निशाकरस्य रश्मिभिर्गौर्यां धवलत्वं प्राप्तायां निशि रात्रौ । रासक्रीडाभि-

मुख श्रीकृष्णः वने क्रीडन् सन् कलपदं चायतं च मूर्च्छितं च तेन सप्तस्वरसमाहारवतागानेन सप्तस्वरसमाहारो मूर्च्छितेति प्रकीर्तितेति उद्दीपित उज्ज्वलितः स्मराख्यो रुग्रोगो यासां ता उद्दीपितस्मररुजस्तासां व्रजसदां व्रजनिलयानां वधूनां स्त्रीणां हर्तुर्नेतुः धनदानुगस्य शंखचूडाख्यस्य शिरो हरिष्यतीति इदमपि विष्णुत्वे घटते नान्यथेति ॥ ३३ ॥ ❀ ❀ ये प्रलंबादयः कृष्णाख्येन हरिणाऽदर्शनमिताः ये चान्ये जरासंधादयः ये च कुरुपांडवसेनागताः कांबोजादयः बलपार्थभीमद्रोणाद्रोण्यादिव्याजाह्वयेन हरिणा मरणं प्रापितास्ते सर्वे तदीयं निलयं यांतीत्यन्वयः । द्वेषिण उदासीना भक्ता इति त्रिविधा जीवास्तत्र द्वेषिणो नितरां लीयते सुखं यस्मिंस्तदंधं तमो यांति उदासीना निरयं नरकं भक्ता निष्कामस्याभीष्टानंदस्य प्राप्तिर्यस्मिंस्तं वैकुंठादिकं यांतीत्यर्थः । सर्वं चास्थानं हरेर्विद्यमानं तदुक्तं विद्वेषिणोप्युदासीना भक्ता अपि न संशयः । हरेर्हि सदनं यांति व्यक्तं भक्तैस्तु गम्यते आरभ्यतम आमुक्तेः कृष्णस्य सदनं यतः अव्यक्तहरिलोकत्वादन्येषामन्यलोकतेति रामभीमादिनामानि हरेरेव मुख्यानि रमणशक्त्यभयवर्णादीनां शक्तिवृत्तिहेतुनां हरेर्मुख्यत्वादन्यत्रामुख्यत्वात् व्यवहारार्थं संकेतितत्वाद्व्याजानि तदप्युक्तं रामभीमार्जुनादीनि विष्णोर्नामानि सर्वशः रमणाभयवर्णाद्याः शब्दवृत्तेर्हि हेतव इत्यादि रयगताविति धातोः रलयोरभेदः न्यक्भावं निरयं नीचगतिं तम इति वा निर्न्यग्भावनिकामयोरिति ॥ ३४ ॥ ३५ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

वरुणस्य पाशाद् यद्भयं तस्मादिति साक्षात् ( भयं ) पाशसंबन्धो न विवक्षितः । अन्ह्याप्लुतं निशि शयानमिति ते तु ब्रह्महृदं नीता इत्यत्राक्रूरतीर्थत्वपक्षे नित्यमेव श्रीकृष्णप्रेमात्मकचेष्टत्वं तदर्थनानाप्रयासानन्तरं तदेकसमाधिकत्वञ्च ज्ञेयम् । यद्धामार्थसुहृत् प्रियात्मतनयप्राणाशयास्त्वत्कृते इति श्रीब्रह्मवाक्यात् । इति नन्दादयो गोपाः कृष्णरामकथां मुदा कुर्व्वन्तो रममाणाश्च नाविन्दन् भववेदनामिति श्रीशुकवाक्याच्च । टीकाया एव मतान्तरेण ब्रह्मसमाधिपक्षे श्रीमन्नन्दान्वेषणार्थ एव तद्दिने व्यापारस्तत्क्रमेण निशि निद्रा निद्रायामेव तद्दर्शनमिति विशेषो ज्ञेयः । एवं भक्तेच्छादायित्वं दर्शितम् । अत्र सर्व्वान्ते यत् गोलोकप्रापणं तदप्यनेनैव सूचितं दावाग्निपानलीलावत् ॥ ३१ ॥ ३२ ॥ ❀ ❀ पूर्व्ववदत्र रासलीलया सह होरिकालीलामेकीकृत्य वर्णनम् ॥ ३३ ॥ ❀ ❀ ये चेति युग्मकम् । बलपार्थेति दैत्यमोक्षदायित्वलक्षणया सर्व्वासाधारणशक्त्या तेष्वावेशात् । इदन्तु यत्र द्विविदादिवधे तस्यासाक्षात्वं तत्रैव ज्ञेयम् । साक्षाद्भावे तु तन्निरीक्षमेव मुख्यं कारणम् । यथोक्तं श्रीभीष्मेण यमिह निरीक्ष्य हता गताः स्वरूपमिति केचिदलमदर्शनं ब्रह्मलयं, केचित्तु तदीयनिलयमिति भेदम् ॥ ३४ ॥ ३५ ॥ ३६ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

वरुणस्य पाशाद्भयं निषिद्धसमयस्नायिनं मां वरुणः पाशैर्बद्ध्वा स्वलोक एव स्थापयिष्यतीति नन्दकर्तृकं यद्भयं तस्मात् । वस्तुतस्तु नन्दस्तेन न बद्धः कृष्णदर्शनार्थिना क्षणमात्रमेव स्वलोक एव स्थापित इत्येवं तत्त्वम् । मयसूनुना व्योमेन अह्नि आप्लुतं तद्दिने श्रीमन्नन्दकृष्णयोर्विच्छेददुःखेन तदन्वेषणार्थं नानाव्यापारेण च युक्तं निशि तद्रात्रौ तत्क्रमेण शयानम् । विकुण्ठं वैकुण्ठम् ॥ ३१ ॥ ❀ ❀ देवे इन्द्रे । रिरक्षुः रिरक्षिषुः । धर्त्ता धरिष्यति उच्छ्रिलीन्ध्रम् उद्धृतछत्राकमिव । अनघे श्रमरहिते एकस्मिन्नेव करे ॥ ३२ ॥ ❀ ❀ निशि कथम्भूतायां निशाकररश्मिभिः गौर्य्यां धवलायाम् । रासोन्मुखः क्रीडन् भविष्यति दिनान्तरभवं शंखचूड़वधमपि राससान्निध्यात् तत्साहित्येनैवाह कलेति । कलपदस्य मधुरास्फुटगीतस्यायतं मुर्च्छितं मूर्च्छना तेन । व्रजभृतो गोपास्तेषां वधूनां हर्त्तुः शङ्खचूड़स्य शिरो हरिष्यति यद्वा तस्यामेव शङ्खचूड़वधानन्तरमर्द्धरात्रे रासञ्च करिष्यति रासोन्मुख इत्युक्तेः ॥ ३३ ॥ ❀ ❀ एवमतिमाधुर्य्याधिक्याद्वृन्दावनीयलीलाः किञ्चिद्व्यासेन प्रोच्या अन्या असुरवधलीलाः समासेनैवोद्दिशति द्वाभ्याम् । ये च प्रलम्बादयस्ते सर्व्वे हरिणा हेतुभूतेन केचिदलमत्यर्थमदर्शनं सायुज्यं केचिच्च तदीयं निलयं वैकुण्ठं यास्यन्तीत्युत्तरेणान्वयः । खरो धेनुकः, दर्दुरसंज्ञको बकः । इभः कुवलयापीड़ः, कुजो नरकः कपिर्द्विविदः ॥ ३४ ॥ ❀ ❀ समितौ संग्रामे शालन्ते श्लाघन्ते इति समितिशालिनः ननु प्रलम्बखरकपिबल्वलरुक्मिप्रमुखा बलभद्रेण निहताः काम्बोजादयश्च भीमार्ज्जुनादिभिः शम्बरः प्रद्युम्नेन यवनो मुचुकुन्देन, न तु हरिणा तत्राह । बलपार्थभीमादयो व्याजेनैवाह्वया नामानि यस्य तेन । सप्तोक्षाणस्तु तेन दमिताः कालान्तरे यास्यंतीति भावः । अत्र प्रलम्बखरादयः सायुज्यं पौण्ड्रकदन्तवक्त्रादयो वैकुण्ठं यास्यन्तीति विवेचनीयमग्रे व्याख्यास्यमानयुक्तेः ॥ ३५ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किंच वरुणस्य पाशात् यद्भयं तस्मान्नंदं स्वपितरं मोक्ष्यति मोचयिष्यति मयस्य सूनुना व्योमाख्येन बिलेषु पिहितान् गोपांश्च मोक्ष्यति किंचाह्नि दिवसे आप्लुतं व्यापारयुक्तम् । श्रमेण निशि शयानं गोकुलम् । स्वानन्यशरणं गोकुलवासिनं जनम् । विकुंठं निजलोकमुपनेष्यति प्रापयिष्यति स्मेत्याश्चर्ये ॥ ३१ ॥ ❀ ❀ हे अनघ नारद गोपैः मखे इंद्रयज्ञे प्रतिहते निवारिते सति व्रजविप्लवाय देवे इंद्रेऽभिवर्षति सति पशून् कृपया रिरक्षुः रक्षितुमिच्छुः सप्तवर्षाणि वयो यस्य सः

एककरे एकस्मिन्नेव करे सलीलं यथा तथा उच्छिलींध्रमिवोद्धृतं छत्राकमिव महीध्रं गोवर्द्धनाख्यं गिरिं धर्ता धरिष्यति मखे प्रतिहते व्रजविप्लवाय देवेऽभिवर्षतीत्यनेन सकामानां क्रौर्यम्। अनघेत्यनेन निष्कामानां महतां निष्पापत्वम्। एकस्मिन्नित्यनेन यस्मिन्करे गिरिर्धृतस्तस्य श्रमराहित्यम्। सप्तदिनानि सप्तवर्ष इत्यनेन भगवतः सर्वत्र कालानभिभूतैश्वर्यवत्वं च दर्शितम् ॥ ३२ ॥ किंच निशाकरस्य चंद्रस्य रश्मिभिर्गौर्यां धवलायां निशि रात्रौ वने रासोन्मुखः रासोत्सवं कर्तुं प्रवृत्तः सन् कलानि मधुराणि पदानि यस्मिन् तच्च आयतं दीर्घं मूर्छितमालापविशेषयुक्तं गीतं तेन उद्दीपितः स्मरो मन्मथ एव रुक् रोग इव क्षोभकः यासां व्रजभृद्वधूनां गोपांगनानां हर्तुः शंखचूडस्य शिरः क्रीडन्नेव हरिष्यति ॥ ३३ ॥ ❀ ❀ किंच हरिणा हेतुभूतेन ये च प्रलंबादयस्ते अदर्शनं प्राकृतेंद्रियाविषयं तदीयं हरिसंबन्धिनिलयं स्थानं वैकुंठं यास्यतीत्युत्तरेणान्वयः। खरो धेनुकः दर्दुर इव दर्दुरो बकः, अरिष्टो वृषभासुरः इभः कुवलयापीडः कुजः भौमासुरः कपिर्द्विविदः सप्तोक्षाणः सप्तवृषाः ॥ ३४ ॥ ❀ ❀ ये वा ये च मृधे युद्धे समितौ संग्रामे शालंते श्लाघंते इति समितिशालिनः आत्तचापाः धृतकार्मुकाः ननु प्रलंबखरकपिप्रमुखा बलेन कांबोजादयश्च भीमादिभिर्निहताः शंबरः प्रद्युम्नेन यवनश्च मुचुकुंदेन निहतः नतु हरिणा तत्राह बलभीमपार्थव्याजाह्वयेनेति बलो भीमः पार्थ इत्यादयः व्याजाह्वयाः निमित्तनामानि यस्य तेन सप्तोक्षाणस्तु हरिणा न निहताः किंतु तद्दर्शनादिकलाभेन स्वमृत्युकाले प्राणांस्त्यक्त्वा तदीयं निलयं यास्यंतीति भावः। अलमिति श्रीकृष्णचरित्रवर्णनेनालमेतावतैव कृतार्थोऽस्मीति साकल्येन वर्णनासंभवादिति भावः। एतच्च सर्वमपि दिव्यमेव तच्चेतरथा न भाव्यमिति पूर्वेणैवान्वयः ॥ ३५ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवमुल्लासं निरूप्य भ्रुवं निरूपयति। भ्रूशब्देन हि भगवत्कृतं फलमुच्यते। "तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमि"[1]ति वाक्यात्। तत्फलं दुःखाभावसुखरूपम्। दुःखस्य परमा सीमा नरकादिः। सुखस्य परमा सीमा वैकुण्ठाख्यम्। तदुभयं भगवान् साधनरहितेभ्यः करोतीति विचारेण भगवत्त्वम्। तत्र दुःखाभावद्वयमाह—नन्दं च मोक्ष्यतीति। भयात्सर्परूपात् वरुणस्य पाशाच्च। उभयत्राऽपि नन्दो रक्षितो व्रते[2] यात्रायां प्रवृत्तः। अनेनाऽन्ये धर्मा अस्वधर्माः। भगवद्धर्मा एव स्वधर्माः। अतो भगवानात्मा। तस्मात्परब्रह्मेत्यविवादम्। नन्दं चेति चकारो यशोदाया उद्धारं कृत्वा नन्दस्याऽपि समुद्धारं कृतवानित्युक्तसमुच्चयार्थः। नन्द एव वा[3] वारद्वयं मोचित इति। वरुणस्य पाशात्सर्पद्वयं तस्मात्। अन्येषामपि दुःखदूरीकरणमाह—गोपान् बिलेषु पिहितान् मयसूनुना चेति। मयसूनुर्व्योमासुरः। स हि गोपरूपः समागतो बालकान्मेषायितान्नीत्वा गुहायां स्थापितवान्। तत्र च तेनैव मार्गेण पातालगमने बिलानि सन्ति। तत उक्तं—बिलेषु पिहितानिति। सर्पादयो वा तत्र निहितान्नयेयुरिति बिलपदम्। चकारादन्येऽप्युपद्रवा अनुक्ताः स्वयमूह्याः। एवं दुःखाभावमुक्त्वा परमसुखमाह—अह्न्यापृतमिति। अह्नि दिवसे आपृतं लौकिकक्रि[4]यया व्याप्तम्। निशि शयानमतिश्रमेणेति निर्भरनिद्रया रात्रौ व्याप्तम्। एवमहोरात्रं परलोकसाधनरहितं स्वमेव वैकुण्ठं व्यापिवैकुण्ठं उप समीप एव नेष्यति। स्वनिकट एव मायाजवनिकां दूरीकृत्य तत्रैव वैकुण्ठे नीतवान्। इदं चरित्रं न योगस्य, न मायायाः, न कालस्य न मण्यादीनाम्। अतो ब्रह्मचरित्रमेवैतत्। नयने हेतुः स्वमिति। आत्मत्वेन भगवांस्तत्परिगृहीतवान् ॥ ३१ ॥ ❀ ❀ एवं भ्रुवं निरूप्य भङ्गं निरूपयति—गोपैर्मखे प्रतिहत इति। पूर्वसिद्धफलस्य [5]भङ्गोऽत्र निरूप्यते। मखेन रक्षा। मखभङ्गेन क्लेशः। देवताप्रीतिश्च मखफलम्। नियतफलत्वं च तस्य निरूप्य तत्प्रतिघात उच्यते। गोपाः सर्वदा मखं कुर्वन्ति। तैरेव कृत्वा भगवांस्तं मखं दूरीकृतवान्। तस्मिन्मखे प्रतिहते रक्षकत्वात्तदभावे देवे अभिवर्षति व्रजनाश आरब्धः। अनेन देवताप्रीतिर्यागफलमिति निश्चितम्। समर्थावलम्बन एव मर्यादा त्यक्तव्येति सूचितम्। तदा कृपया रिरक्षुर्भगवान् जातः। तदा सप्तदिनानि महीध्रं गोवर्द्धनमेककरे सलीलं धृतवान्। अनघेति सम्बोधनमुक्तविश्वासाय। धर्त्ता धरिष्यति। उच्छिलीन्ध्रमिवेति भाराभावाय। वर्षाकाले हि[6] उच्छिलीन्ध्रोद्गमः। अलौकिकवर्षात्वादलौकिकोच्छिलीन्ध्रोद्गम इतीन्द्रो बाधितः। सप्तदिनानीति सप्ततन्तुर्यज्ञो बाधितः सप्तदिनानि दुःखं प्रयच्छतीति। यत्रैव धर्मबाधो दृश्यते तत्रैव सप्तदिनान्युच्यन्ते। नि[7]वर्त्त्यं चेद्दुःखं तदा सप्त दिनानि निरन्तरं दुःखं भवति। अग्रे निवर्त्तते। अनिवर्त्त्यं चेत्सप्तम एव दिवसे भवति। स्वयमपि सप्तवर्षः। तथा परिच्छिन्नं कालमतिक्रान्तवान्। अत एव सप्ततन्तुमखभङ्गः अन्यथा फलं च। मर्यादा हि साङ्गेन वेदेन जन्यते। अङ्गानि षट्। आत्मा चैकः। अयं च संवत्सरः प्रजापतिः स साङ्गवेदप्रव[8]र्तक इति तमतिक्रम्य पश्चात्सप्ततन्तुमतिक्रान्तवान्। कालस्य भगवदवच्छेदकत्वाभावात्स[9]प्तधर्मवेष्टनमेव सप्तवर्षत्वम्। अयं च धर्मः सप्तमो भङ्गात्मकः। एककर इति एकां क्रियाशक्तिं स्थापितवान्। "तैरयं साध्यतां मख" इति वचनात्। अन्यथा तथैव गोवर्द्धनं स्थापयेत्[10]। सलीलमिति। वस्तुतस्तु यागस्य तथात्वाभावाद्भगवतैव तथा संपादनाद्भगवदिच्छयैव गोवर्द्धनः स्थितः। हस्तस्तु केवलं शास्त्रार्थत्वाय प्रदर्शितः। तथापि निरोधोपवासैर्दुःखावश्यकत्वं

---

१. परमेष्ठ्येति क. घ.। २. व्रतयात्रेति ख. ग.। ३. वा नास्ति ख.। ४. क्रिया व्याप्तं ख. ग.। ५. भङ्गो निरूप्यते घ.। ६. हि नास्ति ख.। ७. निवर्त्यते चेदिति ख.। ८. प्रवर्तित इतीति क. घ.। ९. सप्तवर्षवेदनमेवेति क.। १०. स्थापयेत्। अत्र तैरयं साध्यतामिति वाच्यमिति विशेषः ख. ग.।

मत्वा तन्निराकरणाय लीलां कृतवान् । सा[1] हि वेणुवादनरूपा भवति । सप्तरन्ध्रैरमृतपूरकः । तथा सति प्राणाभ्युदयनिःश्रेयसफलसिद्धिः । अतो निरोधदुःखमुपवासदुःखं वा न जातमित्यर्थः ॥ ३२ ॥ ॥ एवं भङ्गं[2] विनिरूप्य संसूचनं निरूपयति—क्रीडन् वने निशीति । भगवतो इदं संसूचनं स्वरूपफलार्थे । सम्यक्त्वं चाऽनिष्टनिवृत्तिमपि करोतीति । गोप्यो हि तत्र निदर्शनम् । ता एव हि भगवन्तं प्राप्तवत्यः । तत्सम्बन्धि चरित्रमेव भगवन्मार्गे फलसूचकम् । वने वृन्दावने । निशि रात्र्याम् । लौकिकवैदिकक्रियायां निवृत्तायां लोकेऽपि विनिवृत्ते तदा क्रीडति । तदाह—क्रीडन् वने निशीति । तन्निवर्त्तिका भक्तिरेव । अत एव निशाकरः । तस्य रश्मयो भक्तिप्रकाराः मनोरूपत्वाद[3]स्य चन्द्रस्य तदिच्छाविशेषाः । तै रश्मिभिर्गौरी रञ्जिता सर्वनिवृत्तिः । तादृश्येव निवृत्तिर्भगवत्क्रीडाहेतुः । अतएव भगवान् रासोत्सुकः । रासो नाम रसेन पूर्णः पदार्थोऽन्यसम्बन्धरहितः । स हि विचार्यमाणे प्रियाबहुस्त्रीकर्तृको नृत्यविशेषो भवति । तत्र भोगो वा । केवलं शृङ्गाररसाभिनिविष्टः । यथा भक्तगुणसौन्दर्याभिनिविष्टः । तदा अन्तः रसेन पूर्णस्तद्रसाविर्भावार्थं कलपदायतमूर्च्छनां कृतवान् । सा हि मूर्च्छनाऽन्येषां हृदये रसार्थं विवरं करोति । तस्मिंश्च विवरे भगवत्सम्बन्धाभावेन रसपूरणाभावात्तदर्थं भगवत्स्मरणात्मकः स्मरः प्रविष्टः । स हि विषयाभावाद्रोगत्वेन पर्यवसितः । सर्वो हि रसपूरकः स्वविषयमप्राप्य बुभुक्षादिवद्रोगतामापद्यते । अन्यथा देहनाशं मृत्युं वा न कुर्यात् । अनेन तासां मुख्योऽधिकारो निवारितः । भगवद्विषयकस्य कामस्य भगवद्धर्मप्रवेशाभावात् । अत एव तादृशीनां भगवत्सम्बन्धप्रतिबन्धकः कामाधिष्ठा[4]तृदेवतारूपः । अर्थाधिष्ठात्रीदेव[5]ताया धनदरूपाया भ्राता । अनुजत्वात्सोऽपि तादृशः । स तासां प्रतिबन्धको जातः । एवमपि सति भगवान् स्वेच्छया प्रवृत्त इति व्रजभृद्वधूनां हर्त्तुः शङ्खचूडस्य शिरो हरिष्यति । गुणत्रयाविष्टानामेव तादृशरोगरूपकामसद्भावे तत्प्रतिबन्धो भवति नतु गुणत्रयातीते भगवत्यासक्तानामतस्तस्य शिरो हृतवान् । कला अव्यक्तमधुरा अनभिव्यक्तपरमानन्दप्रतिपादकाः शब्दब्रह्मरूपाः स्वराः । तेषां पदं स्थानं गीतादि । तथाभूतानि वा पदानि । वाक्यार्थस्य तत्राऽप्रयोजकत्वात्पदानामेव तत्र स्वातन्त्र्यम् । आयतमूर्च्छनं दीर्घमूर्च्छनम् । मूर्च्छना हि सङ्गीते प्रसिद्धा स्वराणाम् । तस्य आयतत्वं सर्वचित्तप्रवेशयोग्यरूपता । मूर्च्छितशब्दाच्च रसान्तरमविवेकादिकं वा नोत्पत्स्यत इति सूचितम् । उद्दीपितो[6]यथाऽग्निर्दहति तथा स्मरेण तास्तथाभूता इव जाताः । अतएव स्मरस्य रोगत्वम् । व्रजमेव बिभ्रतीति न तद्भर्तॄणां रक्षकत्वम् । वधूत्वात्तासामेवाऽतितीव्रभावेन प्रतिबन्धकनिवृत्त्यभावः सूचितः । अतएव स हर्त्ता जातः । एवं भगवान् मुख्याधिकाराभावेऽपि स्वलक्षणं फलं प्रयच्छतीति गोपिकासम्बन्धिचरित्रं संसूचकं भवति ॥ ३३ ॥ ॥ एवं संसूच[7]नं निरूप्य भूरिभावं निरूपयति भूर्यनुग्रहं वा द्वाभ्याम्—ये च प्रलम्बेति । एते सर्वे दैत्या दैत्यांशराजानश्च भगवता हतास्तदीयं निलयं वैकुण्ठं गताः । ये च पुनः प्रलम्बादयो बलभद्रादिभिर्हतास्तत्रापि ये भगवन्मुखारविन्दं पश्यन्तः प्राणान् जहुः पार्थास्त्रपूता धर्मयुद्धे न हतास्तेऽपि वैकुण्ठमेव गताः । अन्ये ये प्रलम्बादयस्ते अदर्शनं गताः । अव्यक्ते प्रकृतौ लीना इत्यर्थः । अथवा । प्रथमश्लोकोक्ता भूरिरूपं प्रकृतिमेव गताः । तस्या व्यापकत्वाद्भूरित्वम् । द्वितीयोक्ता भगवन्तं गता इति । अथवा । उभये एते आवेशिनः प्रकृतिं गताः । अभिमानिनस्तु तदीयं निलयं गता इत्यर्थः । खरो धेनुकः । दर्दुरः कश्चिदन्यो यथा बकस्तथा सोऽपि । बक एव वा जलवासात् । बकदर्दुरेति पाठे अघासुरो वा दर्दुर इति केचित् । अरिष्टो वृषभासुरः । मल्लाश्चाणूरादयः । इभः कुवलयापीडः । यवनः कालयवनः । यवना वा मुचुकुन्दात्समागत्य ये मथुरायां हताः । कुजो नरकासुरः । पौण्ड्रको मिथ्यावासुदेवः । आदिशब्देन काशिराजप्रभृतयः । एते स्वभावत एव हताः । न तु देवान्तरवरपुष्टाः । अतो वरपुष्टत्वविशेषणेन अन्यत्वम् । ते च शाल्वादयः । कपिर्द्विविदः । स रघुनाथभक्तोऽपि तद्भक्तसङ्गेऽपि दुःसङ्गाद्धतः । शम्बरस्तु मायाशतवित् । अत्रैव वा बल्वलः । सोऽपि यज्ञविघ्नकर्तृत्वादृषीणामप्यशक्यत्वाद्वरसिद्ध इति ज्ञातव्यम् । सप्तोक्षाः बलीवर्देषु प्रविष्टा दैत्याः । ते हि भगवत्स्पर्श[8]मात्रेण हताः । अत एव तदर्थं सप्त रूपाणि कृतवान् । ते हि त्रिपुरवदेकक्षणे वध्याः अन्यथा अवध्या इति । बलीवर्दा एव पश्चाद्वा मृता इति । अन्ये वा सप्त बलीवर्दाः । विदूरथो दन्तवक्त्रभ्राता । रुक्मी शालकः स मुख्यो येषां विन्दानुविन्दादीनाम् । एते ह्येकैकशो भगवता सह युद्धे तद्भ्रातृपुत्रैर्वा हताः ॥ ३४ ॥ ॥ अतः परं निमित्तान्तरेण भगवत्सारथ्ये युद्धे हतानाह—ये वेति । एतेषां भगवतैव सह युध्यमानत्वात् द्वेषभावाच्च[9] मुक्तिर्युक्तापि । अन्ये तु निमित्तान्तरेण हता इति ये वेत्यनादरः । समितिशालिनो युद्धे पराक्रमवन्तः । सप्तम्या अलुक् । अत एव मृधे संग्राम आत्तचापाः । धर्मनिष्ठता सूचिता । काम्बोजादयोऽर्णान्तास्तत्तद्देशक्षत्रियाः । दशार्णा वा अर्णाः । सृञ्जयाः पाञ्चालाः । सृञ्जयाद्या इति पाठे धृष्टद्युम्नप्रभृतयः । एकैकश उभयपक्षेऽपि हताः अन्यथा पाण्डवानामर्थे मृतानां मुक्तिर्न स्यात् । प्रथमतः अदर्शनं गताः । यावद्भगवानत्र स्थितस्तावद्द्रष्टा भूत्वा अत्रैव स्थित्वा भगवता सह गता इत्यर्थः । अत्र प्रलम्बो बलभद्रेण हतः खरश्च । मल्लयवना यथायथम् । शम्बरः प्रद्युम्नेन । रुक्मी च बलभद्रेण । काम्बोजादयो भीमादिभिः । अत्र सर्वत्र बलपार्थभीमा इति तेष्वाविष्टस्य भगवत एव नाम । परं व्याजेन । बलपार्थभीमेति व्याजा[10]ह्वयानि यस्य । एतद्धननं भगवच्चरित्रम्

१. स हि वेणुवादनरूपो ग. । २. भङ्गं निरूप्येति ग. । ३. रूपत्वादस्य तदिच्छेति ग. । ४. धिष्ठात्री देवतेति ख. । ५. देवतारूपाया इति ख. ग. । ६. पितोऽग्निर्यथेति ख. । ७. संसूचनामिति ख. । ८. मात्रेणैवेति ख. । ९. च नास्ति ख. । १०. ह्वया यस्येति ख. ग. ।

आत्मत्वात् । अत एव हननादिकमनुक्त्वैव 'तद्गृहे गमनं निरूपितम् । "जातः कंसवधार्थाय" इत्यादि तु दृश्यमानाभिप्रायं कल्पान्तराभिप्रायं वा ॥ ३५ ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

**नन्दश्चे**त्यत्र पूर्वार्द्धेसद्धर्मरूपा उत्तरार्द्धे ऊतिरूपा च भ्रूर्निरूपिता ज्ञेया ॥ ३१ ॥ ❁ ❁ **गोपैरि**त्यत्र भङ्गमिति चाञ्चल्यम् । **रक्षकत्वात्तदद्भाव** इति । मखस्य रक्षकत्वात् मखाभावे । **अनेनेति** मखप्रतिघाते देवकृतातिवर्षाकथनेन । सूचने हेतुं स्फुटमाहुः **तदा कृपये**त्यादि । तथा च, भगवत्कृतरक्षाकथनेनेत्यर्थः । **तदे**ति रिरक्षुत्वे । **इतीन्द्रो बोधित** इति । एवं प्रकरणावस्थासाधनादिविरुद्धकार्यकरणेनेन्द्रः स्वसामर्थ्ये नैश्वरत्वादिज्ञानशालीकृत इत्यर्थः । तथा सति वर्षादावप्यहमेव प्रयोजकस्त्वन्तु मिथ्याभिमन्यसे इति बोधयित्वा दिवससङ्ख्ययान्यदपि बोधितवानित्याहुः **सप्तदिनानी**त्यादि । एतस्यैव प्रकारमाहुः **यत्रे**त्यादि । वर्षसङ्ख्यातात्पर्यमाहुः **स्वयमपी**त्यादि । अत एव तावत्सङ्ख्याककालातिक्रमादेव । **अन्यथाफलमि**ति कालमर्यादातिक्रमेण फलम् । नन्वेवं सति **सप्तमवर्ष** एव कुर्यादेतावत्संख्याककालातिक्रमस्य किं प्रयोजनमित्याकाङ्क्षायामाहुः **मर्यादे**त्यादि । तथाच, प्रमाणबलात्प्रमेयबलस्याधिक्यज्ञापनाय तदतिक्रम इत्यर्थः । नन्वेवं सति प्रमाणमेवातिक्रमेत् । किं कालातिक्रमेणेत्यत आहुः **अयमि**ति कालात्मकः । भगवतः कथं सप्तवर्षत्वमित्यत आहुः **कालस्ये**त्यादि । तथाच वेदगतमवच्छेदनं भगवत्युपचर्यते इति तथेत्यर्थः । **सप्तधर्मवेष्टनमि**ति पाठे सप्तधर्माङ्गी करणमित्यर्थः । सप्तवर्षत्वकथनस्य प्रकृतेऽप्युपयोगमाहुः **अयञ्चे**त्यादि । तथा चैतावत्प्रमेयं बोधयितुं सप्तवर्षोक्तिरित्यर्थः । एककरेण धरणस्य तात्पर्यमाहुः **एकामि**त्यादि । वामदक्षिणभेदेन द्विधा क्रियाशक्तिः । तयोराद्या केवलमेयोपयोगिनी । द्वितीया प्रमाणानुरोधिप्रमेयोपयोगिनी । तत्रोक्तवाक्येन क्रियाशक्तिरक्षाया अभिप्रेतत्वादाद्यां रक्षितवान् । यदि तद्रक्षामपि नाभिप्रेयात्तदेच्छामात्रेणैव गोवर्धनं स्थापयेत् । अतस्तादृशक्रियाशक्तिरक्षणायैककरेण धरणमित्यर्थः । **तथात्वाभावादि**ति रक्षकत्वाभावात् । **शास्त्रार्थत्वाये**ति क्रियाशक्त्यैव रक्षत्येवंरूपशास्त्रमर्यादापालनाय । एवमत्र सद्धर्मरूपो भङ्गः अनन्यत्वरूप उक्तः । तेन सद्धर्मस्य प्रकारान्तरस्थितिरेव भङ्ग इति सिद्ध्यति । **वंशरूपं भङ्गं** बोधयिष्यन्तः **श्रीगोवर्धनेनैव** रक्षायाः सिद्धौ लीलायाः कुत्रोपयोग इत्याकाङ्क्षायां वंशरूपभङ्गस्य सप्तमत्वात्तस्यैवाभिप्रेतत्वायाहुः **तथापी**त्यादि । वेणुवादनलीलैव तदा कृतेत्यत्र गमकमाहुः **सप्ते**त्यादि । तथाच, भङ्गस्य सप्तमत्वेन वेणोश्च सप्तरन्ध्रत्वेन तत्र तद्वादनस्य लीलाया एवौचित्यात् । ईशानुकथायाः प्रलयलीलात्वेन वंशस्याप्यात्मभञ्जकत्वेन वेणुवादनस्याप्यमृतपूरकतया मर्त्यामृतलौकिकामृतपरमामृतफलसाधकत्वात्प्रकारान्तरापादकत्वमिति तथेत्यर्थः । एवञ्चादीनत्वादिधर्माणां सर्गाद्याधिदैवकरूपत्वमतः सर्वं सुस्थमिति तदीयैर्विभावनीयम् ॥ ३२ ॥ ❁ ❁ **क्रीडन्नि**त्यत्र । **इदमि**ति गोपिकासम्बन्धि चरित्रं स्वरूपात्मकं यत्फलं तन्निमित्तं सम्यक् सूचनमित्यर्थः । वननिशापदयोः क्रमेण तात्पर्यमाहुः **लौकिके**त्यादि । **तदे**ति । अवैयग्र्येण जीवानां भगवदेकताननतायाम् । लौकिकवैदिकक्रियानिवृत्तिरपि भगवदिच्छाविशेषेण चेत्तदेव भक्तिफलभूतस्वरूपानुभवहेतुर्भवतीति ज्ञापयितुं निशाविशेषणतात्पर्यमाहुः **तन्निवर्तिके**त्यादि । **अत एवे**ति भक्तिबोधनार्थत्वादेव रञ्जिता सर्वनिवृत्तिरिति रञ्जनं पूर्वोक्तनिवृत्तिरूपमित्यर्थः । **अत एवे**ति भक्तिप्रयुक्तेच्छाविशेषवैशिष्ट्यादेव । **तत्रे**ति तादृशीषु । उत्सुकपदतात्पर्यमाहुः **केवलमि**त्यादि । तथाच, रासेनोत्सुक इति समासः । औत्सुक्यकार्यं विवृण्वन्ति **तदे**त्यादि । **तद्रसाविर्भावार्थमि**ति तासु तदर्थम् । **विषयाभावादि**ति भगवत्सम्बन्धाभावात् । ननु भगवत्सम्बन्धस्य कथं रोगत्वेन पर्यवसानं तत्राहुः **सर्वो** हीत्यादि । **देहनाशमि**ति उपचयाभावं तनुतामिति यावत् । एतेन भ्रमरगीते 'धारयन्त्यतिकृच्छ्रेणेत्यत्र काश्चन मृता' इति या व्याख्यातास्ता एता इति प्रतिभाति । **अनेने**त्यादि, स्मरणस्य रोगत्वकथनेन । तासां फलप्रकरणीयषष्ठाध्यायोक्तानां **भगवद्धर्मप्रवेशाभावादि**ति भगवद्धर्मेषु प्रवेशाभावात् । तत्र गमकमाहुः **अत एवे**त्यादि । **तादृशीनामि**ति लौकिककामवतीनाम् । **तादृश** इति । कामाधिष्ठातृरूपः । यदि तस्य कामस्य न भगवद्धर्मत्वं तदा भगवता किमिति प्रतिबन्धकनिवृत्तिः कृतेत्यत आहुः **एवमपी**त्यादि । ननु हीनेधिकारे भगवान् किमिति स्वेच्छया प्रवर्त्ततातो नैवमिति शङ्कायामाहुः **गुणत्रये**त्यादि । गुणत्रये तत्कार्ये वा आसक्तानाम्, तथा चेच्छायामप्यासक्तिरेव बीजमित्यर्थः । **मूर्च्छितशब्दादि**त्यादि, 'मूर्च्छा मोहसमुच्छ्राययोरि'ति धात्वर्थात्ततस्तथेत्यर्थः । **अत एवे**ति । एवमतितापजनकत्वादेव । **प्रतिबन्धकनिवृत्त्यभाव** इति मुख्यभक्तिप्रतिबन्धकीभूतो य कामस्तन्निवृत्त्यभावः । **मुख्याधिकाराभावादि**ति मुख्योधिकारः सर्वात्मभावरूपस्तदभावे । तथा च, निरोधस्कन्धेऽविहितभक्तेरेव नानाप्रकारिकाया निरूपितत्वात्कामलोभादिप्रतिबन्धकानपि भगवानेवंभावे दूरीकृत्य फलं प्रयच्छतीति एतस्य संसूचनं स्कन्धार्थः । तेनापि मुख्याधिकारे किं वाच्यमित्यपि संसूच्यत इत्यर्थः ॥ ३३ ॥ ❁ ❁ **ये चे**त्यत्र । प्राप्तिक्रियायाः कर्मणश्च प्रथमश्लोकेऽसत्त्वाद्भूरित्वस्य नान्तरीयकलक्षणत्वाच्च द्वाभ्यां मिश्रीकृत्योभयनिरूपणेऽप्यदोष इत्याशयेन पक्षान्तरमाहुः **भूर्यनुग्रहं** वेति । भूरित्वं मुक्तिः,

---

१. तद्गृहगमनमिति ग. ।

सा च रूपान्तरत्यागपूर्वकं स्वरूपावस्थानम्। वैकुण्ठमक्षरम्। तत्र स्वरूपावस्थानं सङ्घातानभिमाने जीवन्मुक्तानामपि भवति, तद्वत्प्रकृतिलीनानामपि सुषुप्ताविव। एतावान् परं विशेषो यद्वासनाराहित्यमक्षरैक्याभावेन च नानात्वस्य विद्यमानत्वात्तस्य, भूरित्वम्, अनुगृहीतानां त्वक्षराभेदादाश्रयत्वमेव, न तु कृपात्मकधर्मान्तरत्वम्, तस्य पूर्वोक्तधर्मविशिष्टे क्षण एव निवेशात्। किन्तु—अनु—भूरित्वोत्तरं गृह्णात्यावेयत्वेन स्वीकरोतीत्यनुग्रहः इति योगेनाश्रय एव तथेति तदिदं हृदि कृत्वा विभजन्ते एत इत्यादि श्लोकक्रमविरोधे एवं भवतीत्यरुच्या पक्षान्तरमाहुः अथवेत्यादि। गता इति तमोभिभवेन भेदस्यापि ज्ञानाविषयत्वात्तद्भावं प्राप्ता इत्यर्थः। तथा सति कथं भूरित्वमित्यत आहुः तस्या इत्यादि। आकाशवद्भूयानित्यादौ व्यापकेपि तथा प्रयोगात्तथेत्यर्थः। एवं यद्यपि क्रमस्वीकारो भवति तथापि यत एतद्विमुच्यत इति 'तदेवरूपं दुरवापमापे'त्यादिबहुवाक्यविरोधात्तदपेक्षया क्रमात्मकधर्ममात्रविरोधस्य स्वल्पत्वात् पूर्वोक्तानुसृतमेव पक्षान्तरमाहुः अथवा उभये इत्यादि। अस्मिन् पक्षे माध्ववज्जीवस्वीकारः प्रथमपक्षाद्विशेषः। सहजासुराणामप्यसुरत्वं प्रमेयबलेन निवर्त्य स्वनिलयप्रापणं माध्वमतादपि विशेष इति बोध्यम्। न चावेश्याभिमानिनोः फलवैपरीत्यं शङ्कनीयमन्यथाकरणसामर्थ्यस्य निष्प्रत्यूहस्य भगवतः स्वतः सिद्धत्वादिति ॥ ३४ ॥ ❀ ❀ ये वा इत्यत्र अन्यथेति मुक्तिहेतुभूतस्य द्वेषादेरभावे। क्रमेतेषां मुक्तिबोधकप्रमाणानि चानुरुध्यादर्शनस्यार्थान्तरमाहुः प्रथमत इत्यादि। आत्मत्वादिति आदायकत्वात्, यच्चाप्नोति यदादत्ते यच्चात्तिविषयानिह। यच्चास्य सन्ततो भावः तस्मादात्मेति कीर्त्यते' इति तन्निर्वचनात्। ननु मूले आदायकत्वमेवात्राभिप्रेतमित्यत्र किं गमकमित्यत आहुः अत एवेत्यादि। तत्रैतद्बोध्यम्। एते अदीनत्वादयः परस्परनिरपेक्षतयैव परमृष्टाः सापेक्षास्तु फलिष्यन्तीति ॥ ३५ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

यच्च भयात् सुदर्शनसर्पग्रासरूपात् वरुणस्य पाशाच्च नन्दं स्वपितरं मोक्ष्यति, मयसूनुना व्योमनाम्नाऽसुरेण गोपान् विक्रीडतो गोपबालांश्च बिलेषु पर्वतगुहायां पिहितान् तिरोधापितान् विमोक्ष्यति, यच्च अह्नि दिवसे आपृतं व्यापृतं कृतव्यापारं अत एवातिश्रमेण त्रस्तं निशि शयानमिति सर्वथा वैकुण्ठगमनसाधनहीनमपि गोकुलं गोकुलवासिजनं विकुण्ठे नित्ये लोके उपनेष्यति प्रापयिष्यति, तच्च कर्म दिव्यमेवेतरथा न भाव्यमित्यन्वयः। भगवत्कर्मणोऽद्भुतत्वं सूचयति—स्मेति ॥ ३१ ॥ ❀ ❀ यच्च गोपैर्मखे इन्द्रयागे प्रतिहते निवर्तिते सति व्रजस्य विप्लवाय विनाशाय देवे इन्द्रे अभिवर्षति सति कृपया पशून् गोमहिष्यादीन् पशुतुल्यान् अज्ञान् व्रजवासिजनांश्च रिरक्षुः रिरक्षिषुः रक्षितुमिच्छुः सप्तवर्षः सप्तवर्षवयस्को बालोऽपि अनघे श्रमरहिते एकस्मिन्नेव करे सलीलं वेणुवादनहासादिलीलासहितं यथा भवति तथा सप्तदिनानि सप्तदिनपर्यन्तं महीध्रं गोवर्धनाख्यमचलं उच्छिलीन्ध्रमिव उद्गतछत्राकमिव धर्त्ता धारयिष्यति, तदपि कर्म दिव्यमिवेतरथा न भाव्यम् ॥ ३२ ॥ ❀ ❀ यच्च निशाकरश्चन्द्रस्तस्य रश्मिभिर्गौर्यां धवलायां निशि रात्रौ वने क्रीडन् विहरन् रासोन्मुखो नृत्यार्थमुद्यत कलानि मधुराणि पदानि यस्मिंस्तदायतं दीर्घं मूर्छितं मूर्च्छनालापविशेषयुक्तं यद्गीतं तेन उद्दीपित उद्बुद्धः स्मरः काम एव रुक् रोगो यासां तासां व्रजं बिभ्रति पोषयन्तीति व्रजभृतो गोपास्तेषां वधूनां गोपीनां हर्त्तुर्गोपीश्चोरयतो धनदानुगस्य कुबेरभृत्यस्य शङ्खचूडाख्यस्य शिरो हरिष्यति, तदपि कर्म दिव्यमिवेतरथा न भाव्यम् ॥ ३३ ॥ ❀ ❀ ये च प्रलम्बादयस्ते सर्वे हरिणा हतास्तत्र केचिदलमदर्शनं लयं केचित्तु तदीयं निलयं वैकुण्ठं यास्यन्तीति द्वयोरन्वयः। इत्यपि तत्कर्म दिव्यमिवेतरथा न भाव्यम्। खरो धेनुकः। दर्दुरो बकः जलवाससाम्यात्। अरिष्टो वृषभासुरः। मल्लाश्चाणूरादयः। इभः कुवलयापीडः। यवनः कालयवनः। कुजो नरकासुरः। पौण्ड्रको मिथ्यावासुदेवः। आदिपदेन काशिराजादयः। एते स्वयमेव बलिष्ठाः, न तु देवान्तरवरदानेनेति सूचयन् वरदानपुष्टानाह—अन्ये चेति। कपिर्द्विविदः। सप्तोक्षाणस्तु बलीबर्दास्तेन दमिताः कालान्तरे मृता अपि तत्सम्बन्धप्रभावादेव वैकुण्ठं यास्यन्ति। शम्बरो दैत्यः। विदूरथो दन्तवक्त्रभ्राता। रुक्मी शालको मुख्यो येषां विन्दानुविन्दादीनां ते च ॥ ३४ ॥ ❀ ❀ ये वा मृद्रे आत्तचापाः धृतधन्वानः अतएव समितौ सङ्ग्रामे शालन्ते श्लाघन्ते इति समितिशालिनः काम्बोजादिदेशाधिपतयः। ननु प्रलम्बखरकपिबल्वलरुक्मिप्रमुखा बलभद्रेण निहताः, काम्बोजादयश्च भीमार्जुनादिभिः, शम्बरः प्रद्युम्नेन, यवनो मुचुकुन्देन, न तु हरिणेत्याशङ्क्याह—बलो भीमः पार्थ इत्यादयो व्याजाह्वयाः कपटनामानि यस्य तेनेति ॥ ३५ ॥

### हिन्दी अनुवाद

वे नन्दबाबाको अजगरके भयसे और वरुणके पाशसे छुड़ायेंगे। मय दानवका पुत्र व्योमासुर जब गोपबालोंको पहाड़की गुफाओंमें बंद कर देगा, तब वे उन्हें भी वहाँसे बचा लायेंगे। गोकुलके लोगोंको, जो दिनभर तो कामधंधोंमें व्याकुल रहते हैं और रातको अत्यन्त थककर सो जाते हैं, साधनहीन होनेपर भी, वे अपने परमधाममें ले जायँगे ॥ ३१ ॥ ❀ ❀ निष्पाप नारद! जब श्रीकृष्णकी सलाहसे गोपलोग इन्द्रका यज्ञ बंद कर देंगे, तब इन्द्र व्रजभूमिका नाश करनेके लिये चारों ओरसे मूसलाधार वर्षा करने लगेंगे। उससे उनकी तथा उनके पशुओंकी रक्षा करनेके लिये भगवान् कृपापरवश हो सात वर्षकी अवस्थामें ही सात दिनोंतक गोवर्द्धन पर्वतको एक ही हाथसे छत्रकपुष्प (कुकुरमुत्ते) की तरह खेल-खेलमें ही धारण किये रहेंगे

॥ ३२ ॥ ❀ ❀ वृन्दावनमें विहार करते हुए रास करनेकी इच्छासे वे रातके समय, जब चन्द्रमाकी उज्ज्वल चाँदनी चारों ओर छिटक रही होगी, अपनी बाँसुरीपर मधुर सङ्गीतकी लंबी तान छेड़ेंगे। उससे प्रेमविवश होकर आयी हुई गोपियोंको जब कुबेरका सेवक शङ्खचूड़ हरण करेगा, तब वे उसका सिर उतार लेंगे ॥ ३३ ॥ ❀ ❀ और भी बहुत-से प्रलम्बासुर, धेनुकासुर, बकासुर, केशी, अरिष्टासुर आदि दैत्य, चाणूर आदि पहलवान, कुवलयापीड हाथी, कंश, कालयवन, भौमासुर, मिथ्यावासुदेव, शाल्व, द्विविद वानर बल्वल, दन्तवक्त्र, राजा नग्नजित्के सात बैल, शम्बरासुर, विदूरथ और रुक्मी आदि तथा काम्बोज, मत्स्य, कुरु, कैकय और सृञ्जय आदि देशोंके राजालोग एवं जो भी योद्धा धनुष धारण करके युद्धके मैदानमें सामने आयेंगे वे सब बलराम, भीमसेन और अर्जुन आदि नामोंकी आड़में स्वयं भगवान्के द्वारा मारे जाकर उन्हींके धाममें चले जायँगे ॥ ३४ ॥ ३५ ॥

कालेन मीलितधियामवमृश्य नृणां स्तोकायुषां स्वनिगमो बत दूरपारः।
आविर्हितस्त्वनुयुगं स हि सत्यवत्यां वेदद्रुमं विटपशो विभजिष्यति स्म ॥ ३६ ॥
देवद्विषां निगमवर्त्मनि निष्ठितानां पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः।
लोकान् घ्नतां मतिविमोहमतिप्रलोभं वेषं विधाय बहु भाष्यत औपधर्म्यम् ॥ ३७ ॥
यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः पाखण्डिनो द्विजजना वृषला नृदेवाः।
स्वाहा स्वधा वषडिति स्म गिरो न यत्र शास्ता भविष्यति कलेर्भगवान् युगान्ते ॥ ३८ ॥
सर्गे तपोऽहमृषयो नव ये प्रजेशाः स्थाने च धर्ममखमन्वमरावनीशाः।
अन्ते त्वधर्महरमन्युवशासुराद्या मायाविभूतय इमाः पुरुशक्तिभाजः ॥ ३९ ॥
विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि।
चस्कम्भ यः स्वरंहसास्खलता त्रिपृष्ठं यस्मात् त्रिसाम्यसदनादुरु कम्पयानम् ॥ ४० ॥

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

व्यासावतारमाह। अनुयुगं मीलिता संकुचिता धीर्येषाम्। स्तोकमल्पमायुर्येषां तेषां स्वनिगमः स्वकृतो वेदराशिः बताहो दूरे पारं यस्येति दुर्गम इत्यवमृश्य सत्यवत्यामाविर्हितः प्रादुर्भूतः सन् स एव हरिः विटपशः शाखाभेदेन ॥ ३६ ॥ ❀ ❀ बुद्धावतारमाह। देवद्विषां निगमवर्त्मनि वेदमार्गे निष्ठितानां नितरां स्थितानाम्। तद्बलेन च पूर्भिः पुरीभिः अदृश्यतूर्भिरलक्ष्यवेगाभिः मतेर्विमोहो योग्यतात्यागो यस्मात् मतेः प्रलोभश्चायुक्तस्वीकारो यस्मात्तं पाखंडवेषं विधाय तेनौपधर्म्यं पाखण्डधर्मम्। स्वार्थे ष्यञ्। बहु भाष्यत इत्यर्थः ॥ ३७ ॥ ❀ ❀ कल्यवतारमाह। यर्हि यदा सतामप्यालयेषु गृहेषु हरेः कथा न स्युस्त्रैवर्णिकाः पाखंडिनः स्युः शूद्राश्च राजानः स्युस्तदा कल्किरूपेण कलेः शास्ता भविष्यति। अत्र च ब्रह्मनारदसंवादात्प्राग्भाविनो वराहादयः। मन्वन्तरावतारास्तु भूता भाविनश्च। धन्वंतरिपरशुरामौ तदा वर्तेते। श्रीरामादयस्तु भाविनः तत्र तु क्वचिद्भूतादिनिर्देशश्छांदस इति द्रष्टव्यम् ॥ ३८ ॥ ❀ ❀ सृष्ट्यादिकार्यभेदेन मायागुणावतारविभूतीराह। सर्ग इति। स्थाने स्थितौ मखो विष्णुः धर्मश्च मखश्च मनवश्चामराश्चावनीशाश्च अंते संहारे हरो रुद्रः मन्युवशाः सर्पाः बहुशक्तिधारिणो भगवत इमा मायाविभूतयः ॥ ३९ ॥ ❀ ❀ इदं मया संक्षेपेणोक्तं विस्तरेण वक्तुं न कोऽपि समर्थ इत्याह। पृथिव्याः परमाणूनपि यो विममे गणितवांस्तादृशोपि को नु विष्णोर्वीर्यगणनां कर्तुमर्हति। कथंभूतस्य यो विष्णुस्त्रिपृष्ठं सत्यलोकं चस्कंभ धृतवान्। किमिति चस्कंभ। यस्मात्त्रैविक्रमेऽस्खलता प्रतिघातशून्येन स्वरंहसा स्वपादवेगेन त्रिसाम्यरूपं सदनमधिष्ठानं प्रधानं तस्मादारभ्योरु अधिकं कंपयानं कंपमानम्। कंपेन यानं यस्येति वा। अतः कारणाच्चस्कंभ आत्रिपृष्ठमिति वा छेदः। सत्यलोकमभिव्याप्य यः सर्वं धृतवानित्यर्थः। तथा च मंत्रः। "विष्णोर्नु कम्०" इति। अस्यार्थः विष्णोर्नु वीर्याणि कं प्रवोचं कः प्रवोचदित्यर्थः। यः पार्थिवानि रजांस्यपि विममे सोऽपि यो विष्णुस्त्रेधा विचक्रमाणस्त्रिविक्रमं कुर्वन्नुत्तरं लोकमस्कभायदवष्टब्धवान्। कथंभूतम्? सधस्थम्। सहस्य सधादेशः। तिष्ठंतीति स्थाः तत्रस्थैर्देवैः सह वर्तमानमित्यर्थः ॥ ४० ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

तद्बलेन वेदमार्गस्थितिबलेन। पाखण्डवेषं शास्त्राविहितवेषं वस्त्रखंडेन मुखपिधानादिलक्षणं तेन वेषेण उपधर्मस्तु पाखण्डस्य एवौपधर्म्यं वेदब्राह्मणदेवार्चनादिनिंदाप्रतिपादकं शास्त्रं तथाहि—सर्वं क्षणिकं क्षणिकं तत्र क्षणिकत्वं नीलादीक्षणानां

---

१. प्रा० पा०—रदृश्यमूर्तिः। २. प्रा० पा०—कथा हरेः।

सत्त्वेनानुमातव्यं यत्सत्तत्क्षणिकं यथा जलधरपटलं संतश्चामी भावा इत्यादि सर्वस्य संसारस्य दुःखात्मकत्वं सर्वतीर्थंकरसंमत-मन्यथा तन्निवृत्त्युपाये तेषां प्रवृत्तिर्न स्यात्तस्मात्सर्वं दुःखं दुःखमिति भावनीयम्। ननु किंवदिति पृष्टे दृष्टांतः कथनीय इति चेन्मैवं स्वलक्षणानां क्षणानां क्षणिकतया सालक्षण्याभावान्नैतेन सदृशमपरमिति वक्तुमशक्यत्वात्। ततः स्वलक्षणं स्वलक्षणमिति भावनीयम्। एवं शून्यं शून्यमित्यपि भावनीयमित्थं बुद्धमुनिना स्वशिष्येभ्यश्चतुर्द्धोपदिष्टमत्र बहुवक्तव्यमस्तीत्युपरम्यते। किञ्च "स्वर्गः कुत्र च कुत्र दैवतकुलं कुत्राथ जन्मान्तरम्" इत्यादिना चिरंजीविभट्टेनापि तन्मतं प्रदर्शितं विद्वन्मोदतरंगिण्यां ततोन्यतश्च तदवसेयम्। इत्यर्थ इति। अत्रापि वर्णलोपश्छांदस इति भावः ॥ ३७ ॥ ❀ ❀ त्रैवर्णिकाः विप्रक्षत्रविशः ॥ ३८ ॥ ३९ ॥ ❀ ❀ संभवत्वादाह कंपेनेति। यानं गमनं पतनमिति यावत्। अतः कंपनरूपात्। इत्यर्थ इति। प्रधानावरणादारभ्य सत्य-लोकपर्यंतं कंपमानं ब्रह्मांडं यः स्वपादेनैव रुरोधेति भावः। अत्र प्रमाणमाह—तथा चेति। "विष्णोर्नुकं वीर्याणि प्रवोचं पार्थिवानि विममे रजांसि यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः" इति स्वामिचरणैरेवायं मंत्रो व्याख्यातः। छंदोभंगस्त्वार्षः। स्वरंहसेति पाठ एव "रह एकांतवेगयोः" इति कोशादननुस्वारपाठोपि प्रशस्त एव तथैव बहुपुस्तकेषु दृश्यते ॥ ४० ॥ ४१ ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

स्वार्थे ष्यञ्च इति। चतुर्वर्णादीनां स्वार्थे उपसंख्यानम् पा १।२।३१ वा इत्यनेन ॥ ३७ ॥ ❀ ❀ पाखण्डिन इति वेदमार्गविरोधेन येषां करणमण्वपि। ते हि पाखण्डिनो ज्ञेया वेदार्थस्य विनिन्दिका इत्युक्तलक्षणाः ॥ ( वृषला इति। वृषं लान्तीति वृषला म्लेच्छाः ॥ स्वाहेत्यादि। स्वाहावषट्पदाभ्यां देवदेवं हविरुच्यते तदुपलक्षितो योगयज्ञादिः। स्वधापदेन स्वधेति मन्त्रसंस्कृतं पितृदेयं कव्यं तदुपलक्षितः पितृयज्ञश्राद्धादिरित्येते यदा न स्युरित्यर्थः। इति व्याख्यालेशः। स्वाहेति वषडिति [illegible] इति [illegible] ) ॥ ३८ ॥ ❀ ❀ [ असुराद्या इति। आद्यपदेन भूतप्रेतपिशाचादयः क्रूरस्वभावाश्च ॥ ३९ ॥ ❀ ❀ त्रैविक्रमे इति। त्रिपादविक्षेपणे इत्यर्थः ॥ स्वरंहसा इति। अत्र छन्दोभङ्ग आर्षः ॥ त्रिसाम्यरूपमिति त्रिगुणसाम्यलक्षणमधिष्ठानस्वरूपं प्रकृतिरित्यर्थः। अधिष्ठान-मिति। आवरणतया सर्वाधिष्ठानमित्यर्थः ॥ यानमिति। यानं पतनमिति व्याख्यालेशः। यस्येति वा इति यस्य सत्यलोकस्येत्यर्थः ॥ उरुगाय इति। यः उरुगायः विपुलकीर्तिः अस्कम्भायत् तस्य विष्णोरित्यन्वयः ॥ उत्तरलोकमिति। सत्यलोकमिति सत्यलोक-मित्यर्थः ॥ ४० ॥

## श्रीमद्वीरराघवव्याख्या

व्यासावतारमाह कालेनेति। कालेन मीलितधियां संकुचितबुद्धीनां स्तोकमल्पमायुर्येषां तेषां नृणां स्वनिगमः स्वकृतो वेदः बताहो दूरपारः दूरः पारो यस्य दूरपारः दुर्गम इत्यवमृश्य विचार्य सत्यवत्यामाविर्हितः आविर्भूतः स हरिरनुयुगं युगानुरूपं वेदद्रुमं विटपशः शाखाभेदेन विभजिष्यति। विभक्तं करिष्यति ॥ ३६ ॥ ❀ ❀ बुद्धावतारमाह देवद्विषामिति। निगमवर्त्मनि वैदिक-मार्गे निष्ठितानां नितरां स्थितानां लोकान् मयेन रचिताभिः कल्पिताभिरदृश्यतूभिरलक्ष्यवेगाभिः पूर्भिः पुरीभिर्घ्नतां नाशयतां देवद्विषां दैत्यानां मतेर्विमोहो मतिविमोहमतिप्रलोभं मतेः प्रलोभो यस्मात्तन्मतिप्रलोभं मतिविमोहं च तन्मतिप्रलोभं मतिविमोहं मतिप्रलोभकं चेत्यर्थः। एवंभूतं वेषं पाखंडवेषं विधाय विरचय्य औपधर्म्यं धर्माभासं पाखंडधर्मं स्वार्थे ष्यञ् बहु अधिकं भाष्यते भाषिष्यते ॥ ३७ ॥ ❀ ❀ कल्यवतारमाह यर्हीति। सतामप्यालयेषु गृहेषु यर्हि यदा हरेः कथा न स्युर्द्विजजनाः त्रैवर्णिकाः पाखंडिनः स्युः नृदेवाः राजानः वृषलाः शूद्राः स्युः तथा यत्र त्रैवर्णिकालयेषु स्वाहा स्वधा वषडिति गिरश्च न स्युः स्वाहावषडित्यनेन दैवं कर्मोपलक्ष्यते स्वधेति पित्र्यं तदा युगांते कलियुगांते भगवान् कलेः शास्ता भविष्यतीत्यर्थः। कल्क्यवतारेणेति शेषः ॥ ३८ ॥ ❀ ❀ अत्र च ब्रह्मनारदसंवादात्प्राचो वराहादयोऽवताराः मन्वंतरावताराश्च भूतभाविनः धन्वंतरिपरशुरामौ तात्कालिकौ। श्रीरामादयस्तु भाविनः तत्र तु कचिद्भूतादिनिर्देशः आर्ष इति द्रष्टव्यं अत्रेदं तत्वं भगवतोऽवतारा द्विविधाः। अनुप्रवेशावताराः स्वेन रूपेणावताराश्चेति। अकर्महेतुत्वाविशेषादुभयत्रावतारशब्दप्रयोगः तथा तस्य रूपमपि द्विविधं प्राकृतवस्तुजातमेकं शुद्धसत्वमयमपरं चेति। तत्र षोडशकलमहदहंकारसूक्ष्मभूतेंद्रियाभिमानिदेवताश्रयं पौरुषं रूपं तदनिरुद्धरूपं तदेव सहस्रोर्वङ्घ्रिबाह्वक्ष आद्योऽवतारः पुरुषः परस्येत्यादिषूच्यते अनुप्रवेशावतारो नाम जीवेषु स्वस्यानुप्रवेशेन स्वीयज्ञानशक्त्यादीनामन्यतामाभिव्यंजनं स एवांशावतार इति कथ्यते स च गौणः शाक्त आवेशश्चेत्यनेकधा उक्तेष्वेवावतारेषु श्रीवराहनारायणध्रुवानुग्राहकहयग्रीवमत्स्य-कूर्मनृसिंहहरिवामनहंसवैकुण्ठाजितरामकृष्णकल्क्यवताराः स्वेन रूपेणावताराः इतरेत्वनुप्रवेशावतारा इति ज्ञातव्यम्। किंच सृष्ट्यादिकार्यभेदेन भगवतो विभूतीराह सर्ग इति। तपः पूर्वं जगत्पर्यालोचनं अहं ब्रह्मा प्रजेशाः प्रजापतयो नवः ऋषयः मरी-च्यादयः मायाविभूतयः विस्मयनीयाः भगवन्नियाम्यवर्गाः स्थाने पालने धर्मश्च मखश्च विष्णुः विष्णोरनन्यत्वात्तद्व्रतपालनानुरूपं सामर्थ्यं मखशब्देन विवक्षितं मनवश्चामराश्चेंद्रादयः अवनीशाश्च भूपा एते स्थाने भगवन्नियाम्यवर्गाः अन्ते संहारे अधर्मश्च

हरश्च रुद्रः मन्युवशाश्च सर्पा असुराद्याश्च पुरुशक्तिभाजः अपरिमिताश्चर्यशक्तिधारिणां भगवतो इमाः मायाविभूतयः आश्चर्यविभूतय इत्यर्थः ॥ ३९ ॥ ❀ ❀ भगवदवतारास्तच्चेष्टितानि च साकल्येनाभिधातुं न कोऽप्यलमित्याह विष्णोरिति । यः कविर्बुद्धिमान्पुरुषः पार्थिवानि पृथिवीसंबंधीनि रजांसि विममे गणितवांस्तादृशोपि कोनु विष्णोर्वीर्यगणनां कर्तुमर्हति नार्हतीत्यर्थः । यो भगवान्यस्मादस्खलता प्रतिहतशून्येन स्वरभसा स्वपादविन्यासवेगेन हेतुना उर्वधिकं कंपमानात्सदनात्तत्स्वनिवासस्थानात्स्खलिनः प्राणिनो निशाम्य दृष्ट्वे त्यर्थः । त्रिपृष्ठं सत्यलोकं चस्कंभ स्तंभयामास श्रुतावपि विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांऽसि यो अस्कभायदुत्तरं संस्थं विचक्रमाणस्त्रेधोरुगादयः इत्यस्यायमर्थः त्रेधा त्रिप्रकारेण विचक्रमाणः पादविन्यासं कुर्वाणः य उरुगायो भगवान् तिष्ठंतीति स्थाः देवाः । सहस्य सधादेशः देवैः सहितमुत्तरं सत्यलोकं अस्कभायदवष्टब्धवानित्यर्थः । कंकः प्रवोचं प्रवोचेदित्यर्थः । एवंविधसर्वशक्तेरपरिच्छिन्नस्वरूपस्वभावस्य वीर्याणि साकल्येन वर्णयितुं कः प्रभवेदित्यर्थः ॥ ४० ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

कालबलेन मीलितदृशामुत्सन्नज्ञानानां स्तोकायुषां अल्पायुषां नृणां स्वनिगमः स्वविषयो वेदो दूरपार इत्यवमृश्य स विष्णुर्वत कृपया सत्यवत्यामाविर्हितोऽवतीर्णो वेदद्रुमं विटपशः शाखोपशाखाभेदेन विभजिष्यतीत्यन्वयः । कस्मिन्युगे इत्यत उक्तं अनुयुगमिति । एतदुक्तं भवति तृतीयसप्तमे षोडशे पंचविंशे अष्टाविंशे च द्वापरे पूर्वेषु चान्यैर्व्यासनामभिर्विभजिष्यतीति अष्टाविंशे स्वयमेव विभजिष्यतीति । तृतीये सप्तमे चैव षोडशेत्यादि वचनं च विशेषवाचिना तु शब्देन गृहीतं कृष्णावतारादुपरि व्यासावतारकथनं तदुपरितनमन्वंतरेष्वपि व्यासावतारसद्भावादविरुद्धमित्यस्मिन्नर्थे हि शब्दः पुराणप्रसिद्धेरिति ॥ ३६ ॥ ❀ ❀ देवद्विषां मतिविमोहं बुद्धिमोहजनकमतिप्रलोभं मतिवंचकं बालवेषं विधाय यदौपधर्म्यमुपधर्माणां पाखंडधर्माणां प्रतिपादकं शास्त्रं तदभाषतेत्यन्वयः नारायण इति शेषः । एतेऽसुराः के इत्याशंक्य पूर्वजन्मकर्मपूर्वकं तान्विशिनष्टि निगमेत्यादिना । प्राग्जन्मनियमेनाविहिताभिस्तिसृभिः पूर्भिः पुरीभि लोकान् घ्नतां नाशयतां रुद्रेण हतानां पुनर्विप्रजन्म लब्ध्वा निगमेन विहिताभिः क्रियाभिः निगमवर्त्मनिविष्ठितानां वेदमार्गे प्रतिष्ठाय यज्ञादिविशिष्टकर्मानुष्ठाने स्थिराणामदृश्या मूर्तिर्यस्य स तथा दैत्यैरज्ञेयस्वरूप इत्यनेन ततो वेदमार्गाच्चलनाय देवैः प्रत्यक्षीकृत्य प्रार्थित इति ज्ञातव्यम् । बुद्धोक्तशास्त्रस्य वेदबाह्यधर्मप्रतिपादकत्वमज्ञजनदृष्ट्या वेदो प्रमाणमित्यादि रूपस्य तस्यैव विष्णोः प्रमाणमित्यादिवेदप्रतिपाद्यार्थत्वेन देवेभ्यः प्रशांतसहितायां हरिणोक्तत्वादिति द्योतनायाभाषतेत्युक्तं स्वसूत्राणां भाष्यं च कृतवानित्यर्थः ॥ ३७ ॥ ❀ ❀ यर्हि यस्मिन्युगे सतामालयेष्वपि हरेः कथा न स्युः द्विजजनाश्च पाखंडिन पाखंडवर्तिनः स्युर्नृदेवा वृषला धर्मविनाशकाः । यत्र यस्मिंश्च युगे स्वाहादिगिरो न संति स्म वचनाभावे स्मरणमपि नास्ति । इति शब्द आद्यर्थे तदा तस्य कलेर्युगस्यांतेऽवसाने भगवान् शास्ता भविष्यति दुष्टानामिति शेष इत्यन्वयः । इतिशब्दः स्वरूपावतारकथनसमाप्तिवचनो वेति ॥ ३८ ॥ ❀ ❀ मायाविभूतीराह सर्ग इति । योहं चतुर्मुखः ये च कर्दमाख्या ऋषयः ये च मरीच्याद्या नव प्रजापतयः ते सर्वे सर्गे सृष्टिसमये प्राप्ते पुरुशक्तिभाजः पूर्णशक्तिभाजो हरेर्मायाविभूतयः । अथ यो धर्मः ये मखा ये चतुर्दश मनवो ये चामरेशाश्चतुर्दशेन्द्रा ये चावनीशाः प्रियव्रतादयः ते सर्वे स्थाने स्थितिकाले प्राप्ते पालनाय विष्णोर्माया विभूतयः । योऽधर्मो यश्च हरो रुद्रो ये च मन्युवशासुराद्याः क्रोधवशा सुरपुरः सरास्ते सर्वे अन्ते तु संहारकाले च प्राप्ते संहाराय हरेर्मायाविभूतय इत्यन्वयः । सृष्टिपालन संहारकालेषु मायया स्वेच्छया विविधो भूत्वाऽस्मदादिषु स्थित्वा सृष्टिपालनसंहारान् करोति यद्वा मायया भगवदिच्छयाऽस्मदादीनां सदाविभूतयो भवंतीत्यतोऽस्मदादयो हरेर्मायाविभूतयो न तु स्वस्वरूपविभूतय इत्ययं विशेषस्तु शब्दसूचितया हरीच्छया विभूतीर्यद्ब्रह्मादीनां सदा भवेत् इच्छया वा बहुविधस्तेषु विष्णुः स्वयं स्थितः अतो मायाविभूतित्वं तेषां मत्स्यादयः स्वयमिति स्मृत्या गृहीत इति ॥३९॥ ❀ ❀ ननु स्वरूपमायया विभूतीनामेतावत्त्वं चेदिदं सर्वं सुलभं ज्ञानमित्याशंक्यानंतायुषापि विभूतीनां गणनं न सुशकमित्याह विष्णोर्न्विति । यस्त्रिपृष्ठस्य सदनाद्विशरणाशाशादुरुकंपमानं मां निशाम्य स्वरभसा त्रिविक्रमक्रमणवेगेन स्खलितं चलितमासन्नपतनं सत्यलोकं चस्कंभस्तम्भितवांस्तस्य विष्णोर्वीर्यगणनां विभूतिलक्षणमाहात्म्यप्रसंख्यानं प्रति कवीनां कतमोऽर्हति न कोऽपीत्यन्वयः । आदिकविरपि न समर्थ इत्याह पार्थिवानीति । यः कविः प्रतिभाविशेषसम्पन्नोऽपि ब्रह्मा पार्थिवानि रजांसि भूमिपरमाणून् विममे गणितवान् सोऽपि न शक्नोतीति शेषान्वयः । यदिति हेत्वर्थे । अनन्तानि यद्यस्मादिति ॥ ४० ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

कलिविशेषे अवतारं श्रीबुद्धमाह । देवद्विषामिति । अस्मिन् कलौ देवद्विषां तादृशत्वाश्रवणात् ॥ ३७ ॥ ❀ ❀ सतां चातुर्वर्ण्याचारवताम् आलयेषु आश्रमेषु यदा हरिकथाः न स्युः । अतएव तेषु त्रैवर्णिकाः पाखण्डिनः स्युः । शूद्राश्च म्लेच्छपर्य्यन्ता राजानः स्युरित्यर्थः ॥ ३८ ॥ ❀ ❀ सर्ग इति । विष्णोरप्यत्र पाठः उपाधिमात्रदृष्ट्या । सृजामि तन्नियुक्तोऽहमित्यादेः ॥ ३९ ॥ ❀ ❀ अथ पूर्व्वपद्ये विष्णोरपि मायाविभूतित्वेनान्यैः साम्यमाशङ्क्य तन्निरस्याह विष्णोर्न्विति प्रकृतिपर्य्यन्तकल्पनात् तस्य तु तदतिरिक्तानन्तपरमैश्वर्य्यमस्त्येवेति भावः ॥ ४० ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

व्यासावतारमाह । कालेन मीलिता संकुचिता धीर्येषां तत्रापि स्तोकायुषाम् अल्पायुषां स्वनिगमः स्वकृतो वेदसमुद्रो दूरेपारं यस्य स इत्यवमृश्य अनुयुगं कल्पे कल्पे । युगशब्दोऽयं कल्पवाची ( कालवाची ) ज्ञेयः । सत्यवत्यामाविर्भूतः सन् स एव हरिर्विटपशः शाखाभेदेन ॥ ३६ ॥ ❀ ❀ बुद्धावतारमाह । देवद्विषां दैत्यानां निष्ठितानां नितरां स्थितानाम् । पूर्भिः पुरीभिः । अदृश्यतूर्भिः सपत्नैरलक्ष्यवेगाभिः । लोकान् घ्नतां तेषां मतेर्विमोहो मतेः प्रलोभश्च यस्मात् तं पाखण्डवेषं विधाय तेन औपधर्म्यं पाखण्डधर्म्यम् । स्वार्थे ष्यञ् । बहुभाषिष्यते इत्यर्थः ॥ ३७ ॥ ❀ ❀ कल्क्यवतारमाह । वृषलाः शूद्रा नृदेवा राजानः । कलेर्युगस्यान्ते एकदेशान्वयः सोढव्यः । अत्र ब्रह्मनारदसंवादात् प्रागभाविनो वराहादयः । मन्वन्तरावताराश्च भूता भाविनश्च । धन्वन्तरिपरशुरामौ तदा वर्त्तेते । श्रीरामादयस्तु भाविनः । तत्र भूतादिनिर्देशश्छान्दस इति द्रष्टव्यम् ॥ ३८ ॥ ❀ ❀ सृष्ट्यादिकार्य्यभेदेन मायागुणावतारविभूतीराह सर्गे इति । स्थाने स्थितौ । धर्मश्च मखाश्च मनवश्च अमराश्च अवनीशाश्च । अन्ते संहारे । मन्युवशाः सर्पाद्याः ॥ ३९ ॥ ❀ ❀ हरेरवतारलीलाः सामस्त्येन वक्तुं न कोऽपि समर्थ इत्याह । विष्णोरिति । गणनां कर्त्तुमिति शेषः । यो विष्णुः स्वरंहसा त्रैविक्रमे स्वचरणवेगेन अस्खलता त्रिपृष्ठं त्रयाणां लोकानां पृष्ठमण्डकटाहं चस्कम्भ रुरोध रुद्ध्वा स्थिरीचकारेत्यर्थः । त्रिपृष्ठं कीदृशम् । यस्मादेव स्वरंहसो हेतोः त्रिसाम्यसदनात् प्रकृत्यावरणमारभ्य उरुकम्पयानम् । तथा च मन्त्रः—विष्णोर्नु वीर्याणि कं प्रावोचं यः पार्थिवानि विममे रजांसि योऽस्कम्भायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगाय इति । अस्यार्थः विष्णोर्नु वीर्य्याणि कं प्रावोचं कः प्रावोचदित्यर्थः । यः पार्थिवान्यपि रजांसि विममे सोऽपि । यो विष्णुस्त्रेधा विचक्रममाणः त्रिविक्रमं कुर्वन् उत्तरलोकमस्कम्भायत् अवष्टब्धवान् । कथम्भूतम् सधस्थं तिष्ठन्तीति स्था देवास्तैः सह वर्त्तमानं सहस्य सधादेशः ॥ ४० ॥

### श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः

श्री व्यासावतारमाह कालेनेति । कालेन मीलिता कुंठिता धीर्येषां तोकमल्पमायुर्येषां तेषां नृणां त्रैवणिकानां स्वनिगमः स्वकीयो वेदः । बत इति खेदे दूरे पारं यस्येति दूरपारः बुद्ध्यगोचरः इत्यवमृश्य विचार्य स भगवान् सत्यवत्यां पराशरादाविर्हितः आविर्भूतः सन् अनुयुगं युगानुरूपं वेदद्रुमं विटपशः शाखाभेदेन विभजिष्यति विभक्तं करिष्यति ॥ ३६ ॥ ❀ ❀ बुद्धावतारमाह देवद्विषामिति । निगमवर्त्मनि वेदोक्तमार्गे निष्ठितानां नितरां स्थितानाम् मयेन विहिताभिः रचिताभिः अदृश्यतूर्भिरलक्ष्यवेगाभिः पूर्भिः पुरीभिः लोकान् घ्नतां देवद्विषामसुराणाम् मतेर्विमोहो युक्तत्यागो यस्मात्तं मतेः प्रलोभोऽयुक्तस्वीकारो यस्मात्तं पाखंडवेषं विधाय औपधर्म्यं स्वार्थे ष्यञ् उपधर्मं पाखंडधर्मं बहु अधिकं भाषिष्यत इत्यर्थः ॥ ३७ ॥ ❀ ❀ कल्क्यवतारमाह यर्हीति । यर्हि यदा सतामप्यालयेषु हरेः कथाः न स्युः द्विजजनाः त्रैवर्णिकाः पाखंडिनः स्युः वृषला शूद्राः नृदेवा राजानः स्युः यत्र स्वाहास्वधावषडिति गिरो न स्युः तदा युगांते भगवान्कल्किरूपेण कलेः शास्ता भविष्यति । अत्र च ब्रह्मनारदसंवादात्प्राचो वराहादयोऽवताराः मन्वंतरावतारास्तु भूताः भाविनश्च धन्वंतरिपरशुरामौ तदानींतनौ श्रीरामादयस्तु भाविनः तत्र तु क्वचित् भूतादिनिर्देशः छांदस इति द्रष्टव्यम् ॥ ३८ ॥ ❀ ❀ किंच पुरुशक्तिभाजः बहुशक्तिधारिणः भगवतः इमाः मायायां प्रकृतिमंडले विभूतयः तत्र सर्गे सृष्टौ तपआद्याः स्थाने स्थितौ च धर्माद्याः मखोऽवताररूपो विष्णुः अंते संहारे च अधर्माद्याः अधर्मश्च हरश्च मन्युवशाः सर्पाश्च असुराश्च ते आद्या येषां ते ॥ ३९ ॥ ❀ ❀ भगवच्चेष्टितं यथा संक्षेपतोऽभिहितं विस्तरतस्त्वभिधातुं कोपि न शक्त इत्याह विष्णोरिति । यः कविः क्रांतदर्शी पार्थिवानि पृथिवीसंबंधीनि रजांसि विममे गणितवान् सोपि इह कविसमूहेषु कतमो नुविष्णोर्वीर्यगणनां कर्तुमर्हति न कतमोप्यर्हतीत्यर्थः । यो विष्णुः अस्खलता प्रतिघातशून्येन स्वरंहसा स्वचरणवेगात्मकव्यापारेण त्रिसाम्यरूपात्सदनात्सकलबद्धजीवनिकेतनभूतात्प्रधानादारभ्य त्रिपृष्ठं सत्यलोकं उर्ध्वधिकं यस्मात्कंपयानं तस्मात् चस्कंभस्तंभयामास । तथाच मंत्रः "विष्णोर्नुकं वीर्याणि प्रावोचं यः पार्थिवानि विममे रजांसि यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगाय" इति मंत्रार्थस्तु यः पार्थिवानि रजांस्यपि विममे गणितवान्सोऽपि विष्णोर्वीर्याणि कं प्रावोचम् कः प्रवोचत् य उरुगायो विष्णुः त्रिधा त्रिःप्रकारेण विचक्रमाणः चरणविन्यासं कुर्वाणः सधस्थ सहस्य सधादेशः तिष्ठंतीति स्थाः देवास्तैः सहवर्तमानम् उत्तरमूर्द्ध्वलोकम् ह्यस्कंभायत् अवष्टब्धवानिति ॥ ४० ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं भूयेनुमहं निरूप्य चिन्तामयं निरूपयति—कालेनेति । भगवतो हि चिन्ता व्यासरूपा[1] । व्यासो हि चिन्तया सर्ववेदार्थं विनिश्चित्य भागवतस्वरूपं लोकेभ्य उपदिशति । कालेन द्वापरादिना मीलिता आच्छादिता दृष्टिर्येषां एतादृशानां नृणाम् । स्वनिगमो दूरपारः आकलयितुमशक्य इति स्वयमाविर्भूतः । अनुयुगमिति वेदद्रुमं विटपशो विभजिष्यतीत्यनेन

१. रूपाचिन्तयेति ग. ।

सम्बध्यते । प्रतिद्वापरान्तं वेदविभागः अतः पुराणान्यप्येकस्य चतुर्युगस्य व्यवस्थां कथयन्तीति सूचितम् । विटपश इति वेदानां विभागे कृत्रिमत्वशङ्कानिवृत्त्यर्थम् । शाखास्वरूपं तु निबन्धे निरूपितम् । एकस्या भगवन्मूर्त्तेः स्वरूपप्रतिपादको वेदराशिः शाखेति । वेदस्य द्रुमत्वमपि पूर्वं निरूपितम् । स्मेति प्रसिद्धे । तस्मादत्र बहु न वक्तव्यमिति भावः ॥ ३६ ॥ ❀ ❀ इदानीमेतं निरूपयति—देवद्विषामिति । एषो (?) बुद्धः साम्प्रतं विद्यमानत्वात् । तस्य स्वरूपमिदमेव यदिदानीं वर्त्तते । अनेन [1]ब्राह्मणोऽपि निरूपणसमयः कलिरेवेति । वेदमार्गविरोधेन येषां करणमण्वपि । ते हि पाखण्डिनो ज्ञेया वेदार्थस्य विनिन्दकाः । देवद्विषां दैत्यानाम् । ते हि देवान् द्विषन्ति । अनेन देवप्रार्थनया दैत्यमोहनार्थं बुद्धावतार इति सूचितम् । निगमवर्त्मनि धिष्ठितानां वेदप्रतिपादितमार्गे व्यस्थितानाम् । यद्यपि वेद एव दैत्यव्यामोहनार्थं बहव उपाया निरूपिताः । तथापि सामान्यत एव वेदवैमुख्यार्थमयमवतारः । धिष्ठिता अधिष्ठाय स्थिताः । वयमेव वेदप्रवर्त्तका इति लोकानां व्यामोहार्थे आत्मनां वैदिकत्वेन ज्ञापयित्वा समागतान् व्यामोहयन्तीत्यर्थः । पूर्भिः त्रिपुररूपाभिः । अदृश्यमूर्भिः । मूर्माया । अतएव 'स्त्रियां क्तिन्' ति [2]मूर्भिरिति भवति । मायाकार्यं किञ्चिदित्यर्थः । अदृश्या मूर्यासु ता अदृश्यमु[3]रः ताभिः पूर्भिस्त्रिपुरैः । ता एव हि मयेन विहिताः कृताः प्रेरिता वा । अनेन मार्गद्वयमपि ते नाशयन्तीति सूचितं वैदिकं लौकिकं च । अनेन सर्वथा तन्नाशः कर्त्तव्य इति भगवदवतारहेतुर्निरूपितः । किञ्च । न केवलं लोकहननमेव देवद्रोहाचरणम् । यज्ञाद्यकरणबोधनेन आत्मन एव वैदिकत्वेन देवत्वसम्पादकत्वं च । तथा चाऽयथा सृष्टिर्निरूपिता भवति । तयोः स्वरूपतो नाशे पुनस्तथैव भवन्तीति बुद्धिव्यामोह[4] एव कर्त्तव्यः । अतो मतिविमोहं कृतवान् अत्यन्तं प्रलोभो यत्र । अल्पेनैव साधनेन बहुफलनिरूपकं शास्त्रं कृतवान् । वेषं बुद्धवेषम् । अहं सर्वज्ञ इत्यात्मानं ख्यापयित्वा तेषां हृदयवार्त्तामुक्त्वा विश्वासमुत्पाद्य विपरीतोपदेशनं मतिविमोहनम् । मतिविमो[5]हनेन सहितो मतिप्रलोभो वा । तथा सति विद्यमानाया मतेर्विमोहोऽन्यथाकर[6]णहविद्यनानायाश्चाऽ[7]मार्गभूताया उत्पादनमिति । औपधर्म्यं पाखण्डधर्मान् ॥ ३७ ॥ ❀ ❀ एवमेतं निरूप्येश्वरं निरूपयति यर्ह्यालयेष्वपीति । बहिः सर्वत्र भगवत्कथा युगान्तरेषु स्थिताः । ततो द्वापरादिषु सतामालयेषु । कलिप्राचुर्ये सतामप्यालयेषु हरेः कथा न भविष्यन्ति, तदा शास्ता कल्किरूपेण भविष्यतीति । कलियुगस्याऽऽरम्भ एव परीक्षिति भगवानाविष्टः कलिनिग्रहं कृतवान् । तथापि तथा न निगृहीतः कलिः । भगवद्धर्माणां प्रवर्त्तमानत्वात् । ते हि कलिमलसंहतिकलनाः । न केवलं भगवद्धर्माभाव एव किन्तु वैदिकोऽपि धर्मो गत इति निरूपयति । धर्मो हि जन्यते ब्राह्मणैः । [illegible]

शूद्रा एव जाताः । तत्रापि वृषमेव लान्ति आददत इति वृषलाः । म्लेच्छा इति यावत् । धर्ममेव स्वयं गृह्णन्ति नाशनार्थम् । कुर्वन्ति वा प्रमाणनाशनाय । ते[8] हि नृणां देवाः पूज्याः । अनेन पाल्याः पालकाश्च[9] उभये दुष्टा इति ज्ञापितम् । किञ्च । धर्माभासोऽपि गतः । सर्वत्र विधिच्छलरूपेणाऽनुकरणेन धर्माभासानेव कुर्वन्ति । तत्र देवादीनां सान्निध्याभावात् यागाभावेऽपि स्वाहादिशब्दाः श्रूयन्ते । तेऽपि यदा न श्रूयन्ते तदा भगवानवतीर्ण इत्याह—स्वाहा स्वधेति । स्वाहेति होमाः, स्वधेति श्राद्धानि, वषडिति यागाः । राजसतामससात्त्विका एते । स्मेति प्रसिद्धाः । गिर इत्यर्थाभावः । यत्र गृहेषु देशे वा । एवं कल्क्यवतारे हेतुत्रयम् । भक्त्यभावः, धर्माभावः, आभासधर्माभावो वेदाभावो वा । अनेन सत्ययुगे त्रयं प्रवर्तयिष्यतीति ज्ञापितम् । युगान्ते चतुर्युगसमाप्तौ । भगवानिति । तस्मिन्नवतारे सर्वभगवद्धर्माविर्भावः ॥ ३८ ॥ ❀ ❀ एवं सर्वमेवान्तर्यामिणं सर्वधर्मसहितमुत्पत्त्या विचार्य "यावन्मनो धारणयाऽवतिष्ठत" इत्यंशं विचारयिष्यन् भगवतो माहात्म्यमाह—सर्गे तपोऽहमिति त्रिभिः । एतादृशभगवन्मूर्त्तिध्या[10]नेन मनसोऽवस्थाने हेतुर्भगवन्माहात्म्यम् । न हि महान् बहुकालं तिष्ठति । अव्यवस्थितमनसा वा महान् चिन्तनीयो भवति । सम्यक्स्फुरणाभावेनाऽपराधप्रसङ्गात् । महतश्च धारणात् वैक्लव्यं भवतीति प्रकारत्रयेण निरूपणम् । तत्र प्रथमं महान् सर्वदा न तिष्ठतीत्यत्र को हेतुरित्याकाङ्क्षायां स[11] हि न सर्वदैकरूपः स्वगुणैः कालभेदेन नानाविधो भवतीति सर्वदा तस्य नैकरूपेणाऽवस्थानम् । तदाह । सर्गे सृष्टिनिमित्तं भगवानेतावन्ति रूपाणि करोतीत्याह । तपः । अहं ब्रह्मा । ऋषयो नव मरीच्यादयः । ये प्रजेशाः प्रजोत्पादने समर्थाः । गुणत्रयेण सृष्टिरिति त्रयो निरूपिताः । ऋषय इति वेदा वा । तथा सति "[12]चतुर्मूर्त्तिः सृष्टिं करोतीति । तत्र तपो वासुदेवः "यस्य ज्ञानमयं तप" इति । प्रजेशाः सङ्कर्षणरूपाः । ऐश्वर्यं हि तत्र प्रतिष्ठितमिति । सृष्ट्यपेक्षया स्थाने बहुकार्यमिति तत्र पञ्च रूपाणि निरूपयति । स्थाने मर्यादापालनार्थम् । अथेति भिन्नक्रमे । धर्मः प्रथमोऽनिरुद्धः मखो यज्ञः । धर्मो ह्यत्राऽऽचाररूपः प्रमाणशब्दश्रवणानन्तरभाविनी प्रवृत्तिः । मखस्तु प्रयत्नव्यङ्ग्यो भगवद्रूपोऽनन्तमूर्त्तिः । उत्पत्तौ यो वेदो गृहीतस्तदर्थोऽत्र साङ्गो गृहीतः । मनुर्धर्मप्रवर्त्तकः तदन्तरस्य सद्धर्मत्वात् । अमरा देवास्ते स्वर्गपरिपालकाः । अवनीशा राजानो भूमिपालकाः संहारे ततोऽप्यधिकापेक्षायामप्य-

---

१. ब्रह्मणोपीति ख. । २. मूर्तिरिति ख. । ३. अदृश्यमूर इति ख. । ४. व्यामोहमिति ख. ग. । ५. विमोहेनेति क. ख. । ६. न्यथाकरणे अविद्य ति ख. । ७. श्च मार्ग इति ख. । ८. ते नृणामिति ग. । ९. च नास्ति क. ख. । १०. ध्याने मनस इति ख. । ११. स न हि सर्वदेति ग. । १२. चतुमूर्ति सृष्टिं ग. ।

नादरेण निरूपयति—अन्त इति । संहारार्थमधर्मः । हरो यज्ञप्रतिपक्षः । मन्युवशाः सर्पादयो मनुप्रतिपक्षाः । असद्रूपा असुरा देवप्रतिपक्षाः । आदिशब्देन भूमौ नाशकाश्चोर व्याघ्रादयः । तेषामसुरपक्षपातित्वात्तदादित्वम् । ननु कथमेवमनेकरूपत्वं भागवतस्तत्राऽऽह—मायाविभूतय इति । मायायैविभूतयः मायायां मायायाः मायया वा । माया हि पूर्वं निरूपिता । इयं जगत्कारणभूता । स हि यदा जगद्रूपेण भवति । भगवतो वा निमित्तत्वमापद्यते तथाऽऽकृतिसमर्पणाय । भगवतो वा सेवार्थमुत्कृष्टानि साधनानि सम्पादयति । भगवत्कर्तृके वा जगति करणत्वमापद्यते । तदा तन्निमित्तमेतावन्ति रूपाणि भगवान् करोति । अन्यथा तस्याः करणत्वादयो नोपपद्येरन् । नन्वेतेषु समागतेषु तस्याः कार्यं नोपपद्यते । तत्राऽऽह—पुरुशक्तिभाज इति । सर्वभवनसमर्थाया मायाया एकस्मिन्नपि कार्ये सर्वसामर्थ्या विद्यमानत्वात्सर्वं कार्यमेकदैव स्यात् । विलम्बे कारणाभावात् । भगवदिच्छाया निमित्तत्वेऽपि तस्या अदृष्टरूपाया नियामकान्येतानि रूपाणि, बोधकानि वा । एतेषां नियतसामर्थ्यान्न पूर्वोक्तदोषः ॥ ३९ ॥ ❀ ❀ एवं भगवतः प्रतिक्षणं नानारूपत्वादेकविधा धारणा न तिष्ठतीति यावदित्युक्तम् । एवं महान् बहुकालं न तिष्ठतीति निरूपितम् । इदानीं अव्यवस्थितमनसा वा महान्न चिन्तनीयो भवतीतीमं पक्षं विशदयति—विष्णोर्नु वीर्यगणनामिति । सर्वेषामेवाऽव्यवस्थितमनस्त्वात् को वाऽर्हतीत्युक्तम् । मनस एव तत्राऽसामर्थ्यायोग्यताऽपि नाऽस्तीत्युक्तम् । जीवस्य तपो योगादिभिः सामर्थ्यवृद्धावपि मनसो वा सहायबाहुल्ये स्वाभाविकधर्मस्याऽनिवृत्तत्वादत्यन्तं ब्रह्माऽपि न समर्थ इति तमप्प्रत्ययः । जगदाद्यर्थे सामर्थ्ये वर्त्तमानेऽप्यत्र भगवतः सर्वांशधारणे न सामर्थ्यमित्याह—इहेति । नन्वेवंरूपेण मनसा ज्ञानजननान्निश्चितपदार्थबोधकत्वे तत्रापि सामर्थ्यं भविष्यतीत्याशङ्कयाऽऽह—नु इति । एनदपि वितर्केणोच्यते नतु निश्चितम् । सामर्थ्ये हेतुमाह—यः पार्थिवानीति । कार्यसृष्टौ समर्थजीवानां गणनायां यः सृष्ट्यभिमानी ब्रह्मा । यत्र सहायतामापन्नानि तत्त्वानि ब्रह्माण्डं जनयन्ति स रजोगुणाधिष्ठाता कतमः । तेन हिपूर्वमस्मिन्ब्रह्माण्डे ये जीवा उत्पाद्यन्ते तेषां भोगादृष्टेन संस्कृतान्परमाणून् महाराशेरुधृत्य ब्रह्माण्डोपादानापरोक्षज्ञानेन भगवदिच्छयैव तादृशसामर्थ्येन ब्रह्माण्डमुत्पाद्यत इति परमाणुगणनसामर्थ्याद्वैलक्षण्यज्ञानाच्च तं तथात्वेनाऽऽशङ्कया निराकरोति । विवेचनार्थं कविपदम् । रजांसीति दुर्लक्ष्यं सूक्ष्मत्वात् । तादृशस्याप्यसामर्थ्ये हेतुः—चस्कम्भेति । इयत्तापररिमाणवन्तो हि गुणा गणयितुं शक्यन्ते विवेचयितुं वा । भगवतस्त्वेकोऽपि गुण इयत्तारहितः । मनसोऽपि स्थूलत्वात्, निरवयवत्वाच्चाऽसङ्गित्वाच्च । तदाह । आत्रिपृष्ठं ब्रह्मलोकमभिव्याप्य । अस्खलता स्वरंहसा असाधारणवेगेन सर्वागम्येन वा । उरुकम्पो यानेषु यस्मिंस्तादृशं त्रिपृष्ठं सर्वं च । ततः त्रिसाम्यसदनाद्गुणत्रयसाम्यावस्थासत्यलोकात्सर्वमित्यर्थात् । उरुकम्पयानं वा चस्कम्भ उपर्येव स्तम्भितवान् । तस्मात्पातकेन गुणेन रक्षणमशक्यमिति मनसोऽप्याकलनाभावादियत्ताभावः । संख्यापरिच्छेदाभावस्त्वग्रे वक्ष्यते ॥ ४० ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः

कालेनेत्यत्र । व्यासस्य चिन्तारूपत्वविचारेण चिन्तामयमित्यत्र प्राचुर्ये मयड्बोधितः ॥ ३६ ॥ ❀ ❀ देवद्विषामित्यत्र अनेनेति । एतत्पदविमर्शावसरे कलिकालोत्पन्नबुद्धावतारनिरूपणेन, प्रतिभातीति शेषः । कलिरिति अष्टाविंशतितमद्वापरात्पूर्वः कलिः, अन्यथा पूर्वश्लोकेषूक्तानां करिष्यतीत्यादीनां भविष्यत्प्रयोगाणां विरोधापत्तेरिति । के देवद्विष इत्यपेक्षायां तत्स्वरूपं कारिकायामाहुः वेदेत्यादि । अणुविरोधः प्रमादादपि भवतीति तद्वारणार्थं विंशिषन्ति वेदार्थस्य विनिन्दका इति, निन्दायां विशेषो बुद्धिपूर्वकं मिथ्येति प्रतिपादनम्, तेन न कोपि कापि विरोधः । अत एवेति मोहनार्थकान्मुहधातोरेव । अनेन मार्गेणेति पुरविशेषणद्वयेन । नन्वेवं सति नृसिंहादिवद्बुद्धावतारेणापि ते कुतो न हता इत्यत आहुः तयोरित्यादि । तयोर्लोकवेदनाशरूपकार्ययोरर्थे तेषां हनने क्रोधेन हननाभावादमुक्तौ कालनेम्यादिवत्पुनस्तथैव भवन्तीति तदभावाय तथेत्यर्थः ॥ ३७ ॥ ❀ ❀ यर्ह्यालयेष्वित्यत्र विधिच्छलरूपेति । शास्त्रस्य जीवपरत्वमङ्गीकृत्य धूममार्गेण करणे विधेस्तात्पर्यकथनं तच्छलरूपं तेनेत्यर्थः ॥ ३८ ॥ ❀ ❀ सर्ग इत्यत्र एवं सर्वमित्यादि । अत्रान्तर्यामिणः सर्वधर्मसहितस्योत्पत्त्या विचारे तत्तदवतारादिवाचकानां पदानां तत्तदङ्गादिवाचकत्वम् । वाक्यानां च तत्तदङ्गादितात्पर्यकत्वम्, तद्द्वारा च भगवत्परत्वमित्येवं ज्ञानश्रवणमित्यादि सिद्ध्यति । ततश्च तादृशस्य सर्वाङ्गेक्षणमशक्यमितो धारणायाः प्रकारं बोधयिष्यन् माहात्म्यमाहेत्यर्थः । ननूक्तांशे विचारणीये माहात्म्यकथनस्य किं प्रयोजनमत आहुः एतादृश इत्यादि । अवस्थान इति स्थैर्ये । नन्वेवं सति सर्वदा भगवति मनः कुतो न तिष्ठतीत्याकाङ्क्षायां श्लोकत्रयतात्पर्यमाहुः न हीत्यादि । अव्यवसितमनसेत्यत्र कर्मधारयः । वैक्लव्यमिति धारणासामर्थ्याभावेन विक्षेपः । निरूपणमिति । धारणाविघटकहेतुसत्त्वायामपि यो धारणायाः सम्भवः स केवलं माहात्म्यहेतुक एवेति ज्ञापनाय मनोऽव्यवस्थापकमाहात्म्यनिरूपणम् । तथा च, विमर्षणीयग्रन्थे यावदित्या-

---

१. मन्युवंशा इति ख. । २. श्चौरेति क. ग. । ३. मायायां नास्ति ग. । ४. तस्येति ग. । ५. रजोगुणोधिष्ठातेति ख. । ६. गणकेति घ. । ७. सूक्ष्मत्वादिति घ. । ८. कम्पमानं क. । ९. लोकवेदनार्थरूपकार्ययोः पाठः ।

दिपदैः कालकरणमनोऽव्यवस्थितिरूपार्थत्रयनिरूपणात्तद्विमर्शार्थं त्रयः श्लोका इति भावः। स्वगुणैरिति स्वोत्पन्नैः सत्त्वादिभिः। तत्रेति चतुर्मूर्त्तिपक्षे। अत्र ब्रह्मा प्रद्युम्नो वेदा अनिरुद्धो बोध्यः। पालनं केवलानिरुद्धकार्यमेवेत्याशयेनाहुः **धर्मः प्रथम** इत्यादि। **प्रवृत्तिरिति** मानसव्यापारविशेषः। उत्पत्ताविति पञ्चमाध्याये 'नारायणपरा वेदा इत्यत्र। **भूमौ नाशका** इति अवनीशानां ते प्रतिपक्षा इत्यर्थः। ननु पूर्वं मायाद्वयं निरूपितमिति तयोर्मध्ये केयमित्याकाङ्क्षायामाहुः **इयमित्यादि**। समासचतुष्टयमत्र कल्पभेदेन सृष्टिभेदाद्विवक्षितमिति तदर्थमुपपादयन्तो विभजन्ति **सा हीत्यादि**। तथा च, प्रथमपक्षे प्रकृतिर्ह्यस्योपादानमि'त्येकादशीयवाक्याज्जगद्रूपेण भवति, तदा मायायै मायाकार्यं सृष्टिस्थितिप्रलयरूपं निमित्ततया निर्वाहयितुं इमा भगवद्रूपा विभूतयः, द्वितीयपक्षे तस्यां निमित्तभूतायां सहकारिण्यो भगवद्रूपा विभूतयः, तृतीयपक्षे सा कर्त्री तदा करणभूताः, चतुर्थपक्षे सा करणभूता तदैता व्यापारभूता इत्यर्थः। एवमत्र सृष्टेस्तत्परिकरस्य च यच्चतुर्द्धा निरूपणं 'तदात्मानं क्रीडयन् क्रीडन् करोति विकरोति चे'ति राजप्रश्ने यावन्तः पक्षा राज्ञा उद्भावितास्तेषां सङ्ग्रहायेति बोध्यम्, सर्वेषां पक्षाणां प्रमाणसिद्धत्वादिति। **नियामिकानीति** दृष्टद्वाररूपाणि। **बोधकानीति** द्वारान्तरस्यापि सद्भावबोधकानि। **प्रतिक्षणं नानारूपत्वादिति**, यद्यप्येतानि सृष्ट्यादिकाले प्रसिद्धानि तथापि प्रतियोगिभेदेन युगपदेवावान्तराणां नानाविधकार्याणां भवनात् ब्रह्मपुराणोपान्त्ये मायानुकीर्त्तनाध्याये घटिकामात्रेण षष्टिवर्षात्मककालातिक्रमस्य जलमग्नचाण्डालीब्राह्मणजन्मोपाख्यानेन प्रतिपादनाच्च तथात्वादित्यर्थः॥ ३९॥

❀ ❀ **विष्णोर्नु वीर्यें**त्यत्र **अव्यवस्थितमनसेति** अव्यस्थितेन मनसेत्यर्थः। अत्र कतमस्य भगवद्वीर्यगणनायां योग्यतायास्तर्कितत्वादितरेषामयोग्यतायाः कैमुतिकन्यायेनार्थादेव सिद्धिरिति वक्तुं कतमशब्दस्य विकल्पत्ते रूढत्वादतिशयिते प्रजापतौ योगाच्च कतमशब्दं पक्षद्वयेन व्याचिख्यासवः प्रथमपक्षतात्पर्यमाहुः **सर्वेषामित्यादि**। **उक्तमिति** कतमपदप्रयोगेणोक्तम्। तेनापि सूचितमर्थमाहुः **मनस एवेत्यादि**। **उक्तमिति** अर्हतिपदमुक्तमन्यथा पदान्तरमेव वदेदित्यर्थः। द्वितीयपक्षतात्पर्यमाहुः **जीवस्येत्यादि**। **स्वाभाविकधर्मस्येति** जीवत्वस्य मनश्चाञ्चल्यस्य च। अत्यन्तं ब्रह्मापीति कतमपदवाच्यो रजोगुणस्य महत्तत्त्वस्य वाभिमान्यपीत्यर्थः। वीर्यगणनायामसामर्थ्ये हेतुमाहुः **जगदादीत्यादि**। तथा सतीह कतमोऽर्हतीत्यावृत्त्यान्वयः। तथा च, वीर्यगणनायां ज्ञानस्य हेतुत्वात्तस्मिंश्च धारणाया हेतुत्वात्तत्तदभावे तदभाव इत्यसामर्थ्यमित्यर्थः। तर्हि सम्भावनायां किं बीजं तत्राहुः **नन्वेवं रूपेणेति** जगदुपादानगोचरापरोक्षज्ञानकरणभूततया वक्ष्यमाणरूपेण। **तत्रापीति** सर्वांशधारणायामपि। **एतदिति** संभावनाबीजरूपं सामर्थ्यम्। संभावनाबीजं स्फुटीकुर्वन्ति **सामर्थ्येत्यादि**। अत्र रजांसीति पदेनावान्तरसृष्टिः सूक्ष्मात्स्थूला भवतीति बोध्यते। नन्वेवं सामर्थ्ये विद्यमाने किमिति धारणादिसामर्थ्यं निराक्रियत इत्याकाङ्क्षायामाहुः **तादृशस्येत्यादि**। तत्र मनसो जीवस्य चासामर्थ्ये हेतुत्वेन विष्णुपदस्यार्थमाहुः **मनसोपीत्यादि**। मनस इति पञ्चमी। यद्यपि तदणु, तथापि तत्त्वरूपं तद्व्यापकम्, तस्य च व्यापकत्वं छान्दोग्ये सनत्कुमारनारदसंवादे प्रसिद्धम्। तदपेक्षयापि भगवतो बृहत्वात्। तथाचैतेषु प्रथमे विचारिते मनसस्तद्ग्रहणसामर्थ्याभावस्तृतीये विचारिते '**यन्न स्पृशन्ति न विदुर्मनोबुद्धीन्द्रियासवः**' इतिवाक्यात् तत्संसर्गस्यैवाभावः। आद्ये द्वितीये च विचारिते वेगस्यैवाशक्यवचनत्वमित्याशयेनेयत्तावच्छेदराहित्यमाहेत्यर्थः। मूले सर्वपदस्याभावात्सर्वस्य ग्रहणे बीजमाहुः **तत** इत्यादि। **अर्थादिति** अवधिरूपादङ्घ्रर्थात्। ननु तथापि गुणेषु संख्यायोगादियत्ता भविष्यतीति शङ्कायामाहुः **सङ्ख्येत्यादि**। **अग्र** इति अग्रिमश्लोके। **एवमत्र मनोनिग्रहस्यावश्यकत्वस्थापनेन धारणा साधिता**। अत्र **नु** इतिपदेन परोक्षत्वस्य मूलाभिप्रेतत्वाज्जहत्स्वार्थात्र न दोषाय॥ ४०॥

### श्रीगिरिधरकृता बालप्रबोधिनी

व्यासावतारमाह—**कालेनेति**। कालेन मीलितधियां सङ्कुचितबुद्धीनां नृणां स्वनिगमः स्वकृतो वेदराशिर्बत दूरपारः अतिदुर्गम इत्यवमृश्य विचार्य सत्यवत्यामाविर्हितः सन् स एव हरिः अनुयुगं युगानुरूपं यथा वेदद्रुमं विटपशः शाखाभेदेन विभजिष्यति। ननु सङ्कुचितबुद्धीनामपि बहुकालाभ्यासाद्वेदः सुगमो भविष्यति किं शाखाविभागेनेत्याशङ्क्याह—**स्तोकायुषामिति**। अल्पायुषां बहुकालं जीवनमेव न सम्भवति कथं वेदाभ्यासः स्यादिति भावः। भगवल्लीलाया अद्भुतत्वं द्योतयन्नाह—**स्मेति**॥ ३६॥ ❀ ❀ बुद्धावतारमाह—**देवद्विषामिति**। निगमवर्त्मनि वैदिकमार्गे नितरां स्थितानां देवद्विषां दैत्यानां मतेर्विमोहो वेदमार्गेऽपकर्षमानं मतेः प्रलोभोऽन्यमार्गेऽल्पसाधनेनैव महाफलनिश्चयेन प्रवृत्तिश्च यस्मात्तथाभूतं पाखण्डं वेषं विधाय तेन औपधर्म्यं धर्माभासं पाखण्डधर्मं-स्वार्थे ष्यञ्-बहु अधिकं भाष्यते भाषयिष्यतीत्यन्वयः। पाखण्डधर्मो नाम वेदविरोधिधर्मः। ननु देवद्विषामित्यनेन देवप्रार्थनया तत्पक्षपातित्वे सूचितोऽपि वेदमार्गस्थानां मोहादिना ततश्चालनं भगवतोऽप्यनुचितमेवेत्याशङ्क्याह—**मयेन** दानवशिल्पिना विहिताभिः रचिताभिः अदृश्यतूभिरलक्षितवेगाभिः पूर्भिः पुरीभिर्गच्छतां तत्रत्यैश्च शस्त्रैर्लोकान् प्राणिनो घ्नतां नाशयतामिति। वेदमार्गस्थत्वेन तेषां प्रबलत्वं तेन च प्राणिविनाशं चालक्ष्य तन्निवृत्त्यर्थं तथा कृतवानिति भावः॥ ३७॥ ❀ ❀ कल्क्यवतारमाह—**यर्हीति**। कृतयुगादौ सर्वत्र हरिकथा भवन्ति, द्वापरादौ तु सतामालयेषु, यर्हि सतामप्यालयेषु हरेः कथा न स्युः, द्विजजनास्त्रैवर्णिकाः पाखण्डिनः 'वेदमार्गविरोधेन येषां करणमण्वपि॥ ते हि पाखण्डिनो ज्ञेया वेदार्थस्य विनिन्दकाः' इत्युक्तलक्षणाः स्युः, नृदेवा राजानश्च वृषलाः वृषं लान्तीति म्लेच्छाः स्युः, तथा यत्र यदा त्रैवर्णिकालयेष्वपि

स्वाहास्वधावषडिति गिरो न स्युः, स्वाहेति वषडिति च दैवे कर्मणि स्वधेति पित्र्ये कर्मणि च प्रयुज्यते उभयविधकर्माभावात्ता गिरो न श्रूयन्ते तदा युगान्ते कलियुगान्ते भगवान् कलेः शास्ता कल्कीरूपो भविष्यतीत्यन्वयः । अत्र च वराहादयो ब्रह्मनारदसंवादात्पूर्वभाविनः, मन्वन्तरावतारास्तु भूता भाविनश्च, धन्वन्तरिपरशुरामौ तदा वर्त्तेते, श्रीरामादयश्च भाविन एव, तत्र कचिद्भूतादिनिर्देश आर्ष इति द्रष्टव्यम् । अत्रेदं बोध्यम्—भगवतोऽवतारा द्विविधाः अनुप्रवेशावताराः स्वरूपेणावताराश्च, अकर्महेतुत्वाविशेषादुभयत्राप्यवतारशब्दप्रयोगः, तत्रानुप्रवेशावतारो नाम जीवेषु स्वस्यानुप्रवेशेन स्वीयज्ञानशक्त्यादीनामाविष्करणं स एवांशावतार इत्यपि कथ्यते, ते चावताराः पृथुपरशुरामादयः, नृसिंहरामकृष्णादयस्तु साक्षादवताराः ॥ ३८ ॥ ❀ ❀ सृष्ट्यादिकार्यभेदेन भगवतो विभूतीराह—सर्गे इति । पुरुशक्तिभाजः अपरिमिताचिन्त्यशक्तिमतो भगवतः सर्गे जगदुत्पत्तौ तपः प्रसिद्धं अहं ब्रह्मा नवर्षयो मरीच्यादयः अन्ये च ये प्रजेशाः दक्षादयः इमाः मायया स्वेच्छया रचिता विभूतयः, स्थाने पालने च धर्मश्च मखो विष्णुश्च मनवश्च अमरा देवाश्च अवनीशा राजानश्च मायाविभूतयः, अन्ते जगत्संहारे तु अधर्मश्च हरो रुद्रश्च मन्युवशाः सर्पाश्च असुराश्च-आद्यपदेन भूतप्रेतपिशाचादयः क्रूरस्वभावाश्च-इमा मायाविभूतय इत्यन्वयः ॥ ३९ ॥ ❀ ❀ भगवदवतारास्तच्चेष्टानि च मया सङ्क्षेपेणोक्तानि साकल्येन तदभिधातुं तु कोऽपि न समर्थ इत्याह—विष्णोरिति । इह संसारे यः कविर्बुद्धिमान् पुरुषः पार्थिवानि पृथिवीसम्बन्धीनि रजांसि परमाणूनपि विममे गणितवांस्तादृशोऽपि विष्णोर्वीर्याणां पराक्रमाणां गणनां कर्त्तुं कतमो नु अर्हति ? न कोऽपीत्यन्वयः । तन्माहात्म्यं प्रदर्शयन्विशिनष्टि—यो विष्णुः आत्रिपृष्ठं सत्यलोकमभिव्याप्य सर्वं चस्कम्भ धृतवानिति । किमिति धृतवानित्यपेक्षायामाह—यस्मात्त्रैविक्रमे अस्खलता प्रतिघातशून्येन स्वरंहसा स्वपादवेगेन पत्त्रिसाम्यरूपं सदनमावरणतया सर्वाधिष्ठानं प्रधानं तस्मादारभ्य उरु अधिकं कम्पयानं कम्पेन यानं पतनं यस्य तथाभूतं सर्वं तस्मात्कारणाच्चस्कम्भेत्यर्थः । तथा च मन्त्रः—"विष्णोर्नु कं वीर्याणि प्रावोचं यः पार्थिवानि विममे रजांसि ॥ योऽस्कम्भायिदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः" इति । अस्यार्थः—य उरुगायो विपुलकीर्तिस्त्रेधा त्रिप्रकारेण विचक्रमाणः पादविन्यासं कुर्वाणः । सहस्य सधादेशः । तिष्ठन्तीति स्थाः प्राणिनः । सधस्थं तत्रत्यैर्देवादिभिः सह वर्तमानमुत्तरं सत्यलोकमस्कम्भायत् अवष्टब्धवांस्तस्य विष्णोर्नु वीर्याणि यः पार्थिवानि रजांस्यपि विममे स तादृशोऽपि बुद्धिमान् कं प्रावोचं कं प्रावोचदित्यन्वयः ॥ ४० ॥

## हिन्दी अनुवाद

समयके फेरसे लोगोंकी समझ कम हो जाती है, आयु भी कम होने लगती है। उस समय जब भगवान् देखते हैं कि अब ये लोग मेरे तत्त्वको बतलानेवाली वेदवाणीको समझनेमें असमर्थ होते जा रहे हैं, तब प्रत्येक कल्पमें सत्यवतीके गर्भसे व्यासके रूपमें प्रकट होकर वे वेदरूपी वृक्षका विभिन्न शाखाओंके रूपमें विभाजन कर देते हैं ॥ ३६ ॥ ❀ ❀ देवताओंके शत्रु दैत्यलोग भी वेदमार्गका सहारा लेकर मयदानवके बनाये हुए अदृश्यवेगवाले नगरोंमें रहकर लोगोंका सत्यानाश करने लगेंगे, तब भगवान् लोगोंकी बुद्धिमें मोह और अत्यन्त लोभ उत्पन्न करनेवाला वेग धारण करके बुद्धके रूपमें बहुत-से उपधर्मोंका उपदेश करेंगे ॥ ३७ ॥ ❀ ❀ कलियुगके अन्तमें जब सत्पुरुषोंके घर भी भगवान्की कथा होनेमें बाधा पड़ने लगेगी; ब्राह्मण, क्षत्रिय तथा वैश्य पाखण्डी और शूद्र राजा हो जायँगे, यहाँतक कि कहीं भी 'स्वाहा', 'स्वधा' और 'वषट्कार' की ध्वनि—देवता-पितरोंके यज्ञ-श्राद्धकी बाततक नहीं सुनायी पड़ेगी, तब कलियुगका शासन करनेके लिए भगवान् कल्कि अवतार ग्रहण करेंगे ॥ ३८ ॥ ❀ ❀ जब संसारकी रचनाका समय होता है, तब तपस्या, नौ प्रजापति, मरीचि आदि ऋषि और मेरे रूपमें; जब सृष्टिकी रक्षाका समय होता है, तब धर्म, विष्णु, मनु, देवता और राजाओंके रूपमें तथा जब सृष्टिके प्रलयका समय होता है, तब अधर्म, रुद्र तथा क्रोधवश नामके सर्प एवं दैत्य आदिके रूपमें सर्वशक्तिमान् भगवान्की माया-विभूतियाँ ही प्रकट होती हैं ॥ ३९ ॥ अपनी प्रतिभाके बलसे पृथ्वीके एक-एक धूलि-कणको गिन चुकनेपर भी जगत्में ऐसा कौन पुरुष है, जो भगवान्की शक्तियोंकी गणना कर सके। जब वे त्रिविक्रम-अवतार लेकर त्रिलोकीको नाप रहे थे, उस समय उनके चरणोंके अदम्य वेगसे प्रकृतिरूप अन्तिम आवरणसे लेकर सत्यलोकतक सारा ब्रह्माण्ड काँपने लगा था। तब उन्होंने ही अपनी शक्तिसे उसे स्थिर किया था ॥ ४० ॥

**नान्तं विदाम्यहममी मुनयोऽग्रजास्ते मायाबलस्य पुरुषस्य कुतोऽपरे ये ।**
**गायन् गुणान् दशशताननं आदिदेवः शेषोऽधुनापि समवस्यति नास्य पारम् ॥ ४१ ॥**
**येषां स एव भगवान् दययेदनन्तः[1] सर्वात्मनाऽऽश्रितपदो यदि निर्व्यलीकम् ।**
**ते दुस्तरामतितरन्ति च देवमायां नैषां ममाहमिति धीः श्वशृगालभक्ष्ये ॥ ४२ ॥**

1, प्रा० पा०—दयया ह्यनन्तः ।

वेदाहमङ्ग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्यः ।
पत्नी मनोः स च मनुश्च तदात्मजाश्च प्राचीनबर्हिर्ऋभुरङ्ग उत ध्रुवश्च ॥ ४३ ॥
इक्ष्वाकुरैलमुचुकुन्दविदेहगाधिरघ्वम्बरीषसगरा गयनाहुषाद्याः ।
मान्धात्रलर्कशतधन्वनुरन्तिदेवा देवव्रतो बलिरमूर्त्तरयो दिलीपः ॥ ४४ ॥
सौभर्युतङ्कशिबिदेवलपिप्पलाद सारस्वतोद्धवपराशरभूरिषेणाः ।
येऽन्ये विभीषणहनूमदुपेन्द्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेववर्याः ॥ ४५ ॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

एतत्प्रपंचयति । नांतमिति । पुरुषस्य यन्मायाबलं तस्यांतं न विदामि न वेद्मि दशशतान्याननानि यस्य स शेषोऽप्यस्य गुणान् गायन् पारं न समवस्यति न प्राप्नोति ॥ ४१ ॥ ❀ ❀ यदि न केऽपि विदंति तर्हि कथं मुच्येरन् तत्कृपयैवेत्याह । येषामिति । दययेद्दयां कुर्यात् । ते च यदि निष्कपटमाश्रितचरणा भवंति ते दुस्तरामपि देवमायामतितरंति चकारान्मायावैभवं विदंति च । अथेति वा पाठः । प्रत्यक्षमेव तेषां मायातितरणमित्याह । नैषामिति । श्वशृगालानां भक्ष्ये देहे ॥ ४२ ॥ ❀ ❀ अंतर्ज्ञानाभावेऽपि मायेयमिति ज्ञानं तत्कृपया बहूनामस्तीत्याह वेदाहमिति त्रिभिः । यूयमिति । सनकादीनंतर्भाव्य बहुत्वम् । दैत्यवर्यः प्रह्लादः मनुः स्वायंभुवः तस्य पत्नी शतरूपा च तदात्मजाः प्रियव्रतोत्तानपादौ पुत्रौ तिस्रः कन्याश्च । प्राचीनबर्हिषो विसर्गलोपश्छांदसः ॥ ४३ ॥ ❀ ❀ शतधनुः अनुश्च । संधिरार्षः । रंतिदेवा इति वा पाठः सुगमः । ऐकपद्ये एतैः सहितो देवव्रत इत्यर्थः ॥ ४४ ॥ ❀ ❀ उपेन्द्रदत्तः शुकः । विभीषणादयो वर्या मुख्या येषां ते ॥ ४५ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अतितरंतीत्यत्रार्थे तरंतीति पाठः ॥ ४२ ॥ ❀ ❀ हे अंगेति ॥ ४३ ॥ ❀ ❀ इत्यर्थ इति । मांधातृत आरभ्य रंतिदेवदेवव्रत इत्यंतमैकपद्ये इति भावः ॥ ४४ ॥ ❀ ❀ उत्तंक इति वक्तव्ये उतंकेत्यार्षः । सारस्वतनामा कश्चि-दृषिविशेषो वसिष्ठादिवत्स च सरस्वतीपुत्रस्तद्वृत्तं भारतादवसेयम् । यस्य गोत्रिणो हि सारस्वतगोत्रा एव न तु सारस्वतसंज्ञा इति । सारस्वतसंज्ञका विप्रास्तु सारस्वतदेशवासिन एव "मत्स्यान्सारस्वतानथ" इति प्रथमस्कंधे सारस्वतदेशोपि पठितोस्ति क्वचित्पुस्तकेषु शारद्वतोद्धवेति पाठोप्यस्ति तत्र शरद्वतोऽपत्यं शारद्वतः कृपाचार्यः प्रतीयते "शारद्वतं गुरुं कृत्वा देवा यत्राक्षि-गोचराः" इत्युक्तेः ॥ ४५ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

मायाबलम् इति । मायामहत्त्वमित्यर्थः । इति व्याख्यालेशः ॥ ४१ ॥ ४२ ॥ ❀ ❀ पुत्राविति । प्रियव्रतोत्तान-पादाविति द्वौ । कन्याश्चेति । आकूतिर्देवहूतिः प्रसूतिरिति तिस्रः ॥ ४३ ॥ ❀ ❀ [ ऐलः पुरूरवाः । नाहुषो ययातिः । आद्य-शब्देन यदुप्रभृतयः ॥ ] सन्धिरिति । शतधनुरित्यत्र विसर्गलोपेन सन्धिरार्षः । अत्र बालप्रबोधिनीकारस्तु शतधन्वा अनुश्चात्रा-कारलोप आर्ष इत्याह । एकपद्ये इति । रन्तिदेवदेवव्रत इत्याकारके पाठे ॥ ४४ ॥ ❀ ❀ [ सारस्वतेति । सारस्वतो दधीचिः ॥ ४५ ॥ ४६ ॥

एवमवतारगुणप्रयोजनान्युक्त्वा नाहं न यूयमिति । पूर्वप्रस्तुतमुपसंहरति नेति । मायाबलस्याद्भुतबलस्य बलं सेना प्रकृत्याख्यपरिकर इति वा पुरुषस्य परमपुरुषस्यांतं स्वरूपस्वभावयोरवधिमहं चतुर्मुखः न विदामि तेऽग्रजाः सनकादयः न विदंत्यन्ये कुतो जानीयुः । किंबहुना दशशतान्याननानि यस्य स दशशताननः सहस्रमुखः आदिदेवः शेषः द्विसहस्रजिह्वश्चानंतगुणान् गायन्नधुनापि अस्य भगवतः पारं न समवस्यति नाध्यवस्यति ॥ ४१ ॥ ❀ ❀ ननु कैरप्यविज्ञातस्वरूपस्वभावावधित्वे कथं तद्भजनेन मुच्येरन्नित्याशंक्यापरिच्छिन्नस्य वस्तुनोऽपरिच्छिन्नत्वेनैव ज्ञानं मुक्तिसाधनं न तु परिच्छिन्नत्वेन तस्यान्यथा ज्ञानरूप-त्वादतः परमात्मस्वरूपमपरिच्छिन्नत्वेन जानंतो भजमाना मुच्यंते एवेत्याह येषामिति । निर्व्यलीकं निरपराधं यथा तथा येषां सर्वा-त्मना उपायोपेयत्वबुद्ध्या आश्रितपदः संश्रितपदो यदि भवेत्स एष भगवाँस्तान् दययेत् भगवद्दयाविषयाः दुस्तरां तर्तुमशक्यां

१. प्रा० पा०—पिप्पलादाः । २. प्रा० पा०—दत्ताः । ३. प्रा० पा०—देवभूपाः ।

देवस्य विष्णोर्मायामतितरंति निःशेषं तरिष्यंति । चकारात्तत्स्वरूपस्वभावादिकमपि यथावस्थितत्वेन जानंति एवं सर्वात्मना भगवत्प्रपन्नानामात्मसमं विचक्ष्महे इत्युक्तेर्देहात्मभ्रमोऽपि निवर्त्तत इत्याह नैषामिति । एषां सर्वात्मना भगवंतमाश्रितानां श्वश्रृगालानां भक्षणयोग्ये कलेवरे ममाहमिति धीः अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिरिति स्थानोक्तधीः नास्तीत्यर्थः ॥ ४२ ॥ ❀ ❀ किमेवंविधा भगवत्प्रपन्ना अपि संतीत्यत आह वेदेति । अंग हे नारद अहं वेद जानामि भगवंतमिति शेषः । परमस्य भगवतो योगमायां दैवी ह्येषा गुणमयीत्युक्तप्रकारां स्वदेहेंद्रियादिरूपेण संयुज्यमानां विचित्रसर्गकरीं प्रकृतिं तरिष्यामीति शेषः । यूयमित्यादीनां विदंत्यतितरंति चेत्युपरितनेनान्वयः यूयमिति । सनकाद्यभिप्रायेण बहुवचननिर्देशः भवो रुद्रः भगवानिति रुद्रविशेषणं दैत्यवर्यः प्रह्लादः मनोः पत्नी शतरूपा स च स्वयंभुवो मनुश्च ॥ ४३ ॥ ❀ ❀ ऐलः पुरूरवाः नाहुषो ययातिः देवव्रतो भीष्मः ॥ ४४ ॥ ❀ ❀ विभीषणादयश्च वर्या मुख्या येषान्ते ॥ ४५ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

अनंतत्वमुपपादयति नांतमिति । विदामीति विकरणव्यत्ययेन चतुर्मुखाद्ब्रह्मणः शेषस्य सहस्रमुखत्वकथनात् ज्ञानाधिकमस्तीत्याशंकां निवारयति न समवस्यति न दिचनोति माल्याक्षतादिदाने स्त्रीशेष इति वैजयंतीकोशात् । अक्षताद्याशीर्वचनवान् शेषः कश्चित्पुमानिति संशयं निरस्यति दशशतानन इत्यनेन । अयमपि नागेष्वन्यतमः कश्चिदित्यत आह आदिदेव इति । अपरेऽर्वाचीना अनेन श्लोकद्वयेन विष्णोर्नुकं वीर्याणि प्रावोचं न ते विष्णो जायमान इत्यृगर्थमुदाहरंति ॥ ४१ ॥ ❀ ❀ नन्वेवं चेन्न कस्यापि त्राणाभावेन पुरुषार्थप्राप्तिरित्याशंक्य तत्प्रसादेन सर्वं सुलभमित्याह येषामिति । सोऽनंतो भगवान् स्वयमेव येषां दययेत् दयांकरोति ते देवरूपमायां स्वरूपशक्तिं विदंति संसारहेतुं शैवलीं मायां तरंति तत्साधनमंतरेण दययेच्चेत्तस्य वैषम्यनैर्घृण्ये च स्यातामित्यत्राह सर्वात्मनेति । तत्रेत्थंभावमाह नैषामिति । येषां सेवकानां श्वसृगालभक्षणयोग्ये देहे ममाहमिति धीर्नास्ति देहाद्यभिमानशून्यत्वेन भाव्यमिति भावः । तत्तद्योग्यतानुसारेण तत्प्रसादोऽपि बहुविध इत्यस्मिन्नर्थे वैशब्दः ॥ ४२ ॥ ❀ ❀ ननु तर्हि तत्प्रसादयोग्याः के इति तानाह वेदाहमिति । "ऋतस्य तंतुं विततं निवृत्त्य तदपश्यदभवत्प्रजासु" इतिश्रुतिद्योतको हिशब्दः प्रथमप्रक्रांतत्वाच्चतुर्मुखः सर्वस्मादधिकं वेत्ति तदन्ये यथायोग्यतया वेत्तार इत्यर्थस्मारको वा भगवानिति विशेषणाद्भवस्य नारदादेर्ज्ञानातिशयोऽस्तीति सूचयति अथेत्यनेन दैत्येषु प्रह्लादस्य ज्ञाननैर्मल्यं सूचयति अंगो वेनस्य पिता ॥ ४३ ॥ ❀ ❀ ऐल इलायाः पुत्रः पुरूरवाः नाहुषो ययातिः ॥ ४४ ॥ ❀ ❀ हरेः स्वरूपांशानामुपेंद्रदत्तादीनां नित्यबद्धगुणेषु सहयोगो दुष्टजनमोहनार्थः ॥ ४५ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

तत्र मायिकामायिकत्वेनोभयविधानमपि वीर्य्याणामानन्त्यमाह नान्तमित्यर्द्धाभ्याम् ॥ ४१ ॥ ❀ ❀ तर्हि तत्तज्ज्ञानां मायिकवीर्य्याणां तरणसाधनानां चामायिकवीर्य्याणामात्यन्तिकज्ञानाभावे कथं लोका निस्तरेयुरित्याशङ्क्याह येषामिति । यद्वा तस्मात्तज्ज्ञानेनाग्रहं परित्यज्य शुद्धभावेन भजेदेवेत्याह येषामिति । चकारादनन्तत्वेनैव जानन्ति च ॥ ४२ ॥ ❀ ❀ ननु मायिकवीर्य्याणामप्यनन्तत्वात्तरणं कथं सम्भवेत् । उच्यते । तत्कृपयैव । तत्रावस्तुत्वज्ञानेनाध्यासपरित्यागादिति सिद्धान्तयंस्तत्राधिकारिण उदाहरति वेदाहमित्यादित्रिकेण । यद्वा वेदेति । योगमायामैश्वर्य्यं तद्यातारतम्येन स्वाधिकारानुरूपमहमन्येऽपि विद्म इत्यर्थः ॥ ४३ ॥ ४४ ॥ ४५ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या ।

एतत् प्रपञ्चयति नान्तमिति । पुरुषस्य यन्मायाशक्तेर्बलं तस्याप्यन्तं न वेद्मि किमुत चिच्छक्तेरिति भावः । तस्य पुरुषस्य गुणान् प्राकृतान् अप्राकृतांश्च गायन् न समवस्यति न प्राप्नोति ॥ ४१ ॥ ❀ ❀ ननु यदि युष्मदादयोऽपि तं न विदन्ति तर्हि तदनुभवो निराश्रय एवाभूदिति चेत्तत्राह । येषां स दययेत् दयेत् अधीगर्थेत्यादिना षष्ठी मामेते जानंत्विति सकरुणमङ्गीकुर्य्यादित्यर्थः । नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम् । इति श्रुतेः । केन लक्षणेन तस्य दया ज्ञातव्येत्यत आह । सर्व्वात्मा ज्ञानकर्म्मादिनिरपेक्षतया निर्व्यलीकं निष्कपटं निष्काममिति यावत् श्रितपदः आश्रितभगवच्चरणा यदि भवन्ति । तस्य दयाशक्तेरेव मुख्या वृत्तिः शुद्धभक्तिः, सा च तद्भक्तद्वारैव जनेषु प्रवर्त्तते इति भावः । चकारात् तं विदन्ति च । केन लक्षणेन मायातरणतद्वेदने ज्ञातव्य इत्यत आह । श्वशृगालभक्ष्ये पुत्रादिदेहे स्वदेहे च एषां ममाहमिति धीर्न स्यात् ॥ ४२ ॥ ❀ ❀ ननु त एव निरहंममत्वाश्च येषु भगवतो दयालक्षणं दृष्टं द्रष्टव्यञ्चेति तान् गणयति वेदाहमङ्गेति । मयि भगवतो दयास्तीति जानामीति तदभिज्ञभक्तजनसंमत्यैव वच्मि स्वानुभवस्तु नान्तं विदाम्यहमिति मया पूर्व्वमेव प्रकाशित इति भावः । दैत्यवर्य्यः प्रह्लादः । पत्नी शतरूपा । मनुः स्वायम्भुवः । तदात्मजाः प्रियव्रतोत्तानपाददेवहूत्यादयः । प्राचीनबर्हिषो विसर्गलोपच्छान्दसः ॥ ४३ ॥ ❀ ❀ शतधन्वा च अनुश्चेति आकारलोप आर्षः । मान्धात्रादिभिः सहितो देवव्रतो भीष्मः । रन्तिदेवा इति च पाठः ॥ ४४ ॥ ❀ ❀ उपेन्द्रदत्तः शुकः ॥ ४५ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्र कैमुत्यन्यायेनाह मायेति । माया प्रकृतिः शक्तिभूता सृष्ट्याद्युपयोगित्वेन बलं यस्य यद्वा मायायाः प्रकृतेः बलं सामर्थ्यं यस्मात्तस्य पुरुषस्य भगवतः अंतं गुणस्वरूपादीनामेतावत्त्वम् अहं चतुर्मुखः न विदामि न वेद्मि ते तव अग्रजाः सनकादयः न विदंति अपरे अन्ये कुतो जानीयुः । दशशताननः सहस्रवदनः शेषः अस्य हरेः गुणान् गायन् अधुनापि पारमंतं न समवस्यति नाध्यवस्यति ॥ ४१ ॥ ❀ ❀ ननु ज्ञानाभावे कथं मुक्तिः स्यादित्यत्राह येषामिति । अनंतः इयत्तानवच्छिन्नः स एव भगवान् यदि येषां दययेत् दयां कुर्यात् तया ते निर्व्यलीकं निरपराधं यथा तथा सर्वात्मना आश्रितपदः भवंति प्रेमविशेषलक्षणां भक्तिं प्राप्नुवंति तथाह भगवान्पूर्वाचार्यः । कृपास्यदैन्यादियुजि प्रजापते यया भवेत्प्रेमविशेषलक्षणा भक्तिर्ह्यनन्याधिपतेर्महान् साचोत्तमा साधनरूपिका परेति ते दुस्तरां देवस्य विष्णोः मायां कार्यकारणस्वरूपिणीं प्रकृतिं तरंति । चकारादेवं प्राप्नुवंति तच्चरणैकशरणानां लक्षणमाह एषां श्वश्रृगालभक्ष्ये देहे ममाहमिति धीर्न भवति भगवत्संकल्पाधीनभूतायाः कार्यभूतं शरीरं मायात्मकतया यैर्ज्ञातं तेषां मदीयमिदं शरीरं शरीररूपोहमिति च बुद्धिर्न भवतीत्यर्थः ॥ ४२ ॥ ❀ ❀ ननु मायाकार्ये शरीरे येषां ममाहमिति धीर्न भवति मायामर्थात्परसंबंधिनीमात्मविलक्षणां विदंति तां तरंति च ते के इत्यत्राह वेदेति चतुर्भिः । हे अंग नारद परमस्य माया यस्य तस्य माधवस्य योगमायां योगः संकल्पः तदधीनां मायां प्रकृतिं हि शब्देन परमं च देव जानामि यूयं मम पुत्राः यूयमित्यादीनां विदंति तरंति च देवमायामिति चतुर्थेनान्वयः । दैत्यवर्यः प्रह्लादः मनोः स्वायंभुवस्य पत्नी शतरूपा स च मनुश्च तदात्मजाः पुत्रौ कन्याश्च । प्राचीनबर्हिषो विसर्गलोपश्छांदसः ॥ ४३ ॥ ❀ ❀ नाहुषः ययातिः शतधनुश्च अनुश्च संधिरार्षः ॥ ४४ ॥ ❀ ❀ उपेन्द्रः शुकः विभीषणादयो वर्याः मुख्या येषां ते ॥ ४५ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं महद्गुणा अव्य[1]वस्थितमनसा आकलयितुमशक्या इति धारणयेत्युक्तम् । धारणा हि यथाकथञ्चिन्मनसा परिकल्प्य क्रियत इति । महतश्च धारणाद्वैकल्यं भवतीत्यवतिष्ठत इति यदुक्तं तदर्थं महत्त्वं निरूपयति—**नाऽन्तं विदामीति** । अहं ब्रह्मा सर्वदा भगवद्गुणानामेवाऽभिव्यञ्जकजगत्कर्त्ता । यावज्जन्म कर्माणि कुर्वन्नपि पुत्रद्वारा कारयन्नपि स्वतिरोभावे स्वस्य वाऽन्यस्य वा विनियोगादन्तं न विदामीत्यर्थः । मुनयोऽपि तथा । योगोऽपि मदन्त[2]र्गतमेव फलं साधयतीति सुतरां त्वदग्रजा मत्पुत्राः सनकादयो मरीच्यादयो वा । ते हि मदंशभूता मदपेक्षया अल्पमेव विषयीकुर्वन्तीति । तेषां गणनेच्छानिवृत्तौ हेतुमाह—**मायाबलस्येति** । क्षणमात्रेण ब्रह्माण्डकोटिजननसमर्थाया मायाया अपि बलं यस्मात् । किञ्च । पुरुषस्य मायाभर्त्तुः । भगवदाहितमेव हि तेजः सा जनयतीति । कुतः अपरे कालादयः । तेषामपि भगवच्चेष्टारूपत्वात् । अस्मदादयो वा । पुरुषापेक्षया अपरत्वे कालादयः । स्वापेक्षया त्वस्मदादयः । अस्मदादीनां प्रथमत एव अनन्तत्वज्ञानान्निवृत्तावपि शेषो वेदाभिमानिनी देवता । सहस्रवदनः सहस्रप्रकारेणैकं पदार्थं वक्तुं शक्तः । अत एव आदिदेवः । तत्प्रतिपाद्या एव हि सर्वे देवाः[3] । यावान् भगवान् तद्व्यतिरिक्तसर्वरूपः शेषः । सृष्टेरनादित्वात्तत आरभ्य गणनायामप्यद्याऽपि नाऽन्तं समवस्यति एतावन्तोऽग्रे गणनीया इति । अनन्तत्वात्सृष्टेरग्रेऽपि । अत आह—**नाऽस्य पारमिति** । अस्य गुणस्य । भगवतो वा । बहून् गुणान् गणयितुं प्रवृत्त एकस्याऽपि पारं न गतवानिति वा । एवं सर्वथा भगवतो महत्त्वं निरूप्य धारणाया अशक्यत्वात् यावदिति निरूपितम् ॥ ४१ ॥ ❀ ❀ नन्वेतादृशत्वे भगवतः क्षण[4]मपि धारणा न स्यादित्याशङ्क्याऽऽह—**येषामिति** । सर्वमार्गप्रवर्त्तकत्वाद्भगवतो मोक्षदातुः अवश्यं धारणा[5] प्रवर्त्तनीयेति यान् पुरुषविशेषानात्मीयत्वेन गृह्णाति तेषां धारणायोग्यतेत्याह—**दययेदिति** । तेषामपि न साधनत्वेन तथात्वसम्पादनं किन्तु दययैव । **स एव भगवानिति** । यः सर्वमार्गप्रवर्त्तकः । न तु गुर्वादीनामपि क्रिया[6] । भगवत्त्वात्स्वेच्छया तथाकरणम् । अनियमेन करणप्राप्ता[7]वतिदुःखित्वेन दीनत्वे दयया तानेव योजयतीति दयायाः करणत्वम् । सर्वेषु च दयाभावः अनन्तत्वात् । तथा सत्यन्येषां गुणानामुपमर्दात्सर्वमुक्त्या सृष्टेर[8]न्तवत्त्वे भगवतोऽनन्तत्वं भज्येत । ननु तथाविधानां किं धारणा[9]मात्रेण स्वयमेव तथा फलं प्रयच्छ[10]तीत्याशङ्क्य साधनेनैव सर्वं भगवान् करोतीति साधनमुपदिशति—**सर्वात्मनाऽऽश्रितपद इति** । भगवद्दयाया ज्ञापकं धारणम् । तस्मिन् सति भगवदिच्छानुगुण्यादन्यानि साधनानि सिद्धिं प्राप्स्यन्तीति सर्वभावेन भगव[11]त्प्रपत्तिः कर्त्तव्या । तदाह । सर्वात्मना आश्रितः पादो यैः । व्यलीकं कापट्यं [12]फलसम्बन्धो वा । सर्वात्मत्वेन [13]फलार्थस्याऽपि भजनस्य प्राप्तत्वान्निर्व्यलीकमिति तन्निषेधः । तेषां फलसिद्धिमाह—**ते दुस्तरामिति** । अथाऽऽश्रयणानन्तरम् । पूर्वमेव दुस्तरत्वादथशब्दो मध्ये निरूपितः । अथवा । ते दुस्तरां मोहिकां मायां तरन्ति । तदा भगवद्भक्तिर्ज्ञानसिद्धिर्भवति । अथ तदनन्तरम् । देव-

---

१. अव्यवसितेति ख. । २. मदन्तमेवेति ख. । ३. वेदा इति ख. । ४. क्षणमात्रमपीति ख. । ५. धारणीया ख. । ६. कृपा इति ख. । ७. प्राप्तावपीति ख. । ८. सृष्टेरन्तत्वे इति ख. । ९. धारणामात्रेणेति ख. । १०. प्रयच्छतीति ख. । ११. प्रतिपत्तिः ख. । १२ फलं वेति ख. । १३. फलस्यार्थस्यापि ख. ।

मायां देवरूपस्य[1] भगवतो द्योतनात्कारणाद्वा क्रीडाद्यर्थं वा या माया तामाधिदैविकीं पश्चात्तरन्ति। भगवति सायुज्यं प्राप्नुवन्तीत्यर्थः। तेषां तरणेऽभिज्ञानमिदानीमाह—**नैषामिति**। एषां श्वश्रृगालभक्ष्ये न ममेति। इदमभिज्ञानं तरणे। स एव तरिष्यतीति ज्ञातव्यम्। अहं ममेति दौर्जन्यं न यस्य देहादौ। सर्वत्रैव हि महत्कार्येऽभिज्ञानेनैव प्रवृत्तिः। **"अङ्गं विधास्यामि"**त्यत्रोक्तम्। श्वश्रृगालभक्ष्य इति पर्यवसानेनाऽन्यदीयत्वनिश्चयार्थमुक्तं तत्तस्य पर्यवसितं फलम्। अन्यानि त्ववान्तरफलानि। तथा देहस्य स्वोपयोगोऽवान्तरफलमेव। तस्मात्स्वोपयोगोऽपि देहादेर्न मुख्यं फलम्। अतः फलार्थे[2] यत्नो न कर्तव्य इति हेतुरपि सूचितः। श्वश्रृगालेति ग्रामारण्ययोर्भक्षका उपलक्षिताः। तेन यत्राऽयं देहस्तिष्ठति तदाश्रयाः सर्व एव गृह्यन्ते। तेन मत्स्यादीनामपि परिग्रहः। अथवा। तादृशस्य नाऽपमृत्युसम्भावनेति ग्रामारण्यभेदेन तावेव भक्षकौ। ताभ्यामुपरोधान्न काकादीनां प्रवेशः। बहुधा विनियोगसम्भवादुपलक्षणमेवेति निश्चयः॥ ४२॥ ❀ ❀ एवं **"यावन्मनोधारणयाऽवतिष्ठत"** इति सुनिरूपितम्। **"एकैकशोऽङ्गानि धियाऽनुधारयेदि"**ति निरूपयति—**वेदाऽहमङ्गेति** चतुर्भिः। तत्र त्रिविधा भक्ताः श्लोकत्रयेण सङ्गृहीताः। भक्तभक्तास्त्वेकेन। एते हि भगवदंशधारकाः। एतादृशत्व एकांशधारणासिद्धिः। पूर्वाधिकारे सम्पन्ने उत्तराधिकारार्थं प्रयत्नः कर्तव्य इति। प्रथमं ब्रह्मा। अन्तिमः शुकः पक्षी। तत्र प्रथमं शुकाधिकारे सम्पन्ने तदनन्तरं क्रमेण ब्रह्मपर्यन्तमधिकारा भवन्ति। इदमेव पादादित्वेनोच्यते। अथवा। चरणसेवा ब्रह्मण एव सिद्धा। स एव हि तच्चरणक्षालनादिना पूजां विधाय गङ्गामुत्पादितवान्। हसितं शुकादयो भगवतश्चित्ररूपाः। तत्र प्रथमं परमसात्त्विका निरूपिताः। तदनु राजसास्तामसाश्च। भगवज्ज्ञाने भक्तिमार्गस्य मुख्यत्वात् भक्ता एव गण्यन्ते। तत्राऽऽपाततः किञ्चित्स्वरूपमहं वेद। परमस्य पुरुषोत्तमस्य। योगमायां जगज्जननार्थमाज्ञापितां मायाम्। साहि प्रथमतो ह्याज्ञाकारिणी। तस्याः स्वरूपे ज्ञाते भगवान् ज्ञातो भवति। तद्द्वारैव हि लोके भगवदाविर्भावात्। ब्रह्मा जानातीत्यत्र गुणानां सृष्टिहेतुत्वात्सर्वगुणसिद्धये[3] ब्रह्मा सर्वं करोतीति हेतुर्हिशब्देन सूचितः। मायाया आधिदैविकत्वज्ञापनार्थं योगपदम्। आध्यात्मिकत्वमिति केचित्। यूयं नारदेन सहिता मरीच्यादयः। भवश्च महादेवः। एते त्रयः सात्त्विकादयः। भवस्य भगवत्त्वं भक्तिविरुद्धाचारस्याऽभक्तत्वबोधनव्यावृत्त्यर्थम्। ज्ञाननिष्ठान् सनकादीन् गणयत्येकरूपेण—**अथ दैत्यवर्य इति**। अनेन दैत्यवर्यः सनकादिरेवेति विचारितम्। अन्यथा राजसेषु गणनीयः स्यात्। दैत्यवर्यः प्रह्लादः। अथेति भिन्नप्रक्रमं[4] प्राप्तः। भक्तमुख्यत्वात्। मनोः पत्नी शतरूपा निरूपिता। कायमित्यत्र[5] स्त्रीलिङ्गस्य प्रथमनिर्देशात्। सर्वत्र चकारास्तदीयानां संग्राहकाः। तदात्मजाः प्रियव्रतोत्तानपादावाकूतिदेवहूतिप्रसूतयः। ऋभुर्विष्णुपुराणे प्रसिद्धः। अङ्गो वेनपिता। उतेति ध्रुवसिद्धिः[6] स्पष्टेति। इक्ष्वाकुप्रभृतयो राजसाः। नाहुषो ययातिः। यदुप्रभृतय आदिशब्देनोच्यन्ते। मान्धात्रादिरन्तिदेवान्तैः सहितो देवव्रतो भीष्मः। एकवद्भावो वाऽनपुंसकश्च। सौभर्यादयस्तदनन्तरभाविनः। मत्स्यसङ्गादिना तथात्वम्। उतङ्को भारते प्रसिद्धः। पिप्पलादः कश्चित्। सारस्वतो दधीचिः। उपेन्द्रदत्तः परीक्षित्। पार्थोऽर्जुनः। अन्ये च यथायथं प्रसिद्धाः॥ ४३-४४-४५॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

नान्तमित्यत्र **स्वस्येति** भगवतः। **ननु** योगजधर्मेण सर्वगुणज्ञानं मुनीनां भविष्यतीत्याकाङ्क्षायामाहुः **योगोपीत्यादि**। ननु मायया बलं यस्येति षष्ठ्यर्थे बहुव्रीहिर्भवत्वित्याशङ्कायामाहुः **किञ्चेत्यादि**। **यावदिति**। **निरूपितमिति**। तेन विद्यमानेपि माहात्म्ये भगवत एवं गुणकत्वात्सर्वदा मनः कुतो न तिष्ठतीत्याशङ्का वारितेत्यर्थः॥ ४१॥ ❀ ❀ **येषामित्यत्र न साधनत्वेन तथात्वसम्पादनमिति**, मार्गप्रवृत्तिसाधनत्वेन नात्मीयतया ग्रहणम्। **क्रियेति** प्रार्थनादिक्रिया। तथा च, यथा पुरुषाणां नियोज्यानां सत्त्वेपि राज्ञा मृगया स्वयं क्रियते, **तथा सर्वमार्गप्रवर्तकत्वाद्भगवत्स्वाच्च** स्वत एव दयाकरणमित्यर्थः। नन्विच्छायाः करणत्वे दयायाः किमिति तथात्वमुच्यते इत्यत आहुः **अनियमेनेत्यादि**। धारणायाः कार्तार्थ्यहेतुत्वज्ञानेन तत्करणावश्यकस्फूर्तावपि भगवतो गुणानन्त्यज्ञानेन तस्याः अशक्यत्वस्फूर्तौ नियमतस्तत्करणं न प्राप्नोतीति **तेषां** तथात्वे तथेति तस्यास्तथात्वमित्यर्थः। नन्वेवं सति सर्वेषु कुतो न दययतीत्यत आहुः **सर्वेष्वित्यादि**। तथा चात्रापीच्छैव कारणमित्यर्थः। **तथाविधानामिति** दयाविषयाणाम्। **साधनमुपदिशतीति** फलसाधनं ब्रह्मा स्वयमुपदिशतीत्यर्थः। **सर्वात्मना** आश्रितः पादौ यैरिति न विग्रहवाक्यम्, किन्तु तात्पर्यकथनम्। विग्रहस्त्वाश्रितः पादो यस्येत्याश्रितपात्, तस्य आश्रितपद इति। तथासति येषां दययेत्, ते सर्वात्मनाश्रितपदः अथ दुस्तरां देवमायामतितरन्तीत्यादियोजना। अभिज्ञानस्य प्रयोजनं शास्त्राभिप्रेतत्वं चाहुः **सर्वत्रे**त्यादि हेतुरिति निर्व्यलीकाश्रये। **तादृशस्येति** उक्तधारणाधारयितुः। अनेनैव प्रथमपक्षेऽस्वरसोपि दर्शितः। **बहुधेत्यादि**। 'देहः किमन्नदातुर्वे' त्यादिवाक्यात्तथेत्येव युक्तमित्यर्थः। **सुनिरूपितमिति** येषु भगवतो दयया निर्व्यलीको भगवदाश्रयस्ते सर्वत्र निर्ममा निरहङ्काराः सुव्यवस्थितमनसो भगवन्माहात्म्येनैव सर्वाङ्गधारणां कुर्वन्तीति मनोनैश्चल्यं सर्वात्मना आश्रयश्च प्रकारो भगवन्माहात्म्यमेव तत्र साधनम्। निदानं तु भगवद्दया, तत्र सहकारिणी तु भगवदिच्छा, सा यथा तथा तावत्कालं धारणा

---

१. देवरूपां देवस्येति घ.। २. परार्थे इति ख.। ३. गुणप्रसिद्धय इति ख.। ४. भिन्नक्रममिति ख.। ५. कार्यमित्यत्रेति ग.। ६. ध्रुवे फलसिद्धिरिति ख. ग.

सिद्धयति, तस्या अन्यादृशत्वे तु मनोवैक्लव्यं भगवत अनियम्यत्वात्। अतः तादृशाभावे स्वदैन्येमेव सदा भावनीयमिति श्लोकत्रयेण सम्यङ्निरूपितमित्यर्थः ॥ ४२ ॥ ❀ ❀ वेदाहमित्यत्र एकैकेत्यादि। पूर्वोक्ताधिकाराभावे एकैकाङ्गधारणाधिकारिणां निरूपणमुखेन तत्प्रकारं निरूपयतीत्यर्थः। तत्रेति सर्वात्मनाश्रयत्वेपि साहङ्कारममकारवत्त्वेन जघन्याधिकारत्वे। भगवतश्चित्ररूपा इति 'मयूराश्चित्रिता येन शुकाश्च हरितीकृता' इतिवाक्यात्ते तद्रूपाः वयांसि तद्व्याकरणं विचित्रमिति वाक्याच्च। मुखधर्मरूपा इति हसितात्मका इत्यर्थः। एतेन 'आरुह्य ये द्रुमभुजानि' त्यत्रोक्तानामीदृशोऽधिकार इति प्रतिभाति। किञ्च। एतद्धारणायाः सञ्जातभक्त्यधिकारत्वेन तादृशस्यैवंभावसम्पत्तौ 'चेतस्तत्प्रवणं सेवे' ति मानसी सेवा सिद्धयति। तत्रापि मुख्याधिकाराभावे सेवौपयिकदेहो वा वैकुण्ठादिष्वित्यनेन बोधितं फलं यथाधिकारं भवतीत्यपि प्रतिभाति ॥ ४३ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

एवं सप्रयोजनभगवदवतारानुक्त्वा 'यो ह्यात्ममायाविभवं स्म पर्यगान्नाहं न यूयं यदतां गतिं विदुः' इति यदुक्तं तदेव द्रढयति—नान्तमिति। पुरुषस्य परमपुरुषस्य भगवतस्तन्मायाबलस्य चान्तं अहं न विदामि न वेद्मि। तथाऽमी ते अग्रजा मुनयः सनकादयो न विन्दन्ति स्वयं चादिदेवो भगवान् न वेत्ति। किं बहुना ? दशशतान्याननानि यस्य स तैर्द्विजिह्वैस्तावद्भिराननैरादित एव तद्गुणान् गायन् अधुनाऽपि अस्य भगवतस्तद्गुणस्य च पारमन्तं न समवस्यति न प्राप्नोति। अपरेऽस्मदाद्यपेक्षयाऽर्वाचीनाः कुतस्तत्प्राप्नुयुरिति। वयं सर्वज्ञा इति वदन्तो मूर्खा एवेति ज्ञेयम् ॥ ४१ ॥ ❀ ❀ ननु यदि केऽपि न विदन्ति तर्हि कथं मुच्येरन् ? "तमेव विदित्वाऽतिमृत्युमेति ॥ नान्यः पन्था विद्यतेऽयनाय" इति श्रुत्या ज्ञानिनामेव मुक्तिप्रतिपादनादित्याशङ्क्यान्तर्ज्ञानाभावेऽपि मायेयमिति ज्ञानं तत्तरणेन संसारविमुक्तिश्च तत्कृपया बहूनां भवतीत्याह—येषामिति। एवकारेण देवतान्तरव्यावृत्तिः। तत्र हेतुमाह—अनन्त इति, देशकालवस्तुपरिच्छेदरहित इत्यर्थः। देवतान्तरस्य तथाभावादिति भावः। येषां स एव भगवान् दययेत् दयां कुर्यात् एते मदीयं तत्त्वं जानन्तु मायां तरन्त्विति कृपया चिन्तयेत् ते भगवत्कृपापात्रभूता अन्यैर्दुस्तरां तर्तुमशक्यामपि देवस्य भगवतः शक्तिरूपां मायामतितरन्ति निश्शेषं तरन्ति। चकारात्ते भगवत्तत्त्वं विदन्ति च। अथेति पाठान्तरम्। "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन ॥ यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्" इति श्रुतेः। केषामुपर्येवं दयां करोतीत्यपेक्षायामाह—सर्वात्मनेति। निर्व्यलीकं निष्कपटं फलाभिसन्धिरहितं हितं यथा भवति तथा अतएव सर्वात्मना एकाग्रेण मनसा यदि ते श्रितपदः आश्रितभगवच्चरणा भवन्तीत्यर्थः। ये भगवत्कृपया तत्त्वज्ञानेन मायां तीर्णास्तेषां किं लक्षणमित्यपेक्षायामाह—नैषामिति। श्वशृगालादीनां भक्षणयोग्ये कलेवरे एषां ममाहमिति धीर्न भवति। अत्र ह्यज्ञानामधमानां देहेऽहमिति धीर्भवति तद्व्यतिरिक्तात्मज्ञानाभावात्, मध्यमानां शास्त्रसंस्कारवतां देहाद्व्यतिरिक्तात्मज्ञानसत्त्वेऽपि देहे ममायमिति धीर्भवत्येव, उत्तमानां भगवदनुग्रहेण तत्त्वज्ञानेन निवृत्ताविद्यानां तु ममाहमित्युभयविधाऽपि धीर्न भवति, किन्तु स्थावरजङ्गमात्मकं सर्वं भगवानेवेत्येव धीर्भवति। तदुक्तं गीतासु—'बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ॥ वासुदेवः सर्वमिति स महात्मा सुदुर्लभः' इति ॥ ४२ ॥ ❀ ❀ तथाभूताः के इत्यपेक्षायां तान् दर्शयति—वेदाहमिति त्रिभिः—हे अङ्गेति सम्बोधनं स्नेहसूचकम्। परमस्य हि योगमायामहं वेद जानामि। यूयमिति शौनकाद्यभिप्रायेण बहुवचनम्। भगवान् भवश्च। दैत्यवर्यः प्रह्लादः। मनोः पत्नी शतरूपा। स च स्वायम्भुवो मनुश्च। तदात्मजाः प्रियव्रतोत्तानपादौ पुत्रौ, देवहूतिः कन्या च। अङ्गो वेनपिता। उतशब्दोऽप्यर्थे। प्राचीनबर्हिषो विसर्गलोपश्छान्दसः ॥ ४३ ॥ ❀ ❀ ऐलः पुरूरवाः। नाहुषो ययातिः। आद्यशब्देन यदुप्रभृतयः। शत[3]धन्वा अनुश्च, अत्राकारलोप आर्षः। रन्तिदेवा इति पाठः सुगमः, ऐक[1]पद्ये तु एतैः सहितो देवव्रतो भीष्म इत्यर्थः ॥ ४४ ॥ ❀ ❀ सारस्वतो दधीचिः। विभीषणादयो वर्या मुखा येषां ते। उपेन्द्रदत्तः शुकः ॥ ४५ ॥

## हिन्दी अनुवाद

समस्त सृष्टिकी रचना और संहार करनेवाली माया उनकी एक शक्ति है। ऐसी-ऐसी अनन्त शक्तियोंके आश्रय उनके स्वरूपको न मैं जानता हूँ और न वे तुम्हारे बड़े भाई सनकादि ही; फिर दूसरोंका तो कहना ही क्या है। आदिदेव भगवान् शेष सहस्र मुखसे उनके गुणोंका गायन करते आ रहे हैं, परन्तु वे अब भी उसके अन्तकी कल्पना नहीं कर सके ॥ ४१ ॥ ❀ ❀ जो निष्कपटभावसे अपना सर्वस्व और अपने आपको भी उनके चरणकमलोंमें निछावर कर देते हैं, उनपर वे अनन्त भगवान् स्वयं ही अपनी ओरसे दया करते हैं और उनकी दयाके पात्र ही उनकी दुस्तर मायाका स्वरूप जानते हैं और उसके पार जा पाते हैं। वास्तवमें ऐसे पुरुष ही कुत्ते और सियारोंके कलेवारूप अपने और पुत्रादिके शरीरमें 'यह मैं हूँ और यह मेरा है' ऐसा भाव नहीं करते ॥ ४२ ॥ ❀ ❀ प्यारे नारद ! परम पुरुषकी उस योगमायाको मैं जानता

---

१. "वस्वे" पाठः। २. मूले अतितरन्त्यथ देवमाया' इत्येवंरूपम्। ३. अत्र श्रीधरस्वामिनस्तु' शतधनुः अनुः इत्याहुः।

१. 'अनुरन्तिदेवदेवव्रताः' इत्याकारके पाठे।

हूँ तथा तुमलोग भगवान् शङ्कर, दैत्यकुलभूषण प्रह्लाद, शतरूपा, मनु, मनुपुत्र प्रियव्रत आदि, प्राचीनबर्हि, ऋभु और ध्रुव भी जानते हैं ॥ ४३ ॥ ❀ ❀ इसके सिवा इक्ष्वाकु, पुरूरवा, मुचुकुन्द, जनक, गाधि, अम्बरीष, सगर, गय, ययाति आदि तथा मान्धाता, अलर्क, शतधन्वा, अनु, रन्तिदेव, भीष्म, बलि, अमूर्त्तरय, दिलीप, सौभरि, उत्तङ्क, शिबि, देवल, पिप्पलाद, सारस्वत, उद्धव, पराशर, भूरिषेण एवं विभीषण, हनुमान्, शुकदेव, अर्जुन, आर्ष्टिषेण, विदुर और श्रुतदेव आदि महात्मा भी जानते हैं ॥ ४४ ॥ ४५ ॥

ते वै विदन्त्यतितरन्ति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः ।
यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥४६॥
शश्वत् प्रशान्तमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वम् ।
शब्दो न यत्र पुरुकारकवान् क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना ॥४७॥
तद् वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद् विदुरजस्रसुखं विशोकम् ।
सध्र्यङ् नियम्य यतयो यमकर्तहेतिं जह्युः स्वराडिव निपानखनित्रमिन्द्रः ॥४८॥
स श्रेयसामपि विभुर्भगवान् यतोऽस्य भावस्वभावविहितस्य सतः प्रसिद्धिः ।
देहे स्वधातुविगमेऽनुविशीर्यमाणे व्योमेव तत्र पुरुषो न विशीर्यतेऽजः ॥४९॥
सोऽयं तेऽभिहितस्तात भगवान् विश्वभावनः । समासेन हरेर्नान्यदन्यस्मात् सदसच्च यत् ॥५०॥

### श्रीधरस्वामिविरचिता भावार्थदीपिकाव्याख्या

किं बहुना सत्संगेन तु सर्वेऽपि विदंतीत्याह । ते वा इति । अद्भुताः क्रमाः पादन्यासा यस्य हरेस्तत्परायणास्तद्भक्ता- [illegible] । तत्र श्रुते भगवतो रूपे धारणा मनोनियमनं येषां ते विदंतीति किमु वक्तव्यम ॥ ४६ ॥ ❀ ❀ किं तद्भगवतः स्वरूपं यस्मिन्मनोधारणां विधाय मायां तरंति चेत्यपेक्षायामाह शश्वदिति द्वाभ्याम् । यद्ब्रह्मेति विदुर्मुनयस्तद्वै भगवतः पदं स्वरूपम् । किं तद्ब्रह्म तदाह । अजस्रं नित्यं च तत्सुखं च विशोकं चेति अजस्रसुखत्वे हेतुः । शश्वत्सदा प्रशांतमतो नित्यसुखरूपम् । विशोकत्वहेतु अभयम् । तत्कुतः । यतः समं भेदशून्यमतोऽभयम् "द्वितीयाद्वै भयं भवति" इति श्रुतेः । तत्कुतः । यतः प्रतिबोधमात्रं ज्ञानैकरसम् । ननु ज्ञानस्यापि नीलपीताद्याकारेण चक्षुरादिकरणभेदेन च भेदो दृश्यते । न । शुद्धं निर्मलम् । ननु दर्शितो विषयकरणोपरागरूपो मल इत्यत आह । सदसतः परं विषयकरणसंगशून्यम् । वृत्तेरेव तदुपरागो न ज्ञानस्येति भावः । ननु तथापि ज्ञात्रा सह भेदः स्यात् । न । आत्मतत्त्वमात्मनो ज्ञातुः स्वरूपमेव तन्न ततो भिन्नम् । ननु च "तं त्वौपनिषदं पुरुषं पृच्छामि" इति शब्दबोध्यत्वप्रतीतेः कुतो बोधरूपत्वं तत्राह । शब्दो न यत्रेति । आरोपितनिवृत्तावेव शब्दस्य व्यापारो न तु तद्बोध इत्यर्थः । ननु च भवतु नाम निरस्तभेदज्ञानरूपत्वाद्विशोकत्वं सुखस्य तु नानाकारकसाध्यक्रियाफलत्वात्कथमजस्रसुखत्वं तस्येत्यत आह । यत्र बहुकारकसाध्यः क्रियार्थ उत्पाद्याप्यविकार्यसंस्कार्यरूपं चतुर्विधं क्रियाफलं च नास्ति इंद्रियैर्ज्ञानांशाभिव्यक्तिरिव क्रियाभिरानंदांशाभिव्यक्तिमात्रं क्रियते नोत्पत्त्यादिकमिति भावः । ननूत्पत्त्याद्यभावेऽपि मायामलापाकरणेन विकार्यत्वमेव स्याद्व्रीहीणामिव तुषापाकरणेनेत्या- शंक्याह । माया अभिमुखे स्थातुं विलज्जमानेव यस्मात् परैति दूरतोऽपसरति ॥ ४७ ॥ ❀ ❀ तस्मादेवंभूते भगवति नियमित- मनसां कृतार्थानां न किमपि कृत्यमस्तीत्याह । सहांचतीति सध्र्यक् सहचरं मनो यं प्रति नियम्य यस्मिन् स्थिरीकृत्य यतयो यत्नशीलाः कर्तो भेदस्तन्निरासोऽकर्तस्तत्र हेतिं साधनं जह्युस्त्यजेयुः अनुपयोगात्तन्नाद्रियंत इत्यर्थः । उपयोगाभावेन साधनानादरे दृष्टांतः । निपीयतेऽस्मिन्निति निपानं कूपस्तस्य खनित्रं खननसाधनं यथा स्वराट् स्वयमेव पर्जन्यरूपेण विराजमान इंद्रो नादत्ते तद्वदिति यद्वा स्वेनैव राजत इति स्वराट् दरिद्रः स यथा इंद्रः समृद्धः सन् कर्मकारदशायां गृहीतं निपानखनित्रं जहाति तद्वदित्यर्थः ॥ ४८ ॥ ❀ ❀ एवं तावदजस्रसुखं विशोकं ब्रह्मैव भगवतः स्वरूपं तत्प्राप्तानां च न प्राप्यं कृत्यं वा किंचिदस्तीत्युक्तमिदानीं ततः प्राक् स एव सर्वफलदाता सर्वकर्मप्रवर्तकश्चेत्याह । स एव श्रेयसां फलानां विभुर्दाताऽपि । तत्र हेतुः । भावानां ब्राह्मणादीनां स्वभावैः शमदमादिभिर्विशेषणैर्विहितस्यास्य सतः शुभस्य कर्मणो यतः प्रवर्तकात्प्रसिद्धिः यद्वा भावानां महदादीनां स्वभावेन परिणामेन विहितस्य सतः कार्यस्य प्रसिद्धिः स एव स्वर्गादीनां दातेत्यर्थः । ननु कर्मकर्तुर्मृतस्य कथं स्वर्गादिफलं स्यात्तत्राह ।

१. प्रा० पा० सम्यक् । २. प्रा पा० ऽतः ।

स्वारंभकधातूना भूतानां विगमे वियोगे सत्यन्वनु विशीर्यमाणेऽपि देहे तत्रस्थं व्योमेव यस्तेन सह न विशीर्यते यतोऽजस्तेन सह न जातस्तस्य पुरुषस्य श्रेयसां प्रभुरित्यर्थः ॥ ४९ ॥ ❀ ❀ अध्यायत्रयस्यार्थमुपसंहरति । सोऽयं ते समासेन संक्षेपेणाभिहितः । तमेवाह । सदसत्कार्यं कारणं च हरेरन्यन्न भवति । ननु हरेस्तदव्यतिरेके तत्तद्विकारप्रसंगः स्यात् । न । अन्यस्मात्कारणभूतो हरिः कार्याद्व्यतिरिक्त इत्यर्थः ॥ ५० ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

शीले शुचौ चरिते "शुचौ तु चरिते शीलम्" इत्यमरः ॥ ४६ ॥ ❀ ❀ मायातारकं भगवद्रूपं पृच्छति किं तदिति तत्समम् । ज्ञानकैत्व आक्षिपति नन्विति । पुनराक्षिपति नन्विति । विषयो घटादिः करणं चक्षुरादि तयोरुपरागः संबंधस्तद्रूपो मलः स एव मलः इति भावः । ज्ञानवृत्तेरुपरागोस्ति तरंगस्थानीया या न तु समुद्रस्थानीयस्य ज्ञानस्येति तात्पर्यम् । पुनराक्षिपति तथापि ज्ञानस्यापरागाभावेपि ज्ञाता यो जीवस्तेन प्रहरति नेति । पुनराक्षिपति नन्विति । औपनिषदमुपनिषत्प्रतिपाद्यम् । आरोपितो यस्तस्मिन्प्रपञ्चस्तन्निवृत्तौ तदपवादे इत्यर्थ इति"अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपंच्यते" इत्युक्तेरिति भावः । पुनराक्षिपति नन्विति । नानाकारकसाध्या क्रिया यागादिरूपा तस्याः फलत्वात् तस्यात्मनः यद्भूत्वा भावि तदुत्पाद्यम् । यत्सिद्धमेव प्राप्यते तदाप्यम् । यत्र पूर्वावस्थापरित्यागेनावस्थांतरप्राप्तिस्तद्विकार्य्यम् । यत्र गुणाधानं मलापकर्षणं क्रियते तत्संस्कार्यम् । इति भाव इति । उत्पत्तिलक्षणस्याभूत्वाभवनरूपस्य तत्रासत्त्वादयमाशयः । पुनराक्षिपति—नन्विति । नन्वत्र "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" इत्यधिकारिभेदादेक एव त्रिरूपतया भातीति अत्र"अपीयतां कर्णकषायशोषान्" इत्यादिना"शास्ता भविष्यति कलेर्भगवान्"इत्यनेन भगवानशेषविशेषतयोक्तः । तदुपासकांश्च 'येषां स एव भगवान्दययेदित्यादिना किमु शुभधारणायें' इत्यंतेनोक्ताः संप्रति परमात्मा ब्रह्म चोच्यतामित्याकाक्षायामाह सदसत उत्तमाधमस्य ब्रह्मादिस्तंबपर्यंतस्य जीववृन्दस्य परमात्मतत्त्वं सममेकरसमेव तथा शश्वत्सदा प्रकर्षेण शांतं तस्य गुणवशाच्छांतघोरमूढस्यापीत्यर्थः । शश्वत्प्रशब्दाभ्यां सत्त्वगुणकार्यैः शमो व्यावृत्तः तथाऽभयं तस्य सभयस्यापि प्रतिबोधमात्रं तस्याज्ञानस्य ज्ञानवतोपि प्रतिमात्रशब्दाभ्यां सत्त्वगुणकार्यबोधो व्यावृत्तः शुद्धं तस्याशुद्धस्यापि एवं परमात्मानमुक्त्वा ब्रह्माह यत्र नानाकारकवानपि तथा क्रियया सहार्थो वाच्यलक्ष्यव्यंग्या यत्र तादृशोपि शब्दो न प्रभवति तद्ब्रह्म ननु ब्रह्मशब्देनैव तद् ब्रूषे अथ च शब्दो न यत्रेति निषिध्यसि च तत्राह-मायेति । यस्याभिमुखे माया परैति पृष्ठदेशमुपैति तस्य भगवतः पदमप्राकृतविचित्ररूपगुणादिविशेषवतोपि तस्य प्राथमिकसाक्षात्कारविषयो निर्विशेषं स्वरूपं 'मदीयं महिमानं च परं ब्रह्मेति शब्दितम्' इति श्रीमत्स्योक्तेस्तदीयं व्यापकत्वलक्षणं बृहत्त्वमेव निश्चितं ब्रह्म । अयं भावः । शब्दस्याकाशगुणत्वेन मायिकत्वान्मायापि तदभिमुखे स्थातुमशक्तामायिकरूपगुणादिमंतं भगवंतमपि शब्दोभिधातुं यद्यपि न प्रभवति तदपि "मेघश्यामः कनकपरिधिः पंकजाक्षोयमात्मा" इत्यादयः शब्दाः मेघकनकादिप्राकृतवस्तुसादृश्यारोपेणैव लोकचित्तं यथा कथंचित्तत्र प्रवेशयंति । लोकश्च चित्तैकाद्र्येणापि वस्तुतोऽस्पृष्टरूपतद्रूपाभासोपि भगवन्तं प्रभुमहं ध्यायामीत्यभिमन्यमानो हृष्यति भगवानप्यपारकृपातरंगवशादेवानेनाहं ध्यात एवेत्यभिमन्यतेऽभिमत्य च तं भक्तं स्वचरणांतिकं समानयतीति भगवत्स्वरूपस्य शब्दगम्यत्वं तत्कृपयैव सिद्धं ब्रह्मस्वरूपस्य तु प्राकृताप्राकृतविशेषराहित्यात्कथं शब्दगम्यत्वमस्त्विति शब्दो न यत्रेत्युक्तं प्रवृत्तिनिमित्तस्य वस्तुधर्मस्य जात्यादेरभावात् यत्र क्रियाकारकवान् शब्दो न प्रभवति तद्ब्रह्मेति ब्रह्मशब्दस्य पृथक्संकेत एवायं कृतः अतः शब्दगम्यत्वाभावेपि शब्दगम्यस्य भगवतो निर्विशेषं स्वरूपं तद्ब्रह्मेति भगवत्संबंधित्वेनैवोक्ते सति तत्र लोकचित्तप्रवेशो नान्यथेति भंग्या ब्रह्मणोपि शब्दगम्यत्वमुक्तमित्थमेव श्रुत्यध्यायादौ व्याख्यास्यते तथाऽजस्रमेव सुखं यतो विगतः शोको यतस्तदिति तस्य सुखरूपत्वे विशोकत्वे च कैमुत्यमानी तदिति विश्वनाथः ॥ ४७ ॥ ❀ ❀ इत्यर्थ इति । भेदनिरासायैव वेदांताभ्यासादिसाधनं क्रियते तत्सिद्धौ तत्त्यागो न्याय्य एव घटसिद्धौ दंडादित्यागवदिति भावः । इंद्रेण तु पूर्वमपि साधनानि नात्तानि तत्र तु स्वत एव त्यागोऽतोऽनुपयुक्तोयमर्थ इति तत्राह—यद्वेति । स्वेनैव न तूपकरणादिनेत्यर्थः । इति इत्यर्थव्याख्या ॥ ४८ ॥ ❀ ❀ ततः प्राग्भगवत्प्राप्तेः पूर्वम् । तत्र कर्मफलदातृत्वे । ब्राह्मणादिस्वभावास्तु—शमो दमस्तपः शौचं तितिक्षा क्षांतिरार्जवम् । ज्ञानं दयाच्युतात्मत्वं सत्यं चेति ब्रह्मस्वभावाः । शौर्यं तेजो बलं धैर्यं दाक्ष्यं दानमीश्वरभावो युद्धेऽपलायनमिति क्षत्रस्वभावाः । कृषिगोरक्ष्यवाणिज्यमिति वैश्यस्वभावाः । त्रिवर्णसेवा शूद्रस्वभावः ॥ आचार्यसेवनं वेदाध्ययनं च ब्रह्मचारिस्वभावः । अतिथिसेवनादिर्गृहस्थस्य । तपो वनौकसः । विचारो यतेरिति विवेकेनाग्रे वर्ण्यंते भावशब्दस्य वर्णाश्रमवाचकत्वाप्रसिद्धिमालोच्याह यद्वेति । महदादिवाचकत्वं भावशब्दस्य "यथेमे विकृता भावाः" इति वक्ष्यत्येव । इत्यर्थ इति । कर्मफलदानार्थमेव स्वर्गादि निर्मितवान्प्रयोजनांतराभावादिति भावः । अत्राक्षिपति नन्विति । तत्रस्थं देहस्थम् । इत्यर्थ इति । "न जायते म्रियते वा कदाचित्" इत्यादिस्मृतेः कर्मफलभोक्तुर्नाशो नास्तीति भावः ॥ ४९ ॥ ❀ ❀ हरावाक्षिपति नन्विति । इत्यर्थ इति । कार्यं तु कारणादनन्यद्भवति तद्विना तदसिद्धेः कारणं तु कार्यादन्यदेव तद्विनापि तस्य सिद्धेरिति भावः । संबुद्धिरुक्ताभिप्रायैव बहुशः ॥ ५० ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

प्रशान्तमिति । क्षुत्पिपासाजरामरणादिषड्भिरहितमित्यर्थः । ननु दर्शितो विषयकरणापरागरूपो मल इत्यत आहेति । निर्म्मलस्फटिकस्य लोहितपुष्पादिसन्निधानेन लौहित्यादिप्रतीतिस्तद्वदत्रापीति चेत् तर्हि किं विषयकरणसङ्गो भवेदित्यर्थः । विषयो रूपादिर्ग्राह्यः कारणं साधनं चक्षुरादि । उपरागः ग्राह्यत्वेन स्वीकारः । तदुक्तम्—दृश्यानुरञ्जितद्रष्टृद्रश्यद्रष्टृनुरञ्जितम् । अहंवृत्त्योभयं रक्तं तन्नाशो ऽद्वैत आत्मनः इति ॥ वृत्तेरेव तदुपराग इति । वृत्तेश्चक्षुरादिवृत्तेर्दर्शनश्रवणादेर्व्यवहारिकज्ञानस्य उपराग उपरता आरक्तत्वम् । तत्तु क्षणिकमेव ज्ञानम् । इदं ज्ञानं त्वखण्डम् । उत्पत्त्यादिति । आदिना प्राप्तिविकृतिसंस्कार्य्याणां ग्रहणम् । चतुर्विधं क्रियाफलमिति । उत्पाद्यम् आप्यं विकार्य्यं संस्कार्य्यञ्चेति । क्रियाफलं चतुर्विधम् । नात्र घटं करोति कुलाल इत्यत्र उत्पाद्यं क्रियाफलम् । चक्षुषा रूपं पश्यति इत्यत्र आप्यं क्रियाफलम् । सोमं सुनोति सोमपा इत्यत्र विकार्य्यं क्रियाफलम् । संस्कारश्च त्रिविधः । तत्र प्राक्तनपुण्यातिशयजन्यः सुखविशेष आद्यः । द्वितीयो मलापाकरणरूपः । तृतीयो गुणाधानरूपः । राज्यं प्राप्नोति धर्मिष्ठ इत्याद्यं संस्कार्य्यम् । रजको वस्त्रं क्षालयतीति द्वितीयं संस्कार्य्यम् । रजको वस्त्रं रञ्जयतीति तृतीयं संस्कार्य्यम् ॥ क्रियाफलञ्च नास्तीति । क्रियाफलत्वाभावे कुतः कारकसाध्यत्वमिति भावः ॥ ४७ ॥ ४८ ॥ ❀ ❀ स्वारम्भकधातूनां भूतानामिति । स्वारम्भकाणां धातूनां मांसादिकरूपेण परिणतानां पृथिव्यादिमहाभूतानामित्यर्थः ॥ ४९-५२ ॥

## श्रीमद्वीरराघवव्याख्या

भवदादयो ये ते सर्वे विदंति परमात्मानं देवमायां देवस्य विष्णोर्नियाम्यामतितरंति च किं बहुना भागवतसंगेन तिर्यगपि तरिष्यतीत्याह अद्भुताः क्रमाः पादविन्यासा यस्य स अद्भुतक्रमो भगवांस्त्रिविक्रमः । स एव परायणं उत्कृष्टं प्राप्यं प्रापकमाधारश्च येषां तेषां भागवतानां शीले शिक्षा वासना येषां ते तथाभूता यदि भवेयुस्तर्हि तिर्यग्जना अपि तरंतीत्यनुषंगः श्रुतेर्थे धारणा येषान्ते मनुष्या ब्राह्मणादयः तिरश्चां श्रुतार्थधारणापि नास्तीति ज्ञापनार्थमिदं ब्राह्मणादयस्तरंतीति तत्र किमु वक्तव्यमित्यर्थः ॥ ४६ ॥ ❀ ❀ ननु कीदृशं तत्स्वरूपं यद्भवदादयो जानंतीत्यपेक्षायां तत्स्वरूपं चिदचिद्विलक्षणत्वेन विशोध्य तत्स्वरूपानुचिन्तनपराणां स्वर्गाद्यर्थानुष्ठानोपकरणत्याग आर्थिक इत्याह श्लोकद्वयेन शश्वदिति । विशोकं दुःखसंभिन्नमजस्रसुखं नित्यानंदमयं यद्ब्रह्मेति विदुः सत्यं ज्ञाननमनंतं विज्ञानमानंदं विशोको विजर इत्यादयो वेदांता आमनंति तदेव परमस्य पुंसः परमपुरुषस्य भगवतः पदं स्वरूपं इत्यर्थः । ननु किं विशेषेण वेदांतवेद्यत्वं उच्यते न प्रमाणांतरविषयत्वमित्यत आह जडात्मिका मायाऽभिमुखेऽवस्थातुं इति शेषः । विलज्जमाना सती परैति तिरोधत्ते मायाकार्याणि मन आदीन्द्रियाणि तत्स्वरूपमवगंतुमसमर्थानीत्यभिप्रायः । न केवलं लौकिकप्रमाणविषयत्वमेव लौकिकप्रमाणभूतवेदैकदेशपूर्वभागाविषयत्वमपीत्याह शब्द इति । पुरुकारकः साध्यसाधनाद्यनेककारकान्वितः क्रियार्थं क्रियाप्रतिपादकः शब्दः वेदपूर्वभागोपि यत्र स्वरूपेण साक्षाद्बोधक इत्यर्थं सर्वे वेदा यत्पदमामनंतीति तु सर्वकर्माराध्यं ब्रह्मरूपमपर्यवसानवृत्या आमनंतीत्येतत्तात्पर्यकं तपांसि सर्वाणि च यद्वदंतीत्युक्तं तपांसि तपःप्रधाना उपनिषद्भागा वदंति साक्षाद्बोधयंतीत्यर्थः । ननु जीवस्यापि स्वरूपमजस्रसुखमेवेत्यत आह परमात्मतत्वमिति । सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्मेति वाक्यप्रत्यभिज्ञानेन अजस्रसुखस्यानंतत्वेन विशेषितत्वादपरिछिन्नदुःखासंभिन्ननित्यसुखस्वरूपत्वं परमात्मन एव स्वरूपमित्यर्थः । ननु जीववदस्यापि कर्माधीनसुखदुःखसंबंधः स्यादिति शंकां वारयति शुद्धमिति । अकर्मवश्यमित्यर्थः । अत एव सदसतोश्चिदचिदोः परं विलक्षणम् । अकर्मवश्यता कुत इत्यत आह समं इत्येकरूपमित्यर्थः । चिदचिदन्तर्यामित्वेनावस्थितस्यापि तत्तद्वस्तुगतदोषासंस्पर्शाद्कर्मवश्यतोपपन्नेति भावः । नन्वाम्रादिफलानां तत्तत्प्रदेशभेदेनाम्लमधुरादिरसवत्सुखापरपर्यायानुकूलज्ञानस्वरूपस्य ब्रह्मणः प्रदेशभेदेन जडरूपतास्यादित्याशंकां वारयति प्रतिबोधमात्रमिति । प्रतिबोध एव प्रतिबोधमात्रं मात्रचाकापि जडत्वव्यावर्त्तिविज्ञानघन एव प्रज्ञानघन ऐवेति श्रुतिः मोक्षप्रदत्वमप्यसाधारणो धर्म इत्याह अभयं न विद्यते भयं यस्मात्तदभयं संसारनिवर्तकं इत्यर्थः । तत्कुतः शश्वत्प्रशांतं शश्वत्सदा प्रशांतमशनापिपासाधूर्मिषट्करहितमतस्तदुपासकानामपि शांतिसंपादकमिति भावः । परमं साम्यमुपैति मम साधर्म्यमागता इति श्रुतिस्मृती ॥ ४७ ॥ ❀ ❀ किंच यतः एवं भूतभगवत्स्वरूपचिंतने प्रयतमाना सध्यङ् सहांचतीति सध्यूङ् सहस्य सध्र्यादेशः जीवसहचरं मनः नियम्य यद्ब्र [illegible] छिद्यतेऽनेन संशया इति कर्तं ज्ञानं छिद्यते सर्वसंशया इति श्रुतेः । कृती छेदने तदितरादकर्तं स्वर्गादिफलसाधनं कर्मेत्यर्थः । तस्य हेतिम् उपाकरणं जह्युः तत्र दृष्टान्तः स्वराट् वर्षप्रदः इंद्रः निपानखनित्रमिव नितरां पिबन्ति यस्मिन्निति निपानं कूपः तस्य खनित्रं खननसाधनमिव स्वर्गाद्यर्थानुष्ठानोपकरणमर्थादेव त्यजंतीत्यर्थः ॥ ४८ ॥ ❀ ❀ ननु स्वर्गादिफलेप्सूनां तत्साधनोपकरणोपादानमावश्यकमित्यत आह स इति । भावस्वभावविहितस्य भावाः ब्राह्मणादिवर्णाश्रमादयः तेषां स्वभावेनानुगुणेन विहितस्य सतः कर्मणः प्रसिद्धिः फलप्रसिद्धिर्यतः स भगवान् श्रेयसां स्वर्गादिफलानामपि विभुः प्रभुः तत्फलप्रदातेत्यर्थः । अंतरात्मतयाऽवस्थितस्य परमात्मन एव स्वर्गाद्यर्थं कर्मस्वपि प्रवर्तकत्वात्तदाराध्यत्वात्तत्फलदत्वाच्च तद्भजनेनैवेप्सितस्वर्गादिफलस्यापि सिद्धे कर्मभिरपि स एव भजनीय इत्यर्थः । भगवतः सर्वांतर्यामित्वे शरीरभूतचेतनाचेतनगतदोषस्पर्शमाशंक्याहं देह इति स्वधातुविगमे स्वधातूनां स्वदेहारंभक-

भूतसूक्ष्माणं वियोगे सत्यनुपश्चाद्विशीर्यमाणे देहे तत्रस्थः पुरुषः परमपुरुषः गगनमिव न शीर्यते । कुत अजः कर्माधीनोत्पत्यादि-शून्यः अत्र देहशब्दः चेतनस्यापि प्रदर्शनार्थः चिदचिद्गततदोषास्पृष्ट इत्यर्थः । अस्योत्तरार्द्धस्य जीवपरत्ववर्णनं त्वशोभनं कृत्स्नस्यास्य प्रकरणस्य परमात्मपरत्वेन मध्ये जीवप्रसक्ताभावाज्जीवस्यापि शरीरद्वारोत्पत्तिविनाशयोर्विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविश्यतीति श्रुत्यैवाभिधानाच्च ॥ ४९ ॥ ❀ ❀ अध्यायत्रयार्थमुपसंहरति सोऽयमिति । हे तात नारद सोयं पूर्वप्रति-पादिताकारः विश्वकारणभूतः भगवान् ज्ञानशक्तिबलैश्वर्यादिसंपन्नो वासुदेवः समासेन संग्रहेण ते तुभ्यमभिहितः मयेति शेषः । संग्रहमेवाह यत्सदसच्चिदात्मकं वस्त्वन्यदतदात्मकं स्वमिष्टमिव भाति । तद्धरेर्नान्यत्तदात्मकमेवेत्यर्थः । हरेर्नान्य-दन्यत्तत्सदसच्च यदिति पाठः । नान्यदन्यस्मात्सदसच्च यदिति पाठे त्वन्यस्मात्सदसत्वलक्षणादपि हरेः सदसदात्मकं नान्यत्किंतु तदात्मकमेवेत्यर्थः ॥ ५० ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

अत्र कैमुत्यन्यायमाह ते इति । ये स्त्रीशूद्रहूणशबराः पापजीवास्तेपि देवस्य मायां विदंति संसारमतिरंति च । किमुता-स्मदादय इत्यन्वयः । तर्हि किमिति सर्वे निस्तीर्णाः संसारान्नाभूवन्निति तत्राह यदिति । अद्भुतक्रमो विष्णुः स एव परायणं तस्य शीलं तस्य शिक्षा च येषां ते तथोक्ताः अद्भुतं जगत्क्रमतीत्यद्भुतक्रमः अत्रापि कैमुत्यन्यायमाह तिर्यगिति । वृंदावनगताः पशुप-क्ष्यादयस्तिर्यग्जना अपि देवमायां विदंति तरंति च ये श्रुतधारणास्ते विदंतीति किमु वक्तव्यमित्यन्वयः ॥ ४६ ॥ ❀ ❀ अद्भु-तक्रमः किंलक्षणक इति तत्राह शश्वदिति । यत् शश्वत्सदैकप्रकारं प्रशांतं प्रकृष्टपूर्णसुखं अद्वितीयत्वादभयं द्वितीयाद्वै भयं भवतीति श्रुतेः । यच्च प्रतिबोधमात्रं निर्दोषज्ञानस्वरूपम् । मात्रशब्दोऽवधारणार्थः । प्रतिशब्दो मुख्यार्थः । अत एव शुद्धं रागादि-दोषरहितं यच्च समं परमाण्वादिपरममहदन्तेषु पदार्थेषु नातिरेकेण गुणविधुरं वैषम्यादिरहितं वा सदसतः परं व्यक्ताव्यक्तजगतो विलक्षणमात्मतत्वमव्यक्तादिसर्वप्रपंचाहंभावरहितं पुरूणि बहूनि कारकपदानि कर्तृकर्मक्रियावाचीनि यस्मिन्संति स तथा अग्निष्टो-माद्यनेकक्रियार्थः । शब्दो वाक्यलक्षणानंतवेदाख्यो यत्र यस्मिन्साकल्येन वाचकत्वेन न वर्तते तदुक्तं अव्यक्ताद्यनहंमानादा-त्मतत्त्वं हरिः स्मृतः अशब्दश्चाप्रसिद्धत्वाच्छांतः पूर्णसुखत्वत इति । हरिः स्वयं यामाधीनश्चेत्तदुपासकाः कथं तां तरंतीति तत्राह मायेति । मायासंसारकारणं प्रकृतिर्यस्याभिमुखे स्थातुं विलज्जमाना यस्मादुपासकेभ्यश्च परत्यैपसरति दृष्टिमार्गं विहाय वर्तत इति ॥ ४७ ॥ ❀ ❀ यश्च सर्वगुणपूर्णत्वात् ब्रह्मेत्यजस्रसुखं निरंतरसुखमिति विदुरतीतानागतवर्तमानाः ब्रह्मादयः श्रवणादिभिर्यतमानत्वाद्यतयः साधनपरिपाकेन यत्सम्यङ्निशाम्य इन्द्रः सुधां प्राप्य निपानखनित्रं कूपखननसाधनकुद्दालादीव यमेनाधिकृतो लोको नरकाख्यस्तस्य हेतुं संसारं जह्युस्त्यजंति । परमस्य पुंसो नारायणस्य पदं स्वरूपं तदेतादृग्लक्षणं हीत्यन्वयः । इंद्र ईश्वरो धनवान् सुधाममृतं जलं प्राप्येति वा ॥ ४८ ॥ ❀ ❀ इदानीमेवंविधभगवज्ज्ञानाधिकारी सत्पुरुष इत्याह स इति । न केवलं धर्मादिसर्वश्रेयसां विभुः अपि तु फलदाता च अधर्मादिसर्वाश्रेयसामपीति वा भगवाननादिकालमारभ्य हरिप्रसादेन परिवृद्धेन भावस्वभावेन भक्तिस्वभावेन विहितस्य निर्मितस्यास्य सतो जीवराशेः प्रसिद्धः करतलामलकवत् प्रत्यक्षः स्यादिति यतोऽतोऽत्र सात्त्विकप्रकृतिजीवराशिस्तादृशो ज्ञानाधिकारी एतेनोक्तार्थे ज्ञानिप्रत्यक्षं प्रमाणमुक्तं भवति । भावो भक्तिः प्रमा-णश्च प्रावण्यमपि चादर इति तत्राह देह इति । स्वारंभकाणां पृथिव्याधिधातूनां विगमे विनाशलक्षणविश्लेषे सति देहे तु विशीर्यमाणे स्वकारणेषु विलीयमाने सति तत्र देहस्थः पुरुषः स्वकर्माद्यनुसारेण पुराणि सरन् स्वतोऽजो जननविधुरोपि केवलं देहाभिमानेन जायमानो यथादेहस्थितं व्योम न शीर्यते तथा जीवो न विशीर्यते अतोदेहस्यैवोत्पत्तिमरणधर्मवत्त्वाच्चे-तनस्य नित्यत्वादुचितस्य प्रसिद्धः परम इति । अनेन परमात्मापि व्याख्यातः तत्र जीववदभिमाननिमित्तजन्मादिमानपि न भवतीति विशेषः । अतएव दृष्टांतेन हरेः शश्वत्प्रतिबोधादिरूपत्वं न विघटनीयमिति भावः ॥ ४९ ॥ ❀ ❀ देवदेव नमस्तुभ्यमित्यारभ्य प्रश्नप्रतिवचनाभ्यामुक्तमर्थमुपसंहरति सोयमिति । समासेन संक्षेपेण एतावज्ज्ञानं सर्वथा न विस्मर्तव्यमिति भावेनाह हरेरिति । चशब्द एवार्थे यत्सदसत्कार्यकारणात्मकं जगत्सर्वमस्मादन्यस्माद्विलक्षणाद्धरेर्नान्यद्भिन्नं न एतदुक्तं भवति स्वतो हरेर्भिन्नमपि तत्वेन स्वातंत्र्याभावेनाभिन्नमिवोच्यते । न स्वतो भेदाभावात्तस्मात्स हरिः स्वतंत्रोऽन्यदस्मदादिकं सर्वं तदधीनमिति विजानीहीति तदधीनसत्तादिमत्त्वात्तदित्युच्यते तत्र किं मानमित्येतद्बोध्यं सत्तादिर्यत्स्वतो विष्णोस्तस्मादन्यः स सर्वत इत्यादिना परिहर्तव्यम् ॥ ५० ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

अथ श्रीभगवत्स्वरूपं विशेष्याकारेणोद्दिशति शश्वदिति सार्द्धेन । अयमर्थः—सर्वतो बृहत्तमत्वात्ब्रह्मेति यद्विदुः तत् खलु परमस्य पुंसो भगवतः पदमेव, निर्विकल्पतया साक्षात्कृतेः प्राथमिकत्वात्, ब्रह्मणश्च भगवत एव निर्विकल्पसत्ता-रूपत्वात्, विचित्ररूपादिविकल्पविशेषविशिष्टस्य भगवतस्तु साक्षात्कृतेस्तदनन्तरजत्वात्, तदीयस्वरूपभूतं तत्ब्रह्म तत् साक्षात्कारास्पदं भवतीत्यर्थः । निर्विकल्पब्रह्मणस्तस्य स्वरूपलक्षणमाह प्रतिबोधमात्रमिति । अजस्रसुखमिति च जडस्य दुःखस्य

च प्रतियोगितया प्रतीयते यद्वस्तु यच्च नित्यं तदेकरूपं तद्रूपमित्यर्थः। यतः आत्मतत्वं सर्व्वेषाम् आत्मनां मूलं, आत्माहि स्वप्रकाशरूपतया निरुपाधिपरमप्रेमास्पदतया च तत्तद्रूपेण प्रतीयत इति। अथ तस्य सुखरूपस्याजस्रत्वे हेतुमाह। शश्वत् प्रशान्तं नित्यमेव क्षोभरहितं तद्वदभयं भयशून्यं विशोकं शोकरहितञ्चेति। न च सुखरूपत्वे तस्य पुण्यजन्यत्वं स्यादित्याह शब्दो यत्रेति। यत्र क्रियार्थो यज्ञाद्यर्थः पुरुकारकवान् शब्दो न प्रवर्त्तत इत्यर्थः। किन्त्वौपनिषदं पुरुषमित्यादिरीत्या केवलमुपनिषदेव प्रकाशिका भवतीत्यर्थः। पुनः स्वसुखरूपत्वे चेन्द्रियजन्यत्वं व्यावर्त्तयति शुद्धमित्यादिना। तत्र शुद्धं दोषरहितम्। समम् उच्चावचताशून्यम्। सदसतः परं कारणकार्य्यवर्गादुपरि स्थितम्। किं बहुनेत्याह मायाच यस्याभिमुखे यदुन्मुखतया स्थिते जीवन्मुक्तगणे विलज्जमाना परैति पलायते ततो दूरं गच्छेतीत्यर्थः। अत्र च शुद्धमित्यादिना यथा वैलक्षण्यं दर्शितं तथैव ज्ञेयम्। जीवस्वरूपस्य ह्यविद्यास्पर्शनात् क्षोभभयशोका भवन्ति सुखचिद्रूपत्वाद्याच्छाद्यते ततः शुद्धत्वं साम्यञ्च गच्छति कर्म्मकाण्डविषयत्वञ्च जायते। यत् पुनर्बृंहत्वात् बृंहणत्वाच्च ब्रह्मत्वं सर्व्वतः परत्वं परमार्थत्वञ्च तत्तस्य स्वत एव नास्ति। तादृशशक्त्यभावान्मायाभिभावकत्वं च नास्त्येव प्रत्युत तदभिभाव्यत्वमेव स्यादिति॥४७॥ ॐ ॐ तदेवं केवलं विशेष्याकारं दुर्गमत्वेनोद्दिश्य तदादिसर्व्वसुगमताकृपामयेन स्वरूपशक्तिविशिष्टाकारेण सुगमत्वेन तदुद्दिशति सध्र्यगित्येकेन। यं प्रति यस्मिन् सध्र्यक् मनो नियम्य स्थिरीकृत्य यतयः पूर्व्वं संन्यासमार्गे कृततादृशज्ञानयत्ना अपि अकर्त्तहेतिम्। अभेदज्ञानरूपं मोक्षसाधनं जहाति तत्कृपाप्राप्ततादृशज्ञानाद्यनन्तगुणाश्च यतद्भक्तिसम्पत्तेः। आत्मारामाश्च मुनय इत्यादेर्महागुणत्वादिति भावः। तदेव दृष्टान्तेन दर्शयति स्वराडिवेति॥४८॥ ॐ ॐ स एव हि भगवान् श्रेयसां पञ्चविधमुक्तीनामन्येषाञ्च पुरुषार्थानां विभुः प्रदाता। यतो भगवतः सकाशात् अस्य भक्तजीवस्य भक्तिस्वभावयोग्यो यो योऽर्थस्तस्य सततस्तत्स्वरूपवैभवे विद्यमानस्यैव प्रसिद्धस्तं प्रति प्राकट्यं भवतीत्यर्थः। ननु तस्य जीवस्य मायावैभवोपाधिस्तदा किं नश्येत् नाशेऽपि वा जीवत्वं किं तिष्ठेत तत्राह देह इत्यर्द्धकेन। देहः स्थूलसूक्ष्मात्मकः। ध्रियन्त इति धातवस्तत्त्वानि। तस्मिन् देहद्वये स्वेषां कारणरूपतत्त्वानां विगमो नाशो यस्य तथाभूते सत्यपि पुरुषो जीवः न विशीर्य्यते न नश्यति। अनाशे हेतुः अज इति। अथवा शश्वत् प्रशान्तमित्यादिकं वैकुण्ठवैभवस्यैव प्रतिपादकम्। भगवतः परम्पदमिति तत्रैव मुख्यार्थत्वात्, भगवत्सन्दर्भे तस्य तादृशत्वेन दर्शितत्वात् तस्मै स्वलोकमित्यादौ दर्शयिष्यमाणत्वाच्च॥४९॥ ॐ ॐ सोऽयमिति। सोऽयं समासेन संक्षेपेणाभिहितः। कथम्। तटस्थलक्षणेनैवेत्याह। सत् कार्य्यं स्थूलम् अशुद्धजीवजगदाख्यं चेतनाचेतनं वस्तु असत् कारणं सूक्ष्मं शुद्धजीवप्रधानाख्यं चिदचिद्वस्तु च यत्, तत् सर्वं हरेरन्यन्न भवति सूक्ष्मस्य तच्छक्तिरूपत्वात्, स्थूलस्य तत्कार्य्यरूपत्वादिति भावः। जगतस्तदनन्यत्वेऽपि शुद्धस्य तस्य तद्दोषसाङ्कर्य्यं नास्तीत्याह अन्यस्मादिति॥५०॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

न केवलमेते महान्त एव अपि तु दीनहीना अपीत्याह ते वै इति। अद्भुत उत्तमाधमविवेचनशून्यः क्रमः पादन्यासः कृपासम्बन्धी यस्य तस्य भगवतः परायणा ये भक्तास्तेषां शीलशिक्षाः तच्छिष्या भूत्वा शीलं शिक्षन्ते ये ते। तिर्य्यग्जना हंसगजशुकशारिकादयः। गुरुमुखात् श्रुतं नामरूपादिकं शीघ्रं ये धारयन्ति मनुष्यास्ते पुनः किमुत॥४६॥ ॐ ॐ ननु ब्रह्मेति परमात्मेति भगवानिति शब्द्यत इति अधिकारिविशेषेषु परमेश्वरस्त्रिरूपतया भातीति। तत्र आपीयतां कर्णकषायशोषानित्यादिना शास्ता भविष्यति कलेर्भगवान् युगान्ते इत्यनेन भगवान् शेषविशेषतया उक्तः, तदुपासकाश्च येषां स एव दययेदित्यादिना किमु श्रुतधारणा ये इत्यन्तेनोक्ताः। सम्प्रति परमात्मा ब्रह्म चोच्यतामित्याकांक्षायामाह शश्वदिति। सदसतः उत्तमाधमस्य ब्रह्मादिस्तम्बपर्य्यन्तस्य जीववृन्दस्य परमात्मतत्वं सममेकरसमेव। तथा शश्वत् सदा प्रकर्षेण शान्तं, तस्य गुणवशात् शान्तघोरमूढस्यापीत्यर्थः। शश्वत्प्रशब्दाभ्यां सत्त्वगुणकार्य्यः शमो व्यावृत्तः। तथा अभयं, तस्य सभयस्यापि। प्रतिबोधमात्रं, तस्याज्ञानस्य ज्ञानवतोऽपि प्रतिमात्रशब्दाभ्यां सत्वगुणकार्यो बोधो व्यावृत्तः शुद्धं तस्याशुद्धस्यापि एवं परमात्मानमुक्त्वा ब्रह्म ह यत्र नानाकारकवानपि तथा क्रियया सह अर्थावाच्यलक्ष्यव्यङ्ग्या यत्र तादृशोऽपि शब्दो न प्रभवति तद्ब्रह्म ननु ब्रह्मशब्देनैव तद्ब्रूषे अथ च शब्दो न यत्रेति निषिध्यसि च तत्राह मायेति। यस्याभिमुखे माया विलज्जमाना सती परैति पृष्ठदेशमुपैति तस्य भगवतः पदं अप्राकृतविचित्ररूपगुणादि विविधविशेषवतोऽपि तस्य प्राथमिकसाक्षात्कारविषयो निर्विशेषं स्वरूपम्। मदीयं महिमानं च परब्रह्मेति शब्दितमिति भगवदुक्तेस्तदीयं व्यापकत्वलक्षणं बृहत्त्वमेव निश्चितं ब्रह्म। अयं भावः—शब्दस्याकाशगुणत्वेन मायिकत्वान्मायाया अपि तदभिमुखे स्थातुमशक्तेरमायिकरूपगुणादिमन्तं भगवन्तमपि शब्दोऽभिधातुं यद्यपि न प्रभवति, तदपि मेघश्यामः कनकपरिधिः पङ्कजाक्षोऽयमात्मेत्यादयः शब्दाः मेघकनकादिप्राकृतवस्तुसादृश्यारोपेणैव लोकचित्तं यथाकिञ्चित् तत्र प्रवेशयन्ति लोकश्च चित्तैकाग्र्येणापि वस्तुतोऽस्पृष्टरूपतद्रूपाभासोऽपि भगवन्तं प्रभुमहं ध्यायामीत्यभिमन्यमानो हृष्यति, भगवानप्यपारकृपातरङ्गवशादेवानेन भक्तेनाहं ध्यात एवेत्यभिमन्यते अभिमत्य च तं भक्तं स्वचरणान्तिकं सेवार्थं मानयतीति भगवत्स्वरूपस्य शब्दगम्यत्वं तत् कृपयैव सिद्धं, ब्रह्मस्वरूपस्य तु प्राकृताप्राकृतविशेषराहित्यात् कथं शब्दगम्यत्वमस्त्विवति शब्दो न यत्रेत्युक्तम्। प्रवृत्तिनिमित्तस्य

वस्तुधर्म्मस्य जात्यादेरभावात् यत्र क्रियाकारकवान् शब्दो न प्रभवति तद्ब्रह्मेति ब्रह्मशब्दस्य पृथक् सङ्केत एवायं कृतः । अतः शब्दगम्यत्वाभावेऽपि शब्दगम्यस्य भगवतो निर्विशेषं स्वरूपं तद्ब्रह्मेति । भगवत्सम्बन्धित्वेनैवोक्ते सति तत्र लोकचित्तप्रवेशः नान्यथेति भङ्ग्या ब्रह्मणोऽपि शब्दगम्यत्वमुक्तम् । इत्थमेव श्रुत्यध्यायादौ व्याख्यास्यते इति । तथा अजस्रमेव सुखं यस्मात्, विगतो भवति शोको यस्मात् तदिति तस्य सुखरूपत्वे विशोकत्वे च कैमुत्यमानीतम् ॥ ४७ ॥ ❀ ❀ परमात्मनो ब्रह्मणश्च उपासकान् सामान्याकारेणाह । सह अञ्चतीति सध्र्यक् सहचरं मनः यं परमात्मानं यत् ब्रह्म च प्रति नियम्य यस्मिन् स्थिरीकृत्य, यमिति पुंस्त्वमार्षं, यतयो यत्नशीला योगिनः संन्यासिनः च कर्त्तो भेदस्तदभावोऽकर्त्तः तत्र हेतिं साधनं जह्युस्त्यजेयुः अनुपयोगान्नाद्रियन्त इत्यर्थः । उपयोगाभावेन साधनानादरे दृष्टान्तः । निपीयतेऽस्मिन्निति निपानं कूपस्तस्य खनित्रं खननसाधनं यथा स्वराट् स्वयमेव पर्जन्यरूपेण राजमान इन्द्रो नादत्ते तद्वत् । यद्वा स्वेनैव राजत इति स्वराट् दरिद्रः समृद्धः सन् कर्म्मकारदशायां गृहीतं निपानखनित्रं जहाति तद्वदित्यर्थः । भगवद्भक्तास्तु साध्यप्राप्तौ साधने द्विगुणितादरा भवन्तीति तेऽत्र व्याख्यायां न प्रवेशनीयाः ॥ ४८ ॥ ❀ ❀ किञ्च परमात्मोपासकानां ब्रह्मोपासकानामन्येषाञ्च भगवन्तं विना न फलसिद्धिरित्याह । स भगवानेव श्रेयसां मोक्षस्वर्गादीनां विभुर्दाता च अतो योगिज्ञानिकर्म्मिभिः प्रतिस्वफलसिद्ध्यर्थं भगवद्भक्तिः कर्त्तव्या । किञ्चास्य भक्तजीवस्य भावा दास्यसख्यादयस्तत्स्वभावेन विहितस्य सतः उत्तमसाधनस्य समुचितश्रवणकीर्त्तनादेर्यतो भगवत एव सकाशान्न तु परमात्मनो नापि ब्रह्मतः प्रकृष्टा सिद्धिरिति । भगवद्भक्तैस्तु स्वप्रेमफलसिद्ध्यर्थं योगज्ञानादिकं न कर्त्तव्यमिति भावः । ननु भक्तियोगज्ञानादिकं साधनं प्रति स्वसाध्यवस्तूत्पादने यावदसमर्थं तन्मध्य एव देहभङ्गे सति कीदृशं स्यात्तत्राह । स्वधातुविगमे स्वारम्भकधातूनां भूतानां विगमे वियोग सति अनु अनन्तरं विशीर्यमाणेऽपि देहे पुरुषो जीवः व्योमेव देहस्थाकाशमिव न विशीर्य्यते । यतोऽजस्तेन देहेन सह वस्तुतो न जात इत्यर्थः । तेन च भक्तिज्ञानादिवासनायाः समुचितस्थाने पुनरपि समुचितं देहं धृत्वा कृतैः साधनैः सिद्ध्यति । यदुक्तम्—यतते च ततो भूयः संसिद्धौ कुरुनन्दनेत्यादि ॥ ४९ ॥ ❀ ❀ अध्यायत्रयस्यार्थमुपसंहरति सोऽयमिति । संक्षेपेण भगवानेवोक्तः । केन प्रकारेणेत्यत आह । सत् कार्यं समष्टिव्यष्ट्यात्मकं जगत्, असत् कारणं जीवा माया च, तत् सर्वं हरेरन्यन्न भवति, जीवमाययोः शक्तित्वाच्छक्तिशक्तिमतोरभेदात् । शक्तिकार्यस्य शक्त्यनन्यत्वादिति भावः । हरेः कथम्भूतात् । सदसद्भ्यामन्यस्मात् । तयोः शक्त्योस्तटस्थत्वबहिरङ्गत्वाभ्यामनासक्तेस्तद्दोषसम्बन्धाभावमिति भावः । भागवते इदमेवाद्वैतमिति सर्वत्राग्रेऽपि द्रष्टव्यम् ॥ ५० ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

ते सर्वे देवस्य विष्णोर्मायां विदंति अतितरंति च चकारेण देवं विदंति ये तु विष्णोर्मायां शरीरपर्यंतां न विदंति तेषां श्वशृगालभक्ष्ये ममाहमिति धीर्न भवतीति भावः । किंच भागवतसंगेन सर्वेऽपि विदंति तरंति चेत्याह स्त्रीत्यादिनास्त्र्यादयः तिर्यञ्चश्च अद्भुताः क्रमाः पादविन्यासा यस्य भगवतस्तत्परायणा भागवताः तच्छीले शिक्षा येषां ते तथा यदि भवंति तर्हि तेपि विदंत्यतितरंति चेत्यर्थः । ये श्रुतधारणाः श्रीगुरुमुखात् श्रुते परमात्मतत्वे धारणाचित्तैकाग्र्यं येषां ते तथाभूताः विदंति तरंति चेति किमुत वक्तव्यम् ॥ ४६ ॥ ❀ ❀ ननु ते वै विदंतीत्यादिशब्दैरुक्ताः क्षेत्रज्ञाः अहं प्रत्ययेन भोक्तृत्वादिना च वेदितव्याः देवमाया च भोग्यत्वादिनोपलभ्यते देवादिशब्दैरुदाहृते परमात्मतत्वे किं प्रमाणं कीदृशं च तदित्यतः परमात्मनि प्रमाणं चिदचिद्विलक्षणं परमात्मस्वरूपं च वदन् प्रधानकारणवादं आम्नायस्य क्रियार्थत्वमिति जैमिनिमतं च निराकरोति शश्वदिति द्वयेन । यत्राभिमुखे पृथक् स्थातुं विलज्जमाना माया प्रकृतिः परैति पराङ्मुखी भवति शक्तेस्तद्वतः पृथक्स्थित्यभावात् प्रकृतेर्जगत्कारणत्वस्य तु का कथेति भावः । यत्र यस्मिन्प्रतिपाद्ये सति पुरुकारकवान् क्रियांगभूतो बहुयजमानादिकारकवाचकोपि शब्दः वेदः क्रियार्थो न भवति विबिल्सोपयोगितया परमात्मपरत्वात् तदा कारकगंधस्पर्शवर्जितः उपनिषद्रूपः शब्दः क्रियार्थो न इति किंपुनर्वक्तव्यम् । तस्य साक्षात्परमात्मा गुणस्वरूपपरत्वात् सर्वे वेदा यत्पदमामनंति तं त्वौपनिषदं पुरुषं पृच्छामि वेदैश्च सर्वैरहमेव वेद्यः तत्तु समन्वयात् इत्यादिश्रुतिस्मृतिसूत्रेभ्यः तद्वेदप्रमाणकमात्मतत्वम् आत्मा वा अरे द्रष्टव्य इत्यादिश्रुतिप्रोक्तं परमात्मतत्वम् । सर्ववेदवेद्यत्वे हेतुमाह सममिति । सर्वात्मभूतमित्यर्थः । सदसतः स्थूलसूक्ष्मरूपाद्चेतनवर्गात्परमुत्कृष्टम् बोध्यम् । तत्र हेतुमाह प्रतिबोधमात्रमिति । प्रतिबोधः ज्ञानं मात्रा गुणो यस्मिन् तद्ज्ञानगुणकमित्यर्थः । स्वरूपतोपि ज्ञानं सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः । अचिद्वैलक्षण्यमुक्त्वा काचिद्वैलक्ष्यण्यं तस्याह न विद्यते संसारभयं यस्मात्तदभयं मुक्तोपसृप्यमित्यर्थः । शुद्धं प्राकृतदोषास्पृष्टम् यतः शश्वत्सदा प्रशांतम् स्वानंदैकराशिभूतम् ॥ ४७ ॥ ❀ ❀ कथंभूतम् अजस्रसुखं नित्यसुखम् विशोकम् विशोको विजर इत्यादि श्रुतेः इत्येवं भूतमात्मतत्वम् बृंहति बृंहयति तस्मादुच्यते परं ब्रह्म तथाः श्रुतयः ब्रह्मेति यद्विदुस्तद्वै निश्चयेन परमस्य पुंसः विश्वकारणस्य भगवतः षडैश्वर्यसंपन्नस्य पदं स्वरूपम् । यतयः आवृत्तिरसकृदुपदेशादिति सूत्रकाराज्ञया मोक्षसाधनावृत्तियत्र पराः यं परमं पुमांसं प्रतिसहांचतीति सध्र्यङ् सहस्य सध्र्यादेशः । जीवसहचरं मनः नियम्य परमानंदलक्षणभगवत्साक्षात्कारहेतुभूतां ध्याननिष्ठां प्राप्य अकर्तहेतिं जह्युः कृत्यंते छिद्यंते सुखानि अनेनेति कर्तः क्लेश प्रतिच्छेदने तद्विपरीतः स्वर्गादिसुखलेशः अकर्तः तत्र हेतिं साधनं कर्म त्यजेयुरित्यर्थः ।

मुख्यपदार्थाधिकारे प्राप्ते सति पदार्थलेशसाधनानादरे दृष्टांतः स्वराट् स्वयमेव राजमानोतिदरिद्रः इंद्रः सन् निपीयतेऽस्मिन्निति निपानं कूपस्तस्य खनित्रं खननसाधनमिव ॥ ४८ ॥ ❀ ❀ परमानंदसाधनं क्षुद्रानंदसाधनं कर्मेत्युक्तं तदुभयोः फलप्रदः प्रवर्तकश्च भगवानेवेति वदन् पुनर्जीवाद्भगवतो वैलक्षण्यमाह स इत्यर्द्धेन । स एवोक्तप्रकारः भगवान् श्रेयसां मुक्ति भुक्तिलक्षणानां विभुः दातापि यतः भगवतः सकाशादेवंभावानां मुमुक्षूणां बुभुक्षूणां च स्वभावेन निवृत्तिलक्षणेन प्रवृत्तिलक्षणेन च विहितस्यानुष्ठितस्य ध्यानस्य कर्मणश्च सतः प्रसिद्धिः ननु ध्यातुः कर्मकर्तुश्च मृतस्य कथं परमानन्दलाभः स्वर्गादिलाभश्च स्यादत आह देहे इति । पुरुषः देहेस्थोऽजो जन्मादिरहितो जीवः देहे स्वधातूनां स्वकारणरूपाणां पृथिव्यादिभूतानां विगमे वियोगे सति विशीर्यमाणेपि तत्रस्थव्योमवत् न विशीर्यते न विनश्यति ॥ ४९ ॥ ❀ ❀ अध्यायत्रयस्यार्थमुपसंहरति स इति । हे तात नारद ते तुभ्यम् । समासेन संक्षेपेण सोयं विश्वभावनो विश्वहेतुः भगवान् ज्ञानशक्त्यादिसंपन्नः वासुदेवः अभिहितः प्रतिपादितः यत् यस्माद्धरेः विश्वहेतोः सदसत्स्थूलसूक्ष्मरूपं विश्वं अन्यत् भिन्नं न भवति कथंभूतादन्यस्मात्स्वरूपतो भिन्नादपि यस्मात्सर्वं सदसद्भिन्नाभिन्नमित्यर्थः । उभयव्यपदेशात्वहिकुंडलवदिति सूत्रात् ॥ ५० ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

तेषां फलमाह—**ते वै विदन्त्यतितरन्ति चेति** । तां मायां ज्ञात्वा तामेव तरन्तीति । अस्मदादीनामपि तरणोपायमाह—**स्त्रीशूद्रहूणशबरा अपीति** । तामसेषु स्त्रियः सात्त्विक्यः । शूद्रो राजसः । हूणस्तामसः । शबरादयस्ततोऽप्यधमाः । पापेनैव जीवन्तीति पापजीवाः । एते विदन्ति तरन्ति च । यदि अद्भुतक्रमस्य भगवतः परायणाः सेवकाः तेषां यदि शीलेन शिक्षिता भवेयुः । अद्भुतः क्रमः पादविक्षेपः क्रियाशक्तिर्यस्येति भगवतः सामान्यतः परायणत्वं यस्य कस्यचित्सुलभम् । तस्य परायणास्तु क्षणमात्रमप्यन्यचित्ता न भवन्ति । अन्यथाऽद्भुतक्रमत्वाद्भगवानन्यत्र गच्छेत् । तेषामपि न वचनमात्रेण शिक्षितं प्रयोजकं किन्तु शीलेन सह । यथा ते भगवत्परास्तथा चेत्तदाज्ञया तेऽपि भवन्ति । किञ्च । स्त्रियादिषु नासम्भावना कर्त्तव्या । यतस्तिर्यग्जना अपि मुक्ता भवन्ति । यथा नामादिपाठनेन शकादयः । श्रुतधारणाः श्रुतार्थालोचनसमर्थाः । तस्मादंशतो ज्ञाने सर्व एवाऽधिकारिणः । सर्वथा ज्ञाने न कोऽपि । भगवद्भक्तसङ्गाभावे तु न किञ्चिज्जानन्ति ॥ ४६ ॥ ❀ ❀ एवमेकैकशो धारणस्य स्वरूपमुत्पत्त्या[1] विनिरूप्य "**जितं जितं स्थानमपोह्य धारयेदि**" त्यस्याऽर्थमुत्पत्त्या विचारयति—**शश्वदिति** द्वाभ्याम् । स एव भगवदंशः स्वाधीनो भवति यः स्वात्मत्वेन स्वयमेव स्फुरति । अन्यथा बुद्ध्या व्यवस्थापितस्तदपगमेऽपगच्छेत् । पादादीनां च स्वरूपमेतदेव । तत्र प्रथमं पादस्वरूपे विचारितेऽन्यत्स्वयमेव ज्ञास्यतीति लक्षणेन प्रथमं पादस्वरूपं निरूपयति—**तद्वै पदं भगवतः परमस्य पुंस इति** । दश धर्मा भगवतश्चरणारविन्दे निरूपिता दशलीलारूपाः । तथा सति प्रत्येकावयवे दशलीला उक्ता भवन्ति । तत्र भगवच्च[2]रणारविन्दं कीदृशमित्यपेक्षायां यत्सर्वदा तच्चरणारविन्दं यत्तु कदाचित्तन्न । अनेन कालेन भगवत्स्वरूपं निर्धारितं कालापरिच्छिन्नं तदिति । यत्कालेन परिच्छिन्नं तन्न तत् । प्रशान्तं गुणत्रयक्षोभरहितम् । सत्त्वस्याऽपि दयादिना क्षोभा[3]त्तदभावाय प्रशब्दः । एवं प्रेर्यप्रेरकयोरपरिच्छेदो निरूपितः । इदानीं सर्वपरिच्छेदकस्य कालस्याऽऽत्रापरिच्छेदकत्वमाह—**अभयमिति** । भयरहितम् । एवं संसारधर्माभावनिरूपणेन दोषाभावमुक्त्वा स्वरूपमाह **प्रतिबोधमात्रं शुद्धं सममिति** । प्रतिबोधमात्रमनुभव[4]रूपम् । मात्रशब्देन प्रमातृप्रमाणप्रमेयसम्बन्धो निवारितः । त्रितयसम्बन्धरहिता या प्रमा तद्भगवत्पदमित्यर्थः । मात्रपदेनैव शुद्धताया उक्तत्वात् शुद्धमानन्दरूपम् । समं सद्रूपम् । एवं सच्चिदानन्दरूपमित्युक्तं भवति । अस्य पदस्य सर्वव्यवहारातीतत्वं वदति चतुर्भिर्विशेषणैः । व्यवहा[5]रोऽपि हि चतुर्द्धा भवति । प्रपञ्चत्वेन आत्मीयत्वेन शब्दत्वेन शब्दार्थत्वेन च । तत्र व्यवहारातीतत्वमाह—**सदसतः परमिति** । कार्यकारणभावात्परम् । प्रकृतेर्वा । आत्मीयो न भवतीति आत्मव्यवहारोऽपि नास्तीत्याह । आत्मनस्तत्त्वं परमार्थस्वरूपम् । व्यवहारस्तत्कृतस्तदन्यस्मिन्भवति । आत्मनः सिद्धत्वान्न तत्र व्यवहारः । शाब्दिकं व्यवहारं निराकरोति—**शब्दो न यत्रेति** । भगवत्पदे कर्मत्वाद्यभावान्न कारकत्वम् । अक्रियारूपत्वात् तदव्यङ्ग्यत्वाद्वा न धात्वर्थत्वम् । अप्रयत्नरूपत्वान्न प्रत्यार्थत्वम् । अनेन [6]शब्दे प्रधानरूपत्वाभावे नामाख्यातार्थत्वाभावादुपसर्गनिपातार्थत्वं दूरादेव निवारितम् । **कारकवान् क्रियार्थ इति** । नामाख्यातयोः सम्बन्धकथनाद्वाक्यार्थोऽपि न भवतीत्युक्तम् । भगवदाज्ञया मायाव्यवहार्यत्वे जीवानामिवाज्ञानादिनिवृत्तिद्वारा व्यवहार्यत्वं स्यात् । तदपि नास्तीत्याह—**माया परैति** दूरादेवापगच्छति । तस्या[7] गमने हेतुः—**विलज्जमानेति** । इयं चरणदासी । ज्ञानरूपत्वाच्च भगवतः । इयं मोहिका । अत एव तस्या जनव्यामोहकत्वं भगवान् जानातीति । ये वा अभिमुखाश्चकारादनु[8]चराश्च ज्ञानिनो भक्ताश्च तत्र सर्वत्रैव विलज्जमाना । विशेषतो लज्जा अंशतोऽपि कार्याकरणं द्योतयति । एवं दशभिर्विशेषणैर्भगवत्पदं लक्षयित्वा तस्य प्रसिद्धिमाह—**ब्रह्मेति यद्विदुरिति** । यद्भगवत्पदं सर्ववेदान्तविचारका ब्रह्मेति विदुः । तस्मिन्नेव

१. मुत्पत्त्या निरूप्य ख. ग. । २. भगवतश्चरणारविन्दं ग. । ३. क्षोभनात् क. घ. क्षोभणादिति ग. । ४. मनुभवस्वरूपमिति ख. ।
५. व्यवहारो हीति ख. ६. शब्देनेति ग. । ७. तस्या अपगमने इति ख. । ८. तदनुवशाश्चेति ख. ।

ब्रह्माणि ईश्वरत्वेन कश्चिदुद्गच्छेत्तदा स भगवान्। पूर्वोक्तं तु पदम्। स एव चेन्नियामको भवे'त्तदा परमः। तत्पदम्। स एव चेद्धोक्ता तदा पुमान्। एवं विचारेण ब्रह्मविदोऽपि ब्रह्मेति तद्वदन्ति। एवं तस्य प्रसिद्धिमुक्त्वा तस्य सहजं फलमाह—**अजस्रसुखं विशोकमिति**। परमानन्दो दुःखाभावश्च फलं तदुभयरूपं त'दित्यर्थः। तत्र साधनान्याह—**सध्र्यङ्नियम्येति**। सम्य'गञ्चतीति सध्र्यङ्मनः। यदात्मानं संसारेऽञ्चति तादृशं मनो नियम्य। तद्भावं तस्य दूरीकृत्येत्यर्थः। इदमान्तरं साधनम्। बहिः साधनं संन्यासः। तदाह—**यतय इति**। एवं दोषाभावप्रभृतिफलपर्यन्तं पदं निरूप्य विजितार्थो विचारितः। जितं जितं स्थानमपोह्येति विचारयति। तत्र जितानां स्वाधीनीकृतानां पदानां न परित्यागः। तथा सति पूर्वप्रयासवैयर्थ्यापत्तेः। किन्तु जितं स्थानं भगवच्चरणारविन्दाश्रयभूतं साधनसमुदायमपोह्य दूरीकृत्येत्याह। ससाधनस्य पदस्य जितत्वात्पदं स्थापनीयम्। साधनं त्यक्तव्यमित्यर्थः। नन्वस्य त्यागस्य किं प्रयोजनं तत्राऽऽह—**धारयेत्परम्परमिति**। अग्रिमावयवस्वाधीनीकरणार्थमुत्तरोत्तर-सम्बन्धिनां धारणमिति दृष्टान्तेन स्पष्टयति—**स्वराडिव निपानखनित्रमिति**। यथा स्वराट् स्वर्गाधिपतिर्मेघादीनां स्वामी। निपानखनित्रं कूपखननसाधनं कुद्दालादि त्यजति। एवं भगवत्पदप्राप्त्यर्थं कृतानि क्षुद्राण्यपि साधनानि पदमाहात्म्यात् महाफलत्वेन पदे सम्पन्ने 'पूर्वमज्ञानात्क्षुद्रपदार्थसाधकानि सङ्गृहीतानि त्यजतीत्यर्थः। स्वराट् साधकानि तु गृह्णात्येव। एवमुत्तरत्र सर्वांशे फले निष्पन्ने इन्द्रो भूत्वा परमैश्वर्यं प्राप्य सर्वमेव त्यजतीति भावः॥ ४७॥ ४८॥ ❀ ❀ एवमुद्देशाध्याये निरूपितस्य भगवत्स्वरूपस्योत्पत्त्या विचारमुक्त्वा साधनाध्याये "**अकामः सर्वकामो वे**"ति वाक्ये तदेव स्वरूपं पुनः फलसाधकत्वेनोक्तम्। तमंशमत्रोत्पत्त्या विचारयति—**स श्रेयसामपि विभुरिति**। स वस्तुतः स्वतः परमपुरुषार्थरूपः। एतादृशोऽपि यदि कश्चित्कामयते स्वर्गादिकमपि तदपि प्रयच्छति। यतः सर्वेषामपि श्रेयसां फलानामयमेव विभुः समर्थ उत्पादयितुं दातुं च। यतोऽयं भगवान् परमानन्दरूपोऽपि षड्गुणान् बिभर्त्तीति। तत्र हेतुमाह। यतः अस्य जगतः भावस्वभावविहितस्य सतो भगवतः सद्रूपादेव प्रकर्षेण सिद्धिरुत्पत्तिः। सर्वमेव हि जगद्द्विरूपम्। एकं भावविहितमन्यत्स्वभावविहितम्। भावो धात्वर्थः क्रिया तदभिव्यङ्ग्यो वा। तेन निष्पद्यते किञ्चिजगत्। सामान्यक्रियाभावः। तद्विकाराः भावविकारा उत्पत्त्यादयः। तेन ये केचनोत्पद्यन्ते। प्राप्यन्ते अभिव्यज्यन्ते 'वा ज्ञायन्ते वा ते सर्वे भावविहिताः। ये तु नित्यनिरतिशयादिरूपा अक्षरकालादयस्ते स्वभावविहिताः। तेषां स्वरूपमेव भावः क्रियादिरूपस्तेन विहिताः। स्वतः सिद्धा इत्यर्थः। एवं क्रियातः स्वतश्च सिद्धाः सर्वे ब्रह्मणः सद्रूपादेव प्रसिद्धाः लब्धसत्ताकाः अन्यस्य सत्संपादकत्वाभावात्। तस्माद्भगवानेव 'सर्वफलानामुत्पादको दाता चेति युक्तम्। एवं 'स्वरूपादि फलान्तं भगवत्स्वरूपं विचार्य फलदानप्रस्तावे फलं कस्येत्याकाङ्क्षायां तच्चेत्फलं भगवत एव भवेत्तदा विचारप्रवृत्ति-वैयर्थ्यापत्तिरिति जीवस्य फलमिति वक्तव्यम्। तत्र जीवो नाम कः पदार्थ इति जिज्ञासायां यो देहवान् स जीव इति लोकवेद-प्रसिद्ध्या देवसम्बन्धी जीव इति निश्चीयते। तत्र सन्नियोगशिष्टत्वे देहेन सह उत्पद्यते। देहे लीयमाने विलीयत इति मन्तव्यम्। अन्यथा पृथगपि तस्य प्रतीतिः स्यात्। "**अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत**" इति देहाभावे न कोऽपि पुरुषार्थः सिद्ध्यतीति। देहान्वयव्यतिरेकानुविधानादस्मिन्नेव देहे यदात्मनः फलं तत्फलं नाऽन्यदिति मतं निराकरोति—**देह स्वधातुविगम इति**। अयं हि देहो नाऽऽत्मा। कित्वात्मनः आवरणरूपः। तत्सम्बन्धेनैव तस्य सुखदुःखजननात्। "**नित्यः सर्वगतः स्थाणुरि**"ति वाक्येन तस्य सर्वगतत्वादिश्रवणाच्च। तस्माद्यथा घट आकाशपरिच्छेदकस्तथा देहोऽप्यात्मपरिच्छेदकः। एवं यथा नोत्पत्तिस्तथा देहनाशेऽपि न तस्य नाशः। तथा च यदाकदाचित्तस्य फलं फलमेव। देहस्तु स्वधातुविगमेन विशीर्यते। तस्योत्पादका ये' धातवः संस्कृतभूतावयवाः। अन्नादयस्तु तदुपष्टम्भकाः। ते हि धातवः स्वसमवेतं फलं जनयित्वा कृतार्थाः सन्तो निवर्त्तन्ते तदा तैः सह जातो निवर्त्तते। तथाऽयमात्मा देहेन' सह जातः। यथा देहो धातुभिः। तस्मात्फले न काऽप्यनुपपत्तिरिति॥ ४९॥ ❀ ❀ उक्तार्थमुपसंहरति—**सोऽयं तेऽभिहित इति**। मयैतावता कालेन भगवानेव निरूपितो दशविधलीलायुक्तः। भगवत्त्वेन षड्गुणाः। विश्वभावनत्वेन चत्वार उत्पत्त्यादयो मोक्षश्च। धर्मादयो वा। तैरेव हि विश्वं भाव्यते। एवं विश्वभावनो भगवानेतावता प्रबन्धेन निरूपितः। श्रवणं तव सम्पादितमिति भावः। विस्तरेण निरूप्य सङ्क्षेपेण निरूपयति बुद्धिसौकर्यार्थम्—**समासेनेति**। यावानर्थो मया विस्तरेण निरूपितस्तस्याऽयं समासः सङ्क्षेपो भगवानेव सर्वं भगवत एव सर्वमिति। उपचारव्यावृत्त्यर्थं निषेधमुखेनाऽऽह—**हरेर्नान्यत्**। हरिरेव सर्वं हरेरन्यन्न। हरेरेव सर्वं नत्वन्यस्मात्। सदसत् उत्कृष्टमपकृष्टं च। चकारात्कालादिकमपि। यदिति प्रसिद्धम्॥ ५०॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

ते वै विदन्तीत्यत्र। महतामपि दैन्यमेवोपाय इति ज्ञापयन्ति। अस्मदादीनामित्यस्मत्पदेन। सुलभमिति। तथा च, यथा निरहंममत्वादिकं मुख्याधिकाराभिज्ञापकं तथा दोषान्तरसत्त्वेऽपि परायणत्वं दयाया अभिज्ञापकमित्यर्थः। ततः

१. तदा स परम इति ख.। २. तद्वदित्यर्थः घ.। ३. सहाञ्चतीति ख.। ४. वा नास्ति ख.। ५. सर्वेषामुत्पादक इति ग.। ६. स्वभावादिति ख.। ७. ते धावत इति ख.। ८. न देहेनेति ग.।

सामान्यतस्तस्मिन्सति विशेषतो ये तादृशास्तेषामनुसरणं कर्त्तव्यमित्याशयेन तल्लक्षणमाहुः तस्येत्यादि। तादृशाश्च प्रसादनीयाः। न तु सम्वादसन्तोषमात्रं कार्यमित्याहुः तेषामपीत्यादि। श्रुतार्थालोचनसमर्था इति। इदं स्त्र्यादीनां विशेषणम्। तेन बुद्धेरधिकारिविशेषणत्वं बोधितम्। तदेतन्मनसिकृत्य सिद्धमाहुः तस्मादित्यादि। तथा च, यथायथाधिकारस्तथा तथा तादृग्धारणासिद्धिरित्यर्थः॥ ४४॥ ❀ ❀ शश्वदित्यत्र। उत्पत्त्या विनिरूप्येति। उत्पत्तिप्रकारसामग्रीप्रदर्शनेन निरूप्य। अर्थमुत्पत्त्या विचारयतीति जितत्वस्वरूपमपोहनप्रकारं च जितत्वसामग्रीविचारेण निरूपयतीत्यर्थः। जितत्वस्वरूपं सामग्रीं चाहुः स एवेत्यादि। तथा च, स्वतः स्फूर्त्तिरेव सामग्रीत्यर्थः। एतदेवेति एतच्छ्लोकोक्तरूपमेव। ननु एतस्मिन् श्लोके पादस्वरूपमात्रमुच्यत इति कथं ततोन्येषां स्वरूपावगतिरित्यत आहुः तत्रेत्यादि। ज्ञास्यतीति तल्लक्षणतया ज्ञास्यति। दशधर्मा इति लक्षणरूपा इत्यर्थात्। प्रेर्यप्रेरकयोरितीति प्रेर्यकृतः प्रेरककृतश्चेत्यर्थः। सर्वपरिच्छेदकस्येति भयोत्पादकस्य सर्वाधारभूतस्य येति ओतानुज्ञात्रनुज्ञाविकल्पभेदेष्वविकल्परूपा। समं सद्रूपमिति सद्रूपस्य सर्वत्र समतयैव प्रतीयमानत्वात्समपदेन तदेवोच्यत इत्यर्थः। सर्वव्यवहारातीतमिति। व्यवहारो नाम लौकिकबुद्धिविषयत्वहेतुभूतो वा लौकिकप्रमाणसामर्थ्यजन्यो वा यो वागादिव्यापारस्तदगोचरमित्यर्थः। तद्व्युत्पादयन्ति व्यवहारोपीत्यादि। व्यवहारातीतत्वमिति प्रपञ्चव्यवहारातीतत्वम्। आत्मीय इत्यादि॥ देहादिवदभिमानिकात्मसम्बन्धवान्न भवतीति देहादिष्विवौपचारिक आत्मव्यवहारोपि तत्र नास्तीत्याहेत्यर्थः। न तत्र व्यवहार इति नात्मीयत्वकृत आत्मव्यवहारः। शाब्दिकमिति शब्दत्वकृतं शब्दार्थत्वकृतं च। कर्मत्वाद्यभावादिति प्रमातृप्रमाणसामर्थ्यस्याभावेन तत्सम्बन्धाभावे तद्विषयकज्ञानाभावेन तथात्वात्। कारकेत्यादि। अनेनैव षष्ठ्यर्थत्वमपि निवारितं बोध्यम्। भगवदाज्ञयेत्यादि। एवं साधितेपि चतुर्विधव्यवहारातीतत्वे यथा 'असङ्गो ह्ययं पुरुष' इत्याश्रुत्युक्तधर्मवतां जीवानां भगवदाज्ञया मायाव्याप्तौ यद्व्यवहार्यत्वम्, ततश्चाज्ञाननिवृत्तिद्वारा गुर्वादिव्यवहार्यत्वम्, तथा पदेपि मायासम्बन्धे निमित्तवशात्तदपनोदार्थं व्यवहार्यत्वं स्यादित्यर्थः। दूरादेवेति। तथा च, तस्याः सम्बन्धस्याभावात्तत्कृतव्यवहारादप्यतीतमित्यर्थः। प्रसिद्धिमाहेति वेदान्तप्रसिद्धिं प्रमाणत्वेनाह। यदीत्यादि। तथा च, लौकिकवैदिकयावद्व्यवहारातीतत्वेपि सर्ववेदान्तसिद्धं तदित्यर्थः। इदं यथा तथा 'प्रकाशवच्चावैयर्थ्यादि' तिसूत्रे व्युत्पादितम्। ननु वेदान्तेषु तस्य परात्परत्वं परमत्वं च प्रतिपादितम्। 'परात्परं यन्महतो महान्तमिति, 'तदेव ब्रह्म परमं कवीनामि' ति। तथा सति कथं तस्य चरणत्वमित्यत आहुः तस्मिन्नित्यादि। पदमिति चरणः, तत्पदमिति तत्स्थानत्वं लोकासनादिरूपम्। तथा चाभिध्यावशादेव तस्य चरणत्वं स्थानत्वं भोग्यत्वं चेति चरणाभरणायुधस्थानादिरूपतायामपि न कश्चिद्विरोधलेश इत्यर्थः। एतदेव निबन्धे 'मूलावच्छेदरूपेण तदाधारतया स्थित' इत्यादिनोक्तं ज्ञेयम्। तेन स्वप्रतिष्ठत्वादेरपि न विरोधः। तस्येति ज्ञातस्य पदस्य। मूले-तत्रेति फले। विजितपदार्थो विचारित इति। पूर्वोक्तरीतिकदशधर्मवत्त्वेन फलत्वेनात्मरूपत्वेन च पदवत्सत एव यो यो भगवदवयवः स्फुरति सोत्र विजितपदार्थ इत्येवं विचारित इत्यर्थः। अत्र सध्र्यङ्नियम्य यतयः सन्तोजस्रसुखं विशोकं यद्ब्रह्मेति विदुरित्येवं मूलं योजयित्वा पूर्वोक्तार्थोनुसन्धेयः। जितं जितमित्यादि, अत्रोक्तस्यापोहनस्वरूपं बोधयितुं 'यमकर्तहेतिं जह्युरि' त्यादिना सप्रयोजनं सदृष्टान्तं विचारयतीत्यर्थः। तदाहुः तत्रेत्यादि। आहेति। यमकर्तृस्थाननियमनजनकं हेतिं साधनं जह्युरित्यनेनाहेत्यर्थः। तथा च, जितं जितं स्थानपोह्य धारयेदित्यस्य स्थानमपोह्य स्थानं जयसाधनं ग्राहकबुद्ध्यग्रभागात्त्याजयित्वा जितं जितं धारयेदित्येवमर्थो बोध्यः। तदेतदाहुः ससाधनस्येत्यादि। अस्य त्यागस्येति पदग्राहकसाधनत्यागस्य॥ ४७ ४८॥ ❀ ❀ स श्रेयसामित्यत्र। तत्र हेतुमाहेति। भगवत्त्वेन फलसाधकत्वे विचारकारणभूतां जगदुत्पत्तिं ज्ञापिकामाहेत्यर्थः। क्रियातदभिव्यङ्ग्यो वेति। अत्र पुरःस्फूर्त्तिकविचारेण क्रियावास्तवविचारेण तदभिव्यङ्ग्य एव धात्वर्थ इति बोध्यम्। क्रियायास्त्रिक्षणावस्थायित्वेन नित्यस्य शब्दसम्बन्धस्य तत्राशक्यवचनत्वादिति। इति युक्तमिति उत्पादकस्य फलदातृताया आवश्यकत्वाच्छ्रेयोविभुत्वं युक्तमित्यर्थः। निवर्त्तत इति देहो निवर्त्तते।॥ ४९॥ ❀ ❀ यथा हराविलत्र सम्बन्धात्मभावादिति सम्बन्धेनात्मीयतालक्षणेन य आत्मभावः स सम्बन्धात्मभावस्तस्मात्। तद्व्युत्पादयन्ति आत्मन इत्यादि। एतत्परिहर्तुं सिद्धान्तमाहुः अयमित्यादि। उपपादितमिति पुनश्च भूयाद्भगवत्यनन्ते १-१९-१६ इत्यत्र वाक्यान्वयाधिकरणे च व्युत्पादितमित्यर्थः॥ ५०॥

**इति श्रीद्वितीयस्कन्धसुबोधिनीप्रकाशे सप्तमाध्यायविवरणम्।**

**श्रीगिरिधरकृता बालप्रबोधिनी**

किं बहुना? अद्भुताः परमाह्लादजनका उत्तमाधमविचारमन्तरेणैव परमपुरुषार्थप्रापकाश्च क्रमाः पादन्यासा लीला यस्य भगवतः स परमुत्कृष्टमयनमाश्रयो येषां तेषां भगवद्भक्तानां शीलस्य शिक्षा येषां ते तथाभूता यदि भवन्ति भक्तानां शिष्या भूत्वा यदि तेषां शीलं भगवच्चिन्तनस्वभावं शिक्षन्ते तर्हि ये स्त्रीशूद्रादयो ये वा पापजीवाः पापयोनयः शबरादयः ये वा तिर्यग्जना गजर्क्षवानरादयस्तेऽपि देवस्य मायां विदन्त्यतितरन्ति च। यद्येवं तर्हि शुभस्य वेदार्थस्य धारणमधिकारो येषां ते ब्राह्मणादयस्तथा-

भूताः सन्तो मायां तरन्ति तत्त्वं विदन्तीति किमु वक्तव्यमित्यर्थः । श्रुतधारणा इति पाठान्तरेऽप्ययमेवार्थः ॥ ४६ ॥ ❀ ❀ किं तद्भगवतः स्वरूपं यच्चिन्तनेन मायां तरन्तीत्यपेक्षायामाह—शश्वदिति द्वाभ्याम् । यद्वेदविदो ब्रह्मेति विदुस्तदेतदेव परमस्य पुंसः पुरुषोत्तमस्य भगवतः ऐश्वर्यादिषड्गुणपूर्णस्य पदं स्वरूपमित्यन्वयः । किं तद्ब्रह्मेत्यपेक्षायामाह—विशोकमिति, स्वयं तु शोकरहितं विगतो भवति शोको येन तद्भक्तशोकनिवर्त्तकं चेत्यर्थः । तत्र हेतुमाह—अभयमिति, स्वयं तु भयरहितं भक्तभयनिवर्त्तकं चेत्यर्थः । तत्रापि हेतुमाह—शश्वत्प्रशान्तमिति । आद्यन्तयोः शश्वदजस्रशब्दप्रयोगाच्छश्वदित्यस्य सर्वत्र विशेषणे तु विशेषणत्वं द्रष्टव्यम् । कदाचिज्जीवस्यापि तथात्वसम्भवेन तद्व्यावर्त्तकत्वेन स्वारस्यं स्यात् शश्वत् भूतभविष्यद्वर्त्तमानकालत्रयेऽपि प्रशान्तं क्षुत्पिपासा-जरामरणादिषड्भूर्मिरहितमित्यर्थः । तत्रापि हेतुमाह—शुद्धमिति, पुण्यपापादिमलरहितमित्यर्थः । तत्रापि हेतुमाह—सदसतःपरमिति, स्थूलसूक्ष्मरूपात् प्रकृतिकार्यात्परं भिन्नमित्यर्थः । तर्हि जीवाद्भिन्नमभिन्नं वेत्यपेक्षायामाह—आत्मतत्त्वमिति, आत्मनां जीवानां तत्त्वं परमार्थभूतं तेषां तदंशत्वादित्यर्थः । तर्हि तस्य वैषम्यं स्यादित्याशङ्क्याह—सममिति । केन रूपेण तस्य समत्वमित्याकाङ्क्षा-यामाह—प्रतिबोधमात्रमिति, ज्ञानैकरसमित्यर्थः । तर्हि तस्यापिसुखापेक्षा स्यादित्याशङ्क्याह—अजस्रसुखमिति, सदानन्दस्वरूप-मित्यर्थः । किं बहुना ? शिष्यपरितोषार्थं यथा कथञ्चिदेव तद्बोध्यते वस्तुतस्तु तत्र शब्दव्यापार एव नास्तीत्याह—शब्द इति पुरुकारकवान् 'कर्त्ता कर्म च करणं सम्प्रदानं तथैव च ॥ अपादानमधिष्ठानमित्याहुः कारकाणि षट्' इति षट्कारकवानपि, शब्दो यत्र न प्रवर्त्तते यं न प्रतिपादयति । तत्र हेतुमाह—क्रियार्थ इति, यागादिक्रियाप्रतिपादक इत्यर्थः । किञ्च जीवानां मायामोहेन जन्ममरणादिसंसारव्यवहारयोग्यताऽस्ति मायानियन्तुर्भगवतस्तु मायामोहाभावात् कथं तद्योग्यता स्यादित्याशयेनाह—मायेति । मत्कपटमसौ जानातीति यस्याभिमुखे स्थातुं विलज्जमाना माया यस्मात् परैति, दूरतोऽपसर्पतीत्यर्थः ॥ यस्मादेवम्भूतो भगवान् तस्मात् तस्मिन्नियमितमनसस्तद्भक्ताः कृतार्था एव न तेषां किञ्चिदपि कृत्यमस्तीत्याह—सध्र्यङिति । सहाञ्चतीति सध्र्यक् सहचरं मनो यं प्रति नियम्य यस्मिन् स्थिरीकृत्य यतयो यत्नशीलाः कृयन्ते छिद्यन्ते सर्वसंशया अनेनेति कर्त्तं ज्ञानं तदितरत् अकर्त्तं स्वर्गादिफलसाधनं कर्म तस्य हेतिंहेतुं उपकरणं जह्युः त्यजेयुरनुपयोगान्नाद्रियन्ते इत्यर्थः । उपयोगाभावेन साधनानादरे दृष्टान्तमाह—स्वराडिति । निपीयतेऽस्मिन्निति निपानं कूपादि तस्य खनित्रं खननसाधनं यथा स्वराट् स्वयमेव पर्जन्यरूपेण विराजमान इन्द्रो नादत्ते तद्वदिति यद्वा स्वेनैव राजते इति स्वराट् दरिद्रः स यथा इन्द्रः समृद्धः सन् कर्मकारकदशायां गृहीतं निपानखनित्रं जहाति तद्वदित्यर्थः ॥ ४७-४८ ॥ ❀ ❀ एवं भगवत्स्वरूपं निरूप्य यदुक्तं [२]'अकामः सर्वकामो वा मोक्षकाम उदारधीः ॥ तीव्रेण भक्ति-योगेन भजेत पुरुषं परम्' इति भगवद्भक्तानां न किञ्चिद्दुर्लभं तदुपपादयति—स इति । भावा वर्णाश्रमादयस्तेषां स्वभावेन शम-दमादिस्वभावानुगुणेन विहितस्यास्य सतः कर्मज्ञानभक्तियोगादिमार्गस्य यतः प्रवर्त्तकात् प्रसिद्धिः प्रवृत्तिः, यद्वा भावानां महदादीनां स्वभावेन परिणामेन विहितस्य जातस्यास्य सतो नामरूपात्मकसर्वप्रपञ्चस्य यतः प्रसिद्धिरुत्पत्तिः, स एव भगवान् श्रेयसां धर्मार्थका-ममोक्षात्मकचतुर्विधफलानामपि विभुस्तत्तद्रूपेण दातुं समर्थः सर्वान्तर्यामित्वात् सर्वात्मकत्वाच्चेत्यन्वयः । ननु कर्मकर्त्तुरत्रैव मरण-दर्शनात्तदनन्तरं कथं स्वर्गमोक्षादिफलं स्यादित्याशङ्क्याह—देहे इति । स्वारम्भकाणां धातूनां मांसादिरूपेण परिणतानां पृथिव्यादि-महाभूतानां विगमे वियोगे सति देहे तदनु पश्चाद्विशीर्यमाणेऽपि तत्रस्थः पुरुषो भोक्ता जीवो न विशीर्यते न नश्यति । तत्र हेतुमाह—अज इति, यतो देहवत्तेन सह न जात इत्यर्थः । 'जातस्य हि ध्रुवो मृत्युः' इत्यादिवाक्ये तथानिश्चयादिति भावः । तत्र दृष्टान्तमाह—व्योमवदिति, तत्रस्थाकाशवदित्यर्थः ॥ ४९ ॥ ❀ ❀ अध्यायत्रयेणोक्तमर्थमुपसंहरति—सोऽयमिति । हे तात नारद स सर्वशास्त्रतात्पर्यविषयोऽयं मम बुद्धिस्थो विश्वभावनः सकलजगत्कारणभूतो भगवान् ज्ञानशक्तिबलैश्वर्यादिसम्पन्नो वासुदेवस्ते तुभ्यं मया समासेन सङ्क्षेपेणाभिहितः कथित इत्यन्वयः । पुनरपि नारदस्नेहवशाद्भगवत्स्मरणेन परमाह्लादतश्च पुनस्ततोऽपि सङ्क्षेपे-णाह—हरेरिति । यत् किञ्चित् सदसत् स्थूलसूक्ष्मं चिदचित्कार्यकारणात्मकं तत्सर्वं हरेरेव भवति, नान्यस्मात् , अतस्ततोऽन्यन्न भवतीत्यन्वयः । हरेर्नान्यदनपत्स्यादिति तु पाठान्तरम् , अन्यदिव प्रतीयते तदन्यन्न स्यादित्यर्थः ॥ ५० ॥

## हिन्दी अनुवाद

जिन्हें भगवान्के प्रेमी भक्तोंका-सा स्वभाव बनानेकी शिक्षा मिली है, वे स्त्री, शूद्र, हूण, भील और पापके कारण पशु-पक्षी आदि योनियोंमें रहनेवाले भी भगवान्की मायाका रहस्य जान जाते हैं और इस संसार-सागरसे सदाके लिये पार हो जाते हैं; फिर जो लोग वैदिक सदाचारका पालन करते हैं' उनके सम्बन्धमें तो कहना ही क्या है ॥ ४६ ॥ ❀ ❀ परमात्माका वास्तविक स्वरूप एकरस, शान्त अभय एवं केवल ज्ञानस्वरूप है। न उसमें मायाका मल है और न तो उसके द्वारा रची हुई विषमताएँ ही। वह सत् और असत् दोनोंसे परे है। किसी भी वैदिक या लौकिक शब्दकी वहाँतक पहुँच नहीं है। अनेक प्रकारके साधनोंसे सम्पन्न होनेवाले कर्मोका फल भी वहाँतक नहीं पहुँच सकता और तो क्या, स्वयं माया भी

---

१. यदित्यारभ्य निवर्तकं चेत्यर्थ इत्यन्तमुत्तरश्लोकान्तर्गतपदानां व्याख्यानम् । २. स्कंधः २, अ. ३ श्लोकः १० ।

उसके सामने नहीं जा पाती, लजाकर भाग खड़ी होती है ॥ ४७ ॥ ❀ परमपुरुष भगवान्‌का वही परमपद है। महात्मालोग उसीका शोकरहित अनन्त आनन्दस्वरूप ब्रह्मके रूपमें साक्षात्कार करते हैं। संयमशील पुरुष उसीमें अपने मनको समाहित करके स्थित हो जाते हैं। जैसे इन्द्र स्वयं मेघरूपसे विद्यमान होनेके कारण जलके लिये कुआँ खोदनेकी कुदाल नहीं रखते, वैसे ही भेद दूर करनेवाले ज्ञान-साधनोंको भी छोड़ देते हैं ॥ ४८ ॥ ❀ ❀ समस्त कर्मोंके फल भी भगवान् ही देते हैं। क्योंकि मनुष्य अपने स्वभावके अनुसार जो शुभ कर्म करता है, वह सब उन्हींकी प्रेरणासे होता है। इस शरीरमें रहनेवाले पञ्चभूतोंके अलग-अलग हो जानेपर जब यह शरीर नष्ट हो जाता है, तब भी इसमें रहनेवाला अजन्मा पुरुष आकाशके समान नष्ट नहीं होता ॥ ४९ ॥ ❀ ❀ बेटा नारद! सङ्कल्पसे विश्वकी रचना करनेवाले षडैश्वर्यसम्पन्न श्रीहरिका मैंने तुम्हारे सामने संक्षेपसे वर्णन किया। जो कुछ कार्य-कारण अथवा भाव-अभाव है, वह सब भगवान्‌से भिन्न नहीं है। फिर भी भगवान् तो इससे पृथक् भी हैं ही ॥ ५० ॥

**इदं भागवतं नाम यन्मे भगवतोदितम्। संग्रहोऽयं विभूतीनां त्वमेतद्[1] विपुलीकुरु ॥५१॥**
**यथा हरौ भगवति नृणां भक्तिर्भविष्यति। सर्वात्मन्यखिलाधारे इति सङ्कल्प्य वर्णय[2] ॥५२॥**
**मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः। शृण्वतः श्रद्धया नित्यं माययाऽऽत्मा न मुह्यति ॥५३॥**

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कन्धे ब्रह्मनारदसंवादे सप्तमोऽध्यायः ॥७॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

अयं च विभूतीनां संग्रह उदितः ॥ ५१ ॥ ❀ ❀ यथा वर्णितेन नृणां भक्तिर्भविष्यतीत्येवं संकल्प्य संचिंत्य तथा हरिलीलाप्राधान्येन श्रीभागवतं वर्णय न तु भक्तिरसविघातेन केवलं तत्त्वमित्यर्थः ॥ ५२ ॥ ❀ ❀ ननु लीला मायाश्रया किं तद्वर्णनेनेत्यत आह। मायामिति ॥ ५३ ॥

इति श्रीभा० म० द्वितीयस्कंधे टीकायां सप्तमोऽध्यायः ॥७॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

विभोरूतयो लीलास्तासां संग्रहः "को वेत्ति भूमन्भगवन्परात्मन्योगेश्वरोतीर्भवतस्त्रिलोक्याम्" इत्यत्रोतिशब्दो लीलावाचको दृश्यते कोशेपि "लीलावासनयोरूतिस्तंतुवापनकर्मणि" इति। संक्षेपस्तु "द्रव्यं कर्म च कालश्च" इत्यारभ्य "आद्योवतारः पुरुषः परस्येति, सर्गे तपोहमृषय इति, यत्रोद्यतः क्षितितलोद्धरणाय" इत्यादिरूपो बोध्यः। विपुलीकुरु व्यासायोपदिश्य विस्तारयेत्यर्थः ॥ ५१ ॥ ❀ ❀ इत्यर्थ इति यत्केवलतत्त्वज्ञानफलं मोक्षस्तदपि भक्त्यैव भविष्यतीति भावः। "यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्। तत्सर्वं मत्प्रसादेन मद्भक्तो लभतेंऽजसा" इति भगवदुक्तेर्भक्तिं प्रधानीकृत्यैवान्यद्वक्तव्यं नान्यथेति तात्पर्यम् ॥ ५२ ॥ ❀ ❀ अत्राक्षिपति नन्विति। अमुष्य ईश्वरस्येत्यसंधिरस्य वेदरूपतां द्योतयति "छंदसि सर्वे विधयो विकल्पंते" इत्युक्तेः। चेतःसन्निहितत्वादमुष्येत्युक्तम्। मायया बंधकशक्त्या न मुह्यति बद्धो न भवतीत्यर्थः। स्ववर्णयितारं मायापि नापकुरुते स्वपालयितारमिव सिंहसर्पादिरिति भावः ॥ ५३ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कन्धे सप्तमोऽध्यायः ॥७॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

[ नृजन्मनीत्यादि ॥ अत्र श्लोकद्वयं बहुषु पुस्तकेषु नास्ति क्वचिदेवास्ति। तच्च वीरराघवेण व्याख्यातम्। भगवन्माहात्म्यप्रतिपादकत्वात् विरोधाभावाच्च व्याख्यायते—ननु त्रिवर्गो यथा भवेत् तथा वर्णयति किं नोच्यत इत्याशंक्याह नृजन्मनीति। मनुष्यजन्मनि कृतेन साधनकलापेन यदि भगवान् न तुष्येत तर्हि नश्वरैः धर्म्मादिभिः किं कार्य्यं किं प्रयोजनं सिध्यति न किमपीत्यर्थः ॥ ५२।१ ॥ ] ❀ ❀ [ धर्म्मस्य ह्यपवर्ग्यस्येति पूर्वोक्तरीत्या परम्परया भगवद्भक्तावुपयुज्यमानानामेव साफल्यं तदुपयोगरहितानान्तु वैफल्यमेवेति अन्वयव्यतिरेकेणाह कृष्णे इति। उत्तमश्लोके अविद्यानिवर्त्तकयशसि श्रीकृष्णे चेत् यदि च कृतैः स्वनुष्ठितैर्वर्णाश्रमाचारादिभिरनपायिनी अव्यभिचारिणी भक्तिर्न स्यात् तर्हि तैः किमन्यत् फलं स्यात् न किमपि। अन्यफलस्य नश्वरत्वात् तत् जातमप्यजातप्रायमेवेति भावः ॥ ५२।२ ॥ इति बालप्रबोधिनी। ] ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

---

१. प्रा. पा. तदेतद्। २. प्रा. पा. वर्ण्यताम्।

## श्रीमद्वीरराघवव्याख्या

स्वोक्तसंग्रहस्य प्रामाणिकत्वं कथयन् त्वमप्येतत्प्रवर्त्तयेत्याह इदमिति । भगवद्विभूतीनामयं संग्रह इति यदिदं भागवतं भगवद्विषयत्वाद्भगवता प्रोक्तत्वाद्भागवतनामकं मे मह्यं भगवतोदितं एतदिदं भागवतं त्वं विपुलीकुरु ॥ ५१ ॥ ❀ ❀ वैपुल्यप्रकारमाह यथेति । सर्वात्मनि सर्वान्तरात्मन्यत एव सर्वाधारे भगवति नृणां भक्तिर्यथा भविष्यति यादृशवर्णनेन तथा संकल्प्य वर्णयेत्यर्थः ॥ ५२ ॥ ❀ ❀ ननु त्रिवर्गो यथा भवेत्तथा वर्णयति किंनोच्यते आह नृजन्मनीति । मनुष्यजन्मनि कृतेन साधनकलापेन भगवान्न तुष्येत यदि तर्हि नश्वरैर्द्धर्मादिभिः किं कार्यं किं प्रयोजनं न किमपीत्यर्थः ॥ धर्मस्य ह्यापवर्गस्येति पूर्वोक्तरीत्या परस्परभगवद्भक्तावुपयुज्यमानानामेव साफल्यं केवलानां तु वैफल्यमन्वयव्यतिरेकाभ्यामाह कृष्ण इति । किं स्यादिति ग्रंथः पूर्वोत्तरार्द्धाभ्यां संबध्यते । अनपायिन्यव्यभिचारिणी समस्तदुरितनिवर्त्तक उत्तमः श्लोकः स्तवः यस्य तस्मिन्नुत्तमश्लोकेऽधोक्षजे भक्तिर्न चेद्वर्णाश्रमाचारादिभिः किं स्यान्न किमपीत्यर्थः ॥ भगवद्विभूतिवर्णनादीनां फलमाह मायामिति । अमुष्येश्वरस्य मायां प्रकृतिं जगत्सृष्ट्यादिप्रकार इत्यर्थः । वर्णयतः अनुमोदतः श्रद्धया नित्यं शृण्वतश्चात्मांतःकरणं मायया मायागुणस्तमआदिभिर्न मुह्यतीत्यर्थः ॥ ५३ ॥

**इति श्रीमद्भागवते द्वितीयस्कंधे वीरराघवकृतटीकायां सप्तमोऽध्यायः ॥ ७ ॥**

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

भगवद्विभूतिसंग्रहरूपमिदं भागवतं पुराणं नृलोके प्रवर्तनाय त्वया व्यासाय विज्ञापनीयमित्यभिप्रायवानाह इदमिति । सर्गादौ यद्भगवता मे ममोदितं तदिदं भागवतं नाम प्रकाश्योपदिशेति शेषः । कस्माद्भागवतमिति प्रकाश्यमिति तत्राह संग्रह इति । यत्रोद्यत इत्युक्तविभूतीनां सर्गे तु योऽहमित्याद्युक्तमायाविभूतीनां च संग्रहः क्रोडीकार इति हेतुगर्भः संक्षिप्योक्तमिति न श्रद्धेयमिति तत्राह तदेतदिति । तदेतन्नृलोके ज्ञानप्रदानायावतीर्णव्यासरूपनारायणाय विज्ञाप्य विपुलीकुरु एतदर्थं विस्ताररूपं भागवतं पुराणं कुर्विति विज्ञापयेत्यर्थः । नामप्रकाश्यसंभाव्यक्रोधापगमकुत्सने इति ॥ ५१ ॥ ❀ ❀ एतदेव विशदयति यथेति । यथासात्त्विकप्रकृतीनां नृणां सर्वात्मनि सर्वस्वामिनि अत एवाखिलाधारे भगवति सर्वोत्तमत्वज्ञानपूर्वकप्रेमलक्षणा भक्तिर्भविष्यति इत्येवं हेतुपूर्वकं संकल्प्य समर्थ्य समाधिभाषया सम्यक् कृत्वा शुकादिशिष्येभ्यो वर्णयेति विज्ञापयेत्यन्वयः ॥ ५२ ॥ ❀ ❀ इतोपि हरिभक्तजनकपुराणरचनमेव तवावतारप्रयोजनं नान्यदित्यभिप्रेत्याह नृजन्मनीति । भक्तिविषयोन्यस्तत्फलदोन्य इत्यत उक्तं अपवर्गेशेति । कृष्णे पूर्णबलप्राणात्मनि हरौ यद्यनपायिनी नित्या भक्तिर्न चेन्न जायते चेन्नृजन्मापुमान्यमनश्वरेयमादंतकान्नाशं गच्छति नृजन्मनि न तुष्येत अलं पुरुषार्थसाधनां बुद्धिं नाप्नुयात् । धर्मादिफलमस्तीत्यत्राह किं फलमिति । धर्मादेरनित्यस्वर्गादिफलं किं नैव फलमल्पफलत्वादित्यर्थः । तस्मात्कृष्णभक्तेरेव नृजन्मफलत्वात्तत्प्रतिपादकपुराणकरणे विज्ञापनं युक्तमिति भावः ॥ ५३ ॥ ❀ ❀ किं फलमित्युक्तं विवृणोति किं स्यादिति । किंस्यादित्याक्षेपः । तदुक्तं आक्षिप्यते किमित्येतद्यत्राल्पफलता भवेदिति प्रश्ने क्षेपे विकल्पे किमिति यादवः ॥ ५४ ॥ ❀ ❀ भागवतपुराणोक्तप्रकारेण भगवति भक्तिं कुर्वतः पुंसः पुत्रकलत्रादिलक्षणा माया संसारहेतुर्न स्यादत एतत्पुराणकरणं विज्ञापनीयमिति भावेनाह मायामिति । अमुष्येश्वरस्य जगत्स्रष्टृत्वादिलक्षणं मायामाहात्म्यं सद्गुरुमुखाच्छ्रुत्वा मननपूर्वकं सच्छिष्येभ्यो वर्णयतः तथा तां मायां श्रद्धयानुमोदतोऽनुमोदमानस्य तथाव्याख्यानाद्यशक्ततया शृण्वतो यावज्जीवं श्रवणैकपरायणस्य पुंस आत्मा मनोमायया बंधकशक्त्या न मुह्यति । अहंकारममकाराभ्यां न भ्रमतीत्यतः सर्वसज्जनपुरुषार्थकारणं भागवतकरणविज्ञापनमिति भावः । अमुष्येश्वरस्येति संध्यकरणे नास्य भागवतस्य वेदसाम्यं सूचयति यद्वा ईश्वरशब्देन शिवो नोच्यते तद्विलक्षणशीला लक्ष्मीस्तस्या ईश्वरो नारायण इति द्योतयति अत्र सवर्णदीर्घत्वमनुसंधेयमिति ॥ ५५ ॥

**इति श्रीभागवते द्वितीयस्कंधे वि० कृ० टीकायां सप्तमोध्यायः**

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

इदं चतुःश्लोकीरूपमित्यर्थः । अनेन तदप्युपदिष्टमिति गम्यते ॥ ५१ ॥ ❀ ❀ तद्भक्त्यर्थश्च स्वरूपशक्तिमयलीलावर्णनं श्रेष्ठम् । अजितरुचिरलीलाकृष्टसार इत्यादेः ॥ ५२ ॥ ❀ ❀ तदीयरुचिभाग्याभावे चित्तशोधनार्थं मायामयतद्वैभवं विराड्रूपमपि वर्णयेत्याह मायामिति । शुद्धभक्तिरुच्यभावे कर्मार्पणवदिति भावः ॥ ५३ ॥

**इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे सप्तमोऽध्यायः ॥ ७ ॥**

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

नन्विदमश्रुतचरमद्भुतं मतं ब्रूषे सत्यमिदं न केवलमहं ब्रुवे किन्तु मह्यं भगवता उदितं भागवतं नाम पुराणम् । न केवलमिदं शास्त्रत्वेनैव मन्तव्यं किन्तु विभूतीनां संग्रहः श्रीभगवद्गीतादिषु विभूतिशब्देनांशकलावताराणामप्युक्तेः साक्षाद् भगवानेवायं शास्त्रस्वरूपेण विराजतीत्यर्थः । अतस्त्वमेतद् विपुलीकुरु सर्वत्र विस्तारय तदेवास्य सेवेति भावः ॥ ५१ ॥ ❀ ❀

किन्त्वत्रान्तरे गुरोर्ममाग्रे त्वमेकं नियमं गृहाणेत्याह यथेति । नृणां कलिकाले जनिष्यमाणानामित्यर्थः । भवेदित्यनुक्त्वा भविष्यतीति निर्देशात् कलौ नष्टदृशामेव पुराणार्क इत्युक्तेश्च । हरौ प्रेम्णा मनो हरति संसारञ्च हरतीति प्रयोजनद्वयमुक्तम् । भगवतीति सुखाराध्यत्वम् । सर्वात्मनि सर्वस्वरूपे इति तद्भक्त्यैव सर्वार्चनसिद्धिः । अखिलाधारेति तद्भक्त्यैव सकामानामपि सर्वकामप्राप्तिः संकल्प्येति प्रथममद्यारभ्य भगवद्भक्तिमेव वर्णयिष्ये इति संकल्पवाक्यमुच्चार्यतामित्यर्थः ॥ ५२ ॥ ❀ ❀ ननु भक्तिश्च श्रवणकीर्तनादिलक्षणा । साच भगवन्नामलीलादिविषयिणी । लीला च लीलावताराणां कृष्णरामादीनां गोवर्धनोद्धारणाद्या चिदानन्दमय्येव । मायाशक्तिप्रधानस्य पुरुषावतारस्य पुरुषवीक्षितायाः प्रकृतेर्महान् महतोऽहंकार इत्येवं सृष्ट्यादिलीला मायासम्बन्धिनीति माया वर्णनीया न वेत्याकांक्षायामाह मायामिति । तत्र वर्णयत इति अनुमोदत इति शृण्वत इति कीर्तनस्मरणश्रवणभक्त्युपकरणत्वेन मायावर्णनमिति भक्तिरेव अतः श्रद्धयेति । सापि भगवतो मायाशक्तिः परमभक्तैव तत्सन्ततयो महत्तत्वादयोऽपि भक्ताः एवेति तृतीये तेषां स्तुतौ व्यक्तीभविष्यतीति शुद्धभक्तैरपि तथा बुद्ध्या माया महत्तत्वादयश्च श्रोतव्या एवेति तत्फलमाह । मायया आत्मा जीवो न मुह्यतीति । ( मायासम्बन्धिन्यपि लीला नैव मायिकी किन्तु मन्निकेतनन्तु निर्गुणम् इत्यादि भगवदुक्तेः ) ॥ ५३ ॥

**इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । द्वितीये सप्तमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ७ ॥**

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत् यस्मिन् विभूतीनां संग्रहः संक्षेपतो निर्देशः तदिदं भागवतं मे मह्यं भगवतोदितम् । एतत्त्वमपि विपुलीकुरु विस्तरतः प्रवर्तय ॥ ५१ ॥ ❀ ❀ विपुलीकरणप्रकारमाह यथेति । सर्वात्मनि सर्वस्य विश्वस्य अन्तर्यामिणि । अखिलस्याधारे भगवति हरौ यथा नृणां भक्तिर्भविष्यति इति संकल्प्य संचिन्त्य भागवतं वर्णय । ॥ ५२ ॥ ❀ ❀ भगवद्गुणस्वरूपादिबोधकं भागवतवर्णनफलं कैमुत्यन्यायेनाह मायामिति । अमुष्य भागवतविषयभूतस्यानन्तगुणशक्त्याद्याश्रयस्य भगवतः शक्तिभूतां सृष्ट्यादावुपयोगिनीं मायां प्रकृतिमपि वर्णयतः अनुमोदतश्च श्रद्धया नित्यं शृण्वतश्च । आत्मा मनः मायया न मुह्यति किमुतामुमेव वर्णयत आत्मा न मुह्यतीति वक्तव्यम् ॥ ५३ ॥

**इति श्रीमद्भागवतसिद्धान्तप्रदीपे द्वितीयस्कन्धीये सप्तमाध्यायार्थप्रकाशः ॥ ७ ।**

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं संक्षेपविस्तराभ्यां निरूप्य शास्त्रमुपसंहरति—**इदमिति** । यदिदं मया निरूपितं तद्भागवतम् । भगवता प्रोक्तं भगवत्फलकं भागवतं नाम । तत्र तृतीयार्थमाह—**यन्मे भगवतोदितमिति** । यन्मे मह्यं भगवता [1]उदितं स्वयमिति । अस्माद्धेतोः इदं भागवतं नाम । ननु भगवता हि स्वरूपं सर्वमेवोपवर्णितम् । तत्कथमेतावदेवेत्याशङ्क्याऽऽह—**संग्रहोऽयमिति** । अयं विभूतीनां सङ्ग्रहः सङ्कोचः सङ्क्षेपविस्तरौ[2] ह्यधिकारानुसारेण निरूप्येते । तत्र त्वमुत्तमोऽधिकारी । अतस्तुभ्यं सङ्क्षेपेण निरूपितम् । त्वं त्वन्येषामर्थ एतद्विपुलीकुरु विस्तरेण वर्णय ॥ ५१ ॥ ❀ ❀ विस्तारकथने हेतुः—**यथा हरौ भगवतीति** । माहात्म्यज्ञानपूर्वकसुदृढसर्वतोधिकस्नेहस्य भक्तित्वान्माहात्म्यज्ञानव्यतिरेकेण तस्या अनुदयान्माहात्म्यज्ञाने विस्तारकथनस्य हेतुत्वान्माहात्म्यज्ञापनेन भक्तिजननार्थं विस्तारो वक्तव्यः । किं बहुना । यथैव भक्तिर्भविष्यति तथैव वक्तव्यः । अनेनाऽधिकारानुसारेण पदार्था वक्तव्या इत्युक्तम् । ननु निरूपितेऽपि माहात्म्ये सम्बन्धाभा[3]वात्कथं भक्तिर्भविष्यति । **"आत्मनस्तु कामाय सर्वं प्रियं भवती"**ति श्रुतेरात्मैव परमप्रेमाश्रयः । अन्यत्र तु तदुपाधिकं प्रेम । तद्भगवति कथं निरुपाधिकं प्रेमेत्याशङ्क्याऽऽह—**सर्वात्मनीति** । अयं भगवान् सर्वेषामात्मा । यथा सर्वात्मत्वं तदुपपादितम् । एवमात्मत्वेन स्नेहविषयत्वं प्रतिपाद्य पुत्रादिसर्वविषयस्नेहप्रतिपादनार्थं भगवत्कृतमुपकारं दर्शयति—**अखिलाधार इति** । सर्वेषामाधारभूतो भगवान् सर्वप्रकारेण । अतस्तस्मिन्नुचितः स्नेह इति । यदा लोकेभ्यो भगवद्गुणा विस्तरेण वक्तव्यास्तदा फलान्तरं नोद्देश्यं किन्तु भगवद्भक्तिरेव सर्वेषां भवत्विति मनसि निश्चित्य गुणा वक्तव्या इत्याह—**इति सङ्कल्प्येति** । वर्णय । एकैकं पदार्थं बहुभिः प्रकारैः कथयेत्यर्थः ॥ ५२ ॥ ❀ ❀ ननु विस्तारकथने ते[4]षां भवति भक्तिः । मम किं स्यात्तत्राऽऽह—**मायां वर्णयत इति** । एषा हि भगवतो माया । सर्वसामर्थ्यानामेव वर्णनीयत्वात् । दशविधलीलानां भगवच्छक्तित्वात् । मायां वर्णयत आत्मा न मुह्यतीति सम्बन्धः । ननु मायावर्णनेऽन्तःकरणस्य [5]मोहो भवेन्न त्वमोह इति । तत्राऽऽह—**अमुष्य ईश्वरस्य मायामिति** । अन्येन वर्ण्यमानां वा अनुमोदतः। सम्यङ्निरूप्यत इति वस्तुतः शृण्वतोऽपि । यद्यपि मुख्यं फलं भक्तिस्तदभावे अन्तःकरणस्य मायया मोहस्तु सर्वथा न भवति तस्माल्लोकोपकारार्थं स्वार्थं च श्रवणादिकं कर्त्तव्यमिति सिद्धम् ॥ ५३ ॥

**इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां द्वितीयस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥**

---

१. उदितमितीति ख. । २. विस्तरौ अधिकारेति ग. । ३. सम्बन्धात्मभावात् क. घ. त्मभावाभावात्कथमिति ख. । ४ सर्वेषामिति ग. तेषां भक्तिर्भवतीति ख. ५ दोषो भवेदिति ग.

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

यथा हरावित्यत्र सम्बन्धात्मभावादिति सम्बन्धेनात्मीयतालक्षणेन य आत्मभावः स सम्बन्धात्मभावस्तस्मात् । तद्व्युत्पादयन्ति आत्मन इत्यादि । एतत्परिहर्तुं सिद्धान्तमाहुः अयमित्यादि । उपपादितमिति पुनश्च भूयाद्भगवत्यनन्ते १—१९—१६ इत्यत्र वाक्यान्वयाधिकरणे च व्युत्पादितमित्यर्थः ॥ ५२ ॥

इति श्रीद्वितीयस्कन्धसुबोधिनीप्रकाशे सप्तमाध्यायविवरणम् ।

### श्रीगिरिधरकृता बालप्रबोधिनी

स्वोक्तसंग्रहस्य प्रामाणिकत्वं कथयन् त्वमेतत्प्रवर्त्तयेत्याह—इदमिति । यत् यस्मान्मे मह्यं भगवतोदितं यस्माच्चायं भगवद्विभूतीनां सङ्ग्रहः भगवन्निरूपकं भगवत्प्रापकं च तस्मादिदं मदुक्तं भागवतं नामेत्यन्वयः । त्वमन्येषामर्थे एतद्विपुलीकुरु विस्तरेण वर्णयेत्यर्थः ॥ ५१ ॥ ❀ ❀ वैपुल्यप्रकारमेवाह—यथेति । तथा वर्णनेन नृणां भगवति भक्तिर्भविष्यति भवेत् इति तथा सङ्कल्प्य सञ्चिन्त्य विस्तरेण तल्लीलाप्राधान्येन भागवतं वर्णयेत्यन्वयः । ननु 'माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः 'स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा' इत्युक्तलक्षणा भक्तिर्भगवति कथं स्यात् ? "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति श्रुत्या सर्वतोऽधिकस्नेहस्यात्मन्येव प्रतिपादनादित्याशङ्क्याह—सर्वात्मनीति । भक्तदुःखनिवर्त्तकत्वेनापि तत्र भक्तिः सम्भवतीत्याशयेनाह—हराविति । सर्वोपकारकत्वेनापि तन्माहात्म्यश्रवणाद्भक्तिर्भवतीत्याशयेनाह—अखिलाधारे इति ॥ ५२ ॥ ❀ ❀ अत्र श्लोकद्वयं बहुषु पुस्तकेषु नास्ति क्वचिदेवास्ति तच्च वीरराघवेण व्याख्यातम्, भगवन्माहात्म्यप्रतिपादकत्वाद्विरोधाभावाच्च व्याख्यायते । ननु त्रिवर्गो यथा भवेत्तथा वर्णयेति किं नोच्यते इत्याशङ्क्याह—नृजन्मनीति । मनुष्यजन्मनि कृतेन साधनकलापेन यदि भगवान् न तुष्येत तर्हि नश्वरैर्धर्मादिभिः किं कार्यप्रयोजनं सिद्ध्यति ? न किमपीत्यर्थः ॥ ५३ ॥ ❀ ❀ 'धर्मस्य ह्यपवर्गस्य' इति पूर्वोक्तरीत्या परम्परया भगवद्भक्तावुपयुज्यमानानामेव साफल्यं तदुपयोगरहितानां तु वैफल्यमेवेत्यन्वयव्यतिरेकेणाह—कृष्णे इति । उत्तमश्लोके अविद्यानिवर्त्तकयशसि श्रीकृष्णे चेत् यदि च कृतैः स्वनुष्ठितैः वर्णाश्रमाचारादिभिः अनपायिनी अव्यभिचारिणी भक्तिर्न स्यात्तर्हि तैः किमन्यत्फलं स्यात् ? न किमपि । अन्यफलस्य नश्वरत्वात्तज्जातमप्यजातप्रायमेवेति भावः ॥ ५४ ॥ ❀ ❀ ननु लीलाया मायाप्रधानत्वात् तस्याश्च मोहकत्वेन कथं तद्वर्णयतो ममान्येषां च श्रोत्रादीनां भक्तिः स्यादित्याशङ्क्य मायानिवृत्त्या परमार्थस्फूर्त्या सा स्यादेवेत्याशयेनाह—मायामिति । अमुष्योक्तमाहात्म्यस्येश्वरस्य श्रद्धया नित्यं मायां लीलां वर्णयतः श्रृण्वतः श्रुत्वाऽनुमोदतश्च पुरुषस्यात्मान्तःकरणं मायया न मुह्यतीत्यन्वयः । योऽयं स्तौति स तत्कृपाविषयो भवतीति सर्वजनीनत्वात् । 'यद्येषोपरता देवी माया' इत्युक्तत्वाच्च श्रवणकीर्त्तनादिपरस्परमायानिवृत्तिनिश्चयादिति भावः ॥ ५५ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता च द्वितीयेऽत्र मननस्य निरूपणे । सप्तमो विवृतोऽध्यायः प्राकट्यविनिरूपकः ॥ ३ ॥

### हिन्दी अनुवाद

भगवान्‌ने मुझे जो उपदेश किया था, वह यही 'भागवत' है। इसमें भगवान्‌की विभूतियोंका संक्षित वर्णन है। तुम इसका विस्तार करो ॥ ५१ ॥ ❀ ❀ जिस प्रकार सबके आश्रय और सर्वस्वरूप भगवान् श्रीहरिमें लोगोंकी प्रेममयी भक्ति हो, ऐसा निश्चय करके इसका वर्णन करो ॥ ५२ ॥ ❀ ❀ जो पुरुष भगवान्‌की अचिन्त्य शक्ति मायाका वर्णन या दूसरेके द्वारा किये हुए वर्णनका अनुमोदन करते हैं अथवा श्रद्धाके साथ नित्य श्रवण करते हैं, उनका चित्त मायासे कभी मोहित नहीं होता ॥ ५३ ॥

सातवाँ अध्याय समाप्त

१. क-ख—पाठस्तु स्नेहभक्तिरित्युक्त इति ।

# अथाष्टमोऽध्यायः

## राजोवाच

ब्रह्मणा चोदितो ब्रह्मन् गुणाख्यानेऽगुणस्य च। यस्मै यस्मै यथा प्राह नारदो देवदर्शनः ॥१॥
एतद् वेदितुमिच्छामि तत्त्वं वेदविदां वर। हरेरद्भुतवीर्यस्य कथा लोकसुमङ्गलाः ॥२॥
कथयस्व महाभाग यथाहमखिलात्मनि। कृष्णे निवेश्य निःसङ्गं मनस्त्यक्ष्ये कलेवरम् ॥३॥
शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितम्। कालेन नातिदीर्घेण भगवान् विशते हृदि ॥४॥
प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहम्। धुनोति शमलं कृष्णः सलिलस्य यथा शरत् ॥५॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

अष्टमे देहसंबंधमाक्षिपन्नीशजीवयोः ॥ बहून्परीक्षिदापृच्छत्पुराणार्थान्बुभुत्सितान् ॥ १ ॥
त्वमेतद्विपुलीकुर्वित्युक्तं तदेव विपुलीकरणं पृच्छति ब्रह्मणेति त्रिभिः। अगुणस्य च गुणातीतस्यापि। देववद्दर्शनं यस्य सः ॥ १ ॥ २ ॥ ❀ ❀ निःसंगं मनः श्रीकृष्णे निवेश्येति स्वप्रयत्नो दर्शितः ॥ ३ ॥ ❀ ❀ सोऽपि श्रद्धया शृण्वतो नावश्यक इत्याह। शृण्वत इति। स्वप्रयत्नं विनापि भगवान् स्वयमेव हृदि विशति ॥ ४ ॥ ❀ ❀ भावसरोरुहं हृदयकमलं प्रविष्ट तद्गतं सर्वं मलं धुनोति। सलिलस्येति। द्रव्यान्तरव्यामिश्रणादिना कुंभस्थे जले शोधिते तदेव केवलं शुद्धयति न तु नदीतडागादिगतम्। स च मलः। कुंभस्यांतस्तिष्ठत्येव नतु सर्वथा विलीयते अत एव किंचिच्चलनेन पुनः क्षुभ्यति च एवं तपोदानादिप्रायश्चित्तं न सर्वथा सर्वेषां सर्वं पापं धुनोति किंतु सावशेषम्। तच्च कस्यचिदेव किञ्चिदेव हृदि प्रविष्टमात्रस्तु श्रीकृष्णः सर्वेषां सर्वं पापं निःशेषं हरतीत्यनेन दृष्टांतेनोक्तं सलिलस्य मलं यथा शरदिति ॥ ५ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

आक्षिपन्नीशस्य देहसंबंधः कथं कथं च जीवस्येत्यादिशंकां कुर्वन्। बुभुत्सितान् ज्ञातुमीप्सितान् (१) हे ब्रह्मन्निति साक्षाद्वेदरूप एव त्वमतो मत्संदेहमपाकर्तुं समर्थोसीति भावः। देवं सर्वत्र द्योतमानं भगवंतं दर्शयति निजसेविनां तत्त्वोपदेशेनेति देवदर्शनः। यद्वा देवस्य हरेर्दर्शनं साक्षात्कारो यस्य स तथा देवैस्तपआदिना द्योतमानैर्दृश्यत इति वा तथा अकारो वासुदेवः स एव देव उपास्यो येषां तेऽदेवा भगवद्भक्तास्तैर्दृश्यते इति वाऽकारप्रश्लेषेऽर्थः ॥ १ ॥ ❀ ❀ हेवेदविदां वर पैलादीनां मध्ये वरेति यत्तत्त्वं त्वया ज्ञायते तद्वेदविद्भिरपि ज्ञातुमशक्यमिति भावः। एतत्तत्त्वं नारदव्याससंवादोत्तरव्यासस्वांबुजोद्भूतश्रीभागवतमकरन्दपानमेव मन्मनश्चञ्चरीकाभिमतं तत्त्वं तदेव वेदितुं पातुमिच्छामीत्यर्थः। अतो हरेः कथाः कथयस्वेत्यग्रिमेणान्वयः। तत्र हेतुः अद्भुतं मनआल्हादकरं वीर्यं यस्य तस्य ॥ २ ॥ हे महाभागेति। भजनं भाग अस्य वासुदेवस्य भागो यस्य सोऽभागः महांश्चासावभागश्चेति महाभागस्तत्संबुद्धौ तथा "वैयासकिश्च भगवान् वासुदेवपरायणः" इत्युक्तेस्त्वं श्रीकृष्णभक्तत्वान्महाभागोसि त्वत्कृपयाहमपि चंदनतरुन्यायेन तथास्यामिति भावः ॥ ३ ॥ ४ ॥ ❀ ❀ कथारूपेण भगवानेव प्रविष्टः सन्भावसरोरुहं हृदयकमलं तत्रांतर्यामी सदा स्थितोप्युदासीन एव कर्णप्रविष्टः। कृष्णश्च जीवमामज्जयति स्वस्मिन्निति ध्वनितं भावो दास्यसख्यादिस्तद्रूपमेव कमलमिति वा शमलं कामक्रोधादि धुनोति ननु नात्यद्भुतमिदं यतो ज्ञानयोगादयोप्येतत्कर्तुं प्रभवन्त्यत आह सलिलस्येति। द्रव्यांतरमिश्रणादिना कुंभस्थे जले शोधिते तदेव केवलं शुध्यति न तु तडागादिगतं स च मलः कुंभस्यांतस्तिष्ठत्येव न तु सर्वथा विलीयतेऽत एव किंचिच्चलने क्षुभ्यति च एवमेव ज्ञानयोगतपआदयो न सर्वेषां किं तु कस्यचिदेव तस्यापि न सर्वथा किं तु किंचिदेव न तु सावशेषं कथंचिदेव हृदयमालिन्यं धुन्वंति तदुक्तं "यमादिभिर्योगपथैः कामलोभहतो मुहुः। मुकुंदसेवया यद्वत्तथाद्धात्मा न शाम्यति" इति हृदि प्रविष्टमात्रस्तु कृष्णः सर्वेषामपि सर्वमपि निःशेषमेवेति शरद्दृष्टांतः सर्वेषामेव सर्वमेव निःशेषमेव हरत्येवेत्यवधारणचतुष्टयमत्र बोध्यम् ॥ ५ ॥

---

१. प्रा. पा. योगे सुमङ्गलाः।

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

॥ १—७ ॥

## श्रीमद्वीरराघवव्याख्या

त्वमेतद्विपुलीकुर्वित्युक्तं विपुलकरणं राजा पृच्छति ब्रह्मणेति। हे ब्रह्मन् शुक देवदर्शनः परमात्मदर्शी नारदः ब्रह्मणा चतुर्मुखेनागुणस्य सत्वादिप्राकृतगुणरहितस्य भगवतः गुणाख्याने गुणानुकथने चोदितः प्रवर्तितः यस्मै यस्मै प्रआयेति शेषः। यद्वा पृच्छते इति यथा प्राह यादृशमित्यर्थः ॥ १ ॥ ॐ ॐ एतन्नारदेन विस्तरेण वर्णितं वेदितुमहमिच्छामीति तत्तस्माद्वे वेदविदां वर त्वमद्भुतवीर्यस्य हरेः लोकसुमंगलकराः कथाः कथयस्व ॥ २ ॥ ॐ ॐ हे महाभाग बुद्धिमत्सर्वांतरात्मनि कृष्णे निःसंगं मनो निवेश्य कलेवरं त्यक्ष्ये भगवत्कथाः शृण्वन् तमेवावसाने स्मरन् देहं त्यक्ष्याम्यतः कथयस्वेत्यर्थः ॥ ३ ॥ ॐ ॐ अल्पकाल-कथाश्रवणेन कथमवसाने स्मृतिः संपद्यते इत्यत आह शृण्वत इति। भगवान्स्वचेष्टितं नित्यं श्रद्धया शृण्वतो शृणुतः कथयतश्च पुंसः हृदयेनातिदीर्घेणाल्पेन कालेन विशति शृण्वतो गुणतश्च चित्तं तत्स्मरणप्रवणमेव भवतीत्यर्थः ॥ ४ ॥ ॐ ॐ भगवतो हृदय-प्रवेशफलमाह प्रविष्ट इति। कर्णरंध्रेण कथाश्रवणद्वारा स्वानां भक्तानां भावसरोरुहं हृदयकमलं प्रविष्टः श्रीकृष्ण हृदयगतशमलं रागादिरूपं मलं धुनोति निरस्यति यथा शरत्कालः सलिलस्य शमलं धुनोति तद्वदित्यर्थः ॥ ५ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

अस्मिन्नध्याये परीक्षित् भागवतपुराणप्रतिपाद्यं शुकं पृच्छति तत्र प्रथमं नारदेन विरिंचाज्ञापालनं कथमकारीति भावेन पृच्छति ब्रह्मणेति। अगुणस्य नित्यनिर्मुक्तसत्त्वादिगुणस्य सर्वत्र प्रधानस्येति वा गुणाख्यान इति तादर्थ्ये सप्तमी व्यासादन्यस्मै यस्मै ॥ १ ॥ ॐ ॐ नारदव्याससंवादानंतरं व्यासमुखविगलितभागवतोक्तहरिकथाप्रथनमेव मदभीष्टमितीदमेव तत्वं वेदितुमिच्छामीत्युक्तमिति भावेनाह हरेरिति ॥ २ ॥ ॐ ॐ यथा प्रथितश्रुतगुणोपसंहारपूर्वकं निःसंगं मनः कृष्णे निवेश्याहमिदं कलेवरं त्यक्ष्ये तथा प्रथयस्वेत्यन्वयः ॥ ३ ॥ ॐ ॐ श्रवणादिनेदं फलं स्यादित्याह शृण्वत इति ॥ ४ ॥ ॐ ॐ ततः किं तत्राह प्रविष्ट इति ॥ ५ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

ब्रह्मणेति सार्द्धकम्। अगुणस्य गुणाख्यान इति तद्गुणानां प्राकृतविलक्षणत्वं दर्शितम्। यस्मै यस्मै यथा प्राह इत्यस्यो-त्तराण्यग्रतः स्कन्धेषु श्रीनारदवक्तृप्रकरणे ज्ञेयानि ॥ १ ॥ ॐ ॐ हरेरिति सार्द्धकम्। हरेः कथायामपि विशेषं वाञ्छति यथाहमिति ॥ २ ॥ ॐ ॐ श्रवणस्य प्रभावमाह शृण्वत इति। तत् प्रभावादेव गृणतश्च ॥ ३ ॥ ॐ ॐ प्रवेशे सति तु मद्भक्तियुक्तो भुवनं पुनातीति न्यायेन तत् सम्बन्धपरम्परया जगदपि पुनाति स भगवानित्याह प्रविष्ट इति। स्वानां प्रवेशेन स्वीकृता-नाम्। अतएव भावविशेषधारिणो हृदयस्य तत् सुखदोपादेयस्थानत्वात् भावसरोरुहमित्युक्तम्। सलिलशरद्दृष्टान्तस्तु सर्व्वपावन-मात्रांशे ॥ ४ ॥ ५ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

राजा कृष्णकथौत्सुक्यमाविष्कृत्याष्टमे स्फुटन् ।
अपृच्छद्विविधानर्थान् श्रीशुकं संशयच्छिदम् ॥ ० ॥

अगुणस्य मायिकगुणरहितस्य। देवस्य कृष्णस्येव दर्शनं यस्य सः ॥ १ ॥ ॐ ॐ कृष्ण इति ममतास्पदानि राज्या-दीनि त्यक्तान्येव यदवशिष्टमहन्तास्पदं कलेवरमस्ति। तत्रापि निःसंगं मनः कृष्णे निवेशयेति। कृष्णस्मरणे स्वप्रयत्नो दर्शितः ॥ २ ॥ ॐ ॐ सोऽपि स्मरणप्रयत्नः श्रवणकीर्त्तनवतो भक्तस्य नावश्यक इत्याह शृण्वत इति। स्वप्रयत्नं विनापि भगवान् स्वयमेव हृदये प्रविशतीति श्रवणकीर्त्तनाधीनमेव स्मरणमिति ज्ञापितम् ॥ ३ ॥ ॐ ॐ प्रविष्ट इति कथारूपेण भगवानेव प्रविष्टः सन्। भावसरोरुहं हृदयकमलमिति तत्रान्तर्यामी सदा स्थितोऽप्युदासीन एव कर्णप्रविष्टः कृष्ण एव जीवं स्वस्मिन्नासञ्जयतीति ध्वनितम्। भावो दास्यसख्यादिस्तद्रूपमेव कमलमिति वा। शमलं कामक्रोधादि धुनोति। ननु नात्यद्भुतमिदं यतो ज्ञानयोगादयोऽप्येतत् कर्त्तुं प्रभवन्तीत्यत आह सलिलस्येति। द्रव्यान्तरव्यामिश्रणादिना कुम्भस्थे जले शोधिते तदेव केवलं शुध्यति न तु नदीतडागादि-गतम्। स च मलः कुम्भस्यान्तरलिप्यत्येव न तु सर्व्वथा विलीयते। अतएव किञ्चिच्चलने पुनः क्षुभ्यति च। एवमेव ज्ञानयोग-तप-आदयो न सर्वेषां, किन्तु कस्यचिदेव, तस्यापि न सर्वथा, किन्तु किञ्चिदेव, न तु सावशेषं, कथञ्चिदेव हृदयमालिन्यं धुन्वन्ति। यदुक्तम्—यमादिभिर्योगपथैः कामलोभहतो मुहुः। मुकुन्दसेवया यद्वत्तथाद्धात्मा न शाम्यति इति। हृदि प्रविष्टमात्रस्तु कृष्णः सर्व्वेषामपि सर्व्वमपि निःशेषमेवेति सद्दृष्टान्तः ॥ ४ ॥ ५ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अष्टमेऽध्याये राज्ञा बहवः प्रश्नाः कृतास्तत्र तावत्त्वमेतद्विपुलीकुर्विति पूर्वाध्यायांते नारदं प्रति ब्रह्मणोक्तं तदेव च विपुलीकरणं पृच्छति ब्रह्मणेति त्रिभिः। हे ब्रह्मन् शुक अगुणस्य प्राकृतगुणरहितस्य चात्स्वाभाविकगुणनिधेः गुणाख्याने तद्गुणप्रधानभागवतविपुलीकरणे ब्रह्मणा नोदितः प्रवर्त्तितः देवदर्शनः श्रीनारदः यस्मै यस्मै यथा प्राह एतद्वेदितुमिच्छामीति द्वितीयेनान्वयः॥ १॥ ❀ ❀ वेदविदां मध्ये वर श्रेष्ठ यथा अखिलात्मनि कृष्णे निःसंगं मनः निवेश्य कलेवरं त्यक्ष्ये तथा तत्ताः हरेः कथाः नारदप्रोक्ताः त्वं कथयस्वेति द्वयोरन्वयः॥ २॥ ३॥ ❀ ❀ कृष्णे निवेश्य निःसंगं मन इति स्वप्रयत्नो दर्शितः सोपि कृष्णविचेष्टितश्रवणादिपरस्य नावश्यक इत्याह शृण्वत इति। भगवान् स्वचेष्टितं नित्यं श्रद्धया शृण्वतः गृणतः कथयतश्च स्वभक्तस्य हृदि नातिदीर्घेण स्वल्पेनैव कालेन विशते॥ ४॥ ५॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं नि[1]र्द्धारभजनमुत्पत्त्या च विमर्शनम्। द्वयं सिद्धं विराड्ब्रह्मरूपयोस्तत्त्वनिश्चये॥ १॥
उपपत्त्याविमर्शस्तु त्रिभिरद्य निरूप्यते। आक्षेपसिद्धान्तफलैः सोपपत्तिस्त्रिधा यतः॥ २॥
अष्टमे सन्दिहानस्य प्रश्न आक्षेपगर्भितः। राज्ञो निरूप्यते प्रश्नास्तन्मूला अपरेऽपि च॥ ३॥

उक्तप्र[2]कारकस्थूलसूक्ष्मरूपाक्षेपे सर्वानुपपत्तिर्भविष्यतीत्याशङ्कां वक्तुं [3]कथायां प्रोत्साहयति षड्भिः—**ब्रह्मणा [4]चोदित इति**। [5]पूर्वाध्यायान्ते त्वमेतद्विपुलीकुर्वित्युक्तम्। तत्सङ्क्षेपश्रवणेनैव यदा महती भक्तिरुत्पद्यते तदा [6]विस्तरे किं भविष्यतीति परमादरेण पृच्छति—**ब्रह्मन्निति** सर्वज्ञत्वाय सम्बोधनम्। ब्रह्मणा प्रेरितो नारदो भगवद्गुणकथनार्थं यस्मै यस्मै यथा प्राह [7]तत्कथयेत्यग्रेण सम्बन्धः। अगुणस्य च गुणाख्याने। सूक्ष्मरूपं त्वगुणम्। चकारात्स्थूलरूपं च। तस्य गुणानामुत्कर्षबोधकधर्माणामाख्याने कथने कथनार्थं ब्रह्मणा नोदितः[8]। नानाधिकारेण वर्णनीयत्वाद्यस्मै यस्मै यथा प्राहेत्युक्तम्। अन्यथा कस्मै प्राहेत्येव ब्रूयात्। तस्य तथा कथने सामर्थ्यमाह—**देवदर्शन इति**॥ १॥ ❀ ❀ नन्वनेन भवतः कोपयोगस्तत्राऽऽह—**एतद्वेतुमिच्छामीति**। इदं हि तत्त्वं कीदृशे अधिकारे कीदृशं वक्तव्यमिति। ज्ञातव्यं चैतत्स्वाधिकारार्थं परबोधनार्थं च। नन्वेतन्मया कथं [9]ज्ञातव्यं, मया तु स्वाधिकारेण ज्ञातव्यमित्याशङ्क्याऽऽह—**वेदविदां वरेति**। वेदे हि स्वाधिकारेणाऽन्याधिकारेण च पदार्था निरूप्यन्ते। ते च सर्वे ब्राह्मणैर्ज्ञायन्ते। वसन्तादयः कालाः। यथष्यधानमंत्राः। अश्वमेधादयः क्रतवः। पुनःस्तोमादयश्च नैमित्तिकाः। तथैतदपि शास्त्रं सर्वाधिकारेण प्रवृत्तं तत्तदधिका[10]रभेदेन पदार्थान्निरूपयति। वेदानुसारेण च तत्तदधिकारानुसारेण व्यवस्था। तत्सर्वं वेदविद्भिर्ज्ञायत इति सम्बोधनम्। एवं पूर्वोक्तार्थसम्ब[11]न्धिप्रश्नमुक्त्वा स्वाभिप्रेतं प्रश्नान्तरमाह—**हरेरद्भुतवीर्यस्येति** सार्द्धेन। हरेः कथाः कथयस्व। आत्मनेपदेन स्वार्थ[12]मपि तद्भविष्यतीति ज्ञापितम्। ननु सर्वदुःखहर्त्तुर्भगवतः कथाः सर्वपुराणप्रसिद्धास्तत्किमद्य विशेषकथनेनेत्याशङ्क्याऽऽह—**अद्भुतवीर्यस्येति**। न हि भगवच्चरित्रं सुगमम्। अन्यथा[13]करोत्यन्यथा च सम्पद्यते। तस्मात्स्वरूपतः पर्यवसानतश्च नानारूपत्वाद्भगवद्गुणा विविच्य ज्ञातव्याः। किञ्च। भगवत्कथा लोकसुमङ्गलाः। किञ्चिद्वस्तु पुरुषमात्रं सुमङ्गलं भवति यथा रक्षाबन्धनं अलङ्कारा वा। किञ्चिद्गृहमङ्गलं यथा गृहालङ्काराः। किञ्चिद्वंशस्य यथा पुत्रजन्म। किञ्चिद्ग्रामदेशानां यथा रक्षा वृष्ट्यादिर्वा। कथास्तु सर्वलोकसुमङ्गलाः। प्राणिनां भुवनानां च[14] परमकल्याणं कुर्वन्ति। **महाभागेति** सम्बोधनम्। तवैवैतादृशार्थकथनेऽधिकारो नत्वन्यस्य। अन्ये तु भगवता तुच्छफलेऽधिकृतास्त्वं तु महाफल इति सम्बोधनम्। पूर्वं यथाधिकारेण वक्तव्यमित्युक्तत्वान्ममैतादृशोऽधिकारोऽस्ति तत्र यदुचितं तद्वक्तव्यमित्यभिप्रायेण स्वाधिकारमवस्थाभिप्रेतयुक्तं निरूपयति—**यथाऽहमखिलात्मनीति**। मम मनोरथ एतावान्। यदैहिकामुष्मिकसर्वविषयेभ्यो मन आकृष्य एकत्र भगवत्येव निवेश्य पश्चात्प्राणांस्त्यजामीति। एतस्मिञ्जन्मन्येतावत्कर्त्तव्यम्। एवं कृते यद्भविष्यति तदग्रे निरूपयिष्यति। नन्वेतत्सुलभं नाऽत्र शास्त्रमपेक्ष्यते। दृष्ट एव कृष्णो मनश्च महतां स्वाधीनमतः कृष्णे निवेश्यतां किं विलम्बेनेत्याशङ्क्याऽऽह—**अखिलात्मनीति**। कृष्णोऽस्माभिर्ज्ञातोऽप्यज्ञातोऽस्ति। परिच्छिन्नो वा ज्ञातः। स हि सर्वात्मना सर्वात्मत्वेन ज्ञातव्यः। तत्तु न पूर्वं वृत्तम्। "तं यथायथोपासते"। इति श्रुतावुपासनानुसारेण फलस्योक्तत्वात्सर्वं फलं तदैव भवति यदि स[15]र्वात्मत्वेनैवोपास्यते। अन्यथा त्वकृत्स्नो भवेत्। तद्वैता[16]न्भूत्वाऽवती" ति च सर्वतो रक्षा च सिद्ध्यति। न केवलं साधारणं

---

१. निर्द्धार्यं भजनं ख.। २. प्रकारस्य ग.। ३. कथयेति क. घ.। ४. नोदित इति मूलव्याख्ययोः ग.। ५. एवं पूर्वेति ग.। ६. विस्तारेणेति ग.। ७. तथा कथयेति ग.। ८. चोदित इति ख.। ९. ज्ञातव्यमित्याशङ्क्येति ग.। १०. दधिकारेणेति ग.। ११. प्रश्नसम्बन्धमिति ग.। १२. मपि भविष्यतीति ग.। १३. तत्करोतीति ग.। १४. च कल्याणमिति ग.। १५. सर्वत्वेनेति घ.। १६. तद्वैतानिति ख.।

मनो भगवति निवेशनीयम् । तथा सत्यशुद्धमन[1]सः अशुद्धमेव फलं भवेत् । तस्माद्यथा मनो निःसङ्गं भवति । यथा वाऽसम्भावना विपरीतभावनाव्युदासेन सर्वात्मकत्वं हृदये स्फुरति तथोपायो वक्तव्य इत्यर्थः ॥ २ ॥ ३ ॥ ❀ ❀ मनसो निवेशने अग्रिमं कार्यं स्वयमेव स्येत्स्यतीत्याह—शृण्वतः श्रद्धयेति । यदा यस्मिन् यस्य मनो भवति कामात्प्रेरणया वा त[2]दा तं शृणोति कीर्त्तयति च । श्रद्धा च तत्रोत्पद्यते । अतः श्रवणादिनिर्वाहकं मनोनिवेशनम् । श्रद्धा हि श्रवणकीर्त्तनयोरङ्गम् । दीर्घकालादरनैरन्तर्येण क्रियमाणस्यैव श्रवणादेः फलसाधकत्वात् । तदा दीर्घकालो नैरन्तर्यं च नित्यपदेनोच्येते । गृणतश्चेति चकारात्स्मरणादिकमपि सङ्गृहीतम् । [3]धर्मिव्यतिरेकेण धर्माणां प्रवेशाभावात्स्वगुणैः सह भगवान् शीघ्रमेव प्रविशति हृदयमिति । स्वानां यतोऽयं भगवान् । भगवतैव शास्त्रस्याऽस्य कृतत्वात् ॥ ४ ॥ ❀ ❀ ततः किमत आह—प्रविष्ट इति । कीर्त्तनेऽपि श्रवणस्य विद्यमानत्वात् मुखस्य गुणनिर्ग[4]मनहेतुत्वात्कर्णरन्ध्रेणेत्युक्तम् । रन्ध्रशब्दः प्रवेशहेत्वर्थः । एकवचनम[5]तिसावधानश्रवणार्थम् । यतो लोके सावधानश्रवणे एकैव कर्णशष्कुली व्याप्रियते तदेन्द्रियमेकमुखमेव भवति । स्वानामिति कृतात्मनिवेदिनाम् । न केवलं हृदयमात्रे प्रविशति । किन्तु भावसरोरुहे । भावो रीतिरिति केचित् । धातुसामान्यार्थः सत्तारूपो भगवानित्यपरे । कारणरूपस्त्वविनाशीभावः । स नि[6]रन्तरश्रवणेन हृदयरूपो जात इति । स चेत्पुनर्भक्त्या विकाशं प्राप्तः सरोवररूपो भवति । साधनरूपभक्तिः श्रवणसम्पुटिता यदि तस्मिन् बीजतामापद्यते । प्रेम्णा च हृदयं पूरितमेव तिष्ठति तदा बीजवृद्धौ श्रवणादिना कमलं भवति । तदेव हि भगवदासनं गृहं च भगवतः । तदा तत्र प्रविष्टो भगवान् शमलं सर्वमेव धुनोति । यद्यपि पाप[7]क्षयः सर्वोऽपि पूर्वमेव जातस्तथापि शमलं तिष्ठति । शं अलं यस्मादिति शमलम् । ऐहिकामुष्मिकफलानि शंशब्देनोच्यन्ते शमादयश्च । केवलपुण्येन च भोगाभावात्तत्र नान्तरीयकपापसहितमेव पुण्यं भोगसाधनमिति तस्मिन् मूलभूते पापे विद्यमाने वैराग्यं कदापि न भवतीति तदा तद्भगवान् दूरीकरोति । ननु शमादिसाधकस्याऽपि गतत्वात् ज्ञानाभावे कथमग्रिमकार्यसिद्धिरिति । तत्राऽऽह—कृष्ण इति । सदानन्दरूपो भगवान् स्वयमेव पुरुषार्थरूपो न ज्ञानादिसाधनमपेक्षत इत्यर्थः । अत्र दृष्टान्तेन स्पष्टयति—सलिलस्य यथा शरदिति । सरःशब्देन यत्सलिलं तदत्रोच्यते । यथा शरदित्येव दृष्टान्तः । यथा लौकिकं जलं शरदा निर्मलं क्रियते न तु वर्षासु कथमपि निर्मलं भवति । तथा प्रेमरूपं यज्जलं तदपि भगवता निर्मलं भवतीत्यर्थः ॥ ५ ॥

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः**

अष्टमाध्यायं विवरिषवः पूर्वप्रकरणसमाप्तत्वात् तत्सिद्धं फलं पूर्वमनुवदन्ति एवमित्यादि, निर्द्धारभजनमिति निर्द्धारपूर्वकं भजनम्, तथा च, द्वयोर्निर्णये ब्रह्मोक्तिमुखेन श्रीशुकैः कृते क्रमेण द्वयं राज्ञः सिद्धमित्यर्थः । तर्हि द्वितीयविमर्शस्य किं प्रयोजनमित्याकाङ्क्षायां तद्वदन्तोऽध्यायार्थमप्याहुः उपपत्त्येत्यादिद्वाभ्याम् । तथा च, यतोत्र शृण्वत इत्यादि (२-८-४+५+६) त्रयेण भजनकर्त्तव्यतानूद्यतेऽग्रे चाक्षेपरूपा उपपत्तिः पूर्वं दृश्यते, तेन ज्ञायते राज्ञ एकस्यैव निश्चयः सम्पन्नो न द्वितीयस्येति तदर्थं द्वितीयप्रकरणमित्यर्थः । फलस्योपपत्तित्वं तात्पर्यनिर्णायकत्वाज्ज्ञेयम् । अध्यायानां सङ्गतिस्तु स्पष्टैव । प्रकरणसङ्गतिस्त्वेककार्यत्वरूपा पूर्वमुक्तैव । व्याख्यानसङ्गतिमाहुः उक्तेत्यादि ।

ब्रह्मणेत्यत्र परमादरेण पृच्छतीति । अत्र यस्मै यस्मै यथा प्राहेति वीप्सा आदरपारम्यबोधिका ज्ञेया । तस्येति स्थूलरूपसहितस्य सूक्ष्मरूपस्य । अन्यथेति आदरश्रवणेप्साबोधकप्रश्नमात्रेणैव सिद्धेः ॥ १ ॥ ❀ ❀ हरेरित्यत्र । अनेन कथमधिकारसूचनामित्यपेक्षायामाहुः अन्ये त्वित्यादि । इति सम्बोधनमिति । एतदभिज्ञापकं सम्बोधनमित्यर्थः । सर्वतो रक्षा चेति । मण्डलब्राह्मणे 'तमेतमग्निरित्यध्वर्यव उपासते यजुरित्येष हीदं सर्वं युनक्तीत्युपक्रम्य' 'तं यथा यथोपासते तदेव भवति तद्धै तान् भूत्वावति तस्मादेनमेवंवित्सर्वैरेवैतैरुपासीत, सर्वं हि तद्भवति सर्वं हैनमेतद्भूत्वावतीति श्रुतौ भगवतः सर्वरूपत्वस्य सर्वरूपतयोपासने सर्वरूपतां प्रकटीकारेण रक्षणस्य च श्रावणेनाखिलात्मत्वज्ञाने सर्वतो रक्षा च सिद्ध्यतीत्यर्थः ॥ २ ॥ ❀ ❀ शृण्वत इत्यत्र । ननु भगवच्चेष्टितश्रवणादिकं कुर्वतस्तदेव हृदि विशतीति भगवान् विशत इति कथमुक्तमित्याशङ्कायां स्वचेष्टितहृद्भगवत्पदसूचितं हेतुत्रयमाहुः धर्मीत्यादि । हृदयमिति हृद्यं हृदयमिति हि श्रौती निरुक्तिः । तथा च, गुणानामविनाभूतत्वात्तत्प्रवेशनार्थं विशतीत्येको हेतुः, दहरत्वाद्विशतीत्यपरः । स्वीकृतजनपुरुषार्थसाधकत्वाद्विशतीत्यन्य इत्येवं ते ज्ञेयाः । नन्वयं भगवत्स्वभाव इति कथं निश्चेयमित्याकाङ्क्षायामाहुः भगवतैवेत्यादि । अयञ्च हेतुः पूर्वाध्याये 'इदं भागवतं नामे'ति २-५-७१ श्लोकेनोक्तत्वात् प्रकरणसिद्धो ज्ञेयः ॥ ४ ॥ ❀ ❀ प्रविष्ट इत्यत्र कीर्त्तनेपीत्यादि । पूर्वं श्रवणादित्रयस्य भजनसहितानां चतुर्णां वा उक्तत्वेपि मुखस्य निर्गमनद्वारत्वेनान्येषामद्वारत्वेनोक्तहेतुभ्यां श्रवणस्यैव द्वारत्वमवशिष्यत इति तथेत्यर्थः । को भावः ? किं सरः ? किं सरोरुहम् ? यद्भगवदधिकरणत्वेनाभिप्रेयते इत्याकाङ्क्षायां तद्व्युत्पादयन्ति भाव इत्यादि । सिद्धान्तपक्षमाहुः कारणरूप इत्यादि । अध्यायद्वयोक्तरीत्या कारणरूपः अविनाशी अक्षराख्यद्वितीयपुरुषः भावशब्दवाच्य इत्यर्थः । पूर्वोक्तपक्षद्वयेऽस्वरसोऽग्रे स्फुटी-

१. मनसा अशुद्धमिति क. ख. । २. तत्रेति ग. । ३. धर्मव्यतिरेकेणेति ख घ. । ४. निर्गमने हेतुत्वादिति क. घ. ५. मपीति ख. । ६. स्वनिरन्तरेति क. घ. । ७. पापक्षयः पूर्वमेवेति ग. । ८. सिद्ध्यतीति ख. ।

भविष्यति। कुतो नाद्रियत इत्याकाङ्क्षायामाहुः स्वेत्यादि। स्वविषयकशाब्दज्ञानधारणयाऽयोगोलकवह्निन्यायेन हृदयरूपः स एव जात इति। तथा च, हृदये पूर्वोक्तरूपद्वयात्मकत्वस्य श्रवणपूर्वकालेपि सत्त्वेन तस्य कमलरूपककथने प्रयोजनाभावादत्र च तत्कथनात्तन्नाद्रियत इत्यर्थः। रूपकबीजं व्युत्पादयन्ति स चेत्यादि। स द्वितीयपुरुष एव यदि पुनः श्रवणादिजन्यस्नेहेन मनन-निदिध्यासनाभ्यां सर्वत्र स्वस्फूर्तिरूपं विकाशमधिकारिण्याविर्भावयति, तदा विसारित्वात्सरोवररूपो भवति, तस्य कमलभाव-प्रकारमाहुः साधनेत्यादि। साधनभक्तिर्मननस्मरणादिसहकृतप्रेमरूपा, पुनः श्रवणे कृते तन्मध्यवर्त्तित्वात्तत्सम्पुटिता सती यदि तस्मिन् अक्षरात्मके हृदये व्यसनरूपतां प्राप्नोति तदाऽवान्तरव्यापाररूपं सर्वभावात्मकं यत्प्रेम जलस्थानापन्नं तेन हृदयस्य पूरि-तत्वात् व्यसनोत्कर्ष्ये सूक्ष्मश्रवणादिना हृदि समागते भगवति तत्प्रेम आल्हादकं सत् कमलं भवति, इत्येवमवस्थापरम्परायाः बोधनं रूपकबीजमित्यर्थः। तेन सिद्धमाहुः तदेवेत्यादि। तथा चात्र परब्रह्मवाचककृष्णपदोक्त्यापि 'तद्धाम परमं ममे'त्युक्तमक्षर-मेवाभिप्रेतमिति ज्ञायते। 'दहरं विपापं परमेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थं तत्रापि दहरं गगनं विशोकं तस्मिन् यदन्तस्तदुपा-सितव्यमि'ति तैत्तिरीये दहरपुण्डरीकरूपहृदयमध्यवर्त्तिदहरस्य विशोकत्वश्रावणेन रत्याख्यभावरूपताया गगनत्वश्रावणेन परम-व्योमात्मकाक्षररूपतायाश्च स्फुटीकरणपूर्वकमुपास्याधिष्ठानत्वस्य श्रावितत्वात् केवलभावादौ च तदभावादिति। शुद्धसत्त्वस्य परमत्वाभावेन तस्य पूर्णाधिष्ठानत्वस्यायोगाच्चेति द्वयमपि पक्षद्वयानादरबीजं सिद्ध्यतीति च बोध्यम्। ननु 'श्रुतोनुपठितो ध्यात आदृतो वानुमोदितः। सद्यः पुनाति सद्धर्मो देव विश्वद्रुहोपि ही'ति 'जन्मान्तरसहस्रेष्वि'-त्यादिभिश्च वाक्यैर्भगवद्धर्मश्रवणाद् भक्त्युद्भवाच्च सर्वेषामेव पापानां निवृत्तत्वाद् भगवता किं वा पापं दूरीकार्यमित्यत आहुः यद्यपीत्यादि। नन्वत्र पापसम्बधिनो-नुक्तत्वादधिकरणस्य चापहतपाप्मत्वात्किमत्र सलिलस्थानापन्नं दार्ष्टान्तिकमित्यपेक्षायामाहुः सर इत्यादि। तथा च, सलिल एको द्रष्टाऽद्वितीयो भवतीत्यत्रैकरूपेपि सलिलपदश्रावणादिहापि सरःशब्दबोधितम् एकरूपं प्रेमैव सलिलपदेन रूपकातिशयोक्त्योच्यत इति तदेव दार्ष्टान्तिकमित्यर्थः॥ ५॥

### श्रीगिरिधरकृता बालप्रबोधिनी

ब्रह्मनारदसंवादं माहात्म्यं शृण्वतो हरेः॥ परीक्षितोऽष्टमे राज्ञः संशयो विनिरूप्यते॥ १॥

'त्वमेतद्विपुलीकुरु' इत्युक्तं तत्र यस्य सङ्क्षेपतश्चरितश्रवणेन परमानन्दो भवति तस्य विस्तरेण तच्छ्रवणे किं भविष्यतीत्यौत्सुक्येन तद्विपुलीकरणं पृच्छति—ब्रह्मणेति त्रिभिः। शुकस्य सर्वज्ञत्वं सूचयन् सम्बोधयति—हे ब्रह्मन्निति। अगुणस्य प्राकृत-गुणाधीनत्वरहितस्य-चकारात्स्वतन्त्रस्य-भगवतो गुणानामुत्कर्षबोधकभक्तवात्सल्यादिधर्माणां तदनुसारिलीलानां चाख्याने वर्णने ब्रह्मणा चोदितः प्रेरितो नारदो यस्मै यस्मै पृच्छकाय यथोत्तममध्यमाधमाधिकारभेदेन यथा यथा प्राह तदेतदहं वेदितुमिच्छामि त्वं च तद्वेद जानास्यतः कथयस्वेति त्रयाणामन्वयः। नारदस्यापि तथाकथने सामर्थ्यमस्तीत्यत्र हेतुमाह—देवदर्शन इति। देवस्य भगवतो दर्शनं ज्ञानं यस्य स तथा, यद्वा देवस्य दर्शनं कृपादृष्टिर्यस्मिन् स तथा॥ १॥ ❀ ❀ सर्वज्ञत्वमेव सूचयन् पुनः सम्बोधयति—हे विदां ज्ञानिनां मध्ये वर श्रेष्ठेति। श्रवणौत्सुक्ये हेतुमाह—हरेरिति। किञ्चिद्वस्तु तत्तत्पुरुषमात्रस्य मङ्गलं भवति यथा रक्षाबन्धनादि, किञ्चिद्वंशमङ्गलं यथा पुत्रजन्म, किञ्चिद्ग्रामदेशादिमङ्गलं यथा वृष्ट्यादि, हरेः कथास्तु सर्वेषां लोकानां प्राणिनां भुवनानां च सुमङ्गलाः परमकल्याणहेतुभूताः। तत्र हेतुमाह—अद्भुतवीर्यस्य अचिन्त्यपराक्रमस्य कथा अपि तथाभूता इति भावः॥ २॥ ❀ ❀ एवं भगवत्कथाश्रवणेन तव किं फलमभिप्रेतमित्यपेक्षायामाह—कथयस्वेति। यथाधिकारकथने भगवत्कृपया तवैवाधिकारोऽस्ति अतो मदधिकारानुरूपमेव वक्तव्यमिति सूचयन्सम्बोधयति—हे महाभागेति। यथाऽहं कृष्णे मनो निवेश्य कलेवरं त्यक्ष्ये त्यक्ष्यामि तथा कथयस्व कथयेत्यन्वयः। ननु रागादिदोषाकरस्य मनसः कथं स्थिरता सम्भवति तत्राह—निस्सङ्गमिति, गृहपुत्रदारादिष्वासक्तिरहितमित्यर्थः। ननु तथापि "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति वाक्यानुसारेण स्वस्मिन् प्रियत्वस्य सत्त्वात्कथं कृष्णे मनोनिवेशः सम्भवतीत्याशङ्क्याह—अखिलात्मनीति॥ ३॥ ❀ ❀ ननु कृष्णे मनो-निवेशनं नाम निरन्तरं तच्चिन्तनमेव, तच्चाल्पकालतत्कथाश्रवणमात्रेण कथं स्यादित्याशङ्क्याह—शृण्वत इति। स्वचेष्टितं श्रद्धया नित्यं निरन्तरं शृण्वतो गृणतो वर्णयतश्च पुरुषस्य हृदि नातिदीर्घेण स्वल्पेनैव कालेन भगवान् विशते इत्यन्वयः॥ ४॥ ❀ ❀ तत्प्रवेशफलमाह—प्रविष्ट इति। कथाश्रवणद्वारा कर्णरन्ध्रेण स्वानां भक्तानां भावसरोरुहं हृदयकमलं प्रविष्टः कृष्णस्तत्रत्यं शमलं पापं तन्मूलकं कामक्रोधलोभादिकं च धुनोति निरस्यतीत्यन्वयः। ननु नात्यद्भुतमिदं यतस्तपोदानादिप्रायश्चित्तैरप्येतत्कर्तुं शक्य-मित्याशङ्क्य दृष्टान्तमाह—सलिलस्येति। यथा द्रव्यान्तरव्यामिश्रणादिना कुम्भस्थं जलं शुद्ध्यति परन्तु तन्मलः[1] कुम्भस्यान्तरेऽ-वतिष्ठति न तु[2] सर्वथा विलीयते अतः किञ्चिच्चलनेन पुनः क्षुभ्यति च, एवं तपोदानादिप्रायश्चित्तमपि न सर्वं पापं निरस्यति किन्तु सावशेषमेव, पुनश्च सोंऽशः उद्बुद्ध्यते च, हृदि प्रविष्टमात्रस्तु श्रीकृष्णः सर्वं पापं निश्शेषमेव निरस्यति। यथा सलिलस्य निश्शेषं

---

१. स जलान्तर्गतो मलः। २. ननु नदीतडागादिगतं जलं ) इति श्रीधरस्वामिनः।

मलं शरद्धरति तथेत्यर्थः । अत्र यथा महाभूतरूपोऽग्निः काष्ठादिसर्वपदार्थेषु यद्यप्यस्ति तथापि न तान् दहति, यदि तु बाह्यतः काष्ठादिरूढ एव प्रविशति तदा दहत्येव, तथा यद्यपि भगवानन्तर्यामिरूपेण सर्वस्यैव हृदये तिष्ठति तथापि न तन्मलं निरस्यति, यदा तु श्रवणादिद्वारान्तः प्रविशति तदैव तन्मलं[1] निरस्यतीत्यपि दृष्टान्तः सूचितो बोध्यः ॥ ५ ॥

## हिन्दी अनुवाद

### राजा परीक्षित्के विविध प्रश्न

**राजा परीक्षितने कहा**—भगवन् ! आप वेदवेत्ताओंमें श्रेष्ठ हैं । मैं आपसे यह जानना चाहता हूँ कि जब ब्रह्माजीने निर्गुण भगवान्के गुणोंका वर्णन करनेके लिये नारदजीको आदेश दिया, तब उन्होंने किन-किनको किस रूपमें उपदेश किया ? एक तो अचिन्त्य शक्तियोंके आश्रय भगवान्की कथाएँ ही लोगोंका परम मङ्गल करनेवाली हैं, दूसरे देवर्षि नारदका सबको भगवद्दर्शन करानेका स्वभाव है । अवश्य ही आप उनकी बातें मुझे सुनाइये ॥ १ ॥ २ ॥ ❀ ❀ महाभाग्यवान् शुकदेवजी ! आप मुझे ऐसा उपदेश कीजिये कि मैं अपने आसक्तिरहित मनको सर्वात्मा भगवान् श्रीकृष्णमें तन्मय करके अपना शरीर छोड़ सकूँ ॥ ३ ॥ ❀ ❀ जो लोग उनकी लीलाओंका श्रद्धाके साथ नित्य श्रवण और कथन करते हैं, उनके हृदयमें थोड़े ही समयमें भगवान् प्रकट हो जाते हैं ॥ ४ ॥ ❀ ❀ श्रीकृष्ण कानके छिद्रोंके द्वारा अपने भक्तोंके भावमय हृदयकमलपर जाकर बैठ जाते हैं और जैसे शरद् ऋतु जलका गँदलापन मिटा देती है, वैसे ही वे भक्तोंके मनोमलका नाश कर देते हैं ॥ ५ ॥

**धौतात्मा पुरुषः कृष्णपादमूलं न मुञ्चति । मुक्तः सर्वपरिक्लेशः[2] पान्थः स्वशरणं यथा ॥ ६ ॥**
**यदधातुमतो ब्रह्मन् देहारम्भोऽस्य धातुभिः । यदृच्छया हेतुना वा भवन्तो जानते यथा ॥ ७ ॥**
**आसीद् यदुदरात् पद्मं लोकसंस्थानलक्षणम् । यावानयं वै पुरुष इयत्तावयवैः पृथक् ।**
**तावानसाविति प्रोक्तः संस्थावयववानिव ॥ ८ ॥**
**अजः सृजति भूतानि भूतात्मा यदनुग्रहात् । ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः ॥ ९ ॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

ततश्च कृतार्थो भवतीत्याह । धौतात्मा निष्पापः मुक्ताः सर्वे रागद्वेषादयः परिक्लेशा येन । पांथः प्रवासादागतः स्वशरणं गृहं यथा न मुंचति तद्वत् ॥ ६ ॥ ❀ ❀ तदेवं श्रवणौत्सुक्यमाविष्कृत्य संदिग्धानर्थान् पृच्छति । अधातुमतः धातवो महाभूतानि तत्संबंधशून्यस्यास्य लौकिकस्यात्मनो जीवस्य धातुभिर्देहारंभ इति यदेतत् किं यदृच्छया निर्निमित्तं हेतुना वा कर्मादिना भवंतो यथावज्जानते अतः कथयंत्विति शेषः ॥ ७ ॥ ❀ ❀ यश्चासावीश्वरः सोऽप्येतत्तुल्यदेहवान् प्रोक्तः अतस्तस्य को विशेष इत्याशयेन पृच्छति आसीदिति सार्धेन । लोकानां संस्थानं रचना तदेव लक्षणं स्वरूपं यस्य तत्त्रैलोक्यात्मकं पद्मं यस्योदरादासीत् । असावीश्वर इयत्तायुक्तैः स्वपरिमितैरवयवैरयं लौकिकः पुरुषो यावान् यत्संख्याकावयवयुक्तस्तावान्संस्थावान्प्रोक्तः अवयववानिव च प्रोक्तः अतः को विशेषस्तस्येति ॥ ८ ॥ ❀ ❀ अवश्यं च विशेषो वाच्य इत्याह । अजो ब्रह्मा भूतानां व्यष्ट्युपाधीनामात्मा नियंता समष्ट्युपाधित्वात् येन च अनुगृह्णता तस्य रूपं ददृशे दृष्टवान् । एतच्च "तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः । सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः ॥" इत्यादिनोक्तमनूद्यते । अग्रे तु स्पष्टं भविष्यति ॥ ९ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

ननु तस्यापि कियद्दिनानंतरं धनाद्युपार्जनाय गृहाद्गतं दृष्टमेव तत्राह मुक्तत्यक्तः सर्वधनाद्युपार्जनलक्षणः क्लेशो येन स तथा ततश्च श्रीकृष्णस्य हृदि प्रवेशाच्च "शरणं गृहरक्षित्रोः" इत्यमरः ॥ ६ ॥ ❀ ❀ दधति धारयंति सर्वमिति धातवः दधातेरौणादिकस्तु प्रत्ययः ॥ ७ ॥ ❀ ❀ अतो जीवतुल्यदेहवत्त्वात् तस्येशस्य ॥ ८ ॥ ❀ ❀ येन भगवताऽनुग्रहं कुर्वता तस्यैव भगवतः एतच्च भगवद्रूपदर्शनवृत्तं च अनूद्यतेऽनुवादः क्रियतेऽग्रे नवमाध्याये ॥ ९, १० ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

अज इति । अत्राजशब्दो ब्रह्मणि रूढः मेदिनीकोषप्रमाणात् अस्मदादिवत् प्रकृतिपुरुषसंयोगेन जन्माभावात् यौगिको वेति ॥ तस्यापीति एतत्स्कन्धीयपञ्चमाध्यायस्य सप्तदशश्लोकः ॥ ९ ॥

---

१. तं हृदयान्तर्गतं मलम् । २. प्रा० पा०—मुक्तः सर्वपरिक्लेशैः ।

### श्रीमद्वीरराघवव्याख्या

ततश्च कृतार्थो भवतीत्याह धौतात्मेति । धौतात्मा शुद्धमनाः पुरुषः कृष्णस्य पादमूलं न मुंचति तदेव स्मरतीति भावः । कथंभूतो न मुञ्चति मुक्तसर्वपरिक्लेशः मुक्ता सर्वे रागद्वेषादयः परिक्लेशा येन स यथा पांथः प्रवासादागतः स्वशरणं स्वगृहं न मुंचति यथेत्यर्थः ॥ ६ ॥ ❀ ❀ एवं श्रवणौत्सुक्यमाविष्कृत्याज्ञातानर्थान् प्रष्टव्यान् क्रमेण वक्ष्यमाणास्तावत्संदिग्धानर्थान्पृच्छति यदिति । हे ब्रह्मन्नधातुमतः स्वरूपतो भौतिकदोषहीनस्य अस्य जीवस्य देहारंभश्च धातुभिरेव स्यादिति तु ज्ञातमित्यर्थः । इदंतु संशयविषयमित्याह स च देहारंभः किंयदृच्छयाऽहेतुकः हेतुना वा सहेतुको वेत्यर्थः । एतद्भवंतो यथावज्जानतेऽतः कथयत्विति शेषः ॥ ७ ॥ ❀ ❀ योसावीश्वरः सोपि जीवदेहतुल्यदेहवान्प्रोक्तः अतस्तस्य को विशेषः यतस्तद्भजनात्पदे पदे मोक्ष इत्युच्यते । इत्याशयेन पृच्छति आसीदिति । सार्द्धेन लोकानां संस्थानं विन्यासो यस्मिंस्तत्र देवलक्षणं स्वरूपं यस्य तज्जगदाकारपद्ममित्यर्थः त्रिलोक्यात्मकं पद्मं यस्योदरादासीत्पृथग्विभक्तैः इयत्तावयवैरयं पुरुषः लौकिकः पुरुषः यावान्यावत्प्रमाणस्तावत्परिमाण एवासावीश्वरः प्रोक्तः स्यात्परिच्छिन्नत्वे न प्रोक्त इति भावः । स्वसंस्थावयवानिव तज्जलानीतिवदयं निर्देशः स्वसंस्थानभूतैरवयवैरनजीवन् संसारी परिच्छिन्नस्तद्वदित्यर्थः । अतो जीवपरयोर्विशेषः कथनीय इत्यर्थः ॥ ८।९ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

तत्फलमाह धौतात्मेति । पांथः पथिकः स्वशरणं स्वगृहं शरणं गृहरक्षित्रोरित्यभिधानम् ॥ ६ ॥ ❀ ❀ इत्थं भागवतार्थकथनश्रवणादेः पुरुषार्थहेतुत्वमुक्त्वा स्वतश्चिद्रूपस्य देहस्य देहसंबंधहेतुं पृच्छति यदिति । अधातुमतः स्वतः प्रकृत्यादिधातुसंबंधरहितस्य नित्यस्य जीवस्यास्य धातुभिः प्रकृत्यादिभिरुपादानकारणैः देहारंभोऽस्तीति यत्तत्किं यदृच्छया केवलेश्वरेच्छया निमित्तभूतयोतान्येन हेतुना कर्मणात्र हरीच्छैव हेतुस्तां विना हेत्वंतरमप्यस्तीति प्रश्नतात्पर्यं भवंतस्तदेतद्यथायथावज्जानते तदस्माकं वदंत्विति शेषः । धातुभिर्नित्ययोगो नास्तीत्यधातुमत इत्युक्तं धातुर्वातादिशब्दादिगैरिकादित्वगादिषु महाभूतेष्विंद्रियेषु शब्दयोनिस्वभावयोरित्यभिधानम् ॥ ७ ॥ ❀ ❀ पुराणाधिकारिलब्धये जीवानां बंधहेतुं पृष्ट्वा श्रुतार्थमनुवदति आसीदिति । आदौ महाप्रलये श्रीसहायतया शयानस्य तस्य नारायणस्य सिसृक्षुः परमपुरुषतयावतीर्य तत्त्वसृष्टिपूर्वकमंडं सृष्ट्वा तैस्तत्वैः सहांडोदं प्रविश्यांडोऽदेपि शेषपर्यंके शयानस्य तस्योदराल्लकसंस्थालक्षणं चतुर्दशभुवनसन्निवेशरूपं पद्ममासीत् स एवांडांतर्वैराजाख्योऽवतीर्ण इति यावत् । अयं पुरुषोंडकोशः पुरुषाकारभगवद्रूपेण अधिष्ठितत्वात्पुरुष इत्युच्यते पातालादिभिरियत्तावयवैरियत्तावच्छिन्नावयवैर्यावान् यावत्परिमाणः असावपि वैराजो विष्णवाख्यस्तावांस्तावत्परिमाण इति प्रोक्तस्तथावयववानिव तदंतस्थितत्वात्तद्भिन्नत्वेपि तथा तादृशावयववानिव इत्यन्वयः । वा इत्यनेन प्रोक्तार्थस्य प्रमाणप्रसिद्धिं अयमाध्यात्मिकः शिरःपाण्यादिमानस्मदादिदेहः पृथगियत्तावयवैर्यावत्परिमाणोऽसावधिदैविको विराट्देहोपि तावत्परिमाण इत्यपव्याख्यानस्य पापहेतुत्वं च सूचयति । समुच्चये चैव पापे वाक्यारंभप्रसिद्धयोरिति ॥ ८,९ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

धौतात्मेति । तत्सम्बन्धेन शुद्धान्तःकरणोऽन्योऽपीत्यर्थः । एवं न कर्म्मज्ञानादिवत् स्वकार्य्यसिद्धौ तत्त्यागः, किन्तु स्वतः परमसुखदत्वमपि तस्येत्युक्तम् ॥ ६ ॥ ❀ ❀ तदेवं तत्कथाश्रवणौत्सुक्यं स्वनिष्ठां चाविष्कृत्य अन्यानप्यर्थान् अनेन भगवत्प्रधानतया प्रोच्यमानान् अन्येषां तदुपयोगितया तद्बोधसौकर्य्याय स्यादिति पृच्छति यदित्यादिभिः । अत्र श्रीभगवद्विग्रहधाम्नोर्नित्यत्वादिज्ञापनाय प्रश्नार्थं दृष्टान्तयन् जीवविग्रहमपि पृच्छति यदिति ॥ ७ ॥ ❀ ❀ आसीदिति सार्द्धकम् । अत्रेशजीवदेहयोः कारणकार्य्यात्मत्वं दर्शितमेव तस्मात् तदंशे तु न प्रश्नः किन्तु स्वरूपांश एवेति विवेचनीयम् ॥ ८ ॥ ❀ ❀ येनानुगृह्णता हेतुना ददृशे ददर्श । अतस्तद्दर्शने यदनुग्रहमात्रस्य हेतुत्वाद् वैलक्षण्यमस्त्येवेति भावः ॥ ९ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

धौतात्मा शुद्धचित्तः । धौतात्मत्वे लिङ्गमाह कृष्णेति । अतएव तत्रापि चित्तबडिशं शनकैर्वियुज्यत इति कपिलदेवोक्तेः कृष्णपादमूलत्यागी योगी धौतात्मम्मान्येव न तु धौतात्मेति ज्ञेयम् । पान्थः प्रवासादागत्य स्वशरणं स्वगृहं यथा न मुञ्चति । ननु तस्यापि कियद्दिवसानन्तरं धनाद्युपार्ज्जनार्थं स्वगृहात् प्रवासगमनं दृश्यते इत्यतो विशिनष्टि मुक्तस्त्यक्तः सर्व्वो धनाद्युपार्ज्जनलक्षणः क्लेशो येन सः ॥ ६ ॥ ❀ ❀ एवं स्वाभिमतायाः शुद्धायाः भक्तेः प्रथमाङ्गभूते कृष्णकथाश्रवणे औत्सुक्यमाविष्कृत्य निर्गुणायाः सगुणायाश्च भक्तेर्यावत्स्वार्थेषु व्याप्तिः सम्भवति तावतोऽप्यर्थानत्तद्भक्त्यधिकारिणा जिज्ञासितार्थसिद्ध्यर्थं पृच्छति यदधातुमत इत्यादिना यावदध्यायसमाप्ति । एवञ्च यत्र यत्र भक्तेर्गन्धोऽपि सम्भवति तत्र तत्र निरपराधतयैव स्थातव्यमन्यथा श्रीमत्या भक्तिदेव्या अप्रसाद इति प्रसाध्य भक्तेरभ्युदयार्थं शुद्धभक्तेरपि स्वाभिमतमधुरश्रवणकीर्त्तनादिषु लब्धनिष्ठैरपि तानि तानि भक्तेरुदाहरणानि प्रत्युदाहरणानि च जिज्ञासनीयानीत्यभिव्यञ्जयति च । अधातुमतो धातवो भूतानि

तत्सम्बन्धशून्यस्यास्य जीवस्य धातुभिर्देहारम्भ इति यत् एतद्यथा निर्निमित्तमेव केनापि हेतुना वा भवन्तो यथा जानते तथा कथयन्त्विति त्वत्तोऽन्ये (तत्त्वतोऽन्ये) एतन्न जानन्तीति ते कथं मया प्रष्टव्या इति भावः॥ ७॥ ❀ ❀ किञ्च यश्चासावीश्वरः सोऽप्येतत्तुल्यदेहवान् प्रोक्तः अतस्तस्य को विशेष इत्याशयेन पृच्छति आसीदिति सार्द्धेन। लोकानां संस्थानं रचना तदेदं लक्षणं स्वरूपं यस्य एतत् पद्मं यस्योदरादासीत्। इयत्तायुक्तैः स्वपरिमितैरवयवैरयं लौकिकः पुरुषो यावान् यादृशावयवयुक्तस्ततः पृथगपि असावीश्वरः तावानयं प्रोक्तः। संस्था यथोचितस्थौल्यकार्श्यदैर्ध्यादिविन्यासविशेषः अवयवास्तद्वन्तः करचरणादयः तद्वानिवेति। यद्यपीश्वरस्य करचरणादयो जीवस्यैव स्वतो भिन्ना न भवन्ति तद्वानिव चोक्तः अतः कोऽपि शेषस्तस्येति भावः॥ ८॥ ❀ ❀ अवश्यञ्च विशेषो (अवयवविशेषो) वाच्य इत्याह। अजो ब्रह्मा भूतानां व्यष्ट्युपाधीनाम् आत्मा नियन्ता समष्ट्युपाधित्वात्। सोऽपि नाभिपद्मसमुद्भवः सन् यदनुग्रहात् भूतानि सृजतीत्यन्वयः। ननु स निराकार एव वाच्यो यतः अजेन तद्रूपं ददृशे। स च अजोऽपि यन्नाभिपद्मोद्भवः। अतः स ब्रह्मणोऽपीश्वरो मायिकपुरुषतुल्याकारः किं मायिकाकारो न वेत्त्येतदपि वाच्यमिति भावः॥ ९॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

हृदि प्रविश्य किं करोतीत्यपेक्षायामाह प्रविष्ट इति। श्रीकृष्णः कर्णरंध्रेण स्वचेष्टितश्रवणद्वारा स्वानां भावसरोरुहं हृदयकमलं प्रविष्टः शमलं बंधहेतुभूतरागादिरूपं मलं धुनोति सलिलस्य यथा शरदिति दृष्टांतः। शरद्व्यतिरिक्तानां जलमलनाशकानामोषधीनामिव कृष्णसंबंधहीनानां तपोव्रतदानध्यानानां मलनाशकाभासत्वं सूचयति॥ ६॥ ❀ ❀ श्रीकृष्णनिर्मूलितशमलस्य श्रीकृष्णभक्तस्य कृतार्थतामाह धौतात्मेति। धौतात्मा श्रीकृष्णशोधितमनाः श्रीकृष्णपादमूलं ध्येयं न मुंचति मुक्ताः सर्वे रागद्वेषादयः परिक्लेशाः येन सः पांथः प्रवासादागतः यथा स्वशरणं गृहं न मुंचति तथा॥ ७॥ ❀ ❀ एवं श्रवणौत्सुक्यमाविष्कृत्य संदिग्धानर्थान्पृच्छति यदित्यादिना। देहे स्वधातुविगमेऽनुविशीर्यमाणे व्योमेव तत्र पुरुषो न विशीर्यतेजा इत्यत्र अधातुमतः धातवो भूतानि तद्विलक्षणस्याजस्य जीवात्मनः यत् यः धातुभिर्देहारंभः सूचितः सः किं यदृच्छया निर्हेतुकतया हेतुना वास्ति एतद्भवंतः यथावज्जानंति अतः कथयंत्विति शेषः॥ ८॥ ❀ ❀ यदप्युक्तं सश्रेयसामपि विभुरिति। भगवतोभुक्तिमुक्तिप्रदत्वं तदपि बद्धजीवदेहसदृशदेहवतो दुर्घटमिवाभातीत्याशयेन पृच्छति आसीदिति सार्द्धेन। यस्योदरात् लोकानां संस्थानं विन्यासो यत्र तत्पद्ममासीत् असौ परमात्मा पृथक् इयत्ता युक्तैः स्वपरिमितैरवयवैरयं लौकिकः पुरुषो यावान् यत्संख्याकावयववान् तावान्प्रोक्तः। इतिशब्दः हेतुवाचकः अतो हेतोः सोपि संस्थावयववान् इव लौकिकपुरुष इव अतो जीवात्परमेश्वरस्य वैलक्षण्ये विस्तरतः कथनीयमिति भावः॥ ९॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

[1]यदाऽन्तःकरणं सर्वदोषरहितं भवति तदा नीरोगः पुरुषः कृष्णपादमूलं न मुञ्चति। न हि कश्चिन्नीरोगः सदानन्दं त्यजति। तस्य ग्राहक आत्मैव नीरोगः। यथा बुभुक्षाऽन्नस्य। अत एव भगवानन्तः करण[2]स्य आत्मेत्येव नाम धृतवान्। अतः स तदेकग्राहकः दोषवशादन्यान् गृह्णाति। यथा चक्षुः। तदा भक्तिमार्गानुसारेणैव मनः पदार्थान् गृह्णातीति कृष्णपाद[3]मूलेति पदम्। मूलपदेन चाऽयं सर्वोऽपि विलासस्तन्मूलक इति ज्ञापयति। ततो व्यापिवैकुण्ठे श्रीकृष्णचरणारविन्दे तद्रसामृततृप्तः सुखेन तिष्ठतीति फलितम्। परावृत्तिशङ्का तु नास्ति [4]मुक्तपरिक्लेशत्वात्। अविद्यादिवशादेवाऽहर्ब्रह्मलोकं गता अपि निवर्त्तन्ते। परिशब्देन तत्रापि क्लेशशङ्का निवारिता। सर्वपदेन स्वाभीष्ट[5]सिद्ध्या नान्तरीयकोऽपि क्लेशो निवारितः। पन्थाः केवलमार्गदर्शी। शरणं गृहम्। स्वशब्देन पराधीनक्लेशो निवारितः भगवदधीनत्वेन क्लेश इति शङ्का दृष्टान्तेन निवार्यते॥ ६॥ ❀ ❀ एवं स्वार्थं मनोनिवेशनोपायं पृष्ट्वा सन्दिग्धान्साधारणानन्यान्पृच्छत्यसम्भावनादि[6]व्युदासार्थम्—यदधातुमत इत्यादिभिः। अत्र पूर्वं पदार्थत्रयं निरूपितम्। भगवतो रूपद्वयं फलार्थं जीवश्च। तत्र जीवे एकः प्रश्नः। सूक्ष्मे भगवति निःसन्दिग्धं पदार्थानां निरूपितत्वात् विशेषतो बुद्ध्यगोचरत्वाच्च शङ्कैव नोदेति। [7]स्थूले रूपे तु सर्वे प्रश्नास्तद्याथात्म्यज्ञापकाः। तस्मात्प्रश्नद्वयम्। अत एवोत्तरे अध्यायद्वयमेव। तत्र जीवे सन्देहात्पृच्छति—यदधातुमत इति। अयं जीवो वस्तुतोऽधातुमान् धातुसम्बन्धरहितः। धातवः पूर्वदेहसम्पादका निरूपिताः। तैः सहाऽस्य नाऽदृष्टद्वारकः सम्बन्धः। प्रथमसृष्टौ तदभावात्। अनादित्वे भगवच्छास्त्रविरोधात्। किञ्च।[8]असङ्गश्रुत्या नाऽयं वस्तुतः सम्बध्यते। भगवदिच्छापक्षे हिताकरणादिदोषा[9]। तस्मात्केनाऽप्युपायेन धातुसम्बन्धनिरूपणस्याऽशक्यत्वात्प्रश्नः। ब्रह्मन्निति सम्बोधनं तदुपादानोच्छेदकपरिज्ञानार्थम्। अस्य जीवस्य देहारम्भः। यदृच्छया भगवदिच्छया। अकस्मा[त्]पक्षेण वा। हेतुना वा अनाद्यविद्यादिना वा। अत्र निर्णयो वक्तव्य इत्यर्थः। परमार्थे बहुवादिविप्रतिपत्ति-

---

१. तदेति ग. घ. । २. करण आत्मन्येव ख. । ३. मूलेतीति पदमिति ग.। ४. मुक्तसर्वपरिक्लेशत्वात् ख. ग.। ५. स्वाभीष्टसर्वसिद्ध्या ख.। ६. मर्नाव्युदा१ार्थ ग.। ७. स्थूलरूपे त्विति ग.। ८. दोष इति ख। ९. पक्षे नवेति ख.।

त्वाद्भवन्तो यथा जानते तथा वक्तव्यमित्यर्थः ॥ ७ ॥ ❀ ❀ जीवस्य देहसम्बन्धः कथमिति प्रश्नार्थः। ईश्वरस्याऽपि देहसम्बन्धः किमर्थ इति । इच्छया देहग्रहणं तु सम्भवति । परं किमर्थमितीमं प्रयोजनप्रश्नं वक्तुं देहसम्बन्धस्थिरीकरणे कार्यहेतुकमनुमानं प्रमाणत्वेन निरूपयति—**आसीद्यदुदरात्पद्ममिति** । प्रतिष्ठामात्रत्वं त्वस्य नाऽस्तीत्याह । लोकानां संस्थानमेव लक्षणं चिह्नं यस्य । लोकस्थित्यर्थमेव पद्मोत्पत्तिः । अनेन लोकस्थितिलक्षणस्य कार्यस्य विद्यमानत्वात्तदाधारपद्मकारणत्वेन शरीरसिद्धिः । न च तत्साकारमेव ब्रह्म केवलमाविर्भूतमिति मन्तव्यमिति शङ्कां वारयति—**यावानयं वै पुरुष इति** । अयं प्राकृतः पुरुषो यावान् करचरणाद्यवयवैः यावत्परिमाणवान् तावानसावपि । यदि तस्याऽऽविर्भावस्तदा अस्याऽपि सङ्घातस्य तथात्वे सति तस्य तिरोभावे फलानुपप[1]त्तिस्तदवस्था । इयत्ता एतावत्त्वं हस्तद्वयं पादद्वयमित्यादि । पृथक् देहात् अन्योन्यं ब्रह्मणो वा । तथा भगवतोऽपि देहः तावान् तावत्प्रमाणकस्त्वया निरूपितः । ननु सहस्रोर्वङ्घ्रिबाह्वक्षोऽयं निरूपितः कथं प्राकृतवद्भविष्यति । तत्राऽऽह—**इवेति** । यद्यपि बाह्वादीनां सहस्रं निरूपितं तथापि बाहुत्वान्नातिरिच्यत इति प्राकृततुल्यता । किञ्च । नाऽयं देहरूपः किन्तु देहाद्व्यतिरिक्तः । ब्रह्मणः प्रसादहेतुत्वात् । तदाह—अजो ब्रह्मा । यदनुग्रहः यस्याऽनुग्रहयुक्तः । अनुग्रहादेव भूतात्मत्वम् । व्यष्टीनामात्मा । भूतानि व्यष्टिरूपाणि सृजति ॥ ८ ॥ ९ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

**धौतात्मेत्यत्र** । तदान्तःकरणमित्यादिकं **धौतात्मेति** श्लोकस्याभास इति ज्ञेयम् । **तदा भक्तिमार्गानुसारेणेत्यादि** । एतेन शुष्कज्ञानिनामक्षरस्य चरणत्वं न भासते । तत एव 'श्रेयःश्रुतिं भक्तिमि' त्यादीनि वाक्यानीति बोधितम् । **तन्मूलक** इति एतादृशाक्षरज्ञानमूलक इत्यर्थः ॥ ६ ॥ ❀ ❀ **यदधातुमत इत्यत्र अकस्मात्पञ्चेनेति** हेतुं विनैव वा, स्वस्माद्वा, स्वस्वभावाद्वा, अलीकाद्वेति चतुर्ष्वन्यतमेन । एवञ्च, यदृच्छापदेन पक्षपञ्चकसङ्ग्रहः **हेतुनेत्यनेनानाद्यविद्यापक्षः**, इति प्रश्नहेतुभूतसंशयः षट्कोटिको बोध्यः ॥ ७ ॥ ❀ ❀ **आसीदित्यत्र अनेनेत्यादि** । तथा च, भूरादिलोकस्थितिः आधाराधीना, रूपादिमत्स्थितित्वाद्, घटादिस्थितिवदिति अनुमानेन सिद्ध आधारे तस्य पद्मत्वं तत्पुष्करपर्णेऽप्रथयदित्यादिरूपाच्छब्दात्सिद्ध्यति । ततश्च पूर्वोक्तानुमानात्साध्यतावच्छेदकतया तस्याप्याधारसिद्धौ स आधारः को वेति विशेषजिज्ञासायां 'यदास्य नाभ्यान्नलिनादि' त्यादिवाक्यात्तादृशपद्माधारशरीरसिद्धिः । ततश्चेश्वरः शरीरी, लोकपद्मजनकत्वात्, यन्नैवं तन्नैवमाकाशवदित्याद्यनुमानादपि शरीरसिद्धिरित्यर्थः । **यावानित्यत्र तावानित्यादि** । तथा च, जीवतुल्य इत्यर्थः । किन्तेनेत्यत आहुः **यदीत्यादि** । तथा च, जीवतुल्यावयवकत्वे यदि तस्य भगवद्वदाविर्भावशालितया नित्यत्वं तदा जीवस्य दुःखादिफलानुपपत्तिः, सङ्घातस्यानित्यत्वनियमेन यदि तस्यैतत्तुल्यतिरोभावशालित्वं तदा तच्छ्रवणादिनाऽभयात्मकफलानुपपत्तिरित्ययं दोष इत्यर्थः । मूलं योजयन्ति **इयत्तेत्यादि** । इयत्ता च अवयवाश्चेति द्वन्द्वः । आर्षत्वादेकवद्भावाभावः, **यद्यपीत्यादि**, तथा चावयवसङ्ख्यामात्रं भिद्यते, तत्तु सहस्रार्जुनादिवदनैकान्तिकं, तदाकृतिस्तु न भिद्यते इति तथेत्यर्थः ॥ ८ ॥ ❀ ❀ **अज इत्यत्र** । नन्वाकृतिमात्रमप्रयोजकम्, घुणाक्षरादौ व्यभिचारात् । अवयवसङ्ख्याबाहुल्यं त्वेकैकत्रानैकान्तिकं सदपि सार्वत्रिकं नेतरत्रेति न तथा, अतो न जीवतुल्यतेत्यत आहुः **किञ्चेत्यादि** । तथा च, प्रसादश्चेतनधर्मश्चेतनस्तु देहाद्व्यतिरिक्त इति देहे साकारब्रह्मता न वक्तुं शक्या, प्रसादहेतुदेहव्यतिरिक्तश्चेतनत्वादस्मदादिवद् इत्यनुमानेन देहरूपत्वे निरस्ते तद्व्यतिरिक्तस्य जीवतुल्यताया अनिवार्यत्वादिति । प्रसादे परिचायकमाहुः **अनुग्रहादेवेत्यादि** । एवमस्मिन् श्लोके ब्रह्मणि नारायणप्रसादबोधका **सृष्ट्यादयश्चत्वारो ब्रह्मनिष्ठधर्मा उक्ताः** ॥ ९ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

ततश्च कृतार्थो भवतीत्याह—धौतात्मेति । धौतो निर्मलीकृत आत्माऽन्तःकरणं यस्य अत एव मुक्तास्त्यक्ताः सर्वे परिक्लेशाः अविद्यास्मितारागद्वेषाभिनिवेशात्मका येन सः पुरुषः कृष्णपादमूलं न मुञ्चति निरन्तरं स्वाश्रयतया तदेव स्मरतीत्यर्थः । तत्र दृष्टान्तमाह—मुक्तेति । मुक्ताः सर्वे धनार्जनाद्यायासरूपाः परिक्लेशा येन स पान्थः प्रवासादागतस्यापि पुनर्धनार्जनाद्यर्थगमनदर्शनात् । दृष्टान्तेऽपि मुक्तसर्वपरिक्लेश इति विशेषणं योज्यम् ॥ ६ ॥ ❀ ❀ तदेवं, श्रवणौत्सुक्यमाविष्कृत्य सन्दिग्धानर्थान् पृच्छति—यदित्यादिना यावदध्यायसमाप्ति । पुनर्जानन्ति [illegible] । अधातुमतो धातवो मांसचर्मरुधिरादिरूपेण परिणताः पृथिव्यादिपञ्चमहाभूतरूपाः तत्सम्बन्धशून्यस्यास्य "असङ्गो ह्ययं पुरुषः" इति श्रुतावसङ्गत्वेनोक्तस्य जीवनस्य यद्धातुभिर्देहारम्भस्तत्किं यदृच्छया निर्निमित्तमेव केनापि हेतुना विद्याकालकर्मादिना वा भवन्तो यथा जानन्ति तथा कथयन्त्विति शेषेणान्वयः ॥ ७ ॥ ❀ ❀ पृथग्विभक्तैरियत्तायुक्तैः परिमितैरवयवैः करचरणादिभिरयं प्राकृतः पुरुषो यावान् यावत्सङ्ख्याकावयवः प्रोक्तः, त्रयाणां लोकानां संस्थानं विन्यासविशेष एव लक्षणं स्वरूपं यस्य तत्पद्मं यस्य नारायणस्योदरादासीदसावपि तावानेव संस्थावान् अवयवानिव च प्रोक्तः, अतो जीवेशयोर्विशेषो वक्तव्य इति शेषेणान्वयः । तुल्यत्वासम्भवं सूचयति—**इवेति** । वैशब्द एवकारार्थः । इतिशब्दोऽप्यर्थकः ॥ ८ ॥ अवश्यं च तयोर्विशेषो वाच्य इत्याशयेन 'तस्यापि द्रष्टुरीशस्य कूटस्थ-

---

1. नुपपत्तिव्यवस्था ख. ।

स्याखिलात्मनः ॥ सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः' इत्यादिनोक्तं भगवतो माहात्म्यमनुवदन् प्रलये तत्स्थानं पृच्छति—अज इति। भूतानां व्यष्ट्युपाधीनामात्मा नियन्ता समष्ट्युपाधित्वात् अजो ब्रह्मा यस्य नाभिपद्मात्समुद्भूतः सन् येनानुगृह्णता तस्य रूपं ददृशे दृष्टवान् ततश्च यस्यानुग्रहादेव भूतानि व्यष्ट्युपाधिप्राणिनः सृजति ॥ ९ ॥

### हिन्दी अनुवाद

जिसका हृदय शुद्ध हो जाता है, वह श्रीकृष्ण के चरणकमलोंको एक क्षणके लिये भी नहीं छोड़ता—जैसे मार्गके समस्त क्लेशोंसे छूटकर घर आया हुआ पथिक अपने घरको नहीं छोड़ता ॥ ६ ॥ ❀ ❀ भगवन्! जीवका पञ्चभूतोंके साथ कोई सम्बन्ध नहीं है। फिर भी इसका शरीर पञ्चभूतोंसे ही बनता है। तो क्या स्वभावसे ही ऐसा होता है, अथवा किसी कारणवश—आप इस बातका मर्म पूर्णरीतिसे जानते हैं ॥ ७ ॥ ❀ ❀ (आपने बतलाया कि) भगवान्‌की नाभिसे वह कमल प्रकट हुआ, जिसमें लोकोंकी रचना हुई। यह जीव अपने सीमित अवयवोंसे जैसे परिछिन्न है, वैसे ही आपने परमात्माको भी सीमित अवयवोंसे परिछिन्न-सा वर्णन किया (यह क्या बात है?) ॥ ८ ॥ ❀ ❀ जिनकी कृपासे सर्वभूतमय ब्रह्माजी प्राणियोंकी सृष्टि करते हैं, जिनके नाभिकमलसे पैदा होनेपर भी जिनकी कृपासे ही ये उनके रूपका दर्शन कर सके थे, वे संसारकी स्थिति, उत्पत्ति और प्रलयके हेतु, सर्वान्तर्यामी और मायाके स्वामी परमपुरुष परमात्मा अपनी मायाका त्याग करके किसमें किस रूपसे शयन करते हैं? ॥ ९-१० ॥

**स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः। मुक्त्वाऽऽत्ममायां मायेशः शेते सर्वगुहाशयः ॥ १० ॥**
**पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः। लोकैरमुष्यावयवाः सपालैरिति शुश्रुम ॥ ११ ॥**
**[1]यावान् कल्पो विकल्पो वा यथा कालोऽनुमीयते। भूतभव्यभवच्छब्द आयुर्मानं च यत् सतः ॥ १२ ॥**
**कालस्यानुगतिर्या[2] तु लक्ष्यतेऽण्वी बृहत्यपि। यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम ॥ १३ ॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

प्रश्नांतरमाह। स चापीति। यत्र शेते येन रूपेणावतिष्ठते। विश्वस्य स्थित्यादयो यस्मात् एवमादिप्रश्नानां तत्त्वतोऽर्हस्युदाहर्तुमिति सर्वांते क्रियायाः संबंधः ॥ १० ॥ ❀ ❀ प्रश्नांतरमाह। पुरुषस्यावयवैः पूर्वं कल्पिता 'यस्येहावयवैर्लोकान्कल्पयंति' इत्यादौ 'लोकैश्चामुष्यावयवाः' इति 'पातालमेतस्य हि पादमूलम्' इत्यादौ च त्वन्मुखाच्छ्रुतवंतो वयम् ॥ ११ ॥ एवं संदेहविपर्ययाभ्यां दृष्टम्। इदानीमज्ञातान्बहूनर्थान्पृच्छति यावानित्यादिना। कल्पो महान् विकल्पोऽवांतरः भूतादिः शब्दो यस्मात् यस्य वाचक इति वा। ततः स्थूलदेहाभिमानिनो मनुष्यपितृदेवादेरायुषः प्रमाणम् ॥ १२ ॥ ❀ ❀ अनुमानप्रकारः पृष्टः विशेषं पृच्छति। कालस्येति। अनुगतिः प्रवृत्तिः कर्मगतयः कर्मप्राप्याणि स्थानानि। यादृशीः यादृश्यः ॥ १३ ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अनुमानप्रकारो भूतकालाद्यनुमानप्रकारः वस्तुतः कालस्यैकरूपत्वात्तत्र भूतादित्वं कथमनुमेयमिति पृष्टमत्रेति ॥ १२ ॥ ❀ ❀ हे द्विजसत्तमेति। ब्राह्मणेषु श्रेष्ठा विद्वांसस्तेष्वपि त्वमुत्कृष्टोसि तपोविद्यानिष्णातत्वान्मत्संदेहापाकरणे सर्वथैव समर्थोसीति। यद्वा। परोपकरणार्थायैव ब्राह्मणानां विधिनाविर्भावितत्वात्स स्वाभाविकयुष्मद्धर्म इति भावः ॥ १३ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

तत्त्वत इति। अत्राध्याये त्रयोविंशश्लोकः ॥ १० ॥ ❀ ❀ यस्येति एतत्स्कन्धीयपञ्चमाध्यायस्य षट्त्रिंशच्छ्लोकः। पातालमिति एतत्स्कन्धीयप्रथमाध्यायस्य षड्विंशच्छ्लोकः ॥ १० ॥ ❀ ❀ [ यावानिति। अत्र कल्पविकल्पपदाभ्यामुत्पत्तिप्रलययोर्मध्यकालस्यैव टीकोक्तमहदवान्तरभेदेन ग्राह्यत्वं सम्प्लवः सर्व्वभूतानामिति परोक्तविंशश्लोकेन सृष्टिस्थितिप्रलयानामुक्तत्वादिति ॥ ११—१७ ॥

### श्रीमद्वीरराघवव्याख्या

अन्यदपि पृच्छति अज इति। भूतात्मा भूतानां व्यष्टिभूतानामात्मा नियंता यद्वा स्वयंभूताध्वरदेहः नाभिपद्मसमुद्भवः अजो ब्रह्मा यदनुग्रहाद्यस्यानिरुद्धस्यानुग्रहाद् भूतानि व्यष्टिभूतानि सृजति येन चतुर्मुखेन तद्रूपं तदनिरुद्धरूपं दृष्टम् ॥ १० ॥ ❀ ❀ स भगवान्विश्वस्थित्युद्भवाप्ययः विश्वस्य स्थित्युद्भवाप्यया यस्मात्तथाभूतः मायाया नियंता आत्ममायां मुक्त्वा प्रकृतिमतीत्य जग-

---

१. प्रा० पा०—यावत्कल्पो। २. प्रा० पा०—नुगतिर्याबह्वयते।

द्वयापारादुपरतः सर्वगुणाश्रयः पूर्णषाड्गुण्यः यत्र शेते वसति तं देशं कथयस्वेत्यन्वयः ॥ ११ ॥ ❀ ❀ यस्येहावयवैर्लोकान्कल्पयति पातालमेतस्य हि पादमूलमित्युभयथा श्रवणात्तस्य कल्पभेदेनोपपत्तिं मन्वानः आशंकते पुरुषेत्यादिना । पुरुषावयवैरनिरुद्धः उत्पन्नः चतुर्मुखाख्यपुरुषावयवैः सपालाः सेशाः लोकाः पूर्वकल्पिताः पूर्वस्मिन्कल्पे कल्पिताः इदानीं त्वितरथेति शुश्रुम इत्याह सपालैरिति । सपालैर्लोकैरमुष्य पुरुषस्यावयवाः कल्पिता इति शुश्रुम एवं च धाता यथा पूर्वमकल्पयदिति श्रुतिविरोधः इत्यभिप्रायः ॥ १२ ॥ ❀ ❀ यथाज्ञातानर्थान्बहून्पृच्छति यावानित्यादिना । कल्पो महाकल्पः यावान्यावत्परिमाणकः विकल्प अवांतरकल्पः कालभागः यावान्भूतभव्यभवदादिशब्दवाच्यः कालः यथाऽनुमीयते ग्रहसंचारादिनेति भावः । सतः कार्यस्य देवपितृमनुष्यादेरायुर्मानमायुः परिमाणं च यत्तदप्युदाहर्त्तुमर्हसीत्यन्वयः ॥ १३ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या ।

आसीद्यदुदरादित्युक्तभगवद्रूपदर्शनप्रकारं तदवस्थितिप्रदेशं च पृच्छति अज इति । भूतात्मा स्वसृष्टतत्तत्कार्यव्यापी सर्वविलक्षणाद्विष्णोर्जातत्वादजो ब्रह्मा भूतान्यहंकारादिजीवांस्तदभिमन्यमानानि च तत्त्वानि सृजति । सृष्टिरपि न स्वातंत्र्यादित्युक्तं यदनुग्रहादिति । पाद्मकल्पे च नाभिपद्मभवो विरिंचिः स्वकारणं पद्मनाभं दिदृक्षुर्येन प्रकारेण तद्रूपं ददृशे तस्यास्योत्तरत्रान्वयः ॥ १० ॥ ❀ ❀ विश्वस्य स्थित्युद्भवाप्ययाः यस्मात्स तथोक्तः लक्ष्म्या ईशः ज्ञानानन्दादिसर्वगुणानामाश्रयः सृष्ट्यादौ गुणभूतानां ब्रह्मादीनामाश्रयो वा पुरुषः पुरुषाकारवान् स पद्मनाभः आत्ममायां स्वेच्छाधीनां बन्धकशक्तिं मुक्त्वा तत्प्रवर्तकत्वं विरम्य मुक्तप्रवर्तकत्वेन यत्र यस्मिन् लोके शेते ॥ ११ ॥ ❀ ❀ अधुना पुनरपि श्रुतार्थमनुवदति पुरुषेति । अण्डस्थितस्य वैराजाख्यस्य पुरुषस्य हरेर्निजावयवैः सपाला इन्द्रादिलोकपालैः सहिताः पातालादयो लोकाः पूर्वकल्पिताः प्रथमं सृष्टाः पातालादिलोकैरमुष्य वैराजस्य हरेर्बाह्यावयवाः कल्पिताः प्रतिमात्मकब्रह्माण्डावयवैः क्लृप्ता इत्यन्वयः । सपालैर्लोकैरमुष्यावयवाः प्रतिमावत्संकल्पिता इति वा ॥ १२ ॥ ❀ ❀ श्रुतार्थमनूद्याधुना प्रस्तुतपुराणार्थं पृच्छति यावानित्यादिना । कल्पो ब्रह्मकल्पः द्विपरार्धाख्यः ब्रह्मणो दिनं वा यावान् यावत्परिमितः । विकल्पो मन्वादिकालो वाराहादिर्वा भूतो भव्यो भवन्निति शब्दो यस्मिन्स तथोक्तः अतीतानागतवर्तमानाख्य इत्यर्थः । यथा यथार्थतयाऽनुमीयते ज्ञायते कथं वाऽऽयुषो मानं प्रमाणं च येन कालेन कृतं स कालः ॥ १३ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

तद्विग्रहस्य कैमुत्याया स चापीति । यत्र स्थाने । मुक्त्वात्ममायामिति । तस्य स्थानस्यामायिकत्वमभिप्रेतम् । शेते प्रकृतिं प्रतिदृष्टिं निमील्य तिष्ठति । सर्व्वेषामपि गुहायां दुर्ज्ञेयस्थाने शेते वसतीति सः ॥ १० ॥ ❀ ❀ सन्देहे तु बीजमाह पुरुषेति ॥ ११ ॥ ❀ ❀ प्रलयस्य वक्ष्यमाणत्वात् कल्पशब्दे सृष्टिप्रलयमध्यकाल एव वाच्यः । भूतादिशब्दो यस्मात् कालात् प्रवर्तत इति शेषः ॥ १२।१३ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

प्रश्नान्तरमाह । स चापि पुरुषः प्रकृतीक्षणकर्त्ता यत्र शेते तत् स्थानं कथयेत्यर्थः । मायेशोऽपि मायाभर्त्तापि मायां त्यक्त्वा तस्याः ( तस्य ) बहिरङ्गशक्तित्वात् तामस्पृष्ट्वैवेत्यर्थः ॥ १० ॥ ❀ ❀ प्रश्नान्तरमाह । पुरुषस्यावयवैः पूर्वं कल्पिताः यस्येहावयवैर्लोकान् कल्पयन्तीत्यादौ । तथा लोकैरमुष्यावयवा कल्पिताः पातालमेतस्य हि पादमूलमित्यादौ शुश्रुम त्वन्मुखात् श्रुतवन्तो वयम् । अत्रान्यो विशेषश्चेदस्ति तमपि कथयेति भावः । अत्र यदधातुमत इतीशितव्यं जीवं पृच्छामि । आसीद् यदुदरादिना ईश्वरं द्वितीयम् अण्डसंस्थितं पुरुषं पृच्छामि । स चापि यत्र पुरुष इति प्रथमं महत्स्रष्टारं पुरुषं पृच्छामि । शेते सर्वगुहाशय इति तृतीयं सर्वभूतस्थं च पुरुषं पृच्छामि । विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः । प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् । तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते ॥ इति स्मृतेः । पुरुषावयवैरिति समष्टिजीवश्च पृच्छामीति प्रश्नपञ्चकं शान्तप्रीतिभक्तौ पर्य्याप्नोति । जीवाद्विशेषं भगवद्रूपं ब्रह्मणा दृष्टं कथयेति व्यज्यमानः प्रश्नोपि प्रीतिभक्तौ पर्य्याप्नोति ॥ ११ ॥ ❀ ❀ कल्पो महान् विकल्पोऽवान्तरः । भूतः अतीतः भव्यो भावी भवन् वर्त्तमानः इति शब्दो यस्मात् स कालः । सतः स्थूलदेहाभिमानिनो मनुष्यपितृदेवतादेरायुषो यत् प्रमाणं तत् कथय ॥ १२ ॥ ❀ ❀ अनुगतिरनुप्रवृत्तिः । अण्वी परमाण्वादिरूपा । बृहती वर्षादिरूपा । कर्म्मगतयो भद्राभद्रकर्म्मप्राप्यानि स्थानानि । यादृशीर्यादृश्यः । इति कर्म्मप्राप्यानि स्थानानि सर्वाण्येव कालैः सूक्ष्मस्थूलविकल्पकल्पैरवश्यमेव ग्रस्यन्त इति कर्म्मनिर्वेदार्थं प्रश्नद्वयं शुद्धभक्तावपि पर्य्याप्नोति । यदुक्तं श्रीभगवता जातश्रद्धो मत्कथासु निर्विघ्नः सर्वकर्म्मस्विति ॥ १३ ॥

## श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः

जीवात्परमात्मनो विशेषाभावे सृजामि तन्नियुक्तोहमित्यादिपूर्वोक्तं च न घटेत अतोऽवश्यं विशेषो वाच्य इत्याह अज इति । भूतानां व्यष्टिभूतानामात्माश्रयः अजो ब्रह्मा यस्य भगवतोऽनुग्रहात् भूतानि व्यष्टिभूतानि सृजति येन च भगवतानुग्रहता नाभिपद्मसमुद्भवः ब्रह्मा तस्य भगवतो रूपं ददृशे दृष्टवान् ॥ १० ॥ ❀ ❀ स चेति प्रश्नांतरं विश्वस्य स्थित्युद्भवाप्यया यस्मात्स मायेशः प्रकृतिनियंता मायां जगदाकारेण स्थितां मुक्त्वा प्राकृतं विहायेत्यर्थः । यत्र लोके शेते वसति तत्तत्वतोर्हस्युदाहर्तुमिति वक्ष्यमाणेन संबन्धः ॥ ११ ॥ ❀ ❀ यस्येहावयवैर्लोकान् कल्पयंतीत्यादिपातालमेतस्य हि पादमूलमित्यादि च श्रुत्वा शंक्यते पुरुषावयवैरिति । सपालाः लोकपालैः सहिता पुरुषावयवैः पूर्वं कल्पिताः इति । सपालैर्लोकैरमुष्य पुरुषस्य अवयवाः कल्पिताः इति च शुश्रुम श्रुतवंतो वयम् तद्विरोधं तत्त्वतोर्हस्युदाहर्तुम् । किंच पुरुषमुखादिरूपेण जनलोकादिरूपमिदं विश्वं यथा पूर्वकल्पितं तदुदाहर्तुमर्हसीत्यपि पृष्टमित्यग्रे स्फुटीभविष्यति ॥ १२ ॥ ❀ ❀ अथाज्ञातान् बहूनर्थान्पृच्छति यावानित्यादिना यावान् यावत्परिमाणकः कल्पो महाकल्पः विकल्पोऽवान्तरः कल्पः भूतादिशब्दा यस्य स तथाकार्यस्य देवपितृमनुष्यादेः आयुषः परिमाणमेवंभूतः कालः यथानुमीयते एतदर्हस्युदाहर्त्तुम् ॥ १३ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

अस्य सामर्थ्यस्य स्वतस्त्वशङ्कां वारयति--ददृशे येनेति । तस्य स्वकारणभूतस्य नारायणस्य रूपं येन प्रसादेन ददृशे । प्रसादादेव नाभिपद्मे समुद्भवो यस्य । एवं ब्रह्मण उत्पत्तिस्थिती भगवदनुग्रहेणैवेति निरूप्य तस्य शयनमपि तस्मिन्नेव रूप इति प्रतिदिनमुद्गमनतिरोभावाभ्यां तदनुग्रहस्तस्मिंस्थिर इति ब्रह्मणः शयनं निरूपयति । स चाऽपि ब्रह्माऽपि यत्र शेते तत्र ब्रह्मणो माहात्म्यमाह । विश्वस्य स्थित्यु[1]त्पत्त्यप्यया यस्मात् । पूर्वं भूतानां सृष्टिरेवोक्ता । इदानीं प्रलयान्ताः सर्वे भावविकारास्तत एवेति विशेषः । आत्मनो मायां सर्वकरणसामर्थ्यं निशायां तत् त्यक्त्वा शेते । निशा पुनस्तत्त्यागादेव भवति । तथा करणे हेतुः--मायेश इति । मायाया नियन्ता । तस्या नियमनार्थमेव तां त्यजतीत्यर्थः । पतिरूपत्वं वा ईशत्वम् । तथा सति कार्यावस्थां तां त्यक्त्वा तया सह क्रीडार्थं शेत इत्यर्थः । मायात्यागे वा सामर्थ्यं बोध्यते--मायेश इति । नियामकस्त्वन्तर्याम्येवेति कथमस्य मायेशत्वम् ? तत्राऽऽह--सर्वगुहाशय इति । सर्वेषां गुहासु हृदयेषु आशयः स्थानं यस्य । अन्तःकरणप्रेरणं वा । तस्मात्सर्वान्तर्यामित्वान्मायेशत्वम् । तस्मात्तस्य देहसम्बन्धः किमर्थं इति प्रश्नः । सचाऽपीति वा नारायण एवोच्यते । यत्र प्रलयजले शेते प्राकृतवत्तस्याऽप्यवस्थानां विद्यमानत्वात्तस्य दे[2]हवत्त्वम् । एवं जीवब्रह्मणोर्देहनिमित्तं पृष्ट्वा शुकब्रह्मवाक्ययोरवान्तरवैलक्षण्यं दूरीकर्तुं पृच्छति--पुरुषावयवैरिति । "भूर्लोकः कल्पितः पद्भ्यामि"ति वाक्यात्पुरुषावयवैर्लोककल्पना निरूपिता । त्वया पुनः "पातालमेतस्य हि पादमूलमि"ति वाक्याल्लोकैरमुष्याऽवयवा निरूपिताः । तत्र निर्णयो वक्तव्य इत्यर्थः । यद्यपि भवतां ब्रह्मणश्च एकवाक्यतैव तथाऽस्माभिः श्रुतमिति स सन्देहो निवारणीय इत्युक्तं शुश्रुम इति । अतः परं तदनुगुणा एव पदार्थाः पृच्छयन्ते--यावान् कल्प इति । कल्पः प्राकृतः । विकल्पो वैकृतः । यस्मिन् कल्पे ब्रह्मा उत्पद्यते यत्र च प्रतिबुध्यते तेषां प्रमाणं स्वरूपं च[3] वक्तव्यमित्यर्थः । कालानुमानज्ञानं घटिकापरिज्ञानम् । यथा वक्ष्यति "द्वादशार्द्धपलोन्मानमि"ति । यावान्यथेति यथायोग्यं [4]सर्वत्रैवाऽनुषज्यते । तेन भूतभव्यभवच्छब्दो यावान् यथेति वाक्यं भवति कालस्य विशेषणम् । भूतभव्यभवच्छब्द इति । भूतं भव्यं भवत् एते शब्दा यस्मात्स कालः कथमनुमीयत इति पूर्वेणैव सम्बन्धः । भूतादिपदानां प्रयोगनिमित्तं [5]स्वरूपं पृच्छयत इति वा । आयुषः परिमाणं यत्तद्वक्तव्यमित्यग्रेण सम्बन्धः । सतो देवतिर्यङ्मनुष्यादीनाम् । सत इति पदं विद्यमानत्वधर्मं सूचयति । अने[6]नाऽऽविर्भूतः कः कियत्कालं तिष्ठतीति प्रश्नः सङ्गच्छते । अन्यथा वैनाशिकप्रक्रियाया अनङ्गीकारात्सर्व एव कालः सर्वस्याऽऽयुर्भवेत् । प्रश्नान्तरमाह--कालस्याऽनुगतिरिति । कालस्य अनु अ[7]ण्वी गतिः बृहती च । अणुः कालो महान् कालश्च कथं ज्ञायत इत्यर्थः । स्वभावतः कालो न ज्ञायते किन्तु कार्यद्वारा । इदमिदानीमिति कार्यद्वारा । सैव कालस्याऽनुगतिः कार्ये गच्छति तदनुवर्त्तनम् । तत्र स्थूलसूक्ष्माणां कार्याणां नित्यत्वात् । अवान्तराणाम[8]नियतकालत्वात् । कालस्याऽनुगतिर्या तां कथयेत्यर्थः । सूर्यगत्या तां वक्ष्यति । ननु कालस्य भेदा एव न सन्तीत्याशङ्क्याऽऽह--या तु लक्ष्यत इति । सर्वत्र इदानीमिति प्रतीतेः पदार्थानुवृत्तिः कालस्य लक्ष्यते । अन्यथा आकाशादिवत्तस्याऽप्यभिलापो न स्यात् । तस्या[9] अण्वी बृहत्यपि । क्षणमात्रेण गतो महता कालेन गत इति । तथा च कालानुगतिरस्ति परं तत्र नियामकं वक्तव्यमिति प्रश्नः । कर्मणां नानाविधानां गतयः प्रवृत्तिप्रकाराः नानाविधयोनिसम्पादनेन सुखदुःखप्रदानेन च यावत्यो यादृशीरिति परिमाण[10]प्रकारौ प्रश्नविषयौ । द्विजसत्तमेति सम्बोधनं महत्या कर्मगत्येति ॥ १० ॥ ॥ ११ ॥ १२ ॥ १३ ॥

---

१. स्थित्युद्भवाप्यया इति ख. । २. देहत्वमिति ग. घ. । ३. च नास्ति ग. घ. । ४. सर्वत्रानुषज्यते ग. । ५. स्वरूपं चेति ग. । ६. तेनेति ख. ग. । ७. अनुगतिः ख. घ. । ८. मनियमित ग. । ९. तथा अण्वीति ख. ग. । १०. परिणाम ख. ।

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

स चापीत्यत्र। षड्धर्मा ब्रह्मनिष्ठाः तथात्वेनोच्यन्ते शयनादिसर्वान्तर्यामित्वान्ताः। तस्मादिति। एवमनुग्रहेणालौकिकदशधर्मत्त्वात्। तथा च यस्मिन्नेतावाननुग्रहस्तस्य तद्विरोधिदेहसम्बन्धः किमर्थं इति विरुद्धत्वात्प्रश्नः। यदि च प्रयोजनं विना प्रयोजनान्तराद्वा, तदा तच्छ्रवणादिना जातस्यानुग्रहस्यैतदपेक्षया न्यूनत्वात्तच्छ्रोतुः कथमभयप्राप्तिरिति सन्देहात्प्रश्न इति भावः। एवं स चापीति तच्छब्दस्याव्यवहितपरामर्शित्वमादायैवं व्याख्यातम्। तत्र पूर्वश्लोकादेव प्रसादहेतुत्वे सिद्धे पुनः प्रसादकथनस्य न किञ्चित्प्रयोजनमित्यरुच्या पक्षान्तरमाहुः स चापीति वेति। यत्रेत्यस्य विवरणं प्रलयजल इति। तेन सिद्धमाहुः प्राकृतवदित्यादि। तथाच, प्रसादहेतुर्न देहव्यतिरिक्तः, चेतनत्वात्, साकारब्रह्मवदिति। हेतौ साधारण्यशङ्कायां देहव्यतिरिक्तः प्राकृततुल्यावस्थाकदेहवत्त्वात्। यदेवं, तदेवं, यन्नैवं तन्नैवमिति साधनान्तरबोधनायायं श्लोक इत्यर्थः॥ १०॥ ❀ ❀ पुरुषावयवैरित्यत्र तथास्माभिः श्रुतमिति, अस्माभिः तथा श्रुतमित्यन्वयः॥ ११॥ ❀ ❀ यावानित्यत्र तदनुगुणा शुकोक्त्यनुगुणाः। कल्पविकल्पयोः क्रमेण स्वरूपमाहुः यस्मिन्नित्यादि। प्रमाणमिति प्रकृष्टं मानमियत्ता इत्यर्थः। प्रमाणशब्दस्येयत्तावाचकत्वं प्रमाणमाण्डकोशस्येत्यत्र स्फुटीभविष्यति। कालानुमानज्ञानमिति कालेयत्तानुमितिहेतोः ज्ञानम्। पूर्वेण सम्बन्धाङ्गीकारे न कश्चिद्विशेष इत्यरुच्या पक्षान्तरमाहुः भूतादीत्यादि, प्रयोगनिमित्तमिति शक्यतावच्छेदकम्। एवं च भूतभव्यभवच्छब्दो यथेति प्रश्नवाक्यं सिद्ध्यति। अनेनेति सत इति पदेन। कथं सङ्गच्छत इत्याकाङ्क्षायामाहुः अन्यथेत्यादि, आयुर्मानानुक्तौ ॥ १२॥ ❀ ❀ कालस्येत्यत्र अनुगतिशब्दार्थं विवृण्वन्तः प्रश्नबीजमाहुः स्वभावत इत्यादि। कार्यद्वारेति कार्यविशेषणतया। गच्छतीतिसप्तम्यन्तम्। तदनुवर्त्तमानं कार्यानुवर्त्तनम्। यथा 'गतः स कालो यत्रासन् देवाः सेवानुवर्त्तिनः' इति। तथा चेति अभिलापात्प्रतीतेश्च। एवं सार्द्धपद्ये नानाप्रकारेण काल एव पृष्टो बोद्धव्यः॥ १३॥

## श्रीगिरिधरकृता बालप्रबोधिनी

स चापि पुराणपुरुषो यत्र शेते एवमादिप्रश्नानां तत्त्वतोऽर्हस्युदाहर्त्तुमिति सर्वान्ते क्रियायाः सम्बन्धः। ननु ब्रह्मणोऽप्यनुगृहीतुं स कथं शक्त इत्यपेक्षायामाह— सर्वगुहाशय इति, सर्वान्तर्यामीत्यर्थः। तस्य तदनुग्रहे किं प्रयोजनमित्यपेक्षायामाह— विश्वेति। विश्वस्य स्थित्यादयो यस्मात्सः, विश्वसृष्ट्यर्थमनुगृहीतवानित्यर्थः। सृष्ट्यादिकरणेऽपि तस्य कथं सामर्थ्यमित्यपेक्षायामाह— मायेश इति, अचिन्त्यशक्तिरूपाया मायाया ईशो नियन्तेत्यर्थः। तर्हि किं जीववत्तस्यापि तमोवृत्तिरूपया निद्रया शयनमस्तीत्याशङ्क्याह—मुक्त्वाऽऽत्ममायामिति मायात्यागेन सृष्ट्यादिलीलात उपराम एव शयनमुच्यते इति भावः॥ १०॥ ❀ ❀ प्रश्नान्तरमाह— पुरुषावयवैः सपाला लोकाः पूर्वकल्पिता इति 'यस्येहावयवैर्लोकान् कल्पयन्ति मनीषिणः' इति ब्रह्मणोक्तं तदपि त्वत्तः श्रुतवन्तः। सपालैर्लोकैरमुष्यावयवाः कल्पिता इत्यपि 'पातालमेतस्य हि पादमूलं' इति वदतस्त्वत्त एव शुश्रुम श्रुतवन्तो वयं तत्र विरोधपरिहारस्त्वया वक्तव्यः। न च कल्पभेदेन विरोधपरिहार इति वाच्यम् "धाता यथा पूर्वमकल्पयत्" इति श्रुतिविरोधादिति भावः॥ ११॥ ❀ ❀ एवं सन्देहविपर्ययाभ्यां पृष्ट्वा ज्ञातान् बहूनर्थान् पृच्छति— यावानित्यादिना। कल्पो महाकल्पः विकल्पः अवान्तरकल्पो वा यावान् यावत्परिमाणकः भूतभव्यभवच्छब्दवाच्यः कालो यथाऽनुमीयते सतः कार्यस्य देवपितृमनुष्यादिदेहस्यायुषः प्रमाणं च ॥ १२॥ ❀ ❀ पूर्वकालानुमानप्रकारः पृष्टस्तत्र विशेषं पृच्छति— कालस्येति। अण्वी सूक्ष्मा निमेषादिरूपा वृत्तिः संवत्सरादिरूपा या कालस्यानुगतिः प्रवृत्तिर्लक्ष्यते निमेषमात्रेण गतः महता कालेन गत इत्यादिव्यवहारे प्रतीयते तत्र नियामकं वक्तव्यमिति शेषः। कर्मगतयः कर्मभिः प्राप्यानि स्थानानि यावत्यो यावत्सङ्ख्याकाः यादृशीर्यादृश्यो यत्प्रकारकाश्च। एवमेकदैव बहुप्रश्ने शुकस्योद्वेगो मा भूदित्याशयेन सम्बोधयति— हे द्विजसत्तमेति॥ १३॥

## हिन्दी अनुवाद

पहले आपने बतलाया था कि विराट् पुरुषके अङ्गोसे लोक और लोकपालोंकी रचना हुई और फिर यह भी बतलाया कि लोक और लोकपालोंके रूपमें उसके अङ्गोंकी कल्पना हुई। इन दोनों बातोंका तात्पर्य क्या है ?॥ ११॥ ❀ ❀ महाकल्प और उसके अन्तर्गत अवान्तर कल्प कितने हैं ? भूत, भविष्यत् और वर्तमान कालका अनुमान किस प्रकार किया जाता है ? क्या स्थूल देहाभिमानी जीवोंको आयु भी बँधी हुई है ?॥ १२॥ ❀ ❀ ब्राह्मणश्रेष्ठ! कालकी सूक्ष्म गति त्रुटि आदि और स्थूलगति वर्ष आदि किस प्रकारसे जानी जाती है ? विविध कर्मोंसे जीवोंकी कितनी और कैसी गतियाँ होती है ?॥ १३॥

---

१. अस्यैव स्कन्धस्य प्रथमाध्यायस्य सप्तविंशः श्लोकोऽयम्।

यस्मिन् कर्मसमावायो यथा येनोपगृह्यते । गुणानां गुणिनां चैव परिणाममभीप्सताम् ॥१४॥
भूपातालककुब्व्योमग्रहनक्षत्रभूभृताम् । सरित्समुद्रद्वीपानां सम्भवश्चैतदोकसाम् ॥१५॥
प्रमाणमण्डकोशस्य बाह्याभ्यन्तर[1]भेदतः । महतां चानुचरितं[2] वर्णाश्रमविनिश्चयः ॥१६॥
युगानि युगमानं च धर्मो यश्च युगे युगे । अवतारानुचरितं यदाश्चर्यतमं[3] हरेः ॥१७॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

गुणानां सत्त्वादीनां परिणामं देवादिरूपमिच्छतां गुणिनां जीवानां मध्ये यस्मिन् परिणामे कर्मणां पुण्यपापानां समवायः समुदायः केन कर्मसमुदायेन कथं कृतेन कर्मसमुदायेन कथं कृतेन कोऽधिकारी देवादिभावं प्राप्नोतीत्यर्थः ॥ १४ ॥ ❀ ❀ भूपातालादीनां संभवः । एतान्योकांसि येषां प्राणिनां तेषां च संभवः । यथेति सर्वत्रानुषंगः ॥ १५ ॥ ❀ ❀ वर्णानामाश्रमाणां च विनिश्चयस्तत्तत्स्वभावैर्निर्धारः ॥ १६ ॥ ❀ ❀ युगेयुगे प्रतियुगं यो धर्मो यच्च हरेरवतारानुचरितम् ॥ १७ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

इत्यर्थ इति । "सत्त्वसंगादृषीन्देवान्रजसाऽसुरमानुषान् । तमसा भूततिर्य्यक्त्वं भ्रामितो याति कर्मभिः" इत्यादिभगवदुक्तेः केन सात्त्विककर्मणा को देवो भवति कथं वा भवतीत्यादि मत्संदिग्धमज्ञातञ्च त्वं ब्रूहीति भावः ॥ १४ ॥ ❀ ❀ एतानि भूपातालादीन्योकांसि स्थानानि "ओकः स्थानं गृहं देहम्" इत्यभिधानात् ॥ १५ ॥ ❀ ❀ एतत्स्वभाववान्विप्रादिरेतत्स्वभाववान्ब्रह्मचर्यादिश्च ज्ञेयस्तथा च तेषां स्वाभाविकधर्मान् ब्रूहीति समागतम् ॥ १६ ॥ ❀ ❀ युगानीति । संख्याप्रश्नः युगमानं वर्षैरियत्तया परिच्छेदः ॥ १७ ॥ १८ ॥

### श्रीमद्वीरराघवव्याख्या

कालस्य या अण्वी सूक्ष्मानिमेषादिरूपा बृहती संवत्सरादिरूपा याऽनुगतिः प्रवृत्तिर्लक्ष्यते सापि कथनीयेत्यर्थः । कर्मगतयः कर्मणः प्राप्यानि फलानि यावंत्यः यावत्संख्याका यादृश्यः यत्प्रकारका हे द्विजसत्तम ॥ १४ ॥ ❀ ❀ यस्मिन्देशे कर्मसमवायः कर्मणां फलनिष्पादनं येन देवादिभूतेन यथा उपगृह्यते यादृशं कर्मफलं प्राप्यते तच्च कथयेत्यर्थः । गुणानां सत्वादीनां गुणिनां च परिणामं परिणामहेतुं गुणिनां परिणामे देवादिशरीरपरिग्रहे हेतुं सविस्तरं वक्तुमर्हसीति ॥ १५ ॥ ❀ ❀ ककुभः दिशः भूभृतः पर्वताः भूपातालादीनां संभवः एतानि भूम्यादीनि ओकांसि येषां तेषां प्राणिनां च संभवः यथेति सर्वत्रानुषंगः ॥ १६ ॥ ❀ ❀ अंडकोशस्य तद्बाह्याभ्यंतरवस्तुनश्च प्रमाणमडाद्बाह्यवस्त्वावरणं महतां भागवतानामनुचरितं चरित्रं वर्णानामाश्रमाणां च विनिश्चयस्तु तत्स्वरूपभावेन निर्द्धारः ॥ १७ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

अण्वी परमाणुलक्षणा । महती परममहत्परिमिता कालस्य गतिः सापि कथं लक्ष्यते कर्मगतयः कर्मफलानि यावतिः कतिसंख्यानि यादृशीः कीदृशानि ॥ १४ ॥ ❀ ❀ यस्मिन्कस्मिन्जीवे किं कर्मसमवायः यथा कथं येन केन सकर्मसमवाय उपगृह्यते कर्मसमवायकर्ता कः सत्त्वादिगुणानां परिमाणं गुणिनां महदादिजीवानां सामर्थ्यपरिमाणं गुणानां शब्दादीनां गुणिनामाकाशादीनामिति व्याख्यानं न युक्तं परिमाणानुक्तेः । देवासुरेभ्यो मघवानित्यादिनोक्तेश्चान्यत्र ॥ १५ ॥ ❀ ❀ भूपातालादीनां च परिमाणं एतानि भूम्यादीनि ओकांसि येषां ते तथा तेषां संभवमुत्पत्तिं च ॥ १६ ॥ ❀ ❀ बाह्याभ्यंतरे च वर्तमानस्य वस्तुनो हरेः परमाण्वादिपरममहदंतानां रूपाणां च परिमाणं सत एवेत्यादिना वक्ष्यमाणत्वात् महतां मरीचिकर्दमादीनामनुचरितं वर्णानामाश्रमाणां विशेषतो निर्णयम् ॥ १७ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या ।

गुणानां परिणाममभीप्सतां सुप्ततत्तद्वासनानां गुणिनां जीवानां मध्ये येन जीवेन यस्मिन् परिणामनिमित्ते यथा येन प्रकारेण यः कर्म्मसमवायो गृह्यत इत्यन्वयः । स कथ्यतामिति शेषः ॥ १४ ॥ १५ ॥ १६ ॥ ❀ ❀ हरेः श्रीकृष्णस्यावताराणामनुचरितम् ॥ १७—२३ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

गुणानां सत्त्वादीनां परिणामं देवादिरूपमभीप्सतां गुणिनां जीवानां यस्मिन् परिणामे कर्म्मणां सुकृतदुष्कृतयोगज्ञानभक्तीनां समवायः समुदायः सम्भवति तं कथय । स च परिणामो मनुष्यदेह एव ज्ञेयः । तस्मिन्नपि परिणामे येन जीवेन यथा

---

१. प्रा० पा—भ्यन्तरवस्तुनः । २. प्रा० पा०—चारु चरितं । ३. प्रा० पा०—मयं ।

यत् कर्म्म उपगृह्यते तत् कथय । मनुष्ये च कर्म्मज्ञानादिषु कः कोऽधिकारी कथं किं किं कृत्वा किं किं साध्यं प्राप्नोतीत्यर्थः । प्रश्नोऽयं कर्म्ममिश्रज्ञानमिश्रयोगमिश्रशुद्धभक्तिषु पर्य्याप्नोति ॥ १४ ॥ ❀ ❀ भूरादीनां सम्भवः । एतानि ओकांसि येषां तेषाञ्च सम्भवः । यथेति सर्व्वत्रानुषङ्गः । भूरादीनां बहुविधभक्तास्पदत्वात् तदोकसाञ्च मायोऽधिकृतादिभक्तत्वात् प्रश्नोऽयं भक्तेषु पर्य्याप्नोति ॥ १५ ॥ ❀ ❀ प्रमाणमण्डकोशस्येत्यैश्वर्य्यप्रधानायां भक्तौ कीदृशान्यण्डानि भगवत्कुक्षौ सन्तीति जिज्ञासायां, वर्णाश्रमेति । वर्णाश्रमधर्मा भक्तिमिश्रतयैव सिद्ध्यन्ति तदन्यथा वेति जिज्ञासायां, कर्म्मज्ञानमिश्रायाञ्च भक्तौ प्रश्नोऽयं पर्य्याप्नोति ॥ १६ ॥ ❀ ❀ युगानीति युगावताराणां तत् प्रवर्त्तितभक्तिविशेषाणाञ्च जिज्ञासायाम् ॥ १७ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

कालस्य याऽण्वी परमाणुरूपा बृहती संवत्सरादिरूपा अनुगतिः प्रवृत्तिर्लक्ष्यते तामुदाहर्तुमर्हसि कर्मणा गम्यन्ते इति गतयः फलभूमयः यावत्यः यावत्संख्याकाः यादृशीर्यादृश्यः यत्प्रकाराः ता उदाहर्तुमर्हसि ॥ १४ ॥ ❀ ❀ गुणानां सत्वरजस्तमसां परिणामं देवमनुष्यपश्वादिभावमभीप्सतामिच्छतां गुणिनां सत्वादिगुणपरियुक्तानां जीवानां मध्ये येन गुणिना यस्मिन् देवादिभावे कर्मणां समवायः फलसमुदायः यथा गृह्यते तथा हे ब्रह्मन्नुदाहर्तुमर्हसि ॥ १५ ॥ ❀ ❀ भूरादीनामेतदोकसां प्राणिनां च यः संभवस्तमुदाहर्तुमर्हसि यच्छब्दः सर्वत्र संयोज्यते ॥ १६ ॥ ❀ ❀ बाह्याभ्यंतरभेदतोऽण्डकोशस्य यत्परिमाणं तत् महतां भागवतानां यदनुचरितं तच्च वर्णानामाश्रमाणां च यो विनिश्चयो निर्द्धारस्तं चोदाहर्तुमर्हसि ॥ १७ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

तज्ज्ञानावश्यकत्वं सूचयति—यस्मिन्निति[1] । यस्मिन्कर्मसमावाय इति प्रश्नान्तरम् । गुणानां सत्त्वादीनां परिणामं देवतिर्यङ्मनुष्यादिरूपं अभीप्सताम् । गुणिनां कार्याणां गुणसमुदायरूपाणां मध्ये । यस्मिन्कर्मसमावायः । कर्मणां शुक्ललोहितकृष्णानां समवायो मेलनमित्येकः प्रश्नः । शुक्लं[2] कर्म देवेष्वेव[3][4] । कृष्णं पातालवासिनाम् । अन्तरिक्षस्थानां वा । समावायो[5] मनुष्येष्विति वक्ष्यते । किञ्च । यथा कर्मसमवायः किं गुणानां समशो मेलनं न्यूनाधिकभावेन[6] वा । किञ्च । येन कर्मसमवायः । केन वा कर्माणि योज्यन्ते उपगृह्यन्ते स्वीक्रियन्ते । जीवेन भगवता कालादिना वा । गुणिनामपि परिणाममभीप्सतामिति कथनार्थं गुणगुणिनोः सह निरूपणम् । यथा देवावतार इन्द्रावतार इति । भूपातालादीनां तदोकसां च सम्भवः यथा यावानिति प्रश्नः । अण्डकोशस्य प्रमाणं ब्रह्माण्डं कियत्प्रमाणकमिति । कोशशब्देन पत्राणां विकाशाभावात् पत्रस्थानीयलोकपरिमाणमपि[7] लोकानामुपर्यधोभावोऽपि निरूपणीय इति सूचितम् । बाह्यतः कियत् । अन्तरतः कियत् । यथाऽन्तरप्रमाणं वक्ष्यति सूर्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्चविंशतिरि' ति । "तथा[8] बाह्यं दशोत्तरै" रिति । महतां सताम् । तेषामनुचरितं भक्तिः । चकाराज्ज्ञानिनाम् । विपरीतं वा । वर्णानामाश्रमाणां च विनिश्चयः आचारतः स्वरूपतश्च । अवताराणामनुचरितम् । तत्रापि यदाश्चर्यतमं कालियदमनगोवर्द्धनोद्धरणादि । युगानि कानि कियन्तीति । युगमानं संवत्सरभेदेन ॥ १४ १७ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः ।

यावत्य इत्यत्र सार्द्धपद्ये । अनेनैकेन कर्मणामेव प्रश्न इत्याशयेनाहुः कर्मणामित्यादि । यस्मिन्निति गुणिनि । वक्ष्यमाणेनोत्तरानुसन्धानेन प्रश्नार्थं विशदयन्ति शुक्लमित्यादि । अथेत्यादि । इदं गुणि परिणामोदाहरणम् । तथा च, यथा रुद्रादिदेवानां स्वस्वलोके विद्यमानत्वेपि स्त्र्यादिसम्बन्धं विनापि कृपो रुद्रगणावतारः, साम्बो गुहावतारः, तादृशगुणिपरिणामार्थं यो मनुष्यरूपेण कर्मसमवायः स कथं केन योज्यते केन वा स्वीक्रियत इति प्रश्नार्थः । एवञ्च 'भवद्भिरंशैर्यदुषूपजन्यता'मित्याज्ञापनोत्तरं को वांशो यादवशरीररूपेणासीत्को वा तच्छरीरे भोक्ता जीवो वा भगवान् वा कालादिर्वेति तात्पर्यं पर्यवस्यति ॥ १४ ॥ ❀ ❀ प्रमाणमण्डकोशस्येत्यत्र । प्रमाणशब्दस्य परिमाणवाचकत्वे मानमाहुः यथान्तरेत्यादि । तथा च, प्रत्युत्तरवाक्यमेव तत्र शक्तिग्राहकमित्यर्थः ॥ १६।१७ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

गुणानां सत्त्वादीनां परिणामं देवादिरूपमभीप्सतामिच्छतां गुणिनां जीवानां मध्ये येनाधिकारिणा यस्मिन्नेव देवादिरूपे [illegible] यथा येन प्रकारेणोपगृह्यते अनुष्ठीयते तदुदाहर्तुमर्हसीत्यग्रेणान्वयः ॥ १४ ॥ ❀ ❀ ककुभो दिशः । भूभृतः पर्वताः । भूपातालादीनां सम्भवः । एतानि भूपातालादीनि ओकांसि येषां

---

१. यस्मिन्धर्मसमवाय इति ख. । २. कर्मणीति घ. । ३. समवाय इति ख. ग. । ४. दैवेष्विति ख. । ५. समवाय इति ग. । ६. धिक्यभावेनेति ग. । ७. परिणाममपीति ख. । ८. यथा बाह्यमिति ग. ।

प्राणिनां तेषां च सम्भवो यथेत्यनुषङ्गः ॥ १५ ॥ ❀ ❀ बाह्याभ्यन्तर-भेदतो बाह्यतः कियत्प्रमाणकः अभ्यन्तरे कियत्प्रमाणक इत्यण्डकोशस्य प्रमाणं, महतां, भागवतानामनुचरितं च, वर्णानामाश्रमाणां च विनिश्चयः तत्तत्स्वभावेन निर्द्धारः ॥ १६ ॥ ❀ ❀ यच्च हरेरवतारानुचरितम् । ननु विस्तरेण साकल्येन च तद्वक्तुं न शक्यते एव, सङ्क्षेपतः प्राधान्येन तु ब्रह्मनारदसंवादद्वारोक्तमेवेत्याशङ्क्य सत्यमुक्तं तथापि मम सन्तोषार्थमन्यदपि यदलौकिकत्वेन चित्ताह्लादजनकं तद्वक्तव्यमित्याह—आश्चर्यतममिति । युगानि कानि कियन्ति च । तेषां युगानां मानं परिमाणं च । युगे युगे प्रतियुगं च यो धर्मः ॥ १७ ॥

## हिन्दी अनुवाद

देव, मनुष्य आदि योनियाँ सत्त्व, रज, तम—इन तीन गुणोंके फलस्वरूप ही प्राप्त होती हैं। उनको चाहनेवाले जीवोंमेंसे कौन-कौन किस-किस योनिको प्राप्त करनेके लिये किस-किस प्रकारसे कौन-कौन कर्म स्वीकार करते हैं ? ॥ १४ ॥ ❀ ❀ पृथ्वी, पाताल, दिशा, आकाश, ग्रह, नक्षत्र, पर्वत, नदी, समुद्र, द्वीप और उनमें रहनेवाले जीवोंकी उत्पत्ति कैसे होती है ? ॥ १५ ॥ ❀ ❀ ब्रह्माण्डका परिमाण भीतर और बाहर—दोनों प्रकारसे बतलाइये। साथ ही महापुरुषोंके चरित्र, वर्णाश्रमके भेद और उनके धर्मका निरूपण कीजिये ॥ १६ ॥ ❀ ❀ युगोंके भेद, उनके परिमाण और उनके अलग-अलग धर्म तथा भगवान्के विभिन्न अवतारोंके परम आश्चर्यमय चरित्र भी बतलाइये ॥ १७ ॥

**नृणां साधारणो धर्मः सविशेषश्च यादृशः । श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवताम् ॥१८॥**
**तत्त्वानां परिसंख्यानं लक्षणं हेतुलक्षणम् । पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च ॥१९॥**
**योगेश्वरैश्वर्यगतिर्लिङ्गभङ्गस्तु योगिनाम् । वेदोपवेदधर्माणामितिहासपुराणयोः ॥२०॥**
**सम्प्लवः सर्वभूतानां विक्रमः प्रतिसंक्रमः । इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः ॥२१॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

सविशेषो वर्णाश्रमनिबंधनः श्रेणीनां तत्तद्व्यवसायोपजीविनां व्यवहारनियमलक्षणो धर्मः राजर्षीणां प्रजापालनाधिकारिणां कृच्छ्रेषु आपत्सु जीवतां सर्वेषाम् ॥ १८ ॥ ❀ ❀ सर्वेषां तत्त्वानां प्रकृत्यादीनां परिसंख्यानं संख्यालक्षणं स्वरूपं हेतुतो लक्षणं तत्तत्कार्यहेतुत्वेन च लक्षणमित्यर्थः । पुरुषाराधनस्य विधिर्देवपूजाप्रकारः अष्टांगयोगस्य च विधिः ॥ १९ ॥ ❀ ❀ योगेश्वराणामैश्वर्येणाणिमादिनाऽर्चिरादिगतिः । लिंगशरीरस्य भंगः प्रलयः । वेदा ऋग्वेदादयः उपवेदा आयुर्वेदादयः धर्मा धर्मशास्त्राणि तेषाम् इतिहासपुराणयोश्च गतिः स्वरूपम् ॥ २० ॥ संप्लवोऽवांतरप्रलयः । यद्वा सम्यक् प्लवनमुद्भवः । विक्रमः स्थितिः । प्रतिसंक्रमो महाप्रलयः । इष्टं वैदिकं कर्म पूर्तं स्मार्तम् । "वापीकूपतडागादि देवतायतनानि च ॥ अन्नप्रदानमारामः पूर्तमित्यभिधीयते" इति ॥ तत्र च काम्यानामग्निहोत्रादीनां विधिः त्रिवर्गस्य धर्मार्थकामस्य विधिरविरोधप्रकारः ॥ २१ ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

संख्यालक्षणं स्वरूपं कति तत्त्वानीति । इत्यर्थ इति । यस्मादेतत्कार्यमुत्पद्यते तदेतन्नामकं तत्त्वमिति भावः । अष्टांगयोगस्य यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपस्य लक्षणम् ॥ १९ ॥ ❀ ❀ अर्चिरादिगतिं तृतीयस्कंधे वक्ष्यामः । आदिना यजुरादिग्रहः । द्वितीयादिना धनुर्वेदादिग्रहः । धर्मशास्त्राणि मन्वाद्यष्टादश स्मृतयः । इतिहासो भारतादिः । पुराणानि मात्स्यादीनि ॥ २० ॥ ❀ ❀ संप्लवशब्दस्यावांतरप्रलयग्राहकत्वे नैयत्यं दृष्ट्वाह—यद्वेति । अग्निहोत्रादिकं वैदिकं कर्म स्मार्त्तं स्मृतिविहितम् । तत्रेष्टापूर्त्तयोर्मध्ये । "त्रिवर्गो धर्मकामार्थैः" इत्यमरः ॥ २१ ॥ २२ ॥

## श्रीमद्वीरराघवव्याख्या

हरेराश्चर्यतममवतारानुचरितं च यत्तदपि युगानि युगस्वरूपं युगपरिमाणं युगे युगे प्रतियुगम् ॥ १८ ॥ ❀ ❀ यो धर्मः साधारणः मनुष्यमात्रसाधारणः सविशेषः वर्णाश्रमविशेषनिबंधनरूपविशेषयुक्तः श्रेणीनां तत्तद्व्यवहारोपजीविनां धर्मः व्यवहारनियमलक्षणः धर्मः राजर्षीणां प्रजापालनाधिकारिणां कृच्छ्रेष्वापत्सु जीविनां यो धर्मः ॥ १९ ॥ ❀ ❀ तत्वानां महदादीनां परिसंख्यानं संख्यालक्षणं स्वरूपं हेतुलक्षणं तत्वकारणलक्षणं पुरुषाराधनविधिः परमपुरुषाराधनप्रकारः आध्यात्मिकस्य प्रकृतिविविक्तात्मस्वरूपविषयस्य योगस्य ज्ञानयोगस्य प्रकारः ॥ २० ॥ ❀ ❀ योगेश्वराणामैश्वर्याण्यणिमादीनि तेषां गतिः स्वरूपं योगिनां लिंगभंगः शरीरपातः । वेदा ऋग्वेदादयः तदुक्तधर्माश्च तेषामितिहासपुराणयोश्च गतिः ॥ २१ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

यदाश्चर्यतमन्येषामिति शेषः । हरेरवतारानुचरितं तच्च कति युगानि युगमानं वर्षैरियत्तया परिच्छेदः अनुयुगं यो यो धर्मस्तत्तं च ॥ १८ ॥ ❀ ❀ साधारणो धर्मो जातिमात्रप्रयुक्तः अहिंसादिलक्षणो यो धर्मो विशेषसहितः यादृशः कीदृशः श्रेणीनाम-

गरक्षकाणां धर्मो युद्धेषूच्यते राजर्षीणां प्रियव्रतादीनां कृच्छ्रेष्वापत्सु जीवताम् ॥ १९ ॥ ❀ ❀ तत्त्वानां महदादीनां परिसंख्यानं सामान्यविशेषसंख्या तेषां लक्षणं व्यावर्तकं धर्मं हेतोः कारणस्य ब्रह्मणो लक्षणं स्वरूपं पुरुषस्य विष्णोः आध्यात्मिकस्य परमात्मसंबंधिनो यमादियोगस्य भक्तियोगस्य च विधिः तं च ॥ २० ॥ ❀ ❀ योगेश्वरैश्वर्यगतिं योगेश्वराणामणिमाद्यष्टैश्वर्यप्राप्तिं तेषां स्वरूपं च योगिनां यमादियोगाभ्याससिद्धानां वेदांतादिशास्त्राभ्याससिद्धानां च योगतो लिंगभंगं सूक्ष्मशरीरनाशकप्रकारं स्थिरं सुखं चेत्यादिनोक्तोयं पाने न ते देवकथासुधाया इत्यादिपश्चाच्च । ऋगादिवेदानामायुर्वेदाद्युपवेदानां वेदादिविहितवर्णाश्रमधर्माणां च यः संभव उद्धारादिस्तं च इतिहासपुराणयोः संभव उत्पत्तिः ॥ २१ ॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

नृणामन्त्यजपर्य्यन्तानामपि साधारणो धर्म्मो भक्तिरेव । विशेषधर्मस्तु तज्जातिधर्म्म इति तद्धर्म्मवत्त्वेपि ते भक्ता भवन्ति । किरातहूणान्ध्रपुलिन्दपुल्कशा इत्यादेः । एवं श्रेणीनां तत्तद्व्यवसायोपजीविनां राजर्षीणाञ्चेति तेष्वपि भक्तिमत्सु निरपराधतयैव स्थातव्यमिति विवक्षायां, कृच्छ्रेषु जीवतां धर्म्म इति आपद्धर्म्मप्रश्नः सर्व्वविधभक्तौ पर्य्याप्नोति ॥ १७ ॥ ❀ ❀ तत्त्वानां प्रकृत्यादीनां परिसंख्यानं गमनं लक्षणं स्वरूपं हेतुलक्षणं तत्तत्कार्यहेतुत्वेन लक्षणमिति पुरुषावतारलीलायाम् । योगस्येति योगमिश्रायाम् ॥ १९ ॥ ❀ ❀ योगेश्वराणां शम्भुप्रभृतीनां महानुभावक्तानाम् ऐश्वर्यरूपा या गतिः । लिंगभंग इति शान्तभक्तौ । वेदादीनां तात्पर्य्यमिति शेषः । तच्च भक्तिरेवेति भक्तौ ॥ २० ॥ ❀ ❀ सम्यक् प्लवः संसारसिन्धोस्तरणसाधनं किं, विक्रमस्तत्र शौर्य्यं किं, प्रतिसंक्रमस्तत्र नाशः क इति भक्तेरनुकूलवस्तुजिज्ञासायाम् यद्वा संप्लवविक्रमप्रतिसंक्रमाः सृष्टिस्थितिसंहाराः इष्टं वैदिकं कर्म्म पूर्तं स्मार्त्तम् । वापीकूपतडागादिदेवतायतनानि च । अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते ॥ इति ॥ काम्यानां काम्यकर्म्मणां त्रिवर्गस्य धर्मार्थकामस्य विधिरविरोधप्रकार इति कर्म्ममिश्रायां भक्तौ ॥ २१ ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

युगानि युगमानं च युगे युगे प्रतियुगं यो धर्मस्तं च यदाश्रयंतमहरेरवतारानुचरितं तच्चोदाहर्तुमर्हसि ॥ १८ ॥ ❀ ❀ यः नृणां सर्वेषां साधारणः धर्मस्तं यादृशः सविशेषः वर्णाश्रमनिबंधनो धर्मस्तादृशं च श्रेणीनां तत्तद्व्यवसायोपजीविनां व्यवहारनियमलक्षणो यो धर्मस्तं राजर्षीणां प्रजापालनाधिकारिणां यो धर्मस्तं कृच्छ्रेषु आपत्सु जीवतां सर्वेषां यो धर्मस्तं चोदाहर्तुमर्हसि ॥ १९ ॥ ❀ ❀ तत्वानां प्रकृत्यादीनां यत्परिसंख्यानं तत् यच्च लक्षणं स्वरूपं हेतुलक्षणं तत्तत्कारणलक्षणम् । यश्च पुरुषस्य परमात्मनः आराधनप्रकारस्तम् आध्यात्मिकयोगस्य अध्यात्मविद्यायाः यो विधिस्तं चोदाहर्तुमर्हसि ॥ २० ॥ ❀ ❀ योगेश्वराणां ज्ञानभक्त्यादिरूपेणैश्वर्येण यार्चिरादिगतिस्ताम् योगिनां लिंगशरीरस्य भंगः कारणे यो लयस्तम् ऋगादिवेदानामुपवेदानामायुर्वेदादीनां धर्मस्य धर्मशास्त्रस्य इतिहासपुराणयोश्च यल्लक्षणं तदुदाहर्तु मर्हसि ॥ २१ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

नृणां साधारणो धर्मः सत्यवचनादिः । सविशेषः यागादिसहितः । श्रेणीनामेकशिल्पोपजीविनाम् । राजर्षीणां राजानो भूत्वा ये ऋषयः । यथा मन्वादयः । तेषां साधारणो धर्मो विशेषधर्मश्च कथनीयः । धर्मकृच्छ्रेषु धर्मसङ्कटेषु । आपत्स्वित्यर्थः । जीविनां केवलजीववतां धर्मकरणासमर्थानां को धर्म इति प्रश्नः । तत्त्वानां प्रकृत्यादीनाम् । परिसङ्ख्यानं गणना । सांख्यमिति यावत् । तेषामेव लक्षणं व्यावर्त्तको धर्मः । तेषामेव हेतुपूर्वकं च लक्षणं तथात्वं तस्य कुत इति । पुरुषाराधनविधिः भगवत्परिचर्याप्रकारः । तथा योगस्य विधिः । योगविशेषस्याऽऽध्यात्मिकस्य च विधिः । योगस्त्वष्टाङ्गः साधारणः । आध्या[1]त्मिकस्तु श्रवणमनननिदिध्यासनैरधिकः । चकाराद्राजयोगादीनां लक्षणं कथयेति प्रश्नः । योगेश्वराणामैश्वर्यगतिं यथा कर्दमस्य । लिङ्गभङ्गस्तु योगिनाम् । लिङ्गशरीरस्य भङ्गः । यथा "न देहं बुबुधे गतम्" । "देहं तु तन्न[2]चरमः स्थितमुत्थितं वे"ति । वेदाश्चत्वारः । उपवेदाश्चत्वार आयुर्वेदादयः । धर्माणि धर्मशास्त्राणि । इतिहासो भारतादिः । पुराणं ब्राह्मादि । एतेषां लक्षणं परिमाणं च वक्तव्यमिति प्रश्नः । सम्प्लवो नाशः । यावान् यथेति प्रश्नः । सर्वभूतानां महतां भौतिकानां च विक्रमः पराक्रमः । कार्यकरणं भूतानामेव । प्रतिसङ्क्रमः कारणेऽनुप्रवेशः पूर्ववत् । इष्टं यागादि कर्मरूपेण क्रियमाणम् । पूर्त्तं खातादि । तयोरेकफलत्वात्सहप्रयोगः । कामानां अन्येषां काम्यकर्मणाम् । अथवा । कामामां विषयाणां यो भोगप्रकारः सः विधिः के विषया भोक्तव्याः के नेति । त्रिवर्गस्य धर्मार्थकामाख्यस्य । स्वतन्त्रपुरुषा[3]र्थपक्षेण त्रिवर्गनिरूपणान्न पौनरुक्त्यम् । एतेषां स्वरूपमुत्तरत्र वक्ष्य[4]ति । विधिः प्रकारः । नित्यनैमित्तिकादिविधयो वा ॥ १८-२१ ॥

---

१. अध्यात्मिक इति घ. । २. तत्रेति ग. । ३. पुरुषार्थपक्षेणादिति ग. ४. वक्ष्यते इति ख. ग. ।

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः**

**वेदोपवेदेत्य**त्र। अस्मिन् वाक्ये षष्ठ्यन्तपदमात्रसत्त्वेन कथनकर्मणोऽनिर्दिष्टत्वात्पूर्वोक्तमनुषज्याग्रिमं चानुसन्धायाहुः **लक्षणं परिमाणञ्चेति**॥ २०॥ ❀ ❀ **इष्टापूर्तस्ये**त्यत्र कामशब्दो यथा इष्टापूर्त्तसमभिव्याहारात् काम्यकर्मपरस्तथा त्रिवर्गसमभिव्याहाराद्विषयपरोपि शक्यवचन इत्याशयेन पक्षान्तरमाहुः **अथवे**त्यादि। तथा च, पूर्वं 'स सर्वधीवृत्त्यनुभूतसर्व' इतिपद्येन सोपपत्तिकं विषयान्तरासक्तिं प्रतिषिध्य सप्तमाध्याये ध्रुवादिकथा प्रस्तुता, तथा सति सर्वे विषया न त्याज्या इत्यायाति, ततः सन्देहात्पृच्छतीति व्याख्यानान्तरस्य तात्पर्यम्। विमर्शकोटौ पूर्वपक्षाध्यायत्वं समर्थयन्ति **तत्रे**त्यादि। तत्र **सम्मतस्येति** शुकोक्तप्रमेयमध्ये स्वाभिमतस्य। नन्वत्र नूतनप्रश्नबाहुल्यात्प्रश्नाध्यायत्वमेव कुतो नाङ्गीक्रियते इत्याकाङ्क्षायां तत्र बाधकमाहुः **अन्यथे**त्यादि। राजप्रश्नादेव पूर्वाध्यायानां कथनात्तदुक्तार्थज्ञानाभावे तेषां तदर्थज्ञाने च स्वस्य वैयर्थ्यमापादयेत्, प्रश्नैतावत्त्वं चकारादुक्तार्थानुवादश्च न सङ्गच्छेतातो नास्य प्रश्नाध्यायत्वमङ्गीक्रियते इत्यर्थः। तदेतद्दृढीकुर्वन्त्याहुः **त** इत्यादि। **त** इति आपाततः प्रतिपन्नाः। **अन्य** इति स्वयं सम्यक्बुद्धाः। तत्र गमकमाहुः **अन्यथे**त्यादि। **अन्यथेति** केवलप्रश्नाध्यायत्वे **शङ्कामिति** मूर्खत्वशङ्कां विरुद्धबुद्धित्वशङ्कां वा। तथा च, तदुत्पत्तावुत्तरं न वदेदत उत्तरदानादपि तथेत्यर्थः। नन्वत्राक्षेपास्तु द्वित्रा एव प्रतीयन्ते इति कथं सप्तमाध्यायाक्षेपकत्वमित्याशङ्कायां तद्व्युत्पादयन्ति **तत्रे**त्यादि। **तदाहेति** 'श्रोतव्यादीनी' त्याद्युक्तप्रमेयस्यानुपपन्नत्वं सार्द्धेनाहेत्यर्थः। **अत** इति। त्वद्वाक्यब्रह्मवाक्ययोर्विरोधस्यावश्यपरिहार्यत्वात्। **ज्ञानं यत** इति श्लोकोक्तेः प्रतिपन्नं स्वाशयं वदन् 'तस्माद्भारते' ति 'तस्मात्सर्वात्मने' तिवाक्ययोक्तमर्थमाक्षिपतीत्याहुः **यदा युक्तमि**त्यादि। **अद्भुतवीर्यस्येति** अद्भुतवीर्यविशिष्टस्य। ननु किमत्र प्रमाणमित्याकाङ्क्षायामाहुः **अन्यथे**त्यादि। केवलस्यैव श्रोतव्यत्वे, तस्य 'शश्वत्प्रशान्तमिति (२-७-४७) श्लोकोक्तरीतिकत्वेन वाङ्मनसागोचरतया 'यथाहमित्यादिना (२-८-३) 'शृण्वत' (२-८-४) इत्यादिश्लोकत्रयेण च वक्ष्यमाणं सर्वात्मनि मनोनिवेशरूपं हृदि शीघ्रं भगवत्प्रवेशादिरूपञ्च स्वानुभवगोचरं फलमनुपपन्नं स्यात्, अतः प्रत्यक्षमेव मानमित्यर्थः। ननु भगवत्पदेन चरित्रसाहित्यमनुक्तसिद्धमेव तादृशश्रवणादेव तव फलमतो न तव प्रत्यक्षमत्र मानमित्यत आहुः **चरित्रे**त्यादि। तथा च, चरित्रवैशिष्ट्यवत्। 'एवं स्वचित्ते स्वत एव सिद्ध' इति (२-२-५) पूर्वोक्तवाक्यात्प्रवेशस्यापि तथात्वेन तथा स्यादित्याशयेनाहेत्यर्थः। वीर्यविशिष्टश्रवणे गुणमाहुः **तथा सती**त्यादि। **दृष्टमिति** निःसङ्गमनोनिवेशरूपम्। एवमनङ्गीकारे दोषमाहुः **अन्ये**त्यादि। **अन्यथेति,** वीर्यविशिष्टस्य श्रोतव्यत्वानङ्गीकारे, निःसङ्गमनसोऽनिवेशे सति। **दोषाणामिति** मनोदोषाणाम्। **न, फलमिति**। स्यादिति शेषः। तथा च, दोषत्रयापातादपि केवलश्रवणमसङ्गतमित्याशयेनाप्याहेत्यर्थः। **एतावदिति** अखिलात्मत्वज्ञानात् मनसः सङ्गाभावरूपम्। **अन्यदिति** मनसि भगवत्प्रवेशरूपमभयरूपञ्च। एवं तस्माद्भारतेत्यादेः (२-१-५) स्वप्रतिपन्नार्थकथनपूर्वकं तत्राक्षेप उक्तः। अतः परं किं प्रमत्तस्येति (२-१-१२) पद्यद्वयोक्तमाक्षिपन् स्वप्रतिपन्नं वदतीत्याहुः **यदि**त्यादि। **बहुकर्त्तव्यत्वादिति**। अभयदानार्थं हृदि प्रवेशमारभ्य नान्तरीयकपापनिवर्त्तनान्तस्य कर्त्तव्यत्वात्। अतः कथं स्वल्पकालेन फलसिद्धिरित्याशयेन स्वप्रतिपन्नमाहेत्यर्थः। **स्वार्थमिति** भावप्रधानः प्रयोगः, 'स्वाना' मित्यनेनोक्तं यद्भवदीयत्वं तदर्थमित्यर्थः। तस्मात्स्वतःसिद्धा स्थितिरप्रयोजिकेति बहुकर्त्तव्यं विशदयन्ति **बहिरि**त्यादि। ननु भगवान् समर्थः, स्वाभाविकस्थित्यापि कार्यं साधयेदतो न तस्या अप्रयोजकत्वमिति शङ्कायामाहुः **अन्यथे**त्यादि। सत्यं समर्थस्ततोपि मर्यादां न भनक्ति, सर्वमुक्तिप्रसङ्गात्। अतः तत्रापि जीवकृतं साधनमावश्यकम्, तत्र ज्ञानादिमार्गीयसाधनस्याङ्गीकारे 'बहूनां जन्मनामन्त' इतिवाक्यात्तस्यां प्रक्रियायां तथा स्यात्। तत्र हेतुः **शरीरे**त्यादि। 'एवं शृण्वत' इति पद्यस्य तात्पर्यमुक्तम्, 'प्रविष्टः कर्णरन्ध्रेणे'त्यस्याहुः **अस्यामि**त्यादि। **आग्रहेणेति** जीवेन भगवति निःसङ्गमनसो निवेशने कृते 'ये यथा माम्' इतिप्रतिज्ञातेनाग्रहेण। तदा च, **शिथिलावयवत्व** इत्यादि। शमले धुते च गुणानां तत्कार्याणाञ्च शिथिलावयवत्वे मूलबन्धप्रच्युतौ ऐश्वर्यादिभिर्गुणैरेवाभयं स्याद्। इदमेवात्र तात्पर्यमित्यत्र गमकमाहुः **अत** इत्यादि। अग्रिमकार्यं स्फुटीकुर्वन्ति **तदे**त्यादि। **द्वितीयमिति** जन्मान्तरम्। तत्र हेतुः **न भयमि**त्यादि। ननु शुकेन भगवदभेदरूपमभयमुक्तमिति कथमेतावदेव फलमुच्यत इत्याकाङ्क्षायां (२-८-६) धौतात्मेत्यस्य तात्पर्यमाहुः **सिद्धान्ते**त्यादि। नन्वेवं शुकोक्त्यङ्गीकारे तदुक्तः शीघ्रं मोक्षोप्यङ्गीकार्य इत्याकाङ्क्षायां तत्र बाधकमाहुः **अन्यथे**त्यादि। भगवतो दृष्टपूर्वत्वादखिलात्मत्वरूपाद्भुतवीर्यज्ञानस्यानादेयत्वेन शीघ्रं मोक्षाङ्गीकारे तथा स्यादित्यर्थः। फलितमाहुः **तस्मादि**त्यादि। तथा च, 'न ह्यतोऽन्यः शिवः पन्था, (२।२।३३) इति, भगवान् ब्रह्म कार्त्स्न्येने, (२।२।३४) तिवाक्ययोः पञ्चमाध्यायस्य चार्थे विचारिते इदानीं भगवति मनोनिवेशनमग्रिमे जन्मनि सेवौपयिकदेहाप्तिस्ततोग्रिमेऽभयमिति ज्ञानप्रक्रिया दुर्घटेति हृदि भातम्, भक्तौ च माहात्म्यज्ञानमङ्गमिति तदद्भुतवीर्यकथा एव श्रोतव्या, न तु केवलो भगवान् इति पूर्वोक्तवाक्यानामितरेतरविरोधः परिहार्य इति प्रश्नाशयः। एवमग्रेपि बोध्यम्। 'श्रोतव्यादीनी' तिपद्यत्रयमाक्षिपतीत्याहुः **यदप्युक्तमि**त्यादि। **अनिर्मोक्षप्रसङ्ग** इति। जीवस्य देहसम्बन्धप्रवाहोऽनन्तभावः अनादिभावत्वात्, प्रकृतिपरमाण्वादिवत्, यन्नैवं तन्नैवं, घटादिवदित्यनुमानेनानन्तत्वनिश्चयात्तथेत्यर्थः। **भगवतैवे**त्यादि। तथा चाकृताभ्यागमो वैषम्यनैर्घृण्यापत्तिरपीत्यर्थः। **आसीदि**त्यादि। सार्द्धपद्यत्रयेण 'तस्माद्भारते' तिपद्योक्तं विधेयविशेषणांशमाक्षिपतीत्याहुः। यदप्युक्तं श्रोतव्येत्यादिभेदस्तु पूर्वव्याख्यानेपि व्युत्पादित इति जीवतुल्यता परि-

हर्त्तव्येपि तात्पर्यम्। ननु सर्वात्मत्वमौपचारिकमस्तु, तथासत्यसङ्गोदासीनत्वान्न कोपि दोषः इति चेत्तत्राहुः **औपचारिक** इत्यादि। **सिद्धमिति**। पञ्चमषष्ठाध्यायाभ्यां शुकेन साधितत्वात् सिद्धम्। तथा च, सर्वात्मेति यदास्य नाभ्यान्नलिनादित्यस्य ( २-८-८ ) च विरोधः परिहार्य इति तात्पर्यम्। एवं भगवत्त्वजीवावयवसंस्थाबोधकवाक्ययोः हरित्वब्रह्मकृतिबोधकवाक्ययोः ईश्वरत्वप्राकृततुल्यावस्थाबोधकवाक्ययोश्च विरोधः परिहार्य इति बोध्यम्। ननु प्रमाणकथनस्य कथमसङ्गतिरित्यत आहुः **विकल्पानामित्यादि**। **आहुरिति** बहुवचनेन हि लोकप्रसिद्धिरैतिह्यं वा प्रमाणतयोपन्यस्तं, तत्र 'यावान् कल्पो विकल्पो वे'ति ( २।८।१२ ) प्रश्नार्थभूतविकल्पपदार्थे युगभेदादिरूपेवधारिते तेषु पूर्वयुगीयादीनां लोकानां विवृत्या प्रसिद्ध्यैतिह्ययोरपि नाशात्प्रमाणकथनस्यासङ्गतिरित्यर्थः। यथा कालोऽनुमीयत ( २।८।१२ ) इति प्रश्नेन दिशां कर्णत्वमाक्षिप्तमित्याहुः **किञ्चेत्यादि**। ननु दिगभावे कथं तद्व्यवहार इत्यत आहुः **व्यवहार** इत्यादि। तथा च, यथादित्योदयवेलाविद्यमानतिथेः पूर्णत्वं तावन्मात्रव्याप्त्यौपचारिकम्, तथादिक्त्वमपि सूर्यकृतिविभागेन देशविशेषेष्वौपचारिकमिति तैरेव तद्व्यवहारोपपत्तिर्यथा च साङ्ख्यमते उपाधिभिः कालस्य तथेत्यर्थः। **नैवंविध** इति नौपचारिकः। ननु वर्णाद्यात्मको नित्य एव शब्दः श्रोत्ररूपोस्तु, तथा सति नानियतत्वमित्याहुः **शब्देत्यादि**। आयुर्मानप्रश्नेनाश्विनोर्नासारूपत्वमाक्षिपतीत्याहुः **यदपीत्यादि**। **अनिरूप्यत्वादिति**। अजागलस्तनवदप्रयोजकयोर्वैयर्थ्येन तथात्वात्। कालानुगतिप्रश्नाक्षेप्यमाहुः एवं **घ्राण** इत्यादि, स्थूलादिरूपज्ञापकोपाधौ विचार्यमाणे तेषामानन्त्यादनन्तघ्राणाद्यापत्तिस्तदनुरोधेनानन्तविराडङ्गीकारे दिवः स्थूलकालस्थायित्वविरोधस्तदनुरोधेनैकविराडङ्गीकारे गन्धादेः क्षणस्थायित्वविरोध इति ते परस्परं तथेत्यर्थः। **यावत्यः कर्मगतय** ( २-८-१३ ) इति प्रश्नाक्षेप्यमाहुः **किञ्च, चक्षुरित्यादि**। **पूर्ववदिति**। पतङ्ग उभे अहनी च परस्परासङ्गत इत्यर्थः। तदुपपादयन्ति **यत** इत्यादि। **सूर्यस्य परावृत्ताविति**। आदित्यो वा अस्माल्लोकादमुं लोकमेति सोमुं लोकं गत्वा पुनरिमं लोकमभ्यध्यायत्स इमं लोकमागत्य मृत्योरबिभेदि'ति श्रौतेन प्रकारेण परावृत्तौ। **सूर्यानन्तत्व** इति। 'नभो मासं नयन्त्यमी' त्यादिपौराणप्रकारेण तथात्वे। तथा च, सूर्यपरावृत्त्यादिकर्मगतिविचारे तदनैयत्याच्चक्षुरनुपपत्तिर्दिनादिव्यवस्थापकतद्गतिविचारे दैवमानुषादिदिनरात्रीणां परस्परविरुद्धत्वात्पक्षमानुपपत्तिरित्यर्थः। **यस्मिन्नित्यत्र उक्त** ( २-८-१४ ) इति, सर्वात्मकत्वबोधनादुक्तः। **तत्रे**त्यादि। तस्मिन् धिष्ण्ये कर्ममेलनेनैव प्राप्यमाणे साकेत्यर्थः। **एतेने**त्यादि, यथा कर्मसमवाय इति मेलनप्रकारप्रश्नेन गुणिनां जलानां कर्मविशेषसंमिश्रणप्रकारादेव नानारसवत्तेति तेषां बहूनां तालुत्वे रस इत्येकवचनविरोधादाक्षिप्तमित्यर्थः। **अनेने**त्यादि कर्मसंमिश्रणं येनोपगृह्यते ( २-८-१४ ) इत्युपग्रहप्रश्नेनोपग्रहीतुर्जीवादेर्नित्यत्वाद्गोलकेन्द्रिययोश्चानित्यत्वात्तस्याधिदैविकत्वानुपपत्तेश्चाक्षिप्तानीत्यर्थः। प्रकारान्तरेणाप्याक्षिपतीत्याहुः **किञ्चेत्यादि**। **विशेषस्येति** ब्रह्माण्डरूपायाः पृथिव्याः। **विशेषपदर्थानिति** विशेषपदस्यावान्तरार्थभूतान्। भूपातालेति सार्द्धेनेति शेषः। **महताञ्चेत्यत्र आक्षिपतीति** ( २-८-१६ ) अत्रानुशब्दस्य पश्चादर्थकत्वेन प्रह्लादस्य सूचयन् स्वस्य श्रैष्ठ्यं स्मृतिरूपतां चाक्षिपतीत्यर्थः। **ब्रह्माननमित्यपि** वर्णाश्रमविभागस्य धर्मकृतत्वेन तस्य पाश्चात्यत्वेन मुखादिरूपत्वादिरूपत्वाक्षेपो ज्ञेयः। **अवतारानुचरितमित्यत्र** ( २-८-१७ ) **तदेकमिति** सामान्ये नपुंसकम्। **लौकिक** इति। तथा च, पूर्वोक्ताप्राकृतत्वविरोधीत्यर्थः। **न स्यादिति**। तथा च, युगविचारो यागनित्यत्वबाधक इत्यर्थः। **अन्यथात्वादिति**। त्रेतायुगात्पूर्वं योगतपोज्ञानरूपत्वात्। तदेवोदाहरन्ति **यथेत्यादि**, **किञ्च युगधर्म** इत्यादि। एतदादीनामनित्यत्वप्राकृतत्वसूचनेन तदङ्गिभूतस्य यागस्यापि तथात्वापादनेनाक्षिपतीत्यर्थः। तत्त्वानां परिसङ्ख्यानमिति ( २-८-१९ ) प्रश्नाक्षेप्यमाहुः **यदपीत्यादि**। **अतः परमिति** 'लक्षणं हेतुलक्षण'मित्यत ( २-८-१९ ) आरभ्येत्यर्थः। **तस्येति** आत्मयोनेः। **इत्यादिभिरिति** एतदारभ्य पञ्चभिःपद्यैः। **चिन्तयेदितीति** उक्तमिति विशेषः। असङ्गतिं व्युत्पादयन्ति **तत्रेत्यादि**। **तत्रेति** हेतुलक्षणविचारे। **तत्र भवतीति** चित्ते भवतीति हेतोर्न कोपि सिद्ध इत्यर्थः। दूरापास्तत्वे हेतुमाहुः **चित्तमित्यादि**। तथा चास्मिन् लक्षणवाक्ये 'यत्तत्सत्त्वगुणं स्वच्छं शान्तं भगवतः पदम्। यदाहुर्वासुदेवाख्यमि'तिपूर्वकथनाद् भगवत एव सिद्धिर्नात्मन इति सा तथेत्यर्थः। पुरुषाराधनविधिप्रश्नाक्षेप्यमाहुः **यदपीत्यादि**। योगद्वयविधिप्रश्नाक्षेप्यमाहुः **स्थूलेत्यादि**। **असङ्गतमिति** वृत्तिनिरोधे धारणाया अप्यपायात्तथेत्यर्थः। योगेश्वरैश्वर्यगतिप्रश्नाक्षेप्यमाहुः **यदप्युक्तं स्थिरमित्यादि**। **इतीति**, इत्यादिभिः सप्तदशभिः। **असङ्गतं भवतीति** लिङ्गभङ्गो ह्यात्मप्राप्तौ तत उत्तरमक्षरप्राप्तावानन्दमयत्वमुक्तम्, तत्र जाते लिङ्गभङ्गे प्रतिबन्धस्य निवृत्तत्वात्तदव्यवहितोत्तरमानन्दमयत्वमुचितमतो विलम्बहेतोरनिर्वाच्यत्वादवसान इत्यसङ्गतं भवतीत्यर्थः। भगवान् ब्रह्मेत्यस्याक्षेपे ( २-२-३४ ) **वेदविचार** इति। मन्त्रब्राह्मणात्मकः शब्दो वेदः। साङ्ख्यागादिधर्मात्मज्ञानप्रतिपादकालौकिकः शब्दो वा वेद इति लक्षणपूर्वके तद्विचारेऽसङ्गतिं व्युत्पादयन्ति **यदीत्यादि**। तथा च, भक्त्यर्थयत्नकरणविमर्शस्यासङ्गतिरित्यर्थः। एवं **द्वितीयाध्यायोक्तमाक्षिप्तमनेनैव** तृतीयाध्यायप्रमेयमप्याक्षिप्यत इत्याहुः **यदपि कामनेत्यादि**। **तृतीयादिरिति**। तृतीयाध्यायाक्षेपारम्भः। असङ्गतौ हेतुमाहुः **वेदे हीत्यादि**। ननु पुराणादिसिद्धं तदिति चेत्तत्राहुः **भक्तीत्यादि**। एवं यद्यप्यसङ्गतिर्नास्ति, तथापि, पूर्वं भक्तेः स्वतःसिद्धत्वव्युत्पादनात्तस्याः साध्यत्वे निराकृते तथेत्यर्थः। सम्प्लवादिप्रश्नाक्षेप्यमाहुः **यदप्युत्पत्त्ये**त्यादि। इदञ्च पञ्चमादित्रयेस्ति, न तु चतुर्थ इति तदनाक्षेपे सप्तमाध्यायस्याक्षेपकत्वं कथमिति न शङ्कनीयम्, तस्याध्यायस्य नमनप्रार्थनमात्रपरतयाऽनिर्णायकत्वात्। उत्पत्तिविमर्शनेनैव तदर्थस्य गतार्थत्वाच्च, तदनाक्षेपेपि पञ्चमाद्याक्षेपेनैवाक्षिप्तप्रायतया प्रतिज्ञाभङ्गस्याभावादिति। आक्षेपं व्युत्पादयन्ति **यदिदमित्यादि**। **विशेषाभावादिति**। मतान्तरप्रति-

पन्नस्येवास्याप्यनित्यत्वाद्यनपायादित्यर्थः । षष्ठाध्याये आक्षिपतीत्याहुः यदपीत्यादि । भूतसंस्कार इत्यादि । अत्र तेनेति शेषो बोध्यः । तथा च, विशेषाभावात्तत्कल्पनवैयर्थ्येन निवारितेत्यर्थः । ननु यज्ञादेर्भगवदीयत्वाय तत्कल्पनमिति चेत्तत्राहुः भगवदीयत्वं त्वित्यादि । अन्यथैवेति समर्पणेनैवेत्यर्थः । पाखण्डत्वमेव न स्यादिति विधिभेदलीलावन्न स्यादित्यर्थः । निराकृता भवतीति दैत्यानां द्वेषादपि भगवत्प्राप्तेरुक्तत्वान्निराकृता भवतीत्यर्थः । व्यवस्थानं स्वरूपत (२-८-२२) इत्यस्याक्षेप्यमाहुः भिन्नतयेत्यादि । व्यर्थं स्यादिति तस्य स्वरूपावस्थानस्यापि भगवद्रूपत्वात्तेषां भगवत्त्वे ब्रह्मानेकत्वापत्त्या भेदवादापत्या वा भयनिवृत्त्यभावात्तथा स्यादित्यर्थः । अतः परं यथात्मतन्त्र (२-८-२३) इति पद्येन सप्तमाध्याय आक्षिपतीत्याहुः अवतारेत्यादि । तादृशमिति अवताररूपम् । ननु तदवताररूपस्य परित्यागाभावाद्विशेषो नाप्रयोजक इत्यत आहुः मायेत्यादि । प्रामाण्यमिति प्रेरणाक्षेपकमद्वाक्यप्रामाण्यम् । श्रूयमाणमिति उपेन्द्रदत्तपदेन भगवद्भक्तगणे श्रूयमाणम् ॥ २१ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

सविशेषः वर्णाश्रमनिबन्धनरूपविशेषसहितो यादृशो नृणां साधारणो मनुष्यमात्रेणानुष्ठेयो धर्मः । श्रेणीनां तत्तद्व्यवहारोपजीविनां धर्मः । राजर्षीणां राजानो भूत्वाऽपि ऋषिवद्वर्तमानानां भगवद्भक्तानां यो धर्मः । कृच्छ्रेषु आपत्सु जीवतां यो धर्मः ॥ १८ ॥ ❀ ❀ तत्त्वानां महदादीनां परिसङ्ख्यानं गणना । तेषामेव लक्षणमसाधारणो धर्मः । हेतुलक्षणं तत्तत्कार्यहेतुत्वेन च लक्षणम् । पुरुषाराधनविधिः भगवत्सेवाप्रकारः । आध्यात्मिकस्य प्रकृतिविविक्तात्मविषयस्य योगस्य च प्रकारः ॥ १९ ॥ ❀ ❀ योगेश्वराणामैश्वर्याणि अणिमादीनि तेषां गतिः स्वरूपम् । योगिनां लिङ्गशरीरस्य भङ्गस्त्यागप्रकारः । वेदा ऋग्वेदादयः, उपवेदा आयुर्वेदादयः धर्मा धर्मशास्त्राणि, तेषां इतिहासपुराणयोश्च गतिः स्वरूपम् ॥ २० ॥ ❀ ❀ सर्वभूतानां कार्यकारणरूपेण वर्तमानानां पृथिव्यादिपञ्चमहाभूतानां सम्प्लवः सम्यक् प्लवनमुत्पत्तिः, विक्रमः स्थितिः, प्रतिसङ्क्रमः प्रलयः । इष्टं वैदिकं कर्म, पूर्तं 'वापीकूपतडागादिदेवतायतनानि च ॥ अन्नप्रदानमारामः पूर्तमित्यभिधीयते' इति स्मृत्युक्तं स्मार्तं कर्म, तयोर्द्वन्द्वैक्यं तस्य, तथा काम्यानां तत्तत्कामनयाऽनुष्ठेयानां कर्मणां, तथा धर्मार्थकामरूपत्रिवर्गस्य च यो विधिः प्रकारः ॥ २१ ॥

### हिन्दी अनुवाद

मनुष्योंके साधारण और विशेष धर्म कौन-कौन-से हैं ? विभिन्न व्यवसायवाले लोगोंके, राजर्षियोंके और विपत्तिमें पड़े हुए लोगोंके धर्मका भी उपदेश कीजिये ॥ १८ ॥ ❀ ❀ तत्त्वोंकी संख्या कितनी है ? उनके स्वरूप और लक्षण क्या हैं ? भगवान्‌की आराधनाकी और अध्यात्मयोगकी विधि क्या है ? ॥ १९ ॥ ❀ ❀ योगेश्वरोंको क्या-क्या ऐश्वर्य प्राप्त होते हैं, तथा अन्तमें उन्हें कौन-सी गति मिलती है ? योगियोंका लिङ्गशरीर किस प्रकार भङ्ग होता है ? वेद, उपवेद, धर्मशास्त्र, इतिहास और पुराणोंका स्वरूप एवं तात्पर्य क्या है ? ॥ २० ॥ ❀ ❀ समस्त प्राणियोंकी उत्पत्ति, स्थिति और प्रलय कैसे होता है ? बावली, कुआँ खुदवाना आदि स्मार्त्त, यज्ञ-यागादि वैदिक एवं काम्य कर्मोंकी तथा अर्थ-धर्म-कामके साधनोंकी विधि क्या है ? ॥ २१ ॥

**यथानुशायिनां सर्गः पाखण्डस्य च सम्भवः । आत्मनो बन्धमोक्षौ च व्यवस्थानं स्वरूपतः ॥ २२ ॥**
**यथाऽऽत्मतन्त्रो भगवान् विक्रीडत्यात्ममायया । विसृज्य वा यथा मायामुदास्ते साक्षिवद्विभुः ॥ २३ ॥**
**सर्वमेतच्च भगवन् पृच्छते मेऽनुपूर्वशः । तत्त्वतोऽर्हस्युदाहर्तुं प्रपन्नाय महामुने[1] ॥ २४ ॥**
**अत्र प्रमाणं हि भगवान्[2] परमेष्ठी यथाऽऽत्मभूः । परे[3] चेहानुतिष्ठन्ति पूर्वेषां पूर्वजैः कृतम् ॥ २५ ॥**
**न मेऽसवः परायन्ति ब्रह्मन्ननशनादमी । पिबतोऽच्युतपीयूषमन्यत्र कुपिताद् द्विजात् ॥ २६ ॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

अनुशायिनां लीनोपाधीनां जीवानाम् । आत्मनो जीवस्य व्यवस्थानं बंधमोक्षातिरिक्तस्वरूपेणावस्थानम् ॥ २२ ॥ ❀ ❀ उदास्ते प्रलये ॥ २३ ॥ ❀ ❀ चशब्दादपृष्टमपि ॥ २४ ॥ ❀ ❀ प्रमाणं सम्यक् ज्ञाता यतस्तव ब्रह्मनारदव्यासक्रमेण संप्रदायोऽस्तीति सामान्यन्यायेनाह । परे चेति । यद्वा त्वदन्ये प्रायशो गतानुगतिका एव न तत्त्वविद इत्याह । परे चेति ॥ २५ ॥ ❀ ❀ ननु तवानशनद्विजकोपाभ्यां व्याकुलस्य कुतः श्रवणं तत्राह । नेति । न परायंति नापगच्छंति न व्याकुलीभवंतीत्यर्थः । अच्युतकीर्तिपीयूषम् ॥ २६ ॥

---

१. प्रा० पा०—महामते । २. प्रा० पा०—भगवान् पर० । ३. प्रा० पा०—अपरे ह्यनुतिष्ठन्ति ।

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

उदास्ते साक्षिवदुदासीन इव तिष्ठति ॥ २३ ॥ ❀ ❀ उदाहर्तुमितिहासादिपुरस्कारेण तत्त्वतो याथार्थ्येन वक्तुम् । प्रपन्नाय शरणमाप्ताय । हे महामुने इति प्रतिवचनसामर्थ्यं सूचयति ॥ २४ ॥ ❀ ❀ परेऽपरे च पूर्वेषां मरीच्यादीनामपि पूर्वजैर्ब्रह्मवादिभिः कृतमनुष्ठितं शास्त्रार्थम् । त्वमपि तदाचरणमेवाश्रयेति चेदाह—यद्वेति । व्यवहारासक्तत्वात्तेषां तत्त्वविस्मृतिर्भविष्यति त्वं तु व्यवहारातीतत्वात्तत्त्ववित्तेभ्यः सर्वेभ्य उत्कृष्टोऽस्यतस्त्वदुक्तौ मे सर्वथैव विश्वास इति भावः । ननु त्वं त्वन्यकविमुखतोऽवगततत्त्वोपि किं पुनर्मां पृच्छसीत्यत आह–अत्रेति । अन्येषां कवीनां मध्ये हि निश्चितमेव भवान्प्रमाणम् अतस्तत्तदर्थाभिज्ञोप्यहं भवन्मुखात्कीदृगुत्तरमाविर्भविष्यतीत्याकांक्षायां पृच्छामि । परमेष्ठी यथात्मभूः परमेश्वरप्रसादात्स्वतः सिद्धज्ञानस्तथा भवानपि परेऽन्ये तु पूर्वेषां पूर्वजैर्विद्वद्भिरेव यद्यत्कृतं सर्वं दृष्ट्वा तेभ्योधीत्याधीत्यानुतिष्ठतीति विश्वनाथः ॥२५॥ ❀ ❀ इत्यर्थ इति । अशनादप्यतिबलहेतुरसायनपानादिति भावः । कुपिताद्द्विजादित्यनेन द्विजकोपहेतुको मरणकालो लक्ष्यते । तथा च द्विजकोपहेतुकमरणाधिकरणसप्तमदिनरूपकालादन्यत्र कालेऽच्युतपीयूषं पिबतो मेऽसवोऽनशनान्न परायंतीत्यन्वयः । सप्तमदिने मरणस्य शापबलेनावश्यंभावित्वात्ततः पूर्वमच्युतपीयूषपानं कुर्वतोऽन्याननुसंधानाच्चोभयनिमित्तापि व्याकुलता नास्तीति भावः । यद्वाऽच्युतपीयूषं पिबतो मेऽसवोऽनशनाद्द्विजकोपाच्च न परायंति किंत्वन्यत्राच्युतपीयूषपानाभावे परायंतीत्यर्थः । बालबोधिन्यां तु–कुपितद्विजाद्धेतोर्यन्मरणं ततोन्यत्र तद्विना तस्य निवृत्तिस्तु नास्तीत्यर्थ इति व्याख्यातम् । चक्रवर्त्ती तु–कुपितद्विजात्सप्तमदिवसे तक्षकरूपो द्विज आयास्यति तस्मादन्यत्र तदागमने सत्यसवः पारस्यंत्येवेति व्याचख्यौ ॥ २६ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

( साधारण इति । साधारणो जातिमात्रनिबन्धनः अहिंसादिलक्षणः ॥ १८—२५ ॥

### श्रीमद्वीरराघवव्याख्या

सर्वभूतानां संप्लवः अवांतरप्रलयः उत्पत्तिर्वा विविधः क्रमः विक्रमः स्थितिः प्रतिसंक्रमः संहारः महाप्रलयः इष्टं वैदिकं कर्म पूर्तं त्रिवर्गस्य धर्मार्थकामानां विधिः प्रकारः ॥ २२ ॥ ❀ ❀ अनुशायिनां भुक्तशेषकर्मणा सह परलोकभ्रष्टानां सर्गः उत्पत्तिः प्रकारः पाखंडस्य पाखंडधर्मस्य संभवः उत्पत्तिः आत्मनो जीवस्य बंधमोक्षप्रकारः स्वरूपतो व्यवस्थानं मुक्तिदशायामवस्थानं तत्प्रकार इत्यर्थः ॥ २३ ॥ ❀ ❀ आत्मतंत्रः स्वतंत्रः विभुः सर्वांतरो भगवान् आत्ममायया स्वनियाम्यमायया यथा विक्रीडति पुनश्च मायां विसृज्य यथा येन प्रकारेण साक्षिवत्साक्षाद्द्रष्टृवदुदास्ते प्रलये उदासीन आस्ते ॥ २४ ॥ ❀ ❀ एतत्सर्वं चकारादपृष्टमपि गुह्यं यत् तच्च पृच्छते प्रपन्नाय च मे मह्यं हे भगवन् हे महामते तत्त्वत उदाहर्तुं उत्तरं वक्तुं त्वमर्हसि । अर्हताद्योतकमिदं विशेषणद्वयं भगवन्महामते इति च उत्पत्तिं प्रलयं चैव भूतानामगतिं गतिं वेत्ति विद्यामविद्यांच स वाच्यो भगवानिति । हि स्मर्यते महामतित्वं च त्रैकालिकवस्तु याथात्म्यज्ञानवत्त्वम् ॥ २५ ॥ ❀ ❀ योग्यतामेवोपपादयति अत्रेति । अत्र पृष्टेष्वर्थेषु भवान्प्रमाणं सम्यग्ज्ञाता तत्र दृष्टान्तः आत्मनः परमात्मनः भूः जातः परमेष्ठी ब्रह्मा यथा प्रमाणं तद्वत् ब्रह्मनारदव्यासक्रमेण संप्रदायोऽप्यस्तीत्याह पूर्वेषामपि पूर्वजैः कृतं परेऽर्वाच अनुतिष्ठंति ॥ २६ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

विक्रमो विविधचरित्रलक्षणः प्रतिसंक्रमः संहारः इष्टस्य योगादेः पूर्तस्य वापीकूपादेः काम्यानां कार्यादीनां त्रिवर्गस्य धर्मार्थकामलक्षणस्य ॥ २२ ॥ ❀ ❀ प्रकृतावनुशयनादनुशायिनः संसारिणस्तेषां सर्गादेः परिभ्रष्टानां स्वभावं वा आत्मनो जीवस्य मोक्षं विशिनष्टि व्यवस्थानमिति । यद्वा तारतम्येनावस्थानम् ॥ २३ ॥ ❀ ❀ आत्मतंत्रो भगवानात्ममायया स्वेच्छया चित्प्रकृत्या च जगत्सृष्ट्यादिना यथा येन प्रकारेण विक्रीडति । द्विविधात्ममायास्ति स्वरूपभूता तद्वशाचेति । तत्र तद्वशया जीवं संसारयन् स्वरूपभूतया भक्त्यादिसाधनसंपन्नं साधयन् संसाराद्विमोचयन् सुखेन रमयन् पुनस्तद्वशबंधकशक्तिं विसृज्य साक्षिरूपपुरुषवन्निर्लेपो यथोदास्ते प्रकृतिमुक्त्वा तिष्ठति द्वेधा चात्ममाया तद्रूपा तद्वशा चेति तद्वशया संसारयति स्वरूपया विमोचयत्युदास्ते इत्यादिश्रुतेर्नानिर्वाच्या मायात्रोच्यते ॥ २४ ॥ ❀ ❀ प्रश्नराशिमुपसंहरति सर्वमिति । च शब्दादन्यदपृष्टं च यदनुपूर्वशः पूर्वं वक्तव्यमिति प्रतीयते तत् क्रमेण उदाहर्तुमर्हसीति प्रपन्नायेत्यनेन आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनं रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिरित्युक्तमर्थमात्मनः सूचयति । महामुने इत्यनेन शुकस्य स्वप्रतिवचनं सामर्थ्यसद्भावं सूचयति ॥ २५ ॥ ❀ ❀ सर्वज्ञस्यापि केनचिन्निमित्तेनान्यथा वचनं संभाव्यत इति शंकमानाशंकां परिहरति अत्रेति । यथात्मभूः परमात्मन उत्पन्नः परमेष्ठी सर्वजीवोत्तमो ब्रह्मा सर्वजनानां सर्वशास्त्रेषु प्रमाणं सम्यग्वक्तव्यत्वेनाप्ततमस्तथा व्यासपुत्रो भवानप्यत्रास्मदर्थे प्रमाणं हि यस्मात्तस्मादुक्तं युक्तमिति एतदेवोपपादयति अपर इति । अपरेऽन्येषां मरिच्यादीनामपि पूर्वजैर्ब्रह्मभावादिभिः कृतं शास्त्रार्थमनुतिष्ठंति हि प्रसिद्धं यद्यदाचरति श्रेष्ठ इत्यादौ अनेनापरेऽनुतिष्ठंतीति यस्मात्परमेष्ठी प्रमाणमतो भवानप्यत्र प्रमाणमिति वाक्यार्थ उक्तो भवतीति ॥ २६ ॥

**श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या**

अत्रेति । आत्मभूः श्रीनारायणोद्भूतत्वात् तत् प्रकाशितज्ञान इत्यर्थः । नन्वहं गुरुपरम्परयापि प्राप्तज्ञान इति चेत्तत्राह परे चेति । तादृशत्वं त्वन्येषामपि वर्त्तत इत्यर्थः । न ( न त्वं गुरुपरम्परया प्राप्तज्ञान इति भावः ) । ॥ २५ ॥ ❀ ❀ यदन्यत् पृष्टं तदपि हरेः कथां विना न कथयितव्यमित्यभिप्रेत्याह न मेऽसव इति । हे ब्रह्मन् अनशनात् तथा कुपितात् द्विजादपि न मेऽसवः परायन्ति । तत्र हेतुः पिबतोऽच्युतपीयूषमिति । अन्यत्र अन्यदा तु तस्मात्तस्मादपि परायन्तीत्यर्थः ॥ २६ ॥

**श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या**

अनुशायिनां महाप्रलये ईश्वरे लीनोपाधीनां जीवानां सर्ग इति साधकभक्तानां साधनसिद्धिजिज्ञासायाम् । पाखण्डस्येति भक्त्यसम्भवजिज्ञासायाम् । आत्मनो मायास्पृष्टजीवस्य बन्धमोक्षाविति भक्तिमिश्रज्ञाने ज्ञानमिश्रायां भक्तौ वा । स्वरूपतो व्यवस्थानमिति आदित एव सदा मायास्पर्शशून्यस्य विष्वक्सेनादेर्जीवस्य नित्यमुक्तस्य नित्यभक्तौ ॥ २२ ॥ ❀ ❀ विविधं क्रीडति सृष्ट्यादिसमये विसृज्य महाप्रलये त्यक्त्वा । यद्वा आत्मतन्त्रो भगवान् श्रीकृष्ण एव अन्येषामवताराणामवतारिणश्चात्मतन्त्रत्वेऽपि विप्रबालकहरणादौ कृष्णैकपारन्त्र्यदर्शनात् । आत्ममायया योगमायया पूतनावधादौ क्रीडति । यथा वा विसृज्य विशेषेण सृष्ट्वा मौषलादौ उदास्ते साक्षिवत् नतु साक्षी ॥ २३ ॥ ❀ ❀ चकारादपृष्टमपि ॥ २४ ॥ ❀ ❀ नन्वन्येभ्य ऋषिभ्यः सकाशात् त्वं पूर्वमेवावगतैतत्सर्वार्थ एव भवति तदपि किं मां पुनः पृच्छसीत्यत आह अत्रेति । अत्र तेषां सर्वेषामपि ऋषीणां मध्ये हि निश्चितमेव भवान् प्रमाणम् । अतस्तत्तदर्थाभिज्ञोऽप्यहं भवन्मुखपद्मात् कीदृगुत्तरमाविर्भवतीत्याकांक्षायां पृच्छामि यथा परमेष्ठी आत्मभूर्भगवत्प्रसादात् स्वतः सिद्धवेदार्थज्ञानस्तथा भवानपि । परेऽन्ये तु पूर्वेषां पूर्वजैर्विद्विद्भिरेव यद्यत् कृतं तत्तत् सर्वं दृष्ट्वा तेभ्योऽधीत्याधीत्य अनुतिष्ठन्ति ॥ २५ ॥ ❀ ❀ न चात्र मत्कष्टे दृष्टिः कार्य्येत्याह नेति । न परायन्ति न व्याकुलीभवन्ति । तत्र हेतुः अच्युतकथापीयूषं पिबतः । किन्तु कुपिताद् द्विजात् सप्तमदिवसे तक्षकरूपो द्विज आयास्यति तस्मादन्यत्रेति तदागमने सति असवः परायस्यन्त्येव ततश्च अच्युतपीयूषपानं नाहं प्राप्स्यामीत्यतो भवता कृष्णकथायां न विलम्बनीयमिति भावः ॥ २६ ॥

**श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः**

सर्वभूतानां यः संप्लवः सम्यक्प्लवनमुत्पत्तिः विक्रमः स्थितिः प्रतिसंक्रमः संहारः इष्टस्य वैदिकस्य कर्मणः पूर्तस्य स्मार्तस्य वापीकूपादिनिर्माणस्य च तमुदाहर्तुमर्हसि तत्र च काम्यानामग्निहोत्रादीनां त्रिवर्गस्य च धर्मार्थकामानां यो विधिस्तमुदाहर्तुमर्हसि ॥ २२ ॥ ❀ ❀ अनुशायिनां कर्मफलभोगाय स्वर्गे लीनानां यश्च सर्गः भुक्तशेषेण कर्मणा पुनरिहोद्भवस्तं यश्च पाखंडस्य संभवस्तं आत्मनो जीवस्य बंधमोक्षौ यौ तौ स्वरूपतः मुक्तौ यद्व्यवस्थाने तच्चोदाहर्तुमर्हसि ॥ २३ ॥ ❀ ❀ आत्मतंत्रः स्वाधीनः विभुः सर्वगः भगवान् यथा सृष्टौ आत्ममायया स्वशक्तिभूतया विक्रीडति यथा वा प्रलये मायां विसृज्य साक्षिवदुदास्ते उदासीन आस्ते ॥ २४ ॥ ❀ ❀ एतत्सर्वं पृष्टं चकारादपृष्टमपि पृच्छते प्रपन्नाय मे मह्यं तत्त्वतः उदाहर्तुमुत्तरं वक्तुं त्वमर्हसि अर्हत्वद्योतकं संबोधनद्वयम् ॥ २५ ॥ ❀ ❀ अर्हत्वमेवोपपादयति अत्रेति । अत्र पृष्टेष्वर्थेषु भगवान् यथा आत्मभूः परमात्मपुत्रः परमेष्ठी ब्रह्मा तथाप्रमाणं सम्यक् ज्ञापकः यतः पूर्वेषां व्यासनारदादीनां पूर्वजैर्ब्रह्मादिभिः कृतमाचरितं परे आर्वाञ्चः भवदादयः अनुतिष्ठंति स्वेच्छकमतो मादृशैः भवद्विधाः सदनुशिष्टप्रष्टव्या इति फलितोर्थः ॥ २६ ॥

**श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या**

यश्चाऽनुशायिनां सर्गः । अनुशायिनो जीवविशेषाः । ये भगवच्छयनमनु शेरते त्रैलोक्यकर्मानुवर्त्तिनः । दैत्याः ज्ञानिनश्च तदनुवर्त्तिनश्च नाऽनुशायिनः । अन्ये जीवास्त्वनुशायिनः । अनुशायिनां यः सर्गः स यावान् यादृश इति प्रश्नः । पाखण्डस्य वेदमार्गविरोधिनः । चकाराद्विधर्मादेः सम्भव उत्पत्तिर्यादृश इति प्रश्नः । आत्मनो जीवस्य अनुशायिव्यतिरिक्तस्य बन्धमोक्षौ ज्ञानिनां मोक्षो दैत्यानां बन्ध उभयमुभयेषामिति वा प्रश्नः । व्यवस्थानं स्वरूपतः । बन्धमोक्षव्यतिरेकेण आत्मा कथं तिष्ठति कीदृग्रूप इति प्रश्नः । अस्योत्तरं—"अशरीरं वाव सन्तमि"ति 'भविष्यतीति[1] । भगवान् वा अत्र ब्रह्माण्डे अवतीर्णः स्वतन्त्रोऽपि यथा आत्ममायया विक्रीडति । अवतीर्य भगवान् कथं क्रीडतीत्यर्थः । अथवा । वैकुण्ठेऽन्यत्र वा कथं क्रीडतीति । मायासम्बन्धे कीदृशं भगवच्चरित्रमित्यर्थः । मायां विसृज्य वा[2] यथा भगवानुदास्ते । साक्षिरूपं हि सर्वं पश्यत्युदासीनं साङ्ख्यसिद्धान्तगम्यं तदेकं भगवतो रूपम् । तद्वन्मूलरूपमप्याहोस्विन्नेति प्रश्नः । उभयकरण[3]समर्थत्वात्सन्देह इति विभुरित्यनेनोक्तम् ॥ १४–२३ ॥ ❀ ❀ एवमत्यन्तोपयोगिनः प्रश्नान्निरूप्य सामान्यतोऽन्यान्पृच्छन्नुपसंहरति—सर्वमेतच्चेति । एतत्पूर्वोक्तम् । चकारादपृष्टमपि । भगवन्

१. वक्ष्यतीति ख. । २. वा नास्ति ग. । ३. सामर्थ्यादिति ग. ।

भवान् पृच्छतो मे मम[1] कार्यार्थम्। अनुपूर्वशः प्रश्नानुपूर्व्येण। यथाजिज्ञासमत्र प्रश्नाः कृताः। क्रमेणोत्तरे[2] तथा तथा चित्तं समाहितं भवतीत्यानुपूर्व्यैणैव वक्तव्यमित्युक्तम्। अस्मदधिकारानुसारेण वा न वक्तव्यं किन्तु तत्त्वतः। अनेन मतान्तराण्यपि व्युदस्तानि। यद्यपि ममाऽधिकारो नास्ति श्रवणे तथापि त्वमुदाहर्त्तुमर्हसि। श्रोतुरप्यधिकारोऽपेक्ष्यत इति चेत्तत्राह—**प्रपन्नायेति**। प्रपन्नाय हि सर्वं वक्तव्यम्। नचैतदुपचारवचनम्। तद्भवानेव जानातीत्याह—**महामुन इति**। मुनिरन्तःकरणस्थितं जानाति। महामुनिस्तु भाव्यमपीति। मम यत्तत्त्वज्ञानं भाव्यं मम या वा [3]प्रपत्तिस्तदुभयं भवान् जानातीति सम्बोधनम्॥ २४॥ ❀ ❀

ननु सर्वे मुनयः। सर्वे च सर्वज्ञाः। ते च नानाविधवक्तारः। यथा तेषां पाक्षिकं प्रामाण्यं तथा ममाऽपि भविष्यतीति न शङ्कनीयम्। तदाह—**अत्र प्रमाणं भगवानिति**। प्रमाणशब्दः अबाधितज्ञाने वर्त्तते। बाधयोग्यव्यतिरिक्ते वा। तत्सम्बन्धी यः प्रमाता प्रमाकरणं वा प्रमाविषयो वा तत्सर्वं प्रमाणमित्युच्यते। केचित्तु प्रमाणशब्दं नानार्थमाहुः। तत्र येषां ज्ञान[4]प्रामाण्यं न व्यभिचरति उत्पत्तिप्रभृत्यामरणं ते प्रमाणशब्देनोच्यन्ते। यथाऽस्मिन्नर्थे वेदव्यतिरिक्ते प्रमेये यथा आत्मभूः प्रमाणम्। यथा ऋषीणामन्योन्यं विरोधाः, न तथा कस्यचिदपि ब्रह्मवाक्ये। तस्य परमप्रामाण्ये हेतुः—आत्मभूरिति। परमेष्ठीति। परमे तिष्ठतीति। उत्पत्त्या स्थित्या च भगवत्पर इति तत्प्रामाण्यम्। एवं भगवानपि प्रमाणमित्यर्थः। ननु केवलं [5]भगवद्वचनेन कथं प्रामाण्यं भविष्यति, जायमानं वा कथं सर्वजनीनं भविष्यतीत्याशङ्क्याह—**परे चेहाऽनुतिष्ठन्तीति**। परे च मत्तोऽपि ये महान्तः अधिगतपरमार्थास्तेऽपि त्वदुक्तेऽर्थे विश्वासं कुर्वन्त्यनुतिष्ठन्ति च तं पदार्थम्। इह अस्मिन् भक्तिमार्गे। तेषामपि पूर्वेषां पूर्वजैः कृतम्। त्वदुक्तोऽर्थः सर्वैरेवाऽनुष्ठितः सर्वैरेव क्रियते। अतस्त्वद्वाक्यं सर्वत्र प्रमाणम्। अथवा अस्माकं साक्षाद्भगवानेव प्रमाणम्। परे अन्ये तु स्वपूर्वेषामपि ये पूर्वजास्तैर्यत्कृतं तदेवाऽनुतिष्ठन्ति। चस्त्वर्थे। न तु प्रमाणं किञ्चिद्विचारयन्ति। अस्माकं तु त्वदुक्ते न सन्देह इत्यर्थः॥ २५॥ ❀ ❀

किञ्च। त्वद्वचनादेव जीवामि। अन्यथा मरणमेव स्यात्। तक्षकाख्यमहाभयस्य श्रुतत्वात्। तदाह—**न मेऽसवः परायान्तीति**। मे असवः प्राणाः अनशनादपि न[6] परायान्ति नाऽपगच्छन्ति। ब्रह्मन्निति सम्बोधनं तज्ज्ञानाय। अनशनं हि प्राणनिवारकम्। **अमीति** बाधितप्राणानां प्रदर्शनम्। राजत्वादेकेनैवोपवासेन क्लिष्टः। अगमने हेतुमाह—**पिबतोऽच्युतपीयूषमिति**। अच्युतस्य सम्बन्धि कथारूपं पीयूषम्। अच्युत एव वा पीयूषम्। अनेन स्वस्योत्तमाधिकारो द्योतितः। ननु यथेदममृतं [7]क्षुधं निवारयति तथा शापमपि निवारयिष्यतीत्याशङ्क्याऽऽह—**अन्यत्र कुपिताद्विजादिति**। अनेन कथामृतेन सर्व एव प्राणोपघातका निवर्त्तन्ते। परं यः कुपिताद्विजात् तक्षकाख्यो यः प्राणोपघातकः स न निवर्त्तते। अन्यथा स कोपस्तमेव द्विजं नाशयेत्। मृत्युना ह्याक्रान्तः कोप एकं सर्वथा नाशयति। तत्र ब्राह्मणमरणापेक्षया स्वमरणमेव वरमित्यस्मत्कामनया सर्वनिवारकमपीदममृतं तन्न निवारयिष्यतीत्यर्थः। एवमापाततः प्रश्नार्थो निरूपितः। अस्याऽध्यायस्य विमर्शमध्यपातात् विमर्शोपयोगी कश्चन पदार्थो वक्तव्यः। तत्रोपपत्तिविमर्शस्योपक्रान्तत्वादुपपत्तेस्त्रिरूपत्वादाक्षेपसिद्धान्तफलेषु प्रथममाक्षेपो वक्तव्यः। स सर्वाक्षेपकश्चेत् श्रोतुरधिकारं प्रच्यावयेदिति सप्ताध्याय्यां यत्प्रमेयं निरूपितं तत्र सम्मतस्य पर्यवसानपर्यन्तं स्वबोधं निरूप्य यत्रैव पर्यवसानज्ञानं तद्यथाश्रुतमाक्षिपतीति पूर्वपक्षाध्यायोऽयमिति मन्तव्यम्। अन्यथा पूर्वाध्यायानां स्वस्य[8] वा वैयर्थ्यमापादयेत्। प्रश्नैतावत्त्वं चाऽसङ्गतं स्यात्। अनन्ता एव प्रश्नाः कर्त्तव्याः स्युः। ते आक्षिप्यन्ते। अन्ये च पर्यवसितार्थकथनेन स्वबोधविषया जाता इति बोध्यन्ते। अन्यथा शृण्वत इत्यादिश्लोकैर्निरूपितं प्रमेयं शुकेनाऽनिरूपितमित्यप्रामाणिकं स्यात्। गुरोर्वा शङ्कामुत्पादयेत्। तस्मात्सप्ताध्याय्येवात्र पूर्वपक्षेण विचार्यते। तत्र प्रथमं श्रोतव्यादीनीति श्लोकत्रयेण साधारणाधिकारं निवार्य अभयमिच्छतां य उपायः कथितः सोऽनुपपन्नः। ब्रह्मणा नानाधिकारेण प्रमेयवक्तव्य[9]त्वोपदेशात्। तदाह—**ब्रह्मणा नोदित इति**। इदमेव हि तत्त्वमधिकारभेदेन सर्वं निरूपणीयमिति। अतः केषाञ्चिदधिकारः केषाञ्चिन्नाऽऽधिकार इति पक्षो न सम्भवति। **"सर्वेऽधिकारिणो ह्यत्र विष्णुभक्तौ यथा नृपे"**ति वाक्यविरोधश्च। अतः—**एतद्वेदितुमिच्छामीति वचनम्**। यदप्युक्तं केवलं भगवान् श्रोतव्य इति। तदप्यनुपपन्नम्। अद्भुतवीर्यस्यैव श्रोतव्यत्वात्। अन्यथेदं वक्ष्यमाणं फलमनुपपन्नं स्यात्। चरित्रमात्रत्वे भगवान् स्वभावत एव प्रविष्ट इति कस्याऽपि संसारो न स्यात्। शास्त्रवैफल्यं च। तदाह—**हरेरद्भुतवीर्यस्येति**। अद्भुतवीर्यस्य कथा अद्भुतवीर्यरूपाः। तथा सति श्रवणादीनां दृष्टमेव द्वारं स्यात्। अन्यथा त्वदृष्टकल्पना प्रसज्येत। दोषाणां प्रतिबन्धकत्वाच्च न फलम्। **"गुणानुषक्तं व्यसनाय जन्तोरि"**ति वाक्यविरोधश्च। तदाह—**यथाऽहमखिलात्मनीति**। श्रवणादिना भगवति मनोनिवेशने[10] अस्मिन् जन्मन्येतावदेव फलम्। जन्मान्तरे त्वन्यत्। यदुक्तं अल्पेनैव कालेन कार्यं सिद्ध्यतीति। तदप्यसङ्गत्यक्ष्ये कलेवरमिति। ततो भगवान् मनसा गृहीत इति जन्मान्तरे भगवत्सेवौपयिकं शरीरं निष्पादयति तदा[11]नीं स्वानामिति भविष्यति भावसरोरुहत्वं च। बहिः स्थितस्यैवाऽन्तःप्रवेशने कार्यसिद्धिर्न त्वन्तःस्थितेन कार्यम्। यथा दार्वग्निना तदाहृतम्। दृष्टोपाये भगवतो बहुकर्त्तव्यत्वात्। तदाह—**शृण्वत इति**। स्वार्थं तु मनोनिवेशनमेव। अत एव निर्धार्य वदति—

१. मत्कार्यार्थमिति ख.। २. णोत्तरेणेति ग.। ३. प्रतिपत्तिरिति ग.। ४. ज्ञानमिति ख. ग.। ५. भवद्वचनेनेति क. घ.। ६. न यान्तीति घ.। ७. क्षुधामिति घ.। ८. स्वस्य वैयर्थ्यमिति ग.। ९. वक्तव्योप देशादितिख.। १०. निवेशेऽस्मिन्निति ख.। ११. तदा स्वानामिति ख.।

विशत इति। अन्यथा प्रक्रियान्तरे रागाभावो जन्मशतेनापि न स्यात्। शरीरेन्द्रियाणां गुणकार्यत्वात्। अस्यां प्रक्रियायां तु प्रकर्षेण आग्रहेण प्रविष्टः शमलं धुनोति। तदा च शिथिलावयवत्वे मूलबन्धात्प्रच्यावे गुणैरेवाऽग्रिमकार्यं स्यात्। अतो धुनोतीत्येवोक्तम्। तदा द्वितीयमभयं भवति। न भयं यस्मादिति अभयरूपो भगवान् मनसा प्राप्तः। अतो मृत्युगृहीतशरीराद्यभावात् न विद्यते भयं यस्येति द्वितीयं फलति। सिद्धान्तफलैरग्रिम[1]दशमस्कन्धार्थेऽवगते न भयमस्मादिति भयनाशक एव स्वयं भविष्यति। तद्वक्ष्यति—"मृत्यवो नैव घटयन्ति मृत्यूनां मृत्युमीश्वरमि" ति। अन्यथा प्रथमपक्ष एव पर्यवसाने गुरोरप्रयोजकता स्यात्। तस्मादेतस्यैव त्रयं भवति। यदप्युक्तं जीवानां स्वभावक्रिययाऽनर्थो भवतीति। तदप्यसङ्गतम्। जीवानां किं स्वभावत एव देहादिसम्बन्ध ईश्वरेच्छया वेति। आद्ये सर्वेषामेवाऽनिर्मोक्षप्रसङ्गः। द्वितीये न ते पर्यनुयोगमर्हन्ति। भगवतैव तथा सम्पाद्यमानत्वात्। एतदभिप्रेत्याह—यद्धातुमत इति। यदप्युक्तं श्रोतव्यं भगवद्विशेषणचतुष्टयं सर्वात्मा भगवान् हरिरीश्वर इति। तदप्यसङ्गतम्। तदाह— आसीद्यदुदरात्पद्ममिति। सर्वात्मा भगवान् श्रोतव्यत्वेन निरूपितः। तस्योदराच्च पद्मजननं निरूपितम्। पद्माधारत्वेन तस्य[2] पद्माद्भिन्नत्वात् जगतश्च पद्माधारत्वात् सर्वात्मत्वं नोपपद्यते। औपचारिक[3]प्रयोगस्तु न फलजनक इति सिद्धम्। किञ्च। भगवत्त्वं च नोपपद्यते। तदाह—यावानयं वै पुरुष इति। प्राकृततुल्यत्वादित्यर्थः। हरित्वं च नोपपद्यते तदाह—अजः सृजतीति। भगवदनुग्रहमपि प्राप्य यतोऽयमजः सर्वभूतजातं सृजति। महति कर्मणि व्यापृतोऽतिखिन्नः। भूतात्मा च जायते तत्तत्स्वभावं प्राप्नोति। एतदेवाऽग्रे वक्ष्यति— "शयानो बहुचिन्तये" ति। ईश्वरत्वं च नोपपद्यते। तदाह— स चाऽपि यत्र पुरुष इति। अस्याऽपि प्राकृततुल्यत्वं जगत्कार्यव्यापृ[4]तत्वं मायाग्रहणपरित्या[5]गक्लेशः शयनं गूढस्थानस्थितिरिति। यदप्युक्तं पातालमे[6]तस्येत्यादि। तदप्यसङ्गतम्। तदाह—पुरुषावयवैरिति। अन्योन्यविरोधादुभयमप्यसङ्गतमिति भावः। यदप्युक्तं इन्द्रादयो बाहव आहुरिति। तदप्यसङ्गतम्। कल्पभेदानां विद्यमानत्वात् प्रतिकल्पमिन्द्रादीनां नानात्वात् बाहूनामनियतत्वापत्तिः। अधिकारशब्दत्वेऽप्यधिकृतानां भेदात् स दोषस्तदवस्थः। इन्द्रत्वधर्मस्याऽबाहुत्वात्। यदप्याहुरित्युक्तं प्रमाणम्। तदप्यसङ्गतम्। विकल्पानां विद्यमानत्वात्। विकल्पा युगभेदाः। ब्रह्मकल्पान्तरकल्पा वा। उभयेषामपि प्रतिकल्पं भिन्नत्वान्न बाहुप्रमाणयोर्व्यवस्था। किञ्च। यदप्युक्तं कर्णौ दिश इति। दिशामव्यवस्थितत्वात्कर्णत्वं नोपपद्यते। दिशस्तु सूर्येण क्रियन्ते। "सूर्येण हि[7] विभज्यन्ते दिश" इति वाक्याद्यत्रोदेति सा प्राचीत्यादि। अतः कालानुमापके सूर्ये विचार्यमाणे दिशो न सन्त्येव कुतस्तासां कर्णत्वम्। व्यवहारस्त्वौपचारिकैरपि भवति। पदार्थनिर्णयस्तु नैवंविधः। यदप्युक्तं श्रोत्रममुष्य शब्द इति। तदपि नोपपद्यते। कालभेदेनैव शब्दानां प्रवृत्तत्वात्। तदाह—भूतभव्यभवच्छब्द इति। एते ह्येकदा न प्रवर्त्तन्त इति श्रोत्रं नियतं न स्यात्। शब्दविशेषस्य श्रोत्रत्वे तु सर्वरूपत्वमुपसंह्रियमाणमसङ्गतं स्यात्। यदप्युक्तं नासत्यदस्रौ परमस्य नास इति। अश्विनीकुमारयोरायुर्वेदप्रवर्त्तकत्वं वक्तव्यम्। तदाऽऽयुषः स्वरूपं विचारणीयम्। किं भगवद्दत्तमायुः प्राणिनां नियतमनियतं वेति। उभयथाऽपि नासत्ययोरप्रयोजकत्वम् अतः स्वत आयुर्माने विचार्यमाणे अश्विनयोरेवाऽनिरूप्यत्वाद् नासिकात्वं दूरे। एवं घ्राणोऽस्य गन्धो मुखमग्निरिद्ध इति। गन्धश्चाऽग्निश्च त्रिक्षणावस्थायाम्। अतः कालस्याऽनुगतिः स्थूला वा सूक्ष्मा वा यदि विचार्यते तदा गन्धाग्नी द्यौश्च न सङ्गच्छन्त इत्यर्थः। किञ्च। चक्षुरभूत्पतङ्गपक्ष्माणि विष्णोरहनी उभे चेति पूर्ववत्। यतः कर्मगतिषु विचार्यमाणासु केनचित्कर्मणा सूर्यस्य परावृत्तौ सूर्यानन्तत्वे च दिनरात्रिव्यवस्थायाः सूर्यगतिकृतत्वात् तस्याश्च कर्मरूपत्वात्। भगवच्चक्षुरेव नोपपद्यते न वा पक्ष्माणि। यादृशीरिति तस्यैवाऽवान्तरभेदः। किञ्च। यदुक्तं तद्भ्रूविजृम्भः परमेष्ठ्य[8]धिण्यमिति। तदपि कर्मसाध्यमेव। तदाह—यस्मिन् कर्मसमा[9]वाय इति। अयं ब्रह्मा गुणानां गुणिनां च कर्मसमवाय उक्तः। तत्र का भगवद्भ्रूविजृम्भा। एतेनैव आपोऽस्य तालू रस एव जिह्वेत्या[10]क्षिप्तमेव। अनेन यानि कानि गोलकत्वेन निरूपितानीन्द्रियत्वेन च तानि सर्वाण्याक्षिप्तानि वेदितव्यानि। किञ्च। आपोऽस्य तालु इत्यारभ्याऽसुरानीकवर्य इत्यन्तेनोक्ताः पदार्था विशेष[11]सामान्यविचारेण गतार्था भविष्यन्तीति विशेषपदार्थानाधाराधेयभावापन्नान् दशपदार्थान्निरूपयति—भूपातालेति। एतेषां दशपदार्थानां स्वकार्यसहितानां विचारे क्रियमाणे सामान्यतो ब्रह्माण्डे च विचार्यमाणे ब्रह्माण्डमेवाऽऽयाति। न भगवान् भगवदवयवा वा केनाऽपि प्रकारेण सङ्गच्छन्ते। तस्मात्सिद्धं ब्रह्माण्डं दूरीकृत्य पुरुषत्वकल्पना व्यर्थेति भावः। असुरानीकवर्य इत्याक्षिपति—महतां चाऽनुचरितमिति। ब्रह्माननमित्यादि वर्णाश्रमविनिश्चयेन। तदुक्तं नानाभिधाभीज्यगुणोपप[12]न्न इति। अत्र यो यज्ञो निरूपितो भगवत्कर्मत्वेन तस्याऽप्राकृतत्वान्नित्यत्वाच्च पूर्वोक्तदोषसम्बन्धाभावात्तदेकमुपपद्यत इत्याशङ्क्य नवपदार्थविचारेण तदपि प्रत्युक्तं भविष्यतीति नवपदार्थान्पृच्छति—अवताराऽनुचरितमिति द्वाभ्याम्। यागो हि देवता भगवदवतारेण विचारिता[13]भवति। स चाऽवतारो लोक इति लौकिकः। युगानि तु विचारणीयानि। तेषु विचारितेषु द्रव्यमपि निराकृतं भविष्यति। यथा "यज्ञवा-

---

१. दशस्कन्धेति घ.। २. तस्य नास्ति घ.। ३. प्रयोजकस्तु घ.। ४. व्यावृतत्वं ख.। ५. त्यागः क्लेश इति ख.। ६. मेतस्य हि पादेत्यादि ख.। ७. हि नास्ति ख.। ८. परमेष्ठिधिष्ण्यं इति ख.। ९. समवाय इति ख.। १०. त्यादिद्विसमेवेति ख.। ११. विशेषस्येति घ.। १२. मिथोपपन्नमिति ख. १३. भवन्तीति ख.।

**स्त्वभ्यवाय[1]न् ते पश्यन् पुरोडाशं कूर्मभूतं सर्पन्तमि**"ति एतत्कर्म कदा। युगेषु वा युगेभ्यो भिन्नकाले वा। युगविशेषे चेत्ततः पूर्वं द्रव्याभावाद्यागो न स्यात्। एवमन्यत्राऽपि। युगमाने च विचार्यमाणे यागानामन्यथात्वात्क्रियैव न सङ्गच्छते। तथा त्रेतामुखे यज्ञोत्पत्तिः। किञ्च। युगधर्मः कालः। नृणां साधारणो धर्म इति देशः। सविशेषो यादृश इति द्रव्याणि गुणभेदभिन्नानि द्विधा निरुपितानि। श्रेणीनामिति कर्त्तारः। राजर्षीणामिति मन्त्राः। धर्मकृच्छ्रेष्विति कर्माणि। अत एव षट्सु धर्मप्रयोगोऽङ्गत्वख्यापनाय। यदप्युक्तं इयानसावीश्वरविग्रहस्येति। तदपि तत्त्वविचारेण प्रत्याख्यातं भविष्यति। तत्त्वानामेकदेशेन ब्रह्माण्डनिर्माणम्। तत्र "**न यतोऽस्ति किञ्चिदि**" ति वचनमनुपपन्नं स्यात्। अतःपरं द्वितीयाध्यायारम्भः। तत्रादावेव तदुक्तम् एवं पुरा धारणयेति। तदसङ्गतम्। तत्त्वानां लक्षणविचारेण। लक्षणं तेषां सृष्टिकर[2]णसामर्थ्यम्। तस्यैवाऽसाधारणधर्मत्वात्। तस्मिन् ज्ञाते तदंशैरेव ब्रह्मणि प्रविष्टैः। कार्यसिद्धेस्तस्य ज्ञानादीनां वैयर्थ्यापत्तिः। यदपि शाब्दस्य हि ब्रह्मण एष पन्था इत्यादिभिर्वैराग्यपुरःसरं स्वचित्ते स्थितं भगवन्तं चिन्तयेदिति। त[3]दपि तत्त्वानां हेतुपूर्वकलक्षणे विचार्यमाणे पूर्ववद्भविष्यति। तत्र चित्तस्य महत्तत्त्वरूपत्वान्महति विद्यमान एव भगवांस्तत्र भवतीति स्वचित्ते कः सिद्धः। [4]आत्मनश्च सिद्धिस्तत्र दूरापास्ता। "**चित्तं तन्महदात्मकमि**"ति हेतुलक्षणम्। यदप्युक्तं केचित्स्वदेहान्तर्हृदयावकाश इति। तदपि पुरुषपूजायां विचार्यमाणायां "**मनोमयी मणिमयी**"ति वाक्यान्मानसी मूर्त्तिः सा। स कथं भगवान् भवेदिति। स्थूलसूक्ष्मधारणासिद्ध्यर्थं योगद्वयं निरूपितम्। तदपि योगस्वरूपे विचार्यमाणे चित्तवृत्तिनिरोधत्वादसङ्गतमेव भविष्यति। यदप्युक्तं स्थिरं सुखं चाऽऽसनमास्थितो यतिरिति। तदप्यसङ्गतम्। जीवत एव योगिनः सर्वलोकगमनसम्भवात् किं मरणेन यथा[5] कर्दमस्य। ऐश्वर्यपदेन चाऽर्जुनादयोऽप्यनेनैव देहेन स्वर्गं गताः परिगृहीताः। यदप्युक्तं आनन्दमानन्दमयोऽवसान इति। तदपि योगिनो लिङ्गभङ्गे विचार्यमाणे असङ्गतं भवति। यदप्युक्तं भगवान् ब्रह्म कार्त्स्न्येनेति। तदपि वेदविचारे क्रियमाणे असङ्गतं भवति। यदि भगवानात्मा। सिद्धमेव तस्मिन् प्रेम। उपदेशश्च व्यर्थः। नाऽस्ति चेत्प्रेम तदा न स आत्मा। अज्ञानादात्माप्यात्मत्वेन न ज्ञात इति चेत्परात्मवत्। तदाप्यात्मत्वमेवोपदेष्टव्यम्। न च प्रेमार्थं यत्नः कर्तव्यः। यदपि कामनाभेदेन देवतान्तरभजनमुक्तं तदपि वेदादिविचारे असङ्गतमिति तृतीयादिः। वेदे हि तदर्थमन्यदेव साधनं निरूपितमिति। भक्त्यर्थनिरूपणं तु भक्तिनिराकरणेनैव निराकृतम्। यदप्युत्पत्त्या विमर्शनमुक्तं तदहि सम्प्लवादिविचारेण निराकृतं भविष्यति। यदिदं जगत् प्रलयं यास्यति प्रवृद्धं वा भविष्यति कारणे वा लीनं भविष्यति। तदा किं भगवतः सकाशादुत्पत्त्या। स्वत एवोत्पद्यतां अन्यथा वा। विशेषाभावात्। यदपि यज्ञादीनां स्वरूपनिर्वाहार्थं भगवदवयवकल्पना निरूपिता। सापि इष्टापूर्त्तादिविचारेण निवारिता भवति। लौकिकैरलौकिकैर्वा पदार्थैर्योगे निष्पन्ने भूतसंस्कारे आत्मसंस्कारे वा[6] भगवत्संस्कारे वा फलतो वा न कश्चिद्विशेषः। भगवदीयत्वादेस्त्वन्यथैव सिद्धेः। यदप्युक्तमात्मानं सृजतीति, तदप्यनुशायिनां सर्गे विचार्यमाणे निराकृतं भविष्यति। यतस्ते भगवद्विलक्षणा वक्तव्याः। तदप्युक्तं तत्त्वं परं रूप[7]वदस्वरूपमिति। तदपि पाखण्डधर्मे विचार्यमाणे निराकृतं भविष्यति। दैत्यानां व्यामोहनार्थे पाखण्डोत्पत्तिः। दैत्याश्च के भगवानन्यो वा। भगवांश्चेत् सापि भगवल्लीलेति पाखण्डत्वमेव न स्यात्। भक्तिरपि निराकृता भवति। पाखण्डत्वेऽपि स्थिरीभूते न दैत्यानां भगवत्त्वम्। यदप्युक्तं कर्णकषायशोषानिति। तदप्यसङ्गतम्। चिदात्मनो बन्धमोक्षौ विचार्येते। बन्धो भगवदिच्छया मोक्षश्च। तत्र किं कर्णकषायशोषणेन। भिन्नतया [8]चाऽवस्थाने निरूपिते सर्वमेव साधनं व्यर्थं स्यात्। भगवद्रूपत्वात्तस्य। अवतारवर्णनं च व्यर्थम्। भगवतो मायायां क्रीडनमेव तादृशमिति सर्वमेव जगदवतारो भवति किं विशेषेण। मायापरित्या[9]गे अवतारलीलामपि परित्यजेत्। यदप्युक्तं त्वमेतद्विपुलीकुर्विति। तदपि न वक्तव्यम्। यथा भवान् भक्तिरसेन वदति तत्किं कस्यचित्प्रेरणया। प्रामाण्यं च त्वय्येव सिद्धम्। तदाह—अत्र प्रमाणमिति। तदप्युक्तं मायां वर्णयत आत्मा न मुह्यतीति। तदप्यल्पमसङ्गतं च। यतो मम प्रायेणाऽपि प्राणा न गच्छन्ति श्रूयमाणमपि तक्षको भक्षयिष्यति ॥ २६ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

यश्चानुशायिनां भुक्तशेषकर्मणा सह परलोकभ्रष्टानां सर्गः उत्पत्तिप्रकारः। पाखण्डस्य वेदविरुद्धमार्गस्य च सम्भवः प्रवृत्तिः। आत्मनो जीवस्य बन्धमोक्षयोः प्रकारश्च। मुक्तिदशायां स्वरूपतो व्यवस्थानप्रकारश्च ॥ २२ ॥ ❀ ❀ भगवानात्मनो स्वस्य शक्तिरूपया मायया यथा विक्रीडति। स्वयं वैराग्यादिगुणपूर्णोऽपि किमर्थं सृष्टिस्थित्यादिना विक्रीडतीत्यत आह—आत्मतन्त्र इति। स्वतन्त्रस्याभिप्रायं को वा जानातीति भावः। यथा वा विभुर्व्यापको भगवान् मायां विसृज्य त्यक्त्वा साक्षिवत् साक्षाद्द्रष्टृवदुदास्ते उदासीन आस्ते ॥ २३ ॥ ❀ ❀ एतत् यन्मया पृष्टं तत्सर्वं—चकारादपृष्टमपि—यद्रहस्यं तत्तत्त्वतो यथार्थं मदधिकारानुरूपं चानुपूर्वशः प्रस्तावक्रमेण मे मह्यं पृच्छते उदाहर्तुं निरूपयितुं अर्हसीत्यन्वयः। 'तद्विद्धि प्रणिपातेन' इति वाक्या-

---

१. वायं ते पश्यत पुरोडाशमिति ख.। २. कारणेति ख.। ३. तदपीति नास्ति ख.। ४. स्वात्मनश्चेति ख.। ५. यदेदि ख.। ६. वानास्ति घ.। ७. रूपमिति ख.। ८. वावस्थाने ख.। ९. स्यागे वा ख.।

नुसारेण स्वस्य श्रवणयोग्यतामाह—प्रपन्नायेति, शरणागतायेत्यर्थः । शुकस्य कथनयोग्यतायां सर्वज्ञत्वं हेतुं सूचयन् सम्बोधयति—हे महामुने इति । प्रपन्नायेति मुखत एव वदामि यद्वाऽन्तःकरण एव तथात्वमस्तीति ज्ञाने मदन्तःकरणे प्रबोधसञ्चारे चापि तव सामर्थ्यमस्तीति सूचयन्सम्बोधयति—भगवन्निति ॥ २४ ॥ ❀ ❀ ननु त्वमपि बहुश्रुतस्तत्त्वज्ञोऽस्यन्येऽपि तत्त्वज्ञा बहवोऽत्र तिष्ठन्ति तान् विहाय मामेव किमिति पृच्छसीत्यपेक्षायामाह—अत्रेति । अत्र पृष्टेषु पदार्थेषु सभायां वा हि निश्चितमेतत् भवानेव प्रमाणं सम्यग्ज्ञातेत्यर्थः । तत्र दृष्टान्तमाह—यथा परमेष्ठीति । यथा ब्रह्मणो वाक्येन कस्यापि विवादस्तथाऽत्रत्यानां त्वद्वाक्येपीत्यर्थः । अतोऽहं यथाकथञ्चिज्जानन्नपि स्वसन्देहनिवृत्त्यर्थं त्वां पृच्छामीति भावः । ब्रह्मणः प्रमाणत्वे हेतुमाह—आत्मभूरिति । यत आत्मा परमात्मा श्रीनारायणस्तस्माद्भूत इत्यर्थः । श्रीशुकस्य प्रमाणत्वे हेतुमाह—परे चेति । इह सभायां वर्तमानाः परे त्वदन्ये तु पूर्वेषां पूर्वजैः कृतमेव दृष्ट्वा श्रुत्वा वाऽनुतिष्ठन्ति न तु सम्प्रदायेन तत्तत्वं जानन्ति, तव तु ब्रह्मनारदव्यासक्रमेण सम्प्रदायोऽस्तीति त्वमेव तत्त्वज्ञोऽत एव तव वाक्ये न कस्यापि सन्देहो विवाद इत्यर्थः ॥ २५ ॥ ❀ ❀ ननु तवानशनद्विजशापाभ्यां व्याकुलस्य म्रियमाणस्य कथं श्रवणं सम्पत्स्यते इत्याशङ्क्याह—नेति । तव तु न किञ्चिदविदितमतः किं बहु वक्तव्यमिति सूचयन् सम्बोधयति—हे ब्रह्मन्निति । अमी मे ममासवः प्राणाः अनशनान्न परायन्ति नापगच्छन्ति न व्याकुलीभवन्ति । तत्र हेतुं सूचयन्नात्मानं विशिनष्टि—पिबत इति, अच्युतस्य भगवतः कथारूपममृतं पिबत इत्यर्थः । परन्तु कुपिताद्द्विजाद्धेतोर्यन्मरणं ततोऽन्यत्र तद्विना, तस्य निवृत्तिस्तु नास्तीत्यर्थः । अत्रापि पीयूषमदेन तस्य मादकत्वेनेतरविस्मारकत्वादनुसन्धानाभावेन द्विजशापजन्यमरणभयेनापि व्याकुलता नास्ति तत्पानोपरमे त्वनशनादेव सद्योमरणं स्यादिति सूचितम्[1] ॥ २६ ॥

## हिन्दी अनुवाद

प्रलयके समय जो जीव प्रकृतिमें लीन रहते हैं, उनकी उत्पत्ति कैसे होती है ? पाखण्डकी उत्पत्ति कैसे होती है ? आत्माके बन्ध-मोक्षका स्वरूप क्या है ? और वह अपने स्वरूपमें किस प्रकार स्थित होता है ? ॥ २२ ॥ ❀ ❀ भगवान् तो परम स्वतन्त्र हैं । वे अपनी मायासे किस प्रकार क्रीड़ा करते हैं और उसे छोड़कर साक्षीके समान उदासीन कैसे हो जाते हैं ? ॥ २३ ॥ ❀ ❀ भगवन् ! मैं यह सब आपसे पूछ रहा हूँ । मैं आपकी शरणमें हूँ । महामुने ! आप कृपा करके क्रमशः इनका तात्त्विक निरूपण कीजिये ॥ २४ ॥ ❀ ❀ इस विषयमें आप स्वयम्भू ब्रह्माके समान परम प्रमाण हैं । दूसरे लोग तो अपनी पूर्वपरम्परासे सुनी-सुनायी बातोंका ही अनुष्ठान करते हैं ॥ २५ ॥ ❀ ❀ ब्रह्मन् ! आप मेरी भूख-प्यासकी चिन्ता न करें । मेरे प्राण कुपित ब्राह्मणके शापके अतिरिक्त और किसी कारणसे निकल नहीं सकते; क्योंकि मैं आपके मुखारविन्दसे निकलनेवाली भगवान्‌की अमृतमयी लीला-कथाका पान कर रहा हूँ ॥ २६ ॥

## सूत उवाच

**स उपामन्त्रितो राज्ञा कथायामिति सत्पतेः । ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि ॥२७॥**

**प्राह[2] भागवतं नाम पुराणं ब्रह्मसम्मितम् । ब्रह्मणे भगवत्प्रोक्तं[3] ब्रह्मकल्प उपागते ॥२८॥**

**यद् यत् परीक्षिदृषभः पाण्डूनामनुपृच्छति । आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे ॥२९॥**

**इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कन्धे प्रश्नविधिर्नामाष्टमोऽध्यायः[4] ॥ ८ ॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

उपामंत्रितः पृष्टः संश्चासौ पतिश्च तस्य ॥ २७ ॥ ❀ ❀ ब्रह्मकल्पे सृष्ट्युपक्रमकल्पे भागवताख्यानेनैव प्रश्नानामुत्तरं दातुमुपक्रांतवानित्यर्थः ॥ २८ ॥ ❀ ❀ पांडूनामृषभः श्रेष्ठः आनुपूर्व्येणेति प्रस्तावक्रमोऽत्र विवक्षितो न प्रश्नक्रमः ॥ २९ ॥

इति श्रीमद्भा० म० द्वितीयस्कंधे टीकायामष्टमोऽध्यायः ॥ ८ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

उपामंत्रितः सत्कृत्य व्यापारितोऽत एव भृशं प्रीतः सतां ब्रह्मादीनां पत्युः ब्रह्मणा श्रीकृष्णेन मुनये गर्भान्निष्कास्य रातो दत्त इति ब्रह्मरातः शुकः । "कृष्णेन ब्रह्मणा दत्तो व्यासाय मुनये स्वयम्" निष्कास्य गर्भाद्व्रीटाया भूत्वाथ प्रतिभूर्यतः ॥ ब्रह्मरातो

---

१. ननु यथेदममृतं क्षुधां निवारयति तथा शापमपि वारयिष्यति इत्याशङ्क्याह—अन्यत्रेति । अनेन कथामृतेन सर्वे एव प्राणोपघातकाः निवर्तन्ते परं यः कुपितात् द्विजात् तक्षकाख्यो यः प्राणोपघातकः न निवर्तते । अन्यथा स कोपस्तमेव द्विजं नाशयेत्, मृत्युना ह्याक्रान्तः कोपः एकं सर्वथा नाशयतीति क-पु-पाठः । २. प्रा० पा०—आह । ३. प्रा० पा०—भगवता प्रोक्तं । ४. प्रा० पा०—विवक्षितानुप्रश्नोऽष्टमो ।

ह्यतः प्रोक्तः श्रीव्यासतनयो मुनिः" इति परमब्रह्मवैवर्तादिवसेयम् । "सभा संसत्सदः स्त्रियाम्" इति धरणिः ॥ २७ ॥ ❀ ❀ इत्यर्थ इति राजप्रश्नोत्तरमिषेण श्रीभागवतं यत्संक्षेपतः सृष्ट्यादौ चतुःश्लोक्या ब्रह्मणे प्रोक्तं तदेव श्रीव्यासविस्तारितं राज्ञे प्राहेति भावः ॥ २८ ॥ ❀ ❀ एवं स्वाभिमतशुद्धभक्तेः प्रथमांगीभूतकृष्णकथाश्रवणौत्सुक्यमाविष्कृत्य निर्गुणशुद्धभक्त्योर्यावत्स्वर्थेषु व्याप्तिस्सं-भवति तावंत एवार्थास्तत्तद्भक्त्यधिकारिणां जिज्ञासितार्थसिद्ध्यर्थं पृष्टाः । किञ्च यत्रयत्र भक्तेर्गंधोपि तत्रतत्र निरपराधतयैव स्थेयमन्यथा श्रीभक्तिदेव्या अप्रसाद एव स्वसाध्यभक्तेरभ्युदयार्थं शुद्धभक्तैरपि स्वाभीष्टश्रवणकीर्तनादिषु लब्धनिष्ठैरपि तानि तानि भक्तेरुदाहरणप्रत्युदाहरणानि जिज्ञास्यान्येवेति 'यदधातुमतः' इत्यारभ्य 'शेते सर्वगुहाशयः' इत्यंतेन प्रश्नपंचकं शांतप्रीतिभक्तौ पर्याप्नोति जीवाद्विशेषब्रह्मदृष्टभगवद्रूपप्रश्नोपि प्रीतिभक्तौ पर्याप्नोति कर्मप्राप्यस्थानानि सूक्ष्मस्थूलविकल्पकल्पैरवश्यं ग्रस्यन्त इति कर्मनिर्वेदार्थं प्रश्नद्वयं शुद्धभक्तावेव पर्याप्नोति "जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु" इति भगवदुक्तेः । यस्मिन्कर्मसमावाय इत्यादिप्रश्नोपि कर्मज्ञानयोगमिश्रशुद्धभक्तिषु पर्याप्नोति । भुवादीनां बहुविधभक्तास्पदत्वात्तदोकसां च प्रायोधिकृतादिभक्तत्वा-त्प्रश्नोयं भक्तेषु पर्याप्नोति । प्रमाणमण्डकोशस्येत्यैश्वर्यप्रधानायां भक्तौ कीदृशान्यंडानि हरिकुक्षौ संतीति जिज्ञासायां वर्णाश्रमधर्मा भक्तिमिश्रतयैव सिद्ध्यन्ति तदन्यथा वेति जिज्ञासायां च भक्तौ प्रश्नोयं पर्याप्नोति । युगानीति युगावताराणां तत्प्रवर्तितभक्ति विशेषाणां च जिज्ञासायां नृणामंत्यजपर्यंतानामपि साधारणो धर्मो भक्तिरेव "सर्वेषां मदुपासनम्" इत्युक्तेः । विशेषधर्मस्तत्तज्जाति-धर्म इति तद्धर्मवत्त्वेपि ते भक्ता भवंति किरातहूणांध्रेत्याद्युक्तेः । श्रेणिराजर्षिष्वपि भक्तिमत्सु निरपराधतयैव स्थेयमिति विवक्षायां कृच्छ्रेष्विवत्यापद्धर्मप्रश्नः सर्वविधभक्तौ पर्याप्नोति । तत्त्वानामिति । पुरुषावतारलीलायां योगस्येति योगमिश्रायां योगेश्वराणां शंभुप्रभृतिमहानुभावभक्तानामैश्वर्यरूपा या गतिः लिंगभंग इति शांतभक्तौ वेदादीनां तात्पर्यमिति शेषः । तत्र भक्तिरेवेति भक्तौ संप्लवः सम्यक् प्लवः संसारसिंधोस्तरणसाधनं किं विक्रमस्तत्र शौर्यं किं प्रतिसंक्रमस्तु नाशः क इति भक्तेरनुकूलप्रतिकूल-वस्तुजिज्ञासायाम् । यद्वा सृष्टिस्थितिप्रलयाः क्रमेण पृष्टाः काम्यकर्मेष्टापूर्तादीनां कर्ममिश्रायां भक्तौ अनुशायिनां महाप्रलये ईश्वरे लीनोपाधीनां सर्ग इति साधकभक्तानां साधनसिद्धिजिज्ञासायां पाखंडस्येति । भक्त्यसंभवजिज्ञासायामात्मनो मायास्पृष्ट-जीवस्य बंधमोक्षाविति भक्तिमिश्रज्ञाने ज्ञानमिश्रायां वा भक्तौ स्वरूपतो व्यवस्थानम् । सदा मायास्पर्शशून्यस्य नित्यमुक्तस्य विष्वक्सेनादेर्जीवस्य नित्यभक्तौ विविधं क्रीडति । सृष्ट्यादिसमये विसृज्य महाप्रलये । त्यक्त्वा यद्वात्मतंत्रो भगवान्कृष्ण एवान्येषामवताराणामवतारिणश्चात्मतंत्रत्वेपि विप्रबालकहरणादौ कृष्णैकपारतंत्र्यदर्शनात् । आत्ममायया योगमायया पूतनाव-धादौ यथा वा विसृज्य विशेषेण सृष्ट्वा मौशलादावुदास्ते साक्षिवन्न तु साक्षीति सर्वस्य प्रश्नजातस्य भक्त्युपयोगित्वम् ॥२९॥

इति श्रीमद्भागवते भावार्थदीपिकाप्रकाशे द्वितीयस्कन्धेऽष्टमोऽध्यायः ॥ ८ ॥

## श्रीमद्वीरराघवव्याख्या

नतु तवानशनद्विजसर्पाभ्यां व्याकुलस्य कुतः श्रवणं तत्राह नम इति । अत्र त्वत्सन्निधौ अच्युतपीयूषमच्युतकीर्तनरूपममृतं पिबतो मेऽसवः प्राणाः कुपितात् द्विजादनशनादपि हेतोः न परायंति नापगच्छंति न व्याकुलीभवंतीत्यर्थः ॥ २७ ॥ ❀ ❀ सूत वाक्यमाह स इति । इतीत्थं सतां पतेर्भगवतः कथायां राज्ञा विष्णुरातेन विष्णुना रक्षितेन परीक्षिता उपामंत्रितः प्रवर्तितो ब्रह्मरातो ब्रह्म ब्रह्मविषयकं ज्ञानं रातीति ब्रह्मरातः श्रीशुकः सभायाम् ॥ २७ ॥ ❀ ❀ भागवतं नाम पुराणं प्राह कथंभूतं ब्रह्मसंमितं वेदतुल्यं परब्रह्मप्रापकं वा ब्रह्मकल्पे सृष्ट्युपक्रमे उपागते प्राप्ते सति ब्रह्मणे चतुर्मुखाय भगवता प्रोक्तं चेत्यर्थः ॥ २८ ॥ ❀ ❀ पांडूनां ऋषभः श्रेष्ठः परीक्षिद्यद्यनुपृच्छति अन्वपृच्छत्तत्सर्वमनुपृष्टं सर्वमानुपूर्व्येण प्रस्तावक्रमेण प्रश्नक्रमेणाख्यातुं भागवताख्यानेनैव प्रश्नानामुत्तरं वक्तुमुपचक्रमे उपक्रांतवान् ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे द्वितीयस्कंधे वीरराघवकृतटीकायाम् अष्टमोऽध्यायः ॥ ८ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

अनश्नतस्तव मनआदीन्द्रियदौर्बल्यादसदुक्तावधारणाशक्तेररण्यरोदनवद्व्यर्थमापद्यत इति तत्राह नम इति । न परायंति न मृतप्राया भवंति अशनादप्यतिबलहेतुरसायनपानादित्याह पिबत इति । अच्युतकथापीयूषम् ॥ २७ ॥ ❀ ❀ सूतत्वान्मुनि-संसदि पृष्टः राज्ञा शुकः किं प्रावोचदिति शौनकादिमुनीनां मानसीं शंकां परिहरति स इति । मुनिसंसदि विष्णुरातेन विष्णु-दत्तेन परीक्षिता सतां ब्रह्मादीनां पत्युर्हरेः कथायामित्युपामंत्रितः सत्कृत्य व्याख्यातुं व्यापारितोऽतएव भृशं प्रीतो ब्रह्मरातः शुको भागवतं नाम पुराणं तत्प्रश्नोत्तरत्वेनाहेत्यन्वयः । बालोपि स गुरुत्वेन मुनिभ्यो ब्रह्मणा यतः दत्तोऽतो ब्रह्मरातेति नाम वैयासकेरभूत् इति वचनात् शुकस्य ब्रह्मरातत्वं नान्यस्येति ॥ २८ ॥ ❀ ❀ आप्तिमूलत्वमाह ब्रह्मण इति । अतीतब्रह्मप्रलयानंतरं ब्रह्मकल्पे ब्रह्मांतरोत्पत्तिनिमित्ते प्राप्ते सति स्वपुत्राय ब्रह्मणे भगवता नारायणेन प्रोक्तमाहेति शेषः ॥ परीक्षित्प्रश्नप्रतिवचनतया शुकेनोक्तमुतान्यत्किंचिदिति शंकां परिहर्तुमाह यद्यदिति ॥ २९ ॥

इति श्रीभागवते म० द्वितीयस्कंधे वि० अष्टमोऽध्यायः ॥ ८ ॥

**श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या**

ब्रह्मणा श्रीकृष्णेन रात इति ब्रह्मवैवर्त्तादनुसन्धेयम् ॥ २७ ॥ ❀ ❀ ब्रह्मकल्पे ब्रह्मणो जन्मोपलक्षिते कल्पे भगवता संक्षेपेण प्रोक्तम् ॥ २८ ॥ ❀ ❀ आनुपूर्व्येणेति । भगवत्कथाया एवानुगतया प्राप्तेन क्रमेण, ननु राजप्रश्नवत् व्युत्क्रमेणेत्यर्थः ॥ २९ ॥

**इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भेऽष्टमोऽध्यायः ॥ ८ ॥**

**श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या**

सत्पतेः कृष्णस्य कथायामिति तत्तत्प्रश्नोत्तराणां कृष्णकथात्वे इदं सूतवाक्यमेव प्रमाणं ज्ञेयम् । ब्रह्मरातः शुकः ॥ २७ ॥ ❀ ❀ भागवतमिति भागवताख्यानेनैव प्रश्नानामुत्तरं दातुमुपक्रान्तवानित्यर्थः । ब्रह्मकल्पे सर्व्वादिमे कल्पे ॥ २८ ॥ ❀ ❀ आनुपूर्व्येणेति प्रस्तावक्रमोऽत्र विवक्षितः, ननु प्रश्नक्रमः ॥ २९ ॥

**इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । द्वितीयेऽत्राष्टमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ८ ॥**

**श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः**

करणनैश्चल्याभावहेतौ सत्यपि भगवत्कथाश्रवणे तन्नैश्चल्यं दर्शयति नम इति । हे ब्रह्मन् अच्युतपीयूषं भगवत्कथामृतं पिबतो मे अमी असवः प्राणाः तमुत्क्रामंतं सर्वे प्राणाः उत्क्रामंतीति श्रुत्युक्तानींद्रियलक्षणानि करणानि अच्युतपीयूषव्यतिरिक्ते विषये अनशनाद्धेतोः भोजनादौ कुपिताद्विजाद्धेतोः मरणप्रतीकारे धनकलत्रादौ च न परायंति न गच्छंति अच्युतकथामृतपाने निश्चलाः भवंतीति भावः ॥ २७ ॥ ❀ ❀ सतां पतेः श्रीभगवतः कथायां विष्णुना भगवता रातेन रक्षितेन राज्ञा उपामंत्रितः प्रवर्तितः ब्रह्म भगवंतं राति ददातीति ब्रह्मरातः स श्रीशुकः भृशमत्यर्थं प्रीतः सन् भागवतं नाम पुराणमाहेति द्वितीयेनान्वयः ॥ २८ ॥ भागवतमाह भागवताख्यानेनैव प्रश्नानामुत्तरं दातुमुपक्रांतवानित्यर्थः । कथंभूतं ब्रह्मसंमितं वेदतुल्यं परब्रह्मगुणस्वरूपादिबोधकं वा ब्रह्म सम्यक् मीयते यस्मिन्निति व्युत्पत्तेः । ब्रह्मकल्पे सृष्ट्युपक्रमकल्पे उपागते प्राप्ते सति ब्रह्मणे स्वयंभुवे भगवता प्रोक्तम् । पांडूनां ऋषभः श्रेष्ठः परीक्षित् यत् अनुपृच्छत् तत्सर्वं शुकः आनुपूर्व्येण व्याख्यातुमुपक्रमे आनुपूर्व्येणेति प्रस्तावक्रमोऽत्र विवक्षितो न तु प्रश्नक्रमः ॥ २८ ॥

**इति श्रीमद्भागवतसिद्धांतप्रदीपे द्वितीयस्कंधीये अष्टमाध्यायार्थप्रकाशः ॥ ८ ॥**

**श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या**

एवं पूर्वपक्षे कृते भगवन्माहात्म्ये[1] स्थिरीकृते शुकस्य सन्तोष एव जातो न क्रोध इत्याह—**स उपामन्त्रित इति**। स शुकः । उपामन्त्रितः प्रार्थितः । "**उपामन्त्रयन्त राज्येन पितरो यमि**"त्यत्र तदर्थनिर्द्धारात् । इ[2]ति एवंप्रकारकथायाम् । युक्ति[3]पूर्वं भगवद्गुणा निरूपणीया इति । तथा सति भगवतो महत्सुखं भवति । सत्पतित्वात् । तथा स[4]ति निःसन्दिग्धो भगवल्लीलाप्रत्ययो भवतीति भगवत्तोषहेतुरयं प्रश्न इति भावः । तत्राप्ययं ब्रह्मरातः ब्रह्मणा वेदेन रक्षितः । अस्मदर्थे युक्तिमयं कथयिष्यतीति । अत एव भृशं प्रीतः । मम जन्मसाफल्यं जातमिति । राजा च विष्णुरातः । विष्णुना एतदर्थमेवाऽयं संरक्षितः । यदयं क्षोदपू[5]र्वं निःसन्दिग्धं मां ज्ञास्यतीति । अत एव स्वजन्मसाफल्यार्थं सभायामेव पृष्टवान् ॥ २७ ॥ ❀ ❀ एवं युक्तिपूर्वकं भगवत्कथायां वक्तव्यायां लौकिकी युक्ति[6]रप्रयोजिकेत्युपपत्तिरूपं भागवतमेवोक्तवानित्याह—**प्राह भागवतं नामेति**। पुराणमिति प्रमाणम् । ब्रह्मसम्मितमित्युक्तिसहितम् । ननु कति भागवतानि सन्ति ? बहुषु स्थलेषु भिन्नप्रकारेण[7] भागवतकथनाच्छङ्का । तत्राऽऽह—**ब्रह्मणे भगवता प्रोक्तमिति**। विषयात्मकं तु भागवतमनेकधा । वि[8]मर्शात्मकं तु द्वेधा । तत्रोत्पत्तिप्रकारेण निरूपितं ब्रह्मणा नारदायोक्तम् । उपपत्तिप्रकारेण तु ब्रह्मणे भगवता प्रोक्तम् । अत्र स्थूले भागवते सर्वे प्रकारा उपनिबध्यन्ते । भागवतप्रवृत्तेरनेकधात्वज्ञापनाय । तत्राऽन्यस्य पदार्थस्य ब्रह्मणा स्वयमेव ज्ञातत्वादुपपत्तिः परं वक्तव्या नान्यदिति वक्तुं ब्रह्मकल्प उपागत इत्युक्तम् । ब्रह्मकल्पे समागते । तत्र हि शब्दब्रह्मण एव[9] सर्वोत्पत्तिः । या उपपत्तिर्भागवते वर्त्तते ॥ २८ ॥ ❀ ❀ ततोऽन्यविषयोऽपि प्रश्न इति भागवतात्पृथगेव तं परिहृत्य पश्चाद्भागवतोपपत्तिं वक्ष्यतीत्याह—**यद्यत्परीक्षिदिति**। पाण्डूनामृषभः भगवद्भक्तानां मध्ये मुख्यः । यद्यदनुपृच्छति पूर्वोक्तहेतुप्रश्नादिरूपम् । आनुपूर्व्येणैव तत्सर्वं वक्तुमुपक्रमं कृतवान् । यथाकाङ्क्षमुत्तराणि दत्तवानित्यर्थः । चकारादधिकामपि युक्तिमुक्तवानिति भावः ॥ २९ ॥

**इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां द्वितीयस्कन्धे अष्टमाऽध्यायविवरणम्**

---

१. न्महात्मनेति ख. २. इतीति एवमिति घ. ३. युक्तिपूर्वकमिति ख. ४. सतामिति घ. ५. पूर्वकमिति ख. ग. ६. अप्रयोजकेति घ. ७. प्रकारेण कथनादिति ग. ८. विमर्शात्मकमिति ख. ९. एवोत्पत्तिरिति घ.

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः

**स उपामन्त्रित** इत्यत्र **अस्मदर्थे** इति वेदार्थे ॥ २७ ॥ ❀ ❀ **प्राहेत्यत्र युक्तिसहितमिति,** यदधीनोत्तदध्नो दधित्वं पञ्चदशाहानिमाशीरित्याद्या युक्तयो वेदे उक्तास्तद्वदिदमपि तत्तुल्यतया तादृग्युक्तियुक्तम् । **विषयात्मकमिति** भगवज्ज्ञापकलीलात्मकम्, तस्य द्वादशस्कन्धात्मके श्रीभागवते तदुभयकथनप्रयोजनमाहुः **अत्रेत्यादि** । **शब्दब्रह्मण एवोत्पत्तिरिति** तस्मिन् कल्पे भगवता ब्रह्मा उत्पाद्यते पाठ्यते च 'यो ब्रह्माणमि'त्यादिश्रुतेः । वेदानामानन्त्याच्च भूयान् कालस्तत्र लगति, तथा चास्य शब्दब्रह्मत्वबोधनाय तं कल्पमन्त्रं बोधितवानित्यर्थः ॥ २८ ॥ ❀ ❀ **यद्यदित्यत्र प्रश्न** इति जीवस्वरूपादिविषयको राजप्रश्नः **परिहृत्येति** पूर्वं समाधाय ॥ २९ ॥

इति श्रीद्वितीयस्कन्धसुबोधिनीप्रकाशे अष्टमाध्यायविवरणम् ।

## श्रीगिरिधरकृता बालप्रबोधिनी

इत्येवं सतां भागवतानां पत्युः पालकस्य भगवतः कथायां राज्ञा परीक्षिता उपामन्त्रितः प्रार्थनया प्रवर्तितः,स शुको भृशमत्यन्तं प्रीतः सन् संसदि तत्सभायां भागवतनामकं पुराणमाहेति द्वयोरन्वयः । अन्याः कथाः विहाय भगवत्कथाप्रश्ने हेतुं सूचयन् राजानं विशिनष्टि—विष्णुरातेनेति, भगवता रक्षितेनेत्यर्थः । यतो भगवद्भक्तः अतो भगवत्कथामेव पृष्टवानिति भावः । प्रश्नेन शुकस्य प्रसन्नतामपि हेतुं सूचयंस्तं विशिनष्टि—ब्रह्मरात इति, ब्रह्मणा भगवतैव रातः पुत्रत्वेन व्यासाय दत्त इत्यर्थः । यतः सोऽपि भगवद्भक्तः अतस्तत्कथाप्रश्नेन प्रसन्नो जात इति भावः । भागवतस्याप्रामाण्यशङ्कानिरासायाह—ब्रह्मसम्मितमिति, वेदतुल्यमित्यर्थः । कुत एतदागतं कथं वा तस्य भागवतमिति नामेत्यपेक्षायामाह—ब्रह्मण इति । ब्रह्मकल्पे सृष्ट्युपक्रमकल्पे उपागते प्राप्ते सति ब्रह्मणे चतुर्मुखाय भगवता प्रोक्तमित्यन्वयः ॥ २७ ॥ २८ ॥ ❀ ❀ ननु राजा तु विविधान् प्रश्नान् कृतवान् स भागवतं कथं प्राहेत्याशङ्क्याह—यद्यदिति । पाण्डूनां वंशे ऋषभः श्रेष्ठः परीक्षित् यद्यदनुपृच्छति अन्वपृच्छत् तत्सर्वमानुपूर्व्येण प्रस्तावक्रमेण आख्यातुं भगवदाख्यानेनैव तदुत्तरं वक्तुमुपचक्रमे उपक्रान्तवानित्यन्वयः ॥ २९ ॥

**इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥**
**श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥**
**रचिता च द्वितीयेऽत्र मननस्य निरूपणे । अष्टमो विवृतोऽध्यायो राज्ञः शङ्कानिरूपकः ॥ ३ ॥**

## हिन्दी अनुवाद

सूतजी कहते हैं—शौनकादि ऋषियो ! जब राजा परीक्षित्‌ने संतोंकी सभामें भगवान्‌की लीला-कथा सुनानेके लिये इस प्रकार प्रार्थना की, तब श्रीशुकदेवजीको बड़ी प्रसन्नता हुई ॥ २७ ॥ ❀ ❀ उन्होंने उन्हें वही वेदतुल्य श्रीमद्भागवत-महापुराण सुनाया, जो ब्राह्मकल्पके आरम्भमें स्वयं भगवान्‌ने ब्रह्माजीको सुनाया था ॥ २८ ॥ ❀ ❀ पाण्डुवंशशिरोमणि परीक्षित्‌ने उनसे जो-जो प्रश्न किये थे, वे उत्तर क्रमशः देने लगे ॥ २९ ॥

**आठवाँ अध्याय समाप्त ।**

# अथ नवमोऽध्यायः

## श्रीशुक उवाच

**आत्ममायामृते राजन् परस्यानुभवात्मनः । न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसा ॥ १ ॥**

**बहुरूप इवाभाति मायया बहुरूपया । रममाणो गुणेष्वस्या ममाहमिति मन्यते ॥ २ ॥**

**यर्हि वाव महिम्नि स्वे परस्मिन् कालमाययोः । रमेत गतसम्मोहस्त्यक्त्वोदास्ते तदोभयम् ॥ ३ ॥**

**आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतम् । ब्रह्मणे दर्शयन् रूपमव्यलीकव्रतादृतः ॥ ४ ॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

राजप्रश्नोत्तरं वक्ष्यन्ब्रह्मणे हरिणोदितम् ॥ कथयामास नवमे शुको भागवतं पुनः ॥ १ ॥

तत्र यत्तावदुक्तं यदधातुमत इत्यनेन जीवस्य कथं देहसंबंध इति तत्रोत्तरमाह । आत्ममायेति । आत्मनो हरेर्मायामंतरेण अनुभवरूपस्यात्मनोऽर्थेन दृश्येन देहादिना संबंधोंऽजसा तत्त्वतो न घटेत । अत्र हेतुः । परस्येति स्वप्नद्रष्टुर्यथा स्वप्नदेहसंबंधो न घटते तद्वत् ॥ १ ॥ ❀ ❀ संसारोऽपि माययैवेत्याह । बहुरूपो बालयुवादिरूपो देवनरादिरूपश्चाभाति गुणेषु देहादिषु ॥ २ ॥ ❀ ❀ अत एव भक्तियोगेन तन्निरासे सति मोक्षोऽपि घटत इत्याह । यर्हीति । वावशब्द एवार्थे । स्व एव महिम्नि यदा रमेत । तदेवाह । कालमाययोः पुरुषप्रकृत्योः परस्मिन् तदोभयमहंममेति च त्यक्त्वा उदास्ते पूर्णरूपेणावतिष्ठते । तदुक्तम् "यया संमोहितो जीव आत्मानं त्रिगुणात्मकम् ॥ परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ॥ अनर्थोपशमं साक्षाद्भक्तियोगमधोऽक्षजे । लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिताम् ॥" इति ॥ ३ ॥ ❀ ❀ यच्चोक्तम् परमेश्वरस्यापि देहसंबंधाविशेषात्कथं तद्भक्त्या मोक्षः स्यादिति 'आसीद्यदुदरात्पद्मम्' इत्यादिना तत्राह । आत्मनो जीवस्य तत्त्वविशुद्ध्यर्थं तद्भवत्येव । किं तत् । यत्तपआदिना भजनं स्वं भजते भगवान् ब्रह्मणे आह किं कुर्वन् । ऋतं सत्यं चिद्घनं रूपं दर्शयन् । दर्शने हेतुः । अव्यलीकेन व्रतेन तपसा आदृतः सेवितः सन् । अयं भावः । जीवस्याविद्यया मिथ्यारूपदेहसंबंधः । ईश्वरस्य तु योगमायया चिद्घनलीलाविग्रहाविर्भाव इति महान् विशेषः अतस्तद्भजनान्मोक्षोपपत्तिरिति ॥ ४ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

तत्र प्रश्नकदंबे अंतरेण विना अनुभवरूपस्य ज्ञानरूपस्यात्मनो जीवस्य । अत्र देहासंबंधे परस्य प्रकृत्यादिसंगरहितस्य स्वप्नदेहसंबंधो यथा निद्रारूपां मायां विना न घटते तथाऽशरीरस्य जीवस्य शरीरसंबंधो भगवदिच्छारूपमायाकार्यसत्त्वोदयगुणमयीं प्रकृतिं विना न घटते इति भावः ॥ १ ॥ ❀ ❀ मायया तत्तद्देहाध्यासेन तत्तद्देहिनमात्मानं मन्येत वस्तुतस्तथात्वाभावात् ॥ २ ॥ ❀ ❀ अत एव बहुरूपाहं ममत्वादेर्मायिकत्वादेव महिम्नि ब्रह्मभावे अत्र मानमाह—तदुक्तमिति । श्लोकाविमौ प्रथमस्कंधे व्याख्यातौ ॥ ३ ॥ ❀ ❀ अव्यलीकेन निष्कपटेन अत्राशयमाह—अयं भाव इति । अतो योगमायाविलसच्चिद्घनविग्रहवत्त्वात् ॥ ४ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

यदधातुमत इति पूर्व्वाध्यायस्य षष्ठश्लोकः ॥ १ ॥ २ ॥ ❀ ❀ यया सम्मोहितः इत्यादि प्रथमस्कन्धीयसप्तमाध्यायस्य पञ्चमषष्ठश्लोकौ ॥ ३ ॥ ❀ ❀ आसीदिति पूर्व्वाध्यायस्य सप्तमश्लोकः ॥ ४ ॥ ५ ॥

### श्रीमद्वीरराघवव्याख्या

अथ राज्ञः प्रश्नानामुत्तरं वक्तुं भागवताख्यानमारभ्यमाणेन मुनिना तावज्जीवस्य देहारंभः सहेतुको निर्हेतुको वेति प्रश्नस्य जीवदेहतुल्यपरिमाणावयवत्वेन जीवतुल्यत्वप्रयुक्ता भजनीयत्वामोक्षप्रदत्वप्रश्नस्य मुक्त्वात्ममायां शेते तं च देशं कथयस्वेति प्रश्नस्य चोत्तरं नवमेऽध्याये नोच्यते तत्र सहेतुकत्वनिर्हेतुकत्वप्रश्नस्योत्तरं वदन् त्रिपाद्विभूतिविशिष्टस्य भगवतः कालमायावश्यत्वाभावं वक्तुं संसारे चेतनानां कालमायावश्यत्वमाह आत्मेति । अनुभवात्मनः अनुभवो ज्ञानं तदात्मा स्वरूपं यस्य तस्यात एव परस्य देहादिभ्यो विलक्षणस्य जीवस्यार्थसंबंधः—भोग्यभूतशब्दादिविषयेषु भोक्तृतया संबंधः आत्ममाया परमात्मनियाम्यां मायां प्रकृतिमृते विना अंजसा सामीचीन्येन न घटेत न सन्गच्छेत तत्र दृष्टांतः स्वप्नद्रष्टुरिवेति । यथा स्वप्नद्रष्टुः न तत्र रथा न रथयोगा न पंथानो भवंति अथ रथान् रथयोगान् पथः सृजते, कामं कामं पुरुषो निर्मिमाण इति श्रुत्युक्तरथादिपदार्थसंबंधस्तदर्थ-

भगवन्मायामतेनोपपद्यते तद्वदित्यर्थः। प्रकृतिः तिरोहितस्वपररूपत्वात्प्रकृतेषु भाग्यबुद्धिरिति भवति एवं च प्रकृत्यातिरोहितस्वपररूपत्वमेव देहारंभे हेतुरित्यहेतुकत्वं निरस्तं भवति ॥ १ ॥ ❀ ❀ उक्तं विवृणोति बह्विति। बहुरूपया विचित्रपरिणामिन्या भगवन्मायया तिरोहितज्ञानानंदस्वरूपो जीवः देवमनुष्याद्याकारमात्मन्यारोप बहुरूप इव भातीत्यर्थः। अस्या मायाया गुणेषु सत्त्वादिगुणकार्येषु शब्दादिषु रममाणः शब्दादीन् भुंजानो ममाहमिति मन्यते अहंकारममकाराभ्यां बुद्धो भवतीत्यर्थः ॥ २ ॥ ❀ ❀ जीवप्रस्तावाद्यवस्थानं स्वरूपत इति जीवविषयप्रश्नान्तरस्योत्तरं वदन् सन्स्वरूपसाक्षात्कारे सति शब्दादिप्रावण्यनिवृत्तिरित्याह यर्हीति। यर्हि यदा मुक्ताविलर्थः। स्वे स्वाभाविके कालमाययोः परस्मिन्कालमायाकार्यासंस्पृष्टे महिम्नि अपहतपाप्मत्वादिसत्यसंकल्पत्वपर्यंतगुणाष्टकलक्षणे परमात्मशेषनैकरसस्य स्वात्मनो महिम्नि यद्वा कालमाययोः परस्मिन्नियंतरि महिम्नि उक्तविधपरमात्ममहिम्नि महिम्नो नियंतृत्वं महिम्नद्वारा रमेत गतसंमोहः निवृत्ताहंकारममकारः तदोभयं प्रकृतिकालवश्यत्वं त्यक्त्वा हित्वा उदास्ते शब्दादिषु योग्यसिद्धार्थप्रवृत्तिशून्यो भवतीत्यर्थः। अनेनाविर्भूतगुणाष्टकविशिष्टत्वेनावस्थितिरेव स्वरूपतो व्यवस्थानं तादृशस्वरूपस्यापि स्वात्मनस्वात्मभूतनिरतिशयानंदपरब्रह्मानुभवः परब्रह्मशरीरभूतत्वेन स्वात्मानुभवो वा शब्दादिप्रावण्यनिवर्तक इति चोक्तं भवति ॥ ३ ॥ ❀ ❀ यच्चोक्तं भगवतोपि जीववद्देहसंबंधाविशेषात्कथं तद्भजने न मुक्तिरिति तस्योत्तरं कालमायावश्यजीवस्य कर्माधीनः प्राकृतो देह ईश्वरस्य त्वप्राकृतस्वेच्छोपात्तदिव्यविग्रहवत्त्वमित्येवं वक्ष्यन्कालमायावश्यजीव विलक्षणभगवत्स्वरूपविशोधने कथं ज्ञायत इत्यत्राह आत्मतत्त्वेति। अव्यलीकव्रतादृतः निर्दिष्टव्रतेन आदृतः आराधितः भगवान् ब्रह्मणे चतुर्मुखाय रूपमप्राकृतं स्वीयरूपं दर्शयन्नात्मतत्त्वविशुद्ध्यर्थं जीवविलक्षणपरमात्मयाथात्म्यविशोधनार्थं ऋतं सत्यं यद्वचनमाह तद्वक्ष्यामीति शेषः। अदर्शयद्रूपमिति पाठे यथादर्शय तथाहेत्यर्थः ॥ ४ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

चतुर्मुखस्य भगवदनुग्रहेण तल्लोकदर्शनं तेन विनाभूतं तत्स्वरूपदर्शनं प्रकृतिजीवयोगस्तदधीनत्वमित्यादिमाहात्म्यवर्णनेन हरेर्हृदयद्रवीभावहेतुर्भक्तिरेवेत्यतः सा हरौ कर्तव्ये तस्मिन्नध्याये प्रतिपाद्यते तत्रादौ यद्धातुमत इत्यस्योत्तरं वक्ति आत्ममायामिति। परस्य धातुशब्दवाच्यार्थेभ्यः प्रकृत्यादिभ्यो व्यतिरिक्तस्यानुभवात्मनो ज्ञानात्मनोऽत एव स्वतोऽशरीरस्य जीवस्यात्ममायां हरेरिच्छां तदधीनां सत्त्वादिगुणरूपां प्रकृतिं च ऋते विना अर्थसंबंधो देहादिसंबंधो न घटेत तथा स्वप्ने करितुरगादिपदार्थानां द्रष्टुर्जीवस्य भगवदिच्छानियतैर्वासनोद्बोधकैरजस्तमोभावैर्ऋते स्वाप्नपदार्थसंबंधः करितुरगादिदर्शनं न युज्यते तस्माद्देहस्य जीवस्य देहसंबंधे भगवदिच्छाप्रथमहेतुः द्वितीया स्वगुणैः सहप्रकृतिरित्युत्तरे अंजसेत्यनेन अशरीरस्य जीवस्य शरीरोत्पत्तिकारणम्। ईश्वरेच्छा प्राथमिकी तां विना न हि किंचनेत्यादिप्रमाणं सूचयति। यद्वांजसेदमेव तत्त्वं स्वप्नस्यार्थक्रियाकारित्वेन सत्यत्वादसत्यस्य तदयोगान्नात्राघटितघटनापटीयस्यनिर्वाच्यलक्षणा मायोच्यते किंत्वीश्वरेच्छैव सूचकश्च हि श्रुतेराचक्षते च तद्विद इति सूत्राच्चेति अंजसा त्वरिते तत्त्व इति यादवः ॥ १ ॥ ❀ ❀ नन्वशरीरस्य जीवस्य भगवदिच्छानियतैः प्रकृतेर्गुणैर्देहारंभः कथमत्राह बहुरूप इति। ईशेच्छयानादित एवास्याः प्रकृतेर्गुणेषु मृद्घट इतिवत् गुणकार्येषु देहेंद्रियेषु च रममाणः सत्त्वादिगुणात्मकलिंगशरीरबद्धतया वर्तमानः सृष्टिकाले महदहंकारादिपंचभूतोपादानकत्वेन मानुषदेवासुरशरीरादिबहुरूपत्वेन बहुरूपतया विकृततया प्रकृत्या सह स्वयमविकृतोऽपि तदभिमानाद्विकृतत्वेनात्मानं च मन्यमानो बहुरूप इव मानुषादिरूप इवाभाति अहं मनुष्योऽहंदेव इत्यात्मानं मन्यते देहे दैहिकेषु त्रिगुणसंपातजयाऽहंमत्याहंममेति मन्यते चेत्यर्थः। तदुक्तं तेषां संपातजो भावो ममाहमिति या मतिरिति तस्मात्प्रकृत्यैव पुमान् मानुषादिविकारया ॥ मानुष्यादिरिवाभाति नित्यं चैतन्यरूपवानिति च तस्मादीशेच्छया नियतत्रिगुणात्मकलिंगशरीरेऽहंमानात्तन्मूलतया धातुभिर्देहारंभो युक्त इति भावः ॥ २ ॥ ❀ ❀ एवं बंधप्रकारमुक्त्वा ततोऽधुना जीवस्य मुक्तिप्रकारमाह यर्हीति। चशब्द एवार्थे यर्हि यदायं जीवो वैराग्यादिसाधनसामग्र्या समुत्पन्नभगवज्ज्ञानेनापरोक्षितनिजस्वरूपः कालमाययोः कालप्रकृत्योः परस्मिन्विलक्षणे तच्छक्तिसंसर्गरहिते स्वे महित्वे सच्चिदानंदलक्षणस्वरूपे रमते चाव्यवधानेन रमत्येव ॥ स्वस्वरूपे तदागतसंमोहो निरस्ताविद्यातत्कार्ये। उभयं बाधक्याद्यापादकां मायां देहारंभहेतुभूतां च तन्मूलं संसारं, त्यक्त्वेति यावत्। उदास्ते उत्कृष्टे वर्तते नीचत्वापादकात्संसारान्मुक्तो भवतीत्यर्थः। तदुक्तं यदा स्वरूपं जानाति कालप्रकृतिवर्जितं वासुदेवप्रसादेन तदा मुक्तो भवत्यसाविति अनेन सागुण्यं त्यक्त्वा नैर्गुण्यमाप्नोतीत्यपव्याख्यानमपास्तं तत्र प्रमाणाभावादिति ॥ ३ ॥ ❀ ❀ अत्रापि किं प्रमाणमित्याशंक्य भगवदुक्तं भागवतमेवैतादृशमोक्षप्रमाणमित्याह आत्मेति। आत्मनः परमात्मनो जीवस्य वा यत्तत्त्वमनारोपितं सच्चिदानंदलक्षणरूपं तस्याविशुद्ध्यर्थं निर्दोषत्वेनानिश्चयार्थमनुभवार्थं वा व्यासो भवान् यद्भागवतं पुराणमाह तदृतं यथोक्तं मुक्तिसाधनं ज्ञानसाधनं शास्त्रम्। न व्यामोहकमतो भगवदुक्तत्वेनोक्तमुक्तौ प्रमाणत्वात् त्वत्प्रश्नानामुत्तरत्वेन वदिष्यामीति शेष इत्यर्थः। प्रथमं तावत्पाद्मकल्पं विवक्षुर्देदृशेन तद्रूपमिति प्रश्नं प्रतिवक्ति ब्रह्मण इति। अव्यलीकेन प्रियत्वेन प्रसन्नताहेतुना व्रतेन भक्तिलक्षणेनादृतोऽर्चितः स हरिः स्वनाभिपद्मादुत्पन्नाय ब्रह्मणे चतुर्मुखाय रूपमदर्शयन्निजमिति शेष इत्यन्वयः ॥ ४ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

अनुभवरूपस्यापि जीवस्य यथा संमोहितो जीव आत्मानमित्याद्यनुसारेण मोहाद्यनुपपत्तेः स्वरूपशक्त्या अनुभवित्वमपि लभ्यत इत्यभिप्रेत्य सिद्धान्तयति । आत्ममायामिति । केवलानुभवत्वे मायासम्बन्धो न स्यात् , स्वप्नद्रष्टृदृष्टान्तश्च न घटत इत्यपि ज्ञेयम् ॥ १ ॥ २ ॥ ❀ ❀ स्वे महिम्नि स्वस्य महिमहेताविल्यर्थः । कालमाययोरपि परस्मिन् तत्तदादिसर्व्वाश्रयतत्त्वे इत्यर्थः । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते इति श्रीगीतातः । प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् इति श्रीऋषभदेववाक्याच्च । उभयं मायां देहादिरूपमर्थञ्च ॥ ३ ॥ ❀ ❀ यदेव च स्वे महिम्नि रमणं ऋतं परमब्रह्मलक्षणरूपं श्रीविग्रहाकारतत्त्वं दर्शयन् साक्षात्कारयन्नेव ब्रह्मणे ब्रह्माणं प्रत्याह चतुःश्लोक्योपदिष्टवान् शब्देनानुभवेन च यत् प्रकाशितवानित्यर्थः । किमर्थम् आत्मनो जीवस्य तत्त्वनिर्णयार्थम् । तद्द्वारा जीवान्तरमपि बोधयितुमित्यर्थः । तद्वा आत्मनः स्वस्य श्रीभगवतो यत् तत्त्वं याथार्थ्यं तस्य निर्णयार्थमिति । तस्य तादृशप्रसादे हेतुमाह अव्यलीकेति एतेन भगवद्विग्रहगतः प्रश्नश्चोत्तरयति ॥ ४ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

प्रश्नस्य प्रथमस्योक्ता द्वितीयस्योत्तरं वदन् । चतुःश्लोकी भागवतप्रवृत्तिं नवमेऽतनोत् ॥ ० ॥

यत् पृष्टं यदधातुमत इत्यनेन जीवस्य देहसम्बन्धो निर्हेतुकः सहेतुको वा तत्रोत्तरमाह । आत्मनो हरेर्माया अनाद्यविद्याशक्तिम् अन्तरेण अर्थे देहेन्द्रियादिभिः सम्बन्धो जीवस्य न घटेत यथा स्वप्नद्रष्टुरज्ञानमृते स्वाप्निकदेहसम्बन्धो न घटेत यतोऽनुभवात्मनः ज्ञानं मदीयस्य तथा देहादिभ्यः परस्य । मायया त्वचिन्त्यशक्त्या दुर्घटघटनापटीयस्या देहसम्बन्धो घटत इत्यर्थः ॥ १ ॥ ❀ ❀ एवञ्च यादृच्छिकया अविद्याशक्त्यैव देहसम्बन्धे सति जीवः कीदृशः स्यादित्यपेक्षायामाह । बहुरूपः बाल्युवादिरूपो देवनरादिरूपश्च । इवेति जीवस्य चित्कणरूपत्वान्न तत्त्वत इत्यर्थः । बहुरूपया जीवस्य बहुरूपत्वहेतुत्वात् बहुवृत्तिकया । यदुक्तं यया । क्षेत्रज्ञशक्तिः स तारतम्येन वर्त्तते इति ॥ २ ॥ ❀ ❀ एवञ्च यादृच्छिकया माययैव जीवस्य संसारो यथा तथैव यादृच्छिकया भक्त्यैव जातप्रेम्णो जीवस्य संसारान्निस्तार इत्याह यर्हीति । वाशब्द एवार्थे । यर्ह्येव स्वे स्वीये महिम्नि रमेत इति । वस्तुतः खलु स्वीये देहादिके ममतास्पदे रमणं त्यक्त्वा यथार्थत एव स्वीये ममतास्पदे वस्तुनीत्यर्थः । महिम्नि महिमातिशयत्वात् महिमरूपे एवेत्यर्थः । कालमाययोः परस्मिन् कालकृतविकाररहिते मायाकृतमहदादितत्त्वरहिते च स्वरूपे रमेत आसज्जेत । तच्च न यत्र काल इति न यत्र मायेत्यादिवक्ष्यमाणवाक्यदृष्ट्या भगवतो धाम श्रीविग्रहपार्षदादिकं ज्ञेयम् । रमणस्य भक्त्यविनाभावित्वात् यदृच्छया प्राप्तया भक्त्येति लक्ष्यते तदा उभयं कालं मायाञ्च कालकृतं अविकारं मायाकृतं लिङ्गञ्च त्यक्त्वा तत्र ( ततः ) उदास्ते अनासक्तो भवति । यदुक्तम्-यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम् । परोऽपि मनुतेऽनर्थं तत्कृतञ्चाभिपद्यते ॥ अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे लोकस्याजानतो व्यासश्चक्रे सात्वतसंहिताम् इति ॥ ३ ॥ ❀ ❀ ननु कालमाययोः परतरे तत्त्वे किंयत्र रमेत तत्राह आत्मतत्वस्य स्वीयतत्त्वस्य विशुद्धिर्ज्ञानं तदर्थं दशमस्य विशुद्ध्यर्थमितिवत् यद्वा आत्मनो जीवस्य तत्त्वानां चित्तादीनां विशुद्ध्यर्थं, यत् ऋतं सत्यं चिद्घनं रूपं दर्शयन् आह चतुश्लोकीभागवतमुपदिदेशात्र हेतुः अव्यलीकेन व्रतेन निष्कपटया भक्त्या आदृतः यच्छब्दस्योत्तरवाक्यगतत्वान्न तत्पदापेक्षा । अयं भावः जीवस्याविद्यकदेहसम्बन्धः ईश्वरस्य तु योगमायया चिद्घनलीलाविग्रहाविर्भाव इति महान् विशेष उक्त इति श्रीस्वामिचरणाः । एवञ्च आसीद्यदुदरात् पद्ममित्यादिना जीवदेहादीश्वरदेहस्य कोऽपि विशेष इति द्वितीयप्रश्नस्योत्तरमुक्तम् ॥ ४ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अधुना राजप्रश्नोत्तरं श्रीमद्भागवताख्यानेनैव वक्तुं तन्मूलभूतं ब्रह्मणे भगवत्प्रोक्तं सूक्ष्मं भागवतं विवक्षुरादौ यदधातुमतो ब्रह्मन्देहारंभोऽस्य धातुभिः यदृच्छया हेतुना वेत्यस्य आत्मनो बंधमोक्षौ चेदस्य व्यवस्थानं स्वरूपत इत्यस्य परमेश्वरस्यापि बद्धजीवदेहसंबंधाविशेषाद्भुक्तिमुक्तिप्रदत्वं दुर्घटमिवेत्यस्य स चापि पुरुषः यस्मिन् लोके शेते तं लोकमुदाहर्तुमर्हसीत्यस्य च प्रश्नस्योत्तरमाह आत्ममायेत्यादिना । तत्र जीवस्य देहारंभो यदृच्छया नास्ति किंतु सहेतुक इत्याह अनुभवात्मनः ज्ञानरूपस्य परस्य देहेन्द्रियमनोबुद्धिप्राणादिभ्यो विलक्षणस्य जीवस्य अर्थसंबंधः देहादिना संबंधः संयोगः आत्मनः परमात्मनः मायां प्रकृतिमृतेंजसा न घटेत न संगच्छेत भगवन्माययैव देहादिसंयोगः न निर्हेतुकः सर्वत्र संबंधप्रसंगादसंभवाच्च तत्र दृष्टांतः स्वप्नदृष्टुरिवेति । यथा स्वप्नदृष्टुः देहसंबंधः परमात्मनः मायामृते न घटेत तद्वत् स्वप्नदृष्टुः शुभमशुभं वा देहादिकं स्वशक्तिभूतया मायया परमात्मैव करोति । न तु स्वप्नपदार्थो निर्हेतुकः सर्वत्र सर्वोत्पत्तिप्रसंगात् । नच तत्कर्ता तद्द्रष्टा अनिष्टदेहादिसंबंधदर्शनात् विस्तरस्तु वेदांतकौस्तुभे द्रष्टव्यः ॥ १ ॥ ❀ ❀ बंधं दर्शयति बहुरूप इवेति । देवमनुष्यादिदिहेंन्द्रियमनोबुद्ध्यादिभेदेनानेकप्रकारया मायया हेतुभूतया संदेहादिभ्यो विलक्षणोपि ज्ञानस्वरूपोऽपि बहुरूप इव आभाति । देवोहं मनुष्योहं बालोहं स्थविरोहमित्येवं नानारूप इव प्रतीयते अस्याः मायायाः गुणेषु रममाणः ममाहमिति मन्यते देहे अहंबुद्ध्या तदनुबंधिषु मदीयबुद्ध्या च बद्धो भवति ॥ २ ॥ ❀ ❀ मोक्षमाह यर्हीति । तर्हि यदा श्रोत्रियस्य ब्रह्मनिष्ठस्य गुरोः चरणोपासनेन

गतसंमोहः आत्मानात्मपरमात्मस्वरूपादिविवेकवान् कालमाययोः कालप्रकृत्योः परस्मिन् स्वे महिम्नि ब्रह्मणि भगवति जगत्कारणे रमेत ध्यानादिनाक्रीडेत तदोभयम् अहंममेति च त्यक्त्वा अर्चिरादिमार्गेण परं पदं प्राप्य उदास्ते आविर्भूतापहत्पाप्मत्वादिधर्मित्वेन अवतिष्ठते अनेनैव स्वरूपतो मुक्ताऽवस्थानमित्युक्तम् ॥ ३ ॥ ❀ ❀ अथ परमेश्वरस्यापि बद्धजीववद्देहसंबंधाविशेषाद्भुक्तिमुक्तिप्रदत्वं दुर्घटमिवेत्यस्योत्तरं बद्धजीवस्य प्राकृतमनित्यं शरीरं परमेश्वरस्य त्वप्राकृतं नित्यं वपुरिति दर्शनात् तप आदिभगवद्भजनमेव मुक्तिसाधनमित्याह आत्मतत्वविशुद्ध्यर्थमिति । अव्यलीकेन तपआदिभजनेन आदृतः आराधितः सन् ब्रह्मणे चतुर्मुखाय ऋतं सत्यं रूपं दर्शयन् यत्तप आदिभजनमाह आत्मनः मुमुक्षोर्जीवस्य तत्वविशुद्ध्यर्थम् आविर्भूतमहदज्ञत्वाद्विशुद्ध्यर्थं मुक्त्यर्थमित्यर्थः ॥ ४ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

नवमे तूत्तरं प्राह जीवब्रह्मस्वरूपयोः । सन्देहवारकं पूर्वकथनस्याऽपि वस्तुताम् ॥ १ ॥
पारम्पर्यकथा चाऽस्य शुद्ध्या[1]धिक्यावगम्यते । नाऽन्यथेत्यस्य सन्देहनाशनाय निरूपिता ॥ २ ॥

अन्येषां सन्देहानां जीवब्रह्मसन्देहमूलत्वात्प्रथमं जीवसन्देहं वारयति—**आत्ममायामृत** इति त्रिभिः । यत्तेनोक्तं यदधातुमतो ब्रह्मन्निति । अस्य जीवस्य देहसम्बन्धः कथमिति । जीवत्वं कथमिति अन्यशब्देन प्राप्तम् । तत्र जीवत्वे जाते बहवो भविष्यन्ति देहसम्बन्धे इति प्रथमं जीवत्वमुपपादयति—**आत्ममायामृत** इति । तत्र सदानन्दरूपो भगवानेककोटिनिविष्टः । चिद्रूपश्चाऽपरः । तस्य मा[2]या द्विविधेति पूर्वं निरूपितम् । तत्र चिद्रूपस्य मा[3]या व्यामोहिका । सा स्वपुरुषं व्यामोहयित्वा जीवतामापादयतीति । जीवतीति जीवः केवलं प्राणधारणप्रयत्नवान् । स हि मायया व्यामोहितो व्याकुलः सन् सदानन्दकृतसृष्टौ यः सूत्रात्मक आसन्यो दशविधप्राणरूपस्तमवलम्ब्य तिष्ठति तदा जीव इत्युच्यते । "**जीव प्राणधारणे**" इति धातोः कर्त्तरि अच्प्रत्ययः । बोधरूपोऽप्ययमानन्दरूपस्य पृथग्भूतत्वादानन्दार्थं तया व्यामोहितत्सम्बन्धादानन्दो भविष्यतीति बुद्ध्या तया सम्बध्यते । अयं च विभागो "**बहु स्यां प्रजायेये**"तीच्छया । इच्छाऽपि सर्वभवनसम[4]र्थं स्वरूपमेव धर्मरूपेण भवेत् इच्छारूपेणाऽपि भवति । तत्र सदंशस्य क्रियारूपा शक्तिः । चिदंशस्य व्यामोहिका माया । आनन्दरूपस्य जगत्कारणभूता । एकत्रितयरूपा शक्तिः सच्चिदानन्दरूपस्य भा[5]वत्वतलादिवाच्या । तथा भगवतो भावस्तु स्वरूपादेव निर्मि[6]तात् । न च सर्वदा भवतीति शङ्कनीयम् । आपादकहेतुभूतस्य कालस्याऽभावात् । जाते पुनः काले तस्यैव नियामकत्वान्न सर्वदा भविष्यति । पूर्वमेव जातत्वात् तत्सङ्गे इच्छादीनामपि जातत्वादिच्छादयस्तदंशभूतास्तान् सदैकरूपान् स्थापयन्ति । तथा च तस्या अंशं परिगृह्णाति भगवानिच्छारूपम् । स एव कामः "**सोऽकामयते**"ति श्रुत्युक्तः । तया कृत्वा भेदरूपया सच्चिदानन्दा धर्माः स्वयं भिद्यमानाः स्वाश्रयमपि भिन्दन्ति । तदा स भगवान् सर्वतःपाणिपादान्तो भवति साकारतां चाऽऽपद्यते । भिन्नोऽपि तया मिलितः अभिन्न इवाऽखण्डो भवति । तदपेक्षया कार्यरूपस्याऽल्पत्वात् । तानि त्रीण्यपि रूपाणि पूर्णशब्देनोच्यन्ते । अत एव सद्रूपस्य कार्ये प्रत्येकपर्यवसायित्वम् । "**प्रजायेये**"तीच्छया उत्कर्षापकर्षरूपेण जाताः । तत्र आनन्द उत्कृष्टः । तदेतरौ तं सेवमानौ जातौ । ततश्च तयोर्धर्मौ ज्ञानक्रिये भगवच्छक्तिरूपे जाते । तदा स आनन्दो ज्ञानक्रियाशक्तिमान् जातः । तदा चिदंशस्य शक्तिरानन्दे गतत्वात् ज्ञानधर्मस्य तं व्यामोहयति तदा तस्य जीवत्वम् । सदंशस्तु क्रियाशक्ते र्गतत्वादव्यक्ततामापद्यते । पश्चान्मूलभूतक्रियांशाभिः क्रियाभिर्यथायथमभिव्यज्यते । पश्चात्तस्यां तत्कृतधर्मे वा तिरोभूते स्वयमपि तिरोभवति । तदा तस्यां मूलेच्छया जातः शब्दोऽभिव्यक्त एव तिष्ठति जीवभगवद्बुद्धिषु । जीवे भगवति । वा । एवं चिद्रूपोऽपि ज्ञानशक्त्यंशभूतैर्ज्ञानैरभिव्यज्यते तिरोभवति च । प्रयत्नस्तु तस्याऽपराधीन इति स जीवग्रहणार्थं सर्वदा तिष्ठति । स चेद्भगवांस्तस्मै तां पूर्णां ज्ञानशक्तिं प्रयच्छेत् तदा तां मोहिकां मायां त्यजति । प्रयत्नं च त्यजति । स्वरूपे चिद्रूपे चाऽवतिष्ठते । अपराधीनश्च भवति । जगत्कर्तृ त्वं तु न भवति । [7]तस्य सा माया शक्तिर्न भवति । उत्कर्षोऽपि न भवति । आनन्दस्यैवोत्कृष्टत्वात् । हीनता त्वापाततो वर्त्तते । आनन्देन सह मिलितस्त्वानन्दोऽपि भवति । स चेत्स्वधर्मेण [8]सङ्गृह्णीयात् इयं प्रक्रिया सर्वश्रुतिवाक्यानुरोधेन श्रुतार्थापत्तिसिद्धा सर्वत्रैवोपयुज्यते । अन्यथा प्रक्रिया तु वाक्यानि बाधते । जीवभेदं त्वग्रे निरूपयिष्यामः ! एतदेवाऽऽह—आत्ममायां आत्मनः स्वस्य चिद्रूपस्य मायां व्यामोहिकामृते । अस्य चिद्रूपस्य । राजन्निति सम्बोधनं राजसत्वात्तव स्वरूपाज्ञानमिति दयां बोधयति । व्यामोहानन्तरमेव देहसम्बन्ध इति तादृशं विशेषमाह—**अनुभवात्मन** इति । वस्तुतस्त्वनुभवात्मा परं सामर्थ्यं भगवति गतमस्ति यतो व्यामोहो भविष्यति । अन्यथाऽर्थसम्बन्ध इव व्यामोहोऽपि न भवेत् । व्यामोहव्यतिरेकेण केवलशक्त्यभावेनार्थसम्बन्धो निरूपयितुमशक्यः । सहजशक्तिश्च सा । तस्याः दोषत्वेन

---

१. शुद्धाधिको ग. । २. मायापीति ख. । ३. इयं माया सेति ख. । ४ समर्थस्वरूप इति ख. । ५. भावः स्वतलादिवाच्यः ख. । ६.निर्मितत्वादिति ख. । ७. तस्या इति ख. । ८. तं गृह्णीयादिति ख. ।

पर्यवसानं हीनभावात् । जीवस्य सामर्थ्यलाभेऽपि तस्या हीनभावापगम[1]: पृथग्भूताया न भविष्यति । तया व्यामोहे तु [2]अर्थेन देहादिना सम्बन्धः सुखेन घटते । मोहितस्याऽर्थसम्बन्धं दृष्टान्तेन स्पष्टयति—स्वप्नद्रष्टुरिवेति । निद्रया व्यामोहितो भगवत्कृतां मायिकीं सृष्टिं पश्यत्यभिमन्यते च । निद्रायाः [3]सर्वेत उद्गमाभावात् मूलभगवन्मायया कृत्वा सा शीघ्रं तिरोभूता भवति तदा स जागर्त्ति । एवं स्वप्नदृष्टान्तेन तस्य व्यामोहं निरूप्य दार्ष्टान्तिके विशेषमाह—अञ्जसेति । सामस्त्येन । स्वप्नकोटयोऽत्र मध्ये भवन्ति । इदं त्वेकमेव जन्मकोटिष्वनुवर्तते ॥ १ ॥ ❀ ❀ एवं तस्याः सम्बन्धमात्रं निरूप्य कार्यं निरूपयति—बहुरूप इवेति । सा ह्याभास[4]मूलमाया बहुरूपा भवति । तया सम्बद्धोऽयं स्वयमपि बहुरूपो भवति । इवेति वचनं तस्याः सम्यक्स्वरूपसमर्पकाभावात् । तदा आनन्दार्थं तस्या गुणेषु रममाणः । तस्याः गुणान् गृहीतुमिच्छुः । ममाहमिति । ममेति गुणेषु । अहमिति मायायाम् । सम्बन्धप्रतिपादकावेतौ शब्दौ तस्य स्वरूपेऽर्थं समर्पयतः ॥ २ ॥ ❀ ❀ एवं तस्याः कार्यमुक्त्वा तत्परित्यागोपायमाह—यर्हि वावेति । यर्हि कदाचिन्मूलभूतस्य इच्छावशात् । वावेति निश्चयेन । स्वे महिम्नि स्वस्य महिमरूपे भगवति आनन्दे । गुणक्षोभककालस्य मोहिकाया जगत्कर्तृकाया मायाया नियन्तरि । तयोः कार्यं स्वेच्छया दूरीकृत्य प्रसन्नतया स्थिते यदि रमेत । तत्रापि भगवानेनं प्रति सर्वथा स्वमाहात्म्यं न बोधयतीति तस्य स्वामित्वे यदि सन्देहं न कुर्यात्, तदा गतसन्देह[5] उभयं त्यजति । व्यामोहिकां मायां, गुणान्, तत्कार्यं देहादिकं वा, ममाहमिति भावं वा त्यक्त्वा उदास्ते तस्यामासक्तिं न करोति तदा निस्तार इति भावः ॥ ३ ॥ ❀ ❀ एवं जीवसन्देहं परिहृत्य ब्रह्मसन्देहं निवारयति—आत्मतत्त्वविशुद्ध्यर्थमित्यारम्भ न विमुह्यति कर्हिचिदित्यन्तेन—अत्राऽपि मुक्तिरस्माभिः प्रक्रियया निरूपितैव । स्वरूपमेवाग्रे निरूप्यते । तत्र प्रथमं ब्रह्मणोऽपि देहसम्बन्धाज्जीवतुल्य[6] इति यद्दूषणं सर्वात्मकत्वानुपपत्तिं वा तदत्र निराक्रियते । आत्मनस्तत्त्वं यथार्थरूपं तस्य विशुद्ध्यर्थम् । लौकिकानां ज्ञानेन लौकिकभावेनाऽन्यथा प्रतिभान[7]लक्षणां शुद्धिं दूरीकृत्य विशेषशुद्धिं सम्यग्बोध[8]लक्षणां जनयितुम् । यदाह । न केवलं वचनं किन्तु ऋतं सत्यं स्वस्याऽऽनन्दरूपं ब्रह्मणे प्रदर्शयन् यदाहेति सम्बन्धः । प्रदर्शने कथने च हेतुः—अव्यलीकव्रतादृत इति । निष्कपटव्रतेन आदृतः सेवितः सन्तुष्टो वा ॥ ४ ॥

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः**

अथ नवमाध्यायं विवरिषवः पूर्वाध्यायं सङ्गमयितुमेतदध्यायार्थमाहुः **नवम** इत्यादि । कारिका तु स्फुटार्था, तथा चाक्षेपसमाधानभवा सङ्गतिरित्यर्थः । नन्वत्राग्रे पारम्पर्यकथा किमित्युक्तेत्याकाङ्क्षायां तत्कथनप्रयोजनमाहुः **पारम्पर्येत्यादि** । अस्य जीवस्य शुद्ध्याधिक्ये सति भगवदुक्तोर्थोवगम्यते, न तु प्रकारान्तरेणेति हेतोः, अस्य राज्ञः सन्देहनाशनाय उपलक्षणविधया सन्देहान्तरानुत्पत्तये च पारम्पर्यकथा निरूपितेत्यर्थः । **आत्ममाय** मित्यत्र । एवं कारिकायामध्यायार्थं सङ्गृह्य व्याख्यातुमवतारयन्तः प्रथमं जीवसन्देहवारणे हेतुमाहुः अन्येषामित्यादि । एवं च जीवसन्देहनिवृत्तेर्ब्रह्मज्ञानोपकारकत्वाद्राज्ञा पूर्वं तदर्थमेव प्रश्नस्य कृतत्वाच्च पूर्वं तदेव वारयतीत्यर्थः । **अन्यशब्देन प्राप्त** मिति प्राणधारणबोधकशब्देन प्राप्तम् । तत्रेति तादृश्यामाशङ्कायाम् । इतोति अस्माद्धेतोः, कथं जीवत्वमुपपादयतीत्याकाङ्क्षायां सृष्टिप्रक्रियाज्ञानं विना दुर्बोधस्य शुकवाक्याशयस्य बोधनार्थं वैदिकीं सृष्टिप्रक्रियामुपपादयिष्यन्तः पूर्वं जीवत्वमुपपादयन्ति तत्रेत्यादि । तत्रेति सच्चिदानन्दे ब्रह्मणि । तस्येति सच्चिदानन्दरूपस्य, कथं व्यामोहिकेत्याकाङ्क्षायां कार्यद्वारा तथात्वमाहुः सेत्यादि । **स्वपुरुषमिति** स्वाभिमानिनम्, का नाम जीवतेत्यत आहुः जीवतीत्यादि । दशविधप्राणरूप इति, अपानादीनां तद्भेदत्वाद्वा दशेन्द्रियाणि प्राणशब्दवाच्यानि । रूपयत्युपष्टम्भयतीति वा तथा । शब्दनिष्पत्तिप्रकारमाहुः जीवप्राणेत्यादि, तथा च, पूर्वोक्तं लक्षणमुपपन्नमित्यर्थः । ननु ज्ञानरूपस्य कथं व्यामोह इत्यत आहुः बोधेत्यादि, तथा च, तत्सम्बन्धादेव व्यामोह इत्यर्थः । एतावानर्थ 'आत्ममायामिति' श्लोके सङ्गृह्यते । नन्विदं तदोपपद्यते, यदा सच्चिदानन्दरूपस्य ब्रह्मणो विभागादिकं प्रामाणिकं भवेत्, अन्यथा तु कश्चिदनाद्यविद्यावच्छिन्नत्वादिना यः प्रस्थानान्तरे च 'नित्यो-नित्यानामि' त्यादिश्रुतिभिः दर्शनान्तरेषु च नानात्मानो व्यवस्थातः पुरुषबहुत्वं व्यवस्थात इति बन्धमोक्षादिव्यवस्थारूपया युक्त्या नित्यभिन्नास्ते जीवा अङ्गीकृता इत्यागन्तुकी जीवता नोपपद्येतेत्याकाङ्क्षायामाहुः अयञ्चेत्यादि । अत्र हि तैत्तरीयादिश्रुतौ इच्छाया आकारद्वयमुक्तम् । तत्र प्रथमेन विभागः प्राप्तः । स एव बृहदारण्यके 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ती' त्यादिनोच्यते । द्वितीयेन चोच्चनीचभावः, अन्यथा बहुत्वस्य पूर्वमुक्तत्वात् तेनैव जननबाहुल्यस्याप्यर्थबलादेव प्राप्तेः को वा प्रकर्षपदार्थः स्यात् । पुरुषविधब्राह्मणे ब्रह्मक्षत्रादिरूपताविवरणेन तस्य बोधितत्वाच्च, अत उच्चनीचभाव एव प्रशब्दार्थः । न च 'नित्यो नित्यानामि' तिश्रुतिविरोधः । एतदग्रे 'चेतनश्चेतनानामेको बहूनां यो विदधाति कामानि'तिश्रावणाच्चेतनतया बहुत्वस्य नित्यत्वस्य भानेन जीवतया तथात्वस्यानभिप्रेतत्वात् । न च विभागात्पूर्वं बहुत्वविरोधापत्तिः, आकाशस्तत्प्रदेशयोरिव तादात्म्यादविभागदशायामपि तदुपपत्त्या विरोधाभावादिति । न च साङ्कर्यापत्तिः, स्वभावभेदस्य 'प्रजायेये' तीच्छोत्तरकालीनत्वेन पूर्वं तस्याभावे मुक्तौ तन्निवृत्तौ

---

१. भावोपगत इति ख. । २. अनर्थेनेति ख. । ३. सर्वदोद्गमेति क. ख. । ४. मायारूपा बह्विति घ. । ५. सन्देहः भयमिति ग. । ६. तुल्यता इति ग. । ७. भावेनेति ग. । ८. बोधनलक्षणमिति ख. ।

मध्ये च तद्विवेकेन तस्य कदाप्यापादयितुमशक्यत्वात्। न च ब्रह्मणो दुःखानुभवाद्यापत्तिः, आपाद्यमानस्य सर्वस्य तदात्मकत्वान्ना-'ग्नेर्हि तापो न हिमस्य तत्स्या' दिति भिक्षुगीताप्रोक्तन्यायेन तस्याप्यभावादिति। न च व्यवस्थाविरोधः, भगवदिच्छयैवोपपत्तेः। इदं यथा तथा 'अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगता' इति १०-८७-३० वेदस्तुतिश्लोके व्युत्पादितमाचार्यचरणैः, तदेव जीव-व्यापकत्वखण्डने मयापि प्रपञ्चितम्। अनाद्यविद्यावच्छिन्नत्ववादस्तु 'अविद्यया बन्ध' इत्यादि श्रुतिपुराणेषु तस्याः करणत्वबोधना-त्तस्य च पूर्वभावित्वं विना अनिर्वाहाद्विद्वन्मण्डन एव दूषित इति पूर्वोक्तेर्थे न कोपि शङ्कालेशः। अयञ्चेत्यत्र चकारो विभागान्त-रस्यापि समुच्चायकः। ननु का नामेच्छा, स्वरूपं वा, अन्यद्वा। आद्ये स्वरूपस्य नित्यत्वेन तस्यास्तदाकारस्य तथात्वाज्जीवभेदस्य तत्स्वभावभेदादेरपि तथात्वात्पूर्वोक्तसाङ्कर्यादिदोषापत्तिः, ततश्च भेदवाद एव विश्रान्तिः। द्वितीये तु तस्या अपि कारणान्तरं मृग्य-मिति तेनैव भेदवादे विश्रान्तिरिच्छाया अनित्यत्वापत्तिश्चेति शङ्कायामाहुः इच्छापीत्यादि। तर्हि कथं तत्रेच्छापदप्रयोग इत्यत आहुः धर्मेत्यादि। तृतीयस्य द्वितीयपादे 'येनाश्रुतं श्रुतं भवती' त्यादिश्रुतीनामुपपत्त्यर्थं द्वेधा विचारितम्। तत्रोभयलिङ्गाधिकरणे नानाप्रकारमपि ब्रह्माहिकुण्डलन्यायेन स्वरूपबलादेव विरुद्धधर्माश्रयं भवतीति भेदापत्त्यभावात्प्रतिज्ञाश्रुतिः प्रमाणबलविचारेणोप-पादिता। तदनन्तरं 'पूर्ववद्वे' त्यधिकरणेऽसङ्गोदासीनमेव पूर्वं ब्रह्म, ततो धर्मरूपेण, ततः शक्तिरूपेण, ततः कार्यरूपेण च भवती-त्येवमपि भेदस्यागन्तुकत्वेन पूर्वमभावात्पाश्चात्यं न्यक्कृत्य पूर्वरूपबोधेपि तदुपपत्तिरिति प्रमेयबलविचारेण विचारितम्। अय-ञ्चोपपादनप्रकारभेदो मुख्यानामितरेषाञ्चाधिकारिणां बोधार्थमत्रापि दशमाध्यायसमाप्तावधिकारिभेदेन प्रकारभेदो वक्ष्यते। अत उभयथा पदप्रयोगोपपत्तिश्चेत्यर्थः। ऐच्छिकबहुभवनप्रकारं विशदयन्तः पूर्वं शक्तेस्तथात्वमुपपादयन्ति तत्रेत्यादि। 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे' ति श्वेताश्वतरे त्रैविध्यश्रावणात्सदंशस्य क्रियारूपा, चिदंशस्य ज्ञानरूपा, आनन्दस्य स्वरूपबलरूपा, वैविध्यश्रावणात्त्रिविधाया अपि वैवीध्येन बलशक्तेः विश्लेषेण तथात्वम्, ज्ञानशक्तेर्मायाऽविद्यादि-भेदेन क्रियाशक्तिरपि स्वांशक्रियाभेदेन, तदेतदुक्तं तत्रेत्यादिनेति न कोपि शङ्कावकाशः। नन्विच्छादिभवने विचार्यमाणे तत्र निमित्तान्तरापेक्षया पूर्वोक्तदूषणापत्तिरिति शङ्कायामाहुः तथा भगवत इत्यादि। तथाभाव इति शक्तिरूपेण भवनम्। नन्वेवं सति स्वरूपस्य नित्यत्वात्सहकार्यनङ्गीकाराच्च शक्तीनामपि नित्यत्वेन द्वैतवादापत्तिः। सर्वदेच्छापत्त्या असङ्गोदासीनत्वाभावप्रसक्तिरप्रतिह-तेच्छत्वात्तिरोभावानवसरेण सर्वदा सृष्ट्यापत्तिश्चेति चेत्तत्राहुः न चेत्यादि। भवतीति शक्तिरूपं भवति। न च 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमि' त्यादिश्रुतौ कालस्योक्तत्वेन सर्वदा तत्सत्तावगमात्तदभावो न शक्यवचन इति शङ्क्यम्, बोधनार्थमेव तथोक्तेः। न चात्र मानाभावः, तथाहि, किमत्र कालसत्ता विधीयते? उतानूद्यते? नाद्यः, वाक्यभेदप्रसङ्गात्, नेतरः, एतासां सृष्ट्यादिवृत्तान्तबोधकत्वेनैतदपेक्षयान्यासां पुरोवादत्वस्याशक्यवचनत्वेनानुवादस्य दूरापास्तत्वात्। न च कालविशिष्टब्रह्मसत्ता विधीयतेऽतो न दोष इति वाच्यम्, गौरवादवधारणान्तरविरोधापाताच्च। न चावधारणान्तरस्य मुख्यान्यसत्तानिवारकत्वान्न विरोध इति वाच्यम्, तथा सति समाभ्यधिकराहित्यस्य तत एव सिद्धेन्यूनद्वितीयसत्ताया उपगतत्वाच्चाद्वितीयपदव्याकोपस्य दुर्निवारत्वापत्तेः। अतस्तत्र कालोक्तिः सृष्ट्युत्तरव्यवहारानुसारेण सर्वाधारतया प्रतीयमानकालोपरञ्जनेन शिष्यस्य पूर्वकालवृत्तान्त-बोधनार्थैव। अन्यथा शिष्यस्य सृष्टिकालस्थत्वात्कालसत्तामवधारयतः पूर्ववृत्तान्तबोधाभावेऽनुशासनवैयर्थ्यप्रसङ्गात्। यदि च आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चनमिषदि'त्यत्रोक्तश्रुत्यादौ इषद्द्वितीयनिषेधः स्वीक्रियेत तदापि प्रतिज्ञादृष्टान्तोत्तम-पुरुषाणां विरोधो दुर्वार एव, तस्मात्सृष्ट्यादौ कालस्याभावान्न पूर्वोक्तशङ्कावकाशः। तथा च, यदि काल इच्छादिभ्यः पूर्वः स्यात् 'सदेवे'त्यादिश्रुताविरनिषेधो न स्यात्, स यदि धर्मान्तरप्रयुक्तः स्यादुक्तश्रुतौ प्रतिज्ञादिकं नोक्तं स्यात्, यस्मादेवं तस्मान्न-सत्तदभावे चापादकत्वाभावान्न सर्वदेच्छापत्तिरिति न कोपि दोष इत्यर्थः। ननु तथापि 'तदैक्षत सोकामयते'त्यादौ विशेषणत्वेन कालस्यानूदितत्वादिच्छादीनां नाशस्यानुक्तत्वाच्च तदुत्तरमिच्छाया नित्यत्वे सर्वदा सृष्टिप्रसङ्ग इत्यसङ्गोदासीनता निवर्त्तेत एवे-त्यत आहुः जात इत्यादि। नियामकत्वादिति स्वातन्त्र्यविघटकत्वात्। तथा च, तदानुकूल्ये भविष्यत्यौदासीन्ये प्रातिकूल्ये च न [1]भविष्यतीति न तथेत्यर्थः। नन्विच्छानियामकस्य कालस्य पश्चाद्भावित्वे ततः पूर्वं तस्याः स्वातन्त्र्ये यत्नविभागयोरपि सिद्धेः पूर्वोक्तदूषणतादवस्थ्यमित्यत आहुः पूर्वमेवेत्यादि। नहि काल इच्छादिभ्यः पश्चाज्जायते, श्रुताविच्छादिविशेषणत्वेनैवोक्तत्वात्। न च 'सदेवे'तिश्रुतिसन्दर्भबोधितं बोधनार्थत्वमिह वक्तुं शक्यम्, तन्नियामकस्याद्वितीयादिपदस्यात्राभावात्। नापि 'सर्वे निमेषा जज्ञिर' इत्यादिश्रुत्या पाश्चात्यत्वं शङ्क्यम्, कालावयवानामेव तत्रोक्तत्वात्। अतोऽवयवविभागरहितस्य तस्यान्यकार्याद्यपेक्षया पूर्वमेव जातत्वात्तत्सङ्गेच्छाप्रयत्नविभागानामपि जातत्वादिच्छादयो विशेषणीभूतस्य कालस्य विशेष्यतयांशभूतास्तान् सदैकरूपा-न्सहाविर्भावतिरोभावशालिनः परस्परोपकारिणश्च भगवान् स्वयमेव स्थापयति, अतो भगवन्नियम्यत्वान्न कोपि दूषणावकाश इत्यर्थः। ननु 'बहुस्यामि'तिश्रुतेः काममुपक्रम्य पठितत्वादिच्छया विभाग इति कथमुच्यते इत्याशङ्कायामाहुः तथा चेत्यादि। 'बहु स्यामि' त्याद्युक्तप्रकारेणैव कालशक्तेरंशं भगवान् परिगृह्णाति इच्छारूपं स एव सः कोशेषु तस्येच्छानामस्वेव पाठात्, कर्मणीव

---

१, भवतीति पाठः।

विचारे शब्दान्तरेणाभिलापस्यादुष्टत्वात्। अत एव तत्त्वसूत्रेऽभिध्योपदेशादिति सूत्रितमत इच्छयेति कथनेऽप्यदोष इत्यर्थः। एतावता परत्वं निर्णीतम्। एवमिच्छामुपपाद्य तस्या विषयमुपपादयन्तः पुरुषत्वं निर्णयन्ति तस्येत्यादि। स्वयं भिद्यमाना स्वाश्रयमपि भिन्दतीति धर्मरूपेण स्वयं भिद्यमानाः 'प्रकाशाश्रयवद्वे' तिन्यायेन स्वाश्रयं क्रियावन्तं ज्ञानिनमानन्दिनञ्च कुर्वन्तीत्यर्थः। तदानींतनस्वरूपमाहुः तदेत्यादि। स इति त्रिरूपोपि। नन्वेवं भेदे सति तस्य खण्डत्वात्तत्पूर्णबोधक श्रुतिविरोध इत्यत आहुः भिन्नोपीत्यादि। तयेति इच्छया। त्रीण्यपीत्यादि। 'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते, पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत' इतिश्रुतौ पूर्णशब्देनोच्यते। तथा च, यद्यभिन्नस्यैव पूर्णत्वं त्रयाणां नोच्यते। अतः कार्यापेक्षयाधिक्यमेव पूर्णत्वमिति न श्रुतिविरोध इत्यर्थः। श्रुत्यर्थस्तु, अदः परोक्षं ज्ञानैकघनं ब्रह्म पूर्णं निरन्तरमाकाशवद्व्यापि, इदं दृश्यमानं सद्रूपं ब्रह्म पूर्णमिति पूर्ववत्, पूर्णमततीति पूर्णात् सर्वव्यापकं, पूर्णात्पूर्णानन्दं ब्रह्म अच्यते, 'उञ्चुगतिपूजनयोः' 'अच् इत्येके' पूज्यते पूर्णाभ्यां सच्चिद्रूपाभ्यां क्षराक्षरपुरुषाभ्यां सेव्यते, एवं ज्ञानादेः फलमाह, पूर्णस्य पूर्वोक्तस्य ( पूर्णं ) ज्ञानादिधर्ममादाय तत्प्रसादेन प्राप्य पूर्णमेवावशिष्यते तत्सायुज्येन तदभिन्नो भवतीति। अन्ये तु पूर्णात् निरुपाधिकात्पूर्णं सोपाधिकमुदच्यते उद्गच्छतीति व्याचक्रुः, तदुपाधिवादानङ्गीकारान्नास्माकं रोचते, परिदृश्यमानस्य पूर्णत्वे गमकमाहुर्त एवेत्यादि, उपलक्षणविधया पुरःस्फूर्त्तिकमिदमुक्तं भातिप्रियत्वयोरपि तथात्वादिति। एवं 'बहुस्यामि'त्यस्य प्राथमिक आकारो विवृतः। अतः परं 'प्रजायेये'त्यस्य तं विवृण्वन्ति प्रजायेयेत्यादि। जाता इति सच्चिदानन्दास्तथा जाताः। कथमुत्कृष्ट इत्याकाङ्क्षायामाहुः तत इत्यादि। अतः परं द्वयोरिच्छयोरग्रिमं कार्यं दिङ्मात्रेण प्रपञ्चयन्ति तदा चिदंशस्येत्यादि। तदेति त्रयाणां पुनर्विभागकाले। तस्येति चिदंशस्य। ज्ञानधर्मस्येति भगशब्दवाच्यान्तर्गतस्य ज्ञानाख्यधर्मस्य। जीवत्वमिति मुख्यजीवत्वं पुरुषतत्त्वरूपत्वमिति यावत्। एतदंशा एव सर्वे व्यष्टिजीवाः, तेषाञ्च जीवत्वं मुक्तिपर्यन्तं तिष्ठति, नत्वर्वाङ्निवर्त्तेत इति बोधयितुं सदंशव्यवस्थामाहुः सदंशस्येत्यादि। अव्यक्ततामिति प्रकृतितत्त्वरूपताम्। तस्य व्यक्तिभावप्रकारमाहुः पश्चान्मूलेत्यादि मूलपदेन पूर्णरूपः सदंशः। यथायथमिति श्रौतेन पौराणेन प्रकारेण। नन्वेवं सति श्रुतौ पिपालयिषासञ्जिहीर्षयोरनुक्तत्वात् श्रौतेन मतेनाविरतं सर्ग एव स्यान्न जातु स्थितिप्रलयावित्याशङ्कायां तावप्यनयैवेच्छयेति व्युत्पादयन्ति पश्चात्तस्यामित्यादि। तत्कृतधर्मे इति क्रियांशक्रियाकृते। घटपटकुड्याद्याकारे। स्वयमिति व्यक्तः सदंशांशः तिरोभवति-अव्यक्ततामापद्यते, तथा च, 'बहुस्यामि' त्याकारेणैव स्थितिसिद्धेः 'प्रजायेये'तीच्छाकारेणैव रूपान्तराविर्भावपूर्वरूपतिरोभावसिद्धेः सिसृक्षाकारेणैव तयोरपीच्छयोरर्थादेव प्राप्तया स्थितिप्रलययोरपि तत एव सिद्धिरिति न कोपि दोष इत्यर्थः। अत एवाग्रे 'यदनुग्रहतः सन्ति न सन्ति यदुपेक्षये' त्यनुग्रहोपेक्षे एव वक्तव्ये क्रियातिरोभावेऽर्थतिरोभावोदाहरणं तु जलनीलीनिवारकक्रियातिरोभावे जलतिरोभावः, कटप्रसारणक्रियातिरोभावे कटविस्तारतिरोभावः, तत्कृतधर्मतिरोभावेऽर्थतिरोभावस्तु कम्बुग्रीवाद्याकारतिरोभावे घटादितिरोभावात्स्फुटतरः। स्वभावभेदेऽपीयमेवेच्छा प्रयोजिका, अत एव निबन्धे 'वृद्धिर्विपरिणामश्च तथापक्षय एव च, पूर्वरूपतिरोभावो द्वितीयस्यादिमस्तथा, उभावेकीकृतौ लोके वृद्ध्यादिभिरुदीरिताविं' ति तत्स्वरूपमुक्तम्। नन्वेवमाविर्भावतिरोभावपक्षाङ्गीकारे प्राथमिकोत्तररूपाविर्भावदशायां प्रलये च पूर्वरूपाभिलापो निवर्त्तते, तद्वन्माध्यमिकतिरोभावदशायामपि तद्भावे तदीयसर्वव्यवहार उच्छिद्येतेत्याशङ्कायां तदबाधप्रकारमाहुः तदेत्यादि। तस्यामिति अभिव्यञ्जकक्रियायाम्। जात इति तत्सम्बन्धाज्जात इति। तथा चैवं शब्दसद्भावान्न व्यवहारोच्छेद इत्यर्थः। बुद्धेर्विनाशित्वात्तिरोभावे बाध इत्यरुच्या पक्षान्तरमाहुः जीव इत्यादि। एतेन विद्वन्मण्डनविवेचित आविर्भावतिरोभाववादः सर्वोप्युपष्टम्भितो बोध्यः। एवं सदंशव्यवस्थामुक्त्वा तां प्रकारभेदेन चिदंशेऽतिदिशन्ति एवमित्यादि। यथा सदंशो मूलसदंशशक्तिभूतक्रियांशक्रियाभिर्लौकिकेन शास्त्रीयेण च प्रकारेणाभिव्यज्यते, एवं चिद्रूपो जीवोपि मूलभूतज्ञानांशशक्तिरूपव्यामोहकमायांशभूतैस्तृतीयस्कन्धसुबोधिनीवक्ष्यमाणरीत्या प्रमातृप्रमाणनिष्ठैः सात्त्विकैर्विशिष्टज्ञानैरभिव्यज्यते। 'जन्मत्वात्मतया पुंसः सर्वभावेन भूरिद। विषयस्वीकृतिं प्राहुः यथा स्वप्नमनोरथावि' त्युक्तरीत्याऽभिमन्यमान आविर्भवन्नुत्पद्यते, 'मृत्युरत्यन्तविस्मृति'रिति वाक्योक्तरीत्या तदभिमानं त्यजंस्तिरोभावे लिङ्गभूतस्य मनः प्राणाद्युपाधेरपि विस्मरणान्मुक्त एव कुतो न भवतीत्यत आहुः प्रयत्न इत्यादि। तस्याः पराधीन इतिपाठे भगवदधीन इत्यर्थः। तथा च, प्रयत्नस्य विद्यमानत्वेन देवनिवृत्तापि न मुक्तिर्भवतीति जीवत्वं नार्वाङ् निवर्तते इत्यर्थः। एतावानर्थो द्वितीये श्लोके सङ्गृहीष्यते। नन्वेवं प्रयत्नाधीनत्वे अनिर्मोक्ष एव स्यादित्याकाङ्क्षायां मुक्तिप्रकारमाहुः स चेत्यादि। स इतिपदं तदापदोत्तरं तामित्यादिना सम्बध्यते। 'जगद्व्यापारवर्ज्यमि' तिसूत्रानुसारेणाहुः जगदित्यादि। तस्येति। अत्र तस्या इति पाठे जीवरूपायाश्रित इति व्याख्येयम्। तथा चैवं स्वरूपलाभादिना भगवत्तौल्येपि 'अमोहाय गुणा विष्णोराकारश्चिच्छरीरता। निर्दोषत्वं तारतम्यं मुक्तानामपि चोच्यत' इति ब्रह्माण्डवाक्यात्तथेत्यर्थः। एवञ्च सायुज्य आनन्दाभावेपि चरणादिरूपतैव भवतीति सर्वं सुस्थम्। इदं तृतीयश्लोके सङ्गृहीष्यते। एतेन 'जीवोत्पादनसमय एवे' त्यादि विद्वन्मण्डनोक्तं समर्थितं भवतीति ज्ञेयम्। सर्वे मुक्तिभेदाश्च तथाभवन्तीत्यपि। एवं सृष्टिप्रक्रियाङ्गीकारे मानं गुणञ्चाहुः इयमित्यादि। 'सदेव सोम्येदमग्र आसीत्' 'आत्मा वा इदमेक एवाग्र आसीत्' 'पुरुषविधः सोनुवीक्ष्य नान्यदात्मनोपश्यदि' त्यादिश्रुतिवाक्येषु सृष्ट्यादावेकस्यैव विद्यमानता कर्तृत्वञ्च बोध्यते। 'तदैक्षत' सोकामयते' त्यादिषु चेच्छाया

एव करणत्वं च बोध्यते, तदाकारश्च सर्वत्र 'बहुस्यां प्रजायेये' त्येवोच्यते। तेन तस्यैवोपादानत्वमपि सिद्ध्यति। 'तदात्मानं स्वयमकुरुते' तिश्रुत्या 'आत्मकृतेः परिणामात्' 'तदनन्यत्वमारम्भणशब्दादिभ्य' इत्यादिसूत्रैश्च तथावसीयते। पूर्णश्रुत्या च त्रयाणां पूर्णत्वमुच्यते। 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ती' त्युपक्रम्य 'सर्व एवात्मानो व्युच्चरन्ती' ति, अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी' ति, 'पादोस्य विश्वाभूतानी' त्यादिश्रुतिभि'र्ममैवांशो जीवलोके जीवभूतः सनातनः', 'अंशो नाना व्यपदेशाद्' इत्यादिस्मृतिसूत्रैश्च तस्यांशत्वम्, अविद्यया बन्धः 'एकस्यैव ममांशस्य जीवस्यैव महामते। बन्धोस्याविद्ययानादिर्विद्यया च तथेतर' इत्यादिश्रुतिस्मृतिभिर्मायया बन्धः, 'तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशमि' ति, 'यमेवैष वृणुते तेन लभ्य' इत्यादिश्रुतिभिः 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' इत्यादिस्मृतिभिश्च भगवत्प्रसादादेव ज्ञानादिप्राप्तौ मुक्तिः। 'सर्वे जीवाः सर्वमयाः तथाप्यल्पा' इत्यादिश्रुतिभिः पूर्वोक्तब्रह्माण्डवाक्याच्च तारतम्यं तथा सिद्धम्, एतेषु यदेव न स्वीक्रियते तद्बोधकं वाक्यं व्याकुप्यत इतिश्रुतार्थापत्तिः सिद्धा सर्वत्रैव श्रुतिपुराणतन्त्रेषूपयुज्यते। चोक्तानि वाक्यान्यस्यां मानं सर्वोपयोगश्च गुण इत्यर्थः। अन्यथाप्रक्रियेति। ब्रह्म निमित्तभूतमेव न परिणमते, कार्यं त्वारभ्यते, जीवस्तु नित्यभिन्न एव, मुक्तिस्त्वविभागे भेदप्रतीत्यभावादेवेति, जीवजडौ ब्रह्मशरीरे, ब्रह्म तु शरीरि, शरीरशरीरिणोश्च घटघटत्वयोरिवाविनाभावः सदा। अविनाभावलक्षणमेव चाद्वैतम् शरीरद्वारक एव ब्रह्मणः परिणामो न साक्षात्। जीवस्यांशत्वञ्च विशेषणत्वेन विशिष्टांशत्वात्। मुक्तिरप्यविभागे भेदप्रतीत्यभावादेवेति। 'अयमात्मा ब्रह्म, विज्ञानमयः यत्साक्षादपरोक्षादि'त्यादिश्रुतिभिर्जीवो ब्रह्मैव। भेदप्रतीतिस्तु माययैव, 'मायया ह्यन्यदिवे त्यादिश्रुत्या। प्रपञ्चस्तु 'सैषा विद्या जगत्सर्वमि' त्यादिश्रुत्या मायापरिणामत्वान्मिथ्या, ईश्वरोपि मायाशबल एव, ब्रह्म तु निर्विशेषमनाद्यविद्यासम्बन्धेन विवर्त्तते, मुक्तिस्तु ज्ञानेनाविद्यायाः सकार्याया नाशाद्विस्मृतकण्ठमणिन्यायेन स्वरूपावस्थानरूपा स्वत एवेति माध्वरामानुजशाङ्कराणां प्रक्रिया। एवं दर्शनान्तराभिमानिनां प्रस्थानान्तराभिमानिनां च ज्ञेया, विस्तरभयान्न लिख्यते। सा सर्वापि पूर्वोक्तानि तज्जातीयान्यन्यानि च वाक्यानि बाधते। अतः पूर्वोक्तैव प्रक्रिया आदरणीयेत्यर्थः। ननु एवं सृष्ट्यादिप्रक्रियातौल्ये स्वरूपतौल्ये च सति जीवानां फले कथं भेदः इत्याकाङ्क्षायामाहुः जीवेत्यादि। एवं बोधनार्थं सर्वं निरूप्य श्लोकं व्याकुर्वते एतदेवेत्यादि। अस्य चिद्रूपस्येति इदं परपदस्य व्याख्यानम्। यद्धातुमतो २।८।७ इतिप्रश्नवाक्ये अस्येतीदमा तन्निर्देशात् तत्स्मारणार्थम्। स्वरूपाज्ञानमिति, जीवमायादीनां स्वरूपाज्ञानम्, देहरूपार्थसम्बन्धो न घटेतेति शेषो मूलादेव बोध्यः। कुतो न घटत इत्याकाङ्क्षायामाहुः व्यामोहेत्यादि। तादृशमिति व्यामोहयोग्यम्। ननु सज्ञातस्य परार्थत्वात्तच्छेषिणोस्य देहसम्बन्धः स्वतः स्वभावतो वान्यथा वाऽनाद्यविद्यया वा सामर्थ्यसत्त्व एव स्वीक्रियतां, तद्गमनं किमिति स्वीक्रियते इत्यत आहुः अन्यथेत्यादि। अन्यथेति धर्मरूपभगशब्दवाच्यज्ञानाख्यसामर्थ्यगमनाभावे। न भवेदिति, अर्थस्येव तस्यापि स्वरूपज्ञानान्न भवेद् इत्यर्थः। ननु तर्हि शक्त्यभावादनिच्छतो विशिष्टवदर्थसम्बन्धोस्तु किं व्यामोहेनेत्यत आहुः व्यामोहेत्यादि, व्यामोहो नाम विपरीतज्ञानम्। तथा च, तं विना केवलज्ञानशक्त्यभावे सदंशस्येव जडत्वमेव स्थावरवत्स्यात्, न तु देहसम्बन्ध इति तदर्थं सः, तेन विक्षेपिका मायापि तदर्थमावश्यकीति तथेत्यर्थः। ननु सामर्थ्यतिरोभावसमकालमेव व्यामोहने को हेतुरित्यत आहुः सहजशक्तिश्च सेति। तथा च, सन्निधिरेव हेतुरित्यर्थः। नन्वेवं सन्निवेर्हेतुत्वे तस्याः शक्तेरपि ज्ञानसन्निधानाद्गुणतैव युक्ता, न तु दोषत्वमित्यत आहुः तस्या इति। हीनभावादिति 'प्रजायेये' तीच्छाकृतात्। तथा च, हीनकार्यकरणात्तस्याः दोषत्वमित्यर्थः। नन्वेवं सति सामर्थ्यलाभार्थमेव यत्नः कार्यो न तु मायातरणार्थमित्यत आहुः जीवस्येत्यादि। तस्याः बन्धनेऽधिकृतत्वा 'यावदधिकारं त्वाधिकारिकमि' तिन्यायेन तस्याः कार्यं मृत्योरिवानिच्छायामप्यनिवार्यम्, भगवतोऽप्रतिहतेच्छत्वाद् अतस्तस्याः सम्बन्धे व्यामोहावश्यंभावात् तत्तरणप्रयत्न आवश्यक इत्यग्रिमस्वारस्यादुक्तम्। सिद्धमाहुः तयेत्यादि। ननु व्यामुग्धस्य भ्रम एव दृष्टो न तु देहादिसम्बन्ध इत्याशङ्कायामाहुः मोहितस्येत्यादि। अभिमन्यते चेति। तथा च, तद्वन्मूलशक्त्या देहादिकमपि पश्यत्यभिमन्यते चेत्यर्थः, तर्हि तद्वदिदमपि मोहनं कालादिनैव निवर्त्ततां किन्तदर्थकोपायेनेत्यत आहुः निद्राया इत्यादि। सर्वत उद्गमाभावादिति, निद्राया बुद्धिवृत्तिविशेषरूपत्वेन व्याप्यतया सर्वत उद्गमाभावात्, तथा चास्याः सर्वत उद्गतत्वादेतन्निवारणस्य कालादिनाऽशक्यत्वादुपाय आवश्यक एवेत्यर्थः। आञ्जस्यं विवृण्वन्ति स्वप्नेत्यादि। तथा च, यथा निद्रया भगवत्कृतां स्वाप्निकीं सृष्टिं भिन्नतया पश्यति, तयैव स्वतया त्वभिमन्यते, तथा मूलचिदंशमायया जगत्कर्तृमायामयीं सदंशसृष्टिं पश्यति, तयैव च स्वतयाभिमन्यते इति दृष्टान्तार्थः। एतस्याः क्षेत्रदर्शकत्वं नृसिंहोत्तरतापनीये नवमखण्डे स्फुटम्। तदस्मत्कृततद्व्याख्यानादवगन्तव्यम्। एवमनेन श्लोकेन देहसम्बन्धे हेतुबोधनाद् यदृच्छापक्षनिरासेन यद्धातुमत २।८।७इति प्रश्न उत्तरितः॥ १ ॥ ❀ ❀ बहुरूप इत्यत्र। अतः परं भवन्तो जानते, यथा २।८।७इति तुर्यपादेन वक्तृज्ञानप्रकारो यः पृष्टस्तमुत्तरयतीत्याशयेनाहुः एवं तस्या इत्यादि। साह्याभासेत्यादि। इदमपि 'जीवेशावाभासेन करोति, माया चाविद्या च स्वयमेव भवती' त्यादौ श्रावणात्तत्रैव स्फुटम्। तस्याश्च प्रपञ्चदर्शननिमित्तत्वमेव, न तूपादानत्वमपि, उपादानत्वं त्वात्मन एवेत्यपि तद्व्याख्यानादेवावगन्तव्यम्। तस्मादात्मन एव त्रैविध्यं योनित्वमपीति तत्र श्रावणात्। समर्पकाभावादिति भावप्रधानः, समर्पकत्वाभावादित्यर्थः। एवमनेन श्लोकेन स्वस्य स्वसदृशानां देहसम्बन्धवि-

षयको ज्ञानप्रकार उक्तः ॥ २ ॥ ❀ ❀ यर्हि वावेत्यत्र । एवं द्वाभ्यामुत्तरमुक्त्वा 'त्यक्ष्ये कलेवरं, २।८।३ । इति देहजिहासामभिसन्धाय पृष्टत्वात्तदसम्बन्धमयमभिकाङ्क्षतीति निश्चित्य तदुपायं वदतीत्याशयेनाहुः एवं तस्या कार्यमित्यादि । स्वस्य महिमरूपे भगवत्यानन्द इति च्छान्दोग्यस्थे "स्वाप्यय" सूत्रविषयवाक्ये 'स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते' इत्यत्र स्वशब्देन जीवमूलरूपमुच्यते, 'महिम' शब्देन चोत्कर्षः, तथा च, स्वस्योत्कर्षरूपं तदभिन्नत्वमेव, न तु हस्तिहिरण्यादिरूपं लौकिकमिति लौकिकमहिमवारणाय परस्मिन्नित्यादेरर्थमाहुः गुणेत्यादि ॥ ३ ॥ ❀ ❀ आत्मतत्त्वेत्यत्र । पूर्वश्लोके एतादृशमरणं यत् कालविशेष उक्तम्, तत्र न कालादेः कारणत्वम्, किन्तु, नियन्तुरेवेति परस्मिन् कालमाययोरित्यनेन बोध्यते । एवं सति मोहोपि तदधीन एव सिद्ध्यतीत्येतदभिसन्धायैवात्र सर्वसृष्ट्यादिप्रक्रिया बोधिता । न चैवं वैषम्याद्यापत्तिः, आत्मसृष्टिकथनेनैतन्निरासात् । उपस्थितद्वान्यकृताभ्यागमौ परमवशिष्येते, तावन्ये च ब्रह्मसन्देहवारणे वारयिष्यन्त इत्याशयेनाग्रिमं वदतीत्याशयेनाहुः एवं जीवेत्यादि । अत्रापीत्यादि, अस्मिन् सन्दर्भे या मुक्तिर्विवक्षिता सास्मिन्निरूपितैवेत्यर्थः ( सर्वात्मकत्वानुपपत्तिरिति नारायणस्येति शेषः ) लौकिकानामित्यादि । अज्ञातशास्त्रतत्वानां लौकिकप्रमाणजन्यसम्यक्परिच्छेदेन भगवदाकारगुणकर्मसु लौकिकबुद्ध्या, एतान्यपि लौकिकप्रमाणयुक्तिभ्यामेव निर्णेयानोति भ्रमलक्षणां निश्चयात्मकबुद्धिं दूरीकृत्येत्यर्थः । यदाहेति । सम्बन्ध इति तद्वदामीति कथनप्रतिज्ञात्राऽऽर्थिकी बोध्या ॥ ४ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

राजशङ्काविनाशाय नवमे हरिणोदितम् ॥ भागवताख्यसिद्धान्तः श्रीशुकेन निरूप्यते ॥ १ ॥

"यदधातुमतः" इत्यनेन जीवस्य देहसम्बन्धो निर्हेतुकः सहेतुको वेति यत्पृष्टं तत्रोत्तरमाह—आत्ममायामिति । सावधानतया श्रवणार्थं सम्बोधयति—हे राजन्निति । आत्मनः परमात्मनो भगवतो मायामृते "अहं बहुस्याम्" इति सङ्कल्पात्मिकया मायया मोहं विना परस्य देहादिव्यतिरिक्तस्य अनुभवात्मनः सच्चिदानन्दात्मकभगवदंशत्वाच्चिद्रूपस्यार्थेन दृश्येन देहादिनाऽञ्जसा साक्षात्सम्बन्धो न घटेत न सङ्गच्छते । तत्र दृष्टान्तमाह—स्वप्नद्रष्टुरिवेति । स्वप्नद्रष्टुः पुरुषस्य यथा मायामोहं विना स्वाप्निकदेहादिना सम्बन्धो न घटते तद्वदित्यर्थः ॥ १ ॥ ❀ ❀ जीवस्य संसारोपि माययैवेत्याह—बहुरूप इवेति । बहुरूपया देवमनुष्यादिरूपैर्बालयुवादिरूपैश्च परिणम्यमानया मायया तत्र प्रविष्टो जीवोऽपि बहुरूप इवाभाति । वस्तुतस्तु जीवे देवादिरूपाभावादिवशब्दप्रयोगः । अस्या मायायाः गुणेषु गुणकार्येषु शब्दादिविषयेषु रममाणः आसक्तचित्तस्तान्ममेति देहमहमिति च मन्यते ॥ २ ॥ ❀ ❀ अतएव भगवद्भक्तियोगेन मायामोहनिरासे सति मोक्षोऽपि घटते इत्याह—यर्हीति । बावेत्येवकारार्थकः । यर्ह्येव कालमाययोः परस्मिन् नियन्तरि स्वे महिम्नि तदंशत्वात् स्वपरमार्थस्वरूपे भगवति रमेत तच्चरणशरणतया सर्वाणीन्द्रियाणि तत्प्रवणानि करोति तदा तत्कृपया मायानिवृत्त्या गतसम्मोहः सन् ममाहमित्युभयं त्यक्त्वोदास्ते उत् उत्कर्षेण भगवल्लोके आस्ते, संसारविमुक्तो भवतीत्यर्थः । एतदेव प्रथमस्कन्धेऽप्युक्तं 'यया सम्मोहितो जीवः' इत्यादिना ॥ ३ ॥ ❀ ❀ एवं जीवस्य देहसम्बन्धमोक्षव्यवस्थामुक्त्वा 'आसीद्यदुदरात् पद्मं' इत्यादिना भगवतोऽपि जीववदेव देहसम्बन्धाविशेषाज्जीवात्तस्य को विशेषो येन तद्भजनाद्विमुक्तिरिति यत्पृष्टं तत्र भगवत्तत्त्वविज्ञानं ब्रह्मणोऽपि दुर्लभमासीत्तत्र साधनं भगवतैवोक्तं तच्छृण्वित्याह—आत्मतत्त्वेति । ऋतं सत्यं परमार्थभूतं सच्चिदानन्दात्मकं स्वरूपं दर्शयन् आत्मतत्त्वस्य विशुद्ध्यर्थं ज्ञानार्थं ब्रह्मणे यत्साधनं भगवानाह तदहं वक्ष्यामि त्वं शृण्विति शेषेणान्वयः । एवं स्वरूपप्रदर्शनेनोपदेशे हेतुमाह-अव्यलीकेति, निष्कपटभावेनाराधित इत्यर्थः ॥ ४ ॥

## हिन्दी अनुवाद

### ब्रह्माजीका भगवद्धामदर्शन और भगवान्‌के द्वारा उन्हें चतुःश्लोकी भागवतका उपदेश

श्रीशुकदेवजीने कहा—परीक्षित् ! जैसे स्वप्नमें देखे जानेवाले पदार्थोंके साथ उसे देखनेवालेका कोई सम्बन्ध नहीं होता, वैसे ही देहादिसे अतीत अनुभवस्वरूप आत्माका मायाके विना दृश्य पदार्थोंके साथ कोई सम्बन्ध नहीं हो सकता ॥ १ ॥ ❀ ❀ विविध रूपवाली मायाके कारण वह विविध रूपवाला प्रतीत होता है, और जब उसके गुणोंमें रम जाता है तब 'यह मैं हूँ, यह मेरा है' इस प्रकार मानने लगता है ॥ २ ॥ ❀ ❀ किन्तु जब यह गुणोंको क्षुब्ध करनेवाले काल और मोह उत्पन्न करनेवाली माया—इन दोनोंसे परे अपने अनन्त स्वरूपमें मोहरहित होकर रमण करने लगता है—आत्माराम हो जाता है, तब यह 'मैं, मेरा' का भाव छोड़कर पूर्ण उदासीन—गुणातीत हो जाता है ॥ ३ ॥ ❀ ❀ ब्रह्माजीकी निष्कपट तपस्यासे प्रसन्न होकर भगवान्ने उन्हें अपने रूपका दर्शन कराया और आत्मतत्त्वके ज्ञानके लिये उन्हें परम सत्य परमार्थ वस्तुका उपदेश किया ( वही बात मैं तुम्हें सुनाता हूँ ) ॥ ४ ॥

---

२. अष्टमाध्यायस्य सप्तमश्लोकोऽयम् ।

स आदिदेवो जगतां परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत ।
तां नाध्यगच्छद् दृशमत्र सम्मतां प्रपञ्चनिर्माणविधिर्यया भवेत् ॥ ५ ॥
स चिन्तयन् द्व्यक्षरमेकदाम्भस्युपाशृणोद् द्विर्गदितं वचो विभुः ।
स्पर्शेषु यत्षोडशमेकविंशं निष्किञ्चनानां नृप यद् धनं विदुः ॥ ६ ॥
निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः ।
स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इवादधे मनः ॥ ७ ॥
दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेन्द्रियः ।
अतप्यत स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहितः ॥ ८ ॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

भगवद्भजनादेव तत्त्वज्ञानमित्येतत्प्रपंचयिष्यन् ब्रह्मणोऽपि तत्त्वज्ञानं तत्प्रसादादेवेति दर्शयितुमितिहासमाह स इत्यादिना। परो गुरुर्भक्तिरहस्योपदेष्टा स्वधिष्ण्यं पद्ममास्थाय अधिष्ठाय तस्याधिष्ठानान्वेषणाय पूर्वं जले निमग्नः परावृत्य स्वधिष्ण्ये स्थित्वेत्यर्थः। ऐक्षत तत्कथं स्रष्टव्यमित्यालोचितवान्। तां दृशं प्रज्ञाम्। अत्र सृष्टिविषये संमतामव्यभिचारिणीम्। विधिः प्रकारः ॥ ५ ॥ ❀ ❀ सृष्टिं चिंतयन्कदाचिद् द्व्यक्षरं वचोंऽभसि उपाशृणोत् उप समीपे श्रुतवान्। ते अक्षरे दर्शयति कादयो मावसानाः स्पर्शास्तेषु यत्षोडशं तकारो यच्चैकविंशं पकारः वचसो निर्देशार्थं तदर्थमाह। हे नृप निष्किंचनानां त्यक्तधनानां धनं यद्विदुः येन तपोधना इति प्रसिद्धाः। तच्च द्विर्गदितं तप तपेति लोण्मध्यमपुरुषैकवचनम्। तस्य वीप्सां सादरविधिरूपामशृणोदित्यर्थः ॥ ६ ॥ ❀ ❀ एवं निशम्य तस्य वचसो वक्तुर्दिदृक्षया ततः प्रचलितः सन् दिशो विलोक्य पुनः स्वधिष्ण्यमास्थाय केनचित्प्रत्यक्षं नियुक्त इव तच्चात्मनो हितं विमृश्य तपसि मनो धृतवानित्यर्थः ॥ ७ ॥ ❀ ❀ ततश्च स ब्रह्माऽखिलानां लोकानां तापनं प्रकाशकं तपोऽतप्यत स्म कृतवान्। तप तपेत्येतस्य वचसोऽर्थे अमोघं दर्शनं यस्य। जितोऽनिल आत्मा मनश्च येन। विजितान्युभयेंद्रियाणि ज्ञानकर्मात्मकानि येन। तपतां तपश्चरतां मध्ये तपीयानतिशयेन तपस्वी। तस्मै ब्रह्मणे स्वलोकं वैकुंठाख्यं परं श्रेष्ठम्। न यत्परं यतः परमुत्कृष्टमन्यन्नास्ति ॥ ८ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

तस्य पद्मस्याधिष्ठानमाश्रयस्तस्यान्वेषणं मार्गणं तस्मै। इत्यर्थ इति। यदाऽधिष्ठानं नातवांस्तदा परवृत्येति भावः ॥ ५ ॥ ❀ ❀ हे नृपेति। नृपाणां तु पालनमेव धर्मस्तत्तु ब्राह्मणानामेवेति भावः। इत्यर्थ इति। द्विरुच्चारणं हि तपसो वैदिकत्वज्ञापनार्थमेव वैदिका हि मंत्रोच्चारणे प्रथमपदं द्विरुच्चरंति "सहस्रशीर्षा सहस्रशीर्षा पुरुष" इतिवदिति भावः ॥ ६ ॥ ❀ ❀ ततः कंजदेशात्प्रचलितः प्रचलितुं प्रवृत्तः स्थानांतरादर्शनात्पुनस्तत्रैव पद्मे स्थित्वा। इत्यर्थ इति। केनचिन्मद्धितैषिणा मह्यं हितमेवोपदिष्टमतस्तप एव करोमीति निश्चयं चकारेति भावः ॥ ७ ॥ ❀ ❀ ततस्तप तपेतिवाक्यश्रवणानंतरम्। ननु तपस्स्वरूपन्तु भगवता नोपदिष्टं स कथं तपः कृतवानिति चेत्तत्राह–अमोघं सर्वथा भगवदिच्छातः सफलं दर्शनं ज्ञानं यस्य स तथा परमेश्वरेच्छयैव तपसस्तदिति कृत्यताया ज्ञानमुपदेशसमकालमेव जातमिति भावः। "परांचि खानि व्यतृणत्स्वयंभूः" इति श्रुतेरुभयेंद्रियजयस्तस्य स्वाभाविक एव पराञ्चि पराङ्मुखानि खानीन्द्रियाणि व्यतृणद्धिंसितवान्। विषयेभ्यः परावर्तनमेवेन्द्रियाणां हिंसा स एव तज्जय इत्युच्यते। सभाजितः पूजितः ॥ ८ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

निर्देशार्थमिति। स्पष्टनिर्देशार्थमित्यर्थः ॥ ६–१५ ॥

### श्रीमद्वीरराघवव्याख्या

आत्मतत्वविशोधकं भगवदुक्तमेवोपपादयितुमितिहासमाह स इति। जगतां व्यष्टिभूतानां परः प्रभुः गुरुर्धर्मोपदेष्टा चापिदेवः चतुर्मुखः स्वधिष्ण्यं भगवन्नाभिपद्मरूपं स्थानमास्थायाधिष्ठानस्यान्वेषणाय पूर्वं जले निमग्नः पश्चात्परावृत्त्य स्वाधिष्ण्ये स्थित्वेत्यर्थः। सिसृक्षया स्रष्टुमिच्छया ऐक्षत कथं स्रष्टव्यमित्यालोचितवान् एवमीक्षमाणो ब्रह्मा यथा दृष्टप्रपंचनिर्माण-

---

१. प्रा० पा०—भजतां।

विधिजगद्रचनाप्रकारः भवेद्ज्ञानं भवेत् अत्र सृष्टिविषये संमतां तां दृशं प्रज्ञां नाध्यगच्छन्न प्राप्तवान् ॥ ५ ॥ ❀ ❀ प्रज्ञाप्राप्त्युपायं चिंतयन्नेकदा कदाचित् द्विर्गदितं द्विरुक्तं द्व्यक्षरं वचः अंभसि जले उपाश्रृणोदुपसमीपे श्रुतवान् तेऽक्षरे दर्शयति कादयो मावसानाः स्पर्शाः तेषु यत्षोडशं तकारः यच्चैकविंशं पकारः वचसो निर्देशार्थं तदर्थमाह हे नृप निष्किंचनानां त्यक्तधनानां धनं यद्विदुः येन तपोधना इति प्रसिद्धः तच्च द्विर्गदितं तप तपेति लोण्मध्यमपुरुषैकवचनं तस्य वीप्सायां सादरविधिरूपामश्रृणोदित्यर्थः ॥ ६ ॥ ❀ ❀ तप तपेति वचो निशम्य श्रुत्वा तस्य वचसो यो वक्ता तस्य दिदृक्षया द्रष्टुमिच्छया तातः प्रचलितः सन् दिशो विलोक्य तत्र दिक्ष्वन्यद्वस्त्वंतरमपश्यमानः पुनः स्वधिष्ण्यमास्थाय उपादिष्ट इव केनचित्प्रत्यक्षमनियुक्त इव तच्चात्मनो हितं विमृश्य तपसि मनः चित्तमादधे धृतवान् ॥ ७ ॥ ❀ ❀ ततश्च स ब्रह्माखिललोकानां तापनं प्रकाशनं यस्मात्तथाभूतं तपः दिव्यं सहस्राब्दं देवमानेन सहस्रवर्षपर्यंतमतप्यत तपतां तपश्चरतां मध्ये तपीयानत्यंततपः संयुक्तः अमोघदृष्टिः स्वचरितव्ये तपस्यव्यर्था दृष्टिः संकल्परूपज्ञानं यस्य सः जितः अनिलः प्राणवायुरात्मा मनश्च येन सः विजितान्युभयेन्द्रियाणि ज्ञानकर्मात्मकानि येन सः एवं भूतोऽतप्यतेत्यर्थः स्मेति प्रसिद्धौ ॥ ८ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

एतदेव विवृणोति स इति । भजतां सनकादीनां स्वधिष्ण्यं नाभिकर्णिकास्थानमैक्षताचिंतयत् यया दृशात्र प्रपंचनिर्माणे ॥ ५ ॥ ❀ ❀ ततः किमत्राह संचिंतयन्निति कथं नु सृष्टिविषया दृष्टिः स्यादिति संचिंतयन् विभुर्ब्रह्मा द्वे अक्षरे यस्मिंस्तत्द्व्यक्षरं वचः अक्षरयोः स्वरूपं लक्षयति । स्पर्शेष्विति ककारादिमकारान्तेषु स्पर्शेषु यत्षोडशमक्षरं तकारः एकविंशं पकारस्तद्रूपं वच इति यावत् तद्वाच्यं स्पष्टं लक्षयति निष्किंचनानामिति । निष्किंचनानां परमहंसानां यद्धनं विदुस्तद्वाच्यं वचनं तपोलक्षणमित्यर्थः । कादयो मावसानाः स्पर्शाः ॥ ६ ॥ ❀ ❀ किमनेन निरणायीति तत्राह निशम्येति । ब्रह्मा तद्वचो निशम्य श्रुत्वा येनैतद्वच उक्तं तद्वक्तृदिदृक्षया दश दिशो विलोक्य तत्र तासु दिक्षु अन्यदपश्यमानः पद्मनालनाडीभिराविश्यान्विष्य दृष्ट्वा स्वधिष्ण्यं पद्ममेवास्थायाध्यास्य तद्वचस्तच्छ्रुतं वचः आत्मनो हितं हितसाधनं विमृश्याहं मज्जनकेन प्रपंचनिर्माणोपाये तव तपो न पूर्यते तस्मात्पुनस्त्वया तपः कर्तव्यं तपेति वा तपस्युपादिष्ट आज्ञप्तोसीति वालोच्य तपसीव तपस्येव मन आदध इत्यन्वयः ॥ ७ ॥ ❀ ❀ विमर्शफलमाह दिव्यमिति । अखिललोकतापनमखिललोकप्रकाशनं तपोज्ञानरूपं ब्रह्मातप्यतालोचयामास दध्याविति । यावत् तपोरूपं परं ब्रह्माचिंतयदंजसेति जितमनस्कत्वादिसर्वसाधारणमित्यतो विशिनष्टि तपीयानिति । तपतां तपीयानत्युत्तमोत्तमः द्विवचनविभज्योपपदेतरबीयसुनावित्युत्तमार्थत्वे ईयसुन् किंप्रमाणमित्यत उक्तं स्मेति । स्मृतौ वृत्तौ निषेधे स्मेति अभिधानात् ॥ अनेन महान्महीयसामादिन्न्यादत्युत्तमोत्तममित्येतत्सूचयति विजितोभयेंद्रियत्वाद्यपि तपद्वय इतरेभ्य आधिक्यसूचनायोक्तव्यमिति ज्ञातव्यं यत्राधिकं वदेत्किंचित्तज्ज्ञेयोर्थस्तत्र चाधिक इति वचनात् अन्यथा तपोऽतप्यतेत्येतावदेवालं अत उभयेंद्रियजयोऽपि ब्रह्मण औत्पत्तिको गुणः परांचि खानि व्यतृणत्स्वयंभूरिति स्मृतेः हरिमंतरेणामोघदर्शनत्वं चास्यैवाधिकं प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूवेति श्रुतेः ॥ ८ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

तदेव विवरितुं तद्दर्शनप्रकारमाह स इत्यादिभिः ॥ ५ ॥ ❀ ❀ स चिन्तयन्निति च कामः कृष्णायेत्यादिना श्रीकृष्णाष्टादशाक्षरमुपदिश्य तप त्वं तप एतेन तव सिद्धिर्भविष्यतीत्यनेन वाक्येन ब्रह्मसंहितायामेतदभिसन्धिश्च दर्शितः निष्किञ्चनानां निष्कामभक्तानां यत् तदाराधनलक्षणं तप एव धनं विदुः ॥ ६ ॥ ❀ ❀ निशम्येति तद्वक्त्र इति सम्बन्धोक्तिपाठे तत् वचो निर्गतं यद्वक्त्रात् तस्य दिदृक्षया इति ॥ ७ ॥ ८ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या ।

न केवलं भगवद्रूपमेव कालमायातीतम् अपि तु तल्लोकं तद्भक्ताश्च कालमायातीता इति दर्शयितुं चतुःश्लोकीं भागवतकथां प्रस्तौति स आदीति । परो गुरुर्भक्तिरहस्योपदेष्टा स्वधिष्ण्यं पद्मम् आस्थाय अधिष्ठाय तस्याधिष्ठानान्वेषणाय पूर्वं जले निमग्नः पश्चात् परावृत्य स्वधिष्ण्ये स्थित्वेत्यर्थः । ऐक्षत तत् कथं स्रष्टव्यमित्यालोचितवान् । तां दृशं प्रज्ञाम् । अत्र सृष्टिविषये । विधिः प्रकारः ॥ ५ ॥ ❀ ❀ सृष्टिं विचिन्तयन् कदाचिद्द्व्यक्षरं वचः द्विर्गदितं द्विरुक्तम् अम्भसि उपसमीपे श्रुतवान् मन्त्रमिव तद्द्व्यक्षरमुद्धरति । स्पर्शेषु कादयो मावसानाः स्पर्शाः तेषु यत् षोडशं तकारः यच्चैकविंशं पकार तेन तपेति लोण्मध्यमपुरुषैकवचनं तच्च द्विरुक्तं तप तपेति । धनमिति यत एव ब्राह्मणास्तपोधना उच्यन्ते ॥ ६ ॥ ❀ ❀ केनचित्तपसि प्रत्यक्षमहमादिष्टः प्रत्यक्षमिव नियुक्त इति तदेव हितं मत्वा तस्मिंस्तपस्येव मन आदधे ॥ ७ ॥ ❀ ❀ अखिलानां लोकानां तापनं प्रकाशकम् आविर्भावकारणमित्यर्थः । तपतां मध्ये तपीयानतितपस्वी ॥ ८ ॥

## श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः।

एतदेव प्रपंचयितुं यस्मिन् लोके भगवान् शेते तं लोकं च दर्शयितुमितिहासमाह स इत्यादिना। जगतां व्यष्टिरूपाणां प्राणिनाम् आदिदेवः परो गुरुर्भक्तिरहस्योपदेष्टा च स ब्रह्मा स्वधिष्ण्यं पद्ममास्थायाधिष्ठाय जगतां सिसृक्षया स्रष्टुमिच्छया ऐक्षत सृष्टिप्रकारमजानन् कया बुद्ध्या सृष्टिं करिष्यामीत्यालोचितवान् एवमीक्षमाणोपि यया प्रपंचनिर्माणविधिः जगद्रचनाप्रकारो भवेत् तामत्र जगन्निर्माणे संमतां बुद्धिं नाध्यगच्छत्॥ ५॥ ❀ ❀ विभुः समष्टिशरीराभिमानी स ब्रह्मा सृष्टिं चिंतयन् एकदाद्व्यक्षरं वचः अंभसि उपाश्रृणोत् उपसमीपे श्रुतवान्। ते अक्षरे दर्शयति स्पर्शेषु कादिमांतेषु यत्षोडशमक्षरं तकारः यदेकविंशमक्षरं पकारः वचसोनिर्देशार्थं तदर्थमाह हे नृप निष्किंचनानां नास्ति किंचन येषां तेषां त्यागिनां यदेव धनं विदुः तच्च द्विर्गदितं तप तपेति लोण्मध्यमपुरुषस्यैकवचनम्। तस्य द्विरुक्तिं सादरविधिरूपामश्रृणोदित्यर्थः॥ ६॥ ❀ ❀ स तप तपेति वचो निशम्य श्रुत्वा तद्वक्त्रदिदृक्षया तस्य वचसो यो वक्ता तद्दृष्टुमिच्छया ततः प्रचलितः सन् दिशो विलोक्य तत्र दिक्षु अन्यत् पुरुषांतरमपश्यमानः पुनःस्वधिष्ण्यमास्थाय तपस्युपादिष्ट इव स्वबंधुना केनचित्साक्षादाज्ञप्त इव तच्च स्वहितं विमृश्य तपसि मनः आदधे धृतवान्॥ ७॥ ❀ ❀ तदनंतरं सः अमोघदर्शनः अनुष्ठीयमाने तपसि अमोघं सफलं दर्शनं संकल्पात्मकं ज्ञानं यस्य सः तत्र हेतुगर्भाणि विशेषणानि जितानिलात्मा जितः अनिलः प्राणः आत्मा मनश्च येन सः विजितानि उभयेन्द्रियाणि ज्ञानकर्मात्मकानि येन सः तपतां तपश्चरतां मध्ये तपीयान् अतिशयेन तपस्वी इत्थं समाहितो दिव्यं सहस्राब्दम् दिव्यमानेन सहस्रवर्षपर्यंतं तप अतप्यत कृतवान्। स्मेति प्रसिद्धौ कथंभूतं तपः अखिललोकानां तापन् प्रकाशकम्॥ ८॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं भगवद्वचनं वक्तव्यत्वेनोपक्षिप्य सन्तोषार्थमव्यलीकव्रतं ब्रह्मणो निरूपयति—**स इति**। नियमविशेषे व्रतशब्दः प्रवर्त्तते। स त्वत्र सर्वेन्द्रियाणां प्राणस्य च सर्वविषयपरित्याजनेन निरोधात्मकः। स चेत्स्वरूपतः फलतश्चैकविषयो भवति तदा निर्व्यलीकः। अयं च ब्रह्मा भगवदर्थं सृष्टिं करिष्यामीति सङ्कल्प्य पश्चात्साधनान्यालोचयितुं प्रवृत्तस्तानि साधनानि भगवदा[1]त्मनि भगवदिच्छानुसारेण कार्यं कुर्वन्तीति यादृशमयं चिकीर्षति तादृशं भगवतो नाऽभिप्रेतमिति ते पदार्था न स्फुरिताः। तदा सन्निकर्षाभावात्तद्विषयकः साक्षात्कारो न जात इत्याह—स ब्रह्मा। यतोऽयं[2] स्वयमेव प्रसिद्धः। तस्मात्प्रसिद्धस्याऽन्यस्याऽभावान्न ततः सन्देहनिवृत्तिः। **आदिदेव इति** देवतान्तरोपासनापि निवारिता। गुरुरप्यन्यो नास्ति यतस्तदुपदेशेन वा कार्यं सिद्ध्यति। यतोऽयमेव सर्वस्याऽपि गुरुः। तीर्थाद्याश्रयणमपि नाऽस्तीत्याह—**स्वधिष्ण्यमास्थायेति**। अथवा। सर्वैरेतैर्विशेषणैरहमेव महान् किं ममाऽन्येन साधनेनेति मङ्गलादिकमप्यकृत्वा केवलं सिसृक्षया स्रष्टुमिच्छया साधनान्यैक्षत। तदा पूर्वोक्तन्यायेन साधनोपस्थित्यभावात् तादृशं नाऽध्यगच्छत्। आलोचनादिकं त्वनुमानतर्कादिरूपं प्रकृतोपयोगि न भवति। उपादानगोचरपरोक्षज्ञानस्यैव साधनत्वात्। तदाह—**प्रपञ्चनिर्माणविधिर्यया भवेदिति**। यया दृशा प्रपञ्चस्य निर्माणमुत्पादनं तत्र विधिः प्रकारो यया भवति तां न प्राप्तवानित्यर्थः॥ ५॥ ❀ ❀ प्रकारः सर्वोऽपि ज्ञानेनैव सम्पाद्यते तदा तमेवाऽर्थं चिन्तयामास। यथा भगवच्चिन्तया भगवान् प्रत्यक्षो भवति [3]तथा साधनचिन्तया साधनान्यपि प्रत्यक्षाणि भविष्यन्तीति। अनेन यः साधनमेव चिन्तयति न तु साधनसाधनं स भ्रान्तो भवतीति ज्ञापितम्। तदा भग[4]वान् मदर्थमयं प्रयासं करोतीति तस्मै साधनमु[5]पदिष्टवान्। तद्भगवन्मुखनिर्गतं वाक्यं मन्त्ररूपमिति मन्त्रोद्धारप्रकारेण तन्निरूपयति—**स चिन्तयन्निति**। पूर्वोक्तप्रकारेण स ब्रह्मा चिन्तयन्। अम्भसि जलमध्ये लीनो यथा वदति तद्वाक्यमिव द्व्यक्षरमुपाश्रृणोत्। द्वे अक्षरे यस्मिन् पदे तादृशमेकं पदमश्रृणोत्। तदपि द्विर्गदितं वारद्वयमुच्चारितम्। अनेन पदभेदो निवारितः। पदनित्यता च निरूपिता। तदा द्वि[6]रुक्तं पदं वाक्यरूपं जातमिति वच इत्युक्तम्। ननु व्याकुलश्चिन्ताकुलितश्च कथं जलं उत्पन्नं तं शब्दमर्थादिपुरस्सरेण निर्धारितवांस्तत्राऽऽह—**विभुरिति**। अक्षरद्वयस्योद्धारमाह—**स्पर्शेषु यत्षोडशमेकविंशमिति**। स्वराणां द्विरूपता। स्वतन्त्रता इतरप्रधानाङ्गता च। तत्राऽक्षरद्वयस्य स्वतन्त्रतया निरूपणात्साङ्गमेव स्पर्शद्वयं भवति। तत्रापि प्रथमातिक्रमे कारणाभावादकारसहितं भवति। तत्र कादयो मावसानाः स्पर्शाः पञ्चविंशतिः पञ्चवर्गात्मकाः। तत्र चतुर्थपञ्चमयोरादिवर्णौ षोडशैकविंशरूपौ भवतः। तकारपकारावित्युक्तं भवति। तत्र साच्कस्यैवाऽर्थसम[7]र्थकत्वात् निर्णयार्थं तदर्थमाह—**निष्किञ्चनानामिति**। अदृष्टजनकतापस्य कृच्छ्रादेस्तपधात्वर्थत्वात्तज्ज्ञापकाऽप्रत्ययाभावेऽपि धातुमात्रं लक्षणयाऽर्थपरमित्यभिप्रेत्याह। न विद्यते किञ्चन येषाम्। किञ्चित्तु तापस्य निवारकम्। अतः[8] स्वरक्षितस्य पदार्थस्य प्रतिबन्धकनिवृत्तेरावश्यकत्वात् तपः कर्त्तारो निष्किञ्चना एव भवन्ति। तदाह—**निष्किञ्चनानां धनमिति**। **नृपेति** सम्बोधनं तस्य धनस्य

---

१. दात्मकानीति ख. ग.। २. यमेव प्रसिद्ध इति ख. ग.। ३. तथा साधनान्यपीति ख.। ४. भगवता ख. भगवान्स्वार्थमयं ग.। ५. मुपदिष्टमिति ख.। ६. तद्विरुक्तामिति ग.। ७. समर्पकत्वादिति ख.। ८. अन्तःस्वेति ख.

माहात्म्यदर्शित्वात् । यदिति प्रसिद्धम् । सर्वप्रकारेण तद्रक्षणीयमिति धनम् । धनकार्यकर्तृत्वाद्वा । तत्र प्रमाणमाह—विदुरिति । यतो लोके तपोधना इति प्रसिद्धाः । तद्धि पदमवश्यं स्पष्टवर्णात्मकमिति न वायुजलसम्बन्धादुत्पद्यते किन्तु वक्त्रा केनचिदुक्तमिति निश्चित्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्राऽन्यमपश्यमानः स्वयं तु नोक्तवानिति ज्ञात्वा अन्यं चाऽपश्यन् तदन्वेषणार्थं स्थलान्तरेऽपि गत्वा परितो वा भ्रमणं विधाय । पुनः स्वधिष्ण्यमास्थाय वक्तृचिन्तां परित्यज्य पदं विचारितवान् । तत्र पदचतुष्टयमध्ये आख्यातमेव तद्भवतीति निश्चित्याऽन्यस्य तादृशरूपाभावाल्लोट्परस्मैपदमध्यमपुरुषैकवचनं द्विरुक्तमिति निश्चित्य लोडर्थविचारे विध्यादिष्वर्थेषु प्रथमातिक्रमे कारणाभावात् विध्यर्थ एवाऽयमिति निश्चित्य आज्ञैव विध्यर्थ इति परोक्षापरोक्षभेदेन क्रियाया लिङ्लोटोर्विधानात् । प्रैषेपरोक्षापरोक्षभेदेन न प्रथमपुरुषमध्यपुरुषयोर्विधानात् भवच्छब्देऽप्याज्ञापरोक्षत्वबोधनात् । प्रत्यक्षतया प्रत्यक्षं मां पश्यन् मदग्रे तपः कुर्विति तपस्युपादिष्ट इव तपसि मन आदधे ॥ ६ ॥ ७ ॥ ❀ ❀ तदा तपः कृतवानिति—दिव्यं सहस्राब्दमिति । सन्तापजनका योगज्ञानप्राणाः । तस्य त्रयमपि सम्पन्नमिति वक्तुं त्रयं विशेषणतया निरूपयति । अमोघदर्शन इति ज्ञानम् । अथवा । यस्तेन पदार्थनिर्धारः कृतः स तस्य इति वा निरूप्यते । जितानिलात्मेति योगजनितस्तपः[3]शुद्धिर्वा । विजितोभयेन्द्रिय इत्यपि । जितोऽनिल आत्मा अन्तःकरणं येन । विशेषेण जितानि ज्ञानकर्मेन्द्रियाणि येन । अतएव आहारपरित्यागेन प्राणनिरोधेनाऽऽत्मानं संतप्तं कृतवान् । तदा तस्मिन् विद्यमाना लोकाः संतप्ता जाताः । यथा घर्मेण वस्त्रशोषणे जाड्यं गच्छति तथा लोकानाम् । तदाह—अखिललोकतापनमिति । अखिललोकस्य तापनं यस्मात् । तपसि सहजा ये दोषाः क्रोधग्लान्युद्वेगादयस्ते तस्य न जाता इति तदर्थं विशेषणं तपतां मध्ये अतितपीयानिति । समाहित इति सावधानः फले । यथा पाचको रसनिष्पत्तिं ज्ञात्वा पश्चान्न तपति । तदर्थं च दत्तदृष्टिर्भवति । तथाऽयमपीत्यर्थः ॥ ८ ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

स इत्यत्र सन्तोषार्थमिति भगवत्तोषार्थम् । ब्रह्मण इतिब्रह्मकृतम् । प्रवर्त्तत इति, नियमसामान्यवाचकोयं शब्दस्तद्विशेषे पर्यवस्यतीत्यर्थः । त इति सृष्टिसाधनभूताः । दृशमिति साक्षात्कारम् ॥ ५ ॥ ❀ ❀ स चिन्तयन्नित्यत्र । प्रकारः सर्वोपीत्यारभ्यैतद्व्याख्यानं ज्ञापितमिति, चिन्ताकथोपक्षेपाच्छुकेन व्यासचरणैर्वा ज्ञापितम् । निरूपितेति द्विर्गदितमित्यनेन पदप्रत्यभिज्ञां बोधयता निरूपितेत्यर्थः । व्याकुल इति साधनाप्राप्त्या व्याकुलः । अक्षरद्वयं विवेक्तुं विशेषमाहुः स्वराणामित्यादि । निर्णयार्थमिति उच्चारितं पदद्वयं किमर्थकमिति निर्णयार्थम् । लक्षणार्थपरमिति सन्तापसामान्यं तपधात्वर्थं इत्यदृष्टजनकोपि स तद्विशेषत्वाद्धात्वर्थ एव । स च केवलधातुप्रयोगेऽनवगम्यमानोऽस्प्रत्ययेन ज्ञाप्यते । प्रकृते तु तदभावाद्धातुमात्रं तादृशविशेषबोधने कुण्ठितं सत् स्वशक्यसम्बन्धेनार्थपरं केषाञ्चिद्धनबोधकमित्यर्थः । किञ्चिन्त्विति निःकिञ्चनशब्दावयवभूतकिञ्चनपदवाच्यं त्वित्यर्थः । निःकिञ्चना एवेति स्वरक्षिततापकृतिबन्धकीभूतकिञ्चिदाख्यपदार्थरहिता एवेत्यर्थः ॥ ६ ॥ ❀ ❀ निशम्येत्यस्य व्याख्यानं तद्धि पदमित्यादि । पदचतुष्टयमध्य इति । नामाख्यातनिपातोपसर्गात्मकपदचतुष्टयमध्ये ॥ ६ ॥ ❀ ❀ दिव्यमित्यत्र साधारणस्य ज्ञानस्याप्रयोजकत्वेनामोघत्वं नोपपद्यत इत्यरुच्या पक्षान्तरमाहुः अथ वेत्यादि । योगजनित इति, सामर्थ्यविशेष उक्त इत्यर्थात् । इत्यपीति तथेति शेषः ॥ ८ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

भगवदुक्तमेवेतिहासपूर्वकं दर्शयति— स इति । स ब्रह्मा स्वाधिष्ठानान्वेषणार्थं पूर्वं जले निमग्नस्तत्र तदप्राप्य ततः परावृत्य स्वधिष्ण्यं नाभिकमलरूपं स्वस्थानमास्थाय तत्र स्थित्वा सिसृक्षया जगत्स्रष्टुमिच्छया ऐक्षत कथं स्रष्टव्यमित्यालोचितवान् । एवं समीक्षमाणोऽपि यया प्रपञ्चनिर्माणविधिर्जगद्रचनाप्रकारो ज्ञातो भवेत् तामत्र सृष्टिविषये सम्मतां योग्यां दृशं प्रज्ञां नाध्यगच्छत् न प्राप्तवानित्यर्थः । यदि ब्रह्मणोऽपि साधनं भगवदनुग्रहं च विना कार्यविषयकस्यापि ज्ञानस्य दुर्लभत्वं तदाऽन्यस्य साधनादि विना भगवत्तत्त्वज्ञानं दुर्लभमिति किं वक्तव्यमित्याशयेन ब्रह्मणो जन्मतो ज्ञानतश्च महत्त्वमाह—जगतामादिदेव उत्पादकः, । परो गुरुः सर्वरहस्योपदेष्टा चेत्यर्थः ॥ ५ ॥ ❀ ❀ स विभुर्ब्रह्मा प्रज्ञाप्राप्त्युपायं चिन्तयन् एकदा द्विर्गदितं द्विरुक्तं द्व्यक्षरं वचः अम्भसि जले उपाश्रृणोत् समीपे श्रुतवान् । ते अक्षरे दर्शयति—स्पर्शेष्विति । कादयो मावसानाः स्पर्शास्तेषु यत् षोडशं तकारः यच्चैकविंशं पकारः । वचसो निर्देशार्थं तद्वाच्यमर्थमाह—निष्किञ्चनानामिति । न विद्यते किञ्चन येषां ते तेषां तपस्विनां यद्धनं लोका विदुर्जानन्ति । येन तपोधना इति ते प्रसिद्धाः । तच्च द्विर्गदितं तप तपेति । लोण्मध्यमपुरुषैकवचनस्य वीप्सां सादरविधिरूपामश्रृणोदित्यर्थः । नृपेति सम्बोधनेन तपःप्रभावस्तु त्वया शमीकशापेनानुभूत एवेति सूचयति ॥ ६ ॥ ❀ ❀ तप तपेति वचो निशम्य श्रुत्वा तस्य वचसो यो वक्ता तस्य दिदृक्षया द्रष्टुमिच्छया ततः प्रचलितः सन् सर्वा दिशो विलोक्य तत्र दिक्ष्वन्यद्वस्त्वन्तरमपश्यमानः पुनः स्वधिष्ण्यमास्थाय उपदिष्ट इव केनचित्प्रत्यक्षं नियुक्त इव तत्तप-

---

१. वक्तृविचारमिति ख. । २. द्वयमिति ख. ३. जनितप इति ख. ग. ।

आचरणमात्मनो हितं कार्यसाधकं विमृश्य मत्वा तपसि मन आदधे धृतवान् ॥ ७ ॥ ❀ ❀ ततश्च तप तपेति वाक्यार्थे अमोघं दर्शनं यस्य सः समाहितः सावधानः सन् अखिललोकानां तापनं प्रकाशकं दिव्यं सहस्राब्दं देवमानेन सहस्रवर्षपर्यन्तं तपोऽतप्यतेत्यन्वयः। समाहितत्वमेव स्पष्टयति—जितेति। जितः अनिलः प्राणवायुः आत्मा मनश्च येन सः, तथा विजितानि ज्ञानकर्महेतुभूतानि उभयेन्द्रियाणि येन सः। एवं तपः कर्तुं स एव समर्थो नान्य इति सूचयन् विशिनष्टि—तपतां तपश्चरतां मध्ये तपीयान् अतिशयेन तपस्वी। तदाश्चर्यं द्योतयति—स्मेति ॥ ८ ॥

## हिन्दी अनुवाद

तीनों लोकोंके परम गुरु आदिदेव ब्रह्माजी अपने जन्मस्थान कमलपर बैठकर सृष्टि करनेकी इच्छासे विचार करने लगे। परन्तु जिस ज्ञानदृष्टिसे सृष्टिका निर्माण हो सकता था और जो सृष्टि व्यापारके लिये वाञ्छनीय है, वह दृष्टि उन्हें प्राप्त नहीं हुई ॥ ५ ॥ ❀ ❀ एक दिन वे यही चिन्ता कर रहे थे कि प्रलयके समुद्रमें उन्होंने व्यञ्जनोंके सोलहवें एवं इक्कीसवें अक्षर 'त' तथा 'प' को—'तप-तप' ('तप करो' इस प्रकार दो बार सुना। परीक्षित्! महात्मालोग इस तपको ही त्यागियोंका धन मानते हैं ॥ ६ ॥ यह सुनकर ब्रह्माजीने वक्ताको देखनेकी इच्छासे चारों ओर देखा, परन्तु वहाँ दूसरा कोई दिखायी न पड़ा। वे अपने कमलपर बैठ गये और 'मुझे तप करनेकी प्रत्यक्ष आज्ञा मिली है' ऐसा निश्चय कर और उसीमें अपना हित समझकर उन्होंने अपने मनको तपस्यामें लगा दिया ॥ ७ ॥ ❀ ❀ ब्रह्माजी तपस्वियोंमें सबसे बड़े तपस्वी हैं। उनका ज्ञान अमोघ है। उन्होंने उस समय एक सहस्र दिव्य वर्षपर्यन्त एकाग्रचित्तसे अपने प्राण, मन, कर्मेन्द्रिय और ज्ञानेन्द्रियोंको वशमें करके ऐसी तपस्या की, जिससे वे समस्त लोकोंको प्रकाशित करनेमें समर्थ हो सके ॥ ८ ॥

**तस्मै स्वलोकं भगवान् सभाजितः सन्दर्शयामास परं न यत्परम्।**
**व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतम् ॥९॥**
**प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च काल[1]विक्रमः।**
**न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः ॥१०॥**
**श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः।**
**सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः।**
**प्रवालवैदूर्यमृणालवर्चसः परिस्फुरत्कुण्डलमौलिमालिनः ॥११॥**
**भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलिभिर्महात्मनाम्।**
**विद्योतमानः प्रमदोत्तमाद्युभिः सविद्युदभ्रावलिभिर्यथा नभः ॥१२॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तमेव लोकमनुवर्णयति पञ्चभिः। व्यपेताः संक्लेशादयो यस्मात्। स्वदृष्टवद्भिः सत्पुण्यवद्भिः। यद्वा स्वस्य दृष्टं दर्शनमस्ति येषान्तैः। आत्मविद्भिरित्यर्थः। तयोस्ताभ्यां मिश्रं सत्त्वं च न प्रवर्तते। किंतु शुद्धमेव सत्त्वम्। कालविक्रमो नाशः ॥ ९ ॥ ❀ ❀ अपरे रागलोभादयो न संतीति किमु वक्तव्यम्। अनुव्रताः पार्षदाः। श्यामाश्च ते अवदाता उज्ज्वलाश्च पद्मनेत्राः पीतांबराः सुरुचोऽतिकमनीयाः सुपेशसोऽतिसुकुमाराः ॥ १० ॥ ❀ ❀ उन्मिषंत इव प्रभावंतो मणिप्रवेका मण्युत्तमा येषु तानि निष्काणि पदकान्याभरणानि च येषां ते। सुवर्चसोऽतितेजस्विनः। प्रवालादिवद्वर्चो वर्णो येषां ते। परितः स्फुरंति कुंडलानि मौलयो मालाश्च संति येषां ते ॥ ११ ॥ ❀ ❀ पार्षदाननुवर्ण्य पुनरपि लोकमनुवर्णयति। भ्राजिष्णुभिर्देदीप्यमानाभिः। प्रमदोत्तमानां दिवः कांतयस्ताभिर्विद्योतमाना सह विद्युद्भिर्वर्तमानाः सविद्युतस्ताभिरभ्रावलिभिः। तत्र विद्युत इव स्त्रियाः। अभ्रपंक्तय इव विमानावलयः। नभ इव लोकः ॥ १२ ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

व्यपेता नष्टाः संक्लेशा अविद्यारागद्वेषाद्याः। विमोहो मौढ्यमाकुलता वा साध्वसं कालादिभयं स्वो विष्णुः स एव लोक इति पक्षमाश्रित्याह—यद्वेति। इत्यर्थ इति। आत्मविद्भिरेव स्वरूपभूतो भगवान्दृश्यते नान्यैरिति भावः ॥ स्वलोकं महावैकुंठं यद्यतो लोकात्परमन्यद्वैकुंठं परं श्रेष्ठं नासीति अत्राथैनं गार्गीवाचक्नवी पप्रच्छेत्यादिकोपनिषदुदाहार्योऽत्र ह्यंतरिक्षलोकादिप्रजा-

---

1. प्रा० पा० कालविभ्रमः।

पतिलोकपर्यंतप्रश्नानामुत्तराणि गार्ग्यै याज्ञवल्क्यो दत्त्वा ब्रह्मलोकादारभ्य भगवल्लोकादप्युपरि पृष्टवत्यै तस्यै मातिप्राक्षीरित्यादिना शापं दातुमुद्यतः । सा च तच्छ्रुत्वा ज्ञातविज्ञेयत्वादुपरराम इति । यद्वा यद्यतो वैकुंठात्परं ब्रह्माख्यं तत्त्वं परं भिन्नं नास्ति स्वरूपशक्तिविशेषाविष्कारेण मायानावृतं तदेव तद्रूपमित्यर्थः । इदमग्रे व्यक्तीकरिष्यते तादृशत्वे हेतुः व्यपेतेति, स्वदृष्टेति च । स्वदृष्टेति "अथ ते मुनयो दृष्ट्वा नयनानंदभाजनम्" इत्यारभ्य "शंसतो वैष्णवीं श्रियम्" इत्यंतेन तृतीयस्कंधोक्तेः ॥ ९ ॥ ❀ ❀ ताभ्यां रजस्तमोभ्यामसुरैः प्रह्लादादिभिश्चार्चितः श्लाघिता यद्वा । दुष्टानामसनादसुर्हरिस्तत्र रमंत इत्यसुराः सुराश्च तेऽसुराश्चेति सुरासुराः "महद्वै देवानामेकमसुरत्वम्" इतिश्रुतेः । तैः स्तुत्याः तयोर्मिश्रं महत्तरं जडं यत्सत्त्वं तदपि न किंत्वन्यदेव सुष्ठु स्थापयिष्यमाणामायातः परा या भगवत्स्वरूपशक्तिस्तस्या वृत्तित्वेन चिद्रूपं शुद्धसत्त्वाख्यं सत्त्वमिति तदीयप्रकरण एव स्थापयिष्यते तदेव च यत्र प्रवर्तते तदुक्तं नारदपंचरात्रीयजितंतस्तोत्रे "लोकं वैकुंठनामानं दिव्यषड्गुणसंयुतम् । अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम्" । पाद्मोत्तरखंडे तु यद् विभूतिवर्णनानंतरं "त्रिपाद्विभूतिरूपं तु शृणु भूधरनंदिनि । प्रधानपरमव्योम्नोरंतरे विरजा नदी । वेदांगस्वेदजनितैस्तोयैः प्रस्राविता शुभा । तस्याः पारे परव्योम त्रिपाद्भूतं सनातनम् । अमृतं शाश्वतं नित्यमनंतं परमं पदम् ॥ शुद्धसत्त्वमयं दिव्यमक्षरं ब्रह्मणः पदम् ॥" इत्यादिप्राकृतगुणानां परस्पराव्यभिचारित्वं तूक्तं सांख्यकौमुद्याम् । अन्योन्यमिथुनवृत्तय इति । तट्टीकायाञ्च अन्योन्यसहचरा अविनाभाववृत्तय इति यावत् । भवति चात्रागमः "अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्रगामिनः । रजसो मिथुनं सत्त्वम्" इत्याद्युपक्रम्य "नैषामादिश्च संयोगो वोपलभ्यते" इति । तस्मादत्र रजसोऽसंभवादसृज्यत्वं तमसोऽसंभवादनाश्यत्वं प्राकृतसत्त्वाभावाच्च सच्चिदानंदरूपत्वं तस्य दर्शितं तत्र 'हेतुर्न च कालविक्रमः' इति । कालविक्रमेण हि सत्त्वादयः प्रकृतिक्षोभात्पृथक् पृथक् क्रियंते तस्माद्यत्रासौ षड्भावविकारहेतुः कालविक्रम एव न प्रवर्तते तेषां तत्राभावः सुतरामेवेति भावः । किञ्च तेषां मूल एव कुठार इत्याह—न यत्र मायेति । मायात्र जगत्सृष्ट्यादिहेतुर्भगवच्छक्तिर्न तु कापट्यमात्रं रजआदिनिषेधेनैव तद्व्युदासात् । यथा वा यत्र तयोः संबंधिसत्त्वं प्राकृतं सत्त्वं यत्तदपि न प्रवर्तते मिश्रमपृथग्भूतगुणत्रयं प्रधानं चात एवेशितव्याभावात्कालमाये अपि न स्त इति मायाप्रधानयोर्भेदोऽग्रे विवेचनीयः । कैमुत्येनोक्तमेवार्थं द्रढयति—किमुतापर इति । किञ्चिद्रजस्तमोमिश्रं सत्त्वं नेति व्याख्यातं तु पिष्टपेषणमेव । सामान्यरजस्तमोनिषेधेनैव तत्प्रतिपत्तेः । ननु गुणाद्यभावान्निर्विशेष एवासौ लोक इत्याशंक्य तत्र विशेषस्तस्याः शुद्धसत्त्वात्मिकायाः स्वरूपशक्तेरेव विलासरूप इति द्योतयंस्तमेव विशेषं दर्शयति—हरेरिति । सुराः सत्त्वप्रभावा असुराः रजस्तमःप्रभावास्तैरर्चितास्तेभ्योऽर्हत्तमा इति गुणातीतत्वादिति भावः इति संदर्भः ॥ अवदाता निर्मलाः "अवदातः सिते गौरे शुद्धे" इति यादवः । इंद्रनीलमणिवन्निर्मलाः "दशदोषविनिर्मुक्तः श्याम इंद्रमणिः स्मृतः" इत्यभिधानात् "सुष्ठु मृदुश्च पेशः स्यात्" इति च ॥ १० ॥ ❀ ❀ उन्मिषंत इव चक्षुष्मंत इव पदकानि वक्षोभूषणानि "निष्कोऽस्त्री हेम्नि दीनारे साष्टे कर्षशते पले । वक्षोविभूषणे कर्षे" इति कोशात् । अनेन सारूप्यादिभाजो मुक्ता अपि तत्र संतीत्युक्तम् । प्रवालादयो मणिभेदाः ॥ ११ ॥ ❀ ❀ सिंहावलोकन्यायेन पुनर्लोकं वर्णयति भ्राजिष्णुभिरिति ॥१२॥

### श्रीमद्वीरराघवव्याख्या

सभाजितस्तपसा सम्यगाराधितो भगवान् परमन्यद्यस्मात्परमुत्कृष्टं नास्ति तथाभूतं लोकं तस्मै चतुर्मुखाय संदर्शयामास तमेव लोकं वर्णयति पंचभिः । व्यपेतसंक्लेशविमोहसाध्वसं क्लेशा अविद्यादयः साध्वसं भयं व्यपेताः संक्लेशादयो यस्मात् स्वदृष्टवद्भिस्स्वशरीरकपरमात्मानमनुभवद्भिः विबुधैर्विशेषेण बुध्यंते इति विबुधा ज्ञानाधिका नित्यमुक्ताश्च तैरधिष्ठितम् ॥ ९ ॥ ❀ ❀ क्लेशमोहाद्यभावहेतुमाह प्रवर्तत इति । रजस्तमसी तयोस्ताभ्यां मिश्रं सत्वं च यत्र वैकुंठाख्यं लोके न प्रवर्तते अविद्यास्मिता रागद्वेषादिनिवेशाः पंचक्लेशाः रजस्तमोविरहाद्रागद्वेषादिकं मोहनं च नास्ति तन्मिश्रसत्वाभवात्कदाचित्प्रकाशश्च नास्ति तस्माच्छुद्धसत्वमय इत्यर्थः । कालविक्रमः कालस्य यो विक्रमः परिणामहेतुत्वं तच्च नेत्यर्थः । माया सत्वरजस्तमआश्रया प्रकृतिः यत्र न अप्राकृत इत्यर्थः । अनेन लोकस्य माया कल्पितत्वशंका निरस्ता । यत्र लोके सुरासुरैरर्चिता हरेरनुव्रता उपासका दृश्यंते इति शेषः ॥ १० ॥ ❀ ❀ कथंभूता दृश्यंत इत्यपेक्षायां सारूप्यमाह श्यामेत्यादिना । श्यामाश्च तेऽवदाता उज्ज्वलाश्च श्यामावदाताः शतपत्रलोचनाः पद्मदलायतेक्षणाः पिशङ्गवस्त्राः पीतांबरधराः सुरुचः दीप्तिमंतः सुपेशसः अतिसुकुमारा उन्मिषंतः देदीप्यमानाः मणयो येषु तानि प्रवेकानि श्रेष्ठानि निष्काणि कनकमयानि आभरणानि येषां ते सुवर्चसः अतिलावण्यवंतः प्रवालादिवद्वर्चो वर्णो येषां परिस्फुरंति कुंडलानि मौलयः मुकुटानि मालाश्च येषां संतीति तथाभूताः आर्ष इनिः अत इनिरिति तपरकरणात् ॥ ११ ॥ ❀ ❀ भ्राजिष्णुभिर्देदीप्यमानाभिर्महात्मनां नित्यमुक्तानां प्रकाशमानविमानपंक्तिभिर्यैः लोकः परितो विराजते यश्च प्रमदोत्तमानां दिवः कांतयस्ताभिर्विद्योत्तमानस्तं दर्शयामासेति पूर्वेणान्वयः । तत्र ददर्शेत्युत्तरेण वान्वयः । तत्र दृष्टांतः विद्युद्भिः तडिद्भिः सह वर्त्तमानाः सविद्युतः अभ्राणां मेघानामावलयः पंक्तयः ताभिर्नभो यथा विराजते तद्वदित्यर्थः । विद्युत इव स्त्रियः अभ्रपंक्तय इव विमानानि नभः इव लोकः ॥ १२ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

इदानीं स चापि यत्र पुरुष इति प्रश्नं परिहरति तस्मा इति । प्रीतिजनकतपसा सभाजितः पूजितः यद्यतो लोकात्पर-

मधिकं पदं स्थानं न तस्मात्संदृष्टवद्भिः सम्यग्परोक्षज्ञानवद्भिर्विबुधैरभिष्टुतमभितो मुख्यत्वेन स्तुतं अविद्यास्मितरागद्वेषादिनिवेशाः संक्लेशा मौढ्यं विमोहः व्याकुलत्वं साध्वसं व्यपेताः संक्लेशादयो यस्मात्स तथा तम् ॥ ९ ॥ ❀ ❀ संक्लेशाद्यभावे कारणमाह नेति । तयोरजस्तमसोर्मिश्रं सत्त्वं सत्त्वरजसोर्मिश्रं तमः सत्त्वतमसोर्मिश्रं रजः केवलं चित्प्रकृतिमय एव कालविक्रमः कालकृतोत्पत्तिनाशवृद्धिक्षयादिलक्षणः सत्त्वाद्यभावं कारणमाह नेति । माया त्रिगुणात्मिका जडप्रकृतिः अपरे मायाविकाराः तस्य लोकस्य मायातीतत्वात् तर्ह्ययं शून्यागारतुल्य इति तत्राह हरेरिति । असनादसुर्हरिस्तास्मिन्रमंत इत्यसुराः असुरत्वगुणोपेतैः सुरैरर्चितामहद्देवानामसुरत्वमेकमिति श्रुतेः तं लोकमित्यन्वयः ॥ १० ॥ ❀ ❀ श्यामवर्णा अवदाता निर्मलाश्चावदातः सिते गौरे शुद्ध इति यादवः । अतस्ते इंद्रनीलवन्निर्मलाः दशदोषविनिर्मुक्तः श्याम इंद्रमणिः स्मृत इति वा शतपत्रं पद्मं सुष्ठु रुक् प्रभा येषां ते सुरुचः सुष्ठु पेशः सौंदर्यं येषां ते सुपेशसः मृदुपिंडश्च पेशः स्यादिति वचनात् सु सुकुमारतरशरीरा इति वा । उन्मिषं तश्चक्षुष्मंतः मणिप्रवेका रत्नश्रेष्ठा येषु ते तथा । ते च निष्कहेमनिर्मिता वक्षोलंकारा येषां ते तथा निष्को स्त्री हेम्नि दीनारे सार्ष्टे कर्षशते पले वक्षोविभूषणे कर्षे इति सुवर्चसः सुतेजसः । अनेन सारूप्यादिभाजो मुक्ता अपि संतीत्युक्तं भवति ॥ ११ ॥ ❀ ❀ पुनरपि तं लोकं विशिनष्टि । प्रवालेति । यो लोको महात्मनां भ्राजिष्णुभिर्लसद्भिर्मानावलिभिः सर्वतो विराज इत्यन्वयः । प्रवालवत् वैदूर्यवन्मृणालवद्वर्चः प्रभा येषां ते तथा परिस्फुरंतः कुण्डलमौलयः कुण्डलानि मौलयश्च कुण्डलमौलयस्तेषां मालाः पंक्तयो येषां संतीति परिस्फुरत्कुंडलमौलिमालिनः तेषां परिस्फुरंति कुण्डलानि मौलयः किरीटानि मालास्स्रजश्च येषां संतीति ते तथा तेषामिति वा ॥ १२ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

भगवदाविर्भावमाह सार्द्धैर्दशभिः । तस्मै इत्यादि भगवदाज्ञापुरस्कारेण श्रीनारायणह्वयपुरुषनाभिपंकजे स्थित्वैव तत्तोषणैस्तपोभिर्भजते ब्रह्मणे सभाजितस्तेन भजनेन वशीकृतः सन् स्वलोकं वैकुण्ठभुवनोत्तमं भगवान् सम्यग्दर्शयामास । यत् यतो वैकुण्ठात् परम् अन्यत् वैकुण्ठपरं श्रेष्ठं न विद्यते परमभगवद्वैकुण्ठत्वात् । ( अत्र परं न यत् परम् इत्यत्र अथ हैनं गार्गी वाचक्नवी पप्रच्छेत्यादिरुपनिषदुदाहार्य्या । अत्र ह्यन्तरिक्षलोकादिप्रजापतिलोकपर्य्यन्तप्रश्नानामुत्तराणि गार्ग्यै याज्ञवल्क्यो दत्त्वा ब्रह्मलोकाख्यभगवल्लोकादप्युपरि पृष्टवत्यै तस्यै मातिप्राक्षीरित्यादिना शापं दातुमुद्यतः सा च तत् श्रुत्वा ज्ञानविज्ञेयवस्त्वादुपरराम इति ) यद्वा यत् यतो वैकुण्ठात् परं ब्रह्माख्यं तत्त्वं परं भिन्नं न भवति । स्वरूपशक्तिविशेषाविष्कारेण मायानावृतं तदेव तद्रूपमित्यर्थः । अग्रे त्विदं व्यक्तीकरिष्यते । तादृशत्वे हेतुः व्यपेतेति स्वदृष्टेति च । अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः विमोहस्तैर्वैचित्यं साध्वसं भयं व्यपेतानि संक्लेशादीनि यत्र तम् । स्वस्य दृष्टं दर्शनं तद्विद्यते येषां तैरात्मविद्भिरपि अभितः सर्व्वांशेनैव स्तुतं श्लाघितम् । अथ ते मुनयो दृष्ट्वा नयनानन्दभाजनम् । वैकुण्ठं तदधिष्ठानं विकुण्ठञ्च स्वयंप्रभम् । भगवन्तं परिक्रम्य प्रणिपत्यानुमान्य च । प्रतिजग्मुः प्रमुदिताः शंसन्तो वैष्णवीं श्रियम् । इति तृतीयात् ॥ ९ ॥ ❀ ❀ पुनस्तादृशत्वमेव व्यनक्ति प्रवर्त्तते इति । यत्र वैकुण्ठे रजस्तमश्च न प्रवर्त्तते । तयोर्मिश्रं सहचरं जडं यतः सत्वं तदपि न किन्तु अन्यदेव । यत् सुष्ठु ( स्थापयिष्यमाणा या मायातः परा भगवत्स्वरूपशक्तिस्तस्य । वृत्तित्वेन चिद्रूपं शुद्धसत्त्वाख्यं सत्त्वमिति तदीयप्रकरण एव ) स्थापयिष्यते । तदेव च यत्र प्रवर्त्तत इत्यर्थः । तया च नारदपञ्चरात्रे जितन्ते स्तोत्रे-लोकं वैकुण्ठनामानं दिव्यषड्गुणसंयुतम् । अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् । इति । पाद्मोत्तरखण्डे तु वैकुण्ठनिरूपणे तस्य सत्त्वस्याप्राकृतत्वं स्फुटमेव दर्शितम् । यत उक्तं प्रकृतिविभूतिवर्णानान्तरम् एवं प्राकृतरूपाया विभूते रूपमुत्तमम् । त्रिपाद्विभूतिरूपं तु शृणु भूधरनन्दिनी ॥ प्रधानपरमव्योम्नो रन्तरे विरजा नदी । वेदाङ्गस्वेदजनिततोयैः प्रश्राविता शुभा ॥ तस्याः पारे परव्योम्नि त्रिपाद्भूतं सनातनम् । अमृतं शाश्वतं नित्यमनन्तं परमं पदम् । शुद्धसत्त्वमयं दिव्यमक्षरं ब्रह्मणः पदम् ॥ इत्यादि । प्राकृतगुणानां परस्पराव्यभिचारित्वं तूक्तं साध्यकौमुद्याम् अन्योन्यमिथुनवृत्तय इति । तट्टीकायाञ्च—अन्योन्यसहचरा अविनाभाववृत्तय इति यावत् । भवति चात्रागमः—अन्योन्यमिथुनाः सर्व्वे सर्व्वे सर्व्वत्र गामिनः । रजसो मिथुनं सत्त्वमित्याद्युपक्रम्य नैषामादिश्च संयोगो वियोगो वोपलभ्यते । इतीति । तस्मादत्र रजसोऽसद्भावादसृज्यत्वं तमसोऽसद्भावादनाश्यत्वं प्राकृतसत्त्वाभावाच्च सच्चिदानन्दरूपत्वं तस्य दर्शितम् । तत्र हेतुः न च कालविक्रम इति । कालविक्रमेण हि प्रकृतिक्षोभात् सत्त्वादयः पृथक् क्रियन्ते । तस्मात् यत्रासौ षड्भावविकारहेतुः कालविक्रम एव न प्रवर्त्तते तत्र तेषामभावः सुतरामेवेति भावः । किञ्च तेषां मूलत एव कुठार इत्याह न यत्र मायेति । मायात्र जगत्सृष्ट्यादिहेतुर्भगवच्छक्तिः न तु कापट्यमात्रं रज-आदिनिषेधेनैव तद्व्युदासात् । अथवा यत्र तयोः सम्बन्धि सत्त्वं प्राकृतं सत्त्वं यत् तदपि न प्रवर्त्तते । मिश्रमपृथग्भूतगुणत्रयं प्रधानं च । अतएवेक्षितव्याभावात् कालमाये अपि न स्तः इति । अग्रे मायाप्रधानयोर्भेदो विवेचनीयः । कैमुत्येनोक्तमेवार्थं द्रढयति किमुतापरे इति । तयोर्मिश्रं किञ्चिद्रजस्तमोमिश्रं सत्वञ्च नेति व्याख्या तु पिष्टपेषणमेव । सामान्यतो रजस्तमोनिषेधेनैव तत्प्रतिपत्तेः । ननु गुणाद्यभावान्निर्विशेष एवासौ लोक इत्याशंक्य तत्र विशेषस्तस्याः शुद्धसत्त्वात्मिकायाः स्वरूपानतिरिक्तशक्तेरेव विलासरूप इति द्योतयंस्तमेव विशेषं दर्शयति हरेरेति । सुरा सत्त्वप्रभवाः असुरा रजस्तमःप्रभवाः तैरर्चिताः तेभ्योऽर्हत्तमा इत्यर्थः । गुणातीतत्वादेवेति भावः ॥ १० ॥ ❀ ❀ तानेव वर्णयति श्यामावदाता इति । श्यामाश्च अवदाता

उज्ज्वलाश्च ते पीतवस्त्राः सुपेशसोऽतिसुकुमाराः उन्मिषंत इव प्रभावन्तो मणिप्रवेका मण्युत्तमा येषु तानि निष्काणि पदकान्याभरणानि येषां ते। सुवर्चसः तेजस्विनः। प्रवालेति। केऽपि तेभ्यः श्रीभगवत्सारूप्यं लब्धवद्भ्योऽन्ये प्रवालादिसवर्णाः ॥ ११ ॥ ❀ ❀ पुनरपि लोकं वर्णयति। भ्राजिष्णुभिरिति ॥ १२ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

स्वर्लोकं महावैकुण्ठम्। यत्परं यतोऽन्यत् परं श्रेष्ठं नास्ति। विशेषेणैव अपेताः संक्लेशा अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च अविद्यावृत्तयः तथा विशिष्टो मोहो वैचित्त्यं स चेह भगवत्स्फूर्त्यभाव एव साध्वसं तत्सेवापराधभयं तदप्यपेतं यत्र तम्। विबुधैरिन्द्रादिदिक्पालैः। स्वदृष्टवद्भिरिति नित्ययोगे मतुपा प्राकृतेन्द्रादिव्यावृत्तिः ॥ ९ ॥ ❀ ❀ यत्र वैकुण्ठे रजस्तमश्च न प्रवर्त्तते। तेन रजसः प्रवृत्त्यभावादसृज्यत्वं तमसः प्रवृत्त्यभावादनाश्यत्वञ्च तस्योक्तम् तथा। तयोर्मिश्रं जडं यत् सत्त्वं तदपि नेति सत्त्वस्यापि प्रवृत्त्यभावात् नश्वरस्वर्गादेः पाल्यत्वमिव न पाल्यत्वं किन्तु शुद्धं सत्त्वं यच्चिद्रूपं स्वरूपशक्तिसम्बन्धि तन्मयमित्यर्थः! तथा च नारदपञ्चरात्रे जितन्ते स्तोत्रे—लोकं वैकुण्ठनामानं दिव्यषड्गुणसंयुतम्। अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ॥ इति। पाद्मोत्तरखण्डे च पादविभूतिवर्णनान्तरम्। त्रिपाद्विभूतिरूपन्तं शृणु भूधरनन्दिनि ॥ प्रधानपरमव्योम्नोरन्तरे विरजा नदी। वेदाङ्गस्वेदजनिततोयैः प्रस्राविता शुभा ॥ तस्याः पारे परव्योम्नि त्रिपाद्भूतं सनातनम्। अमृतं शाश्वतं नित्यमनन्तं परमं पदम् ॥ शुद्धसत्त्वमयं दिव्यमक्षरं ब्रह्मणः पदम्। सर्व्ववेदमयं शुभ्रं सर्वप्रलयवर्जितम्। असंख्यमजरं सत्यं जाग्रत्स्वप्नादिवर्जितम्। न तद्भासयते सूर्यो न शशांको न पावकः ॥ यद्गत्वा न निवर्त्तन्ते तद्धाम परमं हरेः। नानाजनपदाकीर्णं वैकुण्ठं तद्धरेः पदम् ॥ इत्यादि। अतएव यत्र कालविक्रमः षड्भावविकारहेतुर्न प्रवर्त्तते तस्य गुणेष्वेव नियतत्वात्। किमन्यद्वाच्यं यत्र गुणानां मूलत एव कुठार इत्यत आह न यत्र मायेति। मायात्र जगत्सृष्ट्यादिहेतुर्भगवच्छक्तिर्न तु कापट्यमात्रं रज-आदिनिषेधेनैव तद्व्युदासात्। किमुत अपरे मायासन्ततयो महदहमादयो न सन्तीति तत्रत्यानां शरीराणि न तैरारब्धानीति ज्ञापितम्। एवं वैकुण्ठमनुवर्ण्य तत्रत्यान् भगवतो भक्ताननुवर्णयति अनुव्रता अनुवृत्तिरेव व्रतं येषां ते पार्षदा यत्र नित्यं भगवन्तमनुवर्त्तंते इत्यर्थः। तेन परस्मिन् कालमाययोरिति पूर्वमुक्तो भगवानिव भगवल्लोको भगवद्भक्ताश्च कालमायातीता इति प्रतिपादितम्। सुरैरसुरैश्च भक्तैरर्चिताः ॥ १० ॥ ❀ ❀ श्यामाश्च ते अवदाता उज्ज्वलाश्च ते तथा सुपेशसः अतिसुकुमाराः। उन्मिषन्त इव प्रभावन्तो मणिप्रवेका मण्युत्तमा येषु तानि निष्काणि पदकान्याभरणानि येषां ते। सुवर्चसोऽतितेजस्विनः। प्रवालादिवत् वर्च्चो वर्णो येषाम्। तत्र केऽपि तेभ्यः श्रीभगवत्सारूप्यं लब्धवद्भ्योऽन्ये प्रवालादिसवर्णाः रक्तपीतादिवर्णाः सन्तीति सन्दर्भः। हरेरनुव्रता यत्र श्यामारुणहरित्सिताः तत्तद्वर्णमुपास्येशं तत्सारूप्यमुपागताः ॥ इति भागवतामृतम् ॥ ११ ॥ ❀ ❀ पार्षदानुवर्ण्य पुनरपि लोकं वर्णयति। भ्राजिष्णुभिः देदीप्यमानाभिः प्रमदोत्तमानां दिवः कान्तयस्ताभिः सविद्युदिति विद्युत इव स्त्रियः अद्रिपङ्क्तय इव विमानानि नभ इव लोकः ॥ १२ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भगवानपि सभाजितः तपआदिभिः आराधितः तस्मै ब्रह्मणे स्वलोकं स्वस्य सर्वेश्वरस्य विश्वसृष्ट्यादिहेतोः लोकं सृष्टिसंहारवर्जितं निवासस्थानं संदर्शयामास सम्यक्तद्ध्यानविषयं कारयामास। कथंभूतम्, सर्वेभ्यो लोकेभ्यः उपरिस्थितम्। न यत्परम्। यतः परमन्यदुपरिस्थितं लोकांतरं नास्ति प्रकृतिमंडलाद्बहिःस्थितमित्यर्थः। दर्शयामास लोकं स्वगोपानां तमसः परमिति वक्ष्यमाणात् आदित्यवर्णं परस्तादिति श्रुतेश्च। तमेवाप्राकृतं लोकं वर्णयति पंचभिः। व्यपेताः स्वभावत एवापास्ताः संक्लेशादयो यस्मात्तम्। स्वस्य आत्मा वा अरे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्य इत्यादिश्रुतिप्रतिपादितस्य भगवतो दृष्टं साक्षात्कारलक्षणं दर्शनं विद्यते येषां ते। तथा तैः प्रकृतिबंधविनिर्मुक्तैः निरंजनं परमं साम्यमुपैतीत्यादिश्रुतिप्रोक्तैः। विशेषेण बुध्यंते ये ते विबुधाः नित्यमुक्तास्तैश्च सदा पश्यंति सूरय इत्यादिश्रुतिप्रोक्तैः। अभिष्टुतं यत्र रजस्तमश्च तपोमिश्रं सत्वं च कालविक्रमः सृष्ट्यादिनिर्मितस्य विक्रमः प्रभावश्च न प्रवर्तते ॥ ९ ॥ ❀ ❀ माया पूर्वोक्तगुणत्रयवती प्रकृतिश्च यत्र न प्रवर्तते अपरे अन्यलोभादयश्च न प्रवर्तन्ते इति किमुत वक्तव्यम्। पूर्वोक्तान् मुक्तान् नित्यमुक्तांश्च गुणसामान्येन निरूपयति। यत्र यस्मिन् लोके हरेः अनुव्रता उपासकाः सुरासुरार्चिताः सर्वलोकैः पूज्याः संति। कथंभूताः श्यामाश्च अवदाताः शतपत्रलोचनाः पद्मदलेक्षणाः पिशंगवस्त्राः पीतपदाः सुरुचः सुकांतयः सुपेशसः अतिसुकमाराः ॥ १० ॥ ❀ ❀ उन्मिषंतः दीप्तिमन्तः मणिप्रवेकाः मणिश्रेष्ठाः येषु तानि निष्काणि पदकान्याभरणानि येषां ते सुवर्चसः अतितेजस्विनः प्रवालादिवत् वर्च्चो वर्णो येषां ते। परिस्फुरंति कुंडलानि मौलयो मुकुटानि मालाश्च संति येषां ते ॥ ११ ॥ ❀ ❀ यः लोकः भ्राजिष्णुभिर्देदीप्यमानाभिः प्रमदोत्तमाद्युभिः विमानस्थानां प्रमदोत्तमानां दिवःकांतयस्ताभिः विद्योतमानः सन् महात्मनां नित्यमुक्तादीनां लसद्विमानावलिभिः शोभमानाभिः विमानपंक्तिभिः परितः अभ्राणां मेघानामावलिभिः पंक्तिभिः नभो यथा परितो विराजते तद्वदित्यर्थः। तं लोकं दर्शयामासेति पूर्वेणान्वयः ॥ १२ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं क्रियामाणे फलं जातमित्याह—**तस्मै स्वलोकमिति**। स हि भगवदर्थं सृष्टिं कर्तुं विचारयति। भगवांस्त्वेतादृशे लोके तिष्ठति न ह्येतादृशो ब्रह्मशक्यः। अतस्तस्य गर्वपरिहारार्थं स्वलोकं प्रदर्शितवान्। अन्यथा आत्मानमेव प्रदर्शयेत्। कृत्रिमवैकुण्ठस्य लक्ष्म्या अधिकृतत्वात् स्वलोकपदेन व्यापिवैकुण्ठमेवोच्यते। यद्यपि तमेव प्रदर्शयति तथापि तत्प्रदर्शनं न भगवतः किञ्चित्कार्यं जनयति किन्तु तस्यैव भक्तिजनकम्। अत आह—**तस्मा इति**। भगवानिति प्रदर्शनसामर्थ्यार्थमुक्तम्। अन्यथा तद्[1]दृश्यं कथं दृश्यं भवेत्। **समाहित इति**। स्वदृष्टिं तद्दृष्टौ योजयित्वा लोकं प्रदर्शयन्नप्यग्रे स्वदृष्टेः पृथक्करणार्थं यथा[2] तद्दृष्टयैकं न प्राप्नोति [3]तथा सावधानः इत्यर्थः। लोकस्य वा तिरोभावस्वभावात्तद्दृष्टिस्पर्शेऽपि यथा न तिरोहितं भवेत् तदर्थं वा सावधानः। परं कृत्रिमवैकुण्ठात्। ब्रह्मस्वरूपं वा। प्रभुत्वेन हरेः स्फूर्तौ लोकत्वेन तदु[4]द्भव इत्यक्षर[5]रूपं वा। **न यत्परमिति**। न विद्यते यतः परमुत्कृष्टमन्यत्। अक्षरस्याऽप्यनेकधा प्रदर्शनसंभावनयाऽप्येतदुक्तम्। तस्य गुणातीतत्वकथनार्थं गुणासाधारणधर्मान्निवारयति—**व्यपेतेति**। विशेषेणाऽपेताः संक्लेशादयो यस्मात्। सम्यक् क्लेशा अविद्यादयस्तमसः। विशेषेण मोहो रजसः। साध्वसं सत्त्वस्य। साधु रस्यते क्षिप्यतेऽनेनेति साध्वसम्। सर्वस्मादेवाऽकार्यात् साधुस्तेन भयेन पृथक् क्रियत इति। व्यवहारेणाऽपि तस्य सगुणत्वं निवारयति—**स्वदृष्टवद्भिरिति**। स्वस्यैव स्वस्मिन् वा दृष्टं दर्शनमात्मज्ञानं तद्वद्भिः। ब्रह्मविद्भिरेव तत्रापि स्तोत्रेण व्यवह्रियत इति न ब्रह्मत्वक्षतिः। तद्द्वाराऽन्यव्यवहारोऽपि भविष्यतीत्याशङ्क्य विशेषेण बुधैरित्युक्तम्। अभितः स्तुतिः सर्वोऽपि परिकरस्तादृश इति ॥ ९ ॥ ❀ ❀ एवं गुणकार्यं निवार्य गुणानपि निवारयति—**प्रवर्त्तते यत्रेति**। यत्र लोके रजस्तमश्च न प्रवर्त्तते। सत्त्वं च न ताभ्यां मिश्रम्। अनेन शुद्धं सत्त्वं तत्र प्रवर्त्तत इति ज्ञापितम्। तदपि ब्रह्मत्वबाधकमिति चेत्। न। वासुदेववदक्षरस्याऽप्युद्भवे शुद्धसत्त्वस्याऽऽधारत्वेनाऽपेक्षितत्वात्। अन्यथा निराकारे साकारता न सम्पद्येत। तावताऽपि न तस्मिन् गुणसम्बन्धः। [6]आकारसमर्पणार्थमेव तत्सम्बन्धात्। यथा प्रतिकृतिसम्बन्धः पित्तलादीनाम्। तथापि प्रतिमादौ तदाकृतिव्यतिरेकेण न तत्राऽन्यो धर्मोऽस्ति। न च तत्राऽन्तर्बहिः पित्तलस्य व्यतिरेकेणान्यः पदार्थो विद्यते। तस्माद्ब्रह्मत्वमविरुद्धम्। सम्बन्धश्च भगवदिच्छयेति न तद्गतो दोषः। अक्षरस्वरूपं च निबन्धे निरूपितम्। किञ्च। गुणास्तत्रैव भवन्ति यत्र तत्क्षोभकः कालो भवति। अन्यथा तेषां स्थितिर्व्यर्था स्यात्। कार्यार्थमेव हि तेऽङ्गीक्रियन्त इत्यभिप्रायेणाऽऽह—**न च कालविक्रम इति**। कालस्यापि तत्र विक्रमो नास्ति। कालस्तु वर्त्तते सत्त्ववत्। अन्यथा कदाचिदेव कथमभिव्य[7]ज्येत। आनन्दांशतिरोभावः सत्त्वमात्रेण तत्र हीति निरूपणाच्चिद्रूपं तदित्युक्तं भवति। गणितश्चाऽऽनन्दस्तत्रोपपद्यते। अतो मोहिका माया तत्र सम्भविष्यतीत्यत आह—**न यत्र मायेति**। माया ह्यानन्दार्थं परिगृह्यते। अक्षरस्य च सामर्थ्यं न भगवता गृहीतम्। **"एतस्याऽक्षरस्य प्रशासने गार्गि"**त्यादिश्रुतेः। **"ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्द"** इति च। तस्मादस्य सालोक्य एव ब्रह्मभावः। अतस्तस्य तत्रत्यानां च मायाकार्याभावान्न तत्र व्यामोहिका माया। तत्र मायैव नास्ति तत्र किमुतापरे बद्धा जीवाः। ननु भगवत्सेवकानां पराधीनत्वादिभिर्बन्धसम्भवात्कथं ते निषिध्यन्त इत्यत आह—**हरेरनुव्रता यत्रेति**। हरेरनु[8] पश्चाद्व्रतं येषाम्। यथा हस्तिथा ते। अनशनात्मकं शरणागतपालनात्मकं व्रतं येषाम्। यथा भगवानुद्गच्छति सर्वोद्धारार्थम्, तथा तेऽपि लोकेभ्यो भक्त्युपदेशार्थं स्वावेशेन भक्तिजननार्थं चाऽऽविर्भवन्ति। किञ्च। यत्र वैकुण्ठे ते विद्यमानाः सुरासुरार्चिता भवन्ति। सत्त्वरजःपरिणामा ह्येते। तमसस्तत्र सम्भावनैव नास्ति। यदि ते राजसास्तामसा वा भवेयुस्तदा तादृशैरर्चिता न भवेयुः। न ह्युत्कर्षाभावे समानैरर्चनं सम्भवति। असुरा अप्याविर्भूतेन भगवता सह युद्धार्थमागताः कियत्कालं भगवत्सम्बन्धे परमं सुखमनुभूय पश्चात्पराजिता अपि कदापि तादृशसुखस्याऽननुभवात्तत्र नित्यसम्बन्धा[9]न् स्तुवन्ति धन्या एत इति। साक्षादपि पूजनं प्रह्लादादिभिः। सुरैस्त्वावरणत्वेन पूज्यन्त एव ॥ १० ॥ ❀ ❀ तेषां भगवत्तुल्यरूपं निरूपयितुमनुवर्णयति—**श्यामावदाता इति**। भगवतः षोडशगुणाः प्रसिद्धाः। सच्चिदानन्दानां प्रत्येकं पञ्च गुणाः समुदायस्यैक इति। तत्र भगवत्सेवकानां दश गुणाः। अक्षरस्य सच्चिद्रूपत्वात्। तान् दश गुणान्निरूपयति—**श्यामावदाता इति**। लोकत्वेन तदुद्गमान्नाऽत्र श्यामादीनामुपपत्तिर्वक्तव्या। श्यामाश्च तेऽवदाताश्च। इन्द्रनीलमणिवत्। मध्यन्दिनसवितृमण्डलमध्यवत्। यथा वीतार्चिषोऽग्नेर्नीलोपकाशो(?)र्चिस्तद्वद्वा। एवं शुद्धरूपता निरूपिता। सौन्दर्यं निरूपयति—**शतपत्रलोचना इति**। कमलनयनाः। एवं स्वरूपतस्तुल्यत्वमुक्त्वा सामग्र्यापि तुल्यतामाह—**पिशङ्गवस्त्रा इति**। सर्वे पीताम्बराः। सूर्यमण्डलस्याऽपि श्यामावदातत्वात्तस्य यथाऽशीतला रुक् तद्वन्न भवति। न वा चन्द्रस्येवाऽल्पा रुक्। किन्तु सुरुचः। शोभना रु[10]चो येषाम्। न च तद्दर्शने घटादिवद्विषयसंस्का[11]रकं तेजोऽपेक्ष्यते। किञ्च। सुपेशसः अति-

---

१. तद्दृश्यं भवेत् ख. तादृशं ग.। २. यथा यथेति ख. ग.। ३. तदर्थं सावधान इति ख. ग.। ४. तदुद्गम इति ख.। ५. स्वरूपं वेति ख. ग.। ६. आकारस्येति ख.। ७. व्यज्यते इति क. घ.। ८. हरेः पश्चादिति घ.। ९. संबद्धा इति ख. संबद्धानिति ग.। १०. रुक् येषामिति ख.। ११. संस्कारकतेज इति घ.।

कोमलाः । रूपं गन्धश्च शब्दश्च रसश्च स्पर्श एव च । सत्त्वस्यैते पञ्च गुणाः सर्वोत्कृष्टा निरूपिताः । चिदंशस्याऽपरे पञ्च सर्वोत्कृष्टा भुजादयः । सर्वे चतुर्बाहवः । धर्मार्थकाममोक्षास्तेषां हस्तप्राप्ता इति निरूपणार्थं चतुर्भुजत्वम् । उन्मिषन्तो मणिप्रवेका मण्युत्तमाः निष्कादिपदकाद्याभरणेषु येषाम् । यद्यपि गृहादिष्वलङ्कारा भवन्ति तथापि पदकादयश्चेतनानामेव । सुवर्चसः । वर्चश्चेतनकान्तिः । यथा महापुरुषाणां दिव्यस्त्रीणां वा तदेव वर्चःशब्देनोच्यते । सुष्ठु वर्चो येषाम् । सर्वोत्तमदेहकान्तयः । सर्वेषामेकरूपत्वं प्राप्तं विशेषेण निवारयति—प्रवालवैडूर्यमृणालवर्चस इति । यथा प्रवालेभ्योऽन्तःस्निग्धा गौरकान्तिर्निर्गच्छति तथा तेभ्योऽपि श्यामावदातेभ्यो गौररूपा कान्तिर्निर्गच्छति । ते बहुभिर्विषयैर्भगवद्भक्तिकर्त्तारस्तथात्वं बोधयितुं तत्र तादृशकान्तिमन्तो भवन्ति । एवं वैडूर्यस्य स्निग्धार्धपीतश्यामच्छविकान्तिः । व्रततीर्थादिभिः सेवया च ये पूर्वं भक्ताः ये ज्ञानेन भक्तास्ते मृणालवर्चसः । एवमेकरूपत्वेऽपि पूर्वकृतभक्तिप्रकारभेदादनेकरूपास्त इति निरूपितम् । परमोत्साहयुक्तास्त इति तेषामन्तःकरणधर्मनिरूपणार्थं विशेषणान्तरमाह । परितः[1] स्फुरतां कुण्डलानां मौलीनां च या मालास्ता विद्यन्ते येषु । कुण्डलपरिभ्रामणेन मुकुटपरिभ्रामणेन च सोत्साहभगवत्परिचर्याकर्त्तार इति भजनानन्दस्तेषु निरूपितः ॥ ११ ॥ ❀ ❀ एवं तत्रत्यानां भगवत्सेवकानां निर्दोषत्वमुक्त्वा लोकत्वाय वैकुण्ठस्य गुणानाह—भ्राजिष्णुभिरिति द्वाभ्याम् । सेवकानां भगवतश्च [2]क्रमेण विषयानन्दो निरूप्यते । तत्रापि भगवान् प्रथमं सेवकानेव सानन्दान् करोतीति तेषामेव विषयानन्दनिरूपणम् । विषयेषु तावदबला इति तदाधारेषु विमानमिति स्वस्य च परिज्ञा[3]नमितीश्वरकृतभयाभाव इति चतुर्भिर्गुणैर्विषयोत्कर्षः । अन्नादीनां तु दोषाभावे प्रवेशः । रसादीनां त्वेतदङ्गत्वम् । तदाह । भ्राजिष्णुभिः कान्तिमद्भिर्विमानावलिभिर्विमानपङ्क्तिभिर्यो लोकः परितो विराजते । वैकुण्ठशोभाधायकानि विमानानि भगवतैव निरूपितानीति न तत्र कापि शङ्का । लसन्तीति सर्वोत्कृष्टानि । महात्मनामिति सर्वज्ञानाम् । परिच्छेदं परित्यज्य पूर्णत्वं वा प्रापितानाम् । किञ्च । प्रमदोत्तमास्तेषां भोगहेतवः । अन्यथा भोगरागो न भवेत् । किन्तु विषयकृतरागेणैव रागवत्त्वमिति भगवदिच्छयैव तथात्वमिति निरूपितम् । तासां कान्तिभिरयं लोको विद्योतमानः । लोकापेक्षयाऽपि तासामतिकान्तित्वं निरूपितं भोगार्थमेव । तासामपि कान्तिः पुरुषसहितानामेव न केवलानामिति दृष्टान्तेनाऽऽह—यथा विद्युत्सहिताभिरभ्रावलिभिर्मेघपङ्क्तिभिर्नभ आकाशं सर्वतो व्याप्तं तद्वदित्यर्थः ॥ १२ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तस्मा इत्यत्र अत आहेति । अतो हेतोः तादर्थ्यचतुर्थीमाह । स्वपदेनैव कृत्रिमवैकुण्ठात् परत्वं सिद्ध्यतीत्यरुच्या पक्षान्तरमाहुः ब्रह्मरूपं वेति, अहिकुण्डलवत्स्वाभिन्नमित्यर्थः । 'पूर्ववद्' तिन्यायेन राजाधिकारानुरूपसामर्थ्यस्यात्र वक्तव्यत्वादिदमपि नात्र युक्तमित्यतः पक्षान्तरमाहुः प्रभुत्वेनेत्यादि । नन्वेवं सति 'न यत्परमि' त्यग्रिमविरोध इत्यत आहुः अक्षरस्येत्यादि । साम्यदशायां गुणासाधारणधर्माणामभिव्यक्त्यभावाद्व्यपाय इव भवतीति तत्तौल्यवारणमाहुः व्यवहारेणेत्यादि । स्वदृष्टवत्पदेन ब्रह्मविलाभे विबुधपदानर्थक्यमाशङ्क्य तत्तात्पर्यमाहुः तद्द्वारेत्यादि । अन्यव्यवहार इति, तदनुयायिनां व्यवहारः, तद्व्यवहारे गुणसम्बन्धान्नैर्गुण्यं हीयेतेति तद्वारणायैवमुक्तमित्यर्थः ॥ ९ ॥ ❀ ❀ प्रवर्त्तत इत्यत्र अनेनेत्यादि । एतेन 'क्षयन्तमस्य रजसः पराक' इत्यादिश्रुतावुपलक्षणविधया तमसोपि निवारणात्तदुपबृंहितमिति ज्ञेयम् । प्रतिकृतिसम्बन्ध इति भरितपात्रसञ्चायकसम्बन्धः । तथापीति सम्बन्धेपि । तस्मादिति कादाचित्कस्य सम्बन्धस्य पश्चादपायात् । नन्वेवं संसर्गमात्रेपि सांसर्गिकदोषस्त्वायात्येवेत्यत आहुः सम्बन्धश्चेत्यादि । निरूपितमिति । तृतीयैकादशस्कन्धादिवाक्यान्यनुसन्धाय 'प्रकृतिः पुरुषश्चोभौ परमात्माभवत् पुरा, यद्रूपं समधिष्ठाय तदक्षरमुदीर्यत' इत्यादिना निरूपितम् । एतेन सुबोधिनीतः पूर्वं निबन्धमूलं कृतमिति ज्ञायते । निबन्धटीका तु सुबोधिन्यादिसर्वग्रन्थकरणोत्तरं 'त्रयं वच्मि यथामति' इत्यस्य व्याख्याने मीमांसाद्वयभाष्यं भागवतटीका च परिगृहीतेति चकारव्याख्यानाज्ज्ञायते । ननु शुद्धसत्त्ववच्छुद्धे रजस्तमसी अपि तत्र तिष्ठतां को दोषः ? इत्यतस्तदभावगमकमाहुः किञ्चेत्यादि । विक्रम इति क्षोभरूपकार्यव्यापारः । 'न यत्र माये' त्यर्द्धस्यावतरणिकां वक्तुं पूर्वार्द्धस्य निष्कृष्टार्थमाहुः आनन्द इत्यादि । उपपद्यत इतिसत्त्वसम्बन्धादेवोपपद्यते । एतेनेदं स्फुटति, 'तथा हि, यत्र भगवान् स्वस्य यथाकथञ्चित् स्वरूपमात्रं प्रदर्शयति तत्राकारादिसमर्पणार्थं कालादीनामाधारतावश्यकी, अत एव 'कृते शुक्लश्चतुर्बाहु' रित्यादिवाक्यैर्गुणावतारवाक्यैश्च नानावर्णाकारत्वमौपाधिकमिति निश्चीयते । यत्र पुनः कृपया ऋतं स्वस्वरूपं प्रदर्शयति, स्वस्मिन् सत्त्वं न सम्बन्धयति, किन्तु लोके आकारसमर्पणाय [5]लौकिके सम्बन्धयति तेन तस्य गणितानन्दत्वं भवति । स्वयं तु सत्त्वाधारे लोके यदाध्यात्मिकमासनरूपमक्षरं तदाधारौ यावाधिदैविकाक्षररूपौ चरणौ, तदाधारो गुणसंसर्गलेशस्यापि राहित्यान्निरवध्यानन्दरूपः स्वाभाविकसुन्दराकारः कालसम्बन्धाभावात् सदाविर्भूतो निरुपहितधर्मा भवति । एवं सति यथात्र तथैव

---

१. परिस्फुरतामिति ग. । २. क्रमेण नास्ति ग. । ३. ज्ञातमिति ग । ४. इतः शुद्धैकेन प्रतिफकेन संवादितः प्रकाशोयम् ।
५. ''लोके'' पाठभेदः ।

'रमाक्रीडमभून्नृपे' त्यत्र बृहद्वामनीयकथास्थले चावगन्तव्यम् । तेन च गीतास्थश्रुत्यादिस्थकेवलानन्दाकारत्वबोधकवाक्यतात्पर्यप्रकाशकः, अथवा 'शून्यवद्गाढ' मिति तत्त्वदीपग्रन्थस्तदर्थप्रकाशिका जन्मप्रकरणीयतृतीयाध्यायटिप्पणी चैतदनुसन्धायैव विचारणीयम्, न त्वन्यथेति । अत इति चिद्रूपत्वात्तद्गुणसम्बन्धाच्च । अस्येति भगवतः । एत इति सुरासुराः ॥ १० ॥ ❀ ❀ श्यामावदाता इत्यत्र । इन्द्रनीलादिदृष्टान्तैरुपलक्षणविधया श्यामत्वे नानाप्रकारत्वं बोधितं शब्दश्च रसश्चेति, पीताम्बरस्य वेदरूपत्वात् 'पिशङ्गवस्त्र' इत्यनेन शब्दः, सूर्यमण्डलदृष्टान्तेन रूपस्योक्तत्वात्, सूर्यस्य च श्रुतौ मधुत्वेन निरूपणात्, 'सुरुच' इत्यनेन रस इत्यनवद्यम् । सत्त्वस्येति सदंशस्य । आभरणानां बाह्यत्वेन सद्गुणत्वमाशङ्क्य निराकुर्वन्ति यद्यपीत्यादि । तथा च, सद्गुणत्वेन प्रतीयमानत्वेपि नियतचेतनैकसम्बन्धित्वाच्चिद्गुणा इत्यर्थः ॥ ११ ॥ ❀ ❀ भ्राजिष्णुभिरित्यत्र । ननु विषयकोटौ प्रथममन्नपानादिकं रसादिकञ्चावश्यवक्तव्यमिति तत्कुतो नोक्तमत आहुः अन्नादीनामित्यादि । तथा चान्नाद्यभावस्य दोषरूपत्वात्तदभावस्य च प्रागेवोक्तत्वात्तेनैवान्नादिसद्भावप्राप्तिरित्यतो नोक्तमित्याद्याशयेन विमानानां शोभामाहेत्यर्थः । कापि शङ्केति दोषलेशस्य शङ्का । विषयानन्दनिरूपणप्रयोजनमाहुः अन्यथेत्यादि । भोगराग इति भोगकृतरागः । अत्रायमर्थः प्रतिभाति, आनन्दमीमांसायां 'युवा स्यादि' त्यादिना विषयभोगपूर्वकं मानुषानन्दं प्रथमतो निरूप्य शताधिक्येनाग्रिमा आनन्दा निरूपिताः, तथा सति प्राजापत्यान्तेष्विव ब्रह्मानन्देपि सोवश्यं वक्तव्यः, अन्यथा प्रायपाठो विरुद्ध्येत, 'भोगमात्रसाम्यलिङ्गाच्च ( ४-४-२१ ) इत्यनेन सूत्रकृताप्येतदङ्गीकृतं तदपि विरुद्ध्येत । तस्य भोगस्यात्राभावे अक्षरानन्दस्य तदंशन्यूनतायां तत आधिक्यं तदंशे बाधितञ्च भवेदतस्तन्निरूपणम् । तथा च, मात्रकृत एव रागो न तु विषयकृत इतीश्वरकृतभयाभावार्थं भगवदिच्छया स इति बोधयितुं विषयानन्दो निरूपित इत्यर्थः ॥ १२ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

एवं सभाजितस्तपसा आराधितो भगवांस्तस्मै ब्रह्मणे स्वलोकं ततोऽन्यत्र गमनाभावाद्यापि वैकुण्ठाख्यं सम्यक् प्रकारेण दर्शयामासेत्यन्वयः । तं लोकमेव वर्णयति—सुष्ठु अदृष्टं पुण्यं तद्वद्भिर्विबुधैर्देवैरभिष्टुतम्, यद्वा स्वदृष्टवद्भिः स्वानुभववद्भिर्विशेषेण बुधा ज्ञानिनो विबुधास्तैरभितः स्तुतम् । तत्र हेतुमाह—परमुत्कृष्टमिति । यस्मात्कस्मादुत्कृष्टत्वेऽपि ततोऽपि कश्चिदन्य उत्कृष्टः स्यादित्याशङ्क्याह—न यत्परमिति । यस्मात्पर उत्कृष्टो लोको नास्ति तथाभूतमित्यर्थः । परत्वे हेतुमाह—व्यपेतेति । संक्लेशाः अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः इति पातञ्जलसूत्रादविद्यादयः, मोहो भ्रमः, साध्वसं साधुरस्यते सन्मार्गाद्विचाल्यन्तेऽनेनेति साध्वसं भयम्, व्यपेताः निरस्ताः संक्लेशादयो यस्मात्तम् ॥ ९ ॥ ❀ ❀ क्लेशाद्यभावे हेतुमाह—प्रवर्त्तते इति । यत्र वैकुण्ठलोके रजस्तमसी तयोस्ताभ्यां मिश्रं सत्त्वं च न प्रवर्त्तते । अतस्तत्कार्यभूताः क्लेशादयः कथं स्युरिति भावः । कालस्य विक्रमो विनाशकत्वं च न प्रवर्त्तते । रजआद्यभावे तत्कारणाभावं हेतुमाह—नेति । यत्र कारणभूता माया प्रकृत्यपरनाम्नी न प्रवर्त्तते तत्रापरे तत्कार्यभूता रजआदयस्तत्कार्यभूताः क्लेशादयश्च न प्रवर्त्तन्ते इति किमुत वक्तव्यमित्यर्थः । अतएव यत्र सुरासुरैरर्चिताः सत्कृता हरेरनुव्रताः भगवतः पार्षदा भक्ताश्च सुखेन विहरन्तीति शेषः । सुरवदसुरेष्वपि प्रह्लादबलिप्रभृतीनां भगवद्भक्तानां सत्त्वात्तैः सत्कृतत्वम् । यद्वा युद्धे महाप्रभावदर्शनादसुरैरपि सत्कृतत्वं तेषां ज्ञेयम् ॥ १० ॥ ❀ ❀ रजआदयो न प्रवर्त्तन्त इत्यनेन तत्रत्यं सर्वशुद्धसत्त्वमयमित्यर्थादागतं तर्हि तत्रत्याः पुरुषाः कीदृशरूपा इत्याकाङ्क्षायामाह—श्यामाश्च ते अवदाताः स्वच्छाश्च श्यामावदाताः । शतपत्रलोचनाः पद्मदलायतेक्षणाः । पिशङ्गवस्त्राः पीताम्बरधराः । सुरुचः अतिकमनीयाः । सुपेशसः अतिसुकुमाराः । सर्वे चतुर्बाहवः चतुर्भुजाः । उन्मिषन्त इव प्रभावन्तो मणिप्रवेका मण्युत्तमा येषु तानि निष्काणि पदकानि अन्यानि चाभरणानि येषां ते । सुवर्चसः अतितेजस्विनः । न सर्वे श्यामा एव किन्तु प्रवालादिवद्वर्चो वर्णो येषां ते तथाभूता अपि सन्ति । मृणालं कमलकन्दः । परिस्फुरन्ति कुण्डलानि मौलयो मुकुटानि मालाश्च सन्ति येषां ते ॥ ११ ॥ ❀ ❀ एवं पार्षदाननुवर्ण्य पुनरपि लोकमनुवर्णयति—भ्राजिष्णुभिरिति । देदीप्यमानैः महात्मनां महति भगवति आत्मा चित्तं येषां तेषां भगवद्भक्तानां लसन्ति प्रकाशमानानि यानि विमानानि तेषामावलिभिः पङ्क्तिभिर्यो लोकः परितः सर्वतो विराजते शोभते, यश्च प्रमदोत्तमानां द्युभिः कान्तिभिर्विद्योतमानः प्रकाशमानस्तं सन्दर्शयामासेति पूर्वेणान्वयः । तत्र ददर्शेत्युत्तरेण वाऽन्वयः । तत्र दृष्टान्तमाह—सविद्युदिति । विद्युद्भिः सह वर्त्तमानाः सविद्युताः अभ्राणां मेघानामावलयः पङ्क्तयस्ताभिर्नभो यथा विराजते तद्वदित्यर्थः । तत्र विद्युत इव स्त्रियः, अभ्रपङ्क्तय इव विमानानि, नभ इव लोक इति ज्ञेयम् ॥ १२ ॥

### हिन्दी अनुवाद

उनकी तपस्यासे प्रसन्न होकर भगवान्‌ने उन्हें अपना वह लोक दिखाया, जो सबसे श्रेष्ठ है और जिससे परे कोई दूसरा लोक नहीं है । उस लोकमें किसी भी प्रकारके क्लेश, मोह और भय नहीं हैं । जिन्हें कभी एक बार भी दर्शनका सौभाग्य प्राप्त हुआ है, वे देवता बार-बार उसकी स्तुति करते रहते हैं ॥ ९ ॥ ❀ ❀ वहाँ रजोगुण, तमोगुण और इनसे मिला हुआ सत्त्वगुण भी नहीं है । वहाँ न कालकी दाल गलती है और न माया ही कदम रख सकती है; फिर मायाके बाल-बच्चे तो

जा ही कैसे सकते हैं ? वहाँ भगवान्‌के वे पार्षद निवास करते हैं, जिनका पूजन देवता और दैत्य दोनों ही करते हैं ॥ १० ॥ ❀ ❀ उनका उज्ज्वल आभासे युक्त श्याम शरीर शतदल कमलके समान कोमल नेत्र और पीले रंगके वस्त्रसे शोभायमान है। अङ्ग-अङ्गसे राशि-राशि सौन्दर्य बिखरता रहता है। वे कोमलताकी मूर्ति हैं। सभीके चार-चार भुजाएँ हैं। वे स्वयं तो अत्यन्त तेजस्वी हैं ही, मणिजड़ित सुवर्णके प्रभामय आभूषण भी धारण किये रहते हैं। उनकी छवि मूँगे, वैदूर्यमणि और कमलके उज्ज्वल तन्तुके समान है। उनके कानोंमें कुण्डल, मस्तकपर मुकुट और कण्ठमें मालाएँ शोभायमान हैं ॥ ११ ॥ ❀ ❀ जिस प्रकार आकाश बिजली-सहित बादलोंसे शोभायमान होता है, वैसे ही वह लोक मनोहर कामिनियोंकी कान्तिसे युक्त महात्माओंके दिव्य तेजोमय विमानोंसे स्थान-स्थानपर सुशोभित होता रहता है ॥ १२ ॥

श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः ।
प्रेङ्खं श्रिताया कुसुमाकरानुगैर्विगीयमाना प्रियकर्म गायती ॥ १३ ॥
ददर्श तत्राखिलसात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिम् ।
सुनन्दनन्दप्रबलार्हणादिभिः स्वपार्षदमुख्यैः परिसेवितं विभुम् ॥ १४ ॥
भृत्यप्रसादाभिमुखं दृगासवं प्रसन्नहासारुणलोचनाननम् ।
किरीटिनं कुण्डलिनं चतुर्भुजं पीताम्बरं वक्षसि लक्षितं श्रिया ॥ १५ ॥
अध्यर्हणीयासनमास्थितं परं वृतं चतुःषोडशपञ्चशक्तिभिः ।
युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन् रममाणमीश्वरम् ॥ १६ ॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

श्रीः संपत् । रूपिणी मूर्तिमती । मानं पूजाम् । विभूतिभिर्नानाविभवैः प्रेंखमांदोलं संश्रिता कुसुमाकरो वसंतस्तस्यानुगा भ्रमरास्तैर्विविधं गीयमाना स्वयं तु प्रियस्य हरेः कर्म गायंतीव भवति ॥ १३ ॥ ❀ ❀ य एवंभूतो लोकस्तत्र तस्मिन् ॥ १४ ॥ ❀ ❀ भृत्यानां प्रसादेऽभिमुखं दृगेव आसव इव द्रष्टॄणां हर्षकरी यस्य तं प्रसन्नहासमरुणलोचनं चाननं यस्य वक्षसि स्थितया च श्रिया लक्षितम् अलंकृतमित्यर्थः ॥ १५ ॥ ❀ ❀ अध्यर्हणीयं वरिष्ठं सिंहासनम् । चतस्रः प्रकृतिपुरुषमहदहंकाररूपाः षोडश एकादशेंद्रियपंचमहाभूताख्याः पंचतन्मात्ररूपा या शक्तयस्ताभिर्वृतम् । स्वैर्भगैः स्वाभाविकैरैश्वर्यादिभिः इतरत्र योगिष्वध्रुवैरागंतुकैः साधारणैरित्यर्थः । एवं सत्यपि स्व एव धामन्स्वस्वरूप एव रममाणम् अत एवेश्वरम् ॥ १६ ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

"प्रेंखमांदोलनम्" इति कोशात् । ब्रह्मादय एव भ्रमरीभूता ज्ञेयाः ॥ १३ ॥ ❀ ❀ तत्र वैकुंठे ॥ १४ ॥ ❀ ❀ इत्यर्थ इति । "लक्ष दर्शनांकनयोः" इति लक्षितमंकितमिति भावः ॥ १५ ॥ ❀ ❀ इत्यर्थ इति । आगंतुकत्वात्साधारणैरिति भावः । यद्वा द्रष्टा ज्ञानक्रियाबलाख्याभिः प्रह्वीसत्येशानानुग्रहाख्याभिर्वात्मांतरात्मपरमात्मज्ञानात्माख्याभिर्वा चतुःशक्तिभिर्वृतं मोचिका सूक्ष्माऽसूक्ष्मामृताज्ञानामृताव्यापिनीव्योमरूपिण्यनंताऽणिमा-महिमा-गरिमा-लघिमा-प्राप्ति-प्राकाश्येशित्वप्राकाम्याख्याभिः षोडशशक्तिभिः पञ्चभिर्विमलोत्कर्षिणीज्ञानाक्रियायोगाख्याभिश्च वृतम् । यद्वा चतस्रः शक्तयः पाद्मोत्तरखंडे योगपीठवर्णनोक्ता धर्माद्याः यथा "धर्मज्ञानबलैश्वर्यवैराग्यैः पादविग्रहैः । ऋग्यजुःसामाथर्वाणरूपैर्नित्यं वृतं क्रमात्" इति षोडशशक्तयश्चंडाद्याः यथा तत्रैव "चंडादिद्वारपालैश्च कुमदाद्यैश्च रक्षिता" नगरीति पूर्वेणान्वयः । ते च "चंडप्रचंडौ प्राग्द्वारे याम्ये भद्रसुभद्रकौ । वारुण्यां जयविजयौ सौम्ये धातृविधातरौ ॥ कुमुदः कुमुदाक्षश्च पुंडरीकोऽथ वामनः । शंकुकर्णः सर्पनेत्रः सुमुखः सुप्रतिष्ठितः ॥ एते दिक्पतयः प्रोक्ताः पुर्यामत्र सुशोभने" ॥ इति कुमुदादयश्च द्वौ द्वावाग्नेय्यादिदिक्पतय इत्यर्थः । पञ्चशक्तयस्तु "कूर्मश्च नागराजश्च वैनतेयस्त्रयीश्वरः । छंदांसि सर्वमंत्राश्च पीठरूपत्वमाश्रिताः" इति । त्रयीश्वर इति वैनतेयविशेषणमिति संदर्भचक्रवर्त्तिकारो एवं सत्यपि ऐश्वर्यादियुक्तत्वेपि अत एव स्वरूपविस्मरणाभावादेव ॥ १६ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

अगन्तुकैरिति अनित्यैरैश्वर्यैरित्यर्थः । साधनवत्वेन प्राप्तैरिति वा । असाधारणैरिति । असाधारणैः स्वैर्भगैरित्यन्वयः ॥ १६—३० ॥

---

३. प्रा० पा०—प्रमुखा० । ४. प्रा० पा०—'स्व' शब्दो नास्ति । ५. प्रा० पा०—पीतांशुकं ।

### श्रीमद्वीरराघवव्याख्या

श्रीर्महालक्ष्मीर्यत्र लोके रूपिणी प्रशस्तमूर्तिमती उरुगायस्य भगवतः पादयोः मानं पूजां विभूतिभिः भूलीलादिभिः सह करोति कथंभूता करोति या श्रीः प्रेंखं दोलांश्रिता कुसमाकरानुगैः शुककोकिलभृंगादिभिः विविधं गीयमाना स्वयं तु प्रियस्य भगवतः कर्म गायती भवति सा श्रीर्मानं करोतीत्यर्थः ॥ १३ ॥ ❀ ❀ एवंभूतो लोकस्तत्र श्रियः पतिं ददर्शेत्यन्वयः । कथंभूतं यज्ञपतिं तपआदियज्ञानां प्रवर्त्तकमाराध्यं फलप्रदं वा जगत्पतिं चिदचिदात्मकजगतः शेषिणं अखिलानां सात्वतां सत्वधर्मनिष्ठानां पतिं स्वलोकप्रापणेन रक्षकं सात्वतं पंचरात्रं सुनंदादिभिः स्वपार्षदश्रेष्ठैः परितः सेवितं विभुं सर्वांतरम् ॥ १४ ॥ ❀ ❀ भृत्येषु यः प्रसादो अनुग्रहस्तस्मिन्नभिमुखं दृगासवं दृशि चक्षुष्यासवोऽमृतं यस्य तं यद्वा दृगासवमिव यस्यामृतकल्पकटाक्षम् इत्यर्थः । प्रसन्नहासारुणलोचनमाननं च यस्य तं वक्षसि स्थितया श्रिया लक्षितं अलंकृतमित्यर्थः ॥ १५ ॥ ❀ ❀ अभ्यर्हणीयमाराधनीयं परमुत्कृष्टमासनं अधिष्ठितं चतुःषोडशपंचशक्तिभिः पंचविंशतितत्वाधिष्ठातृशक्तिभिः अस्त्रभूषणाध्यायोक्तप्रकारस्मारितैः भगैरैश्वर्यवीर्ययशःश्रीज्ञानवैराग्याधिष्ठातृदेवताविशेषैः स्वैः स्वाभाविकैः शेषभूतैरित्यर्थः । इतरत्र संसारिषु कर्मतारतम्याऽनुगुणमध्रुवैः संसारिष्वैश्वर्याद्यधिष्ठातृणामधिष्ठेयद्वाराऽध्रुवत्वं बोध्यं एवं भूतैर्भगैर्युक्तं धामन् धामनि स्वे स्वकीये क्षेत्रज्ञे रममाणमत एवेश्वरं नियंतारं ददर्शेत्यर्थः ॥ १६ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

तत्र दृष्टांतमाह सविद्युदिति ॥ १३ ॥ ❀ ❀ प्रेंखं स्थिता या रत्नदोलमास्थिता या विभूतयस्ताभिर्विभूतिभिः सह । कुसुमाकरो वसन्तस्तस्यानुगा भृंगकोकिलादयस्तदाकारयिता ब्रह्मादयस्तैर्विगीयमाना प्रियस्य भर्तुः कर्माणि गायंतीति प्रयोजकपुरुषदर्शनं विना लोकमात्रदर्शनेन किमस्य प्रयोजनमत्राह ददर्शेति । तत्रैवंविधे श्वेतद्वीपाभिधे लोके मुक्तसभामध्ये मुक्तैः सेव्यमानमात्मनो बंधकशक्तिप्रवर्तनं विरम्य मुक्तप्रवर्तकत्वेन शयानं लक्ष्मीकांतं ददर्शेत्यन्वयः । अनेन मुक्त्वात्ममायामित्यस्य परिहारोप्युक्तो भवति मुक्तैश्च पार्षदैः पूर्वैर्ब्रह्माद्यैश्चैव संयुतं ब्रह्मा ददर्श तपसा भगवंतं हरिं प्रभुमित्यनेन ब्रह्मा सगुणं ब्रह्म ददर्शेत्येतन्निरस्तं सतः शोभनस्य भावः सत्त्वं तेन युक्ताः सात्त्वतास्तेषां सात्त्वतां पतिं तदुक्तं सत्त्वं तु शोभनत्वं स्यात्तद्युक्ताः सात्त्वता मता इति ॥ १४ ॥ ❀ ❀ विभुं सर्वगतमिति अनेन परिच्छिन्नरूपमत्रोच्यत इति निरस्तं विभुः सर्वगते पत्यौ चंद्रे रविकुबेरयोरिति दृगासवैः नेत्राभ्यां यानि दर्शनानि तान्येवामृतानि तैः दृक्स्त्री स्याद्दर्शने बुद्धौ नेत्रे द्रष्टरि च त्रिष्वति प्रसिद्धेन हासेनारुणाभ्यां सहितमाननं यस्य स तथा तम् ॥ १५ ॥ ❀ ❀ किरीटिनं कुंडलिनमित्यस्य इनप्रत्ययस्य मतुबादित्वादयमिन्नित्ययोगार्थः । भूमनिंदाप्रशंसासु नित्ययोगेतिशायने संसर्गेस्ति विवक्षायां भवंति मतुबादय इति वचनात् । वक्षसि स्थितया लक्षितमित्येतल्लक्षणं हरेरेवेत्यभिप्रायेणोक्तं नारायणत्वनिर्णयाय लक्षणांतरमाह वृतमिति । चतुःषोडशपंचशक्तिभिर्वृतं इच्छाज्ञानक्रियाबलाख्याभिः प्रह्वी सत्येशानानुग्रहाख्याभिः आत्मांतरात्मा परमात्मा ज्ञानात्माख्याभिरिति चतुःशक्तिभिर्वृतं मोचिका सूक्ष्मा सूक्ष्मामृता ज्ञानामृताप्यायिनी व्यापिनी व्योमरूपिण्यनंताणिमामहिमालघिमाप्राप्तिप्रकाशेशित्वप्रकाम्याख्याभिः षोडशशक्तिभिश्च वृतं वासुदेवादिदामोदरांताभिः षोडशशक्तिभिश्च तथा पंचांगाभिधाभिर्विमलोत्कर्षिणीज्ञानक्रियायोगवशित्वाख्याभिः पंचशक्तिभिश्च परिवृतं मोचिका चैव सूक्ष्मा च तथा सूक्ष्मा परावृता ज्ञानामृताप्यायिनी च व्यापिनी व्योमरूपिणी अनंता चैव संप्रोक्ता मोचिकाद्याश्च शक्तय इति वायुप्रोक्ते इच्छाद्या मोचिकाद्याश्च अणिमाद्याश्च शक्तय इत्यादेः ॥ १६ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

श्रीर्यत्रेति । श्रीः स्वरूपशक्तिः रूपिणी तत् प्रेयसीरूपा । मानं पूजाम् । विभूतिभिः स्वसखीरूपाभिः प्रेङ्खम् आन्दोलनं श्रिता विलासेन । कुसुमाकरो वसन्तः तदनुगाः भ्रमरास्तैर्विविधं गीयमाना । स्वयं प्रियस्य हरेः कर्म्म गायन्ती भवति ॥ १३ ॥ ददर्शेति त्रिकम् । तत्र लोके इति प्राक्तनानां यच्छब्दानां विशेष्यम् ॥ १४ ॥ ❀ ❀ भृत्यप्रसादेति । दृगेवासव इव द्रष्टॄणां मदकरी यस्य तम् । श्रिया वक्षोवामभागे स्वर्णरेखाकारया ॥ १५ ॥ ❀ ❀ अभ्यर्हणीयेति । चतस्रः शक्तयो धर्म्माद्याः, पाद्मोत्तरखण्डे योगपीठे त एव कथिता, न बहिरंगा अधर्म्माद्या इति । तथाहि—धर्म्मज्ञानतथैश्वर्य्यवैराग्यैः पादविग्रहैः । ऋग्यजुःसामाथर्व्वणरूपैर्नित्यं वृतं क्रमात् ॥ इति । समस्तान्तस्तथाशब्दप्रयोगस्त्वार्षः । षोडश शक्तयश्चण्डाद्याः तथा च तत्रैव चण्डादिद्वारपालैस्तु कुमाद्यैः सुरक्षिता इति । नगरीति पूर्व्वेणान्वयः । ते च चण्डप्रचण्डौ प्राग्द्वारे याम्ये भद्रसुभद्रकौ । वारुण्यां जयविजयौ सौम्ये धातृविधातरौ । कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः । शंकुकर्णः सर्व्वनेत्रः सुमुखः सुप्रतिष्ठितः । एते दिक्पतयः प्रोक्ताः पुर्यामत्र शुभानने । इति कुमुदादयस्तु द्वौ द्वौ आग्नेयादिदिक्पतय इति शेषः । पञ्च शक्तयः कूर्म्माद्याः तथा च तत्रैव कूर्म्मश्च नागराजश्च वैनतेयस्त्रयीश्वरः । छन्दांसि सर्वमन्त्राश्च पीठरूपत्वमास्थिताः ॥ इति त्रयीश्वर इति वैनतेयविशेषणं तस्य छन्दोमयत्वात् । स्वैः स्वरूपभूतैरैश्वर्य्यादिभिर्युक्तम् इतरत्र योगिषु अध्रुवैः आगन्तुकैः नश्वरैः तत् प्रमादादेव कदाचित् तदाभासरूपतयैव प्राप्तैरित्यर्थः । स्वस्वरूप एव धामनि श्रीवैकुण्ठे रममाणम् अतएवेश्वरं कथमपि पराधीनसिद्धित्वाभावात् ॥ १६ ॥

## श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

तत्र तत् प्रेयसीमनुवर्णयति । श्रीरन्तरङ्गा भगवतः स्वरूपशक्तिः रूपिणी सौन्दर्यवती । मानं पूजाम् । विभूतिभिः स्वसखीरूपाभिः प्रेङ्खम् आन्दोलनं विलासेन श्रिता । कुसुमाकरो वसन्तस्तदनुगा भ्रमरास्तैर्विविधं गीयमाना । स्वयन्तु प्रियस्य हरेः कर्म्म गायन्ती भवति ॥ १३ ॥ ❀ ❀ तत्प्रेयसीमनुवर्ण्य तं प्रभुं भगवन्तमनुवर्णयति ददर्शेति ॥ १४ ॥ ❀ ❀ दृगेव आसव इव द्रष्टॄणां हर्षकरी यस्य तम् । पीताम्बरत्वेन श्यामवर्णत्वं लभ्यते । श्रिया । वक्षोवामभागे स्वर्णरेखाकारया ॥ १५ ॥ ❀ ❀ चतस्रः शक्तयो धर्म्माद्याः । पाद्मे वैकुण्ठीययोगपीठवर्णने त एवोक्ताः । यथा धर्म्मज्ञानबलैश्वर्यवैराग्यैः पादविग्रहैः ऋग्यजुःसामाथर्व्वाणरूपैर्नित्यं वृतं क्रमात् ॥ इति षोडश शक्तयश्चण्डाद्याः । यथा तत्रैव चण्डादिद्वारपालैश्च कुमुदाद्यैश्च, रक्षिता । नगरीति पूर्व्वेणान्वयः । ते च चण्डप्रचण्डौ प्राग्द्वारे याम्ये भद्रसुभद्रकौ । वारुण्यां जयविजयौ सौम्ये धातृविधातरौ ॥ कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः । शंकुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः । एते दिक्पतयः प्रोक्ताः पुर्यामत्र सुशोभने ॥ इति । पञ्च शक्तयः कूर्म्माद्याः यथा तत्रैव कूर्म्मश्च नागराजश्च वैनतेयस्त्रयीश्वरः । छन्दांसि सर्व्वमन्त्राश्च पीठरूपत्वमाश्रिताः ॥ इति । त्रयीश्वर इति वैनतेयविशेषणम् । चतस्रः प्रकृतिपुरुषमहदहंकाररूपाः, षोडश एकादशेन्द्रियमहाभूताख्याः पञ्चतन्मात्ररूपाः शक्तयो यास्ताभिर्वृतमिति स्वामिचरणानां व्याख्या च नासङ्गता मायापि तत्र महदादिभिः सह भक्तिं कुर्व्वाणा तिष्ठत्येव त्रिपाद्विभूतेः स्वरूपशक्तिमय्यास्तस्याः सर्व्वशक्त्याश्रयत्वात् । न यत्र माया किमुतापरे हरेरित्यत्र मायामहदादिविक्रमो जीवमोहनरूपस्तत्र नास्तीति कालविक्रमपदसाहचर्य्याद्व्याख्येयम् । अत एव वक्ष्यते मंजुमहिमदर्शने चतुर्विंशतिभिस्तत्त्वैः परीता महदादिभिरिति । स्वैर्भगैः स्वाभाविकैरैश्वर्य्यादिभिः इतरत्र ब्रह्मादिषु अध्रुवैरागन्तुकैर्नैश्वरैः स्वे स्वरूप एव धामनि वैकुण्ठे ॥ १६ ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यत्र लोके श्रीः भगवत्प्रियारूपिणी रूपवती विभूतिभिः विविधा भूतयः ऐश्वर्याणि यासां ताभिः भूलीलादिभिः । भगवत्प्रियाभिः सह उरुगाय पादयोः बहुमानं पूजां करोति या च प्रेंखं आंदोलं संश्रिता कुसुमाकरानुगैः भ्रमरकोकिलादिभिः विविधं गीयमाना प्रियस्य उरुगायस्य कर्म गायती भवतीति तं लोकं दर्शयामासेति पूर्वेणैवान्वयः ॥ १३ ॥ ❀ ❀ तत्रोक्तप्रकारे लोके ईश्वरं ददर्शेत्यन्वयः । सर्वेषां सात्वतां भागवतानां पतिं स्वामिनम् । श्रियः पतिं श्रियो भर्तारम् । यज्ञपतिं यज्ञानां भोक्तारं तेषां प्रवर्त्तनादौ फलं प्रदाने च समर्थम् अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति श्रीमुखवचनाच्च चिदचित्स्वशक्तिमयस्य जगतः पतिं परमांशित्वेन स्वामिनम् । सुनंदादिभिः स्वपार्षदश्रेष्ठैः परितः सर्वतः सेवितं विभुं व्यापकम् ॥ १४ ॥ ❀ ❀ भृत्यप्रसादाभिमुखं स्वानन्यजनविषयकानुग्रहेऽनुकूलम् दृगासवमिव यस्य दृशि आसवोऽमृतं यस्य वा तम् । प्रसन्नहासमरुणलोचनं च आनने यस्य तम् वक्षसि तद्दक्षिणभागे रोमराज्यात्मलक्ष्मभूतया श्रिया लक्षितमलंकृतम् ॥ १५ ॥ ❀ ❀ ओं नमो भगवते वासुदेवाय न अध्यर्हणीयमभ्यर्चनीयमासनं सिंहासनमास्थितमधिष्ठितम् । परं पूर्णम् सकालचतुर्विंशतिप्राकृततत्त्वाधिष्ठातृशक्तिभिर्वृतम् । स्वैः स्वासाधारणैः ध्रुवैर्भगैरैश्वर्यादिभिर्युक्तम् । कथंभूतैः इतरत्र भगवदितरेषु अध्रुवैः स्थिरैः स्वे स्वैकप्रधाने धामन् धाम्नि लोके रममाणम् ॥ १६ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं सेवकानां महाभोगमुपपाद्य तत्र भगवतो महाभोगोपपादनार्थं लक्ष्मीमनुवर्णयति— श्रीर्यत्रेति । [1]यदा भगवान् स्वशक्तिरूपेणाऽऽवि[2]र्भूतस्तदा शक्तीनां मध्ये श्रीः प्रथमा । सा शरीर एव बलवत्पूर्वं स्थिता । यदा भगवान् प्रभुत्वेनाऽऽविर्भूतस्तदा साऽपि भोग्यत्वेनाऽऽविर्भूता भार्येव । तदाह—रूपिणीति । साऽपि[3] सच्चिद्रूपा स्वार्थम् । तस्याः शरीरं तु ब्रह्मानन्द[4]रूपम् । अत एवोरुगायपादयोर्विभूतिभिर्मानं करोतीति । सा ह्यक्षरस्याऽऽनन्दरूपा । अक्षररूपौ च पादौ । अतः सा स्वात्मचरणावेवाऽऽनन्दयुक्तौ करोति । इदमेव हि सन्माननम् । उरुगायेति । उरुभिर्मन्त्रैर्गीयत इति । "तद्विष्णोः परमं पदम्"। "विष्णोर्नु कं वीर्याणि" त्यादि "त्रेधोरुगाय" इत्यादिभिः सर्वश्रुत्यर्थ उरुगायः पुरुषोत्तमः । तस्य तु चरणावक्षरमिति निरू[5]पितम् । बह्वेति पञ्चभिरेव गुणैर्भक्त्या च । एवं तस्या भगवदर्थमानन्दरूपायाः प्रयोजनमुक्त्वा स्वार्थं चिद्रूपायाः प्रयोजनमाह— प्रेङ्खं श्रितेति । या लक्ष्मीः प्रेङ्खं हिन्दोलां श्रिता तत्रोपविश्य सर्वथा चित्तनिवृत्त्यर्थं कुसुमाकरानुगैर्वसन्तसेवकैर्भ्रमरैः स्वयं गीयमानाऽपि । सर्वावयवस्थितपुष्पाद्यामोदार्थं तमागता भ्रमरा बहुकालं निकटस्थित्यर्थं तां वस्तुतो गायन्ति । स्वयं तु भगवत्क[6]र्माणि गायति । अन्यथाऽक्षरे लीना स्यात् । अत एव साक्षात्सम्बन्धाभावाय प्रेङ्खं श्रिता । तस्यालयव्यावृत्त्यर्थं

---

१. यथा इति ख. । २. आविर्भूतः शक्तीनामिति ख. ग. । ३. सा चेति ख. ग. । ४. स्वरूपमिति ख. । ५. निरूपयन्तीति ख. । ६. कर्मादीति ख. ।

सैव गुणान् गायति। तत्रत्यः कुसुमाकरः फलपूर्वावस्थारूपः परमनिवृत्त्यात्मा। तस्याधिष्ठात्र्यो देवता एनामानन्दरूपां स्तुवन्ति। स्वस्याऽपि फलरूपत्वात्। अनेनाऽक्षरकृतं भयं व्यावृत्तम्। यतस्तदीया मन्यन्त इति। यदा मानावसरो नास्ति तदा स्वरक्षार्थं प्रियकर्माणि गायति। एकवचनं तु स्वोद्धाराभिप्रायम्॥ १३॥ ❀ ❀ एवं भोग्यरूपां तां निरूप्य तस्या भोक्तारं भगवन्तं निरूपयति—ददर्श तत्रेति। पूर्वोक्तमपि सर्वं ब्रह्मा दृष्टवान्। लोकस्य प्रदर्शितत्वात्। तत्र स्थितं भगवन्तं सर्वसामग्रीसहितमनुवर्णयति। तत्र सच्चिदानन्दरूपो भगवान् यदाविर्भूतस्तद्ब्रह्मणे तत्तत्प्रयोजनपरिज्ञानार्थमेव। तत्र प्रथमं सर्वे ये सात्त्वता भगवत्सेवकाः देवा धर्मपराः सात्त्विकाश्च त्रयाणामपि पतिः। अनेन यदा कदाचिद्भगवानवतरति तदैतेषामेव कार्यार्थेऽवतरतीति ज्ञापितम्। किञ्च। श्रियः [1]पतिं लक्ष्म्याः पतिम्। यदा भगवान् स्वभोगार्थं जगत्करोति तदा सर्वं लक्ष्मीरूपमेव करोतीति बोधितम्। अनेनाऽवतारेषु भोग्या लक्ष्मीरूपा एवेति। स्वरूपत आवेशतो वा। किञ्च। यज्ञानां पतिर्भगवान्। यदा भगवान् वेदान् करोति तदा स्वस्य भोगा[2]र्थं करोति। अनेन सर्वे यज्ञा भगवदर्था एवेति। किञ्च। जगतः [3]पतिर्भगवान् जगद्यत्करोति तत्तत्र क्रीडार्थमेव करोति। तस्यैव पतित्वात्। वैकुण्ठे पुनस्ते मूर्तिरूपाः सच्चिद्रूपा इति ज्ञापना[4]र्थाः। अखिलसात्त्वताः लक्ष्मीर्यज्ञो जगच्चेति चत्वार एते भगवद्भोग्याः। एतदनुप्रवेश एव भगवति सम्बन्ध इति सर्वत्र ज्ञेयम्। अत एव निरोधे जगत्सा[5]त्त्वतयज्ञलक्ष्मीरूपाः पूर्वलीलासमसङ्ख्ययाऽऽभिर्मूर्त्तिभिरध्यायार्थाः सन्तो भगवद्भोगायोपयुक्ता निरूपिताः। ते चत्वारो मूर्त्तिरूपाः भगवता परिगृहीता ब्रह्मणे प्रदर्शिताः। किञ्च। सुनन्दनन्दादयो भगवद्भक्तिरूपाः। ते सख्येन सहिताऽष्टविधाः श्रवणाद्यधिष्ठातारः। पार्षदाः सर्वे तदधिष्ठिताः श्रवणादयः। तत्र चत्वारो नामतो गणिताः। लोके त एव प्रभविष्यन्तीति। तत्र सुनन्दनन्दप्रबलाः कीर्त्त[6]नश्रवणस्मरणात्मकाः। श्रवणादयो वा विपर्ययेण। चतुर्थस्तु अर्हणरूपः। नामसामान्यात्स एव गृह्यते। आदिशब्देन चाऽन्ये। एतेषु सिद्धेषु पुनर्वैकुण्ठे गतानामितरसिद्धिर्ज्ञापिता। विभुं प्रभुरूपम्। एवं सर्ववेष्टितोऽपि भृत्येभ्य एव प्रसादं दातुमभिमुखः सर्वापेक्षया भृत्या एव प्रिया इति। अनेन सहजप्रसादो भृत्येषु। अन्येषु तु धर्मार्थकाममोक्षरूपेषु चतुर्षु क्रमेण प्रसादः। तत्र धर्मो यज्ञः, अर्थो जगत्, कामो लक्ष्मीः, सन्त इति, भृत्या भक्तिरिति, पञ्च पदार्था निरूपिताः। [7]पञ्चानां भोगो नियामकत्वं च। विशेषस्तु भृत्यप्रसादाभिमुखत्वम्। किञ्च। अन्येषु चतुर्षु सर्वेषु वा दृगासवं दृगेव आसवो मादको यस्य। भगवता दृष्टा आत्मानं न स्मरन्ति। अनेन ज्ञानस्य यत्प्रपञ्चविस्मारकत्वं तद्भगवद्दृष्टिरूपस्यैव नाऽन्यस्येति सूचितम्। एते पदार्था ब्रह्मणो बोधार्थं निरूप्यन्ते मूलोपपत्तिरेतादृशी ति। अथवा। भक्तेषु प्रसादः कामिषु माद इति। किञ्च। **प्रसन्नहासारुणलोचनम्**। प्रसन्नो यो हासस्तद्युक्तं अरुणवर्णं चारु मनोहरं लोचनं यस्य। भगवति हासः प्रसन्नः। हासो हि जनोन्मादकरी माया निरूपिता। इयमागन्तुकशक्तिरन्यैव। सा हि प्रसन्ना स्वकार्यैकरणेऽतिसमर्था। तेन भगवन्मायया सुतरामुन्मत्ताः सन्तो ब्रह्मणः कार्यतामापत्स्यन्त इति सूचितम्। अरुण इत्यारक्तिमा अल्पप्रकाशः। तदेव चारु मनोहरम्। जगद्धि आपाततो ज्ञातं सुखकरं भवति। न तु सर्वथा ज्ञातमज्ञातं वा। ज्ञातोत्तमत्वे पुनर्भगवन्नेत्रनिष्ठे। कालवशादेव ज्ञातः। समीचीनश्च भवतीति ज्ञापितं न तु सर्वथाऽज्ञातः कश्चित्समीचीनो वा भवतीति सूचितम्। किञ्च। भगवानाधार आधेयश्च। तत्र पञ्चानामाधारोऽन्येषामाधेय इति। तत्राऽऽधाररूपाणि पञ्च गणयति—**किरीटिनं कुण्डलिनं चतुर्भुजं पीताम्बरं वक्षसि लक्षितं श्रियेति**। किरीटं शिरसि धार्यम्। कुण्डले कर्णधार्ये। ततोऽधस्ताच्चत्वारो भुजाः। ततोऽप्यधस्तात्पीताम्बरम्। एवं ये भगवदवयभूता लोकास्ते चतुर्मूर्त्तेर्भगवत आश्रिता इति। तावता सर्वमेव कार्यं भगवदाश्रितमिति ज्ञापितम्। एतावता विरा[8]ड्भगवानिति ब्रह्मा बोधितः॥ १४ १५॥ ❀ ❀ आधेयं निरूपयति—**अध्यर्हणीयासनमा[9]स्थितमिति**। अधि अधिकं अर्हणीयं सर्वैरेव धर्मादिभिः पूज्यम्। तत्सम्बन्धेन वा पूज्यम्। तादृशमासनमास्थाय स्थितम्। तदधिष्ठातृदेवताऽप्युदासायाऽऽह—**परमिति**। तेभ्य उत्तमम्। नियन्तारं वा। मुख्यं तदक्षरात्मकम्। अक्षरात्मकम्। अक्षरं हि लोकात्मकमासनात्मकं चरणात्मकं चेति। आधिभौतिकमाध्यात्मिकमाधिदैविकमिति। तस्यांऽशाः पञ्चविंशतितत्त्वानि। तान्यग्रे निरूपयिष्यन्ते। पीठांशत्वेन च। तदाह—**वृतं चतुःषोडशपञ्चशक्तिभिरिति**। तत्र चत्वारः प्रकृतिपुरुषमहदहङ्काराः प्रथमावरणरूपाः चतुर्दलकमलवत्। ततः षोडश एकादशेन्द्रियाणि पञ्चतन्मात्राश्चेति द्वितीयावरणं षोडशदलकमलवत्। ततः पञ्चभिर्महाभूतैर्वृतम्। एवमावरणत्रयं निरूपितम्। तान्यतिक्रम्य यो भगवत्समीपे गच्छति स गच्छति। एवं सर्वतत्त्वसहितमक्षरमासनमिति निरूपितम्। किञ्च। **युक्तं भगैः स्वैः**। ऐश्वर्यादयः षड्गुणा मूर्त्तिमन्तो भगवन्तमा[10]वेष्ट्य तिष्ठन्ति। ते चैश्वर्यादयो भगवदेकनिष्ठा नाऽन्यत्राऽऽविष्टा भवन्ति। इतरत्र च पार्षदादिषु अध्रुवैः। चकाराद्राजादिष्वपि। एतावता भगवच्छब्दप्रयोगः सर्वत्र। तथापि ध्रुवा ऐश्वर्यादयो भगवत्येव। अध्रुवास्त्वन्यत्र। तेन तरतमभावेनैव भगवत्त्वम्। अनेन **"ब्रह्म वेद ब्रह्मैव भवति"**। **"यो यच्छ्रद्धः स एव सः"**। **"स आत्मानं यच्छती"**

---

१. श्रियः पतिः लक्ष्म्याः पतिरिति क. ग. घ.। २. यज्ञभोगार्थमेवेति ख. ग.। ३. पतिर्भवान् ख. ग.। ४. ज्ञापनार्थः ख. ज्ञापनार्थं ग.। ५. जगत् सत् यज्ञेति ख.। ६. कीर्त्तेः श्रवणेति ख.। ७. पञ्चसु भोग इति ख.। ८. भगवान्विराडिति ख. ग.। ९. मास्थितं अधीति ग.। १०. मावेश्येति घ.।

ति सर्वे पदार्था व्याख्याताः । अतः असाधारणानि भगवत्येव । मुक्तापेक्षयाऽपि भगवान् महानिति ज्ञापितम् । न हि तदानीं कृपया जाता ऐश्वर्यादयो नित्या भवन्ति । एवं सर्वसामग्र्यां विद्यमानायामपि स्वस्मिन्नेव रमते । आनन्दमयत्वात् । ननु सुखानुभवः फलम् । स्वस्य त्वानन्दत्वेऽप्यनु[१]भावात्कथं भोगस्तत्राऽऽह—धामन्निति । तेजोरूपे प्रकाशके स्वस्मिन् । अप्रकाशे हि ज्ञानं प्रकाशमपे[२]क्ष्यते । न तु स्वप्रकाशे । अनेन जीवानां भगवान् भोग्य इति पक्षो व्युदस्तः । एवमपीश्वरं नियन्तारम् । यद्यपि स्वस्य कापि रमणापेक्षा नास्ति तथापि सर्वनियन्ता ॥ १६ ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

श्रीर्यत्रेत्यत्र । स्वार्थं सच्चिद्रूपत्वे गमकमाहुः, अत एवेत्यादि । तथा च, चरणसेवया भगवदानन्दाकाङ्क्षावत्वमेव तद्गमकमित्यर्थः ॥ १३ ॥ ❋ ❋ ददर्शेत्यत्र परिज्ञानार्थमिति, अन्तर्भावितण्यर्थपरिज्ञानार्थम् । सच्चिद्रूपा इति पूर्णशब्दवाच्यसच्चिद्रूपाः, ते क इत्याकाङ्क्षायां तानाहुः अखिलेत्यादि । एतदनुप्रवेश इत्यादि । एतेषां लौकिकेनुप्रवेशे सत्येव लौकिकस्य भगवति सम्बन्ध इत्यर्थः । अत्र गमकमाहुः अत एवेत्यादि । एतदनुप्रवेशस्य भगवत्सम्बन्धजनकत्वादेव दशमोक्तलीलायां लौकिका जगदादिरूपाः पदार्थाः पूर्वलीलासमसङ्ख्यया त्रिविधसर्गत्रिविधस्थितीशानुकथारूपप्रलयभेदेन समाना या सप्तसङ्ख्या, तया कृत्वा, आभिः अत्रोक्ताभिः जगदादिमूर्त्तिभिरध्यायप्रतिपाद्याः सन्तो भगवद्भोगायोपयुक्ताः सप्तसप्ततिभिरध्यायैर्निरूपिताः, इदं गमकमित्यर्थः । त इति जगदाद्याधिदैविकाः । इतरसिद्धिरिति पादसेवनादिसिद्धिः ॥ १४ ॥ ❋ ❋ भृत्यप्रसादेत्यत्र । एतं श्लोकं व्याकुर्वन्ति, एवं सर्वेत्यादि । एवं व्याख्याने बीजमाहुः एत इत्यादि । एतादृशीति व्याख्यातरूपा, अन्यथैतन्निरूपणमनर्थकं स्यादतस्तथेत्यर्थः । ज्ञानं हि प्रपञ्चस्यैव विस्मारकं, न तु स्वरूपस्येति तस्यासवरूपता नोपपद्यत इत्यरुच्या पक्षान्तरमाहुः अथ वेत्यादि । कामिपदेन जगद्व्यतिरिक्ताश्रयोऽत्र ग्राह्यः । तथा च, तादृशदृष्ट्या कामिन एव पश्यन्तीति तेषामेव स्वस्य विस्मरणमित्यर्थः । न च प्रपञ्चविस्मरणाभावादत्राप्यरुचितौल्यमिति वाच्यम्, प्रपञ्चस्वरूपज्ञाने कामस्यैवानुदयात्तेनैव तदज्ञानसिद्धेररुच्यभावादिति । अन्यैवेति प्रकारान्तरेणैव मादिकेत्यर्थः । दृगासव इत्यनेन दृशो मादकत्वे निरूपितेपि पुनरागन्तुकशक्त्या तत्सूचनस्य तात्पर्यमाहुः जगदित्यादि । तथा च, जगद्रूपेणोन्मादार्थं सेत्यर्थः । प्रकारान्तरेण नेत्रनिरूपणस्य तात्पर्यमाहुः कालेत्यादि । 'चक्षुरभूत्पतङ्ग' इति भगवच्चक्षुषः पतङ्गताधर्मविशिष्ट ( सूर्य ) रूपत्वेन सूर्यस्य 'चासावादित्य एकविंश' इति श्रुत्या तस्य कालात्मकत्वेन कालवशाज्ज्ञातो जगदन्तःपाती पदार्थः, कालाधेयो ज्ञातः समीचीनश्च भवतीति ब्रह्माणे ज्ञापितम्, न त्वित्यादिनोक्तरीत्या वा सूचितमित्यर्थः । आधार आधेयश्चेति । श्रीभगवद्गीतासु पुरुषोत्तमस्वरूपनिरूपणे 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया । यस्यान्तःस्थानि भूतानि येन सर्वमिदं तत' मिति वाक्यादाधारः, 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः, यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर' इति वाक्यादाधेयश्चेत्यर्थः । एवं भगवदवयवेत्यादि । 'वेदा यथा मूर्तिधराश्त्रिपृष्ठे' इति वाक्यान्मूर्त्तवेदरूपकिरीटाधारत्वेन सत्यलोकत्वं शिरसः । योगसाङ्ख्यरूपकुण्डलाधारयोः कर्णयोः श्रीमुखान्तःपातित्वेन तपोजनमहर्लोकरूपत्वं सग्रीवस्य श्रीमुखस्य, 'योगस्तपश्च वंशश्च भगवद्भक्तिरेव चे' तिचतुरर्जितलोकरूपत्वं चतुर्णां भुजानां श्र्याधारस्वर्लोकरूपत्वं वक्षसः । मायारूपपीताम्बराधाराणां कट्यादीनां भूरादिलोकरूपत्वम्, एवं प्रकारकास्य ये भगवदवयवभूता लोकास्ते तृतीयस्कन्धवक्ष्यमाणरीत्या प्रद्युम्नादिरूपचतुर्मूर्त्तेर्भगवत आश्रिता इत्यर्थः ॥ १५ ॥ ❋ ❋ अध्यर्हणीयेत्यत्र । तत्सम्बन्धेन वा पूज्यमिति धर्मादीनामासने प्रवेशस्यैकादशस्कन्धे वक्ष्यमाणत्वेनेदं पक्षान्तरमुक्तम् । तथा च, धर्मादिसम्बन्धेनान्यैः पूज्यमित्यर्थः । तेभ्य इति धर्मादिभ्यो नवभ्यः । तदिति आसनम् । तरतमभावेनेति इदं वाराहे ( नारसिंहे ) कण्ठत उक्तं 'भगवानिति शब्दोयं तथा पुरुष इत्यपि, निरुपाधी च वर्त्तेते वासुदेवे सनातन' इति । नित्या इति स्वाभाविकाः । अनेनेत्यादि । एतेन प्रथमाध्याये 'तं सत्यमानन्दनिधिं भजेते' त्यत्र यत्फलसेव्यत्वमुक्तं तत्पुरुषशेषत्वाभावात्समर्थितं ज्ञेयम् ॥ १६ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

यत्र च रूपिणी अतिसौन्दर्यवती श्रीमहालक्ष्मीः उरुगायस्य वेदेन बहुधा गीयमानस्य भगवतः पादयोर्विभूतिभिः सखिभिः सह, यद्वा नानाविभवैर्बहुधा मानं पूजां करोति । या च लक्ष्मीः प्रेङ्खमान्दोलं श्रिता कुसुमाकरो वसन्तस्तदनुगाः शुककोकिलभृङ्गादयस्तैः स्वयं विविधं गीयमानाऽपि प्रियस्य भगवतः कर्म गायती भवति ॥ १३ ॥ ❋ ❋ तत्र लोके विभुं स्वप्रभुं भगवन्तं ददर्शेत्यन्वयः । दृष्टस्य भगवतो माहात्म्यं वर्णयति—अखिलसात्वतां सर्वभक्तानां पतिं सर्वतापनिवृत्तिपूर्वकस्वसालोक्यादिदानेन पालकं यज्ञपतिं यज्ञानां प्रवर्त्तकं यज्ञैराराध्यं यज्ञफलप्रदं च । किम्बहुना ? सर्वजगत्पतिं तत्तत्प्राणिकर्मानुसारेण तत्तत्फलप्रदानेन सर्वजगत्पालकम् । तत्र सामर्थ्ये हेतुमाह—अखिलसम्पदधिष्ठात्र्याः श्रियो महालक्ष्म्याः पतिं स्वामिनमिति । सुनन्दादिभिर्द्वारपालैरन्यैश्च स्वपार्षदमुख्यैः परितः सेव्यमानम् ॥ १४ ॥ ❋ ❋ एवं माहात्म्यविशिष्टदर्शनेन द्रष्टुर्भयं स्यादित्याशङ्क्य भयशङ्का निवारयन्नाह—भृत्येति । भृत्यानां स्वसेवकानां प्रसादे अभिमुखं दृग्दृष्टिरेवासवः आसववन्मदकरी हर्षकरी च यस्य तम् ।

१. अननुभवादिति ग. अनुभवादिति घ. । २. सपेक्षत इति ख. ग. ।

यद्वा दृशां नेत्राणामासव इव मादको यस्तम् । कृपया दृष्टानां तद्दर्शनकर्तृणां च हर्षेण संसारदुःखविस्मरणात् । प्रसन्नः प्रसादपूर्वको हासः अरुणे लोचने च यस्मिंस्तदाननं यस्य तम् । किरीटादिधारिणं वक्षसि स्मितया श्रिया लक्षितमलङ्कृतमित्यर्थः ॥ १५ ॥ अध्यर्हणीयमतिपूजनीयं परमुत्कृष्टमासनमास्थितमधिष्ठितम् । चतस्रः प्रकृतिपुरुषमहदहङ्काररूपाः षोडश एकादशेन्द्रियाणि पञ्च महाभूताख्याः पञ्च तन्मात्रारूपा याः शक्तयस्ताभिर्मूर्तिमतीभिर्वृतं सेवितम् । स्वैः स्वाभाविकैः इतरत्र ब्रह्मादिषु अध्रुवैः भगवदग्रहेण सञ्चारादनित्यैर्भगैः ऐश्वर्यवीर्ययशश्श्रीज्ञानवैराग्याधिष्ठातृदेवताविशेषैर्युक्तम् । एवं परमैश्वर्यनिरूपणात्किं तद्भोगासक्तिमित्याशङ्कयाह—स्व इति । स्वे स्वकीये धामन् धामनि परमानन्दस्वरूपे एव रममाणम् । तत्र हेतुमाह—ईश्वरमिति, सर्वनियन्ता यदि विषयासक्तः स्यात्तदा को वा जनोद्धारकः स्यादिति भावः । एवम्भूतं ददर्शेति पूर्वेणैवान्वयः । न च पूर्वं न यत्र मायेत्यादिना मायातत्कार्यनिषेधं कृत्वा कथं तद्विरुद्धं प्रकृत्यादिसेवितत्वमुच्यते इति शङ्कनीयम् । न प्रवर्त्तत इत्यस्याः स्वकार्यं मोदादिकं न करोतीत्ययमेवार्थः । न तु स्वरूपतोऽपि नास्ति तेषां शक्तिरूपाणां स्वरूपतो सत्त्वे भगवतो न्यूनताऽऽपद्येत पूरणता च न स्यात् चतुर्विंशतिभिस्तत्त्वैः परीता महदादिभिरिति वक्ष्यमाणविरोधापत्तिश्चेति ज्ञेयम् ॥ १६ ॥

## हिन्दी अनुवाद

ब्रह्माजीने देखा कि उस दिव्य लोकमें समस्त भक्तोंके रक्षक, लक्ष्मीपति, यज्ञपति एवं विश्वपति भगवान् विराजमान हैं। सुनन्द, नन्द, प्रबल और अर्हण आदि मुख्य-मुख्य पार्षदगण उन प्रभुकी सेवा कर रहे हैं ॥ १४ ॥ ❀ ❀ उनका मुख-कमल प्रसाद-मधुर मुसकानसे युक्त हैं। आँखोंमें लाल-लाल डोरियाँ हैं। बड़ी मोहक और मधुर चितवन है। ऐसा जान पड़ता है कि अभी-अभी अपने प्रेमी भक्तको अपना सर्वस्व दे देंगे। सिरपर मुकुट, कानोंमें कुण्डल और कंधेपर पीताम्बर जगमगा रहे हैं। वक्षःस्थलपर एक सुनहरी रेखाके रूपमें श्रीलक्ष्मीजी विराजमान हैं और सुन्दर चार भुजाएँ हैं ॥ १५ ॥ ❀ ❀ वे एक सर्वोत्तम और बहुमूल्य आसनपर विराजमान हैं। पुरुष, प्रकृति, महत्तत्त्व, अहंकार, मन, दस इन्द्रिय, शब्दादि पाँच तन्मात्राएँ और पञ्चभूत—ये पचीस शक्तियाँ मूर्तिमान् होकर उनके चारों ओर खड़ी हैं। समग्र ऐश्वर्य, धर्म, कीर्ति, श्री, ज्ञान और वैराग्य—इन छः नित्यसिद्ध स्वरूपभूत शक्तियोंसे वे सर्वदा युक्त रहते हैं। उनके अतिरिक्त और कहीं भी ये नित्यरूपसे निवास नहीं करतीं। वे सर्वेश्वर प्रभु अपने नित्य आनन्दमय स्वरूपमें ही नित्य-निरन्तर निमग्न रहते हैं ॥ १६ ॥

**तद्दर्शनाह्लादपरिप्लुतान्तरो हृष्यत्तनुः प्रेमभराश्रुलोचनः ।**
**ननाम पादाम्बुजमस्य विश्वसृग् यत् पारमहंस्येन पथाधिगम्यते ॥१७॥**
**तं प्रीयमाणं समुपस्थितं तदा प्रजाविसर्गे निजशासनार्हणम् ।**
**बभाष ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन् ॥१८॥**

## श्रीभगवानुवाच

**त्वयाहं तोषितः सम्यग् वेदगर्भ सिसृक्षया । चिरं भृतेन तपसा दुस्तोषः कूटयोगिनाम् ॥१९॥**
**वरं वरय भद्रं ते वरेशं माभिवाञ्छितम् । ब्रह्मञ्छ्रेयःपरिश्रामः पुंसो मद्दर्शनावधिः ॥२०॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तस्य दर्शनेन य आह्लादस्तेन परिप्लुतं व्याप्तमांतरमंतःकरणं यस्य । हृष्यंती रोमांचिता तनुर्यस्य प्रेमभरेणाश्रूणि लोचनेषु यस्य । विश्वसृग् ब्रह्मा । पारमहंस्येन पथा ज्ञानमार्गेण ॥ १७ ॥ ❀ ❀ तं ब्रह्माणं भगवान् बभाषे । प्रजाविसर्गकार्ये । निजशासनार्हणं स्वनियोगार्हम् । प्रजाविसर्गे समुपस्थितमिति वान्वयः । ईषत्स्मितेन शोचिर्दीप्तिः शोभा यस्यास्तया गिरा ॥ १८ ॥ ❀ ❀ सिसृक्षया हेतुना चिरं संभृतेन तपसाऽहं सम्यक् तोषितः । दुस्तोषस्तोषयितुमशक्यः ॥ १९ ॥ ❀ ❀ मा इति माम् । श्रेयसां फलानां परिश्रामः परिश्रमः साधनप्रयासः मम दर्शनमवधिर्यस्य स तथा अतोऽधिकं तु पुनः फलं नास्तीत्यर्थः ॥ २० ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

ज्ञानमार्गेणाहिंसादिजन्येन प्रीयमाणं हृष्यंतम् । तदा तत्यवसरे । ईषद्बभाषे इति योज्यम् । "महांतो हि प्रकृत्या मितभाषिणः" इत्युक्तेः ॥ ईषद्धासस्यैव स्मितत्वात्तेनेषत्पदं न योज्यं पुनरुक्तेः । प्रजाविसर्गे निजशासनार्हणमिति संबंधे प्रजा-

विसर्गेतरनिजशासनानर्हमिति प्रतीतिः स्यादतः समुपस्थितमिति वेत्युक्तम् । करस्पर्शेन हि प्रीत्यतिशयो द्योत्यते ॥ १८ ॥ ❀ ❀ वेदगर्भेति । भावि वेदगर्भत्वं स्वामंत्रणेनाहेति भावः । कूटयोगिनां योगच्छद्मनामलीकवचनपराणां कलियुगे प्रायेण कूटयोगिन एव भविष्यंति ते च स्वसंगिभिः सह नरके गमिष्यंति "कलौ पाखंडपंथानो मुण्डाः केशादिधारिणः। बहवः प्रचरिष्यंति वेदविप्रामरद्रुहः ॥ स्वदम्भवाचा लोकांस्ते चालयिष्यंति धर्मतः ॥ ते च तदनुगाः सर्वे यम्यदंडेन ताडिताः ॥ कुंभीपाकादिषु चिरं वत्स्यंति नात्र संशयः" इत्यादिकौशिकसंहितोक्तेरलं प्रसक्तानुप्रसक्त्या ॥ १९ ॥ ❀ ❀ वरेशं वरान् दातुं समर्थम्। ब्रह्मन्निति वरदानपात्रतोक्ता। इत्यर्थ इति मद्दर्शनादधिकं किञ्चिदपि जगति नास्ति वरेणैतावतैवालं "यद्भवान्मेऽक्षिगोचरः" इत्यादिमार्कंडेयोक्तेः । त्वद्दर्शने सर्वे वराः प्राप्ताः स्युः "सर्वे पदा हस्तिपदे निमग्नाः" इति न्यायेनेति भावः ॥ २० ॥

## श्रीमद्वीरराघवव्याख्या

तस्य भगवतो दर्शनेन य आल्हादः तेन परिस्नुतं समंततो व्याप्तमंतरं हृदयं यस्य सः हृष्यत्तनुः पुलकिततनुः प्रेम्णो यो भरः पूरस्तेनाश्रूणि लोचनेषु यस्य स आनंदाश्रुनयनः ॥ विश्वसृट् ब्रह्मा पारमहंस्येन परमहंसैरनुष्ठेयेन यथा भक्तिमार्गेण यत्पदांबुजमधिगम्यते प्राप्यते तदस्य भगवतः पदांबुजं ननाम नमस्कृतवान् ॥ १७ ॥ ❀ ❀ प्रजासर्गे प्रजासृष्टिरूपे कार्ये समुपस्थितं समुद्यतं निजशासनार्हणं स्वनियोगार्हं प्रीयमाणं स्वस्मिन्निरतिशयप्रीतिमन्तं तं कविं ब्रह्माणं करे हस्ते स्पृशन्करं गृहीत्वेत्यर्थः। प्रीतमनाः तस्मिन्निरतिशयप्रीतियुक्तान्तःकरणः प्रियो निरतिशयप्रीतिविषयो भगवानीषत्स्मितेन मंदहासेन शोचिर्दीप्तिः शोभा यस्यास्तया गिरा प्रियं यथा तथा बभाषे भाषितवान् ॥ १८ ॥ ❀ ❀ त्वयेति । हे वेदगर्भ, सिसृक्षया हेतुना चिरंभृतेन चीर्णेन तपसा साधनभूतेन त्वया कर्त्राहं सध्र्यक् सम्यक्तोषितः कूटयोगिनां दांभिकयोगिनां दुस्तोषस्तोषयितुमशक्योहम् ॥ १९ ॥ ❀ ❀ वरेशं वरप्रदं मां प्रत्यभिवांछितमभीष्टं वरं वरयस्व तुभ्यं भद्रं मंगलमस्त्विति शेषः । हे ब्रह्मन् पुंसां श्रेयः परिश्रामः श्रेयसो फलानां परिश्रामः साधनप्रयासः मद्दर्शनावधिर्मद्दर्शनमवधिर्यस्य सः ॥ २० ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

युक्तमित्यनेन स्वरूपभूता न भवंतीति नाशंकनीयं योगशब्दस्य संन्नहने वृत्तेः तत्स्वरूपाश्च शक्य इति च ॥ इतरत्र पुरुषांतरेष्वध्रुवैरनित्यैः स्वैः स्वरूपैर्भगैरैश्वर्यादिभिश्च युक्तं स्व एव धामन् स्वरूपानंद एव रममाणं नान्यत्रेत्येष शब्दार्थः। ब्रह्मैवंविधमीश्वरं ददर्शेति पूर्वत्रान्वयः। तस्य हरेर्दर्शनादुद्भूतेनाह्लादेन परिप्लुतमार्द्रीभूतमांतरं यस्य स तथा हृष्यंती रोमांचं कुर्वती तनुर्यस्य स तथा प्रेमभरेणाश्रुपूर्णे लोचने यस्य स तथा ॥ १७ ॥ ❀ ❀ यत्पादांबुजं पारमहंस्येन संबंधिना पथा ज्ञानमार्गेणाहिंसादिधर्मजन्येनाधिगम्यते ज्ञायते ॥ १८ ॥ ❀ ❀ प्रीयमाणं हृष्यंतं कविं ब्रह्माणं आदिकवय इत्युक्तेः। कविरयं पुत्रः स इमाचिकेतेति श्रुतेश्च ईषद्बभाषे इत्यनेन शब्दतोऽल्पत्वमर्थतो गुरुत्वं द्योत्यते प्रकृत्यामितभाषिण इति वचनात् । करे स्पृशन्नित्यनेन प्रीतमनस्कत्वं प्रकाशयति त्वयेति । मनसि प्रसन्ने तदितरेंद्रियाणां प्रसन्नत्वं किं वक्तव्यमित्यर्थः ॥ १९ ॥ ❀ ❀ आंतरीमंतःकरणप्रीतिं वाचोद्गलयति । किंधनादिनेत्यत उक्तं तपसेति । किमर्थेनेत्यत उक्तं सिसृक्षयेति । अनुपचितांगोपांगेन इत्यत उक्तं चिरमिति । अहं न तपोमात्रेण तुष्यामि किंतु त्वादृशानामधिकारिणामेवेति भावेनाह दुस्तोष इति ॥ २० ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

तद्दर्शनेति । आह्लादेन हृष्यत्तनुः प्रेमभरेण त्वश्रुलोचन इति विवेकः । यत्पादाम्बुजं पारमहंस्येन पथाधिगम्यते इति सच्चिदानन्दत्वं तस्य व्यनक्ति । पारमहंस्यमत्र भागवतपारमहंसत्वं ज्ञेयं, भागवतपरमहंसदयितकथामिति पञ्चमोक्तेः ॥ १७ ॥ तं प्रीयमाणमिति । तं ब्रह्माणं भगवान् बभाषे । प्रजाविसर्गे कार्य्ये निजस्य स्वांशभूतस्य पुरुषस्य शासनेऽर्हणं योग्यम् । नन्वसौ पुरुष एव तमनुगृह्णातु भगवतस्तु परावस्थत्वात्तेन प्राकृतसृष्टिकर्त्रा सम्बन्धोऽपि न सम्बन्ध इत्याशंक्य तस्य भक्तवात्सल्यातिशयमित्याह, प्रियं तस्मिन् प्रेमवन्तम् । यतःसोऽपि प्रियः प्रेमवशः । तत्रापि प्रीयमाणमिति प्रीतमना इति च विशेषणं तदानीं प्रेमोल्लासातिशयद्योतकम् । तस्मिन् स्वविषयकप्रीतिचिह्नदर्शनेन तस्यापि तत्र प्रीत्यतिशयं व्यञ्जयति ईषत् स्मितशोचिषेति । गिरेति करे स्पृशन्निति च ॥ १८ ॥ ❀ ❀ त्वयाहमिति सिसृक्षयोपलक्षितेन न तु विशिष्टेन, मद्भक्तिप्रभावेण तद्वासनाया गुणीभूतत्वात् । अत एव चिरंभृतेनेति । यतः कूटयोगिनामिति अप्रोज्झितकैतवानामहं दुस्तोष इति ॥ १९ ॥ ❀ ❀ मद्दर्शनावधिरिति । मद्दर्शनस्यान्तर्भूतसर्व्वफलत्वादिति भावः ॥ २० ॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

परमहंसा भक्ताः प्रियाः परमहंसानामित्यत्र तथा व्याख्यानात् भागवतपरमहंसदयितकथामिति पंचमोक्तेश्च तेषां भावः पारमहंस्यं भक्तियोगस्तेन पथा भक्त्याहमेकया ग्राह्य इति भगवदुक्तेः ॥ १७ ॥ ❀ ❀ प्रजाविसर्गे कार्ये निजशासनमर्हतीति तम् । ईषत्स्मितेन शोचिर्दीप्तिर्यस्यास्तथागिरा ॥ १८ ॥ ❀ ❀ वेदगर्भेति सम्बोधयन् वेदान् संचारयति सिसृक्षया

हेतुना चिरंभृतेन तपसा। दुस्तोषस्तोषयितुमशक्यः सध्यक् सम्यक् ॥ १९ ॥ ❀ ❀ मा मां वरं वांछितं वस्तु वरय वृणु याचस्वेति यावत् श्रेयः परिश्रामः फलार्थकः प्रयासो मद्दर्शनावधिरेव। मद्दर्शनादन्यस्य फलस्य मद्भक्तैरग्राह्यत्वादिति भावः ॥ २० ॥

## श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः

ततश्च तस्य भगवतो दर्शनेन य आह्लादस्तेन परिप्लुतं समंततो व्याप्तमंतरमतःकरणं यस्य सः। हृष्यंती जातहर्षा तनुर्यस्य सः। प्रेम्णो यो भरः पूरस्तेनाश्रूणि लोचनेषु यस्य सः। विश्वसृक् व्यष्टिजगत्स्रष्टा चतुर्मुखः यत्पारमहंस्येन परमहंसैः भगवद्ध्यानप्रधानैरनुष्ठितेन यथा भगवद्भक्तिमार्गेणाधिगम्यते प्राप्यते तदस्य भगवतः पादांबुजं ननाम ॥ १७ ॥ ❀ ❀ ततश्च तपआदि-आराधनेन प्रीतमनाः तस्मिन्प्रीतियुक्तमानसः भगवान् प्रीयमाणं भगवद्दर्शनेन भगवति अतिशयप्रीतिमंतं प्रजाविसर्गे कार्ये समुपस्थितं समुद्यतं निजशासनार्हणं निजनियोगयोग्यं तं चतुर्मुखम्। करे हस्ते स्पृशन् ईषत्स्मितेन मंदहासेन रोचिर्दीप्तिः शोभा यस्याः तया गिरा प्रियं यथा बभाषे भाषितवान् ॥ १८ ॥ ❀ ❀ भाषणमेवाह त्वयेति। अहं कूटयोगिनां दुस्तोषयितुमशक्योपि हे वेदगर्भ त्वया सिसृक्षया प्रजाविसर्गेच्छया हेतुना चिरंभृतेन बहुकालं चीर्णेन तपसा सम्यक् तोषितोस्मि ॥ १९ ॥ ❀ ❀ हे ब्रह्मन् ते भद्रं मंगलं भवतु। वरेशं वरदं मा मां अभिवांछितमभीष्टं वरं वरय पुंसां साधकानां श्रेयसां फलानां परिश्रामः परिश्रमः साधनप्रयासः मद्दर्शनावधिर्मम दर्शनमवधिर्यस्य सः ॥ २० ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं सर्वसन्देहनिवर्त्तकं भगवत्स्वरूपं दृष्ट्वा तद्दर्शनेन य आह्लादः आनन्दानुभवेन यः सन्तोषः तेन परिप्लुतमन्तरं यस्य तादृशो भूत्वा ननामेत्यग्रेण सम्बन्धः। तपो हि किञ्चित्कामनार्थं करोति। तया च कामनया हृदयं साकाङ्क्षमपूरितं तिष्ठति। तदानन्दानुभवेन फलरूपेण कामितापेक्षयाऽप्यधिकफलत्वादन्तःकरणं परिप्लुतम्। यथा महापूरे सर्वमेव गर्त्तजातं पूर्णं सत् उच्छलितं भवति। तथा ब्रह्मणोऽपि चित्तं जातमित्यर्थः। अत एव तस्याऽग्रे वचनासामर्थ्यम्। किञ्च। अन्तःपूर्ण आनन्दो बहिरप्युद्गत इत्याह—**हृष्यत्तनुरिति**। तदा ज्ञानशक्तिरप्यानन्दे निमग्ना न फलान्तरं बोधयतीति ज्ञापयितुं **प्रेमभराश्रुलोचन** इत्युक्तम्। प्रेमभरेण जातानि यान्यश्रूणि तानि लोचनयोर्यस्येति। पूर्वं भगवति प्रेम स्थितं तदाधारे परिप्लुते ततो निर्गतं सन्नेत्रयोर्ज्ञानजनकत्वात्तत्र परिचयमिव प्राप्य तद्द्वारा जलरूपेण निर्गतमिति। भरो भारः भाराक्रान्ते स्वेदो भवत्येव। तदाह। प्रेमभरेणाश्रूणीति। स्वभावतो न स्रवन्तीत्यश्रुत्वम्। तदा कर्त्तव्यान्तराभावात् **ननाम पादाम्बुजमिति** भक्तिप्रकारेण। **अस्येति** पूर्वोक्तरूपस्य ब्रह्मणोऽपेक्षितरूपस्य। अपेक्षामेव बोधयति—**विश्वसृगिति**। विश्वं सृजतीति। नन्वेवं दर्शने नमनमेव कुतः कृतवान् सायुज्यं कुतो न प्राप्तवानितीयमपि शङ्का निवारिता। यतोऽयं विश्वकृत्। अधिकारित्वान्न प्राप्तवानिति भावः। ननु चरणारविन्दस्य तुल्यत्वात् समर्थत्वाच्चाऽधिकारे कुतो न सायुज्यमत आह—**यत्पारमहंस्येन पथाऽधिगम्यत** इति। परमहंसमार्गेणैव दृष्टं चेत् तदैव पादाम्बुजं प्राप्यते। ननु प्रकारान्तरेण दृष्टं सायुज्यहेतुर्भवति ॥ १७ ॥ ❀ ❀ एवं नमनं कृत्वा ब्रह्माणि तूष्णीम्भूते किञ्चिदपि वक्तुमसमर्थे स्वयमेव भगवांस्तदभीप्सितमुक्तवानित्याह— **तं प्रीयमाणमिति**। यत्र साधनमभीप्सितं फलं च तत्र प्रकारान्तरव्यावृत्त्यर्थं प्रारब्धफलसिद्ध्यर्थमेव तस्य प्रोत्साहनम्। अन्यथात्वे तु भगवतस्तूष्णीम्भावः। प्रसन्नत्वाद्यथाभिलषितदानम्। अत्र तु साधनमपि स्वोपदिष्टमिति तस्या वरयाचनप्रेरणम्। अन्यथा स्वाभिलषितमात्रत्वे निर्बन्धेन करणे पदार्थज्ञानेऽप्यन्यथाकरणमाद्येत। अतः स्वयं स्वेच्छासमानविषयां तदिच्छामुत्पाद्य तद्द्वारेणैव स्वाभिलषितं करिष्यामीति भगवदिच्छया ब्रह्मणस्तूष्णीम्भावः। भगवत्याविर्भूते वस्तुमाहात्म्यात्सम्बन्धाद्वा अभिलषितार्थसिद्धिहेतुत्वाद्वा भगवद्दर्शनेन प्रीयमाणः परमप्रीतियुक्तो ब्रह्मा। सम्यक् चाऽवस्थितो नतु तपसा क्लिष्टः। अन्यथा आज्ञापि न देया स्यात्। दोषरहितो वा। तदेत्युभयत्र सम्बन्धः। पूर्वं क्लिष्टोऽपि तदा न क्लिष्टः। अत एव तदैव प्रजानिर्माणार्थं निजाज्ञाकरणसमर्थः। एतादृशं ब्रह्माणं ज्ञात्वा स्वरूपयोग्यतामवगत्य तस्य सहकारियोग्यतासम्पादनाय बभाषे उक्तवान्। भाषणमेव प्रयोजनं न भवतीति वाचः करणतामाह— **गिरेति**। भगवद्रूपे दृष्टे उत्तमे चाऽधिकारे सम्पन्ने भगवद्वाक्यात्तत्त्वज्ञानमेव भविष्यतीत्याशङ्क्याऽऽह— **ईषत्स्मितशोचिषेति**। सर्ववस्तुषु वस्तुस्वरूपं यत् तदज्ञानार्थं मोह इति ईषत्पदेनोक्तम्। यद्यपि तदेव महत् तथापि ब्रह्मण इच्छामात्रेणैतद्भविष्यतीति यत्कार्यस्याऽल्पत्वम्। स्मितमपि मन्दहासस्तस्याऽपि ज्ञानम्। परं न फलपर्यवसायि। भवत्वस्य वस्तुस्वरूपज्ञानं तथापि यत्तस्य फलं तदिदानीं मा भवत्विति स्मितम्। फलेऽपि मोक्षलक्षणमेव फलं मा भवतु सर्वज्ञत्वमलौकिकतेजस्त्वं भवत्विति शोचिषेत्युक्तम्। स्मिते एव शोचिर्यस्येति। स्मितमिव वा। यदसाधारणं स्वकर्त्तव्यं तदन्येन न कर्त्तव्यमित्याशङ्क्य प्रियेण तदपि कर्त्तव्यमिति प्रियमित्युक्तम्। तस्य प्रियत्वं भगवतः सम्बन्धात् स्वभावतो वा यदि स्यात् तदा शास्त्रं

१. ब्रह्मणश्चित्तमिति ख.। २. योग्यतां संपादयितुमिति ख.। ३. स्मितमेवेति ख.। ४. स्मितमेवेति ख.। ५. शास्त्रे विबुध्येतेति ख.।

विरुद्धयेतेति ब्रह्मगतं स्नेहं 'स्नेहे हेतुत्वेन निरूपयति—प्रिय इति । "ये यथा मां प्रपद्यन्त" इत्ययमर्थः सूचितः । भगवद्वाक्ये भगवन्मन उत्पादकमिति तस्याऽप्रसादे वागप्यप्रसन्ना स्यात् । तथा च "उत त्वः पश्यन्न ददर्श वाचमि" ति वद्ब्रह्मणो वाक्यार्थप्रतीतिर्न स्यात् अत आह—प्रीतमना इति । प्रीतं मनो यस्य । स्वकार्यं ब्रह्मणा जन्यत इति । करे स्पृशन्निति क्रियाशक्त्याधानम् । ज्ञानशक्तिस्तु वाक्यात् । एवमुभयसम्पन्नं स्वाभीष्टं करिष्यतीति ॥ १८ ॥ ❀ ❀ मनसो बहिरस्वातन्त्र्यात् वाचमाह—त्वयाऽहं तोषित इति । सृष्ट्यर्थं तपःकरणे भगवतो वरदानं कुत्रोपयुज्यत इत्याशङ्क्य तेन तपसा अहमेव प्रीत इत्याह । अयमेवाऽस्मिन् शास्त्रे मुख्यः सिद्धान्तः । यो भगवत्कर्त्तव्यं करोति महता प्रयत्नेन स मुख्यः । यस्तु भगवत्सेवां करोति स मध्यमः । यस्तु स्वार्थं भगवन्तं सेवते सोऽधम इति । ब्रह्मणा त्वाद्यः पक्षः कृत इति भगवानतितुष्टः । तदाह—सम्यगिति । कथं ब्रह्मणाऽयमर्थो ज्ञात इति तत्राऽऽह—वेदगर्भेति । वेदा गर्भे यस्य । वेदानामिदमेव तात्पर्यं यद्भगवत्कार्यं कर्त्तव्यमिति । अत एव सर्वत्र—"प्रजापतिरकामयत प्रजाः सृजेयेति" । "ऋतवो वै प्रजाकामाः प्रजां नाऽविन्दन्त तेऽकामयन्त प्रजाँ सृजेमहि प्रजामवरुन्धीमहि प्रजां विन्देमहि प्रजावन्तः स्यामे" ति "अग्निहोत्रं जुहोति" । "यदेव किञ्च यजमानस्य स्वं तस्यैव तद्रेतः सिञ्चति प्रजनन" इति । अन्यथा लौकिकार्थपरत्वे वेदानामनुवादकत्वेनाऽप्रामाण्यं स्यात् । अतएवाऽऽपाततो ये वेदज्ञास्ते नेममर्थं जानन्तीति तद्व्यावृत्त्यर्थं गर्भपदप्रयोगः । तत्र हि वेदाः स्थिराः बुद्धौ तु त्रिक्षणावस्थायिन इति । सिसृक्षयैवाऽहं तोषितः । तत्रापि तदर्थं महान् क्लेशः कृत इति सुतरामेवाऽहं तुष्ट² इति हेत्वन्तरमाह चिरं भृतेन तपसेति । यद्यपि सिसृक्षासम्बन्धव्यतिरेकेण केवलतपसा तोषो न भवति । तथा सति सिसृक्षा तत्रैवाऽङ्गं भवति । तथापि मुख्या सेति पृथग्घेतुत्वम् । तपस्तु सन्तापात्मकं सकृदेवोत्पद्यते । तदेव यदि प्रयत्नेन तिरोभावमप्रापयत् ध्रियते तदोत्कर्षो भवति । विरम्य विरम्य प्रारम्भ³स्तु प्रथमतुल्य एव । अभ्यासेन संस्कारः परं वर्द्धते न तु फलम् । अतस्तद्व्यावृत्त्यर्थमाह—चिरं भृतेनेति । एकमेव तपोमध्ये प्रयत्नान्तररहितं सङ्घातस्य शोषकत्वेनाऽधिकारं सम्पादयत् तोषहेतुर्भवति । सामर्थ्यविशेषं वा । अतो दीर्घकालधरणैकवचनानि तपसि युक्तानि भवन्ति । केवलतपसैव भगवत्तोषमाशङ्क्य प्ररोचनार्थमेव भगवान्वदतीति ब्रह्मणो बुद्धिं परिहर्तुमाह—दुस्तोष इति । तपोधारकत्वेन योगोऽपेक्ष्यते । तपःस्वरूपं चाऽग्रे वक्ष्यते । अतो ये भगवत्कार्यं न कुर्वन्ति ते तपस्विनो न भवन्ति । तेषां योगे तपसोऽभावात् शून्य एव स योगस्तपः सहित इति भ्रमाद्भासते । अतस्ते कूटयोगिन इत्युक्तम् । तेषां दुस्तोषः दुःखेन तोषो यस्य । योगस्य निर्बन्धात्मकत्वात् ते स्वात्मानं पीडयन्तीति तद्दयया निर्बन्धेन सन्तोषः । यथा प्रायोपवेशिनः ॥ १९ ॥ ❀ ❀ एवं स्वसन्तोषमुपपाद्य वरार्थं प्रेरयति—वरं वरयेति । अन्यकामनयैव कार्यं कर्त्तव्यमिति भगवदिच्छा । वरस्तु स्वकामितपदार्थः । कामनया च नाश इति न शङ्कनीयमित्याह—भद्रं त इति । वृतेऽपि वरे मदर्थमेवोपयोगात्तव न कापि चिन्ता । अतस्तव भद्रमेव । वरेशमिति । वरस्तु भगवत्स्वरूपावधिः । तत्राऽन्यस्याऽसामर्थ्यमतोऽहमेव वरेशः अन्ये तु वराभासेशाः कूटयोगिवत् । तत उक्तमभितो वाञ्छितमिति । सर्वथा वरत्वेन प्रतिपन्नम् । ननु पूर्वकृततपसा भवान्प्रसन्नः । एवं पुनस्तपसाऽभीप्सितार्थसिद्धिरपि भविष्यति । किं वरेण ? तत्राऽऽह—ब्रह्मन् श्रेयःपरिश्राम इति । ब्रह्मन्निति सम्बोधनमुक्तार्थसम्बोधनाय । श्रेयोनिमित्तं यः परिश्रामः स तु मद्दर्शनमेवाऽवधिर्यस्य तथोक्तः । पुंसामित्यन्येषामपि । मच्छब्देन च पुरुषोत्तमोऽभिप्रेतो न त्ववतारः । तेन तृतीयस्कन्धे "भूयस्त्वं तप आतिष्ठ" तिवचनं न विरुद्धम् । तस्य पुरुषावतारत्वात् । एवमन्यत्राऽपि ॥ २० ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तं प्रीयमाणमित्यत्र । एतदादीनां षण्णां तात्पर्यं वदन्तः स्वतो भाषणस्याहुः यत्रेत्यादि । अभीप्सितमिति भगवदाशयगोचरम् । प्रारब्धफलसिद्धयर्थमिति कर्त्तुमारब्धं यत्साधनं तत्फलसिद्ध्यर्थम् । प्रोत्साहनमिति करस्पर्शादिना हर्षजननम् । अन्यथात्व इति अन्यतरस्यानभीप्सितत्वे । तथा च, यद्भगवान् प्रोत्साह्य स्वयं भाषितवान्, तेन ब्रह्मापि संहितानां साधनादीनां स्वाभिलषितत्वं ज्ञापितवान् । अभिलषितदानतात्पर्यमाहुः प्रसन्नत्वादित्यादि । ननु प्रेरणाभावे को दोष इत्यत आहुः अन्यथेत्यादि । अन्यथेति प्रेरणाभावे । तथा च, पदार्थान्यथाकरणापत्तिरेव दोष इत्यर्थः । नन्वस्त्वेवं भगवत्कृतिस्तथापि ब्रह्मा भगवद्वक्त्रं प्रसन्नं पश्यन्नपि स्वाभिप्रेतं किमिति न विज्ञापितवानित्यपेक्षायामाहुः अत इत्यादि, अत इति, अन्यथाकरणस्यानभीष्टत्वात् । अतः परं व्याकुर्वन्ति भगवतीत्यादि । ननु स्मितपदेनैव हासमान्द्यप्राप्तौ पुनरीषत्पदस्य किं प्रयोजनमत आहुः सर्वेत्यादि । तथा च, हासस्वरूपाल्पत्वं स्मितपदेनोच्यते, न तु कार्याल्पत्वमतस्तद्बोधनायैतदित्यर्थः । ननु चिदंशत्वेऽविशिष्टत्वेपि मोहस्य जीवत्वापादकत्वाद्भगवता स्मितद्वारा ब्रह्ममोहोत्पादने ईषदपि कृते सोपि जीवतुल्य एव स्यान्नत्वीश्वरकोटावित्यत आहुः यद्यपीत्यादि । यद्यपि स्मितमेवाज्ञाय पर्याप्तम्, तथापि, ब्रह्मण इच्छामात्रेणैव जगद्भविष्यत्यक्लेशेन कृते ब्रह्मणोऽत्यासक्त्यभावादज्ञानकार्यस्याल्पत्वमतो न जीवतौल्यमित्यर्थः । अन्यदपि विशेषमाहुः स्मितमित्यादि । तथा च, स्मितस्वरूपस्य माहात्म्यस्य

---

१. स्नेहहेतुत्वेनेति ग. । २. सन्तुष्ट इति ख. । ३. प्रारम्भः प्रथमेति ख. । ४. दयतोषे इति ख. । ५. भरणेति ख. ग. । ६. परिश्रमः क. ख. घ. ।

( मायात्वस्य ) ज्ञानादपि न जीवतौल्यमित्यर्थः । नन्वेवं मायात्मके तत्स्वरूपे ज्ञाते वैराग्यमेव भविष्यति, न तु सृष्टिरित्यत आहुः परमित्यादि । तथा चातः सृष्टिरित्यर्थः । ननु फलापर्यवसायित्वे स्वरूपज्ञापनस्य किं प्रयोजनमत आहुः भवत्वित्यादि । ननु इदानीं साफल्याभावे इदानीं ज्ञापनस्य किं प्रयोजनमत आहुः फलेऽपीत्यादि । शास्त्रमिति 'ये यथा मामि'ति प्रतिज्ञाशास्त्रम् । उत त्व इत्यादि, त्वशब्दोऽन्यार्थकः । अत्र श्रुतावुत्तरार्द्धानुरोधाद्भागप्रसादप्रयुक्त एव शब्दार्थज्ञानाभावः पूर्वार्द्धे विवक्षित इति ज्ञायते, तद्वदित्यर्थः ।। १८ ।। ❀ ❀ त्वयाहमित्यत्र । भगवत्कार्यकरणे वेदतात्पर्यमित्यत्र गमकमाहुः अत एवेत्यादि । तथा च, भगवत्कार्ये या यज्ञकर्तृव्यापारोक्तिः सैव गमिकेत्यर्थः । नन्वत्र पूर्वश्रुतिद्वयस्य भूतपूर्वार्थानुवादात्तृतीयस्यालौकिकार्थ परत्वाच्चोपपत्तौ कथं तथातात्पर्यावगतिरित्यत आहुः अन्यथेत्यादि । एवं तात्पर्यानुक्तौ वेदानां लोकानधिगतार्थगन्तृत्वाभावेन प्रामाण्याभाव एव स्यादतस्तथा तदनुपपत्त्या एवमवसीयत इत्यर्थः । नन्वर्थवादानां विधेयकर्मस्तुतावेव तात्पर्यात्तेषां स्वार्थेऽप्रामाण्येऽपि नाप्रामाण्यप्रसक्तिरित्याशङ्कायामाहुः अत एवापातत इत्यादि । तथा चैवं पुराणविचारेण सिद्धौ जैमिनीयानां तदंशज्ञानाभावाद्भ्रान्तत्वमेवेत्यर्थः । तत्र हेतुः, तत्रेति चतुर्मुखे । त्रिगुणावस्थायिन इति दर्शनान्तरानुसारेणोक्तम् । अप्रापयदिति । शत्रन्तमिदं णिजत्र स्वार्थे, यथा रामो राज्यमचीकरदित्यादौ । प्रथमतुल्य इति शुष्कतपोवत्तोषाजनक इत्यर्थः । सामर्थ्यविशेषं वेति सम्पादयदिति शेषः । तद्दययेति तद्देहदयया ।। १९ ।। ❀ ❀ वरं वरयेत्यत्र अन्यत्रापीति । यत्रैवं वचनाभावस्तत्रेत्यर्थः ।। २० ।।

## श्रीगिरिधरकृता बालप्रबोधिनी

तस्य भगवतो दर्शनेन य आह्लादस्तेन परिप्लुतं व्याप्तमन्तरमन्तःकरणं यस्य सः अन्तःपूर्ण आनन्दो बहिरप्युद्गत इत्याशयेनाह—हृष्यन्ती रोमाञ्चिता तनुर्यस्य सः प्रेम्णो भरेण आधिक्येन अश्रूणि लोचनेषु यस्य सः विश्वसृक् ब्रह्माऽस्य भगवतः पादाम्बुजं ननाम । तच्चरणकमलप्राप्तिः सुदुर्लभेति सूचयन् विशिनष्टि—यदिति । परमहंसाः परमविवेकिनो भगवद्भक्ताः प्रियः परमहंसानां भागवतपरमहंसदयितकथामित्यादौ तथा निश्वसात् तेषां पन्था भक्तिमार्गः पारमहंस्यस्तेन यथा यत्पादाम्बुजमधिगम्यते प्राप्यते ।। १७ ।। ❀ ❀ तदा ब्रह्मणः प्रियो भगवान् समुपस्थितं सम्यक् तपः क्लेशभयकम्पादिराहित्येन उप समीपे स्थितं तं ब्रह्माणं करे स्पृशन् तत्करग्रहणेन तस्मिन् क्रियाशक्तिं सञ्चारयन् ईषत्स्मितेन मन्दहासेन शोचिर्दीप्तिः शोभा यस्यास्तया गिरा तस्य प्रियं यथा स्यात्तथा बभाषे इत्यन्वयः । तत्र हेतुमाह—प्रीतमना इति । तस्मिन्नतिशयप्रीतियुक्तान्तःकरण इत्यर्थः । 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' इति स्ववाक्यपरिपालनरूपम् । तत्र हेतुमाह—प्रीयमाणमिति, स्वस्मिन्नतिशयप्रीतियुक्तमित्यर्थः । तस्मिन् प्रीतौ हेत्वन्तरमप्याह—प्रजाविसर्गरूपे कार्ये निजशासनार्हणं स्वनियोगयोग्यमिति ।। १८ ।। ❀ ❀ भगवद्भाषणमेव दर्शयति—त्वयेत्यादिना । हे वेदगर्भेति सम्बोधयंस्तस्मिन् ज्ञानशक्तिं सञ्चारयति—सिसृक्षया हेतुना चिरं भृतेन चीर्णेन तपसा साधनभूतेन त्वया कर्त्राऽहं सभ्यक् सम्यक् तोषित इत्यन्वयः । यस्तु मत्प्रीत्यर्थं मदभिप्रेतं करोति स उत्तमो यो मोक्षार्थं साधनान्यनुतिष्ठति स मध्यमो यस्तु भोगेच्छया मदाराधनं करोति सोऽधम इति सूचयन्नधमैः स्वसन्तोषाभावं दर्शयति—कूटं छलं कामना तेन योगो भक्तियोगो येषां तेषां तैरहं दुस्तोषस्तोषयितुमशक्य इत्यर्थः ।। १९ ।। ❀ ❀ एवं स्वसन्तोषं प्रदर्श्य तं वरार्थं प्रेरयति—वरमिति । आदरं सूचयन् सम्बोधयति—हे ब्रह्मन्निति । अभिवाञ्छितं स्वाभीष्टं वरं पदार्थं मा मां प्रति वरय याचस्वेत्यन्वयः । ननु त्वत्तो वरग्रहणे सति बन्धो भविष्यतीति किं तेनेत्याशङ्क्याह—तेन ते तव भद्रं कल्याणमेव भविष्यति, न बन्धः । मदत्तवरस्य बन्धकत्वाभावादिति भावः । कथं त्वमभीष्टं दातुं शक्त इत्यपेक्षायामाह—वरेशमिति । सर्वेषां वराणामीशं स्वामिनमित्यर्थः । एतदेव स्पष्टयति—पुंसां श्रेयसां धर्मार्थकाममोक्षाणामर्थे यः परिश्रामः परिश्रमः साधनानुष्ठानप्रयासः स मद्दर्शनमेवावधिर्यस्य तथाभूतः । मम दर्शने जाते सर्वं दातुं समर्थत्वाद्धर्मादिषु न किमपि दुर्लभं येन पुनः साधनानुष्ठानप्रयासः स्यादिति भावः ।। २० ।।

## हिन्दी अनुवाद

उनका दर्शन करते ही ब्रह्माजीका हृदय आनन्दके उद्रेकसे लबालब भर गया । शरीर पुलकित हो उठा, नेत्रोंमें प्रेमाश्रु छलक आये । ब्रह्माजीने भगवान्‌के उन चरणकमलोंमें, जो परमहंसोंके निवृत्ति-मार्गसे प्राप्त हो सकते हैं, सिर झुकाकर प्रणाम किया ।। १७ ।। ❀ ❀ ब्रह्माजीके प्यारे भगवान् अपने प्रिय ब्रह्माको प्रेम और दर्शनके आनन्दमें निमग्न शरणागत तथा प्रजा-सृष्टिके लिये आदेश देनेके योग्य देखकर बहुत प्रसन्न हुए । उन्होंने ब्रह्माजीसे हाथ मिलाया तथा मन्द मुसकानसे अलंकृत वाणीमें कहा—।। १८ ।। ❀ ❀ श्रीभगवान्‌ने कहा—ब्रह्माजी ! तुम्हारे हृदयमें तो समस्त वेदोंका ज्ञान विद्यमान है । तुमने सृष्टिरचनाकी इच्छासे चिरकालतक तपस्या करके मुझे भलीभाँति सन्तुष्ट कर दिया है । मनमें कपट रखकर योगसाधन करनेवाले मुझे कभी प्रसन्न नहीं कर सकते ।। १९ ।। ❀ ❀ तुम्हारा कल्याण हो । तुम्हारी जो अभिलाषा हो, वही वर मुझसे माँग लो । क्योंकि मैं मुँहमाँगी वस्तु देनेमें समर्थ हूँ । ब्रह्माजी ! जीवके समस्त कल्याणकारी साधनोंका विश्राम—पर्यवसान मेरे दर्शनमें ही है ।। २० ।।

मनीषितानुभावोऽयं मम लोकावलोकनम् । यदुपश्रुत्य रहसि चकर्थ परमं तपः ॥२१॥
[1]प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते । तपो मे हृदयं साक्षादात्माहं तपसोऽनघ ॥२२॥
सृजामि तपसैवेदं ग्रसामि तपसा पुनः । बिभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः ॥२३॥

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

एतच्च मत्कृपयैव त्वया प्राप्तमित्याह । मनीषितमिच्छा तुभ्यमिदं दातव्यमिति या ममेच्छा तस्यानुभावोऽयम् । कोऽसौ तमाह । मम लोकस्यावलोकनं यत् । न चेदं मयैव तपोबलेन प्राप्तमिति स्वातंत्र्यं मन्यस्व तत्प्रवृत्तेरपि मत्कृतत्वादित्याह । रहसि तप तपेति यद्वच उपश्रुत्य परमं तपश्चकर्थ कृतवानसि ॥ २१ ॥ ❀ ❀ तदपि त्वां प्रति मयैवादिष्टमुपदिष्टम् । कदा । तत्र तदा सृष्ट्यारंभे त्वयि कर्मणि कार्येऽर्थे विमोहिते सति । किं च तपो नाम ममैव शक्तिरित्याह । तपो मे हृदयमंतरंगा शक्तिः । आत्मा स्वरूपम् । "यस्य ज्ञानमयं तपः" इति श्रुतेः ॥ २२ ॥ ❀ ❀ ग्रसामि संहरामि । बिभर्मि पालयामि । वीर्यं शक्तिः ॥ २३ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

एतच्च मद्दर्शनं च ॥ २१ ॥ ❀ ❀ विमोहिते किं कर्त्तव्यं कथं कर्तव्यमित्यज्ञातवति सति न केवलं त्वय्येव तपसा सामर्थ्यं भविष्यति किंतु ममापि तदेव शक्तिरित्याह "किञ्चेति । तपसो भगवच्छक्तित्वे प्रमाणमाह यस्येति । यस्य भगवतः ज्ञानमयं ज्ञानप्रचुरज्ञानस्वरूपं वा न तु कायक्लेशसाध्यं तप इति श्रुतिपदार्थः ॥ २२ ॥ ❀ ❀ तदेव स्फुटयति । पदार्थविषयाशेषज्ञानाभावे सर्जनाद्यनुपपत्तेस्तपसैव ज्ञानरूपेण ॥ २३ ॥

### श्रीमद्वीरराघवव्याख्या

मल्लोकदर्शनं मत्प्रसादादेवाभूदित्याह मनीषितेति । लोकस्य वैकुंठलोकस्यावलोकनमित्ययं ममैव मनीषितानुभावः मत्संकल्पानुभाव इत्यर्थः । अनुभावः प्रभावः ममैव तपोबलेन प्राप्तं लोकावलोकनं इत्याशंकायां तव प्रवृत्तेरेव मत्कृतत्वान्न तपसः स्वातंत्र्यमित्याह रहसि यदुपश्रुत्य तप तपेति वच उपश्रुत्य परमं श्रेष्ठं तपश्चकर्थ ॥ २१ ॥ ❀ ❀ तदपि त्वयि कर्मणि जगत्सर्गकर्मणि विमोहिते सति मयैव प्रत्यादिष्टं त्वां प्रत्याभिमुख्येन उपदिष्टमतो ममैवानुभाव इति भावः । तप प्रशंसति तपो मे इत्यादिना ॥ २२ ॥ ❀ ❀ तपसैव सो तप्यत यस्य ज्ञानमयं तप इत्यादि श्रुत्युक्तपूर्वजगदाकारपर्यालोचनरूपतपसैवेदं जगत्सृजामीति तेनैव तपसा ग्रसामि संहरामि बिभर्मि पालयामि विश्वं तपः मे वीर्यं प्रभावः ॥ २३ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या ।

स्वतुष्टिफलमाह वरमिति । पुंसां सर्वश्रेयः परिश्रामः तपआदिसर्वकल्याणानां परिश्रामः परिपाको मद्दर्शनावधिर्मद्विषयावलोक एवावधिः पर्यवसानं यस्य स तथा मद्दर्शनमेव सर्वश्रेयसां फलमिति यतोऽतो मद्दर्शनाख्यसर्वश्रेयः फलवांस्त्वमिष्टं मामपादानीकृत्य वांछितं वरं वरयेत्यन्वयः । ते तुभ्यं भद्रमस्त्विति वरेशमित्यनेन याचितं दातुं समर्थ इति द्योतयति ॥ २१ ॥ ❀ ❀ तपसः कर्तव्यत्वं श्रद्धापयति मनीषितेति । यत्द्व्यक्षरं तप इति वच उपश्रुत्य रहसि मद्गुणालोचनरूपं परमं तपस्त्वं चकर्थ कृतवान् यन्मम लोकावलोकनं ममावलोकनं चायं मय मनीषितस्याभिप्रेतस्य तपसोऽनुभावो महिमेत्यन्वयः ॥ २२ ॥ ❀ ❀ तपसः स्वमनीषितत्वं कथयति प्रत्यादिष्टमिति । तत्र तदा त्वयि कर्मविमोहिते इदं कर्तव्यमित्यजानति सति मया तपः कुर्विति प्रत्यादिष्टं त्वामुद्दिश्योक्तं तस्मान्मनीषितं तप इत्यन्वयः । त्वत्प्रसादजनकं तप एवेति कुतोऽन्यत्किं न स्यादिति तत्राह तप इति । हृदयं प्रियं प्रियं हृदयमुद्रिक्तं कांतमित्यभिधीयत इति । तदुपपादयति साक्षादिति । अहं साक्षात्तपस आत्मा ज्ञानात्मेति यस्मात् ॥ २३ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

मनीषितेत्यर्द्धकम् ॥ २१, २२ ॥ ❀ ❀ तपो मे इति । तपस्तादृशभक्त्यात्मकमेवात्र गृह्यते । तत्तु हृदयं तदावेशित्वेन तत्तादात्म्यापन्नत्वात् तद्रूपमेव । आत्मा आश्रयः तस्य ममैव शक्तित्वात् । तपसैवेति । भक्त्येच्छयैव मम सर्वत्र प्रवृत्तेः । अतो यत्किञ्चिन्मम वीर्यं शक्तिः तपतप एवेति ॥ २३ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

मनीषिणो भावो मनीषिता पाण्डित्यं तस्या अयमनुभावः व्यञ्जकः । मम लोकावलोक एव पाण्डित्यं व्यनक्ति न तु बहुशास्त्राध्ययनाध्यापनादिरित्यर्थः ॥ २१ ॥ ❀ ❀ न केवलमधुनैव त्वयि मम प्रीतिः अपि तु तपसः पूर्व्वमपीत्याह, रहसि तप तपेति यद् वच उपश्रुत्य परमं तपश्चकर्थ कृतवानसि तदपि त्वां प्रति मयैवादिष्टम् । कदा, तत्र तदा सृष्ट्यारम्भे त्वयि कर्माणि । कर्त्तव्ये अर्थे विमोहिते सति ॥ २२ ॥ ❀ ❀ किञ्च तपो नाम ममैव विद्याशक्तिवृत्तिरित्याह तपो मे हृदयमिति । जीवस्य

---

१. प्राचीनप्रतिमें 'प्रत्यादिष्टं मया तत्रसे लेकर 'वीर्यं मे दुश्चरं तपः' तक दो श्लोक नहीं हैं ।

विषयभोगत्याग एव भक्तिानुकूलत्वात् ममेप्सितमित्यर्थः । अतएव प्रसिद्धं मम वचनम्—यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः । इति । तच्च तपो यदि मत्प्राप्त्यर्थकं स्यात्तदैव नान्यथेत्याह तपसोऽहमात्मेति मां विना तपो निरात्मकं मृतकमिव कामिनां स्यादिति । यद्यपि सिसृक्षोस्तवापि तपस्तादृशमेव तथापि सिसृक्षायां मयैव प्रवर्त्तितत्वात् तव तपसश्च मयानुमोदितत्वात् तदिदं तपो निष्काम-कल्पमेवेत्यहं स्वलोकञ्च त्वामदर्शयम् । मम तुह्लादिनीशक्तिपतेर्वैषयिकभोगत्यागः स्वाभाविक इत्यहं सदैव तपस्वीत्याह सृजामीत्यादि तेन तपसः सृष्ट्यादिसामर्थ्यं ममेव किञ्चिद्भवत्विति ध्वनितम् ॥ २३ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

मम लोकस्य दर्शनं त्वया मम प्रसादादेव कृतमित्याह मनीषितेति । मम लोकस्यावलोकनमित्ययं मनीषितानुभावः ममेच्छाया प्रभावः ननु ममैव तपोबलेनैतन्मया प्राप्तमित्यत्र तपसि मयैव भवान्प्रवर्तितो न तत्रापि तव स्वातंत्र्यमित्याह यदिति । यत्तपतपेति वचः रहस्युपश्रुत्य परमं तपश्चकर्थ कृतवान् ॥ २१ ॥ ❀ ❀ तदपि तत्र अवांतरसृष्ट्यारंभे त्वयि कर्माणि कार्येर्थे विमोहिते सति प्रत्यादिष्टं मयैव त्वां प्रत्युपदिष्टम् । तपो ममातिप्रियमित्याह तप इति । हृदयम् अतिप्रियमित्यर्थः । हे अनघ तपसः अहं साक्षादात्मा आश्रयः स्थितिप्रवृत्यादिहेतुरित्यर्थः ॥ २२ ॥ ❀ ❀ इदं विश्वं तपसैवालोचनात्मकेन सृजामि ग्रसामि संहरामि बिभर्मि पालयामि तच्च तपः मे दुस्तरं दुर्लंघ्यं वीर्य्यम् आलोचनात्मिका शक्तिः यस्य ज्ञानमयं तप इति श्रुतेः ॥ २३ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

नन्वन्यथाऽर्थे सिद्धे ईश्वरप्रार्थना न क्रियते । लोके हि कष्टेनाऽपि पदार्थाः साध्यन्त इत्याशङ्क्य न प्रकारान्तरेणाऽयमर्थः सेत्स्यतीति वक्तुं पूर्वं जाता अपि पदार्था न केवलं तपसा जाताः किन्तु मदिच्छयेत्याह—**मनीषितानुभावोऽयमिति** । मनीषितस्य अनुभावः । ममैवेच्छा यद्यं वैकुण्ठं पश्यसीति । अन्यथा अप्राकृतस्य चक्षुषा दर्शनमुपायसहस्रेणाऽपि न भवति । "पराञ्चि खानि व्यतृणत्स्वयम्भूरि" ति श्रुतेश्च । बहिःस्थितोऽपि पदार्थो योग्य एव गृह्यते नाऽयोग्यः । नहि योगिनोऽपि चक्षुषा आकाशं पश्यन्ति । सामर्थ्याधानमप्यर्वाक्पदार्थेषु न त्वक्षरेऽपि वा । ननु मनीषितेऽपि कथमेवम् ? । तपस इच्छायाश्च भगवच्छक्तित्वेन तुल्यत्वात् । तत्राऽऽह—**अनुभावोऽयमिति** । न केवलं मनीषया शक्तितुल्यत्वादिदं कार्यं किन्तु तस्या अनुभावः । सर्वासां शक्तीनां मध्ये इच्छाशक्तिरुत्कृष्टा । सर्वमूलत्वात् । अन्यास्तु तत्साध्याः । अतस्तस्या एवाऽयमनुभा[1]वो मम लोकस्य वैकुण्ठस्याऽवलोकनं दर्शनम् । नन्वेवं सति तपो व्यर्थं स्यात् । तथा सति पूर्वमेव कथं न दर्शनं लोकस्य । अत इच्छोत्पादकत्वेन साक्षाद्दर्शनहेतुत्वेन वा तपोऽवश्यं वक्तव्यमित्याशङ्क्याऽऽह—**यदुपश्रुत्येति** । तपो हि मयैवोपदिष्टम् । यतस्तप तपेति मद्वाक्यं श्रुत्वा । रहसि एकान्ते । उभयत्रैतद्विशेषणम् । परमं तपश्चकर्थ । पूर्वत्र विशेष[2]णत्वे एकान्तवचनत्वात्तत्कथनं विश्वासाय । उत्तरत्र तु गुप्ततयैव तपःकरणं कीर्त्तनेन क्षरणशङ्काभावाय । **परममिति** स्वरूपतः फलतश्चोत्कृष्टम् । इदमपि मनीषितानुभावरूपम् ॥ २१ ॥ ❀ ❀ नन्वेवं सति मनीषा अप्रयोजिका तपसः कृतत्वादित्याशङ्क्याऽऽह—**प्रत्यादिष्टमिति** । कर्मणा विमोहितः कर्मविमोहितः । सृष्टीच्छया व्याप्तो ब्रह्मा प्रयोजनसन्देहेन विमोहितः किं स्वार्थं परार्थं वा कर्त्तव्यमिति । तदा कर्मजनितमोहव्यावृत्त्यर्थं तप उपदिष्टं न तु कार्यार्थम् । कार्यविलम्बस्तु मोहाभावार्थः । एवं तपःप्रयोजनमुक्त्वा तपःस्वरूपमाह—**तपो मे हृदयमिति** । यथा भगवान् षड्गुणस्तथा तपोऽपि षड्गुणम् । तथा सति तस्य षड्गुणत्वे ज्ञाते तपसैव कार्यं भविष्यति किं भगवतेत्याशङ्का निवृत्ता भविष्यति । तपसः षड्गुणानाह । तपो मे हृदयमन्तरङ्गा शक्तिः । हृदयमेव वा । साक्षादिति उपचारनिवृत्तिः । "**यस्य ज्ञानमयं तप**" इति श्रुतेः । ज्ञानात्मकत्वं हृदयस्यैव । मद्धृदयत्वं तस्यैश्वर्यम् । किञ्च । अहमेव तस्यात्मा । मदात्म[3]कत्वं तस्य वीर्यम् । यद्यपि भगवान् सर्वस्याऽऽत्मा तथापि न स्वरूपात्मत्वमत्र विवक्षितं किन्तु कार्यात्मत्वम् । ततश्च यत्किञ्चिदहं कर्तुं शक्तस्तत्सर्वं तपसाऽपि भवति । अतोऽवतारवद्रूपान्तरं तप इत्यर्थः ॥ २२ ॥ ❀ ❀ ननु तथापि न भगवत्तुल्यता । तपसो जगदकर्तृत्वादित्याशङ्क्य उत्पत्तिस्थितिप्रलयकर्तृत्वं तस्याऽऽह—**सृजामीति** । **बिभर्मि तपसा विश्वमित्यन्तेन** । यद्यपि करणत्वं सृष्ट्यादौ, तथापि "**स्वव्यापारे हि कर्तृत्वं सर्वत्रैवास्ति कारक**" इति न्यायेन कर्तृत्वमपि । एवं स्वरूपगुणकार्याणि तस्य निरूपितानि । तथा सति भगवतस्तस्य वा वैयर्थ्यमाशङ्क्याऽऽह—**वीर्यमिति** । तपस्तु मम पराक्रमो धर्मरूपः । न हि कार्यसाधकधर्मेण धर्मी धर्मो वाऽन्यथासिद्धो भवति आश्रयस्य प्रयोजकस्य चाऽवश्यमपेक्षणात् अतस्तपसो मद्रूपत्वात्पूर्वमपि मया स्वस्वरूपमेवोपदिष्टम् । परमेतावान्विशेषः । किञ्चिन्मम स्वरूपं क्रिययाऽभिव्यज्यते किञ्चिज्ज्ञानेनेति । तपस्तु क्रियया । तस्माद्यत्तपसा जायते मदुपदिष्टेन तन्मयैव जायत इति वैलक्षण्यार्थं नाऽतीवाऽऽग्रहः कर्त्तव्यः ॥ २३ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

**मनीषितानुभावेत्यत्र अक्षरात्मकस्येति** । 'अव्यक्तोक्षर इत्युक्त' इतिवाक्यादव्यक्तस्य हेत्वन्तरमाहुः पराञ्चीत्यादि । तथा चायोग्यत्वात्करणकौण्ठ्याच्च भगवदिच्छाभावे कथमपि न दर्शनमतस्तथैव तथेत्यर्थः । एतदेवोपपादयन्ति बहिरित्यादि । तथा

१. भावः लोकस्येति ग. । २. विशेषणं त्वेकान्तेति ख. । ३. मदात्मकं तस्येति ग. ।

चाकाशस्यापि तद्वस्तुस्वभावेनैव ग्रहणम्, न चक्षुः सामर्थ्येनेत्यर्थः । नन्वयोग्यमपि कालरूपं दिव्यचक्षुषार्जुनेन दृष्टम्, तथात्र तपःसामर्थ्येन दर्शनं भविष्यतीत्याशङ्कायामाहुः सामर्थ्येत्यादि ॥ २१ ॥ ❀ ❀ प्रत्यादिष्टमित्यत्र एवं सतीति, तपसः परमत्वे सति । कार्यात्मत्वमिति कार्यव्यापकत्वम् ॥ २२ ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

यन्मम लोकस्य वैकुण्ठस्यावलोकनं त्वया कृतं सोऽप्ययं मम मनीषितस्यायं लोकं पश्यत्विति सङ्कल्पस्यैवानुभावः प्रभावः । न च मया स्वतपोबलेनैव एतदवलोकनं प्राप्तमिति मन्तव्यं, यतो रहसि एकान्ते तप तपेपि वच उपश्रुत्य यत्परमुत्कृष्टं तपश्चकर्थ कृतवानसि ॥ २१ ॥ ❀ ❀ तदपि त्वयि जगन्निर्माणरूपे कर्मणि विमोहिते सति तत्र तदा मयैव प्रत्यादिष्टं त्वां प्रति उपदिष्टमिति सार्धान्वयः । तथा च तव तपसि प्रवृत्तेरपि मत्कर्तृकत्वान्न तपसः स्वातन्त्र्यं किन्तु मदिच्छाया एव स्वातन्त्र्येण तत्र हेतुत्वमिति भावः । यद्यत्र तवेच्छैव कारणं तर्हि तपसि किं प्रवर्तितवानित्याशङ्क्याह—तप इति । तपसाऽपहतपाप्मत्वादेव सपरिकरः स्वलोकः स्वरूपं च प्रदर्शितं, रहस्यं च वदामीति सूचयन् सम्बोधयति—हे अनघेति । यतस्तपो मे हृदयं यथा लोके हृदये गृहीते गृहीतो भवति तथा तपसाऽहमभिव्यक्तो भवामीति मत्प्राप्तिसाधनम् । यतश्च "यस्य ज्ञानमयं" इत्यादिश्रुतेर्ज्ञान-चिदपरपर्यायस्य तपसोऽहं सच्चिदानन्दात्मकः साक्षादात्मा स्वरूपमेव । अतः सर्वदोषनिवर्त्तकं स्वप्राप्तिसाधनं स्वरूपभूतं तपो मया प्रसन्नेन त्वां प्रति उपदिष्टमित्यर्थः ॥ २२ ॥ ❀ ❀ किम्बहुना ? स्वरूपपर्यालोचनात्मकेन तपसैवाहमिदं विश्वं पुनः पुनः सृजामि, बिभर्मि पालयामि ग्रसामि संहरामि च, अतस्तप एव मे मम वीर्यं सामर्थ्यम् । नन्वेवं तर्ह्यन्तोऽपि तपसा सृष्ट्यादि कुर्यादित्याशङ्क्य एवम्भूतस्य तपसो दुष्करत्वमाह—दुश्चरमिति ॥ २३ ॥

## हिन्दी अनुवाद

तुमने मुझे देखे विना ही उस सूने जलमें मेरी वाणी सुनकर इतनी घोर तपस्या की है, इसीसे मेरी इच्छासे तुम्हें मेरे लोकका दर्शन हुआ है ॥ २१ ॥ ❀ ❀ तुम उस समय सृष्टिरचनाका कर्म करनेमें किंकर्तव्यविमूढ़ हो रहे थे । इसीसे मैंने तुम्हें तपस्या करनेकी आज्ञा दी थी । क्योंकि निष्पाप ! तपस्या मेरा हृदय है और मैं स्वयं तपस्याका आत्मा हूँ ॥ २२ ॥ ❀ ❀ मैं तपस्यासे ही इस संसारकी सृष्टि करता हूँ, तपस्यासे ही इसका धारण-पोषण करता हूँ और फिर तपस्यासे ही इसे अपनेमें लीन कर लेता हूँ । तपस्या मेरी एक दुर्लङ्घ्य शक्ति है ॥ २३ ॥

## ब्रह्मोवाच

**भगवन् सर्वभूतानामध्यक्षोऽवस्थितो गुहाम् । वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितम् ॥२४॥**
**त[1]थापि नाथमानस्य ना[2]थ नाथय नाथितम् । परावरे यथा रूपे जानीयां ते त्वरूपिणः ॥२५॥**
**यथाऽऽत्ममायायोगेन नानाशक्त्युपबृंहितम् । विलुम्पन् विसृजन् गृह्णन् बिभ्रदात्मानमात्मना ॥२६॥**
**क्रीडस्यमोघसङ्कल्प ऊर्णनाभिर्यथोर्णुते । तथा तद्विषयां धेहि मनीषां म[3]यि माधव ॥२७॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

अध्यक्षोऽधिष्ठाता । गुहां गुहायां बुद्धाववस्थितः । सन्नप्यपि वेद तथापीत्युत्तरेणान्वयः ॥ २४ ॥ ❀ ❀ नाथमानस्य याचमानस्य उपतप्यमानस्येति वा । हे नाथ नाथय आशंसय प्रयच्छ नाथितं याचितम् । नाथृनाधृयाच्ञोपतापैश्वर्याशीष्षुः । नाथितमेवाह परावरे इति परं सूक्ष्ममवरं स्थूलं च ते रूपं यथा जानीयाम् ॥ २५ ॥ ❀ ❀ यथा च त्वं क्रीडसि तद्विषयां मनीषां मयि धेही-त्युत्तरेणान्वयः । नानाशक्त्युपबृंहितं नानाशक्तिभिरुपचितं विश्वं विलुंपन् संहरन् विविधं सृजन् बिभ्रत्पालयन् आत्मना स्वयमेवात्मानं ब्रह्मादिरूपं गृह्णन्ननुगृह्णन् क्रीडसि ॥ २६ ॥ ❀ ❀ ऊर्णुते तंतुभिरात्मानमाच्छादयति ॥ २७ ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

हे भगवन्निति । अप्रच्युतज्ञानत्वमाह तदेवाह अप्रतिरुद्धेनेति ॥ २४ ॥ ❀ ❀ नाथेति । एतेन स्वस्य शिष्यत्वं हरेर्गुरुत्वञ्चोक्तम् । "द्वे वाव ब्रह्मणो रूपे" इति श्रुतेः ॥ २५ ॥ ❀ ❀ यथेति युग्मकम् । आत्मनो मायायोगो योगमाया च तयोर्द्वन्द्वैक्यं तेन मायया बहिरंगशक्त्या नानाशक्त्युपबृंहितं द्रव्यज्ञानक्रियाशक्तिसमेतं विश्वं विलुंपन्संहरन् विसृजन् विविधं सृजन् बिभ्रत्पालयन् आत्मना स्वयमेवात्मानं गृह्णन्स्वस्वरूपं प्रकटयन् क्रीडसि । ऊर्णुते तंतुसंतानं करोति । योगमायापक्षे

---

१. प्रा० पा०—अथापि । २. प्रा० पा०—नाथनाथ जनार्चित । ३. प्रा० पा०—मम ।

मायिकप्रपंचांतर्वर्तिलोके तत्रैव नानाशक्त्युपबृंहितं ह्लादिन्यादिशक्तिगणपरिपूरितमात्मानं स्वं स्वीयं च वास्तवं वस्तु अनन्यसिद्धत्वादात्मनैव गृह्णन्योगमाययांतरंगशक्त्या तच्च किञ्चिद्विलुंपन्कमपि भक्तं प्रति आवृण्वन् किञ्चिद्विसृजन् विविधं प्रकाशयन् किञ्चिद्विभ्रत्कमपि कालं भूयान् क्रीडसि । ऊर्णनाभिदृष्टांतस्तु स्थूलत उभयत्राप्यात्मैककारणत्वमात्रांशेन ज्ञेयः । मयि धेहि अहं मायां योगमायां तत्तत्प्रकाशितं वस्तु च जानीयामित्यर्थः । तत्र पररूपजिज्ञासायामुत्तरं ज्ञानमित्यादिभिः अवररूपजिज्ञासायामुत्तरं तत्रैव "ऋतेर्थम्" इत्यादिना मायामायिकयोरेकात्मकत्वात् । यथात्ममायायोगेत्यस्य समाधानं यद्रूपगुणकर्मक इत्यनेन भविष्यति । हे माधवेति मायायाः कर्तृत्वेन ज्ञानदाने समर्थमिति भावः ॥ २६ ॥ २७ ॥

### श्रीमद्वीरराघवव्याख्या

एवं भगवतानुगृहीतो ब्रह्मा स्वबुभुत्सितमर्थद्वयं तस्मै निवेदयति भगवन्निति । हे भगवन्सर्वभूतानां गुहां हृदयकुहरमवस्थितोऽधिष्ठितः अतएवाध्यक्षः सर्वेन्द्रियवृत्तिद्रष्टा अत एवाप्रतिरुद्धेन प्रतिहतिशून्येन प्रज्ञानेन चिकीर्षितं साक्षादस्मदादिपरंपरया वा कर्तुमिष्टं यद्यपि वेद जानीहि हीति प्रसिद्धौ ॥ २४ ॥ ❀ ❀ तथापि नाथमानस्य याचमानस्य हे नाथ नाथितं प्रार्थितं नाथय पूरय नाथितमेवाह परावर इति । परं दिव्यात्मस्वरूपमवरं रूपं चिदचिदात्मकमरूपिणः कर्मायत्तप्राकृतरूपरहितस्य ते तव परावरे रूपे यथा जानीयां तथा मनीषां बुद्धिं देहीत्यन्वयः ॥ २५ ॥ ❀ ❀ द्वितीयं नाथितमाह यथेति । नानाशक्त्युपबृंहितः परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रियाचेति श्रुत्युक्तज्ञानबलादिभिरुपबृंहितः युक्तः द्वितीयांतपाठे नानाशक्तिभिः पंचविंशतितत्वात्मकशक्तिभिः उपबृंहितमभिव्यंजितं विश्वमात्ममायायोगेन स्वात्मनः आश्रयशक्तियोगेन आत्मना निमित्तभूतेनात्मना आत्मानं सूक्ष्मचिदचिद्विशिष्टमुपादानं तदात्मान ( ) स्वयमकुरुत इति श्रुत्या आत्मानमित्युपादानत्वस्याकुरुतेति निमित्तत्वस्य चाविधानात् विलुंपन्निति सृष्टेः पूर्वसंहारः गृह्णन्निति पाश्चात्यसंहारः विसृजन्नस्मदादिरूपेण बिभ्रत्पुष्णन् ॥ २६ ॥ ❀ ❀ अमोघसंकल्पः सत्यसंकल्पस्त्वं ऊर्णनाभिर्यथातंतूनूर्णुते आच्छादयति सृजति इति यावत् तद्यथा क्रीडसि तथा तद्विषयां सृष्टिविषयां मनीषां बुद्धिं हे माधव लक्ष्मीनाथ मयि धेहि देह्यर्पयेत्यर्थः ॥ २७ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

तस्मादिदं तपसैव सृजामि । पदार्थविषयाशेषविशेषज्ञानाभावे तदनुपपत्तेः उपसंहरति वीर्यमिति । वीर्यमाहात्म्यं जडोपचितज्ञानत्वात्सुतरामितरेषाम् । इदं तु न तादृशमतो दुस्तरमित्यर्थः । कायक्लेशसाध्येन तपसा सृष्ट्यादिकं चेद्धरेरपि क्लेशित्वमापद्यत इत्याशंका तपःप्रियं सदा विष्णोस्तपसैवाप्यते हरिरित्यादिना परिहृतेति ज्ञातव्यं साक्षादात्मा वीर्यमिति कथनाच्च नहि पूर्णानंदस्य हरेः क्लेशात्मकत्वं युज्यते तस्मात्तपःशब्देन ज्ञानमेवोच्यत इत्यर्थः ॥ २४ ॥ ❀ ❀ वरसादास्यतो ब्रह्मणो हरिं प्रति विज्ञापनप्रकारमाह भगवन्निति । भगवता वरं वरयेति मां प्रति यदादिष्टं तद्विडंबनं मन्ये तथाहि सर्वभूतानां हृदयगुहामध्यक्षोऽवस्थितो भगवानप्रतिरुद्धेनाप्रतिहतेनानेन सर्वेषां चिकीर्षितं वेद हि यस्मात्तस्मान्मच्चिकीर्षितमपि वेत्त्येव ॥ २५ ॥ ❀ ❀ तथापि वरं वरयेति तदाज्ञाकर्तव्यतया वरं याच इति विज्ञापयति अथापीति । नाथमानाय याचमानाय नाथितं याचितं तं वरं नाथय समर्थय नाथृनाधृयाच्ञोपतापैश्वर्याशीःष्विति धातुः कोसौ चित्तीकृतो वर इति तत्राह परावरेति । अरूपिणः प्राकृतरूपरहितस्य तव चिदानंदाद्यात्मकवैराजाख्यं परं रूपं सनवावरणांडाख्यमवरमपररूपमिति द्वे परावरे रूपे यथा येन प्रकारेण जानीयां तथा तद्विषयां मनीषां मयि धेहि आधेहीत्यन्वयः । तुशब्देन ते च रूपे सत्ये इत्यवधारयति द्वे वाव ब्रह्मणो रूप इति श्रुतिसिद्धत्वात् । अनेन कार्यकारणरूपे व्यावर्तयति ॥ २६ ॥ ❀ ❀ किंच यथोर्णनाभिर्लूताकीट ऊर्णामूर्णुते सृजते बिभर्ति च ऊर्णामंडलमध्ये क्रीडति अथवात्मन्येव लुंपति तथात्ममायायोगेन स्वरूपेच्छायोगेनाऽवियोगिन्या श्रिया च जगत्सृजन्नात्मना स्वभावेनात्मानमवतारं गृह्णन् बिभ्रत् पालयन् विलुंपन् क्रीडसि च यथा तथा च तद्विषयां मनीषां धेहीति ॥ नानाशक्त्युपबृंहितोऽमोघसंकल्प इत्याभ्यामूर्णनाभेर्हरेर्वैशिष्ट्यं दर्शयति ॥ २७ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या ।

वेदेति वेत्थेत्यर्थः ॥ २४ ॥ ❀ ❀ अरूपिणः अप्राकृतरूपिणस्तव परं यदप्राकृतं रूपम् अवरं च यत् प्राकृतं ते रूपे ॥ २५ ॥ ❀ ❀ यथेति युग्मकम् ॥ २६ ॥ ❀ ❀ ऊर्णुते तन्तुसन्तानादिकं करोतीत्यर्थः । तद्यथा यथोर्णनाभिर्हृदयादूर्णां सन्तत्य वक्त्रतः । तथा विहृत्य भूयस्तां ग्रसत्येवं महेश्वर ॥ इति तत्र पररूपजिज्ञासायामुत्तरज्ञानमित्यादिभिः अवररूपजिज्ञासायामुत्तरं तत्रैव ऋतेऽर्थमित्यादिना मायामायिकयोरेकात्मकत्वाद् यथात्ममायेत्यस्य समाधनं यद्रूपगुणकर्म्मक इत्यनेन भविष्यति ॥ २७ ॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

गुहायां बुद्धावित्यर्थः । वेद वेत्थ ॥ २४ ॥ ❀ ❀ नाथमानस्य याचमानस्य उपतप्यमानस्येति वा । हे नाथ नाथय आशंसय । नाथितं याचितम् । नाथृनाधृयाच्ञोपतापैश्वर्य्याशीःषु । नाथितमेवाह अरूपिणः प्राकृतं नित्ययोगित्वेन न यस्यास्ति तस्य, नित्ययोगे इति । परे यदप्राकृतं रूपम् अवरञ्च यत् प्राकृतं ते रूपे ॥ २५ ॥ ❀ ❀ आत्मनो माया च योगमाया च तयोर्द्वन्द्वैक्यं तेन । तत्र मायया बहिरङ्गशक्त्या । नानाशक्त्युपबृंहितं द्रव्यज्ञानक्रियाशक्तिसमेतं विश्वं विलुम्पन् संहरन् विसृजन् विविधं सृजन् बिभ्रत् पालयन् आत्मना स्वयमेव आत्मानं गृह्णन् स्वस्वरूपं प्रकटयन् क्रीडसि ऊर्णुते तन्तुसन्तानं करोति । योगमाया-पक्षे मायिकप्रपञ्चान्तर्वर्तिलोके तत्रैव नाना शक्त्युपबृंहितं ह्लादिन्यादिशक्तिगणपरिपूरितम् । आत्मानं स्वं स्वीयञ्च वास्तवं वस्तु अनन्यसिद्धत्वादात्मनैव गृह्णन् योगमायया अन्तरंगशक्त्या तच्च किञ्चिद्विलुम्पन् कमपि भक्तं प्रति आवृण्वन् किञ्चिदविसृजन् विविधं प्रकाशयन् किञ्चिद् बिभ्रत् कमपि कालं पुष्यन् क्रीडसि । ऊर्णनाभिदृष्टान्तस्तु स्थूलत उभयत्राप्यात्मैककारणत्वमात्रांशेन ज्ञेयः । मयि धेहि अहं मायां योगमायाञ्च तत्तत्प्रकाशितं वस्तु च जानीयामित्यर्थः ॥ २६ ॥ २७ ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अध्यक्षः सर्वकरणाधिष्ठाता गुहां हृदयाकाशमवस्थितः सन् अप्रतिरुद्धेन अनर्गलेन प्रज्ञानेन चिकीर्षितं कर्त्तुमिष्टं हि निश्चयेन भवान् यद्यपि वेद वेत्ति ॥ २४ ॥ ❀ ❀ तथापि हे नाथ हे याच्य नाथमानस्य याचमानस्य नाथितं याचितं नाथय प्रयच्छ याचितमेवाह परावरे इति । ते तवाप्राकृतनित्यानंदानंदविग्रहविशिष्टस्य ममाग्रे स्थितस्य अरूपिणः कर्मजन्यरूपरहितस्य परा-वरे विश्वस्य निर्गमप्रदेशस्थानभूते रूपे यथा जानीयां तथा मयि मनीषां धेहीत्यनेनान्वयः ॥ २५ ॥ ❀ ❀ यथा च परास्य शक्ति-र्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतिप्रोक्तं नानाशक्त्युपबृंहितमात्मानमुपादानरूपम् । आत्मना निमित्तरूपेण तदा-त्मानं स्वयमकुरुतेति श्रुत्यैव आत्मानमित्युपादानत्वस्य कुरुतेति तिमित्वस्य च दर्शितत्वात् आत्ममायायोगेन स्वशक्तिविशेषत्रिगुणा-त्मकप्रकृतियोगेन प्रकृतिमहदहंकारादिक्रमयोगेनेत्यर्थः ॥ अर्थान्मायामपि ब्रूहीति प्रश्नः । विसृजन् विविधं कुर्वन् चिदचिच्छक्तिमंत-मात्मानं विश्वाकारं कुर्वन्नित्यर्थः । बिभ्रत् पालयन् यथोपयोगं नानाविधानि रूपाणि गृह्णन् विलुंपन् संहारं कुर्वन् यथा च क्रीडसि तथा तद्विषयां मयि धेहीत्यनेनैवान्वयः ॥ २६ ॥ ❀ ❀ यथोर्णनाभिः ऊर्णुते तंतून् आच्छादयति सृजति स्वसृष्टैस्तंतुभिर्गृहं-निर्माय्य क्रीडतीति यावत् तद्वत् अमोघसंकल्पः सत्यसंकल्पस्त्वं क्रीडसि तथा तद्विषयं भगवद्गुणस्वरूपसृष्ट्यादिलीलाविषयां बुद्धिं ज्ञानं मयि धेहि अर्पय ॥ २७ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं सोपपत्तिकवरप्रार्थनायामाज्ञप्तो ब्रह्मा आज्ञापने प्रतीतं दोषं परिहृत्य वरं प्रार्थयते—**भगवन् सर्वभूतानामित्यादि** पञ्चभिः । चत्वारोऽर्थाः प्रार्थनीयाः । दोषपरिहारार्थं चाऽऽद्यः । तमाह—हे भगवन् । पूर्वं सहसा भगवद्दर्शनेनाऽऽगतसाध्वसोऽ-समर्थो जातः । इदानीं भगवद्वाक्येन स्पर्शेन च सावधानः सोपपत्तिकं वदति—**भगवन्निति** सम्बोधनं स्वरूपपरिज्ञापकम् । त्वं हि सर्वान्तरात्मा सर्वेषां हृदयं जानासि । अतो यन्ममाऽभिप्रेतं तत्तव ज्ञातमेव । तथा च ज्ञातृज्ञापनं पिष्टपेषः । तथापि याचितमेव देयमिति यदि । अथवा । न ज्ञायतेऽस्य तत्त्वं किमित्येवमाह भगवानिति । तस्मिन्नपि पक्षे भगवदाज्ञा कर्त्तव्येति प्रार्थनमावश्य-कम् । तद्वक्ष्यति—**तथापीति** । सर्वभूतानामध्यक्षः । सर्वकार्येषु प्रेरको नियामको वा । यथा लोके कर्माध्यक्षस्तथा भगवान् सर्वाध्यक्षः । अनेन भगवदाज्ञाव्यतिरेकेण न कस्याऽपि कोऽपि धर्मोऽन्तर्बहिर्वोत्पद्यते । अतः कामनाऽप्युत्पन्ना त्वयैवोत्पादितेति तत्पूरणमपि त्वयैव कर्त्तव्यमिति न मम भारः । स्वपुत्रान् हि सर्व एव पुष्णन्ति । किञ्च **गुहामवस्थितः** हृदयाकाशमधिष्ठाय स्थितः । अतः सर्वं तव विदितम् । किञ्च । चिकीर्षितमपि **भवान् वेद** । यतोऽप्रतिरुद्धेन कालादिभिः प्रतिरोधो यस्य ज्ञानस्य नास्ति । कार्य-बोधने उत्पत्तौ वा प्रत्यासत्त्यर्थं वा केनाऽप्यंशेन प्रतिरोधो नास्ति । अतो ज्ञातत्वाद् ज्ञानोत्पत्तिस्थान एव विद्यमानत्वादिच्छाया[1]-श्चोत्पादकत्वाद्भगवता न प्रष्टव्यं न वा वक्तव्यं तथापि तवाऽऽज्ञापरिपालनार्थं कथयिष्यामीत्याह—**तथापीति** । परमेकमेव प्रार्थ्यते । याचितं देयं न तु युक्तमयुक्तं वेति विचारणीयम् । तदाह— **नाथितो नाथयेति** "नाथृ" याच्ञायाम् । अतो नाथितं याचितम् । नाथय प्रयच्छ । अवश्यदाने हेतुः—**हे नाथेति** । स्वामी हि सेवकेभ्यः प्रयच्छत्येव । अनन्यगतिकत्वात्तेषाम् । एवं प्रार्थयित्वा प्रथमं द्वयं प्रार्थयते—**परावरे यथा रूपे इति** । ममायं महान् सन्देहः कस्त्वं परः कोऽपर इति । किंवा तव पुरुषोत्तमरूपं किंवेदं परिदृश्यमानमिति । एते परावरे रूपे । पुरुषोत्तमाक्षररूपे आविर्भूतानाविर्भूतरूपे अवतारावतारिरूपे वा यथा जानीयां तथा वरो देयः । नन्वेतानि रूपाणि वेद एव प्रसिद्धानि वेदानुसन्धानादेव ज्ञातव्यानि किमिति वरत्वेन प्रार्थ्यते ? तत्राऽऽह—ते त्वरू-

---

1. श्चोदकत्वादिति घ.

पिण इति । तु शब्दः पक्षं व्यावर्त्तयति । न तद्रूपमस्तीश्वरे यन्न वेदे श्रुतमस्तीत्येकस्येश्वरस्य सर्वाणि रूपाणि वेदे प्रतिपाद्यन्ते । अन्ये वीर्यादयः पञ्च । भगवांश्चाऽनुक्त एव तिष्ठति । तस्मादेतानि षडपि न पृच्छ्यन्ते साम्प्रतम् । किञ्च । मूलरूपस्य धर्माकारेणाऽप्यजातस्य यत्परं रूपं, यद्वा सर्वरूपेण जातस्य पश्चाज्जायमानमपरं रूपं ते ज्ञातुं प्रार्थयामीत्यर्थः । अनेनाऽऽद्यन्तरूपपरिज्ञानं भवति । तथा च सत्येतावत्कर्त्तव्यमिति ज्ञातं स्यात् । तच्च ज्ञानं कर्माङ्गमिति प्रसिद्धम् । एवमाद्यन्तरूपज्ञानं प्रार्थयित्वा मध्यस्थानि सर्वाण्येव रूपाणि ज्ञातुं प्रार्थयते । तथा सति तत्तदुपयोगार्थं सृष्टिकरणं सुगमं स्यात् सृष्टिज्ञानं तु पूर्वमेव वर्तत इति न तत्प्रार्थयते । सिसृक्षायां वा प्रार्थयिष्यते अंशभेदेन । यथा आत्मनः स्वस्य पुरुषोत्तमस्य माया कार्यकारणरूपिण्यनन्ता । तस्याः सर्वतो योगेन तस्यास्त्रिगुणत्वात्तत्सम्बन्धेन नानाभावमुत्पत्त्यादिरूपं च तेनोपबृंहितमात्मानं विसृजन् विशेषेण कुर्वन् । गृह्णन् बिभ्रत् । आत्मानमेव गृह्णन्नुत्पन्नमात्मसात्कुर्वन् । बिभ्रत् आत्मानमेवोत्पन्नं भाररूपं स्वयमेव धारयन् । यदा पुनर्भारं वोढुं नेच्छति तदा विशेषेण लुम्पन् स्वयमेव कर्तृकर्मकरणरूपः क्रीडसि । तथा क्रीडाज्ञानं ममाऽस्त्विति प्रार्थना । तथा सति कृतिः सुगमा भवति । ननु भगवानेव यदि सर्वं करोति तदा ब्रह्मणा किं कर्त्तव्यमित्याशङ्क्याऽऽह—अमोघसङ्कल्प इति । अमोघः सङ्कल्पो यस्य । सङ्कल्पमात्रेणैव भगवान् करोति । कृत्या तु मया कारयतीत्यर्थः । नन्वेक एव कथमनेकानि रूपाणि करोत्यतो ब्रह्मादिरूपाणि स करोतीति मन्तव्यमित्याशङ्क्याऽऽह दृष्टान्तेन—ऊर्णनाभिरिति । यथोर्णनाभिः साधनान्तरनिरपेक्षः स्वरूपभूतयैवोर्णया क्रीडति ऊर्णामेवोत्पादयति स्थापयति भक्षयति च । तथा भगवानप्यात्मानं करोति । कृतिमात्रे दृष्टान्तः । स्वरूपं त्वज्ञातमेव । दृष्टान्ते तु ऊर्णारूपमेव सृज्यादिभावं प्राप्नोति न तूर्णनाभिः । आश्रयं चाऽपेक्षते । दुष्टत्वं चोत्पादितस्य भवति । अतस्तस्य स्वरूपं ज्ञातव्यम् । अन्यानपेक्षतामात्रे दृष्टान्तः । नाऽपि तस्य सर्वानपेक्षता । देशादीनामपेक्षितत्वात् । अतो दृष्टान्तमात्रेण ज्ञानं न भवतीति भवानेव तत्सम्पादयत्विति प्रार्थयते—तथा तद्विषयां धेहीति । भगवान्करोतीत्यविवादम् । श्रुतिरपि कृतिमेवाऽऽह न तु स्वरूपम् । अतस्त्वमेव तां मनीषां बुद्धिं धेहि मयि स्थापय । न तूपदेशेन तत्सिद्धिरिति भावः । मदुक्तं पित्रा भवता कर्त्तव्यमेवेति सम्बोधयति—माधवेति ॥ २५-२७ ॥

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।**

**तथापीत्यत्र, परमिति** । असङ्गोदासीनमेकमित्यर्थः । त इति उभे रूपे ॥ २५ ॥ ❀ ❀ **क्रीडसीत्यत्र** । ननूर्णनाभिदृष्टान्तेन सृष्टिप्रकारविशिष्टो भगवान् ज्ञात एवेति स्वरूपज्ञानप्रार्थनस्य किं प्रयोजनमत आहुः कृतीत्यादि । **अत इति** दृष्टान्तमात्रेण स्वरूपाज्ञानात् । तद्व्युत्पादयन्ति अन्येत्यादि ॥ २७ ॥

**श्रीगिरिधरकृता बालप्रबोधिनी**

एवं वरग्रहणे प्रचोदितो ब्रह्माऽऽह—भगवन्निति । हे भगवन् यतस्त्वं सर्वभूतानां गुहां हृदयकुहरमवस्थितः अतः अध्यक्षः सर्वेन्द्रियवृत्तिनियन्ता तद्द्रष्टा च अतएवाप्रतिरुद्धेन अविद्यादिप्रतिरोधरहितेन प्रकृष्टज्ञानेन सर्वेषां मम च चिकीर्षितं कर्तुमिष्टं यद्यपि वेद हि जानास्येव तथापीत्युत्तरेणान्वयः ॥ २४ ॥ ❀ ❀ यद्यपि ममाभीष्टं ज्ञात्वा स्वयमेव तद्दास्यसि तथापि वरं वरयेति तवाज्ञापालनं परमो धर्मः स्वामित्वादिति द्योतयन् सम्बोधयति—हे नाथेति । नाथमानस्य याचमानस्य मम नाथितं याचितं नाथय देहि । नाथृनाधृयाच्ञोपतापैश्वर्याशीःषु । नाथितमेवाह—परावरे इति । परं सूक्ष्मं, अवरं स्थूलं, अरूपिणः कर्माधीनस्वरूपरहितस्य ते स्थूलसूक्ष्मे रूपे यथा त्वहं जानीयां तथा तद्विषयां मनीषां बुद्धिं मयि धेहि स्थापयेति तृतीयेनान्वयः ॥ २५ ॥ ❀ ❀ यथाऽऽत्ममायायोगेन आत्मना स्वेच्छयैवात्मानमरादिरूपं गृह्णन् नाना पञ्चविंशतितत्त्वात्मिकाभिः शक्तिभिरुपबृंहितं विश्वं विसृजन् उत्पादयन् बिभ्रत् पालयन् विलुम्पन् संहरन् क्रीडसि तथा तद्विषयां मनीषां यथार्थबुद्धिं मयि धेहीति द्वयोरन्वयः ॥ २६ ॥ ❀ ❀ नन्वेकेनासहायेन कथमेवं क्रीडां कर्तुं शक्यते इत्याशङ्क्य दृष्टान्तेन साधयति—ऊर्णनाभिर्यथोर्णुते इति । ऊर्णनाभिः कीटविशेषो यथैकः असहाय एव ऊर्णुते तन्तून् विस्तारयति तत्र क्रीडति च तान् संहरति च तथेत्यर्थः । तथापि तद्वन्महान्प्रयासः स्यादित्याशङ्क्य तदपि सृष्ट्यादिकरणं सङ्कल्पमात्रेणेति सूचयन् विशिनष्टि—अमोघसङ्कल्प इति, सत्यसङ्कल्प इत्यर्थः । मयि तथाबुद्धिस्थापने तव सामर्थ्यमस्ति बुद्धेर्लक्ष्मीविभूतित्वात्तव च लक्ष्मीपतित्वादित्याशयेन सम्बोधयति—हे माधवेति ॥ २७ ॥

**हिन्दी अनुवाद**

ब्रह्माजीने कहा—भगवन्! आप समस्त प्राणियोंके अन्तःकरणमें साक्षीरूपसे विराजमान रहते हैं। आप अपने अप्रतिहत ज्ञानसे यह जानते ही हैं कि मैं क्या करना चाहता हूँ ॥ २४ ॥ ❀ ❀ नाथ! आप कृपा करके मुझ याचककी यह माँग पूरी कीजिये कि मैं रूपरहित आपके सगुण और निर्गुण दोनों ही रूपोंको जान सकूँ ॥ २५ ॥ ❀ ❀ आप मायाके

१. किन्त्विति क. ख. । २. लोकप्रसिद्धमिति ख. । ३. शिक्षायां वेति ख. । ४. चापेक्ष्यत इति ख. । ५. मात्रेणेति घ. । ६. अस्मिन्नर्थे आत्मनेपदमार्षम् । नाथमानस्य उपतप्यमानस्य वेति श्रीधरस्वामी व्याचख्यौ । ७. मायाः लक्ष्म्याः धवः पतिर्माधवस्तत्सम्बुद्धौ ।

स्वामी हैं, आपका सङ्कल्प कभी व्यर्थ नहीं होता। जैसे मकड़ी अपने मुँहसे जाला निकालकर उसमें क्रीड़ा करती है और फिर उसे अपनेमें लीन कर लेती है, वैसे ही आप अपनी मायाका आश्रय लेकर इस विविध शक्तिसम्पन्न जगत्‌की उत्पत्ति, पालन और संहार करनेके लिएअपने आपको ही अनेक रूपोंमें बना देते है और क्रीड़ा करते हैं। इस प्रकार आप कैसे करते हैं—इस मर्मको मैं जान सकूँ, ऐसा ज्ञान आप मुझे दीजिये ॥ २६-२७ ॥

**भगवच्छिक्षितमहं करवाणि ह्यतन्द्रितः । नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात् ॥२८॥**

**यावत् सखा सख्युरिवेश ते कृतः प्रजाविसर्गे विभजामि भो जनम् ।**
**अविक्लवस्ते परिकर्मणि स्थितो मा मे समुन्नद्धमदोऽजमानिनः ॥२९॥**

**श्रीभगवानुवाच**

**ज्ञानं परमगुह्यं मे यद् विज्ञानसमन्वितम् । सरहस्यं तदङ्गं च गृहाण गदितं मया ॥३०॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तत्किं सृष्टेरुद्विग्न एव तत्त्वज्ञानं प्रार्थयसे नेत्याह। भगवता त्वया शिक्षितमनुशिष्टमतंद्रितोऽनलसः सन् करिष्यामि। तर्हि किमनेन तत्त्वज्ञानेन तत्राह। यस्मादेवंभूतात्तवानुग्रहात्प्रजासर्गमीहमानः कुर्वन्नप्यहंकारादिभिर्बद्धो न भवेयमिति ॥ २८ ॥ ❀ ❀ अवश्यं च मदो भविता स तु कंचित्कालं माभूदिति प्रार्थयते। यावदिति। भो ईश ते त्वया लौकिकस्य सख्युः सखेवाहंकृतः करस्पर्शनादिना ममत्वेन संमानितः सन्प्रजासर्गरूपे तव परिकर्मणि सेवायां स्थितोऽविक्लवोऽव्याकुल एव। यावज्जनं विभजाम्युत्तममध्यमादिभेदेन सृजामि तावत्त्वत्संमाननादहमप्यजः स्वतंत्र इति मानिनो मे समुन्नद्ध उत्कटो मदो माभूत्। यद्वा। मदो मा समुन्नद्ध मा समुन्नह्यताम्। कर्मणि लुङ्। उद्रिक्तो न भवेदित्यर्थः ॥ २९ ॥ ❀ ❀ ज्ञानं शास्त्रोक्तम्। विज्ञानमनुभवः। रहस्यं भक्तिः। सुगोप्यमपि वक्ष्यामीत्यादिनिर्देशात् तस्यांगं साधनम् ॥ ३० ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

भगवच्छिक्षितमित्यत्रोपदेश एतन्मतं समातिष्ठेत्यादिना भविष्यति ॥ २८ ॥ ❀ ❀ मनोवांछितं प्रार्थयते—यावदिति। हे ईश सर्वं कर्तुं समर्थेति भावः। सखेव कृत इति सख्यभक्तिमेव प्राप्नुयामिति। किञ्च स्रष्टृत्वावस्थानंतरं यावदधिकारमवस्थितिराधिकारिकाणामिति न्यायेन मुक्तिरेव भविष्यतीति भावः। संभवत्वादाह यद्वेति। इत्यर्थ इति। आत्मनेपदमार्षम्। नह धातोर्लुङि प्रथमपुरुषैकवचनं "न माङ्योगे" इत्यडभाव इति भावः ॥ २९ ॥ ❀ ❀ अथ तत्र परमभागवताय ब्रह्मणे श्रीभागवताख्यं निजं शास्त्रमुपदेष्टुं तत्प्रतिपाद्यतमं वस्तुचतुष्टयं प्रतिजानीते ज्ञानमित्यादिषट्कं मम भगवतो ज्ञानं शब्दद्वारा याथार्थ्यनिर्द्धारणं मया गदितं सद्गृहाणेत्यन्यो न जानातीति भावः। यतः परमगुह्यं ब्रह्मज्ञानादपि रहस्यतमं "मुक्तानामपि सिद्धानाम्" इत्याद्युक्तेः। तच्च विज्ञानेन तदनुभवेनापि युक्तं गृहाण न चैतावदेव किन्तु सुरहस्यं तत्रापि रहस्यं यत्किमप्यस्ति तेनापि सहितं तच्च प्रेमभक्तिरूपमित्यग्रे व्यंजयिष्यते तथा तदंगं च गृहाण तच्च सति त्वपराधाख्यविघ्ने नष्टे झटिति विज्ञानरहस्ये प्रकटयेत्। तस्मात्तस्य ज्ञानस्य सहायं च गृहाणेत्यर्थः। तच्च श्रवणादिभक्तिरूपमित्यग्रे व्यंजयिष्यते। यद्वा। सरहस्यमिति तदंगस्यैव विशेषणं ज्ञेयं सुहृदाविव मिथः संवर्द्धकयोरेकत्रावस्थानादिति संदर्भः। विश्वनाथः। तत्र परावरे यथारूपे जानीयामित्यनेन तवाप्राकृतं रूपं प्राकृतं च रूपं कीदृशमिति यथात्ममायायोगेनेत्यनेन तव माया योगमाया च कीदृशीति यथा क्रीडसीति मायाधिकृतेषु योगमायाधिकृतेषु च लोकेषु तव केन प्रकारेण क्रीडेति भगवच्छिक्षितमहं करवाणि ह्यतंद्रित इत्यनेन मदभीष्टसिद्ध्यर्थं तच्छिक्षितं किं मम कर्तव्यमिति ब्रह्मणा क्रमेण दृष्टस्य वस्तुचतुष्टयस्य चतुःश्लोक्या क्रमेणैवोत्तरं दातुं भगवान्प्रतिजानीते–ज्ञानमिति। एतदेव भगवद्दत्तोत्तरचतुष्टयात्मकमेव श्रीभागवतं शास्त्रं भगवत्प्रोक्तत्वेन प्रसिद्धमित्याहुः। न केवलं मद्रूपस्य ज्ञानमेव तुभ्यं ददाम्यपि तु विज्ञानेनानुभवेन समन्वितं यत्तदपि। किञ्च परमगुह्यं निर्विशेषब्रह्मज्ञानादपि श्रेष्ठत्वादिति भावः। किञ्च रहस्यं प्रेमभक्तिञ्च स प्रसिद्धस्त्वं गृहाण सुगोप्यमपि वक्ष्यामीत्यादिनिर्देशात्तस्य रहस्यत्वं ज्ञेयं तस्य रहस्यस्यांगं साधनभक्तियोगस्तं चेति त्वयाऽपृष्टमप्येतत्त्रयं कृपयैव वक्ष्यामि किं वा भगवच्छिक्षितमहं करवाणीत्यनेनैवैतत्त्रिकमपि त्वया पृष्टमेवेति चतुर्थश्लोक एव रहस्यत्वाद्बहिरंगलोकागम्यतयैव वक्ष्यामि अत्र रहस्यतदंगयोरेतयोर्नामाग्रहणं प्रथमोक्ताद् ब्रह्मज्ञानादप्यतिगोप्यत्वमुत्कृष्टत्वञ्च बोधयतीति ज्ञेयं मया निगदितं गृहाणेत्यवदधानमपि ब्रह्माणं विशेषतोऽवधापयति ॥ ३० ॥

### श्रीमद्वीरराघवव्याख्या

अन्यदपि प्रार्थयते भगवन्निति। हे भगवन् शिक्षितं त्वया प्रदर्शितप्रकारं प्रजासर्गमतंद्रितः अनलसः सन् करवाणि एवमीहमानः कुर्वाणः यदनुग्रहाद्यस्य भगवतोनुग्रहान्न बध्येयं बद्धो न भवेयं तथानुगृह्णीष्वेत्यर्थः ॥ २८ ॥ ❀ ❀ अवश्यं

प्रजाः सृजतो मे मदो भविता स माभूदिति प्रार्थयते यावदिति । भो हे भगवन् ते त्वया लौकिकस्य सख्युः सखेवाहं कृतः करस्पर्शादिना संमानितः प्रजाविसर्गे प्रजासर्गरूपे परिकर्मणि परिचर्यायां अविक्लवः धीरः अव्याकुलः एव यावज्जनं विभजामि उत्तममध्यमादिभेदेन सृजामि तावत्त्वत्परिचर्यावधिः अजमानिनः जगत्स्रष्टारं मां मन्यमानस्य मे मम समुन्नद्धमदः प्रभूतमदः स त्वत्प्रसादान्मा भूदित्यर्थः ॥ २९ ॥ ❀ ❀ एवं प्रार्थितो भगवान् तमनुगृह्णन्परावररूपप्रकाशकं चतुश्श्लोक्यात्मकं भागवतमाह ज्ञानमिति । ज्ञानं प्राधान्येन ज्ञातव्यं भगवत्स्वरूपविषयकं ज्ञानं तदंगमप्रधानतया ज्ञातव्यचिदचित्स्वरूपविषयकं च ज्ञानं मया गदितं तत् मे मत्तः गृहाण कथंभूतं ज्ञानं परमगुह्यमतिगोप्यं विज्ञानसमन्वितं विज्ञायतेऽनेनेति विज्ञानं शास्त्रं योगश्च ताभ्यां सहितं सरहस्यं समंत्रकम् ॥ ३० ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

तादृशमनीषाप्रयोजनमाह भगवच्छिक्षितमिति । यदनुग्रहाद्यस्या मनीषाया आनुकूल्येन ग्रहणादतंद्रितोऽहं भगवता शिक्षितं करवाण्यथ यदनुग्रहाच्च प्रजासर्गमीहमानः कुर्वाणो न बध्येयं तादृशीं मनीषां यस्य भगवतोऽनुग्रहाच्च न बध्येयं तेन भगवता शिक्षितमेवं करवाणीति वरांतरप्रार्थनं वा ॥ २९ ॥ ❀ ❀ इदानीं बंधमूलाहंकारनाशं प्रार्थयते इत्याह यावदिति । ईदृशो यथा सखा राजादिः स्वोक्तकारिणः सख्युर्जनपदाद्यधिकारं ददाति तथा ते त्वया—प्रजाविसर्गे कृतोऽधिकृतोऽविक्लवस्त्वत्प्रसादादहं न्यहीनस्ते तव परिकर्मणि जगत्सृष्ट्यादिशुश्रूषाकर्मणि स्थितोऽहं यावद्रुद्रादिप्रजानां त्वदाज्ञया तवेदं पदं तवायं भोग इत्यादिरूपं भोजनं विभजामि विभज्य विभज्य ददामि तावन्मच्छतायुःपर्य्यन्तमजमानिनः आत्मविलक्षणात्त्वज्जातोऽहं—इत्यभिमानवतो मे समुन्नद्धमदः समुत्पन्नोहंकारो जगतः स्रष्टाहमित्यादिलक्षणो मा भूदित्यन्वयः । भो स्वामिन्यथासख्युर्व्यापारेऽधिकृतसखा तात्पर्यात्तत्कार्यं करोति तथाहमपि त्वत्प्रजासर्गेऽधिकृतो यावज्जन्यत इति जनोजन्यपदार्थस्तं विभजामि सुरनरतिर्यगादिरूपेणोत्पादयामि तावत्समुन्नद्धमदो मा भूदिति वा ॥ ३० ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

भगवच्छिक्षितमित्यत्रोपदेश एतन्मतं समातिष्ठेत्यादिना भविष्यति ॥ २८ ॥ ❀ ❀ यावदिति स्रष्टृत्वावस्थानानन्तरं तु यावदधिकारिकाणामिति न्यायेन मुक्तिरेव मम भविष्यतीति भावः ॥ २९ ॥ ❀ ❀ अथ तत्र परमभागवताय ब्रह्मणे श्रीमद्भागवताख्यं निजं शास्त्रम् उपदेष्टुं तत्प्रतिपाद्यतमं वस्तुचतुष्टयं प्रतिजानीते ज्ञानमित्यादिषटकम् मे मम भगवतो ज्ञानं शब्दद्वारा याथार्थ्यनिर्द्धारणं मया गदितं सत्गृहाण इत्यन्यो न जानातीति भावः । यतः परमगुह्यं ब्रह्मज्ञानादपि रहस्यतमं, मुक्तानामपि सिद्धानामित्यादेः तच्च विज्ञानेन मदनुभवेनापि युक्तं गृहाण न चैतावदेव किञ्च सरहस्यं तत्रापि रहस्यं यत् किमप्यस्ति तेनापि सहितम् । तच्च प्रेमभक्तिरूपमित्यग्रे व्यञ्जयिष्यते तथा तदङ्गञ्च गृहाण तच्च सतित्वपराधाख्ये विघ्ने न क्वचिति विज्ञानरहस्ये प्रकटयेत् तस्मात्तस्य ज्ञानस्य सहायञ्च गृहाणेत्यर्थः । तच्च श्रवणादिभक्तिरूपमित्यग्रे व्यञ्जयिष्यते यद्वा सरहस्यमिति तदङ्गस्यैव विशेषणं ज्ञेयं सुहृदोरिव मिथः संवर्द्धकयोरेकत्रावस्थानात् ॥ ३० ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

किञ्च भगवता शिक्षितं करवाणीति कामपि स्वभजनशिक्षां गुरुः शिष्यायैव मह्यं देहीति भावः । यतस्त्वदनुग्रहात् प्रजासृष्टिम् ईहमानः कुर्वन्नपि अहंकारादिभिर्न बध्येयं बद्धो न भवेयम् ॥ २८ ॥ ❀ ❀ मनोवाञ्छितमभिव्यञ्जयन् प्रार्थयते यावदिति । हे ईश ते त्वया सख्युः सखेव दासाभासोऽप्यहं कृतः करस्पर्शादिना व्यवहृतः अतः सख्यभक्तिमेवाहं प्राप्नुयामिति । किञ्च यावदधिकारमवस्थितिराधिकारिकाणामिति न्यायेन स्वायुःपर्य्यन्तं यावत् प्रजानां विसर्गे विविधसृष्टौ भोः परमेश्वर जनं विभजामि उत्तमाधममध्यमभेदेन विभक्तं करोमि । कीदृशः ते तव परिकर्मणि परिचर्य्यायाम् अविक्लवोऽव्याकुलः सावधानतया स्थितः सन्नित्यर्थः । तावत् समुन्नद्ध उत्कटो मदो मे मम माभूत् ॥ २९ ॥ ❀ ❀ अत्र परावरे यथा रूपे जानीयामित्यनेन तव अप्राकृतं रूपं प्राकृतञ्च रूपं कीदृशमिति, यथात्ममायायोगेनेत्यनेन तव माया योगमाया च कीदृशीति, यथा क्रीडसीति मायाधिकृतेषु योगमायाधिकृतेषु च लोकेषु तव केन प्रकारेण क्रीडति, भगवच्छिक्षितमहं करवाणि ह्यतन्द्रितः इत्यनेन मदभीष्टसिद्धयर्थं त्वच्छिक्षितं किं मम कर्त्तव्यमिति ब्रह्मणा क्रमेण पृष्टस्य वस्तुचतुष्टयस्य चतुःश्लोक्या क्रमेणैवोत्तरं दातुं भगवान् प्रतिजानीते ज्ञानमिति एतदेव भगवद्दत्तोत्तरचतुष्टयात्मकमेव श्रीभागवतं शास्त्रं श्रीभगवत्प्रोक्तत्वेन प्रसिद्धमित्याहुः । न केवलं मद्रूपस्य ज्ञानमेव तुभ्यं ददामि अपि तु विज्ञानेनानुभवेन समन्वितं यत् तदपि । किञ्च परमगुह्यं निर्विशेषब्रह्मज्ञानादपि श्रेष्ठत्वादिति भावः । किञ्च रहस्यं प्रेमभक्तिञ्च स प्रसिद्धस्त्वं गृहाण सुगोप्यमपि वक्ष्यामीत्यादिनिर्देशात् तस्य रहस्यत्वं ज्ञेयम् । तस्य रहस्यस्यांगं साधनभक्तियोगस्तञ्चेति त्वया अपृष्टमपि एतत्त्रयं कृपयैव वक्ष्यामि किंवा भगवच्छिक्षितमहं करवाणीत्यनेनैवैतत्त्रिकमपि त्वया पृष्टमेवेति चतुर्थश्लोक एव रहस्यत्वाद्बहिरंगलोकागम्यतयैव वक्ष्यामि अत्र रहस्यतदंगयोरेतयोर्नामाग्रहणं

प्रथमोक्तात् परमगुह्यतज्ज्ञानादप्यतिगोप्यत्वम् उत्कृष्टत्वञ्च बोधयतीति ज्ञेयम् । मया गदितं गृहाणेत्यवदधानमपि ब्रह्माणं विशेषतोऽवधापयति ॥ ३० ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

भगवता त्वया शिक्षितमुपदिष्टं प्रजासर्गमतंद्रितो ऽनलसन्नहं करवाणि करिष्यामि भगवच्छिक्षानुरूपमीहमानः प्रजासर्गे चेष्टां कुर्वाणः यस्मादनुग्रहात् । हा हेतौ तत्र जनिष्यमानेनाहंकारादिना न बध्येयं बद्धो न भवेयम् तमनुग्रहं कुर्विति शेषः ॥ २८ ॥ ❀ ❀ प्रजास्रष्टुरवश्यं मदो भविता स कश्चित्कालं माभूदिति प्रार्थयते यावदिति । भो ईश ते त्वया लौकिकस्य सख्युः सखेवाहं कृतः अत्यादरविषयः कृतः प्रजासर्गरूपे तव परिकर्मणि परिचर्यायां स्थितः अविक्लवः अव्याकुलः यावज्जनं विभजामि उत्तममध्यमादिभेदेन सृजामि तावत् त्वत्परिचर्याविधित्वात्संमानादहमप्यजः स्वाधीन इति मानिनो मे समुन्नद्धः उत्कटो मदो माभूत् ॥ २९ ॥ ❀ ❀ एवं ब्रह्मणा प्रार्थितः आह भगवान् ज्ञानमिति । यत् परमगुह्यं परमगोप्यं सरहस्यं रहस्येन भक्तियोगेन सहितं यस्मिन् जाते भक्तियोगो दृढो भवेदेवंभूतमित्यर्थः । सविज्ञानं विज्ञानेन विविधगुणशक्तिविषयकेणावांतरज्ञानेन सहितम् एवं भूतमस्मद्विषयकं ज्ञानं तस्यांगं तत्प्रतिपादकचतुश्लोक्यात्मकं शास्त्रं यद्वा तस्यांगमुपायं च मया गदितं मे मत्तः गृहाण ॥ ३० ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

यथा लक्ष्मीपतिर्भार्योक्तं करोति तथा पुत्रोक्तं कर्त्तव्यमिति । एवं ज्ञाने वरद्वयं प्रार्थितं निरूप्य क्रियायामपि वरद्वयं प्रार्थयते शिक्षां गर्वाभावं च । तत्र प्रथमं शिक्षामाह—भगवच्छिक्षितमिति । भगवता अहं शिक्षणीयः एवंप्रकारेण सृष्टिं कुर्विति । शिक्षा नाम बोधिका क्रिया विषयान्तरव्युदासेनाऽभीष्टविषयपरा । तस्याः कर्त्ता शिक्षकः । शिक्षितस्त्वाश्रयः । तत्र क्रियाया गुणभूताया अपि कर्मत्वेन विवक्षितायाः कर्मभावं परित्यज्य आश्रयभावमेवाऽवलम्बते सैव क्रिया तस्यास्त्वाश्रय कर्मभावमवलम्बते[1] । पठने शिक्षितो देवदत्तो लिखने शिक्षित इति । प्रकृते तु क्रियायाः कर्मत्वेनैव विवक्षितत्वात्तद्विषय एवाऽऽश्रयतां प्राप्तः । न तु तदाश्रयो ब्रह्मा । स च विषयो जगद्रूपः । तथा सति तस्मिन् जगति यथा शिक्षोचिता तथा कुर्वित्यर्थः । पश्चात्तथा शिक्षां प्राप्य यथोचितं मया कर्त्तव्यम् । यथा फलकादावतिबालकशिक्षायां गुर्वादिरेव प्रथमतोऽक्षराणि लिखति तदुपर्येव बालकस्तथाऽङ्गुलिचालनं करोति । हस्ते धृत्वाऽङ्गुलिचालनं गुरोः प्रयासाधिक्यजनकं भवति । फलके तु सुगमम् । संस्कारेण हृदये तदुल्लेखापेक्षया जगत्येव तदुल्लेखनं सुगमं ममाऽपि हितकरम् । अद्यापि मानेन पदार्थकर्त्तारो न बध्यन्ते । तथा अहमपि भगवता येन प्रकारेण निष्पादितं जगत्तेनैव प्रकारेण स्वक्रियामपि तत्र सम्पादयिष्याम्यग्रे शिक्षार्थम् । नन्वेवं करणे आलस्यं भवति, ज्ञात्वा करणे त्वनालस्यमत आह—अतन्द्रित इति । तन्द्रामप्राप्त[2] एवाऽहं करिष्यामि । युक्तोऽयमर्थः । भगवता शिक्षिते न कस्यचित्तन्द्रा भवति । ननु किमित्येवं प्रार्थ्यते ? तत्राऽऽह—नेहमान इति । प्रजासर्गमीहमानो निष्पादनार्थं व्यापृतः यस्य शिक्षणस्य भगवतो वा अनुग्रहान्न[3] बध्येयम् । अन्यथाकरणादेव बन्धः । वैषम्यनैर्घृण्ये प्रजासर्गे भगवतस्ततो बन्धः । शिक्षायां तु नाऽस्य वैषम्यं न नैर्घृण्यम् ॥ २८ ॥ ❀ ❀ एवं क्रियायां शिक्षां प्रार्थयित्वा तथाकरणे यो दोषस्तदभावं च प्रार्थयते—यावत्सखेति । सखा सख्युर्यावत्करोति तथा भगवान्मां कृतवान् । मम पुरस्कारं वा । किमतो यद्येवं तत्राऽऽह—प्रजाविसर्गं विभजामि भोजनमिति । यदा सख्युः स्वसाम्यमापादयति सखायं स्वसमानं करोति । वस्तुतश्चिदानन्दयोः समानता । तत्र भगवानानन्दो ब्रह्मा चिद्रूपः । एवं वस्तुतः सख्येऽपि क्रियाज्ञानशक्ती भगवत्येव सिद्धे इति । इदानीं भगवान् क्रियाज्ञानादिभिः स्वसमानं कृतवान् । तदा सर्वशक्तिसम्पन्नो विविधसर्गे प्रजाः विभजामि । सत्त्वरजस्तमोगुणभेदेन, ऐश्वर्यादिधर्मेषु उच्चावचभेदेन, धर्मादिपुरुषार्थोपयोगिभेदेन च प्रजा विभजामि । तेषां भोजनं भोग्यवस्तूनि[4] च विभजामि । प्रजासृष्टिसमय एव वा तेषां भोजनं विभजामि । यद्यप्यत्र तथा । ते त्वया कृतं इति नास्ति तथापि अथात् यावत्सखासख्युरित्युक्ते करोतीति प्राप्यते । तथा इवेति पदेनाऽपि तावत्प्राप्यते । अतो न न्यूनता । केचित्तु यावद्विभजामीति योजयन्ति तावन्मदो मा समुन्नद्ध इति सम्बन्धं च वदन्ति । तत्रापि तावदित्यध्याहारस्तुल्यः । कालावच्छेदेन च मदाभावप्रार्थनायुक्ता । ततोऽपि किमत आह । ते परि[5]कर्मणि अविक्लवश्च स्थितः त्वत्सेवारूपे आज्ञारूपे वा कर्मणि स्थितः । एव[6]मेते त्रयः पदार्थाः । सख्येन त[7]च्छक्तिलाभः । प्रजादिविभागसामर्थ्यम् । तव सेवायां चाऽविक्लवः अवैक्लव्यम् एतत्त्रयं यद्यपि गुणभूतं तथापि मादृशस्य तुच्छत्वाद्दोषरूपं भवति । अतस्त्रिभिर्दोषैरजमानिनः अहं न कस्माज्जातोऽतोऽज एवाऽहमिति । भगवत्सकाशात्प्राप्ता एते गुणा दूरे । भगवतः सकाशात्स्वस्य जन्माऽपि न मन्यते । तादृशस्य सम्यगुन्नद्धो मदो भवति ।

---

१. भावमालम्बत इति ख. । २. प्राप्त इवेति ख. ३. नचेति ख. ४. वस्तूंश्चेति क. ख. ५. परिकर्मणे इति घ. ६. एवमेवेति ख. ७. तव भक्तीति ख. ।

स मे मा भवत्विति प्रार्थना ॥ २९ ॥ ❀ ❀ एवं परावरज्ञानं, क्रीडाज्ञानं, शिक्षा, गर्वाभावश्चेति चत्वारः प्रार्थिताः । तत्र क्रमाज्ज्ञानद्वये श्लोकद्वयम् । शिक्षायां चतुःश्लोकी । अनेनैव गर्वाभाव [1]इत्यन्तिमः श्लोकः । एवं सप्तभिः श्लोकैश्चतुर्णामुत्तरं भवति । तत्र प्रथमं ज्ञानद्वये उत्तरमाह—ज्ञानमिति । मे पुरुषोत्तमस्य यज्ज्ञानं, तत्परमगुह्यं वक्तव्यं न भवति । यादृशं मां पश्यसि तादृश एवाऽहं पुरुषोत्तमः इदमेव ममाऽऽदिरूपं अन्तिमं रूपं च । इदं मदन्यः कोऽपि न जानाति । अतो मयैव गदितं सामान्यतो निरूपितं त्वं गृहाण । भगवद्बुद्धौ सिद्धं भगवद्गुणज्ञानावताररूपं भगवज्ज्ञानं गृहाणेत्यर्थः । भगवतो हि ज्ञानं गदितमपि कृपा-व्यतिरेकेण न प्राप्यत इति सिद्धवत्कारेण ददाह—गृहाणेति । उपदेशपूर्वकं ब्रह्मणे ज्ञानं दत्तवानित्यर्थः । तस्य ज्ञानस्य परिकर-माह—यद्विज्ञानसमन्वितमिति । विविधं ज्ञानं विज्ञानम् । अस्याऽनुभवस्य जातत्वादस्यैव ज्ञानरूपत्वाद्विज्ञानं नाऽनुभवः किन्तु अखिलसात्त्वतां पतिमित्यादिपतिचतुष्टयज्ञानं विज्ञानं तेन समन्वितं ज्ञानम् । तस्य रहस्यं सुनन्दनन्दादिवेष्टितत्वम् । [2]भक्तिरिति यावत् । तस्याऽङ्गं "भृत्यप्रसादाभिमुखमि" त्यादिभिर्निरूपितानि प्रसादादीनि । चकारस्त्वनुक्तसर्वसमुच्चयार्थः । किं बहुना । यत्किञ्चित्त्वया वैकुण्ठे दृष्टं तस्य सर्वस्य ज्ञानं तव भवत्वित्यर्थः ॥ ३० ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

भगवच्छिक्षितमित्यत्र । नन्वत्र शिक्षितकरणं तेन बन्धाभावप्रार्थनमेव च प्रतीयते, न तु शिक्षाप्रार्थनमिति शङ्कायां तत्प्रार्थनमुपपादयन्ति भगवतेत्यादि । अत्र हि शिक्षितकरणवाक्यान्यथानुपपत्त्या तदाशयगोचरमेवं वाक्यं पूर्वं कल्पनीयम्, अन्यथेदं प्रथमत इदानीमेव भगवतो दृष्टत्वेनेतः पूर्वशिक्षान्तरस्य वक्तुमशक्यत्वादेतद्वाक्यार्थबाधापत्तेः । सिद्धे चैवं कल्पने निःप्रत्यूहैव प्रार्थनसिद्धिरित्यर्थः । एवं वाक्यमुपपाद्य तदर्थं वक्तुं शिक्षादेः स्वरूपमाहुः शिक्षेत्यादि । कर्त्तेति शिक्षणक्रियायां स्वातन्त्र्येण विवक्षितः । आश्रय इति तादृशक्रियाबोधकवचनेन तादृश्या क्रियया वा यत्र साऽऽधीयते स इत्यर्थः । एवं त्रयाणां स्वरूपमुक्त्वा वाक्यार्थमाहुः तत्रेत्यादि । तत्र क्रियाकर्मकशिक्षाप्रार्थनवाक्यप्रयोगे शिक्षाप्रार्थनक्रियाया एव मुख्यत्वेन कर्मभूत-क्रियाया गुणभूताया अपि कर्मत्वेन विवक्षितायाः सिद्धाविति शेषः । सिद्धौ सैव कर्मभूतक्रियैव तथा वैपरीत्यमालम्बते । तथा तदाश्रयश्च पठनादिक्रियादृष्टान्तेन । प्रकृते तु ब्रह्मकर्तृकप्रार्थनक्रियायां तु जगत्सृष्टिक्रियाया असिद्धत्वेनातथात्वात्तथेति । तथा सतीत्यादिनोक्तरीतिक एवार्थ इत्यर्थः । एवं शिक्षावाक्यार्थमुक्त्वा शिक्षितं करवाणीत्यस्याहुः पश्चादित्यादि । अग्रे शिक्षार्थमिति अग्रे जनिष्यमाणानां शिक्षणार्थम् । ॥ २८ ॥ ❀ ❀ यावदित्यत्र । नन्वत्र करोतीत्यादिपदानामभावात्कथमेव-मध्याहार्य व्याख्यायत इति शङ्कायामाहुः यद्यपीत्यादि । त इत्यस्यैव व्याख्यानं त्वयेति । मतान्तरव्याख्याने दोषसाम्यमा-धिक्यं चाहुः तत्रापीत्यादि । अयुक्तेति कालान्तरे पुनर्मदप्राप्त्याऽयुक्तेत्यर्थः ॥ २९ ॥ ❀ ❀ ज्ञानमित्यत्र परिकरमिति येन प्रकारेण तदभिप्रेतं तादृशप्रकारसामग्रीम् । ननु विज्ञानपदस्य विशिष्टज्ञानविविधज्ञानयोर्वाचकत्वान्नियन्त्रणं विना कथं विविध-ज्ञानवाचकत्वावगम इत्याकाङ्क्षायामाहुः अस्येत्यादि । ब्रह्मणा यो भगवान् दृष्टः सोनुभवो विशिष्टज्ञानसमानाकारोपि वस्तुतो न सः, भगवदात्मकस्वप्रकाशभगवद्धर्मरूपत्वात्, स्वेन्द्रियादिसामर्थ्याजन्यत्वाच्च, किन्तु, केवलाखण्डानुभवरूपः, स च जात एवेति परमगुह्यत्वात् ज्ञानपदेन स उक्त एवेति शब्दान्तरसन्निधिना नियन्त्रणादुक्तरूपपतिचतुष्टयज्ञानमेव तदित्यर्थः । किम्बहुनेत्यादि, तथा च, एवं वैकुण्ठस्थितसर्वपदार्थविषयकज्ञानदानेन तादृक् तद्विशिष्टरूपस्य नित्यत्वे ज्ञापिते तस्यैव सर्वपूर्वव-र्त्तित्वसर्वपश्चाद्वर्त्तित्वज्ञापनात् 'परावरे यथारूपे' इत्यनेन यत्प्रार्थितं तद्दत्तमिति दृष्टातिरिक्ते आद्यन्तवत्ताज्ञानं भविष्यतीति-भावः ॥ ३० ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

तत्किं सृष्टिकरणात्त्वमुद्विग्न एव संस्तत्वज्ञानं प्रार्थयसे इत्याशङ्क्याह—भगवदिति । भगवता त्वया शिक्षितमनुशिष्टं प्रजासर्गमहमतन्द्रितः अनलसः सन् करवाणि हि करिष्याम्येव । तर्हि किमनेन तत्वज्ञानेनेत्यपेक्षायामाह—नेति । यत् यस्मात् ज्ञानप्रदानलक्षणात्तवानुग्रहात् प्रजासर्गमीहमानः कुर्वन्नप्यहङ्कारादिभिर्न बद्ध्येयं बद्धो न भवेयमतो ज्ञानं प्रार्थये ॥ २८ ॥ ❀ ❀ [illegible]

परिकर्मणि सेवायां स्थितोऽहं प्रजाः विभजामि उत्तममध्यमाधमभेदेन सृजामि तथा तासामनुरूपं भोग्यं च विभजामि तावत् यावदधिकारमवस्थितिराधिकारिणाम्' इति न्यायेन ममायुःपर्यन्तमविक्लवो व्याकुलतारहितो भवेयं मे मम समुन्नद्ध उत्कटो मदश्च मा भूदित्यन्वयः । मदो भविष्यतीति कथं सम्भवतीत्यपेक्षायामाह—अजमानिन इति । अजत्वाभिमानादिति भावः । सोऽपि कथमित्यपेक्षायां त्वत्सम्मानादित्याशयेनाह—सखेति । यथा लौकिकः सखा स्वसख्युः सत्कारं करोति तथैव ते त्वयाऽहं करग्रहणा-दिना सत्कृतः अतस्त्वदन्यस्य मम जनकस्याप्रसिद्धत्वादजत्वाभिमानो भविष्यतीति भावः ॥ २९ ॥ ❀ ❀ एवं ब्रह्मणा

---

१. अन्तिमश्लोक इति क. २. भगवद्भक्तिरिति ख. ग. ।

सम्प्रार्थितो भगवांस्तत्प्रदानप्रतीक्षया तं सावधानीकरोति—ज्ञानमिति । अवरस्य स्थूलरूपपातालादिनानाविशेषवतो विविधप्रकारकं ज्ञानं विज्ञानं तेन समन्वितं सहितं तथा रहस्यं सुगोप्यमपि वक्ष्यामीति ज्ञापकाद्भक्तियोगस्तत्सहितं च यत्परमं गुह्यमप्रसिद्धं मे मम परस्य सूक्ष्मरूपस्य ज्ञानं तस्य ज्ञानस्याङ्गं साधनं च मया गदितमुपदिष्टं त्वं सावधानतया गृहाणेत्यन्वयः ॥ ३० ॥

## हिन्दी अनुवाद

आप मुझपर ऐसी कृपा कीजिये कि मैं सजग रहकर सावधानीसे आपकी आज्ञाका पालन कर सकूँ और सृष्टिकी रचना करते समय भी कर्तापन आदिके अभिमानसे बँध न जाऊँ ॥ २८ ॥ ❀ ❀ प्रभो ! आपने एक मित्रके समान हाथ पकड़कर मुझे अपना मित्र स्वीकार किया है, अतः जब मैं आपकी इस सेवा—सृष्टिरचनामें लगूँ और सावधानीसे पूर्वसृष्टिके गुण-कर्मानुसार जीवोंका विभाजन करने लगूँ; तब कहीं अपनेको जन्म-कर्मसे स्वतन्त्र मानकर प्रबल अभिमान न कर बैठूँ ॥ २९ ॥ ❀ ❀ **श्रीभगवान्‌ने कहा**—अनुभव, प्रेमाभक्ति और साधनोंसे युक्त अत्यन्त गोपनीय अपने स्वरूपका ज्ञान मैं तुम्हें कहता हूँ; तुम उसे ग्रहण करो ॥ ३० ॥

**यावानहं यथाभावो यद्रूपगुणकर्मकः । तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥ ३१ ॥**
**अहमेवासमेवाग्रे नान्यद् यत् सदसत् परम् । पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥ ३२ ॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

ननु त्वद्दर्शनेऽप्यसमर्थोऽहं कथं ज्ञानाधिकारी स्यां तत्राह । यावानिति । यावान् । स्वरूपतः यथाभावो यादृक्सत्तावान् यानि रूपाणि गुणाः कर्माणि च यस्य ॥ ३१ ॥ ❀ ❀ एतदेव सम्यगुपदिशन् यावानित्यस्यार्थं स्फुटयति । अहमिति । अहमेवाग्रे सृष्टेः पूर्वमासं स्थितः । नान्यत्किंचित् । यत् सत्स्थूलमसत्सूक्ष्मं परं तयोः कारणं प्रधानम् । तस्याप्यंतर्मुखतया तदा मय्येव लीनत्वात् अहं च तदा आसमेव केवलं न चान्यदकरवम् । पश्चात्सृष्टेरनंतरमप्यहमेवास्मि यदेतद्विश्वं तदप्यहमस्मि । प्रलये योऽवशिष्येत सोऽप्यहमेव । अनेन चानाद्यनंतत्वादद्वितीयत्वाच्च परिपूर्णोऽहमित्युक्तं भवति ॥ ३२ ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अत्राक्षिपति—नन्विति । तत्र साध्ययोर्विज्ञानरहस्ययोराविर्भावार्थमाशिषं ददाति—यावानिति । यावान्स्वरूपतो यत्परिमाणकोऽहं यथा भावः सत्ता यस्येति यल्लक्षणोहमित्यर्थः । यानि स्वरूपांतरंगाणि रूपाणि श्यामचतुर्भुजत्वादीनि । गुणा भक्तवात्सल्याद्याः । कर्माणि तत्तल्लीला यस्य स यद्रूपगुणकर्मकोऽहं तथैव तेन सर्वेण प्रकारेणैव तत्त्वविज्ञानं याथार्थ्यानुभवो मदनुग्रहात्तवास्तु । एतेन चतुःश्लोकार्थस्य निर्विशेषपरत्वं स्वयमेव परास्तम् । वक्ष्यते च चतुःश्लोकीमेवोद्दिशता भगवता स्वयमुद्धवं प्रति "पुरा मया" इत्यादौ "ज्ञानं परं मन्महिमावभासम्" इति तत्त्वविज्ञानपदेन रूपादीनामपि स्वरूपभूतत्वं व्यक्तम् । अत्र विज्ञानाशीः स्पष्टा । रहस्याशीश्च परमानंदात्मकतत्तद्याथार्थ्यानुभवेनावश्यप्रेमोदयादिति संदर्भः । विश्वनाथः किञ्च ज्ञानं शब्दद्वारा याथार्थ्यनिर्द्धारणं परोक्षं तच्च किञ्चिच्छुद्धचित्तानामास्तिकानां संभवेदपि विज्ञानं त्वपरोक्षानुभवो मत्स्वरूपस्य याथार्थ्येन साक्षात्कारः । स च रहस्यतदंगशब्दाभ्यां प्रेमभक्तिसाधनभक्तिभ्यां विना नैव भवतीति बोधयंस्तदर्थमाशिषं ददाति यावान्यत्प्रमाणाकारः यादृशस्थौल्यकार्श्यदैर्घ्यतुंगतावृत्तताद्यौचित्यसंनिवेशविशिष्टावयव इत्यर्थः । यथाभावो यादृशाभिप्रायः यानि रूपाणि श्यामत्वद्विभुजत्वचतुर्भुजत्वकृष्णरामत्वनृसिंहत्वादीनि । गुणा भक्तवात्सल्याद्याः । कर्माणि लक्ष्मीपरिग्रहगोवर्द्धनोद्धरणादीनि यस्य सः तथैवेति । येन येन प्रकारेण मम परिमाणाभिप्रायरूपगुणकर्माण्याविर्भवंति तेनैव प्रकारेण तद्विज्ञानं तेषां याथार्थ्यानुभवोस्तु तत्राशीर्वादेनैवानुग्रहे व्यंजितेपि पुनर्मदनुग्रहपदोपादानं परमांतरंगमत्कृपाशक्तिवृत्तिविशेषसाधनभक्तिप्रेमभक्त्योर्वृद्धितारतम्येनैव तद्रूपगुणादिमाधुर्यानुभवतारतम्ये समुत्पत्स्यमानेप्येतस्मादपि मत्स्वरूपादधिकतममाधुर्यं परमदुर्लभं कृष्णस्वरूपं मां व्रजभूमौ त्वं साक्षादनुभविष्यसीति सूचयति एतेन चतुःश्लोक्या निर्विशेषस्वरूपमात्रपरत्वेन व्याख्यानं परास्तम् ॥ ३१ ॥ ❀ ❀ स्वामिव्याख्यानं स्फुटार्थमेव एवं चतुःश्लोक्या देयत्वेन ज्ञानादिकं प्रतिश्रुत्य तत्प्राप्तावाशिषैव योग्यतामापाद्य च प्रथमं ज्ञानमुपदिशन्नेव परावरे यथारूपे जानीयामिति प्रश्नस्योत्तरमाह—अहमेवाग्रे सृष्टेः पूर्वमासमिति तर्जन्या स्ववक्षः स्पृशति । एवकारेणान्ययोगव्यवच्छेदकेन मद्विजातीयं प्राकृतं वस्तु किमपि नासीदिति लभ्यते । अयमर्थः संप्रति भवंतं प्रति प्रादुर्भवन्नसौ परममनोहराकारो रूपगुणमाधुरीमहोदधिरहमेवाग्रे महाप्रलयकालेप्यासमेव "वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शंकरः इति आत्मैवेदमग्र आसीत्पुरुषविधः इति, पुरुषो ह वै नारायण इति, एको ह वै नारायण आसीदिति, पुरुषो ह वै नारायणोऽकामयत । अथ नारायणादजो अजायत यतः सर्वाणि भूतानि नारायणः परं ब्रह्म तत्त्वं नारायणः परम् ऋतं सत्यं परं ब्रह्म पुरुषः । कृष्णपिंगलमिति, एको नारायण आसीन्न ब्रह्मा नेशानः" इत्यादिश्रुतिभ्यः "भगवानेक आसेदम्" इत्यादिस्मृतेश्च ।

अत्र वैकुंठतत्पार्षदादीनामपि तदुपांगत्वादहंपदेनैव ग्रहणं राजासौ प्रयातीतिवत्। अतस्तेषाञ्च तद्वदेव स्थितिर्बोध्यते तथा च राजप्रश्नः "स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः। मुक्त्वात्ममायां मायेशः शेते सर्वगुहाशयः" इति श्रीविदुरप्रश्नश्च "तत्त्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः। तत्रेमं क उपासीरन्क उस्विदनुशेरते" इति स्वामिचरणानां व्याख्या च तत्र प्रलये इमं परमेश्वरं शयानं राजानमिव चामरग्राहिणः के उपासीरन्के वानुशेरते शयानमनु स्वपंतीत्येषा। काशीखंडेप्युक्तं "न च्यवंतेपि यद्भक्ता महत्यां प्रलयापदि। अतोच्युतोखिले लोके स एकः सर्वगोव्ययः" इति। आसमेवेत्ययोगव्यवच्छेदः। अस्तेः सत्तार्थकत्वात् तदानीं मद्विद्यमानताया अभावः सर्वथा नाभूदित्येवार्थप्रतीतेः। अहमेवासमेव न किमप्यकरवमिति क्रियांतरव्यावृत्तिश्च वस्तुतो न घटेत अस्तेः सर्वधात्वर्थेष्वेवानुस्यूतत्वात्। पूर्वस्मिन्वर्षेऽस्मिन्ग्रामे चैत्र आसीदेवेत्युक्ते चैत्रस्य शयनाशनभोजनादिक्रिया नैव व्यावर्त्तते किंत्वभाव एवेति किं तूक्तपरिपाट्या घटते च यथा संदर्भे आसमेवेति ब्रह्मादिबहिर्जनज्ञानगोचरसृष्ट्यादिलक्षणक्रियांतरस्यैव व्यावृत्तिर्न तु स्वांतरंगलीलाया अपि यथाधुना राजासौ स किञ्चिदपि करोतीत्युक्ते राजसंबंधिकार्यमेव निषिध्यते न तु शयनभोजनादिकमपीति तत्त्वमिति दृष्टम्। ननु कचिन्निर्विशेषमेव ब्रह्मासीदिति श्रूयते तत्राह सत्कार्यमसत्कारणं ताभ्यां परं यद्ब्रह्म तन्न मत्तोन्यत् कचिदधिकारिणि शास्त्रे वा स्वरूपभूतनानाविशेषव्युत्पत्त्यसमर्थे सोयमहमेव निर्विशेषब्रह्मतया प्रतिभामीत्यर्थः। त्वं तु पूर्वश्लोकोक्तमाशीर्वादानुग्रहाभ्यां रूपगुणादिविशिष्टमेव मां जानीहीति भावः। ननु सृष्टेरनंतरं जगदेव न तु त्वमुपलभ्यसे तत्राह पश्चात्सृष्टेरनंतरमप्यहमेवास्म्येवेति वैकुंठेषु भगवदाद्याकारेण प्रपञ्चेष्वंतर्यामिरूपेण [illegible] मत्स्याद्यवताररूपेण च ननु तर्हि पृथिव्यादिकं देवतिर्यगादिकञ्च त्वं न भवसीति तत्राह यदेतत्
व्यष्टिसमष्टिविराण्मयं विश्वं तदप्यहमेव मच्छक्तिजन्यत्वान्ममैव प्राकृतं रूपं परावरे यथारूपे जानीयामिति त्वया यदपरं रूपं पृष्टं तदेवेदं त्वं जानीहीत्यर्थः। तथा योवशिष्यते "भवानेकः शिष्यते शेषसंज्ञः" इत्याद्युक्तः परमेश्वरः सोहमस्मि तत्राहमित्यस्य त्रिरावृत्त्या निर्द्धारणस्य सूचितत्वात् एतद्रूपगुणादिविशिष्टस्य मम त्रैकालिकनित्यस्थित्या पररूपत्वं सृष्टिसंहारयोर्मध्य एव दृश्यमिदं मायिकप्रपंचजातमपरं रूपमिति परावररूपयोर्ज्ञानमुक्तम्। विज्ञानं तु पररूपस्य प्रथमस्यैव तच्च तदैव स्याद्यदा श्रवणकीर्त्तनादिजन्यप्रेमभक्त्या तद्रूपगुणादिमाधुर्यमास्वाद्यमानः स्यादिति चतुर्थश्लोके व्यक्तं भावीति विश्वनाथः। संदर्भोप्येतादृशव्याख्यः॥ ३२॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

यानि रूपाणीत्यादियादृग्रूपो यादृग्गुणो यादृक्कर्म्मा चेत्यर्थः॥ ३१॥ ❀ ❀ अहमेवासमित्यादिचतुःश्लोकीभागवतम्। पश्चात् सृष्टेरनन्तरमप्यहमेवास्मीति न त्वंकुरे जाते बीजवदनुपलम्भः कारणतया पृथगवस्थानात् एतेनाप्रच्युतस्वरूपत्वम् उक्तम्। यदेतद् विश्वं तदप्यहमेवास्मीति अनेन प्रपञ्चस्य वागालम्बनमात्रत्वमुक्तं वस्तुतः सर्वं ब्रह्म तन्मात्रमित्यर्थः॥ ३२॥

## श्रीमद्वीरराघवव्याख्या

कार्त्स्न्येन त्वद्गदितग्रहणेनाहं प्रभुरित्याशंकमानं प्रत्याह यावानिति। अहं सत्यं ज्ञानं यः सर्वज्ञः इत्यादिश्रुत्युक्तज्ञानस्वरूपज्ञानगुणकोऽहं यावान् यत्परिणामकः अपरिच्छिन्नः यथाभावः यादृक्स्वभावः स्वाभाविकी ज्ञानबलक्रियाचेत्युक्तसर्वज्ञत्वादिगुणकः यद्रूपगुणकर्मकः रूपं चिदचिद्वस्तु गुणस्तयोर्गुणः स च सद्वारको भगवद्गुणः काठिन्यवान् यो बिभर्तीतिवत् कर्मजगद्व्यापारः यानि रूपगुणकर्माणि यस्य स बहुव्रीहिः तथैव तत्वविज्ञानं मत्स्वरूपगुणविभूतियाथात्म्यविज्ञानं मदनुग्रहान्मत्प्रसादाद्धेतोस्ते तवास्तु भवतु॥ ३१॥ ❀ ❀ यावानित्यस्यार्थमेव स्फुटयन्प्राधान्यतया ज्ञातव्यपरशब्दोक्तं भगवत्स्वरूपमाह अहमिति। सदसत्परं चेतनाचेतनविलक्षणं यद्वस्तु तदहमेवासमभवम् अन्यत्र चिदचिद्विलक्षणं न भवति अन्यत्सर्वं चिदचिदंतर्गतं अहमेव तद्विलक्षण इत्यर्थः। अग्रे सृष्टेः प्राग् यद्वस्तु पश्चात्सृष्टिकाले जातस्त्वमेतत्कार्यजातं च तदप्यहं कारणचिदचिद्रूपः कार्यचिदचिद्रूपश्चाहमित्यर्थः। पुनः संहारकाले योऽवशिष्येत संहिते सोप्यहमेवेत्यर्थः। प्रकृतिपुरुषविलक्षणस्तच्छरीरकश्चाहमेक एव य एव सर्वज्ञः सर्वशक्तिः सर्वेश्वरः सृष्टे प्राग् विभक्तनामरूपसूक्ष्मप्रकृतिपुरुषशरीरकः सृष्टिकाले विभक्तनामरूपप्रकृतिपुरुषशरीरकः स्वपर्यंतनामरूप आसं संहारविषयोप्यहमेवेत्यर्थः। एवं कारणावस्थायां विभक्तनामरूपप्रकृतिशरीरकत्वेन कार्यावस्थायां विभक्तनामरूपप्रकृतिपुरुषशरीरकत्वेनावस्थितस्यापि परमात्मनः स्वशरीरभूतचेतनाचेतनगताज्ञत्वदुःखित्वकर्मवशगत्वपरिणामित्वजडत्वादिभिर्विकारैर्जीवात्मनस्तच्छरीरगतबालत्वयुवत्वस्थविरत्वादिभिरिवास्पर्शात् चेनताचेतनवैलक्षण्यमविहितमेवावतिष्ठते कार्यत्वं कारणत्वं च स्वशरीरभूतप्रकृतिपुरुषद्वारकमुपपन्नमित्यत्र भाष्यादिषु विस्तरो द्रष्टव्यः॥ ३२॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

यत्किंचित्पृष्टं यः कश्चित्परिहार इत्यतः परावरे इति प्रार्थितवरदानप्रकारं वक्ति ज्ञानमिति। नियतमुक्तिप्रापकेण स्वबिंबविषयेण विज्ञानेन समन्वितं मे स्वरूपविषयं सरहस्यमुपनिषत्संवादसहितं यज्ज्ञानं तस्य ज्ञानस्य यदंगं च तन्मया गदितं गृहाणेत्य-

न्वयः। उपनिषदो बाह्यार्थरूपं चेदिदमनुपादेयं स्यादित्यत उक्तं परमेति। ज्ञानं शास्त्रार्थविषयं विज्ञानं स्वानुभव इत्यपव्याख्यानं गदितमित्यनेन सूचितया येन येन यथा ज्ञात्वा नियतं मुक्तिराप्यते तद्विज्ञानमिति प्रोक्तं ज्ञानं साधारणं स्मृतमिति स्मृत्या निरस्तम् ॥ ३१ ॥ ❀ ❀ यथात्ममायायोगेनेति याचितवरप्रदानप्रकारमाह यावानिति। देशकालव्याप्त्या यावाननंतपरिमाणोपेतोऽहं यथाभावो यादृशसत्तावान् निरुपाधिकसत्तोपेतः यद्रूपगुणकर्मकः यादृशावतारः यादृशगुणः यादृशकर्मा चाहं मदनुग्रहात्ते तव तथैव तत्त्वविज्ञानमस्त्वित्यन्वयः। एवशब्देन सोपाधिकरूपं व्यावर्तयति ॥ ३२ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

तत्र साध्ययोर्विज्ञानरहस्ययोराविर्भावार्थमाशिषं ददाति यावानहमिति। यावान् स्वरूपतो यत्परिमाणकोऽहं यथा भावः सत्ता यस्येति यल्लक्षणोऽहमित्यर्थः। यानि स्वरूपान्तरंगाणि रूपाणि श्यामचतुर्भुजत्वादीनि गुणा भक्तवात्सल्याद्याः कर्म्माणि तत्तल्लीलाः यस्य सः यद्रूपगुणकर्म्मकोऽहम्। तथैव तेन तेन प्रकारेणैव तत्त्वविज्ञानं याथार्थ्यानुभवो मदनुग्रहात्ते तवास्तु भवतादिति एतेन चतुश्श्लोक्यर्थस्य निर्विशेषपरत्वं स्वयमेव परास्तम्। वक्ष्यते च चतुःश्लोकीमेवोद्दिशता श्रीभगवता स्वयमुद्धवं प्रति पुरा मयेत्यादौ ज्ञानं परं मन्महिमावभासमिति। तत्त्वविज्ञानपदेन रूपादीनामपि स्वरूपभूतत्वं व्यक्तम्। अत्र विज्ञानाशीः स्पष्टा रहस्याशीश्च परमानन्दात्मकतत्तद्याथार्थ्यानुभवेनावश्यप्रेमोदयात् ॥ ३१ ॥ ❀ ❀ तदेवाभिधेयादिचतुष्टयं चतुःश्लोक्या निरूपयन् प्रथमं ज्ञानार्थं स्वलक्षणं प्रतिपादयति अहमेवासमिति। अत्राहंशब्देन तद्वक्ता मूर्त्त एवोच्यते। न तु निर्विशेषं ब्रह्म तदविषयत्वात् आत्मज्ञानतात्पर्यकत्वे तु तत्त्वमसीतिवत् त्वमेवासीरित्येव वक्तुमुपयुक्तत्वात् ततश्चायमर्थः—सम्प्रति भवन्तं प्रति प्रादुर्भवन्नसौ परममनोहरश्रीविग्रहोऽहमेवाग्रे महाप्रलयकालेऽप्यासमेव। वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शंकरः एको नारायण आसीन्न ब्रह्मा नेशान इत्यादि श्रुतिभ्यः। भगवानेक आसीदमग्र आत्माऽऽत्मनां विभुरित्यादि तृतीयात्। अतो वैकुण्ठतत् पार्षदादीनामपि तदुपांगत्वादहंपदेनैव ग्रहणम्। राजासौ प्रयातीतिवत्। ततस्तेषाञ्च तद्वदेव स्थितिर्बोध्यते तथा च राजप्रश्नः स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः मुक्त्वाऽऽत्ममायां मायेशः शेते सर्वगुहाशयः ॥ इति श्रीविदुरप्रश्नश्च तत्त्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः। तत्रेमं क उपासीरन् क उस्विदनुशेरते ॥ इति काशीखण्डेऽप्युक्तं श्रीध्रुवचरिते न च्यवन्तेऽपि यद्भक्ता महत्यां प्रलयापदि। अतोऽच्युतोऽखिले लोके स एकः सर्वगोऽव्यय इति अहमेवेत्येवकारेण कर्त्रन्तरस्यारूपत्वादिकस्य च व्यावृत्तिः आसमेवेति। तत्रासम्भावनाया निवृत्तिः तदुक्तं यद्रूपगुणकर्म्मक इति अत एव यद्वा आसमेवेति। ब्रह्मादिबहिर्जनज्ञानगोचरसृष्ट्यादिलक्षणक्रियान्तरस्यैव व्यावृत्तिः न तु स्वान्तरङ्गलीलाया अपि यथाऽधुनाऽसौ राजा कार्य्यं न किञ्चित् करोतीत्युक्ते राजसम्बन्धि कार्यमेव निषिध्यते न तु शयनभोजनादिकमपीति तद्वत्। यद्वा असगतिदीप्त्यादानेष्वित्यस्मात् आसं साम्प्रतं भवता दृश्यमानैर्विशेषैरभिरग्रेऽपि विराजमान एवातिष्ठमिति निराकारत्वादिकस्यैव विशेषतो व्यावृत्तिः। तदुक्तमनेन श्लोकेन साकारनिराकारविष्णुलक्षणकारिण्यां मुक्ताफलटीकायामपि—नापि साकारेष्वव्याप्तिः तेषामाकारातिरोहितत्वादिति। ऐतरेयकश्रुतिश्च—आत्मैवेदमग्र आसीत् पुरुषविध इति। एतेन प्रकृतीक्षणतोऽपि प्रागभावात् पुरुषादप्युत्तमत्वेन भगवज्ज्ञानमेव कथितम्। ननु क्वचिन्निर्विशेषमेव ब्रह्मासीदिति श्रूयते, तत्राह, सत् कार्य्यम् असत् कारणं तयोः परं यत् ब्रह्म तन्न मत्तोऽन्यत्। क्वचिदधिकारिणि शास्त्रे वा स्वरूपभूतविशेषव्युत्पत्त्यासमर्थे सोऽयमहमेव निर्व्विशेषतया प्रतिभामीत्यर्थः। यद्वा तदानीं प्रपञ्चे विशेषाभावात् निर्विशेषचिन्मात्राकारेण वैकुण्ठे तु सविशेषभगवद्रूपेणेति शास्त्रद्वयव्यवस्था। एतेन च ब्रह्मणो हि प्रतिष्ठाऽहमित्यत्रोक्तं भगवज्ज्ञानमेव प्रतिपादितम्। अतएवास्य ज्ञानस्य परमगुह्यत्वमुक्तम्। ननु सृष्टेरनन्तरं जगति ( जगदिति ) नोपलभ्यसे, तत्राह पश्चात् सृष्टेरनन्तरमप्यहमेवासमेव, वैकुण्ठे तु भगवदाद्याकारेण प्रपञ्चेष्वन्तर्याम्याद्याकारेणेति शेषः। एतेन, सृष्टिस्थितिप्रलयहेतुरहेतुरस्येत्यादिप्रतिपादितं भगवज्ज्ञानमेवोपदिष्टम्। ननु सर्व्वत्र घटपटाद्याकारा ये दृश्यन्ते ते तु त्वद्रूपाणि न भवन्तीति तवापूर्णत्वप्रसक्तिः स्यादित्याशंक्याह। यदेतत् विश्वं तदप्यहमेव मदनन्यत्वान्मदात्मकमेवेत्यर्थः। अनेन, सोऽयं तेऽभिहितस्तात भगवान् विश्वभावनः। समासेन हरेर्नान्यदन्यस्मात् सदसच्चयत् ॥ इत्याद्युक्तं भगवज्ज्ञानमेवोपदिष्टम्। तथा प्रलये योऽवशिष्येत सोऽहमेवास्म्येव। एतेन भवानेकः शिष्यते शेषसंज्ञ इत्याद्युक्तं भगवज्ज्ञानमेवोपदिष्टम् ॥ तथा पूर्वं स्वानुग्रहप्रकाश्यत्वेन प्रतिज्ञातं यावत्त्वं सर्वकालदेशापरिच्छेद्यत्वज्ञापनयोपदिष्टम् ॥ एवं नान्यद्यत् सदसत् परमित्यनेन ब्रह्मणो हि प्रतिष्ठाहमिति ज्ञापनया यथाभावत्वं सर्व्वाकारावयविभगवदाकारनिर्देशेन विलक्षणानन्तरूपत्वज्ञापनया यद्रूपत्वं, सर्व्वाश्रयतानिर्देशेन विलक्षणानन्तगुणत्वज्ञापनया यद्गुणत्वं, सृष्टिस्थितिप्रलयोपलक्षितविविधक्रियाश्रयत्वकथनेनालोकिकानन्तकर्म्मत्वज्ञापनया यत् कर्म्मत्वञ्च ॥ ३२ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

किञ्च ज्ञानं शब्दद्वारा याथार्थ्येनिर्द्धारणं परोक्षं तच्च किञ्चित् शुद्धचित्तानामास्तिकानां सम्भवेदपि। विज्ञानन्त्वपरोक्षानुभवः मत्स्वरूपस्य याथार्थ्येन साक्षात्कारः स च रहस्यतदङ्गशब्दोक्ताभ्यां मत्प्रेमभक्तिसाधनभक्तिभ्यां विना नैव भवतीति बोधयंस्तद्वर्ममाशिषं ददाति यावान् यत्प्रमाणाकारः। यादृशस्थौल्यकार्श्यदैर्घ्यतुङ्गतावृत्ततायौचित्यसन्निवेशविशिष्टावयव इत्यर्थः।

यथाभावो यादृशाभिप्रायः। यानि रूपाणि श्यामत्वचतुर्भुजत्वद्विभुजत्वकृष्णत्वरामत्वनृसिंहत्वादीनि गुणा भक्तवात्सल्याद्याः कर्म्माणि लक्ष्मीपरिग्रहगोवर्द्धनोद्धरणादीनि यस्य सः। तथैवेति। येन येन प्रकारेण मम परिमाणाभिप्रायरूपगुणकर्म्माण्याविर्भवन्ति तेन तेनैव प्रकारेण तत्त्वविज्ञानं तेषां याथार्थ्यानुभवोऽस्तु। तत्राशीर्वादेनैवानुग्रहे व्यञ्जितेऽपि पुनर्मदनुग्रहपदोपादानं परमान्तरङ्गमत्कृपाशक्तिवृत्तिविशेषसाधनभक्तिप्रेमभक्त्योर्वृद्धितारतम्येनैव मद्रूपगुणादिमाधुर्य्यानुभवतारतम्ये समुत्पत्स्यमानेऽप्येतस्मादपि मत्स्वरूपादधिकतममाधुर्य्यं परमदुर्लभं कृष्णस्वरूपं मां व्रजभूमौ त्वं साक्षादनुभविष्यसीति सूचयति। एतेन चतुःश्लोक्या निर्विशेषस्वरूपमात्रपरत्वेनान्यव्याख्यानं स्वयमेव परास्तम्॥ ३१॥ ❀ ❀ एवं श्लोकाभ्यां देयत्वेन ज्ञानादिकं प्रतिश्रुत्य तत् प्राप्तावाशिषैव योग्यतामापाद्य च प्रथमं ज्ञानमुपदिशन्नेव परावरे यथारूपे जानीयामिति प्रश्नस्योत्तरमाह अहमेवाग्रे सृष्टेः पूर्वमासमिति तर्जन्या स्ववक्षः स्पृशति एवकारेणान्ययोगव्यवच्छेदकेन मद्विजातीयं प्राकृतं वस्तु किमपि नासीदिति लभ्यते अयमर्थः—सम्प्रति भवन्तं प्रति प्रादुर्भवन्नसौ परममनोहराकारो रूपगुणमाधुरीमहोदधिरहमेवाग्रे महाप्रलयकालेऽप्यासमेव वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शङ्कर इति आत्मैवेदमग्र आसीत् पुरुषविध इति पुरुषो ह वै नारायण इति एकोह वै नारायण आसीदिति पुरुषो ह वै नारायणोऽकामयत अथ नारायणादजोऽजायत यतः सर्वाणि भूतानि नारायणः परं ब्रह्म तत्त्वं नारायणः परम् ऋतं सत्यं परं-ब्रह्म पुरुषं कृष्णपिङ्गलमिति एको नारायण आसीन्न ब्रह्मा नेशान इत्यादि श्रुतिभ्यः भगवानेक आसीदित्यादिस्मृतेश्च अत्र वैकुण्ठतत्पार्षदादीनामपि तदुपाङ्गत्वादहं पदेनैवग्रहणं, राजाऽसौ प्रयातीतिवत् अतस्तेषाञ्च तद्वदेव स्थितिर्बोध्यते तथाच राजप्रश्नः स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः मुक्त्वाऽऽत्ममायां मायेशः शेते सर्व्वगुहाशयः इति॥ विदुरप्रश्नश्च—तत्त्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः। तत्रेमं क उपासीरन् क उस्विदनुशेरते॥ इति। श्रीस्वामिचरणानां व्याख्या च तत्र प्रलये इमं परमेश्वरं शयानं राजानमिव चामरग्राहिणः के उपासीरन् के वाऽनुशेरते शयानमनुस्वपन्तीत्येषा। काशीखण्डेऽप्युक्तं न च्यवन्तेऽपि यद्भक्ता महत्यां प्रलयापदि अतोऽच्युतोऽखिले लोके स एकः सर्वगोऽव्ययः॥ इति। आसमेवेत्ययोगव्यवच्छेदः अस्तेः सत्त्वार्थकत्वात् तदानीं मद्विद्यमानताया अभावः सर्वथा नाभूदित्येवार्थप्रतीतेः। अहमेवासमेव न किमप्यकरवमिति क्रियान्तरव्यावृत्तिस्तु वस्तुतो न घटते अस्तेः सर्वधात्वर्थेष्वेवानुस्यूतत्वात्। पूर्व्वस्मिन् वर्षे तत्र ग्रामे चैत्र आसीदेवेत्युक्ते चैत्रस्य शयनासनभोजनादिक्रिया नैव व्यावर्त्त्यन्ते किंत्वभाव एवेति। किन्तूक्तिपरिपाट्या घटते च। यथा सन्दर्भे—आसमेवेति ब्रह्मादिबहिर्जनज्ञानगोचरसृष्ट्यादिलक्षणक्रियान्तरस्यैवं व्यावृत्तिर्न तु स्वांतरंगलीलाया अपि। यथा अधुनाऽसौ राजा न किञ्चिदपि करोतीत्युक्ते राजसम्बन्धि कार्यमेव निषिध्यते न तु शयनभोजनादिकमपीति तद्वदिति दृष्टम्। ननु कचिन्निर्विशेषमेव ब्रह्मासीदिति श्रूयते तत्राह। सत् कार्यम् असत् कारणं ताभ्यां परं यद्ब्रह्म तन्न मत्तोऽन्यत् कचिदधिकारिणि शास्त्रे वा स्वरूपभूतनानाविशेषव्युत्पत्त्यसमर्थे सोऽयमहमेव निर्विशेषब्रह्मतया प्रतिभामीत्यर्थः। त्वन्तु पूर्व्वश्लोकोक्तमदाशीर्व्वादानुग्रहाभ्यां रूपगुणादिविशिष्टमेव मां जानीहीति भावः। ननु सृष्टेरनन्तरं जगदेव न तु त्वमुपलभ्यसे तत्राह पश्चात् सृष्टेरनन्तरमप्यहमेवास्म्येवेति वैकुण्ठेषु भगवदाद्याकारेण प्रपञ्चेष्वन्तर्यामिरूपेण यथासमयं मत्स्याद्यवताररूपेण च। ननु तर्हि पृथिव्यादिकं देवतिर्यगादिकञ्च त्वं न भवसीति तवापूर्णत्वप्रसक्तिस्तत्राह यदेतच्च व्यष्टिसमष्टिविराण्मयं विश्वं तदप्यहमेव मच्छक्तिजन्यत्वान्ममैव प्राकृतं रूपम्। परावरे यथारूपे जानीयामिति त्वया यदवरं रूपं पृष्टं तदेवेदं त्वं जानीहीत्यर्थः। तथा योऽवशिष्येत भवानेकः शिष्यते शेषसंज्ञः इत्याद्युक्तेः परमेश्वरः सोऽहमस्मि। तत्राहमित्यस्य त्रिरावृत्त्या निर्धारणस्य सूचितत्वात् एतद्रूपगुणादिविशिष्टस्य मम त्रैकालिकनित्यस्थित्या पररूपत्वं सृष्टिसंहारयोर्मध्य एव दृश्यमिदं मायिकं प्रपञ्चजातमवरं रूपमिति परावररूपयोर्ज्ञानमुक्तम्। विज्ञानन्तु पररूपस्य प्रथमस्यैव तच्च तदैव स्यात् यदा श्रवणकीर्त्तनादिजन्यप्रेमभक्त्या तद्रूपगुणादिमाधुर्यमास्वाद्यमानं स्यादिति चतुर्थश्लोके व्यक्तं भावि॥ ३२॥

## श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः

भक्तियोगसमन्वितस्य ज्ञानस्य मुख्योपायः ममानुग्रह एवेत्याह यावानिति। अहं यावान् यत्परिमाणकः यथाभावः यादृक्सत्तावान् यानि रूपाणि गुणाः कर्माणि च यस्य स यद्रूपगुणकर्मकः तथैव तत्तत्त्वविज्ञानं मदनुग्रहात्तेऽस्तु॥ ३१॥ ❀ ❀ अथ संक्षेपतस्तदेव ज्ञानं ज्ञेयवस्तूपदेशद्वारोपदिशन् परावरे रूपे दर्शयति अहमिति। सदसतोः स्थूलसूक्ष्मयोः परं बीजभूतं कारणं यदग्रे सृष्टेः पूर्वं वस्तु तदहमेवासम् नान्यत्किंचिदासीत् यश्च पश्चादवशिष्येत सोप्यहमस्मि। एवं परावररूपो जगदायत्तरूपोऽहमेवास्मीत्यर्थः। यदेतच्चिदचिदात्मकं विश्वं तदप्यहमेवास्मि विश्वभिन्नाभिन्नस्वरूपोऽस्मीत्यर्थः। अनेन परिमाणतोऽपरिच्छिन्नः त्रैकालिकसत्तावान् जगद्भिन्नाभिन्नस्वरूपः विश्वसृष्ट्याद्यनुरूपसर्वज्ञत्वादिगुणवान् विश्वकर्मा चाहमस्मि तद्विषयकज्ञानवान् ममानुग्रहात् भूत्वा दृढविश्वासेन मां भजेत्युपदिष्टम्॥ ३२॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

द्वितीयं ज्ञानमाह—यावानहमिति। प्रमाणतो यावानहं परिमाणतोऽपि। यथाभावः यादृशो मम कारणभूतो भावः सर्वकार्यकरणाय सर्वशक्तिरूपः। यावन्ति रूपाणि गुणाः कर्माणि च यस्य। यानि वा गुणादीनि। एतदपि पूर्ववत्। तदाह—

तथैव ते मदनुग्रहात्तत्त्वविज्ञानमस्तु । तत्त्वतो विशेषेण ज्ञानं सर्वेषां याथार्थ्यं तव स्फुरत्वित्यर्थः ॥ ३१ ॥ ❀ ❀ एवं ज्ञानद्वयं निरूपयितुमशक्यत्वान्निरूपणे वा ब्रह्मणो हृदये स्फुरणासम्भवात् स्वयमेव दत्त्वा शिक्षार्थं चतुःश्लोकीमाह—**अहमेवाऽऽसमेवाऽग्र** इति । यादृग्रूपं भगवान् जगत्करोति 'तच्छिक्षायां[1] प्रार्थितम् । तत्राऽऽह । अहमेव तद्रूपो जातः नाऽन्यदिति । अन्यथाभानं च मन्माय[2]येति । जडे देहादौ मध्ये जीवप्रतीतिश्च घटादावाकाशप्रतीतिवत् । आधाराधेयभावो बाह्याभ्य[3]न्तरभेद[4]हेतुश्चाऽहमेवेति । स्वरूपतो मूलभूतं जगत् । प्रतीतितो मायारूपं अनुप्रवेशको जीव[5] इति सर्वं जगत्सर्वप्रकारेणाहमेवेति । ज्ञात्वा स्वस्वरूपमपि तथा ज्ञातव्यम् । इयमेव शिक्षा । एवं मद्रूपो भूत्वा मद्रूपं चेज्जगत्करोति तदा गर्वो न भवतीति तद्धेतुभूतो मोहोऽपि न भवतीति पञ्चश्लोकानामर्थः । तत्र सर्वं जगत्कथं भगवानित्याकाङ्क्षायां तज्जल[6]ानिति हेतुं विस्तरेण वदति । **सृष्टेः** पूर्वं अहमेव । "**एको नारायण आसीन्न ब्रह्मा न च शङ्करः ।**" "**वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शङ्कर**" इति श्रुतेः सृष्टेः पूर्वमहमेव । किञ्च । मत्तोऽपि पूर्वमिति नाऽऽशङ्कनीयम् । यथा जगतः पूर्वमहं मत्तोऽपि पूर्वमन्यदिति तदैवं भवेत् यदि कदाचिदप्यहं नाऽऽसम् । तत्तु मम न सम्भवति । सद्रूपेणैव निरूपणात् "**सदेव सौम्येदमग्र आसीदेकमेवाऽद्वितीयम्**"-ति श्रुतेरासमेव । अग्रे सृष्टेः पूर्वम् । "**असद्वा इदमग्र आसीत्ततो वै सदजायते**" त्यादीनां पश्चात् प्रतीयमानजगतः पूर्वमेवादृशरूपेणाऽनवस्थितत्वप्रतिपादकत्वात् । अन्यथा असतः सत्ताबोधकत्वे विरोधः । "**नाऽसतो विद्यते भाव**" इति वाक्यात् । "**नाऽसदासीन्नो सदासीत्तदानीम्**" त्यादेस्तु स्थूलसूक्ष्मकार्यपरत्वम् । "**आपो वा इदमग्रे सलिलमासीद्**" ति त्ववान्तरकल्पाभिप्रायेण । आपो नानाविधानि जलानि[7] इदं तत्कार्यं च जगत्सर्वं सलिलं प्रलयोदकरूपमेवाऽऽसीदित्यर्थः । "**अव्यक्तादीनि भूतानी**" ति तु अव्यक्तरूपं ब्रह्मैव । लीनत्वकल्पकस्य पश्चादेव सिद्धेः पश्चादेव पूर्वलीनत्वं सिध्यति । न पूर्वम् । अनेन "**प्रकृतिं पुरुषं चे**" त्यपि निरस्तम् । मतान्तरत्वात् । "**आसीज्ज्ञानमथो ह्यर्थ**" इति वाक्यविरोधाच्च । "**तम आसीद्**" ति तमोऽपि ब्रह्मैव । सर्वतः [8]सुप्तत्वेन साम्यात् । न प्रकृतिः । "**किमावरीवः कुहकस्य शर्मन्नि**" ति कार्याश्रयप्रयोजनाभावात् तस्याः कार्यैकोन्नेयस्वरू[9]पाया अभावात् । एवमन्यान्यपि वाक्यानि तत्तद्भावप्रकारेण बोधयन्ति पूर्वमेकरूपे भगवति न बाधकानि भवन्ति । अत एव श्रुतिसिद्धत्वादन्यानि तत्काले निषेधति—**नाऽन्यदि**ति । सदसतोः श्रुतौ पूर्वसिद्धत्वेऽपि न तयोरन्यत्वम् । तदाह—**सदसदि**ति । सच्छब्देनाऽसच्छब्देन च ब्रह्मैवोच्यत इत्यर्थः । "**योऽस्मात्परस्मात्पर**" इति परशब्देनापि न कालादिरुच्यते । किन्त्वहमेव । तस्मात्पूर्वमहमेवेति सिद्धम् । अभावास्त्वन्मते तिरोभावातिरिक्ता न भवन्तीति तस्य च भगवच्छक्तित्वात् "**पूर्ववद्धे**" ति न्यायेन शक्तिधर्माणामपि तदो[9]द्गतत्वाभावेन कालस्याऽपि निरूपणसमय एव तथावचनात्प्रकृतितुल्यत्वेन भगवानेक एक सिद्ध इत्यविवादम् । किञ्च । पश्चादहम् । सर्वभवनसमर्थात्स्वरूपादेव चेष्टावत्प्रादुर्भावः कालस्य पश्चाद्गुणरूपेण शक्तिरूपेण च पश्चात्कार्यरूपेण । ;"**स आत्मान**ं **स्वयमकुरुते**" ति श्रुतेः असतः सत्तानङ्गीकाराच्च । **यदेतदि**ति परिदृश्यमानं सर्वम् । चकारादपरिदृश्यमानमप्रसिद्धं च । अनेन जीवा अपि सङ्गृहीताः । त्वमेतच्चेति पाठे जीवजडात्मकं सर्वमहमेवेत्यर्थः । अयं [10]मुख्यो ब्रह्मवादः । ननु पदार्थविरोधे शब्दो न प्रमाणम् । भगवांश्च सर्वदोषरहितः । विकारादयश्च दोषाः । सर्वशब्दे सङ्कोचाभावादुपदेश्याभावः शास्त्रोच्छेदश्च । प्रयोजनाभावात् हिताकरणादिदोषप्रसक्तिः । पुरुषोत्तमत्वाभावश्च । तस्मादनेकदोषदुष्टत्वाद्ब्रह्मवादोऽनुपपन्न इति चेन्मैवम् । **प्रत्यक्षादृष्टविषये पदार्थाः श्रुतिबोधिताः । परस्परं विरुद्धास्ते नैकशेषं भजन्ति हि । उभयोर्वैदिकत्वेन कः स्यादत्र नियामकः । विचारकाणां बुद्धिस्तु सोपजीव्या श्रुतेः सदा । क्रियाविद्यापरत्वे तु विकल्पेनैकवाक्यता । दुष्टोऽप्याश्रीयते पक्षो विकल्पाख्यः श्रुतेर्बलात् । तथैव भगवद्रूपं यथा हस्तादयः पृथक् । यथा सर्वविरोधः स्यात्तथैवाऽत्र विचारणम् । सवरूपसमर्थत्वमतो ब्रह्मणि गीयते । अन्यथा प्रतिभानं यदुच्चनीचादिभेदतः । तद्भानं तस्य कर्त्ता च हरिरेव तथाविधः । यत्किञ्चिद्दूषणं त्वत्र दूष्यं चाऽपि हरिः स्वयम् । विरुद्धपत्ता सर्वेऽपि सर्वमत्रैव शोभते । योऽवशिष्येत सोऽस्म्यहमि**ति । उद्भूतस्य सर्वस्य तिरोभावप्रापणे यत्तिरोभूतं न भवति, तत्तिरोभावस्तदाश्रयो वा, अंशभेदेन वा तदप्यहमस्मीत्यनेन सर्वा एव क्रियास्तद्विषयश्चाऽहमिति ज्ञापयति ॥ ३२ ॥

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः ।**

**यावानि**त्यत्र 'द्वितीयमिति' 'यथात्ममाये'तिश्लोकद्वयप्रार्थितं क्रीडाज्ञानम् । **यावन्ति रूपाणी**ति, इदं यद्रूपेत्यस्यार्थकथनं न तु विग्रहवाक्यम् । **एतदपि पूर्ववदि**ति एतद्रूपगुणकर्मज्ञानमपि पूर्ववद्यथायथं रहस्यरूपमङ्गरूपञ्चेत्यर्थः । अत्र श्लोके प्रमाणतो यावत्त्वज्ञापनेन 'यदेकमव्यक्तमनन्तरूपमि'तिश्रुत्युक्तसर्वरूपत्वं स्फोरितम् । परिमाणतो यावत्त्वज्ञापनेन 'अणोरणीयान्महतो महीयान्' इत्यादिश्रावितः परिमाणविरोधो विरुद्धधर्माधारत्वेन परिहृतः स्फोरितः । **यथाभाव** इति कारणरूपतया शक्त्याद्यष्टाविंशतितत्त्वरूपता श्रौतकारणरूपता च स्फोरिता । यद्रूपगुणकर्मक इति तत्तत्कार्यरूपता बोधिता । सर्वत्रानुग्रहस्य कारणताबोधनेन 'यमेवैष

१. तदिच्छायामिति ख. ग. । २. मायेतीति ख. । ३. बाह्यान्तरेति क. घ. । ४. भेदे हेतुरिति ख. ग. । ५. जीवरूपमिति ख. ग. । ६. जलानीति ख. ग. । ७. गुप्तत्वेनेति घ. । ८. पायाः भावादिति ख. । ९. तदोद्गमत्वेति ख. । ग. । १०. मुख्ये इति ख. ।

वृणुत' इतिश्रुत्युक्तं समर्थितं ज्ञेयम्, तदेतदाहुः एवं ज्ञानेत्यादि ॥ ३१ ॥ ❀ ❀ **अहमेवासमित्यत्र प्रार्थितमिति**। यथात्ममायायोगेनेति द्वाभ्यां सृष्ट्यादिक्रीडाविषयकज्ञानपूर्वकशिक्षाकरणोक्त्या 'भगवच्छिक्षितं करवाणी'त्यनेन प्रार्थितमेतस्योत्तरञ्च प्रथमश्लोकेनैव सिद्ध्यतीति शेषाणां किं प्रयोजनमित्याशङ्कायां तेषां तात्पर्यमाहुः अन्यथेत्यादि। इदं द्वितीयस्य। स्वरूपत इत्यादिकं तृतीयस्य। अनुप्रवेशको जीव इत्यात्रानुप्रवेशतो जीवरूपमिति पाठः। प्रतिभाति। इति ज्ञात्वेत्यादिदं तुरीयस्य। एवं मद्रूप इत्यादिकं पञ्चमस्येति ज्ञेयम्। तज्जलानिति हेतुं विस्तारेण वदतीति छान्दोग्ये शाण्डिल्यविद्यायां 'सर्वं खल्विदं ब्रह्म तज्जलानि'ति 'शान्त उपासीते'ति श्रावितं जगतो ब्रह्मात्मकत्वहेतुं सोपपत्तिकं कथयति। श्रुत्यर्थस्तु, खलु निश्चयेन इदं दृश्यमानं सर्वं ( पक्षः ) ब्रह्म इदं ( साध्यं ) तत्र हेतुर्जलानिति, जायत इति जं, लीयत इति लं, अनीतीत्यन्, जञ्च लञ्च जलं, तच्च तदन् च जलान्, तज्जलानिति हेतोः। शान्त उपासीत' ब्रह्मसमवेतत्वाज्जगद् ब्रह्मत्वेनानुसन्दध्यादिति, समवायश्च तादात्म्यस्यैव नामान्तरम्। अतिरिक्तपक्षेपि अनारोपितानागन्तुकरूपेणानुवृत्तिरेव, तत्स्वरूपमिति वैशेषिकप्रतिपन्नाद्भिन्न एव भगवदात्मक इति न तर्कचरणविरोधः। अत्रैवकारद्वयादहमेवासमेवेतिवाक्यद्वयमग्रपदञ्चोभयत्र सम्बद्ध्यते पूर्ववृत्तान्तबोधकत्वादित्याशयेन तयोः प्रथमं व्याकुर्वन्ति सृष्टेरित्यादि। "एको नारायण आसी"दित्यादिश्रुतिद्वयं शाखान्तरीयमिदानीं प्रसिद्धोपनिषत्सु "एको ( वै ) नारायण आसीन्न ब्रह्मा न ईशान" इति ब्रह्मो ( महो ) पनिषदि पाठात्। अत्र प्रथमश्रुतावग्रेदंपदयोरभावेन सृष्टिपूर्वकालस्योपादानत्वस्य चास्फुटत्वाद् द्वितीयश्रुतिप्रदर्शनं तेन तथेत्यर्थः। ननूक्तश्रुतावग्रपदेन कालस्योक्तत्वाद्धरितो रोहितादासीदित्यादावस्तेरुत्पत्त्यर्थकत्वस्यापि सिद्धत्वात्तदा सर्वेभ्यः प्रथममुत्पत्तेरपि शक्यवचनत्वात् सृष्टिपूर्वकाले स्वमात्रसत्ताप्रतिज्ञा नोपपद्यत इति शङ्कायामाहुः किञ्चेत्यादि। पूर्वमितीति वक्ष्यमाणप्रकारेण। तत्त्विति असत्त्वं तु। ननु तर्ह्युभयसत्तास्तु न चैवकारविरोधः, अगत्याऽयोगव्यवच्छेदकत्वस्यैव तत्रादरणीयत्वादन्यथाऽग्रपदव्याकोपादिति शङ्कायामाहुः अग्रे सृष्टेः पूर्वमिति। अयमर्थः, अत्र श्रुतौ कालसत्ताविधानाङ्गीकारे वाक्यभेदापत्तिः। अनुवादाङ्गीकारे तस्य पुरोवादसापेक्षत्वेन तत्कल्पनस्यावश्यकतया तस्य तद्वक्तुश्च सत्तापत्त्या वाक्यार्थबाधप्रसक्तिर्विशिष्टविधाने च गौरवापत्तिरतस्तत्र शिष्यबोधनार्थमिदानीं प्रसिद्धकालोपरञ्जनेन तस्य वाक्यस्य प्रवृत्तिरित्यवश्यमादरणीयम्। तथा सति सूक्ष्मेक्षिकायामग्रपदमपि न कालवाचकम्। 'अग्रे गच्छ' 'अग्रे नगरी'त्यादौ देशविशेषेपि तत्प्रयोगात्। अतोवधारणानुरोधेनाग्रपदे पुरःस्फूर्तिकं विशेष्यांशं विहाय विशेषणीभूतस्य पूर्वत्वस्य वृत्तिमत्त्वाय सत एव विशेष्यत्वमवधारणीयम्, सप्तमी चाधिकरणे, तथा सति सृष्टेः पूर्वमधिकरणं केवलं सदित्यर्थो भवति। न चैतद्विवरणभूत एकमेवाद्वितीयमि'त्यग्रिमवाक्य एकपदा'देके मुख्यान्यकेवला' इति कोशेन तत्र मुख्यार्थताया अपि वक्तुं शक्यत्वात्समाभ्यधिकराहित्यमेव तत्र विवक्षितमिति वाच्यमद्वितीयपदवैयर्थ्यापत्तेः, इतरसत्तानिषेधातिरिक्तस्य तदुक्तिप्रयोजनस्यालाभात्। ( ऐतरेये )न 'चात्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चन मिषदि'तिश्रुत्यन्तराद्वथापारं कुर्वतोन्यस्य निषेधार्थमद्वितीयपदमिति वाच्यम्, तथा सति 'येनाश्रुतं श्रुतं भवती'त्यादिप्रतिज्ञाया 'यथा सोम्यैकेन मृत्पिण्डेने'त्यादिदृष्टान्तस्य चोपरोधप्रसङ्गात्। न चैवं धर्माभावप्रसङ्गः, स्वरूपधर्माणां तदात्मकत्वेन सत्त्वेप्यदोषादिति तदेतदभिसन्धायोक्तम् अग्रे सृष्टेः पूर्वमित्यनवद्यम्। एतेन 'तज्जलानि'ति श्रुतावुपासनाशेषत्वेनाप्युक्तो हेतुर्मानान्तराविरोधाद्वस्तुतत्त्वसमर्पक इति बोधितम्। ननु तथापि केवलब्रह्मसत्ता नोपपद्यते, 'असद्वे' त्यादिश्रुतिष्वसदादीनामपि तथाकथनादिति शङ्कायामाहुः असद्वेत्यादि। पश्चादिति सृष्टिदशायाम्। पूर्वमिति सृष्टिप्राक्काले तथा च, तदानीमेतादृशरूपेणानवस्थितत्वप्रतिपादने घटस्य पूर्वं मृद्रूपेणेव जगतः पूर्वं सद्रूपेणैवावस्थितिः सिद्ध्यतीति तदानीं केवलब्रह्मसत्ता सूपपन्नेत्यर्थः। ननु श्रुतिबलाल्लोकसिद्धाऽसतः सत्तैव कुतो नाङ्गीक्रियते इत्यत्र आहुः अन्यथेत्यादि। लोकानुरोधेनास्य वाक्यस्यासतः सत्ताबोधकत्वे 'कुतस्तु खलु सौम्यैवं स्यात् कथमसतः सज्जायेते'ति श्रुतिविरोधः। कार्यस्य नियतावधिकत्वविरोधश्चेत्यर्थः। ननु कार्यस्य नियतावधिकत्वाय तत्तत्प्रागभावस्तत्राङ्गीकार्योतोऽसतः सत्ताङ्गीकारेप्यदोषः। 'कुतस्त्वि'त्यादिश्रुतिस्तु केवलवैनाशिकमतनिरासार्थेति न तस्या अपि विरोध इत्यत आहुः नासत इत्यादि। तथा च तदानीं सर्वसत्ताङ्गीकारेऽधिकरणाभावात्कार्यप्रागभावस्याशक्यनिरूपणत्वादधिकरणसत्ताङ्गीकारे च 'सदेवे'ति श्रुतिविरोधाद् ब्रह्मण्येव तत्सत्ताङ्गीकार्या, तदाप्येतद्वाक्यविरोधो दुष्परिहर इत्यर्थः। वाक्यार्थस्तु, असतः पदार्थस्य भावः सत्ता न विद्यते, सतः पदार्थस्याभावः असत्ता न विद्यते, तत्र हेतुरुभयोरप्यनयोरसद्भावयोरन्तः परिच्छेदो निष्कर्षस्तत्त्वदर्शिभिर्वास्तवरूपद्रष्टृभिर्दृष्टः साक्षात्कृत इति। ननु भाववृत्तसूक्ते 'नासदासी'दिति श्रुत्या सृष्टिपूर्वकाले सदसतोरुभयोरप्यभावबोधनादागतैवासतः सत्तेत्यत आहुः नासदासीदित्यादि। तथा चात्रासच्छब्देन सूक्ष्मं कार्यं सच्छब्देन च स्थूलं कार्यमनूद्य, तदभाव उच्यत इत्येतस्यापि पूर्वतुल्यत्वात्तेनैवेदं दत्तोत्तरमित्यर्थः। विद्यारण्यैस्त्वसत्पदेनानुपाख्यं सत्पदेनात्मवन्निर्वाच्यमत्राङ्गीकृतम्। तथा च, तदभावबोधनादुभयविलक्षणमनिर्वाच्यमेवासीदिति तन्मतमित्यर्थः। तथापि, न कश्चिद्विशेषः, अग्रे च 'नासीद्रज' इति रजोगुणनिषेधः नो व्योमापरो यदित्यनेन काणादादिप्रतिपन्नाकाशप्रतिषेधः, योस्याध्यक्षः परमे व्योमन्नित्यनेनाक्षरब्रह्मात्मकस्याकाशस्याग्रे वक्ष्यमाणत्वात्, 'ततः किमावरीव' इत्यादिना प्रकृतितत्त्वनिषेधः ततोम्भः किमासीदित्यादिना प्रलयोदकस्य सः, तदग्रिमे मन्त्रे 'न मृत्युरासीदि'त्यादिना मृत्यु—मृतकालज्ञानानां सः। तत 'आनीदवातमि'त्यादिना तस्यैकस्य सत्तामुक्त्वा तदितरसर्वसत्तानिषेधः क्रियते इति मन्त्रद्वयार्थः।

नन्वत्राम्भोनिषेधेप्यापो वेति संहितावाक्ये तत्सद्भाव उक्त इति तस्य विरोध इत्यत आहुः आपो वेत्यादि । नन्वस्त्वेवं तथापि सृष्ट्यादौ प्रकृत्यभावो न वक्तुं शक्यः, गीताया 'मव्यक्तादीनी' त्यनेन भगवता तत्सत्ताप्रतिपादनादव्यक्तपदस्य च प्रकृतिवाचकत्वादित्याशङ्कयामाहुः अव्यक्तेत्यादि । नन्वत्राव्यक्तपदेन ब्रह्मैवोच्यत इति कथं निश्चेयमित्यत आहुः लीनेत्यादि । अत्र ह्यर्जुनविषादनिवारणाय जीवानां नित्यत्वमुच्यतेऽतोत्र भूतपदेन जीवा एवाभिप्रेताः, तेषाञ्च व्यक्तता उत्पत्त्यनन्तरमेवोक्तरीत्या सिद्ध्यतीति विभागात्पूर्वं लीनत्वेनापि रूपेण न व्यक्ततेति तेषामव्यक्तादित्वम् । एवं सति भूतादिभूताव्यक्तत्वं न प्रकृतेः शक्यवचनम्, साङ्ख्यसिद्धान्ते प्रकृतिपुरुषयोरुभयोरप्यनादित्वोपगमात् । अतस्तदाद्यव्यक्तं ब्रह्मैवेत्यर्थः । नन्वेवं सति 'प्रकृतिं पुरुषञ्चे' ति वाक्यान्तरस्य का गतिरित्यत आहुः अनेनेत्यादि । अनेनेति अव्यक्तपदार्थनिश्चायनेन । ननु भाववृत्तसूक्ते तृतीये मन्त्रे सृष्ट्यादौ तमःसत्तोच्यते, तच्च मायैव 'तमो वा इदमेकमेवाग्र आसीत्तत्परेणेरितं विषमत्वं प्रयाती, त्यादौ तन्निर्णयादिति कथं तदानीं केवलब्रह्मसत्तासिद्धिरित्यत आहुः तम आसीदित्यादि । कथमित्याकाङ्क्षायामाहुः सर्वत इत्यादि । अत्र हि पूर्वमन्त्रे आनीदवातं स्वधया तदेकं तस्माद्धान्यन्नपरः किञ्चनासेत्यत्र तच्छब्देन यदुक्तं तत्स्वरूपमत्रोच्यते तम इत्यादिना तस्मात्तथेत्यर्थः । नन्वेवं लक्षणापेक्षया शक्यार्थग्रहणमेव ज्याय इत्यत आहुः न प्रकृतिरित्यादि । श्रुत्यर्थस्तु किं कार्यमावरीवः आवृणुयात् कुहकस्य शर्मन् कस्य सुखार्थमिति । तथा च, प्रकृतिसत्तानिषेधस्य पूर्वमन्त्र एव निषिद्धत्वान्नात्र तमःशब्दस्य पुरःस्फूर्त्तिकोर्थो गृहीतुं शक्योतो लक्षणैव ज्यायसीत्यर्थः । न च तमसा गूढमग्रे इत्यग्रिमविरोधः शङ्क्यः । आसमन्तादिदं नामरूपाभ्यां व्याकृतं जगद् अग्रे सृष्टेः पूर्वमप्रकेतमप्रज्ञायमानं सलिलं कारणेनाविभक्तमसा पूर्वोक्तरूपेण ब्रह्मणा गूढमासीदिति क्रियावृत्त्यान्वयेन तदभावादिति । एवं कतिपयानि वाक्यानि विचार्य तद्वदन्येषां गतिमाहुः एवमन्यानीत्यादि । किं तदानीं तस्मै सहोवाच न सन्नासन्नसदसदिति, 'तमो वा इदमग्र आसीत्परेणेरितं विषमत्वं प्रयातीति यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासन् शिव एव केवल' इत्यादीनि सौबालमैत्रायणीयश्वेताश्वतरीयाणि एवं जातीयकान्यन्यान्यपि सदसद्विलक्षणतमोनियामकशिवादिप्रकारेण बोधयन्ति तथा भवतीत्यर्थः । एवं वाक्यमात्रगतिमुक्त्वा सिद्धमाहुः अत एवेत्यादि । एतेनैव विशिष्टाद्वैतवादोप्यनादृत इति बोधितम् । ननु पश्चात्प्रतीयमानानां प्रतियोगिनां बहुत्वात्प्रागभावात्यन्ताभावान्योन्याभावानां पूर्वं सत्वादितरनिषेधः कथं सन्गच्छत इत्यत आहुः अभावा इत्यादि । एवं सृष्टिप्राक्काले केवलस्वसत्तां प्रतिपाद्य सृष्टिकाले नानापदार्थमत्वेपि केवलस्यैव सत्तां प्रतिपादयतीत्याहुः । किञ्चेत्यादि । तथा च, भेदप्रतीतिरेवासङ्गता । पदार्थास्तु भगवद्रूपा एव सन्तीति तदानीमपि केवलसत्तेति मुख्यो ब्रह्मवादः इत्यर्थः । एवं व्याख्यानेन सर्वं ब्रह्मवादं व्युत्पाद्य स्थूणाखननन्यायेन तं दृढीकर्तुं पूर्वपक्षमुद्भावयन्ति नन्वित्यादि, "अत्र न प्रमाण"मित्यन्तेन । पश्चात्कैवल्यस्यासङ्गतत्वं बोधितम् । दोषा इत्यन्तेन साक्षात्परिणामस्यासङ्गतत्वमुक्तम् । सर्वशब्द इति 'सर्वं खल्विदं ब्रह्मे'तिश्रुतिस्थे सर्वशब्दे हिताकरणादीति सर्वरूपत्वेपि जीवानां क्लेशदाने हिताकरणवैषम्यनैर्घृण्यप्रसङ्गः । पुरुषोत्तमत्वाभाव इति, सर्वस्य ब्रह्मरूपत्वेनैकरूप्ये उच्चनीचभावाभावात्तथेत्यर्थः ।

अत्र कारिकाभिः समादधते, मैवं प्रत्यक्षेत्यादि, परीक्षणीयमण्यादिवत्प्रत्यक्षानिर्णीते विषये परीक्षकवाक्यसिद्धपदार्थवत्, श्रुतिबोधिताः परस्परं विरुद्धा विकारित्वाविकारित्वैजत्वानेजत्वादयः पदार्था एकस्मिन्नेव धर्मिणि मन्तव्याः । हि यतो हेतोस्ते एकशेषं एकशेषत्वं एकस्य मुख्यत्वेनापरस्योपचरितत्वम् अपोद्यापवादकभावं वा न भजन्ति, श्रुतिबोधितत्वान्न प्रयान्ति । तत्र हेतुः, उभयोरित्यादि । अत्रेति, गुणप्रधानभावे अपोद्यापवादकभावे वा कः नियामकः स्यात् ? वेदादुत्कृष्टस्य प्रमाणान्तरस्याभावान्न कश्चिदपि तन्नियामकोऽतो वेदादेव ब्रह्मणो विरुद्धधर्माश्रयत्वसिद्ध्या नैकतरस्य गौणत्वमपोद्यत्वं वा सुवचमित्यर्थः । नन्विदमपि बुद्ध्या विचार्यैवोच्यत इति वेदार्थविचारे विचारकबुद्धिरेव नियामिका, अतस्तयैवैकतरस्य गौणत्वमपोद्यत्वं वास्त्विति चेत्तत्राहुः विचारकाणामित्यादि । श्रुतेरिति ल्यब्लोपे पञ्चमी, तथा चाऽऽस्तिकविचारकाणां बुद्धिस्तु सदा सर्वकालं श्रुतिं प्राप्योपजीव्यसहिता भवति । अतो विरुद्धार्थद्वयप्रतिपादकमपि श्रुतिद्वयं पश्यन्ती ( बुद्धिः ) उपजीव्यत्वस्योभयत्राप्यविशिष्टत्वात्कथमेकतरार्थस्य गौणत्वमपोद्यत्वं वा स्वतः कल्पयिष्यति, कल्पयन्ती वा उपजीव्यविरोधेन स्वस्मिन् अप्रामाणिकत्वं कुतो न धास्यति, अतः सापि न स्वतो नियामिकेति यथाश्रुतं विरुद्धधर्माश्रयत्वमेवाङ्गीकार्यमित्यर्थः । ननु श्रुता 'वुदिते जुहोती' ति विधाय तत्प्रशंसार्थमनुदितहोमो निन्द्यते । तथा 'अनुदिते जुहोती' त्यनुदितहोमं विधायोदितहोमो निन्द्यते, तत्रैकतरबाधस्योभयकरणस्य चाशक्यत्वे प्राप्ते तत्तच्छाखीयपरत्वेन यथोभयं व्यवस्थाप्यते । तथात्रैकस्योपासना परत्वमितरस्य ज्ञानपरत्वमिति वक्तव्यम् । तत्रापि कस्य किं परत्वमित्यपेक्षायाम् उपासनानां तत्तद्धर्मपुरस्कारेण विधानाद्धर्माणां तत्परत्वम् । ज्ञाने तु 'एकमेवाद्वयं ब्रह्म, नेह नानास्ति किञ्चन' मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती' ति निन्दया निषेधस्य ज्ञानपरत्वमित्यास्थेयम् । न चैवमुभयलिङ्गत्वसिद्धिः, कल्पितधर्मैरप्युपासनायाः सिद्धेः, 'वाचं धेनुमुपासीते'त्यादौ तथानिर्णयात् । ज्ञानस्य तु न तथासिद्धेः । 'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते, किं तेन न कृतं पापं चौरेणात्मापहारिणे'ति निन्दाश्रवणात् । अतः सोपजीव्याया विचारकबुद्धेर्नियामकत्वाद्विरुद्धधर्माश्रयत्वं न साधीय इत्यत आहुः क्रियेत्यादि । क्रिया

मानसी ध्यानरूपा उपासना । विद्या ज्ञानम्, धर्मतन्निषेधनिरूपकश्रुत्योः यथायथं तत्तत्परत्वे तु विकल्पे प्राप्ते नैकवाक्यता, ब्रह्मणोऽमुख्यत्वात् क्रियाविद्ययोरेव मुख्यतया प्रतिपाद्यत्वे उदितहोमानुदितहोमवाचकयोरिवार्थभेदेन विभागे साकाङ्क्षत्वाभावेन च भिन्नवाक्यत्वं स्यात् । यथा सति 'सर्वे वेदा यत्पदमामनन्ति' सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषादित्यादिश्रुतिसूत्रोक्तं सर्वासां श्रुतीनां ब्रह्मप्रतिपादकतयैकवाक्यं बाध्येतेत्यर्थः । ननु नास्माभिर्ज्ञानोपासनयोर्मुख्यतया प्रतिपाद्यमङ्गीक्रियते, अपि तु ब्रह्मणः । अतोऽध्यारोपापवादसङ्गत्या सुखेनैकवाक्यत्वसिद्धिरित्यत आहुः दुष्ट इत्यादि । अयमर्थः, उपासनार्थं धर्माणां कल्पनोपदेशत्वं वदता तेषां कचिद्वास्तवत्वमास्थेयम् । अन्यथा तेषां कल्पनाया अप्ययोगात् । आरोप्यमाणस्य धर्मस्यैकत्र सत एवान्यत्राऽऽरोपस्य मध्वादिविद्यायां निर्णयात् । एवं सत्येषां वास्तवत्वमुपाधावास्थेयं, तत्रोपाधेः सत्वे द्वैतापत्तिः । असत्त्वे तु धर्माणां एवाभावादारोपासम्भवेन कल्पनोपदेशत्वस्यैवासम्भव इति मुख्यतया ब्रह्मणः प्रतिपाद्यत्वे तस्याः सङ्गतेरशक्यवचनत्वाद्वाक्यभेदो दुर्वारः । अतो यथा 'ह्यतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाती'तिवाक्यद्वयबलाददृष्टदोषदुष्टोपि विकल्पाख्यः पक्ष आश्रीयते । तथात्र श्रुतिद्वयबलादेवोभयलिङ्गत्वमास्थेयम् । तथा च, यथा हस्तादयः पुरुषात् पृथक्भूता अपि पुरुषात्मकास्तथा जगद् ब्रह्मणः सकाशाद् भिन्नतया प्रतीयमानमपि तदात्मकम्, भगवान् जगद्रूपोपि तद्भिन्नः पुरुषोत्तमः । किं बहुना यथैव सर्वश्रुत्यविरोधस्तथैव सूक्ष्मेक्षिकयात्र विचारणं कर्तव्यम्, नत्वेकतरबाधेन । अतः अस्थूलादीनां अकर्ता अभोक्तेत्यादीनां धर्मनिषेधमुखेनैव 'सर्वतः पाणिपादन्तदित्यादिना 'स विश्वविदात्मयोनिरि'त्यादीनां धर्मविधिमुखेनैव ब्रह्मस्वरूपबोधनायैव प्रवृत्ततया तुल्यबलत्वात् तयोरर्थबोधसौकर्यार्थं ब्रह्मणि सर्वरूपसमर्थत्वं सर्वरूपत्वं सर्वकरणसमर्थत्वं च गीयते । उभयलिङ्गाधिकरणेन व्यासचरणैः प्रतिपाद्यते । तेन श्रुतिसूत्रादिबलात्सर्वाविरोधार्थं विरुद्धधर्माश्रयत्वमेवादरणीयमित्यर्थः । ननु ब्रह्मणः सर्वरूपत्वं न युक्तम्, सर्वस्मिन् देशकालभेदेनाप्रतीतेः, ब्रह्मणस्तु सच्चिदानन्दात्मकत्वेन ज्ञानैकघनत्वेन सदैकरूपत्वात् । अतो न पूर्वोक्तोपपत्तिर्युज्यत इत्यत आहुः अन्यथेत्यादि । कर्त्तेति । माया, 'स्वव्यापारे हि कर्तृत्वं सर्वत्रैवास्ति कारक' इतिन्यायात्कर्तृत्वं तस्याः । तथा चानेकरसत्वेप्येकरसत्वस्याबाधायुक्तैवोपपत्तिरित्यर्थः । ननु प्रतीतिविरुद्धस्यापि शब्दादङ्गीकरणे नियामकाभावात्कथमाश्वास इत्यत आहुः विरुद्धपक्षा इत्यादि । अत्र ब्रह्मणि सर्वेषु अवतारेषु प्रतीयमानाः मत्स्यस्यान्हा योजनशतवृद्धिर्वराहस्य क्षणेन पर्वताकारत्वं, सप्तवर्षस्य गोवर्धनोद्धरणम्, दामोदरलीलायां स्वल्पस्यापि व्यापकत्वम्, इत्यादयो विरुद्धपक्षास्तत्कालीनैर्दृष्टाः, इदानीमपि श्रुत्यादिप्रसिद्धाः, अतोत्रैव ब्रह्मण्येव सर्वं शोभते । तथा च, प्रत्यक्षादेरेव नियामकत्वं शङ्काढ्यमानिना त्वयादरणीयमित्यर्थः । इदं यथा तथा विद्वन्मण्डनाद्विशिष्यावधेयम् । एवं प्रपञ्चदशायां ब्रह्मकैवल्यं साधितम् । तेन भेदवादः सर्वथा नाभिमतो भगवत इति बोधितम् । अतः परं प्रलयदशायां तदाहुः ( इत्यादि । एतेन पृथिव्यप्सु प्रलीयते, आपस्तेजसि विलीयन्ते, तेजो वायौ प्रलीयते, वायुराकाशे विलीयते, आकाशमिन्द्रियेष्विन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादौ विलीयन्ते, भूतादिर्महति विलीयते, महान् अव्यक्ते विलीयते, अव्यक्तमक्षरे विलीयते अक्षरं तमसि विलीयते, तम एकीभवति परस्मिन्, परस्तान्नासन्नासन्नासदसदित्येतन्निर्वाणमनुशासनमिति वेदानुशासनमिति, सौबालवाक्यमुपन्यस्य पृथिव्याद्यक्षरान्तानां स्वस्वकारणे लयं सर्वकारणभूतस्य तमसः परस्मिन्नामरूपविभागानर्हत्वलक्षणमेकीभावमङ्गीकुर्वन्तो विशिष्टाद्वैतवादिनोपि निवारिता इति बोधितम् । लिङ्श्लेषण इति धात्वर्थविचारणे लयस्य श्लेषरूपतया शुद्धोदके शुद्धोदकक्षेप इव नामरूपविभागानर्हत्व एव पर्यवसानादक्षरान्तानां स्वकारणेन सह तथात्वं तमसस्त्वेकीभावकथनात्[1] सकारणस्वरूपाभेद इत्येतस्यैवार्थस्य स्फुटीभावात् । अत एवोपसंहारे 'परस्तान्न सन्नासन्न सदसदि' त्युपक्रमोक्तरूपतैव परामृश्यते । तस्मादयमेव मुख्यो ब्रह्मवाद इति सर्वं सुस्थम् ॥ ३२ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

तस्य परमगुह्यस्य ग्रहणेऽहं न शक्त इति चेत्तत्राह—यावानिति । अहं यावान् यत्परिमाणकः, यथाभावो यादृक्सत्तावान्, यानि रूपाणि गुणाः कर्माणि च यस्य सः यद्रूपगुणकर्मकः, तथैव तत्त्वविज्ञानं यथार्थज्ञानं ते तव मदनुग्रहादेवास्तु ॥ ३१ ॥ ❀ ❀ एवं द्वाभ्यामाशीर्वादपूर्वकमुपदेशं प्रतिज्ञाय चतुर्भिः श्लोकैरुपदिशति— अहमिति । अग्रे सृष्टेः पूर्वं यत्सदसतोः कार्यकारणयोः परं कारणं वस्तु तदहमेवासं स्थितः, नान्यत् किञ्चित्स्थूलं सूक्ष्मं वा, इत्यनेन परं रूपं प्रदर्शितम् । आसमेव केवलं, न च किञ्चिदकरवमित्येवकारार्थः । पश्चात्सृष्टेरनन्तरमपि यदेतत् कार्यकारणात्मकं स्थूलसूक्ष्मात्मकं विश्वं तदप्यहमेवास्मीत्यपरं रूपं प्रदर्शितम् । यद्रूपगुणकर्मक इत्युक्तानि रामकृष्णाद्यवताररूपाणि, भक्तवात्सल्यादयो गुणाः, सृष्टिपालनादीनि गोवर्द्धनोद्धारणादीनि कर्माणि च सूचितानि । यश्च प्रलयेऽवशिष्येत स ईश्वरोऽप्यहमेवास्मीति त्रिकालव्यापिनी मम सत्तेति 'यथाभावः' इत्यस्यार्थो दर्शितः ॥ ३२ ॥

---

१. 'स्वकारण' पाठः ।

### हिन्दी अनुवाद

मेरा जितना विस्तार है, मेरा जो लक्षण है, मेरे जितने और जैसे रूप, गुण और लीलाएँ हैं—मेरी कृपासे तुम उनका तत्त्व ठीक-ठीक वैसा ही अनुभव करो ॥ ३१ ॥ ❀ ❀ सृष्टिके पूर्व केवल मैं-ही-मैं था। मेरे अतिरिक्त न स्थूल था न सूक्ष्म और न तो दोनोंका कारण अज्ञान। जहाँ यह सृष्टि नहीं है, वहाँ मैं-ही-मैं हूँ और इस सृष्टिके रूपमें जो कुछ प्रतीत हो रहा है, वह भी मैं हूँ और जो कुछ बचा रहेगा, वह भी मैं ही हूँ ॥ ३२ ॥

**ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि । तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः ॥३३॥**
**यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु । प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥३४॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

'यथात्ममायायोगेन' इत्यनेन मायाया अपि पृष्टत्वाद्वक्ष्यमाणोपयोगित्वाच्च मायां निरूपयति। ऋतेऽर्थं विनापि वास्तवमर्थम्। यद्यतः किमप्यनिरुक्तमात्मन्यधिष्ठाने प्रतीयेत। सदपि च न प्रतीयेत तदात्मनो मम मायां विद्यात्। यथा आभासो द्विचंद्रादिरित्यर्थः विना प्रतीतौ दृष्टांतः। यथा तम इति। सतोऽप्रतीतौ तमो राहुर्यथाग्रहमंडले स्थितोऽपि न दृश्यते तथा ॥ ३३ ॥ ❀ ❀ यथाभाव इत्येतत्स्पष्टयति। यथ महाभूतानि भौतिकेष्वनु सृष्टेरंतरं प्रविष्टानि तेषूपलभ्यमानत्वात् अप्रविष्टानि च प्रागेव कारणतया तेषु विद्यमानत्वात्। तथा तेषु भूतभौतिकेषु अहं न च तेष्वहम्। एवंभूता मम सत्तेत्यर्थः ॥ ३४ ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

किञ्च जीवस्य परमात्मज्ञानविज्ञाने प्रति माया खल्वंशेनानुकूला प्रतिकूला च भवति विज्ञाते च परमात्मनि मयि योगमायैवाधिकरोति सा खल्वनुकूलैवेति ते द्वे अवश्यनिरूपणीये इति ज्ञापयन् यथात्ममायायोगेनेत्यनेन व्यंजितस्य तव माया योगमाया च कीदृशीति प्रश्नस्योत्तरं तंत्रेणैव क्रमेणाह ऋतेर्थमिति, यद्यतोऽर्थं सत्यं वस्तु विना न प्रतीयते किं त्वर्थसत्यं वस्त्वेव प्रतीयते इत्यर्थः। तथा यतः अर्थं विना प्रतीयते अर्थो न प्रतीयते किंत्वनर्थः प्रतीयेतेत्यर्थः। तत्ताम् आत्मनि स्वस्मिन्मुक्तो बद्धश्च जीव आत्मनो मम मायां क्रमेण विद्याविद्येति वृत्तिद्वयां मायाख्यां शक्तिं विद्यात् जानीयात् विद्याया दृष्टान्तः यथा भासो दीपादिप्रकाशः दीपादिप्रकाशाद्यथा गृहे विद्यमानो घटपटादिरर्थ एव प्रतीयते न तु दीपानयनात्पूर्वं संभावितो घटपटाद्यभावस्तथा सर्पवृश्चिकादिरागंतुकश्च भयकारणमनर्थः प्रतीयते एवमेव विद्याया हेतोर्मुक्तेन जीवेन स्वस्मिन्नित्यसंबद्धं ज्ञानादिकमेव प्रतीयते नत्वविद्यादशायामिव तदभावः नापि स्वस्मिन्नसंबद्धो देहदैहिकशोकमोहादिकश्च प्रतीयते अविद्याया दृष्टान्तः यथा तमोंधकारः अंधकाराद्यथा स्वगृहे विद्यमानो घटपटादिरर्थो न प्रतीयते किं त्वविद्यमानोपि संभाव्यमानः सर्पचौरादिकोभयकारणमनर्थः प्रतीयते एवमेवाविद्याया हेतोरेव बद्धेन जीवेन स्वस्मिन्नित्यसंबंधितया वर्त्तमानमपि ज्ञानानंदादिकं न प्रतीयते किंतु स्वस्मिन्नसन्नपि स्वसंबंधित्वेन वर्त्तमानो देहदैहिकशोकमोहादिरेव प्रतीयते तेन कुसुमशृङ्गादीनां सत्यत्वेप्याकाशशशादीनां तत्संबंधाभावादेवाकाशकुसुमसलीकं शशशृङ्गसलीकमिति यथोच्यते तथैव देहानां तद्धर्माणां शोकमोहसुखदुःखादीनां च प्राधानिकत्वात्सत्यत्वेपि जीवस्य तत्संबंधाभावादेव जीवस्य देहादयो मिथ्याभूता इति शास्त्रेषूच्यते जीवस्य मिथ्याभूतोपि देहसंबंधः खल्वविद्यया कल्पते विद्यया लुप्यत इति विद्याऽविद्ययोर्दृष्टांतावाभासतमसी इत्यत्र "छायातपौ यत्र न गृध्रपक्षौ" इत्यष्टमस्कन्धे एव प्रमाणं ज्ञेयम् केचित्तु तमो दृष्टांतोयमावरणांश एव आवरणविक्षेपयोस्तु दृष्टांताः सर्पव्याघ्रभूतावेशाद्या ज्ञेया इत्याहुस्तेपि तामसत्वात्तमःशब्देनैव ग्राह्या इत्यपरे। एवं जीवे सार्वदिकविद्यमानवस्तुप्रत्यायनमविद्यमानवस्तुप्रत्यायनं चेत्यविद्याया धर्मा वावरणविक्षेपशब्दाभ्यामुच्यते। अथार्थशब्दस्य धनवाचित्वाच्छ्लेषेण भाग्यप्राप्तस्वीयबहुधनो वणिगिव विद्यालब्धज्ञानानंदो मुक्तः संपन्नत्वेन रूप्यते। तथाऽभाग्यानधिगतस्वीयधनो वणिगिवाविद्यावृतज्ञानानंदो बद्धजीवो दरिद्रत्वेनेति ज्ञेयम्। एवं विद्यया त्वंपदार्थस्य जीवात्मनोऽनुभवो भवति न तु तत्पदार्थस्य परमात्मनः तस्य निर्गुणत्वान्निर्गुणया भक्त्यैवापरोक्षानुभवः संभवेत् "भक्त्याहमेकया ग्राह्यः" इति भगवदुक्तेः। किं च "कैवल्यं सात्त्विकं ज्ञानम्" इति भगवदुक्तेर्देहादिव्यतिरिक्तात्मज्ञानरूपा येयं विद्या तस्याः सत्त्वगुणत्वादनया गुणातीतस्य परमात्मनो नैवानुभवः प्रत्युतास्या अप्यभाव एव तदुक्तं भगवता "द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः। श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्याः सर्व एव हि। येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः। भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते" इति। ननु तर्हि मुक्तजीवेन परमात्मनोऽपरोक्षानुभवार्थं भक्तिः कुतो लभ्यताम्। उच्यते। ज्ञानधिकारिणः सांख्ययोगतपआदिभिर्भक्तिमिश्रैरेव जनितया विद्ययाऽविद्यानिवर्तिकया प्रथमं त्वं पदार्थानुभवः ततस्तस्या विद्यातो विमुक्तस्य निरिंधनाग्निन्यायेन विद्याया अप्युपरमतारतम्येन पूर्वसिद्धभक्तिचंद्रकलायास्तदुपरागविच्युतायास्तत उद्गमतारतम्यं तथैव भक्त्या पुनःपुनरभ्यस्तया तत्पदार्थस्य परमात्मनोऽनुभवतारतम्यं तदुक्तं भगवता गीतासु "ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति। समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्" इति परां पौर्वकालिकगुणीभावराहित्यात् श्रेष्ठां केवलां वा

१. प्रा० पा—चेषु च।

ततश्च "भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः" इत्युक्तेर्जातिप्रमाणाभ्यामल्पीयस्या तया भक्त्या निर्विशेषब्रह्माण एवानुभवः। न त्वनंतचिद्विशेषब्रह्मणो भगवतः यथाऽल्पतेजश्चक्षुष्केण जनेन मणिमयी मूर्त्तिः सामान्यतेजोमय्येव दृश्यते। न तु मुखनासिकानेत्रकर्णादिविशेषमयी। ततश्च विद्यायाः सामरूपेणैवोपरमे सत्यद्भुतनैर्गुण्यस्य तस्य तयैव भक्त्या ब्रह्मानुभवस्यापूर्णत्वमेतदेव निर्वाणशब्दवाच्यं जीवब्रह्मैक्यं तदुक्तं तत्रैव "अतो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम्" इति। या तु चिच्छक्तिवृत्तीनां सारभूता कृपाविलासरूपा परमोत्तमा श्रद्धा भक्तिर्जातिप्रमाणाभ्यामत्यधिका सा प्रबला परमस्वतंत्रा गुणदोषादिकमप्यगणयंती बद्धेपि जीवे राक्षसपुलिंदपुल्कसादौ दुराचारेपि यदृच्छयैवोदयते। विप्रे संन्यासिनि मुक्तेपि नोदयते। तयैवाविद्यापर्यंतसमस्तक्लेशध्वंसस्तदुक्तं "जरयत्याशु या कोशं निगीर्णमनलो यथा" इति। तयैवानंतचिद्विशेषस्य भगवतोऽप्यपरोक्ष्यानुभवो भवेत्। यथा बहुतरतेजस्विचक्षुष्केण जनेन सामान्यतस्तेजोमयी विशेषतश्च मुखनासिकानेत्रकर्णादिसौंदर्यमयी च मूर्त्तिर्भद्रेणैव दृश्यते इति। तदेवं भक्तिर्द्विविधा निर्गुणा गुणमयी च। तत्राद्यया पाकदशायां प्रेमभक्तिसंज्ञया भगवद्वशीकारः सच्चिदानंदमयभगवद्रूपगुणलीलामाधुर्य्यानुभवश्च। द्वितीयया सात्त्विकया सत्त्वगुणाद्विच्युतयैव निर्विशेषब्रह्मसुखानुभवमात्रमिति। तस्माद्ब्रह्मसुखानुभवदशातः पूर्वास्वेव दशासु जीवेषु मायाया अधिकार इति सिद्धम् "सत्यमेव प्रतीतं स्याद्यतोऽसत्यं तथा यतः। तद्विद्यादात्मनो मायां यथा भासो यथा तमः" इत्यनुक्तेरित्यन्यस्मिन्नर्थेप्याशय ईक्ष्यते। ऋतेर्थशब्दौ परिवृत्यसहावर्पितौ यतः स चार्थो यथा ब्रह्मानुभववत्स्वपि जनेषु नानाविधेषु या स्पष्टमधिकरोति भगवदिच्छावशात्तदीयस्वरूपगुणलीलाप्रकाशावरणधुरंधुरा स्वरूपभूता शक्तिस्तस्यायोगमायाया अपि लक्षणं तंत्रेणैवाह—ऋत इति। आत्मनि परमात्मनि मयि ऋते ज्ञाते सति अर्तेर्गत्यर्थत्वेन ज्ञानार्थत्वात्साक्षादनुभूते सतीत्यर्थः। यदिति "इण् गतौ" इत्यस्य शत्रंतं तत्पदेनैव यत्पदस्याक्षेपात्। यतः अर्थं यत्प्रयोजनं प्राप्नुवद्वस्तु अप्राकृतं प्राकृतं च प्रतीयते। यया प्रकाशितसत्प्रयोजनं वस्तु परमात्मसाक्षात्कारवता जनेन साक्षादनुभूयेतेत्यर्थः। यतः सकाशान्न प्रतीयते ययाऽऽवृतं तदेव वा समयांतरे वा न प्रतीयेतेत्यर्थः। तामात्मनो भगवतो मम मायां योगमायाख्यामंतरंगां शक्तिं विद्याज्जानीयात्। मायया प्रयोजनं विनैवाद्रियते योगमायया तु प्रयोजनमुद्दिश्यैवेति विवेचनीयम्। "यथा भासो यथा तमः" इति आभासेन दीपादिना प्रकाशितं घटपटादिकं यथा प्रतीयते तमसा वृतं तन्नानुभूयते च तथैव सा मदिच्छावशादाभासतमोधर्मवती योगमायेत्यर्थः। उदाहरणं तु यथा ऐश्वर्यदर्शनेपि प्रेमसंकोचाभावज्ञापनार्थं भगवत्कुक्षौ यया प्रकाशितं प्राकृतमप्राकृतं गोकुलयशोदाकृष्णादिस्वरूपं च यया मोहिता श्रीयशोदा साक्षादनुबभूव क्षणांतरे च ययावरणान्नानुबभूव च यथा चैश्वर्य्यानुभूत्या प्रेमसंकोचज्ञापनार्थं यया प्रकाशितं विश्वरूपं परमात्मस्वरूपं चार्जुनः साक्षादनुबभूव तत्रैव वर्तमानमपि कृष्णस्वरूपं ययावरणान्नानुबभूव समयांतरे च ययाच्छादितं विश्वरूपादिकं नानुबभूव द्विभुजं श्रीकृष्णमेवानुबभूव अत्रैकदैवैकस्य स्वरूपस्य प्रकाशनमन्यस्यावरणमिति पूर्वतो विशेषः यथा मंजुमहिमदर्शनया ब्रह्मण ईश्वरत्वाभिमाननिवर्तनार्थं ययावरणप्रकाशनाभ्यां लीलापारकरवत्सबालाद्यदर्शनतद्दर्शनकृष्णस्वरूपसूतवत्सबालादिदर्शनचतुर्भुजत्वादिदर्शनतद्दर्शनश्रीकृष्णस्वरूपदर्शनानि प्राप। यया मोहितः परमेष्ठी अत्रैकस्मिन्नेव परमेष्ठिनि विविधस्वरूपावरणप्रकाशनयोः पौनःपुन्यमिति विशेषः। यथा च भगवद्वपुः स्वरूपत एव परिच्छिन्नमपरिच्छिन्नं चातर्क्यमिति ज्ञापनार्थं तथा केवलभजनश्रमस्तज्जन्या भगवत्कृपा चेत्युभाभ्यामेव भगवद्वशीकार इति ज्ञापनार्थञ्च दामबंधनलीलायां युगपदेव यशोदाकृष्णयोरभीप्सितबंधनाबंधने विभुत्वस्य युगपदेवावरणप्रकाशनाभ्यां वेष्टयंत्या किंकिण्या द्व्यंगुलन्यूनदाम्ना चावेष्टयता सूचिते दर्शयंत्यापि वस्तुतः कृष्णस्यैवाभीप्सितमबंधनं साधयंत्या यया मोहिता व्रजेश्वरी विस्मयरसं क्षणमनुबभूव पश्चात्तस्या अप्यभीप्सितं कृष्णसंमत्या साधयितुं विभुत्वं यया खल्वावृतमेवेत्यतः सा कृष्णं बबंधैव तत्रैकदैवैकस्यैव विभुत्वस्यावरणप्रकाशने इति पूर्वपूर्वतो विशेषः। यथा च प्रतिस्वनिमंत्रणादिसिद्ध्यर्थं श्रुतदेवबहुलाश्वरुक्मिणीसत्यभामादिगृहस्थितस्य तस्य तत्तत्स्वरूपस्य ययैव युगपदेवावरणप्रकाशनाभ्यां तत्र तत्र लीलासिद्धिर्व्याख्यास्यते। अत्र श्रुतदेवबहुलाश्वादिव्यक्तिभेदमपेक्ष्यैवावरणप्रकाशनयोर्यौगपद्यं पूर्वत्रैकस्यां यशोदायामेवेति विशेषः। सा खलु योगमायैव न तु माया। तया मोहितानामपि तेषां परमात्मसाक्षात्कारदर्शनात्स च परमात्मसाक्षात्कारो भक्तिमिश्रज्ञानवतामविद्याविद्ययोरुपरामे सति तथैवावतारसमये कृष्णं प्रीत्या पश्यतां तत्कृपाविषयीभूतत्वादप्रेमवतामपि। अन्यदा तु प्रेमवतामेवं कृष्णरामादिसाक्षात्कारो भागवतमतेनोच्यते। तेषु योगमायैवाधिकरोति न तु माया। कृष्णं तदिच्छया पश्यतामपि कंसादीनां द्वेषलक्षणांतःकरणदोषादेव न परमात्मसाक्षात्कारो यथा मत्स्यंडिकां भुंजानानामपि पित्तदूषितरसनानां न मत्स्यंडिकास्वादानुभवस्तेषु मायैवाधिकरोति न तु योगमाया मायाशक्तिश्च योगमायोत्था तस्या विभूतिरेव यदुक्तं नारदपंचरात्रे श्रुतिविद्यासंवादे "अस्या आवरिका शक्तिर्महामायाखिलेश्वरी। यया मुग्धं जगत्सर्वं सर्वेदेहाभिमानिनः" इति भगवता स्वस्वरूपत्वेनाभिमन्यमाना योगमाया शक्तिश्चिदेव सैवांशेन स्वेच्छावशात्स्वस्वरूपत्वेनाभिमन्यमाना स्वस्वरूपात्पृथग्भूता सती मायाशक्तिर्जडैव। यथा सर्पस्य स्वरूपभूतापि त्वक् तेन त्यक्ता चेत्ततः पृथग्भूतं कंचुकं जडी स्यात् तथा चोक्तं श्रुतिभिः॥ "तमुत जहासि तामहिरिव त्वचमात्तभगः" इति सा च माया त्रिविधा प्रधानमविद्या विद्या च प्रधानस्य लक्षणं जायंतेयोपाख्याने वक्ष्यते प्रधानेनोपाधयः सृज्यंते ते च सत्या एव। अविद्यया जीवेषु तदध्यासः सृष्टः।

स चासत्य एव विद्यया तदध्यासध्वंस इति तिसृणां शक्तीनां कार्यं तत्तन्मयं जगदिदमंशेनासत्यं तथा जीवानां नित्यत्वात्। भगवन्निकेतनादिभक्त्युपकरणानां निर्गुणत्वाच्चांशेन नित्यत्वमपि वादिभिर्यथा स्वमतं नानारूपतया निरूपितम् "कार्यं प्राधानिकं सत्यं कार्यमाविद्यकं मृषा। नित्यं तद्भक्तिसंबद्धमिदं तत्त्रितयात्मकम्। १ प्राधानिकाः स्युर्देहास्तद्धर्मा आविद्यकाः पुनः। जीवेषु तत्तत्संबंधो भक्तिश्चेन्निर्गुणाश्च ते २ चिज्जीवमाया नित्यास्स्युस्तिस्रः कृष्णस्य शक्तयः। तद्वृत्तयश्च ताभिः स भात्येकः परमेश्वरः ३ कार्यकारणयोरैक्याच्छक्तिशक्तिमतोरपि। एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ४ भक्तानामेव सिद्धांतश्चतुःश्लोकीयमीलिता। शीलिता भवतादुक्तैस्तैरेव न किलापरैः ५" इति विश्वनाथः। संदर्भस्तु अथ तादृशरूपादिविशिष्टस्यात्मनो व्यतिरेकमुखेन विज्ञापनार्थं मायालक्षणमाह—ऋतेर्थमिति। अर्थं परमार्थभूतं मां विना तत्प्रतीयते मत्प्रतीतौ तत्प्रतीत्यभावात्। मत्तो बहिरेव यस्य प्रतीतिरित्यर्थः। यच्चात्मनि न प्रतीयते यस्य च यदाश्रयत्वं विना स्वतः प्रतीतिर्नास्तीत्यर्थः। तथा लक्षणं वस्तु आत्मनो मम परमेश्वरस्य मायां जीवमायागुणमायेति द्वयात्मिकां मायाख्यशक्तिं विद्यात्। तत्र शुद्धजीवस्यापि चिद्रूपत्वाविशेषेण तदीयरश्मिस्थानीयत्वेन च स्वांतःपात एव विवक्षितः। तत्रास्याद्वयात्मकत्वेनाभिधानं दृष्टांतद्वैधेन लभ्यते तत्र जीवमायाख्यस्य प्रथमांशस्य तादृशत्वं दृष्टांतेन स्पष्टयन्नसंभावनां निरस्यति। यथा भास इति। आभासो ज्योतिर्बिम्बस्य स्वीयप्रकाशाद्व्यवहितप्रदेशे कश्चिदुच्छलितप्रतिच्छविविशेषः स यथा तस्माद्बहिरेव प्रतीयते न च तं विना तस्य प्रतीतिस्तथा सापीत्यर्थः। अनेन प्रतिपर्यायाभासधर्मत्वेन तस्यामाभासाख्यत्वमपि ध्वनितम्। अतस्तत्कार्यस्याप्याभासाख्यत्वं क्वचित् "आभासश्च निरोधश्च" इत्यादौ स तथा क्वचिदत्यंतोद्भटात्मास्वचाकचिक्यच्छटापतितनेत्राणां नेत्रप्रकाशमावृणोति तमावृत्य च स्वेनात्यंतोद्भटतेजस्त्वेनैव द्रष्टृनेत्रं व्याकुलयन्स्वोपकंठे वर्णशावल्यमुद्गिरति। कदाचित्तदेव पृथग्भावेन नानाकारतया परिणमयति। तथेयमपि जीवज्ञानमावृणोति सत्त्वादिगुणसाम्यरूपां गुणमायाख्यां जडां प्रकृतिमुद्गिरति कदाचित्पृथग्भूतान् सत्त्वादिगुणान्नानाकारतया परिणमयति चेत्याद्यपि ज्ञेयम्। तदुक्तम् "एकदेशस्थितस्याग्नेर्ज्योत्स्नाविस्तारिणी यथा। परस्य ब्रह्मणो माया तथेदमखिलं जगत्।" तथा चायुर्वेदविदः "जगद्योनेरनिच्छस्य चिदानंदैकरूपिणः। पुंसोस्ति प्रकृतिर्नित्या प्रतिच्छायेव भास्वतः॥ अचेतनापि चैतन्ययोगेन परमात्मनः। अकरोद्विश्वमखिलमनित्यं नाटकाकृतिम्" इति। तदेवं निमित्तांशो जीवमाया उपादानांशो गुणमायेत्यग्रेपि विवेचनीयम्। अथैवं सिद्धं गुणमायाख्यं द्वितीयमप्यंशं दृष्टांतेन स्पष्टयति। यथा तम इति। तमःशब्देनात्र पूर्वत्रोक्तं तमःप्रायं वर्णशाबल्यमुच्यते तद्यथा—तन्मूलज्योतिष्यसदपि तदाश्रयत्वं विना न संभवति तद्वदियमपीति। अथवा मायामात्रनिरूपण एव पृथग्दृष्टांतद्वयं तत्राभासदृष्टांतो व्याख्यातः। तमोदृष्टांतश्च यथांधकारोज्योतिषोऽन्यत्रैव प्रतीयते ज्योतिर्विना च न प्रतीयते ज्योतिरात्मना चक्षुषैव तत्प्रतीतेर्न पृष्ठादिनेति तथेयमपीति ज्ञेयं ततश्चांशद्वयं प्रवृत्तिभेदेनैवोत्थं न तु दृष्टांतभेदेन प्राक्तनदृष्टांतद्वैधाभिप्रायेण तु पूर्वस्या आभासपर्यायच्छायाशब्देन क्वचित्प्रयोगः उत्तरस्यास्तमःशब्देनैव चेति तथा "ससर्ज च्छायया विद्यां पञ्चपर्वाणमग्रत" इत्यत्र। यथा च "क्वाहं तमो महदहम्" इत्यादौ पूर्वत्राविद्याख्यनिमित्तशक्तिवृत्तिकत्वाज्जीवविषयकत्वेन जीवमायात्वम्। उत्तरत्र स्वीयतत्तद्गुणमयमहदाद्युपादानशक्तिवृत्तिकत्वं तथा तद्गुणमायात्वं ससर्जेत्यादौ छायाशक्तिं मायामवलंब्य सृष्ट्यारंभे ब्रह्मा स्वयमविद्यामाविर्भावितवानित्यर्थः। "विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम्। बंधमोक्षकरी आद्ये मायया मे विनिर्मिते" इत्युक्तत्वात्। अनयोराविर्भावभेदश्च श्रूयते तत्र पूर्वस्याः पाद्मे श्रीकृष्णसत्यभामासंवादीयकार्त्तिकमाहात्म्ये देवगणकृतमायास्तुतौ "इति स्तुवतस्ते देवास्तेजोमण्डलसंस्थितम्। ददृशुर्गगने तत्र तेजोव्याप्तदिगंतरम्॥ तन्मध्याद्भारतीं सर्वे शुश्रुवुर्व्योमचारिणीम्। अहमेव त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः" इत्यादि। उत्तरस्याः पाद्मोत्तरखंडे "असंख्यं प्रकृतिस्थानं निबिडध्वांतमव्ययम्" इति विद्यादिति प्रथमपुरुषनिर्देशस्यायं भावः अन्यान्प्रत्येव खल्वयमुपदेशः त्वं तु मद्दत्तशक्त्या साक्षादेवानुभवसीति एवं मायिकदृष्टिमतीत्यैव रूपादिविशिष्टं मामनुभवेदिति व्यतिरेकमुखेनानुभावनस्यायं भावः शब्देन निर्द्धारितस्यापि मत्स्वरूपादेर्मायाकार्यावेशेनैवानुभवो न भवति ततस्तदर्थं मायात्याजनमेव कर्त्तव्यमिति। एतेन तदविनाभावात्प्रेमाप्यनुभावित इति गम्यते॥ ३३॥ ❀ ❀ इत्यर्थ इति अलौकिक्येव मम सत्तेति भावः। संदर्भ अथ तस्यैव प्रेम्णोरहस्यत्वं बोधयति यथेति। यथा महांति भूतानि भूतेष्वप्रविष्टानि बहिःस्थितानामप्यनुप्रविष्टान्यंतःस्थितानि भांति तथा लोकातीतवैकुंठस्थितत्वेनाप्रविष्टोप्यहं तेषु तत्तद्गुणविख्यातेषु प्रणतजनेषु प्रविष्टो हृदि स्थितोहं भामि तत्र महाभूतानामंशभेदेन प्रवेशाप्रवेशौ तस्य तु प्रकाशभेदेनेति भेदोपि प्रवेशाप्रवेशमात्रसाम्येन दृष्टांतः तदेवं तेषां तादृगात्मवशकारिणी प्रेमभक्तिर्नाम रहस्यमिति सूचितं तथा च ब्रह्मसंहितायाम्। "आनंदचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः। गोलोक एव निवसत्यखिलात्मभूतो गोविंदमादिपुरुषं तमहं भजामि॥ प्रेमाञ्जनच्छुरितभक्तिविलोचनेन संतः सदैव हृदयेपि विलोकयंति। तं श्यामसुंदरमचिंत्यगुणस्वरूपं गोविंदमादिपुरुषं तमहं भजामि" इति। अचिंत्यगुणस्वरूपमपि प्रेमाख्यं यदंजनच्छुरितवदुच्चैः प्रकाशमानं भक्तिरूपं विलोचनं तेनेत्यर्थः। यद्वा यथा तेषु तानि बहिःस्थितानि च भांति तथा भक्तेष्वप्यहमंतर्मनोवृत्तिषु बहिरिंद्रियवृत्तिं च विस्फुरामीति भक्तेषु सर्वथानन्यवृत्तिता हेतुर्नाम किमपि स्वप्रकाशं प्रेमाख्यमानंदात्मकं वस्तु मम रहस्यमिति भावः। तथैव श्रीब्रह्मणोक्तं "न भारती मेंग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः। न मे हृषीकाणि

पतंत्यसत्पथे यन्मे हृदौत्कंठ्यवता धृतो हरिः" इति यद्यपि व्याख्यांतरानुसारेणायमर्थोपलपनीयः स्यात्तथाप्यस्मिन्नेवार्थे तात्पर्यं प्रतिज्ञाचतुष्टयसाधनायोपक्रांतत्वात्तदनुक्रमगतत्वाच्च । किञ्चार्थे न तेष्वतिछिन्नपदं व्यर्थं स्यात् दृष्टांतस्यैव क्रियाभ्यामन्वयोपपत्तेः । अपि च रहस्यं नाम ह्येतदेव यत्परमदुर्लभं वस्तु इष्टोदासीनजनदृष्टिनिवारणार्थं साधारणवस्त्वंतरेणाच्छाद्यते तथा चिंतामणेः संपुटादिना अत एव "परोक्षवादा ऋषयः परोक्षं मम च प्रियम्" इति भगवद्वाक्यं तदेव च परोक्षं क्रियते यददेयं विरलप्रचारं महद्वस्तु भवति तस्यैवादेयत्वं विरलप्रचारं महत्त्वं च 'मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम्' । इत्यादौ "मुक्तानामपि सिद्धानाम्" इत्यादौ "भक्तिः सिद्धेर्गरीयसी" इत्यादौ च बहुत्र व्यक्तं स्वयं चैतदेव श्रीभगवता परमभक्ताभ्यामर्जुनोद्धवाभ्यां कष्टोक्त्यैव कथितं "सर्वं गुह्यतमं भूयः शृणु मे परमं वचः" इत्यादिना "सुगोप्यमपि वक्ष्यामि" इत्यादिना च इदमेव रहस्यं श्रीनारदाय स्वयं ब्रह्मणैव प्रकटीकृतम् । "इदं भागवतं नाम यन्मे भगवतोदितम् । संग्रहोयं विभूतीनां त्वमेतद्विपुलीकुरु ॥ यथा हरौ भगवति नृणां भक्तिर्भविष्यति । सर्वात्मन्यखिलाधारे इति संकल्प्य वर्णय" इति । तस्मात्साधु व्याख्यातं स्वामिचरणैरपि रहस्यं भक्तिरिति । विश्वनाथस्तु एवं च मायां योगमायाञ्च तंत्रेणैव लक्षयित्वा ताभ्यामधिकृतेषु सगुणनिर्गुणलोकेषु ब्रह्मणा पृष्टं स्वस्वप्रकारं तंत्रेणैवाह यथेति । यथा महाभूतान्याकाशादीनि भूतेषु देवमनुष्यतिर्यगादिष्वनुप्रविष्टानि तेषूपलभ्यमानत्वात् । अप्रविष्टानि च पृथग्विद्यमानत्वात् । तथा तेषु भूतभौतिकेष्वहं प्रविष्टः सन्नपि पृथक् शुद्धसत्त्वात्मकस्वधामनि वर्तमानत्वादप्रविष्टश्चास्मि । किं तु महाभूतानामचेतनत्वादेव तेषु भूतेषु प्रवेश आसंगरहितः मम तु चेतनत्वेप्याकाश इवासौ स्वगृहेष्वलिप्त एव वसतीतिवत्तेषु सर्वेषु प्रवेशनियमनपालनादीन्यासंगरहितानीत्येवंभूतेषु मायिकेष्वासंगरहितैव क्रीडेति भावः । तथा तेषु प्रसिद्धेषु नतेषु प्रणतभक्तजनेषु प्रविष्टोन्तःकरणेषु दर्शनं दातुं तथाऽप्रविष्टः बहिस्थितश्च तेषां नयनेषु स्वसौंदर्यमर्पयितुं नासासु स्वसौरभ्यं प्रवेशयितुं तैः सहोक्तिप्रत्युक्ती कुर्वंस्तेषां कर्णेषु स्वसौस्वर्यामृतं पूरयितुं स्पर्शनालिंगनादिदानैस्तेषामंगेषु स्वीयसौकुमार्यादिकं चानुभावयितुमिति तेषु गुणातीतभक्तेष्वंतर्बहिर्मैयात्यक्तुमशक्येष्वासंगसहितैव मम क्रीडेति भावः ॥ ३४ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

ऋतेऽर्थमित्यादि किमपि देहादेरित्यर्थः । अयम्भावः असन्नपि मिथ्याभूतोऽपि देहादिर्वास्तवं परमार्थं विनैव आत्मत्वेन प्रतीयते सन्नपि नित्यप्रकाशमानोऽपि आत्मा न प्रतीयते न ज्ञायते देहादिभिन्न आत्मा नास्तीति बोधो यया भवति तामात्मनः परमेश्वरस्य मायां विद्यात् अयम्भावः मायाया आवरणविक्षेपरूपे द्वे शक्ती तत्रावरणशक्त्या स्वरूपाज्ञानं विक्षेपशक्त्या देहे आत्माभिमानः तत्रासतः प्रतीतौ दृष्टांतः यथाभास इति चन्द्रादेर्द्वित्वाभावेऽपि बुद्धिविपर्य्यासात् दृष्टदोषाद्वा यथा चन्द्रद्वयं कदाचित् प्रतीयते इति सतोऽप्यप्रतीतौ दृष्टान्तः यथा तम इति गाढान्धकारावृतगेहोदरे सन्तोऽपि घटादयो न प्रतीयन्ते किन्तु तम एव प्रतीयते एवं नात्मा किन्तु देहादिरिति यद्वा तमोराहुः यथा ग्रहमण्डले स्थितोऽपि न प्रतीयते इत्यर्थः ।इति बालप्रबोधिनी ॥ ३३ ॥ ३४ ॥

### श्रीमद्वीरराघवव्याख्या

एवं चिदचिद्विलक्षणस्य परमात्मनः स्वरूपमुक्तं अथावरशब्दोक्तमंगतया ज्ञातव्यं चिद्रूपमाह ऋतेऽर्थमिति । अर्थनिरतिशयपुरुषार्थभूते चित्तत्त्वमृते विना यद्विद्वस्तु प्रतीयेत प्रकृत्यनुसंधानवेलायामात्मस्वरूपं न यथावत्प्रकाशत इत्यर्थः । आत्मनि चेतनस्वरूपे प्रतीयमाने सा निशा पश्यतो मुनेरिति न्यायेन यदचेतनं प्रतीयेत तदात्मनः परमात्मनः मायां विद्यादित्यर्थः । अन्यतरस्य प्रकाशने नान्यतरस्य प्रकाशनं विरुद्धाकारत्वादित्यभिप्रेत्य तत्र दृष्टांतमाह । यथा भासो भासनं भासुशब्दो बहुवचनांतो वा नहि तेजसि तमो भाति न च तमसि तेजो भाति तद्वदित्यर्थः । स्थूलत्वसूक्ष्मत्वनित्यत्वजडत्वादिविरुद्धाकारयोगोऽभिप्रेतः ॥ ३३ ॥

❀ ❀ एवं परस्परविलक्षणं चिदचित्स्वरूपमुक्तं अथैतयोः स्वस्यानुप्रवेशेन तत्प्रशासनरूपं पालनं तद्गतदोषास्पर्शं चाह यथेति । महांति भूतान्याकाशवायुतेजांसि यथोच्चावचेषु नानाविधेषु भूतेषु भौतिकेषु घटादिषु प्रविष्टान्यप्रविष्टान्येव घटादिगतभेदच्छेदनाद्यस्पृष्टत्वात्तथाहमपि तेषु चेतनाचेतनेष्वात्मतयानुप्रविष्टोऽपि तेषु न प्रविष्टः न तद्गतदोषैः स्पृष्ट इत्यर्थः । यद्वा परिच्छिन्नचेतनाचेतनवस्त्वनुप्रवेशेपि स्वस्यापरिच्छिन्नत्वं सदृष्टांतमाह यथेति ! अप्रविष्टानि बहिरपि संति तथातर्बहिश्च तत्सर्वं व्याप्येति प्रकारेण तेषु प्रविष्टोऽहं नतेष्वेव बहिरपि व्याप्त इत्यर्थः । एवमपरिच्छिन्नत्वप्रतिपादनेन यावानहमित्येतत्स्पष्टीकृतं अहमेवासमित्यत्र जगत्कारणत्वतदाक्षिप्तचेतनाचेतनवैलक्षण्यापादनसार्वज्ञ्यसर्वशक्तित्वादिप्रतिपादनेन यथा भाव इत्येतत्स्पष्टीकृतं ऋतेऽर्थमित्यादिना परमात्मशरीरभूतस्य परस्परविलक्षणचेतनाचेतनस्वरूपप्रतिपादनेन यद्रूप इति स्पष्टीकृतं तथातेष्वित्यनेन चेतनाचेतनयोः परमात्मशरीरत्वप्रतिपादनाच्छरीरगता धर्मा जीवात्मनस्तच्छरीरगतबालत्वयुवत्वादय इव मच्छरीरभूतचेतनाचेतनद्वारा ममैव धर्मा इति प्रतीतेर्यद्गुण इत्यभिव्यंजितं अहमेवासमित्यनेन स्रष्टृत्वपालकत्वसंहर्तृत्वरूपजगद्व्यापाररूपकर्मप्रतिपादनेन यत्कर्मक इत्यभिव्यक्तीकृतम् ॥ ३४ ॥

**श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या**

ज्ञानोपदेशप्रकारमाह अहमिति । अग्रे सृष्टेः प्रागहमेवासं च शब्दात्सदसदासीत्कालप्रकृत्यादिकमभूत्तथापि प्रलये यत्कालकर्मादिकमन्यद् हरेर्भिन्नमभूत्तत्परं स्वतंत्रं नासं किंच मायावृतत्वेन मदधीनमेवाभूत् पश्चात्सृष्ट्यनंतरं स्थितिकाले त्वहमेत-ज्जगद्वासमासीत् फलितमाह य इति । स्थितिकाले भोक्ताऽहं कर्ताऽहं इति स्वातंत्र्यप्रतीतेः सृष्टेः प्राक् लयानंतरं चास्य जगतः स्वातंत्र्यं स्यादिति चेन्न तत्प्रतीतेः बुद्धिमोहमूलत्वात् तदुक्तं विष्णोरधीनं प्राक् सृष्टेस्तथैव प्रलयादनु अस्य सत्त्वप्रवृत्त्यादिविशेषेणा-धिगम्यते स्वातंत्र्यं स्थितिकाले तु कथां चिद्बुद्धिमोहतः प्रतीयमानमपितु तस्मान्नैवेति गम्यतामित्यादि । अनेन कालत्रयेऽपि स्वतंत्रोऽहं त्वदादिकं सर्वं यदधीनमेवेत्युक्तं भवति ॥ ३३ ॥ ❀ ❀ अस्वतन्त्रस्य प्रकृत्यादेः स्वरूपमुपदिशतीत्याह ऋतेऽर्थं मिति । यद्वस्तु आप्तकामस्य ममार्थं प्रयोजनमृते सर्वत्र वेदादिषु प्रतीयेत यच्चात्मनि मयि बाधकं न प्रतीयेत न हीश्वरस्य जीवप्रकृति-भ्यामर्थो बाधश्च स्तः तत्प्रकृत्यादिवस्तु आत्मनः परमात्मनो मायां विद्यादित्यन्वयः । मायेति नेंद्रजालमुच्यते किंतु जीवप्रकृती एवेत्याह यथेति । यथा यथार्थत्वेनैव सत्यत्वे नैवप्रतीयमान आभासो मम प्रतिबिंबभूतो जीवो यथा यथार्थत्वेनैव तमोग्लानिहेतुर्मूल-प्रकृतिश्च मायेत्युच्यते मुख्यतो विष्णुशक्तिर्हि मायाशब्देन भण्यते उपचारतस्तु प्रकृतिर्जीवश्चैव हि भण्यत इति वचनात् एतदुक्तं भवति यथाच्छत्रधराद्या रथस्था अपरथिनो नोच्यन्ते तथा जीवप्रकृतिकर्मकलाः सदा मयि वर्तमाना अपि जीवेन जीवनाभावात् प्रकृत्या बंधाभावात् कर्मणा फलाभावात् कालतः परिणामाभावाच्च मयि स्थिता इति नोच्यन्ते सर्वं परे स्थितमपि नैव तत्रेति भण्यत इत्यादेरिति ॥ ३४ ॥

**श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या**

अथ तादृशरूपादिविशिष्टस्यात्मनो व्यतिरेकमुखेन विज्ञापनार्थं मायालक्षणमाह ऋतेऽर्थमित्यादि । अर्थं परमार्थभूतं मां विना यत् प्रतीयेत मत्प्रतीतौ तत् प्रतीत्यभावात् मत्तो बहिरेव यस्य प्रतीतिरित्यर्थः । यच्चात्मनि न प्रतीयेत यस्य च यदाश्रयत्वं विना स्वतः प्रतीतिर्नास्तीत्यर्थः । तथालक्षणं वस्तु आत्मनो मम परमेश्वरस्य मायां जीवमायागुणमायेति द्व्यात्मिकां मायाख्यशक्तिं विद्यात् अत्र शुद्धजीवस्यापि चिद्रूपत्वाविशेषेण तदीयरश्मिस्थानीयत्वेन च स्वान्तःपात एव विवक्षितः तत्रास्या द्व्यात्मकत्वेना-भिधानं दृष्टान्तद्वैधेन लभ्यते । तत्र जीवमायाख्यस्य प्रथमांशस्य तादृशत्वं दृष्टान्तेन स्पष्टयन्नसम्भावनां निरस्यति यथाभास इति । आभासो ज्योतिर्बिम्बस्य स्वीयप्रकाशात् व्यवहितप्रदेशे कथञ्चिदुच्छलितप्रतिच्छविविशेषः स यथा तस्माद्बहिरेव प्रतीयते न च तं विना तस्य प्रतीतिस्तथा सापीत्यर्थः । अनेन प्रतिच्छविपर्य्याभासधर्मत्वेन तस्यामाभासाख्यत्वमपि ध्वनितम् ! अतस्तत्कार्य्य-स्याप्याभासाख्यत्वं क्वचित् आभासश्च निरोधश्चेत्यादौ अत्र स यथा क्वचिदत्यन्तोद्भटात्मा स्वचाकचिक्यच्छटापतितनेत्राणां नेत्रप्रकाश-मावृणोति तमावृत्य च स्वेनाभ्यन्तोद्भटतेजस्त्वेनैव द्रष्टृनेत्रं व्याकुलयन् स्वोपकण्ठे वर्णशाबल्यमुद्गिरति कदाचित्तदेव पृथगभावेन नानाकारतया परिणमयति तथेयमपि जीवज्ञानमावृणोति सत्त्वादिगुणसाम्यरूपां गुणमायाख्यां जडां प्रकृतिमुद्गिरति कदाचित् पृथगभूतान् सत्त्वादिगुणान् नानाकारतया परिणमयति चेत्याद्यपि ज्ञेयम् । तदुक्तम्—एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा परस्य ब्रह्मणो माया तथेदमखिलं जगत् ॥ तथा चायुर्वेदविदः जगद्योनेरनिच्छस्य चिदानन्दैकरूपिणः पुंसोऽस्ति प्रकृतिर्नित्या प्रतिच्छायेव भास्वतः ॥ अचेतनापि चैतन्ययोगेन परमात्मनः । अकरोद्विश्वमखिलमनित्यं नाटकाकृतिम् ॥ इति । तदेवं निमि-त्तांशो जीवमाया उपादानांशो गुणमायेत्यग्रेऽपि विवेचनीयम् । अथैवं सिद्धं गुणमायाख्यं द्वितीयमप्यंशं दृष्टान्तेन स्पष्टयति यथा तम इति । तमःशब्देनात्र पूर्वप्रोक्तं तमःप्रायं वर्णशाबल्यमुच्यते । यद्यथातन्मूलज्योतिष्यसदपि तदाश्रयत्वं विना न सम्भवति तद्वदियमपीति । अथवा मायामात्रनिरूपण एव पृथग्दृष्टान्तद्वयम् । तत्राभासदृष्टान्तो व्याख्यातः तमोदृष्टान्तश्च यथान्धकारो ज्योतिषोऽन्यत्रैव प्रतीयते ज्योतिर्विना च न प्रतीयते ज्योतिरात्मा चक्षुषैव तत्प्रतीतेर्न पृष्ठादिनेति, तथेयमपीति ज्ञेयम् । ततश्चांशद्वयं प्रवृत्तिभेदेनैवोह्यं न तु दृष्टान्तभेदेन । प्राक्तनदृष्टान्तद्वैधाभिप्रायेण तु पूर्वस्या आभासपर्य्यायच्छायाशब्देन क्वचित् प्रयोगः उत्तरस्या-स्तमःशब्देनैव चेति यथा—ससर्जच्छाययाविद्यां पञ्चपर्व्वाणमग्रतः इत्यत्र यथा चकाहं तमोमहदहमित्यादौ । पूर्व्वत्राविद्याख्य-निमित्तशक्तिवृत्तिकत्वाज्जीवविषयकत्वेन जीवमायात्वम् । उत्तरत्र स्वीयतद्गुणमयमहदाद्युपादानशक्तिवृत्तिकत्वाद्गुणमायात्वम् । तथा ससर्जेत्यादौ छायाशक्तिं मायामवलम्ब्य सृष्ट्यारम्भे ब्रह्मा स्वयमविद्यामाविर्भावितवानित्यर्थः । विद्याविद्ये मम तनू विध्युद्धव शरीरिणाम् । बन्धमोक्षकरी आद्ये मायया मे विनिर्म्मिते ॥ इत्युक्तत्वात् । अनयोराविर्भावभेदश्च श्रूयते । तत्र पूर्वस्याः पाद्मे श्रीकृष्ण-सत्यभामासंवादीयकार्त्तिकमाहात्म्ये देवगणकृतमायास्तुतौ इति स्तुवन्तस्ते देवास्तेजोमण्डलसंस्थितम् । ददृशुर्गगने तत्र तेजोव्याप्त-दिगन्तरम् ॥ तन्मध्याद्भारतीं सर्वे शुश्रुवुर्व्योमचारिणीम् । अहमेव त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः इत्यादि । उत्तरस्याः पाद्मोत्तर-खण्डे असंख्यं प्रकृतिस्थानं निविडध्वान्तमव्ययम् । इति । विद्यादिति प्रथमपुरुषनिर्देशस्यायं भावः अन्यान् प्रत्येव खल्वयमुपदेशः त्वन्तु मद्दत्तशक्त्या साक्षादेवानुभवन्नसीति । एवं मायिकसृष्टिदृष्टिमतीत्यैव रूपादिविशिष्टं मामनुभवेदिति व्यतिरेकमुखे नानु-भावनस्यायं भावः शब्देन निर्द्धारितस्यापि मत्स्वरूपादेर्मायाकार्यावेशेनैवानुभवो न भवति ततस्तदर्थं मायात्याजनमेव कर्त्तव्यमिति

एतेन तदविनाभावात् प्रेमाप्यनुभवति इति गम्यते ॥ ३३ ॥ ❀ ❀ अथ तस्यैव प्रेम्णो रहस्यत्वं बोधयति यथा महान्तीति । यथा महांति भूतानि भूतेष्वप्रविष्टानि बहिःस्थितान्यप्यनुप्रविष्टानि भांति तथा लोकातीतवैकुण्ठस्थितत्वेनाप्रविष्येऽप्यहं तेषु तत्तद्गुणविख्यातेषु प्रवेशाप्रवेशौ तस्य तु प्रकाशभेदेनेति भेदेऽपि प्रवेशाप्रवेशमात्रसाम्येन दृष्टान्तः । तदेवं तेषां तादृगात्मवशकारिणी प्रेमभक्तिर्नाम रहस्यमिति सूचितम् । तथा च ब्रह्मसंहितायाम् आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः । गोलोक एव निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामि ॥ प्रेमाञ्जनच्छुरितभक्तिविलोचनेन सन्तः सदैव हृदयेऽपि विलोकयन्ति । ते श्यामसुन्दरमचिन्त्यगुणस्वरुपं गोविन्दमादिपुरुषं तमहं भजामि ॥ इति । अचिन्त्यगुणस्वरूपमपि प्रेमाख्यं यदञ्जनच्छुरितवदुच्चैः प्रकाशमानं भक्तिरुपं विलोचनं तेनेत्यर्थः । यद्वा तेषु यथा तानि बहिःस्थितानि चान्तःस्थितानि च भान्ति तथा भक्तेष्वप्यहमन्तर्मनोवृत्तिषु बहिरिन्द्रियवृत्तिषु च विस्फुरामीति भक्तेषु सर्वथाऽनन्यवृत्तिताहेतुर्नाम किमपि स्वप्रकाशं प्रेमाख्यमानन्दात्मकं वस्तु मम रहस्यमिति व्यञ्जितम् । तथैव श्रीब्रह्मणोक्तं न भारती मेऽङ्ग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः । न मे हृषीकाणि पतन्त्यसत्पथे यन्मे हृदौत्कण्ठ्यवता धृतो हरिः ॥ इति । यद्यपि व्याख्यान्तरानुसारेणायमर्थोऽपलपनीयः स्यात्तथाप्यस्मिन्नेवार्थे तात्पर्य्यं प्रतिज्ञाचतुष्टयसाधनायोपक्रान्तत्वात् तदनुक्रमगतत्वाच्च । किञ्च तस्मिन्नर्थे न तेष्विति च्छिन्नपदमपि व्यर्थं स्यात् । दृष्टान्तस्यैव क्रियाभ्यामन्वयोपपत्तेः । अपि च रहस्यं नाम ह्येतदेव यत् परमदुर्ल्लभं वस्तु दुष्टोदासीनजनदृष्टिनिवारणार्थं साधारणवस्त्वन्तरेणाच्छाद्यते यथा चिन्तामणिः सम्पुटादिना । अतएव परोक्षवादा ऋषयः परोक्षञ्च मम प्रियम् । इति श्रीभगवद्वाक्यम् तदेव च परोक्षं क्रियते यददेयं विरलप्रचारं महद्वस्तु भवति । अस्यैवादेयत्वं विरलप्रचारत्वं महत्त्वञ्च मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगमित्यादौ मुक्तानामपि सिद्धानामित्यादौ भक्तिः सिद्धेर्गरीयसीत्यादौ च सर्वत्र व्यक्तम् । स्वयञ्चैतदेव श्रीभगवता परमभक्ताभ्यामर्ज्जुनोद्धवाभ्यां कण्ठोक्त्यैव कथितम् । सर्वगुह्यतमं भूयः शृणु मे परमं वच इत्यादिना सुगोप्यमपि वक्ष्यामीत्यादिना च । इदमेव रहस्यं श्रीनारदाय स्वयं श्रीब्रह्मणैव प्रकटीकृतम् । इदं भागवतं नाम यन्मे भगवतोदितम् । संग्रहोऽयं विभूतीनां त्वमेतद् विपुलीकुरु ॥ यथा हरौ भगवति नृणां भक्तिर्भविष्यति । सर्वात्मन्यखिलाधार इति संकल्प्य वर्णय ॥ इति । तस्मात् साधु व्याख्यातं स्वामिचरणैरपि रहस्यभक्तिरिति ॥ ३४ ॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

किञ्च जीवस्य परमात्मज्ञानविज्ञाने प्रति माया खल्वंशेनानुकूला च भवति । विज्ञाते च परमात्मनि मयि योगमायैवाधिकरोति सा खल्वनुकूलैवेति ते द्वे अवश्यनिरूपणीये इति ज्ञापयन् यथात्ममायायोगेनेत्यनेन व्यञ्जितस्य तव माया योगमाया च कीदृशीति प्रश्नोत्तरं तन्त्रेणैव क्रमेणाह, ऋतेऽर्थमिति । यत् यतः अर्थं सत्यं वस्तु विना न प्रतीयते, किन्त्वनर्थः । सत्यं वस्त्वेव प्रतीयेत इत्यर्थः । तथा यतः अर्थं विना प्रतीयेत, अर्थो न प्रतीयेत, किन्त्वनर्थः प्रतीयेतेत्यर्थः । तत्ताम् आत्मनि स्वस्मिन् मुक्तो बद्धश्च जीव आत्मनो मम मायां क्रमेण विद्या अविद्येति वृत्तिद्वयां मायाख्यां शक्तिं विद्यात् जानीयात् । विद्याया दृष्टान्तः—यथाभासो दीपादिप्रकाशः, दीपादिप्रकाशाद्यथा गृहे विद्यमानो घटपटादिरर्थ एव प्रतीयते, न तु दीपानयनात् पूर्व्वं सम्भावितो घटपटाद्यभावस्तथा सर्पवृश्चिकादिरागन्तुकश्च भयकारणमनर्थः प्रतीयते । एवमेव विद्याया हेतोर्मुक्तेन जीवेन स्वस्मिन्नित्यसम्बन्धं ज्ञानानन्दादिकमेव प्रतीयते न त्वविद्यादशायामिव तदभावः, नापि स्वस्मिन्नसम्बन्धो देहदैहिकशोकमोहादिकश्च प्रतीयते । अविद्याया दृष्टान्तः—यथा तमोऽन्धकारः, अन्धकाराद्यथा स्वगृहे विद्यमानो घटपटादिरर्थो न प्रतीयते, किन्त्वविद्यमानोऽपि सम्भाव्यमानः सर्पचोरादिको भयकारणमनर्थः, प्रतीयते । एवमेवाविद्याया हेतोरेव बद्धेन जीवेन स्वस्मिन् नित्यसम्बन्धितया वर्त्तमानमपि ज्ञानानन्दादिकं न प्रतीयते किन्तु स्वस्मिन्नसन्नपि स्वसम्बन्धित्वेन वर्त्तमानो देहदैहिकशोकमोहादिरेव प्रतीयते । तेन कुसुमशृंगादीनां सत्यत्वेऽपि आकाशशशादीनां तत्सम्बन्धाभावादेव आकाशकुसुममलीकं शशशृंगमलीकमिति यथोच्यते तथैव देहानां तद्धर्म्माणां शोकमोहसुखदुःखादीनाञ्च प्राधानिकत्वात् सत्यत्वेऽपि जीवस्य तत्सम्बन्धाभावादेव जीवस्य देहादयो मिथ्याभूता इति शास्त्रेषूच्यते । जीवस्य मिथ्यामूतोऽपि देहसम्बन्धः खल्वविद्यया कल्प्यते विद्यया लुप्यते इति विद्याविद्ययोर्दृष्टान्तावाभासतमसी इत्यत्र छायातपौ यत्र न गृध्रपक्षावित्यष्टमस्कन्ध एव प्रमाणं ज्ञेयम् । केचित्तु तमोदृष्टान्तोऽयमावरणांश एव आवरणविक्षेपयोस्तु दृष्टान्ताः सर्पव्याघ्रभूतावेशाद्या ज्ञेया इत्याहुस्तेऽपि तामसत्वात्तमःशब्देनैव ग्राह्या इत्यपरे एवं जीवे सार्वदिकविद्यमानवस्तुप्रत्यायनमविद्यमानवस्तु प्रत्यायनं चेत्यविद्याया धर्म्मावावरणविक्षेपशब्दाभ्यामुच्येते ॥ अथार्थशब्दस्य धनवाचित्वात् श्लेषेणभाग्यप्राप्तस्वीयबलधनोवणिगिव विद्यालब्धज्ञानानन्दो मुक्तः सम्पन्नत्वेन रूप्यते तथा अभाग्यानधिगतस्वीयधनो वणिगिवाविद्याज्ञानानन्दो बद्धजीवो दरिद्रत्वेनेति ज्ञेयम् । एवं विद्यया त्वम्पदार्थस्य जीवात्मनोऽनुभवो भवति न तु तत्पदार्थस्य परमात्मनः तस्य निगुर्णत्वान्निर्गुणया भक्त्यैवापरोक्षानुभवः सम्भवेत् भक्त्याहमेकया ग्राह्य इति भगवदुक्तेः । किञ्च कैवल्यं सात्त्विकं ज्ञानमिति भगवदुक्तेर्देहादिव्यतिरिक्तात्म ज्ञानरुपा येयं विद्या तस्याः सत्त्वगुणत्वादनया गुणातीतस्य परमात्मनो नैवानुभवः प्रत्युतास्या अप्यपाय एव । यदुक्तं भगवता-द्रव्यं देशः फलं कालो ज्ञानं कर्म्म च कारकः। श्रद्धाऽवस्थाकृतिर्निष्ठात्रैगुण्यः सर्व एव हि ॥

येनेमे निर्जिता सौम्य गुणा जीवेन चित्तजाः । भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते ॥ इति ननु तर्हि मुक्तजीवेन परमात्मनो परोक्षानुभवार्थं भक्तिः कुतो लभ्यताम् उच्यते ज्ञानाधिकारिणः सांख्ययोगतपआदिभिर्भक्तिमिश्रैरेव जनितया विद्यया अविद्यानिवर्तिकया प्रथमं त्वम्पदार्थानुभवः ततस्तस्याविद्यातो वियुक्तस्य निरिन्धनाग्निन्यायेन विद्यया अप्युपरमतारतम्येन विद्यया अप्युपरमतारतम्येन पूर्वसिद्धभक्तिचन्द्रकलायास्तदुपरागविच्युतायास्तत उद्गमतारम्यम् । तथैव भक्त्या पुनः पुनरभ्यस्तया तत्पदार्थस्य परमात्मनोऽनुभवतारतम्यम् । यदुक्तं भगवता गीतासु 'ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् । इति परां पौर्वकालिकगुणीभावराहित्यात् श्रेष्ठां केवलां वा ततश्च भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः । इत्युक्तेर्जातिप्रमाणाभ्यामल्पीयस्या तया भक्त्या निर्विशेषब्रह्मण एवानुभवः न त्वनन्तचिद्विशेषब्रह्मणो भगवतः । यथा अल्पतेजस्विचक्षुष्केण जनेन मणिमयी मूर्त्तिः सामान्यस्तेजोमयेव दृश्यते न तु मुखनासिकानेत्रकर्णादिविशेषमयी ततश्च विद्याया सामस्त्येनैवोपरमे सत्यद्भुतनैर्गुण्यस्य तस्य तयैव भक्त्या ब्रह्मानुभवस्यापि पूर्णत्वम् एतदेव निर्व्वाणशब्दवाच्यं जीवब्रह्मैक्यम् । यदुक्तं तत्रैव ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् । इति या तु चिच्छक्तिवृत्तीनां सारभूता कृपाविलासरूपा परमोत्तमा शुद्धा भक्तिर्जातिप्रमाणाभ्यामत्यधिका सा प्रबला परमस्वतन्त्रा गुणदोषादिकमप्यगणयन्ती बद्धेऽपि जीवे राक्षसपुलिन्दपुल्कशादौ दुराचारेऽपि यदृच्छयैवोदयते विप्रे सन्न्यासिनि मुक्तेऽपि नोदयते । तयैवाविद्यापर्यन्तसमस्तक्लेशध्वंसः यदुक्तम्' जरयत्याशु या कोषं निगीर्णमनलो यथा ॥ इति । तयैवानन्तचिद्विशेषस्य भगवतोऽप्यपरोक्षानुभवो भवेत् । यथा बहुतरतेजस्विचक्षुष्केण जनेन सामान्यतस्तेजोमयी विशेषतश्च मुखनासिकानेत्रकर्णादिसौन्दर्यमयी च मूर्त्तिभेदेनैव दृश्यत इति । तदेवं भक्तिर्द्विधा निर्गुणा गुणमयी च तत्राद्यया पाकदशायां प्रेमभक्तिसंज्ञया भगवद्वशीकारः सच्चिदानन्दमयभगवद्रूपगुणलीलामाधुर्य्यानुभवश्च द्वितीयया सात्त्विक्या सत्त्वगुणाद्विच्युतयैव निर्विशेषब्रह्मसुखानुभवमात्रमिति । तस्माद् ब्रह्मसुखानुभवदशातः पूर्वास्वेव दशासु जीवेषु मायाया अधिकार इति सिद्धम् । सत्यमेव प्रतीतं स्याद्यतोऽसत्यं तथा यतः । तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥ इत्यनुक्तेरित्यन्यस्मिन्नर्थेऽप्याशय ईक्ष्यते । ऋतेऽर्थशब्दौ परिवृत्त्यसहावर्पितौ यतः ॥ स चार्थो यथा ब्रह्मानुभववत्स्वपि जनेषु नानाविधेषु या स्पष्टमधिकरोति भगवदिच्छावशात् तदीयस्वरूपरूपगुणलीलाप्रकाशनावरणधुरन्धरा स्वरूपभूता शक्तिस्तस्या योगमायाया अपि लक्षणं तन्त्रेणैवाह ऋते इति । आत्मनि परमात्मनि मयि ऋते ज्ञाते सति अर्तेर्गत्यर्थत्वेन ज्ञानार्थत्वात् साक्षादनुभूते सतीत्यर्थः । यदिति इण् गतौ शत्रन्तम् तत्पदेनैव यत्पदस्याक्षेपात् यतः अर्थं यत् प्रयोजनं प्राप्नुवत् वस्तु अप्राकृतं प्राकृतञ्च प्रतीयते यया प्रकाशितं सत् सप्रयोजनं वस्तु परमात्मसाक्षात्कारवता जनेन साक्षादनुभूयते इत्यर्थः । यतः सकाशात् न प्रतीयते च यया आवृतं तदैव वा समयान्तरे वा न प्रतीयेतेत्यर्थः । ताम् आत्मनो भगवतो मम मायां योगमायाख्यामन्तरङ्गां शक्तिं विद्यात् जानीयात् । मायया प्रयोजनं विनैवाभ्रियते योगमायया तु प्रयोजनमुद्दिश्यैवेति विवेचनीयम् । यथाभासो यथा तम इति । आभासेन दीपादिना प्रकाशितं घटपटादिकं यथा प्रतीयते तमसा आवृतं तन्नानुभूयेत च तथैव सा मदिच्छावशादाभासतमोधर्मवती योगमायेत्यर्थः । उदाहरणन्तु यथा ऐश्वर्यदर्शनेऽपि प्रेमसंकोचाभावज्ञापनार्थं भगवत्कुक्षौ यया प्रकाशितं प्राकृतं विश्वमप्राकृतं गोकुलयशोदाकृष्णादिस्वरूपञ्च यया मोहिता श्रीयशोदा साक्षादनुबभूव क्षणान्तरे च यया आवरणान्नानुबभूव च । यथा चैश्वर्यानुभूत्या प्रेमसंकोचज्ञापनार्थं यया प्रकाशितं विश्वरूपं परमात्मस्वरूपञ्चार्ज्जुनः साक्षादनुबभूव, तत्रैव वर्त्तमानमपि कृष्णस्वरूपं यया, आवरणान्नानुबभूव, समयान्तरे च ययाच्छादितं विश्वरूपादिकं नानुबभूव, द्विभुजं श्रीकृष्णमेवानुबभूव । अत्रैकदैव एकस्य स्वरूपस्य प्रकाशनमन्यस्यावरणमिति पूर्वतो विशेषः । यथा च मञ्जुमहिमदर्शनया ब्रह्मण ईश्वरत्वाभिमाननिवर्त्तनार्थं यया, आवरणप्रकाशनाभ्यां लीलापरिकरवत्सबालाद्यदर्शन—कृष्णस्वरूपभूतवत्सबालादिदर्शन—तददर्शन—चतुर्भुजादिदर्शन—तददर्शन—श्रीकृष्णस्वरूपदर्शनानि प्राप यया मोहितः परमेष्ठी । अत्रैकस्मिन्नेव परमेष्ठिनि विविधस्वरूपावरणप्रकाशनयोः पौनःपुन्यमिति विशेषः यथा च भगवद्वपुः स्वरूपत एव परिच्छिन्नमपरिच्छिन्नं चातर्क्यमिति ज्ञापनार्थं तथा केवलभजनश्रमस्तज्जन्या भगवत्कृपा चेत्युभाभ्यामेव भगवद्वशीकार इति ज्ञापनार्थञ्च दामबन्धनलीलायां युगपदेव यशोदाकृष्णयोरभीप्सिते बन्धनाबन्धने विभुत्वस्य युगपदेवावरणप्रकाशनाभ्यां वेष्टयन्त्या किङ्किण्याद्व्यङ्गुलन्यूनदाम्ना चावेष्टयता सूचिते दर्शयन्त्यापि वस्तुतः कृष्णस्यैवाभीप्सितसम्बन्धनं साधयन्त्या यया मोहिता व्रजेश्वरी विस्मयरसं क्षणमनुबभूव, पश्चात्तस्या अप्यभीप्सितं कृष्णसम्मत्यासाधयितुं विभुत्वं यया खल्वावृतमेवेत्यतः सा कृष्णं बबन्धैव । अत्रैकदैवैकस्यैव विभुत्वस्यावरणप्रकाशने इति पूर्व्वपूर्व्वतो विशेषः ।

यथा च प्रतिस्वनिमन्त्रणादिसिद्ध्यर्थं श्रुतदेवबहुलाश्वरुक्मिणीसत्यभामादिगृहस्थितस्य तस्य तत्तत्स्वरूपस्य ययैव युगपदेवावरणप्रकाशनाभ्यां तत्र तत्र लीलासिद्धिर्व्याख्यास्यते अत्र श्रुतदेवबहुलाश्वादिव्यक्तिभेदमपेक्ष्यैवावरणप्रकाशनयोर्यौगपद्यं, पूर्व्वत्रैकस्यां यशोदायामेवेति—विशेषः सा खलु योगमायैव, न तु माया, तया मोहितानामपि तेषां परमात्मसाक्षात्कारदर्शनात् । स च परमात्मसाक्षात्कारो भक्तिमिश्रज्ञानवतामविद्याविद्ययोरुपरामे सति, तथैवावतारसमये कृष्णं प्रीत्या पश्यतां तत्कृपाविषयीभूतत्वादप्रेमवतामपि । अन्यदा तु प्रेमवतामेव कृष्णरामादिसाक्षात्कारो भागवतमतेनोच्यते । तेषु योगमायैवाधिकरोति न तु

माया । कृष्णं तदिच्छया पश्यतामपि कंसादीनां द्वेषलक्षणान्तःकरणदोषादेव न परमात्मसाक्षात्कारः, यथा मत्स्यण्डिकां भुञ्जानानामपि पित्तदूषितरसनानां न मत्स्यण्डिकास्वादानुभवः । तेषु मायैवाधिकरोति न तु योगमाया । मायाशक्तिश्च योगमायोत्था तस्या विभूतिरेव यदुक्तं नारदपञ्चरात्रे श्रुतिविद्यासंवादे अस्या आवरिकाशक्तिर्महामायाऽखिलेश्वरी । यया मुग्धं जगत् सर्व्वं सर्वे-देहाभिमानिनः ॥ इति ॥ भगवता स्वस्वरूपत्वेनाभिमन्यमाना योगमाया शक्तिश्चिदेव सैवांशेन स्वेच्छावशात् स्वस्वरूपत्वेनानभिमन्यमानात् स्वस्वरूपात् पृथगभूता सती मायाशक्तिर्जडैव । यथा सर्पस्य स्वरूपभूतापि त्वक् तेन त्यक्ता चेत् ततः पृथगभूतं कञ्चुकं जडं स्यात् । तथा चोक्तं श्रुतिभिः—त्वमुत जहासि तामहिरिव त्वचमात्तभग इति सा च माया त्रिविधा—प्रधानमविद्या विद्या च । प्रधानस्य लक्षणं जायन्तेयोपाख्याने वक्ष्यते प्रधानेनोपाधयः सृज्यन्ते ते च सत्या एव, अविद्याया जीवेषु तदध्यासः सृष्टः स चासत्य, एव विद्यया तदध्यासध्वंस इति तिसृणां शक्तिनां कार्य्यं तत्तन्मयं जगद्विदमंशेन सत्यमंशेना सत्यं तथा जीवानां नित्यत्वात् भगवन्निकेतनादिभक्त्युपकरणानां निर्गुणत्वाच्चांशेन नित्यत्वमपि वादिभिर्यथास्वमतं नानारूपतया निरूपितम् । कार्य्यं प्राधानिकं सत्यं कार्य्यमाविद्यकं मृषा । नित्यं तद्भक्तिसम्बन्धमिदं तत्त्रितयात्मकम् ॥ १ ॥ प्राधानिकाः स्युर्देहास्तद्धर्म्मा; वाविद्यकः पुनः । जीवेषु तत्तत्सम्बन्धो भक्तिश्चेन्निर्गुणाश्रते ॥ २ ॥ चिज्जीवमायानित्याः स्युस्तिस्रः कृष्णस्य शक्तयः तत्वृत्तयश्चताभिः स भात्येकः परमेश्वरः ॥ ३ ॥ कार्य्यैकारणयोरैक्याच्छक्तिशक्तिमतोरपि । एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥ ४ ॥ भक्तानामेव सिद्धान्तश्चतुःश्लोकीयमीरिता । शीलिता भगवद्भक्तैस्तैरेव न किलापरैः ॥ इति ॥ ३३ ॥ ❀ ❀ एवञ्च मायां योगमायाञ्च मन्त्रेणैव लक्षयित्वा ताभ्यामधिकृतेषु सगुणनिर्गुणलोकेषु ब्रह्मणा पृष्टं स्वस्वक्रीडाप्रकारं तन्त्रेणैवाह यथेति । यथा महाभूतान्याकाशादीनि भूतेषु देवमनुष्यतिर्य्यगादिषु अनुप्रविष्टानि तेपूपलभ्यमानत्वात् अप्रविष्टानि च पृथगविद्यमानत्वात् तथा तेषु भूतभौतिकेष्वहं प्रविष्टः सन्नपि पृथक् शुद्धसत्त्वात्मकस्वधामनि वर्त्तमानत्वादप्रविष्टश्चास्मि । किन्तु महाभूतानामचेतनत्वादेव भूतेषु प्रवेश आसङ्गरहितः मम तु चेतनत्वेऽप्याकाशवदसौ स्वगृहेऽवलिप्त एव वसतीतिवत् तेषु सर्वेषु प्रवेशनियमनपालनादीन्यासंगरहितानीत्येवम्भूता भूतेषु मायिकेष्वासंगरहितैव क्रीडेति भावः । तथा तेषु प्रसिद्धेषु नतेषु प्रणतभक्तजनेषु प्रविष्टोऽन्तःकरणेषु दर्शनं दातुं तथा अप्रविष्टः बहिःस्थितश्च तेषां नयनेषु स्वसौन्दर्य्यमर्पयितुं नासासु स्वसौरभ्यं प्रवेशयितुं तैः सहोक्तिप्रत्युक्ती कुर्व्वन् तेषां कर्णेषु स्वसौस्वर्य्यामृतं पूरयितुं स्पर्शनालिङ्गनादिदानैस्तेषामङ्गेषु स्वीयसौकुमार्यमाधुर्य्यादिकं चानुभावयितुमिति तेषु गुणातीतभक्तेष्वन्तर्बहिर्मया त्यक्तुमशक्येष्वासङ्गसहितैव मम क्रीडेति भावः ॥ ३४ ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मायामाह ऋतेऽर्थमिति । यद्वस्तु आत्मनि ज्ञानस्वरूपे ज्ञातरि सति ज्ञेयतया प्रतीयेत अर्थं ज्ञातृपदार्थमृते न प्रतीयेत तदचेतनं द्रव्यम् आत्मनः परमात्मनः मम मायां विद्यात् अचेतनस्य चेतनज्ञेयतया स्वरूपनिश्चये दृष्टांतः यथा आभासः प्रकाशः यथा वा तमोऽप्रकाशः ज्ञातरि सत्येव प्रतीयते नतु तद्भावे तद्वदित्यर्थः ॥ ३३ ॥ ❀ ❀ यथा आत्ममायायोगेन विश्वं विसृजन् विलुंपन् भगवान् क्रीडति तद्विषया मनीषा संक्षेपतः चतुराननेन अर्पिता माया चदर्शिता अथ विश्वसृष्ट्यादिहेतोरात्मनो विश्वगतदोषाऽस्पृष्टत्वं परिच्छिन्नेष्वनुप्रविष्टस्याप्यपरिच्छिन्नत्वं चाह यथेति । यथा महांति भूतानि खवातादीनि उच्चावचेषु भौतिकेषु घटपटादिषु भेदक्लेदाद्यर्हेषु परिच्छिन्नेषु अनुसृष्टेरनंतरं प्रविष्टान्यपि अप्रविष्टानि घटपटादिवद्भेदक्लेददोषास्पृष्टत्वात् घटपटादिभिरनावृतत्वाच्च तथा तेषु महाभूतेषु ब्रह्माण्डरूपेण स्थितेषु तत्सृष्ट्वा तदेवानुप्राविशदितिश्रुत्युक्तरीत्याऽनुप्रविष्टोऽस्मि तद्गतदोषास्पृष्टत्वात्तैरनावृतत्वाच्च एवं चिदचिदात्मकं जगत्कारणं मां ज्ञात्वा ज्ञानविज्ञानवान् भवति ज्ञाने जाते परममंगलगुणशक्त्याद्याश्रये ज्ञेये भक्तियोगेन कृतार्थो भवतीति सूक्ष्मभागवतसिद्धान्तः ॥ ३४ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं तज्जलानिति हेतुं विविच्य सर्वमात्मैवेति प्रमेयं विनिश्चित्य प्रमाणवैयर्थ्यमाशङ्क्य प्रवृत्तिसङ्कोचपरत्वात् गुणदोषविषयत्वात् सोऽप्येका भगवल्लीलेति मायां निरूपयति—ऋतेऽर्थमिति । यद्वस्तु स्वरूपे अन्यथा प्रतिभासते तत् आत्मनां जीवानां [1]व्यामोहिका या माया पूर्वं निरूपिता तस्याः कार्यम् । सा हि जीवं व्यामोहयित्वा तत्सम्बन्धिधनमन्तःकरणबुद्ध्यादिकमपि व्यामोहयति । तया व्यामोहिता बुद्धिः पदार्थानन्यथा मन्यते । न तु पदार्था अन्यथा भवन्ति । बुद्ध्यर्थमेव हि प्रमाणानि साधनानि च । कानिचिद्बुद्धिजनितदोषनिवर्त्तकानि । कानिचिद्गुणाधायकानि । माया च द्विधा भ्रमं जनयति । विद्यमानं न प्रकाशयति । अविद्यमानं च प्रकाशयति देशकालव्यत्यासेन । तदाह—अर्थमृते यत्प्रतीयेत न प्रतीयेत च । अर्थादर्थः । अर्थो न प्रतीयते । अर्थमृते प्रतीयत इति । तस्मात्पदार्थानां याथात्म्यज्ञापनार्थं प्रमाणमित्युक्तं भवति । ननु वस्त्वेव कुतो न तथास्तु । कैश्चिद्वादिभिर्जगतो मायिकत्व-

---

१. मोहिकाय इति ग.

स्वीकारादिति चेत् । भवेदेतदेवं यदि विचारे पर्यवस्यति । प्रमाणभूतो वेदः "सर्वं खल्विदं ब्रह्म वै"त्याह । ब्रह्मविदां प्रतीतिरपि तथा । भ्रान्तप्रतीतेस्तु नाऽर्थनियामकत्वम् । अन्यथा भ्रमदृष्ट्या गृहीतं जगद्भ्रम[1]रूपमेव स्यात् । अतो विषये विषयता काचित्स्वीकर्त्तव्या यया दृष्टिः सविषया भवति । अन्यथा पदार्थानां स्थिरत्वाद्भ्रमदृष्टिर्निर्विषया स्यात् । अतोऽन्यत्रैव सिद्धभ्रमिर्मायया पुरःस्थिते विषये समानीयते । दृष्ट्यनुरोधित्वात्तस्याः । अतो यथाऽधिकारं जीव[2]सृष्टिं पुरस्कृत्य व्यामोहिकया मायया व्यत्यासेन पदार्थाः सम्पाद्यन्ते । एवं सर्वत्र जगति सा बुद्धिभ्रमं जनयति अन्यत्राऽन्यविषयतां सम्पादयति । विषयता मायाजन्या । विषयो भगवान् । मायायामेव विषयतारूपं भगवतः स्वरूपं प्रकटितमिति । तदपि न निःस्वभावम् । आत्मशक्तित्वान्मायाऽपि न निःस्वभावा । चिद्विलासत्वाद्बुद्धेः परं तामेव व्यामोहयति यावन्न ब्रह्मभावः । सा हि भगवदीयैः सर्वैरेव पदार्थैर्विरुध्यते । ते हि भगवद्विषयकं ज्ञानं जनयन्ति । अतो विषयताजनितं ज्ञानं भ्रान्तं विषयजनितं प्रमेति । एवं यथा जगति, आत्मन्यपि तथेत्याह—**चाऽऽत्मनीति** । आत्मनि च विद्यमानं न प्रकाशयति । अविद्यमानं प्रकाशयति । ननु सर्वजनीनप्रतीत्यनुरोधेन जगद्रूपोऽयं विषयो ब्रह्मणो भिन्न एव कुतो नाऽङ्गीक्रियते तत्राऽऽह—**तद्विद्या[3]दात्मनो मायामिति** । यस्मात्कारणादविद्यमानमेव बोधयति विद्यमानं न बोधयति तस्मात्कारणात्तां मायामेव [4]विद्यात् । न हि विषयश्चक्षुर्वा जडं नियतस्वभावमन्यथाप्रतीतिहेतुर्भवति । तत्र दृष्टान्तमाह—**यथाऽऽभासो तथा तम इति** । यथा द्विचन्द्राद्याभासो माययैव जन्यते । न तु प्रतीत्यनुरोधेन चन्द्रद्वयं कल्प्यते । एवं विषयताऽपि मायया जन्यते । बुद्धिस्तु चिद्विलास इति न मायाजनिता । अन्यथा ब्रह्मविदोऽपि बुद्धिस्तथा स्यात् । ततश्च सर्वविप्लवः । सा च विषयता द्विधा[5] । आच्छादिकैका । अन्यथाप्र[6]तीतिहेतुश्चाऽपरा । सा उभयविधाऽपि माययैव जन्यते यथाऽऽभासः । ननु मायायाः कथमेवं पदार्थजनकत्वम् ? व्यामोहजनकत्वमेव तस्याः । न च विषयातिरिक्ता विषयता कचिदुपलब्धेत्याशङ्क्याऽऽह—**यथा तम इति** । यथाऽन्धकारः पदार्थस्तेजोऽभावे जन्यते । यत्रैव तेजोऽभावस्तत्रैवाऽन्धकारं जनयति माया । इयमेव व्यामोहिका । अतएव दिवाभीतान्प्रति नाऽन्धकारं जनयति । ते तु तेजोभावमेव गृह्णन्ति तेषां दृष्टेः कोमलत्वाद्बलवत्तेजो दृष्टिप्रतिबन्धकं भवति । तदभावे सुखेन विषयान् गृह्णन्ति । अस्मदादीनामपि तेजो न विषयसंस्कारकम् । न वा चक्षुषः । किन्तु तेजोऽभावे मायया तमोजननात् सैव दृष्ट्या विषयीक्रियते न तु विषयः । अतस्तमोनिवृत्त्यर्थमेव तेजः । तथैव लोकप्रतीतिः । सा च विषयता चक्षुषा गृह्यते । विषयाद्भिन्नतया स्वात्मसात्क्रियते । परिभ्रमणे तथा सिद्धेः । "**यथा हि भानोरुदयो नृचक्षुषाम**"-ति वाक्ये चक्षुःसम्बन्धिन एव तमसो नाशकत्वम् । न तु स्वभावत एव किञ्चित्तमः । अन्यथा स्पर्शेनाऽपि ज्ञाने[7] तत्प्रतिबन्धकं स्यात् । स्पर्शेन वा तद्गृह्येत । तम इति चोपलक्षणम् । आदर्शे च मुखं जनयति । न च परावृत्तं चक्षुर्मुखमेव गृह्णातीति मन्तव्यम् । तथा सति दर्पणान्तरे साभासस्य प्रतीतिर्न स्यात् । न चेदमेव मुखमुभयत्र प्रतिबिम्बितं इति वाच्यम् । असम्मुखदिकानामपि प्रतिबिम्बदर्शनात् । अयमेव वा आभासः । तस्माद्दर्पणे मुखजननवत्तेजोऽभावेऽन्धकारजननवन्माया मोहितपुरुषबुद्धावपि विषयताद्वयं जनयतीत्यर्थः । तत्रैका ब्रह्मरूपतां न प्रकाशयति । एका तु जगद्रूपा विषयता । तदुभयव्यावृत्त्यर्थं सर्वाणि प्रमाणानीति भावः ॥ ३३ ॥ ❀ ❀ एवं प्रमेयं प्रमाणं च निरूप्य विषयं निरूपयति—**यथा महान्ति भूतानीति** । वेदेन हि प्रकारद्वयेन पदार्था निरूप्यन्ते–साकारो निराकारः, सावयवो निरवयवः, पूर्णः परिच्छिन्न इत्यादिप्रकारेण । तदुभयमपि यथा विषयो भवति तदर्थमिदमारभ्यते । अन्यथैकपक्षो विषयता स्यात् । तथा सति वेदानामंशतोऽप्रामाण्यं भवेत् । अथ सर्ववेदप्रामाण्यसि[8]द्धये उभयविधो विषयो निरूप्यते । यथा महान्ति भूतानि आकाशादीनि भूतेषु घटादिषु उच्चावचेष्वनेकरूपेषु स्थूलसूक्ष्मदीर्घह्रस्ववक्रर्ज्वादिभिन्नेषु कारणत्वेन प्रविष्टानि, पुनरनुप्रविष्टानि भवन्ति, ततोऽप्यप्रविष्टा[9]नि भवन्ति । तथा अहं सर्वत्र कारणभूतः सर्वत्राऽनुप्रविष्टोऽपि न कारणभूतो नाऽनुप्रविष्ट इत्यर्थः । तेष्विति पुनर्वचनं वाक्यद्वयबो[10]धार्थम् । अन्यथा नकारः पूर्ववाक्य एव सम्बध्येत । कारणं हि कार्येऽनुप्रविशति । कार्यं च कारणे समवेतमुत्पद्यते । अन्यथा पटस्य निराधारतयोत्पत्तिः स्यात् । तथा सति नोत्पद्येत । उत्पद्यमानं वा सर्वत्रोत्पद्येत । यथा घटो भगवान्[11] यथा शब्दः । कुम्भकारकृत्या प्राकृत एव घट उत्पद्यते । विषयतावत् । ननु भगवद्रूपः सिद्धत्वात् । शब्दोऽपि ताल्वोष्ठपुटव्यापारेणोत्पद्यमानः सर्वत्रैव श्रोत्रेषूत्पद्यते । एवं निराधारः पटोऽपि भवेत् । तथा सति तन्त्वाधारतयोत्पन्ने पटे यदि तन्तवो न प्रविशेयुस्तदा पटे तन्तुप्रतीतिर्न स्यात् । जायमाना वा भ्रान्ता स्यात् । एकस्यैवाऽऽधारत्वमाधेयत्वं च[12] कारणकाले कार्यकाले च व्यवस्थितं भवति । एवं महाभूतेषु त्रयम् आधारत्वं, आधेयत्वं, विशेषत आधेयत्वमिति । तदाह—**प्रविष्टान्यप्रविष्टानीति** । अथवा । महाभूतेषु पञ्चधा कारणत्वेन पूर्वमेव तत्र विद्यमानत्वेन महाभूतत्वेन चेत्यप्रवेशस्त्रेधा । कारणप्रवेशवत्प्रवेशत्वेन पृथक्प्रवेशत्वेन च प्रवेशो द्वेधा । तथा तेष्विति पञ्चधाऽपि । न[13] तेष्विति पुनः पञ्चधा । एवं भगवति दशधा भवति । तथा सति सर्वत्र जगति भगवान् दशविधलीलायुक्तो दशधा ज्ञातव्यः ॥ ३४ ॥

---

१. भ्रमद्रुपमिति घ. २. जीवदृष्टिमिति क. । ३. तद्विन्द्यादिति ख. ४. विन्द्यादिति क. घ. ५. द्विविधेति ग. ६. प्रतीतिश्चापरेति ग. ७. ज्ञानेनेति ख. ८. सिद्धे उभयेति ख. ९. विष्टानि चेति ख. ग. १०. बोधनार्थमिति ख. ग. । ११. भगवान्-शब्द इति । १२. च नास्ति ख. । १३. न पुनरिति ग. ।

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

**ऋतेर्थमित्यत्र, एवं तज्जलानित्यादि** । एवं पूर्वार्द्धेन जननाधारत्वस्य तृतीयेनाननाधारत्वस्य तुरीयेण लयाधारत्वस्य स्फुटीकरणात्तज्जलानिति हेतुं सम्यग्बोधयित्वा, तेनात्मरूपं प्रमेयं निर्द्धार्यम्, एवं सर्वस्य ब्रह्मस्वरूपपरत्वे गुरुशिष्यभावाभावात् साधनफलभावाभावाच्च प्रमाणवैयर्थ्यमाशङ्क्य, बुद्ध्यादिशोधनार्थं यज्ञादिनिरूपकः प्रापञ्चिकत्याजनाय वैराग्यनिरूपको यः प्रमाणभूतो वेदः, तस्य सर्वत्रात्मबुद्धौ बुद्धिशुद्धिवैराग्ययोः प्रयोजनाभावाद्वैयर्थ्यमाशङ्क्य, प्रवृत्तिसङ्कोचपरत्वात् गुणदोषविषयत्वाच्च बहुस्यां प्रजायेये, तीच्छायाः स्वैकात्म्यस्य स्वोत्कर्षस्य च तिरोधानाज्जीवानां प्रपञ्चासक्त्या, तत्र रागतः प्रवृत्तावनिर्मोक्षे प्रसक्ते 'लोके व्यवायामिषमद्यसेवे' ति श्लोकोक्तप्रकारेण पूर्वकाण्डस्य जीवप्रवृत्तिसङ्कोचार्थत्वात्तत ईषद्वैराग्योन्मुखत्वसम्पत्तावुत्तरकाण्डस्य प्रवृत्तिनिवृत्तिधर्मयोस्तत्फलयोश्च प्रातिलोम्येन गुणदोषविषयत्वात् । सापि मायाकृताऽऽसक्तिरपि एका वैराग्योत्पादनेन प्रमाणसार्थकीकरणार्थाभगवल्लीलेतिहेतोर्मायां प्रमाणनिवर्त्यां भगवच्छक्तिमुपोद्घातेन वर्णयतीत्यर्थः । **अन्यथाप्रतिभासत** इति तद्वस्तुभिन्नवस्तुतया प्रतिभासते । ननु सा जीवशक्तिस्तस्य मुक्तौ स्वस्याभिमानिशून्यता स्यादिति तदभावार्थं जीवव्यामोहस्तस्याः कार्यमिति युक्तम् । परन्तु प्रपञ्चे भेदभ्रमस्य प्रयोजनाभावादुपकरणाभावाच्च न तस्याः कार्यमिति भेदज्ञानस्य भ्रमत्वाभावात्पदार्था एवान्यथेत्यत आहुः **सा हीत्यादि** । तथा च, जगतो ब्रह्मांशत्वस्फूर्त्तौ तद्विहाय ब्रह्मार्थं जीवः प्रयतेत, तदा न व्यामुह्येतेत्यतस्तदर्थं तत्सम्बन्धिनोर्थान्मोहयति तेन तथेति पदार्था न तथेत्यर्थः । नन्वस्त्वेवमन्यथाभानम्, तथापि प्रमाणस्य कथं सार्थकयमत आहुः **बुद्ध्यर्थमित्यादि** । तथा च, बुद्धिनैर्मल्यार्थं प्रमाणतदर्थयोरुपयोगात्सार्थक्यमित्यर्थः । ननु प्रमाणैरेव नैर्मल्यसिद्धौ किं साधनैरित्यत आहुः **कानीत्यादि** । बुद्धिजनकदोषनिबर्त्तकानीति, अन्तःकरणबहिःकरणदोषनिवारकाणि । तथा च, दोषनिवृत्त्यर्थं गुणाधानार्थं च यथायथमुपयोगान्न कस्याप्यानर्थक्यमित्यर्थः । एवं तात्पर्यं सङ्गृह्य पद्यं व्याकुर्वते **माय**। **चेत्यादि** । **इतीति** । उक्तप्रकारको द्विधाभ्रमो यस्मान्मायाकृतः । ननु वस्त्वेव तथास्त्विति सर्वं यदि ब्रह्म स्यादसदृग्गोचरो न स्यादत एवमतो नैवं किन्तु मायिकमेवास्त्वित्यर्थः । **वादिभिरिति** । 'इन्द्रो मायाभिः पुरुरूप ईयते, अनृतापिधानाः, वाचारम्भणं विकारः, मायां तु प्रकृतिं विद्यादि' त्यादिश्रुत्यनुसारिभिर्वादिभिः कुतो न पर्यवस्यतीत्यत आहुः **प्रमाणेत्यादि** । न चोपासनार्थमेव सर्वस्य ब्रह्मत्वमत्रोच्यत इति न तद्वास्तवमिति वाच्यम्, हेतूक्तिवैयर्थ्यापत्तेः । तां विनापि विधानमात्रेणोपासनासिद्धेरप्रत्यूहत्वात् । 'इदं सर्वं यदयमात्मे' ति, 'स वै सर्वमिदं जगत्' ( स ) स भूतं स भव्यमि' ति श्रुत्यन्तराच्च न 'चेन्द्रो मायाभिरि' त्यादिश्रुतिविरोधः शङ्कनीयः । आद्ये बहुत्ववैशिष्ट्येन मायापदादविद्याया गृहीतुमशक्यत्वात्पुरुरूपज्ञानकरणतयोल्लेखाच्चेन्द्रियवृत्तीनामेव तत्र ग्राह्यत्वात् मायया बहुभवनस्याशक्यवचनत्वात् । किञ्च, मायया पुरुरूपभवने विवक्षिते ऋक्पूर्वार्द्धे एव मायापदमेकवचनान्तं वदेत् । न च समभिव्याहारलभ्योयमर्थ इति वाच्यमेतस्य पूर्वोक्तानुवादत्वेन पुरोवादवैलक्षण्यस्याशक्यवचनत्वात् । न च तदर्थनिर्द्धारार्थमेवायं समभिव्याहार इति वाच्यम्, विनिगमकाभावात् । किञ्चेदं वाक्यं **मधुब्राह्मणस्थम्**, तत्र च मैत्रेयीब्राह्मणोक्तस्यात्मनः पृथिव्यादिषु विद्यमानत्वममृतत्वं ब्रह्मत्वं सर्वात्मकत्वं चोक्त्वा ततः 'पुरश्चक्रे द्विपदः' इत्यादिना पुरां करणं तासु प्रवेशं सर्वस्य तत्संवृतत्वञ्चोवाच । तेन प्राप्ते भेदे 'सर्वं समाप्नोषि ततोसि सर्व' इति च व्याप्तिकृता गौणी सर्वात्मकता भविष्यतीति शङ्कावारणाय 'रूपं रूपमि' तिमन्त्रः पठ्यते । अयं वै हर योयं वै दश च सहस्राणि च बहूनि चानन्तानि चे' ति विव्रीयते च । ततो यस्यैवं रूपतात्र विवृता, ब्राह्मणोपक्रमे चोक्ता, तस्यैवश्च*तदेतद् ब्रह्मापूर्वमनपरमन्तरमबाह्यमित्यनेन स्वरूपमुक्त्वाऽ 'यमात्मा ब्रह्म सर्वानुभूरि' त्यनुशासनमुपसंहृतम् । एवञ्चात्र विचारे उपक्रमोपसंहारविवरणेषु मायां विनैवात्मनः सर्वरूपत्वाभ्यासात्, स्वरूपकथने पूर्वत्वादिनिषेधेन प्राप्त ( प्रश्न ) स्य शून्यवादभ्रमस्य वारणाय सर्वानुभूरिति सर्वानुभवकर्तृत्वस्वरूपोपपत्तिकथनाच्च भ्रमरहितस्यात्मनः सर्वरूपता श्रुत्यन्तरोक्तस्वेच्छाकृतैवेति विनिगमनोत्पत्तेरपि, मायापदेनेन्द्रियवृत्तिरेव तत्र ग्राह्या, 'स्यान्माया शाम्बरी क्रिया ( भेदो ) दम्भो बुद्धिश्चे' त्यनेकार्थकोशेन बुद्धिवृत्तौ मायापदस्य शक्तेरेव ग्रहणादतोस्मदिन्द्रियवृत्तिभिरिन्द्रो बहुरूपो ज्ञायते इत्येव तत्रार्थ इति न तद्विरोधः । एव 'मनृतापिधाना' इत्यपि छान्दोग्ये दहरविदः कामानुपक्रम्य पठितम् । 'त एते सत्याः कामा अनृतापिधानास्तेषां सत्यानाम् ( सता ) मनृतमपिधानमिति, तत्राप्यनृतशब्दस्तावन्न मिथ्यावचनः, किन्तु, तैत्तरीये 'सोऽकामयत बहु स्यामि' ति बहुभवनमुपक्रम्य 'सत्यञ्चानृतञ्च सत्यमभवत्' 'यदिदं किं च तत्सत्यमित्याचक्षत' इत्युपसंहारादनृतशब्दवाच्यं भगवतो रूपान्तरं यदुक्तं तद्वचनः, ( अ ) पिधानाल्लिङ्गात् मिथ्याभूतेनापिधानासम्भवात् । शुक्तिरजतादावपि बुद्धिवृत्तेः सत्याया एव रजतरूपेणान्तराख्यानादन्तराबुद्धेरेव पिधानं न तु शुक्तेः । अन्यथा प्रतियोगिभेदेन तत्र युगपत्भ्रमप्रमानुपपत्तेः । प्रकृते तु कामपदेन 'स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति, तेन पितृलोकेन सम्पन्नो महीयत' इत्यादिभिरुक्तानां काम्यानामर्थानां सङ्ग्रहात्तेषां पिधानं शरीरादिना लौकिकेनार्थेनाभिप्रेतं न त्वनिर्वचनीयेन, संस्कारप्राबल्यादेव ख्यानोपपत्तावनीर्वचनीयतत्कल्पनस्य युक्तिबाधितत्वात् । तादृशविद्यावतः ख्यानासम्भवाच्च

* तदेव ब्रह्मा पाठः

सम्भवे कामानामपि सत्यत्वासम्भवेन श्रुतेरेव व्याकोपाच्चेति न तस्यामनृतशब्देन मायिकमभिप्रेतमतो न तस्या अपि विरोधः । 'वाचारम्भणं विकार' इति वाक्यं तु व्यासचरणैरेव विचारितम् 'तदनन्यत्वमारम्भणशब्दादिभ्य' इति । तत्र च विकाराणां घटकुड्यशरावादीनामाकृतिविशेषदर्शनेन वाचा नाममात्रेणैवारब्धत्वाद्विकारो नामधेयम् न तु रूपमिति, रूपस्य कारणाभिन्नत्वात्, कारणभूतमृत्तिकारूपेणैव सत्यत्वमभिप्रेयते एकविज्ञानेन सर्वज्ञानार्थम् । तथा सति ज्ञानेन विकल्पबुद्धेरेव बाधः सिद्ध्यतु, न तु कार्यस्वरूपस्यापि । यत्तु 'सूत्रे भेदव्यासेध एव क्रियते न त्वभेदो बोध्यते' इति भामतीकारः, तदसङ्गतमेव, प्रमाणाभावात् । व्यासेधे च भेदे अभेद एव पर्यवसानाच्चेति, तत्रापि न मायिकताभिप्रेयते इति न तस्या अपि विरोधः । 'मायां तु प्रकृतिं विद्यादिति' श्वेताश्वतरीयं तु मायायाः प्रकृतित्वमात्रं वदति, न तस्या न वा जगतो मायिकत्वम् । न च ब्रह्मभिन्नत्वात्तथात्वं शङ्क्यम्, 'पूर्ववद्वे' तिपूर्वोक्तन्यायेन ब्रह्मण एव तद्रूपेण भवने भेदस्याभावात् । 'प्रकृतिर्यस्योपादानमाधारः पुरुषः परः । सतोभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वह'मित्यग्रे वक्ष्यमाणत्वाच्च । **अतो न तस्या अपि विरोध इति** । अतः सर्वत्र वेदे जगतो ब्रह्मतादात्म्येन ब्रह्माभेदस्यैवाभिप्रेतत्वाद्विचारे न पर्यवस्यतीति जगतो मायिकत्वं नाद्रियत इत्यर्थः । ननु तर्हि प्रतीतेः का गतिरित्याकाङ्क्षायां युक्त्यन्तरमाहुः **ब्रह्मे**त्यादि । तथेति परिणतसर्वभूतब्रह्माभेदविषया, 'तदिदमप्येतर्हि य एवं वेदे' त्यादिश्रुतेः । तथा च, न प्रतीतिविरोध इत्यर्थः । ननु परप्रतीत्यपेक्षया स्वप्रतीतेरभ्यर्हितत्वात्तथा नाङ्गीक्रियत इति चेत्तत्राहुः **भ्रान्ते**त्यादि । तथा च, तस्या अभ्यर्हितत्वमप्रयोजकमित्यर्थः । कथं तथेत्याकाङ्क्षायां तस्या अर्थनियामकत्वे बाधकं तर्कमाहुः **अन्यथे**त्यादि । ननु तस्या अर्थानियामकत्वेपि जगतो मायिकत्वसिद्धिः । तथा हि, भ्रमदृष्टिर्यद्यत्यन्ताऽसदवगाहिनी स्यात् खपुष्पमप्यवगाहेत, यदि सदवगाहिनी स्यात् पदार्थां ह्यन्यथा स्युः, यतो नैवमतो नैवम्, यदि मायिकावगाहिन्यपि न स्यान्निर्विषया स्यात्, अस्ति तु सविषया, पूर्वोक्तोभयानवगाहिनी च, तस्मान्मायिकविषयैव, यस्मादेवं तस्मात्तस्माद्भ्रमविषयो मायिक इति लोकसिद्धभ्रमविषयस्य मायिकत्वसिद्धौ प्रकृतेपि श्रुतिविरुद्धावगाहिन्या अस्मदादृष्टेर्भ्रान्तत्वात्तद्विषयस्य जगतो मायिकत्वं सेत्स्यतीत्यत आहुः **अत** इत्यादि । अत उक्ततर्कात्, विषये भ्रमदृष्टिविषयकोटौ, काचिद्विषयता विषयासम्बद्धोपि सम्बद्धत्वेन भासमानः कश्चित्पदार्थः स्वीकार्यः । तत्र हेतुर्**यथे**त्यादि । ननु दोषवशेनान्यथाख्यानादिसम्भवे किं विषयताङ्गीकारेणेत्यत आहुः **अन्यथे**त्यादि । तथा च, दोषो हि ख्याने सामग्री, न तु पदार्थान्यथात्वे, यदि तत्रापि दोषस्तथा स्यात्तदा पदार्थानां वास्तवान्यथाभावाद्भ्रम एवोच्छिद्येत, अतः सावश्यकीत्यर्थः । एवं विषयतां साधयित्वा प्रकृते भ्रमसामग्रीमाहुः **अतोन्यत्रे**त्यादि । तथा च, दृष्टिविषययोरन्तराले विषयतासमानयनमेव भ्रमसामग्रीरित्यर्थः । सिद्धमाहुः **अत** इत्यादि । एवं चाक्षुषभ्रमे सामग्रीं व्युत्पाद्य तां मानसभ्रमेप्यतिदिशन्ति **एवमि**त्यादि । तेन यत्सिद्धं तदाहुः **विषयता मायाजन्या विषयो भगवानिति** । ननु यदि व्यत्याससामग्री, तदा पदार्थस्य तत्रागतत्वाद्भ्रमस्योच्छेदस्तुल्य इत्यत आहुः **मायायामि**त्यादि । तथा च, मायिकमेव समानयति न सत्यमतो न भ्रमोच्छेद इत्यर्थः । ननु तादृशेनावरणासम्भवाद्विक्षेपस्याप्यभावे कथं भ्रमसम्भव इत्यत आहुः **तदपी**त्यादि । तथा च, शक्तेरावरकत्वात् कार्यस्य च विक्षेपकत्वात्ताभ्यां बुद्धिव्यामोहे भ्रम इत्यर्थः । **चिद्विलासत्वादिति** चिद्धर्मत्वात् । तथा च, यथा लोके चाक्षुषभ्रमस्थले दृष्टया विषयासम्बन्धतया विषयतानुपलम्भेपि तदनुग्राहिकाया बुद्धेरदुष्टत्वात्तया भ्रमणस्यासम्बद्धत्वनिश्चयस्तथात्वबुद्धिश्च भ्रमे तदनुग्राहकेण विचारनिर्णीतार्थेन शास्त्रेण उत्पत्तिनाशमायिकत्वादीनां प्रपञ्चासम्बद्धतया निश्चय इति न जगतो मायिकत्वमित्यर्थः । नन्वासां प्रतीतीनामग्रे बाधाभावात्कथं भ्रमत्वमित्यत आहुः **यावदि**त्यादि । तथा च, ब्रह्मभावोत्तरं बाधात् भ्रमत्वनिश्चय इत्यर्थः । एवं कालविभागेपि हेतुमाहुः **सा ही**त्यादि । एवं श्रुतितो लोकतो ब्रह्मवित्प्रतीतेश्च विरुद्धत्वाद्भ्रान्तप्रतीतिमात्रेण तथा भ्रान्तस्य मायिकत्वादिना विचारे पर्यवसानाभावान्न जगतो मायिकत्वम्, किन्तु, विषयकोटिविभागेन तज्जनितं ज्ञानमेव तथेत्याहुः **अत** इत्यादि । इमं न्यायं विषयान्तरेप्यतिदिशन्ति **एवमि**त्यादि । **विद्यमानमिति** ब्रह्मतादात्म्यम् । **अविद्यमानमिति** भेदद्वैन्यादिकम् । अत्र भेदवादिनः प्रत्यवतिष्ठन्ते **नन्वि**त्यादि । समाधिं व्याकुर्वते **यस्मादि**त्यादि । **तामिति** उक्तप्रकारकभ्रमहेतुम् । ननु मायाया भ्रमहेतुत्वे किं मानमित्याकाङ्क्षायामाहुः **न ही**त्यादि । तथा च, प्रतीतिनियामकत्वेन यो दोषः स्वीक्रियते स साक्षात्परम्परया यथाकथञ्चिन्मायाजन्य इति तां विना भ्रमानिर्वाहात्तदन्यथानुपपत्तिरेव मानमित्यर्थः । ननु सार्वजनीनप्रतीतिविषयस्य भेदस्य कथं विषयतारूपत्वमित्यत आहुः **तत्रे**त्यादि । **विषयतापीति**, भेदरूपा विषयतापि । तथा च, दर्शनमात्रानुरोधेन जगतो भिन्नत्वं न कल्पयितुं शक्यमिति श्रुत्या ब्रह्मवित्प्रतीत्या च जगत आत्मनश्च ब्रह्मात्मकत्वे निश्चिते यत्तत्र तदप्रकाशोऽविद्यमानस्य वस्तुभेदस्य च प्रकाशस्ताभ्यां लक्षणरूपाभ्यां कार्याभ्यां सैवाङ्गीक्रियतेऽतो जगतो न ब्रह्मणः सकाशात्परमार्थतो भेद इत्यर्थः । नन्वाभासविषयता मायया जन्यता इत्यसङ्गतम्, न हि आभासो मायया जन्यते, किन्त्वभिन्ने भेदबुद्धिमात्रमुत्पाद्यते इति ज्ञानस्यैव मायिकत्वम्, न तु विषयस्यापि, तस्य वस्तुत एवासत्त्वादिति शङ्कायामाहुः **बुद्धिस्त्वि**त्यादि । अन्यथेति, बुद्धित्वेनास्या मायिकत्वे । तथा चावच्छेदेन मायिकत्वेऽनिर्मोक्षादिप्रसङ्गादेतस्या एव मायिकत्वस्य विषयद्वारैव सम्भवादुभयोस्तथात्वाङ्गीकारेऽध्यासद्वयकल्पनापत्तिगौरवात्तदभावाय विषयताया एव तथात्वं युक्तमित्यर्थः । एवं विषयतां साधयित्वा तस्याः प्रकारद्वयमाहुः **सा चे**त्यादि । अत्र पुनः प्रत्यवतिष्ठते **नन्वि**त्यादि । तथा चोक्तप्रकारे विचारिते ज्ञानाध्यासो न वक्तुं शक्यः, मायायाः पदार्थजनकत्वस्य क्वाप्यसिद्धत्वादर्थाध्यासोपि न वक्तुं शक्यः ( तथासति ख्यात्यन्तरं वा जगतो वस्तुतो भिन्नत्वं

वाङ्गीकार्यमित्यर्थः )। मायायाः पदार्थजनकत्वं व्युत्पादयन्ति यथान्धकार इत्यादि। नन्वभावस्य पदार्थाधिकरणत्वं न क्वापि दृष्टमिति शङ्कायामाहुः यत्रेत्यादि। तथा स नाधिकरणत्वेनास्माभिरिष्यतेऽपि तु सहकारित्वेनातो न दोष इत्यर्थः। ननु तेजोभाववत्यधिकरणे तमो वक्तुं शक्यम्, तथा सति पेचुकबिडालादीनां तच्चाक्षुषापत्तेः। न च जायते एव तेषां तमश्चाक्षुषमिति वाच्यम्, तथा सत्यस्मदादीनामिव तेषामपि विषयान्तरचाक्षुषप्रतिबन्धापत्तेः। अतस्तेजोभावस्थले तेषां तेजःसंयोगनिरपेक्षमेव चक्षुर्वस्तुचाक्षुषं जनयतीत्येतावतैव चारितार्थ्ये तेजोभावातिरिक्तं तमो न शक्यवचनमित्याशङ्कायामाहुः इयमित्यादि। अयमर्थः नटादयो हि यद्दृष्टिं व्यामोहयन्ति तानेव मायिकं पदार्थं दर्शयन्ति, नेतरान्, तथेयमपि यद्दृष्टिं व्यामोहयति तानेव तमः प्रदर्शयतीति तमश्चाक्षुषत्वेन तद्दृष्टिव्यामोहत्वेन कार्यकारणभावात् पेचुकादिदृष्टीनां दोषरहितत्वेन तान् प्रति तदभावेऽप्यस्मद्दृष्टिविषयतया तादृशाधिकरणे तमःसिद्धिरप्रत्यूहेत्यर्थः। न च तेजोऽभावस्यैव तमस्त्वान्न विषयानुपपत्तिरिति वाच्यम्, निलचाक्षुषबाधापत्त्या तस्मिंस्तेजोभावत्वस्याशक्यवचनत्वात्। न च भ्रमस्य विशिष्टज्ञानत्वेन विशेषणज्ञानजन्यत्वात् प्रकृतभ्रमस्यापि तथात्वाच्चाक्षुषत्वं युक्तं चक्षुःसंयुक्तविशेषणतारूपविशेष्यभानसामग्रीतद्विशेषणज्ञानमात्रस्यैवावश्यकत्वेन विशेषणीभूतनीलरूपाभावेऽपि तज्ज्ञानस्य सत्त्वान्नीलरूपतेजोभावयोरसंसर्गाग्रहमात्रेणैव तादृशभ्रमोपपत्तेर्नीलचाक्षुषस्याभिमानमात्रत्वान्न तेन तमोरूपपदार्थसिद्धिरिति वाच्यम्, नीलज्ञानस्य स्मरणादिरूपतया वक्तुमशक्यत्वेन तत्र चाक्षुषेभिमानत्वस्य वक्तुमशक्यत्वात्। ननु स्मरणरूपत्वे किं बाधकमितिचेद् उच्यते, अमावास्यारात्रौ सुधाधवलितगृहादौ दिनसम्बन्धिनीं वार्तां कुर्वतः सदृशादृष्टचिन्तादीनां संस्कारोद्बोधकानामभावेन तादृशस्मरणस्याशक्योदयत्वमिति जानीहि। न चादृष्टमेव तदोद्बोधकमिति वाच्यम्, दृष्टसामग्रीं विना तस्याकिञ्चित्करत्वात्। ननूपनीतभानरूपमेव नीलज्ञानं तत्रेति चेन्न, मानसोपनीतभानत्वे पूर्वोक्तयुक्त्या उपनामकस्य स्मरणस्य संस्कारस्य वा तदानीं वक्तुमशक्यत्वेन तदभानापत्तेः, चाक्षुषोपनीतभानत्वं तु तादृशस्थले नीलाभावादेवासङ्गतम्। न च चक्षुर्गतं नैल्यं तत्रारोपितं प्रतीयत इति वाच्यम्, तस्यागृह्यमाणत्वात् पिङ्गाक्षस्य तादृशप्रतीत्यनुपपत्तेश्च। अतो नीलभानस्य स्मरणादिरूपताया वक्तुमशक्यत्वाच्चाक्षुषत्वमेव तस्याभ्युपेयम्। ततश्च तादृशप्रतीत्यनुरोधेन तेजोभावातिरिक्तमेव तमः सिद्ध्यतीति। यदपि प्राभाकराः 'तेजोज्ञानाभाव एव तमः, सत्यपि तेजसि तदज्ञाने तमःप्रत्ययादि'त्याहुः तदपि' न, ज्ञानाभावज्ञानस्य मानसत्वेन नीलं तम इति चाक्षुषव्याघातात्। अभिमानत्वबाधकानां पूर्वमुपपादितत्वात् तेजोभावमुपलभामहे इत्यनुव्यवसायबाधापत्तेश्च। द्रव्यान्तरत्वं त्वनुपदं दूषयिष्यते। **तस्मान्नीलचक्षुषानुरोधात्पदार्थान्तरमेव तम इति सिद्धम्।** एवं तमोरूपं पदार्थं साधयित्वा तच्चाक्षुषादिसामग्रीं बोधयितुं पेचुकादीनां वस्तुसाक्षात्कारे आलोकनिरपेक्षमेव चक्षुः कारणमिति व्युत्पादयन्ति **अत एवेत्यादि।** उलूकादीनामव्यामोह्यत्वादेव तान् प्रत्यन्धकारं न जनयतीति तदभावादालोकनिरपेक्षेण चक्षुषा तेजोभावमेव ते गृह्णन्ति। तेजोभाव इत्युपलक्षणम्, वस्त्वन्तरमपि गृह्णन्ति। अन्यथा काकानपश्यन्तः कथं तान् हन्युरित्याशयेन तेषां विषयज्ञानप्रकारमाहुः **तेषामित्यादि।** तथा च, **विषयालोकसंयोगस्य न तत्र सहकारित्वमिति तन्निरपेक्षमेव चक्षुः कारणमित्यर्थः।** नन्वेवं सति भावचाक्षुषत्वावच्छिन्नं प्रति विषयालोकसंयोगस्य या कारणता सा तु भज्येतेति शङ्कायामाहुः **अस्मदादीत्यादि।** तथा च, चाक्षुषत्वावच्छिन्नं प्रति दूरत्वाद्यभावविशिष्टयोग्यताया एव कारणत्वात्तद्भङ्गे पीष्टापत्तिरित्यर्थः। न चैवं योग्यतामात्रस्य कारणत्वे गृहादौ त्रसरेणुचाक्षुषापत्तिरिति वाच्यम्, तत्र छायारूपस्य तमसः सत्त्वेन त्रसरेणूनां तदावृत्ततया व्यवधायकाभावविशिष्टयोग्यताया अभावेन तदनापत्तेः। न च गाढतेजसि तदापत्तिः ( इति वाच्यम् ) तत्र गाढतेजस एव प्रतिबन्धकत्वादिति। एतेनैव तमश्चाक्षुषार्थं चक्षुरधिष्ठानकं तामसमिन्द्रियान्तरं कल्पयन्तीति प्रत्युक्ताः। फलितमाहुः **अत इत्यादि। लोकप्रतीतिरिति।** दीपेन तमोनिवृत्तमिति सार्वजनीनप्रतीतिः। तथा चोक्तयुक्तिसार्वजनीनप्रतीतिभ्यामप्यतिरिक्तं तमः सिद्धमित्यर्थः। एवमेतेन माया च तमोरूपानुभूतेरिति श्रुत्युक्तमनुभवरूपं कार्यलिङ्गकानुमानरूपञ्च प्रमाणमूलभूतं मायासत्त्वे निर्दिष्टम्। एवं तमोरूपां विषयतां साधयित्वा तत्प्रतीतेः शुक्तिरजतादिप्रतीतिवदारोपितत्वाभावायाहुः सा चेत्यादि। तथा च, भ्रमणस्थले शुक्तौ चाकचक्यादिवद्घटादिषु भ्रमणसंस्कारोद्बोधकस्य वक्तुमशक्यतया तज्जन्यस्मृतेरशक्यवचनत्वेन स्मर्यमाणारोपस्य दुर्वचत्वम्। तथागृह्यमाणारोपस्यापि इदानीं किं गतं ? भ्रमणं गृह्यते इति विचारे चक्षुरिन्द्रियगतमेव गृह्यत इति त्वसङ्गतम्, कामलादिदोष आदर्शादिना स्वचक्षुर्गोलकगतपीतिमवत् भ्रमणदोषे स्वेन परेण वा स्वचक्षुर्गतभ्रमणग्रहणात्, नापीन्द्रियगतं गृह्यत इति युक्तम्, जातिगुणक्रियाणां योग्यगतानामेव ग्राह्यत्वनियमाद् इन्द्रियस्यायोग्यत्वात्। अन्यथा गुणदशायामपीन्द्रियगतसंयोगक्रियादीनां ग्राह्यत्वप्रसङ्गात्। न चोत्कटे दोषे भ्रमणमपि नियमादावनुभूयत एवेति तदाऽऽरोपस्य निर्बाधत्वमिति वाच्यम्, तथाप्यनुत्कटे दोषे तद्दोषतादवस्थ्यात्, तदानीं क्वापि स्वदेहभ्रमणाननुभवात्। किञ्चात्र किमारोपकं क्रिया वा ज्ञानं वा ? क्रिया चेत्, सा किं क्रियान्तरमुत्पाद्यारोपयति ( स्वं ) स्वरूपं वा ? नाद्यः, त्वत्समवायिनोऽनिर्वाच्यत्वात्, नेतरः तत्रालब्धसत्ताकत्वात्, लब्धसत्ताकत्वे सर्वेषां तदनुभवप्रसङ्गात्। ज्ञानपक्षेप्येवम्। अतः परिभ्रमणं यथा विषयाद्भिन्नतयान्तरा चक्षुषा गृह्यते तथा तमोपीति तस्य प्रतीतिर्नारोपितेत्यर्थः। नन्वेवं सति तमसोन्यत्रासिद्धत्वेन व्यत्यासाभावाद्विषयतारूपत्वमप्यशक्यवचनमित्यत आहुः **यथा हीत्यादि।** इदमेकादशस्कन्धे भगवद्वाक्यम्, 'यथा हि भानोरुदयो

नृचक्षुषां तमो निहन्यान्न तु तद्विधत्ते। एवं समीक्षा निपुणा सती मे हन्यात्तमिस्रं पुरुषस्य बुद्धे'रिति। यथा चेदमपि नृचक्षुषि सिद्धं तेजोभावयुक्ते देशे नीयत इति न काचिदनुपपत्तिरित्यर्थः। ननु भाट्टवद्द्रव्यान्तरमेव तमः कुतो नाङ्गीक्रियत इत्यत आहुः नन्वित्यादि। प्रतीयमानान्नीलरूपवत्त्वचलनक्रियावत्त्वरूपात्स्वभावादेव किञ्चिद्द्रव्यान्तरं तु तमो न भवति। ननु हेतौ विद्यमाने द्रव्यान्तरत्वं कुतो नाद्रियते इति शङ्कायामाहुः अन्यथेत्यादि। महदुद्भूतनीलरूपवद्द्रव्यत्वेन द्रव्यान्तरस्पार्शनप्रतिबन्धकत्वेन स्पर्शग्राह्यत्वेन च व्याप्यव्यापकभावात्तथा स्यात्, यतो नैवमतो न द्रव्यान्तरत्वमाद्रियते। तथा च, नीलरूपवत्त्वपरत्वापरत्वचलनक्रियावत्त्वैर्द्रव्यत्वसाधने द्रव्यान्तरस्पार्शनाप्रतिबन्धकत्वस्पर्शाग्राह्यत्वाभ्यां तेषां सत्प्रतिपक्षत्वाद् द्रव्यान्तरत्वानुमितिप्रतिबन्धाच्चलनादिप्रतीतिनाम्भः प्रचलने तीरतरुप्रचलनवत्तेजश्चलनहेतुकत्वेन तमश्चलनाद्यसाधकत्वाच्च न द्रव्यान्तरमित्यर्थः। यदि चोक्तव्याप्त्योः पृथिवीत्वगर्भत्वं विभाव्यते, तथापि श्रौतपुराणसृष्टिप्रक्रियासु द्रव्यमध्ये तमसोनुल्लेखान्मायात्वेनोल्लेखाच्च शब्दप्रमाणविरोधादुक्तव्याप्त्योः पृथिवीत्वगर्भत्वमनादरणीयमिति द्रव्यान्तरत्वं दुर्घटमेवेति। यत्तु न्यायकन्दलीकारः नीलरूपमेव तम इत्याह तदप्यसङ्गतम्, द्रव्यासमवेतत्वात्, नीलं तम इति प्रतीतिबाधापत्तेश्च! तस्मात्पदार्थान्तरमेव तम इति निश्चयः। इदं सर्वमन्धकारवादे प्रपञ्चितं मयेति विशेषविविदिषायां ततो बोध्यम्। एवं तमोरूपां विषयतां साधयित्वा विषयतान्तरमपि साधयन्ति तम इतीत्यादि। अत्र नैयायिका भामतिकारश्च दर्पणादिसन्निधानेन परावृत्तं चक्षुः स्वमुखं पश्यति, तमसि तिष्ठतस्तु परावृत्तमपि विषयालोकसंयोगाभावादेव न पश्यति, प्रतिबिम्बपक्षे तु बाधकाभावात्तच्चाक्षुषं स्यादतो नातिरिक्तः प्रतिबिम्बपदार्थ इत्याहुः। तन्मतं दूषयन्ति न चेत्यादि। यत्रैकस्य दर्पणस्य सम्मुखो द्वितीयो दर्पणः स्थापितस्तत्र दर्पणद्वये मुखाभासयुक्तो दर्पणो दर्पणानवस्था चोभयत्र प्रतीयते। यदि तत्रातिरिक्तः प्रतिबिम्बो न भवेत् तदा ततः परावृत्तं चक्षुरेकमेव स्वमुखं पश्येत्, तथा सति दर्पणद्वये मुखप्रतीतिर्दर्पणानवस्थाप्रतीतिश्च या जायते सा न स्यात्। अतस्तदनुरोधेन प्रतिबिम्बपदार्थोप्यतिरिक्त एवेत्यर्थः। ननु यथा नासा समानदेशे व्यवधायकस्य यष्ट्यादेः स्थापनेन चक्षुःकिरणविघटनान्नक्षत्रद्वयप्रतीतिस्तथा साभासदर्पणस्थले द्वयोर्दर्पणयोः चक्षुःकिरणपरावर्त्तकत्वेन किरणविघटनाम्मुखद्वयप्रतीतिरिति न तया प्रतिबिम्बोतिरिक्तः सिद्ध्यतीत्यत आहुः न चेत्यादि। प्रतिबिम्बत इति प्रतीयत इत्यर्थः। बिगताविति धातोः। वस्तुतस्तु प्रतीयत इत्येव पाठः प्रतिभाति। तथा चासम्मुखादिक्कस्थले वक्त्रपरावृत्तर्युक्तिविरुद्धत्वादवश्यमतिरिक्त एव प्रतिबिम्बः स्वीकार्य इत्यर्थः। न चैवमन्धकारस्थवस्तुनो दर्पणे प्रतिबिम्बप्रसंगः। तस्य बिम्बभूतस्य तमसाऽऽवरणेन तदभावात्। न चैवं तमःस्थिते दर्पणेपि तदभावापत्तिरिति शङ्क्यम्, आन्तरालिकतमसा बिम्बस्यानावृतत्वात्सुखेन तदुपपत्तेः ननु तमस आन्तरालिकत्वे तुल्ये कुतोयं विवेक इति चेत्स्वभावादेवेति वदामः। ननु स्वभावकल्पनापेक्षया चक्षुःपरावृत्तिकल्पनैव लघीयसीतिवत्। पूर्वोक्ता सम्मुखादिदिक्कादिस्थले स्वभावकल्पनस्य तवाप्यावश्यकत्वात्। तस्मात्प्रतिबिम्बपदार्थोतिरिक्त एवेति युक्तम् इदं यथा तथा प्रतिबिम्बवादे निपुणतरमुपादितमितिनात्राधिकं लिख्यते।

ननु मूले प्रतिबिम्बसङ्ग्राहकपदाभावात्किमर्थमयमाग्रह इति शङ्कायामाहुः अयमेव वा आभास इति। तथा च 'स किन्नरान् किम्पुरुषान् प्रत्यात्म्येनासृजत्प्रभुः। मानयन्नात्मनात्मानमात्माभासं विलोकयन्' 'जीवेशावाभासेन करोती'त्यादावाभासशब्दस्य प्रतिबिम्बे प्रयुक्तत्वादत्रापि तथावक्तुं शक्यत्वादयमाग्रह इत्यर्थः। एवं तमःप्रतिबिम्बौ साधयित्वा सिद्धमाहुः तस्मादित्यादि। तेन सिद्धं श्लोकतात्पर्यमाहुः तत्रेत्यादि। जगद्रूपेति। जगद्रूपयति निरूपयतीति भिन्नजगत्प्रत्यायिकेत्यर्थः। ननु श्लोकद्वयव्याख्यानव्युत्पादितयुक्तिभिस्तदुपष्टम्भकप्रमाणैश्चाविर्भावतिरोभावाभ्यां जगतो ब्रह्मरूपत्वेऽवधारितेपि तस्मिन् शब्देनापरोक्षज्ञानस्याजनितत्वेन नाशोत्पत्तिभेदेष्टानिष्टशुद्धाशुद्धादिप्रतीतीनां जायमानत्वेन च विषयतासत्त्वाद् दर्शनान्तराभिमानिवद् भिन्नत्वप्रतीतेः पोषणान्न प्रतीतौ तेभ्यः कश्चिद्विशेषः। किञ्च, मनोध्यानाभावभेदा वर्त्तमानत्वेनानुभूयमानत्वेप्यसन्त आद्यन्तयोरसत्वात्, यदेवं तदेवं स्वाप्निकवत्, यन्नैवंतन्नैवंस्वस्वमतप्रतिपन्ननित्यवस्तुवत्, विमता घटादयो मिथ्याभूता वितथसदृशत्वात्, ऐन्द्रजालिकवत् असन्तः अर्थक्रियाकारित्वात्, छायाप्रत्याह्वयप्रतिबिम्बवदित्याद्यनुमानैर्मिथ्यात्वबोधान्मायावादिभ्यः प्रतीतौ न कश्चिद्विशेष इति चेद् उच्यते। आस्तामिदानीं तथा प्रतीतिः, किमेतावता ? न ह्यन्यथानिश्चयोस्ति येन पुरुषार्थहानिः। वस्तुतस्तस्यैव विशेषः, आप्तवाक्यप्रामाण्येन हीरकादाविव विषयबाधाया निवृत्तत्वात्। तथा च, यथा चतुरतरतक्षकनिर्मितो यन्त्रेण सञ्चरन्नपि काष्ठकेसरी भुजङ्गमो वा प्रतीयमानो ज्ञाततत्त्वस्य न भयादिकं जनयितुं शक्नोति, प्रत्युत कुतुकं निर्मातृमाहात्म्यमेव च ख्यापयति। तथैतादृशप्रतीतिस्तद्विषयं च जगच्च भगवतोऽत्यलौकिकं माहात्म्यमेवाचष्टे इति। नन्वनुमानविरोधः कथं परिह्रियत इतिचेत्पूर्वोक्तप्रमाणैर्युक्तिभिश्च विषयताया विषयस्य च भेदे सिद्धनियतावधिकतया श्रुत्या च सत्कार्यवादेन कार्याणां सत्त्वेवधारिते आद्यन्तयोरसत्त्वादित्यस्य स्वरूपासिद्धसिद्धत्वमर्थान्तरसाधकत्वञ्च सिद्ध्यति। तथा वितथसदृशत्वादित्यस्य च साधारणत्वम्, सत्याः वितथसदृशत्वात्, ऐन्द्रजालिकप्राकालीनगजादिवदिति प्रयोगात्। एवमर्थक्रियाकारित्वादित्यस्यापि घटादिदृष्टान्तत्वेन साधारणत्वं चावधार्य परिहरणीय इति ब्रूमः। नन्वेवं सति पूर्वोक्तानुमानबोधकानां 'त्वय्युद्भवाऽऽश्रयति' 'ईक्षेत विभ्रममिमम्' 'छायाप्रत्याह्वया भासा' इत्यादीनां पुराणवाक्यानां का गतिरिति चेद् विषयतामादाय तेषां वैराग्यार्थतैव गतिरिति जानीहि। न चात्र मानाभावः, अवान्तरप्रकरणेन तथानिश्चयात्। महाप्रकरणे तूपसंहारे 'यथा सुवर्णं सुकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य।

तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वद्' इति ब्रह्मरूपताया एव कथनात्। ननु 'पराञ्चि खानी'तिश्रुतेः ब्रह्मण इन्द्रियाविषयत्वात्तदात्मकस्य प्रपञ्चस्य नेन्द्रियविषयकत्वं युज्यते, न चेष्टापत्तिः कर्त्तुं शक्या, जगदप्रतीतिप्रसङ्गादिति चेन्न, तस्यानावृत्तब्रह्मदर्शननिषेधपरतया प्रपञ्चस्य तथात्वाबाधकत्वात् तत्रत्येनान्तरात्मपदेन तथानिश्चयात्। ननु विषयरूपब्रह्मसाक्षात्कारमन्तरेण जगद्रूपविषयतायाः कथं साक्षात्त्वमिति चेन्न, 'यदिदं मनसा वाचा गृह्यतेन्यैरपीन्द्रियैः। अहमेव न मत्तोन्यद्' इति हंसवचनेन 'इदं सर्वं यदयमात्मेति'त्यादिश्रुत्या ब्रह्मणोपीन्द्रियविषयत्वस्याभिप्रेतत्वेनाज्ञानदशायामपि तस्य ग्रहणेन विषयतासाक्षात्कारे बाधकाभावात्। न च वाक्ययोः परस्परं विरोधः, आवृत्तानावृत्तब्रह्मपरत्वेन विषयभेदात्। अत एव च न मुक्त्यापत्तिः, नाप्यनिर्मोक्षप्रसङ्ग इति बोध्यम्। एवञ्चास्थूलादिवाक्येषु जडजीवधर्मनिषेधोपि युज्यते, नेत्रदर्पणान्तरितवर्णस्थौल्यदूरस्थसूर्यध्रुवाद्यणुत्ववत्तेषां मायिकत्वादिति। यत्तु, आरोपत्वेनाधिष्ठानज्ञानत्वेन सामान्यतः कार्यकारणभावाच्छब्दावकाशाद्यनुमितेऽप्रत्यक्षेऽप्याकाशे नीलारोपवच्छब्दविषये ब्रह्मणि विचित्रजगदारोपस्य सम्भवाद्रूटभ्रमदृष्टान्तेन प्रत्यक्ष एवारोपाङ्गीकारो न युक्त इति तदपि फल्गु। उक्तानुमानादिनाऽऽकाशे रूपराहित्यस्य निश्चयेन तथा वक्तुं शक्यत्वेपि शब्दैकसमधिगम्ये ब्रह्मणि उपनिषद्भिर्जिज्ञास्यमाने सर्वरूपत्वारूपत्वसर्वकर्तृत्वाकर्तृत्वनिष्कलत्वसकलत्वाद्यनेकविरुद्धधर्माधारत्वे नैव ज्ञातं भवतीति तादृश एवारोपस्य युक्तत्वेनाकाशदृष्टान्तस्यायुक्तत्वात्। तस्मादन्यप्रतीतावसत्प्रतीतौ च विशेषो निराबाध एव। एवञ्च, भगवन्मूर्त्तिदर्शनादावपि भक्ताभक्तयोर्यथायथं विषयविषयतयोरेव साक्षात्कार इति तैर्यथायथमनुभावानुभवादिकं तदननुभवादिकं च युज्यते। यत्पुनर्दुःखशोकादिकमनुभूयते, तद्विषयताकृतम्, सा च मायाकृता, तन्निवृत्तौ निवर्त्तते, तन्निवृत्तिश्च प्रपत्तेः सम्यक् सिद्धाविति प्रथमादिकक्षायां तदनिवृत्तावपि शैथिल्यस्यानुभूयमानत्वान्न कोपि क्वापि शङ्कालेश इति तदीयैरनुसन्धेयम्। प्रकृतमथानुसरामः ॥३३॥ ❀ ❀ **यथा महान्तीत्यत्र एवमित्यादि।** एवमुक्तप्रकारेण प्रमेयं सर्वं ब्रह्मेत्येवं रूपं प्रथमश्लोकेन निरूप्य प्रमाणं वेदरूपं तन्निवर्त्यमायानिरूपणमुखेन द्वितीय श्लोके निरूप्य विषयं वेदरूपप्रमाणस्यार्थं निरूपयतीत्यर्थः। ननु प्रमेयस्यैव प्रमाणविषयत्वात्तस्य च पूर्वमेव निरूपितत्वाद्विषयान्तराभावाच्च पुनर्विषयनिरूपणस्य किं प्रयोजनमत आहुः **वेदेनेत्यादि।** **पदार्था इति** प्रमेयभूतब्रह्मगता धर्माः। **इदमिति** विषयनिरूपणम्। **निरूप्यत इति** सदृष्टान्तमुच्यते। तथा च, 'रसोहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोरि'त्यादिवाक्यैर्यथा तेषु तेषु तद्रूपेणाविरस्ति, तथा वेदे विषयरूपेण मायायां च विषयतारूपेणेति तत्र तत्र तथैव ज्ञेयः। अन्यथाज्ञाने तु 'योन्यथा सन्तमि' तिश्रुत्या दोषकथनात् सर्वनाश इति सर्ववेदप्रामाण्यसिद्धौ च यथार्थज्ञाने सत्यभ्युदयनिःश्रेयसोः सिद्धिरिति सर्ववेदप्रामाण्यसिद्ध्यर्थं पुनर्विषयो निरूप्यत इत्यर्थः। अत्र मूले भूतेष्विति सप्तमी, अभिव्यापकाधिकरणे सर्वस्मिन्नात्मास्तीत्यादाविवेत्याशयेनाहुः **कारणत्वेनेत्यादि।** शेषं स्फुटम्। तथा च, यथा महाभूतानि स्वकार्येष्ववयवत्वेन प्रविष्टान्यपि कारणत्वेनाप्रविष्टानीति तस्मिन्नेवांशे रूपभेदयोः क्रियातद्राहित्ययोश्च न विरोधः, अंशान्तरेण ताटस्थ्यञ्च, तथाहं वेदे परस्परविरुद्धतद्रूपतत्तद्धर्मवत्त्वेन प्रतिपाद्यमानोपि न भिन्नो नापि विरुद्ध इति सर्ववेदप्रामाण्यमव्याहतमित्यर्थः। नन्वत्रैकविधस्यापि विषयत्वमुपादानत्वानुप्रवेशाप्रवेशैरुच्यते, तत्रोपादानत्वाप्रवेशाभ्यां वानुप्रवेशाप्रवेशाभ्यां वा विषयत्वोपपत्तावुपादानत्वानुप्रवेशयोरन्यतरस्य किं प्रयोजनमित्याशङ्कायां द्वयोरावश्यकत्वमुपपादयन्ति **कारणं हीत्यादि।** एवमुभयं प्रतिज्ञाय कार्यं कारणे समवेतमुत्पद्यत इत्यत्र युक्तिमाहुः **अन्यथेत्यादि।** अत्र तर्कद्वयं सहैव क्रमेणोच्यते। तत्र प्रथमस्यापादकत्वमन्यथेत्यनेनोच्यते। यदि कार्यं कारणे समवायसम्बन्धेनाधारभूतं न स्यादिति। पटस्येत्युपलक्षणं वैशद्यार्थम्। ननूत्पत्तेः पूर्वं पटादिप्रतीत्यभावादसदेव कार्यं निमित्तवशात्कारणे उत्पद्यत इति कारणस्याधारत्वमस्तु न तु कार्यस्य कारणे सत्त्वमपीत्यतस्तर्कान्तरमाहुः **तथा सतीत्यादि।** यदि कारणे कार्यं विद्यमानं न स्यात्तदा नोत्पद्येत इत्यादि। **उत्पाद्यमानमिति** असत्त्वेप्युत्पाद्यमानं उभयत्र यथायथं दृष्टान्तः **यथेत्यादि।** तथा च, कार्यस्य नियतावधिकत्वदर्शनात्कार्यस्य कारणे स्थितिरवश्यमङ्गीकार्या, न, चावधिनियमस्य कार्यप्रागभावेनैव निर्वाहात्कार्यस्य कारणे स्थितियुक्तेति वाच्यम्, कारणावस्थातिरिक्तस्य प्रागभावस्यैव निरूपयितुमशक्यत्वात्। न चेह कपाले घटो नास्तीति प्रतीतिरेव तत्र मानम्, तस्याः घटत्वावच्छिन्नप्रतियोगिताकसंसर्गाभावसामान्यत्वेन प्रागभावात्मकविशेषानवगाहित्वात्। न च कपालं घटप्रागभाववत्, घटीयचरमसामग्रीवत्त्वात्, यो यच्चरमसामग्रीवान् स तत्प्रागभाववान्, पटीयचरमसामग्रीविशिष्टतन्तुवदित्यनुमानमपि मानम्, अनुमानप्रयोगात्पूर्वं साध्यतावच्छेदकस्य प्रागभावस्यासिद्धत्वेन तदवच्छिन्नसाध्याप्रसिद्ध्या हेत्वाभासत्वात्। **इदं यथा तथा निबन्धोक्तदिशा प्रस्थानरत्नाकरे पपञ्चभेदवादे च सम्यङ्मयोपपादितमिति नात्र प्रपञ्च्यते।** अतः कारणावस्थायामेव प्रागभावाभिमानात्पूर्वं प्रतीत्यभावेपि कारणरूपेण कारणे विद्यमानमेव कार्यमुत्पद्यत इति तत एव नियतावधिकत्वमिति निश्चयः। एवमेवोत्पत्तिस्वरूपविचारादपि सिद्ध्यतीत्याविर्भाववादाद्प्यवगन्तव्यम्। ननु घटस्योत्पत्तिदर्शनात्कथं भगवत्त्वं शब्दस्य चाकाश एवोत्पद्यमानत्वात् कथं सर्वत्रोत्पत्तिरित्याकाङ्क्षायां द्वयमपि व्युत्पादयन्ति **कुम्भेत्यादि। शब्दोपीत्यादि च।** अत्र घटदृष्टान्त एवं बोध्यम्। **प्रथमस्कन्धे** तावद्वैदिकपौराणजगतोर्भगवद्रूपत्वाविशेषेपि घटितपूरितपात्रवद्भेद उक्तः। तेन वैदिकं जगदिच्छया युगपदाकाशादिक्रमेण वा घटितवदुत्पद्यते। पौराणं तु प्रकृतिपुरुषक्रियोत्पन्ने गुणमये सङ्घातके प्रविष्टं तत्प्रयुक्तमाकारं धत्ते। एवं प्रयोजकभेदेनोभयथा जायमानोप्याकारो घृतद्रवत्ववद्ब्रह्मधर्म एव तेनोभयविधेपि जगति 'इदं

सर्वं यदयमात्मे' ति 'सर्वं खल्विदं ब्रह्मे' त्यादीनि श्रौतानि, विश्वं वै ब्राह्मं तन्मात्रमि' त्यादीनि पौराणानि वाक्यानि ब्रह्मात्मकत्वं बोधयन्ति । यानि पुनर्द्वेअस्य बीजे शतमूल' इत्यादीनि पौराणानि, 'सैषा विद्या जगत्सर्वमि' त्यादीनि श्रौतानि च तानि तु द्विबीजत्वमुपक्रम्य 'मायामयं वेद स वेदवेदमित्युपसंहरन्ति, सञ्ज्ञायकस्य जगतो मायित्वं बोधयन्ति । एवं प्रपञ्चस्यापि चातुर्विध्यं सत्तायाश्च त्रैविध्यं भवति । तत्रायं प्रयोगः, व्यावहारिकः प्रपञ्चः स्वापेक्षयोत्कृष्टसत्ताकप्रपञ्चपूर्वकः, मायिकत्वादैन्द्रजालिकप्रपञ्चवद् इति, व्यावहारिकसत्तापेक्षयोत्कृष्टा च पारमार्थिक्येव सत्तेति, वाचनिकसत्ताङ्गीकारपक्षे तु सत्ताया अपि चातुर्विध्यम्, सा च खपुष्पादीनामिति प्रातिभासिकसत्तापेक्षयापि निकृष्टा, तथा सति द्वावुत्कृष्टसत्ताकौ, एको व्यावहारिकः, एकः प्रातिभासिक इति तेन घटस्य भगवद्रूपत्वं सिद्धमेव । तदेतद्धृदिकृत्योक्तं कुम्भकारेत्यादि । तथा च, व्यावहारिकस्य घटस्य यथावधित्वेन समवाय्यपेक्षा तथा पटस्यापि एवमेको दृष्टान्तः साङ्ख्यरीत्या । द्वितीयं दृष्टान्तं नैयायिकरीत्या व्याकुर्वन्ति शब्द इत्यादि । तथा च, ( जिह्वाद्यभिघातं ) निमित्तं समवायिभूतं प्रदेशं चातिहाय तव मते यथा शब्दो यत्र कचिदुत्पद्यते इति तत्प्रागभावावच्छिन्नो देशो न नियतः, तथा तन्तुराहित्ये पटः स्यादित्यर्थः । एवं कार्यान्तरेपि, तथा सति सत्कार्यवादस्य शिष्टादृतत्वात्कारणे समवेततया विद्यमानमेव कार्यमुत्पद्यत इति सिद्धम् । कारणस्य कार्ये प्रवेशं साधयन्ति तथा सति तन्त्वित्यादि । तथा सतीति । एवं तन्तुषु पटस्य विद्यमानत्वेपि सति । न प्रविशेयुरिति । अवयवतया न प्रविशेयुः । नन्वियं प्रतीतिः समवायेन तादात्म्येन वा उत्पत्स्यत इत्यनुप्रवेशो न प्रतीतितः सिद्ध्यतीत्यत आहुः शुष्केत्यादि । श्रुतौ 'तत्सृष्ट्वा तदेवानुप्राविशदि' तिश्रावणात्, 'सोनुप्रविष्टो भगवान् चेष्टारूपेण तं गणं, 'परेण विशता स्वेन मात्रये' त्यादिपुराणवाक्याच्चानुप्रवेशो बोध्यते इति तद्विरोधिनी युक्तिः शुष्का अप्रमाणिकी कापि प्रामाणिकशास्त्रे पदं प्रवेशमलभमाना तथेति, न तयानुप्रवेशबाध इत्यर्थः । सिद्धमाहुः अत इत्यादि । एवं कालदेनावस्थाभेदादेकस्यैव भौतिकस्यार्थस्य तन्निरूपितमाधारत्वमाधेयत्वञ्च साधयित्वा महाभूतेष्वतिदिशन्ति एवमित्यादि । विशेषत आधेयत्वमिति संयोगसम्बन्धेनाधेयत्वम् । तथा च, समवायेन कारणतयाऽऽधारत्वम्, परस्परसंयोगेनावयवतयाऽऽधेयत्वम्, तटस्थसंयोगेन कार्यतया विशेषत्वमाधेयत्वमिति धर्मत्रयमित्यर्थः । एवमापाततो विचारेण दृष्टान्ते धर्मत्रयसिद्धौ दार्ष्टान्तिकेपि तावदेव सेत्स्यतीति दशधर्मकत्वाभावे दशलीलाऽभावाद्भगवत्त्वं जगतो न भविष्यतीत्यरुच्या पक्षान्तरमाहुः अथवेत्यादि । न तेष्विति । पुनः पञ्चधेति । महाभूतानां केनचिदेवांशेन कारणत्वात्पञ्चावस्थाकत्वमेव, भगवतस्तु अन्यदेव, 'तद्विदिताद्थो अविदितादि' तिश्रुत्या विदिताविदितविलक्षणवद् अप्राकृतेन सच्चिदानन्दरूपेण प्रविष्टाप्रविष्टविलक्षणत्वात् पुनः पञ्चधेत्यर्थः । तेन सिद्धमाहुः तथा सतीत्यादि । तथा च जगति भगवतः प्राकृतकारणरूपत्वेन पञ्चधास्थित्या प्राकृताप्राकृतवस्तुनो विषयताविषयरूपाभ्यां भगवत्त्वाज्जगति दशधा भगवज्ज्ञापनेन वेदानामंशतोऽप्रामाण्यनिरासार्थं विषयनिरूपणमित्यर्थः ॥ ३४ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

'यथाऽऽत्ममायायोगेन' इत्यनेन मायाया अपि पृष्टत्वात्तां निरूपयति—ऋतेऽर्थमिति । आत्मनि जीवे अर्थमृते कृशत्वादिदेहधर्मरूपं काणत्वादीन्द्रियधर्मरूपं क्षुधादिप्राणधर्मरूपं दुःखित्वाद्यन्तःकरणधर्मरूपमर्थं विनाऽपि यत् यस्मान्निमित्तात् कृशोऽहं काणोऽहं क्षुधितोऽहं दुःख्यहमिति सोऽर्थः प्रतीयेत प्रतीयते भगवदंशत्वाद्विद्यमानोऽपि सच्चिदानन्दत्वस्वरूपोऽर्थो न प्रतीयते च तत्तां निमित्तभूतामात्मनः परमात्मनो मम मायां विद्यात् । तत्र दृष्टान्तमाह—यथा भास इति, द्विचन्द्रादिरूपो यथा । तत्र यथा अविद्यमानमपि द्वित्वं मायामोहात्प्रतीयते विद्यमानं चैकत्वं न प्रतीयते तथेत्यर्थः । ननु विद्यमानं चेत्कथं न प्रतीयेतातो नास्त्येवेत्याशङ्क्य विद्यमाना प्रतीतौ दृष्टान्तमाह—यथा तम इति । तमो राहुर्यथा ग्रहमण्डले विद्यमानोऽपि न प्रतीयते तथेत्यर्थः ॥ ३३ ॥ ❀ ❀ एवं विश्वात्मकत्वे विकारित्वमाशङ्क्य दृष्टान्तेन तन्निरस्यति—यथेति । उच्चावचेषु स्थूलसूक्ष्मेषु भूतेषु स्वकार्येष्वनुप्रविष्टान्यपि महाभूतानि अप्रविष्टान्येव कार्याणि विनाशादिविकारवत्त्वेऽपि तेषां विकाराभावस्तथा तेषु उच्चावचेषु कार्येष्वहं प्रविष्टोऽप्यप्रविष्ट एव तेषां विकारित्वेऽप्यविकार्येवेत्यर्थः । अनेनैव 'यावानहं' इत्युक्तं स्वपरिमाणमपि व्यापकत्वं दर्शितम् । यथा महाभूतानां सर्वकार्येषु प्रविष्टत्वेऽपि बहिरपि व्यापकत्वं तथा भगवतोऽपीति ध्येयम् ॥ ३४ ॥

### हिन्दी अनुवाद

वास्तवमें न होनेपर जो कुछ अनिर्वचनीय वस्तु मेरे अतिरिक्त मुझ परमात्मामें दो चन्द्रमाओंकी तरह मिथ्या ही प्रतीत हो रही है, अथवा विद्यमान होनेपर भी आकाश-मण्डलके नक्षत्रोंमें राहुकी भाँति जो मेरी प्रतीति नहीं होती, इसे मेरी माया समझना चाहिये ॥ ३३ ॥ ❀ ❀ जैसे प्राणियोंके पञ्चभूतरचित छोटे-बड़े शरीरोंमें आकाशादि पञ्चमहाभूत उन शरीरोंके कार्यरूपसे निर्मित होनेके कारण प्रवेश करते भी हैं और पहलेसे ही उन स्थानों और रूपोंमें कारणरूपसे विद्यमान रहनेके कारण प्रवेश नहीं भी करते, वैसे ही उन प्राणियोंके शरीरकी दृष्टिसे मैं उनमें आत्माके रूपसे प्रवेश किये हुए हूँ और आत्मदृष्टिसे अपने अतिरिक्त और कोई वस्तु न होनेके कारण उनमें प्रविष्ट नहीं भी हूँ ॥ ३४ ॥

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः। अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा ॥ ३५ ॥
एतन्मतं समातिष्ठ परमेण समाधिना। भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥ ३६ ॥

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

साधनमाह। आत्मनस्तत्त्वजिज्ञासुना एतावत्तत्त्वमेव जिज्ञास्यं विचार्यम्। तदेवाह। अन्वयः कार्येषु कारणत्वेनानुवृत्तिः कारणावस्थायां च तेभ्यो व्यतिरेकः तथा जाग्रदाद्यवस्थासु तत्तत्साक्षितयाऽन्वयः व्यतिरेकश्च साध्यादौ एवमन्वयव्यतिरेकाभ्यां यत्स्यात् सर्वत्र सर्वदा च तदेवात्मेति ॥ ३५ ॥ * * यत्प्रार्थितं 'नेहमानः प्रजासर्गं' इति तत्प्रसादीकरोति। एतन्मतं सम्यगनुतिष्ठ समाधिना चित्तैकाग्र्येण कल्पेषु ये विकल्पा विविधाः सृष्टयस्तेषु विमोहं कर्तृत्वाभिनिवेशं न यास्यतीति ॥ ३६ ॥

## वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अथ "भगवच्छिक्षितमहं करवाणि ह्यतंद्रितः" इति ब्रह्मणा प्रार्थितस्य स्वप्राप्तिसाधनस्यातिरहस्यत्वाद्बहिरंगजनागम्यतयैवाह एतावदेवेति। अत्र बहुतरशास्त्रानुसंधानमपि नापेक्षितव्यमिति भावः। तत्त्वजिज्ञासुना आत्मनः स्वस्य श्रेयः साधनत्वं ज्ञातुमिच्छुना जनेन जिज्ञास्यं श्रीगुरुचरणेभ्यः शिक्षणीयमित्यर्थः। त्वया तु मदनुग्रहादवगम्यत एवेति भावः। किं तत् यच्छ्रेयःसाधनेषु कर्मज्ञानयोगभक्त्यादिषु मध्येऽन्वयव्यतिरेकाभ्यां स्यात् सिध्यति स्थिरीभवतीत्यर्थः। अत्र तावत्स्वर्गापवर्गादेः कर्मज्ञानयोगादिभिः केवलैरसिद्धैस्तैर्विनापि सिद्धेः। कर्मज्ञानयोगादयोऽन्वयव्यतिरेकाभ्यां नैव साधनानि स्युस्तथा हि "कोवार्थ आप्तोऽभजतां स्वधर्मतः" इति "क्लिश्यंति ये केवलबोधलब्धये" इति "पुरेह भूमन्बहवोऽपि योगिनः" इति "यत्कर्मभिर्यत्तपसा" इत्यादौ "कर्मादिभिर्विनापि" "सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा। स्वर्गापवर्गं मद्धाम कथंचिद्यदि वाञ्छति" इति। "या वै साधनसंपत्तिः पुरुषार्थचतुष्टये। तया विना तदाप्नोति नरो नारायणाश्रयः" इति मोक्षधर्मीयवचनं च। भक्त्या तु केवलयैव सर्वाणि श्रेयांसि सिद्ध्यंति तया विना तु नैव सिद्ध्यंतीत्यन्वयव्यतिरेकाभ्यां भक्तिरेव सर्वश्रेयःसाधनत्वेन स्थिरीभवति तथाहि अन्वयेन यथा "अकामः सर्वकामो वा मोक्षकाम उदारधीः। तीव्रेण भक्तियोगेन यजेत पुरुषं परम्" इति भक्तियोगस्य केवलस्यैव तीव्रत्वं निरभ्रसूर्यस्येवेति ज्ञेयम्। यथा वा 'यत्कर्मभिर्यत्तपसा' इत्यादिव्यतिरेकेण यथा "मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह। चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् ॥ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम्। न भजंत्यवजानन्ति स्थानाद्भ्रष्टाः पतंत्यधः" इति। यथा वा "तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः। क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे नमोनमः" इति। अत्र देशकालविशेषाभावमाह—सर्वत्र सर्वदेशेषु सर्वाधिकारिषु च सर्वदा सर्वेष्वेव कालेषु यत्स्यात्तथाहि—शुचावेव देशे शुचौ तत्कालजीवी कर्म कुर्यात्, शुद्धांतःकरण एव ज्ञानं लभते, "शुचौ देशे प्रतिष्ठाप्य सुखमासनमात्मनः ॥ योगी योगं युंजीत" इति कर्मज्ञानादीनां न सार्वत्रिकता तथा यत्कर्म तत्संन्यासभोगप्राप्त्यवधियोगः सिद्ध्यवधिः सांख्यमात्मज्ञानावधि ज्ञानं मोक्षावधीति नापि सार्वत्रिकता भक्तेश्च सार्वत्रिकतासार्वदिकते अतिप्रसिद्धे एव "न देशनियमस्तत्र न कालनियमस्तथा। नोच्छिष्टादौ निषेधोस्ति श्रीहरेर्नाम्नि लुब्धका" इति "तस्मात्सर्वात्मना राजन्हरिः सर्वत्र सर्वदा। श्रोतव्यः कीर्त्तितव्यश्च स्मर्तव्यो भगवान्नृणाम्" इति कर्मिज्ञानिप्रभृतिषु सर्वेष्वेवाधिकारिषु भक्तेर्व्याप्तिरुक्तैव "किरातहूणांध्रपुलिंदपुल्कसाः" इत्यादिना जातिचांडालकर्मचांडालादिष्वपि दृष्टा। तथा सर्वावस्थास्वपि गर्भे प्रह्लादादेर्बाल्ये ध्रुवादेर्यौवनेंबरीषादेर्वार्द्धक्येद्युम्ये ययात्यादेर्मरणेऽजामिलादेर्नारकितायामपि यन्नाम्न्युदिते नारकोपीत्युक्तेः। "यथायथा हरेर्नाम कीर्त्तयंति च नारकाः। तथातथा हरौ भक्तिमुद्वहंतो दिवं ययुः" इति नृसिंहपुराणोक्तेश्चेति भक्तेरेव साधनत्वं निर्द्धारितम्। अथ प्रेमभक्तिरूपं रहस्यमपि तंत्रेणैवाह—एतावदिति। तत्त्वजिज्ञासुना पुंसा एतावदेव श्रेयस्सु स्वर्गापवर्गप्रेमसु मध्ये जिज्ञास्यं किं तत् यच्छ्रेय आत्मनः स्वस्यैवान्वयव्यतिरेकाभ्यां सर्वत्र सर्वदा स्यात् तत्र न तावत्स्वर्गापवर्गौ स्वान्वयव्यतिरेकाभ्यां सिद्धयतः प्रेमा तु स्वस्यैवान्वयव्यतिरेकाभ्यां सिद्धयति प्रेम्णोपि भक्तिशब्दवाच्यत्वात्साधनभक्त्यैव साध्यभक्तेः प्रेम्णः सिद्धिदर्शनात्। प्रेम्णः स्वेनैव सिद्धिः तदुक्तं "भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम्" इत्यतो रहस्यतदंगशब्दाभ्यामुच्यमाने प्रेमभक्तिसाधनभक्ती तंत्रेणैवोक्ते ततश्च प्रेमभक्तिसाधनत्वेनैव भक्तिः कर्त्तव्या न तु स्वर्गापवर्गादिसाधनत्वेनेति भगवतः शिक्षा व्यंजिता "भगवच्छिक्षितमहं करवाणि ह्यतंद्रितः" इति ब्रह्मणा प्रार्थितत्वात् शुद्धसाधनभक्तिसिद्धया प्रेमभक्त्यैव यद्रूपगुणादिमाधुर्यरसानुभवस्तस्य प्रेमभक्त्यनुभावरूपत्वादिति विज्ञानं स्वत एव लब्धमतो रहस्यतदंगविज्ञानानि श्लोकेनानेनैवोक्तानि। किञ्च 'रसो वै सः' इत्यनंतरं, 'सैषा रसस्य मीमांसा भवति' इति श्रुतेः। सर्वश्रेयोवधिरूपो रस एव मूर्त एव रंगभूमौ "मल्लानामशनिः" इत्याद्याकार एव दर्शितस्तस्य च विज्ञानमत्रैव श्लोके तंत्रेणोक्तेः। यथा जिज्ञास्येषु मध्ये एतावदेव जिज्ञास्यमनुबुभूषणीयं किं तत् अन्वयव्यतिरेकाभ्यां योगायोगाभ्यां संयोगविप्रलंभाभ्यां यत्स्यात्सर्वत्र सर्वब्रह्मांडवर्तिनि श्रीवृंदावनादौ दाससखिगुरुप्रेयसीषु सर्वदा नित्यमेव महाप्रलयसमयेपीति दास्यसख्यवात्सल्यशृंगाररसानामास्वादनं व्यंजितम्। एवमतिरहस्यप्रेमभक्तिरसव्यंजकः श्लोकोऽयं ज्ञानरूपार्थांतरेण भगवतैवाच्छादितश्चिंतामणिरिव कनक-

संपुटेन बहिरंगजनाशक्योद्घाटनेन । तथा च श्रुतिः "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" इति । तच्च ज्ञानरूपमर्थांतरं यथा स्वामिचरणैर्व्याख्यातं तथैवेति विश्वनाथः । अत्र संदर्भः । अथ क्रमप्राप्तं रहस्यपर्यंतसाधकत्वात् रहस्यत्वेनैव तदंगमुपदिशति—एतावदेवेति । आत्मनो मम भगवतस्तत्त्वजिज्ञासुना याथार्थ्यमनुभवितुमिच्छुना एतावदेव जिज्ञास्यं श्रीगुरुचरणेभ्यः शिक्षणीयं किं तत् यदेकमेव वस्तु अन्वयव्यतिरेकाभ्यां विधिनिषेधाभ्यां सदा सर्वत्र स्यादित्युपपद्यते तत्रान्वयेन यथा 'एतावानेव लोकेस्मिन्' इत्यादि "ईश्वरः सर्वभूतानाम्" इत्यादि 'मन्मना भव मद्भक्तः' इत्यादि च व्यतिरेकेण यथा 'मुखबाहूरूपादेभ्यः' इत्यादि "ऋषयो देवयुष्मत्प्रसंगविमुखा इह संपतंति" इत्यादि, 'न मां दुष्कृतिनो मूढाः' इत्यादि 'यावज्जनो भवति नो खलु विष्णुभक्तः' इत्यादि च कुत्रकुत्रोपपद्येत सर्वत्र शास्त्रकर्तृदेशाकारणद्रव्यक्रियाकार्यफलेषु समस्तेष्वेव तत्र समस्तशास्त्रेषु यथा स्कांदे ब्रह्मनारदसंवादे "संसारेस्मिन्महाघोरे जन्ममृत्युसमाकुले । पूजनं वासुदेवस्य तारकं वादिभिः स्मृतम्" इति । तत्रान्वयेन यथा "भगवान्ब्रह्म कात्स्न्येन" इत्यादि । तथा पाद्मे स्कांदे लैंगे च "आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा" इति व्यतिरेकोदाहरणं "पारंगतोपि वेदानां सर्वशास्त्रार्थविद्यदि । यो न सर्वेश्वरं भक्तस्तं विद्यात्पुरुषाधमम्" इत्यादिकं सर्वत्रावगंतव्यम् । तच्चांते दर्शयिष्यते एकादशे "शब्दब्रह्मणि निष्णातो ननिष्णायात्परे यदि । श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः" इति । सर्वकर्तृषु यथा "ते वै विदंत्यतितरंति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः । यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु शुभधारणा ये" इति । गारुडे च "कीटपक्षिमृगाणाञ्च हरौ संन्यस्तकर्मणाम् । उर्ध्वमेव गतिं मन्ये किं पुनर्ज्ञानिनां नृणाम्" इति । तत्रैव सदाचारे दुराचारे ज्ञानिन्यज्ञानिनि विरक्ते रागिणि मुमुक्षौ मुक्ते भक्त्यसिद्धे भक्तिसिद्धे तस्मिन्भगवत्पार्षदतांप्राप्ते ऽस्मिन्नित्यपार्षदे च सामान्येन दर्शनादपि सार्वत्रिकता । तत्र सदाचारे दुराचारे च तथा "अपि चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः" इति । सदाचारस्तु किं वक्तव्य इत्यपेरर्थः 'ज्ञानिन्यज्ञानिनि च ज्ञात्वाऽज्ञात्वाथ ये वै माम्' इत्यादि "हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः" इति । विरक्ते रागिणि च "बाध्यमानोपि मद्भक्तो विषयैरजितेंद्रियः । प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते" इति अबाध्यमानस्तु सुतरां नाभिभूयत इत्यपेरर्थः । 'मुमुक्षौ मुक्ते च 'मुमुक्षवो घोररूपान्' इत्यादि, 'आत्मारामाश्च मुनयः 'इत्यादि भक्त्यसिद्ध भक्तिसिद्धे च 'केचित्केवलया भक्त्या वासुदेवपरायणाः' इति 'न चलति भगवत्पदारविंदाल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः' इति भगवत्पार्षदतां प्राप्ते, मत्सेवया प्रतीतं च' इत्यादि । नित्यपार्षदे 'वापीषु विद्रुमतटास्वमलामृताप्सु' इत्यादिसर्वेषु वर्षेषु ब्रह्मांडेषु तेषां बहिश्च तैस्तैः श्रीभगवदुपासनायाः क्रियमाणायाः श्रीभागवतादिषु प्रसिद्धिः सिद्धैरेभिः सर्वदेशोदाहरणं ज्ञेयं सर्वेषु करणेषु यथा "मानसेनोपचारेण परिचर्य हरिं मुदा । परे वाङ्मनसागम्ये तं साक्षात्प्रतिपेदिरे" इति । एवंभूतवचने हि अस्तु तावद्बहिरिंद्रियेण मनसा वचसापि तत्सिद्धिरिति प्रसिद्धिः । सर्वद्रव्येषु यथा "पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति" इत्यादि । सर्वक्रियासु यथा "श्रुतोनुपठितो ध्यात आदृतो वानुमोदितः । सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोपि हि" इति, 'यत्करोषि यदश्नासि' इत्यादि, एवं भक्तभासेषु भक्ता भासापराधेष्वप्यजामिलमूषिकादयो दृष्टान्ता गम्याः । सर्वेषु कार्येषु यथा "यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतम्" इति सर्वफलेषु यथा "अकामः सर्वकामो वा" इत्यादि । तथा 'यथा तरोर्मूलनिषेचनेन' इत्यादिवाक्येन हरिपरिचर्यायां क्रियमाणायां सर्वेषामन्येषामपि देवादीनामुपासना स्वत एव भवतीत्यतोपि सार्वत्रिकता यथोक्तं स्कांदे श्रीब्रह्मनारदसंवादे "अर्चिते देवदेवेशे शंखचक्रगदाधरे । अर्चिता सर्वदेवाः स्युर्यतः सर्वगतो हरिः" इति । एवं यो भक्तिं करोति यद्द्रवादिकं भगवते दीयते येन द्वारभूतेन भक्तिः क्रियेत यस्मै श्रीभगवते प्रीणनार्थं दीयते यस्माद्द्रवादिकात्पयआदिकमादाय भगवते निवेद्यते यस्मिन्देशादौ कुले वा कश्चिद्भक्तिमनुतिष्ठति तेषामपि कृतार्थत्वं पुराणेषु दृश्यत इति कारकगतापि एवं सार्वत्रिकत्त्वं साधितं सनातनत्वमप्याह—सर्वदेति । तत्र सर्गादौ यथा 'कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता' इत्यादि, सर्गमध्ये तु बहुत्रैव चतुर्विधप्रलयेपि 'तत्रेमं क उपासीरन्' इति विदुरप्रश्ने सर्वेषु युगेषु "कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः । द्वापरे परिचर्यायां कलौ तद्धरिकीर्त्तनात्" इति किं बहुना 'सा हानिस्तन्महच्छिद्रं स मोहः स च विभ्रमः । यन्मुहूर्त्तं क्षणं वापि वासुदेवो न चिंत्यते" इत्यादि वैष्णवे । सर्वावस्थास्वपि गर्भे श्रीनारदकारितश्रवणेन श्रीप्रह्लादे प्रसिद्धं बाल्ये ध्रुवादिषु यौवने श्रीमदंबरीषादिषु वार्द्धक्ये धृतराष्ट्रादिषु मरणेऽजामिलादिषु स्वर्गितायां श्रीचित्रकेत्वादिषु नारकितायामपि "यथायथा हरेर्नाम कीर्त्तयंति स्म नारकाः । तथातथा हरौ भक्तिमुद्वहंतो दिवं ययुः" इति नृसिंहपुराणे । अत एवोक्तं दुर्वाससा "मुच्येत यन्नाम्न्युदिते नारकोपि" इति । तथा 'एतन्निर्विद्यमानानाम्' इत्यादावपि सर्वावस्थोदाहृतिः । अथ तत्रतत्र व्यतिरेकोदाहरणानि च कियंति दर्श्यंते "पारंगतोपि वेदानां सर्वशास्त्रार्थवेद्यपि । यो न सर्वेश्वरे भक्तस्तं विद्यात्पुरुषाधमम्" इति, "किं वेदैः किमु शास्त्रैर्वा किं वा तीर्थनिषेवणैः । विष्णुभक्तिविहीनानां किं तपोभिः किमध्वरैः" इति "किं तस्य बहुभिः शास्त्रैः किं तपोभिः किमध्वरैः । वाजिपेयसहस्रैर्वा भक्तिर्यस्य जनार्दने" इति गरुडबृहन्नारदीयपाद्मवचनानि । तथा "तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः । क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे नमोनमः" इति, "न यत्र वैकुंठकथासुधापगा न साधवो भागवतास्तदाश्रयाः । न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोपि न जातु

सेव्यताम् ॥ यथा च आनम्य किरीटकोटिभिः'' इत्यादि, सायुज्यं सार्ष्टिसालोक्यसामीप्येत्यादि, 'न दानं न तपो नेज्या' इत्यादि, 'नैष्कर्म्यमप्यच्युतभाववर्जितम्' इत्यादि, 'नात्यंतिकं विगणयंत्यपि ते प्रसादम्' इत्यादयः। अथ सर्वत्र सर्वदा यदुपपद्यत इति योजनिकार्थोपयुगपद् यथा 'तस्मात्सर्वात्मना राजन्हरिः सर्वत्र सर्वदा' इत्यादि अन्वयव्यतिरेकाभ्यां सर्वत्र सर्वदा यदुपपद्यते इत्यत्र यथा ''स्मर्त्तव्यः सततं विष्णुः'' इत्यादि साकल्येपि यथा 'न ह्यतोन्यः शिवः पंथाः' इत्युपसंहारे ''तस्मात्सर्वात्मना राजन्हरिः सर्वत्र सर्वदा। श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यो भगवान्नृणाम्। जीवानामिति 'नृगतिं विविच्य कवयः इतिवत् एतदुक्तं भवति। यत्कर्म' तत्संन्यासभोगशरीरप्राप्तावधियोगः सिद्ध्यवधिः सांख्यमात्मज्ञानावधि ज्ञानमोक्षावधिः तथा तत्तद्योग्यतादिकानि च सर्वाणि एवंभूतेषु कर्मादिषु शास्त्रादिव्यभिचारिता च ज्ञेया हरिभक्तिस्तु अन्वयव्यतिरेकाभ्यां सदा सर्वत्र तत्तन्महिमभिरुपपन्नत्वात्तथाभूतस्य रहस्यस्यांगत्वं युक्तम्। अतो रहस्यस्यांगत्वेन च ज्ञानरूपार्थांतराच्छन्नतयैवेदमुक्तमिति। तथाप्यात्मविद्ययैवान्यार्थसंगोपनादसौ साधनभक्तिरपि कश्चिद्ग्राह्यं ब्रह्मज्ञानादिसाधनं स्यादिति गम्यते। अत्रेयं प्रक्रिया साधनभक्तेः सार्वत्रिकत्वात्सदातनत्वाच्च प्रथमं सा गुरोर्ग्राह्या ततस्तदनुष्ठानाद्ब्रह्मसाधनं वैराग्यपुरस्सरताशीलमात्मज्ञानमानुषंगिकं भवति। ततो भूयश्च तथाभूतत्वाद्भक्तिरनुवर्त्तत एव 'ब्रह्मभूतः प्रसन्नात्मा' इत्यादिभ्यः 'आत्मारामाश्च मुनयः' इत्यादिभ्यश्च तदैव 'भगवज्ज्ञानविज्ञाने च' इति। तस्माज्ज्ञानविज्ञानरहस्यतदंगानामुपदेशेन चतुःश्लोक्या अपि स्वयं भगवानेवोपदेष्टा अत्र तस्मै स्वलोकं भगवान्सभाजित इति भगवच्छब्देन ''ददर्श तत्राखिलसात्वतां पतिम्'' इत्यत्र 'परार्द्धांते न सोऽबुध्यत गोपवेशो मे पुरस्तादाविर्बभूव' तितापनीश्रुतादनुकूलितश्रीकृष्णत्वलिंगेन चास्य वक्तुः श्रीभगवत्त्वमेव स्पष्टं न जातु तदंशभूतनारायणाख्यगर्भोदशायिपुरुषत्वम्। अत एवास्य महापुराणस्यापि श्रीभागवतमित्येव व्याख्या तथैवोक्तं 'कस्मै येन विभाषितोयमतुलो ज्ञानप्रदीपः पुरा' इत्यादौ पुराशब्देन भगवद्वक्तृत्वमेवोक्तम्। 'आद्योऽवतारः पुरुषः परस्य' इति द्वितीयेऽभिधानात्। अत ''इदं भगवता पूर्वं ब्रह्मणे नाभिपंकजे। स्थिताय भवभीताय कारुण्यात्संप्रकाशितम्'' इत्यत्रापि भगवच्छब्दः प्रयुक्तः श्रीनाभिपंकजे स्थितं ब्रह्माणं प्रति स्वयं भगवता तत्रैव व्यापि महावैकुंठे प्रकाश्येदं पुराणं प्रकाशितमित्यर्थः। अनुगतं चैतद्द्वितीयस्कंधेतिहासस्येति ॥ ३५ ॥ ❀ ❀ नन्वतिगंभीरार्थं चतुश्लोकीभागवतमिदं कथं मयावगंतुं शक्यं विवदमानानां मतवैविध्यादित्यत आह—एतन्मतं मदीयं सम्यगनुतिष्ठ समाधिना चित्तैकाग्र्येण विमृशेत्यर्थः। कल्पविकल्पेषु महाकल्पानुकल्पेषु। इयं विश्वजनीनातिरम्याभावार्थदर्शिनी भक्तिशास्त्रमधीयानैर्जनैर्द्रष्टव्या न चापरैरिति ॥ अस्य महापुराणत्वे तु सर्गादिदशलक्षणवत्त्वेन भाव्यं तच्चात्र चतुःश्लोक्यां दुर्विज्ञेयं विना श्रीनन्दनन्दनकृपयेत्येतदर्थं तदपि सूक्ष्मधिया ज्ञेयमत्रासूच्येव तथाहि मे मत्संबंधि यज्ज्ञानं वेदांतप्रतिपादितत्वादगुह्यं प्रसिद्धमेव 'विज्ञानमेतत्त्रियवस्थमंगे' इत्यादिनैकादशस्कंधे भगवदुक्तैर्विज्ञानं प्रधानं तत्सहितं मया श्रीगीतासु भारते 'अहं ब्रह्म परं धाम' इत्यादिना 'दैवी ह्येषा गुणमयी' इत्यादिना च गदितमुक्तमेव स प्रार्थयिता त्वं रहस्यं रहस्ये कान्ते स्थाप्यं रहस्यं सुरेभ्यो गोपितत्वाद्वा रहस्यं पाद्म उक्तमेतत्' 'परीक्षिते कथां वक्तुं सभायां संस्थिते शुके' इत्यादिना ''गुह्यं पुत्राय शांताय परं गुह्यमिदं जगौ'' इति नवमस्कन्धे श्रीशुकोक्तेश्च परं रहस्यं श्रीभागवतमेव न वेदादिपैलादिभ्यो वेददानेप्येतददानात् ''हित्वा स्वशिष्यान्पैलादीन्'' इति तत्रैवोक्तेश्च गुह्याद्गुह्यतरं मुक्तिं ददाति''कर्हीचित्स्म न भक्तियोगम्'' इत्युक्तेरतिगुह्यस्यैवादानं भवति नत्वगुह्यस्यात एव भक्तिरेव रहस्यं न तु ज्ञानादीति रहस्यमस्त्यत्र प्रतिपाद्यत्वेनेति रहस्यं श्रीमद्भागवतमेव अत्र मत्वर्थीयोच् यद्वा प्रतिपाद्यप्रतिपादकयोरभेदोपचारात्। तदंगं भक्त्यंगमेकत्वं सामान्यापेक्षं तदंगानीत्यर्थः। तानि च सत्संगादीन्येव श्रीभागवतप्राप्तिरपि सत्संगादीनि विना न भवत्यतस्तस्यापि तान्येवांगानीति ज्ञेयं सुधिया यथैव गुणकर्मकोहमस्मि तथैव तत्त्वविज्ञानं मदनुग्रहात्ते तवास्तु किं भूतोहं यच्छत्युपरमयति संसारान्निजभक्तानिति वा मोक्षादप्युपरमयति वा या वा ''मद्भक्तास्सर्वथा राजन्नैव वांछंति किंचन'' इति पुराणांतरात् ''गृहेषु दारेषु सुतेषु बंधुषु द्विपोत्तमस्यंदनवाजिवस्तुषु। अक्षय्यरत्नाभरणायुधादिष्वनंतकोशेष्वकरोदसन्मतिम्'' इत्यंबरीषोपाख्यानोक्तेः ''सालोक्यादिचतुष्टयम्। ''दीयमानं न गृह्णंति विना मत्सेवनं जनाः'' इति श्रीकपिलोक्तेश्च। यम उपरमे अस्मादंतर्भावितण्यर्थात्कर्त्तरिक्विनिपि ''यमस्यात्वम्.' इति मस्यात्वे राजवत्साधनम्। पुनः न विद्यतेस्ति कथंभूतं रहस्यं परं सर्वोत्कृष्टमेवाहंभावो यस्य सोनहंभावः ''छन्दसि परेऽपि, व्यवहिताश्च'' इति यथाशब्दव्यवधानमदोषो प्राकृतवस्तुष्वस्य साक्षाद्वेदस्यापि बीजत्वात्। अत एव चतुःश्लोक्योपदेशाद्वेदा अपि चत्वार एवोद्भूता अन्यथा त्रिभिः पंचभिर्वा कथं नोपदिष्टमिति तत्त्वं तदुक्तं ''चतुःश्लोकी चतुर्वेदबीजभूता न संशयः'' इति संहितोक्तेर्वर्णितं चैतदाद्यपद्यव्याख्याशतके। अप्राकृते तु 'अहमादिर्हि देवानां' अहं सर्वस्य प्रभव इत्यादिभगवदुक्तेरेवाहंभावोस्त्येवेति ज्ञेयम्। यत्प्रमाणमस्येति। यावानिति विवृतौ त्वप्रमेयत्वं भगवतो विदीर्येत ''नांतो न चादिर्न च संप्रतिष्ठा'' इति श्रीगीतोक्तेः। ''अनंतं ब्रह्म'' इति श्रुतेश्च भगवतः प्रमाणं नास्तीति गम्यते ( ३१ ) अथ सर्गादीनाह—''अहमेवासमेवाग्रे' इत्यनेन स्थानं ध्वनितम्। यदेतच्चेत्यनेन विसर्गो ध्वनितः। नान्यद्यत्सदसदित्यनेन विरोधो ध्वनितः। योवशिष्येतेत्यनेनाश्रयो ध्वनितः ( ३२ ) ऋते सत्यस्वरूपे ब्रह्मणि अर्थं प्रति भूभारहृतिं सन्मार्गप्रवृत्त्यादिप्रयोजनं प्रति यद्रामकृष्णादिरूपं 'प्रतियेत कार्यांते न प्रतीयेत तदात्मनो मे मायां लीलां विद्यादित्यनेनावतारानुचरितरूपेशकथा ध्वनिता। अनेनैवोतयोपि

ध्वनितास्तथाहि—ऋते शुद्धे आत्मन्यंतःकरणे यत्प्रतीयेतार्थमुद्दिश्य अन्यथा न प्रतीयेत तदात्मनो जीवस्य मीयते भावि शुभाशुभमनयेति मायावासना तां विद्यात् । सा च द्विधा । शुभाऽशुभा च प्रथमायां दृष्टांतो यथा भास इति । आभासस्सूर्यादिस्तद्वत्प्रकाशकर्त्रीत्यर्थः । द्वितीयायां यथा तम इति । तमोवद्दुःखहेतुरित्यर्थः ( ३३ ) यथा महांति भूतानि भूतेषु सर्वदेहेषु प्रविष्टानि देहरक्षणार्थं तत्र स्थितानि तेषां विनिर्गमे देहे स्वधातुविगमे तु विशीर्य्यंत इत्युक्ते र्देहनाशश्रवणात् । अनेन पोषणमुक्तम् । अप्रविष्टानीति । मुख्यप्रवेशासंभवादुक्तम् । अत्र भूतपदेन भौतिकमपि ज्ञेयं कारणस्य कार्यस्यापि लक्षकत्वात् । तेन मन्वंतरं लक्ष्यते सर्वेषां मन्वादीनां भौतिकत्वात् । तथा तेषु न तेष्वहमित्यनेनासंगत्वकथनेन स्वस्य नित्यमुक्तत्वं सूचितमिति मुक्तिरुक्ता । यद्वा जीवरूपेण प्रविष्टोपि स्वरूपेणप्रविष्ट एवेत्यर्थः ( ३४ ) 'एतावदेव जिज्ञास्यम्' इत्यनेनाश्रयश्रवणजिज्ञासादावश्यं यतितव्यमित्युक्तम् । अन्वयव्यतिरेकाभ्यामित्यादिनाप्याश्रय एवोक्तः । "अन्वयव्यतिरेकेण जाग्रत्स्वप्नसुषुप्तिषु । मायामयेषु तद्ब्रह्मजीववृत्तिष्वपाश्रयः" इति द्वादशे वक्ष्यमाणत्वात् ( ३५ ) एतत्फलमाह—एतन्मतमिति श्रीहरिं स्वेष्टदेवं च नत्वा तस्य कृपावशात् । मूलभागवतव्याख्यां कुर्वे गुर्वनुमोदितः (१) श्रीमन्नारायणो "वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहम्" इत्यादिभिः सर्ववेदकृत्सर्ववेदांतसारं श्रीमद्भागवतं ब्रह्मणे उपदिशंस्तत्र वक्तव्यार्थसंग्रहं कुर्वंस्तं ग्राहयितुं ब्रह्माणं सम्मुखीकरोति । ज्ञानमिति । न च भागवतस्य वेदांतसारत्वे प्रमाणाभाव इति वाच्यम् । "सर्ववेदांतसारं यद्ब्रह्मात्मैकत्वलक्षणम् । वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम्" इति तत्रैव निर्देशात् । तत्र भागवतस्य सर्ववेदांतसारत्वं प्रतिज्ञाय तदापादनायैव हेतुगर्भितं विशेषणमाह—ब्रह्मात्मैकत्वलक्षणमिति । अत ब्रह्मशब्देन मायोपहितः सर्वज्ञत्वसर्वेश्वरत्वसर्वनियंतृत्वादिधर्मविशिष्टः परमात्मा तत्पदवाच्य आत्मशब्देन चाविद्याद्युपहितोऽल्पज्ञत्वादिगुणविशिष्टो जीवात्मा त्वंपदवाच्यः तयोः श्रुतिसिद्धैक्यस्य विरोधेनानुपपत्तौ [illegible] त्रचामरादिविशिष्टस्य तद्देशकालदंडकमंडल्वादिविशिष्टेनैक्यानुपपत्त्या विरुद्धांशपरित्यागेनाविरुद्धदेवदत्तपिंडाभेदबोधवद्विरुद्धमायाऽविद्याद्युपाधिसर्वज्ञत्वाऽल्पज्ञत्वादिधर्मरूपांशौ विहाय सच्चिदानंदस्वरूपात्मकत्वलक्षणमैक्यं जहदजल्लक्षणया लक्षयतीति तथा । ननु जहदजहल्लक्षणात्मैक्यसिद्धावप्युपाध्यवशेषान्नाद्वैतपर्य्यवसानं तत्राह—वस्त्वद्वितीयं तन्निष्ठमिति । न हि लक्षणयैक्यं बोधयच्छास्त्रमुपाधिं पृथगवस्थाप्यैक्यं बोधयति येनैवमाशंक्येत किंतु "नेह नानास्ति किंचन" इत्यादिनोपाधींस्तदधीनतद्धर्मादि निखिलद्वैतमपबाध्य यदद्वितीयं वस्तु तदेकनिष्ठं भवतीति च । तथा च वेदांतेषु श्रूयमाणसर्वोपास्तीनां चित्तैकाग्र्यद्वारा ब्रह्मविद्यैकपर्य्यवसायितया ब्रह्माद्वैतविद्यैकनिरूपकश्रीमद्भागवतस्य सर्ववेदांतसारत्वमुपपन्नं विषयतः सारत्वमुक्त्वा फलतोपि सारत्वमाह–कैवल्यैकप्रयोजनमिति । ननु ब्रह्मावबोधस्य "ब्रह्मविदाप्नोति परं, ब्रह्म वेद ब्रह्मैव भवति, यं एष वेद विष्णुरेव भवति" इत्यादिश्रुतौ ब्रह्मावाप्तिफलश्रवणात्कथं फलांतरोक्तिरिति चेन्न । नित्यमेव प्राप्तं ब्रह्म तस्य मायाऽविद्याद्युपाधिकल्पितभेदभ्रममंतरेणाप्राप्त्यसंभवाद्बोधेन भेदभ्रमबाधद्वारा कैवल्यमृते प्राप्त्यन्तरासंभवात् । कैवल्यस्यैव ब्रह्मावाप्तिशब्दार्थत्वं यन्मे मत्स्वरूपविषयं परमगुह्यं ज्ञानं तदंगं साधनकलापं च मया गदितं गृहाणेत्यन्वयः । तत्र यज्ज्ञानं कर्मविषयं तद्वैदिकमपि न गुह्यं "ब्राह्मणो यजेत्" इत्यादौ बाह्याध्यस्तब्राह्मणत्वादिजातिमद्देहादिपुरस्कारेण तत्प्रवृत्तेः "प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म" इत्यादिभिरदृढत्वश्रवणाच्च । उपाधिविविक्तिकेव प्रत्यक्स्वरूपविषयज्ञानमांतरत्वाद्गुह्यं ब्रह्माभेदज्ञानं तु परमगुह्यं तदप्युक्तं "कैवल्यं सात्त्विकं ज्ञानं मन्निष्ठं निर्गुणं स्मृतम्" इति । तत्र सत्त्वस्याभानान्यथाभानप्रयोजकत्वाभावेनाध्यासानापादकत्वादुपाधिविविक्तज्ञानं सात्त्विकं ब्रह्मात्मावबोधं विना विवेकाज्ञानमात्रेण गुणबाधानुपपत्त्या न निर्गुणं मत्स्वरूपे आत्मत्वनिष्ठारूपं मन्निष्ठं तु मायागुणबाधकत्वान्निर्गुणमित्यर्थः । किं भूतं तज्ज्ञानं तत्राह—विज्ञानसमन्वितमिति विशेषेण प्रमेयगतसंशयनिरासेन ज्ञायते स्वरूपं येन तद्विज्ञानं मननं फलोपकार्य्यंगं तेन समन्वितं रहस्यं निदिध्यासनाख्यं ध्यानं तत् द्विविधं यत्नसाध्यमयत्नसाध्यं च । तत्राद्यं साक्षात्कारात्पूर्वं स्मरणभक्त्यंतःपातितया साधनरूपम् । द्वितीयं तु ज्ञानिनस्तस्य कार्यं न विद्यते इत्यादिना कर्तव्यप्रवृत्त्यनुपपत्त्या यत्नं विनैव स्वाभाविकजीवन्मुक्तिदशायां स्वरूपानुसाधनं "ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् इत्यादिवाक्यसिद्धं पराभक्तिरूपं तेन सहितं तदंगं साधनजातं च । ननु भगवद्गदितज्ञानग्रहणाय नाहं समर्थस्तत्राह—यावानिति । यावान् विभुसच्चिदानंदैकरससर्वांगः तथा यथाभावः परमार्थसद्रूपः । यद्वा यथा स्वभक्तेषु वात्सल्यादिभावो यस्य स तथा । यद्वा यथा नृत्यादौ नेत्रकरचालनादिभावो यस्य स तथा । ननु स्वरूपस्य भवतु वेद्यत्वं करचलनादिकर्म्मणां तदतिरिक्तत्वेन "अतो न्यदार्तम्" इत्यादिश्रुत्या वेद्यत्वाभाव इत्याशंक्याह—'यद्रूपगुणकर्मकः' इति । यस्य रूपाणि स्वरूपाण्येव गुणाः कर्म्माणि च यस्य स तथा तथा । च भगवद्गुणानां कर्म्मणां च स्वरूपात्मकत्वेननावेद्यत्वाभाव एवेति भावः । एवं यादृक् मत्स्वरूपं तथैव तत्त्वविज्ञानं परमार्थं वस्त्वपरोक्षं ते मदनुग्रहादेवास्तु "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इत्यादि श्रुतौ गुर्वीश्वरभक्तानां तयोरनुग्रहाज्ज्ञानलाभाध्यवसायेपि तव तु गुरुरिष्टदेवश्चाहमेवेति मदनुग्रहादेवास्तु एवमनुग्रहाधीनतत्त्वज्ञानोत्पत्त्युक्त्या "वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम् ॥ मद्भक्तिविमुखानां हि शास्त्रगर्तेषु मुह्यताम् । न ज्ञानं न च मोक्षः स्यात्तेषां जन्मशतैरपि" इत्यादिवाक्यशतैः "यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः" इत्यादिना स्वप्रभावलेशमात्रेण सर्वसाधन-

संपादिका । "या या साधनसंपत्तिः पुरुषार्थचतुष्टये । तया विना तदाप्नोति नरो नारायणश्रयः" इत्यादिना सर्वसाधनप्रतिरूपतयाऽभिषिक्ता साधनस्वरूपा नवधा भक्तिरनुग्रहाविर्भाविका मुख्यं ज्ञानोत्पत्तिसाधनमिति ज्ञापितम् । "ज्ञानकारणसामग्र्यां भक्तिरेव गरीयसी" इति श्रीभगवत्पूज्यपादोक्तेः । "नियुज्यमानया भक्त्या भगवत्यखिलात्मनि । सदृशोऽस्ति शिवः पंथा योगिनां ब्रह्मसिद्धये" इति श्रीकपिलोक्तेश्च एवं तत्त्वज्ञानाद्ब्रह्माणं संमुखीकृत्य स्वानुग्रहात् तत्प्राप्तिं संभाव्यास्त्विति वरदानेन तस्मिंस्तद्ग्रहणशक्तिमाधाय तत्त्वमेवाह—अहमेव सच्चिदानंदविग्रहः स्वरूपात्मकधामोपकरणपरिषदादिरूपः "सत्यात्मप्राणानाम्" इत्यादिश्रुतिसिद्धस्तवापरोक्षः सत्त्वस्य मन्नियम्योपाधेरभानान्यथाभानाप्रयोजकतया शुद्धस्वरूपभूतः सर्वाधिष्ठानात्मकएवाग्रे सर्गोत्पूर्वभासं श्रूयमाणमच्छब्दस्यानुपपत्तिमंतरेणार्थांतरकल्पनानुपपत्तेः सर्गादग्रे कार्य्यस्य कारणाव्यतिरेकेण प्रतीतेरप्यभावान्ममैव सर्वकारणत्वादहमेवासमिति भावः । "आत्मा वा इदमेक एवाग्र आसीत्" इति श्रुतेः । न चाग्रे इति पदेन कालसद्भावप्रतीतेरेवकारानुपयोग इति वाच्यम् "कालोऽस्मि लोकक्षयकृत्प्रवृत्तः" इति भगवद्वचनात्तस्य तदनतिरेकात् । किं च सुषुप्तौ अज्ञानावृतस्वरूपातिरिक्तकालभानेऽपि समुत्थितस्य कालवासनाविष्टतया 'तदा सुखमस्वाप्सं न किमप्यवेदिषम्' इति तदाशब्देन कालपरामर्शस्य दर्शनवत्तदुक्त्युपपत्तेः । उक्तं च वृद्धैः "कालाभावे पुरेत्युक्तिः कालवासनया युतम् । शिष्यं प्रत्येव तेनात्र द्वितीयं न हि शंक्यते" इति । किं चाग्रे इति पदस्य पूर्वत्ववाचित्वेपि कालवाचित्वाभाव एवेति न तच्छंकावकाशः न च पूर्वत्वाभिधाने भूतत्वप्रतीतेः कथं कालं विना भूतत्वादिव्यवहार इति वाच्यम् । कालमस्वीकुर्वतामपि सांख्यानां भूतभविष्यदादिव्यवहाराबाधात् । ननु कथं सद्रूपविष्णोरेव पूर्वसत्त्वमुच्यते यतः "असद्वा इदमग्र आसीत्, असदेवेदमग्र आसीत् । तत्सदासीत तद्धैक आहुः, असदेवेदमग्र आसीत्" इति श्रुतिषु असत्पूर्वकत्वश्रवणात् "तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यामेव व्याक्रियते" इत्यत्र चाकर्तृकैव सृष्टिः श्रूयते तत्राह—आसमेवेति न आसमिति न न चोदाहृतश्रुतिविरोधः । "समाकर्षात्" इति सूत्रे भगवद्व्यासेन तद्विरोधपरिहारस्य दर्शितत्वात् । तथाहि—"असद्वा इदमग्र आसीत्" इति नासत्कारणत्वविवक्षा । "असन्नेव स भवति असद्ब्रह्मेतिवेद चेत् । अस्ति ब्रह्मेति चेद्वेद संतमेनं ततो विदुः" इत्यसदपवादेन सत एव ब्रह्मणोऽन्नमयादिगुहांतःस्थत्वेन प्रत्यक्त्वमुक्त्वा "सोऽकामयत्" इति समाकृष्य ततः सृष्टिं निरूप्य "तत्सत्यमित्याचक्षते" इत्युपसंहृत्य तत्रैवेमं श्लोकमाह—असद्वा इति अत्रासच्चेदभिप्रेतं स्यात्तदान्यं समाकृष्यान्योक्तौ वाक्यमसंबद्धं स्यात्तस्मादव्यक्तनामरूपतया सूक्ष्मत्वेन दुर्लक्ष्यं असदित्युपचर्य्यते "असदेवेमग्र आसीत्" इत्यत्रापि "तत्सदासीत्" इति समाकर्षादियमेव गतिः । "तद्धैक आहुरसदेवेदमग्र आसीत्" इत्यत्रापि न अत्यन्तासत्त्वोक्तिर्भ्रान्तिकल्पनानुवादेन श्रौतप्रत्यक्षदार्ढ्यमेव "तद्धेदं तर्ह्यव्याकृतमासीत्" इत्यत्रापि नाहेतुव्याकृतिः "सर्व एव इह प्रविष्टः" इति व्याकर्तुः प्रविष्टत्वेन समाकर्षात् । व्याकर्तुरभावे कमाकृष्येत चेतनस्यैवायं प्रवेशः "पश्यंश्चक्षुः शृण्वञ्श्रोत्रम्" इति चेतनत्वोक्तेः । अनेन जीवेनात्मनाऽनुप्रविश्य "नामरूपे व्याकरवाणि" इति श्रुत्यंतरेपि व्याकृतेश्चेतनहेतुत्वदर्शनात् लूयते क्षेत्रं स्वयमेवेतिवद्व्याक्रियते इत्यत्रापि सत्येव कर्तर्य्युपपत्तेश्च । एवकारव्यावृत्तिमाह—नान्यदिति । "नान्यत्किंचन मिषत्" इति श्रुतेः । मिषादिति चलं नश्वरमित्यर्थः । अन्यच्छब्दार्थमेव विवृणोति यत्सदसत्परमिति । सत् स्थूलम् असत्सूक्ष्मं परं तयोः कारणं चेत्यर्थः । न च भवतु स्थूलसूक्ष्मयोरभावः "नासदासीन्नो सदासीत्" इति श्रुतेः । "तम आसीत्" इति श्रुते कथं कारणाभावोक्तिरिति वाच्यम् । 'नोसदासीत्तम आसीत्' इत्यत्र तमसः सत्त्वप्रतिषेधादासीदिति प्रयोगस्यैवानुपपत्तेः । सद्योगात्तमसः सत्त्वं न स्वतस्तन्निषेधनात्" इति वृद्धोक्तेः सत्त्वनिषेधेन स्वतस्तत्प्रयोगानुपपत्तावपि सदधिष्ठानाध्यासिकसंबंधेन तत्सत्तयैवासीदिति प्रयोगसंभावनायामपि तच्छक्तित्वेनैव तदन्यत्वानन्यत्वाभ्यामनिर्वचनीयतया नान्यदिति भगवदुक्त्यनुपपत्त्यभावात् । न हि वह्नेः शक्तिस्तदन्या तत्पार्थक्येन तत्सत्तास्वरूपाभानात् । नापि वह्निरेव तच्छक्तिस्तथात्वे शक्तिशक्तिमद्भावानुपपत्तेरेकस्मिन्नाधाराधेयभावस्य वक्तुमशक्यत्वात्प्रतिबंधकमणिमंत्रादिसंनिधौ वह्निस्वरूपसमवधानेऽपि स्फोटाख्यकार्य्यादर्शनेन तत्प्रतिरोधदर्शनात् । न चान्यत्वानन्यत्वतदुभयात्मकत्वशक्तेर्विरोधात् मिथोभावः भावरूपयोस्तयोरेकाधिकरणत्वासंभवात्तस्मादन्यत्वानन्यत्वतदुभयात्मकत्वैर्निर्वक्तुमशक्यैव शक्तिः । तथैव तमोरूपासतः शक्तिरप्यनिर्वचनीयतया न तदन्यासीत् । किं च सतः शक्तेस्तदनन्यत्वासंभवेनैव न सत्त्वं कार्य्यदर्शनेन च नासत्यं विरोधाच्च । नोभयात्मत्वमिति सत्त्वासत्त्वान्यत्वानन्यत्वतदुभयात्मत्वेभ्योनिर्वचनीयतया शक्तेर्मिथ्यात्वेन तत्कार्य्यस्याप्यनिर्वचनीयतया मिथ्यात्वात्तदा तदनुद्भवाच्च नान्यादासीदित्यभिप्रायः । नन्वनिर्वचनीयत्वेन मायाया जगतश्चानिर्वचनीयतयोक्तौ भवन्मते ब्रह्मणोप्यनिर्वचनीयतया मिथ्यात्वापत्तिस्तथा च ब्रह्मापि मिथ्या अनिर्वचनीयत्वादिति प्रयोगापत्तिरिति चेत् । न । अत्र ब्रह्मापीत्यपिशब्देन सर्वप्रपञ्चस्यापि पक्षांतःपातितया हेतोरनुपसंहारित्वापत्तेः । अन्वयव्यतिरेकदृष्टांतरहितो ह्यनुपसंहारी सर्वस्य पक्षत्वे तदितरदृष्टांतालाभात् । अपिशब्दानुक्तावपि शब्दब्रह्मादाय सिद्धसाधनता चेतनविशेषणेपि ब्राह्मणाद्यादाय सिद्धसाधनत्वम् परत्वविशेषणेऽपि मायोपहितकारणब्रह्मादाय सिद्धसा धनम् । सिद्धसाधनताया अदूषकत्वम् । अनधिगतार्थगमकस्यैव प्रमाणत्वेन सिद्धस्यानधिगतत्वाभावात् । तत्साधकस्य प्रमाणत्वा- नुपपत्तेः । संदिग्धसाध्यवान्हिपक्षः साध्यस्य तत्र सिद्धत्वे निश्चितसाध्यवान् स पक्ष इति तल्लक्षणापत्त्या पक्षत्वानुपत्तेस्त'दसिद्धौ च पक्षस्यैव हेत्वाश्रयतया हेतोराश्रयासद्ध्यापतिश्च किं चात्र ब्रह्मशब्देनास्मदभिमतस्वरूपं प्रतीयते न वा ? । नान्त्यः पक्षस्वरूपाभानेप्याश्रयसिद्ध्या हेतुसाध्यादिसमर्थनानुपपत्तेः । नाद्यः ब्रह्मशब्देन तत्प्रतीतौ ब्रह्मशब्दगोचरत्वेनैवा-

निर्वचनीयत्वहेतोरसिद्ध्या शब्दोऽनित्यश्चाक्षुषत्वाद्धटवदित्यादिवत्पक्षे हेत्ववर्तनलक्षणस्वरूपासिद्ध्यापत्तेः। किं च ब्रह्मणोऽपि मिथ्यात्वं वदता किंचित्स्वीक्रियते न वा स्वीक्रियते चेत्तज्जडं चिद्वा जडं चेत्तस्य स्वतः सिद्धत्वानुपपत्त्या तत्सिद्ध्यै चित्स्वीकारापत्तेः चिच्चेत्सिद्धं न समीहितं सच्चिदैकसिद्ध्यै वाद्वैतवादिनामिष्टसिद्धेः। नाम्न्येव विवादो न वस्तुनि न स्वीक्रियते चेन्निरधिष्ठानारोपासिद्ध्या ब्रह्मणो मिथ्यात्वासिद्धिः। किं च मिथ्यात्वशब्देनासत्यत्वमभिप्रेयते। सद्विलक्षणत्वं वा ?। सदसद्भ्यामनिर्वचनीयत्वं वा ? नाद्यद्वितीयौ। तथात्वे तुच्छत्वापत्त्या प्रत्यक्षेणावभासमानशुक्तिरूप्यस्वप्नप्रपंचादौ तदसंभवेन दृष्टांते साध्यवैकल्यं ततश्च व्याप्तसिद्धिः। हेतुसत्त्वे साध्यसत्त्वमन्वयव्याप्तिः। साध्यभावे हेत्वभावो व्यतिरेकव्याप्तिः। अत्र तु यत्र यत्र स्वप्नादौ अनिर्वचनीयत्वं हेतुस्तत्र प्रत्यक्षत्वेन तुच्छत्वाभाव इति नान्यव्याप्तिस्तथा तत्रैव स्वप्नादौ तुच्छत्वसाध्याभावेप्यनिर्वचनीयत्वहेतुसद्भावान्न व्यतिरेकव्याप्तिः। अत एव निश्चितसाध्याभाववद्विपक्षवृत्तित्वेन साध्याभाववद्वृत्तिर्हेतुः साधारणानैकांतिक इति। सव्यभिचारपर्य्यायसाधारणासाधारणानुपसंहारित्रिविधानैकांतिकांतःपातिसाधारण्यं च शशशृङ्गादौ निश्चिततुच्छत्वसाध्यवत्ति सपक्षे चानिर्वचनीयत्वहेतोरवृत्तेः विपक्षमात्रवृत्तितयासाध्याभावता हेतुर्विरुद्ध इति। साध्याभावोपादकत्वेन विरुद्धता च तृतीये तु सदसद्भ्यामनिर्वचनीयत्वस्य साध्यत्वे तस्यैव हेतुत्वेन हेतोः साध्यावैशेष्यं तथा च साध्यस्य पक्षे संदिग्धतया हेतोरतिसंसिग्धासिद्धतयास्वरूपासिद्धिरेव पक्षत्रयेऽपि तत्त्रिविधविकल्पितसाध्याभावस्य सत्यत्वस्य ब्रह्मणि पक्षे "सत्यं ज्ञानमनंतं ब्रह्म, तदेवर्त्तं तदुसत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्" इत्यादिश्रुतिभिर्बोधनात् यस्य साध्याभावः प्रमाणांतरेण बाधितः स बाधित इति बाधलक्षणसद्भावाद्बाधश्च। किंचानिर्वचनीयत्वं किं नाम सदसद्भ्यामनिर्वचनीयत्वं वा ? शब्दजन्यज्ञानाभास्यत्वं वा ? आद्ये उदाहृतश्रुत्यैव पक्षे ब्रह्मणि सत्यत्वाध्यवसायात्स्वरूपासिद्धिः। द्वितीये—सर्परूप्यादिशब्दजज्ञानभास्ये रज्जुसर्पशुक्तिरूप्यादौ घटपटादिशब्दजज्ञानभास्ये स्वप्नजाग्रद्धटादौ साध्यवति सपक्षे दृष्टांते साधनवैकल्यं तथा चोक्तरूपमिथ्यात्वसाध्याभाववति तुच्छे शशशृंगादौ विपक्षे तच्छब्दजज्ञानभास्ये चावर्तमानत्वे सति पक्षमात्रवृत्तित्वेन शब्दजज्ञानाभास्यत्वरूपानिर्वचनीयत्वहेतोः सपक्षविपक्षव्यावृत्तः पक्षवृत्तिरसाधारण इति लक्षणलक्षितासाधारण्यं च। न च शब्दजज्ञानाभास्यत्वे ब्रह्मणो वेदान्तवेद्यत्वानुपपत्तिः। वेदांतानां तद्गताज्ञानावरणबाधकत्वेनैव तदभासकत्वेपि तत्र प्रमाणत्वस्य तस्य च तज्जन्यज्ञानप्रयुक्ताज्ञानबाधफलभाक्त्वेनैव स्वप्रकाशत्वेनैव तदभास्यत्वेपि तद्वेद्यत्वस्य चोपपत्तेः। न च हेतौ विकल्पमनुद्भाव्यानिर्वचनीयत्वशब्दमात्रेण मिथ्यात्वापादनं तथात्वे स्वर्णं तु कुंडलादिभूषणोपादानं कनकशब्दवाच्यत्वात् धत्तूरवत्। धत्तूरफलं कंटकादिबहुमूल्यभूषणोपादानं कनकत्वात् स्वर्णवत्। सूर्यगभस्तयो दुग्धदोहा गोत्वाद्धेनुवत्। धेनवो न दुग्धदोहा गोत्वाद्गभस्त्यादिवत् मंदारो जगदवभासकोऽर्कत्वात्सूर्यवत्। सूर्यो नावभासकोऽर्कत्वान्मंदारवत्। विष्णुर्न संसारतारको हरित्वात्कप्यादिवत्। कप्यादिस्तत्तारको हरित्वाद्विष्णुवदित्याद्याभाससमत्वापातात्। जडत्वपरिच्छिन्नत्वादयश्चात्रोपाधयः। साध्यव्यापकत्वे सति साधनाव्यापको हि उपाधिः यत्रयत्र हेतुस्तत्रतत्र साध्यमिति व्याप्तौ व्याप्तिनिरूपकं व्यापकं साध्यं व्याप्त्याश्रयो व्याप्यो हेतुस्तदेव लिंगं साध्यव्यापकत्वं च सर्वसाध्यवत्सु नियमेन वर्तमानत्वं साधनाव्यापकत्वं कचित्साधनवति वर्तमानत्वेपि सर्वत्र साधनवत्सु नियमेनावर्तमानत्वं जडत्वपरिच्छिन्नत्वादयश्च मिथ्यात्वसाध्यवति सर्वत्र व्यापकत्वेन साध्यव्यापकत्वेपि पक्षे वर्तमानत्वाऽभावात्साधनाव्यापकत्वादुपाधयः। न च स्वप्नाकाशादौ तत्र स्वप्तृपुरुषेषु चापरिच्छिन्नत्वचेतनत्वाभ्यां सति मिथ्यात्वे साध्ये परिच्छिन्नत्वजडत्वयोरभावात्साध्याव्यापकत्वमिति वाच्यम्। स्वप्नाकाशादौ देशपरिच्छेदासंप्रतिपत्तावपि वस्तुपरिच्छेदसंप्रतिपत्तेः सुप्तपुरुषदेहादौ जडत्वसंप्रतिपत्तेश्च। तदात्मनश्चेतनस्य जडत्वाभावेपि तत्र ब्रह्माभेदेन मिथ्यात्वासंप्रतिपत्त्यासाध्यासत्त्वेन तदव्यापकत्वाभावात् ब्रह्म परमार्थसत्यं चिद्रूपत्वाद्व्यतिरेके मिथ्यारूप्यादिवदिति प्रतिपक्षानुमानपराहतत्वं च। न चास्य केवलव्यतिरेकिणः साध्यस्य पक्षे प्रसिद्धौ अनुमानी प्रवृत्तिरन्यत्र प्रसिद्धौ तत्र हेतुसत्त्वे अन्वयव्याप्तिसद्भावेन व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकीति लक्षणकेवलव्यतिरेकित्वभंगः अप्रवृत्तौ सपक्षव्यावृत्तत्वेनासाधारण्यमिति सर्वथा साध्याप्रसिद्धिरेवेति वाच्यम्। सद्विलक्षणत्वं कचिदत्यंताभावप्रतियोगिधर्मत्वाद्रूपवदित्यनवधारितधर्मिकसत्यत्वसिद्धौ केवलव्यतिरेकिणा पक्षे स्थापनोपपत्तेः। न च प्रमेयत्वादिषु व्यभिचारस्तेषु धर्मत्वहेतुसत्त्वेपि कचिदत्यंताभावप्रतियोगित्वाभावात् सर्वं प्रमेयं सर्वमभिधेयं सर्वं व्यावृत्तमित्यंगीकारादितिवाच्यम्। "अप्रमेयमनादि च, यतो वाचो निवर्तंते, यद्वाचा नाभ्युदितम्" इत्यादिभिस्तेषामत्यंताभावस्य ब्रह्मणि श्रुत्यैवापादनात्। किं च प्रमेयत्वं प्रमेयत्वे वर्तते न वा ?। आद्ये आत्माश्रयो द्वितीये—स्वस्मिन्नेवात्यंताभावप्रतियोगित्वेन केवलान्वयित्वक्षतिः। अपि च प्रत्येकप्रमाविषयत्वं प्रमेयत्वं केवलान्वयि सर्वप्रमाविषयत्वं वा नोभयथापि घटप्रमाविषयत्वस्य पटे पटप्रमाविषयत्वस्य घटे सर्वप्रमाविषयत्वस्य सर्वत्र घटपटादावत्यंताभावेन केवलान्वयित्वानुपपत्तेः। एवमभिधेयत्वादावप्यूह्यं तथा च प्रमेयत्वादिकेवलान्वयित्ववादिनां कुतार्किकाणामेव साध्याप्रसिद्ध्या केवलव्यतिरेक्यसंभवो नोपनिषदानाम्। न च साध्यव्याप्तहेतोः पक्षधर्मताज्ञानलक्षणालिंगपरामर्शस्यैवानुमानत्वेनात्र केवलव्यतिरेकिणि हेतुसाध्यव्याप्तिस्थलाभावेन तद्व्याप्त्यसिद्ध्यापरामर्शासंभव इति वाच्यम्। अन्वयिन्यन्वयव्याप्तिवद्व्यतिरेकिणि व्यतिरेकव्याप्तहेतोरेव साध्यगमकत्वात्। न च हेतुना साध्यसिद्धौ

१. पक्षत्वासिद्धौ।

साध्याभावहेत्वभावव्याप्तेरनुपयोग इति वाच्यम् । यत्र साध्याभावस्तत्र हेत्वभाव इति विपक्षे व्याप्तिमुदाहृत्य न तथा चायं तस्मान्न तथेत्यत्र तदभावोक्त्या अभावाभावस्य भावत्वेन हेतुसाध्यव्याप्तावेव तत्पर्यवसानात् । न चैतादृक्स्थलेऽर्थापत्तिरेव मानमिति वाच्यम् । यथोपयोगयोरुभयोरपि मानत्वोपपत्तेः । एवं सर्गात्पूर्वं स्वसत्त्वमुक्त्वा विसर्गोपि तदाह—पश्चादिति । पश्चाद्विसर्गावसरे ब्रह्मादिरूपेणापि अहमेव तदाप्युक्तं "त्वमेक एवास्य सतः प्रसूतिस्त्वं संनिधानं त्वमनुग्रहश्च । त्वन्मायया संवृतचेतसस्त्वां पश्यंति नाना न विपश्चितो ये ॥ सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते । स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः" इत्यादिना यद्वा पश्चात् प्रपंचस्य लयोत्तरमप्यहमेव "सर्वाणि च भूतानि नारायणादेव समुत्पद्यंते नारायणे प्रलीयंते" "नष्टे लोके द्विपरार्द्धावसाने महाभूतेष्वादिभूतं गतेषु व्यक्तंव्यक्तं कालवेगेन याते भवानेकः शिष्यते शेषसंज्ञः" इत्यादिश्रुतिस्मृतिभ्यः यच्चैतन्मध्ये परिदृश्यमानं तदप्यहमेव कार्य्यस्य कारणाव्यतिरेकात् "एतदात्म्यमिदं सर्वं नारायण एवेदं सर्वं यद्भूतं यच्च भाव्यं पुरुष एवेदं विश्वं सर्वमिदं पुराणः यस्मिन्निदं संचविचैति सर्वे यस्मिन्देवा अधि विश्वे निषेदुः तदेवभूतं तदुभव्यमाहुः इदं तदक्षरे परमे व्योमन् यथा सौम्ये केन मृत्पिंडो न सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादिश्रुतिभ्यः । "न यत्पुरस्तादुत यन्न पश्चान्मध्येपि तन्न व्यपदेशमात्रम् । भूतं प्रसिद्धं च परेण यद्यत्तदेव तत्स्यादिति मे मनीषा ॥ सर्वेषामिह भावानां भावार्थो भवति स्थितः । तस्यापि भगवान्कृष्णः किमतद्वस्तु रूप्यताम् ॥ आत्मैकतदिदं विश्वं सृज्यते सृजति प्रभुः । त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ॥ यदिदं मनसा वाचा दृश्यतेऽन्यैरपींद्रियैः । अहमेवं न मत्तोऽन्यदिति बुद्ध्यध्वमंजसा" इत्यादिस्मृतिभ्यः । "तदनन्यत्वमारंभणशब्दादिभ्यः" इति सूत्राच्च । तथा [illegible] "नेह नानास्ति किंचन, अथात आदेशो नेतिनेति" इत्यादि श्रुतिभिः प्रतीतिमात्रसर्वप्रपञ्चबाधे योऽवशिष्येत सोऽहमेवास्मि "अंतर्भवेऽनंतभवंतमेव ह्यतत्यजन्तो मृगयंति सन्तः । असंतमप्यंत्यहिमंतरेण संतं गुणंतं किमु यन्ति संतः ॥ श्रुतयस्त्वयि हि फलं त्यतन्निरसनेन भवन्निधनाः । निषेधशेषो जयतादशेषः ॥ एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदा । मायामात्रमनूद्यांते प्रतिषिध्य प्रसीदति" इत्यादिस्मृतिभ्यः निषेधे कृते नेतिनेतीति वाक्यैः "समाधिष्ठितानां यदाभाति पूर्णमवस्थात्रयातीतमद्वैतमेकम् । परंब्रह्म नित्यं तदेवाहमस्मि" इत्यादिवचनाच्च ॥ ३ ॥ ननु त्वत्स्वरूपातिरिक्तं किंचिन्नास्ति चेत् किमिति प्रपंचो भाति न भाति चानंदविग्रहो भवानित्याशंक्याह—ऋतेऽर्थमिति । यद्विश्वमर्थम् । ऋते वस्तुतो नास्ति तद्यतः स्वरूपाज्ञानादात्मन्यधिष्ठाने प्रतीयेत यच्च सच्चिदानंदानंतविग्रहं मत्स्वरूपं तद्यतो न प्रतीयेत तदधिष्ठानस्यान्यथाभानहेतुविक्षेपशक्तिप्रधानमधिष्ठानमत्स्वरूपाभानहेतुभूतमावरणशक्तिप्रधानमज्ञानमात्मनो मम मायां विद्यात् । तत्रार्थाभावेपि भाने दृष्टांतो यथा भासो द्विचंद्रादिः आवरणेनाधिष्ठानभगवत्स्वरूपाभाने दृष्टांतो यथा तमो राहुर्नक्षत्रमंडले वर्तमानोऽपि न प्रतीयते । यद्वा । तस्य स्वत एवाभानात्मकस्य नावरणकृत्यमतो यथा अतमाः सूर्यो मेघाच्छन्नस्तन्मेघं विश्वं च भासयन्नपि स्वयं सामान्येन प्रकाशमानोऽपि न विशेषतो भाति पेचकादीनां स्वीयेनैव दिवांधत्वदोषेणावृत इव न भाति । यद्वा । यद्विश्वमर्थम् ऋते तद्यतोऽज्ञानवशादात्मनि विश्वाधिष्ठाने प्रतीयेत अथ च सुषुप्तिप्रलयादौ कारणे लयेन स्वप्ने च कारणाज्ञानस्य प्रपंचांताराकारपरिणामेन क्षणेक्षणे चाज्ञानस्य पूर्वपूर्वभ्रमदृष्टसंस्कारोद्बोधे तत्तद्विषयांतराकारपरिणामेन ब्रह्मावबोधे तु सकारणबाधेन यत् विश्वं न प्रतीयेत तदज्ञानं तत्कार्य्यं चात्मनो मम मायां विद्यात् । तत्र दृष्टांतो यथा भासो रज्जुसर्पशुक्तिरजतादि च यद्वदर्थम् ऋते प्रतीयेताथ चान्यत्र प्रवृत्तौ वा दंडमालाभ्रकरंगादिभ्रमांतरोद्बोधे वा बाधेव वा न प्रतीयेत यथा च तमोनभोनीलिमा ऋतेर्थं प्रतीयेत तत्तद्दिक्प्रांतेऽसंनिधाने प्रतीयमानोपि तत्तद्देशगमनेन प्रतीयेत तद्वत् । यद्वा । आत्मनि स्वप्नदृशि यथा भासः स्वप्नप्रपंचो यथा तमो निद्रा ज्ञानं चार्थम् । ऋते प्रतीयेताथ प्रबोधेन प्रतीयेत यश्च तदधिष्ठानमात्मा स न प्रतीयेत तथात्मनि मयि यद्विभुं यतोऽज्ञानतमसः प्रतीयेताथ च लयबाधादौ न प्रतीयेत तदधिष्ठानं मत्स्वरूपं च यद्यतो न प्रतीयेत तदज्ञानमात्मनो मम मायां विद्यात् । "तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नासमस्तधिषणं पुरु दुःखदुःखम् । त्वय्येव नित्यसुखबोधतनावनंते मायात उद्यदपि यत्सदिवावभाति ॥ "आत्मानमेवात्मतयाऽविजानता तेनैव जातं निखिलं प्रपंचितम् । ज्ञानेन भूयोऽपि च संप्रलीयते रज्ज्वामहेर्भोगिभवाभवौ यथा । अज्ञानसंज्ञौ भवबंधमोक्षौ द्वौ नाम नान्यौ स्त ऋतज्ञभावात् । अजस्य चित्यात्मनि केवले परे विचार्यमाणे तरणाविवाहनी" न च कथं मायावादोऽत्र लिख्यते मायावादस्यासद्वादत्वप्रच्छन्नबौद्धत्वयोः स्मरणादिति वाच्यम् । तद्बोधकवाक्यस्य प्रामाण्यानिश्चयात् । मायाया वादः कथनं मायावादस्तथा च तद्वाक्येऽपि मायोक्तिदर्शनात् । स्वासद्वादत्वबौद्धत्वाऽपादकस्यात्मघातिनस्तस्यासद्वादत्वादेव शास्त्रांतरादूषकत्वापत्तेः । किं च "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इत्यादिश्रुतौ "दैवी ह्येषा गुणमयी मम माया दुरत्यया । संभवाम्यात्ममायया । नाहंप्रकाशः सर्वस्य योगमायासमावृतः" इत्यादिगीतायाम् । "एषा माया भगवतः सर्गस्थित्यंतकारिणी" इत्यादौ श्रीमद्भागवते एवं सर्वत्र माया शब्दप्रयोगदर्शनात्सर्वश्रुतिस्मृतिपुराणेतिहासादिशास्त्रस्यासद्वादत्वापादनाय प्रवृत्तं स्वयमपि मायाशब्दकथनेन मायावादात्मकं तदेवासद्वादतया "त्यजेदेकं कुलस्यार्थे" इति न्यायेन हेयम् । न च मायया जगत्कारणत्ववाद एव मायावाद इति वाच्यम् । उदाहृतश्रुतिस्मृत्यादौ सर्वत्र तथोपलंभात् । किं च तद्वाक्यस्य प्रामाण्येऽपि सर्वाविरुद्धोयमेव विचारो न्याय्यः । यथा ब्रह्मसत्यत्ववादिन

एव ब्रह्मवादिनस्तथा मायाकारणत्वस्य सर्वत्र श्रूयमाणस्य तत्तच्छास्त्रेभ्यो निःसारणासंभवात्सर्वप्रामाण्यास्वीकारे च नास्तिकत्वापत्तेर्ये मायायाः सत्यत्ववादिनस्त एव तत्पक्षपातितया मायावादिनस्तेषां मतस्यैव पुनर्मिथ्याभूतमायायां सत्यत्वभ्रमेणासद्वादत्वमायातत्कार्य्यसत्यत्वापादनेन सर्ववेदांतप्रतिपाद्यस्य "अथ नित्यो निष्कलो निराख्यातो निर्विकल्पो निरंजनः शुद्धोऽद्वितीयो नारायणो न द्वितीयोऽस्ति कश्चित्" इत्यादि श्रुतिसिद्धाऽद्वैतस्य बाधनेनार्थात् बौद्धत्वेऽपि वाङ्मात्रेण वेदप्रामाण्यस्वीकारोक्त्या प्रच्छन्नत्वं "यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति । तस्याहं न प्रणश्यामि स च मे न प्रणश्यति" इति भगवतैवापरिच्छिन्नदृष्टीनां स्वनाशाभावोक्त्या परिच्छिन्नमतीनां "विष्ल़ व्याप्तौ" इत्यस्मात्सर्वव्यापकस्य विष्णोः सर्वतो नाशेनैकत्र परिच्छेदाभिमत्या स्वद्वेष्यत्वबोधनादतो मायासत्यत्वाद एव मायावादो न तन्मिथ्यात्ववादस्तेषां तन्मिथ्यात्वापादनेन तदपवादकत्वात् ॥ ४ ॥ ननु सर्वथा द्वैतप्रपंचस्य मायामात्रत्वेन मिथ्यात्वे "यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति, आनंदाद्ध्येव खल्विमानि भूतानि जायंते तस्माद्वा एतस्मादात्मन आकाशः संभूत आकाशाद्वायुः, अथ पुरुषोह वै नारायणोऽकामयत प्रजाः सृजेय नारायणात्प्राणो जायते मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापश्च पृथिवी विश्वस्य धारिणी" इत्यादिश्रुतिभिः "जन्माद्यस्य यतः" इति सूत्राच्च कथं तत्कारणत्वेनैव ब्रह्म निरूप्यते "तत्सृष्ट्वा तदेवानुप्राविशत्" इत्यादिना तत्प्रवेशोक्तिस्तत्राह—यथा महांति भूतानीति । यथा महांति भूतानि पंचीकृतमहाभूतानि उच्चावचेषु ब्रह्मादिस्तंबपर्य्यंतप्राणिदेहेषु ब्रह्माण्डादिघटांतेषु च पटादिषु तंत्वादिवत्तत्सृष्ट्वा तदनुप्रविष्टानि प्रतीयंते तथापि वस्तुतो यथासौम्यैकेन मृत्पिंडो न सर्वं मृन्मयं विज्ञातं "स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादिश्रुतिभ्यः । पटादीनां तंत्वादिस्वरूपातिरेकेण पृथक्सत्त्वाभावादेव कस्मिन् प्रविष्टानि स्वीक्रियेरन्निति तदप्रवेशवत् प्राणिदेहानां ब्रह्मांडादेश्च महाभूतात्ममात्रत्वेन वस्तुतस्तत्पृथक्—सत्त्वाभावात् स्पष्टं तथानुभवात् "क्षित्यादीनामिहार्थानां छाया न कतमापि हि । न संघातो विकारो वा न पृथङ् नान्वितो मृषा" इत्यादिवचनाच्च । अतस्तदभावादेव कुत्र प्रविष्टाः स्युरित्यप्रविष्टान्येव तथा तेषु भूतेषु सच्चिदात्मनानुप्रविष्टतया भासमानोप्यहं सच्चिद्विवेचने तदसत्त्वाभानापत्त्या "धातवोऽवयवित्वाच्च तन्मात्रावयवैर्विना । न स्युरसत्यवच्चविन्यसन्नवयवींततः ॥ "य आत्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतोऽबुधः । विनानुवादं न च तन्मनीषितं सम्यग्यतस्त्यक्तमुपाददत्पुमान्" इत्यादिवचनैश्च तत्पृथक्–स्वरूपानवस्थानादेव "तेषु नाहं प्रविष्टः, 'तदनुत्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे । व्याप्यव्यापकता मिथ्या सर्वात्मेति हि शासनात्" इत्यादिवचनात् । कारणत्वादिना निरूपणं तु "नैतन्मनो विशति वागुत चक्षुरात्मा प्राणेंद्रियाणि च यथानलमर्चिषः स्वाः । शब्दोपि बोधकनिषेधतयात्ममूलमर्थोक्तमाह यदृते न निषेधसिद्धिः ॥ यतो वाचो निवर्त्तंते अप्राप्य मनसा सह" इत्यादिना मनोवागगोचरस्य ब्रह्मणः साक्षाद्वक्तुमशक्यतया "अध्यारोपापवादाभ्यां निःप्रपंचं प्रपंच्यते । अज्ञातजबोधार्थे विद्वद्भिः कल्पितः क्रमः" इति न्यायमाश्रित्य कारणत्वानुवादप्रतिषेधाभ्यां तत्स्वरूपावबोधायैव "इत्थंभावेन कथितो भगवान् भगवत्तमः । नेत्थंभावेन हि परं ज्ञातुमर्हंति सूरयः ॥ नास्य कर्मणि जन्मादौ परस्यानुविधीयते । कर्तृत्वप्रतिषेधार्थं माययारोपितं हि तत् ।" इत्यादिवचनात् । "न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता" । इत्यादिश्रुत्या परमार्थसृष्ट्यादिनिषेधाच्च ॥ ५ ॥ एवं ज्ञानं परमगुह्यं निरूप्यान्वयव्यतिरेकरूपयुक्त्या मननेन भेदभ्रमबाधपूर्वकं प्रत्यगभिन्नाद्वयब्रह्मैव जिज्ञास्यमित्याह–एतावदेवेति । आत्मनो यत्तत्त्वं परमार्थस्वरूपं तज्जिज्ञासुना पुरुषेण एतावदेव जिज्ञास्यम् । अतो "अन्यदार्तम्" इत्यादिश्रुत्या ततोन्यस्य मृषात्वेन जिज्ञास्यत्वभावात् किं तदित्यपेक्षायामाह—"यत्स्यात्सर्वत्र सर्वदा" सर्वत्राकाशवायुतेजोबन्नांडभुवनघटपटादिषु कारणतया सच्चिदानंदस्वरूपेण यदनुगतं तदुक्तं भगवत्पूज्यपादैः । "अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकम् । आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्" ॥ इति । यदेव पुनः प्रत्यक् चैतन्यं सर्वदा जाग्रत्स्वप्नसुषुप्त्यवस्थासु तत्तत्साक्षितयाऽनुगतम् । तदन्वयव्यतिरेकाभ्यां जिज्ञास्यम् । अन्वयशब्देनात्रानुवृत्तिः । व्यतिरेकशब्देन व्यावृत्तिः । आकाशादिघटपटांतेषु सच्चिदानंदस्वरूपब्रह्मणः सर्वत्रान्वयस्तत्तन्नामरूपयोश्च मिथो व्यतिरेकः "आकाशोस्ति तथा भाति प्रियो वायुस्तथैव सन् । भाति प्रियस्तथा तेजोबन्नं सद्भाति तत्प्रियम् । ब्रह्मांडादिघटांतेषु सत्ताभानं प्रियं ततम् । ब्रह्मणो नाम रूपं च नान्यस्यान्यत्र दृश्यते ॥ अस्ति भाति प्रियं नामरूपाभ्यां व्यतिरिच्यते । अनुवृत्तेर्यथा सूत्रं मणिभ्यो भिद्यते तथा ॥ नाम रूपं च सद्भानप्रियाद्भिन्नं तथेष्यते । व्यावृतत्वेन मणयो यथा सूत्रादिति ध्रुवम् ॥ नामरूपात्मकं विश्वमसद्भिन्नं सतो यतः । अभानं भानभिन्नत्वादप्रियं प्रियभेदतः । उक्तं भागवतेऽथापि असद्ःखात्मकं जडम् । जगत्सच्चित्परानंदविग्रहो ब्रह्म श्रीहरिः तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् । त्वय्येव नित्यसुखबोधतनावनंते मायात उद्यदपि यत्सदिवावभाति । योहं नावेदिषं किंचिदस्वाप्सं सुखतस्तदा । दृष्टवान्विविधान्स्वप्नान्सोहं जागर्मि तत्स्मरन् । साक्षिप्रत्यक्चैतन्यानुवृत्तिरिति सर्वदा । सर्वावस्थासु तासां तु मिथो व्यावृत्तिरेव हि । स्वप्ने जागरणोऽलीकः स्वप्नो हि जागरे न हि । द्वयमेव लये नास्ति लयोपि ह्युभयोर्न च । सत्यं साक्ष्यनुवृत्तत्वात् त्रिष्ववस्थासु शुक्तिवत् । व्यावृत्तत्वान्मृषावस्थारूप्यरंगाभ्रकादिवत् । त्रय आवस ॥ थास्त्रयः स्वप्ना इति श्रुतीरणात् । जाग्रत्सुप्ती मृषा स्यातामवस्थात्वाद्धि स्वप्नवत् ॥ जाग्रन्मृषैव जाग्रत्वात्सुप्तजाग्रद्यथा तथा । सुप्तिर्मृषैव सुप्तित्वात्स्वप्नदृष्टसुसुप्तिवत् ॥ जाग्रद्विश्वं मृषा सर्वं विश्वत्वात्स्वप्नविश्ववत् । बाध्यत्वं नह्युपाधिः स्यात्पक्षे

साधनव्याप्तितः ॥ 'नेह नानास्ति श्रुतितो बाध्यत्वं तस्य निश्चितम् । स्वप्नत्वं न ह्युपाधिः स्यात्साधनव्याप्तितस्तथा ॥ त्रयः स्वप्नाः इति श्रुतेस्तत्र स्वप्नत्वनिश्चयात् । तयोस्तद्व्यतिरेके वै ह्युपाधिश्चित्स्वरूपता ॥ ब्रह्मणि साध्यव्यापित्वात्पक्षे च तदसंभवात् । साक्षी तु सर्वदा सत्यं साक्षित्वात्स्वप्नसाक्षिवत् ॥ सर्वत्रानुगतं ब्रह्म सच्चिदानंदविग्रहम् । व्यावृत्तेभ्योनुवृत्तत्वाद्यन्मृषाभ्यो विवेचितम् ॥ तथा साक्ष्यनुवृत्तत्वाद्व्यावृताभ्यो विवेचितः । सर्वाभ्यो जाग्रदादिभ्यो मृषाभ्यः सर्वदैव सत् ॥ अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ब्रह्म प्रत्यगभिन्नं तत्तत्वमस्यादिगोचरम् ॥ एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः । इत्येवं भगवत्पक्षः श्रीद्भागवतामृते" ॥ ६ ॥ एवं निरूपितं स्वमतमुपसंहरंस्तदंगं निर्दिशति–एतन्मतमिति । एतन्मम मतं त्वं समातिष्ठ सम्यक् तत्र स्थिरो भव तादृक्स्थित्यै तदंगमाह–परमेण समाधिनेति । समाधिशब्देनात्र योगः स च त्रिविधः कर्मयोगो भक्तियोगो ज्ञानयोगश्च । "योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया । ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योस्ति कर्हिचित्" इत्यादिवचनात् । युज्यते भगवत्स्वरूपे अनेनेति योग इति व्युत्पत्त्या सर्वापेक्षा हि विद्या यज्ञादिश्रुतेरश्ववदिति न्यायेन सर्वेषां तेषां विद्यांगतया योगत्वम् । तत्र कर्मयोगस्त्रिविधः तत्राद्यः—फलमनभिसंधाय स्ववर्णाश्रमविहितधर्मानुष्ठानरूपः "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि" इत्यादिवचनात् । द्वितीयः—सर्वकर्मणामीश्वरेऽर्पणं "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम् ॥ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात् । करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥ यदत्र क्रियते कर्म भगवत्परितोषणम् । ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम्" इत्यादिवचनात् । तृतीयः–कर्तृत्वाद्यननुसंधायानुष्ठीयमानः "प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्वशः । अंहकारविमूढात्मा कर्ताहमिति मन्यते ॥ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः । गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते" ॥ इति वचनात् । सकामकर्मणस्तु स्वर्गादिफलपरत्वेन भगवत्स्वरूपे अयोजकत्वादेव वेदविहितकर्मत्वेपि न कर्मयोगत्वं "परोक्षवादो वेदोयं बालानामनुशासनम् । कर्म्ममोक्षाय कर्म्माणि विधत्ते ह्यगदं यथा" इति न्यायेन तद्वाक्यानां फलेन प्रलोभ्य वैदिकप्रवृत्त्या भगवत्पथसंमुखीकरणतात्पर्य्यवत्त्वे तु भवतु परंपरया संमुखीकारद्वारा कर्मयोगत्वं, भक्तियोगश्च द्विविधः पराऽपरभेदात् तत्र परा तु "सापरानुरक्तिरीश्वरे" इति भगवता शांडिल्येन सूत्रिता ईश्वरे यानुरक्तिः सा परा भक्तिस्तु फलरूपा "ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्" इत्यादिवचनान्न साधनत्वेन तस्याज्ञानोत्पत्तावंगत्वं, द्वितीया नवधा "श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनम्" इत्यादिवचनात् । सा तु निष्प्रत्यूहज्ञानसाधनं "वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम् ॥ पुरेह भूमन्बहवोपि योगिनस्त्वदर्पितदेहा निजकर्मलब्धया । विबुद्ध्य भक्त्यैव कथोपनीतया प्रपेदिरेऽजोऽच्युत ते गतिं पराम् ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः ॥ मद्भक्तिविमुखानां हि शास्त्रगर्तेषु मुह्यताम् । न ज्ञानं न च मोक्षः स्यात्तेषां जन्मशतैरपि" इत्यादिवचनात् । ज्ञानयोगोपि ज्ञानस्य बहिरंगांतरंगभावेन द्विविधो विवेकादिः श्रवणादिश्च । तत्राद्यश्चतुर्विधो नित्यानित्यवस्तुविवेको वैराग्यं शमादिषट्संपत्तिर्मुमुक्षुता च तत्रापि प्रथमं त्वात्मैव नित्यं तदितरत्सर्वमनित्यमिति "न जायते म्रियते वा विपश्चित्" अतोन्यदार्तं तद्यथेह "कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इत्यादिश्रुतेः "नित्यमात्मस्वरूपं हि दृश्यं यद्विपरीतगम्" इति 'या निश्चिताबुद्धिर्विवेको वस्तुनः सवै' इत्याचार्योक्तेश्च । द्वितीयमैहिकामुष्मिकविषयविरागः "परीक्ष्य लोकान् कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन" इत्यादिश्रुतेः "ब्रह्मादिस्थावरांतेषु वैराग्यं विषयेस्वनु । यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलम्" इत्याचार्य्योक्तेश्च शमादिसंपत्तु षोढा शमो दम उपरतिस्तितिक्षा श्रद्धा समाधानता च "शान्तो दांतो उपरतस्तितिक्षुः समाहितो भूत्वा आत्मन्येवात्मानं पश्येत्" इति श्रुतेः । शाखांतरे 'श्रद्धान्वितो भूत्वा' इति पाठाच्च । तत्र श्रवणादीतरविषयेभ्यो मनोनिरोधः शमः "सदैव वासनात्यागः शमोयमिति शब्दित" इत्याचार्य्योक्तेः । बाह्येंद्रियाणामपि ततो निरोधो दमः 'निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते' इति तद्वचनात् । न च मनोनिग्रहेणैवालं किमिन्द्रियनिग्रहेणेति वाच्यम् । "इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः । इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते ॥ तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि" इति भगवद्वचनात् । न च तर्हि दमेनैवालं "कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् । इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते" इतीश्वरोक्तेः । निवर्तितानामिंद्रियमनसां श्रवणादितरविषयेभ्यः स्वाभाविकी परमुपरतिः तदुक्तमाचार्य्यैः 'विषयेभ्यः परावृत्तिः परमोपरतिर्हि सा' इति । परमेति परावृत्तेर्विशेषणं स्वभाविकीत्यर्थः । केचिदुपरतिः संन्यास इत्याहुस्तस्य तु जनकादौ साक्षात्तदभावेपि बोधदर्शनाद्वर्णाश्रयधर्म्मादिवज्जन्मांतरीयस्यापि तस्य बोधेऽदृष्टद्वारोपकारकत्वसंभवाद्ब्राह्मणेतरेषु "मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणम् । बाहुजातोरुजातानां नायं धर्म्मः प्रशस्यते" इत्यादिभिः तदनधिकारात् "अश्वमेधं गवालंभं संन्यासं पलपैतृकम् । देवराच्च सुतोत्पत्तिं कलौ पञ्च विवर्जयेत् । चत्वार्यब्दसहस्राणि चत्वार्य्यब्दशतानि च । कलेर्यदा गमिष्यंति तदा त्रेतापरिग्रहः ॥ संन्यासश्च न कर्तव्यो ब्राह्मणेन विपश्चिता" इत्यादिना सर्वकालिकत्वाभावाच्च । न ज्ञानांगचतुष्टयसाधनेष्वेवावश्यकांतर्भाव इत्यत्राचार्य्यैरुपेक्षितं ज्ञानसाधनप्रवृत्तौ प्रारब्धवादागतदुःखैरनुद्वेगस्तितिक्षा 'सहनं सर्वदुःखानां

तितिक्षा सा शुभा मता' इत्याचार्य्यवचनात् । गुरुवेदांतवाक्येषु विश्वासः श्रद्धा "गुरुवेदांतवाक्येषु भक्तिः श्रद्धेति विश्रुता" इत्याचार्य्योक्तेः । अनेनैव "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुतिसिद्धगुरुलक्षणं तदुपसदनं च सूचितं श्रोत्रियत्वञ्च याज्ञवल्क्यवाक्येन ब्राह्मण एव पर्यवसितमिति ध्येयं "तद्विज्ञानार्थं स ब्राह्मणमेव गुरुमुपासीत" इति श्रुतेः । 'जन्मना ब्राह्मणो गुरुः' इति श्रीनंदराजोक्तेर्ब्राह्मणाद्ब्राह्मण्युत्पन्नदेहस्यैव गुरुत्वं न ज्ञानवतः क्षत्रियादेरपीति तत्त्वम् । श्रवणादौ चित्तैकाग्र्यं समाधानता "दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" इति श्रुतेः । 'सत्त्वात्संजायते ज्ञानम्' इति स्मृतेः । प्रमादादितमोधर्मस्थौल्यरजोधर्मचांचल्यरहितसूक्ष्मैकाग्रबुद्ध्यैव बोधसंभवात् । 'चित्तैकाग्र्यं तु संलक्ष्येत्समाधानमिति स्मृतम्" इत्याचार्य्यवचनाच्च । प्रदीप्तशिरसो जलराशिं प्रति प्रवृत्तिवत्संसारदुःखतप्तस्य ततोऽनवरतमोक्षेच्छा मुमुक्षुता "संसार-बंधनिर्मुक्तिः कथं स्यान्मे कदा विधे । इति या सुदृढा बुद्धिर्वक्तव्या सा मुमुक्षुता" ॥ इत्याचार्य्यवचनात् । इति बहिरंगम् । द्वितीयस्तु—त्रिविधः श्रवणमनननिदिध्यासनभेदात् । "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य" इति श्रुतेः स श्रवणादिस्वंतरंगं श्रवणादेर्ज्ञानांगत्वेपि मिथोप्यंगांगित्वं तत्र सर्ववेदांतानां प्रत्यगभिन्नद्वयब्रह्मणि तात्पर्यावधारणं श्रवणं कृत्यन-धीनतया । विध्यनर्हत्वादात्मदर्शनस्यार्हार्थकतव्यप्रत्ययेनात्मा दर्शनार्ह इति साक्षात्तद्दर्शनमुद्दिश्य विधानात् वेदांतप्रमाणगोचरत्वाच्च । प्राधान्येन तस्य श्रवणस्यांगित्वं नानोपपत्तिभिस्तद्विचारात्मकमननस्य तत्प्रमेयगता संभावना निरासकत्वात्तत्प्रमेयाविषयकानवरतप्र-त्ययप्रवाहात्मकनिदिध्यासनस्य च तत्प्रमेयगतविपरीतभावनानिरासकत्वात्तत्फलोपकार्य्यंगत्वं निदिध्यासनोपमर्द्याविपरीतभावना द्विविधा द्वैतप्रपंचस्य सत्यत्वरूपा तद्भानरूपा च । तत्र प्रथमा तु सादरनैरंतर्यैकियत्कालाभ्यासे नापनीयते तदपनये एव जिज्ञा-सोर्विद्वद्व्यवहारः संशयविपर्य्ययाप्रतिबद्धज्ञानत्वात् । प्रपंचभानात्मकविपरीतभावनानिवृत्तौ तु तद्भानं विना भोगासंभवात्स्व-फलभोगाय प्रारब्धं कर्म तत्प्रतिबध्नाति प्रारब्धकर्मणां विनश्यदवस्थायां तत्तद्रक्षणे प्रयोजनाभावात्तत्प्रतिबंधक्षये निदिध्यास-नोपकृततत्त्वज्ञानं सकारणलेशं तमपि भानाप्रयोजकं विपर्य्यासं निवर्त्तयति "भूयश्चांते विश्वमायानिवृत्तिः" इति श्रुतेः । तच्च निदिध्यासनं द्विविधं योगसाध्यं केवलं च । विक्षिप्तचित्तानां चित्तदर्पोपशमपूर्वकत्वाभिमुख्याय योगसाध्यं हरिगुरुभक्त्या तत्कृपा-लवेन स्वत एव तत्त्वाभिमुखचित्तानां तु केवलं "तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनम् । एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः" ॥ इत्यादिवचनात् । "समाहितैकः करणैर्गुणात्मभिर्गुणो भवेन्मत्सुविविक्तधाम्नः । विक्षिप्यमाणैरुत किं नु दूषणं धनैरुपेतैर्विगतैरवेः किम्" इत्यादिश्रीमद्भगवतोक्तेश्च । तदेतद्यावद्यत्र साध्यं योगः समाधिरित्यादिशब्दाभिधेयं ततश्च स्वाभाविकं तु परमः समाधिः पराभक्तिरित्यादिशब्दाभिधेयं स्यात् "देहाभिमाने गलिते विज्ञाते परमात्मनि । यत्रयत्र मनो याति तत्रतत्र समाधयः ॥ सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः । भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥" इत्यादिवचनैः तत्र देहाभिमाने गलिते इत्यत्र देहाभिमानशब्दो नामरूपमात्रोपलक्षणं प्रापंचिकनामरूपसत्यत्वभ्रमनिवृत्तौ परमात्मनि सर्वत्र सत्ताभानप्रियरूपेणानुगते सच्चिदा-नंदविग्रहे कृष्णब्रह्मणि विज्ञात इत्यर्थः । श्रीमद्भागवतवाक्येपि सर्वभूतेष्वात्मनो भगवद्भावं भूतानि भगवत्यात्मनीत्युक्त्या प्रपंचस्यात्मव्यतिरेकोक्त्या बाधेनात्मभगवच्छब्दयोर्मुख्यसामानाधिकरण्याच्च । प्रत्यगभेदेनाद्वैतमेव पर्य्यवसितं तथा चैवंविधेन परमेण समाधिनाऽऽतिष्ठत्सर्वस्यैतस्य "यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः । हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः ॥" इत्यादिवचनैः भगवद्भक्त्यधीनतया तस्याश्च "भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत-सत्समागमः । सत्संगमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः ॥" इत्यादिना सत्संगाधीनतया ममापि साधूत्तमतया मत्संगलब्धया भक्त्यैवातिष्ठ । तत्फलमाह—भवानिति । तत्र स्थित्या भवान् कल्पविकल्पेषु कल्पस्य विविधसर्गेष्वपि मदैकात्म्यदृष्ट्या कर्हिचिन्न विमुह्यति तत्र "को मोहः कः शोकः एकत्वमनुपश्यतः" इति श्रुतेः । "नारायणपरा राजन्न कुतश्चन बिभ्यति स्वर्गापवर्ग-निरयेष्वपि ।' तुल्यार्थदर्शिनः ॥" इत्यादिवचनैर्निरयादिष्वपि नामरूपभेददृष्टेरेव दुःखमयहेतुतया तदपबाध्यः स्वर्गापवर्गनिरयेष्वपि तुल्योर्थः सत्ताभानाद्यात्मकनारायणस्वरूपं तद्दर्शिनोऽत एव नारायणपरास्तथा च "द्वितीयाद्वै भयं भवति" । "भयं द्वितीयाभिनिवेशतः स्यात्" इत्यादिश्रुतिस्मृतिवर्णितप्रत्यक्षानुभूतभयहेतुद्वितीयाभावान्न बिभेतीति भावः । "यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः । नानात्वमात्मनो यावदस्वातंत्र्यं तदैव हि ॥ यावदस्यास्वतंत्रत्वं तावदीश्वरतो भयम् । य एतत्समुपासीरंस्ते मुह्यंति शुचार्पिताः ॥" इत्यादिभिश्च गुणवैषम्यनिमित्तनानात्वभाने एव भयशोकमोहनिर्देशात् ॥ "भक्तिज्ञानोपदेशेन ब्रह्माणं विश्वमेव च ॥ योऽमूमुच-द्धरिः स्वात्मा तं वंदे स्वात्मनो गुरुम् ॥ हृत्स्थो व्याख्यातवाञ्छ्रीशो मन्मुखात्स्वमुखोद्भवम् । वेदाबुध्यमृतं स्वेष्टं तं स्वात्मानं गुरुं भजे ७ ॥ ३६ ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

एतावदेवेत्यादि स्पष्टम् । अन्वयः कार्येषु कारणत्वेनानुवृत्तिरिति यदा कार्य्याणि जायंते तदा उपादानतया ईश्वरस्य सर्व्व-त्रैवानुवृत्तिः कुण्डलादिषु स्वर्णवत् यदा अविकृतः कारणरूपेण वर्त्तते तदा कार्याणामभावात् तेभ्यो व्यतिरेकः अविकृतसुवर्णवत् । एतेन जगत्कारणं यत् किमपि नित्यसिद्धं स्वप्रकाशरूपं तदेव तत्त्वं श्रेयस्कामैरन्वेषणीयमिति चतुःश्लोकीभागवतम् ॥ नन्वनेन

श्लोकचतुष्टयेन कथं दशलक्षणलक्षितसमस्तभागवतार्थसंग्रहो भवतु अत्रोच्यते अहमेवासमेवाग्रे इत्यनेन सर्वकारणकारणं भागवतप्रतिपाद्यम् । आश्रय उक्तः अनेन द्वादशस्कन्धार्थस्याप्युपसंग्रहः पश्चादहमित्यनेन पुरुषप्रधानादिसर्व्वं उक्तः अनेन द्वितीयतृतीयस्कंधार्थस्योपसंग्रहः । यदेतच्चेत्यनेन विसर्गः स्थानम् । ऊतिः मन्वन्तरेशानुकथा चोक्ता यत् एतत् कार्यभूतं जगत् तदप्यहमेवेत्यर्थः । अनेन चतुर्थपञ्चमसप्तमाष्टमनवमस्कं धपर्य्यन्तार्थः संकेतितः । योऽवशिष्येत सोऽस्म्यहमित्यनेन निरोध उक्तः । अनेन दशमस्कन्धार्थस्योपसंग्रहः ऋतेऽर्थमिति मायाकथनेन मायाया जगत्सृष्ट्यादिर्जीवस्य संसारो जीवेश्वरविभागश्च उक्तः । तत्तु समग्रग्रन्थे तत्तदवसरे तत्तदुपाख्यानेन ज्ञेयम् । अनेन प्रथमस्कन्धार्थस्याप्युपसंग्रहः यथा महतीत्यनेन पोषणमुक्तम् अनेन षष्ठस्कन्धार्थस्योपसंग्रहः । एतावदेवेति साधनकथनैर्मुक्तिर्दर्शिता अनेन एकादशस्कन्धार्थस्योपसंग्रहः । एतत्सर्गादिविशेषः श्रीश्रीधरस्वाम्युक्तप्रतिस्कन्धोपक्रमश्लोकैर्द्रष्टव्यः किं च स्वामिदर्शितसर्गप्रतिपादकतृतीयस्कन्धान्तर्गतविसर्गादिकथनवत् यद्यपि विसर्गादिप्रतिपादकेषु चतुर्थादिष्वन्येषु स्कन्धेषु स्वाम्युक्तेतराणि अन्यानि लक्षणानि क्वचित् सन्ति, तथापि बाहुलयोक्तेः प्राधान्यात्स्वाम्युक्तलक्षणप्रतिपादकत्वमेव सर्वेषां स्कन्धानां युक्तमिति ज्ञेयम् । बहुविद्वत्सम्मतेयं चतुश्लोकी टिप्पणीति ॥ ३५ ॥ ४४ ॥

### श्रीमद्वीरराघवव्याख्या

पुनश्च प्रकृतिपुरुषविलक्षणेश्वरस्वरूपं संग्रहेण वक्ष्यन् तस्यैव जिज्ञास्यत्वमाह एतावदिति । आत्मनः परमात्मनः तत्वं स्वरूपं जिज्ञासुना ज्ञातुमिच्छुना एतावदेव परस्परविविक्तस्वभावचिदचिदंतरात्मभूतभगवत्स्वरूपमेवान्वयव्यतिरेकाभ्यामयोगान्ययोगव्यवच्छेदाभ्यां जिज्ञास्यम् इत्यर्थः । एवं जिज्ञास्यमेवेत्यन्वयः । नान्यज्जिज्ञास्यमिति व्यतिरेकः यद्वाऽन्वयात्सद्भावाच्चिदचिच्छरीरकपरमात्मन एव कार्यात्मना कारणात्मना च सद्भावाद्व्यतिरेकाच्चिदचिच्छरीरकपरमात्मातिरिक्तवस्त्वंतराभावादेवंभूतपरमात्मविज्ञानेन सर्वविज्ञानाद् ज्ञातव्यांतराभावादेतावदेव जिज्ञास्यमित्यर्थः । प्राधान्येन ज्ञेयं भगवत्स्वरूपं चेतनमचेतनं च तद्विभूतिं भूतमिति तद्ज्ञानस्य भगवद्ज्ञानेंऽतर्भावादात्मनस्तत्वं इत्युक्तं संग्रहेण प्रकृतिपुरुषवैलक्षण्यमाह यत्स्यादिति । यदात्मनस्तत्वं मत्स्वरूपं सर्वदा स्यादित्यचिद्व्यावृत्तिः अचिदपि प्रतिक्षणपरिणामित्वेन पिंडत्वघटत्वकपालत्वचूर्णत्वरजत्वरजस्त्वाणुत्वाद्यवस्थासु पूर्वपूर्वावस्थानां सद्द्रव्यस्योत्तरोत्तरावस्थाप्राप्त्यभावात्सर्वदाऽस्तिशब्दानर्हत्वात् सर्वत्रेति जीवव्यावृत्तिः तस्याविकृतत्वेन सर्वदा स्यादिति वक्तुं शक्यत्वेपि बालाग्रशतभागस्येत्याद्युक्तप्रकारेण जीवस्वरूपस्याणुपरिमाणत्वेन सर्वत्र स्यादिति वक्तुमशक्यत्वात् । एवमविकारित्वानंतत्वकथनेन सत्यं ज्ञानमनंतं ब्रह्मेत्युक्तब्रह्मस्वरूपलक्षणमभिहितं भवति ॥ ३५ ॥ ❀ ❀ एवं परावरे यथा रूपे जानीयां ते इत्यस्योत्तरमुक्तं नेहमानः प्रजासर्गं बध्येयमित्यस्योत्तरमाह एतदिति । परमेण समाधिना चित्तैकाग्र्येण एतन्मतं सम्यगनुतिष्ठ भवानिति संहाराद्यधिकर्तृरुद्रादेरप्युपलक्षणं कल्पविकल्पेषु सृष्टिसंहारेषु कल्पः कल्पनं सृष्टिः विकल्पो विपरीतकल्पनं संहारः कर्हिचित्कदाचिदपि न मुह्यति अस्मदधीनत्वमनुसंधाय समुन्नद्धमदापहतो न भविष्यसीत्यर्थः । अनेनैव तद्विषयां धेहि मनीषां इत्यस्याप्युत्तरमुक्तं भवति ॥ ३६ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

भगवान्स्वव्याप्तिं सोदाहरणमुपदिशतीत्याह यथा महांति पंचभूतानि उच्चावचेषु भूतेषु स्वकार्यशरीरेषु प्रविष्टानि वर्तंते ततोऽप्यधिकव्याप्तिसद्भावात् तेष्वप्रविष्टानि च तथाहमप्यनंतदेशकालव्याप्तेषु भूतेषु प्रविष्टस्तेभ्यो बहिरपि स्थितत्वात्तेषु न प्रविष्टश्च यथा महांति भूतानि शरीरेषु बहिस्तथेत्यादेः ॥ ३५ ॥ ❀ ❀ उक्तव्याप्तिस्फुटीकरणपूर्वकमुपदेशमुपसंहरति एतावदिति । यद्वस्तु सर्वज्ञे सर्वदेशे सर्वदा सर्वस्मिन्काले चान्वयव्यतिरेकाभ्यामवस्त्वन्वितानन्वितदेशकालस्वरूपाभ्यां व्याप्तं स्यादेतावदेव मत्स्वरूपमात्मनः परमात्मनस्तत्त्वजिज्ञासुना त्वया जिज्ञास्यं विचार्यं स्यादित्यन्वयः । अनेन वस्त्वंतरसद्भावासद्भावरूपाभ्यामन्वयव्यतिरेकाभ्यां सर्वदेशकालयोरेकप्रकारेण गुणक्रियाभिव्याप्तमिति विचार्यमित्युक्तं भवति ॥ ३६ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

अथ क्रमप्राप्तरहस्यपर्य्यन्तसाधकत्वात् रहस्यत्वेनैव तदङ्गमुपदिशति एवावदेवेति । आत्मनो मम भगवतस्तत्त्वजिज्ञासुना याथार्थ्यमनुभवितुमिच्छुना एतावदेव जिज्ञास्यं श्रीगुरुचरणेभ्यः शिक्षणीयम् । किं तत् यदेकमेव वस्तु अन्वयव्यतिरेकाभ्यां विधिनिषेधाभ्यां सदा सर्वत्र स्यात् उपपद्यते तत्रान्वयेन यथा एतावानेव लोकेऽस्मिन्नित्यादि, ईश्वरः सर्व्वभूतानामित्यादि, मन्मना भव मद्भक्त इत्यादि, च व्यतिरेकेण यथा मुखबाहूरुपादेभ्य इत्यादि ऋषयोऽपि देवयुष्मत्प्रसंगविमुखा इह संसरन्तीत्यादि न मां दुष्कृतिनो मूढा इत्यादि, यावज्जनो भवति नो भुवि विष्णुभक्त इत्यादि च कुत्रकुत्रोपपद्यते सर्व्वत्र शास्त्रकर्तृ देशकरणद्रव्यक्रियाकार्य्यफलेषु समस्तेष्वेव तत्र समस्तशास्त्रेषु यथा स्कान्दे ब्रह्मनारदसंवादे-संसारेऽस्मिन् महाघोरे जन्ममृत्युसमाकुले पूजनं वासुदेवस्य तारकं वादिभिः स्मृतम् इति तत्राप्यन्वयेन यथा भगवान् ब्रह्मकात्स्न्र्येन त्रिरन्वीक्ष्य मनीषया तदध्यवस्यत् कूटस्थोरतिरात्मन् यतो भवेत् इति तथा पाद्मे स्कान्दे लैंगे च आलोड्य सर्वशास्त्राणि

विचार्य्य च पुनः पुनः इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा इति व्यतिरेकोदाहरणम्—पारंगतोऽपि वेदानां सर्वशास्त्रार्थविद्यदि यो न सर्व्वेश्वरे भक्तस्तं विद्यात् पुरुषाधमम् । इत्यादिकं सर्व्वत्रावगन्तव्यम् । तत्रान्ते दर्शयिष्यते एकादशे शब्दब्रह्मणि निष्णातो न निष्णयात् परे यदि श्रमस्तस्य श्रमफलोह्यधेनुमिव रक्षत इति सर्व्वकर्तृषु यथा—ते वै विदन्त्यतितरन्ति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः । यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्य्यग्जना अपि किमु श्रुतधारणा ये इति गारुडे च—कीटपक्षिमृगाणाञ्च हरौ सन्न्यस्तचेतसाम् ऊर्द्धमेव गतिं मन्ये किं पुनर्ज्ञानिनां नृणाम् इति तत्रैव सदाचारे दुराचारे ज्ञानिन्यज्ञानिनि विरक्ते रागिणि, मुमुक्षौ मुक्ते भक्त्यसिद्धे भक्तिसिद्धे तस्मिन् पार्षदतां प्राप्ते तस्मिन्नित्यपार्षदे च सामान्येन दर्शनादपि सार्व्वत्रिकता तत्र तत्र सदाचारे दुराचारे च यथा—अपि चेत् सुदुराचारी भजते मामनन्यभाक् साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः इति । सदाचारस्तु किं वक्तव्य इत्यपेरर्थः । ज्ञानिन्यज्ञानिनि च ज्ञात्वाज्ञात्वाऽथ ये वै मामित्यादि । हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः इति । विरक्ते रागिणि च—बाध्यमानोऽपि मद्भक्तो विषयैरजितेन्द्रियः । प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते ॥ इति । अबाध्यमानस्तु सुतरां नाभिभूयते इत्यपेरर्थः । मुमुक्षौ मुक्ते च मुमुक्षवो घोररूपानित्यादि आत्मारामाश्च मुनय इत्यादि । भक्त्यसिद्धे भक्तिसिद्धे च केचित् केवलया भक्त्या वासुदेवपरायणाः । इत्यादि न चलति भगवत्पदारविन्दाल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः । इति च भगवत्पार्षदतां प्राप्ते मत्सेवया प्रतीतं ते इत्यादि नित्यपार्षदे वापीषु विद्रुमतटास्वमलामृताप्स्वित्यादि । सर्वेषु वर्षेषु भुवनेषु ब्रह्माण्डेषु तेषां बहिश्च तैस्तैः श्रीभगवदुपासनायाः क्रियमाणायाः श्रीभागवतादिषु प्रसिद्धिः । सिद्धैरेभिः सर्वदेशोदाहरणं ज्ञेयम् । सर्वेषु करणेषु यथा मानसेनोपचारेण परिचर्य्य हरिं मुदा । परे वाङ्मनसागम्यं तं साक्षात् प्रतिपेदिरे ॥ इति । एवम्भूतवचनं हि अस्तु तावद्बहिरिन्द्रियेण मनसा वचसापि तत्सिद्धिरिति प्रसिद्धिः । सर्व्वद्रव्येषु यथा पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । इत्यादि । सर्वक्रियासु यथा श्रुतोऽनुपठितो ध्यात आदृतो वानुऽमोदितः । सद्यः पुनाति सद्धर्म्मो देवविश्वद्रुहोऽपि हि ॥ इति । यत् करोषि यदश्नासि इत्यादि । एवं भक्त्याभासेषु भक्त्याभासापराधेष्वपि अजामिलमूषिकादयो दृष्टान्ता गम्याः सर्वेषु कार्येषु यथा यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं सम्पूर्णतामेति सद्यो वन्दे तमच्युतम् ॥ इति । सर्वफलेषु यथा अकामः सर्वकामो वा इत्यादि तथा यथा तरोर्मूलनिषेचनेन इत्यादिवाक्येन हरिपरिचर्य्यायां क्रियमाणायां सर्वेषामन्येषामपि देवादीनामुपासना स्वत एव भवतीत्यतोऽपि सार्वत्रिकतापि यथोक्तं स्कान्दे श्रीब्रह्मनारदसंवादे अर्च्चिते देवदेवेशे शङ्खचक्रगदाधरे अर्च्चिताः सर्वदेवाः स्युर्यतः सर्व्वगतो हरिः इति । एवं यो भक्तिं करोति यद्द्रवादिकं भगवते दीयते येन द्वारभूतेन भक्तिः क्रियते यस्मै श्रीभगवत्प्रीणनार्थं दीयते यस्माद्गवादिकात् पयआदिकमादाय भगवते निवेद्यते यस्मिन् देशादौ कुले वा कश्चिद्भक्तिमनुतिष्ठति तेषामपि कृतार्थत्वं पुराणेषु दृश्यत इति कारकगतापि । एवं सार्व्वत्रिकत्वं साधितम् । सदातनत्वमप्याह सर्वदेति । तत्र सर्गादौ यथा कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता इत्यादि सर्गमध्ये तु बहुत्रैव चतुर्विधप्रलयेष्वपि तत्रेमं क उपासीरन्निति विदुरप्रश्ने सर्वेषु युगेषु कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः । द्वापरे परिचर्यायां कलौ तद्धरिकीर्त्तनादिति ।

किं बहुना—सा हानिस्तन्महच्छिद्रं स मोहः स च विभ्रमः । यन्मुहूर्त्तं क्षणं वापि वासुदेवो न चिन्त्यते ॥ इत्यपि वैष्णवे । सर्वावस्थास्वपि—गर्भे श्रीनारदकारितश्रवणेन श्रीप्रह्लादे प्रसिद्धम्, बाल्ये श्रीध्रुवादिषु, यौवने श्रीमदम्बरीषादिषु, वार्द्धक्ये धृतराष्ट्रादिषु, मरणे अजामिलादिषु, स्वर्गितायां श्रीचित्रकेत्वादिषु । नारकितायामपि—यथा यथा हरेर्नाम कीर्त्तयन्ति स्म नारकाः तथा तथा हरौ भक्तिमुद्वहन्तो दिवं ययुः ॥ इति नृसिंहपुराणे अत एवोक्तं दुर्व्वाससा—मुच्यते यन्नाम्न्युदिते नारकोऽपीति । तथा एतन्निर्व्विद्यमानानामित्यादावपि सर्व्वावस्थोदाहृतिः । अथ तत्र तत्र व्यतिरेकोदाहरणानि च कियन्ति दृश्यन्ते—पारंगतोऽपि वेदानां सर्व्वशास्त्रार्थवेद्यपि । यो न सर्व्वेश्वरे भक्तस्तं विद्यात् पुरुषाधमम् ॥ इति किं वेदैः किमु शास्त्रैर्वा किं वा तीर्थनिषेवणैः । विष्णुभक्तिविहीनानां किं तपोभिः किमध्वरैः इति किं तस्य बहुभिः शास्त्रैः किं तपोभिः किमध्वरैः । वाजपेयसहस्रैर्वा भक्तिर्यस्य जनार्दने ॥ इति गारुडबृहन्नारदीयपाद्मवचनानि । तथा—तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमंगलाः । क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ॥

न यत्र वैकुण्ठकथासुधापगा न साधवो भागवतास्तदाश्रयाः न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न जातु सेव्यताम् । यया च आनम्य किरीटकोटिभिरित्यादि सालोक्यसार्ष्टिसारूप्यसामीप्येत्यादि न दानं न तपो नेज्या इत्यादि नैष्कर्म्यमप्यच्युतभाववर्जितमित्यादि नात्यन्तिकं विगणयन्त्यपि ते प्रसादमित्यादयः अथ सर्वत्र सर्वदा यदुपपद्यत इति योजनिकार्थो युगपद् यथा—तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदेत्यादि । अन्वयव्यतिरेकाभ्यां सर्व्वत्र सर्वदा यदुपपद्यत इत्यत्र यथा—स्मर्त्तव्यः सततं विष्णुरित्यादि साकल्येऽपि यथा—न ह्यतोऽन्यः शिवः पन्था इत्युपक्रम्य तदुसंहारे तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदा श्रोतव्यः कीर्तितव्यश्च स्मर्त्तव्यो भगवान् नृणाम् इति नृणां जीवानामिति नृगतिं विविच्य कवय इतिवत् एतदुक्तं भवति यत् कर्म्म तत् संन्यासभोगशरीरप्राप्त्यवधि योगः सिद्ध्यवधि सांख्यमात्मज्ञानावधि ज्ञानं मोक्षावधि तथा तत्तद्योग्यतादिकानि च सर्वाणि एवम्भूतेषु कर्म्मादिषु शास्त्रादिव्यभिचारिता च ज्ञेया हरिभक्तेस्तु अन्वयव्यतिरेकाभ्यां सदा सर्वत्र तत्तन्महिमभिरुपपन्नत्वात् तथाभूतस्य रहस्यस्याङ्गत्वं युक्तम् । अतोरहस्यांगत्वेन च ज्ञानरूपार्थान्तराच्छन्नतयैवेदमुक्तमिति तत्राप्यात्मविद्ययैवान्यार्थ-

संगोपनादसौ साधनभक्तिरपि कचिद्ग्राह्यं ब्रह्मज्ञानादिसाधने स्यादिति गम्यते। तत्रेयं प्रक्रिया—साधनभक्तेः सार्वत्रिकत्वात् सदातनत्वाच्च प्रथमं सा गुरोर्ग्राह्या। ततस्तदनुष्ठानाद् बाह्यसाधनं वैराग्यपुरःसरता शीलमात्मज्ञानविज्ञाने चेति आनुषङ्गिकं भवति ततो भूयश्च तथाभूतत्वाद्भक्तिरनुवर्तित एव ब्रह्मभूतः प्रसन्नात्मा इत्यादिभ्यः, आत्मारामाश्च मुनयः इत्यादिभिश्च तदैव भगवज्ज्ञानविज्ञाने चेति। तस्मात् ज्ञानविज्ञानरहस्यतदङ्गानामुपदेशेन चतुःश्लोक्या अपि स्वयं भगवानेवोपदिष्टः। अत्र, तस्मै स्वलोकं भगवान् सभाजित इति भगवच्छब्देन, ददर्श तत्राखिलसात्वतां पतिमित्यत्र, परार्द्धान्ते सोऽबुध्यत गोपवेशोभे पुरस्तादाविर्बभूव इति तापनीश्रुत्याद्यनुकूलितश्रीकृष्णत्वलिंगेन चास्यवक्तुं श्रीभगवत्त्वमेव स्पष्टम्। न जातु तदंशभूतनारायणाख्यगर्भोदशायिपुरुषत्वम्। अतएवास्य महापुराणस्यापि श्रीभागवतमित्येवाख्या तथैवोक्तम्—कस्मै येन विभाषितोऽयमतुलो ज्ञानप्रदीपः पुरेत्यादौ पुराशब्देन भगवद्वक्तृत्वमेवोक्तम्। आद्योऽवतारः पुरुषः परस्येति द्वितीयेऽभिधानात् अतः इदं भगवता पूर्वं ब्रह्मणे नाभिपंकजे स्थिताय भवभीताय कारुण्यात् संप्रकाशितम्॥ इत्यत्रापि भगवच्छब्दः प्रयुक्तः श्रीनारायणनाभिपंकजे स्थितं ब्रह्माणं प्रति स्वयं भगवता तत्रैव व्यापिमहावैकुण्ठलोकं प्रकाशयेदं पुराणं प्रकाशितमित्यर्थः। अनुगतं चैतत् द्वितीयस्कन्धेतिहासस्येति जीयादसौ भगवतः प्रतिज्ञा चातुरर्थिकी व्याख्या च स्वामिपादानां या याऽभून्मम जीविका॥ ३५॥ ❀ ❀ ( तदेवं श्रीभागवतं संक्षेपेणोपदेक्ष्यन्तं श्रीनारदं श्रीब्रह्माऽपि तथैव संकल्पं कारितवान्, यथा हरौ भगवति नृणां भक्तिर्भविष्यति इत्यादि श्रीनारदेनापि तन्महापुराणाविर्भावार्थं तथैवोपदिष्टम् अथो महाभाग भवानित्यादिना )॥ ३६॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

अथ भगवच्छिक्षितमहं करवाणि ह्यतन्द्रित इति ब्रह्मणा प्रार्थितं च प्राप्तिसाधनम् अतिरहस्यत्वात् बहिरंगजनागम्यतयैवाह एतावदेवेति। अत्र बहुतरशास्त्रानुसन्धानमपि नापेक्षितव्यमिति भावः। तत्त्वजिज्ञासुनाऽऽत्मनः स्वस्य श्रेयः साधनतत्त्वं ज्ञातुमिच्छुना जनेन जिज्ञास्यं श्रीगुरुचरणेभ्यः शिक्षणीयमित्यर्थः। त्वया तु मदनुग्रहादवगम्यते एवेति भावः। किं तत् यत् श्रेयःसाधनेषु कर्म्मज्ञानयोगभक्त्यादिषु मध्ये अन्वयव्यतिरेकाभ्यां स्यात् सिध्यति स्थिरीभवतीत्यर्थः। तत्र तावत् स्वर्गापवर्गादेः कर्म्मज्ञानयोगादिभिः केवलैरसिद्धैस्तैर्विनापि सिद्धेः कर्म्मज्ञानयोगादयोऽन्वयव्यतिरेकाभ्यां नैव साधनानि स्युः। तथाहि को वार्थ आप्तोऽभजतां स्वधर्म्मत इति। क्लिश्यन्ति ये केवलबोधलब्धये इति। पुरेह भूमन् बहवोऽपि योगिन इति। यत् कर्म्मभिर्यत् तपसेत्यादौ कर्मादिभिर्विनापि सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा। स्वर्गापवर्गं मद्धाम कथञ्चिद् यदि वांछति इति। या वै साधनसम्पत्तिः पुरुषार्थचतुष्टये। तया विना तदाप्नोति नरो नारायणाश्रयः॥ इति मोक्षधर्मीयवचनञ्च। भक्त्या तु केवलयैव सर्व्वाणि श्रेयांसि सिध्यन्ति तया विना तु नैव सिध्यन्तीति अन्वयव्यतिरेकाभ्यां भक्तिरेव सर्वश्रेयःसाधनत्वेन स्थिरीभवति। तथा हि अन्वयेन यथा अकामः सर्वकामो वा मोक्षकाम उदारधीः तीव्रेण भक्तियोगेन यजेत पुरुषं परम्॥ इति।

भक्तियोगस्य केवलस्यैव तीव्रत्वं निरभ्रसूर्य्यस्येवेति ज्ञेयम् यथा वा—यत् कर्म्मभिर्यत्तपसेत्यादि व्यतिरेकेण यथा—मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक्॥ य एषां पुरुषः साक्षादात्मप्रभवमीश्वरम् न भजन्त्यवजानन्ति स्थानाद्भ्रष्टाः पतन्त्यधः॥ इति यथा वा—तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमंगलाः क्षेमं न विंदन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः॥ इति तत्र देशकालविशेषाभावमाह, सर्व्वत्र सर्वदेशेषु सर्व्वाधिकारिषु च सर्वदा सर्व्वेष्वेव कालेषु यत् स्यात् तथाहि शुचावेव देशे शुचितत्काले जीवो कर्म्म कुर्य्यात् शुद्धान्तःकरण एव ज्ञानं लभते शुचौ देशे प्रतिष्ठाप्य सुखमासनमात्मनः योगी योगं प्रयुञ्जति, इति कर्मज्ञानादीनां न सार्व्वत्रिकता तथा यत् कर्म्म तत् संन्यासभोगप्राप्त्यवधि, योगः सिद्ध्यवधि, सांख्यमात्मज्ञानावधि, ज्ञानं मोक्षावधीति नापि सार्व्वत्रिकता भक्तेस्तु सार्व्वत्रिकतासार्व्वत्रिकते अतिप्रसिद्धे एव न देशनियमस्तत्र न कालनियमस्तथानोच्छिष्टादौ निषेधोऽस्ति श्रीहरेर्नाम्नि लुब्धक॥ इति तस्मात् सर्व्वात्मना राजन् हरिः सर्वत्र सर्वदा। श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यो भगवान् नृणाम्। इति कर्म्मज्ञानिप्रभृतिषु सर्व्वेष्वेवाधिकारिषु भक्तेर्व्याप्तिरुक्तैव किरातहूणान्ध्रपुलिन्दपुल्कशा इत्यादिना जातिचाण्डालकर्मचाण्डालादिष्वपि दृष्टा तथा सर्वावस्थास्वपि गर्भे प्रह्लादादेः, बाल्ये ध्रुवादेः, यौवने अम्बरीषादेः, वार्द्धक्ये ययात्यादेः, मरणे अजामिलादेः नारकितायामपि—मुच्येत यन्नाम्न्युदिते नारकोऽपीत्युक्तेः यथा यथा हरेर्नाम कीर्त्तयन्ति च नारकाः तथातथा हरौ भक्तिमुद्वहन्तो दिवं ययुः॥ इति नृसिंहपुराणोक्तेश्चेति भक्तेरेव साधनत्वं निर्द्धारितम्।

अथ प्रेमभक्तिरूपं रहस्यमपि तन्त्रेणैवाह एतावदिति। तत्त्वजिज्ञासुना पुंसा एतावदेव श्रेयःसु स्वर्गापवर्गप्रेमसु मध्ये जिज्ञास्यम्। किन्तत् यत् श्रेयः आत्मनः स्वस्यैव अन्वयव्यतिरेकाभ्यां सर्वत्र सर्वदा स्यात्। तत्र न तावत् स्वर्गापवर्गौ स्वान्वयव्यतिरेकाभ्यां सिध्यतः प्रेमा तु स्वस्यैवान्वयव्यतिरेकाभ्यां सिध्यति। प्रेम्णोऽपि भक्तिशब्दवाच्यत्वात् साधनभक्त्यैव साध्यभक्तेः प्रेम्णः सिद्धिदर्शनात् प्रेम्णः स्वेनैव सिद्धिः। यदुक्तम् भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम्॥ इति। अतो रहस्यतदंगशब्दाभ्यामुच्यमाने प्रेमभक्तिसाधनभक्ती तन्त्रेणैवोक्ते ततश्च प्रेमभक्तिसाधनत्वेनैव भक्तिः कर्त्तव्या न तु स्वर्गापवर्गादिसाधनत्वेनेति

भगवतः शिक्षा व्यञ्जिता भगवच्छिक्षितमहं करवाणि इति ब्रह्मणा प्रार्थितत्वात्। शुद्धसाधनभक्तिसिद्धया प्रेमभक्त्यैव यद्रूपगुणादिमाधुर्यरसानुभवस्तस्य प्रेमभक्त्यनुभावरूपत्वादिति विज्ञानं स्वत एव लब्धम् अतो रहस्यतदंगविज्ञानानि श्लोकेनानेनैवोक्तानि। किञ्च रसो वै स इत्यनन्तरं सैषाऽऽनन्दस्य मीमांसा भवतीति श्रुतेः सर्वश्रेयोऽवधिरूपो रस एव मूर्त्त एव रंगभूमौ मल्लानामशनिरित्याद्याकार एव दर्शितस्तस्य च विज्ञानमत्रैव श्लोके तन्त्रेणोक्तम्। यथा—जिज्ञास्येषु मध्ये एतावदेव जिज्ञास्यमनुबुभूषणीयम्। किं तत्। अन्वयव्यतिरेकाभ्यां योगायोगाभ्यां संयोगविप्रलम्भाभ्यां यत् स्यात्। सर्वत्र सर्वब्रह्माण्डवर्त्तिनि श्रीवृन्दावनादौ दाससखिगुरुप्रेयसीषु सर्वदा नित्यमेव महाप्रलयसमयेऽपीति दास्यसख्यवात्सल्यशृंगाररसानाम् आस्वादनं व्यञ्जितम्। एवमतिरहस्यप्रेमभक्तिरसव्यञ्जकः श्लोकोऽयं ज्ञानरूपार्थान्तरेण भगवतैवाच्छादितश्चिन्तामणिरिव कनकसम्पुटेन बहिरङ्गजनाशक्योद्घाटनेन। तथाच श्रुतिः नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्॥ इति। तत्र ज्ञानरूपमर्थान्तरं यथा आत्मनस्तत्त्वजिज्ञासुना एतावदेव जिज्ञास्यम् किं तत् यदन्वयव्यतिरेकाभ्यां सर्वत्र सर्वदा स्यात् तदेवात्मा। तथा ह्यात्मनः कारणत्वेन जगत्यन्वयः जगतस्त्वात्मनि व्यतिरेकः तथाच जाग्रदाद्यवस्थासु तत्साक्षितया आत्मनोऽन्वयः आत्मनि तु जाग्रदाद्यवस्थाव्यतिरेक इति॥ ३५॥ ❀ ❀ नन्वतिगम्भीरार्थं चतुःश्लोकीभागवतमिदं कथं मया अवगन्तुं शक्यं विवदमानानां मतवैविध्यादित्यत आह। एतन्मतं सम्यगनुतिष्ठ समाधिना चित्तैकाग्र्येण विमृशेत्यर्थः। कल्पविकल्पेषु महाकल्पानुकल्पेषु। मदीयं इति चतुःश्लोकीभागवतविवृतिः सम्पूर्णा॥ ❀॥

इयं विश्वजनीनातिरम्या सारार्थदर्शिनी। भक्तिशास्त्रमधीयानैर्जनैर्दृश्या न चापरैः॥ ३६॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अथ स्वानुग्रहसाध्यमुपायमाह एतावदेवेति। सर्वकार्योपादानतयाऽन्वयोऽनुवृत्तिः आधारत्वकर्तृत्वादिना निमित्तकारणतया व्यतिरेकोऽननुवृत्तिः एवंविधाभ्यां तदात्मानं स्वयमकुरुतेति श्रुतिप्रोक्ताभ्यामन्वयव्यतिरेकाभ्यां सत्सर्वत्र सदा च स्यात् एतावदेवात्मनः परमात्मनः मम तत्वं तत्वजिज्ञासुना मम तत्वं ज्ञातुमिच्छुना जिज्ञास्यं मम ज्ञानार्थं विचार्यमित्यर्थः। अन्यस्य स्वातंत्र्येण जिज्ञास्यत्वाभावाद्यद्विज्ञानेन सर्वं विज्ञातं भवतीति श्रुतेः॥ ३५॥ ❀ ❀ अथेहमानः नवध्येयमिति यत्प्रार्थितं तत्राह एतन्मतमिति। परमेण समाधिना चित्तैकाग्र्येण एतन्मतं सम्यगातिष्ठ अनेनैव बलेन भगवान् कल्पेषु तेषु ये विकल्पाः विविधाः सृष्टयः तेषु च कर्हिचिन्न विमुह्यति कर्तृत्वाभिनिवेशं न यास्यति॥ ३६॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं प्रमेयं प्रमाणं विषयं च निरूप्य निरूप्यान्तरशङ्कां वारयन् त्रिष्वप्युपपत्तिं वदति—एतावदेव जिज्ञास्यमिति। निरूपणं तु जिज्ञासानुरोधेन। जिज्ञासा तु त्रिष्वेव न तु शास्त्रान्तरवत् षोडशधा। तस्यात्मोपयोगाभावात्। आत्मार्थमेव हि जिज्ञास्यम्। तदाह—तत्त्वजिज्ञासुनाऽऽत्मन इति। प्रमेयं ज्ञानम्, प्रमाणं वैराग्यम्, विषयो दशविधलीलाभक्तिः। आत्मनस्त्वेतावदेवोपयुज्यते। अन्यत्तु देहाद्यर्थम्। एवं निरूप्याऽऽन्तरं निराकृत्य त्रिष्वप्युपपत्तिमाह—अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदेति। अन्वयव्यतिरेकाभ्यामित्युपपत्तिः। यदित्यादि त्रयमुद्देश्यम्। तत्र [1]सर्वं भगवान् कथमित्याकाङ्क्षायामन्वयव्यतिरेकाभ्यामिति। सर्वत्र भगवतोऽन्वयोऽस्ति। घटः सन् पटः सन् भासत इति प्रियमिति च सर्वत्रैवैकस्याऽन्वयः। अन्यथा एकशब्दानुवृत्तिः प्रतीत्य[2]नुवृत्तिर्वा न स्यात्। विशेषेणाऽतिरिच्यत इति व्यतिरेकः। घटादिभ्यः किमतिरिच्यते। घटस्तु घटान्नाऽतिरिच्यते तथा पटः पटात्। किन्तु सद्घटादप्यतिरिच्यते पटादपि। एवं सर्वत्र यत्सर्वं सत्सर्वस्मादतिरिच्यते तद्ब्रह्मैव। नन्वेकमेव [3]ब्रह्मत्वसाधकमस्तु किं द्वाभ्यामिति चेन्न। अन्वयेन ब्रह्मत्वं न सिद्ध्यति। जगति जगतोऽप्यन्वयात्। यद्यपि घटादेर्व्यतिरिच्यते जगत्तथापि जगतो न व्यतिरिच्यते। खपुष्पादिकं तु जगतो व्यतिरिच्यते परं नाऽन्वेति। सत् जगतो व्यतिरिच्यते। भगवतोऽपि सत्त्वात्कारणत्वाऽपि सत्त्वात्। अतो यस्याऽन्वयव्यतिरेकौ तदेव सर्वम्। किञ्च। यत्सर्वत्र स्यात्। यद्वा सर्वदा देशकालौ यस्य परिच्छेदकौ न भवतः। तत्राप्यन्वयव्यतिरेकाभ्याम्। माया ह्यन्वयेन परिच्छिद्यते। न हि मायाविषये आभासे सदन्वयोऽस्ति। न चाऽऽभासः [4]सतो न व्यतिरिच्यते स्वस्यैवाऽसत्त्वात्। भगवांस्तु मायायामप्यस्ति। अतिरिक्तेऽपि। एवं कालेऽपि। विषये घटे सत्कारणम्, सत्कार्यम्, सदाधारः, सदाधेयम्।[5] सत्त्वेऽप्यतिरिक्तता। न हि मृदेव घटः। तदा मृदवस्थायामपि घटप्रतीतिः स्यात्। घटशब्दप्रयोगश्च। एवं कार्ये सर्वदा पञ्चधा भगवानन्वेति। पञ्चधा च[6] व्यतिरिच्यते। घटो हि पटादिभ्यो व्यतिरिच्यते। कारणादपि व्यतिरिच्यते। घटान्तरादपि व्यतिरिच्यते। आविर्भावात्तिरोभावाच्च व्यतिरिच्यते। घटस्य ह्याविर्भावस्तिरोभावश्च। अत एकस्मिन्घटे आविर्भावतिरोभावाभ्यां दशधा भगवानस्ति। एवं सर्वत्र दशलीलायुक्तो भगवान्। अनेन स्वरूपं भगवान्। देशप्रतीतिस्तु

---

१. सर्वत्रेति ग.। २. त्यनुपपत्तिर्वेति ख. ग.। ३. ब्रह्मसाधकमिति ग.। ४. तत इति ग.। ५. सदाधेयमिति नास्ति ख.। ६. च नास्ति ग.।

मायिकी । कालप्रतीतिस्तु लीलया । एवं देशकालवस्त्वपरिच्छिन्नं देशकालवस्तुरूपं चाऽहमेवेति । एतावदेव जिज्ञास्यम् । इदमेवोपपत्त्या विचारितम् । उत्पत्त्या च । "पुरुष एवेदँ सर्वम्" "वितस्तिमधितिष्ठती"ति । उद्देशे च "न यतोऽस्ति किञ्चित्" "प्रादेशमात्रं पुरुषं वसन्तमि"ति च । एवं भगवतो ब्रह्मणः शिक्षा निरूपिता । ब्रह्मरूपं जगज्ज्ञातव्यं जगतो व्यतिरिच्यत इति न तत्राऽऽसक्तिः कर्त्तव्या । एकस्मिन्नपि पदार्थे सर्वलीलासहितो भगवानस्तीति च देशकालवस्तुरूपः सन् देशकालवस्तुभ्यो व्यतिरिच्यत इति ॥ ३५ ॥ ❀ ❀ एवं शिक्षां निरूप्य गर्वाभावे एतदनुसन्धानमेव कारणमित्याह—एतन्मतमिति । सर्वं भगवान् । अन्यथाप्रतीतिर्मायया । सर्वत्र भगवान् सर्वलीलासहितः सर्वदोषविवर्जित इति एतन्मतं मम भगवतः । इदं हि भगवच्छास्त्रं मम आतिष्ठ । यथा तत्तन्मतानुसारिणस्तत्र तत्र प्रतिष्ठितास्तथा भवानप्यस्मिन्मते प्रतिष्ठितो भवतु । अतः कुतर्का बहव उत्पत्स्यन्ते ते सर्वेऽनुभवेनैव दूरीकर्त्तव्याः । तदाह—परमेण समाधिनेति । समाधिश्चित्तैकाग्र्यम् । सूक्ष्मदृष्ट्यैतज्ज्ञातव्यम् । आपाततो दृष्ट्या विचारेण वा नैतन्मतं ज्ञातं भविष्यति । ज्ञाते त्वस्मिन्महाकल्पेऽवान्तरकल्पेषु च सृष्टिप्रलययोर्न मुह्यति । किञ्च । कर्हिचिदपि न मुह्यति । कदाचिदपि माया तं न व्यामोहयति । अस्य मतस्य मायायाश्च विरोधात् । तत्रैव माया यत्रैवैतन्मतं नास्तीत्यर्थः ॥ ३६ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

एतावदेवेत्यत्र । ननूक्तविषयवदवान्तरविषयाणां बहूनां सत्त्वात्कथं निरूप्यान्तराभाव इत्यत आहुः निरूपणं त्वित्यादि । प्रमेयं ज्ञानमित्यादि । अत्रायमर्थः, भगवता नृणां श्रेयोविधित्सया ज्ञानकर्मभक्तयो मयोक्ता इति वक्ष्यते, तथासत्यात्मनस्त्रयमेवोपयोगाय । तत्र प्रमेयं स्वरूपं ज्ञानसाधनत्वाज्ज्ञानविषयत्वाज्ज्ञानरूपत्वाच्चोपयुज्यते । एवं प्रमाणं वेदः कर्मप्रतिपादकः ~~परोक्षवादेन वैराग्ये पर्यवस्यतीति वैराग्याद्युपयुज्यते । तथा विधयो निरूढमभावत्वं भक्तौ पर्यवस्यतीति भक्तिरप्युपयुज्यते ।~~ 'भगवान् ब्रह्म कार्त्स्न्येने'त्यत्र साधनकथनांशस्य तत्र पर्यवसानाच्च । तथा च, ज्ञानत्वाद् वैराग्यत्वाद् भक्तित्वाच्च त्रयमेव तथा इत्येतावदेव ज्ञातुमिष्टत्वाद्विचार्यं नान्यदित्यर्थः । उपपत्तिमिति भगवदात्मकत्वबोधिकां युक्तिम् । यत् स्यादित्यस्याग्रे सर्वत्रेत्यादिपदादत्रापि विभक्तिविपरिणामेन सर्वपदमेव विवक्षितमित्याशयेनोक्तस्वारस्येन च विवृण्वन्ति तत्र सर्वमित्यादि । एकस्येत्यादि । सच्चिदानन्दरूपस्य ब्रह्मणः अन्वयः, अनु एति इत्यन्वयः, अनुगताकारत्वमित्यर्थः । तत्र युक्तिः अन्यथेत्यादि । तथा च, यदि सच्चिदात्मकं सर्वं न स्यात्सर्वत्र सदादिपदानुवृत्तिः सदादिप्रतीत्यनुवृत्तिश्च न स्यात् । यस्मादेवं तस्मादेवमित्यर्थः । अत्र 'महेन्द्रगुग्गुलूलूकव्यालग्राहेषु कौशिक' इति कोशान्महेन्द्रादिषु कौशिकशब्दानुवृत्तिवन्न तदन्वय इत्यत उक्तं प्रतीतीत्यादि । तथा चैकप्रतीत्यनुगम एव मुख्योन्वय इत्यर्थः । नन्वेवमन्वय उपपद्यते परं व्यतिरेकस्य यदभावे यदभावात्मकत्वाद्भगवतो व्यापकत्वेन तदभावस्य क्वाप्यभावात् स कथमुत्पत्स्यत इत्याकाङ्क्षायां तत्स्वरूपमन्यदाहुः विशेषेणेत्यादि । न चैवं ब्रह्मापि न व्यतिरिच्यत इत्यव्यतिरेकः शङ्क्यः, सर्वस्य पक्षत्वेन ततो व्यतिरेकस्यैवात्र विवक्षितत्वेनादोषात् । ननु व्यतिरेक एव साधकोस्तु किमन्वयेनेत्याकाङ्क्षायामाहुः खपुष्पेत्यादि । कारणस्येति परमाणुप्रकृत्यादेः । अत इति अन्वयव्यतिरेकयोरन्यतरस्यैकस्यासाधकत्वात् । ननु प्रीत्यप्रीतिविषादैः कारणस्यान्वयदर्शनाज्जगद्व्यतिरेकस्यापि दर्शनाच्च कथं भगवतः सर्वत्वनिर्णय इति शङ्कायामाहुः किञ्चेत्यादि । वाशब्द एवकारार्थो वाक्यालङ्कारे । परिच्छेदकौ व्यापकौ । तत्रापीति परिच्छेदकत्वेपि । तथा च, प्रीत्यप्रीतिविषादेष्वपि सदन्वया 'दव्यक्तमक्षरे लीयतेऽक्षरं तमसि लीयते, तमः परे देवे एकीभवती'ति परदेवस्य व्यतिरेकश्रावणाच्च कारणस्यापि परदेवः कालश्च परिच्छेदकः, परमाणूनां तु देशोपि, अतस्तदात्मकं न सर्वं किन्तु सदात्मकमित्यर्थः । ननु परिच्छेदकत्वे उभयोः किं प्रयोजनमेकेनान्वयेनैव देशकालयोः परिच्छेदसम्भवात । सती माया सन् काल इत्येकप्रतीत्यनुगमदर्शनादिति शङ्कायामाहुः माया हीत्यादि । अन्वय इति भिन्नं पदम् , नेति भिन्नम् , तथा च, मायायाः सदन्वयपरिच्छेद्यत्वेपि तत्कार्यस्य तदपरिच्छेद्यत्वात्सद्व्यतिरेकस्य विद्यमानत्वाच्च कार्यांशेऽन्वयापरिच्छेद्यत्वमुभयमावश्यकमित्यर्थः । ननु तर्हि व्यतिरेक एव परिच्छेदकोस्तु किमन्वयेनेत्यत आहुः भगवानित्यादि । तथा चान्वयस्य विद्यमानत्वात्सोप्यदण्डवारित इत्यर्थः । एतदेव कालेति दिशन्ति एवं काल इत्यादि । तथा च, कालः सन्निति प्रतीत्यनुगमात्सतो मायादावपि वर्त्तमानत्वेन कालव्यतिरिक्तत्वाच्च कालः सत्परिच्छेद्य एव, न तु परिच्छेदक इत्यर्थः । एवं मानानुगमात्सर्वत्र भाति परिच्छेद्यतापि । न च प्रियत्वाननुगमः शङ्क्यः, सर्वप्रियत्वस्याभावेपि यत्किञ्चित्प्रियत्वस्य सर्वत्रानुगमात् । न चाभासे व्यभिचारः, आश्चर्यजनकत्वेन तत्राप्यनुगमात् । वस्तुतस्तु तस्यासत्त्वाद्भ्रातिगतमेव तत्रयं तत्र भासते इत्यननुगमेप्यदोष इति तस्मादन्वयव्यतिरेकाभ्यां सर्वं ब्रह्मेत्यनुभवसिद्धम् । नन्वेवं सर्वस्य ब्रह्मत्वं सिद्ध्यति न तु भगवत्त्वं दशलीलायुक्तत्वाभावादित्याशङ्कायां भगवत्त्वाय दशलीलायोगं व्युत्पादयन्ति विषय इत्यादि । अतिरिक्ततेति अधिकाकारता, तां व्युत्पादयन्ति न हीत्यादि । तथा सत्त्वेप्यतिरिक्तता नाम तद्रूपत्वेपि तदतिरिक्ताकारतेत्यर्थः । व्यतिरिच्यत इति व्यावृत्ताकारो भवति । तत्र हेतुद्वयमाहुः आविर्भावत्तिरो-

---

७. तिष्ठेति ख. ग. ।

भावाच्चेति । नन्वेतयोर्हेतुत्वेन प्रवेशात्तत्कार्यरूपो व्यतिरेकस्त्रिधैव सिद्ध्यतीति कथं पञ्चधेत्याकाङ्क्षायामाहुः घटस्याविर्भावस्तिरोभावश्चेति । तथा च, तौ व्यावृत्तिरूपत्वादेव व्यावर्त्तकौ व्यावृत्तिरेक इति ताभ्यां स एवातिरिच्यते इति पञ्चप्रकारकत्वमुपपन्नमेवेत्यर्थः । न चाविर्भावस्येतरेभ्यो व्यावर्त्तकत्वाद्व्यावृत्तत्वाच्च पृथक्त्वापरपर्यायत्वेनास्तु व्यतिरेकत्वं तिरोभावस्य त्वभावरूपत्वान्न व्यतिरेकत्वमिति वाच्यम्, घटप्रतियोगिकतिरोभावे इतरव्यावर्त्तकत्वस्य स्पष्टत्वेन व्यतिरेकत्वस्य स्फुटत्वात् । न चाविर्भावेनैव व्यावृत्तिसिद्धौ तिरोभावस्यानावश्यकत्वादप्रयोजकत्वमिति वाच्यम्, आविर्भावस्याव्याप्यवृत्तित्वेनान्यत्र तत्तिरोभावाभ्युपगमात्, प्रकृतेपि घटः पटो नेति समानाधिकरणप्रतीत्युपपत्त्यर्थमावश्यकत्वात् । न चेतरतिरोभाव एव घटाविर्भाव इति वाच्यम्, तस्य व्याप्यवृत्तित्वे घटाप्रतीतिप्रसङ्गात् । अव्याप्यवृत्तित्वे च तिरोभावप्रतियोगिकतिरोभावकल्पनाया आवश्यकत्वे कल्पनातौल्याद्भावप्रतीतेश्चाविर्भावाभ्युपगमस्यैवौचित्यमिति नान्यतरेण निर्वाह इति दिक् । फलितमाहुः अत इत्यादि । यत उभयोरप्यावश्यकत्वं यत आविर्भावस्य पञ्चधान्वयप्रत्यायकत्वं तिरोभावस्य च त्रिविधव्यतिरेकप्रत्यायकत्वमुभयोर्व्यतिरेकरूपत्वञ्च' अत एकस्मिन् घटे आविर्भावतिरोभावाभ्यां कारणतोपहिताभ्यां स्वरूपसद्भ्यां चाभ्यां दशधा भगवान् अस्ति सद्रूपः प्रतीयत इत्यर्थः । एवमेकत्र व्युत्पाद्यान्यत्राप्यतिदिशन्ति एवमित्यादि । तथा च, भगवत्यनन्ते द्वितीयपुरुषे तृतीयस्कन्धोक्तप्रकारेण प्रथमपुरुष एवं वर्त्तमाना तदंशेष्वेवं भवतीति सर्वत्रैवं दशलीलात्मकत्वं निश्चेयमित्यर्थः । एवं श्लोकार्थं विविच्य निर्गलितमर्थमाहुः अनेनेत्यादि । जिज्ञास्यमित्यन्तम् । अनेनेतिश्लोकत्रये उपपत्तिपूर्वकं त्रितयपदार्थोपदेशेन । कालप्रतीतिस्तु लीलयेति, उत्पत्त्यादिसम्बन्धघटकभूतादिकालप्रतीतिस्तु क्रमिकाविर्भावात्मकलीलया । नन्वत्र सर्वं भगवानिति सिद्धान्तितम्, पूर्वाध्यायेषु तु कर्तृवादोपि प्रत्यायित इति कथमनयोरविरोध इत्यत आहुः इदमेवेत्यादि । इदमेव श्लोकत्रयोक्तं सर्वं भगवानिति प्रमेयमेव उपपत्त्या अन्वयव्यतिरेकाभ्यां विचारितम् । उत्पत्त्या जननादित्रितयरूपया । पुरुषेत्यादि । पद्येषु इति । एवं विरुद्धधर्माश्रयत्वेन उद्देशे च न यत इत्यादिषु, तेनैव धर्मेणेदं विचारितमतो न विरोध इत्यर्थः । चतुर्णां फलितार्थमाहुः एवमित्यादि । अथ पूर्वाध्यायस्थाशङ्कां तदध्यायस्थोत्तरयोः सम्यग्बोधार्थमुभयार्थः सङ्गृह्यते । तत्र शङ्का, 'तस्माद्भारते'त्यत्र यत्सर्वात्मकत्वमुक्तं तन्मुख्यवृत्त्या गौण्या वा ? नाद्यः, स्वस्मिन् स्वप्रसादानुपपत्त्या स्वाभिन्ने ब्रह्मणि प्रसादस्यासङ्गत्यापत्तेः, भेदमन्तरेणोत्पत्तेरशक्यवचनतया उत्पन्नपद्मस्य देहाद्भिन्नत्वेन जगतश्च पद्माधेयत्वेन ततोपि भिन्नतया देहे सर्वात्मकत्वस्य दूरापास्तत्वाच्च । नान्त्यः, औपचारिकस्य सर्वात्मकत्वस्य मनोराज्यतुल्यत्वेनोद्यतकामानिवर्त्तकत्वात् । एवमुभयथापि सर्वात्मकस्यासङ्गतत्वात्तदतिरिक्ताकाराप्रसिद्ध्या साकारब्रह्मत्वे विघटिते भगवद्देहस्य पद्मोत्पत्त्यतिरिक्तप्रयोजनाभावात् । तेन च सर्वात्मकत्वानिर्वाहाज्जीवतुल्यत्वापादकः सर्वात्मकत्वविघटको देहसम्बन्धः किमर्थ इति पूर्वपक्षसङ्ग्रहः । तत्रोत्तरं 'चात्मतत्त्वे'ति पद्येन भगवद्वाक्योपक्षेपं प्रतिज्ञाय चतुःश्लोक्या शुकेनोच्यते । तत्र चान्वयव्यतिरेकाभ्यां भगवति सर्वात्मकत्वस्य निःप्रत्यूहत्वेन सर्वात्मपदस्य मुख्यवृत्त्या बोधकत्वादन्यथाप्रतीतेर्मायिकत्वेन हिताकरणादिदोषाणां जीवबुद्धिभ्रमकल्पितत्वेन तत्राभावात् । उत्पत्त्यादिघटकभूतादिकालप्रतीतेर्लीलाजन्यत्वेनोपस्थितहान्यकृताभ्यागमानवकाशादेभ्य एव भगवत्त्वोपपत्तेश्चेश्वरत्वोपपत्त्या च जीवतुल्यतापरिहारादिच्छया लीलार्थं देहसम्बन्धः स्वतन्त्रत्वेनादुष्ट इति पूर्वोक्तमनवद्यमिति समाधानसङ्ग्रहः । 'अतस्तस्मै स्वलोकमि'त्यारभ्य 'स्व एव धामन् रममाणमीश्वरमि'त्यन्तग्रन्थस्य 'मत्स्थानि सर्वभूतानी'त्येतत्पद्यविस्तारत्वं ज्ञेयम् । तत्र 'पश्ये'ति मध्यमपुरुषप्रयोगेण विरुद्धधर्माधारत्वप्रदर्शनादत्रापि ब्रह्मणे तत्प्रदर्शनावगमात् ॥ ३५ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

ज्ञानसाधनमाह—एतावदिति । आत्मनः परमात्मनस्तत्त्वं याथार्थ्यं जिज्ञासुना एतावदेव जिज्ञास्यं विचार्यम् । एतावदिति किमित्यपेक्षायामाह—अन्वयः कार्येषु कारणत्वेन सद्रूपेणानुवृत्तिः, कारणावस्थायां च तेभ्यो व्यतिरेको व्यावृत्तिः, एवमन्वयव्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा च यत्स्यात्तदेव परमात्मस्वरूपमिति ॥ ३५ ॥ ❀ ❀ यत्प्रार्थितं 'नेहमानः प्रजासर्गं बध्येयम्' इति तत्प्रसादीकरोति—एतदिति । परमेण समाधिना चित्तैकाग्र्येणैतन्मतं सम्यगनुतिष्ठ निरन्तरमनुचिन्तय । एवं चेन्महाकल्पे ये विकल्पा अवान्तरकल्पास्तेषु भवान् कर्हिचिदपि न विमुह्यति, कामक्रोधाभिमानाद्यभिभूतो न भविष्यतीत्यर्थः । अतो ब्रह्मणः कचित्कामक्रोधाद्यभिभव एतद्विस्मरणादेवेति ज्ञेयम् ॥ ३६ ॥

### हिन्दी अनुवाद

यह ब्रह्म नहीं, यह ब्रह्म नहीं—इस प्रकार निषेधकी पद्धतिसे और यह ब्रह्म है, यह ब्रह्म है—इस अन्वयकी पद्धतिसे यही सिद्ध होता है कि सर्वातीत एवं सर्वस्वरूप भगवान् ही सर्वदा और सर्वत्र स्थित हैं, वही वास्तविक तत्त्व हैं । जो आत्मा अथवा परमात्माका तत्त्व जानना चाहते हैं, उन्हें केवल इतना ही जाननेकी आवश्यकता है ॥ ३५ ॥ ❀ ❀ ब्रह्माजी ! तुम अविचल समाधिके द्वारा मेरे इस सिद्धान्तमें पूर्ण निष्ठा कर लो । इससे तुम्हें कल्प-कल्पमें विविध प्रकारकी सृष्टिरचना करते रहनेपर भी कभी मोह नहीं होगा ॥ ३६ ॥

**श्रीशुक उवाच**

**सम्प्रदिश्यैवमजनो जनानां परमेष्ठिनम् । पश्यतस्तस्य तद् रूपमात्मनो न्यरुणद्धरिः ॥३७॥**
**अन्तर्हितेन्द्रियार्थाय हरये विहिताञ्जलिः । सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत् ॥३८॥**
**प्रजापतिर्धर्मपतिरेकदा नियमान् यमान् । भद्रं प्रजानामन्विच्छन्नातिष्ठत् स्वार्थकाम्यया ॥३९॥**
**तं नारदः प्रियतमो रिक्थादानामनुव्रतः । शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥४०॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

एवं संप्रदिश्योपदिश्य । जनानां परमेष्ठिनं परमे आधिपत्ये स्थितं ब्रह्माणम् । आत्मनस्तद्रूपं न्यरुणदंतर्हितवान् ॥३७॥ ❀ ❀ अंतर्हित इंद्रियार्थः प्रत्यक्षरूपं येन तस्मै । बद्धांजलिः सन् ॥ ३८ ॥ ❀ ❀ तदनंतरं पूर्वोक्तो ब्रह्मनारदसंवादः प्रवृत्त इत्याह प्रजापतिरिति पंचभिः । प्रजानां भद्रमन्विच्छन् विमृशन् सैव स्वार्थे काम्या स्वप्रयोजनेच्छा तया यमनियमानन्वतिष्ठत् ॥ ३९ ॥ ❀ ❀ रिक्थादानां पुत्राणां मध्ये प्रियतमस्तं पितरं सेवमानः शीलादिना परितोषयामासेत्युत्तरेणान्वयः ॥ ४० ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

जन्मनो रूपं न्यरुणत् अनेन वैकुंठस्याप्यात्मरूपत्वमेवांगीकृतमिति । अत्र संदर्भः तदेवं श्रीमद्भागवतं संक्षेपेणोपदेक्ष्यंतं श्रीनारदं ब्रह्मापि तथैव संकल्पं कारितवान् 'यथा हरौ भगवति नृणां भक्तिर्भविष्यति' इत्यादि श्रीनारदेनापि 'अथो महाभाग भगवानमोघदृक्' इत्यादिना तन्महापुराणाविर्भावार्थं तयैवोपदिष्टम् ॥ ३७ ॥ ❀ ❀ अंतर्हितः स्वभक्तचक्षुरादीनामर्थः परमपुरुषार्थः स्वसौंदर्यसौस्वर्यसौरभ्यादिको येन तस्मै स ब्रह्मा पूर्ववत् पूर्वपूर्वस्मिन्व्यतीते कल्प इत्यर्थः । तेन ब्रह्मणः स्वकन्याभिगमरूपो मोहः पूर्वकल्पे तत्रैवाभूत् न तु चतुःश्लोकीभागवतोपदेशानंतरमपि 'भवान्कल्पविकल्पेषु न विमुह्यति' इति भगवदुक्तेः । यत्तु कृष्णावतारे ब्रह्ममोहनं तत् भगवत्कृपाविलसितमेव ज्ञेयम् ॥ ३८ ॥ ❀ ❀ तदनंतरं च ब्रह्मनारदसंवादः प्रवृत्त इत्याह पंचभिः । यमनियमानातिष्ठत्स्वाचरणेन शिक्षयन् मत्प्रजा यमनियमानातिष्ठंत्वित्येव स्वार्थकाम्या तया ॥ ३९ ॥ ❀ ❀ रिक्थं धनं पैतृकं दायप्राप्तत्वेनाददत् इति रिक्थादाः पुत्रास्तेषां मध्ये प्रियतम इति कर्मयोगज्ञानयोगभक्तियोगानां पैतृकधनानां मध्ये दक्षादयः कर्मयोगमापुः, सनकादयो ज्ञानं, नारदो भक्तिं प्रापेति नारदस्योत्कर्षात् । अनुव्रतः पितृभक्तः ॥ ४० ॥

### श्रीमद्वीरराघवव्याख्या

अजनः कर्मायत्तोत्पत्तिशून्यः हरिर्भगवान् जनानां व्यष्टिभूतानां परमे आधिपत्ये स्थितं प्रति एवमुक्तप्रकारेण संप्रदिश्य तस्य परमेष्ठिनः पश्यतः सतः तच्चतुर्मुखाय प्रदर्शितमात्मनः संबंधिरूपं न्यरुणत्तिरोभावयामास ॥ ३७ ॥ ❀ ❀ अंतर्हितस्तिरोधापित इंद्रियार्थः चक्षुरिंद्रियविषयः प्रत्यक्षरूपं येन तस्मै हरये विहितः रचितः अंजलिर्येन सः सर्वभूतमयः सर्वभूतप्रचुरः स्रक्ष्यमाणदेवादिभूतानि बुद्धिस्थत्वेन भूतविषयकज्ञानप्रचुर इत्यर्थः । स ब्रह्मा इदं विश्वं पूर्ववत्पूर्वकल्पवत् ससर्ज ॥ ३८ ॥ ❀ ❀ तदनंतरं पूर्वोक्तो ब्रह्मनारदसंवादः प्रवृत्त इत्याह प्रजापतिरिति पंचभिः । धर्मपतिर्भागवतधर्माणां प्रवर्तनेन गोप्ता प्रजापतिः ब्रह्मा प्रजानां भद्रं मंगलमन्विच्छन् विमृशन् सैव स्वार्थे काम्या स्वप्रयोजनेच्छा तया कदाचिद्यमान्नियमांश्चान्वतिष्ठदनुष्ठितवान् इत्यर्थः ॥ ॥ ३९ ॥ ❀ ❀ तमनुतिष्ठंतं पितरं रिक्थादानां मरीच्यादिपुत्राणां मध्ये प्रियतमो नारदः शीलादिभिः पर्यतोषयदित्युत्तरेणान्वयः । प्रियतमत्वमेवाह अनुव्रतः पितरं सेवमानः शुश्रूषमाणः श्रोतुकामः शीलेन स्वस्वभावेन प्रश्नरूपेण विनयेन दमेन बाह्येंद्रियदमनेन च चकाराच्छमेनांतरिंद्रियनिग्रहेण च ॥ ४० ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या ।

नेहमान इति प्रार्थितं वरं ददानीत्याह एतन्मतमिति ॥ ३७ ॥ ❀ ❀ तिरोधानातिरोधाने अपि स्वेच्छाधीने इति ज्ञापयन् हरिः स्वरूपं तिरोधत्त इत्याशयेनाह संप्रदर्श्येति । अजनो जननरहितो जननविरुद्धलक्षणो वा हरिर्जनानां रुद्रादीनां सकाशात् परमेष्ठिन उत्तमस्य हिरण्यगर्भस्तद्रूपं प्रादर्शयदात्मनस्तद्रूपं तस्य विरिंचस्य पश्यतः सतो न्यरुणदित्यन्वयः ॥ ३८ ॥ ❀ ❀ भगवतींद्रियविषयादंतर्हिते सति विरिंचेन किं कृतमत्रान्तर्हित इति इंद्रियविषयस्तस्मादंतर्हिताय ब्राह्येंद्रियग्राह्यरूपरहितायेत्यर्थः । सर्वभूतमयः

---

१. प्राचीने पाठे नास्ति ।

सर्वभूतप्रधानः सर्वस्यापि प्रधानत्वात्सर्वमय ईर्यत इति ॥ ३९ ॥ ❁ ❁ सदा स्वेष्टदेवतां सेवमानोऽपि पुमान् विशेषप्रयोजनप्राप्तौ विशेषतस्तदुपास्तिं कुर्यादिति न्यायं दर्शयितुं विरिंचस्य विशेषोपास्तिमाह प्रजापतिरिति। धर्मपतिः संपदि विपदि वा तत्तद्विशेषकार्यप्राप्तौ विशेषतस्तद्योग्यानुष्ठानं कर्तव्यमिति धर्मस्य पालकः प्रजानां भद्रान्वेषणं न स्वार्थं इत्यत उक्तं स्वार्थेति। तदपि स्वप्रयोजनमिति मनीषया मुक्तौ सुखोद्रेकार्थत्वादित्यर्थः। अहिंसासत्यमस्तेयं ब्रह्मचर्यं दयार्जवं क्षमाधृतिर्मिताहारः शौचं चैते यमा दश। तपः संतोष आस्तिक्यं दानमीश्वरपूजनं सिद्धांतश्रवणं चैव ह्रीर्मतिश्च जपो व्रतं एते तु नियमाः प्रोक्तास्तान्सर्वांश्च पृथक् शृणिवत्यादियोगशास्त्रे ॥ ४० ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

आत्मनो रूपं न्यरुणदित्यनेन वैकुण्ठादिकमपि स्वरूपत्वेनैवाङ्गीकृतम्। एवमेव हि व्याख्यातम्। अहमेवासमेवाग्र इत्यत्रापि अत ऋतेऽर्थमित्यत्रापि अर्थशब्दस्याप्यर्थः स अन्तरङ्गवैभव एव भगवान् गम्यते ॥ ३७ ॥ ❁ ❁ अन्तर्हिते इति। अन्तर्हित इन्द्रियाणां चक्षुरादीनां अर्थः परमपुरुषार्थस्वरूपः स्वस्य प्रकाशो येन तस्मै इति व्याख्येयम् ॥ ३८ ॥ ❁ ❁ प्रजापतिरिति। स्वार्थस्य स्वस्रष्टृत्वस्य वांछया नियमान् यमानातिष्ठत् तत्र च किं कुर्व्वन्, प्रजानां भद्रं, मात्रार्थञ्च भवार्थञ्च आत्मनेऽकल्पनाय चेत्युक्तलक्षणमिति ॥ ३९ ॥ ❁ ❁ तमिति युग्मकम् ॥ ४० ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

परमेष्ठिनं स्रष्टारम् आत्मनो रूपमिति वैकुण्ठादिकमपि तस्यैव रूपमिति ज्ञापितम्। न्यरुणत् अन्तर्द्धापयामास ॥ ३७ ॥ ❁ ❁ अन्तर्हित इंद्रियाणां स्वभक्तचक्षुरादीनाम् अर्थः परमपुरुषार्थः स्वसौन्दर्य्यसौस्वर्यसौरभ्यादिको येन तस्मै पूर्व्ववत् पूर्वपूर्वस्मिन् व्यतीते कल्प इवेत्यर्थः। तेन ब्रह्मणः स्वकन्याभिगमरूपो मोहः पूर्व्वकल्पे तत्रैवाभूत् न तु चतुःश्लोकीभागवतोपदेशानन्तरमपि भवान् कल्पविकल्पेषु न विमुह्यतीति भगवदुक्तेः यत्तु कृष्णावतारे ब्रह्ममोहनं, तत्तु भगवत्कृपाविलसितमेव ज्ञेयम् ॥ ३८ ॥ ❁ ❁ तदनन्तरञ्च पूर्व्वोक्तब्रह्मनारदसंवादः प्रवृत्त इत्याह पञ्चभिः। प्रजानां भद्रमन्विच्छन् यमनियमानातिष्ठत् स्वाचरणेन शिक्षयन् मत्प्रजा यमनियमानातिष्ठन्त्वित्येवं स्वार्थकाम्या तया ॥ ३९ ॥ ❁ ❁ रिक्थं धनं पैतृकं दायप्राप्तत्वेनाददते इति रिक्थादाः पुत्रास्तेषां मध्ये प्रियतमम् इति कर्म्मयोगज्ञानयोगभक्तियोगानां पैतृकधनानां मध्ये दक्षादयः कर्म्मयोगं प्रापुः सनकादयो ज्ञानं नारदो भक्तिं प्रापेति नारदस्योत्कर्षात् अनुव्रतः पितृभक्तः मायां बहिरंगशक्तिं कृपां वा तस्या वैचित्रीं ज्ञातुमिच्छन्नित्यर्थः। मायेशस्य मायाभर्त्तुः मायया कृपया ईष्टे तस्येति वा ॥ ४० ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अजनो नित्यशरीरी जनानां हरिः नानावतारैः क्लेशहरणस्वभावः परिमेष्ठिनं ब्रह्माणं प्रति एवमुक्तरीत्या संदिश्योपदिश्य तस्य परमेष्ठिनः पश्यतः यत्परमेष्ठिने दर्शितं तत् आत्मनः रूपं न्यरुणत् अंतर्हितवान् ॥ ३७ ॥ ❁ ❁ सर्वभूतमयः विराट्देहाभिमानी सः परमेष्ठिनः अंतर्हितः इंद्रियार्थः इंद्रियसर्वस्वभूतं रूपं येन तस्मै हरये विहितांजलिः सन् इदं व्यष्टिरूपं जगत्पूर्ववत्ससर्ज सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयदिति श्रुतेः ॥ ३८ ॥ ❁ ❁ ततः पश्चात्पूर्वोदाहृता ब्रह्मनारदसंवादो जात इत्याह प्रजापतिरिति पंचभिः। प्रवृत्तिनिवृत्तिवेदेनोभयविधस्य धर्मस्य पतिः यतः उभयविधायाः प्रजायाः पतिः परमेष्ठिनः प्रजानामुभयविधानां भद्रं कल्याणमन्विच्छन् स्वार्थकाम्याप्रयोजनेच्छा तया उभयप्रकारानेव यमान्नियमांश्चान्वतिष्ठत् अनुष्ठितवान् ॥ ३९ ॥ ❁ ❁ रिक्थादानां दायभाजां मरीच्यादीनां पुत्राणां मध्ये प्रियतमः नारदः तमनुतिष्ठंतं पितरं परमेष्ठिनं शुश्रूषमाणः सेवमानः विष्णोर्मायां प्रकृत्याख्यां शक्तिं यद्वा माया च वयुनं ज्ञानमिति कोशान्मायां ज्ञानं चेष्टां विविदिषन् शीलादिभिः पर्यतोषयत् परितोषयामासेति द्वयोरन्वयः ॥ ४० ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवमुपदिश्य यत्कृतवांस्तदाह संप्रदिश्यैवमिति। एवं सम्यक्प्रकारेणाऽनुभवारूढपर्यन्तं स्वमतमुपदिश्य स्वयं तिरोदधे बाह्यतः ननु सर्वरूपो भगवान् सर्वप्रतिकृ[1]तिवत् तत्कथं न स्थापितवान्। तथा सति सृष्टिः सुगमा भवति? तत्राऽऽह—**अजन** इति। न जनः अजनः। जनाद्व्यतिरिक्तः। इदं हि रूपं न विश्वरूपं किन्तु तस्माद्व्यतिरिक्तं तस्याऽऽधिदैविकम्। अत एतद्ध्यानादेव कार्यं नत्वेतद्दृ[2]ष्ट्वा कर्त्तव्यम्। अप्रतिकृतिरूपत्वात्। जनस्तु जनस्य प्रतिकृतिर्न त्वजनः। तर्हि कथमयं [3]जनसृष्टिं ज्ञास्यति?

---

१. प्रकृतिवदिति ख. ग.। २. त्वेतद्दृष्ट्वेति घ.। ३. जनदृष्टिमिति ख.।

तत्राऽऽह—जनानां परमेष्ठितमिति। जायन्त इति जनास्तेषां परमो नियामको भावः। यतस्ते जायन्ते तिष्ठन्ति तदधीनाश्च भवन्ति तस्मिन्पदे तिष्ठतीति परमेष्ठी जनोत्पादनाद्यधिकारी। तस्येदं रूपं ध्यानेनोपयोगि न तु साक्षात्। तादृशनिर्माणे त्वस्य न सामर्थ्यम्। यतः पश्यत एव तस्य तद्रूपं न्यरुणत् आवृतवान्। ननु परमकृपालुः किमिति तद्रूपमावृतवान्? तत्राऽऽह—हरिरित। ब्रह्मणो जनानां च सर्वदुःखहर्त्ता। अतो निर्बन्धनिवृत्त्यर्थमुपसंहृतवानित्यर्थः॥ ३७॥ ❀ ❀ ततो यज्जातं तदाह—अन्तर्हितेन्द्रियार्थायेति। इन्द्रियाणामर्थ इन्द्रियार्थः। अन्तर्हितश्चाऽसाविन्द्रियार्थश्च। भगवान् सर्वेन्द्रियातीतोऽपि स्वेच्छया भक्तेन्द्रियाणामर्थरूपो जातः। सर्वेषामपि भगवानर्थ इति सुतरां भक्ताश्रयाणामिन्द्रियाणां चेतनसृष्टिपक्षे तेषामेव मुक्त्यर्थं, जडपक्षे तदधिष्ठातॄणां कृतार्थत्वाय भगवानर्थो भवति। एवं सति ब्रह्मणः समष्टित्वात् तस्य तदंशा[1]नां व्यष्टीनां च निरिन्द्रियत्वं स्यात्। अतस्तेषां दुःखनिवृत्तये पूर्वमिन्द्रियार्थोऽपि सन्निदानीमन्तर्हितः इन्द्रियाविषयो जातः। एवंभवनं ब्रह्मण उपकारायेति ज्ञापयति—हरय इति। अत एव विहितोऽञ्जलिर्येन। विशेषेण हि[2]तोऽञ्जलिर्वा यस्य। भगवांश्चेज्जीवेभ्य उपकरोति तदा जीवैः स उपकारोऽञ्जलिना ग्राह्यः अयमेव जीवानां विहितः। नत्वन्यः कश्चनोपकारः सेवा वा भगवतः कर्त्तुं शक्या। भगवत्स्वरूपस्य दृष्टत्वात्। इदमेव तेषां बहु यद्भगवता क्रियमाणं न निषेध[3]न्ति। शास्त्रतो विदितोऽपि ब्रह्मणा स्वयमप्यनुष्ठित इति विहितः कृत इत्यर्थः। ततो भगवदुक्तार्थानुसन्धानेन स्वयं सर्वभूतमयो जातः। आत्मनोऽपि तथाभावस्य विहितत्वात्। भूतशब्देन प्रादुर्भूतमात्रमुच्यते। भगवदाज्ञया वा यावत्प्रादुर्भूतं तत्सर्वं ब्रह्मणि प्रविष्टमिति वा। तदनन्तरं विश्वं सृष्टवान्। तदा आत्मसृष्टेर्वैषम्यं न भविष्यति अत एव ब्रह्मा[4] सः पूर्ववदेव जातः। जगच्च पूर्ववदेव कृतवान्। यथा भगवता सृष्टं, यथा वा स्वेनैव सृष्टमिति॥ ३८॥ ❀ ❀ एवमुपदेशं कार्यपर्यवसायिनं निरूप्य तस्योपदेशस्य प्रचा[5]रमाह—प्रजापतिरिति। यथा स्वयं भगवदुपदेशेन कृतार्थः एवं सर्वे कृतार्था भवन्त्विति प्रजानां भद्रमन्विच्छन् तेषामधिकाराभावमाशङ्क्य, अधिकारसम्पादने अशक्तिमप्याशङ्क्य, पित्रा [6]'कृतं पुत्राणा[7]मर्थे भवतीति "यस्मिन् जात एतामिष्टिं निर्वपतो" ति श्रुतौ तथा सिद्धत्वात् स्वयं तदर्थं नियमान् यमांश्चाऽऽतिष्ठत् कृतवान्। तत्र विहित एव धर्मः पुत्राणामर्थे भवतीति प्रकारान्तरमाह—प्रजापतिरिति। यथा पतिकृतं भार्यायै भवति तथा प्रजानामपि भविष्यतीति। नन्वेतदपि स्त्रीपरमेव न त्वन्यपरमित्याशङ्क्य धर्मनियामकत्वेन यथा धर्मं प्रेरयेत्तथा तत्र गच्छेदिति स्वयं कृत्वा प्रजाभ्यो दत्तवानिति ज्ञापयितुमाह—धर्मपतिरिति। एकदेति। निश्चिन्ततादशायां भावार्थज्ञा[8]ने प्र[9]चरणकाले वा। नियमा अब्भक्षादयः। यमा अहिंसादयः। इन्द्रियान्तःकरणनियमनमेव यमनियमात्मकम्। यथेन्द्रियाणि लौकिकक्रियायां प्रवृत्तानि ततो नियम्य वैदिकक्रियापराणि क्रियन्ते। एवमन्तःकरणमपि लौकिकज्ञानान्नियम्य वैदिके ज्ञाने योज्यते। तदुभयमपि ब्रह्मा प्रजानामर्थं कृतवानित्यर्थः। नन्वेवं ब्रह्मणो निर्बन्धे को हेतुस्तत्राऽऽह—स्वार्थकाम्ययेति। स्वस्य अर्थः प्रयोजनमिति यावत्। "एतन्मतं मम[10]ऽऽतिष्ठे"ति भगवदाज्ञया मतेऽवस्थितिः कर्त्तव्या। सा च प्रचारणादेव भवति। अतः प्रचारणार्थं तथा कृतवान्। किञ्च। "न पतिश्च स स्यादि"ति वाक्यात् प्रजानां कृतार्थत्वाभावे स्वस्य तत्पतित्वमनर्थायेति स्वार्थमेव तथा कृतवानित्यर्थः॥ ३९॥ ❀ ❀ तस्य तथा करणं फलपर्यवसायि जातमित्याह—तं नारद इति। तं पूर्वोक्तधर्मवन्तम्। नारं द्यति खण्डयतीति नारदः। ददातीति वा। नराणां जी[11]वानां समूहो नारम्। नारदो हि सर्वेषां जीवानां जीवभावं दूरीकरोति। नारायणस्याऽऽधारभूतं हृदयं वा सम्पादयति। अतो नार[12]दोऽत्राऽधिकारी। किञ्च। प्रियाय पुत्राय [13]तद्देयमिति नारदो रिक्थादानां पुत्राणां मध्ये प्रियतमो भवति। रिक्थं धनमाददत इति रिक्थादाः रिक्थं हि बहुविधम्। तत्रेदं मताख्यं परमं रिक्थम्। अतः प्रियतम एवाऽर्हति। यथाऽयं प्रियतमस्तथैव रिक्थमिति। किञ्च। न केवलं प्रीतिविषयः किन्त्वनुव्रतः अनु पश्चाद्व्रतं यस्येति। सेवक इत्यर्थः। सेवको हि स्वामी यत्करोति तदनुगुणं सर्वं करोति। अतो ब्रह्मणा यत्कर्त्तव्यं तत्र साधकोऽयम्। किञ्च। शुश्रूषमाणः सेवां कुर्वाणः। शुश्रूषाभिरताय देयम्। तस्यैव च फलति। शुश्रूषाऽपि न स्वेच्छया कर्त्तव्या किन्तु शीलेन। यथा स्वामिनः शीलं भवति स्वभावो भवति। तद्रोचकेन वा स्वस्यैव सुस्वभावेन विहितमपि तदेव भवति। तदपि न साहङ्कारेण कर्त्तव्यं किन्तु प्रश्रयेण विनयेन। विनीतस्यैव हि सेवा फलपर्यवसायिनी भवति। किञ्च। दमेन इन्द्रियदमनेन। इन्द्रियलोलुपेन कृतं शङ्कोत्पादनान्न प्रसादहेतुर्भवति। चकारादन्येऽपि स्तुत्यादयः प्रजापतितोषहेतवः परिगृह्यन्ते। सा सेवा न स्वतो धर्मरूपा नारदेन क्रियते। किन्त्वितरशेषा॥ ४०॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः।

अन्तर्हितेन्द्रियेत्यत्र। एवं सतीति भगवत्प्रत्यक्षेण इन्द्रियादीनां मोक्षे सतीत्यर्थः। एतेन हरित्वमप्युपपादितं ज्ञेयम्।

---

१. शानां चेति ग.। २. रचित इति ग.। ३. निषेधयन्तीति ख.। ४. ब्रह्मसर्ग इति ग.। ५. प्रकारमिति ख. घ.। ६. कृते इति घ.। ७. पुत्रार्थे इति ग.। ८. ज्ञानेनेति ख.। ९. प्रजारणेति ग.। १०. ममेति भगवदिति ग.। ११. जीवानां नास्ति ख.। १२. नारदोऽधिकारीति ख.। १३. चैतदिति ग.।

विहितत्वादिति भगवत्कृतत्वेन निषेधानर्हत्वादित्यर्थः । तदिति भगवदाज्ञाप्रादुर्भूतमित्यर्थः । अत एवेति भगवदुक्तानुसन्धानादेवेत्यर्थः । पूर्ववदिति पदं संयोगपृथक्त्वेन योज्यमित्याशयेनाहुः पूर्वेत्यादि ॥ ३८ ॥ ❋ ❋ प्रजापतिरित्यत्र । तत्र विहित इति पुत्रोत्पत्तौ विहित इत्यर्थः । तत्र गच्छेदिति धर्मस्तत्र गच्छेदित्यर्थः ॥ ३९ ॥ ❋ ❋ तत्नारद इत्यत्र । जीवभावं दूरीकरोतीति नरस्येदं नारं, जीवभावः प्राणधारणप्रयत्न इति यावत् । तं भगवत्स्वरूपज्ञापनेन निवर्त्तयतीत्यर्थः । सम्पादयतीति नरो जलपिता, तत्सम्बन्धिज्ञानं नारं तद्दानेन । सम्पादयतीत्यर्थः ॥ ४० ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

हरिः स्वजनशोकहर्त्ता भगवान् जनानां व्यष्टिभूतानां परमेष्ठिनं परमे आधिपत्ये स्थितं ब्रह्माणं प्रति एवमुक्तेन प्रकारेण सम्प्रदिश्य तद्ब्रह्मणे प्रदर्शितं आत्मनः स्वस्य रूपं न्यरुणत् तिरोभावयामासेत्यन्वयः । रूपमिति लोकस्याप्युपलक्षणम् । तदन्तर्धानस्याश्चर्यं द्योतयन्नाह—तस्य ब्रह्मणः पश्यत एव सत इति । अन्तर्द्धाने हेतुं सूचयन् विशिनष्टि—अजन इति । प्राकृतजनाद्भिन्न इत्यर्थः ॥ ३७ ॥ ❋ ❋ अन्तर्हितस्तिरोधापित इन्द्रियार्थः । चक्षुरिन्द्रियविषयः स्वरूपं येन तस्मै हरये विहितो रचितः अञ्जलिर्येन स ब्रह्मा पूर्ववत् पूर्वकल्पवदिदं विश्वं ससर्जेत्यन्वयः । तस्य विश्वसृष्टौ न कोऽप्यायासः समष्टिरूपत्वेन व्यष्टीनां तत्र विद्यमानत्वात् किन्तु भगवत्कृपां विना सृष्टिप्रकाराज्ञानमात्रमेव स्थितं तदपि भगवत्कृपया निवृत्तमिति सूचयन् विशिनष्टि—सर्वभूतमय इति ॥ ३८ ॥ ❋ ❋ तदनन्तरं च पूर्वोक्तब्रह्मनारदसंवादः प्रवृत्त इत्याह—प्रजापतिरिति पञ्चभिः । एकदा प्रजापतिर्ब्रह्मा स्वार्थकाम्यया स्वप्रयोजनेच्छया नियमान् स्नानजपादीन् यमान् अहिंसादींश्चातिष्ठत् अनुतिष्ठितवानित्यन्वयः । कोऽसौ प्रयोजनेच्छेत्यपेक्षायामाह—भद्रं प्रजानामन्विच्छन्निति, ममाचारं दृष्ट्वा प्रजा धर्मे प्रवृत्ता भवन्तु ततश्च तासां कल्याणं स्यादितीच्छन्नित्यर्थः । तत्र हेतुमाह—धर्मपतिरिति, यतो धर्मप्रवर्त्तकोऽपि स एवेत्यर्थः ॥ ३९ ॥ ❋ ❋ रिक्थं धनमाददते इति रिक्थादाः पुत्रास्तेषां मध्ये प्रियतमो नारदस्तं नियमादीननुतिष्ठन्तं स्वपितरं स्वशिलादिभिः पर्यतोषयदित्युत्तरेणान्वयः । तस्य प्रियतमत्वे हेतुमाह—शुश्रूषमाण इति, सेवमान इत्यर्थः । साऽपि सेवा न हस्तादिमात्रेण किन्तु चित्तानुवृत्तिरूपेत्याह—अनुव्रत इति ॥ ४० ॥

### हिन्दी अनुवाद

श्रीशुकदेवजी कहते हैं—लोकपितामह ब्रह्माजीको इस प्रकार उपदेश देकर अजन्मा भगवान्ने उनके देखते-ही-देखते अपने उस रूपको छिपा लिया ॥ ३७ ॥ ❋ ❋ जब सर्वभूतस्वरूप ब्रह्माजीने देखा कि भगवान्ने अपने इन्द्रियगोचर स्वरूपको हमारे नेत्रोंके सामनेसे हटा लिया है, तब उन्होंने अञ्जलि बाँधकर उन्हें प्रमाण किया और पहले कल्पमें जैसी सृष्टि थी, उसी रूपमें इस विश्वकी रचना की ॥ ३८ ॥ ❋ ❋ एक बार धर्मपति, प्रजापति ब्रह्माजीने सारी जनताका कल्याण हो, अपने इस स्वार्थकी पूर्त्तिके लिये विधिपूर्वक यम—नियमोंको धारण किया ॥ ३९ ॥ ❋ ❋ उस समय उनके पुत्रोंमें सबसे अधिक प्रिय, परम भक्त देवर्षि नारदजीने मायापति भगवान्की मायाका तत्त्व जाननेकी इच्छासे बड़े संयम, विनय और सौम्यतासे अनुगत होकर उनकी सेवा की ॥ ४० ॥

**मायां विविदिषन् विष्णोर्मायेशस्य महामुनिः । महाभागवतो राजन् पितरं पर्यतोषयत् ॥४१॥**
**तुष्टं निशाम्य पितरं लोकानां प्रपितामहम् । देवर्षिः परिपप्रच्छ भवान् यन्मा[1]नुपृच्छति ॥४२॥**
**तस्मा इदं भागवतं पुराणं दशलक्षणम् । प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ॥४३॥**
**नारदः प्राह मुनये सरस्वत्यास्तटे नृप । ध्यायते ब्रह्म परमं व्यासायामिततेजसे ॥४४॥**
**यदुताहं त्वया पृष्टो वैराजात् पुरुषादिदम् । यथाऽऽसीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ॥४५॥**

**इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीय[2]स्कन्धे नवमोऽध्यायः ॥ ९ ॥**

---

१. प्रा० पा०—भवान् यदनु । २. प्रा० पा०— अत्र 'पुरुषसंस्थानुवर्णनं' मित्यधिकम् ।

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

किमिच्छन् । विष्णोर्मायां विविदिषन् ॥ ४१॥ ॥ ❀ ❀ निशाम्य दृष्ट्वा ज्ञात्वेत्यर्थः । मा माम् ॥ ४२ ॥ ❀ ❀ भगवता चतुःश्लोक्या संक्षेपेण प्रोक्तं विस्तरेण प्राह । दश लक्षणानि लक्षणीया अर्था; विद्यंते यस्मिंस्तत् ॥ ४३ ॥ ❀ ❀ तत्संप्रदायतो भागवतं मया ज्ञातमित्याशयेनाह । नारद इति ॥ ४४ ॥ ❀ ❀ भागवतव्याख्यानेनैव त्वत्प्रश्नानामुत्तरं दास्यामीत्याह । यदुतेति । 'पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः' इत्यादिना वैराजात्पुरुषादिदं विश्वं कथमासीदिति यदहं त्वया पृष्टस्तद्यथावदुपाख्यास्यामि शृण्विति ॥ ४५ ॥

इति श्रीभा० म० द्विती० टी० नवमोऽध्यायः ॥ ९ ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

मायां बहिरंगशक्तिं कृपां वा तस्या वैचित्र्यं ज्ञातुमिच्छन्नित्यर्थः । मायेशस्य मायाभर्तुः मायया कृपया ईष्टे सर्वं वशीकरोतीति मायेशस्तस्येति वा ॥ ४१ ॥ ❀ ❀ शाम्यतिर्दर्शने मित्र" इति ह्स्वाभावः । पिता कश्यपः पितामहो मरीचिः प्रपितामहो ब्रह्मेति विवेकः ॥ ४२ ॥ ❀ ❀ इदं बुद्धिस्थं भगवदुपदिष्टं दशलक्षणमिति जन्माद्यस्येतिवच्चतुःश्लोक्यामपि तत्तदंतर्भावयितुं शक्यत्वात् । तच्च यथा कथंचित्प्रदर्शितमपि न च पूर्णमिदमुपदिदेशेति व्याख्येयं 'त्वमेतद्विपुलीकुरु' इति ब्रह्मणः प्रागुक्तिविरोधात् । केचित्तु प्रथमं संक्षेपेण चतुःश्लोक्या प्रोच्य पुनर्दशलक्षणं द्वादशस्कंधात्मकं सपूर्णमेव भगवता प्रोक्तमित्याहुः । भूतानि चराचराणि करोत्युत्पादयति भगवत्सत्तयेति भूतकृद्ब्रह्मा ॥ ४३ ॥ ❀ ❀ एवं नारायणो ब्रह्मणे ब्रह्मा नारदाय नारदो व्यासाय व्यासो मह्यमहं तुभ्यमाख्यास्ये इति षट्संवादीया भागवती कथा प्रसिद्धेति नारदः प्राहेति च समाधिनानुस्मर तद्विचेष्टितमित्यनेनैवोपदिदेशेत्यर्थः । तेन ब्रह्महृदेतिवत् ब्रह्म परमं निर्विशेषरूपं ध्यायते इत्यनेन ततोत्युत्कृष्टता श्रीमद्भागवतस्य द्योतिता ॥ ४४ ॥

इति श्री भागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कन्धे नवमोऽध्यायः

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

पुरुषावयवैरिति पूर्वाध्यायस्य दशमश्लोकः ॥ ४५ ॥

## श्रीमद्वीरराघवव्याख्या

किमिच्छन्मायाधिपस्य विष्णोर्मायां तन्नियाम्याश्चर्यशक्तिं विविदिषन् वेदितुमिच्छन् ॥ ४१ ॥ ❀ ❀ लोकानां प्रपितामहं स्वस्य पितरं ब्रह्माणं तुष्टं स्वपरिचर्यायां संतुष्टं निशाम्य ज्ञात्वा देवर्षिर्नारदः भवान्मां प्रति यदनुपृच्छति अनुपृष्टवांस्तदेव परिपप्रच्छ ॥ ४२ ॥ ❀ ❀ तस्मै पृष्टवते नारदाय इदं भागवतं भगवता चतुःश्लोक्यात्मना संक्षेपेण उक्तं दशलक्षणं उपरितनाध्यायोक्तै र्दशभिरर्थैश्चिन्हितं पुराणं चतुःश्लोक्यामपि सर्गादयो दशार्थाः संग्रहेण सूचिताः । तथाहि अहमेवासमिति श्लोकेन भगवतः सृष्टिस्थितिसंहारकारणत्वोक्त्या आश्रयसर्गपोषणनिरोधानामुक्तिः अनेनैव सर्वकारणत्वरूपसर्वातिशायित्वोक्त्या वैकुंठविजयरूपस्थितिरप्युक्ता पश्चादहं यदेतच्चेत्यनेन कार्यचिदचिद्रूपव्यष्टिसर्गस्यापि चतुर्मुखशरीरकस्वकारणकत्वोक्त्याविसर्गोपि संगृहीतः परस्परविविक्तत्वेन प्रकृतिपुरुषस्वरूपशोधके ऋतेऽर्थमिति श्लोके आत्मस्वरूपाप्रतीतिदशायां मायास्वरूपप्रतीतिकथनादात्मस्वरूपाप्रतीतिमायाप्रतीत्योरनादिकर्मवासनायत्तत्वप्रतीतेः कर्मवासनारूपा ऊतयोऽपि सूचिताः यथा महांति भूतानीति श्लोके सर्वांतरात्मतया प्रशासितृत्वरूपपालकत्वेनैव पालनाधिकृतभगवदवतारकथानां भगवदनुवर्तिमन्वादिकथानामपि सूचितत्वेन मन्वंतरेशानुकथे अपि सूचिते परमपुरुषशरीरप्रकृतिविलक्षणजीवस्वरूपशोधनेनैव प्रकृतिविनिर्मुक्ता विभूतिगुणाष्टकपरमात्मकस्वरूपेणावस्थितिरूपा मुक्तिरित्यपि सूचितं एवं दशार्थाः संग्रहेण चतुःश्लोक्यामपि सूचिता अतएवैतद्विवरणरूपे द्वादशस्कंधात्मके पुराणे दशार्थानां प्रतिपादनमुपपद्यते भूतकृद् ब्रह्मा प्रीतः प्राह ॥ ४३ ॥ ❀ ❀ स च नारदः सरस्वत्या नद्यास्तटे परमब्रह्म ध्यायते ध्यानं कुर्वतेऽपरिमिततेजसे मुनये वेदशास्त्रार्थतत्वावगन्त्रे व्यासाय प्राह प्रोक्तवान् व्यासस्तु मह्यं प्रोक्तवानित्येतत्तु अधीतवान् द्वापरादौ पितुर्द्वैपायनादहमिति पूर्वमेवोक्तम् ॥ ४४ ॥ ❀ ❀ एवं सत्संप्रदायागतश्रीभागवताख्यानेनैव त्वत्कृतप्रश्नानानुत्तराण्यभिधास्यामीत्याह यदुतेति । इदं विश्वं वैराजात् वैराजाख्यादनिरुद्धसृष्टाच्चतुर्मुखाद्यथा आसीदिति यत्वयाऽहं पृष्टः अतः सृजति भूतानि भूतात्मा यदनुग्रहादित्यादिना तदुपाख्यास्ये भागवताख्यानेनोत्तरयाम्यन्यांश्च प्रश्नान्कर्तृत्वेनोपाख्यास्य इत्यर्थः । एवं यत्र शेते इत्य-

स्योत्तरमुक्तं भवति परमव्योमकथनादप्राकृतशुद्धसत्वमयलोकस्य परिग्रहकथनेनेश्वरस्य जीववद्धातुभिर्देहारंभप्रश्नः प्रत्युक्तः अन्यत्र व्याप्तिकथनात्परिच्छिन्नत्वमपि परिहृतम् ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे द्वितीयस्कंधे वीरराघवकृतटीकायाम् नवमोऽध्यायः ॥ ९ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

रिक्थं पित्र्यं धनमाददत इति रिक्थादाः पुत्रास्तेषां मध्ये नारदोऽतिशयेन प्रियः ॥ ४१ ॥ ❀ ❀ मायां जगत्स्रष्टृत्वादिमाहात्म्यो वावदिषुर्ज्ञातुकामः । मायेशयाऽन्येषां माहात्म्यानां पतेः मुख्यतो विष्णुमाहात्म्यं मायाशब्दोदितं भवेत् प्रधानत्वाच्च मातृत्वान्मेयत्वं चैव तस्य हीति ॥ ४२ ॥ ❀ ❀ पितृतोषणप्रयोजनमाह तुष्टमिति ॥ ४३ ॥ ❀ ❀ भगवता स्वस्य प्रोक्तं भूतं सत्तावत्सत्यं जगत्करोतीति भूतकृत् ॥ ४४ ॥ ❀ ❀ नारदस्येति संकल्प्य वर्णयेति स्वपित्राज्ञापालनप्रकारमाह नारद इति । मुनय इत्यादिविशेषणेभ्यो व्यासस्य सार्वज्ञ्यादिप्रतीतेर्नारदादिभ्यः श्रवणं मोहनार्थमिति ज्ञातव्यं तदुक्तं हरिर्व्यासादिरूपेण सर्वज्ञोऽपि स्वयं प्रभुरित्यादि❀ । अधुना परीक्षित्प्रश्नपरिहाराय श्रीभागवतव्याख्यानं पृथक्पृथक्प्रश्नप्रतिवचनं च प्रतिजानीते यदुतेति यत्पुराणपरिज्ञानं व्यासकृतं भागवतपुराणं तवोपाख्यास्ये तत्पुराणं व्याकुर्वन् प्रथमतः सर्वेशत्वाद्विराडाख्यविरिंचस्थतत्वाद्वैराजपुरुषाख्यहरेरिदं विश्वं यथासीत् तथोपाख्यास्ये प्रत्यहं त्वया पृष्टस्तउताऽथान्यान्प्रश्नांश्च कृत्स्नशो व्याख्यास्ये इत्यन्वयः । श्रीभागवतप्रथमकथानारायणोद्भूतविराड्विरिंचस्थहरेरधिदैवादिसर्वजगत्सृष्टिरुतापीति वा उताप्यर्थविकल्पयोरित्यभिधानम् ॥ ४५ ॥

इति श्रीभागवते म० द्वितीयस्कंधे वि० नवमोऽध्यायः ॥ ९ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

मायां कृपां विविदिषन् तस्या वैचित्रीं ज्ञातुमिच्छन्नित्यर्थः । मायेशस्य मायया कृपया ईष्टे सर्वं वशीकरोतीति तस्य ॥ ४१ ॥ ❀ ❀ तुष्टमिति भवान् यन्मानुपृच्छतीत्यादिकं तत्र तत्र तत्तत्सर्वस्य समावेशयितुं शक्यत्वात् ॥ ४२ ॥ ❀ ❀ तस्मा इति दशलक्षणमिति जन्माद्यस्येतिवत् चतुःश्लोक्यामपि तत्तदन्तर्भावयितुं शक्यत्वात् न च पूर्णमुपदिदेशेति व्याख्येयम् । त्वमेतद् विपुलीकुर्विति ब्रह्मणः प्रागुक्तिविरोधात् ॥ ४३ ॥ ❀ ❀ नारदः प्राप्तेति च समाधिनानुसरतद्विचेष्टितमित्यनेनैनोपदिदेशेत्यर्थः, तेने ब्रह्महृदेतिवत् ब्रह्म परमं निर्विशेषरूपं ध्यायते इति ततोऽप्युपर्येतत्द्योतितम् ॥ ४४ ॥ ४५ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भेऽनवमोऽध्यायः ॥ ९ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

निशाम्य दृष्ट्वा मा माम् ॥ ४२ ॥ ❀ ❀ भगवता चतुःश्लोक्या संक्षेपेण प्रोक्तं विस्तरेण दशलक्षणं ब्रूहीत्याह । चतुःश्लोक्या संक्षेपेण प्रोच्य दशलक्षणं द्वादशस्कंधात्मकं संपूर्णमेव भगवता प्रोक्तमिति च केचदाहुः ॥ ४३ ॥ ❀ ❀ एवं नारायणो ब्रह्मणे प्राह ब्रह्मा नारदाय नारदो व्यासाय व्यासो मह्यम् । अहं तु तुभ्यमाख्यास्य इति भागवतीया कथा षट्संवादीया प्रसिद्धा ॥ ४४ ॥ ❀ ❀ श्रीभागवताख्यानेनैव तव प्रश्नानामुत्तरं दास्यामीत्याह यदुतेति । पृष्ट इति । पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः । शुश्रुमेति वदता त्वया तद्विशेषबुभुत्सया अहं व्यञ्जनया पृष्ट एवेत्यर्थः । यथा यथावत् ॥ ४५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । द्वितीये नवमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ९ ॥

### श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः ।

देवर्षिर्नारदः पितरं तुष्टं स्वपरिचर्यया संतुष्टं निशाम्य ज्ञात्वा यद्भवान्मा मां प्रति अनुपृच्छति पूर्वं पृष्टवान् तत्परिपप्रच्छ ॥ ४१ ॥ ❀ ❀ तदनंतरं भूतकृत् व्यष्टिभूतस्रष्टा प्रीतः सन् तस्मै पृच्छते पुत्राय नारदाय संप्रति चतुःश्लोक्यात्मना प्रोक्तं दशलक्षणानि प्रतिपाद्या अर्था यस्मिंस्तत्पुराणं किंचिद्विस्तरेणाह ॥ ४३ ॥ ❀ ❀ स च नारदः सरस्वत्यास्तटे परं ब्रह्मश्रीकृष्णं ध्यायते व्यासाय प्राह ॥ ४४ ॥ ❀ ❀ स च मह्यं प्रोक्तवान् अहमपि भागवतव्याख्याद्वारैव त्वत्प्रश्नानामुत्तरं दास्यामीत्याह

---

❀ शृणोति नारदादिभ्यो मोहायैषां प्रसिद्धये इति शेषतात्पर्यम् ।

यदुतेति । पुरुषावयवैर्लोका सपालाः पूर्वकल्पिता इत्यादिना वैराजात्पुरुषादिदं कथमासीदिति यदहं त्वया पृष्टः तद्वैराजात्पुरुषादिदं जलमुखादिरूपेणावर्ण्यमानं विश्वं यथाऽऽसीत्तथा कृत्स्नशः उपाख्यास्ये अवशिष्टान् प्रश्नांश्चोपाख्यास्ये ॥ ४५ ॥

इति श्रीमद्भागवतसिद्धांतप्रदीपे द्वितीयस्कंधीये नवमाध्यायार्थप्रकाशः ॥ ९ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

तदाह—मायां विविदिषुरिति । मायेशस्येति सम्बन्धिनिर्देशान्माया जगत्कारणभूता गृह्यते । नतु व्यामोहिका । स हि पूर्वं माययैव तथा भगवान् भवतीति ज्ञातवान् । पूर्वकल्पे तथैव जातत्वात् । एतावानेवाऽत्र विशेषः कश्चित्कदाचित्कारणत्वेन तां स्वीकरोति कदाचिन्नेति । उभयथाऽपि पदार्थे न कोऽपि विशेषः । बुद्धिगम्या च सा भवति प्र¹ष्टुं च शक्यते । व्यवहारस्तु केवले ईश्वरे अयुक्तः अशक्यश्च । अतो विष्णोर्व्यापकस्य त्रितयपरिच्छेदरहितस्य मायां त्रितयरूपां सर्वत्र का²रणभूतां स्वांशमायया मोहिकां दशप्रकारहेतुभूतां च । तदाह—मायेशस्येति । मायां नियमयतीति मायायाः करणता महामुनिरिति अत्यन्तं मननशीलः । स हि द्वितीयां मायां जानाति । अतस्तामपि निवर्त्तयितुं योग्यो भवतीति तथोक्तम् । मुनिरेव स्वहितं जानाति । महामुनिस्तु परमहितम् । किञ्च । महाभागवत इति दशविधलीलाश्रवणाधिकारी । अत्र राजन्निति सम्बोधनं भवानपि तादृश इति ज्ञापनार्थम् । पितरमिति विश्वासाय । परितस्तोषणं फलपर्यवसायि ॥ ४१ ॥ ❀ ❀ अतः किमत आह—तुष्टं नि³शम्येति । निशम्य ज्ञात्वा । शमस्य ज्ञानपरत्वमुक्तम् । तस्योत्कृष्टत्वं सम्यग्ज्ञाने भवति । प्रश्नयोग्यतार्थमाह—पितरमिति । न केवलं स्वार्थम् , किन्तु सर्वार्थमित्याह लोकानां प्रपितामहमिति । "अनुशिष्टेन हि भाव्यं पितुः पुत्रेण ।" अतः पिता मां चेच्छिक्षयेन्मया पुत्रप्राया लोकाः शिक्षणीया इति वक्ष्यतीत्यपि ज्ञातवान् । देवऋषित्वाद्देवानामप्युपास्यं मन्त्रं यः पश्यति स ब्रह्मणो हृदयं जानातीत्यविवादम् । परितः प्रश्नः ससाधनः । यथा त्वया पूर्वपक्षेण पृष्टं तथा तेनापि पृष्टमित्याह—भवान्यन्माऽनुपृच्छतीति ॥ ४२ ॥ ❀ ❀ तदा तस्याऽर्थत्रयं पूर्वमेव ज्ञातमिति सर्वसन्देहनिवारकं तृतीयमेवोक्तवान् । तदाह—दशलक्षणमिति । दश लक्षणान्यन्यानि पुराणान्तरे भवन्ति । तानि लोकप्रसिद्धानि । तद्व्यावृत्त्यर्थमाह—भागवतमिति । भगवता प्रोक्तं भगवत्स्वरू⁴पं प्रतिपाद्यमिति । अनेन प्रथमसिद्धान्तोऽपि कथितः । पुराणमिति लोकप्रतीतिसिद्धत्वात् द्वितीयोऽपि । इदमिति स्वप्रतीतिसिद्धमङ्गुल्या निर्दिशति । अनेन चतुर्थोऽपि कथितः । अनेन चतुःश्लोकोक्तं सिद्धान्तचतुष्टयमपि कथितवान् । प्रामाण्यार्थं परम्परामाह—प्रोक्तं भगवतेति । नन्वेतद्गूढं परमसमाधिगम्यं कथमुक्तवान् । अत आह—प्रीत इति । पुत्रत्वादावश्यकमपि । ननु मायाज्ञानार्थं स प्रवृत्तो मायिकीं भगवल्लीलां तस्मा अनुक्त्वा किमिति सिद्धान्तं कथयति । तत्राऽऽह—पुत्रायेति । अमार्गेणापि गच्छन्पुत्रो निवार्यते । मार्ग एवो⁵पदिश्यत इति । किञ्च । सर्वाण्येव भूतान्ययं करोति । अतः सर्वार्थमेतद्द्वारा प्रकाशितवानित्याह—भूतकृदिति ॥ ४३ ॥ ❀ ❀ ब्रह्मणोऽभिप्रेतमपि कृतवानित्याह—नारदः प्राहेति । व्यासस्य ⁶तादृशश्रवणयोग्यतायै चत्वारि विशेषणानि । तत्र प्रथमं चतुर्थयोग्यता । मुनिर्हि स्वस्वरूपं भगवत्त्वेन ध्यायति । दशलीलापरिज्ञानार्थं परब्रह्म ध्यायत इति । यस्तु पुरुषोत्तमं ध्यायति स हि तस्य दशविधां लीलां ज्ञातुं शक्नोति व्यासायेति । वेदविस्तारकर्तृत्वेन सर्वबुद्ध्यनुरोधित्वात् व्यामोहिकां मायां ज्ञातुं शक्तः । अमिततेजस इति भगवत्स्वरूपं ज्ञातुं शक्तः । अलौकिकं हि तेजो ब्रह्मज्ञाने प्रयोजकं भवति । ब्रह्मज्ञानसाध्यं हि तत् । तथाभूतमत्र भगवज्ज्ञाने उपयुज्यते ॥ ४४ ॥ ❀ ❀ एवं परम्परामुक्त्वा सामान्यतः सर्वदूषणानि परिहृत्य प्रश्नत्वेन पृष्टानर्थान्निरूपयितुमाह—यदुताऽहमिति । उतेति दूषणव्यतिरेकेण केवलं प्रश्नरूपेणाऽपि पृष्टम् । तदपि पृष्टे मया वक्तव्यमिति तदुपाख्यास्ये । तत्र प्रश्ने सामान्यविशेषभेदेन रूपद्वयम् । तत्र सामान्यं रूपं वैराजात्पुरुषात्कथमेतज्जातमिति । विशेषस्तु तत्तद्भेदेन । तदाह—प्रश्नानन्यांश्चेति । अन्यानित्यनेन तदुपयोगिनोऽपि ये अन्येऽपृष्टाः । सर्वमेतत्वेति चकारेण तेऽप्युच्यन्ते । चकारेण ततोऽप्यन्ये अन्यैरपि कृताः । कृत्स्नश इति एकैकः प्रश्नो बहुधा निरूप्यत इत्युक्तम् ॥ ४५ ॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां
द्वितीयस्कन्धे नवमोऽध्यायः ॥ ९ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः श्रीसुबोधिनीप्रकाशः ।

मायामित्यत्र स हीति । नारदो हि व्यवहारस्त्वति ज्ञातृज्ञेयादिरूप इत्यर्थः । त्रितयपरिच्छेदरहितस्येति देशकालवस्तुपरिच्छेदरहितस्य । अत्रेदं बोध्यम् । 'परास्य शक्तिरि' त्यत्र स्वाभाविकी शक्तिर्ज्ञानबलक्रियारूपेण त्रिविधा विविधा

---

१. द्रष्टुमिति ख. । २. कारणभूतामिति ख. । ३. निशाम्येति ख. । ४. स्वरूपप्रतिपाद्यमिति ख. । ५. मेवेति ख. ग. ।
६. तादृशलीलाश्रवणेति ग. ।

आविता, तत्र बलरूपा आनन्दस्य, ज्ञानरूपा ज्ञानस्य, क्रियारूपा सदंशस्य एतस्या विविधत्वं च त्रिगुणाया एतदंशत्वेनाविद्यानिन्द्रादीनां चैतदंशत्वेनेति, अतः सर्वं सूपपन्नमिति ॥ ४१ ॥ ❀ ❀ तस्मा इदमित्यत्र अर्थत्रयमिति ज्ञानं वैराग्यं विचारश्चेत्यर्थत्रयमित्यर्थः। तृतीयमिति 'यथा महान्ति भूतानि' (२-९-३४) इति प्रतिपाद्य भक्तिरूपमित्यर्थः। अथ पूर्वपक्षसङ्ग्रहः। तत्र ब्रह्मणा नोदितः २-८-१ इतिसार्धपद्यस्थेन केषाञ्चिदधिकारः केषाञ्चिन्नेतिपक्षासम्भवनागर्भेण सर्वेऽधिकारिण इति वाक्यविरोधगर्भेण च राजप्रश्नेन 'श्रोतव्यादि'पद्यचतुष्कस्थं साधारणाधिकारनिवारणपूर्वकाभयेच्छूपायकथनरूपं प्रमेयमाक्षिप्तम्। तत्रोत्तरं 'नारदः प्राह मुनय' इतिपद्येन शुकैरुक्तम्। तेन नानाप्रकारककथनोपदेशोपि तादृगधिकारिणं प्रत्येवेति फलति। अन्यथा नारदेन सर्वेभ्य उक्तं स्यात्। किञ्च, 'सर्वेऽधिकारिण' इति वाक्ये विष्णुभक्त्यधिकारोतिदिष्टः स च देवासुरो मनुष्यो वेति वाक्येन। सात्विकराजसयोर्मिश्रेषु च नियम्यते इति ज्ञायते। अन्यथा तामसा अप्युक्ताः स्युः। एवं सति तामसातिरिक्तेषु सत्यप्यधिकारे भजनादर्शनाल्लौकिकरागादेः प्रतिबन्धकत्वं वाच्यम्, तच्च फलप्रत्यनीकत्वादधिकाराभाव एव पर्यवस्यति। तस्मान्न शुकब्रह्मवाक्ययोर्विरोध इति। एवं स्वार्थं मनोनिवेशनोपायप्रश्ननिरूपकचतुष्टयश्लोकमध्ये 'हरेरद्भुतवीर्यस्ये' ति सार्द्धपद्यस्थेन 'तस्माद्भारते' त्युपक्रम्याध्यायद्वयेन स्थूलसूक्ष्माख्यरूपद्वयनिरूपणे अन्तरा 'अथोनन्तस्य मुखानलेने' त्यनेन प्रलय उक्तः। स चोत्पन्नस्यैव सम्भवति 'जातस्य ही' तिवाक्यात्। अतस्तत्कर्त्ता भगवान्, सर्वात्मकत्वं त्वौपचारिकमिति भगवद्वीर्यमेव श्रोतव्यमित्याशयेनोत्पत्त्यादिकर्तृत्वे पृष्टे श्रीशुकैः नारदब्रह्मसंवादमुखेन सर्वात्मत्वं मुख्यवृत्त्या *सर्वकर्तृत्वञ्च माययेत्युक्तम्। एवं द्वैते सति यदप्युक्तमि' त्यारभ्य 'जन्मान्तरे त्वन्यदि' त्यन्तया सुबोधिन्युक्तदिशा भगवतः केवलत्वानुपपत्तिगर्भेण राजप्रश्नेनाद्याध्यायद्वयस्थं प्रमेयमाक्षिप्तम्। तत्रोत्तरं नारदब्रह्मणोर्ब्रह्मभगवतोः संवादमुखेन पूर्वोक्तसमर्थनाय दुर्ज्ञेयत्वज्ञापनाय च चतुःश्लोक्या मायावीर्यादीनां भगवत्त्वप्रतिपादनादुक्तमिति दिक्। 'शृण्वत' इत्यादिश्लोकत्रयस्थाया भगवत्कर्तृकबहुकर्त्तव्यरूपया प्रक्रियया 'किं प्रमत्तस्ये' ति पद्यत्रयस्थं प्रमेयमाक्षिप्तम्। तत्रोत्तरं 'यर्हि वाव महिम्नि स्वे' इति पदेनोच्यते। यदेव रमते भगवति तदैव मायां त्यक्त्वा उदास्ते इति न कालविलम्बो जीवकृतः, किन्तु भगवदिच्छैव तथेति भगवति रतेर्जातत्वान्न दोष इति दिक्।

**इति श्रीद्वितीयस्कन्धसुबोधिनीप्रकाशे नवमाध्यायविवरणम्।**

### श्रीगिरिधरकृता बालप्रबोधिनी

किमर्थं पर्यतोषयदित्यपेक्षायामाह—विष्णोर्मायां लीलां विविदिषन् वेत्तुमिच्छन्निति। कथं तन्मायावेदनेच्छा जातेत्यपेक्षायामाह—महाभागवत इति। महाभागवतत्वमपि तस्य कथमित्यपेक्षायामाह—महामुनिरिति, अत्यन्तमननशीलत्वादित्यर्थः। कथं तल्लीलाया दुर्ज्ञेयत्वमित्यत आह—मायेशस्येति। प्रियत्वेऽप्यनधिकारिणि कथं सन्तोषेण भगवल्लीलावर्णनं सम्भवतीत्यत आह—शीलेन सुस्वभावेन प्रश्रयेण अहङ्काराराहित्येन दमेनेन्द्रियजयेन चेति। त्वमपि तादृश एवेति सूचयन् सम्बोधयति—राजन्निति ॥ ४१ ॥ ❀ ❀ लोकानां प्रपितामहं स्वपितरं ब्रह्माणं तुष्टं निशाम्य ज्ञात्वा देवर्षिर्नारदो भवान् मा मां प्रति यदिदं पृच्छति तदेव परिपप्रच्छेत्यन्वयः ॥ ४२ ॥ ❀ ❀ तस्मै पृष्टवते पुत्राय नारदाय प्रीतः सन् भूतकृत् ब्रह्मा इदं सङ्क्षेपेण चतुश्श्लोक्या भगवता प्रोक्तं दश लक्षणानि लक्षणीया अर्था विद्यन्ते यस्मिंस्तद्विस्तृतं भागवतं नाम पुराणं प्राहेत्यन्वयः ॥ ४३ ॥ ❀ ❀ त्वमप्येतच्छ्रवणाधिकार्यसीति सूचयन् सम्बोधयति—नृपेति। स च नारदो व्यासाय प्राहेत्यन्वयः। एतद्ग्रहणे परमशुद्धत्वमङ्गमिति सूचयन् व्यासं विशिनष्टि—अमिततेजसे इति। तत्रापि हेतुः—शुद्धैकान्तदेशे भगवद्ध्यानमेवेति द्योतयन्नाह—सरस्वत्या नद्यास्तटे परमं ब्रह्म ध्यायते इति। एवं भगवद्ध्यानमपि विचारपरस्य विवेकिन एव सम्भवति नान्यस्येत्याशयेनाह—मुनये इति। व्यासस्तु मह्यं प्रोक्तवानिति 'अधीतवान् द्वापरादौ पितुर्द्वैपायनादहम्' इति पूर्वमेवोक्तम् ॥ ४४ ॥ ❀ ❀ एवं सत्सम्प्रदायागतश्रीभागवताख्यानेनैव त्वत्कृतप्रश्नानामुत्तरं दास्यामीत्याह—यदुतेति। 'पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः' इत्यादिना यदुत यदपि त्वयाऽहं पृष्टस्तद्वैराजात्पुरुषाद्यथेदं विश्वमासीत्तथोपाख्यास्यामि, अन्यांश्च कृत्स्नशस्तव प्रश्नानुपाख्यास्यामीत्यन्वयः ॥ ४५ ॥

**इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥**
**श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥**
**रचिता च द्वितीयेऽत्र मननस्य निरूपणे। नवमो विवृतोऽध्यायः सिद्धान्तविनिरूपकः ॥ ३ ॥**

---

*"सर्वाकर्तृत्वं च" पाठभेदः। "मायादीनां" पाठभेदः।

## हिन्दी अनुवाद

उन्होंने सेवासे ब्रह्माजीको बहुत ही सन्तुष्ट कर लिया ॥ ४१ ॥ ❀ ❀ परीक्षित् ! जब देवर्षि नारदने देखा कि मेरे लोकपितामह पिताजी मुझपर प्रसन्न हैं, तब उन्होंने उनसे यही प्रश्न किया, जो तुम मुझसे कर रहे हो ॥ ४२ ॥ ❀ ❀ उनके प्रश्नसे ब्रह्मा जी और भी प्रसन्न हुए। फिर उन्होंने यह दस लक्षणवाला भागवत पुराण अपने पुत्र नारदको सुनाया, जिसका स्वयं भगवान्‌ने उन्हें उपदेश किया था ॥ ४३ ॥ ❀ ❀ परीक्षित् ! जिस समय मेरे परम तेजस्वी पिता सरस्वतीके तटपर बैठकर परमात्माके ध्यानमें मग्न थे, उस समय देवर्षि नारदजीने वही भागवत उन्हें सुनाया ॥ ४४ ॥ ❀ ❀ तुमने मुझसे जो यह प्रश्न किया है कि विराट् पुरुषसे इस जगत्‌की उत्पत्ति कैसे हुई, तथा दूसरे भी जो बहुत-से प्रश्न किये हैं, उन सबका उत्तर मैं भी भागवतपुराणके रूपमें देता हूँ ॥ ४५ ॥

**नववाँ अध्याय समाप्त**

# अथ दशमोऽध्यायः

### श्रीशुक उवाच

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः। मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥१॥
दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम्। वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा ॥२॥
भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः। ब्रह्मणो गुणवैषम्याद् विसर्गः पौरुषः स्मृतः ॥३॥
स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः। मन्वन्तराणि सद्धर्म ऊतयः कर्मवासनाः ॥४॥
अवतारानुचरितं हरेश्चास्यानुवर्तिनाम्। सतामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः ॥५॥

#### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

ततो भागवतव्याख्याद्वारैव दशमे स्फुटम्। राजप्रश्नोत्तरं वक्तुमारेभे बादरायणिः ॥ १ ॥

दशलक्षणं पुराणं प्राहेत्युक्तं तानि दश लक्षणानि दर्शयति। अत्रेति। मन्वंतराणि ईशानुकथाश्चेति द्वंद्वः। सर्गादयोऽत्र दशार्था लक्ष्यंते ॥ १ ॥ ❀ ❀ नन्वेवमर्थभेदाच्छास्त्रभेदः स्यात्तत्राह। दशमस्याश्रयस्य विशुद्ध्यर्थं तत्त्वज्ञानार्थं नवानां लक्षणं स्वरूपम्। एकस्यैव प्राधान्यान्नायं दोष इत्यर्थः। नन्वत्र नैवं प्रतीयतेऽत आह श्रुतेन श्रुत्यैव स्तुत्यादिस्थानेष्वंजसा साक्षाद्वर्णयंति। अर्थेन तात्पर्यवृत्त्या च तत्तदाख्यानेषु ॥ २ ॥ ❀ ❀ सर्गादीनां प्रत्येकं लक्षणमाह। भूतान्याकाशादीनि मात्राणि च शब्दादीनि इंद्रियाणि च धीशब्देन महदहंकारौ गुणानां वैषम्यात्परिणामाद् ब्रह्मणः परमेश्वरात्कर्तुर्भूतादीनां यद्विराड्रूपेण स्वरूपतश्च जन्म स सर्गः। विसर्गमाह। पुरुषो वैराजस्तत्कृतः पौरुषश्चराचरसर्गो विसर्ग इत्यर्थः ॥ ३ ॥ ❀ ❀ वैकुंठस्य भगवतो विजयः सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानम्। स्वभक्तेषु तस्यानुग्रहः पोषणम्। तदनुगृहीतानां सतां मन्वंतराधिपतीनां धर्मः सद्धर्मः कर्मणां वासनाः। वेञ् तंतुसंताने। ऊयंते कर्मभिः संतन्यंत इत्यूतयः। यद्वा। वृद्ध्यर्थात्संश्लेषार्थाद्वाऽवतेर्धातोरिदं रूपम्। ऊयंते कर्मभिर्वृद्ध्यंते संश्लिष्यंत इति वा ऊतय इत्यर्थः ॥ ४ ॥ ❀ ❀ हरेरवतारानुचरितमस्य हरेरनुवर्तिनां च सत्कथा ईशानुकथाः प्रोक्ता इत्यर्थः ॥ ५ ॥

#### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

ततो राजप्रश्नानंतरम् ( १ ) अत्र श्रीमद्भागवते ॥ १ ॥ ❀ ❀ अत्राक्षिपति—नन्विति। विशुद्धिर्वस्त्वंतरेणामिश्रितत्वं तदर्थं तत्त्वज्ञानार्थमित्यर्थः। वस्त्वंतरं चात्र सर्गादिनवकपरमेश्वरहेतुकं जीवगतमेव जीवस्यैव सृज्यत्वपाल्यत्वसंहार्यत्वदर्शनात् ॥ इत्यर्थ इति। अत एकस्यैव आश्रमस्य शास्त्रविषयत्वान्नायं दोष इति भावः। महात्मानो मैत्रेयादयः ॥ २ ॥ ❀ ❀ पुरुषो ब्रह्मा तत्कृतश्चराचरसर्ग इति वा जीवानां यथायोगं भक्तिमुक्तिभुक्तिसाधनबुद्धींद्रियादिप्राप्तिस्तया सृष्टिरुक्ता ॥ ३ ॥ ❀ ❀ यतो वैकुंठस्य भगवतो विजयः सृष्टिकर्तुर्ब्रह्मणः संहर्तु रुद्राच्चोत्कर्षः। यद्वा। वैकुंठो हरिस्तत्कर्तृको जीवदुःखाभिभवः जयतेरभिभवार्थकत्वात्। एवं सृष्ट्यनंतरं स्थितिरुक्ता स्थितावेव केषुचित्साधकभक्तेषु दैवाद्विकर्मपरेष्वपि तस्यानुग्रहः पोषणं धर्मस्तत्तच्चरिते व्यक्त इति स्थितावेव केषांचित्कर्मिणां सात्त्विकजीवानामाचरणीयो धर्म उक्तः। धातूनामनेकार्थत्वमपेक्ष्याह—यद्वेति। यत्तु कश्चिदवतेरिति पाठस्तन्न सुष्ठु प्रतिभाति। तस्य संप्रसारणभावाद्यकि प्रत्यये ऊयंत इति न साधुः। किंत्वव्यंत इति साधुः। अतो वृद्ध्यर्थात्संश्लेषार्थाद्वा वयत इत्येव पाठः प्रशस्तः। इत्यर्थ इति। प्राकृताप्राकृतकर्मोत्था वासनाः शुभा अशुभाश्च भाविनां सुकृतदुष्कृतानां कारणभूताः स्थितावेवोत्कृष्टापकृष्टजीवानां स्वभाव उक्त इति भावः ॥ ४ ॥ ❀ ❀ इत्यर्थ इति। स्थितावेवास्यानुवर्तिनामवतारपरिकररूपाणां भक्तानां च चरितम्। ईशकथास्तासां श्रवणीयत्वकीर्त्तनीयत्वादिभ्यः। केषाञ्चित्साधकभक्तानां श्रवणकीर्त्तनादीनि भक्त्यंगान्युक्तानि ॥ ५ ॥ ६ ॥

#### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

॥ ० ॥ १ ॥

---

१. प्रा० पा०—श्रीबादरायणिरुवाच। २. प्रा० पा० नुवर्णितम्।

एकस्यैवेति। दशमस्याश्रयस्यैवेत्यर्थः ॥ २ ॥ ❀ ❀ ब्रह्मणः परमेश्वरादिति। कारणसृष्टिः पारमेश्वरी कर्मसृष्टिस्तु वैरञ्चीत्यर्थः ॥ ३ ॥ ❀ ❀ सद्धर्म इति। अत्र मन्वन्तराणीति प्रोक्त इति शेषः ॥ ४—६ ॥

### श्रीमद्वीरराघवव्याख्या

अथ वैराजात्पुरुषादिदं यथासीत्तदुपाख्यास्ये इति प्रतिज्ञातसमष्टिपुरुषचतुर्मुखावयवैर्देवादिक्लृप्तीरभिधास्यंस्तावत्पुराणं दशलक्षणं प्रोक्तं भगवतेति प्रश्नुतान् दशार्थानाह अत्रेति। अत्र अस्मिन् पुराणे सर्गादय आश्रयांता दशार्थाः प्रतिपाद्या इत्यर्थः। मन्वन्तरेशानुकथा मन्वन्तरकथनं ईश्वरचेष्टाकथनं चेत्यर्थः ॥ १ ॥ ❀ ❀ नन्वेवं प्रतिपाद्यानां बहुत्त्वात्प्रतिपाद्यभेदाच्छास्त्रभेदः स्यादित्याशंक्याह दशमस्येति। इह पुराणे दशमस्याश्रयस्य परब्रह्मणः विशुद्ध्यर्थं शोधनार्थं सम्यक् प्रतिपत्त्यर्थं नवानां सर्गादीनां लक्षणमंजसा सुखेन महात्मानः परापरयाथात्म्यज्ञाः श्रुतेनार्थेन यथा श्रुतं वर्णयंति। एवं च दशमस्यैव प्राधान्यात्तदर्थत्वेनेतरेषां प्रतिपादनाच्च शास्त्रभेद इत्यर्थः ॥ २ ॥ ❀ ❀ प्रत्येकं दशानां लक्षणमाह भूतेति। भूतान्याकाशादीनि मात्रास्तन्मात्राणि शब्दादीनि इंद्रियाणि ज्ञानकर्मोभयेंद्रियाणि धीशब्दोन्तःकरणभूतबुद्धिशब्दवाच्यो महत्तत्त्वपरः महदादिपृथिव्यन्तानामित्यर्थः। एतेषां तत्त्वानां यज्जन्म उत्पत्तिः तत्सर्ग इत्युदाहृतः। ब्रह्मणः परस्माद्ब्रह्मणः प्रयोजकात्कर्त्तुः गुणानां सत्त्वरजस्तमसां वैषम्याद्धेतोः पौरुषश्चतुर्मुखसंबंधी प्रयोज्यचतुर्मुखकर्तृक इत्यर्थः। एवंभूतः सर्गो विसर्गः स्मृतः ॥ ३ ॥ ❀ ❀ वैकुण्ठविजयः वैकुंठस्य हरेः सर्वोत्कर्षः शत्रुविजयादिरूपा स्थितिः तस्य वैकुंठस्य योऽनुग्रहः जगद्रक्षणरूपः स पोषणमित्यर्थः। सद्धर्मः सतां वैकुंठानुगृहीतानां मन्वंतराधिपतीनां यो धर्मः स मन्वंतरानुकथनं कर्मवासनाः कर्मणः वासनाः संसारा ऊतय उच्यंते। क्रमस्त्वविवक्षितः ॥ ४ ॥ ❀ ❀ ईशानुकथां विवृणोति अवतारेति। हरेरवतारानुचरितं तदनुवर्तिनां हर्यनुवर्तिनां पुंसां च नानाख्यानोपबृंहिताः विचित्रकथाभिर्युक्ताः सत्कथाश्चेशानुकथा इत्यर्थः ॥ ५ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

अस्मिन्नध्याये वैराजाख्यहरेः सकलजगत्सृष्टिः प्रपंच्यते। तत्रादौ भागवतपुराणं दशलक्षणमित्युक्तं दशलक्षणानि कथयतीत्याह अत्रेति। अत्र श्रीभागवते सर्गादिदशलक्षणानि प्रतिपाद्यंत इति शेषः ॥ १ ॥ ❀ ❀ मुक्तामुक्तप्रपंचाधारस्य दशमस्य हरेर्माहात्म्यवर्णनस्यावश्यापेक्षितत्वात्सर्गादिनवानां वर्णनं कोपयुज्यत इति तत्राह दशमस्येति। महात्मानो ब्रह्मादय इह पुराणे दशमस्याश्रयस्य विशुद्ध्यर्थं सर्गादिनवानां लक्षणं वर्णयंतीत्यन्वयः। अनेनार्थाद् ब्रह्मज्ञानलब्ध्यर्थत्वमुक्तं भवति। अत्र किं प्रमाणमत्राह श्रुतेनेति। अंजसा मुख्यया वृत्त्यानंतवेदार्थसंवादेनेत्यर्थः। ब्रह्मणः सर्वगुणपूर्णत्वसर्वोत्तमत्वादिज्ञानार्थत्वेन तदुपयोगात्तल्लक्षणकथनं युक्तमिति भावः ॥ २ ॥ ❀ ❀ तत्र प्रथमं सर्गं लक्षयति भूतेति। सृष्टिकाले परब्रह्मणः सकाशाज्जाताद् गुणवैषम्यात्तन्नामकान्महत्तत्त्वादहंकारद्वारा भूतमात्रेंद्रियधियां पंचमहाभूतानां शब्दादितन्मात्राणां श्रोत्रादिदशेंद्रियाणां धियो बुद्धेश्चाण्डपर्यन्तं यज्जन्म सः सर्गः उदाहृतः इत्यन्वयः। विसर्गं लक्षयति विसर्ग इति। पौरुषो विसर्गः स्मृत इत्यन्वयः। अंडांतर्गतपुरुषनाम्नो हरेर्भूतानां यद्विविधं जन्म स विसर्गः स्मृतः शास्त्रांतरोक्त इति शेषः। तदुक्तं महदाद्यंडपर्यंतः। सर्गोंडब्रह्मणस्तु यः। अनुसर्ग इति प्रोक्तः पौरुषश्चेति कथ्यते। किंच पंचभूतसमूहेन जातः पुरुषो जीवः तद्विषयसर्गः पौरुषसर्ग इत्युच्यते अत्राप्युक्तैव स्मृतिः प्रमाणं पञ्चभूतसमुहेन जातः पुरुष उच्यते अंडांतर्हि जातानां नानाजीवानां सात्त्विकादिस्वभावानां व्यक्तिस्तेषु जीवेषु तैजसाप्यादिकार्यापेक्षया भूतानां बहुत्वात् भूयस्त्वात्तथा च भूतानां काठिन्यादिस्वभावव्यंजकत्वेन कृतार्थत्वाज्जीवतत्त्वमेकस्माद्भूतसमूहाजातत्वादेकजमित्युच्यते। बहुत्त्वात्तत्र भूतानां तावत्त्वात्तत्त्वमेकजमिति च ॥ ३ ॥ ❀ ❀ स्थानं लक्षयति स्थितिरिति। वैकुण्ठस्य हरेर्दुष्टशिष्टनिग्रहानुग्रहलक्षणो विजयः स्थितिरित्युच्यत इत्यन्वयः। तस्य वैकुण्ठस्यानुग्रहोऽनुकंपिताप्रसादविशेषः पोषणमित्युच्यते तत्तद्भक्तैकविषयत्वात्पूर्वस्माद्विशेषः मन्वन्तरं लक्षयति मन्वंतराणीति। सद्धर्मा मन्वंतरेषु सतां धारका धर्मा मन्वंतराणीत्युच्यंते ऊतीराह ऊतय इति। नानाजीवानामनादिकर्माणि तत्संस्काराश्च नानासृष्टिहेतुभूता ऊतय इत्युच्यंते ॥ ४ ॥ ❀ ❀ ईशानुकथामाह अवतारेति। हरेर्मत्स्याद्यवताराणामनुचरितमस्य हरेरनुवर्तिनां ब्रह्मादीनां पुंसामनुचरितं च नानाख्यानोपबृंहिता विविधेतिहासपूर्णा ईशकथेत्युच्यते ॥ ५ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

तदेवाश्रयसंज्ञकं महापुराणलक्षणरूपैः सर्गादिभिरर्थैः समष्टिनिर्देशद्वारापि लक्ष्यते इत्यत्राह द्वाभ्याम्। अत्र सर्गो विसर्गश्चेति। मन्वन्तराणि च ईशानुकथाश्च मन्वन्तरेशानुकथाः अत्र सर्गादयो दशार्था लक्ष्यन्ते इत्यर्थः ॥ १ ॥ ❀ ❀ तत्र च दशमस्याश्रयस्य—विशुद्ध्यर्थं तत्त्वज्ञानार्थं नवानां लक्षणं स्वरूपं वर्णयन्ति ( नन्वत्र नैवं प्रतीयते अत आह ) श्रुतेन श्रुत्या कण्ठोक्त्यैव स्तुत्यादिस्थानेषु अञ्जसा साक्षाद् वर्णयन्ति अर्थेन तात्पर्यवृत्त्या च तत्तदाख्यानेषु ॥ २ ॥ ❀ ❀ तदेवं दशमं विस्पष्टयितुं तेषां दशानां व्युत्पादिकां सप्तश्लोकीमाह भूतमात्रेति। भूतानि खादीनि मात्राणि च शब्दादीनि, इन्द्रियाणि च धीशब्देन महदहङ्कारौ गुणानां वैषम्यात् परिणामात् ब्रह्मणः परमेश्वरात् कर्त्तुर्भूतादीनां जन्मसर्गः पुरुषो वैराजो ब्रह्मा तत्कृतः पौरुषः चराचरसर्गो विसर्ग

इत्यर्थः ॥ ३ ॥ ❀ ❀ स्थितिरिति । वैकुण्ठस्य भगवतो विजयः सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानम् । उत्कर्षस्थित्योरभेद उपचारात् । तत्र स्थितेषु स्वभक्तेषु तस्यानुग्रहः पोषणम् । मन्वन्तराणि तत्तन्मन्वतरस्थितानां मन्वादीनां तदनुगृहीतानां सतां चरितानि तान्येव धर्मः तदुपासनाख्यः सद्धर्मः तत्रैव स्थितौ नानाकर्म्मवासना ऊतयः ॥ ४ ॥ ❀ ❀ अवेति स्थितावेव हरेरवतारानुचरितम् । अस्यानुवर्त्तिनाञ्च कथा ईशानुकथाः प्रोक्ता इत्यर्थः ॥ ५ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

अत्र सर्गविसर्गादिदशार्थाः सुष्ठु लक्षिताः । अध्यात्मादिविभागश्च दशमे सम्यगीरितः ॥ ० ॥

पूर्व्वाध्यायान्ते दशलक्षणं पुराणं प्राहेत्युक्तम् । तानि दश लक्षणानि दर्शयति अत्रेति । मन्वन्तराणि च ईशानुकथाश्चेति द्वन्द्वः ॥ १ ॥ ❀ ❀ नन्वेवमर्थभेदाच्छास्त्रभेदः स्यात्तत्राह । दशमस्याश्रयस्य विशुद्धिर्वस्त्वन्तरेणामिश्रितत्वं तदर्थं तत्त्वज्ञानार्थमित्यर्थः । वस्त्वन्तरञ्चात्र सर्गादिनवकं परमेश्वरहेतुकं जीवगतमेव जीवस्यैव सृज्यत्वपाल्यत्वसंहार्यत्वदर्शनात् । अत एकस्याश्रयस्यैव शास्त्रविषयत्वान्नायं दोष इत्यर्थः । श्रुतेन क्वचित् स्तुत्यादिषु तद्वाचकशब्देनैव साक्षाद् वर्णयन्ति अर्थेन च तात्पर्यवृत्त्या तत्तदाख्यानेषु महात्मानो विदुरमैत्रेयादयः ॥ २ ॥ ❀ ❀ सर्गादीनां प्रत्येकं लक्षणमाह । ब्रह्मणः परमेश्वरात् सकाशात् गुणवैषम्यं ततो हेतोर्भूतादीनां स्वरूपतो विराड्रूपेण च जन्म सर्गः धीशब्देन महदहंकारौ । पुरुषो ब्रह्मा तत्कृतः चराचरसर्गो विसर्ग इति जीवानां यथायोगं भक्तिमुक्तिभुक्तिसाधनबुद्धीन्द्रियादिप्राप्तिरूपा सृष्टिरुक्ता ॥ ३ ॥ ❀ ❀ स्थानमित्यस्य लक्षणं स्थितिः पालनम् । यतो वैकुण्ठस्य भगवतो विजयः सृष्टिकर्त्तुर्ब्रह्मणः संहारकर्त्तुः शम्भोश्च सकाशादुत्कर्षः यद्वा वैकुण्ठो हरिस्तत्कर्त्तृको जीवदुःखाभिभवः जयतेरभिभवार्थकत्वात् । एवं सृष्ट्यनन्तरं जीवानां स्थितिरुक्ता स्थितावेव केषुचित् जीवेषु साधकभक्तेषु दैवाद् विकर्म्मपरेष्वपि तस्यानुग्रहः पोषणम् । सतां मन्वन्तराधिपतीनां धर्मः तत्र तत्र उच्चरिते व्यक्त इति स्थितावेव केषांचित् कर्मिणां सात्त्विकजीवानामाचरणीयो धर्म उक्तः । ऊयन्ते कर्मभिः संतन्यन्ते इत्यूतयः कर्मवासनाः प्राकृताप्राकृतकर्मोत्था वासनाः शुभाशुभाश्च भाविनां सुकृतदुष्कृतानां कारणभूता इति स्थितावेवोत्कृष्टापकृष्टजीवानां स्वभाव उक्तः ॥ ४ ॥ ❀ ❀ हरेरवतारानुचरितं तथा अस्यानुवर्त्तिनाम् अवतारपरिकररूपाणां भक्तानाञ्च अवतारानुचरितम् ईशकथा इति तासां श्रवणीयत्वकीर्त्तनीयत्वादिभ्यः स्थितावेव केषाञ्चित् साधकभक्तानां श्रवणकीर्त्तनादीनि भक्त्यङ्गान्युक्तानि ॥ ५ ॥

### श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः

नन्वर्थभेदाच्छास्त्रभेदः स्यादत्राह दशमस्येति । इह श्रीमद्भागवते दशमस्य आश्रयस्य परब्रह्मणो भगवतः विशुद्ध्यर्थं निःसंशयतया सम्यक् प्रतिपत्त्यर्थम् नवानां सर्गादीनां लक्षणं स्वरूपं महात्मानस्तत्तत्प्रकरणे श्रुतेन श्रुत्यैव अनेन सर्गादिना इत्थं भगवान्बोद्धव्यः इत्येवं निरपेक्षरवेणैव अंजसा साक्षादेव वर्णयंति क्वचित्क्वचिच्च अर्थेनानेन सर्गादिनाऽर्थात् भगवद्ग्रहणं भविष्यतीति तात्पर्येण च वर्णयंति अत एकस्यैवाश्रयस्य प्राधान्यान्न शास्त्रभेदः ॥ २ ॥ ❀ ❀ प्रत्येकं तल्लक्षणमाह भूतेति । भूतान्याकाशादीनि तन्मात्राणि एकादशेन्द्रियाणि च धीशब्देन महदहंकारौ च एतेषामर्थानां गुणवैषम्यात् शक्तिगुणपरिणामात् ब्रह्मणः परब्रह्मणः सकाशात् यत्स्वरूपतो विराड्रूपेण च जन्मतत्सर्ग उदाहृतः पुरुषो वैराजः विराट्शरीरे उपास्यः प्रयोजककर्ता तच्छरीराभिमानी चतुर्मुखश्च प्रयोज्यकर्ता तत्कृतः पौरुषः चराचरसर्गः विसर्गः ॥ ३ ॥ ❀ ❀ वैकुण्ठस्य हरेः असाधूनां निग्रहेण जगत्पालनार्थो विजयः उत्कर्षः स्थितिः स्थानम् । तस्य वैकुण्ठस्य साधुषु अनुग्रहः पोषणम् । सतां वैकुण्ठानुगृहीतानां मन्वंतराधिपतीनां रक्षणीयो धर्मः मन्वंतराणि ।कर्मणां वासना ऊयन्ते कर्म्मभिर्वर्द्धय न्ते संश्लिष्यंते इति वा ऊतयः । वृद्ध्यर्थात्संश्लेषार्थाद्वा वयतेर्धातोरिदं रूपम् । क्रमस्त्वविवक्षितः ॥ ४ ॥ ❀ ❀ हरेः अवतारानुचरितम् अस्य हरेः अनुवर्तिनां पुंसां च चरितम् ईशानुकथाः प्रोक्ताः कथंभूताः नानाख्यानोपबृंहिताः ॥ ५ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

इत्याक्षेपसमाधाने निरूप्य हरिजीवयोः । उपपत्त्या तयोरेव रूपदेहाविहोदितौ ॥ १ ॥

दशधा ज्ञायते रूपं हरेरन्यत् त्रिधा मतम् । आध्या[1]त्मिकादिभेदेन गुणतः कर्मतोऽपि हि ॥ २ ॥

एवं पूर्वाध्याये उपदेशे पदार्थचतुष्टयं निरूप्य तृतीयव्यतिरिक्तानां पक्षाणां श्रुत्यादिषु प्रसिद्धत्वा[2]त्तद्विस्तारमनुक्त्वैकस्मिन्पदार्थे दश लीला अलौकिका इति ताः स्वरूपतो लक्षणतश्च निरूपयति । यद्यपि ते लौकिका दश पदार्था बहिर्मुखतया पुराणान्तरेषु सिद्धास्तथाप्यत्र भागवते ते न भवन्ति । किन्त्वेत इत्याह—अत्रेति । अत्र भागवते । आश्रयान्ताः सर्गादयो दश पदार्था निरूप्यन्ते । अत्र सिद्धान्ते वा । एतेषां दशानामर्थस्तत्तत्स्कन्धे विस्तरेण [3]कथयिष्यते । तथापि सामान्यतो निरू[4]प्यन्ते ।

१. अध्यात्मिकेति क. ग. घ. । २. त्वात्तत्तद्विस्तारमिति ग. । ३. निरूप्यते इति क. निरूपयिष्यते इति ख. । ४. निरूप्यते इति घ. ।

तत्राऽशरीरस्य विष्णोः पुरुषशरीरस्वीकारः सर्गः। पुरुषाद्ब्रह्मादीनामुत्पत्तिर्विसर्गः। उत्पन्नानां तत्तन्मर्यादया पालनं स्थानम्। स्थितानाम[1]भिवृद्धिः पोषणम्। पुष्टानामाचार[2] ऊतिः। तत्रापि सदाचारो मन्वन्तरम्। तत्रापि विष्णुभक्तिरीशानुकथा। भक्तानां प्रपञ्चाभावो निरोधः। निष्प्रपञ्चानां स्वरूपलाभो मुक्तिः। मुक्तानां ब्रह्मस्वरूपेणाऽवस्थानमाश्रय इति। प्रत्येकपदार्थे तु सर्गः कारणत्वेन तत्र भगवत्स्थितिः। विसर्गः कार्यत्वेन पूर्वमेव तत्र विद्यमानत्वम्। पटे तन्तुषु सिद्धे हि तन्तवः पटे प्रतीयन्ते। स्थानं सर्ववस्तुषु वस्तुस्वरूपेण मूलरूपेण च तत्तन्मर्यादारूपम्। पुष्टिः कार्यसिद्ध्यर्थं सर्वसमर्थस्य तत्र प्रवेशः। ब्रह्मज्ञानिनः प्रतीतिसिद्ध्यर्थं तत्र तादृशलीलाप्रदर्शनमूतिः। एवं पञ्चधा भगवदन्वयेन सर्ववस्तुषु भगवल्लीला। व्यतिरेकेणाऽपि पञ्चधा। तत्र कारणाद्भिन्नरूपेण घटरूप[3]भिन्नभावेन सतां धर्महेतुः प्रापञ्चिकोऽपि विधिविषयो भवतीति स्वरूपाद्व्यतिरिक्तो मन्वन्तराणि। स एव पुनर्भक्तिविषयत्वेन भगवत्सेवैकरूपेण धर्मेण लौकिकवैदिकव्यतिरिक्ततामापद्यत इतीशानुकथारूपो भवति। स एव पुनर्लौकिकवैदिकभक्तानां स्वरूपेच्छूनां परित्यागरूपेण पूर्वोक्तान्निरुणद्धीति निरोधरूपो भवति। तादृशोऽपि सन्नात्मानं परित्याजयित्वा तानपि ताद्द[4]शस्वस्मात् परित्याजनरूपो भवतीति मुक्तिरूपो भवति। घटादिषु वा भगवतोऽसङ्गोदासीनरूपता मुक्तिः। आश्रयस्तु नवप्रकाराणामपि स्वरूपाणामाधारो भवतीति। एतदज्ञाने सर्वाण्येव शास्त्राणि व्याकुलानि भवन्ति। अतो भागवतशास्त्रं सर्वोद्धारकं सर्वनिर्वाहकं च॥ १॥ ❀ ❀ नन्वत्र दश पदार्थाः कथं निरूप्यन्ते? शास्त्रभेदप्रसङ्गात्। एकस्मिन् शास्त्रे ह्येकं प्रतिपाद्यं नतु समप्रधानतया बहूनि प्रतिपाद्यानि भवन्तीत्याह—**दशमस्य विशुद्ध्यर्थमिति**। दशमोऽत्राऽऽश्रयः। तस्य विशेषेण शुद्धिः। सर्वत्रैव हि पदार्थे दश धर्माः सन्ति भगवद्रूपाः। तत्रैको ग्राह्योऽन्ये तु त्याज्याः। तत्र ते यदि न निरूपिता भवन्ति ग्राह्यत्याज्यविवेको न भवति। अतो यावद्दूरं गुणसम्बन्धः स त्याज्यः। भगवदाश्रये व्यभिचारापत्तेः अनन्याश्रयभङ्गश्च। तत उत्तरो[5]त्तरा एते धर्मा भवन्तीति [6]यः पर्यवसानेऽवशिष्यते स ग्राह्य इति तुषादिवदाश्रयावरकत्वेनैते धर्माः प्रतिपाद्यन्ते। अत एतैर्निरूपितैराश्रयः पदार्थान्तरात्स्पष्टः शुद्धो निरूपितो भवति। अत एतेषामपि स्वरूपज्ञानार्थं लक्षणानि निरूपणीयानि। तदाह—**लक्षणमिति**। यथा गोः सास्ना असाधारणो धर्मस्तथा सर्गादीनां लक्षणमत्रोच्यते नतु स्वरूपम्। स्वरूपं त्वग्रे वक्ष्यामोऽग्रिमस्कन्धैः। तेषां लक्षणमेतदित्यत्र प्रमाणमाह—**वर्णयन्तीति**। तेषां भगवत्त्वात्तल्लक्षणमल्पेन वक्तुमशक्यमित्यत आह—**महात्मान इति**। महानात्मा अन्तःकरणं येषाम्। अन्तःकरणे भगवच्चरणारविन्दविक्रमो यदा तदा महत्त्वम्। तदैव हि भगवत्स्वरूपाणि ज्ञातानि भवन्ति। ननु भगवान् प्रमेयं तत्सामर्थ्येन ज्ञातं प्रमेयबलमेव भवति नतु प्रमाणस्येत्यत आह—**श्रुतेनाऽर्थेनेति**। यः सर्वत्र वेदादौ पदार्थः श्रुतः स सर्वोऽपि भगवदीय इति "**सर्वे वेदा यत्पदमामनन्ती**" ति वाक्यात्। "**शतँ शुक्राणि यत्रैकं भवन्ति। सर्वे होतारो यत्रैकं भवन्ती**" ति श्रुतेः। अनुग्राहकप्रमाणप्रमेयानामेकपर्यवसानविधानात् यत्र त्रयोऽप्येते पर्यवस्यन्ति स आश्रयः। एते त्रयोऽन्योन्यप्रवेशान्नव सर्गादीनां लक्षणरूपा भवन्ति। तत्र सर्गादिषु प्रमेयं लक्षणम्। कारणप्राधान्यात्। पुष्ट्यादिषु प्रमाणम्। ईशानुकथादिषु ज्योतींषीति। अर्थादेते उत्पत्तिस्थितिप्रलयात्मानो भवन्ति। उत्पत्तिर्हि कारणतः कार्यत आधारतश्च। स्थितिरपि पोषणतो विलासतो धर्मतश्च। प्रलयोऽपि अहन्ताममतारूपस्य ईशानुकथया लक्षणम्। सङ्घातस्य प्रलयो नि[7]रोधः। न मुक्तजीवानां ब्रह्मणि प्रवेशलक्षणया। तस्माच्छ्रुतेनैवाऽर्थेन चका[8]रात्तत्साधनयुक्त्या च वर्णयन्तीत्यर्थः। तत्राऽप्यञ्जसा सामस्त्येन। नतु क्लिष्टकल्पनया किन्त्वार्जवेनैव॥ २॥ ❀ ❀ तानि लक्षणान्याह—**भूतमात्रेन्द्रियधियामिति**। भूतानि महाभूतानि। पञ्च तन्मात्राणि च। शब्दादीनि पञ्च। इन्द्रियाणि दश। धीर्बुद्धिः अन्तःकरणात्मिका चतुर्द्धा। एवं चतुर्विंशतितत्त्वान्युक्तानि भवन्ति। तेषामपि कारणत्वेन त्रयो गुणाः। तेषां वैषम्यात् गुणत्वेनाऽऽविर्भावात्। तेषामपि कारणं ब्रह्म। अतः परम्परया अष्टाविंशतिभेदा भवन्ति। तेषां जन्म सर्गः। सर्गोऽपि द्विविधः। प्रत्येकं समुदायेन च। वैषम्यं च चतुर्विधं भवति। ते हि प्रत्येकं विषमाः समुदायेनापि विषमा भवन्ति। त्रिविध एव वा। एवं सर्गस्त्रयस्त्रिंशच्चतुस्त्रिंशद्भेदभिन्नो वा भवति। विसर्गस्य लक्षणमाह—**विसर्गः पौरुषः स्मृत इति**। पुरुषाद्ये जातास्ते विसर्गशब्देनोच्यन्ते। तत्र प्रमाणं स्मृतिर्महताम्। पुरुषाल्लोकत्रयभेदेन तद्भेदा एकत्रिंशद्भवन्ति। "**अष्टौ वसव एकादश रुद्रा द्वादशाऽऽदित्या**" इति। स्थितिं लक्षयति—**वैकुण्ठस्य विशिष्टो जयो यत्रेति**। प्राकृतेषु चतुर्विंशतिधा। जीवब्रह्मभेदेन आत्मनि द्विधेति [9]षड्विंशतिभिन्ना। पुष्टिं लक्षयति—**तदनुग्रह इति**। तस्य वैकुण्ठस्य जितेषु स्वाधीनीकृतेषु योऽयमनुग्रहः तेषु मर्यादार्थं[10] सप्त पृथक्कृत्य शिष्टेष्वनुग्रहः। महाभूतेष्वात्मद्वये च नानुग्रहः। तत्र मर्यादैव। ऊतिसद्धर्मयोर्वासनाधर्मरूपत्वात् धर्मजनिता वासनेति विपरीतयया लक्षयति—**मन्वन्तराणि सद्धर्म इति**। सतां धर्मस्त्रिविधो भवति कायवाङ्म[11]नोभिः कृतः। कायिको दशधा। वाचनिकश्च दशधा। इन्द्रियोपलक्षकत्वात्। मानसश्चतुर्द्धा। अन्तःकरणोपलक्षकत्वात्। इष्टं चिन्तयति, इष्टमावापो-

१. मपीति ख.। २. ऊतीरिति ग. घ.। ३. रूपधर्मभावेनेति क.। ४. तादृशस्तस्मादिति क.। ५. उत्तरोत्तरमेत इति ख.। ६. यत्पर्यवसान इति ख.। ७. निरोधेन मुक्तेति ख.। ८. चकरात्साधनेति ख.। ९. द्वेधेति क. घ.। १०. मर्यादार्थं पृथगिति ख.। ११. मनोभिः। तत्र कायिक इति ग.।

द्वापाभ्यां विचारयति, इष्टमाशंसते, इष्टं करिष्यामीत्यध्यवस्यति । एवमन्तःकरणे चतुर्द्धा सद्धर्मः । सर्वेन्द्रियैश्च सद्धर्मकरणम् । रेतोपाननिरोधेन धर्महेतुत्वं तयोः । आश्रयादानतृ[1]प्तिप्रजननजाड्यतापनिर्बन्धदूरीकरणैः शब्दादिदा[2]नेन च सद्धर्मः शरीरे दशधा । एवं चतुर्विंशतिभेदो भवति । [3]ऊतीर्लक्ष्यति—कर्मवासना इति । कर्मजनिता वासनाः कर्मवासनाः । तत्र शरीरस्य कर्मेन्द्रियाणां च सम्बन्धिनः सद्धर्मा वासनाजनकाः । नतु ज्ञानेन्द्रियान्तःकरणानाम् । अतः पञ्चदशधा भवन्ति ॥ ३ ॥ ४ ॥ ❀ ❀ ईशानुकथां लक्षयति—अवतारानुचरितमिति । ईशानुकथा द्विविधा । ईशस्य तदनुवर्तिनां च कथा । तदुभयं लक्षयति । तत्र ईशकथामाह—अवतारानुचरितमिति । सर्वभूतदुःखदूरीकरणार्थमाविर्भूतस्य भगवतश्चरित्रमीशानुकथा । अस्याऽनुवर्त्तिनामिति द्वितीयस्य लक्षणम् । यथा भगवान् सर्वदुःखनिवारकस्तथा ये दुःखनि[4]वारकाः ते तदनुशब्देनोच्यन्ते । तत्रेशस्य हरेरिति विशेषणात् दुःखदूरीकरणं सुखप्रापणं चेति । अतो दुःखनिवारणे गुणभेदेन तदनुवर्तिनो नवधा भवन्ति । ईशस्याऽपि चरित्रं कर्मज्ञानभक्तिभेदैस्त्रिधा भवति । तथाऽनुवर्तिनोऽप्यविद्यालक्षणदुःखदूरीकर्त्तारो ज्ञानिन एकविधा भवन्ति । एवं दुःखदूरीकरणे त्रयोदश भेदाः । सुःखप्रापणे दशधा सर्वेन्द्रियसुखप्रापकास्तदनुवर्त्तिन एकश्च भगवानित्येवमेकादश उभये चतुर्विंशतिः । तेषां प्रत्येकनिरूपणार्थं नानाख्यानोपबृंहिता इत्युक्तम् ।

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ दशमाध्यायविवरणं चिकीर्षवः पूर्वाध्यायसङ्गतिं वक्तुं तदर्थमनुवदन्तः प्रस्तुतार्थमाहुः इतीत्यादि । इति प्रकारे, इहास्मिन्नध्याये विस्तरेणोदितौ । तथा च, पूर्वोत्तरयोः सामान्यविशेषभावः सङ्गतिरित्यर्थः । तं विशेषमेव स्फुटमाहुः दशधेत्यादि । यत्पूर्वाध्याये 'यथा महान्ती' त्येनेन सूत्रेणैव हरे रूपं निरूपितम्, तद्गुणतो दशधा, तत्र हेतुः, ज्ञायते इति उद्देशलक्षणाभ्यां यतस्तथा ज्ञायतेऽतस्तथेत्यर्थः । अन्यत्तीवशरीरमाध्यात्मिकादिभेदेन कर्मत्रिविधेत्यर्थः ।

अत्र सर्ग इत्यत्र । उद्देशाध्यायेऽदीनत्वादिभिः 'यथा महान्ती'त्यत्र प्रवेशाप्रवेशातिरेकैः परामृष्टा या दशलीलाः प्रत्येकपदार्थे सत्कारणमित्यादिभिः परिचायितास्ता एव सर्गादिरूपेणात्रोद्देशपूर्वकं लक्ष्यत इति ज्ञापयितुं सामान्यतस्तत्स्वरूपं वदन्तः आहुः एतेषामित्यादि । तत्र नवसु लीलासु गुणसम्बन्धादेकैकस्मिन् त्रिके यथाक्रमं उत्पादकत्वस्थापकत्वप्रलापकत्वानामग्रे वक्ष्यमाणत्वात् पूर्वञ्च त्रेधाप्रवेशद्वेधाप्रवेशतदुभयव्यतिरेकैर्दशविधत्वस्योक्तत्वादन्तरायेण तदनुसन्धानराहित्ये बोधदौर्घट्याद्यापत्तौ वैशद्यार्थं व्याकुर्वते तत्रेत्यादि । निर्वाहकञ्चेत्याद्यन्तम् । तदर्थस्त्वेवं तद्द्वया प्रतिभाति । सर्गो हि भगवतः अदीनत्वरूपो धर्मः । अदीनत्वञ्च यथासुखं वस्तुरूपेण स्वप्रादुर्भावात् । एवं सति तादृशसामर्थ्यमेवादीनत्वमिति फलति । प्रकृते चाशरीरस्य विष्णोर्नित्यव्यापकस्य पुरुषोत्तमस्य पुरुषशरीरस्वीकारः स्वक्रीडार्थमनित्याव्यापकस्वरूपग्रहणमुक्तसामर्थ्यात्मकं भवति, 'विशुद्धं सत्त्वमूर्जितमि'ति वाक्यात् । सदंशात्मकस्य तस्य शक्तिभूतक्रियायाः पुरुषोत्तमे गतत्वेनाव्यक्ततापन्नत्वात् । अत एव 'एतन्नानावताराणां निधानं बीजमव्यय'मिति वाक्याज्जगद्बीजत्वम्, न हि बीजे सन्नपि तरुः प्रतीयते, एवं सति प्रत्येकपदार्थे घटादिरूपे कारणत्वेनाव्यक्तसद्रूपेण या भगवत्स्थितिः सा सर्गो भवति । अस्याश्च [5]स्वसमवायरूपत्वादुत्पत्तिरूपत्वमप्रवेशरूपत्वञ्च स्पष्टम् । अयञ्च परिणामः स्वभावकार्यम्, एवं विसर्गोपि लीला अनायासेन क्रियमाणं कर्म, स च पुरुषाद् ब्रह्माद्युत्पत्तिः स्पष्टैव, इदमेव सृष्टिप्रक्रियायां पश्चादित्यारभ्याभिव्यज्यत इत्यन्तेनोक्तम् । इदञ्च जीवानां देहसम्बन्धरूपं जन्मकर्मणः कार्यम्, एवं सति प्रत्येकपदार्थे कार्यत्वेन पूर्वमेव विद्यमानत्वं फलानुमेयकार्यरूपतया विद्यमानत्वं तच्च विशिष्टसर्गरूपत्वाद्विसर्गो भवति । तत्र दृष्टान्तः **पट** इत्यादि । पटे कार्ये तन्तुषु पटत्वेनाव्यक्तेषु सिद्धे आतानदशायामीषद्व्यक्ते यतो हेतोस्तन्तवोवयवरूपतया पटे प्रतीयन्ते व्यक्ता भवन्तीति षद्व्यक्तत्वदशा विसर्ग इत्यर्थः । तथा च, त एव तदाकारेण परिणमन्तीत्यप्रवेशान्तररूपत्वमाद्यक्षणसम्बन्धादुत्पत्तिरूपत्वञ्च स्पष्टम् । चेतनदेहेषु त्वस्यामेव दशायां जीवसमागम इति जडव्यक्तिचेतनसमागमयोरन्यतरं क्वचित्समुदायोपि विसर्ग इति फलति । एवं तत्तन्मर्यादया पालनरूपस्य स्थानस्य हसितत्वम्, 'अदीनलीलाहसिते'त्यस्य विमर्षे परमार्थरूपे का मर्यादेत्यन्तेन स्वयमेव स्पष्टीकृतम् । प्रत्येकपदार्थे च सर्ववस्तुषु घटादिषु वस्तुस्वरूपेण मूलरूपेण वस्तुस्वरूपात्मकमेव यन्मूलरूपं कारणप्राग्रूपं तेन या तत्तन्मर्यादा वस्तुस्वरूपमर्यादा, यथा कार्पासः पट इति सा **स्थानम्** । अत्रोत्पत्तेश्चिरकालस्थायित्वात्पालनमप्यभिप्रेतमेव । इयञ्चाप्रवेशरूपा स्पष्टैव, नहि मूलरूपमर्यादा बहिष्ठ आयाति, नैसर्गिकत्वात् । एतस्य स्थितिरूपत्वेप्युत्पत्तिरूपत्वं मूलरूपोत्पन्नतास्मारकत्वात् । एवं स्थित्यभिवृद्धिरूपस्य पोषणस्येक्षणरूपत्वं प्रागेव स्फुटीकृतम् । प्रत्येकपदार्थे तु कार्यसिद्ध्यर्थं जलाहरणप्रावरणादिसिद्ध्यर्थं सर्वसमर्थस्य तत्र योऽवयवरूपेण तन्तूनामिव प्रवेशः स कार्याकृतिदृढीकरणरूपः कयाचिदानुपूर्व्याभिवृद्धं कारणमेव हि कार्यरूपं भवतीति पोषणरूपत्वम् । अस्य च कारणप्रवेशरूपत्वं कारणावस्थातोतिरिक्तरूपत्वञ्चानित्यस्य पोषणेनैव स्थितिरिति स्थापकत्वञ्च स्फुटमेव । एवं भ्रूरूपायास्तदुल्लासरूपाया वा ऊतेराचाररूपत्वं पूर्वमेव स्फुटीकृतम् । प्रत्येकपदार्थे च ब्रह्मज्ञानिनः

---

१. प्राप्तिजाड्यता इति ख. । २. दाने चेति घ. । ३. ऊतिं लक्षयतीति क. ऊतिर्लक्षयतीति ख. । ४. निवारिका इति क. । ५. स्वसत्तासमवायरूपत्वात्वेशरूपत्वं स्पष्टम् । इति पाठः ।

प्रतीतिसिद्धयर्थं घटरूपो भगवानेवेत्यादिप्रतीतिसिद्धयर्थम्, तत्र च घटादौ तादृशमेव लीलाप्रदर्शनं भगवत्त्वावबोधकघटीयकार्यप्रत्यायनमूतिः। तथैव चावयविनि घटादिशब्दप्रयोगस्तेषां तादृशलीलाप्रदर्शनाभावे ब्रह्मविदां घटपटादिप्रयोगो[1] बाध्येतात एव 'न सूर्यो ही'तिवाक्ये एतमितिपदेनाविद्वद्व्यवहारस्यैवाप्रामाणिकत्वमुक्तं ज्ञेयम्। एवं विविच्यान्वयलीलामुपसंहरन्ति एवमित्यादि। व्यतिरेकप्रकारानाहुः व्यतीत्यादि। तत्र भङ्गरूपस्य भ्रूरूपस्य वा सद्धर्मस्य मन्वन्तराख्यस्य जगदुत्तम्भकत्वात्स्थापकत्वं स्पष्टम्। प्रत्येकपदार्थे च कारणान्मृदादेर्भिन्नरूपं यत् 'पुरुषावयवैरेतैरि'ति वाक्यात्पुरुषावयवरूपम्, तेन रूपेण यो घटरूपधर्मभावः घटादिरूपत्वं तेन रूपेण सतां वैदिकानां धर्महेतुः। संस्कारद्वारेणादृष्टजनकः पूज्यदेवताप्रीतिजनको वा प्रापञ्चिकोपि घटादिः विधिविषयो द्रोणकलशादिविधिगोचरो भवतीति स्वरूपात् प्रापञ्चिकाद्व्यतिरिक्तो वैदिकरूपो मन्वन्तराणि। एवमुल्लासरूपाया भङ्गरूपाया वा ईशानुकथाया मर्यादाभक्तिरूपत्वेन संसारनाशकत्वात् प्रलयरूपत्वम्। प्रत्येकपदार्थः च स एव लौकिक एव घटादिः पुनः वैदिकरूपो वा सन् भक्तिविषयत्वेनेत्यादि स्पष्टम्। एवं संसूचनरूपस्य निरोधस्य प्रपञ्चाभावरूपत्वेन सङ्घातप्रलयरूपत्वं स्पष्टम्। अत एवान्तर्गृहगतानां सङ्घातत्यागो रासमण्डलमण्डनानामन्येषाञ्च वह्न्ययोगोलकवत्प्रपञ्चकथनमपि सङ्गच्छते। प्रत्येकपदार्थे च स एव पूर्वोक्तो घटादिः पुनः प्रकारान्तरेण लौकिकवैदिकभक्तानां स्वरूपेच्छूनां भगवद्दर्शनेच्छूनां भगवदेकनिष्ठानां वा परित्यागरूपेण—परित्यज्यते योसौ परित्यागः त्यागविषय इति यावत्। तेन रूपेण पूर्वोक्तान् लौकिकवैदिकभगवदीयत्वरूपान् धर्मान् निरुणद्धि नितरामावृणोति विस्मारयतीति निरोधरूपः आवरकरूपो भवतीति। एवं भूरिरूपाया मुक्तेः स्वरूपलाभरूपमुक्तत्वं स्वस्याध्यात्मिकादिभावातिरिक्तस्य 'प्रभुत्वेन हरेः स्फूर्त्तौ लोकत्वेन तदुद्भव' इत्याकारकस्य लीलाक्षमान्तरङ्गरूपस्य यो लाभः प्राप्तिः तद्रूपत्वं स्पष्टम्, प्रत्येकपदार्थे च तादृशोपि पूर्वोक्तरूपत्रयावरकरूपोपि सन् आत्मानं आवरकरूपं परित्याजयित्वा तानपि विस्मृतप्रपञ्चानपि तादृशस्तस्माद् विस्मारकरूपात् स्वस्मात्परित्याजनरूपो भवति, अतिरिक्तत्यागरूपो भवति इति हेतोर्मुक्तिरूपो भवति। अत्र स्वरूपलाभरूपो मदीयमिदमितिरूपो भवति इति इदं मुक्तिरूपमित्यर्थः। तथा च, भगवल्लीलोपयोगि सत्त्वमिदं पूर्वस्मादतिरिक्तमिति ध्येयम्। एतदेव मुक्तिरूपं ममोत्तमेत्यत्र श्रीप्रभुचरणैः प्रपञ्चितम्, पुष्टिस्तु [illegible]द्विपरीतेत्यनेन व्याख्यानेनेति दिक्। नन्विदं पुष्टिमार्गीयमुक्तिलक्षणमर्यादायामनुपपन्नमित्यतस्तदप्याहुः घटादिष्वित्यादि। तथा चोभयधर्मसत्त्वान्न दोष इति भावः। आश्रयरूपं तु सर्वत्र साधारणमेवेति न विविच्यते। नन्वस्मिन् शास्त्रे किमित्येवं निरूपणं तत्राहुः एतदज्ञान इत्यादि। एतदज्ञाने उक्तप्रकारकस्वरूपाज्ञाने व्याकुलानि परस्परविरोधप्रतिसन्धानेन बाधितविषयत्वज्ञानविषयाणि। तथा च, सर्वशास्त्रस्थापनायैवं निरूपणमित्यर्थः। सिद्धमाहुः अत इत्यादि। अतः सर्वत्र भगवदात्मकत्वतरतमत्वयोर्मुख्यवृत्त्या तत्सङ्कोचेन च यथायथं बोधनात्॥ १॥ ❀ ❀ दशमस्येत्यत्र वर्णयन्तीति। तथा चाप्तवाक्यमत्र प्रमाणमित्यर्थः। इनीति एवंप्रकारकं ज्ञानम्। तथा च, श्रुत्यविरुद्धवादित्वात्ते आप्ता इत्यर्थः। नन्वनया श्रुत्या सर्वेषां वेदानां भगवद्बोधकत्वमात्रमुच्यते तावता विवक्षितप्रकारेणाश्रय एवं बोध्यत इति कथं निश्चेयमित्याकाङ्क्षायां श्रुत्यन्तरमाहुः शतमित्यादि। शतमानन्त्यवाचकम्, अनन्तानि शुक्राणि बीजानि ( चेतजानि ) यत्र ब्रह्मण्येकं भवन्ति–अभेदं प्राप्नुवन्ति। वेदा वेदा ज्ञानानि वा, होतारो जीवाः। अस्याः श्रुतेस्तात्पर्यमाहुः अनुग्राहकेत्यादि। तथा चैतच्छ्रुतौ पर्यवसाने सर्वेषां ब्रह्मणैक्यबोधनात् सर्वाभेदो यत्रेत्यनेनाश्रयत्वञ्च ब्रह्मणो बोध्यतेऽतस्तथा निश्चेयमित्यर्थः। ननु श्रुतौ तु त्रयाणामेकीभावो निरूप्यतेऽतो नवानामनिरूपणात् कथं तेषां वेदाविरुद्धवादित्वमित्याकाङ्क्षायामाहुः एते त्रय इत्यादि। तथा च, यथा त्रयो गुणाः अन्योन्यप्रवेशान्नव, तथैतेपीति त्रयाणां नवसु प्रवेशेनैकार्थ्याद् दशमस्य चोक्तत्वाद्वेदाविरुद्धवादित्वमित्यर्थः। तदेव विशदयन्ति तत्रेत्यादि। कारणप्राधान्यादिति शुक्रपदोक्तबीजप्राधान्यात्। प्रमाणमिति लक्षणमित्यनुवर्त्तते, वेदशब्दोक्तज्ञानप्राधान्यादिति विशेषोऽर्थाज्ज्ञेयः। ज्योतींषीति अत्रापि लक्षणमित्यनुवर्तते, होतृपदोक्तानुग्राहकप्राधान्यादिति च शेषः। एतेषामेतेषु प्राधान्ये बीजमाहुः अर्थादित्यादि। 'तज्जलानि'ति 'यतो वा इमानी'तिश्रुते'र्जन्मादि'सूत्राच्च प्रपञ्चस्योत्पत्त्यादित्रयं भगवत उपादानत्वकर्तृत्वयोर्बोधकं कार्यलक्षणमत एते सर्गादयस्तथा भवन्तीति तेषां शुक्रादीनि त्रीण्येवैवं प्रकारेण लक्षणानीति तत्र तत्र तेषां प्राधान्यमित्यर्थः। कथमेकैकस्य त्रैविध्यं कथञ्च तेषु तेषां प्राधान्यमत आहुः उत्पत्तिरित्यादि। कारणतो मृत्पिण्डादेः सकाशादुत्पत्तिः, कारणसमवायरूपात्कार्यत उत्पत्तिः स्वसत्तासमवायरूपा, आधारो मूलकारणं मृदादि, तस्मादुत्पत्तिरवस्थाभिव्यक्तिरूपा, एवं सर्वत्र प्रकृतेः भूतादिभ्यः कारणेभ्यः कार्येभ्यो गुणेभ्यो भगवतश्चेति तत्त्रेधा उत्पत्तिः। न च भगवत उत्पत्तिलक्ष्यत्वादुत्पत्तिलक्षणत्वमयुक्तमिति शङ्क्यम्, कार्पासन्यायेन व्यापाराविष्टस्य लक्षणतया व्यापारशून्यस्य लक्ष्यतया चावस्थाभेदेनैकस्यैवोभयरूपतयाऽविरुद्धत्वादिति। एवञ्च गुणसम्बन्धविचार एता लीला राजसतामसराजसराजसराजससात्विक्यः प्रतिभान्ति। स्थितौ प्रमाणस्य कथं ×प्राधान्यं येन तस्य स्थितिलक्षणतेत्याकाङ्क्षायामाहुः स्थितिरित्यादि। अयमर्थः, पोषणं नामानुग्रहो वरणाख्यः, स च, स्वीकाररूपत्वादीक्षणत्वाच्च वेदोक्तज्ञानात्मको भवति, तस्य स्थितिहेतुत्वं प्राधान्यं भगवल्लक्षणत्वं च 'यदनुग्रहतः सन्ती'ति वाक्यादेव सिद्धम्। हेतोः कार्यलक्षणत्वं चात्यभ्रस्य वृष्टिलक्षणत्ववद् वृष्टेः सुभिक्ष-

---

१. बोध्येत पाठः नूतनपुस्तके। २. ( भगवदुत्पत्तिः×प्रामाण्यं पाठः।

लक्षणत्ववदुपपन्नम्। न च ज्ञानस्य प्रमात्वात्कथं प्रमाणत्वमिति शङ्क्यम्, 'अत्र प्रमाणं भगवानि'त्यत्र प्रमाणशब्दस्य ज्ञानवाचकताया *विचारितत्वात्। एवं विलासस्य वासनारूपत्वात्तस्याश्च ज्ञानजन्यत्वेन स्मृतिपूर्वावस्थारूपतया च ज्ञानत्वं प्रमाणत्वञ्च। तया च, स्थितिर्देहविष्टम्भात्मकप्राणनरूपा 'यस्याः कालेन नोद्याया वियोगः प्राणदेहयोः, प्राणिनः सा स्वसमये मृत्युरत्यन्तविस्मृति'रिति मृत्युलक्षणान्यथानुपपत्तिसिद्धत्वाच्च तस्याः प्राधान्यमप्युपपन्नम्। विलासस्य भगवद्धर्मत्वेन स्थितेस्तज्जन्यत्वाद् भगवल्लक्षणत्वमप्यव्याहतमेव। एवं धर्मतो या स्थितिः सा 'स्थाने त्वधर्ममखमन्वमरावनीशा' इति वाक्येन तस्य जगदुत्तम्भकत्वादायुर्वर्द्धकत्वाच्च धर्मश्चोदनालक्षणोतो वैदिकस्य ज्ञानस्य तत्रापि प्राधान्यमतः प्रमाणस्य स्थितिलक्षणत्वं स्थितस्याधारः स्थितिकर्त्ता च भगवानिति तस्या भगवल्लक्षणत्वञ्चोपपन्नमित्यर्थः। ज्योतिषां प्रलयलक्षणत्वं दुरूहमिति तत्स्वयं विवेचयन्ति प्रलय इत्यादि। संसारस्य लयोऽवतारादिचरित्रेणाभीक्ष्णं श्रुतेन कीर्तितेन स्मृतेन येषां जीवानां भवति ते जीवा मोक्ष्यन्तीति ज्ञायते। तथा सत्यध्यासलयस्य जीवनिष्ठत्वाज्ज्योतिरूपास्त एव लक्षणम्, स च कार्यतया जीवद्वारा च भगवल्लक्षणम्। सङ्घातस्येत्यादि। एवं सङ्घातोपि जीवभोगार्थ इति तस्य लयेपि त एव लक्षणभूता देवदत्तो मृत इति शुकदध्यङादयो विस्मृतप्रपञ्चा इति भानात्। घटादेर्लयो भोग्यादृष्टनाशेनेति तत्रापि त एव लक्षणं बोद्धृणां सोपि कार्यतयाऽऽधेयतया च निरोधत्वेनैव रूपेण भगवल्लक्षणं न तु मुक्तजीवानां भगवति प्रवेशलक्षणया मुक्त्या लक्षणमित्यर्थः। मुक्तेस्तु स्वरूपलाभरूपत्वात्तल्लक्षणत्वं ज्योतिषां तस्याश्च भगवल्लक्षणत्वं स्पष्टमेवेति तदत्र न विवृतम्। तेन सिद्धमाहुः तस्मादित्यादि ॥ २ ॥ ❀ ❀ **भूतमात्रे**त्यत्र **गुणत्वेनाविर्भावा**दिति बन्धकत्वेनाविर्भावात्। **विषमा** इति क्षुब्धाः, **प्रत्येकं समुदायेन** चेति महदाद्युत्पत्तिरूपः प्रत्येकं अण्डसर्गः समुदायेनेत्येवं द्विविध इत्यर्थः। **प्रत्येकं विषमा** इत्यादि। 'ततोऽभवन्महत्तत्त्वमव्यक्तात्कालचोदितादि'त्यादिना विकुर्वाणादिशब्दबोधिताः [illegible]

सङ्ख्याप्रयोजनकत्वमिति ज्ञापितम्। **लोकत्रयभेदेनेति** लोकत्रयस्य भेदेन ॥ ३ ॥ ❀ ❀ **स्थितिरि**त्यत्र **वैकुण्ठस्येत्यादि**। भगवतः सर्वकारणादिकारणत्वरूप उत्कर्षो यस्यां क्रियायां ज्ञायते सा मर्यादा पालनक्रिया **स्थितिपदवाच्ये**त्यर्थः। एतेन स्थानशब्दः करणव्युत्पन्न इति बोधितम्। स्थितिशब्दश्च भावव्युत्पन्न इति तेन तत्तन्मर्यादास्थापनं प्रति कारणभूता भगवतः स्थितिक्रिया सा स्थानमिति फलति। तां विभजन्ति प्राकृतेत्यादि। **ब्रह्मपदेनाक्षरम्, योयमनुग्रह** इति यत्स्वीकरणरूपं ज्ञानं तत्पोषणमित्यर्थः। ननु पोषणस्य स्थितिवृद्धिरूपत्वादभिवृद्धौ पूर्वरूपनाशेन स्थितिमर्यादानाशे सा वृथैव स्यादिति शङ्कां वारयितुं पोषणं विभजन्ति **तेष्वित्यादि, पूर्वोक्तेषु षड्विंशतिषु**। **शिष्टेष्विति** ऊनविंशतिषु। के ते सप्त इत्यत आहुः **महाभूतेष्वित्यादि**। तथा च, सप्तसु तस्य स्थापितत्वान्न वैयर्थ्यमित्यर्थः। **वासनाधर्मरूपत्वादिति**, अत्र वासना च धर्मश्चेति द्वन्द्वो बोध्यः। **इन्द्रियोपलक्षकत्वादिति** स्वयं दशेन्द्रियैः, कार्योऽन्यस्मै च तथा कार्यत्वेनोपदेष्टव्य इति कार्यत्वे वाच्यत्वे चेन्द्रियोपलक्षकत्वादित्यर्थः। **चिन्तयतीत्यादि**, एतैर्बुद्धिमनोहङ्कारचित्तक्रमेण धर्मो निर्दिष्टो बोध्यः। पायूपस्थयोर्धर्मकरणं न सम्यक्तया प्रतिभातीति तदर्थमाहुः **रेत इत्यादि**। **तयोरिति** उपस्थपाय्वोः। नन्वेवं तयोर्धर्महेतुत्वं गृहस्थव्यतिरिक्तेषु भवति, न तु गृहस्थ इति शङ्कायां दशेन्द्रियकार्यैस्तं स्फुटीकुर्वन्ति **आश्रयेत्यादि**, अत्र तृप्तिर्वागिन्द्रियकार्यं सद्वाक्येन तृप्ते रनुभवसाक्षित्वात्, जाड्यादिदूरीकरणं पायोः, विसर्गस्य तत्कार्यत्वात्, दूरीकरणस्य च विसर्गरूपत्वादिति चकाराद् ग्रहणेन। **कर्मजनिता वासना** इति। 'वेञ् तन्तुसन्ताने' ऊयन्ते कर्मभिः सन्तन्यन्ते इत्यूतयः, वृद्ध्यर्थात् संश्लेषार्थाद् वा वयतेरिदं रूपम्, तथा सति वर्द्धयन्ते संश्लिष्यन्ते इति वा ऊतयः, इति योगात्तथेति ॥ ४ ॥ ❀ ❀ **अनवतारे**त्यत्र **द्वितीयस्येति** चरित्रस्य, **तत्रेशस्येति** ईशकथांशभूतस्येशस्य ॥ ५ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

फलं भागवतं त्वादौ सङ्क्षेपेण निरूपितम् ॥ परीक्षिते शुकेनेति दशमे विनिरूप्यते ॥ १ ॥

पूर्वं दशलक्षणं पुराणं प्राहेत्युक्तं तानि दशलक्षणानि दर्शयति—अत्रेति। अत्र श्रीभागवते सर्गादयो दशार्था निरूप्यन्ते इत्यर्थः। मन्वन्तराणि ईशानुकथाश्चेति द्वन्द्वैक्यम् ॥ १ ॥ ❀ ❀ नन्वेवं प्रतिपाद्यानां बहुत्वात्तद्भेदेन शास्त्रभेदः स्यादित्याशङ्क्याह—दशमस्येति। अञ्जसा सुखेन दशमस्याश्रयस्य परब्रह्मणो विशुद्ध्यर्थं विविक्तप्रतिपत्त्यर्थं नवानां सर्गादीनां लक्षणमिह पुराणे महात्मानो विशुद्धान्तःकरणा विवेकिनो वर्णयन्तीत्यन्वयः। तथा च दशमस्यैकस्यैव प्राधान्यात्तदर्थत्वेन इतरेषां प्रतिपादनान्न शास्त्रभेद इत्यर्थः। नन्वत्र नैवं प्रतीयते तत्राह—स्तुत्यादिस्थानेषु श्रुतेन श्रुत्या कण्ठतः साक्षादेवं वर्णयन्ति, तत्तदाख्यानेषु तु अर्थेन तात्पर्यवृत्त्या वर्णयन्तीत्यर्थः ॥ २ ॥ ❀ ❀ प्रत्येकं दशानां लक्षणमाह—भूतेति सप्तभिः। भूतान्याकाशादीनि पञ्च, मात्राणि शब्दादीनि पञ्च, इन्द्रियाणि चक्षुरादीनि दश, धीशब्देन चतुर्विधान्तःकरणम्, येषां ब्रह्मणः परमात्मनः प्रयोजकाद् गुणानां सत्त्वरजस्तमसां वैषम्याद्धेतोर्यज्जन्म उत्पत्तिः स सर्ग इति तत्त्वज्ञैरुदाहृतः। पुरुषो वैराजो ब्रह्मा तत्कृतः पौरुषः चराचरसर्गो विसर्गः

---

* विचारित्वात् पाठः।

स्मृत इत्यर्थः ॥ ३ ॥ ❀ ❀ वैकुण्ठस्य भगवतो विजयः । सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानम् । स्वभक्तेषु तस्यानुग्रहः[1] पोषणम् । सतां तद[2]नुगृहीतानां मन्वन्तराधिपतीनां धर्मो मन्वन्तराणि । कर्मणां वासनाः । वेञ् तन्तुसन्ताने । ऊयन्ते कर्मभिः सन्तन्यन्ते इत्यूतयः । यद्वा वृद्ध्यर्थात्संश्लेषार्थाद्वा वयतेर्धातोरिदं रूपम् । ऊयन्ते कर्मभिर्वर्द्धन्ते संश्लिष्यन्ते इति वा ऊतय इत्यर्थः ॥ ४ ॥ ❀ ❀ ❀हरेरवतारानुचरितमस्य हरेरनुवर्त्तिनां च नानाख्यानोपबृंहिताः विविधेतिहासयुक्ताः कथाः ईशकथाः प्रोक्ता इत्यन्वयः ॥ ५ ॥

## हिन्दी अनुवाद

### भागवतके दस लक्षण

श्रीशुकदेवजी कहते हैं—परीक्षित्! इस भागवतपुराणमें सर्ग, विसर्ग, स्थान, पोषण, ऊति, मन्वन्तर, ईशानुकथा, निरोध, मुक्ति और आश्रय—इन दस विषयोंका वर्णन है ॥ १ ॥ ❀ ❀ इनमें जो दसवाँ आश्रयतत्त्व है, उसीका ठीक-ठीक निश्चय करनेके लिये कहीं श्रुति से, कहीं तात्पर्यसे और कहीं दोनोंके अनुकूल अनुभवसे महात्माओंने अन्य नौ विषयोंका बड़ी सुगम रीतिसे वर्णन किया है ॥ २ ॥ ❀ ❀ ईश्वरकी प्रेरणासे गुणोंमें क्षोभ होकर रूपान्तर होनेसे जो आकाशादि पञ्चभूत, शब्दादि तन्मात्राएँ, इन्द्रियाँ, अहङ्कार और महत्तत्त्वकी उत्पत्ति होती है, उसको 'सर्ग' कहते हैं। उस विराट् पुरुषसे उत्पन्न ब्रह्माजीके द्वारा जो विभिन्न चराचर सृष्टियोंका निर्माण होता है, उसका नाम है 'विसर्ग' ॥ ३ ॥ ❀ ❀ प्रतिपद नाशकी ओर बढ़नेवाली सृष्टिको एक मर्यादामें स्थिर रखनेसे भगवान् विष्णुकी जो श्रेष्ठता सिद्ध होती है, उसका नाम 'स्थान' है। अपने द्वारा सुरक्षित सृष्टिमें भक्तोंके ऊपर उनकी जो कृपा होती है, उसका नाम है 'पोषण'। मन्वन्तरोंके अधिपति जो भगवद्भक्ति और प्रजापालनरूप शुद्ध धर्मका अनुष्ठान करते हैं, उसे 'मन्वन्तर' कहते हैं। जीवोंकी वे वासनाएँ, जो कर्मके द्वारा उन्हें बन्धनमें डाल देती हैं, 'ऊति' नामसे कही जाती हैं ॥ ४ ॥ ❀ ❀ भगवान् के विभिन्न अवतारोंके और उनके प्रेमी भक्तोंकी विविध आख्यानोंसे युक्त गाथाएँ 'ईशकथा' हैं ॥ ५ ॥

**नीरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः । मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ॥ ६ ॥**
**आभासश्च निरोधश्च यत[3]श्चाध्यवसीयते । स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥ ७ ॥**
**योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः । यस्तत्रोभयविच्छेदः पु[4]रुषो ह्याधिभौतिकः ॥ ८ ॥**
**एकमेकतराभावे यदा नोपलभामहे । त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥ ९ ॥**
**पुरुषोऽण्डं विनिर्भिद्य यदासौ स[5] विनिर्गतः । आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः ॥ १० ॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

निरोधमाह । अस्यात्मनो जीवस्य हरेर्योगनिद्रामनुपश्चाच्छक्तिभिश्चोपाधिभिः सह शयनं लयो निरोधः । अन्यथारूपमविद्ययाऽध्यस्तं कर्तृत्वादि हित्वास्वरूपेण ब्रह्मतया व्यवस्थितिर्मुक्तिः ॥ ६ ॥ ❀ ❀ आभास सृष्टिः निरोधोः लयश्च यतो भवत्यध्यवसीयते प्रकाशते च स परं ब्रह्मेति परमात्मेति प्रसिद्धः आश्रयः कथ्यते ॥ ७ ॥ ❀ ❀ आश्रयस्वरूपमपरोक्षानुभवेन स्पष्टं दर्शयितुमध्यात्मादिविभागमाह । योऽयमाध्यात्मिकः पुरुषश्चक्षुरादिकरणाभिमानी द्रष्टा जीवः स एवाधिदैविकश्चक्षुराद्यधिष्ठाता सूर्यादिः तत्रैकस्मिन्नेवोभयो द्विरूपो विच्छेदो यस्मात्स आधिभौतिकश्चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः पुरुष इति पुरुषस्य जीवस्योपाधिः । "स वा एष पुरुषोऽन्नरसमयः" इत्यादिश्रुतेः ॥८॥ ❀ ❀ एकमेकतराभाव इत्येतेषामन्योऽन्यसापेक्षसिद्धित्वे नानात्मत्वं दर्शयति । तथाहि दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिद्ध्यति नापि द्रष्टा नच तद्विना करणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्यादिः न च तं विना करणं प्रवर्तते, न च तद्विना दृश्यमित्येवमेकतरस्याभावे एकं नोपलभामहे तत्र तदा तत्त्रितयमालोचनात्मकेन प्रत्ययेन यो वेद साक्षितया पश्यति स परमात्मा आश्रयः । तेषामपि परस्परमाश्रयत्वमस्त्येवेति तद्व्यवच्छेदार्थं विशेषणम् । स्वाश्रयोऽनन्याश्रयः स चासावन्येषामाश्रयश्चेति । तथा च भगवान् वक्ष्यति । "दृग्रूपमार्कं वपुरत्र रंध्रे परस्परं सिद्ध्यति यः स्वतः खे ॥ आत्मा यदेषामपरो य आद्यः स्वयाऽनुभूत्याऽखिलसिद्धसिद्धिः" ॥ इति । एतेनैव व्यभिचारित्वात्तेषां मायामयत्वमप्युक्तम् । अत एव । "पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः ॥ लोकैरमुष्यावयवाः सपालैः" इत्यनेनोक्तो विरोधोऽपि परिहृतः ॥ ९ ॥ ❀ ❀ उक्तमेवाध्यात्मादिविभागं प्रपंचयन् "यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदम् ॥ यथासीत्तदुपाख्यास्ये" इति यत्प्रतिज्ञातं तदुत्पत्तिप्रकारमाह पुरुष इत्यादिना । पुरुषो वैराजोऽण्डं विनिर्भिद्य पृथक्कृत्य विनिर्गतः पृथक् स्थित इत्यर्थः । अयनं स्थानमन्विच्छन् विमृशन् यतः शुचीः स्वयमतः शुचीः शुद्धाः अपो गर्भोदकसंज्ञा अस्राक्षीत्ससर्ज ॥ १० ॥

---

१. तस्य वैकुण्ठस्य भगवतः । २. तेन वैकुण्ठेनानुगृहीतानाम् । ३. प्रा० पा०—तपस्तद् यत्र गीयते । ४. प्रा० पा०—जप्यते । ५. प्रा० पा०—स स्मृतो । ६. प्रा० पा०—विसर्गतः ।

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

सर्गादीन्नवार्थानुक्त्वा दशममाश्रयमाह–आभास इति । चात्स्थितिपोषणादयः द्वितीयचान्मुक्तिश्च यतोऽध्यवसीयते निश्चीयते स आश्रयो भगवान्नारायण एव तस्मादेव सृष्ट्यादिदर्शनात्तस्यैवोपासकभेदेन संज्ञांतरमाह–परमिति । अस्य विवृतिरग्रे विधेया । तथाहि-अत्र दशार्थाः प्रथमस्कन्धानुक्रमेण निरूप्यंते तथा सामान्यतो लक्षितमप्याश्रयत्वं श्रीकृष्ण एव तु वैशिष्ट्यं तदर्थमेव ह्यखंडश्रीभागवतप्रकाशः । अत्र प्रथमस्कंधे श्रीशौनकसूतयोः प्रश्नोत्तरे तत्परत्वेनैव प्रतिपादिते तदनुगतावेव प्रथमद्वितीयाध्यायौ तृतीयाध्यायस्तु स्फुट एव पुनर्विशेषतस्तत्प्रस्तावाय चतुर्थाद्यध्यायाः । अत्र तदेकपरयोः श्रीशुकपरीक्षितोः संवादघटना अतो द्वितीयस्कंधे च सामान्यतो भगवत्तत्त्वं प्रशंसन्नपि तत्रैव तात्पर्यं वहति यत्र ब्रह्मणश्चतुश्श्लोकीवक्तृश्रीभगवतश्च तात्पर्यं तत्रैव दर्शितं ब्रह्मकल्पकथारंभस्तु तदर्थ एव तृतीये पाद्मकल्पकथा च गतस्य पूर्वपरार्द्धस्याद्यंतवर्णने मध्यमानामपि कल्पानां तदनुसारेण ज्ञाने सति दशमैकादशयोः प्रस्ताव्यायास्तत्कथायाः सम्यगवगमात् । एवमेव गते स्वायंभुवचाक्षुषमन्वंतरेऽपि तृतीयचतुर्थपञ्चमषष्ठसप्तमेषु निरूपितेऽष्टमे प्राचीनमिश्रवैवस्वतं नवमस्तु तत्प्रादुर्भावास्पदकेवलवैवस्वतान्वय एव द्वादशः खलु समाधिमुद्रामयः तत्र तत्र तत्तदन्यकथा तु तत्पोषिकैव विशेषतस्तत्तदवतारकथेति । तस्मात्सर्गादीनां मध्ये क्वचिदेकद्वारा क्वचिदनेकद्वारा य आश्रयो निरूप्यते स तु दशमादावीशानुकथाप्रधानतत्तद्वारा सर्वत उत्कृष्य श्रीकृष्णरूपो निरूप्यते इति स्थितम् ॥ ७ ॥ ❀ ❀ तत्रेत्यस्य विवरणमेकस्मिन्निति । तैत्तिरीयश्रुतौ देहेपि पुरुषपदप्रयोगो दृश्यते तथा हि "स वा" इत्यादिस्पष्टार्था श्रुतिः । अत्र संदर्भः । अथ स्वयं भगवल्लक्षणपरमरूपं तदेवाश्रयं स्तोतुं स्थितौ च तत्राश्रयस्वरूपमपरोक्षानुभवेन व्यष्टिद्वारा दर्शयितुं तदंशभूतस्य पुरुषस्य वैभवं तादृशत्वेन दर्शयन्नध्यात्मादिविभागमाह । देहसृष्टेः पूर्वं करणानामधिष्ठानाभावेनाक्षमतया करणप्रकाशकर्तृत्वाभिमानितत्सहाययोरपि तयोर्वृत्तिभेदानुदयेन जीवत्वमात्राविशेषात् । ततश्चोभयः करणाभिमानितदधिष्ठातृरूपद्विरूपो विच्छेदो यस्मादिति सर्वमन्यत्स्वामिवत् । चक्रवर्त्तिना त्वस्यावतरणिका प्रकारांतरेणोक्ता । तथाहि अथ 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इत्युक्तेः प्रतिदेहमेवांतर्यामिरूपेण स्थितं तदेवाश्रयरूपमध्यात्मादिभ्यो विभागेन स्पष्टं दर्शयितुमाह द्वाभ्याम् । उभयो गोलकरूपः शब्दस्पर्शादिरूपश्च विच्छेदो यस्य सः पुरुषस्य जीवस्योपाधित्वात्सर्वत्र पुरुषपदप्रयोग इति विशेषः ॥ ८ ॥ ❀ ❀ एतेनैव श्लोकेन तेषामध्यात्मादीनां परस्परं व्यभिचारवत्त्वात् । अत एव मायामयत्वादेव विरोधो हि परमार्थयोस्तेजस्तिमिरयोरिव भवति न तु वंध्यात्मजशशशृंगयोरपरमार्थयोरपीति । अत्र संदर्भः । अत्रांशांशिनो शुद्धजीवपरमात्मनोरभेदांशस्वीकारेणैवाश्रय उक्तः अतः "परोपि मनुतेऽनर्थम्" इति । "जाग्रत्स्वप्नसुषुप्तञ्च गुणतो बुद्धिवृत्तयः । तासां विलक्षणो जीवः साक्षित्वेन विनिश्चत" इति । "शुद्धो विचष्टे ह्यविशुद्धकर्तुः" इत्याद्युक्तस्य साक्षिसंज्ञिनः शुद्धजीवस्याश्रयत्वं नाशंकनीयम् । अथ वा नन्वाध्यात्मिकादीनामन्याश्रयत्वमस्त्येव । सत्यम्, तथापि परस्पराश्रयित्वान्न तत्राश्रयता कैवल्यमिति । ते त्वाश्रयशब्देन मुख्यतया नोच्यंते तत्राह-एकमिति । तर्हि साक्षिण एवास्तामाश्रयत्वं तत्राह–त्रितयमिति । स आत्मना साक्षी जीवः यः स्वाश्रयोऽनन्याश्रयः परमात्मा स एवाश्रयो यस्य स तथाभूत इति वक्ष्यते च "सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीड्यम्" इति तस्मादाभास इत्यादिनोक्तः । परमात्मैवाश्रय इति सर्वमेतत्त्रितयं पुमाञ्जीवो वेदेति तत्रार्थः । तथा चाध्यात्मादीनां परस्पराश्रयाणां जीव आश्रयः परमात्माश्रयः परमात्मनश्च परमात्मैवाश्रय इत्याश्रयत्त्वं परमात्मैव तथा "विष्टभ्याहमिदं कृत्स्नम्" इत्याद्युक्तेः स्वः कृष्ण एवाश्रयो यस्य स परमात्मेति व्याख्याने श्रीकृष्णस्य मुख्यमाश्रयत्वं तदंशत्वात्परमात्मनश्च निर्विशेषस्वरूपत्वाद्ब्रह्मणश्चेत्येकमाश्रयतत्त्वमुपासकस्य भेदात् त्रिधा भासत इति ॥ ९ ॥ ❀ ❀ इत्यर्थ इति । पृथक्स्थितिरेव निर्गमपदार्थ इति भावः । अत्र विश्वनाथः–एवं दशभिर्महापुराणलक्षणैर्जीवेश्वरविभागं निरूप्य जीवानामीश्वरभक्त्यैव निस्तारमभिव्यंज्य "यदुताहं त्वया दृष्टो वैराजात्पुरुषादिदम् । यथासीत्तदुपाख्यास्ये" इति प्रतिज्ञातमर्थं वक्तुं कथां प्रस्तौति— पुरुषोऽडमिति । ननु कथं मुहुरपि वैराजस्याध्यात्मादिकथैव प्रपंच्यते । भगवतोऽतिमधुरलीलावताररूपगुणादिकथाः किमल्पीयस्यो दृष्टाः सत्यंताः कथा आस्वादनीयत्वेन केषु खल्पदेष्टव्याः ये तद्भक्तिसिद्धा नित्यसिद्धा वा महानुभावास्ते तत्सौंदर्यामृतसिंधौ स्वत एवाविरामं खेलंत्येव । ये पुनरन्ये विषयानंदतल्पे निद्रांति ये च कुकर्मफलदुःखतरंगे मूर्च्छंति ते ततः प्रबोधयितुमेवाशक्याः कथं भगवल्लीला उपदेश्यंतां यदुपदेशादेव ते साधकभक्ता भवेयुरिति महाकारुणिकः पुराणचूडामणिरयं ताः स्वतः प्रबोधयितुं भंग्या किमपि मुहुरपि यतते स्म । तत्र यथा वह्निना तप्तमंगं वह्निनैवोपशाम्यति यथा च भूताविष्टो भूतमंत्रेणैव प्रबुध्यते तथैव जीवानां मायानिद्रावेशो मायाकथयैवापयाति यदुक्तं "मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः । शृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति" इति । किञ्च । यद्यपि भागवतकृपालब्धभगवल्लीलामृतवृष्ट्यैव मायासुखनिद्राणोपि कर्मदुःखमूर्च्छितोपि जागर्त्ति अश्नाति जीवति नृत्यत्यानंदेन माद्यति च तदपि तादृशमहत्कृपा यैरवलभ्यते तैरेव कृतार्थीभूयते, न तु सर्वैरेवातोध्यात्मकथया मुहुः श्रुतया लब्धसंसारतितीर्षाणां गुरुपादाश्रयेण प्रोद्भूतयत्नानां निकृष्टजीवानामपि निस्तारो भवत्वित्येतदर्थमेवाध्यात्मकथापौनःपुन्यं भगवद्भक्तानामास्तिक्यवतां तु सर्वमेव श्रीभागवतममृतमिवास्वाद्यमेव । अपि च । शास्त्रस्यास्य न केवलं भगवंतमेवाधिकृत्य प्रवृत्तिरपि तु तन्निर्विशेषस्वरूपतदंशभूतौ ब्रह्मपरमात्मानावपि । तदुक्तं शास्त्रारंभे एव "ब्रह्मेति परमात्मेति भगवानिति

शब्द्यते" इति । ब्रह्मपरमात्मोपासकानामध्यात्मादिकथाभ्यास उपयुक्त एव । किञ्च शास्त्रस्यास्य महिम्ना ब्रह्मपरमात्मोपासकानामपि भक्तिप्रवर्त्तितत्वात् । अतः फलदशायामपि 'आत्मारामाश्च मुनयः' इत्यादेः प्रायो भक्तिरेव वरीवर्त्तीति तेन तत्साधनं तत्फलं च शुद्धभक्तैरपि न कटाक्षणीयमपि त्वनुमोदनीयमेव । तस्माद्यथा ब्रह्मत्वपरमात्मत्वमत्स्यकूर्माद्यनेकावतारत्वधर्मज्ञानबलैश्वर्यरूपगुणलीलामाधुर्यपरिपूर्णः श्रीकृष्णः सर्वविधभक्तैरेव परिचर्यते । एवमेव ब्रह्मत्वपरमात्मत्वमत्स्यकूर्माद्यवतारावतारितत्तत्सर्वमूलभूतश्रीकृष्णतदीयरूपगुणलीलामाधुर्यैश्वर्यतत्प्राप्तिसाधनभक्तिप्रेमधर्मज्ञानयोगवैराग्याद्यखिलतत्त्वप्रदर्शको ग्रंथोऽयमपि स्वरूपभूत इति सर्वं समंजसम् । संदर्भः । अथ स्वयं भगवल्लक्षणपरमरूपं तदेवाश्रयं स्थातुं तदंशभूतस्य पुरुषस्य वैभवं तादृशत्वेन दर्शयति यदासौ विनिर्गत 'आद्योऽवतारः पुरुषः परस्य' इत्युक्तरीत्या श्रीभगवत आविर्भूतस्तदा त्वंडमात्मनि लीनं तत्समूहं विनिर्भिद्यात्मनः पृथक्कर्तुमारभ्येत्यर्थः । अथवांडं निजाविर्भावस्थानं श्रीभगवंतं विनिर्भिद्य ततः पृथग्भूत्वा विनिर्गतः अपस्तत्पर्यंतानि तत्त्वानीत्यर्थः । पृथिव्यपि तदंतर्भूतत्वेन ज्ञेयेत्याह ॥ १० ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

यत इति हेतौ पञ्चमी ॥ ७ ॥ ❀ ❀ विच्छेद इति । भेद इत्यर्थः ॥ ८ ॥ ❀ ❀ एषामित्यादि । आध्यात्मिकादीनां त्रयाणां मिथः सापेक्षत्वेन सिद्धेस्तेषामाश्रयत्वं नास्तीति व्याचष्टे इत्यर्थः ॥ तत्प्रतीत्यनुमेयमिति । दृश्यप्रतीत्यनुमेयमित्यर्थः ॥ तद्विना करणेति । तद्विना करणं विनेत्यर्थः ॥ ते विनेति । अधिष्ठातारं सूर्यादिं विना ॥ तत्रितयमिति । आध्यात्मिकादित्रयमित्यर्थः । दृग्रूपमार्कमिति एकादशस्कन्धीयद्वाविंशाध्यायस्य एकत्रिंशश्लोकः ॥ पुरुषावयवैरिति एतत्स्कन्धीयाध्यायस्य दशमश्लोकः ॥ तेनोक्तो विरोधः परिहृत इति । विरोधो यथा—पुरुषावयवैर्लोकाः सपालाः सपालैर्लोकैरमुष्यावयवा इत्यन्योन्याश्रयत्वात् एकतरोपादाने च सिद्धत्वात् । परिहारस्तूभयोरेव मायामयत्वादिति व्याख्यालेशः ॥ ९ ॥ ❀ ❀ यदु ताहमिति पूर्वाध्यायस्य चरमश्लोकः ॥ १० ॥

## श्रीमद्वीरराघवव्याख्या

निरोधलक्षणमाह निरोध इति । अस्य जीवात्मनः सह शक्तिभिः कर्मशक्तिभिः सहानुशयनं सूक्ष्मावस्थप्रकृत्यवस्थितिनिरोध इत्यर्थः । मुक्तिलक्षणमाह मुक्तिरिति । अन्यथा भावं देवादिरूपं हित्वा स्वरूपेणाविर्भूतापहतपाप्मत्वादिगुणाष्टकविशिष्टेन रूपेणावस्थानमेव मुक्तिरित्यर्थः ॥ ६ ॥ ❀ ❀ आश्रयलक्षणमाह आभास इति । आसमंताद्भासनमाभासः जगत आविर्भावः निरोधः प्रलयश्च ॥ यतः यस्मादध्यवसीयते ज्ञायते प्रमाणेनावगम्यते आविर्भावतिरोभावजन्मनाशविकल्पवदित्युक्तेः ॥ यच्च परब्रह्मादिशब्दैः शब्द्यतेऽध्यवसीयते स आश्रय इत्यर्थः ॥ ७ ॥ ❀ ❀ अथाश्रयस्य परमात्मनः कारणत्वोपयुक्तसर्वज्ञतां वक्तुं ज्ञातृज्ञेयज्ञानकरणानां भगवदात्मकत्वमाह य इति । आत्मनि जीवे ज्ञातरि नियन्तृतया वर्तमान आध्यात्मिको यः पुरुषः सो सावेवाधिदैविकः ॥ देवेषु ज्ञानकरणचक्षुरादीन्द्रियाभिमानिष्वादित्यादिषु वर्तमानश्च स एव उभय विच्छेदः उभयविधो विच्छेदो भेदो यस्य स उभयविच्छेदः ज्ञातृज्ञानकरणविलक्षणो ज्ञेयः शब्दादिराकाशादिभूतेषु वर्तमानः तत्र यः शब्दादिष्वंतरात्मतया वर्तमानो यः स आधिभौतिकः स्मृत इत्यर्थः । ज्ञाताज्ञानकरणं शब्दादिज्ञेयं च भगवदात्मकमित्यर्थः ॥ ८ ॥ ❀ ❀ एवं त्रयाणां भगवदात्मकत्वमभिधाय तस्य सर्वज्ञतां वक्तुं जीवानामसर्वज्ञतामाह एकमिति । यथा एकतराभावे चक्षुरादिकरणाभावे एकं विषयं नोपलभामहे न साक्षात्कुर्महे चक्षुरादिकरणाभावे सन्निहितमपि विषयं न पश्यामः । क्षेत्रज्ञास्त्रिविधसन्निकर्षवत्सु पदार्थेषु करणाधीनज्ञाना न तु सूक्ष्मव्यवहितादिज्ञानवंतो न च करणानपेक्षज्ञाना इत्यर्थः । परमात्मा तु कोटित्रयसाक्षात्कर्तेत्याह त्रितयमिति । तत्र तदा त्रितयं ज्ञातृकरणज्ञेयानां त्रयं यो वेद साक्षात्कुर्यात्स त्वात्मा आश्रयाश्रयः अविद्याश्रयः जीवस्याप्याश्रयः यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रजामात्राः प्राणेऽर्पिता इति श्रुतेः स्वाश्रयाश्रय इति पाठे स्वस्याप्याश्रयः अन्येषामप्याश्रय इत्यर्थः ॥ ९ ॥ ❀ ❀ एवमाश्रयपर्यंतानर्थानभिधाय यथासीत्तदुपाख्यस्य इति प्रतिज्ञाते चातुर्मुखसृष्टिप्रकारं वक्तुमारभते पुरुष इति । पुरुषश्चतुर्मुखरूपी असौ परमात्मा आत्मनः स्वस्यायनं स्थानमन्विच्छन्विमृशन् यतः स्वयं शुचिरत एव शुचीः शुद्धा अपः जलान्यस्राक्षीत्सृष्टवान् ॥ १० ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

निरोधं लक्षयति निरोध इति । आत्मन इति जातावेकवचनं अस्यात्मनो जीवसमुदायस्यानभिव्यक्तस्वरूपेच्छादिशक्तिभिः सह श्रीविष्णुमनुप्रविश्यानुशयनं स्वापो निरोध इत्युच्यते, अनुप्रविश्य परमं जीवस्य शयनं तु यत् सहैव शक्तिभिः स्वीयैरिच्छाद्यैरप्रकाशितैरित्यादेः मुक्तिं लक्षयति मुक्तिरिति । अन्यथारूपं प्राकृतवैकृतसूक्ष्मस्थूलेन्द्रियादिकं हित्वा केवलचिदानंदाद्यात्मकेन स्वरूपेण व्यवस्थितिर्विशेषेणावस्थानं मुक्तिरित्युच्यते ॥ ६ ॥ ❀ ❀ आश्रयरूपं लक्षयति आभास इति । यतो यस्माज्जगत आभासो मुख्यगौणवृत्त्या सृष्टिश्च शब्दात् स्थितिर्निरोधश्च भवति तत् त्रयमपि यदाधारतया ईयते वेदादिषु ज्ञायते स आश्रय इत्युच्यते । किंनामधेयोऽयमिति तत्राह परं ब्रह्मेति । मुक्तिव्यावृत्त्यर्थं परमात्मेति । सृष्टिस्थित्यप्ययाभासा यद्बलाद्यत्र च स्थिता

इत्यादिना लक्ष्यत इत्यर्थः ॥ ७॥ ❀ ❀ प्रकारांतरेणाश्रयं लक्षयिष्यन्नाध्यात्मिकादिभगवद्रूपैक्यकथनपूर्वकं जीवानामीशतंत्रतामाह आध्यात्मिक इति । आध्यात्मिकः शरीरसंबंधिषु चक्षुरादिषु तत्प्रेरकत्वेन स्थितः पुरुषो विष्णुः सोऽसावेवाधिदैविक आधिदैवेष्वादित्यादिषु स्थितः यस्तत्राधिभूतेषु घटादिपदार्थेषु स्थित्वा तयोरुभयोराध्यात्मिकाधिदैविकयोश्चक्षुःप्रकाशयोर्विच्छेदः सम्यक् निश्चायको विष्णुराधिभौतिको हि स्मृत इत्यन्वयः ॥ ८ ॥ ❀ ❀ हेत्वर्थवाचिना हिशब्देन सूचितहेतुं व्यनक्ति एतदिति । एतेषां त्रयाणां मध्ये एकतमाभावे चक्षुराद्यभावे प्रकाशाभावे वा तद्विषयघटादिपदार्थाभावे वा नोपलभामहे घटादिविषयामुपलब्धिं ज्ञानं नाप्नुम इति यदा यस्मात्तस्मात् ज्ञानस्वातंत्र्याभावात् सर्वे वयमस्वतंत्रा इत्यर्थः । ननु कोऽसौ ज्ञाने स्वतंत्र इति तत्राह त्रितयमिति । तत्र तेषामस्वतन्त्राणां जीवानां मध्ये योऽध्यात्मादित्रितयं वेद स आत्मा विष्णुराश्रय इत्यन्वयः । नन्वन्यदेवंविधं ज्ञानमस्तु न सुषुप्त्यादावित्यस्येदमेवोत्तरं तत्र सुषुप्त्यादावपींद्रियप्रकाशविषयाननपेक्ष्यैव यो जीवानां सर्वं स्वरूपज्ञानेनैव वेत्ति स आत्माश्रय इति । ननु प्राणस्याप्येतत्त्रयापेक्षाभावे ज्ञानसंभवात् प्राणा वा एवैतस्मिन्पुरे जाग्रतीति श्रुतेः श्रियोऽपि नित्यमुक्तत्वान्मुक्तानां निर्देहकत्वाच्च कथमेतल्लक्षणं लक्ष्यं व्यावर्तयतीति तत्राह स्वाश्रयाश्रय इति । मुक्ताश्रयाणां रमामुख्यप्राणादीनां स्वाश्रयाणामाश्रय आधारोऽनेन स्वातंत्र्येण प्रतीयमानं सर्वज्ञत्वं लक्षयन् लक्ष्म्यादिभ्यो लक्ष्यं व्यावर्तयतीत्युक्तं भवति सुप्त्यादावीश्वरस्य सर्ववेत्तृत्वं च स्वप्नेन । शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीतीति श्रुतिसिद्धम् ॥ ९ ॥ ❀ ❀ एवं पुराणलक्षणमभिधायाधुना विराडाख्यविरिंचोत्पत्तिं वक्ष्यन् प्रथमतस्तल्लष्टृपुरुषाख्यहरेरवतारकथनपूर्वकमस्य सृष्टिमाह पुरुष इति । यदा स पुरुषः सृष्टैस्तत्त्वैः सहांडं प्रविश्य विनिर्भिद्य विभज्य विनिर्गतः प्रकाशितः पुरुषाभिध एव प्रादुर्भूतस्तदात्मन एव दीपाद्दीपांतरवत् रूपांतरेण शेषपर्यंके शयनायायनमाश्रयमन्विच्छन्नित्यशुचिः स भगवानात्मनोऽयनभूताः शुचीः स्वपूजासाधनयोग्या अपोऽस्राक्षीदित्यन्वयः । अण्डं प्रविष्टो यो विष्णुः सोऽडं भित्त्वा प्रकाशित इत्यादेः ॥ १० ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

निरोध इति । स्थित्यनन्तरञ्च आत्मनो जीवस्य शक्तिभिः स्वोपाधिभिः सह, अस्य हरेरनुशयनं हरिशयनानुगततत्त्वेन शयनं निरोध इत्यर्थः । तत्र हरेः शयनं प्रपञ्चं प्रति दृष्टिनिमीलनं, जीवादीनां शयनं तत्र लय इति ज्ञेयम् । तत्रैव निरोधे अन्यथारूपमविद्ययाऽध्यस्तमज्ञत्वादिकं हित्वा स्वरूपेण व्यवस्थितिर्नाम स्वरूपसाक्षात्कार उच्यते तदज्ञानमात्रस्य संसारदशायामपि स्थितत्वात्, अन्यथारूपत्वस्य च तदज्ञानमात्रार्थत्वेन तद्धानात्तज्ज्ञानपर्य्यवसानात् स्वरूपञ्चात्र मुख्यपरमात्मलक्षणमेव रश्मिपरिमाणूनां सूर्य इव स एव हि जीवानां परमांशिस्वरूपम् यथोक्तं श्रीब्रह्माणं प्रति श्रीगर्भोदशायिना-यदा रहितमात्मानं भूतेन्द्रियगुणाशयैः । स्वरूपेण मयोपेतं पश्यन् स्वाराज्यमृच्छति । इति उपेतं युक्तमित्येवाक्लिष्टोऽर्थः रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवतीति श्रुतेः ॥ ६ ॥ ❀ ❀ आभासश्चेति आभासः सृष्टिः निरोधो लयश्च यतो भवति अध्यवसीयते उपलभ्यते जीवानां ज्ञानेन्द्रियेषु प्रकाशते च स ब्रह्मेति परमात्मेति प्रसिद्धः आश्रयः कथ्यते । इति शब्दः प्रकारार्थः ( आश्रयगतप्रकारवाची ) तेन भगवानिति च अस्य विवृत्तिरग्रे विधेया । तथाहि अत्र दशार्थाः प्रथमस्कन्धानुक्रमेण निरूप्यन्ते यथा-सामान्यतो लक्षितस्याप्याश्रयत्वस्य श्रीकृष्णे एव तु वैशिष्ट्यं तदर्थमेव ह्यखण्डश्रीभागवतप्रकाशः । तत्र प्रथमस्कन्धे श्रीशौनकसूतयोः प्रश्नोत्तरे तत्त्वेनैव प्रतिपादिते तदनुगतावेव प्रथमद्वितीयाध्यायौ तृतीयाध्यायस्तु स्फुट एव पुनर्विशेषतस्तत्प्रस्तावाय चतुर्थाद्यध्यायाः तत्र तदेकपरयोः श्रीशुकपरीक्षितोः संवादघटना, अतो द्वितीयस्कन्धश्च सामान्यभगवत्तत्त्वं प्रशंसन्नपि तत्रैव तात्पर्य्यं वहति यत्र ब्रह्मणश्चतुःश्लोकीवक्तृश्रीभगवतश्च तात्पर्य्यञ्च तत्रैव दर्शितं ब्राह्मकल्पकथारंभश्च तदर्थं एव तृतीये पाद्मकल्पकथा च गतस्य पूर्व्वपरार्द्धस्याद्यन्तवर्णने मध्यमानामपि कल्पानां तदनुसारेण ज्ञाने सति दशमैकादशयोः प्रस्ताव्यायास्तत्कथायाः सम्यगवगमात् । एवमेव गते स्वायम्भुवचाक्षुषमन्वन्तरे अपि तृतीयचतुर्थपञ्चमषष्ठसप्तमेषु । निरूपिते अष्टमे प्राचीनमिश्रवैवस्वतम् । नवमस्तु तत्प्रादुर्भावास्पदकेवलवैवस्वतान्वय एव द्वादशः खलु समाधिमुद्रामयः तत्र तत्र तत्तदन्यकथा तु तत्पोषिकैव विशेषतस्तु तत्तदवतारकथेति । तस्मात् सर्गादीनां मध्ये क्वचिदेकद्वारा क्वचिदनेकद्वारा य आश्रयो निरूप्यते, सतु दशमादावीशानुकथाप्रधानतत्तद्द्वारा सर्व्वत उत्कृष्य श्रीकृष्णरूपो निरूप्यते इति स्थितम् ॥ ७ ॥ ❀ ❀ अथ स्वयं भगवल्लक्षणपरमरूपं तदेवाश्रयं स्तोतुं स्थितौ ( च तत्राश्रयस्वरूपमपरोक्षानुभवेन व्यष्टिद्वारापि स्पष्टं दर्शयितुं ) तदंशभूतस्य पुरुषस्य वैभवं तादृशत्वेन दर्शयन् अध्यात्मादिविभागमाह योऽध्यात्मिकोऽयमिति द्वाभ्याम् । योऽयमाध्यात्मिकः पुरुषः चक्षुरादिकरणाभिमानी द्रष्टा जीवः स एवाधिदैविकश्चक्षुराद्यधिष्ठाता सूर्यादिः देहसृष्टेः पूर्वं करणानामधिष्ठानाभावेनाक्षमतया करणप्रकाशकर्त्तृत्वाभिमानितत्सहाययोरुभयोरपि तयोर्वृत्तिभेदानुदयेन जीवत्वमात्राविशेषात् ततश्चोभयः करणाभिमानितदधिष्ठातृदेवतारूपो द्विरूपो विच्छेदो यस्मात् स आधिभौतिकः चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः पुरुष इति पुरुषस्य जीवस्योपाधिः 'स वा एष पुरुषोऽन्नरसमय' इत्यादिश्रुतेः ॥ ८ ॥ ❀ ❀ एकमेकतराभावे इति एषामन्योन्यसापेक्षसिद्धित्वेन अनात्मत्वं दर्शयति । तथाहि दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिध्यति नापि द्रष्टा, न च तद्विना करणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्यादिः, न च तं विना करणं प्रवर्त्तते,

न च तद्विना दृश्यमित्येकतरस्याभावे एकं नोपलभामहे। तत्र तदा तत्त्रितयम् आलोचनात्मकेन प्रत्ययेन यो वेद साक्षितया पश्यति स परमात्मा आश्रयः। तेषामपि परस्परमाश्रयत्वमस्तीति तद्व्यवच्छेदार्थं विशेषणं स्वाश्रयः अनन्याश्रयः स चासावन्येषामाश्रयश्चेति। तत्रांशांशिनोः शुद्धजीवपरमात्मनोरभेदांशस्वीकारेणैवाश्रय उक्तः। अतः परोऽपि मनुतेऽनर्थमिति 'जाग्रत् स्वप्नः सुषुप्तञ्च गुणतो बुद्धिवृत्तयः। तासां विलक्षणो जीवः साक्षित्वेन विवक्षितः॥' इति शुद्धौ विचष्टे ह्यविशुद्धकर्त्तुरित्यायुक्तस्य साक्षिसंज्ञिनः शुद्धजीवस्याश्रयत्वं न शंकनीयम्। अथवा नन्वाध्यात्मिकादीनामप्याश्रयत्वमस्त्येव। सत्यम्। तथापि परस्पराश्रयत्वान्न तत्र आश्रयताकैवल्यमिति ते त्वाश्रयशब्देन मुख्यतया नोच्यन्ते इत्याह एकमिति। तर्हि साक्षिण एवास्तामाश्रयत्वं तत्राह त्रितयमिति। स आत्मा साक्षी जीवश्च यः स्वाश्रयोऽनन्याश्रयः परमात्मा स एवाश्रयो यस्य तथाभूत इति। वक्ष्यते च—सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेदसर्वज्ञमनन्तमीडे इति। तस्मादाभासश्चेत्यादिनोक्तः परमात्मैवाश्रय इति॥ ९॥ ❀ ❀ अथ स्वयं भगवल्लक्षणपरमरूपं तदेवाश्रयं स्तोतुं तदंशभूतस्य पुरुषस्य वैभवं तादृशत्वेन दर्शयति पुरुष इति। यदासौ विनिर्गतः आद्योऽवतारः पुरुषः परस्येत्याद्युक्तरीत्या श्रीभगवत आविर्भूतः तदा त्वण्डम् आत्मनि लीनं तत्समूहं विनिर्भिद्य आत्मनः पृथक् कर्त्तुमारभ्येत्यर्थः, अथवा यदा अण्डं निजाविर्भावस्थानं श्रीभगवन्तं विनिर्भिद्य ततः पृथग्भूत्वा विनिर्गतः तदा अपस्तत्पर्यन्तानि तत्त्वानीत्यर्थः। पृथिव्यपि तदन्तर्भूतत्वेन ज्ञेया॥ १०॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

आत्मनो जीवस्य हरेर्योगनिद्राम् अनु पश्चात् शक्तिभिः स्वोपाधिभिः सह शयनं निरोध इति स्थित्यनन्तरं महाप्रलये जीवानां परमेश्वरे लय उक्तः। अन्यथारूपं मायिकं स्थूलसूक्ष्मरूपद्वयं हित्वा स्वरूपेण शुद्धजीवस्वरूपेण केषाञ्चिद्भगवत्पार्षदरूपेण च व्यवस्थितिर्मुक्तिः। इति सर्गादयो जीवविषया नवार्था उक्ताः॥ ६॥ ❀ ❀ सर्गादीनां नवानां लक्षणैरेव तद्विषयीभूतान् सर्वान् जीवान् लक्षयित्वा एकस्याश्रयस्य लक्षणेन परमेश्वरं लक्षयति। आभासः सर्गः चकारात् स्थितिपोषणादयः निरोधश्चेति चशब्दान्मुक्तिश्च यत एवाध्यवसीयते निश्रीयते स आश्रयो भगवन्नारायण एव तस्मादेव सृष्ट्यादिदर्शनात्। तस्यैवोपासकभेदेन संज्ञान्तरमाह परमिति॥ ७॥ ❀ ❀ अथ, विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्। इत्युक्तेः प्रतिदेहमेवान्तर्यामिरूपेण स्थितं तदेवाश्रयरूपमध्यात्मादिभ्यो विभागेन स्पष्टं दर्शयितुमाह द्वाभ्याम्। योऽध्यात्मिकोऽयमिति सर्वत्र विनयादित्वात् स्वार्थे ठक्। योऽयमाध्यात्मिकः पुरुषः यदिदमध्यात्मं चक्षुरादिकरणमित्यर्थः। स एवाधिदैविकश्चक्षुराद्यधिष्ठाता सूर्यादिः इन्द्रियतदधिष्ठात्रोरुभयोरेव सूर्यांशत्वेनैकरूप्यादित्यर्थः। तत्र तत्त्वेषु मध्ये उभय आध्यात्माधिदैवरूपो विच्छेदो विभागो यस्मिन् सः आधिभौतिकः चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः। यद्वा उभयः गोलकरूपः शब्दस्पर्शादिरूपश्च विच्छेदो भेदो यस्य सः। पुरुषस्य जीवस्योपाधित्वात् सर्वत्र पुरुषपदप्रयोगः। स वा एष पुरुषोऽन्नरसमय इत्यादिश्रुतेः॥ ८॥ ❀ ❀ एकमेकतराभावे इति एतेषामन्योन्यसापेक्षसिद्धित्वेन अनात्मत्वं दर्शयति। तथाहि दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिध्यति, नापि द्रष्टा न च तद्विना करणप्रवृत्त्यनुमेयस्तदधिष्ठता सूर्यादिः, न च तं विना करणं प्रवर्त्तते न च तद्विना दृश्यमित्येवमेकतरस्याभावे यदा एकं नोपलभामहे तत्र तदा तत्त्रितयं यो वेद स तन्निरपेक्षसिद्धिरात्मा जीवः। यदुक्तम्—देहोऽसवोऽक्षा मनवो भूतमात्रामात्मानमन्यञ्च परं विदुर्यत्। सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे॥ इति सर्वमेतत्त्रितयं पुमान् जीवो वेदेति तत्रार्थः। तथैव—जाग्रत् स्वप्नः सुषुप्तञ्च गुणतो बुद्धिवृत्तयः। तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः॥ इति। स कीदृशः स्वमेवाश्रयो यस्य सः परमात्मा एव आश्रयो यस्य सः। अयमर्थः—अध्यात्मादीनां परस्पराश्रयाणां जीव आश्रयः जीवस्य परमात्मा आश्रयः परमात्मनः परमात्मैवाश्रय इत्याश्रयतत्त्वं परमात्मैव। तथा विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थित इत्युक्तेः स्वं कृष्ण एवाश्रयो यस्य स परमात्मेति व्याख्याने श्रीकृष्णस्य मुख्याश्रयत्वं तदंशत्वात् परमात्मनश्च निर्विशेषस्वरूपत्वात् ब्रह्मणश्च इत्येकं आश्रयतत्त्वमुपासकभेदात् त्रिधा भासते इति॥ ९॥ ❀ ❀ एवं दशभिर्महापुराणलक्षणैर्जीवेश्वरविभागं निरूप्य जीवानामीश्वरभक्त्यैव निस्तारमभिव्यज्य यदुताहं त्वया पृष्टो वैराजात् पुरुषादिदं यथासीत्तदुपाख्यास्ये इति प्रतिज्ञातमर्थं वक्तुं कथां प्रस्तौति पुरुषोऽण्डमित्यादि। ननु कथं मुहुरपि वैराजस्याध्यात्मादिकथैव प्रपंच्यते भगवतोऽतिमधुरलीलावतार-रूपगुणादिकथाः किमल्पीयस्यो दृष्टाः। सत्यम्। ताः कथा आस्वादनीयत्वेन केषु खल्पदेष्टव्याः ये तद्भक्तिसिद्धा नित्यसिद्धा वा महानुभावास्ते तत्सौन्दर्यामृतलीलामृतसिन्धौ स्वत एवाविरामं खेलन्त्येव ये पुनरन्ये विषयानन्दतल्पे निद्रान्तिये च कुकर्मफलदुःखतरङ्गे मूर्च्छन्ति ते ततः प्रबोधयितुमेवाशक्याः कथं भगवल्लीला उपदेश्यन्तां यदुपदेशादेव ते साधकभक्ता भवेयुरिति महाकारुणिकः पुराणचूडामणिरयं तांस्ततः प्रबोधयितुं भंग्या किमपि मुहुरपि यतते स्म। तत्र यथा वह्निना तप्तमङ्गं वह्निनैवोपशाम्यति यथा च भूताविष्टो भूतमन्त्रेणैव प्रबुद्ध्यते तथैव जीवानां मायानिद्रावेशो मायाकथयैवापयाति यदुक्तम्—मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः। शृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति॥ इति। किञ्च यद्यपि भागवतकृपालब्धभगवल्लीलामृतवृष्ट्यैव मायासुखनिद्राणोऽपि कर्मदुःखमूर्च्छितोऽपि जागर्त्ति स्तिम्यति जीवति नृत्यति आनन्देन माद्यति च तदपि तादृशमहत्कृपा यैरेव लभ्यते तैरेव कृतार्थीभूयते न तु सर्वैरेव अतोऽध्यात्मकथया मुहुः श्रुतया लब्धसंसारतितीर्षाणां गुरुपादाश्रयणे

प्रोद्भूतयत्नानां निकृष्टजीवानामपि निस्तारो भवत्वित्येतदर्थमेवाध्यात्मकथापौनःपुन्यं भगवद्भक्तानामास्तिक्यवतान्तु सर्वमेव श्रीभागवतममृतमिवास्वाद्यमेव। अपि च शास्त्रस्यास्य न केवलं भगवन्तमेवाधिकृत्य प्रवृत्तिः अपि तु तन्निर्विशेषस्वरूप-तदंशभूतौ ब्रह्मपरमात्मानावपि। यदुक्तं शास्त्रारम्भ एव-ब्रह्मेति परमात्मेति भगवानिति शब्द्यते। इति ब्रह्मपरमात्मोपासकानामध्यात्मादिकथाभ्यास उपयुक्त एव। किञ्च शास्त्रस्यास्य महिम्ना ब्रह्मपरमात्मोपासकानामपि भक्तिप्रवर्त्तितत्वात् तत्फलदशायामपि आत्मारामाश्च मुनय इत्यादेः प्रायो भक्तिरेव वरीवर्त्तीति ते तत्साधनं तत्फलञ्च शुद्धभक्तैरपि न कटाक्षणीयम्, अपि तु अनुमोदनीयमेव। तस्माद् यथा ब्रह्मत्व-परमात्मत्व-मत्स्यकूर्माद्यनेकावतारत्व-धर्मज्ञानवैराग्यबलैश्वर्यरूपगुणलीलामाधुर्यपरिपूर्णः श्रीकृष्णः सर्वविधभक्तैरेव परिचर्यते एवमेव ब्रह्म-परमात्म-मत्स्यकूर्माद्यवतारावतारितत्तत्सर्वमूलभूतश्रीकृष्णतदीयरूपगुणलीलामाधुर्यैश्वर्यतत्प्राप्तिसाधन-भक्ति-प्रेम-धर्म-ज्ञान-योग-वैराग्याद्यखिलतत्त्वप्रदर्शको ग्रन्थोऽयमपि तत्स्वरूपभूत इति सर्वं समञ्जसम्। पुरुषः प्रकृतीक्षणकर्त्ता अण्डं सृष्ट्वा यदा विनिर्भिद्य स्वरूपभूतादात्मनः सकाशात् पृथक्कृत्य विनिर्गतो बहिः स्थितः तदा आत्मनः स्वस्य अयनं शयनस्थानं तस्मिन्नेव ब्रह्माण्डे अन्विच्छन् अपो गर्भोदसंज्ञा अस्राक्षीत्। शुचिः स्वयम्, अतः शुचीः शुद्धाः न तु क्षारोदादितुल्या इत्यर्थः॥ १०॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अस्य देहगतस्य आत्मनः जीवस्य अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते इति वाक्योक्ताभिः कर्मसंज्ञाभिः शक्तिभिः सह अनुशयनं लयो निरोधः अन्यथा रूपमात्मत्वेन गृहीतं देहादिरूपं कार्यकारणरूपप्रकृतिसंबंधं हित्वा भगवद्भावापन्नेन स्वरूपेण व्यवस्थितिर्मुक्तिः॥ ६॥ ❀ ❀ आभासः आसमंताद्भासनमाविर्भवनमुत्पत्तिः निरोधो लयः चकारात्स्थित्यादिसंग्रहः यतः अध्यवसीयते शास्त्रद्वारा ज्ञायते स आश्रयः। ननु तस्मिन्नाश्रये किं प्रमाणमित्यत आह परमिति। सर्वोत्कृष्टत्वेन ब्रह्मेति बृहद्गुणशक्त्याद्याश्रयत्वेन परमात्मेति सर्वात्मत्वेन च शब्द्यते अनादिसिद्धेन शब्देन वेदेन प्रतिपाद्यते इत्यर्थः॥ ७॥ ❀ ❀ देहाद्यात्मत्वस्य देहादिविलक्षणात्मस्वरूपप्रतिपादनेनान्यथा रूपत्वं दर्शयन् स्वरूपेणाश्रये व्यवस्थितिं दर्शयति य इति द्वाभ्याम्। योऽयमात्मनि देहे प्रसिद्धः चक्षुरादिकरणसमूहः स आध्यात्मिकः यश्चासौ चक्षुराद्यधिष्ठातृभूतः सूर्यादिसमूहः स एव आधिदैविकः यश्चोभयविच्छेदः उभयभिन्नः देहः स आधिभौतिकः पुरुषः स्मृतः॥ ८॥ ❀ ❀ न ह्याधिभौतिकं विना प्रतीत्यनुमेय आध्यात्मिकः चक्षुरादिकरणसमूहः सिद्ध्यति नापि तं विना तत्प्रवृत्त्यनुमेयस्तदधिष्ठातृसमूहः, नापि तं विना करणवर्गः प्रवर्तते नापि करणवर्गं विना देहादे रूपाद्युपलब्धिः, एवं यदा एकमेकतराभावेनोपलभामहे न साक्षात्कुर्महे तत्र तदातत्त्रितयं यो वेद स आत्मदेहेन्द्रियादिद्रष्टा जीवः तस्य स्वातंत्र्यं वारयितुं हर्यधीनतामाह स्वाश्रयाश्रय इति। स्वाश्रयो भगवान् आश्रयो यस्य सः॥ ९॥ ❀ ❀ एवं सर्गाद्यर्थान् जीवस्य देहादिविलक्षणत्वं भगवतः आश्रयस्य स्वाश्रयत्वं जीवस्य हर्यधीनत्वं चाभिधायेदानीं यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदं यथासीत्तदुपाख्यास्ये इति यदुक्तं तदुत्पत्तिप्रकारमाह पुरुष इति। असौ पुरुषो वैराजः अण्डं विनिर्भिद्य पृथक्कृत्य विनिर्गतः पृथक् स्थित इत्यर्थः। आत्मनोऽयनं स्थानम् अन्विच्छिन् विमृशन् यतः स्वयं शुचिरतः शुचीः शुद्धाः अपः गर्भोदकसंज्ञाः अस्राक्षीत्सृष्टवान्॥ १०॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

निरोधं लक्षयति—अस्याऽनुशयनमिति। अस्य भगवतः अनु पश्चाच्छयनं शक्तीः शाययित्वा तद्भोगार्थं स्वस्य शयनम्। अस्येति पुरोवर्त्ती आत्मत्वेन प्रकाशमानोऽङ्गुल्या निर्दिश्यते। आत्मनो देहस्य। सहेत्युभयत्र। देहशक्तयो द्वासप्ततिभेदा नाडीरूपाः। स्वस्य श्रिया[1]दयो द्वादश। शयनं च त्रिविधं जाग्रत्स्वप्नसुषुप्तिभेदेन। अतः सप्ताशीतिभेदा भवन्ति। मुक्तिं लक्षयति—हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिरिति। अन्यथारूपं तत्वरूपं तस्य परित्यागः स्वरूपमेकम्। अवस्था द्विविधा सामान्यविशेषभेदेन। उभयत्र लक्षणं मिलितम्। तत्रापि पूर्वं तत्त्वपरित्यागः, तत्त्वान्यष्टाविंशतिः। एवमेकत्रिंशद्भेदा भवन्ति॥ ६॥ ❀ ❀ आश्रयं लक्षयति—आभासश्चेति। आश्रयो द्विविधः। शास्त्रमार्गेणाऽऽश्रीयत इति प्रपत्त्या, सायुज्येन वा, उत्पत्तिस्थितिप्रलयैर्वा। क्रियया आश्रयणं पञ्चधा। ज्ञानेनाऽऽश्रयणमष्टधा। मनसो द्विस्वभावत्वात्तस्योभयत्र सम्बन्धः। अन्तःकरणानां मध्ये अहङ्कारस्य नाऽऽश्रयहेतुत्वम्। एवं त्रयोदशधा भवति। एवमपि राशिद्वयात्मको भवति क्रियाज्ञानभेदेन। तत्र प्रथमतः क्रियया आश्रयं प्रतिपादयति—आभासश्चेति। आभास उत्पत्तिः। चकारात्तमश्च। आभासशब्देन च उत्पत्त्यादयः सर्वे वस्तुतो मायिकानामेव न स्वस्येति विषयताया आश्रयत्वं बोधयति। निरोधस्तयोरेव। इदमाश्रयत्वं कर्त्तृत्वेन। तदैव क्रियया आश्रयत्वं भवति। आभासनिरोधावुत्पत्तिप्रलयौ। अन्ये विकारा एतदन्तर्भाविनः। पूर्वरूपपरित्यागो द्वितीयस्याऽऽदिमस्तथा। उभावेकीकृतौ लोके बुद्ध्यादिभि-

---

1. श्यादय इति ख. श्रियाश्रय इति ब।

रुदीरिताविति । अध्यवसीयत इति । यतो भगवतः सकाशान्न केवलमेते विकारा जायन्ते किन्तु प्रकाश्यन्ते च भगवतैव । चकारात्तेषु स्वभावोऽपि सम्पाद्यते । अतोऽस्ति भाति प्रियमिति त्रयं भगवत्कार्यं तत्कारणत्वेनाऽऽश्रयः । एतदेव तस्याऽधिष्ठानत्वम् । तदाह—स आश्रय इति । स भगवानाश्रय इत्यर्थः । यतः सच्चिदानन्दरूपत्वात्पूर्वोक्ता धर्मा भवन्ति । अयमेव भगवान् शास्त्रान्तरे नामान्तरेण व्यपदिश्यत इति सर्वसमन्वयार्थं नामान्तरमाह । परं ब्रह्मेति वेदे । परमात्मेति स्मृतौ । शब्द्यत एव । शब्दमात्रं भिद्यते । अर्थस्त्वेक एव । वेदचतुर्मुखवर्णव्युदासार्थं परशब्दः । जीवव्युदासार्थं द्वितीयः ॥ ७ ॥ ❀ ❀ एवं क्रियाश्रयं निरूप्य ज्ञानाश्रयं निरूपयति—योऽध्यात्मिकोऽयमिति द्वाभ्याम् । ज्ञानमग्रे निरूपयितुं ज्ञेयमत्र निरूप्यते । ज्ञेयं त्रिविधमाध्यात्मिकादिभेदेन । आत्मानमध्यध्यात्मम् । आत्मा देहस्तमधिष्ठाय ये तिष्ठन्तीन्द्रियान्तःकरणानि प्राणाश्च तेऽध्यात्मानः । तानधिष्ठाय यस्तिष्ठति शारीर आत्मा स आध्यात्मिकः । सोऽयमेव पुरुषो यः श्रोतृवक्तृत्वेन व्यवह्रियते । यस्त्वेतदन्तर्यामी स आधिदैविकः । अधिदेवानामिन्द्रियाधिष्ठातृदेवानां नियामकत्वेन तानधिष्ठा[१]य यः स्थितः स आधिदैविकः । सोऽप्ययमेव । एक एवेन्द्रियाणीन्द्रियाधिष्ठातृदेवांश्चाऽधितिष्ठन् शब्दद्वयेनोच्यते । अतएव देवाधिष्ठानसामर्थ्यमन्तर्यामिण इति स एतस्याऽपि पूज्यत्वेन निरूप्यते । एकस्यैव उभयविधविच्छेदकर्त्ता शब्दद्वयप्रवृत्तिनिमित्तभूत आधिभौतिकः । भूतान्यधिष्ठाय ये तिष्ठन्ति रूपादयस्तेऽधिभूतास्तत्समुदायोऽवयवी आधिभौतिको देहः । देहे विद्यमान एवेन्द्रियाभिमानित्वमिन्द्रियप्रेरकत्वं च । नो चेदेक एवाऽऽत्मा । अस्योभयविच्छेदकत्वे महतां स्मृतिः स्मर[२]णं प्रमाणम् । तदाह—स्मृत इति ॥ ८ ॥ ❀ ❀ एवं ज्ञेयं निरूप्य तद्विषयकज्ञानाधारत्वेनाऽऽश्रयं निरूपयति—एकमेकतराभावादिति । त्रितयं तत्र यो वेद स आश्रय इति । ननु जीवोऽपि त्रितयं वेद । अन्तर्याम्यपि । अत आश्रयलक्षणमतिव्यापकमित्याशङ्क्याऽऽह । एकं त्रयाणां मध्ये एकतरस्य स्वातिरिक्तस्य अभावाद्धेतोः एकं नोपलभामहे किन्तु भावेनैवोपलभामहे । एकमप्यन्ययोर्भावेन उपलभ्यते न स्वभावेन । तदा "सापेक्षमसमर्थं भवती"ति न तेषामन्यतरस्त्रितयं ज्ञातुं शक्तः । अन्तर्याम्यपि स्वव्यापारे व्यापृतस्त्रितयमध्ये प्रविष्टो न त्रितयं जानाति । यथा देहजीवयोस्त्रितयाज्ञानं सर्वजनीनं तथाऽन्तर्यामिणोऽपि ज्ञेयम् । एवं सति यस्त्रितयं वेद स आश्रयः । तस्य नामान्तरमप्याह—आत्मेति । अतति व्याप्नोतीत्यात्मा । अत एवाऽस्य लीलात्वादात्मा विभूतित्वेन गणितः । "अहमात्मा गुडाकेशे"ति । इदमेकं भगवतो रूपम् । भगवानेव वा ज्ञाना[३]श्रयत्वेय आत्मत्वेन निरूपितः । ननु तस्याऽपि स्वज्ञानाभावात् स्वाधिष्ठातृज्ञानाभावाच्च तस्याऽप्यन्य आश्रयः स्यादत आह—स्वाश्रय इति । स तु स्वात्मानमेवाऽऽश्रित्य तिष्ठति न तस्याऽऽश्रयान्तरापेक्षा । अनेन स्वप्रकाशः स इत्युक्तं भवति ॥ ९ ॥ ❀ ❀ एवं दश लक्षणानि निरूप्य त्रितयनिरूपणार्थं पूर्वोक्तं विराजमुपपत्त्या सह निरूपयति—पुरुषोऽण्डमिति । "यावानयं वै पुरुष" इत्यत्र नामरूपे तस्याऽऽक्षिप्ते जीवतुल्यतया । तत्र जीववैलक्षण्यं निरूपयितुं स्वेच्छयैव तस्य नाम इन्द्रियाणि चेति जीवसाम्यं निराकरोति । तत्र प्रथमं नामनिरुक्तिमाह—पुरुषोऽण्डमिति द्वाभ्याम् । पुरुषो विराट् । ब्रह्माण्डं विनिर्भिद्य कटाहात्पृथक्कृत्य नारिकेलगोलकवत् यदा विनिर्गतः स्वस[४]र्वकार्ये [५]समर्थो जातः । अथवा । अण्डमेव वा भित्त्वा निर्गतः । तदा अण्डे न जलाद्यावरणव्यवस्था । पुराणान्तरानुरोधेन परमण्डे स्थित इति व्याख्यायते । वस्तुतस्तु कटाहं विनिर्भिद्यैव निर्गतः । अत एवाऽऽत्मन आश्रयापेक्षा । पूर्वमण्डमेवाऽऽश्रयत्वेन स्थितम् । तस्मिन् भग्ने आश्रयान्तरमन्विच्छन् अपोऽस्राक्षीत् । स्वयं शुद्धो ज्ञानपूर्णो भगवदवतारः स्वाश्रयं शुद्धमेव सृष्टवान् । सर्वस्याऽपि शुद्धिर्जलेनेति जलं सृष्टवान् । अपामपि शुद्धिः फेनतरङ्गादिराहित्येन ॥ १० ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

निरोध इत्यत्र मूलस्थस्यास्येति पदस्यात्मबोधकत्वे आत्मपदस्यार्थमाहुः आत्मनो देहस्येति, आत्मत्वेन प्रकाशमानादभिन्नस्य देहस्येत्यर्थः । उभयत्रेति द्विविधशक्तिषु शयने उभयोः शक्तीनां सहभावो विवक्षित इत्यत्र गमकमाहुः देहेत्यादि । द्वासप्ततिभेदाः प्रश्नोपनिषदि प्रसिद्धाः, द्वासप्ततिप्रतिशाखानाडीसहस्राणीति । तथा च, तासु मुख्यानां ग्रहणात्तथेत्यर्थः । तेनोभयविधशक्तिसहभावेऽध्यायसङ्ख्यैव गमिकेति भावः । सामान्यविशेषभेदेनेति सामान्यावस्था दैवीसम्पद्रूपा, विशेषावस्था मर्यादारूपा पुष्टिरूपा च तेनेत्यर्थः । उभयत्र लक्षणं मिलितमिति अवस्थाद्वये मुक्तिलक्षणमविशिष्टमित्यर्थः । ननु विशेषावस्थायामहन्तादिसद्भावस्यैव दर्शनात्कथं लक्षणसमन्वय इत्यत आहुः तत्रापीत्यादि । तत्रापीति पुष्ट्यवस्थायाम् । इदं यथा तथा ममोत्तमेतिश्लोकेत्यत्र विवृतमाचार्यैः । तन्मत्कृततट्टिप्पणीतोऽवगन्तव्यम् । पञ्चविंशतितत्त्वपक्षेऽध्यायसङ्ख्या न युज्यत इत्यतः सङ्ख्यान्तरमाहुः तत्त्वानीत्यादि ॥ ६ ॥ ❀ ❀ आभासश्चेत्यत्र । नन्वाश्रयस्य कुतो लक्षणद्वयमित्याकाङ्क्षायामाहुः आश्रय इत्यादि । शास्त्रे भगवत्प्रापकं भक्तिज्ञानरूपं मार्गद्वयम् । आश्रयशब्दश्चात्र कर्मव्युत्पन्नः, 'यथा सर्वासामपां समुद्रमेकायनमि'त्यादिश्रुतिसिद्धाधिकरणत्वबोधकः, "तत्र भक्तिमार्गे प्रपत्त्याऽऽश्रयो भवति ज्ञानमार्गे सायुज्येनेति प्रकारद्वैविध्याल्लक्षणद्वयमित्यर्थः । एवं सति तृतीयमार्गिणां जडानां चाश्रयो न स्यादित्यरुच्या पक्षान्तरमाहुः उत्पत्तीत्यादि । तथा च, प्रपत्त्या सायुज्येन वा ज्ञानद्वारा आश्रीयते,

---

१. ष्ठाय स्थित इति ख. । २. स्मृतिः प्रमाणमिति ख. । ३. श्रयत्वेनात्मत्वेनेति ख. । ४. स सर्वेति ख. । ५. कार्यसमर्थ इति ख. ।

उत्पत्त्यादिभिश्च स्वोत्पादनक्रियाद्वारा आश्रीयतेऽतो लक्षणद्वयमित्यर्थः । अध्यायविभागमाहुः क्रियेत्यादि । ननु मनसोपि कर्मेन्द्रियत्वात् कथं पञ्चेत्यत आहुः मनस इत्यादि । सम्बन्ध इति, अनुग्राहकतया सम्बन्धः । तथा च, तत्क्रियायाम ❀ मुख्यत्वात्पञ्चधेत्यर्थः । ननु तथाप्यन्तःकरणस्य चतुर्विधत्वात् ज्ञानेन नवधा वक्तव्य इत्यत आहुः अन्तरित्यादि । निरोधशब्दस्य प्रलये प्रसिद्धत्वात् तत्समभिव्याहृत आभासशब्द उत्पत्तिबोधनाय किमिति प्रयुक्तः, उत्पत्तिपदमेव कुतो नोक्तमित्यकाङ्क्षायामाहुः आभासशब्देनेत्यादि । विषयतया आश्रयत्वमिति विषयताद्वयाधारत्वम् । तयोरिति, जगद्रूपतमोरूपयोः विषयतयोः, उत्पत्त्यादिभिः स्वजनक्रियाधारत्वेनाश्रीयते, न तु स्वाश्रयत्वेनेतीममर्थं स्फुटीकुर्वन्ति इदमित्यादि । आश्रयत्वमिति, स्वस्वरूपलाभार्थकोपजीव्यत्वम् । उत्पत्त्यादय स्वस्वरूपलाभाय यमुपजीवन्ति स जगज्जन्मस्थितिभङ्गकर्त्ता आश्रय इत्यर्थः । निरोधश्चेति चकारस्यार्थमाहुः आभासनिरोधावित्यादि । वृद्ध्यपायादिभिरिति वृद्धिविपरिणामापक्षयैः । तर्हि चतुर्मुखात् को विशेषः इत्यत आहुः अध्यवसीयत इत्यादि अत इति प्रकाशनात् स्वभावसम्पादनाच्च । त्रयमिति, विषयतागतं त्रयम् । एतदेवेति, अस्तिभातिप्रियत्वसम्पादकत्वमेव । तथा च मूले यत इत्यनेन उत्पत्त्यादिजनकं प्रकाशकं हेतुमुद्दिश्य तस्मिन्नाश्रयत्वविधानाद्विषयतोपरञ्जकस्थित्या आश्रयत्वं विवक्षितमिति प्रकृतिपुरुषजन्यायां जगद्रूपायां विषयतासञ्ज्ञायकरूपायां प्रविश्य तत्तदाकाररूपायास्तस्या अस्त्यादिरूपत्वं यत्सम्पाद्यते तदेवाविष्टत्वमधिष्ठानत्वमित्यर्थः । शास्त्रान्तरेप्येवमेव सम्मतमिति मूलाशयं स्फुटीकुर्वन्ति अयमित्यादि । सर्वसमन्वयार्थमिति सर्वेषां प्रमाणानामेकार्थत्वार्थम्, एवं चैतेन पद्येनैतादृशस्य प्रपत्त्या आश्रयणीयत्वं बोधितप्रायम् । स्मृताविति गीतायाम् । जीवव्युदासार्थमिति मुक्तजीवव्युदासार्थम् ॥ ७ ॥ ❀ ❀ योध्यात्मिक इत्यत्र । नन्वनुप्रविष्टस्यैकस्य जीवान्तर्यामिभावकथने 'तदनुप्रविश्य सच्च त्यच्चाभवदि'ति श्रुतिविरोधाभावेपि 'द्वासुपर्णे'ति—श्रुतिर्विरुद्ध्यत इत्यत आहुः अत एवेत्यादि । अन्तर्यामिण इति पञ्चमी । यत उभयप्रवेशपक्षेपि 'ऋतं पिबन्तावि'ति—श्रुत्यन्तरे जीवात्मा छायारूपत्वादप्रयोजक उक्तः । अत एव हेतोरस्य देवाधिष्ठानसामर्थ्यमन्तर्यामिणः सकाशादेवेति, स एतस्यापि पूज्यत्वेन श्रुत्यन्तरे निरूप्यते । तथा चोद्देश्यविधेयभावस्य तद्बोधनार्थतया कथनान्न तद्विरोध इत्यर्थः । मूले, उभयविच्छेद इत्यत्र उभयोर्विच्छेदो यस्मादिति व्यधिकरणपदं बहुव्रीहिं ज्ञापयितुमाहुः उभयविच्छेदकर्त्तेति ॥ ८ ॥ ❀ ❀ नन्वन्तर्यामिणः प्रकाशस्वभावत्वात् तस्य स्वव्यतिरेकेण त्रितयज्ञानं भविष्यतीत्याशङ्कायामुद्देश्यविधेयभावसूचितं तात्पर्यमाहुः अन्तर्यामीत्यादि । त्रितयमिति स्वव्यतिरिक्तं त्रितयम् । ज्ञेयमिति त्रितयान्तः प्रविष्टत्वादनुमेयम् । आत्मेति, तस्य नाम योगरूढमिति ज्ञापनायाहुः अततीत्यादि । अत एवेति । त्रितयव्यापकत्वादेव । इदमिति द्वितीयाश्रयलक्षणेन लक्षितम्, अग्रे स्वाश्रयाश्रयपदात्तदनुरोधेन प्रक्षान्तरमाहुः भगवानेव वेति । स्वाश्रयाश्रयपदे षष्ठीतत्पुरुष इत्येतत्पदमक्षरव्यावर्त्तकत्वेनापि शक्यवचनम् । तथा चाश्रयस्य लीलात्वे इदमक्षरलक्षणं पुरुषोत्तमत्वे मूललक्षणमुभयोरविच्छेदज्ञापनायैवमुक्तमित्यर्थः । प्रथमपक्षे स्वाश्रयाश्रयपदप्रयोजनं वक्तुमाहुः नन्वित्यादि । एवञ्चैताभ्यां श्लोकाभ्यां चैतस्य सायुज्यत्वेन आश्रयत्वं विवृतं ज्ञेयम् । तथा सति, भक्तिमार्गे भगवान् जगन्निमित्तोपादानभूतः प्रपत्त्याश्रयणीयः । ज्ञानमार्गे तु स्वप्रकाशरूपो बिभूत्यात्मकः स्वयं वा यथाधिकारं सायुज्येनाश्रयणीय इति बोधनायात्र लक्षणद्वयमुक्तमिति फलति ॥ ९ ॥ ❀ ❀ पुरुष इत्यत्र दशलक्षणानीति पुराणस्य दशलक्षणानि । पृथक्कृत्येति स्वस्वरूपं पृथक्कृत्य 'कण्ठं भित्वा विनिःक्रान्तावि'त्यादौ तथादर्शनात्तथेत्यर्थः । ननु पञ्चमाध्याये विशेषस्तु 'विकुर्वाणादम्भसो गन्धवानभूदि'त्यादिनाण्डसृष्टिमुक्त्वा 'स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गत' इत्यनेन यः पुरुष उक्तः स एवात्र विमृष्यते इति स्वस्थित्यर्थं जलसृष्टृत्वं तस्यैव वक्तव्यम्, यदा पुनर्नारिकेलकगोलकवत्स्वकार्यसमर्थत्वरूपस्तस्य निर्गमोङ्गीक्रियते, तदाण्डरूपस्य स्थानस्य सत्त्वा 'दात्मनोयनमन्विच्छन्' इति कथनं विरुद्ध्यत इत्यरुच्या पक्षान्तरमाहुः अथवेत्यादि । अस्मिन्नपि पक्षे दोषमाहुः तदेत्यादि । तदाण्डभेदनपक्षेण्डनिवृत्त्या, तत्र न जलाद्यावरणव्यवस्था । तथा च, तदनङ्गीकारे 'आण्डकोशो बहिरयं पञ्चाषत्कोटिविस्तृतः । दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवदि'त्यादिवाक्यविरोधस्तुल्य इत्यर्थः । एवं दोषसाम्येपि प्रथमव्याख्यानं यदुक्तं तत्र बीजमाहुः परमित्यादि । अत्र तु द्वितीयपक्ष एवाभिप्रेत इत्याहुः वस्तुत इत्यादि । तथा च, तत्पक्षोपष्टम्भकानि वाक्यानि कल्पान्तराभिप्रायाणीत्यर्थः ॥ १० ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

अस्यात्मनः जीवात्मनः शक्तिभिरिन्द्रियान्तःकरणादिभिः सह अनुशयनं भगवति लयस्तदेकपरतया संसारविस्मृतिश्च निरोधः, निरोधनिरूपके दशमस्कन्धे तथैव प्रतीतेः । अन्यथारूपमविद्यया देवमनुष्यदेहादौ आत्माभिमानलक्षणं हित्वा स्वरूपेण सच्चिदानन्दात्मत्वेन व्यवस्थितिर्मुक्तिः ॥ ६ ॥ ❀ ❀ आ समन्ताद्भासनमाभासः जगत आविर्भावः निरोधः प्रलयश्च यतो यत्र चाध्यवसीयते प्रमाणेन निश्चीयते स आश्रयः । स क इत्यपेक्षायामाह—वेदे परं ब्रह्मेति स्मृतौ परमात्मेति च शब्द्यते कथ्यते इति ॥ ७ ॥ ❀ ❀ आश्रयस्वरूपमपरोक्षानुभवेन स्पष्टं दर्शयितुमध्यात्मादिविभागमाह—य इति । योऽयमाध्यात्मिकः पुरुष-

---

❀ आमुख्यत्वात् पाठः ।

श्चक्षुरादिकरणाभिमानी द्रष्टा जीवः स एवासौ आधिदैविकश्चक्षुराद्यधिष्ठाता सूर्यादिः। यस्तु तत्रैकस्मिन्नेवोभयः आध्यात्मिकादिद्विरूपो विच्छेदो भेदो यस्मात्तथाविधश्चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः स ह्याधिभौतिकः पुरुषः स्मृतः तत्त्वज्ञैर्निरूपितः। पुरुषस्य जीवस्योपाधित्वात्तस्य पुरुषत्वं ज्ञेयम् "स वा एष पुरुषोऽन्नरसमयः" इत्यादिश्रुतेः॥८॥ ❀ ❀ एकमेकतराभावे इत्येतेषामन्योन्यसापेक्षं सिद्धत्वेनानात्मत्वं सूचयति। तथाहि—दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिद्धयति, नापि द्रष्टा, न च तद्विना करणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्यादिः, न च तं विना करणं प्रवर्त्तते, न च तद्विना दृश्यमित्येवं यदैकतरस्याभावे एकमपि नोपलभामहे न पश्यामस्तत्र तदा तद् आध्यात्मिकादित्रितयमालोचनात्मकेन प्रत्ययेन यो वेद साक्षितया पश्यति स परमात्मैव स्वाश्रयाश्रय इत्यन्वयः। तेषामपि परस्परमाश्रयत्वमस्त्येवेति तद्व्यवच्छेदार्थं विशेषणं स्वाश्रयेति, अनन्याश्रयश्चासौ अन्येषामाश्रयश्चेत्यर्थः। तथा च भगवानेकादशे वक्ष्यति—'दृग्रूपमार्कं वपुरत्र रन्ध्रे परस्परं सिद्धयति यः स्वतः खे। आत्मा यदेषामपरो य आद्यः स्वयाऽनुभूत्याऽखिलसिद्धिसिद्धिः' इति॥९॥ ❀ ❀ एवमुक्तमेवाध्यात्मादिविभागं प्रपञ्चयन् 'यदु'ताहं त्वया पृष्टो वैराजात्पुरुषादिदम्॥ यथासीत्तदुपाख्यास्ये' इति यत् प्रतिज्ञातं तदुत्पत्तिप्रकारमाह—पुरुष इत्यादिना। स पुरुषो वैराजः अण्डं विनिर्भिद्य पृथक्कृत्य यदादौ सृष्टेः पूर्वं विनिर्गतः पृथक् स्थितस्तदा आत्मनः स्वस्य अयनं स्थानमन्विच्छन् विमृशन् यतः स्वयं शुचिः शुद्धः अतः शुचीः फेनतरङ्गादिराहित्येन शुद्धाः अपो गर्भोदकसञ्ज्ञाः अस्राक्षीत् ससर्ज॥१०॥

## हिन्दी अनुवाद

जब भगवान् योगनिद्रा स्वीकार करके शयन करते हैं, तब इस जीवका अपनी उपाधियोंके साथ उनमें लीन हो जाना 'निरोध' है। अज्ञानकल्पित कर्तृत्व, भोक्तृत्व आदि अनात्मभावका परित्याग करके अपने वास्तविक स्वरूप परमात्मामें स्थित होना ही 'मुक्ति' है॥६॥ ❀ ❀ परीक्षित्! इस चराचर जगत्की उत्पत्ति और प्रलय जिस तत्त्वसे प्रकाशित होते हैं, वह परम ब्रह्म ही 'आश्रय' है। शास्त्रोंमें उसीको परमात्मा कहा गया है॥७॥ ❀ ❀ जो नेत्र आदि इन्द्रियोंका अभिमानी द्रष्टा जीव है, वही इन्द्रियोंके अधिष्ठातृ-देवता सूर्य आदिके रूपमें भी है और जो नेत्रगोलक आदिसे युक्त दृश्य देह है, वही उन दोनोंको अलग-अलग करता है॥८॥ ❀ ❀ इन तीनोंमें यदि एकका भी अभाव हो जाय तो दूसरे दोकी उपलब्धि नहीं हो सकती। अतः जो इन तीनोंको जानता है, वह परमात्मा ही, सबका अधिष्ठान 'आश्रय' तत्त्व है। उसका आश्रय वह स्वयं ही है, दूसरा कोई नहीं॥९॥ ❀ ❀ जब पूर्वोक्त विराट् पुरुष ब्रह्माण्डको फोड़कर निकला, तब वह अपने रहनेका स्थान ढूँढ़ने लगा। और स्थानकी इच्छासे उस शुद्ध सङ्कल्प पुरुषने अत्यन्त पवित्र जलकी सृष्टि की॥१०॥

**तास्ववात्सीत् स्वसृष्टासु सहस्रपरिवत्सरान्। तेन नारायणो नाम यदापः पुरुषोद्भवाः॥ ११॥**
**द्रव्यं कर्म च कालश्च स्वभावो जीव एव च। यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया॥ १२॥**
**एको नानात्वमन्विच्छन् योगतल्पात् समुत्थितः। वीर्यं हिरण्मयं देवो मायया व्यसृजत् त्रिधा॥ १३॥**
**अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः। यथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच्छृणु॥ १४॥**
**अन्तःशरीर आकाशात् पुरुषस्य विचेष्टतः। ओजः सहो बलं जज्ञे ततः प्राणो महानसुः॥ १५॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

अप्सु वासं नारायणनामनिरुक्त्या स्पष्टयति। तेन अप्सु वासेन यद्यस्मात् पुरुषो नरस्तस्मादुद्भवो यासां ता नारा अपोऽयनमस्येति नारायण इत्यर्थः। तदुक्तम्। "आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः॥ इति॥११॥ ❀ ❀ तस्य प्रभावमाह। द्रव्यमुपादानम्। कर्मादीनि निमित्तानि जीवो भोक्ता यस्यानुग्रहात्संति कार्यक्षमा भवंतीत्यर्थः॥१२॥ ❀ ❀ योग एव तल्पं शय्या तस्मात् वीर्यं गर्भरूपं देहं हिरण्मयमिव प्रकाशबहुलम्॥१३॥ ❀ ❀ तस्यैव प्रपंचः यथेत्यादिना॥१४॥ ❀ ❀ अंतः शरीरे य आकाशस्तस्मात्क्रियाशक्त्या तत्र विविधं चेष्टमानस्य सत ओज इंद्रियशक्तिः सहो मनःशक्तिर्बलं देहशक्तिः ततः शक्त्यात्मकात्सूक्ष्माद्रूपात्प्राणः सूत्राख्यः महान् मुख्यः असुः प्राणः सर्वेषाम्॥१५॥

## वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

इत्यर्थ इति इति। नारेषु स्थितत्वान्नारायण इति भावः। अत्र प्रमाणमाह—तदुक्तमिति। नरस्य भगवतः सूनवः पुत्राः ता आपः पूर्वं प्रलये यतोऽयनं वासस्थानं तेन हेतुनेति स्मृत्यर्थः॥११॥ ❀ ❀ तस्य समष्टिविराडंतर्यामिणः उपादा-

१. नवमाध्यायस्य (४१) श्लोकोऽयम्। २. प्रा०पा०—तेजस्ततः।

पृथिव्यादि जीवो हिरण्यगर्भः अनुग्रहादन्वयात् । इत्यर्थ इति । इति न हि परमात्मानं विना जीवो वा तिष्ठेदिति भावः ॥ १२ ॥ ❀ ❀ समष्टिविराडेव कथमभूदित्यपेक्षायामाह–एकः प्रलये स्वांशाञ्जीवानात्मनि विलाप्यैकत्वेन स्थितः अनु अनंतरं सृष्टिकाले "एकोहं बहु स्याम्" इति श्रुतेर्नानात्वमिच्छंस्तानेव जीवानात्मनः सकाशाद्विभक्तान् कुर्वन् योगः स्वमहिमस्थितिलक्षण एव तल्पं शय्या तस्मान्महाप्रलये रात्रिस्थानीये शयित्वा सृष्टिकाले प्रातरुत्थितः सन् देवो दीव्यन् पुरुषः मायया स्वशक्त्या महत्तत्त्वादीनि कारणानि सृष्ट्वा तैः कार्यभूतं वीर्यं हिरण्मयं कनकवर्णं प्रकाशबहुलं ब्रह्मांडं सावरणमसृजदिति महासमष्टिसृष्टिः ततश्च तेषामेव महत्तत्त्वादीनां किंचित्किंचिदंशैर्भगवच्छक्त्यैव परस्परं मिलितैः समष्टिविराट्पञ्चाशत्कोटियोजनपरिमितांडकटाहमध्यगः सृष्टोभूत् । तदैवादिपुरुषस्तदेवांडकटाहं प्रविश्य तदर्द्धं स्वसृष्टजलेनापूर्य्य तत्रस्थं समष्टिविराजं स्वजठरमध्यगतं कृत्वा सहस्रवर्षाणि तस्मिन् गर्भोद एव सुष्वाप तदन्ते योगतल्पात्समुत्थितः सन् हिरण्मयं वीर्यं समष्टिविराजं त्रिधा व्यसृजत् ॥ १३ ॥ ❀ ❀ त्रिधैव किं तत्राह–अधिदैवमित्यादि । एष एव समष्टिस्तस्य नाभिद्वाराकमलनालात्मको भविष्यति । स एव पुनश्चतुर्दशलोकात्मको वैराजसंज्ञः स्थूलो भावी सूक्ष्मं तु हिरण्यगर्भः समष्टिजीवो वैराज एव विसर्गाद्यर्थं चतुर्मुखो भावीति ब्रह्मणस्त्रैविध्यम् । अथ प्रकृतमनुसरामः अथ इति । आधिदैवादिकाद्युक्त्वा त्रिविधादन्यदिदं त्रिविधमित्यर्थः ॥ १४ ॥ ❀ ❀ असुर्जीवनव्यंजकः ॥ १५ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

निरुक्त्या प्रकथनेन, व्युत्पत्त्या इति यावत् ॥ ११ ॥ १२ ॥ ❀ ❀ गर्भरूपो देहमिति चतुर्दशभुवनात्मकं समष्टिदेहम् अप एव ससर्ज्जादौ तासु बीजमवासृजत् । तदण्डमभवद्धैमं सहस्रार्कसमद्युतीति मनुवचनात् ॥ १३ ॥ २२ ॥

### श्रीमद्वीरराघवव्याख्या

स्वसृष्टासु तास्वप्सु सहस्रं परिवत्सरान् बहून्संवत्सरानवात्सीत् उवास । एतदेव नारायणशब्दप्रवृत्तिनिमित्तमित्याह तेनेति । यद्यस्मात्पुरुषोद्भवाः पुरुषात्परमपुरुषादुद्भवा उत्पन्नाः पुरुषादुद्भवो यासां इति वा नारा आपः अयनं यस्येति शेषः, तेनेदृशव्युत्पत्तिलभ्येनावयवत्वेन नारायणो नारायणशब्दवाच्योऽभूदित्यर्थः । नामेति स्मृत्यंतरप्रसिद्धिं द्योतयति । तथाहि—स्मर्यते आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं यस्य ताः पूर्वं तेन नारायणः स्मृत इति ॥ ११ ॥ ❀ ❀ अस्यैव प्रभावमाह द्रव्यमिति । द्रव्यादयः यदनुग्रहतः संति स नारायणः । इत्यन्वयः द्रव्यं महदादिपृथिव्यंतभूतवर्गः कर्मजीवादृष्टं कालः गुणवैषम्यहेतुः स्वभावः प्रकृतेः परिणामस्वभावः यदनुग्रहतः संति यस्य उपेक्षया न संति द्रव्यादयो यत्संकल्पानुविधायिसत्तास्थितिप्रवृत्तिका इत्यर्थः ॥ १२ ॥ ❀ ❀ एवंभूतो नारायण एकः अविभक्तनामरूपसूक्ष्मचिदचिच्छरीरकत्वेनैकः नानात्वं देवमनुष्यादिरूपेण भवितुमिच्छन् योगः स्वात्मानुभवरूपो योगः स एव तल्पं शय्या तस्मात्समुत्थितः देहं स्वशरीरभूतं हिरण्मयं रमणीयं वीर्यं चिदचिदात्मकं कारणद्रव्यं मायया चतुर्मुखरूपेण त्रिधा करणज्ञातृज्ञेयरूपेण व्यसृजत् मायाशब्दस्तद्गुणरजःप्रचुरः चतुर्मुखपरः संकल्पपरो वा संकल्पेन चतुर्मुखरूपी भूत्वा वाप्यसृजदित्यर्थः ॥ १३ ॥ ❀ ❀ त्रैविध्यं विवृणोति अधिदेवमिति । अधिदैवं दिगादिदेवताधिपः एकादशेंद्रियरूपकरणवर्गः अध्यात्मं ज्ञातृवर्गः अधिभूतमिति पृथिव्यादिभूतस्थगंधादिज्ञेयवर्गः उक्त इति त्रिधा प्रभुर्व्यसृजदित्यर्थः । ज्ञातृसृष्टिर्नामजीवानां तत्तद्देवादिदेहयोगसंपादनमेव । तथाहि तोयान् जीवान् विससर्ज भूम्यामिति । तोयशब्दोपलक्षितभूतसंघपरिणामदेवादिशरीरविशिष्टत्वेनाकारेण विससर्ज इत्यर्थः । अथ संग्रहेणोक्तं देवादिव्यष्टिशरीरस्थानां प्राणेन्द्रियादीनां चतुर्मुखशरीरस्थप्राणेंद्रियादिसमष्टित उत्पत्तिप्रकारं प्रतिपादयितुं प्रतिजानीते यथेति । पौरुषे समष्टिपुरुषचतुर्मुखदेहगतं पुरुषाधिष्ठितं वा एकं समष्टिरूपेणैकं वीर्यं व्यष्टिकारणं द्रव्यं त्रिधा करणभोक्तृविषयरूपेण देवादिव्यष्टीनां यथा निरभिद्यत उदपद्यत तच्छृणिवत्यर्थः, मत्त इति शेषः ॥ १४ ॥ ❀ ❀ एवं प्रतिज्ञाय व्यष्टींद्रियसृष्टिविभागं वक्तुं इंद्रियाश्रयप्राणव्यष्टिसृष्टिमाह अंतरिति । पुरुषस्य चतुर्मुखस्य विचेष्टतः प्राणव्यापारं कुर्वतः चतुर्मुखे प्राणव्यापारं कुर्वति सतीत्यर्थः । अंतः शरीरे तच्छरीरांतः स्थितादाकाशादाकाशकार्यवायुविशेषात्प्राणादोजः सहोबलं जज्ञे ओजः प्रवृत्तिसामर्थ्यं सहः वेगसामर्थ्यं बलं धारणसामर्थ्यं एते धर्मा अभवन्नित्यर्थः । ततश्चतुर्मुखस्वशरीरगतौजःसहोबलधर्मिप्राणात्प्राणाख्यः महान्मुख्यः असुः प्राणनहेतुः जज्ञे इतरेषां शरीरांतर्वर्तिप्राणा अभवन्नित्यर्थः । प्राण इत्येकवचनमार्षं जात्यभिप्रायं वा ॥ १५ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

ततः किं तत्राह तास्विति । स्वसृष्टासु तास्वप्सु सहस्रपरिवत्सरानवात्सीदिति यत् तेन नारायणो नामाभूदित्यन्वयः । ननु अनेनायनमप्स्वासेति अबयन इति वा जलायन इति चांतरेण नारायण इति नाम कथमत्राह यदिति । अनाशात्पुरुषो नरस्तदुद्भवापो नारा इति यद्यस्मात्ता नारा अयनं यस्य स नारायण इति सोऽपोऽसृजत्ततो नारा नरोऽनाशात्परो यत इति च ॥ ११ ॥ ❀ ❀ हरेरियं सृष्टिः स्वाधीनसाधनांतरसहकृतेत्याशयेनाह द्रव्यमिति द्रव्यं पृथिव्यादि ॥ १२ ॥ ❀ ❀ ब्रह्मांडस्यांतस्त्रैविध्यमपि श्रीनारायणेनैव कृतमित्याह एक इति । जले शेषपर्यंके शयान एको नारायण एव स्वसृष्टतत्तद्वस्तुनियामकतयांतर्यामिरूपैर्नानात्वं

बहुत्वसंख्यागोचरत्वमाप्तुमन्विच्छन् योगतल्पात्समुत्थितो देवो लीलालोके हिरण्यं स्ववीर्यमंडं मायया स्वेच्छयांतस्त्रिधा व्यधात् तत्तन्नियामकत्वेन बहुत्वं प्राप्तुमीश्वर इत्यादेः किंच हिरण्मयं पूर्णसुखं शतानंदवीर्यं स्वरतो रूपं त्रिधा व्यसृजदित्यन्वयः। अंतःस्थितहरेः कामादंडे ब्रह्मतनोर्जनिरित्यादेः ॥ १३ ॥ ❀ ❀ अंडांतस्त्रैविध्यप्रकारं कथयति। अधिदैवमिति। प्रभुरिति त्रिधा व्यसृजदिति शेषः। हरिवीर्यरूपस्य विराजोऽपि त्रैविध्यमस्तीति कथयति पुनरिति। पुनर्यथा तत्पौरुषं पुरुषाख्यस्य हरेर्वीर्यं विराण्नामब्रह्मात्मकं जातं त्रिधा भिद्यत इति त्रिविधमभवत् तथा शृण्वित्यन्वयः ॥ १४ ॥ ❀ ❀ तत्त्रैविध्यं विवृणोति अंतरिति। विराडाख्यब्रह्मशरीरेंतराकाशे विचेष्टतः पुरुषस्य हरेरोजः सहो बलं पराभिभवसहनस्वेच्छाकरणशक्तयो जज्ञिरे ततस्तेभ्य ओजआदिभ्यो महान्प्राणो मुख्यप्राणो जज्ञ इत्यन्वयः। ब्रह्मांतर्यामिहर्योजःसहोबलानुविष्टहिरण्यगर्भौजःसहोबलेभ्यः सर्वेन्द्रियनायक ओजःसहोबलात्मको मुख्यप्राणो जात इत्युक्तं भवति। एतेन च पूर्वप्रकृताध्यात्माधिभूताधिदैवानां ब्रह्मस्थनारायणब्रह्मप्राणेभ्यः सृष्टिरिति ज्ञातव्यं प्राणेन क्षिपतेत्यादिवक्ष्यमाणत्वात् ॥ १५ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या।

तदेवं ब्रह्माण्डं कर्तुमारभ्यापि शयनलीलार्थं कञ्चित् कालं स्थगितचेष्ट आसीदित्याह तास्ववात्सीदिति ॥ ११ ॥ ❀ ❀ ततश्च सर्वं तद्वश्यर्थमेवासीदित्याह द्रव्यमिति ॥ १२ ॥ ❀ ❀ एक इति सार्द्धम्। तत्र महासमष्टिव्यष्टिजीवानां त्रयाणां तदुपाधीनाञ्च सृष्टिप्रक्रियामभेदप्रायतया बिवरीतुमाह एक इति। एकः प्रलये स्वांशान् जीवान् आत्मनि विलाप्यैकत्वेन स्थितः संप्रति तु तत्तत्स्वांशानाविर्भाव्य नानात्वमन्विच्छन् योगनिद्रास्थानात् समुत्थितः। ततश्च वीर्य्यं ब्रह्माण्डसमूहोत्पादनार्थमंशतो विभक्तीकृतं तत्त्वसमुदायरूपं ब्रह्माण्डसमूहबीजम् ॥ १३ ॥ ❀ ❀ अथेत्यर्द्धकम् ॥ १४ ॥ ❀ ❀ अथ त्रिधात्वं विवरीतुं प्रथमं प्राणं विवृणोति अन्तरिति द्वाभ्याम्। अन्तः शरीरे तस्यैव गर्भीभूतस्य महासमष्टिरूपस्य पुरुषस्याभ्यन्तरे य आकाशस्तस्मात् प्राणो जज्ञे स्पष्टीबभूव। ततो विचेष्टमानस्य सतः ओजः सहो बलञ्च जज्ञे इत्यन्वयः ॥ १५ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

अप्सु वासं नारायणनामनिरुक्त्या स्पष्टयति। तेन अप्सु वासेन नारायण इति नाम अभूत्। कुतः यत् यस्मादापः पुरुषादुद्भवन्तीति ता इति नरः पुरुषः तस्माज्जाता नारा आपोऽयनं यस्य स नारायण इति नाम। तदुक्तम्। आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं यस्य ताः पूर्वं तेन नारायणः स्मृतः ॥ इति ॥ ११ ॥ ❀ ❀ तस्य समष्टिविराडन्तर्यामिणः प्रभावमाह। द्रव्यमुपादानं पृथिव्यादिकं कर्मादीनि निमित्तानि जीवो हिरण्यगर्भो भोक्ता यस्यानुग्रहात् यदन्वयात्। न हि परमात्मना विना जीवो देहो वा तिष्ठेत् स्वकार्यक्षमो वा भवेत् ॥ १२ ॥ ❀ ❀ समष्टिविराडेव कथमभूदित्याकांक्षायामाह। एकः प्रलये स्वांशान् जीवान् आत्मनि विलाप्य एकत्वेनास्थितः अनु अनन्तरं सृष्टिकाले नानात्वमिच्छन् तानेव जीवानात्मनः सकाशाद् विभक्तान् कुर्वन् योग एव तल्पं शय्या तस्मादिति महाप्रलये रात्रिस्थानीये शयित्वा सृष्टिकाले प्रातरुत्थितः सन् देवो दीव्यन् पुरुषः मायया स्वशक्त्या महत्तत्त्वादीनि सृष्ट्वा तैः कार्यभूतं वीर्यं हिरण्मयं कनकवर्णं प्रकाशबहुलं ब्रह्माण्डं सावरणमसृजदिति महासमष्टिसृष्टिः। ततश्च तेषामेव महत्तत्त्वादीनां किञ्चित् किञ्चिदंशैर्भगवच्छक्त्यैव परस्परमिलितैः समष्टिविराट् पञ्चाशत्कोटियोजनशतकोटिपरिमिताण्डकटाहमध्यगः सृष्टोऽभूत् तदैवादिपुरुषस्तदेवाण्डकटाहं प्रविश्य तदर्द्धं स्वसृष्टजलेनापूर्य तत्रस्थं समष्टिविराजं तं स्वजठरमध्यगतं कृत्वा सहस्रवर्षाणि तस्मिन् गर्भोद एव सुष्वाप तदन्ते योगतल्पात् समुत्थितः सन् हिरण्मयं वीर्यं समष्टिविराजं त्रिधा व्यसृजत्। त्रिधैव किं तत्राह अधिदैवमित्यादि। एष एव समष्टिस्तस्य नाभिद्वारात् कमलनालात्मको भविष्यति। स एव पुनश्चतुर्दशलोकात्मको वैराजसंज्ञः स्थूलो भावी सूक्ष्मस्तु हिरण्यगर्भः वैराज एव विसर्गाद्यर्थं चतुर्मुख भावीति ब्रह्मणस्त्रैविध्यम् ॥ १३ ॥ ❀ ❀ अथ प्रकृतमनुसरामः अथेति। अधिदैवादिकादुक्तात् त्रिविधादन्यदिदं त्रिविधमित्यर्थः ॥ १४ ॥ ❀ ❀ अन्तःशरीरे य आकाशस्तस्मात् क्रियाशक्त्या तत्र विविधं चेष्टमानस्य पुरुषस्य समष्टिविराजः। ओज इन्द्रियशक्तिः सहो मनःशक्तिः बलं देहशक्तिः। ततः त्रिविधशक्त्यात्मकात् सूक्ष्मात् रूपात् प्राणः सूत्राख्यः महान् श्रेष्ठः असुर्जीवनव्यञ्जकः ॥ १५ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तासु स्वसृष्टासु अप्सु सहस्रं परिवत्सरान् अवात्सीत् उवास तेनाप्सु वासेन नामेति प्रसिद्धौ नारायणशब्दवाच्योऽभूत् यद्यस्मादापः पुरुषोद्भवाः पुरुषो नर स्वयं भगवान् तदुद्भवा 'नयतीति नरः प्रोक्तः परमात्मा सनातन' इति श्रीव्यासवचनात् ताः नाराः आपोऽयनं यस्य स तथोक्तः। आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति स्मृतेश्च ॥ ११ ॥ ❀ ❀ तत्प्रभावमाह द्रव्यमिति। द्रव्यं महदादिकर्मजीवादृष्टं कालः गुणवैषम्यहेतुः स्वभावः प्रधानस्य परिणामित्वम्। जीवश्चेतनः यस्य भगवतः अनुग्रहतः संति कार्यकारिणो भवन्ति यदुपेक्षया तु न संति किमपि कर्तुं नोत्सहंते,

यदैते संहता भावाः भूतेन्द्रियमनोगुणाः। यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः। सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यद इति पूर्वोक्तेश्च ॥ १२॥ ❀ ❀ देवो दीप्तिमान् प्रभुः समर्थः एकः अविभक्तशरीरावयवः नानात्वमधिदैवादिविभागमन्विच्छन् योगः स्वात्मानुभवरूप एव तल्पः तस्मादुत्थितः वीर्यं वक्ष्यमाणसृज्यपदार्थमूलभूतं हिरण्मयं प्रकाशबहुलं अविभक्तावयवं शरीरं मायया वयुनेन संकल्पमात्रेण अधिदैवमध्यात्ममधिभूतमिति त्रिधा व्यसृजदिति सार्द्धश्लोको वाक्यम्॥ १३॥ ❀ ❀ अस्यैव प्रपंचः अथेत्यादि पौरुषं पुरुषाधिष्ठितम्। एकं समष्टिरूपं वीर्यं व्यष्टिकारणम्। त्रिधाभिद्यत निरभिद्यत उदपद्यत तच्छृणु॥ १४॥ ❀ ❀ पुरुषस्य विचेष्टतः प्राणचेष्टां कुर्वतः अंतःशरीरे यः आकाशः तस्मात् ओजः इन्द्रियशक्तिः सहः मनःशक्तिः बलं देहशक्तिः प्राणः जज्ञे शक्तित्रययुक्तः समष्टिप्राणोऽभवदित्यर्थः॥ ततो महान्मुख्यः असुः सर्वेषां प्राणः जज्ञे। जातावेकवचनम्॥ १५॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

ततस्तास्वेवाऽप्सु स्वसृष्टास्ववात्सीत्। न ह्यन्य एवमपः स्रष्टुं तत्र स्थातुं वा शक्नोति। स्वसृष्टास्वित्यनेनाऽपां महत्त्वेन स्वमहत्त्वं बोधयन् जीवाद्यन्तराभावेन च तत्कृतं भयमशुद्धिं च निवारयति। अत्र वासस्तूष्णींभावेन। **सहस्रं परिवत्सरानिति।** स नारायणावतारो ब्रह्ममानेन सहस्रपरिवत्सरमात्रं तिष्ठतीति ज्ञायते। शयनार्थं वा। सहस्रपरिवत्सरं शयनं कृत्वा पश्चात् सृष्टिं करोति। एतावान् कालः स्वदेहे निष्पाद्यमानानां सर्वेषां जीवानां सर्वनिर्वाहार्थे। एवं सति तस्य नारायणेति नाम जातमित्याह—**तेन नारायणो नामेति।** नारमयनं यस्येति नारायणः। नन्वस्य जलमयनं तत्कथं नारायण इति। तत्राऽऽह—**यदापः पुरुषोद्भवा इति।** यद्यस्मादापः पुरुषशब्दवाच्यान्नरादेवोत्पन्नाः। पूर्वं हि पुरुषः। स एव नारायणपूर्वभावित्वान्नर इत्युच्यते। भगवदावेशात्। तस्माज्जाता आपः तेन नाराः। ता अयनं यस्येति भवत्येव नारायणः। एवं स्वनिर्मितेनैव कार्येण स्वस्य नामानि भवन्तीति न प्राकृततुल्यता॥ ११॥ ❀ ❀ किञ्च। अस्मादपि हेतोर्न प्राकृततुल्यतेत्याह—**द्रव्यं कर्म च कालश्चेति।** द्रव्यमधिभूतं महाभूतादि। कर्माऽध्यात्ममदृष्टादि। काल आधिदैविको नियन्ता सर्वनिमित्तभूतः। स्वभावः परिणामहेतुः। जीवो भोक्ता। **उपादानं निमित्तं च क्षोभको हेतुरेव च। भोक्ता चेति समस्तार्थे समर्थाः कृपया हरेः।** तदाह—**यदनुग्रहत इति।** एवकारेण जीवानां विशेषाकारेण भगवत्कृपाधीनत्वं बोधितम्। चकारादन्यान्यपि साधनानि दण्डादीनि भगवत्कृपयैव। सन्ति आविर्भूतानि तिष्ठन्ति। कार्यक्षमाणि च भवन्ति। अन्यथाऽव्यक्तमेतानपकर्षति। यथा व्याघ्रः पशुम्। तदाह—**न सन्तीति।** नाऽत्र भगवतः क्रोधोऽप्यपेक्ष्यते। किन्तूपेक्षामात्रेणाऽव्यक्तस्तानुपसंहरति। अनेन "**यावान् कल्प**" इत्यादिषु ये कालादय आक्षिप्तास्ते सर्वे समाहिता ज्ञेयाः॥ १२॥ ❀ ❀ किञ्च। भगवाननन्तः कथं सृष्ट्यादि करोतीति न शङ्कनीयम्। यतस्तस्य सृष्टिप्रकार एवमित्याह—**एको नानात्वमन्विच्छन्नित्यादिभिः।** भगवानेक एव जले शयानोऽनेकरूपो भविष्यामीतीच्छां कृतवान्। ततः शयानस्तल्पादुत्थितो यथा पुरुषः शय्यात उत्तिष्ठति। ततस्तस्य स्वात्मनो बहुधेच्छायां तस्य वासुदेवस्य मायारूपा या भार्या तया हेतुभूतया तस्याः सन्निधिमात्रेणैव स्वस्मिन्नेव विद्यमानं बीजात्मकं वीर्यं सच्चिदानन्दरूपं त्रिधा सद्रूपचिद्रूपानन्दरूपभेदेन त्रिधा असृजत्॥ १३॥ ❀ ❀ भेदत्रयमपि गणयति—प्रथमतः अधिदैवं आनन्दांशभूतम्। अथ तदनन्तरं अध्यात्मं चिद्रूपम्। कथं कृतवानित्यपेक्षायामाह—**प्रभुरिति।** सर्वसमर्थः। इतिशब्दः प्रकारे। यथैतत्त्रयं निर्मितं तथाऽन्येऽपि प्रकारा निर्मिता इति। अनेन सर्वे त्रिविधा उत्तरिताः। प्रकारविशेषेणाऽपि त्रैविध्यं जातं निरूपयति—**यथैकमिति।** प्रकारव्यतिरेकेणेच्छयैव त्रैविध्यं भवति तथापि प्रकारेणाऽपि निरूप्यते। यथा एकमभिद्यत। अखण्डस्य यथा भेदस्तथा शृण्वित्यर्थः॥ १४॥ ❀ ❀ तदेवाऽऽह—**अन्तःशरीर इति।** शरीरमध्ये हृदयस्थाने य आकाशस्तस्मादाकाशाद्धेतोः पुरुषश्चेष्टां कृतवान्। निरवकाशश्चेष्टितुं न समर्थ इत्यधिकरणेऽप्याकाशस्य हेतुत्वम्। पुरुषस्य नारायणस्य। विचेष्टतः शरीरमध्य एव चेष्टां कुर्वतः। इदं तु तस्यैव शक्यम्। तदा तस्य चेष्टात इन्द्रियान्तःकरणदेहानां सामर्थ्यानि जातानीत्याह—**ओजः सहो बलं जज्ञ इति।** ततः तदनन्तरं प्राणो जातः। तस्य प्राणस्य वायुत्वं निराकरोति—**महानिति।** महत्तत्त्वांशभूतः सूत्रात्मा। न तु भौतिको वायुः। अन्येऽपि प्राणाः सन्तीति विशेषणमाह—**असुरिति।** सुरित्यनुकरणशब्दः श्वासवायुः। स न भवतीत्यसुः। भौतिकादतिरिक्त इति यावत्॥ १५॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

**तास्ववात्सीदित्यत्र तूष्णींभावेनेति,** सुप्तवत् क्रियान्तरराहित्येन। अत्र स्वसृष्टासु वासकथनादेवं ज्ञायते। अण्डभेदानावरणजलस्याविलत्वेनायनान्विच्छयापां सृष्टिस्तेन विराजोऽयनं स्वसृष्टा आपस्तदयनं भूतरूपं जलं तस्यायनं तेज इति। तथा पूर्वमण्डस्य सहस्राब्दं स्थितेरुक्तत्वादत्र च नारायणस्थितेस्तात्कालिकत्वेन कथनात् सहस्रद्वयवर्षोत्तरं सृष्टिरिति 'योगतल्पात्समुत्थित' इति वक्ष्यमाणलिङ्गात् पक्षान्तरमाहुः **शयनार्थं वेति॥ ११॥** ❀ ❀ **द्रव्यमित्यत्र हेतुरिति** सहकारी। एवञ्चैतैस्त्रिभिः पद्यैरलौकिकसामर्थ्यबोधनेन प्राकृततुल्यावयवत्वकृतं प्राकृततौल्यं लोकन्यायेनापि निरस्तम्। तुल्यावयवकयोपि राजरङ्कयोः

सामर्थ्यतदभावाभ्यामुत्कर्षापकर्षस्याध्यक्षसिद्धत्वात् फलानुपपत्तिशङ्काप्येतेनैव निरस्ता । मूलसामर्थ्यस्यास्मिन् विद्यमानत्वेनैतद्रूपधारणायामप्यभयरूपस्य फलस्य सुखेन सम्भवादिति । अपि च, बाह्याद्यनियतत्वं यदाक्षिप्तम्, तदपि लोके पुरुषकृतस्यावयवविवरणावरणवदिच्छाधीनतया तृतीयश्लोकेन समाहितमित्याहुः । अनेन इत्यादि ॥ १२ ॥ ❀ ❀ एक इत्यत्र तस्य वासुदेवस्येत्यादि । अत्र 'द्रव्यं कर्म चे' त्यस्योत्तरार्द्धे 'पूर्वं वासुदेवा परो ब्रह्मन्न चान्योर्थोस्ति तत्त्वत' इति पठितमत्र च 'यदनुग्रहतः सन्ति न सन्ति यदुपेक्षये' ति पठित्वाग्रे तस्मात्सृष्टिरुच्यत इति तत्रोक्तो वासुदेवोयमेवेत्याशयेनोक्तम् । तथा सति, दशमस्कन्धे 'वासुदेवकलानन्त' इत्यत्र यो वासुदेवो वक्ष्यते 'सात्विकेषु तु कल्पेष्वि' त्यनेन विवरिष्यते च सोयमिति बोध्यम् । सन्निधिमात्रेणेति तां सङ्ख्यायकप्रतिकृतिरूपां कृत्वा ॥ १३ ॥ ❀ ❀ अधिदैवमित्यत्र अन्येपीति अन्यत्रोक्तात्रानुक्ता अपि ॥ १४ ॥ अन्तःशरीर इत्यत्र अधिकरणेपीति स्वसृष्टजले । अत्र चेष्टाकरणेनेन्द्रियादिसामर्थ्योत्पत्तिकथनाच्चेष्टाजनकं स्वसामर्थ्यं तस्मादन्यदेवेति ज्ञापनायाहुः इदं तु शक्यमिति ॥ १५ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

येन स्वसृष्टासु तास्वप्सु सहस्रपरिवत्सरान् बहून् संवत्सरान् अवात्सीत् उवास तेन अप्सु वासेन नारायण इति नामाभूदिति शेषः । एतदेव व्युत्पादयति—यत् यस्मात् पुरुषो नरस्तस्मादुद्भवो यासां ता नाराः आपः अयनमस्येति नारायण इत्यर्थः । तदुक्तम्—'आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः' इति ॥ ११ ॥ ❀ ❀ तस्य प्रभावमाह—द्रव्यमिति । द्रव्यं महदादिपृथिव्यन्तो भूतवर्गः, कर्म शुभाशुभजीवादृष्टं, कालो गुणवैषम्यहेतुः, स्वभावः परिणामहेतुः, जीवो भोक्ता, चकारादन्यदपि यत्किञ्चित्-एते सर्वे यस्यानुग्रहतः सन्ति सत्तां लभन्ते, कार्यक्षमाश्च भवन्ति, यस्योपेक्षया च न सन्ति सत्तामेव न लभन्ते । कुतः कार्यक्षमतेत्यर्थः ॥ १२ ॥ ❀ ❀ स देवः एकः अविभक्तनामरूपः आत्मनो देवमनुष्यादिरूपेण नानात्वमन्विच्छन् योगजात् तल्पात् शय्यातः समुत्थितः सन् हिरण्मयं प्रकाशबहुलं रमणीयं वीर्यं गर्भरूपं देहं मायया स्वसङ्कल्पात्मिकया त्रिधा व्यसृजत् विभक्तवान् ॥ १३ ॥ ❀ ❀ किं तत्त्रैविध्यमित्यपेक्षायामाह अधिदैवमथाध्यात्ममधिभूतमितीति । तस्य सर्वत्र सर्वदा सर्वकरणे सामर्थ्यमस्तीत्याह-प्रभुरिति । कथं त्रिधा व्यसृजदित्यपेक्षायां सङ्क्षेपेणोक्तमपि विस्तरेण तत्प्रकारं वक्तुं प्रतिजानीते—यथेति । एकं पौरुषं वीर्यं यथा त्रिधा भिद्यत तथा शृण्वित्यन्वयः ॥ १४ ॥ ❀ ❀ प्रतिज्ञातं निरूपयति-अन्तरिति । पुरुषस्य विचेष्टतः क्रियाशक्त्या विविधं चेष्टमानस्यान्तश्शरीरे य आकाशस्तस्मात् ओजः इन्द्रियशक्तिः, सहो मनश्शक्तिः, बलं देहशक्तिः, ततस्तदनन्तरं प्राणश्च जज्ञे । असव इन्द्रियाणि । तेषु प्राणस्य मुख्यत्वमाह-महानसुरिति ॥ १५ ॥

### हिन्दी अनुवाद

विराट् पुरुषरूप 'नर' से उत्पन्न होनेके कारण ही जलका नाम 'नार' पड़ा । और उस अपने उत्पन्न किये हुए 'नार' में वह पुरुष एक हजार वर्षोंतक रहा, इसीसे उसका नाम 'नारायण' हुआ ॥ ११ ॥ ❀ ❀ उन नारायणभगवान्की कृपासे ही द्रव्य, कर्म, काल, स्वभाव और जीव आदिकी सत्ता है । उनके उपेक्षा कर देनेपर और किनीका अस्तित्व नहीं रहता ॥ १२ ॥ ❀ ❀ उन अद्वितीय भगवान् नारायणने योगनिद्रासे जगकर अनेक होनेकी इच्छा की तब अपनी मायासे उन्होंने अखिल ब्रह्माण्डके बीजस्वरूप अपने सुवर्णमय वीर्यको तीन भागोंमें विभक्त कर दिया—अधिदैव, अध्यात्म, और अधिभूत । परीक्षित् । विराट् पुरुषका एक ही वीर्य तीन भागोंमें कैसे विभक्त हुआ, सो सुनो ॥ १३ ॥ १४ ॥ ❀ ❀ विराट् पुरुषके हिलने-डुलनेपर उनके शरीरमें रहनेवाले आकाशसे इन्द्रियबल, मनोबल और शरीरबलकी उत्पत्ति हुई । उनसे इन सबका राजा प्राण उत्पन्न हुआ ॥ १५ ॥

**अनुप्राणन्ति यं प्राणाः प्राणन्तं सर्वजन्तुषु । अपानन्तमपानन्ति नरदेवमिवानुगाः ॥ १६ ॥**
**प्राणेन क्षिपता क्षुत् तृडन्तरा जायते प्रभोः । पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत ॥ १७ ॥**
**मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते । ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते ॥ १८ ॥**
**विवक्षोर्मुखतो भूम्नो वह्निर्वाग् व्याहृतं तयोः । जले वै तस्य सुचिरं निरोधः समजायत ॥ १९ ॥**

१. तथेति मूलगततच्छब्दस्य पर्यायः । तथा तच्छृणिवति वाऽर्थः । चिन्त्यमेतत् । अयमेव ( रा० ) सुबोधिन्याः पाठः । 'अथैकं' इति श्रीधरस्वामिपाठः । २ क्षिपता चालयता निमित्ते न क्षुत्तडादिकं प्रभोः आजायते स्मेति श्रीधरस्वामिव्याख्यानम् । ३. प्रा० पा०—विभोः । ४. प्रा० पा०—सुचिरं तत्र ।

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

महत्त्वं दर्शयति । प्राणा इंद्रियाणि यं प्राणंतं चेष्टां कुर्वंतमनु पश्चात् प्राणंति चेष्टां कुर्वंति अपानंतं चेष्टां त्यजंतमनु अपानंति चेष्टां त्यजंति राजानमनु भृत्या इव ॥ १६ ॥ ❀ ❀ क्षिपता चालयता निमित्तेन । क्षुत्तृडादिकं प्रभोरिति विराड्जीवाभेदेनोपासनार्थमुक्तम् । आजायते स्म । ततो जक्षतः भक्षयितुमिच्छत इत्यर्थः । प्राक् प्रथमं निरभिद्यत विभक्तमभूत् ॥ १७ ॥ ❀ ❀ तात्वधिष्ठानं जिह्वेन्द्रियं नानारसो विषयः वरुणश्च देवता ज्ञातव्या । एवं सर्वत्राधिष्ठानमिंद्रियं देवता विषय इत्येतच्चतुष्टयमनुक्तमप्यूह्यम् ॥ १८ ॥ ❀ ❀ विवक्षोर्वक्तुमिच्छोः मुखत एव वह्निर्देवता वाक् इंद्रियं व्याहृतं भाषणम् । तयोरितींद्रियदेवताधीनत्वं कर्मणो दर्शयति ॥ १९ ॥ ❀ ❀ नभस्वति प्राणवायौ दोधूयति दोधूयमानेऽत्यंतं प्रचलति सति तत्र च नासिकायां वायुर्देवता गंधं वहतीति तथा । अनेन गंधो विषयो दर्शितः । घ्राण इंद्रियं जिघृक्षतः गंधं ग्रहीतुमिच्छतः ॥ २० ॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

जीवनव्यंजकत्वेन महत्त्वं दर्शयति अन्विति ॥ १६ ॥ ❀ ❀ पिपासतो जक्षतश्चेत्यनेन सुप्ततद्वासनामात्रमुच्यते यदेव स्वभावरूपं स तत्तत्कार्यं संपादयतीत्येवमुत्तरत्रापि ज्ञेयम् । मुखमिति । व्यष्टिमुखमेव तन्मुखत्वेनोपदिश्यते तत्तत्समुदायकारणमात्ररूपत्वात्तन्मुखस्य, एवमुत्तरत्रापि एकत्वं समूहापेक्षया एकोपलक्षणत्वेन वा ज्ञेयम् । अंतरा उदरमध्ये प्रभोर्वैराजस्य ॥ १७ ॥ ❀ ❀ पूर्वमुपक्रांतमधिदैवादित्रैविध्यं विवृणोति मुखत इति । मुखतः मुखोत्पत्तेरनंतरमित्यर्थः । तत्राधिष्ठानविषयावधिभूतमिंद्रियमध्यात्मं देवताधिदैवमिति सर्वत्र चातुर्विध्येऽपि त्रैविध्यमेव द्रष्टव्यम् । तत्र तालुनि । ततो जिह्वोत्पत्तेरनंतरम् । यो नाना रसः । यद्वा मुखत इति सप्तम्यर्थे तसिः मुखे तालु निर्भिन्नमित्यर्थः ॥ १८ ॥ ❀ ❀ भूम्न इति । भगवदभेदापेक्षयोक्तम् । तस्य विराजः यदा जले विराजो निरोधोऽजायत तदा श्वासचलनं विना निर्वाह इति श्वासचलनमार्गभूते नासिके अभूतामिति भावः । तयोर्वह्निवाचोस्संबंधि तदधीनं व्याहृतमित्यर्थः । कर्मणो व्याहृतस्येति स्वामिपदविवृतिः । यद्वा । तस्य व्याहृतस्य ॥ १९ ॥ २० ॥

### श्रीमद्वीरराघवव्याख्या

तस्य महत्त्वमेवाह अनुप्राणंतीति । प्राणा इंद्रियाणि सर्वजंतुषु यं प्राणंतं चेष्टां कुर्वंतमनु पश्चात्प्राणन्ति चेष्टां कुर्वंति अपानंतं चेष्टां त्यजंतं प्राणमनु पश्चात्सर्वे प्राणाः अपानंति चेष्टां त्यजंति नरदेवं राजानमनुभृत्या इव सर्वाण्यपीन्द्रियाणि प्राणाधीनवृत्तीनीत्यर्थः । यद्वा व्यष्टिप्राणानां कारणस्वभावानुवर्तित्वमाह अन्विति । यं चतुर्मुखशरीरस्थं समष्टिप्राणमनु अनुसृत्य तत्स्वभावानुवर्तिनः ओजआदिसामर्थ्ययुक्ता एव व्यष्टिप्राणाः प्राणापानादिव्यापारं कुर्वन्तीत्यर्थः ॥ १६ ॥ ❀ ❀ अथ साधिष्ठानस्य सदेव तस्य सविषयस्य जिह्वेंद्रियस्योत्पत्तेर्मुखप्राणोत्पत्तिहेतुकत्वं सूचयन्नाह प्राणेनेति । क्षिपता व्याप्रियमाणेन प्राणेन विभोश्चतुर्मुखस्यान्तरा जाठराग्नौ दीपिते क्षुत्तृट् च जायेते इत्यर्थः । ततः पिपासतः पातुमिच्छतः जक्षतः अत्तुमिच्छतश्च नटस्य शृणोतीतिवत् पंचम्यर्थे षष्ठी बोध्या ।प्राक् प्रथमं मुखं निरभिद्यत विभक्तमभूत् चतुर्मुखमुखाद्व्यष्टिशरीरमुखान्युत्पन्नानीत्यर्थः ॥ १७ ॥ ❀ ❀ तात्वधिष्ठानं जिह्वेन्द्रियं नानारसो विषयः वरुणश्च देवता ज्ञातव्या एवं सर्वत्राधिष्ठानं इंद्रियं देवता विषय इत्येतच्चतुष्टयमनुक्तमप्युह्यंमुखाद्यङ्गैर्विना जिह्वाउत्पत्त्ययोगान्मुखोत्पत्तिरुक्ता नत्वधिष्ठानतया । अधिष्ठानं तु तात्वेव अनेन ज्ञातृसृष्टिरप्यर्थादुक्ता भवति वागादींद्रियाश्रयमुखाद्यवयवसंघातात्मकदेवादिदेहयोगकरणमेव हि ज्ञातसृष्टिः ॥ तालुजिह्वामूलं निर्भिन्नं व्यष्टिशरीरतालूत्पन्नमित्यर्थः ॥ तत्र तालुनि जिह्वा उपजायते उपाजायतेत्यर्थः । नानारसः कट्वम्लमधुरतिक्तादिरसः जज्ञे जिह्वया यः नानारसः, अधिगम्यते ज्ञायत इत्यर्थः ॥ १८ ॥ ❀ ❀ वाग्व्यष्ट्युत्पत्तिमाह विवक्षोरिति ॥ विवक्षोर्वक्तुमिच्छोर्भूम्नो भूमवतः मुखतः मुखाद्वह्निः वागभिमानिनी देवता वागिंद्रियं तयोरिंद्रियतदभिमानिदेवतयोर्व्यापाररूपं व्याहृतमुक्तिश्चाभूदित्यर्थः । एवं सर्वत्र ब्रह्मशरीरात्समष्टिभूताद्व्यवयवविशेष विभाग उच्यते ॥ मुखाद्यङ्गैरित्यस्य मुखमादिर्येषां कपोलादीनां तैरङ्गैर्विनेत्यर्थः मुखकपोलहन्वादिसमुच्चयं विना तदन्तर्वर्त्तिजिह्वाया उत्पत्त्ययोगादित्यभिप्रायः ॥ न चेयं चतुर्मुखस्यैवेंद्रियोत्पत्तिरिति वक्तुं युक्तं उपरिहस्तौ रुरुहतुरिति हस्तद्वयोत्पत्तिकथनेन चतुर्मुखस्य द्विबाहुत्वाभावात् देवादिशरीरस्य हस्तादिव्यष्टियुग्मविभागस्य सूचितत्वात् घ्राणेंद्रियव्यष्ट्युत्पत्तिमाह गले इति । एतस्य ब्रह्मणः गले कंठे सुचिरं कालमित्यर्थः । वायोरिति शेषः । वायोर्निरोधः समजायतेत्यर्थः । जले इति पाठे नभस्वतीत्यन्वयः ॥ १९ ॥ ❀ ❀ निरोधान्नभस्वति वायौ दोधूयति अत्यंतं प्रचलति सति नासिके नासापुटे निरभिद्येतां वायुव्यापारं कुर्वतो ब्रह्मणः शरीरे वायुपूरिते नासिके निरभिद्येतां ब्रह्मशरीरे वायोः स्तैमित्यान्नासाव्यष्टयोऽभवन्नित्यर्थः । जिघृक्षतो गन्धमाघ्रातुमिच्छतो ब्रह्मणः तत्र नसि नासायां गन्धवहः गन्धप्रापको वायुः घ्राणाधिष्ठाता घ्राण इन्द्रियं च निरभिद्यतेत्यन्वयः ॥ २० ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

प्राणस्य सर्वेन्द्रियप्रभुत्वं स्पष्टयति अनुप्राणंतीति पिंगलया नाड्या अपानंतमधश्चेष्टमानम् ॥ १६ ॥ ❀ ❀ इडापिंगलयोः प्राणापानचेष्टाफलमाह प्राणेनेति । प्राणेनापानेन च ॥ विभोर्विरिंचस्य ॥ चतुर्मुखावयवोत्पत्तिकथनपूर्वकं तेभ्योऽध्यात्मा-

दीनामुत्पत्तिप्रकारं प्रपंचयति पिपासत इति। प्रागादौ मुखं निरभिद्यत व्यक्तमभवत्॥ १७॥ ❀ ❀ मुखतो मुखे तत्र तालु निरभिनत् जिह्वया जिह्वेंद्रियेण॥ १८॥ ❀ ❀ वाक् वागिंद्रियं तयोर्वह्निवाचोरनंतरं व्याहृतमभिवादनं शरीरांतस्थे नभस्वति वायौ दोधूयति पुनः पुनर्धुन्वति कंपमाने सति जलेंऽडोदके वर्तमानस्य विरिंचस्य वायुनिर्गमद्वाराभावेन निरोधः क्लेशविशेषोऽभूत्॥ १९॥ ❀ ❀ तदनंतरं नासिके श्वासोच्छ्वासरूपवायुनिर्गमागमद्वारे व्यक्ते वायुरित्यनेनाद्यापि निरोधोऽनुभवसिद्ध इत्याह जिघृक्षतो घ्रातुमिच्छतो धातुस्तत्र नसि नासिकायां यो नासिक्यः प्राणः स गंधग्राही वायुर्घ्राणेंद्रियं तद्विषयो गंधश्च जात इति शेषः॥ २०॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

अन्विति। प्राणा व्यष्टिगता वायवः। मुख्यप्राणशक्त्यैव व्यष्टिप्राणशक्तिरित्येवात्र विवक्षितम्। अविवक्षितवाच्यार्थध्वनित्वात्॥ १६॥ ❀ ❀ पिपासतो यक्षतश्चेत्यनेन सुप्ततत्तद्वासनामात्रमुच्यते यदेव स्वभावरूपं सत् तत्तत् कार्यं सम्पादयतीति। एवमुत्तरत्रापि ज्ञेयम्। मुखमिति व्यष्टिमुखमेव तन्मुखत्वेनोपदिश्यते तत्समुदायकारणमात्ररूपत्वात् तन्मुखस्य। एव मुत्तरत्रापि। एकत्वमत्र समूहापेक्षया एकोपलक्षणत्वेन वा ज्ञेयम्॥ १७॥ ❀ ❀ त्रिधात्वं विवृण्वंस्तदुपलक्ष्य चतुर्द्धात्वमपि दर्शयति मुखत इति। ततो नानारसो जज्ञे इति तु समष्टेरेव धर्मः॥ १८॥ ❀ ❀ विवक्षोरित्यर्द्धकम्॥ १९॥ ❀ ❀ जले वा इति सार्द्धकम्॥ २०॥ २१॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

जीवनव्यञ्जकत्वेन महत्त्वं दर्शयति अन्विति। प्राणा इन्द्रियाणि। यं प्राणन्ते चेष्टां कुर्वंतं तमनु पश्चात् प्राणन्ति चेष्टां कुर्वन्ति अपानन्तं चेष्टां त्यजन्तम् अनु अपानन्ति राजानमनु भृत्या इव॥ १६॥ ❀ ❀ क्षिपता चालयता निमित्तेन क्षुत्तृडादिकं जायते स्म। प्रभोरित्युपासनार्थं तत्र समष्टौ परमेश्वरत्वारोपः। ततो जक्षतः भक्षयितुमिच्छत इत्यर्थः। प्राक् प्रथमं निरभिद्यत विभक्तमभूत्॥ १७॥ ❀ ❀ पूर्व्वमुपक्रान्तमधिदेवादित्रैविध्यं विवृणोति। मुखतः मुखोत्पत्त्यनन्तरमित्यर्थः। तालु अधिष्ठानं जिह्वा इन्द्रियं नानारसो विषयः वरुणश्च देवता ज्ञातव्या। तत्राधिष्ठानविषयावधिभूतम् इन्द्रियमध्यात्मं देवता अधिदैवमिति सर्वत्र चातुर्विध्येऽपि त्रैविध्यमेव द्रष्टव्यम्॥ १८॥ ❀ ❀ मुखतो मुखेऽधिष्ठाने वह्निर्देवता वाक् इन्द्रियं व्याहृतं भाषणं विषयः। तयोरिन्द्रियदेवतयोरधीनमित्यर्थः॥ १९॥ ❀ ❀ यदा जले विराजो निरोधोऽजायत तदा श्वासचलनं विना न निर्वाह इति श्वासमार्गभूते नासिके अधिष्ठानं तत्र नभस्वति प्राणवायौ दोधूयमाने अत्यन्तं चलति सति वायुर्देवता गन्धं वहतीति तथा अनेन गन्धो विषयो दर्शितः। घ्राण इन्द्रियं जिघृक्षतः गन्धं ग्रहीतुमिच्छतः॥ २०॥

### श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः

तस्य मुख्यतां दर्शयति नरदेवं राजानमनु अनुगा इव सर्वजंतुषु यं मुख्यं प्राणं प्राणंतं चेष्टां कुर्वंतम् अनु पश्चात्प्राणः इंद्रियाणि प्राणंति चेष्टां कुर्वंति अपानंतं चेष्टांत्यजन्तमन्वपानंति चेष्टां त्यजंति॥ १६॥ ❀ ❀ क्षिपता व्याप्रियमाणेन प्राणेन निमित्तेन विभोः अंतरा देहमध्ये क्षुत् तृट् जायतेस्म ततः पिपासतः पातुमिच्छतः जक्षतः भक्षयितुमिच्छतः प्राक् प्रथमं मुखं निरभिद्यत विभक्तमभूत् पुरुषस्योत्पन्नैर्मुखादिभिरवयवैर्जनादिकान् जनादिभ्यश्च पुरुषस्य मुखाद्यवयवान् विजानीहीति अष्टमे पृष्टोऽविरोधप्रकारोऽपि सूचितः॥ १७॥ ❀ ❀ मुखतः मुखे तालु अधिष्ठानं निर्भिन्नं विभक्तं तत्र तालुनि जिह्वा इंद्रियमुपजायते स्म। ततः नानाकट्वम्लमधुरादिभेदवान् रसो विषयः वरुणश्च देवता ज्ञेया। एवं सर्वत्राधिष्ठानमिंद्रियं देवता विषयः॥ इत्येतच्चतुष्टयमनुक्तमप्यूह्यम्॥ १८॥ ❀ ❀ भूम्नो विवक्षोर्वक्तुमिच्छोर्मुखतो मुखादेव वह्निः वागभिमानिनी देवता वागिन्द्रियं तयोर्वाग्वह्न्योर्व्यापाररूपं व्याहृतं भाषणं चाभूदित्यर्थः। तस्य व्याहृतस्य जले निरोधः समजायत॥ १९॥ ❀ ❀ नभस्वति प्राणे दोधूयति अत्यंतं स्वव्यापारं कुर्वति सति नासिके नासापुटे निरभिद्येताम् तत्र नसि नासिकायां वायुर्देवतां गंधं वहतीति गंधवहः, अनेन गंधो विषयो दर्शितः जिघृक्षतः गंधं ग्रहीतुमिच्छतः घ्राण इंद्रियमभूत्॥ २०॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

भगवच्चेष्टामात्रेणैवेन्द्रियादिशक्तयः प्राणाश्च जाताः। तस्य प्राणस्य माहात्म्यमाह—**अनु प्राणन्तीति**। पूर्वं राजसाहङ्कारात्प्राणादीनामुत्पत्तिरुक्ता। ते आधिदैविक[1]रूपाः। एते त्वाध्यात्मिकरूपाः। यं प्राणन्तमनु[2] प्राणन्ति कार्यं कुर्वन्ति। प्राणाः इन्द्रियाणि। तत्रापि न स्वरूपस्थमनु किन्तु प्राणन्तमनु। क्रियाया अपि क्रियापेक्षा सूचिता। तदा तस्य सर्वत्रैव तथात्वं जातमित्याह—**सर्वजन्तुष्विति**। आब्रह्मतृणस्तम्बेषु। अपानन्तमपगच्छन्तमनु इन्द्रियाण्यप्यपगच्छन्ति। तस्योपलक्षकत्वं वारयति दृष्टान्तेन—**नरदेवमिवाऽनुगा इति**। राजानमनु सेवका इव॥ १६॥ ❀ ❀ एवं तस्य माहात्म्यमुक्त्वा ततोऽग्रे सृष्टिमाह—**प्राणेन क्षिपता क्षुत्तृडिति**। प्राणः करणम्[3]। क्षिपता क्षेपयुक्तेन। अन्तःस्थितानि वस्तूनि मलादीनि क्षिपता इतस्ततो विक्षिपता। क्षुत्तृट्

---

१. दैविकभूताः घ.। २. प्राणमनु इति ख.। ३. कारणमिति ख.।

अग्निविशेषावित्येके । मृत्युरित्यपरे । ऊष्मविशेष इत्येके । भगवानेव वैश्वानररूपः क्षुत्तृड्वृत्तिद्वयात्मकः । अन्तरा उदरमध्ये । ततस्तद्वशात् पिपासा जिघृक्षा च जाता । ततो बहिःस्थितपदार्थान् जलान्नरूपान् । पिपासतो जक्षतश्च पातुमिच्छोर्भोक्तुमिच्छोश्च । प्राक् पूर्वभागे । पुरुषेणैव हि विभज्यन्ते दिशः । मुखं विवरात्मकम् । निरभिद्यत भिन्नं जातम् । तथापि न स्फुटितमिव किन्तु द्वारमिव । तत्रैव मुखे विवरात्मके । तस्मादेव मुखाद्धेतुभूतात् । तालु लोके जिह्वेति प्रसिद्धं तन्मध्ये निर्गतम् । उपर्यधो देवा अंशत एकीभूताः [1]पदार्था दानार्थे तालुरूपेण निर्गता इत्यर्थः । तत्र जिह्वेन्द्रियं उपजायत आविर्भूतमित्यर्थः । तत इन्द्रियान्निमित्तभूतात्तदनन्तरं वा । नानारसो जज्ञे मधुरादिः । सर्वोऽपि विषयस्तत्र जायते कारणत्वतः । बहिःस्थितो वा तस्येच्छावशतो जायते रसः । अनेनाऽन्नादीनामप्येषैव व्यवस्था ज्ञापिता । अन्तःस्थितिपक्षेऽपि तालुव्यापारेणैव तालुद्वारा क्षुत्तृट्शाम[2]कं भवतीति मुखादिनिर्माणम् । उपदीका (?) गजादिवत् । बहिर्विषयपक्षे तु न सन्देहः । रसाः श्रृङ्गारादयोऽपि भवन्तीति तद्व्यावृत्त्यर्थमाह—जिह्वया योऽधिगम्यत इति । अधिगम्यते ज्ञायते, विषयतया स्वीक्रियत इति वा ॥ १७ ॥ १८ ॥ ❀ ❀ ततस्तस्मिन्नेव स्थान इन्द्रियान्तरं जातमित्याह—विवक्षोरिति । वेदरूपां वाणीं वक्तुमिच्छोः । मुखतः विवरात्मकाद्धेतुभूतात् । भूम्नो व्यापकस्य आकाशरूपस्य । मुखत इत्येतस्य विशेषणम् । आकाश एव यतः शब्दो भवति । यथा तालुरूपे जिह्वा तिष्ठति तथा मुखमध्ये य आकाशस्तस्मिन्वागिन्द्रियं तिष्ठतीत्यर्थः । तत्र प्रथमं वह्निर्देवता वाक् स्त्रीरूपा न भर्तारं विना निर्गच्छतीति ततोऽत्र[3] देवता प्रथमं निरूपिता । ततो वाक् इन्द्रियम् । ततोऽन्यत्राऽपि प्रथमं देवता पश्चादिन्द्रियमिति ज्ञापितम् । व्याहृतं तयोरिति । तयोः सम्बन्धि व्याहृतं वाग्व्यापारो देवताधिष्ठितेन्द्रियसाध्यो न केवलसाध्यः । एवमन्यत्राऽपि । ततश्चालनेनाऽन्तर्वायु [illegible] क्षोभं जनयतीति तन्निवृत्त्यर्थं नासिके नासापुटे निरभिद्येताम् । तस्य बहिःपदार्थग्रहणावश्यकत्वाभावेऽप्यन्तःस्थितवायोरेव निमित्तत्वमाह—दोधूयति नभस्वतीति । नभस्वान्वायुस्तस्मिन्नत्यन्तं कम्पमाने सति । अथवा नासिकायां चलनात्मको वायुरेव गोलकरूपः । तत्र वायुर्देवता । गन्धं वहतीति गन्धवहो वायुर्घ्राणो वा । उभयोर्मध्ये विशेषणं गन्धस्य विषयत्वबोधकम् । घ्राण इन्द्रियम् । नसि जिघृक्षत इति । नासिका गोलकस्थानीया । गोलकाधाररूपा वा । गन्धं जिघृक्षतः आघ्रातुमिच्छतो भगवतः । निरभिद्यत उद्गतं जातं ग्रहीतुमिति यथायोग्यं क्रिया [4]अनुसन्धेयाः ॥ १९ ॥ २० ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अनुप्राणन्तीत्यत्र एते त्वाध्यात्मिकरूपा इति । एतेन "प्राण ओजः सहो बलम्" इति पद्योक्तानां भौतिकत्वं बोधितम् । सर्वत्रेति व्यष्टौ ॥ १६ ॥ ❀ ❀ प्राणेनेत्यत्र प्राक् पूर्वभाग इत्यादि । एतेन 'यथा कालोनुमीयत' इति प्रश्ने 'सूर्येण हि विभज्यन्ते दिशः' 'यत्रोदेति सा प्राची' 'सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित' इत्यादिवाक्येभ्यो दिग्बहुत्व( त्वा )व्यवस्थितत्वाभ्यां कर्णदिशोः संख्याव्यवस्थाविरोधो य आक्षिप्तः स्थितः स समाहित इत्यादि ज्ञापितम् । एवं सति सूर्यकृतदिक्सङ्ख्याव्यवस्थयोः पूज्यपूजकमध्यप्राचीवद्व्यवहारार्थत्वान्न कश्चिद्दोष इति सिद्ध्यति । ❀ ❀ मुखत इत्यत्र उपर्यधो देवा इति, वरुण उदानादिवायुदेवताश्च । तत्रेति विराट्शरीरे । अन्नादीनामिति षष्ठाध्यायोक्तानां तेषाम् । नन्वन्तरेवं नानारसोत्पत्तिपक्षे मुखनिर्माणवैयर्थ्यमायातीति स पक्षो न सङ्गत इत्याकाङ्क्षायां तत्पक्षेपि तत्सङ्गतिं व्युत्पादयन्ति अन्तरित्यादि । षष्ठाध्याये क्षेत्रमित्यधिकृत्य 'हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य चे'ति कथनाज्जिह्वायामेव रसादिस्थितिरिति तत्पक्षेपि क्षुत्पिपासाकारणस्योदरेऽन्नादिप्रवेशे सति भवनात्तस्य च तालुव्यापाराधीनत्वाद्व्यापारस्य च विवराधीनत्वाद्विवरात्मकं मुखं तालुव्यापारेणैव तालुद्वारा क्षुदादिशामकं भवतीति मुखनिर्माणं युक्तमित्यर्थः । अन्तर्निर्माणे दृष्टान्तमाहुः उपदीकेत्यादि, उपदीका कीटविशेषः उदेहीति प्रसिद्धः ॥ १८ ॥ ❀ ❀ विवक्षोरित्यत्र आकाशरूपस्येति सद्रूपस्य व्यापकत्वेपि साधारणत्वेन शब्दोत्पत्तिजनकत्वाभावादेवं व्याख्यातं ज्ञेयम् ॥ १९ ॥ ❀ ❀ नासिके निरभिद्येतामित्यत्र निमित्तत्वमिति नासानिर्भेदनिमित्तत्वम् । दोधूयति नभस्वतीत्युक्त्वा पुनर्वायुकथनात्पक्षान्तरं सम्भवतीत्यतस्तमाहुः अथवेत्यादि । चलनात्मक इति दोधूयतीत्यनेन सूचितः । अत्राश्विनोर्न देवत्वमिति ज्ञापनायाहुः वायुर्देवतेति । पक्षद्वयमुपष्टम्भन्ति नसीत्यादिना । तथा च, नभस्वतो गोलकत्वानङ्गीकारे नस्पदमनतिप्रयोजनं स्यादतः स वायुर्गोलकस्तद्गोलकं नासेत्यवगन्तव्यमित्यर्थः ॥ २० ॥

## श्रीगिरिधरकृता बालप्रबोधिनी

तस्य महत्त्वमेव स्पष्टयति—अनुप्राणन्तीति । सर्वजन्तुषु सर्वप्राणिषु प्राणा इन्द्रियाणि यं प्राणन्तं चेष्टां कुर्वन्तं अनु पश्चात् प्राणन्ति चेष्टां कुर्वन्ति । अपानन्तं चेष्टां त्यजन्तं अन्वपानन्ति चेष्टां त्यजन्ति । तत्र दृष्टान्तमाह—नरदेवमिवानुगा इति । यथा राजानं गच्छन्तं तद्भृत्या अनुगच्छन्ति तं तिष्ठन्तमनुतिष्ठन्ति च तथेत्यर्थः ॥ १६ ॥ ❀ ❀ प्रभोर्वैराजस्य अन्तरा उदर-

१. पदार्थास्तात्विति घ. । २. क्षामकमिति ख. । ३. तत्रातो देवतेति ख. । ४. क्रियानुसन्धेयेति ख. ।

मध्ये क्षिपता व्याप्रियमाणेन प्राणेन निमित्तेन क्षुत् तृट् च जायते स्म । ततः पिपासतः पातुमिच्छतः जक्षतः भक्षयितुमिच्छतश्च प्राक् प्रथमं मुखं निरभिद्यत विभक्तमभूत् ॥ १७ ॥ ❀ ❀ मुखतो मुखे विवरात्मके तालु इन्द्रियाधिष्ठानं निर्भिन्नमुत्पन्नम् । तत्र तालुनि जिह्वेन्द्रियमध्यात्ममुपजायते स्म । ततस्तदनन्तरं नाना कट्वम्लमधुरतिक्तकषायक्षारभेदेन षड्विधो रसो विषयः अधिभूतं जज्ञे जातः । वरुणश्च देवतारूपमधिदैवमनुक्तमपि ज्ञेयम् । एवं सर्वत्राधिष्ठानमिन्द्रियं देवता विषयश्चेत्येतच्चतुष्टयमनुक्तमप्यूह्यम् । नानाविधा रसाः शृङ्गारादयोऽपि भवन्तीति तद्व्यावृत्त्यर्थं विशिनष्टि—जिह्वया इन्द्रियेण यो रसोऽधिगम्यते ज्ञायते । विषयतया स्वीक्रियते इति वाऽर्थः ॥ १८ ॥ ❀ ❀ भूम्नो व्यापकस्येति विराड्जीवाभेदेनोपासनार्थमुक्तं ज्ञेयम् । विवक्षोर्वक्तुमिच्छोर्मुखतो मुख एवाधिष्ठाने वह्निर्देवता वागिन्द्रियं तयोरिन्द्रियतदभिमानिदेवतयोः कर्मरूपं व्याहृतं भाषणं चाभूत् । किञ्च जले इति । गले इति पाठान्तरे तस्य गले कण्ठे सुचिरं वायोर्निरोधः समजायतेत्यर्थः ॥ १९ ॥ ❀ ❀ तस्य जिघृक्षतः गन्धं ग्रहीतुमिच्छतः नभस्वति प्राणवायौ दोधूयति अत्यन्तं प्रचलति सति नासिके अधिष्ठानभूते निरभिद्येताम् । तत्र च नसि नासिकायां गन्धं वहतीति तथाभूतो वायुर्देवता अभूत् । अनेनैव गन्धो विषय इति सूचितम् । घ्राण इन्द्रियमभूत् ॥ २० ॥

### हिन्दी अनुवाद

जैसे सेवक अपने स्वामी राजाके पीछे-पीछे चलते हैं, वैसे ही सबके शरीरोंमें प्राणके प्रबल रहनेपरही सारी इन्द्रियाँ प्रबल रहती हैं और जब वह सुस्त पड़ जाता है, तब सारी इन्द्रियाँ भी सुस्त हो जाती हैं ॥ १६ ॥ ❀ ❀ जब प्राण जोरसे आने-जाने लगा, तब विराट् पुरुषको भूख-प्यासका अनुभव हुआ । खाने-पीनेकी इच्छा करते ही सबसे पहले उनके शरीरमें मुख प्रकट हुआ ॥ १७ ॥ ❀ ❀ मुखसे तालु और तालुसे रसनेन्द्रिय प्रकट हुई । इसके बाद अनेकों प्रकारके रस उत्पन्न हुए, जिन्हें रसना ग्रहण करती है ॥ १८ ॥ ❀ ❀ जब उनकी इच्छा बोलनेकी हुई, तब वाक् इन्द्रिय, उसके अधिष्ठातृ-देवता अग्नि और उनका विषय बोलना—ये तीनों प्रकट हुए । इसके बाद बहुत दिनोंतक उस जलमें ही वे रुके रहे ॥ १९ ॥ ❀ ❀ श्वासके वेगसे नासिका-छिद्र प्रकट हो गये । जब उन्हें सूँघनेकी इच्छा हुई, तब उनकी नाक घ्राणेन्द्रिय आकर बैठ गयी और उसके देवता गन्धको फैलानेवाले वायुदेव प्रकट हुए ॥ २० ॥

**तदाऽऽत्मनि निरालोकमात्मानं च दिदृक्षतः । निर्भिन्ने ह्यक्षिणी[1] तस्य ज्योतिश्चक्षुर्गुणग्रहः ॥२१॥**
**बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः । कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः ॥२२॥**
**वस्तुनो मृदुकाठिन्यलघुगुर्वोष्णशीतताम् ।**
**जिघृक्षतस्त्वङ् निर्भिन्ना तस्यां रोममहीरुहाः । तत्र चान्तर्बहिर्वातस्त्वचा लब्धगुणो वृतः ॥२३॥**
**हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया । तयोस्तु बलमिन्द्रश्च[2] आदानमुभयाश्रयम् ॥२४॥**
**गतिं जिगीषतः पादौ रुरुहातेऽभिकामिकाम् । पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः[3] ॥२५॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

निरालोकं प्रकाशशून्यमासीदिति शेषः । निर्मक्षिकमितिवदव्ययीभावः । तदा आत्मानं देहं चकारादन्यच्च वस्तु दिदृक्षतः अक्षिणी स्थानम् । ज्योतिरादित्यो देवता चक्षुरिंद्रियम् । ततो गुणस्य रूपस्य ग्रहो ग्रहणम् । अनेन रूपं विषयो दर्शितः ॥ २१ ॥ ❀ ❀ ऋषिभिर्वेदैर्बोध्यमानस्य तदात्मनः प्रबोधनं ग्रहीतुमिच्छतः ततो गुणग्रहः शब्दस्य ग्रहणम् ॥ २२ ॥ ❀ ❀ मृदुत्वं च काठिन्यं च लघुत्वं च गुरुत्वं च आ उष्णत्वमीषदुष्णत्वं च शीततां चेत्यर्थः । यद्यप्यत्युष्णत्वमपींद्रियविषय एव तथापि तस्य जिघृक्षाभावादुष्णत्वमित्युक्तम् । गुर्वुष्णेति पाठे यणादेशश्छांदसः । वस्तुन एतान् धर्मान् जिघृक्षतस्त्वङ् निर्भिन्ना । त्वगिंद्रियाधिष्ठानं चर्म जातमित्यर्थः । तस्यां रोमाणींद्रियं महीरुहाश्च देवताः जाताः । वस्तुनि हस्तेनातोलिते लघुत्वगुरुत्वयोर्ज्ञानात्तयोरपि त्वगिंद्रियविषयत्वमिति पौराणिकाः । तत्र त्वच्यंतर्बहिश्च वातो वृत आवृत्य स्थितः कर्तरि निष्ठा । कथंभूतः । त्वचा लब्धो गुणः स्पर्शो येन । अयमर्थः त्वगिंद्रियमेव बहिः कंडूतिसहितं स्पर्शं गृह्णल्लोमशब्देनोच्यते । तत्र महीरुहाणां देवत्वम् । अंतर्बहिश्च स्पर्शं गृह्णत्तदेव त्वक्शब्देनोच्यते । तत्र वातो देवता । तथा च तृतीये वक्ष्यति । "त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः । अंशेन लोमभिः कंडूं यैरसौ प्रतिपद्यते । निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् ॥ प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते ॥" इति । तत्र चर्माणीति चर्मोपलक्षिता त्वगित्यर्थः । प्राणेनांशेनेति प्राणवायुव्याप्तेन त्वगिंद्रियेणेत्यर्थः । बह्वृचश्रुतौ त्वेक एवांशो निर्दिष्टः । "त्वङ् निरभिद्यत त्वचो लोमानि लोमभ्य औषधिवनस्पतयः" इति ॥ २३ ॥ ❀ ❀ रुरुहतुर्निर्भिन्नौ बलमिंद्रियं इंद्रो देवता तदुभयाश्रयमादानं कर्म ॥ २४ ॥ ❀ ❀ अभिकामिकामभीष्टां विहितामित्यर्थः । पद्भ्यां सह यज्ञो

---

1. प्रा० पा० अक्षिणी । 2. प्रा० पा० बलवानिन्द्र आदा० । 3. प्रा पा० त्रिभिः ।

विष्णुरेव स्वयं तदधिष्ठातृरूपेण स्थितः । कर्मभिरिति गत्याख्या कर्मशक्तिरिंद्रियमुक्तम् । हव्यं क्रियत इति गतिप्राप्यं यज्ञार्थं द्रव्यं विषय इत्युक्तम् । नृभिरिति व्यष्टिजीवेष्वपीयमेव रीतिरिति दर्शयन्नराधिकारित्वं यज्ञादीनां दर्शयति ॥ २५ ॥

### श्रीवंशीधरकृतभावार्थदीपिकाप्रकाशव्याख्या

ततस्तेन चक्षुषा अनेन गुणग्रह इति वचनेन ॥ २१ ॥ २२ ॥ ❁ ❁ इत्यर्थ इति । "ईषदर्थे क्रियायोगे मर्यादाभिविधौ तथा । एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥ आकारस्तु निपातोयं ङिदङिद्भेदतो द्विधा । तत्रापि च ङिदाकारः संधि प्राप्नोति न त्वङित्" इत्युक्तेरत्राकारस्य ङित्त्वात्संधिर्जात इति भावः । यणादेश इति । "अकः सवर्णे दीर्घः" इति दीर्घे प्राप्ते यणादेशोऽत्रार्षः । इत्यर्थ इति अत्राधिष्ठेयेनाधिष्ठानग्रहणमुपचारादिति भावः । निष्ठाक्तप्रत्ययः । अत्राशयं स्फोटयति । अयमर्थ इति । तत्र तृतीयस्कंधश्लोके इत्यर्थ इत्युभयत्रेयं व्याख्येति एक एव त्वद्रूप एवेत्यर्थः ॥ २३ ॥ ❁ ❁ उभयाश्रयमिन्द्रियदेवताधीनमित्यर्थः ॥ २४ ॥ ❁ ❁ यज्ञो विष्णुशक्त्याविष्टो देवताविशेषः । स्वयमिति तस्याप्यन्यदेवापेक्षया प्राधान्यमाह—गतिं गमनं जिगीषत इति धात्वर्थस्याविवक्षितत्वादिच्छत इत्यर्थः । यद्यपि गुणः प्रकृत्यर्थोऽन्यत्र सात् इत्यनुभूतिना सन्नन्ते प्रकृत्यर्थस्यैव प्राधान्यमुक्तं तथाप्यस्य शास्त्रस्य छंदोरूपत्वात्प्रत्ययार्थस्यापि प्राधान्यमत्र न दोषायेति ॥ २५ ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

त्वचमस्येति तृतीयस्कन्धीयषष्ठाध्यायस्याष्टादशश्लोकः निर्भिन्नान्यस्येति तृतीयस्कन्धीयषष्ठाध्यायस्य षोडशश्लोकः बह्वृचश्रुतौ ऋग्वेदीयैतरेयोपनिषदीत्यर्थः ॥ २३ ॥ २५ ॥

### श्रीमद्वीरराघवव्याख्या

चक्षुर्व्यष्टिसृष्टिमाह यदेति । यदा आत्मनि देहे निरालोके अर्थाभावेऽव्ययीभावः आसीदिति शेषः, तदा आत्मानं देहं चकारादन्यच्च वस्तु दिदृक्षतस्तस्य ब्रह्मणोऽक्षिणी अधिष्ठाने निर्भिन्नौ चक्षुरिंद्रियस्य व्यष्टियुग्मान्युत्पन्नानीत्यर्थः, चक्षुश्चक्षुरिंद्रियगुणग्रहो रूपगुणग्राहकं ज्योतिरादित्यश्चेत्यर्थः, स हि चक्षुरभिमानी आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशदिति श्रुतेः ॥ २१ ॥ ❁ ❁ प्रोक्तव्यष्टिसृष्टिमाह बोध्यमानस्येति । ऋषिभिर्वेदैः बोध्यमानस्य प्रबोध्यमानस्य तत्प्रबोधं ग्रहीतुमिच्छतः आत्मनो ब्रह्मणः कर्णावधिष्ठानं दिशः श्रोत्राभिमानिदेवतागुणग्रहः शब्दग्रहणहेतुः श्रोत्रमिंद्रियं निरभिद्यत इत्यर्थः । श्रोत्रेन्द्रियव्यष्टियुग्मान्यभवन्निति भावः ॥ २२ ॥ ❁ ❁ त्वगिन्द्रियव्यष्ट्युत्पत्तिमाह वस्तुन इति । वस्तुनः द्रव्यस्य मृदुत्वं काठिन्यं च लघुत्वं च गुरुत्वं च आउष्णं ईषदुष्णत्वं चानुष्णत्वस्य ग्रहणायोग्यत्वादोष्णं इत्युक्तं गुर्वुष्णेति पाठे यणादेशश्छांदसः, शीततां च एतान् गुणान् जिघृक्षतः ग्रहीतुमिच्छतः त्वगिन्द्रियव्यष्टिरुत्पन्ना इत्यर्थः । वस्तुनि हस्तेनातोलिते लघुत्वगुरुत्वयोर्ज्ञानयोरपि त्वगिंद्रियविषयत्वमिति ज्ञेयम् । अत्रेदं बोद्धव्यं त्वगिंद्रियस्य सूक्ष्मस्थूलरूपबाह्याभ्यन्तरचर्मणी द्वे स्थाने स्थानभेदाच्च कंडूः स्पर्शश्चेति विषयभेदः, विषयभेदाच्च महीरुहाः वायुश्चेति देवताद्वयं त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः । अंशेन लोमभिः कंडूयैरसौ प्रतिपद्यते ॥ निर्भिन्नान्यस्य चर्माणि लोकपालोनिलोऽविशत् । प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते ॥ इति तृतीये स्पष्टमभिधास्यमानत्वात् एवं चैकमेव त्वगिंद्रियं बाह्यचर्मगतं लोम सुव्याप्तमोषधिदेवताकं कंडूग्राहकं एतदेवांतर्बहिश्च स्पर्शग्रहणाद्वायुदैवतमिति । एतदेव संग्रहेणाह तस्यामिति । तस्यां त्वचि त्वगिन्द्रिये निर्भिन्ने तदधिष्ठानं रोमाणि अधिष्ठातृदेवता महीरुहाश्चोत्पन्ना इत्यर्थः । अथ स्पर्शं गृह्णतस्तस्यैव त्वगिन्द्रियस्य वाय्वधिष्ठितत्वमाह तत्र चेति । तत्र च तत्रैव त्वगिंद्रिये वातो वायुर्वृतः अधिष्ठितवान्, कथंभूतः त्वचा स्वाधिष्ठेयत्वगिंद्रियेण साधनेनांतर्बहिश्च लब्धगुणः लब्धः स्पर्शः गुणो येन सः अंतर्बहिश्च स्पर्शसंपादक इत्यर्थः ॥ २३ ॥ ❁ ❁ पाणिव्यष्टिसृष्टिमाह हस्ताविति । नानाकर्म आदानादिकर्म चिकीर्षतः लब्धस्पर्शं कर्तुमिच्छतः तस्य ब्रह्मणः हस्तौ रुरुहतुः ब्रह्मगतहस्तसमष्टितः हस्तयुग्मव्यष्टयोऽभूवन्नित्यर्थः । अत्र स्थाने इन्द्रियाधिष्ठातृकर्माण्याह वृत्तिस्तृतीये स्पष्टा तयोरिति । तयोर्हस्तयोः स्थानभूतयोः बलवान्पाणीन्द्रियापरपर्यायबलसहितः इंद्रः अधिष्ठातेत्यर्थः, उभयाश्रयं हस्तद्वयाश्रयमादानं कर्म विषयस्तु इन्द्रियस्य हस्तद्वयगतत्वादादानमपि हस्तद्वयाश्रयमित्यर्थः ॥ २४ ॥ ❁ ❁ पादेन्द्रियव्यष्टिसृष्टिमाह गतिमिति । अभिकामिकामिच्छानुसारां गतिं जिघृक्षतः ब्रह्मणः पादौ रुरुहाते निर्भिन्नावित्यर्थः । अत्र स्थाने इंद्रियादीन्याह पद्भ्यामिति । यज्ञो विष्णुः । यज्ञो वै विष्णुरिति श्रुतेः, यज्ञः स्वयमेव पद्भ्यां इंद्रियेण इंद्रियस्य पादद्वयस्थत्वात्पद्भ्यामिति द्विवचननिर्देशः पद्भ्यां गतिसामर्थ्यापादकपादेन्द्रियेण सह पादयोरधिष्ठितवानित्यर्थः । नृभिः कर्मभिः गमनागमनादिभिः कर्मभिः हव्यं हविरर्थं द्रव्यं क्रियते संपाद्यत इत्यर्थः । गमनादिकं कर्म हव्यं विषय इत्युक्तम् ॥ २५ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

यदा स विरिंच आत्मनि निरालोको निष्प्रकाशस्तदात्मानं स्वशरीरमन्यच्च दिदृक्षतस्तस्याऽक्षिणी गोलके व्यक्ते ततो ज्योतिः सूर्यो रूपगुणग्रहश्चक्षुरिन्द्रियं तद्ग्राह्यं रूपं चोत्पन्नमिति शेषः ॥ २१ ॥ ❁ ❁ ऋषिभिर्ज्ञानसाधनैर्वेदादिभिरग्न्यादिभिर्वा

बोध्यमानस्य वेदाग्निबोधेति विज्ञाप्यमानस्य तस्य विरिञ्चस्यात्मनस्तद्विज्ञापनं जिघृक्षतो ग्रहीतुकामस्य कर्णौ जातौ तयोर्दिशो दिग्देवता गुणग्रहः श्रोत्रेंद्रियं च तद्विषयश्च शब्दः ॥ २२ ॥ ❀ ❀ वस्तुनो घटादिपदार्थस्य मृदुत्वादिगुणान् जिघृक्षतो ज्ञातुमिच्छतस्तस्य विधेस्त्वगिंद्रियं तस्यां त्वचि रोममहीरुहास्तत्र त्वचि चांतर्बहिर्व्याप्तोऽपि त्वचा त्वगिन्द्रियेण स्पर्शलब्धेन ज्ञानेन स्पर्शगुणेनावृतो वातः स्पर्शवायुः स्पर्शश्चाभवदित्यन्वयः। गुर्वुष्णेति छांदसः ॥ २३ ॥ ❀ ❀ उभौ इन्द्रेन्द्रिया-भिमानावाश्रयौ यस्य तत्तथोक्तं आदानमुपादानहानादि कर्म च ॥ २४ ॥ ❀ ❀ गतिं गमनलक्षणं कर्म। यज्ञ इन्द्रपुत्रः स्वयं तदभिमानी गतिश्च पद्भ्यामभूतां तथा नृभिर्यद्धव्यं हविःसंबंधि हवनादिकर्म क्रियते यमुद्दिश्य स उपेन्द्रो भगवान् यज्ञांतर्यामितयाऽभिव्यक्त इति शेषः ॥ २५ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

बोध्येति स्वस्य बोध्यमानताज्ञानमन्तः समान्वयाकारेण स्फुरणञ्च परापश्यन्तीमध्यमाख्यवेदद्वारा परमात्मनैवेति ज्ञेयम् ॥ २२ ॥ २३ ॥ ❀ ❀ आदानमादीयमानं वस्तु विषय इत्यर्थः ॥ २४ ॥ ❀ ❀ गतिमिति। जिगीषतो वशीकर्त्तु-मिच्छतः अतः पद्भ्यामिति पूर्ववत् पञ्चम्येव। यज्ञो विष्णुशक्त्याविष्टरूपा काचिद्देवता स्वयमिति तथापि सर्व्वतः प्राधान्यविवक्षया यत्र च सति नृभिः कर्त्तृभिः कर्मभिः कृत्वा हव्यं क्रियते कर्मभिरिति बहुत्वं तद्वृत्तिभेदापेक्षया हव्यमिति मुख्यत्वेनोक्तं सर्व्वमप्याहरणीयम् ( आहवनीयं ) तु ज्ञेयम्, तदर्थ मेव तत्र तत्र गमनात् ॥ २५ ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

यदा आत्मनि स्वस्मिन् निरालोकं निर्मक्षिकमितिवदव्ययीभावः, आलोकाभाव आसीदित्यर्थः। आत्मानं स्वमन्यच्च वस्तु दिदृक्षतः अक्षिणी अधिष्ठानं, ज्योतिरादित्यो देवता, चक्षुरिन्द्रियं ततो गुणस्य रूपस्य ग्रहणम्। अनेन रूपं विषयो दर्शितः ॥ २१ ॥ ❀ ❀ ऋषिभिर्वैदैर्बोध्यमानस्य आत्मनः तत् प्रबोधनं ग्रहीतुमिच्छतः। ततो गुणग्रहः शब्दग्रहणम् ॥ २२ ॥ ❀ ❀ मृदुत्वं काठिन्यं लघुत्वं गुरुत्वम् आ उष्णत्वम् ईषदुष्णत्वं शीततां ग्रहीतुमिच्छतः। यद्यप्युष्णत्वमपीन्द्रियविषय एव तथापि तस्य जिघृक्षाभावादो-ष्णमित्युक्तम्। गुर्वुष्णेति पाठे यणादेश आर्षः। वस्तुन एतान् धर्मान् जिघृक्षतस्त्वचो निर्भिन्नाः त्वगिन्द्रियाधिष्ठानं चर्म ज्ञातम्। वस्तुनि हस्तेनातोलिते लघुत्वगुरुत्वयोर्ज्ञानात् तयोरपि त्वगिन्द्रियविषयत्वमिति पौराणिकाः, त्वगधिष्ठानं तत्र त्वचि अन्तर्बहिर्वृत आवृत्य स्थितो वातो देवता। कीदृशः त्वचा त्वगिन्द्रियेण लब्धो गुणः स्पर्शो येन सः। तथा तस्यां त्वचि अधिष्ठाने रोम इन्द्रियं महीरुहा देवताः कण्डूस्तयोविषयाश्च ज्ञेयाः इति त्वचि इन्द्रियद्वयं तिष्ठति। अयमर्थः त्वगिन्द्रियमेव बहिः कण्डूतिसहितसंस्पर्शं गृह्णत् रोमशब्देनोच्यते तत्र महीरुहाणां देवतात्वं अन्तर्बहिश्च स्पर्शं गृह्णत् तदेव त्वक्शब्देनोच्यते। तत्र वातो देवता, तथा च वक्ष्यति तृतीये त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः। अंशेन रोमभिः कण्डूं यैरसौ प्रतिपद्यते॥ निर्भिन्नान्यस्य चर्माणि लोकपालो-ऽनिलोऽविशत्, प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते॥ इति। तत्र चर्माणीति चर्मोपलक्षिता त्वगित्यर्थः। प्राणेनांशेन प्राणवायु-व्याप्तेन त्वगिन्द्रियेणेत्यर्थः। वह्वृचश्रुतौ त्वेक एवांशो निर्दिष्टः, त्वङ् निरभिद्यत त्वचो लोमानि लोमभ्य ओषधयो वनस्पतय इति ॥ २३ ॥ ❀ ❀ तयोर्हस्तयोर्बलमिन्द्रियं तद्युक्त देवता उभयाश्रयम् इन्द्रियदेवताधीनम् आदानं विषयः॥ २४ ॥ ❀ ❀ गतिं गमनं जिगीषत इति धात्वर्थस्याविवक्षितत्वादिच्छत इत्यर्थः। अभिकामिकाम् अभीष्टाम्। यज्ञो विष्णुशक्त्याविष्टो देवता। पद्भ्यां पदोः तदधिष्ठातृरूपेण स्थित इत्यर्थः। कर्मभिरिति गत्याख्या कर्मशक्तिरिन्द्रियमुक्तम्। कर्मभिरिन्द्रियेण हव्यं क्रियते हवनीयं द्रव्यं देशान्तरस्थं गतिप्राप्यं क्रियते इति विषय उक्तः। नृभिरिति व्यष्टिजीवेषु इयमेव रीतिः। सर्वत्र तथा सर्व एव विषयाः शास्त्र-विहिता एव ग्राह्या इति बोधितम् ॥ २५ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यदा आत्मनि देहे निरालोकमालोकाभाव आसीत् अर्थाभावेऽव्ययीभावः तदात्मानं देहं दिदृक्षतः पुरुषस्य अक्षिणी अधिष्ठानभूते निर्भिन्ने तत्र ज्योतिरादित्यो देवता च चक्षुरिन्द्रियमभूद् गुणग्रहः रूपग्रहणहेतुः अनेन रूपं विषयो दर्शितः ॥ २१ ॥ ❀ ❀ ऋषिभिर्वैदैर्बोध्यमानस्य तदात्मनः प्रबोधनं ग्रहीतुमिच्छतः कर्णौ अधिष्ठानभूते निरभिद्येताम्। दिशः देवतागुणग्रहः शब्दग्रहणहेतुः श्रोत्रमिंद्रियं निरभिद्यत ॥ २२ ॥ ❀ ❀ वस्तुनो धर्मिणः मृदुत्वं काठिन्यं च लघुत्वं गुरुत्वं औष्णमीषदुष्णत्वं च शीतत्वं चेत्येतान् धर्मान् जिघृक्षतः गृहीतुमिच्छतः त्वगिंद्रियं निर्भिन्ना तस्यां त्वचि त्वगिन्द्रिये निर्भिन्ने तदधिष्ठानभूतानि रोमाणि कार्यकारणयोरभेदविवक्षया चर्माणि तत्र बहिः कंडूति सहिते स्पर्शे त्वगिंद्रियेण गृह्यमाणे सहायभूताः देवताः महीरुहाश्चोत्पन्नाः अंतर्बहिश्च स्पर्शग्रहणे वा तद्देवतामाह तत्रेति। तत्र तेषु शब्दोदितेषु चर्मसु अंतर्बहिश्च वातः आवृत्यास्थितः कर्तरि निष्ठा कथंभूतः त्वचा लब्धो गुणः स्पर्शो येन स तथोक्तः त्वचमस्य विनिर्भिन्नां विविशुर्द्धिष्ण्यमौषधीः अंशेन लोमभिः कंडूयैरसौ प्रतिपद्यते निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् प्राणेनांशेन संस्पर्शं एनासौ प्रतिपद्यते इति वक्ष्यमाणाच्च वह्वृचश्रुता त्वेक एवांशो निर्दिष्टः त्वग्निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतय इति ॥ २३ ॥ ❀ ❀ तस्य पुरुषस्य नानाकर्मचिकीर्षया हस्ते

स्थानभूतौ रुरुहतुर्भिन्नौ तयोर्हस्तयोः बलवानादानहेतुः पाणिसंज्ञकमिन्द्रियमित्यर्थः । इंद्रः देवतातदुभयाश्रयमादानं कर्म ॥ २४ ॥ ❀ ❀ अभिकामिकामिच्छानुरूपां गतिं जिगीषतः पुरुषस्य पादौ रुरुहाते निर्भिन्नौ यज्ञो वै विष्णुरिति श्रुतेः । यज्ञो विष्णुः स्वयमधिष्ठाता पद्भ्यां पादेंद्रियेण राहावस्थितः पद्भ्यामिति द्विवचनं पादेंद्रियस्य पादद्वयगतत्त्वात् व्यष्टिजीवेष्वप्ययमेव गतिरिति दर्शयति नृभिर्व्यष्टिजीवैः कर्मभिः पादेंद्रियव्यापारैः हव्यार्थं यज्ञार्थं द्रव्यं क्रियते ॥ २५ ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं मुखनासिके उपपाद्य अक्षिणी निरूपयितुमाह—यदात्मनि निरालोकमिति । आसीदित्यर्थः । आत्मा देहः । तत्र कीदृशोऽहमिति यदा न ज्ञातवान् । कीदृशे च स्थाने तिष्ठामि । अन्यच्च स्वसम्बन्धिनं दिदृक्षतः । अक्षिणी निर्भिन्ने । चक्षुरादीनामालोकापेक्षा नाऽस्तीति पूर्वमेवोक्तम् । तस्य तु मायामोहो नाऽस्तीति न मायाऽकृतप्रतिबन्धः । निरालोकस्त्वदर्शनकृतः । तत्र देवता ज्योतिः । सूर्य इति यावत् । सूर्यस्य ज्योतिरूपं आधिदैविकम् । आध्यात्मिकं तु मण्डलं सूर्यशब्दवाच्यम् । किरणास्त्वाधिभौतिकाः । अतोऽत्र आधिदैविकमेवेति ज्योतिःशब्दप्रयोगः । चक्षुरिन्द्रियम् । गुणो रूपम् ।पञ्चानां मध्ये रूपस्यैव प्रसिद्धत्वाद्देवतेन्द्रियाभ्यां गुणज्ञानं भवतीत्यर्थः । तदनन्तरं भगवन्तं महापुरुषं ऋषयो मन्त्राः स्तोतुमारब्धवन्तस्तदा । ऋषिभिः स्तूयमानस्य साक्षात्त्वं परब्रह्मेति बोध्यमानस्य । आत्मनः पूर्वोक्तस्य । देहव्यावृत्त्यर्थं वा । तज्जिघृक्षतः तैरुच्यमानं स्वरूपं गृहीतुमिच्छतः । कर्णौ निरभिद्येतां गोलकरूपे । दिशो देवताः । श्रोत्रमिन्द्रियम् । गुणग्रहः शब्दग्रहणम् । शब्दस्य पूर्वसिद्धत्वात् ॥ २१ ॥ २२ ॥ ❀ ❀ एवं त्रीणीन्द्रियाणि द्विगोलकानि निरूपितानि । व्यापकमिन्द्रियमाह—वस्तुन इति । वस्तुनो घटपटादेर्लघ्वादीन् जिघृक्षतः त्वग् निर्भिन्ना । तस्यां लोम इन्द्रियम् । महीरुहा देवाः । लघु सूक्ष्मम् । लघुशब्दो धर्मवाची धर्मिणमपि प्रचुरप्रयोगाद्बोधयति । तदभिप्रायेण लाघवादिशब्दः । अत एव चातुर्यादौ लाघवशब्दः । अत्र लघुशब्दः स्पर्शविशेषवाची । यथा सूक्ष्मवायुस्पर्शः । मृदुत्वं तु गाढस्पर्शे नाऽवगम्यते । सर्वत्र स्पर्शविधाने लघुस्पर्श एव विधीयते कर्णादिषु । काठिन्यं कठिनस्पर्शः पाषाणादिषु । मृदुस्तु कोमलः । पिच्छिलताऽपि तस्यैव भेदः पट्टवस्त्रादिषु । गुरुत्वमपि स्पर्शः । यद्यपि शास्त्रान्तरे भिन्नो धर्म उत्तोलनादिनाऽवगम्यते । तथापि सोऽस्मिन् शास्त्रे स्पर्श एव । स्पर्शसहितेनैव तोलनादिनाऽवगमात् । स्पर्शरहितं तोलनमनुमानम् । अन्यथा कारणे गुरुत्वस्याऽभावात् कार्ये कथं भवेत् । बहुत्वं तु महत्त्वबोधकमेव । न गुरुत्वबोधकम् । केचित्तु शिथिलावयवयोगेन लघुत्वं श्लिष्टावयवयोगेन गुरुत्वमाहुः । तदप्यसङ्गतम् । स्पर्शातिरिक्तस्य संयोगस्य निरूपयितुमशक्यत्वात् । स्पष्टमेव संयुक्तमुच्यते लोके । अन्यथा स्पर्शातिरेकेण चाण्डालादिसंयोगे प्रायश्चित्तमन्यत्स्यात् । तस्मात्प्रशिथिलावयवसंयोगादिनिरूपणेऽपि लघुत्वं गुरुत्वं स्पर्श एव । श्लेषस्तु विभागाभाव एव । अनेनाऽपि संयोगो नाऽतिरिच्यते । संयुक्ता अप्यङ्गुलयश्चतस्रो भवन्ति । संश्लेषे तु न तथा यथा मिलिताङ्गुलेः । तस्मान्न स्पर्शातिरिक्तः संयोगः । न च गुरुत्वादयः । उष्णं ईषदुष्णस्पर्शः । अत्युष्णस्य स्पर्शायोग्यत्वात् । त्वचो दाहसम्भवात् । शीतता शीतस्पर्शः । अथवा । लघुकाठिन्यं लघुकठिनयोर्भावः । लाघवं काठिन्यं च । मृद्वाद्यन्ते तल्प्रत्ययः सर्वत्रैव सम्बध्यते । द्वन्द्वान्ते श्रूयमाणत्वात् । ततो मृदुत्वं गुरुत्वमुष्णत्वं शीतत्वमिति । यः शब्दो यद्धर्मपुरःसरेण धर्मिणि प्रवर्त्तते तस्य भावः स एव धर्मः । अतः शब्दप्रवृत्तिनिमित्तमेव भाव इति केचित् । सर्वत्राऽनुस्यूतः सत्तापरपर्यायः । तदंशा एव सर्वैः शब्दैरुच्यन्त इति सर्वशब्दवाच्यो भाव इति शास्त्रार्थः । अभावशब्देऽपि निषेधपूर्वको भावः प्रतीयते । अन्यथा अभावो निःस्वभावः स्यात् । अत्र त्वगिन्द्रिये भेदद्वयमस्ति । कण्डूः स्पर्शश्च तयोर्विषयः । बहिःस्पर्श एव कण्डूः । अन्तस्तु स्पर्शोऽपि । स च लोमशब्दवाच्यः कण्डूग्राहकः । तत्र महीरुहा देवाः । अधिष्ठानं तूभयोरेकम् ॥ २३ ॥ ❀ ❀ द्वितीयमाह—तत्र चाऽन्तर्बहिर्वायुरिति । चकारेण त्वचो लोमव्यतिरिक्तस्थानमप्यस्त्यन्तरिति सूचितम् । तत्र वायुर्देवता । अन्तर्बहिरिति पूर्वदेवताया अधिकविषयत्वं सूचितम् । त्वचाऽऽलब्धगुण इति त्वगिन्द्रियेण स्पर्शग्रहणम् । अत्र देवतायाः प्राधान्यम् । अन्यथायोगे वायुग्रहणेन गृहीतं न स्यात्[3] । वृत इति । अन्तर्बहिरावृतो वायुरित्यर्थः । अनेन बहिर्वायुर्न देवतेत्युक्तम् । एवं त्वचं निरूप्य ज्ञानेन्द्रियाणि समाप्य कर्मेन्द्रियाणि निरूपयति—हस्तौ रुरुहतुरिति । नानाकर्माणि कर्तव्यानीतीच्छया । अत्र प्ररोहात्मकावेताविति शाखारूपत्वं सूचितम् । एतयोरुभयोर्गोलकद्वयम् । तयोस्तु बलवानिन्द्रः । तयोर्हस्तयोर्बलमिन्द्रियम् । इन्द्रो देवता । आदानं कर्म । उभयाश्रयं देवतेन्द्रियाश्रयम् । पूर्ववत्र देवताप्राधान्यम् । अभिकामिकां गतिं जिगीषतः पादौ रुरुहाते । पद्भ्यामितीन्द्रियम् । यज्ञो देवता स्वयमिति विष्णुः । अभिकामिका अभीष्टा नानादेशगमनेच्छाविषया । तादृशस्य पादौ हस्ताविव शाखारूपेण रुरुहाते । अपदानामपि गतिरस्ति । चतुष्पदामपि । तथापि द्विपदां यथा सर्वत्र गमनं न तथाऽन्येषामिति पादद्वयकामना । ननु विराट्पुरुषस्य स्थिरत्वात् किं पद्भ्यां कार्यम् । अस्थिरत्वे वा लोकेषु व्याकोपः स्यात् । रूपान्तरकल्पनायां च प्रक्रमविरोध इत्याशङ्क्याऽऽह—स्वयं हव्यं कर्मभिः क्रियते

१. वायुः स्पर्श इति ख. । २. अत्युष्णस्पर्शेति ख. । ३. स्यात् । अन्तरिति ख. ।

नृभिरिति । हव्यस्य पुरोडाशादेर्भगवत्त्वं निरूप्यते—स्वयं हव्यमिति । तथा सति तस्याऽवश्यं फलसाधकत्वं वक्तव्यम् । यतः कारणान्नृभिः कर्मभिस्तद्द्रव्यं क्रियते । तदेव पुरोडाशादिकं देवतोद्देशेनाऽग्नौ प्रक्षिप्तं सत् यागरूपतामापद्य तं जीवं गृहीत्वा लोकान्तरे गच्छति । तत्रावश्यं गत्यर्थं पादावपेक्ष्येते । अन्यथा जीवगतौ कर्मरूपतया वा गमनसाधकत्वे यत्र कचिद्गमनं स्यात् । न च तद्रूपान्तरम् । अस्यैव तत्राऽऽविष्टत्वात् । न वा एतदधिष्ठातृदेवता । तस्या अभावात् । भावे वा तस्या एतदेकनिष्ठत्वात् । यज्ञस्यैव हि स्वर्गबोधकत्वात् । "सृती विचक्रमे विष्वङि"ति वाक्याच्च । किञ्च । भूमावेव यागो हविश्च क्रियते । पादौ चेन्न भवेतां तद्रूपा भूमिरेव न भवेत् । स्वर्गादिगतिश्च । अतः स्वयमेव यज्ञः स्वयमेव हव्यं चेत्यभीष्टगतिसिद्ध्यर्थं पशुपुत्रस्वर्गादि-भावापत्त्यर्थं पादावपेक्ष्येते । किञ्च । यज्ञो हि पादयोरधिष्ठात्री देवता । तदभावे सोऽपि न भवेत् । स च लोके प्रसिद्धः । तस्या-लौकिकत्वेऽपि तदर्थं क्रियमाणपुरोडाशादेः प्रत्यक्षसिद्धस्याऽपलापाशक्तेः । अतो लोके नृभिर्द्रव्यात्मकयागकरणात् तदन्यथानुपपत्त्या भगवतः पादौ वर्त्तेते इति सिद्धम् ॥ २४ ॥ २५ ॥

## श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

यदात्मनीत्यत्र 'आत्मानञ्च दिदृक्षत' इत्यनेन चक्षुषो द्रव्यग्राहकत्वं तथा बोध्यते, तेन गुणग्राहकत्वं तथात्वं न दुष्टम् । मायाकृतप्रतिबन्ध इति तमःकृतप्रतिबन्धः ॥ २१ ॥ ❀ ❀ वस्तुन इत्यत्र । ननु लघुशब्दस्य धर्मत्वे अस्मिन् वस्तुनि लाघवं दृश्यत इत्यादिप्रयोगो बाधितः स्यादित्याशङ्कायामाहुः धर्मिणमपीत्यादि । प्रचुरप्रयोगादेव धर्मिणं बोधयति इत्यत्र गमकमाहुः अत एवेत्यादि । अत एवेति धर्मिणि प्रयोगप्राचुर्यादेव । चातुर्यादाविति चातुर्यसौष्ठवादीर्घदर्शित्वोत्तालत्वादिधर्मेषु । तथा चात्र शास्त्रे वस्तुधर्मे लघ्वादिशब्दप्रयोगेपि चातुर्यादौ लाघवादिपदप्रयोगात् लघ्वादिशब्दानां धर्मिण्यपि प्रचुरप्रयोग उभयसामञ्जस्याया-दरणीय इत्यर्थः । ननु शास्त्रान्तरे गुरुत्वस्य गुणमध्ये गणनात्तदभावे लाघवपदं प्रयुज्यत इति कथं तस्य वस्तुधर्मत्वमित्याशङ्काया-माहुः अत्रेत्यादि । एतद्वाक्यार्थोदाहरणमाहुः यथेत्यादि । तथा च, नहि तत्र गुरुत्वाभावग्रहः, अपि तु सूक्ष्मस्पर्शस्यैव ग्रह इति न तस्य गुरुत्वाभावरूपत्वमित्यर्थः । नन्वस्त्वेवं तथापि मृदुत्वस्य चक्षुषापि ग्रहणात्तजिघृक्षया त्वङ्निर्भेदकथनमत्र न युक्तमित्यत आहुः मृदुत्वमित्यादि । तथा च, तत्र चाक्षुषं तूपनीतभानम्, न तु लौकिकमित्यर्थः । अत एव गुल्मनवरङ्गाख्ये कुसुमे रूपकृत-मृदुत्वभ्रमोपि युज्यते । ननु स्पर्शस्य गमकत्वमसङ्गतमक्लृप्तत्वेन गौरवादित्यत आहुः सर्वत्रेत्यादि । सर्वत्र लघ्वादिषु गमकत्वेकनात्र स्पर्शस्य विधाने लघुस्पर्श एव कर्णादिष्विन्द्रियान्तरेषु द्रव्यग्रहणव्यापारत्वेन विधीयते । अत्र शास्त्रेऽतः स्पर्शेनैव सर्वत्र व्यापार-निर्वाहान्न गौरवम्, किन्तु लाघवमेवेत्यर्थः । न च श्रोत्रेण शब्दग्रहणे स्पर्शस्य व्यापारत्वमसङ्गतमिति वाच्यं, शब्दवाहकेन वायुना श्रोत्रपर्यन्तमानीतस्य शब्दस्य श्रोत्रावच्छिन्नत्वचा सह वाहकवायुस्पर्शे तमेव संयोगाख्यं स्पर्शं व्यापारीकृत्य शब्दग्रहणस्यानुभव-साक्षिकत्वात् । न च नाभसे श्रोत्रेन्द्रिये स्पर्शाभावात् स्पर्शस्य तज्जन्यत्वाभावात् व्यापारत्वमसङ्गतमिति वाच्यम्, अवान्तरद्वारत्व-मात्रस्यैव व्यापारलक्षणत्वेनाङ्गीकारात् । इदं यथा तथा प्रस्थानरत्नाकरे व्युत्पादितं मयेति ततोऽवधेयम् । एवं चाक्षुषघ्राण-रासनेष्वपि व्यापारत्वं लघुस्पर्शस्यैव सौकर्यादभ्युपेयम् । त्वचि गाढस्पर्शस्यापीति विशेषः । न चैवं चक्षुर्व्यापारीभूतस्य स्पर्शस्य चक्षुषा त्वचा वा ग्रहणापत्तिः, शब्दगन्धभास्वररूपातिरिक्तभौतिकगुणप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य कारणताभ्युपगमात् । नापि सर्वत्र स्पार्शनव्यवहारत्वस्य करणनिबन्धनत्वेनात्र स्पर्शस्य तथात्वाभावेन तदप्रसङ्गादिति । काठिन्यादीनां स्वरूपमाहुः काठिन्यमित्यादि । ननु लघुत्वस्यातिरिक्तत्वाङ्गीकारे पिच्छिलत्वादीनामन्येषामपि धर्माणां विद्यमानत्वात्तेषामप्यतिरिक्तत्वापत्तिरित्यत आहुः पिच्छिलतापीत्यादि । एतेन स्नेहस्यापि त्वग्ग्राह्यत्वात् स्पर्श एवान्तर्भाव इति बोधितम् । न च सङ्ग्रहनिमित्तत्वेन मृजानाश्यत्वेन सोतिरिक्त एवाङ्गीकार्य इति वाच्यम्, स्पर्शस्यैव तथात्वाङ्गीकारेपि बाधकाभावात् । एवं द्रवत्वस्यापि स्पर्शभेदत्वमेव ज्ञेयम्, युक्तेस्तौल्यात् । नन्वाद्यपतनासमवायित्वादतीन्द्रियत्वादवनमनोन्नेयत्वाच्च न स्पर्शविशेषो गुरुत्वमित्याशङ्कायामाहुः यद्यपीत्यादि । स्पर्शसहितेनेति त्वाचस्पर्शसहितेन । तथा च, त्वाचप्रत्यक्षविषयत्वात् स्पर्शविशेष एव स इत्यर्थः । अत एव पाणौ फलकुसुमयोः स्थापने पाणिनमनाभावेपि फलगुरुत्वानुभवो युज्यतेऽतीन्द्रियत्वाङ्गीकारस्तु भ्रमादेव वस्तुविष्टम्भेन तद्गुरुत्वस्याध्यक्षत्वात् । ननु केवलस्पर्शेनानवगमात् स्पर्शरहितेन केवलतोलनेन चावगमाद्गुरुत्वमतिरिक्तमतीन्द्रियमेव ऐन्द्रियकत्वाङ्गीकार एव भ्रमादिति चेत्तत्राहुः स्पर्शरहितमित्यादि । तथा च, तत्र तुलादिनमनादिदमस्माद् गुर्विल्यापेक्षिकं गुरुत्वं सिद्ध्यति, तच्च, कल्पितमेवातो (ना) नुमानस्यार्थान्तरत्वेन तदसाधकत्वान्न तेन तत्सिद्धिरित्यर्थः । ननु पृथक्त्वादिवदापेक्षिकमेव गुरुत्वमस्तु को दोष इति चेत्तत्राहुः अन्यथेत्यादि । अन्यथेति आपेक्षिकत्वाङ्गीकारे । तथा च, पृथक्त्वस्य कारणे नित्यत्वात् कार्ये च विभागजन्यत्वाद्वास्तवमेव तदपेक्षाबुद्ध्या ज्ञायत एव न तु जन्यते । प्रकृते तु परमाणोः सर्वतो लघुत्वेन कारणे तस्याभावात् कार्ये तस्योत्पत्तिः केन स्याद-तस्तन्निमित्तस्याशक्यवचनत्वात्तत्रापेक्षिकतदङ्गीकारो न युक्त इत्यर्थः । न चैवं सति लघुत्वमेवातिरिक्तमङ्गीकार्यमिति युक्तम्, तस्याप्यापेक्षिकत्वेन कार्यसिद्धेः पूर्वमशक्यवचनत्वात् । तस्य कारणनिष्ठत्वेन तज्जनकगुणान्तरस्य तत्रासत्त्वेनापेक्षिकस्य तस्य पश्चादपि तत्र वक्तुमशक्यत्वाबात उभयमपि स्पर्शविशेषरूपं त्वग्ग्राह्यमेवाङ्गीकार्यमित्यर्थः । नन्वस्ति नित्यमतिरिक्तं गुरुत्वं परमाणु-

मात्रवृत्ति, तेन सङ्ख्यया सङ्ख्यान्तरमिव गुरुत्वान्तरं तु न जन्यते, यदि जन्येत तदा ( तो ) लोकतोलकमितावयवारब्धेऽवयविनि अवयवगुरुत्वाभ्यां सहास्य तोलकचतुष्टयमितं गुरुत्वं स्यात् । तच्च न दृश्यते इति परमाणुमात्रवृत्ति नित्यं निरपेक्षमेव तत्, तद्बहुत्वादेवावयविनि गुरुत्वाधिक्यप्रतीतिरिति बहुत्वबोध्यमेव तदिति चेत्तत्राहुः **बहुत्व त्वित्यादि** । तथा च, बहुत्वस्य गुरुतूलपुञ्जलघुपाषाणयोः पातने पाषाणस्य प्रथमतः पातो न स्यात्, पाषाणे बहुत्वबोधितस्य गुरुत्वस्याभावात् । तस्मान्न गुरुत्वबोधकं किन्तु महत्त्वबोधकमेवेति नैवमपि तत्सिद्धिरित्यर्थः । न च गुरुत्वस्य स्पर्शविशेषत्वे वायावपि तदापत्तिरिति वाच्यम्, इष्टापत्तेः । न च प्रत्यक्षबाधः, वायुपूरितदृतितोलनशीघ्रपतनाभ्यां तत्र तन्निश्चयात् । न च बहिर्वायौ तदापत्तिः, प्रचितस्यैव तस्य गुरुत्वारम्भकत्वात् । एवञ्च सुवर्णादिनिष्ठमपि गुरुत्वं तैजसमेव, बाधकाभावात् । न च तेजोन्तरे तदापत्तिः, उक्तयुक्तेः । मास्तु वा तत्र तत्, तथा न दोषः, वायावुष्णस्येव तेजसि शीतस्येव तत्र गुरुत्वाख्यस्पर्शाभावेपि तस्मिन् स्पर्शरूपत्वस्याबाधादिति । गुरुत्वसाधकं मतान्तरं दूषयितुमुपक्षिपन्ति **केचित्त्वित्यादि** । एतन्मते परमाणुषु न गुरुत्वम् । यद्यप्यत्र न पूर्वो दोषः, तूलस्य शिथिलावयवयुक्तत्वेन गुरुत्वाभावात्, तत्प्रथमपातस्य सम्भवात्, तथापि शिथिलावयवश्लिष्टावयवौ द्वावपि यत्र सन्निहितौ तत्र तोलनेन शिथिलावयवे गुरुत्वसिद्धिः, द्वितीये च प्रथमपातेन गुरुत्वसिद्धिः, तत्रापेक्षाबुद्धेरुभयत्र तौल्येनापेक्षिकस्य गुरुत्वस्यैकत्र निश्चेतुमशक्यत्वात् । एवं बृहत्काष्ठस्वल्पपाषाणतरणमज्जनयोर्हेतौपृष्टे लोको मज्जने पाषाणस्य गुरुत्वं वक्ति, तोलने तु तद्वैपरीत्येन काष्ठे तद्वक्तीति ताभ्यां प्रथमपाततोलनाभ्यां वा गुरुत्वस्यैकत्र निश्चय इति नात्रानुमानं प्रमाणं, सत्प्रतिपक्षत्वात् साध्याप्रसिद्धेश्च, अतोऽतीन्द्रियातिरिक्तगुरुत्वाङ्गीकारः प्रशस्तपादभाष्यविश्वासादेवेति दिक् । प्रकारान्तरेण दूषयन्ति **तदप्यसङ्गतमिति** अपिः गर्हायाम्, गर्हा चोक्तयुक्तिभिर्दूषणेपि पुनरुत्थानात् । एवं सति गर्हामुखेनैता युक्तयः सङ्गृहीता ज्ञेयाः । दूषणे हेतुमाहुः **स्पर्शेत्यादि** । तथा च, तज्जनकसंयोगासिद्ध्या सुतरां तदसिद्धिरित्यर्थः । ननु संयोगस्य चाक्षुषत्वात्कथं तदसिद्धिरित्यत आहुः **स्पष्टमित्यादि** । अयमर्थः, स्पर्शत्वं हि रूपव्यापकगुणत्वं वा, शब्दव्याप्यगुणत्वं वा, वाय्वादिचतुष्टयगुणत्वं वा, तद्व्यङ्ग्यजातिरूपं ( त्वं ) वाङ्गीकार्यम् । तच्च लक्षणं संयोगेपि तुल्यमिति लोके प्रयोगोपि तथेति संयोगो न गुणान्तरमिति । ननु लोकोक्तिमात्रेण संयोगस्य स्पर्शभेदत्वं न वक्तुं शक्यमित्याकाङ्क्षायामाहुः **अन्यथेत्यादि** । अन्यथेति लोकोक्तेर्भ्रान्तित्वे । तथा च, प्रायश्चित्तद्वयास्मरणात् मन्वादीनामप्ययमेवाशय इति न सा भ्रान्तेत्यर्थः । न च संयोगस्य व्यासज्यवृत्तिमात्रवृत्तित्वेन स्पर्शस्य च व्यासज्याव्यासज्यवृत्तित्वेन भेद इति वाच्यम्, पाकजमृदुत्वादिवत्तदानीमेव संयोगस्य जननेन तत्प्रतीत्या तस्याः स्पर्शभेदानापादकत्वात् । **इदं यथा तथा प्रस्थानरत्नाकरादवगन्तव्यम्** । फलितमाहुः **तस्मादित्यादि** । तस्मात् प्रत्यक्षतो निश्चितत्वात् । संयोगस्य श्लेषरूपत्वं दूषयितुं प्रसङ्गाच्छ्लेषस्वरूपमाहुः **श्लेषस्त्विति** । ननु विभागाभाग एव संयोगोस्तु, किं बाधकमिति चेत्तत्राहुः **अनेनापोत्यादि** । **नातिरिच्यते** स्पर्शातिरिक्तो न भवतीत्यर्थः, तत्र हेतुः **संयुक्तेत्यादि** । **न तथा**, न भेदप्रतीतिः, **तस्माद् अभेदप्रतीति** (अ)जनकत्वात् । न च संयोगस्य स्पर्शरूपत्वे आत्ममनसोस्तद्रहितत्वात् स्पर्शाभावे ज्ञानानुदयप्रसङ्गः । 'अन्नमयं हि सौम्य मनः' इति श्रुतेरन्नविकारत्वेन वैकारिकाहङ्कारकार्यत्वपक्षेप्यन्नपोषितत्वेन मनसि तत्सत्त्वात् । एवञ्च 'देहं मनोमात्रमिमं गृहीत्वे'ति च सङ्गच्छते । तन्नित्यत्वादिकन्तु **प्रस्थानरत्नाकरे** दूषितमिति ज्ञेयं **सुज्ञैः** । ननु मनसः स्पर्शवत्त्वेपि 'यन्न स्पृशन्ति न विदुर्मनोबुद्धीन्द्रियासव' इति वाक्यादात्मस्पर्शाभावाज्ज्ञानोदयस्तथापि दुर्घट इति चेत् मैवं, स्वाप्नभिन्नजन्यज्ञानस्य मनोधर्मत्वात् 'ह्रीर्धीः सर्वे मन एवे'तिश्रुतेः जीवात्मा त्वध्यासेन मनआदि धारयन् प्रयोजको भवतीत्यन्तःकरणादिभिरेव तदुदयस्य सुघटत्वात् । ( जीवशरीरत्वं यस्मिन् कल्पे ) न च देहविष्टम्भानुपपत्तिः आत्माध्यस्तबुद्धिवृत्तिविशेषेण प्राणेन वा तत्सम्भवात्, 'यस्याः कालेन नोद्याया वियोगः प्राणदेहयोः । प्राणिनः स्वसमये मृत्युरत्यन्तविस्मृतिरि'ति मृत्युलक्षणेन तथावधारणात् । ब्रह्माण्डस्य जीवशरीरत्वं यस्मिन् कल्पे तत्रायमेव कल्पः । यत्र ब्रह्मशरीरत्वं तत्र तु, तत्सामर्थ्येन तत्सम्भवः, 'यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर' इति वाक्यादिति दिक् । लघ्वादिशब्दानां धर्मिवाचकत्वमभ्युपगम्य पक्षान्तरमाहुः । **अथवेत्यादि** । अतः शक्यतावच्छेदकरूपत्वात्, जातेः खण्डनादननुमानाच्चात्रास्वरसं हृदिकृत्य भगवतः सर्वशब्दवाच्यत्वञ्च **पत्रावलम्बनोक्तरीत्या** हृदिकृत्य तत्त्वमाहुः **सर्वत्रेत्यादि** । **महाभाष्यवाक्यपदीयप्रभृतिष्वयमेव सिद्धान्त** इति नात्र कश्चित्सन्देह इत्यर्थः । ननु भावशब्दस्य सत्तावाचकत्वेऽभावपदात्त्वतलाद्यनुपपत्तिरित्यत आहुः **अभावेत्यादि** । 'भावान्तरमभावोन्यो न कश्चिदनिरूपणा'दित्यभियुक्तोक्तेस्तत्रापि एकतरनिषेधपूर्वकं भावान्तरमेव भेदस्थले प्रतीयते, संसर्गाभावस्थले ध्वंसप्रागभावयोः कारणावस्था वा तन्निरूप्यो निषेधपूर्वकः प्रतीयोगी वा प्रतीयते । एवं अत्यन्ताभावस्थलेपि घटो नास्ति घटाभाव इत्यादिप्रत्ययान्निषेधपूर्वकः प्रतीयोग्येव प्रतीयत इति तस्य भावरूपत्वात्ततः सुखेन त्वतलाद्युपपत्तिरित्यर्थः । एतदुपष्टम्भाय तर्कमाहुः **अन्यथेत्यादि** । अभावो यदि भावरूपो न स्यात् खपुष्पादिवन्निःस्वभावः स्यात्तथा सति न प्रतीयेतातो योग्यानुपपत्ति( लब्धि )ग्राह्यस्य तत्स्वभावस्यैवानुमापकत्वात्तस्य निषेधपूर्वकभावरूपत्वमनुमानसिद्धमित्यर्थः । तथा च प्रयोगः, अभावः भावरूपः, अस्तीत्यबाधितप्रतीतिविषयत्वात्, घटवत्, यन्नैवं तन्नैवं खपुष्पवदिति । अग्रे समानप्रकरणे 'त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः । अंशेन रोमभिः कण्डूं यैरसौ प्रतिपद्यत' इति कण्डूनामकस्पर्शसुखग्रहणार्थं त्वङ्निर्भेदो वक्ष्यते, सोत्रापि तस्यां रोमेत्यादिकथनादभिप्रेत इति

ज्ञापयितुमाहुः अत्रेत्यादि । अत्रेति शास्त्रे । ननु त्वचः कण्डूग्राहकत्वे उक्तनियमभङ्गाल्लध्वादिषु स्पर्शत्वसाधनप्रयासो व्यर्थ एवेत्यत आहुः बहिरित्यादि । बहिः स्पर्शे जायमाने यत्सुखमुत्पद्यते सैव कण्डूः । अन्तर्जायमाना तुल्यस्पर्शरूपा स्पर्शजन्यापि, तथा च, तस्याः स्पर्शाभिन्नत्वान्न तेषु स्पर्शत्वसाधनप्रयासवैयर्थ्यमित्यर्थः । नन्वेवं कण्ड्वा अपि स्पर्शरूपत्वे किमिति त्वग्द्वयकल्पनेत्यत आहुः स चेत्यादि । तथा चेन्द्रियान्तर इवात्रापि देवताभेदाद्भेद इति न कल्पनेत्यर्थः । ननु तर्हीन्द्रियान्तरत्वमेवास्तु न तु त्वग्भेदत्वमत आहुः अधिष्ठानमित्यादि । तथा च, गोलकाभेदात् समानप्रकरणे अंशत्वकथनाच्चेन्द्रियाभेद इत्यर्थः ॥ २३ ॥ ❀ ❀ तत्र चेत्यत्र पूर्वदेवताया इति पञ्चम्यन्तमिदं महीरुहेभ्य इत्यर्थः । न च मुखे वाग्रसनयोरुभयोरपि सत्त्वादधिष्ठानाभेदो नेन्द्रियाभेदप्रयोजक इति वाच्यम्, तत्रापि ताल्वाकाशभेदेनाधिष्ठानभेदादिति । देवताप्राधान्ये गमकमाहुः अन्यथेत्यादि । वायुरूपदेवताया यदि प्राधान्यं स्पर्शग्रहणेन स्यात्तदा प्राणजये वायुग्रहणेन बहिःस्पर्शज्ञानं निरुद्धं न स्यात्, त्वचो विद्यमानत्वात् । तथा चैतदेव देवताप्राधान्यगमकमित्यर्थः । तथा चैवं मूलयोजना, तत्र लोमसु चकारात् तदन्तराले अस्थ्यादिषु च अन्तर्बहिर्महीरुहेभ्योऽधिकस्थानो वायुर्देवता त्वचा लब्धगुणः त्वगिन्द्रियेण गृहीतः स्पर्शो येन तादृशः वृतः त्वगिन्द्रियावेष्टितो जात इति । जात इति क्रिया तु नसि जिघृक्षत इत्यत्राध्याहारस्य निर्णीतत्वादध्याहार्या ॥ २४ ॥ ❀ ❀ गति जिगीषत इत्यत्र । स्वयमिति विष्णुरिति स्वसमाननामरूपः स्वांशः, उक्तकामनायां पादद्वयरोहे बीजमाहुः अपदानामित्यादि । तथा च, 'द्विपादोभीष्टगतिजेतारो भवन्त्वि'तीच्छाहेतुका पादद्वयकामनेत्यर्थः । यज्ञपदेनैव विष्णुप्राप्तौ स्वयं पदमनतिप्रयोजनमित्याशङ्क्य स्वयं हव्यमिति समभिव्याहारसूचितमर्थमाहुः हव्यस्येत्यादि । कर्मभिस्तद्द्रव्यं क्रियत इति । तल्लौकिकं पुरोडाशादि द्रव्यं कर्मभिः प्रोक्षणादिभिर्वैदिकैः हव्यं होमसाधनं क्रियतेऽतो विराडवयवत्वाद्भगवत्त्वमित्यर्थः । एवं हव्यस्य भगवत्त्वं व्युत्पाद्य पादप्रयोजनमाहुः तदेवेत्यादि । ननु जीवकर्मणैव लोकान्तरगमनसम्भवान्न पादापेक्षेत्यत आहुः अन्यथेत्यादि । विराजः पादाभावे स्वत एव लोकान्तरे जीवगतिः पुरोडाशादीनां यागान्तःपातित्वेन कर्मरूपतया वा लोकान्तरगमनसाधनत्वमवश्यं वक्तव्यम्, तत्र कर्मणो जडत्वादिष्टदेशगमनं प्रति जीवस्यैव स्वातन्त्र्यं वक्तव्यम्, तथा सति जीवस्य तृष्णकतया कर्मणो गहनत्वेन यत्र कचिद्गमनं स्यात्ततश्च स्वर्गादितारतम्यव्यवस्था भज्येतातस्तद्व्यवस्थार्थं चेतनस्य विराज एव पादावङ्गीकार्यावित्यर्थः । नन्वेवं सति यज्ञस्य विष्णुत्वेन तत एव लोकान्तरप्रापणव्यवस्थानिर्वाहान्न विराजः पादापेक्षेत्यत आहुः न चेत्यादि । अस्येति विराजः । तत्रेति यज्ञे । तथा च, स्वयंपदस्य यज्ञहव्ययोर्मध्ये पाठादुभयोर्भगवत्त्वं विवक्षितमतो रूपान्तराभावाद्विराज एव पादावङ्गीकार्यावित्यर्थः । नन्वधिष्ठातृदेवतयापि निर्वाहे गोलोकभूतौ पादौ नावश्यकावित्यत आहुः न वेत्यादि । अत्र स्वयं पदोक्त्या देवान्तरानुक्त्या च सा नेत्यर्थः । ननु स्वयमित्यनेन विलक्षणाकारस्यैव निषेधो न देवतायाः, यज्ञपदेनैव तस्या उक्तत्वादित्याकाङ्क्षायां ( तदापि गोलकसद्भावे हेतूनाहुः भावे वा इत्यादि । अत्र 'स्वयं'पदोक्त्या यदि सा देवता वर्तते तदापि तस्या अधिकरणाकाङ्क्षायां ) विराज एवाधिकरणत्वं वक्तव्यम्, तत्र देवान्तराणां तत्र तत्र निवेशस्योक्तत्वेन परिशेषात्पादयोरेव तथात्वं वक्तव्यमिति तस्याः पादैकनिष्ठत्वात् सिद्धावेव तावित्यर्थः । किञ्च, 'स्वर्गकामो यजेते'त्यादिवाक्येभ्यो यज्ञादेव स्वर्गबोधनाद्यज्ञपदेनाप्यत्र स्वसम्बन्धी स्वर्गो बोधनीय इति क्रियाया जडत्वेन तस्यामपि पूर्वोक्तन्यायेनाधिष्ठात्रपेक्षया तथेत्यर्थः । स्फुटमग्रिमम् । स्वर्गादिगतिरिति पादाभावे स्थितिमत्त्वासम्भवात्, स्थानरूपा सापि न स्यादित्यर्थः । अत इति विरुद्धधर्माश्रयत्वात् ॥ २५ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

यदा आत्मनि देहे निरालोकं प्रकाशशून्यमासीदिति शेषः । निर्मक्षकमितिवदव्ययीभावः । तदा आत्मानं देहं—चकारादन्यच्च वस्तु दिदृक्षतो द्रष्टुमिच्छतस्तस्य अक्षिणी अधिष्ठानभूते निर्भिन्ने उत्पन्ने । तत्र ज्योतिरादित्यो देवताऽभूत्, चक्षुरिन्द्रियं चाभूत् । ततश्च गुणस्य रूपस्य ग्रहः ग्रहणं भवति । अनेनैव रूपं विषयो दर्शितः ॥ २१ ॥ ❀ ❀ ऋषिभिर्वेदैर्बोध्यमानस्य तदात्मनः प्रबोधन जिघृक्षतः गृहीतुमिच्छतः कर्णौ अधिष्ठानभूतौ च निरभिद्येताम् । तत्र दिशो देवता अभूवन्, श्रोत्रं चेन्द्रियमभूत् । ततश्च गुणस्य शब्दस्य ग्रहो ग्रहणं भवति । अनेन शब्दो विषयो दर्शितः ॥ २२ ॥ ❀ ❀ मृदुत्वं च काठिन्यं च लघुत्वं च गुरुत्वं च आ उष्णत्वमीषदुष्णत्वं च गुरुत्वं च शीततां च वस्तुनो द्रव्यस्य एतान् धर्मान् जिघृक्षतस्त्वक् निर्भिन्ना त्वगिन्द्रियाधिष्ठानं चर्म जातमित्यर्थः । तस्यां त्वचि रोमाणि इन्द्रियं जातम्, महीरुहा वृक्षाभिमानिनो देवताश्च जाताः । यद्यप्युत्युष्णत्वमपि त्वगिन्द्रियविषय एव, तथापि तस्य जिघृक्षाभावात् ओष्णमित्युक्तम् । गुर्वोष्णेति पाठे तु यणादेशश्छान्दसः । वस्तुनि हस्तेनातोलिते लघुत्वगुरुत्वयोर्ज्ञानात्तयोरपि त्वगिन्द्रियविषयत्वमिति पौराणिकाः । तत्र त्वचि अन्तर्बहिश्च वायुर्वृतः आवृत्य स्थितः । कर्तरि निष्ठा । वायुं विशिनष्टि—त्वचा लब्धो गुणः स्पर्शो येन सः । अयमर्थः—त्वगिन्द्रियमेव बहिः कण्डूयतिसहितं स्पर्शं गृह्णत् लोमशब्देनोच्यते, तत्र च महीरुहाणां देवत्वम् । अन्तर्बहिश्च स्पर्शं गृह्णंस्तदेव त्वक्शब्देनोच्यते, तत्र वायुर्देवता । तथा च तृतीये वक्ष्यते—'त्व'चमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमौषधीः ॥ अंशेन लोमभिः कण्डूं यैरसौ प्रतिपद्यते ॥ निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् । प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते' इति । तत्र चर्माणीति चर्मोपलक्षिता त्वगित्यर्थः । प्राणेनांशेनेति

सप्तमाध्यायस्याष्टदशषोडशश्लोकावेतौ ।

प्राणवायुव्याप्तेन त्वगिन्द्रियेणेत्यर्थः ॥ २३ ॥ ❀ ❀ नाना आदानप्रक्षेपादि कर्म चिकीर्षया कर्तुमिच्छतः तस्य हस्तौ अधिष्ठानभूतौ रुरुहतुः । तयोर्हस्तयोर्बलवान् बलेनेन्द्रियेण सहित इन्द्रो देवता प्रविवेश । आदानं कर्म उभयाश्रयमिन्द्रियदेवताधीनम् ॥ २४ ॥ ❀ ❀ जिगीषत इति धात्वर्थो न विवक्षितः । अभिकामिकामभीष्टां गतिमिच्छतस्तस्य पादौ रुरुहाते । पद्भ्यां पादयोर्यज्ञो विष्णुः स्वयमेव गत्याख्येनेन्द्रियेण सह तदधिष्ठातृरूपेण स्थितः । नृभिः कर्तृभिः कर्मभिर्हव्यं क्रियते गमनागमनादिभिर्यज्ञार्थं द्रव्यरूपविषयः सम्पाद्यते इत्यर्थः । नृभिरित्यनेन व्यष्टिजीवेष्वपीयमेव रीतिः यज्ञादीनां नराधिकारित्वं चेति सूचयति ॥ २५ ॥

## हिन्दी अनुवाद

पहले उनके शरीरमें प्रकाश नहीं था; फिर जब उन्हें अपनेको तथा दूसरी वस्तुओंको देखनेकी इच्छा हुई, तब नेत्रोंके छिद्र, उनका अधिष्ठाता सूर्य और नेत्रेन्द्रिय प्रकट हो गये। इन्हींसे रूपका वर्णन होने लगा ॥ २१ ॥ ❀ ❀ जब वेदरूप ऋषि विराट् पुरुषको स्तुतियोंके द्वारा जगाने लगे, तब उन्हें सुनने की इच्छा हुई। उसी समय कान, उनकी अधिष्ठातृ-देवता दिशाएँ और श्रोत्रेन्द्रिय प्रकट हुईं। इसीसे शब्द सुनायी पड़ता है ॥ २२ ॥ ❀ ❀ जब उन्होंने वस्तुओंकी कोमलता, कठिनता, हलकापन, भारीपन, उष्णता और शीतलता आदि जाननी चाही तब उनके शरीरमें चर्म प्रकट हुआ। पृथ्वीमेंसे जैसे वृक्ष निकल आते हैं, उसी प्रकार उस चर्ममें रोएँ पैदा हुए और उसके भीतर-बाहर रहनेवाला वायु भी प्रकट हो गया। स्पर्श ग्रहण करनेवाली त्वचा-इन्द्रिय भी साथ-ही-साथ शरीरमें चारों ओर लिपट गयी और उससे उन्हें स्पर्शका अनुभव होने लगा ॥ २३ ॥ ❀ ❀ जब उन्हें अनेकों प्रकारके कर्म करनेकी इच्छा हुई, तब उनके हाथ उग आये। उन हाथोंमें ग्रहण करनेकी शक्ति हस्तेन्द्रिय तथा उनके अधिदेवता इन्द्र प्रकट हुए और दोनोंके आश्रयसे होनेवाला ग्रहणरूप कर्म भी प्रकट हो गया ॥ २४ ॥ ❀ ❀ जब उन्हें अभीष्ट स्थानपर जानेकी इच्छा हुई, तब उनके शरीरमें पैर उग आये। चरणोंके साथ ही चरण-इन्द्रियके अधिष्ठातारूपमें वहाँ स्वयं यज्ञपुरुष भगवान् विष्णु स्थित हो गये और उन्हींमें चलनरूप कर्म प्रकट हुआ। मनुष्य इसी चरणेन्द्रियसे चलकर यज्ञ-सामग्री एकत्र करते हैं ॥ २५ ॥

**निरभिद्यत शिश्नो वै प्रजानन्दामृतार्थिनः । उपस्थ आसीत् कामानां प्रियं तदुभयाश्रयम् ॥२६॥**
**उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम् । ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः ॥२७॥**
**आसिसृप्सोः पुरः पुर्या नाभिद्वारमपानतः । तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयम् ॥२८॥**
**आदित्सोरन्नपानानामासन् कुक्ष्यन्त्रनाडयः । नद्यः समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये ॥२९॥**
**निदिध्यासोरात्ममायां हृदयं निरभिद्यत । ततो मन[1]स्ततश्चन्द्रः सङ्कल्पः काम एव च ॥३०॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

प्रजा अपत्यमानन्दो रतिरमृतं स्वर्गादि तदर्थिनः । शिश्नोऽधिष्ठानमुपस्थ इन्द्रियं प्रजापतिश्चासीदिति ज्ञेयम् । तदुभयाश्रयेन्द्रियदेवताश्रयं कामानां सम्बन्धि प्रियं सुखम् ॥ २६ ॥ ❀ ❀ धातुमलं भुक्तान्नादीनामसारांशं त्यक्तुमिच्छोः गुदपायुमित्रोत्सर्गा अधिष्ठानेन्द्रियदेवताविषयाः । उभयाश्रयः पायुमित्राश्रयः ॥ २७ ॥ ❀ ❀ पुर्या देहात्पुरो देहांतराण्यासिसृप्सोः सर्वतो गंतुमिच्छोः नाभिद्वारं निरभिद्यतेत्यनुषंगः । अपानतोऽपगच्छतः पृथक्त्वं मरणम् । नाभ्यादीन्यधिष्ठानादीनि नाभ्यां हि प्राणापानयोर्बंधविश्लेषे मृत्युरिति प्रसिद्धम् ॥ २८ ॥ ❀ ❀ अन्नपानानामादित्सोः संग्रहेच्छोः कुक्षिश्चांत्राणि च नाड्यश्चासन् । तत्र कुक्षिरधिष्ठानं अन्त्राण्यन्नसंग्रहे करणमिंद्रियस्थानीयं नाड्यस्तु पानसंग्रहे तयोर्नाड्यंत्रवर्गयोः क्रमेण नद्यः समुद्राश्च देवते तुष्टिरुदरभरणं पुष्टिस्तु रसपरिणामतः स्थौल्यं तदाश्रये तदुभयनिमित्ते । तत्रान्नसंग्रहेच्छोः कुक्ष्यंत्रसमुद्रतुष्टय इति चतुष्टयं पेयसंग्रहेच्छोः कुक्षिनाडिनदीपुष्टय इति विवेकः ॥ २९ ॥ ❀ ❀ निदिध्यासोर्नितरां चिंतयितुमिच्छोः कामोऽभिलाषः हृदयमनश्चंद्रसंकल्पाः अधिष्ठानादयः ॥ ३० ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अत्रानन्दशब्देन तद्धेतवः स्त्रिय एवोच्यन्ते तत्र च स्त्रीणां विषयत्वं साक्षात्तेन भोग्यत्वात् । अन्ययोस्तु तदुत्पाद्यतया भोगहेतुत्वात् । स्वर्गादिकं च गार्हस्थ्यधर्ममयप्रजास्त्रीपरिकरतदुत्पाद्यं भवति तदुभयाश्रयं कामसुखमिन्द्रियदेवताधीनम् ॥ २६ ॥ २७ ॥ ❀ ❀ ततोनंतरम् । अपानतोऽपानमार्गेण उपलक्षणमिदं प्राणमार्गेणोत्पन्नस्यापि नाभिद्वारमधिष्ठानमपान इंद्रियं मृत्युर्देवता मरणं विषयः ॥ २८ ॥ २९ ॥ ❀ ❀ मायां मायिकं वस्तु च संकल्पस्तत्तत्पदार्थचिंतनं कामस्तत्तद्विषया-

1. प्रा० पा० मनश्चन्द्र इति ।

भिलाषः हृदयमधिष्ठानं मन इंद्रियं चन्द्रो देवता संकल्पो विषयः । तत्र हृदयमेवाधिष्ठानं चित्ताहंकारबुद्ध्य इतींद्रियाणि तद्देवताश्च वासुदेवरुद्रब्रह्माणस्तृतीयस्कंधाज्ज्ञेयाः । तदेवमष्टादशेंद्रियाणि प्रसिद्धान्येकादशैव ज्ञेयानि ॥ ३० ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

तदाश्रये तदुभयनिमित्ते इति । अन्त्रसमुदाश्रया तुष्टिः । नाडीनद्याश्रया पुष्टिरित्यर्थः ॥ २९ ॥ ३० ॥

### श्रीमद्वीरराघवव्याख्या

उपस्थव्यष्टिसर्गमाह निरभिद्यतेति । प्रजानंदामृतार्थिनः प्रजाः अपत्यमात्रे रतिः ॥ आनंदहेतुत्वात्तस्याः ताभ्यां यदमृतममृततुल्यं सुखं तदर्थं यतः यद्वा प्रजां रत्यानंदरूपममृतं वार्थः यतः ब्रह्मणः समष्ट्युपस्थतः शिश्नः व्यष्ट्युपस्थस्थानं निरभिद्यताभूदित्यर्थः ॥ शिश्नग्रहणं योषिल्लिंगस्याप्युपलक्षणं शिश्नः अधिष्ठानं उपस्थ इंद्रियं प्रजापतिरधिष्ठाता रतिः कर्म आनंदो विषयश्चासीदित्यनुक्तमप्यूह्यम् । कामानां स्त्रीसंभोगादीनां प्रियं सुखं उभयाश्रयं इंद्रियदेवताश्रयमित्यर्थः ॥ यद्वा उभयाश्रयं स्त्रीपुल्लिंगाश्रयं इत्यर्थः इंद्रियतत्स्थानाश्रयं इति वा ॥ २६ ॥ ❀ ❀ पायुव्यष्ट्युत्पत्तिमाह उत्सिसृक्षोरिति । धातुमलं भुक्तानामन्नादीनामसारांशम् । त्यक्तुमिच्छोर्गुदं पाय्विंद्रियस्थानं निरभिद्यत ततो गुदतः पायुरिंद्रियं मित्रोऽधिष्ठाता वाऽभूत् उत्सर्गस्त्यागः उभयाश्रयः इंद्रियतत्स्थानाश्रयो धातुमलत्याग इत्यर्थः ॥ २७ ॥ ❀ ❀ एवं ज्ञानकर्मोभयेंद्रियव्यष्टिसृष्टिमभिधायान्यासामपि नाभ्यादिव्यष्टिसृष्टिमाह आसिसृप्सोरिति । पुर्याः शरीरात् पुरः शरीरान्तराणि आसिसृप्सोः आ सर्वतो गन्तुमिच्छोर्ब्रह्मणो नाभिद्वारस्थानं निरभिद्यत तत्र नाभिद्वारे अपानो वायुरिन्द्रियस्थानीयं ततोऽपानतो मृत्युरधिष्ठाता पृथक्त्वं शरीरत्याग उभयाश्रयं प्राणापानाश्रयं प्राणापानवायुवियोगमरणस्य पुराणांतरप्रसिद्धेः ॥ २८ ॥ ❀ ❀ व्यष्टिकुक्ष्यंत्रनाडीनां सृष्टिमाह आदित्सोरिति । अन्नपानानामादित्सोः संग्रहेच्छोः कुक्ष्यंत्रनाड्यः आसन्नभूवन् कुक्षिरधिष्ठानमंत्राण्यन्नसंग्रहे करणमिंद्रियस्थानीयानि नाड्यस्तु पानसंग्रहे तयोर्नाड्यंत्रवर्गयोः क्रमेण नद्यः समुद्राश्च देवते तुष्टिरलंबुद्धिः पुष्टिर्देहपोषस्तदाश्रये नदीसमुद्राश्रये सस्यादिहेतुत्वात् ॥ २९ ॥ ❀ ❀ मनोव्यष्टिसृष्टिमाह निदिध्यासोरिति । आत्ममायां स्वरूपतिरोधायकप्रकृतिं निदिध्यासोर्निरूपयितुमिच्छतः हृदयं कमलाकारमधिष्ठानं ततो मन इंद्रियं चंद्र अभिमानी संकल्पः मनोव्यापारश्चाभूदित्यर्थः ॥ ३० ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

प्रजा संततिस्तन्निमित्ता या रतिस्तस्यां जात आनन्दः स एवामृतं तदर्थयितुं शीलमस्येति प्रजानंदामृतार्थिनस्तस्य विधेः शिश्नमिंद्रियस्थानं तस्मिन् शिश्ने कामानां प्रियं परतः प्राप्य सुखसाधनं तादृशमुपस्थेंद्रियं तदुभयाश्रयं शिश्नोपस्थाश्रयं रतिः सुखं चासीत् कामानां भोगसाधनमिति वा ॥ २६ ॥ ❀ ❀ धातुमलं पुरीषसंज्ञमुत्सिसृक्षोस्त्यक्तुकामस्य गुदमपानद्वारं ततस्तस्मिन् गुदे वा वायुनामेन्द्रियं तत इंद्रियानन्तरं मित्रनामा देवः उभयाश्रयः पायुमित्राश्रयो वा इत्यनेन मलादिकं कदाचित्त् ब्रह्मलोकाभिपत्तये आत्मनो निर्ममे कामात् सर्वेषामभवत्तत इत्यादिवाक्यं स्मारयति ॥ २७ ॥ ❀ ❀ परकायप्रवेशप्रकारमाह आसिसृक्षोरिति पुरः स्वाधिष्ठितादेहात् पुर्यामन्यस्मिन् देहे पुरि तन्नामनाडीविशेषमासिसृक्षोः प्रवेष्टुकामस्य विरिंचस्येत्युक्तलक्षणं योगिनां नाभिद्वारमपावृतं विवृतं ततो नाभिद्वारादपानवायुस्तस्मान्मृत्युस्तदुभयाश्रयं पृथक्त्वं देहांतरप्राप्तिलक्षणं चोत्पन्नं अत्र मृत्युर्मरणं तत्प्रापकश्चापानः इदं ब्रह्मणो न किंतु देहिनामित्यनुसंधेयम् ॥ २८ ॥ ❀ ❀ अन्नपानानामन्नपानानि आदित्सोरादातुकामस्य विरिंचस्य कुक्षिनाड्यावभूतां असृजो रुधिरस्य स्थानं कुक्षिरंत्रस्थानं नाडीद्वारा सप्ततिभेदभिन्ना तयोः कुक्षिनाड्योः समुद्रा नद्यश्चासन् तृप्तिः पुष्टिश्च तदाश्रये तृप्तिः कुक्ष्याश्रया पुष्टिर्नाड्याश्रया ॥ २९ ॥ ❀ ❀ आत्ममायां विष्णुसृष्ट्यादिमहिमानं निदिध्यासोर्ध्यातुकामस्य हृदयं मनो निवासस्थानमभूत् ततो हृदयान्मनो मनसश्चंद्रोऽधिदेवता संकल्पः कामश्च मनोवृत्तिविशेषावभूतां इतिशब्दो निरुद्धग्रहणार्थः ॥ ३० ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

प्रजानन्दामृतानि विषयः । तत्रानन्दशब्देन तद्धेतवः स्त्रिय एव उच्यन्ते । तत्र च स्त्रीणां विषयत्वं साक्षात्त्वेन भोग्यत्वात् अन्ययोस्तु तदुत्पाद्यतया भोगहेतुत्वात् । स्वर्गादिकं च गार्हस्थ्यधर्ममयप्रजास्त्रीपरिकरादुत्पाद्यं भवति ॥ २६ ॥ ❀ ❀ उत्सर्गः उत्सृज्यमानं मलम् ॥ २७ ॥ ❀ ❀ आसिसृप्सोरपानत इति । विशेषणद्वयं क्रियेच्छाक्रिययोर्भेदेन । पृथक्त्वमिति इन्द्रियदेवताश्रयं मरणमिति शेषः ॥ २८ ॥ ❀ ❀ आदित्सोरिति । अन्नपानानि विषयाः पानानि पानीयानि । तुष्टिपुष्टी द्वे द्वयोरपि प्रत्येकं क्रिये ज्ञेये ॥ २९ ॥ ❀ ❀ निदिध्यासोरिति । मनोजन्मनः पूर्वमपीच्छा मनसः कारणावस्थामवलम्ब्य जायते । आत्ममायाम् आत्मविषयिकां सकार्यां मायां विषयोऽत्र आत्ममायैव, कामसङ्कल्पौ त्विच्छाक्रिये ॥ ३० ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या ।

प्रजा अपत्यम् आनन्दो रतिः अमृतं स्वर्गादि तदर्थिनः शिश्नोऽधिष्ठानम्, उपस्थ इन्द्रियं, प्रजापतिर्देवता ज्ञेया । कामानां

स्त्रीसम्भोगानां सम्बन्धिप्रियं सुखं विषयः । तदुभयाश्रयम् इन्द्रियदेवताधीनम् ॥ २६ ॥ ❀ ❀ धातुमलं भुक्तान्नादीनां सारांशं त्यक्तुमिच्छोर्गुदमधिष्ठानं, पायुरिन्द्रियं, मित्रो देवता, उत्सर्गो विषयः ॥ २७ ॥ ❀ ❀ पुर्य्याः देहात् पुरः देहान्तराणि आसिसृप्सोः सर्वतो गन्तुमिच्छोः । अपानतः अपानमार्गेण, उपलक्षणमिदं प्राणमार्गेण च, प्राणापानयोर्बन्धविश्लेषे मृत्युरिति प्रसिद्धेः नाभिद्वारमधिष्ठानम् अपान इन्द्रियं, मृत्युर्देवता, पृथक्त्वं मरणं विषयः ॥ २८ ॥ ❀ ❀ अन्नपानानामादित्सोः संग्रहेच्छोः कुक्षिश्च अन्त्राणि च नाड्यश्चासन् । तत्र कुक्षिरधिष्ठानम् अन्त्राण्यन्नसंग्रहे, नाड्यस्तु पानसंग्रहे, इन्द्रियम् । तयोर्नाड्यन्त्रवर्गयोः । क्रमेण नद्यः समुद्राश्च देवते । तुष्टिरुदरभरणं, पुष्टिश्च रसपरिणामतः स्थौल्यं, क्रमेणैतौ विषयौ । तदाश्रये इन्द्रियदेवताधीनतुष्टिपुष्टी ॥ २९ ॥ ❀ ❀ आत्मनो मायां मायिकञ्च वस्तु निदिध्यासोश्चिन्तयितुमिच्छोः हृदयमधिष्ठानं मन इन्द्रियं चन्द्रो देवता सङ्कल्पाभिलाषाद्या विषयाः । अत्र हृदय एवाधिष्ठाने चित्ताहङ्कारबुद्धयः इन्द्रियाणि तद्देवताश्च वासुदेवरुद्रब्रह्माणो देवतास्तृतीयस्कन्धाद् ज्ञेयाः । तदेवमष्टादशेन्द्रियाणि प्रसिद्धान्येकादशैव ज्ञेयानि ॥ ३० ॥

## श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रजानंदामृतार्थिन इति प्रजायै सदपत्याय आनंदो रतिः तेनामृतमयत्वहेतुकलोकादितदर्थिनः शिश्न अधिष्ठानं निरभिद्यत उपस्थ इंद्रियम् प्रजापतिरधिष्ठाता चासीदित्यनुक्तमप्यूह्यम् । कामानां स्त्रीसंभोगानां संबंधि यत् प्रियं सुखम् तत् उभयाश्रयम् उपस्थप्राजापत्याश्रयम शिश्नोपस्थाश्रयं वा ॥ २६ ॥ ❀ ❀ धातुमलम् भुक्तान्नाद्यसारांशम् उत्सिसृक्षोः त्यक्तुमिच्छोः गुदमधिष्ठानं निरभिद्यत ततो गुदतः पायुः इंद्रियम् मित्रोऽधिष्ठाता उभयाश्रयः गुदपाय्वाश्रयः उत्सर्गस्त्यागः ॥ २७ ॥ ❀ ❀ पुर्याः शरीरात्परः शरीरांतराणि आसिसृप्सोः सर्वतोऽपसर्पितुमिच्छोः नाभिद्वारं निरभिद्यत तत्र अपानात् अपसर्पतः प्राणसंयोगं हित्वा अपगच्छतः उभयाश्रयम् अन्योन्यवियुक्तप्राणापानाश्रयम् शरीराच्छरीरिणः पृथक्त्वम् तदेव मृत्युरित्युच्यते नाभ्यादीन्यधिष्ठानादीनि ॥ २८ ॥ ❀ ❀ अन्नाद्यादित्सोः संग्रहेच्छोः कुक्ष्याद्यासन् अभूवन् तत्र कुक्षिरधिष्ठानम् अंत्राणि अन्नसंग्रहे करणमिंद्रियस्थानीयम् नाड्यस्तु पानसंग्रहे तयोर्नाड्यन्त्रवर्गयोः क्रमेण नद्यः समुद्राश्च देवते तुष्टिरुदरभरणानंतरमलंबुद्धिः पुष्टिस्तु रसपरिणामतः स्थौल्यम् तदाश्रयं नदीसमुद्राश्रये तत्रायं विवेकः अन्नादित्सोः कुक्ष्यंत्रसमुद्रपुष्टयः स्थानकरणाधिष्ठातृविषयाः पानादित्सोः कुक्षिनाडीनदीतुष्टयः स्थानकरणाधिष्ठातृविषयाः ॥ २९ ॥ ❀ ❀ आत्ममायां प्रकृतिशरीरादिरूपेण भोग्यां निदिध्यासोः नितरां चिंतयितुमिच्छोः हृदयमधिष्ठानं निरभिद्यत ततो मनः इंद्रियम् चंद्रो देवता संकल्पो विषयः कामोऽभिलाषः ॥ ३० ॥

## श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

आदौ वाग्लक्षणमेकं कर्मेन्द्रियं निरूपितम् । हस्तपादाविदानीं निरूपितौ । अवशिष्टे निरूपयति—**निरभिद्यतेति** द्वाभ्याम् । शिश्नो गोलकं तस्य रूपान्तराभावात्तदभावमाशङ्क्य वै इति निश्चयमाह । कारणे चेत्तन्न स्यात् तद्बीजे कार्ये पुरुषादिषु तत्कथं भवेत् । अतस्तत्र सन्देहो न कर्त्तव्य इत्यर्थः । प्रजारूपो योऽयमानन्दः सम्भोगसुखं प्रजाजनको वा । प्रजा च आनन्दश्चेति अमृतं च वा । "**प्रजामनु प्रजायन्ते तदु ते मर्त्याऽमृतमि**"ति श्रुतेः । अमृतं मोक्षो वा । ऋणत्रयापाकरणसाध्यः । "**नाऽपुत्रस्य लोकोऽस्ती**"ति च । "**अष्टाशीतिसहस्राणी**"त्यादिवाक्यान्यूर्ध्वरेतसां प्रशंसापराणि । त्रैविद्यवृद्धानां तु वेद एव प्रमाणम् । अतो मोक्षो वा अमृतम् । त्रितयप्रेप्सोरिन्द्रियं निर्गतमित्यर्थः । उपस्थ इन्द्रियम् । कामानां प्रियं स्त्रीसम्भोगानां सम्बन्धि यत्सुखं तदुभयाश्रयं देवतेन्द्रियाश्रयम् । अथवा । कामानां स्थानं पूर्वोक्तमासीदित्यर्थः । कामो देवता । तदभिमानी इत्येके । काम एव देवतेति मुख्यः सिद्धान्तः । तदभावे केवलेन्द्रियेण सुखाजननं प्रत्यक्षसिद्धम् ॥ २६ ॥ ❀ ❀ अवशिष्टमाह—**उत्सिसृक्षोरिति** । धातूनां मलम् । धातवो हि त्वगादयो मज्जान्ताः । ते कालादिना निरन्तरं पच्यन्ते । अन्नादीनां तु[1] पोषकत्वम् । अतस्तत्पोषणेऽन्नादिभिः क्रियमाणे रसस्य तत्र प्रवेशे योऽसारो भागोऽवशिष्यते तन्मलं न त्वन्नस्य । तस्य स्वकार्यकरणात् । अतो धातोरेव मलम् । गुदमिति पायुस्थाने मांसविशेषः । स रोगादिना निर्गतः प्रत्यक्षो भवति । तदनन्तरं पायुस्तत्रेन्द्रियम् । मित्रो देवता । न हि सर्वमित्रव्यतिरेकेण तादृशे कश्चिद्देवो भवेत् । उत्सर्गः कर्म । उभयाश्रयः पूर्ववत् ॥ २७ ॥ ❀ ❀ एवं नवद्वाराणि निरूपितानि । दशेन्द्रियाणां मध्ये त्रयाणां न द्वाराणि । उभयं त्वेकत्र । त्रयाणां द्वयं द्वयम् । एवमिन्द्रियाणां द्वाराणां च न समसङ्ख्या । अतो द्वारान्तरमाह प्राणादीनां नियामकत्वाय—**आसिसृप्सोरिति** । मलं हि द्विविधम् । प्रत्यहं जायमानं प्रतिजन्मनि जायमानं च । तत्र प्रत्यहं जायमानस्य मलस्य परित्यागार्थे पायुः । सम्पूर्णज[2]न्मनि जायमानस्य देहरूपस्य मलस्य परित्यागार्थे नाभिद्वारम् । पुरः शरीराणि । पुर्याः शरीरात् उत्सिसृक्षोः नाभिद्वारं जातमिति सम्बन्धः । यथा आमरणं धातवोऽनुवर्त्तन्ते । तस्य पोषकमन्नम् । मलं तु प्रसिद्धम् । एवं "बहु स्यामि"ति भगवदिच्छामारभ्य भगवत्प्रवेशपर्यन्तं भग[3]वच्चिदंशस्य जीवस्य एकमेव शरीरमनुवर्त्तते । तस्य पोषकान्यन्यानि शरीराण्यन्नवत् अन्नमयानि । तानि भोजनवदुत्पत्तौ गृह्यन्ते । मलपरित्यागवन्मरणे त्यज्यन्ते । प्राणो ह्युत्पादकः । अपान

१. तु तत्पोषकत्वमिति ख. । २. संपूर्णे इति ख. । ३. भगवति तदंशस्येति ख. ।

मारकः । अतस्तद्वारमपानादुत्पन्नम् । तत्राऽपान इन्द्रियं मृत्युर्देवता । पृथक्त्वं प्राणापानयोर्विश्लेषो मरणात्मकः । तदुभयाश्रयमिति पूर्ववत् । नाभिद्वारेण तच्छरीरं निर्गच्छति । तस्य नाभिद्वारेण वा प्रयत्नेन मलवदिदं शरीरं त्यजति । यथेदं शरीरं बहुकालं तिष्ठति तस्य पोषादिकं जनयति तथाऽन्नपानादिकमपि कियत्कालं स्थितमेव धातुपोषं जनयतीति अन्नपानानामादित्सुः स्थापनेच्छुर्भगवान् जातः । ततस्तस्य कुक्ष्यन्त्रनाडय आसन् । तत्र कुक्षिर्गोलकमुदराभ्यन्तराकाशः । अन्त्राण्यन्नस्थापनार्थमिन्द्रियाणि । नाड्यः पानार्थम् । नद्यः समुद्राश्च तयोर्देवते । नद्यो नाडीनाम् । अन्त्राणामुदरस्य च समुद्राः । अत एव चकार उभयार्थः । "नाडीर्नद्यो लोहितेने"ति वाक्यात् । "क्षुत्तृड्भ्यामुदरं सिन्धुरि"ति च । तुष्टिराप्यायनम् । पुष्टिर्देहवृद्धिरन्नस्य । तुष्टिपुष्टी तदाश्रये इन्द्रियदेवताश्रये । आत्मनो मायां जगत्कर्त्रीम् । कीदृश्येषा कथमहमेतत्प्रतिकृतिरूपो भविष्यामीत्यात्ममायाया निदिध्यासनम् । तदा हृदयं गोलकं निरभिद्यत । ततो मन इन्द्रियम् । चन्द्रो देवता । सङ्कल्पो ज्ञानरूपः । कामः क्रियारूपः । मनस्तूभयात्मकमित्युभयं कार्यं निर्दिष्टम् । सङ्कल्पस्य कार्यं काम इति तु ज्ञानस्य क्रियां प्रति कारणत्वेन । अत[1] एवेत्यवधारणे । चकारेणेन्द्रियानुरोधः ॥ २८ ॥ २९ ॥ ३० ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

**निरभिद्यतेत्यत्र तस्य रूपान्तराभावादिति** विराजः स्त्रीलक्षणरूपान्तराभावात् । लोके प्रजानन्दस्य बहुधा दर्शनान्मूले तत्सत्ताबोधनाय बहुधा तदर्थमाहुः **प्रजेत्यादिना** । अत्र पक्षचतुष्टयम् । तत्र प्रथमपक्षद्वये उत्तरपदलोपिघटितः प्रजानन्देनामृतमिति तृतीयासमासः । तृतीये द्वन्द्वघटितः सः । **अमृतं** वेति केवलो द्वन्द्व एव । एतेषु चतुर्षु प्रथमपक्षत्रये आनन्दस्य लौकिकसुखात्मकत्वादमृतपदेन प्रकृष्टं यज्जननमौरसपुत्रपौत्रादिरूपेण तदेव परामृश्यत इति बोधयितुमाहुः **प्रजामन्वित्यादि** । तुरीयेऽमृतपदार्थमन्यमाहुः **अमृतमित्यादि** । नन्वेवं सति नैष्ठिकब्रह्मचर्यादिविधायकवाक्यानां का गतिरित्यपेक्षायामाहुः **अष्टाशीतीत्यादि** । ननु फलाभावे प्रशंसापि व्यर्थैवेत्यत आहुः **त्रैविद्येत्यादि** । केवलप्रवृत्तिमार्गनिष्ठानां दक्षादितुल्यानां पूर्वकाण्डमेव प्रमाजनकमतः स्तावन्मात्रविश्वासजाड्यात्ते तथा वदन्ति, न तावतान्यवाक्यवैयर्थ्यमित्यर्थः । एतेन केवलप्रवृत्तिमार्गनिष्ठानामभयं क्षेममममृतमि'तिवाक्योक्तसत्यलोकस्थामृतप्राप्तिरेव सहस्राश्वमेधयाजिनामिव, न तु मुख्यामृतप्राप्तिरिति बोधितम् । 'कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्त्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते, न च पुनरावर्त्तत, इति गृहिणोपसंहारश्रुत्यनुसारेण पक्षान्तरमाहुः । **अतो मोक्षो वामृतमिति** अस्मिन् पञ्चमीतत्पुरुषो बोध्यः । अस्मिन् पक्षे निरभिद्यतासीदिति क्रियाद्वयस्यानतिप्रयोजनत्वम् । कामस्येन्द्रियाभिमानित्वाभावे प्रत्यक्षविरोधश्चेत्यरुच्या पक्षान्तरमाहुः **अथवेत्यादि** । अत्र देवताद्वयकथनादुपस्थेन्द्रियस्य यत्कार्यत्रयं तन्मध्ये प्रजाऽमृतञ्च कस्य कार्यं आनन्दः कामस्य कार्यं तानि त्रीण्यपि स्त्रियं विनानुपपद्यमानानि तदा स्त्रीसृष्टिमपि ज्ञापयन्ति, नानारस इवान्नादिसृष्टिमित्यप्याशयो बोध्यः ॥ २६ ॥ ❀ ❀ **उत्सिसृक्षोरित्यत्र** । ननु तेन द्वारेणान्नमलस्याप्युत्सर्गदर्शनाद्धातुपदमनर्थकमित्याशङ्कायां विराज्यन्नमलाभावेन धातुपदस्यार्थवत्त्वमुपपादयन्ति **धातव इत्यादि** । 'नन्वन्नमशितं त्रेधा भवति, तस्य यः स्थविष्ठो धातुस्तत्पुरीषमि'ति श्रुत्याऽन्नांशे धातुत्वबोधनादन्ने सुतरां धातुत्वमितीयं परिसङ्ख्यानुपपन्नेत्याशङ्कायामाहुः **अन्नादिति** । तथा च, धारणपोषणाभ्यामेव धातुत्वसिद्धेर्'मलायत्तं बलं पुंसां' इति वैद्यकवाक्याच्चान्नांश एव धातुत्वसम्भवात्केवलेन पोषणेन नान्नस्य धातुत्वमित्यर्थः । नन्वस्त्वेवं तथापि पाककथनस्य किं प्रयोजनमत आहुः **अत इत्यादि** । पाकेन क्षये सम्भवति तत्पोषणस्यावश्यकत्वात् । **तन्मलमिति** 'कफः पित्तं मलः खेषु प्रस्वेदो नखलोम च । कर्णविड्दूषिका चेति धातूनां क्रमशो मला' इति वैद्यकोक्तं त्वगादिपोषकरसादिधातुमलमित्यर्थः । **अत इति** हव्यकव्यादिरूपेऽलौकिकेऽन्नेऽसारांशाभावात् । तथा च, धातुपदं सार्थकमेवेत्यर्थः । इदं च मलं विराट्पुरुषेण गुदद्वारा त्यज्यते न तु कर्णादिद्वारा 'तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनमि'ति तद्गात्रस्य सौभगभाजनत्वकथनान्मलसम्बन्धे च सौभगापायात् । अतः 'पराभूतेरधर्मस्य निरयस्य गुदः स्मृत' इति वाक्येन तद्द्वारैव तत्त्यागाच्चेति ज्ञेयम् ॥ २७ ॥ ❀ ❀ **आसिसृक्षोरित्यत्र त्रयाणामिति** त्वक्करचरणानाम् । **उभयमिति** वाग्रसना चेति द्वयम् । **त्रयाणामिति** दृग्घ्राणश्रोत्राणाम् । परिशिष्टयोः पायूपस्थयोरेकैकमर्थाज्ज्ञेयम् । **मारक इति** प्राणव्रतानां चरणाद्दशेन्द्रियविलक्षणः । **तच्छरीरमिति** लिङ्गशरीरम् ॥ २८ ॥ ❀ ❀ **आदित्सोरित्यत्र** । पूर्वं पिपासतो जक्षतश्चेति कथनात्तयोरेव चान्नपानाऽऽदित्सारूपत्वादत्र पुनरन्नपानादित्सुत्वकथनं किमर्थमित्याकाङ्क्षायां तत्स्वरूपं वक्तुमुपपादयन्ति **यथेत्यादि** । **तस्येति** लिङ्गशरीरस्य । **इतीति** हेतौ । स्थूलशरीरपोषार्थम् । **पानार्थमिति** पानस्थापनार्थम् । **अत एव चकार उभयार्थ इति** इन्द्रियभेदादेव समुद्राश्चेति चकारः पृथक्कार्यकृत्त्वज्ञापनार्थ इत्यर्थः । **तुष्टिराप्यायनमिति** पानस्येति शेषः ॥ २९ ॥ ❀ ❀ **निदिध्यासोरित्यत्र निदिध्यासनमिति** विचारेण विशिष्टज्ञानम् । नन्वग्रे 'यत्सङ्कल्पाभ्यां वर्त्तते कामसम्भव' इत्यनेन सङ्कल्पस्य कार्यं काम इति वक्तव्यम् । तत्कथमत्रोभयं समतया

---

१. अत एव । एवेति क.।

मिर्दिश्यत इत्यत आहुः अत एवेत्यादि । तथा च, सङ्कल्पस्य व्यापारत्वादेवात्रावधारणमुक्तमित्यर्थः । इन्द्रियानुरोध इति बहिरिन्द्रियानुरोधः ॥ ३० ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

प्रजा अपत्यमानन्दः स्त्रीसम्भोगसुखं अमृतं 'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे प्रयोजयेत्' इति वचनात् ऋणत्रयापाकरणसाध्यो मोक्षः तदर्थिनः शिश्नोऽधिष्ठानं निरभिद्यत । तत्रोपस्थः इन्द्रियमासीत्, प्रजापतिश्च देवता ज्ञेया । कामानां कामिजनानां यत् प्रियं स्त्रीसम्भोगसुखं तदुभयाश्रयमिन्द्रियदेवताधीनमित्यर्थः ॥ २६ ॥ ❀ ❀ धातुमलं भुक्तान्नादीनामसारांशं उत्सिसृक्षोः त्यक्तुमिच्छोस्तस्य गुदमधिष्ठानं निरभिद्यत । ततस्तत्र पायुरिन्द्रियमासीत् । ततस्तस्य मित्रो देवताऽऽसीत् । उत्सर्गो मलत्यागरूपो विषयः । उभयाश्रयः देवतेन्द्रियाधीन इत्यर्थः ॥ २७ ॥ ❀ ❀ पुर्याः देहात् पुरो देहान्तराणि आसिसृप्सोः आभिमुख्येन गन्तुमिच्छोस्तस्यापानतः अपानवायुतो नाभिरूपं द्वारं निरभिद्यत । तत्रापानः इन्द्रियमासीत् । ततस्तस्याधिष्ठाता मृत्युर्देवताऽऽसीत् । पृथक्त्वं प्राणापानविश्लेषरूपं मरणं उभयाश्रयमिन्द्रियदेवताधीनमित्यर्थः ॥ २८ ॥ ❀ ❀ अन्नपानानामादित्सोः सङ्ग्रहेच्छोः कुक्षिरधिष्ठानम्, अन्त्राणि नाड्यश्चेन्द्रियम्, तयोर्नाड्यन्त्रवर्गयोः क्रमेण नद्यः समुद्राश्च देवते, तुष्टिरुदरभरणं, पुष्टिस्तु रसपरिणामतः स्थौल्यं च, तदाश्रये तदुभयनिमित्ते । तत्रान्नसङ्ग्रहेच्छोः कुक्ष्यन्त्रसमुद्रतुष्टय इति चतुष्टयम्, पेयसङ्ग्रहेच्छोः कुक्षिनाडीनदीपुष्टय इति चतुष्टयमिति विवेकः ॥ २९ ॥ ❀ ❀ आत्मनो मायां प्रकृतिकार्यरूपां निदिध्यासोः नितरां चिन्तयितुमिच्छोर्हृदयं कमलाकारमधिष्ठानं निरभिद्यत । ततस्तत्र मन इन्द्रियं जातम् । तस्य चन्द्रोऽधिष्ठाता देवता । ततश्च सङ्कल्पस्तत्तत्पदार्थ-चिन्तनम् । तत एव कामस्तद्विषयाभिलाषश्च भवति ॥ ३० ॥

### हिन्दी अनुवाद

सन्तान, रति और स्वर्ग-भोगकी कामना होनेपर विराट् पुरुषके शरीरमें लिङ्गकी उत्पत्ति हुई । उसमें उपस्थेन्द्रिय और प्रजापति देवता तथा इन दोनोंके आश्रय रहनेवाले कामसुखका आविर्भाव हुआ ॥ २६ ॥ ❀ ❀ जब उन्हें मलत्यागकी इच्छा हुई, तब गुदाद्वार प्रकट हुआ । तत्पश्चात् उसमें पायु-इन्द्रिय और मित्रदेवता उत्पन्न हुए । इन्हीं दोनोंके द्वारा मलत्यागकी क्रिया सम्पन्न होती है ॥ २७ ॥ ❀ ❀ अपानमार्ग द्वारा एक शरीरसे दूसरे शरीरमें जानेकी इच्छा होनेपर नाभिद्वार प्रकट हुआ । उससे अपान और मृत्यु देवता प्रकट हुए । इन दोनोंके आश्रयसे ही प्राण और अपानका बिछोह यानी मृत्यु होती है ॥ २८ ॥ ❀ ❀ जब विराट् पुरुषको अन्न-जल ग्रहण करनेकी इच्छा हुई, तब कोख, आँखे और नाड़ियाँ उत्पन्न हुईं । साथ ही कुक्षिके देवता समुद्र, नाड़ियोंके देवता नदियाँ एवं तुष्टि और पुष्टि—ये दोनों उनके आश्रित विषय उत्पन्न हुए ॥ २९ ॥ ❀ ❀ जब उन्होंने अपनी मायापर विचार करना चाहा, तब हृदयकी उत्पत्ति हुई । उससे मनरूप इन्द्रिय और मनसे उसका देवता चन्द्रमा तथा विषय कामना और सङ्कल्प प्रकट हुए ॥ ३० ॥

**त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः । भूम्यप्तेजोमयाः सप्त प्राणो व्योमाम्बुवायुभिः ॥३१॥**
**गुणात्मकानीन्द्रियाणि भूतादिप्रभवा गुणाः । मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ॥३२॥**
**एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया । मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतम् ॥३३॥**
**अतः परं सूक्ष्मतममव्यक्तं निर्विशेषणम् । अनादिमध्यनिधनं नित्यं वाङ्मनसः परम् ॥३४॥**
**अमुनी भगवद्रूपे मया ते अनुवर्णिते । उभे अपि न गृह्णन्ति मायासृष्टे विपश्चितः ॥३५॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तदेवमधिदैवादिभेदं विभज्योक्त्वा तदंशभूतानां धात्वादीनां स्वरूपमाह त्वगिति द्वाभ्याम् । त्वक् स्थूलं चर्म तदुपरि स्थितं सूक्ष्मं त्वगादयोऽस्थ्यंता द्वंद्वैकवद्भावेन निर्दिष्टाः सप्त ये धातवस्ते भूम्यप्तेजोमयाः तेषां च पांचभौतिकत्वेऽपि वाय्वाकाशयोराहारादिरूपेण संवर्धकत्वाभावादेवमुक्तम् ॥ ३१ ॥ ❀ ❀ गुणात्मकानि गुणेषु शब्दादिष्वात्मा येषाम् । विषयाभिमुखस्वभावानीत्यर्थः । गुणाः शब्दादयः भूतादिरहंकारस्ततः प्रकर्षेण भवंतीति यथा अहंकारकल्पितशोभनस्वभावा नतु वस्तुतस्तथेति तात्पर्यम् । अत्र हेतुः । यतो मन एव सर्वविकाराणामात्मा स्वरूपं, बुद्धिस्तु तथाभूतार्थविज्ञानरूपिणी, नतु परमार्थग्राहिणीति वैराग्यार्थमुक्तम् । अनेनैव बुद्धिमनसोः स्वरूपं चोक्तम् ॥ ३२ ॥ ❀ ❀ उपसंहरति । एतदिति । प्रकृत्या सहाष्टभिः

---

१. प्रा० पा०—भूतात्म० ।

॥ ३३ ॥ ❀ ❀ स्थूलमुक्त्वा सूक्ष्मं समष्टिलिंगशरीरमाह । अतः परमस्य । अतः परमस्य कारणभूतं सूक्ष्ममतीन्द्रियं यतोऽव्यक्तम् । तत्कुतः । यतो निर्विशेषणम् अनादिमध्यनिधनमुत्पत्तिस्थितिलयशून्यं नित्यं सदैकरूपं अपक्षयादिशून्यमित्यर्थः । अत एव वाक् च मनश्चेति द्वंद्वैक्यं तस्मात् परम् ॥ ३४ ॥ ❀ ❀ उपासनार्थं भगवत्यारोपितं रूपद्वयमपवदति । अमुनी इति । न गृह्णंति वस्तुतो नांगीकुर्वन्ति यतो मायासृष्टे ॥ ३५ ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

व्योमांबुभ्यां पुष्टा वायव एव प्राण इत्यर्थः । तृतीयाबहुवचनमार्षम् ॥ ३१ ॥ ❀ ❀ इत्यर्थ इति वस्तुतः शब्दादीनां बंधकत्वाच्छोभनता नास्तीति भावः । अत्र गुणानामशोभनत्वे मन एव सर्वविकारान्संजीवयतीति भावः । तामसेष्वेव विषयेषु संकल्पविकल्पं करोति न तु हेयोपादेयविवेकं बुद्धिस्तु तथाभूतार्थविज्ञानरूपिणी न तु परमार्थग्राहिणी अनेन बुद्धिमनसोः स्वरूपं चोक्तम् । संदर्भस्तु विकारा हर्षदुःखादयः । विज्ञानं विवेकशक्तिः । 'बुद्धींद्रियमनःप्राणान्' इत्याद्युक्तेः । पारमार्थिक्यपि सा भवतीति ज्ञेयम् ॥ ३२ ॥ ❀ ❀ मह्यादिभिः पृथिव्यप्तेजोवाय्वाकाशमहदहंकारप्रकृत्याख्यैः प्रत्येकं दशदशगुणोत्तरैः ॥ ३३ ॥ ❀ ❀ अतः स्थूलात् । अस्य स्थूलस्य । तदव्यक्तत्वम् । निर्विशेषणं वर्णाकारादिशून्यम् । यदेव स्थूलेन सह व्यष्टिपूत्पत्त्यादियुक्तं न भवतीत्याह । अनादीति । अतस्तदपेक्षया नित्यमपि निर्विशेषणत्वादेव वाङ्मनसात्परमत एव सूक्ष्मतममत एव चाव्यक्तं सूक्ष्मतममित्युक्त्या सूक्ष्ममतिसूक्ष्मं चेति द्वितयं लभ्यतेऽत्र सूक्ष्मं लिंगशरीरमतिसूक्ष्मं मायारूपं निर्विशेषणमित्यादिभिश्चतुर्भिर्विशेषणैरुक्तम् ॥ ३४ ॥ ❀ ❀ अमुनीति द्विवचनं स्थूलयोः समष्टिव्यष्ट्योरैक्यात्सूक्ष्मयोरप्यैक्यात् न गृह्णंति प्राप्यत्वेन न स्वीकुर्वन्ति किंतूपासनार्थं प्रथमदशायामेव यतो मायासृष्टे तृतीयमतिसूक्ष्मं यत्तत्तु कारणं मायैव किन्तु विपश्चितः शुद्धिभक्तिमंतः प्रथमदशायामपि नैव गृह्णंति किंतु रामकृष्णनारायणनृसिंहादिरूपं शुद्धसत्त्वमेव साध्यसाधनदशायां गृह्णंतीति ॥ ३५ ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

त्वक् स्थूलमित्यादि । उपरितनं सूक्ष्मं चर्म्म त्वक् । तदन्तः स्थूलचर्म्म इत्यर्थः ॥ एवमुक्तमिति । भूम्यादित्रितयवार्यत्वमुक्तमित्यर्थः ॥ ३१ ॥ ❀ ❀ सर्व्वविकाराणामिति । कामक्रोधलोभमोहशोकादीनामित्यर्थः ॥ ३२ ॥ ३३ ॥ ❀ ❀ अव्यक्तमिति न चक्षुरादिभिर्व्यज्यते इति तथा ॥ ३४ ॥ ३५ ॥

## श्रीमद्वीरराघवव्याख्या

एवं ब्रह्मशरीरात्समष्टिव्यष्ट्यवयवविशेषविभागमभिधाय तेषां सार्वभौतिकत्वेऽपि तत्तद्भूतांशभूयस्त्वनिबंधनं तदात्मकत्वमाह त्वगिति । चर्मस्थूलमंतस्त्वक् ॥ तदुपरि स्थितं सूक्ष्मं चर्म त्वक् त्वगादयोऽस्थ्यंता द्वंद्वैकवद्भावेन निर्दिष्टा एते सप्त धातव भूम्यप्तेजोमयाः प्राणस्तु व्योमांबुवायुभिरारब्ध इति शेषः ॥ ३१ ॥ ❀ ❀ गुणात्मेति । इंद्रियाणि गुणात्मकानि शब्दादिगुणग्रहणस्वभावानि गुणा यदात्मकास्ते के इत्यत आह भूतादिरिति । भूतादिः अहंकारः तत्प्रभवाः शब्दादयो गुणाः इन्द्रियाण्यपि तत्प्रभवत्वात्तदात्मकान्येवेत्यभिप्रायः । मनः सर्वविकाराणां कामसंकल्पादीनामात्मा आश्रयः । बुद्धिः विज्ञायतेऽनेनेति विज्ञानं महत्तत्वं तद्रूपिणी बुद्धिः महान् वै बुद्धिलक्षण इति वचनात् ॥ ३२ ॥ ❀ ❀ उपसंहरति एतदिति । एतच्चेतनाचेतनात्मकं देवादिव्यष्टिवस्तुजातगर्भमेतच्छब्दोऽण्डकटाहपरः, पृथिव्यप्तेजोवाय्वाकाशाहंकारमहदव्यक्तरूपैरष्टभिरंडावरणैर्बहिरावृतं भगवतः स्थूलं रूपं ते तुभ्यं मया व्याहृतं सम्यगभिहितम् ॥ ३३ ॥ ❀ ❀ ततो विलक्षणं रूपांतरमस्तीत्याह अत इति । अयं श्लोको जीवपरः अव्यक्तस्योक्तत्वादन्यथा समसंख्यानुपपत्तेः ॥ अतः स्थूलरूपात्परं परत्वेनावस्थितं सूक्ष्मतरं बालाग्रशतभागस्येति श्रुत्युक्तं मुक्तात्मस्वरूपं रूपांतरमपि भगवतोऽस्तीति शेषः । सूक्ष्मतरत्वं कुतः अव्यक्तं चक्षुरादिभिर्न व्यज्यते इत्यव्यक्तं चक्षुराद्यग्राह्यं तत्कुतः निर्विशेषणं शब्दस्पर्शरूपादिगुणाभावाच्छब्दादिविशेषवदेव चक्षुरादिग्राह्यमिति भावः । निर्विशेषत्वं कुतः ? वाङ्मनसः परं देवमनुष्यादिबुद्धिशब्दागोचरं तदपि कुतः ? अनादिमध्यनिधनमादिरुत्पत्तिः निधनं विनाशः मध्यमुत्पत्तिनिधनयोरंतरालावस्था एतदवस्थात्रयशून्यमित्यर्थः । तदपि वा कुतः ? नित्यं कालापरिच्छिन्नं कालपरिच्छिन्नमेवावस्थात्रयवदिति भावः ॥ ३४ ॥ ❀ ❀ एवं प्रकृतिमंडलोत्तीर्णं मुक्तात्मस्वरूपं विशोध्य संसृष्टासंसृष्टयोरुभयोः संसृष्टस्याविद्यावेष्टितत्वान्मुक्तस्वरूपस्य निष्पन्नयोगिध्येयतया योगयुग्मगसोनालंबनतया शुभाश्रयत्वं प्रतिषेधति अमुनी इति । ते तुभ्यं मयाऽनुवर्णिते भगवत अमुनी स्थूलसूक्ष्मे रूपे न गृह्णंति नोपासते उपासका इति शेषः ॥ उपासका उपास्यशुभाश्रयत्वेन गृह्णन्तीत्यर्थः । कुतः विपश्चितः सर्वज्ञस्य ब्रह्मणो मायासृष्टेः संकल्पसृष्टेर्भगवत्संकल्पायत्तत्वाद्बंधमोक्षयोरित्यर्थः ॥ मूर्तस्य संसृष्टचेतनस्याविद्यावेष्टितत्वेनाशुद्धत्वान्मुक्तस्वरूपस्य स्वतः शुद्धिविरहाच्च नोपासनाविषयत्वं किंत्वादित्यवर्णं इत्यादिवेदांतसिद्धं परमात्मनो मूर्तं रूपमेवोपास्यमित्यर्थः ॥ तथा च शौनकेन चतुर्मुखसनकादीनां जगदंतवर्तिनामविद्यावेष्टितत्वेन शुभाश्रयतानर्हतामुक्तवाबद्धानामेव [illegible] ... नोद्भूतबोधानां स्वस्वरूपापन्नानां च

स्वतः शुद्धिविरहाच्छुभाश्रयताप्रतिषेध उक्तः आब्रह्मस्तंबपर्यंता जगदंतर्व्यवस्थिताः । प्राणिनः कर्मजनितसंसारवशवर्तिनः यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः । अविद्यान्तर्गताः सर्वे तेहि संसारगोचराः ॥ पश्चादुद्भूतबोधाश्च ध्यानेनैवोपकारकाः । नैसर्गिको न वै बोधस्तेषामप्यन्यतो यतः । तस्मात्तदमलं ब्रह्म निसर्गादवबोधवदित्यादिना प्राधान्येनोपास्यत्वनिषेधः ॥ भगवद्विभूतित्वेनोपासनं त्विष्टमेव ॥ ३५ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या ।

त्वगाद्याः सप्तधातवः शरीरस्थितिहेतुभूता जाता इति शेषः । तेषां निदानमाह भूमीति । मुख्यप्राणाभिमन्यमानजडरूपप्राणोपादानकारणमाह प्राण इति । मुख्यप्राणेनाभिमन्यमानजडप्राणो व्योमांबुवायुभिः सृष्ट इति शेषः ॥ ३१ ॥ ❀ ❀ इंद्रियोपादानकारणमाह गुणेति । गुणाः सत्त्वादयः गुणकारणमाह बुद्धिरिति । विज्ञानरूपिणी निश्चयज्ञानरूपिणी ॥ ३२ ॥ ❀ ❀ ब्रह्मशरीरस्य भगवत्प्रतिमात्वं स्पष्टयति एतदिति । पंचभूताहंकारतत्त्वमहत्तत्त्वप्रकृत्याख्याष्टावरणावृतमेतत्स्थूलं विराडाख्यं ब्रह्मशरीरं भगवतो नारायणस्य प्रतिमारूपं ते तव मया व्याहृतमित्यन्वयः । तदुक्तं स्थूलं भगवतो रूपं ब्रह्मदेह उदाहृत तत्तंत्रत्वाच्चेति ॥ ३३ ॥ ❀ ❀ ननु तर्हि हरेर्निजरूपं कीदृशमत्राह अत इति । अतो ब्रह्मणो देहाच्च परं विलक्षणमपि स्थूलं किन्नेत्याह सूक्ष्मतममिति । सूक्ष्माणामप्यतिशयेन सूक्ष्मं अणोरणीयानिति श्रुतेः महत्परिमाणाभावेनाचाक्षुषत्वेन भक्तानां दिदृक्षोपासना व्यर्थेत्यत उक्तं अव्यक्तमिति । महत्परिमाणवस्त्वेऽपि स्वप्रसादमंतरेण चाक्षुषं न स्यादित्यर्थः । महतो महीयानिति श्रुतिः यमेवैष वृणुते तेन लभ्य इति श्रुतेः सूक्ष्मं शंखचक्रगदाधरमिति च, अन्यस्य कस्यचिदतिशयलक्षणविशेषणसंभवे कथमेतदित्यत उक्तं निर्विशेषणमिति । निर्गतं विशेषणमतिशयलक्षणं यस्मात्तत्तथोक्तं अस्य काव्यस्य कवयो न समर्था विशेषण इति दर्शनात् एवंविधस्यापि वस्तुत्वेन घटवदाद्यंन्तवत्त्वं किं न स्यादिति मंदाशंकापरिहारायोक्तं अनादीति । आदिमध्यांतशून्यं नैतदौपचारिकमत उक्तं नित्यमिति । नित्यमविनाशि । नित्यो नित्यानामिति श्रुतिः चाक्षुषस्वभावाभावेऽपि वागादिविषयत्वं स्यादत उक्तं वाङ्मनसोः परमिति वाङ्मनसयोरगोचरं सरस्वतीरुद्रोत्तमं वा ॥ ३४ ॥ ❀ ❀ प्रेक्षावद्गृहीतत्वेन ते उभे अपि ग्राह्ये इत्याशयेनोपसंहरति अमुनी इति । स्थूलसूक्ष्मे अमुनी भगवद्रूपे मया ते तवानुवर्णिते मायासृष्टे भगवदिच्छया प्रकृत्या च विरचिते जगति येऽविपश्चितः ज्ञानदुर्बलास्ते जना उभे अपि रूपे न गृह्णन्ति न जानंतीत्यन्वयः ॥ ३५ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

त्वगिति स्थूलं चर्म्म खलु चर्मोच्यते तदुपरिस्थितं सूक्ष्मं त्वगुच्यते प्राणस्तु व्योमादिमय इत्यर्थः ॥ ३१ ॥ ❀ ❀ प्रसङ्गादिन्द्रियाणां लक्षणमाह गुणात्मकानीति । गुणेषु विषयेषु आत्मा स्वभाव औत्पत्तिकः सम्बन्धो येषाम् । विकारा हर्षदुःखादयः, विज्ञानं विवेकशक्तिः, बुद्धीन्द्रियमनःप्राणानित्याद्युक्तेः पारमार्थिक्यपि सा भवतीति ज्ञेयम् ॥ ३२ ॥ ३३ ॥ ❀ ❀ अतः परमिति । निर्विशेषणं वर्णाकारादिशून्यम् यदेव व्यष्टिषु स्थूलेन सहोत्पत्त्यादियुक्तं न भवतीत्याह अनादीति । अतस्तदपेक्षया नित्यमपि निर्विशेषणत्वादेव वाङ्मनसः परम् । अत एव सूक्ष्मतमम् । अत एव चाव्यक्तम् ॥ ३४ ॥ ❀ ❀ अमुनी अमू ॥ ३५ ॥

## श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

अधिदैवादिभेदं विभज्योक्त्वा तदंशभूतानां धात्वादीनां स्वरूपमाह त्वगिति द्वाभ्याम् । त्वक्चर्मणोः स्थौल्यसूक्ष्मत्वाभ्यां भेदः कल्प्यः । त्वगादयोऽस्थ्यन्ता ये सप्तधातवस्ते भूम्यप्तेजोमयाः तेषाञ्च पाञ्चभौतिकत्वेऽपि वाय्वाकाशयोराहारादिरूपेण संवर्द्धकत्वाभावादेवमुक्तम् । प्राण इति व्योमाम्बुभ्यां पुष्टा वायव एव प्राण इत्यर्थः । तृतीयाबहुवचनमार्षम् ॥ ३१ ॥ गुणात्मकानि गुणेषु शब्दादिष्वात्मा प्रवृत्तिस्वभावो येषां तानि । गुणाः शब्दादयो भूतादिरहंकारः ततः प्रकर्षेण भवन्तीति तथा । सर्वविकाराणामात्मा सर्वान् विकारान् मन एव संजीवयतीत्यर्थः । विज्ञानं विवेकशक्तिस्तद्रूपिणी ॥ ३२ ॥ ❀ ❀ स्थूलं समष्टिसंज्ञम् । मह्यादिभिरिति महासमष्टिसंज्ञं महास्थूलम् ॥ ३३ ॥ ❀ ❀ स्थूलमुक्त्वा सूक्ष्ममाह, अत इति । सूक्ष्मतममित्यनेनैव सूक्ष्ममतिसूक्ष्मञ्चेति द्वितयं लभ्यते । अत्र सूक्ष्मं लिङ्गशरीरम् अतिसूक्ष्मं मायारूपं निर्विशेषणमित्यादिभिश्चतुर्भिर्विशेषणैरुक्तम् ॥ ३४ ॥ ❀ ❀ उपासनार्थं भगवत्यारोपितं रूपद्वयमपवदति । अमुनी इति द्विवचनं स्थूलयोः समष्टिमहासमष्ट्योरैक्यात् । न गृह्णन्ति प्राप्यत्वेन न स्वीकुर्वन्ति किन्तु उपासनार्थं प्रथमदशायामेव । यतो मायासृष्टे । तृतीयमतिसूक्ष्मं यत् तत्तु कारणं मायैव । किञ्च विपश्चितः शुद्धभक्तिमन्तः प्रथमदशायामपि नैव गृह्णन्ति किन्तु रामकृष्णनारायणनृसिंहादिरूपं शुद्धसत्त्वमेव साधनसाध्यदशयोर्गृह्णन्ति ॥ ३५ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

एवं समष्टिशरीरावयवहृदयस्थानेंद्रियादिभेदं विभज्योक्त्वा तदंशभूतानां धात्वादीनां स्वरूपमाह त्वगिति द्वाभ्याम्। त्वक् स्थूलं चर्म तदुपरिसूक्ष्मम् त्वगादयोऽस्थ्यंताः द्वंद्वैकवद्भावेन निर्दिष्टाः ते सप्तधातवः कथंभूताः भूम्यप्तेजोमयाः तेषां पांचभौतिकत्वेपि भूम्यादीनां भूयस्त्वोपलब्धेर्वाय्वाकाशयोराहारादिरूपेण संवर्द्धकत्वाभावाच्च प्राणस्तु व्योमांबुवायुभिः संपन्नो वायोरवस्थाविशेषः व्योमकार्यभूतः देहोऽबभावे स्थातुमक्षम इति भावः॥ ३१॥ ❀ ❀ गुणात्मकानि गुणेषु आत्मा येषां तानि गुणात्मकानि गुणाभिमुखस्वभावानि उत्पन्नानि तु राजसाहंकारादेवं भूतानींद्रियाणि यद्यपि शब्दादिगुणाभिमुखानि ज्ञानेंद्रियाणि संति तथापि कर्मेन्द्रियाणामपि भगवन्मूर्तिरूपादिग्रहणे गमनादिक्रियाद्वारोपयोगाद्गुणात्मकत्वम्। गुणाः शब्दादय भूतादिस्तामसाहंकारस्ततः प्रकर्षेण भवंतीति तथा मनः वैकारिकप्रभवं सर्वविकारात्मा सर्वेषां विकाराणां बंधमोक्षहेतूनामात्मा कारणम् मन एव मनुष्याणां कारणं बंधमोक्षयोः। बंधाय विषयासक्तं मुक्तये पुंसि वा रतमिति बचनात् बुद्धिर्विज्ञानरूपिणी विषेण ज्ञायतेऽनेनेति विज्ञानं ज्ञानवान्मां प्रपद्यते इति श्रीमुखोक्तं ज्ञानं तद्रूपिणी तत्करणभूतेत्यर्थः॥ ३२॥ ❀ ❀ उक्तं समष्टिरूपमुपसंहरति एतदिति। एतत्पूर्वोक्तम् भगवतः धारणाश्रयस्य पृथिव्यप्तेजोवायुव्योमाहंकारमहत्प्रकृतिमयैरष्टभिरावरणैर्बहिरावृतं स्थूलं रूपं ते तुभ्यं मया व्याहृतम्। अयमर्थः पुरुषनारायणादिपदैः पूर्वत्रोक्तस्य भगवत एवेदं शरीरं तत्र प्राणेन क्षिपता क्षुत्तृडंतराजायंत इत्यादयो जीवधर्मा तदभिमानिचतुर्मुखविषयाः समष्टिशरीरनिरूपणे अनुप्राणंति यं प्राणाः प्राणंतं सर्वजंतुषु। इत्यादिषु व्यष्टिस्मरणं हस्तौ रुरुहतुरित्यादिव्यष्टिदेहावयवस्मरणं च व्यष्टिजीवशरीरेऽपीयमेव गतिरिति सूचनार्थमित्यलं विस्तरेण॥ ३३॥ ❀ ❀ स्थूलं समष्टिशरीरमुक्त्वा सूक्ष्मं समष्टिशरीरमाह। अतः स्थूलरूपात्परमन्यत्सूक्ष्मतमं रूपमस्ति यतो निर्विशेषणं महदादिपृथिव्यंतविशेषणरहितम् अनादिमध्यनिधनम् अवस्थात्रयशून्यम् यतो नित्यं त्रैकालिकं वाङ्मनसः परम् तयोः कारणम् अव्यक्तं भगवच्छक्तिरूपप्रधानात्मकम्॥ ३४॥ ❀ ❀ एवं विराट्शरीरावयवेषु देवमनुष्यादिषु मोक्षप्रतिबंधकभूतरागद्वेषादिनिवृत्तये रूपद्वयविलक्षस्वरूपनिविष्टोपपादनाय च अमुनी स्थूलसूक्ष्मे भगवतो रूपे ते तुभ्यं मयानुवर्णिते प्रतिपादिते। ते उभयेऽपि विपश्चितः मायामयरूपद्वयाद्विलक्षणे भगवति निष्ठावंतः न गृह्णंति उपास्यत्वेन न स्वीकुर्वंति मायासृष्टे प्रकृतिमूले यावन्नजायेत परावरेऽस्मिन्विश्वेश्वरे द्रष्टरि भक्तियोगः तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेदिति स्थूलरूपध्यानस्य तद्विधेश्च पूर्वत्र दर्शितत्वाच्च॥ ३५॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं सर्वस्य त्रैविध्यं निरूप्य गोलकानामाधिभौतिकत्वमिन्द्रियाणामाध्यात्मिकत्वं देवतानामाधिदैविकत्वमिति समुदितस्य त्रिरूपत्वम्। त्वगादीनां केवलान्नमयत्वेनाऽत्रैविध्यमाशङ्क्य त्रैविध्यमाह—**त्वक्चर्ममांसेति**। त्वगुपरितना। चर्म स्थूलम्। रुधिरस्य पूर्वभावेऽपि मांस[1]भावात्प्रथमतो मांसनिरूपणम्। मेदो वृद्धयादिषु प्रसिद्धम्। मज्जाऽस्थ्यन्तर्गता। अस्थि प्रसिद्धम्। स्नाय्वप्रसिद्धं तस्य मेदोमध्येऽन्तर्भावः। तदस्थ्नामावरणरूपम्। एते सप्ताऽपि तेजोबन्नमयाः। तदाह—**भूम्यप्तेजोमया इति**। भूमिरन्नस्थानीया। पाञ्चभौतिकत्वेऽपि त्रिरूपत्वं क्रमात्। त्रिरूपा एव वा। प्राणस्य त्रैविध्यमाह—**व्योमाम्बुवायुभिरिति**। सर्वदेहव्यापकत्वेनाऽऽप्यायकत्वेन वायुस्वरूपत्वेन च प्राणोऽपि त्रिविधो व्योमाम्बुवायुभिः॥ ३१॥ ❀ ❀ इन्द्रियाणामपि त्रैविध्यमाह—**गुणात्मकानीन्द्रियाणीति**। त्रिगुणमयानीन्द्रियाणि सर्वाण्येव। अत एव लौकिकीं प्रवृत्तिं धर्मं भक्तिज्ञाने च जनयन्ति। अहङ्कारस्याऽपि त्रैविध्यमाह—**भूतादिप्रभवा गुणा इति**। भूतादिरहङ्कारः। भूतादीनां प्रभवो यत्र। भूतादेर्वा प्रभवो येषाम्। अहङ्कारस्य त्रैविध्यं स्पष्टमेव भूताद्यादिभेदात्। भूतादिशब्देनाऽहङ्कार एव वा। तस्माद् गुणत्रयोत्पत्तिः स्पष्टैव। तेन गुणजनकत्वेन त्रिगुणत्वं स्पष्टम्। मनसोऽपि त्रैविध्यमाह—**मनः सर्वविकारात्मेति**। सर्वे हि विकारास्त्रिविधाः। तन्मयत्वान्मनोऽपि त्रिविधम्। बुद्धिरपि त्रिविधेत्याह—**बुद्धिर्विज्ञानरूपिणीति**। विविधं ज्ञानं विज्ञानम्। तत्त्रिविधमिति तद्रूपिणी बुद्धिरपि त्रिविधा॥ ३२॥ ❀ ❀ एवं सर्वस्य[2] त्रैविध्यमुपपाद्य उपसंहरति—**एतद्भगवतो रूपमिति**। एतत्पूर्वनिर्दिष्टं सर्वमेव त्रिविधं भगवतो रूपं स्थूलो देहः। ते तुभ्यं त्वदर्थं मया व्याहृतमित्यर्थः। त्रिगुणत्वेन यन्नि[3]रूपणं तत्तवाऽधिकारेण निरूपितम्। भगवतो हि रूपं सर्वेषामधिकारानुसारेण सर्वरूपत्वेन भासते। "तं यथायथोपासत" इति श्रुतेः॥ ३३॥ ❀ ❀ एवं राज्ञे त्रैविध्यं निरूप्य सूक्ष्मं रूपं ततोऽप्युत्तमाधिकार्यर्थे अव्यक्तरूपं निरूपयति—**अतः परमिति**। मह्यादिसप्तावरणसहितात्स्थूलरूपात्परं व्यतिरिक्तमुत्कृष्टमेतन्नियामकम्। सूक्ष्मतमं आकाशाद्यपेक्षयाऽप्यतिसूक्ष्मम्। तस्य रूपविशेषनिरूपणं न कर्त्तव्यम्। यतस्तदव्यक्तं केनाऽपि धर्मेण न प्रकटम्। ततस्तस्य विशेषाः प्रकटा भविष्यन्तीत्याशङ्क्याऽऽह—**निर्विशेषणमिति**। सर्वविशेषणरहितम्। सर्वव्यावर्त्तकधर्मरहितमित्यर्थः। तस्योत्पत्त्यादिकं नाऽस्तीत्याह—**अनादिमध्यनिधनमिति**। आदिमध्यावसानरहितम्। नित्यं सदैकरूपम्। वाङ्मनसः परं सर्वव्यवहारातीतम्॥ ३४॥ ❀ ❀ एवं स्थूलसदृशं सर्वप्रकारेण सूक्ष्ममिति निरूपितम्। उभयमप्युपसंहरति—

---

१. मांसाभावादिति ख.। २. सर्वत्रैविध्यमिति ख.। निरूपणं तवेति ख.।

अमुनी भगवद्रूपे इति । मया ते त्वदर्थमेवाऽनुवर्णिते पूर्ववत् । अस्माकं तु नाऽनेनोपयोगः । तदाऽऽह—उभे अपि न गृह्णन्तीति । तत्र हेतुः—मायासृष्टे इति । मायायाः कार्यका[1]रणरूपायाः सम्बन्धेनैवंरूपो जात इति । यतस्ते विपश्चितः साक्षात्स्वरूपज्ञातारः॥३५॥

**श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः**

त्वक्चर्मेत्यत्र त्रिरूपा एव वेति । छान्दोग्ये त्रिवृत्करणस्यैवोक्तत्वात्तथेत्यर्थः । तथा सति पञ्चीकरणपक्षः कल्पान्तराभिप्रायः ॥ ३१ ॥ ❀ ❀ गुणात्मकानीत्यत्र भूतादिप्रभवा गुणा इत्यनेन गुणा भूतादिप्रभवा इत्येवं गुणोद्देश्यकत्रैविध्यविधाने गुणानां पुरुषपूर्वभावित्वाद्यथैकं पौरुषं त्रिधा भज्यतेति प्रतिज्ञाविरोध इति नात्र तद्विवक्षितम्, किन्तु, भूतादिपदस्याहङ्कारे प्रसिद्धत्वात्तत्त्रैविध्यमेवात्र विवक्षितमित्याशयेनाहुः अहङ्कारेत्यादि । तथा सति बहुवचनानुपपत्तिरित्याशङ्क्याहुः भूतादीनामित्यादि । भूतेन्द्रियमनसां प्रभावो येषु गुणेषु ते आहङ्कारिका गुणास्त्रिविधा इति तत्कारणभूतस्य तस्य त्रैविध्यमित्यर्थः । द्वितीयपक्षेऽप्येवम् । एवं व्याख्यानस्य प्रामाणिकत्वायाहुः अहङ्कारस्येत्यादि । द्वितीयपक्षोपष्टम्भायाहुः भूतादोत्यादि । अहङ्कार इति मूलाहङ्कारः ॥ ३२ ॥ ❀ ❀ एतद्भगवतो रूपमित्यत्र । ते व्याहृतमित्युक्तितात्पर्यमाहुः त्रिगुणत्वेनेत्यादि । अत्रायमाशयः, यदि राज्ञा कीदृशः पुरुषोत्तमः कथमाश्रयणीयः कथं भजनीय इति फलस्वरूपादिजिज्ञासया प्रश्नः कृतः स्यात्तदा श्रीशुकैर्मुख्या गुणातीता मूलरूपलीलैव निरूपिता स्यात् । राज्ञा तु सर्वात्मना किङ्कर्त्तव्यं म्रियमाणैश्च किङ्कर्त्तव्यमिति पृष्टम् । तत्राद्यः प्रश्नो मुख्यफलसाधकतया यद्विहितं साधनं तद्विषयत्वेन श्रीशुकैः निश्चितः । द्वितीयस्तु संसारभीत्या शीघ्रमभयेच्छया कृत इति निश्चितः । एवं सत्यभयमेवास्य मुख्यं फलमिति निश्चित्य तदुक्त्या मुख्यलीलाश्रवणानधिकारं वासुदेवलीलाश्रवणाधिकारं चावगत्य स्वलीलासहितवासुदेवस्य विहितभक्तिरूपं यच्छ्रवणादित्रयं तदेव कर्त्तव्यत्वेनोपदिश्य तादृशाधिकारे श्रवणादिविषयत्वेन वासुदेवस्य लीलातत्स्वरूपञ्च निरूपितमिति । ननु राज्ञस्तादृशाधिकारेपि श्रीशुकै'रहमेवासमेवे'—त्युक्तप्रकारेण कृपया मुख्यलीलैव कुतो नोक्तेत्यत आहुः भगवतो हीत्यादि । तथा च, तत्कथनेपि राज्ञोधिकाराभावाद् बोधो न भविष्यतीत्यतो नोक्तेत्यर्थः ॥ ३३ ॥ ❀ ❀ अतः परमित्यत्र मह्यादिसप्तावरणसहितादिति । मह्यादि—भूतानि उपरिष्टानि यानि सप्तावरणानि तत्सहितादित्यर्थः । ननु पूर्वं सप्तावरणसंयुत इति कथनादिदानीं चाष्टावरणकथनाद्विरोध इति चेन्न, पूर्वं विशेषस्य सप्तावरणान्युक्तानि, अत्र तु वैशेषिकाणां निरूपणाद्विशेषमप्यन्तर्भाव्य तथोक्तिरित्यविरोधात् । आदिमध्यावसानरहितमिति इयत्तारहितम् । एवं स्थूलसदृशमिति अव्यक्तपदे व्यक्तपर्युदासाद् व्यक्तसादृश्यं लभ्यत इति तथेत्यर्थः ॥ ३४ ॥ ❀ ❀ अमुनीत्यत्र । नन्वादिमध्यनिधनत्वे कथं न मायासृष्टत्वमित्याकाङ्क्षायामाहुः मायाया इत्यादि । तथा चाकारस्य तद्रूपप्रतिकृतिनिमित्तकत्वात्तत्सृष्टत्वम्, स्वरूपस्य तु पूर्वोक्तधर्मवत्त्वमित्युभयमप्यविरुद्धमित्यर्थः । नन्वेवं भगवद्रूपत्वेन तस्य वास्तवत्वे युष्मदादिभिरिदं कुतो न गृह्यते इत्यतो विपश्चित्पदार्थमाहुः साक्षादित्यादि । तथा च, मुख्याधिकारिणां तस्यानुपयोगात्ते न गृह्णन्ति । न त्ववास्तवत्वं तत्राप्यारोप्य न गृह्णन्तीत्यर्थः ॥ ३५ ॥

**श्रीगिरिधरकृता बालप्रबोधिनी**

तदेवमधिदैवादिभेदं विभज्योक्त्वा तदंशभूतानां धात्वादीनां स्वरूपमाह—त्वगिति द्वाभ्याम् । त्वगुपरितनं सूक्ष्मं चर्म । चर्म तदन्तस्स्थूलचर्म । त्वगादयोऽस्थ्यन्ताः द्वन्द्वैकवद्भावेन निर्दिष्टा ये सप्त धातवस्ते भूम्यप्तेजोमयास्तेषां कार्यभूताः । पाञ्चभौतिकत्वेऽपि वाय्वाकाशयोराहारादिरूपेण संवर्द्धकत्वाभावाद्भूम्यादित्रितयकार्यत्वमुक्तम् । प्राणस्तु व्योमाम्बुवायुभिरारब्ध इति शेषः ॥ ३१ ॥ ❀ ❀ इन्द्रियाणि चक्षुरादीनि सर्वाण्यपि गुणात्मकानि रजोगुणकार्याणि अतएव गुणकार्यशब्दादिविषयाभिमुखस्वभावानि । ननु चक्षुरादीन्द्रियाणां शब्दादिविषयाणां चाहङ्कारकार्यत्वं प्रसिद्धं तत्कथं गुणकार्यत्वमित्याशङ्क्याह—भूतादिप्रभवा गुणा इति । भूतादेरहङ्कारस्य प्रभवो येभ्यस्तथाभूता यतो गुणाः । अहङ्कारद्वारा गुणकार्यत्वं तेषामिति भावः । अतोऽहङ्कारद्वारा गुणकार्यत्वादेव मनोऽपि कामक्रोधलोभमोहशोकादिसर्वविकाराणामात्मा स्वरूपमेव । बुद्धिरपि विविधज्ञानरूपिणी, न तु परमार्थग्राहिणी ॥ ३२ ॥ ❀ ❀ उक्तमुपसंहरति—एतदिति मह्यादिभिः पृथ्व्यप्तेजोवाय्वाकाशाहङ्कारमहदव्यक्तरूपैर्दशगुणोत्तरवृद्धैरष्टभिः बहिरावृतमेतद्ब्रह्माण्डात्मकं भगवतः स्थूलं रूपं मया ते तुभ्यं व्याहृतं कथितमित्यन्वयः ॥ ३३ ॥ ❀ ❀ एवं स्थूलं स्वरूपमुक्त्वेतो विलक्षणं सूक्ष्मं समष्टिलिङ्गशरीरमप्यस्तीत्याह—अतः परमिति । अतः स्थूलाद्रूपात् परमन्यदस्य कारणभूतं नित्यसदैकरूपमपक्षयादिशून्यं वाक् च मनश्चेति द्वन्द्वैक्यं तस्मात्परं तदगोचरं सर्वव्यवहारातीतं भगवतो रूपमस्तीति शेषेणान्वयः । व्यवहारातीतत्वे हेतुमाह—अव्यक्तमिति । न चक्षुरादिभिर्व्यज्यते इति तथा । तत्र हेतुमाह—सूक्ष्मतममिति । तत्रापि हेतुमाह—निर्विशेषणमिति, सर्वव्यावर्त्तकधर्मरहितमित्यर्थः । नित्यत्वे हेतुमाह—अनादिमध्यनिधनमिति, उत्पत्तिस्थितिलयशून्यमित्यर्थः ॥ ३४ ॥ ❀ ❀ उपासनार्थमुक्तं भगवतो रूपद्वयमपवदति—अमुनी इति । अमुनी स्थूलसूक्ष्मे भगवतो रूपे उपासनार्थं मया ते तुभ्यं अनुवर्णिते । ते उभे अपि विपश्चितो विवेकिनो न गृह्णन्ति परमार्थतो न स्वीकुर्वन्ति । कुतः ? हि यस्मात् मायासृष्टे प्रकृतिकार्यभूते इत्यर्थः ॥ ३५ ॥

---

१. कार्यकरणेति ख. ।

## हिन्दी अनुवाद

विराट् पुरुषके शरीरमें पृथ्वी, जल और तेजसे सात धातुएँ प्रकट हुईं—त्वचा, मांस, रुधिर, मेद, मज्जा अस्थि आदि। इसी प्रकार आकाश, जल और वायुसे प्राणोंकी उत्पत्ति हुई ॥ ३१ ॥ ❀ ❀ श्रोत्रादि सब इन्द्रियाँ शब्दादि विषयोंको ग्रहण करनेवाली हैं। वे विषय अहङ्कारसे उत्पन्न हुए हैं। मन सब विकारोंका उत्पत्तिस्थान है और बुद्धि समस्त पदार्थोंका बोध करानेवाली है ॥ ३२ ॥ ❀ ❀ मैंने भगवान्‌के इस स्थूल रूपका वर्णन तुम्हें सुनाया है। यह बाहरकी ओरसे पृथ्वी, जल, तेज, वायु, आकाश, अहङ्कार, महत्तत्व और प्रकृति— इन आठ आवरणोंसे घिरा हुआ है ॥ ३३ ॥ ❀ ❀ इससे परे भगवान्‌का अत्यन्त सूक्ष्म रूप है। वह अव्यक्त, निर्विशेष, आदि, मध्य और अन्तसे रहित एवं नित्य है। वाणी और मनकी वहाँतक पहुँच नहीं है ॥ ३४ ॥ ❀ ❀ मैंने तुम्हें भगवान्‌के स्थूल और सूक्ष्म—व्यक्त और अव्यक्त जिन दो रूपोंका वर्णन सुनाया है, ये दोनों ही भगवान्‌की मायाके द्वारा रचित हैं। इसलिये विद्वान् पुरुष इन दोनोंको ही स्वीकार नहीं करते ॥ ३५ ॥

**स वाच्यवाचकतया भगवान् ब्रह्मरूपधृक्। नामरूपक्रिया धत्ते सकर्माकर्मकः परः ॥ ३६ ॥**
**प्रजापतीन्मनून् देवानृषीन् पितृगणान् पृथक्। सिद्धचारणगन्धर्वान् विद्याध्रासुरगुह्यकान् ॥ ३७ ॥**
**किन्नराप्सरसो नागान् सर्पान् किम्पुरुषोरगान्। मा[1]तृरक्षःपिशाचांश्च प्रेतभूतविनायकान् ॥ ३८ ॥**
**कूष्माण्डोन्मादवेतालान् यातुधानान् ग्रहानपि। खगान्मृगान् पशून् वृक्षान् गिरीन्नृप सरीसृपान् ॥ ३९ ॥**
**द्विविधाश्चतुर्विधा येऽन्ये जलस्थलनभौकसः। कुशलाकु[2]शला मिश्राः कर्मणां गतयस्त्विमाः ॥ ४० ॥**

## श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

यद्रूपगुणकर्मक इति यदुक्तं भगवता ब्रह्माणं प्रति तत्प्रपंचयितुं ब्रह्मादिरूपाणि तत्कर्माणि चाह स इत्यादिना इत्थंभावेनेत्यतः प्राक्तनेन ग्रंथेन। स भगवान् ब्रह्मरूपधृक् सन् वाच्यवाचकतया नामानि वाच्यतया रूपाणि क्रियाश्च धत्ते। सृजतीत्यर्थः। मायया सकर्मा सव्यापारः सन् वस्तुतस्त्वकर्मकः ॥ ३६ ॥ ❀ ❀ एतत्प्रपंचयति प्रजापतीनिति सार्धैस्त्रिभिः। द्वितीयांतानां धत्त इत्यनेनान्वयः। तत्र प्रजापत्यादीनि नामानि तत्तद्वाच्यानि रूपाणि तत्तत्कर्माणि च ज्ञेयानि पृथक् तत्तदवांतरभेदेन ॥ ३७ ॥ ३८ ॥ ❀ ❀ गिरीनित्यस्यानंतरं नृपेति संबोधनम् ॥ ३९ ॥ ❀ ❀ द्विविधाः स्थावरजंगमरूपेण। तत्र चतुर्विधाः जरायुजांडजस्वेदजोद्भिज्जरूपेण। जलस्थलनभांस्योकांसि येषां तानपि धत्त इति पूर्वेणान्वयः। यच्च राज्ञा पृष्टं "यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम" इति तस्यापि प्रसंगादनेनैवोत्तरमाह। कुशला उत्तमाः, अकुशला नीचाः। मिश्रा इति पदांतरम्। मिश्रा मध्यमाः, कर्मणां पुण्यपापमिश्राणां गतयः फलानि ॥ ४० ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

अथ व्यष्टीनां स्थितिसंहारानाह—स इत्यारभ्येत्थंभावेत्यंतेन। स महदादिस्रष्टा पुरुषः परः परमेश्वरः अकर्मकः प्राकृतक्रियाहीनोपि ब्रह्मरूपधृक् सन्सकर्मा सव्यापारः वक्ष्यमाणानां व्यष्टिजीवानां धत्ते सृजतीत्यर्थ इति। धातूनामनेकार्थत्वात्सर्जनेपि दधातिः प्रयुक्त इति भावः। अत्र संदर्भेण अत एव तत्संबंधिसर्वमपि भगवद्रूपत्वेनैव कल्पितमित्यवतरणिकामुक्त्वा यद्रूपगुणकर्मक इत्यत्र त्वप्राकृतानि चतुःश्लोक्यां श्रीभगवता प्रतिज्ञातानि स्वयमेव दर्शितानीति व्याख्यातमेव ॥ ३६ ॥ ❀ ❀ एतद्बहुरूपगुणकर्मकत्वम्। सार्द्धत्रिकस्यान्वयः ॥ प्रजापतीन्दक्षादीन्। मनून्स्वायंभुवादीन्। देवानिंद्रादीन्। ऋषीन्मरीच्यादीन्। पितृगणानर्यमादीन्। सिद्धान्कपिलादीन्। चारणान्सुप्रज्ञादीन्। गंधर्वांश्चित्ररथादीन्। विद्याध्रान्सुदर्शनादीन्। असुरान्नमुच्यादीन्। गुह्यकान्कामुकादीन् ॥ ३७ ॥ ❀ ❀ किन्नरान्मर्कटादीन्। अप्सरसो मंजुघोषाद्याः। नागसर्पोरगाणामवांतरभेदो हि सर्पसिद्धांतग्रंथाज्ज्ञेयः। नागाश्शेषाद्याः। सर्पास्तक्षकाद्याः। उरगाः कुंडधराद्याः। किंपुरुषाः वनचरपुरुषाद्याः। मातरो ब्राह्म्याद्याः। रक्षांसि सुमाल्यादीनि। पिशाचा घंटाकर्णाद्याः। प्रेता दुर्मरणमृताः। भूता भृंग्याद्या रुद्रगणाः। विनायका विघ्नविशेषाः ॥ ३८ ॥ ❀ ❀ कूष्मांडाः खट्वलादयः। उन्मादाः कालकर्गादयः। वेतालाः सुवेगाद्याः शिवगणविशेषाः। यातुधाना रक्षोभेदा मृगकर्णाद्याः। ग्रहा बालग्रहाः पूतनाद्या वृद्धग्रहा वैरूप्याद्यास्सूर्याद्या वा। खगा गरुडाद्याः। मृगा हरिणाद्याः पशवो गवाद्याः। वृक्षा अश्वत्थाद्याः। गिरयो मेर्वाद्याः। सरीसृपाः सहस्रपादाद्याः। हे नृपेति। राज्ञां हि नृपालनप्रसंगेन सर्वं ज्ञातप्रायं भवतीति भावः ॥ ३९ ॥ ❀ ❀ ननु कथमेवं विषयान्सृजति तत्राह—इमाः कर्मणां गतयः कुशलाः पुण्यफलभूताः अकुशलाः पापफलभूता मिश्रास्तदुभयरूपाः जीवाः प्रतिस्वकर्मानुरूपाः गतीः प्राप्नुवंति, स्रष्टुः को दोष इति भावः ॥ ४० ॥

---

१. प्रा० पा० मातृरक्षः। २. प्रा० पा० कुशलाकुशलमिश्राणां।

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

यद्रूपेति पूर्वाध्यायस्यैकत्रिंशश्लोकः ॥ ३६ ॥ ❀ ❀ प्रजापतीन् मरीचिप्रमुखानित्यर्थः ॥ ३७—४० ॥

### श्रीमद्वीरराघवव्याख्या

स्थूलत्वं भगवद्रूपत्वमेवोपपादयितुं भगवत एव ब्रह्मादिरूपेण स्रष्टृत्वादिकमाह स इति । भगवान् वाच्यवाचकतयाऽवस्थितः जगच्छरीरकत्वाद्वाच्यतयाऽवस्थितः आकाशशरीरकत्वाच्च वाचकाकाशगुणशब्दरूपेणावस्थितः ब्रह्मरूपधृक् नामरूपक्रिया धत्ते । ब्रह्मरूपधृगित्यनेन प्रागुक्तव्यष्टिश्चतुर्मुखशरीरकादित्यवगम्यते नाम देवादिनाम रूपं देवादिरूपं क्रियास्तेषां कृत्यानि धत्ते स्वपर्यंतनामक्रियाः व्याकरोदित्यर्थः । यथा नामरूपं च भूतानां कृत्यानां च प्रपंचनम् । वेदशब्देभ्य एवादौ देवादीनां चकार स । इति कथंभूतो विधत्तेऽकर्मकः अकर्मवश्यः सकर्मा संकल्पमात्रव्यापारकः ॥ ३६ ॥ ❀ ❀ नामरूपक्रियाधानमेव प्रपंचयति प्रजापतीनित्यादिना । द्वितीयांतानां धत्ते इत्यनेनान्वयः तत्र प्रजापत्यादिनामानि तद्वाच्यानि रूपाणि तत्कर्माणि च ज्ञेयानि पृथक्तत्तदवांतरभेदेन । गिरीनित्यस्यानंतरं नृपतिसंबोधनम् ॥ ३७ ॥ ३८ ॥ ३९ ॥ ❀ ❀ चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जरूपेण सा चतुर्विधा पुमान्न देवो न नरो न पशुर्न च पादपः। चतुर्विधो विभेदोऽयं इत्युक्तदेवादिरूपेण वा चतुर्विधाः जलस्थलनभांस्योकांसि येषां तान् धत्ते इति पूर्वेणान्वयः । नन्वेकरूपेणैव किं न धत्ते इत्यत आह कुशलेत्यादिना । कर्मणां क्षेत्रज्ञपुण्यापुण्यरूपाणां कर्मणां पराः प्राप्या गतयः फलानि कुशला उत्तमाः अकुशलाः नीचाः मिश्राः मध्यमाः । कर्मणां विचित्रत्वात्तत्फलानामपि वैचित्र्यमिति भावः ॥ ४० ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

मायामये जगति विपश्चित उभे कार्यकारणरूपे न गृह्णंति नांगीकुर्वंतीत्येतदपव्याख्यानं प्रत्याह स वाच्येति । नामैव वाचकत्वेन नामरूपक्रिया अपि वाच्यत्वेन हरिर्देवो नियामयति चैकराट् । कर्तृत्वात्तु सकर्मासौ निष्फलत्वादकर्मक इत्यनेन व्याख्यातोऽयं श्लोकः । निष्फलत्वात्कर्मफलानपेक्षत्वात् । नन्वेकस्य नानानामरूपक्रियाकारकत्वं मायामंतरेण कथं संजाघटीयत उक्तं ब्रह्मेति । अंतर्बहिर्व्याप्तं यद् ब्रह्मशब्दवाच्यं रूपं तस्य धारकत्वाद्घटत इत्यर्थः । ब्रह्म वेदतपस्तत्त्वमित्यतो वेदादिशब्दराशिघृतत्वाद्वा अनेन प्रपञ्चस्य वेदादिसिद्धत्वेन सत्यत्वात्तस्य मायामयत्वे वेदादेरप्रमाणत्वेन तदुक्तदैक्यस्यापि तथात्वेन विश्वस्यैव सत्यत्वं न्यायप्राप्तमित्युक्तं भवति ॥ ३६ ॥ ❀ ❀ उक्तमेव विशदयति प्रजापतिरित्यादिना । सर्वनामरूपक्रिया यतः प्रजापत्यादिनामरूपक्रियाश्च धत्त इति पूर्वेणान्वयः ॥ ३७ ॥ ❀ ❀ मातरोऽदित्यादयो ब्राह्मयाद्या वा पिशाचा घंटाकर्णादयः भूता भृंगिरुद्रानुगाः विनायका विघ्नादयः ॥ ३८ ॥ ❀ ❀ कूष्मांडा रुक्मांङ्गादयः । उन्मादाः कालकर्णादयः । यातुधाना रक्षोविशेषा भृगुकुत्सादयः । ग्रहा अष्टादश नव ग्रहा वा । हे नृप नृपाः प्रियव्रतादयो वा सरीसृपाः सहस्रपादादयः ॥ ३९ ॥ ❀ ❀ संख्यातुमशक्यत्वात्सामान्यतो निर्दिशति द्विविधा इति । व्योमर्क्षपथमाकाशनभः शब्दगुणोऽम्बरम् । पुष्करं गगनं विष्णोः पदं द्यौरात्रमुच्यते इत्यभिधानान्नभःशब्द उभयलिंगः । तेषामुत्तमादित्वे कारणमाह कुशलेति । उक्ता इमा जातयः कुशलादिकर्मणां गतयः फलानि ॥ ४० ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

अत एतत्सम्बन्धि सर्वमपि भगवद्रूपत्वेनैव कल्पितमित्याह स वाच्येति । यद्रूपगुणकर्म्मक इत्यत्र तु अप्राकृतानि चतुःश्लोक्यां श्रीभगवता प्रतिज्ञातानि स्वयमेव दर्शितानीति व्याख्यातमेव ॥ ३६ ॥ ❀ ❀ प्रजापतीनिति सार्द्धत्रिकम् ॥ ३७—४० ॥

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

अथ व्यष्टीनां सृष्टिस्थितिसंहारानाह स इत्यादिना इत्थम्भावेनेत्यन्तेन । स महदादिस्रष्टा पुरुषः परः परमेश्वरः अकर्मकः प्राकृतक्रियाहीनोऽपि ब्रह्मरूपधृक् सन् सकर्म्मा सव्यापारः वाच्यवाचकतया वाच्यतया रूपाणि क्रियाश्च वाचकतया नामानि वक्ष्यमाणानां व्यष्टिजीवानां धत्ते सृजति ॥ ३६ ॥ ❀ ❀ तानेव दर्शयति प्रजापतीनिति । द्वितीयान्तानां धत्ते इत्यनेनान्वयः ॥ ३७ ॥ ३८ ॥ ❀ ❀ नृपेति सम्बोधनम् । द्विविधा स्थावरजङ्गमरूपेण । चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जरूपेण त्रिविधाश्च जलस्थलनभौकोरूपेण येऽन्ये तानपि धत्ते इति पूर्व्वेणैवान्वयः ॥ ३९ ॥ ❀ ❀ ननु कथमेवं विषयान् सृजति तत्राह । इमाः कर्मणां गतयः कुशलाः पुण्यफलरूपाः अकुशलाः पापफलरूपाः मिश्रास्तदुभयरूपाः । जीवाः प्रतिस्वकर्मानुरूपाः गतीः प्राप्नुवन्ति, स्रष्टुः को दोष इति भावः । एतेन यावत्यः कर्मगतयो यादृशीर्द्विजसत्तमेति राज्ञः प्रश्नस्योत्तरं दत्तमिति ज्ञेयम् ॥ ४० ॥

### श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः

यावत्यः कर्मगतयो यादृशी द्विजसत्तमेति राजप्रश्नस्योत्तरं वदन् स्वांशाभ्यां ब्रह्मरुद्राभ्यां स्वावतारैश्च भगवतो गंतव्यभूतनामरूपस्रष्टृत्वादिकं दर्शयति स इत्यादिना । संयच्छति च कालेन घनानीकमिवानिल इत्यंतेन । स भगवान् ब्रह्मरूपधृक् सन् वाच्यवाचकतया नामरूपक्रिया धत्ते वाचकतया नामानि वाच्यतया रूपाणि क्रियाश्च धत्ते सृजतीत्यर्थः । सकर्मा सव्यापारः । ननु तर्हि जीववत्कर्मवश्यः स नेत्याह अकर्मक इति । कर्मवश्यो नेत्यर्थः । तत्र हेतुः पर इति । पूर्ण इत्यर्थः ॥ ३६ ॥ ❀ ❀ नामरूपसृष्टिं प्रपञ्चयति प्रजापतीनित्यादिना । द्वितीयांतानां धत्ते इत्यनेनान्वयः । तत्र च प्रजापत्यादीनि नामानि तद्वाच्यानि रूपाणि तत्कर्माणि च बोध्यानि पृथक्तत्तदवांतरभेदेन ॥ ३७ ॥ ३८ ॥ ३९ ॥ ❀ ❀ येऽन्ये द्विविधाः स्थावराः जंगमाश्चेति । विख्याताः चतुर्विधाः जरायुजाण्डजस्वेदजोद्भिज्जाः जलस्थलनभांस्योकांसि येषां ते त्रिविधाः जलचराः भूचराः खेचराः तानपि धत्ते इति पूर्वेणान्वयः । इमाः प्रजापत्यादिनामरूपलक्षणाः कर्मणां जीवकर्तृकाणां पुण्यमिश्राणां कुशलाः उत्तमाः अकुशलाः नीचा मिश्राः मध्यमाः गतयः फलानि ॥ ४० ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

ननु तर्हि भगवान् कथमेवं रूपं करोतीत्याशङ्क्याऽऽह—स वाच्यवाचकतयेति । स भगवान् । वाच्यवाचकत्वं अनामरूपात्मनि नामरूपे विधाय तादृशो भूत्वा जगतः पालनादिकं करोतीति वाच्यवाचकतया स्वरूपाप्रच्युत एव ब्रह्मरूपं सच्चिदानन्दं बिभ्रत् सर्वेषामपि जीवानां नामरूपक्रिया धत्ते । नामानि रूपाणि क्रियाश्च स्वसदृशान्करोतीत्यर्थः । स्वयं च सकर्मा । न च पुनरेतादृश एव । यतो वस्तुतोऽकर्मकः सर्वकर्मरहितः । सर्वेषां नियामकश्च । एतादृशोऽपि सर्वानुत्पादयितुं त्रिगुणात्मकं अव्यक्तं च रूपं करोतीत्यर्थः ॥ ३६ ॥ ❀ ❀ ननु के ते येषामर्थे स्वयं त्रिविधो जात इति । तत्राऽऽह—प्रजापतीनित्यादिभिस्त्रिभिः । एके प्रत्येकगुणप्रधानाः । एके मिश्राः । तत्र प्रत्येकान् श्लोकत्रयेण गणयति । तत्राप्युत्तरोत्तरहीनता । प्रथमं प्रजापतयो मरीच्यादयो गुह्यकान्ताः सत्त्वापकर्षरूपाः । किन्नरादयो विनायकान्ता राजसाः । कूष्माण्डादयः [illegible] । अन्ये नरदेवेषु मिश्रा इति तानेकेन गणयति—द्विविधा इति स्थावरजङ्गमभेदेन । चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जाः । ये पूर्वोक्तादन्ये ते सर्वे सङ्करजाता इति ज्ञेयाः । तथापि स्थानतस्त्रैगुण्यं तदाह—जलस्थलनभौकस इति । जलादयः स्थानानि येषाम् । तत्र जलस्था राजसाः । स्थलस्थाः सात्त्विकाः । नभस्थास्तामसाः ॥ ३७ ॥ ३८ ॥ ३९ ॥ ❀ ❀ एवं स्वरूपतः स्थानतश्च सर्वेषां त्रैविध्यमुपपाद्य फलतोऽपि त्रैविध्यमाह—कुशलाकुशला मिश्रा इति । कर्मणां त्रिविधा गतिः सात्त्विकादिविभेदेन । सात्त्विकं कर्म शुभफलं कुशलशब्देनोच्यते । तामसं कर्माऽशुभफलमकुशलशब्देनोच्यते । राजसं कर्मोभयफलं मिश्रशब्देनोच्यते । एवं कर्मगतयः कर्मसाधनफलप्रकारास्त्रिविधाः । कुशलाश्चाऽकुशलाश्च कुशलाकुशलाः । मिश्रा[1] अभिन्नाः । कर्मणामिमा एव गतयो न त्वन्याः । तासां मूलनामान्याह—सत्त्वं रजस्तम इति । कुशलाकुशलमिश्राणामेतानि मूलनामानि । सत्त्वं कुशलनाम । तमोऽकुशलनाम । रजो मिश्रनाम । तत्कृतदेहा अपि त्रिविधा इत्याह । सुरनृनारकाः । सत्त्वं रजस्तम इति तिस्र इत्युभयत्र सम्बध्यते । सुराः सत्त्वम् । नरा रजः । नारकास्तम इति तिस्र एव । पश्वादयो नारकमध्य एव ॥ ४० ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

स वाच्यवाचकतयेत्यत्र । ननु तर्हीत्यादि । साक्षात्स्वतः सर्वरूपत्वे सति मायाप्रतिकृतिद्वारा केन प्रकारेण करोतीत्याशङ्क्य तत्र प्रकारमाहेत्यर्थः । वाच्यवाचकत्वमित्यस्य विवरणमनामरूपात्मनि नामरूपे इति । तथा चानामरूपेऽक्षरे मायासम्बन्धेन नामरूपे पूर्वोक्तरीत्या विधाय तत्तद्गुणावतारादिरूपो भूत्वा तथा तथा तत्तत्करोतीत्येवं परार्थसृष्टौ प्रकार इत्यर्थः ॥ ३६ ॥ ❀ ❀ द्विविधा इत्यत्र तथापीति द्वैविध्ये चातुर्विध्ये च ॥ ३९ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

उक्तमेव भगवतः सर्वात्मकत्वं दृढीकर्तुं तस्यैव ब्रह्मादिरूपेण सृष्ट्यादिकर्तृत्वमाह—स इत्यादिना । इत्थम्भावेनेत्यतः प्राक्तनेन ग्रन्थेन । स परः प्रकृतिगुणसम्पर्करहितः अकर्मकः सर्वव्यापाररहितोऽपि ब्रह्मरूपधृक् सकर्मा सव्यापारश्च सन् प्राणिनां वाचकतया देवमनुष्यादिनामानि तद्वाच्यतया देवादिरूपाणि तत्तदधिकारेण तत्तत्फलहेतुभूताः क्रियाश्च धत्ते, सृजतीत्यर्थः ॥ ३६ ॥ ❀ ❀ एतदेव प्रपञ्चयति—प्रजापतीनिति सार्धैस्त्रिभिः । द्वितीयान्तानां धत्ते इत्यनुषङ्गेणान्वयः तत्र प्रजापत्यादीनि नामानि तद्वाच्यानि रूपाणि तत्तत्कर्माणि च ज्ञेयानि । पृथक् तदवान्तरभेदेन ॥ ३७ ॥ ३८ ॥ ❀ ❀ गिरीनित्यस्यानन्तरं नृपेति सम्बोधनं विश्वासार्थम् ॥ ३९ ॥ ❀ ❀ ये चोक्तेभ्योऽन्ये द्विविधाः स्थावरजङ्गमभेदेन, चतुर्विधा जरायुजाण्डजस्वेदजोद्भिजरूपेण, जलस्थलनभांस्योकांसि स्थानानि येषां तानपि विधत्ते इति पूर्वेणैवान्वयः । यच्च राज्ञा पृष्टं 'यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम' इति तस्यापि प्रसङ्गादत्रैवोत्तरमाह—कुशलेति । कर्मणां पुण्यपापमिश्राणां त्विमा गतयः फलानीत्यर्थः ॥ ४० ॥

---

१. मिश्रा भिन्ना इति क. ।

## हिन्दी अनुवाद

वास्तवमें भगवान् निष्क्रिय हैं। अपनी शक्तिसे ही वे सक्रिय बनते हैं। फिर तो वे ब्रह्माका या विराट् रूप धारण करके वाच्य और वाचक—शब्द और उसके अर्थके रूपमें प्रकट होते हैं और अनेकों नाम, रूप तथा क्रियाएँ स्वीकार करते हैं॥ ३६॥ ❀ ❀ परीक्षित्! प्रजापति, मनु, देवता, ऋषि, पितर, सिद्ध, चारण, गन्धर्व, विद्याधर, असुर, यक्ष, किन्नर, अप्सराएँ, नाग, सर्प, किम्पुरुष, उरग, मातृकाएँ, राक्षस, पिशाच, प्रेत, भूत, विनायक, कूष्माण्ड, उन्माद, वेताल, यातुधान, ग्रह, पक्षी, मृग, पशु, वृक्ष, पर्वत, सरीसृप इत्यादि जितने भी संसारमें नाम-रूप हैं, सब भगवान्के ही हैं॥ ३७-३९॥ ❀ ❀ संसारमें चर और अचर भेदसे दो प्रकारके तथा जरायुज, अण्डज, स्वेदज और उद्भिज्ज भेदसे चार प्रकारके जितने भी जलचर, थलचर तथा आकाशचारी प्राणी हैं, सबके सब शुभ-अशुभ और मिश्रित कर्मोंके तदनुरुप फल हैं॥ ४०॥

**सत्त्वं रजस्तम इति तिस्रः सुरनृनारकाः। तत्राप्येकैकशो राजन् भिद्यन्ते गतयस्त्रिधा।**
**यदैकैकतरोऽन्याभ्यां स्वभाव उपहन्यते॥४१॥**
**पुष्णाति स्थापयन् विश्वं तिर्यङ्नरसुरात्मभिः[1]। स एवेदं जगद्धाता भगवान् धर्मरूपधृक्॥४२॥**
**संनियच्छति कालेन[2] घनानीकमिवानिलः। ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः॥४३॥**
**इत्थंभावेन कथितो भगवान् भगवत्तमः। नेत्थंभावेन हि परं द्रष्टुमर्हन्ति सूरयः॥४४॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

सत्त्वादिभेदेन कर्मगतिवैचित्र्यं प्रपंचयति सत्त्वमिति सार्धेन। सत्त्वादयस्तिस्रो गतयः सुरादिशब्दा ऋष्यादीनामुपलक्षणार्थाः। अन्याभ्यां गुणाभ्यां स्वभावो गुण उपहन्यतेऽनुविध्यते॥ ४१॥ ❀ ❀ ब्रह्मरूपेण स्रष्टृत्वमुक्त्वा विष्णुरूपेण पालकत्वमाह। स एव भगवांस्तिर्यगाद्यवतारैरिदं विश्वं स्थापयन्पालयन्धर्मरूपेण पुष्णाति भोगैः संवर्धयति॥ ४२॥ ❀ ❀ रुद्ररूपेण संहर्तृत्वमाह। तत इति। आत्मनः सकाशाद्यदिदं सृष्टं तत्संनियच्छति संहरति॥ ४३॥ ❀ ❀ कर्तृत्वाद्यपवादेन दशमस्य शुद्धिमाह। इत्थंभावेन स्रष्टृत्वादिरूपेण। "तस्माद्वा एतस्मादात्मन आकाशः संभूतः। सोऽकामयत बहु स्यां प्रजायेय" इत्यादिश्रुत्या प्रतिपादितः। सूरयस्तु परं केवलमेवंरूपेणैव द्रष्टुं नार्हंति॥ ४४॥

### श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

तत्रापि तिसृषु गतिष्वपि एकैकशो गतयस्त्रिधा भिद्यंते नवसंख्याका भवंति। अन्याभ्यां स्वभावाभ्यां तथाहि शुद्धसत्त्वा रजोमिश्रसत्त्वा तमोमिश्रसत्त्वा च एवं शुद्धराजसी तमोमिश्रराजसी सत्त्वमिश्रराजसी च तथैव शुद्धतामसी रजोमिश्रतामसी सत्त्वमिश्रतामसी चेति। यथा रजःस्वभावोपि नरः सत्त्वस्वभावमिश्रणाधिक्याद् ब्राह्मणः, रजोधिक्यात्क्षत्रियः, रजस्तमसोराधिक्याद्वैश्यः, तमोधिक्याच्छूद्र इति॥ ४१॥ ❀ धर्मो विष्णुः 'धर्मो धर्मविदुत्तमः' इति सहस्रनामसु पठितत्वात्। धर्मतो रक्षाऽधर्मतो नाशः धर्माधर्माभ्यां सृष्टिरिति द्योतयति। तिर्यगादीनां स्वभावैरिति पशुपक्षिणोपि स्वसुतमित्रकलत्रादीन्पालयंति॥ ४२॥ ४३॥ ❀ ❀ सूरयः केचिच्छुद्धभक्तिमंतस्तु परं केवलं विश्वस्रष्टृत्वादिरूपेण द्रष्टुं नार्हंति, किन्तु वैकुंठादौ स्वधामनि चिद्विभूतौ स्वप्रेयस्यादिभिर्विहरमाणत्वेनैवेत्यर्थः॥ ४४॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

[ तत्रापीति अत्र तत्तदवान्तरभेदेऽपि त्रिधेत्याह इत्याभासो ज्ञेयः॥ त्रिधा भिद्यन्ते इति। एतदपि स्थूलदृष्ट्यैवोक्तम्। वस्तुतस्तु तत्तद्गुणतारतम्येन तत्तत्पुण्यपापतारतम्यानुसारेण नानाविधगतयो भवन्तीत्यर्थः॥ ] अनुविध्यते इति। यथा मनुष्याणां स्वभावतो राजसत्वेऽपि गुणान्तरानुवेधात् सात्त्विकत्वं राजसत्वञ्च प्रतीयते॥ ४१॥ ४२॥ ❀ ❀ [ कालाग्निरुद्रात्मेति। कालः प्रलयकालः तत्साधनकोऽग्निः संकर्षणमुखानलः तत्र रुद्रात्मा रुद्ररूपेणाविर्भूत इत्यर्थः॥ ४३॥ ] ❀ ❀ एवंरूपेणैवेति। केवलं विश्वस्रष्टृत्वादिरूपेणैव न पश्यन्ति, किन्तु निष्फलं निष्क्रियं शांतं निरवद्यं निरञ्जनमित्यादिश्रुत्यनुसारेण विशुद्धमपि पश्यन्तीति भावः॥ ४४॥

---

१. प्रा० पा०—सुरादिभिः। २. प्रा० पा०—तत्काले।

## श्रीमद्वीरराघवव्याख्या

एतदेव प्रपंचयति सत्त्वमिति । सार्द्धेन सत्त्वं सात्त्विकगतिः कर्मफलरूपाद् देवत्वप्राप्तिरुत्तमा सुखप्राचुर्यात् रजोगतिर्मनुष्यतामिश्रा, नारकशब्दः स्थावराद्युपलक्षकः तमोगतिर्नारकिता नीचेत्यर्थः । तत्रापि सात्त्विकराजसतामससुरनृनारकासु गतिष्वपि यदैकैकतरः सात्विकादिः स्वभावः इतराभ्यामवशिष्टाभ्यां स्वभावाभ्यां उपहन्यतेऽनुविध्यतेऽभिभूयत इत्यर्थः । तदा एकैकशः एकैकं त्रिधा गतयो भिद्यंते । यथा रजःप्रचुरा एकतराः केचित्केवलरजःप्रचुराः केचित्सत्त्वप्रचुराः केचित्तमःप्रचुराः एवं सात्त्विकतामसा अपि प्रत्येकं त्रिधेत्यर्थः । एतेन यावत्यः कर्मगतय इत्यस्याप्युत्तरमुक्तं भवति ॥ ४१ ॥ ❀ ❀ एवं ब्रह्मांतर्यामित्वेन स्रष्टृत्वमभिधाय साक्षात् पालयितृत्वमाह स इति । जगद्धाता जगत्स्रष्टा स एव भगवान् तिर्यङ्नरसुरात्मभिः तिर्यंचो वराहमीनकच्छपहंसादयः, नरा रामकृष्णादयः, सुरा वामनसुयज्ञादयः, एतैरवतारैरिदं विश्वं स्थापयन् पालयन् धर्मरूपधृक् धर्मशरीरकः सन्पुष्णाति संवर्द्धय... ॥ ४२ ॥ ❀ ❀ रुद्रशरीरकत्वेन संहर्तृत्वमाह तत इति । कालाग्निरुद्रात्मा कालाग्निरुद्र आत्मा शरीरं यस्य सः कालाग्निरुद्रस्यात्मभूत इति वा स भगवानुपादानभूतादात्मनः सृष्टं यद्विश्वं तत्काले कल्पांते सन्नियच्छति संहरत्यनिलो वायुर्मेघसमूहमिवेति दृष्टांतः ॥ ४३ ॥ ❀ ❀ जगद्व्यापारस्य जीववत्कर्मायत्तत्वमाशंक्य नेत्याह इत्थमिति । इत्थंभावेन प्रकृतस्रष्टृत्वादिभावेन प्रयुक्तः भगवत्तमः ज्ञानादिपूर्णतमः भगवान्कथितः सम्यक् प्रतिपादितः सूरयो ब्रह्मविदः इत्थंभावेन चिदचिद्रूपेण परं केवलं द्रष्टुं नार्हंति, किंतु तद्विलक्षणत्वेन द्रष्टुमर्हंति । भगवान्भगवत्तम इति विशेषणद्वयं जीववैलक्षण्यप्रतिपादकं जीवस्याभगवत्त्वात्तद्व्यापारः कर्मायत्तः, परमात्मनः कर्तृत्वं अकर्मायत्तमिति भावः ॥ ४४ ॥

## श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

उक्तजातीस्त्रिधा विभजति सत्त्वमिति । सत्वं रजस्तम इति गुणत्रयहेतुकाः सुरनृनारका इति तिस्रो ज्ञेया इत्यन्वयः । सत्त्वहेतुकपुण्यफला सुरगतिः रजोहेतुकपुण्यपापफला मनुष्यगतिः, तमोहेतुकपापफला नारकी गतिः,अनेन नरकयोग्या असुरा इत्युक्तं भवति अवांतरभेदोपि त्रिधेत्याह तत्रापीति । गुणत्रयमूलकर्मभ्यः प्राप्तसुरनरासुरगतयः प्रत्येकं सात्त्विकराजसतामसतया त्रिधा भवंति तथाहि कल्पादिप्रधाना असुरास्तामसतामसाः प्रधानसुरभृत्यास्तामसराजसाः अप्रसिद्धासुरास्तामससात्त्विकाः केवलपापचारिणो मनुष्या राजसतामसाः मिश्रकर्मकृतो मनुष्या राजसराजसाः । मनुष्येषु पुण्यैककर्मकृत उत्तमा मनुष्या राजससात्त्विकाः । पृथगप्रसिद्धा देवा सात्त्विकतामसाः अतत्त्वाभिमानिनो लोके ख्याताः सात्त्विकराजसाः तत्त्वाभिमानिनो देवाः सात्त्विकसात्त्विकाः सात्त्विकेभ्योऽपि सात्त्विकाः । गरुडादित्रिकतद्भार्याः तेभ्योऽपि सात्त्विकी ब्रह्मभार्या सरस्वती ततोऽपि सात्त्विको ब्रह्मेति भेदः एकैकश इति शप्रत्ययेन ज्ञायते तदुक्तं तामसास्तामसा दैत्याः प्रधाना देवशत्रव इत्यादिना ॥ ४१ ॥ ❀ ❀ एवं जगत्स्वरूपं निरूप्याधुना भगवदवतारावसरमाह यदेति । यदैकतमस्वभावः सात्त्विकोऽन्याभ्यां रजस्तमोभ्यामुपहन्यते तदैव तस्मिन्नवसर एव धाता पोषणादिकर्ता वर्णाश्रमधर्मप्रवर्तकरूपधरो भगवान् तिर्यङ्नरसुरात्मभिः मत्स्यकूर्मवराहरामकृष्णोपेंद्रादिरूपैरवतीर्येदं जगत्सत्त्वेन स्थापयन् पुष्णाति संवर्धयति स्थितं रक्षतीत्यन्वयः । तेषु त्रिष्वेकतमो भावः सात्त्विकतामसः सात्त्विकराजसः सात्त्विकसात्त्विको वा तामसराजसाभ्यामुपहन्यते तदेति वा तदा तैस्तामसादिभी राजसतामसादिभिश्च दैत्यदानवराक्षसादिभिः ते त्रयः । सात्त्विकभेदा बाध्यते तदा वराहादिरूपैरिति वा, तदुक्तं सात्त्विकेषु त्रिषु यदात्वेकस्य प्रतिबाधनमित्यादिना ॥ ४२ ॥ ❀ ❀ ननु संहारोऽन्यनियतश्चेत्तदुपद्रवेण जगद्रक्षणं दुःशकमित्याशंक्य स्वनियतरूपभेदेन संहारस्य क्रियमाणत्वात् न तदुपरोधो जगद्रक्षणस्येति ध्वनयति तत इति । ततः स्थित्यनंतरं प्रलयकाले प्राप्ते कालाग्निरुद्राणामात्मांतर्यामी स भगवानात्मनो ब्रह्मणोंऽतर्यामिणः स्वोदराद्युत्सृष्टं जगत् तदिदं सर्वं नियच्छति कथमिव अनिलो घनानीकं मेघपटलमिवेत्यन्वयः । तदुक्तं मत्स्यादिरूपी पोषयति नृसिंहो रुद्रसंस्थित इत्यादिना । कालो यमः ॥ ४३ ॥ ❀ ❀ उक्तमर्थं प्रमाणयति इत्थंभावेनेति । भगवंतो ब्रह्मादयस्तेभ्योऽतिशयेनोत्तमो भगवानैश्वर्यगुणो नासर्वजगन्नेता परमपुरुषः इत्थंभावेन सृष्टिस्थितिसंहारादिकर्तृत्वेन सर्वस्माद्भिन्नत्वेन सर्वदोषविवर्जितत्वेन कथितः प्रतिपादितः श्रुत्यादाविति शेषः । यतो वा इमानि भूतानि जायंत इत्यादि । तथा कथने कारणमाह इत्थमिति । सूरयः परं परमात्मानमित्थंभावेन सर्ववैलक्षण्येन द्रष्टुमर्हंति हि नाभेदज्ञानेनातस्तत्कथनं युक्तमिति भावः । यद्वा भगवान् जगत्स्रष्टृत्वादिलक्षणविशिष्टत्वेन कथित इति यद्यस्मात्तस्मात्सूरयः परमार्थदर्शिनः । इत्थंभावेऽचेतसि परं द्रष्टुं नार्हंतीति न अर्हन्त्येवेति ।अनेन ज्ञानी प्रत्यक्षमपि प्रोक्तार्थे प्रमाणमिति सूचितम् ॥ ४४ ॥

## श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

जगद्धर्त्ता श्रीविष्णुरूपेण तत्पालकः सन् धर्मरूपधृक् धर्मस्वरूपरक्षको भूत्वा तिर्यगाद्यनुकर्तृरूपैः श्रीमत्स्याद्यवतारैश्च पुष्णाति ॥ ४२ ॥ ४३ ॥ ४४ ॥

### श्रीमद्वीरराघवव्याख्या

एतदेव प्रपंचयति सत्त्वमिति । सार्द्धेन सत्त्वं सात्त्विकगतिः कर्मफलरूपाद् देवत्वप्राप्तिरुत्तमा सुखप्राचुर्यात् रजोगतिर्मनुष्यतामिश्रा, नारकशब्दः स्थावराद्युपलक्षकः तमोगतिर्नारकिता नीचेत्यर्थः । तत्रापि सात्त्विकराजसतामससुरनृनारकासु गतिष्वपि यदैकैकतरः सात्विकादिः स्वभावः इतराभ्यामवशिष्टाभ्यां स्वभावाभ्यां उपहन्यतेऽनुविध्यतेऽभिभूयत इत्यर्थः । तदा एकैकशः एकैकं त्रिधा गतयो भिद्यंते । यथा रजःप्रचुरा एकतराः केचित्केवलरजःप्रचुराः केचित्सत्त्वप्रचुराः केचित्तमःप्रचुराः एवं सात्त्विकतामसा अपि प्रत्येकं त्रिधेत्यर्थः । एतेन यावत्यः कर्मगतय इत्यस्याप्युत्तरमुक्तं भवति ॥ ४१ ॥ ❀ ❀ एवं ब्रह्मांतर्यामित्वेन स्रष्टृत्वमभिधाय साक्षात् पालयितृत्वमाह स इति । जगद्धाता जगत्स्रष्टा स एव भगवान् तिर्यङ्नरसुरात्मभिः तिर्यंचो वराहमीनकच्छपहंसादयः, नरा रामकृष्णादयः, सुरा वामनसुयज्ञादयः, एतैरवतारैरिदं विश्वं स्थापयन् पालयन् धर्मरूपधृक् धर्मशरीरकः सन्पुष्णाति संवर्द्धयति ॥ ४२ ॥ ❀ ❀ रुद्रशरीरकत्वेन संहर्तृत्वमाह तत इति । कालाग्निरुद्रात्मा कालाग्निरुद्र आत्मा शरीरं यस्य सः कालाग्निरुद्रस्यात्मभूत इति वा स भगवानुपादानभूतादात्मनः सृष्टं यद्विश्वं तत्काले कल्पांते सन्नियच्छति संहरत्यनिलो वायुर्मेघसमूहमिवेति दृष्टांतः ॥ ४३ ॥ ❀ ❀ जगद्व्यापारस्य जीववत्कर्मायत्तत्वमाशंक्य नेत्याह इत्थमिति । इत्थंभावेन प्रकृतस्रष्टृत्वादिभावेन प्रयुक्तः भगवत्तमः ज्ञानादिपूर्णतमः भगवान्कथितः सम्यक् प्रतिपादितः सूरयो ब्रह्मविदः इत्थंभावेन चिदचिद्रूपेण परं केवलं द्रष्टुं नार्हंति, किंतु तद्विलक्षणत्वेन द्रष्टुमर्हंति । भगवान्भगवत्तम इति विशेषणद्वयं जीववैलक्षण्यप्रतिपादकं जीवस्याभगवत्त्वात्तद्व्यापारः कर्मायत्तः, परमात्मनः कर्तृत्वं अकर्मायत्तमिति भावः ॥ ४४ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

उक्तजातीस्त्रिधा विभजति सत्त्वमिति । सत्त्वं रजस्तम इति गुणत्रयहेतुकाः सुरनृनारका इति तिस्रो ज्ञेया इत्यन्वयः । सत्त्वहेतुकपुण्यफला सुरगतिः रजोहेतुकपुण्यपापफला मनुष्यगतिः, तमोहेतुकपापफला नारकी गतिः,अनेन नरकयोग्या असुरा इत्युक्तं भवति अवांतरभेदोपि त्रिधेत्याह तत्रापीति । गुणत्रयमूलकर्मभ्यः प्राप्तसुरनरासुरगतयः प्रत्येकं सात्त्विकराजसतामसतया त्रिधा भवंति तथाहि कल्पादिप्रधाना असुरास्तामसतामसाः प्रधानसुरभृत्यास्तामसराजसाः अप्रसिद्धासुरास्तामससात्त्विकाः केवलपापचारिणो मनुष्या राजसतामसाः मिश्रकर्मकृतो मनुष्या राजसराजसाः । मनुष्येषु पुण्यैककर्मकृत उत्तमा मनुष्या राजससात्त्विकाः । पृथगप्रसिद्धा देवा सात्त्विकतामसाः अतत्त्वाभिमानिनो लोके ख्याताः सात्त्विकराजसाः तत्त्वाभिमानिनो देवाः सात्त्विकसात्त्विकाः सात्त्विकेभ्योऽपि सात्त्विकाः । गरुडादित्रिकतद्भार्याः तेभ्योऽपि सात्त्विकी ब्रह्मभार्या सरस्वती ततोऽपि सात्त्विको ब्रह्मेति भेदः एकैकश इति शप्रत्ययेन ज्ञायते तदुक्तं तामसास्तामसा दैत्याः प्रधाना देवशत्रव इत्यादिना ॥ ४१ ॥ ❀ ❀ एवं जगत्स्वरूपं निरूप्याधुना भगवदवतारावसरमाह यदेति । यदैकतमस्वभावः सात्त्विकोऽन्याभ्यां रजस्तमोभ्यामुपहन्यते तदैव तस्मिन्नवसर एव धाता पोषणादिकर्ता वर्णाश्रमधर्मप्रवर्तकरूपधरो भगवान् तिर्यङ्नरसुरात्मभिः मत्स्यकूर्मवराहरामकृष्णोपेंद्रादिरूपैरवतीर्येदं जगत्सत्त्वेन स्थापयन् पुष्णाति संवर्धयति स्थितं रक्षतीत्यन्वयः । तेषु त्रिष्वेकतमो भावः सात्त्विकतामसः सात्त्विकराजसः सात्त्विकसात्त्विको वा तामसराजसाभ्यामुपहन्यते तदेति वा तदा तैस्तामसादिभी राजसतामसादिभिश्च दैत्यदानवराक्षसादिभिः ते त्रयः । सात्त्विकभेदा बाध्यते तदा वराहादिरूपैरिति वा, तदुक्तं सात्त्विकेषु त्रिषु यदात्वेकस्य प्रतिबाधनमित्यादिना ॥ ४२ ॥ ❀ ❀ ननु संहारोऽन्यनियतश्चेत्तदुपद्रवेण जगद्रक्षणं दुःशकमित्याशंक्य स्वनियतरूपभेदेन संहारस्य क्रियमाणत्वात् न तदुपरोधो जगद्रक्षणस्येति ध्वनयति तत इति । ततः स्थित्यनंतरं प्रलयकाले प्राप्ते कालाग्निरुद्राणामात्मांतर्यामी स भगवानात्मनो ब्रह्मणोंऽतर्यामिणः स्वोदराद्युत्सृष्टं जगत् तदिदं सर्वं नियच्छति कथमिव अनिलो घनानीकं मेघपटलमिवेत्यन्वयः । तदुक्तं मत्स्यादिरूपी पोषयति नृसिंहो रुद्रसंस्थित इत्यादिना । कालो यमः ॥ ४३ ॥ ❀ ❀ उक्तमर्थं प्रमाणयति इत्थंभावेनेति । भगवंतो ब्रह्मादयस्तेभ्योऽतिशयेनोत्तमो भगवानैश्वर्यगुणो नासर्वजगन्नेता परमपुरुषः इत्थंभावेन सृष्टिस्थितिसंहारादिकर्तृत्वेन सर्वस्माद्भिन्नत्वेन सर्वदोषविवर्जितत्वेन कथितः प्रतिपादितः श्रुत्यादाविति शेषः । यतो वा इमानि भूतानि जायंत इत्यादि । तथा कथने कारणमाह इत्थमिति । सूरयः परं परमात्मानमित्थंभावेन सर्ववैलक्षण्येन द्रष्टुमर्हंति हि नाभेदज्ञानेनातस्तत्कथनं युक्तमिति भावः । यद्वा भगवान् जगत्स्रष्टृत्वादिलक्षणविशिष्टत्वेन कथित इति यद्यस्मात्तस्मात्सूरयः परमार्थदर्शिनः । इत्थंभावेऽचेतसि परं द्रष्टुं नार्हंतीति न अर्हन्त्येवेति ।अनेन ज्ञानी प्रत्यक्षमपि प्रोक्तार्थे प्रमाणमिति सूचितम् ॥ ४४ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

जगद्धर्त्ता श्रीविष्णुरूपेण तत्पालकः सन् धर्मरूपधृक् धर्मस्वरूपरक्षको भूत्वा तिर्यगाद्यनुकर्तृरूपैः श्रीमत्स्याद्यवतारैश्च पुष्णाति ॥ ४२ ॥ ४३ ॥ ४४ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

तासां गतीनामपि गुणा एव कारणमित्याह सत्त्वमिति । तिस्रो गतयः क्रमेण सुराद्याः । एकैकशो गतयस्त्रिधा भिद्यन्त इति नवसंख्या भवन्तीत्यर्थः । अन्याभ्यां स्वभावाभ्याम् एकैकाभ्यामुपहन्यते अनुविध्यते । यथा रजःस्वभावोऽपि नरः सत्त्वस्वभावमिश्रणाधिक्यात् ब्राह्मणः, तमःस्वभावमिश्रणाधिक्यात् शूद्र इत्येवम् ॥ ४१ ॥ ❀ ❀ धर्मो विष्णुः । धर्मपदेन धर्मतो रक्षा अधर्मतो नाशः धर्माधर्माभ्यां सृष्टिरिति । तिर्यगादीनाम् आत्मभिः स्वदत्तैः स्वभावैरिति पशुपक्षिणोऽपि स्वसुतमित्रकलत्रादीन् पालयन्ति ॥ ४२ ॥ ❀ ❀ तत इति । आत्मनः सकाशात् यदिदं सृष्टं तत् संनियच्छति संहरति । घनानीकं मेघसमूहम् ॥ ४३ ॥ ❀ ❀ इत्थम्भावेन स्रष्टृत्वादिरूपेण तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः सोऽकामयत बहु स्यां प्रजायेयेत्यादिश्रुत्या कथितः सूरयः केचित् शुद्धभक्तिमन्तस्तु परं केवलं विश्वस्रष्ट्रादिरूपेण द्रष्टुं नार्हन्ति, किन्तु वैकुण्ठादौ स्वधामनि चिद्विभूतौ स्वप्रेयस्यादिभिर्विहरमाणत्वेनैवेत्यर्थः ॥ ४४ ॥

### श्रीमच्छुकदेवकृतसिद्धांतप्रदीपः ।

ननु गतित्रैविध्ये को हेतुरित्यतः सत्त्वादिभिस्तास्त्रिधा मिश्रितैः सत्त्वादिभिः प्रत्येकं पुनस्त्रिधा बोध्या इत्याह सत्त्वमिति सार्द्धेन । हे राजन् सत्वं रजस्तम इति सुरनृनारकास्तिस्रः गतयः संति तत्रापि तास्वपि एकैकशः प्रत्येकं त्रिधा भिद्यन्ते यदा एकैकतरः स्वभावः गुणः अन्याभ्यां गुणाभ्यामुपहन्यते अभिभूयते तदेत्यर्थः ॥ ४१ ॥ ❀ ❀ एवं ब्रह्माख्यस्वांशात्मना स्रष्टृत्वमभिधाय स्वावतारैः पालयितृत्वमाह त एवेति । स एव भगवान् जगद्धर्ता जगत्पोषकः तिर्यङ्नरसुरात्मभिः तिर्यंचो वराहादयः नराः पृथ्वादयः सुराः यज्ञादयः एतैः स्वावतारैः इदं विश्वं स्थापयन्पालयन् धर्मरूपधृक् सन् पुष्णाति भोगैः संवर्द्धयति ॥ ४२ ॥ ❀ ❀ रुद्राख्यस्वांशात्मना संहर्तृत्वमाह तत इति । कालाग्निरुद्राणामात्माश्रयः अंशी नियोजक इत्यर्थः । आत्मा उपादानभूतात् यदिदं विश्वं सृष्टं तन्निमित्तभूतेन संहारकालेन संनियच्छति संहरति वायुर्मेघसमूहमिव ॥ ४३ ॥ ❀ ❀ एवं यतो वा इमानि भूतानि जायंते इत्यादिवेदांतवाक्योपबृंहणाय विश्वकर्तृत्वेन भगवान् वर्णितः । इदानीं परपक्षं निराकुर्वन् तदेवाह इत्थमिति द्वाभ्याम् ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चापि षण्णां भग इतींगनेति स्मृत्युक्तषडैश्वर्यसंपन्नः भगवत्तमः सर्वेभ्यः तद्वत्तैश्वर्यवद्भ्योऽप्युत्कृष्ट इत्थंभावेन विश्वकर्तृत्वेन कथितोतः सूरयो विवेकिनः परं भगवदितरं कालकर्मादिकं इत्थंभावेन विश्वकारणत्वेन द्रष्टुं नार्हन्ति ॥ ४४ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

ननु त्रिविधा एव गतय उच्यन्ते । प्रकारास्तु कोटिशो भवन्ति । तत्राऽऽह—**तत्राप्येकैकशो राजन्निति** । बहवो मया त्रिविधा गणिताः । तेष्वेकैकशस्त्रिविधा ये प्रजापतयो गणितास्तेऽपि त्रिविधाः । ये वा सरीसृपास्तेऽपि । **राजन्निति** सम्बोधनं पुरुषाणां नानाविधत्वज्ञापनार्थम् । ननु कथमेकमनेकधा भवति ? तत्राऽऽह—[1] **यदैकैकतर इति** । यदा एकतरः स्वभावः सात्त्विकादिः अन्याभ्यां स्वव्यतिरिक्ताभ्यां उपहन्यते बलवद्भ्यामभिभूयते । तत्र बलाभिभवतारतम्येनैकस्याऽनेकरूपाणि भवन्ति ॥ ४१ ॥ ❀ ❀ एवं कार्यत्रैविध्यमुपपाद्योपसंहरन् भगवतः सात्त्विकीं लीलां पालनाख्यामुपपादयति—**स एवेदमिति** । स एव त्रिविधजगत्कर्त्ता तदर्थं त्रिविधश्च । सृष्टमिदं जगत् भगवान् भगशब्दवाच्यैः स्वगुणैः पालनसमर्थैर्धर्मरूपधृक् । धर्मेण च स्थापयन् तत्तन्मर्यादायां पुष्णाति अभिवृद्धं करोति । नित्यमित्युत्पत्तिक्षणमारभ्य अन्तपर्यन्तं प्रतिक्षणं पुष्णाति । तदुपघातकासुराविर्भावे तिर्यङ्नरसुरात्मभिः त्रिविधैर्मत्स्यादिरूपै रामादिरूपैर्वामनादिरूपैश्च सर्वं जगत् परिपालयतीत्यर्थः ॥ ४२ ॥ ❀ ❀ तृतीयां लीलामाह—**कालाग्निरुद्रात्मेति** । कालः प्रलयकालः । तत्साथकोऽग्निः सङ्कर्षणमुखानलः । तत्राऽनले यो रुद्रस्त्र्यक्षस्त्रिशिखं शूलमुत्तम्भयन्नुदतिष्ठत् तद्रूपो भूत्वा आत्मनः सकाशादेव यत्सृष्टमूर्णातन्तुवत् सन्नियच्छति उपसंहरति । कालेन करणेन । यथोत्पादने मायाकरणं पालने चाऽवतारास्तथा संहरणे कालः करणम् । उत्पत्त्यादिभिः संहारा[2]न्तैः कृतैरप्याधारे न किञ्चिद्विकृतता जा[3]यत इत्यत्र दृष्टान्तमाह—**घनानीकमिवाऽनिल इति** । मेघानां समूहं यथा वायुरपकर्षति । वायुनाऽपकृष्टा मेघा यथा न ज्ञायन्ते क गता इति तथा संस्कारं सर्वमेव नाशयतीत्यर्थः ॥ ४३ ॥ ❀ ❀ एवं भगवत्कृतानुत्पत्तिस्थितिप्रलयान्निरूप्येदं भगवत्कर्तृकं जगदुत्पत्त्यादि ब्रह्मवादिसम्मतमित्याह—**इत्थम्भावेन कथित इति** । हे भगवत्तमाः । राजानं बोधयितुमेवंप्रकारेणाऽस्माभिर्जगदुत्पत्तिस्थितिकर्ता भगवानुक्तस्तदाह—**इत्थम्भावेन कथित इति** । पूर्वोक्तप्रकार एवेत्थम्भावः । **भगवानिति** तथा कथनेऽप्यदोषाय । स हि सर्वैः स्वाधिकारेण बुध्यते बोध्यते च । **भगवत्तमा इति** । अत्यन्तमधिकारिणः । भवदर्थं त्वग्रे निरूप्यते । तदाह—**नेत्थम्भावेनेति** । परं मायातीतं भगवन्तं स्वत एव सर्वं पूर्वोक्तप्रकारेण सूरयो ब्रह्मविदो द्रष्टुं नाऽर्हन्ति ॥ ४४ ॥

---

१. यदेकैकतर इति ख. । २. संहारान्तैरप्याधारेति ख. । ३. ज्ञायत इति ख ।

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

ततः कालाग्नीत्यत्र संस्कारं सर्वमेव नाशयतीति। एतेनावान्तरकल्पीयप्रलयो यः कालद्रव्याभ्यां जायते स संस्कारनाशपर्यन्तमिति ज्ञापितम् ॥ ४३ ॥ ❀ ❀ इत्थंभावेनेत्यत्र तथा कथनेपीत्यादि। एतेन ब्रह्मवादिसम्मतत्वे युक्तिरुक्ता ॥ ४४ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

पुण्यादीनि कर्माणि कुतो भवन्तीत्यपेक्षायामाह—सत्त्वमिति। इतिशब्दो हेत्वर्थकः। सत्त्वादिगुणेभ्यो हेतुभ्यः पुण्यपापद्वारा सुरादयस्तिस्रो गतयो भवन्ति। सुरादिशब्दा ऋष्यादीनामुपलक्षणार्थाः। तत्र सत्त्वात् पुण्यकर्मतः कुशला उत्तमा देवा भवन्ति, तमसा पापकर्मतः अकुशला अधमा नारका भवन्ति, रजसा पुण्यपापमिलितं कर्म ततो नरा भवन्तीति विवेकः। ननु गतयस्तु बह्वो दृश्यन्ते तत्कथं तिस्र एवोच्यन्ते तत्राह—तत्रेति। यदैकतरः सात्त्विकादिः स्वभावोऽन्याभ्यामवशिष्टाभ्यां स्वभावाभ्यामुपहन्यते अभिभूयते तत्र तदा एकैकशोऽपि गतयस्त्रिधा भिद्यन्त इत्यन्वयः। एतदपि स्थूलदृष्टयैवोक्तम्। वस्तुतस्तु तत्तद्गुणतारतम्येन तत्तत्पुण्यपापतारतम्यानुसारेण नानाविधगतयो भवन्तीत्यर्थः। राजन्निति सम्बोधनं सम्मतिद्योतकम् ॥ ४० ॥ ४१ ॥ ❀ ❀ एवं ब्रह्मरूपेण स्रष्टृत्वमुक्त्वा विष्णुरूपेण पालकत्वमाह—स एवेति। स एव जगत्कर्त्ता भगवान् धर्मरूपधृक् धर्मरक्षकत्वाद्धर्मो विष्णुस्तद्रूपधृक् इदं विश्वं स्वस्वमर्यादायां स्थापयन् तिर्यगाद्यवतारैः पुष्णाति पालयति। तत्र तिर्यगवतारा वराहमीनकच्छपहंसादयः, नरावतारा रामकृष्णपरशुरामादयः, सुरावतारा वामनसुयज्ञादयः ॥ ४२ ॥ ❀ ❀ रुद्ररूपेण संहर्तृत्वमाह—तत इति। कालः प्रलयकालस्तत्साधकोऽग्निः सङ्कर्षणमुखानलस्तत्र रुद्रात्मा रुद्ररूपेणाविर्भूतो यदात्मनः स्वस्मादेवोपादानभूतात् स्वेनैव सृष्टमिदं विश्वं तत्कालेनैव करणभूतेन सन्नियच्छति संहरति। तत्र स्वातन्त्र्ये दृष्टान्तमाह—घनेति, मेघसमूहं यथा वायुः संहरति तथेत्यर्थः ॥ ४३ ॥ ❀ ❀ कर्तृत्वादिकं निरूप्य तदपवादशमस्य विशुद्धिमाह—इत्थम्भावेनेति द्वयेन। इत्थम्भावेन स्रष्टृत्वादिरूपेण भगवान् कथितः "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। सोऽकामयत बहु स्यां प्रजायेय" इत्यादिश्रुत्यनुसारेण निरूपिता। हि हेत्वर्थे। परन्तु सूरयो विवेकिन इत्थम्भावेन द्रष्टुं नार्हन्तीत्यन्वयः। किन्तु "निष्कलं निःक्रियं शान्तं निरवद्यं निरञ्जनम्" इत्यादिश्रुत्यनुसारेण विशुद्धमेव पश्यन्तीति भावः। जीवेऽपि भगवानिति व्यवहारदर्शनात्तद्व्यावृत्त्यर्थमाह—भगवत्तम इति। नित्यपरिपूर्णैश्वर्यादिगुणवानित्यर्थः ॥ ४४ ॥

### हिन्दी अनुवाद

तत्त्वकी प्रधानतासे देवता, रजोगुणकी प्रधानतासे मनुष्य और तमोगुणकी प्रधानतासे नारकीय योनियाँ मिलती हैं। इन गुणोंमें भी जब एक गुण दूसरे दो गुणोंसे अभिभूत हो जाता है, तब प्रत्येक गतिके तीन-तीन भेद और हो जाते हैं ॥ ४१ ॥ ❀ ❀ वे भगवान् जगत्के धारण-पोषणके लिए धर्ममय विष्णुरूप स्वीकार करके देवता, मनुष्य और पशु, पक्षी आदि रूपोंमें अवतार लेते हैं तथा विश्वका पालन-पोषण करते हैं ॥ ४२ ॥ ❀ ❀ प्रलयका समय आनेपर वे ही भगवान् अपने बनाये हुए इस विश्वको कालाग्निस्वरूप रुद्रका रूप ग्रहण करके अपनेमें वैसे ही लीन कर लेते हैं, जैसे वायु मेघमालाको ॥ ४३ ॥ ❀ ❀ परीक्षित्! महात्माओंने अचिन्त्यैश्वर्य भगवान्का इसी प्रकार वर्णन किया है। परन्तु तत्त्वज्ञानी पुरुषोंको केवल इस सृष्टि, पालन और प्रलय करनेवाले रूपमें ही उनका दर्शन नहीं करना चाहिये; क्योंकि वे तो इससे परे भी हैं ॥ ४४ ॥

**नास्य कर्मणि जन्मादौ परस्यानुविधीयते। कर्तृत्वप्रतिषेधार्थं माययारोपितं हि तत् ॥४५॥**
**अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः। विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ॥४६॥**
**परिमाणं च कालस्य कल्पलक्षणविग्रहम्। यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो[1] शृणु ॥४७॥**

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

तत् किं यतोऽस्य विश्वस्य जन्मादौ कर्माणि परस्येश्वरस्येत्थंभावः कर्तृत्वं नास्ति श्रुत्यापि तात्पर्येण न प्रतिपाद्यते किंतु अनुविधीयतेऽनुवर्ण्यते। किमर्थं कर्तृत्वप्रतिषेधार्थम्। हि यतो मायया ऽऽरोपितं प्रकाशितम्। यथा च श्रुतयः। "निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनम् ॥ इंद्रो मायाभिः पुरुरूप ईयते" इत्याद्याः ॥ ४५ ॥ ❀ ❀ उक्तमर्थमुपसंहरति अयं त्विति। ब्रह्मणः संबंधी कल्पो महाकल्पः विकल्पोऽवांतरस्तत्सहित उदाहरणत्वेन संक्षेपत उक्तः। कथंभूतः? यत्र महाकल्पे प्राकृता

1. प्रा० पा०—कल्पमिमं।

महदादिसर्गो अवांतरकल्पे च वैकृताः स्थावरादिसर्गा इत्ययं विधिः प्रकारः । अन्यैर्महाकल्पादिभिः साधारणः ॥ ४६ ॥ ❀ ❀ वक्ष्यमाणं विस्तरं प्रतिजानीते । परिमाणं स्थूलं सूक्ष्मं च कल्पस्य लक्षणमियानेवंरूप इति तद्विग्रहमवांतरकल्पम् । मन्वंतरादिरूपं विभागं च यथावद्विस्तरेण पुरस्तात्तृतीयस्कंधे व्याख्यास्यामि । तत्र पाद्मं कल्पमथो इति कात्स्न्र्येन व्याख्यायमानं शृणु ॥ ४७ ॥

## श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

नैतद्भगवतो वस्तुतः कर्मेत्याह—अस्य विश्वजन्मादौ जन्मस्थितिसंहारे कर्मणि परस्य परमेश्वरस्येत्थंभावः कर्तृत्वं नास्ति किं त्वनुविधीयते श्रुतिस्मृत्यादिषु सर्वत्र वर्ण्यते किमर्थं कर्तृत्वप्रतिषेधार्थं हि यतो माययैवारोपितं सृष्ट्यादीना गुणकार्यत्वाद्बहिरंगमायाया एव कर्तृत्वं परमपुरुषे आरोपितमिति मत्कृतमपीदं मत्स्वामित्वात्तेन परमेश्वरेणैव कृतं न तु वस्तुतः परमेश्वरः स्वस्वरूपेण कर्तेत्यर्थः । अत्र प्रमाणं तथा चेति । इंद्र आत्मा यद्यपि तत्प्रभावत एव तद्भवति तथाप्ययस्कांतवत्तत्र तस्य विकारो नास्तीति भावः । अध्यारोपापवादावपि शुद्धस्वरूपावगत्यर्थमेव वर्णितमिति । ज्ञेयम् । "अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते" इति श्रुतेः ॥ ४५ ॥ ❀ ❀ कल्पो ब्रह्मदिनं "स कल्पो यत्र मनवश्चतुर्दश विशांपते" इति वक्ष्यमाणत्वात् । कल्पवर्णना ही स्कांदे प्रभासखंडे "प्रथमः श्वेतकल्पश्च द्वितीयो नीललोहितः । वामदेवस्तृतीयस्तु ततो गाथांतरोऽपरः १ रौरवः पञ्चमः प्रोक्तः षष्ठः प्राण इति स्मृतः । सप्तमोऽथ बृहत्कल्पः कंदर्पोऽष्टम उच्यते २ सद्योथ नवमः कल्प ईशानो दशमः स्मृतः । ध्यान एकादशः प्रोक्तस्तथा सारस्वतोऽपरः ३ त्रयोदश उदानस्तु गरुडोऽथ चतुर्दशः । कौर्मः पञ्चदशो ज्ञेयः पौर्णमासी प्रजापतेः ४ षोडशो नारसिंहस्तु समाधिस्तु ततोऽपरः । आग्नेयो विष्णुजः सौरः सोमकल्पस्ततोऽपरः ५ द्वाविंशो भावनः प्रोक्तः सुपुमानिति चापरः ॥ वैकुंठश्चार्ष्टिषस्तद्वद्वल्मीकल्पस्ततोऽपरः ६ सप्तविंशोऽथ वैराजो गौरीकल्पस्ततो परः । महेश्वरस्ततः प्रोक्तस्त्रिपुरो यत्र घातितः ७ पितृकल्पस्ततश्चांते यः कव्र ब्राह्मणः स्मृता । त्रिंशत्कल्पाः समाख्याता ब्रह्मणो दिवसैः सदा ८ अमावास्या [illegible] प्रतिपद्ब्रह्मणः प्रोक्ता द्वितीयार्द्धस्य सांप्रतम् ९" अत्र श्वेतः श्वेतवाराहः स एव वाराहश्च अयमेव ब्रह्मोत्पत्तिसमये ब्राह्म उच्यते इति ज्ञेयम् । एवं पितृकल्प एव प्रथमपरार्द्धांते पद्मनिर्मितलोकत्वात्पाद्म इत्युच्यते अतः श्रीभागवतस्य सारस्वतकल्पमयत्वं तु प्रायिकमेव ॥ ३६ ॥ ❀ ❀ विस्तरेण तु यथाकालोनुमीयत इत्यस्य प्रश्नस्योत्तरं मध्य एव तस्योत्तरं दास्यमानं प्रतिजानीते परिमाणं कीदृशं कल्पानां लक्षणमेव विग्रहो वपुर्यस्य तत् कल्पादिलक्षणं विना कालपरिमाणं न सिध्यतीत्यर्थः । पाद्मं कल्पं प्रथमपरार्द्धान्तभवम् ॥ ४७ ॥

## श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

अनूद्यते इति । उक्तस्यार्थस्य पुनः कर्त्तव्यत्वेन उपादानमनुवादः । अप्रसक्तस्य च प्रतिषेधो न सम्भवतीत्यतः प्रसक्तप्रतिषेधार्थमेवात्रानुवादः क्रियते एतदेवाभिप्रेत्याह किमर्थमित्यादि ॥ कर्त्तव्यप्रतिषेधार्थमिति । अधिष्ठानज्ञाने हि तत्रारोपितस्य प्रतिषेध इति भावः ॥ ४५ ॥ ❀ ❀ ब्रह्मणः सम्बन्धीति । यस्मिन् कल्पे ब्रह्मा जातः स ब्राह्म नामको महाकल्प इत्यर्थः । साधारण इति अन्येष्वपि महाकल्पादिषु एवमेव सृष्टिकारोऽस्तीत्यर्थः ॥ ४६ ॥ ❀ ❀ स्थूलं सूक्ष्मञ्चेति । अत्र स्वरूपमिति शेषः ॥ ४७ ॥

## श्रीमद्वीरराघवव्याख्या

ननु स एव सृज्यः स च सर्गकर्ता यो मामजमनादिं च तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययं इत्यादिना सृज्यत्वमसृज्यत्वं कर्तृत्वमकर्तृत्वं वाऽवगम्यते तत्कथं घटत इत्याशंक्य विधिनिषेधयोर्विषयव्यवस्थानं च दर्शयति नेति । अस्य जगतः कर्माणि सृष्टौ परस्य परमात्मनः जन्मादिर्नानुविधीयते परमात्मनः स्वरूपेण सृज्यः अपितु सृज्यवस्त्वंतरात्मतया तद्विसृष्टत्वात्सृज्य इत्युच्यते तस्मादजत्वं स्वरूपेण सृज्यत्वं तु सद्द्वारकमित्यविरोध इत्यर्थः । कर्तृत्वाकर्तृत्वविरोधं परिहरति कर्तृत्वमिति । मायया प्रकृत्या जीवेष्वारोपितम् ॥ ० ॥

प्राकृतकरणकलेवरसापेक्षं जीवगतकर्तृत्वं यत्तदेव प्रतिषेधार्थं प्रतिषेधविषयपरं संकल्पमात्रेण कर्तृत्वं तु विधीयते इत्यविरोध इत्यर्थः । कामाच्च नानुमानापेक्षेति प्रकृत्यधीनकर्तृत्वाभावो हि सूत्रितः प्रतिषेधार्थमित्यत्रार्थशब्दो विषयपरः अर्थः स्याद्विषये मोक्ष इति प्रसिद्धेः कर्मणि जन्मादौ परस्यानुविधीयते कर्तृत्वप्रतिषेधार्थमित्यपि पाठः तत्रायमर्थः ननु जीवविलक्षणत्वेन पश्यतीत्युक्तं कथमेतदुपपद्यते जीववदस्यापि जन्मकर्मादिदर्शनादित्यत आह नास्येति । अस्य चिदचिदात्मकप्रपंचस्य जन्मादिकर्माणि च यद्वा जन्मादिरूपे कर्मणि सत्यनुसृत्य प्रपंचानुसारिजन्मादिकमित्यर्थः । परमात्मनो न विधीयते प्रपंचवत्कर्मायत्तजन्मादिकं परमात्मनो न विधीयते न प्रतिपाद्यते अजायमानो बहुधाविजायत इत्यादिवेदांतवाक्यैरिति शेषः । परमात्मनो जन्मादिककर्मायत्तमिति कुतोऽवगम्यत इत्यत आह कर्तृत्वेत्यादिना । हि यस्मात्तज्जन्मकर्मादिकं मायया स्वकीयसंकल्परूपज्ञानेन मायावयुनं ज्ञानमिति ज्ञानपर्यायोऽत्र मायाशब्दः मायया सततं वेद्मि प्राणिनां च शुभाशुभमिति प्रयोगाच्च कर्तृत्वप्रतिषेधार्थं कर्मा-

यत्तकर्तृत्वस्य प्रतिषेधार्थं प्रतिषेधायारोपितं स्वस्मिन्निति शेषः । मदीयजन्मकर्मादिकं जीववन्न कर्मायत्तमिति प्रदर्शनाय स्वेच्छयैव स्वस्मिन्दैवमानुषजन्मकर्मादिकमारोपितं गृहीतमित्यर्थः । तथा च भगवतैव गीयते अजोपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममाययेति ॥ ४५ ॥ ❀ ❀ पुरुषोऽडं विनिर्भिद्येत्यादिनोक्तमर्थमुपसंहरति अयं त्विति । ब्रह्मणः अयं कल्पः महाकल्पः सविकल्पः अवान्तरकालविभागवानुदाहृत दिङ्मात्रत्वेनोक्तः अस्मिन्कल्प इव कल्पांतरेति सृष्टिरित्याह विधिरिति । यत्र महाकल्पे प्राकृतमहदादिपृथिव्यन्ताः सर्गा वैकृताः पृथिव्यादि विकारैरारब्धाः सर्गाः इत्ययं विधिः प्रकारः अन्यैर्महाकल्पादिभिः साधारणः समानः एतेन पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिता इत्यादिनोद्भावितः धाता यथा पूर्वमित्यादिश्रुतिविरोधः परिहृतः पुरुषावयवानां लोकानां चोपासनार्थं मिथस्तादात्म्योपदेशेऽपि प्रतिकल्पं सृष्टेरैकरूप्यो विरोधाभावात् ॥ ४६ ॥ ❀ ❀ वक्ष्यमाणं सविस्तरं प्रतिजानीते परिमाणमिति । कालस्य परिमाणं सूक्ष्मं स्थूलं च परिमाणं कल्पस्य लक्षणमियानेवं रूपं लक्षणं विग्रहमवान्तरकल्पमन्वंतरादिरूपं च यथा यथावत्पुरस्तात्तृतीयस्कन्धे व्याख्यास्ये विस्तरेण कथयिष्ये पाद्मं कल्पमथो कार्त्स्न्येन व्याख्यायमानं शृण्वित्यर्थः ॥ ४७ ॥

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

अत्रोच्यमानं जन्मादिकर्तृत्वं मायामयं किं न स्यादत्राह न चेति । अस्य परस्य कर्तृत्वं जन्मकर्माणि यथा जीवानां बंधस्य प्रतिषेधार्थं भवंति तथा न विधीयत इति न वेदादौ कर्तृत्वं जन्म कर्म च विधीयत एव अतो मायया स्वेच्छया रोपितं नित्यारूढं स्वरूपाविभिन्नत्वात् । कर्तृत्वं नानिर्वाच्यम् । प्रतिषेधाय बंधस्य जीवानां परमेशितुः स्वेच्छयैव तु कर्तृत्वं नित्यारूढं चिदात्मकमिति वचनात् रुप उपरिभाव इति धातोः सुभद्रां रथमारोप्येति प्रयोगाच्च स्वाभाविकी ज्ञानबलक्रिया चेति च अनेन मायाकल्पस्येष्टार्थत्वं न मिथ्यार्थत्वमित्युक्तं भवति हि शब्देन निरस्तकुहकमिति पूर्वोक्तं सूचयति ॥ ४५ ॥ ❀ ❀ संप्रत्युक्तब्रह्मकल्पेनान्यब्रह्मकल्पानां साधारण्यमाह अयमिति । अयं ब्रह्मणः प्रथमः कल्पस्तवोदाहृतः मयेति शेष इत्यन्वयः । कीदृशः सांवकल्पः मन्वंतरादिविविधकल्पेन सहितः यत्र ब्रह्मकल्पेऽन्यब्रह्मकल्पानामन्यकल्पानां च साधारणः समानो विधिः यत्र च प्राकृतवैकृताः सर्गा संतीत्यर्थः । अनेन प्राकृतादिसर्गकथनं साधारण्ये कारणमित्युक्तं भवति ॥ ४६ ॥ ❀ ❀ श्रोतृप्रवृत्त्यर्थमुत्तरस्कंधार्थं प्रतिजानीते परिमाणमिति कल्पानां लक्षणानि विग्रहमियत्तां च कल्पलक्षणस्वरूपं वा परस्तात्पश्चाद्यथावद्व्याख्यास्ये प्रथमत इमं पाद्मं कल्पं शृण्वित्यन्वयः ॥ ४७ ॥

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

नास्येति । तत्कर्तृत्वं परस्य नास्ति । किन्तु तत्कर्तृत्वप्रतिषेधार्थमनूद्यते मात्रम् हि । यस्मान्माययेति । यद्यपि तत्प्रभावत एव तत्तद्भवति तथापि अयस्कान्तवत् तत्र तस्य विकारो नास्तीति भावः ॥ ४५ ॥ ❀ ❀ अयन्त्विति । कल्पो ब्रह्मदिनम् । सविकल्पः सभेदः । अथ कल्पगणना यथा स्कान्दप्रभासखण्डे—प्रथमः श्वेतकल्पस्तु ( १ ) द्वितीयो नीललोहितः ( २ ) । वामदेवस्तृतीयस्तु ( ३ ) ततो गाथान्तरोपरः ( ४ ) ॥ रौरवः पञ्चमः .( ५ ) प्रोक्तः षष्ठः प्राण ( ६ ) इति स्मृतः । सप्तमोऽथ बृहत्कल्पः ( ७ ) कन्दर्पोऽष्टम उच्यते ( ८ ) ॥ सत्योऽथ नवमः ( ९ ) प्रोक्त ईशानो दशमः ( १० ) स्मृतः । ध्यान एकादशः ( ११ ) प्रोक्तस्तथा सारस्वतोऽपरः ( १२ ) त्रयोदश उदानस्तु ( १३ ) गरुणोऽथ चतुर्दशः ( १४ ) । कौर्मः पञ्चदशो ज्ञेयः ( १५ ) पौर्णमासी प्रजापतेः ॥ षोडशो नारसिंहस्तु ( १६ ) समाधिस्तु ततोऽपरः ( १७ ) । आग्नेयो ( १८ ) विष्णुजः ( १९ ) सौरः ( २० ) सोमकल्पस्ततोऽपरः ( २१ ) ॥ द्वाविंशो भावनः प्रोक्तः ( २२ ) सुपुमानिति चापरः ( २३ ) । वैकुण्ठ ( २४ ) श्चार्चिषस्तद्वत् ( २५ ) वल्मीकल्पस्ततोऽपरः ( २६ ) ॥ ॥ सप्तविंशोऽथ वैराजो ( २७ ) गौरीकल्पस्तथापरः ( २८ ) । माहेश्वरस्तथा प्रोक्त ( २९ ) स्त्रिपुरो यत्र घातितः ॥ पितृकल्पस्तथा चान्ते यः कुहूर्ब्रह्मणः स्मृतः ( ३० ) । त्रिंशत् कल्पाः समाख्याता ब्रह्मणो दिवसैः सदा ॥ अतीताश्च भविष्याश्च वाराहो वर्त्ततेऽधुना । प्रतिपद्ब्रह्मणः प्रोक्त द्वितीयार्द्धस्य साम्प्रतम् ॥ इति । अत्र श्वेतः श्वेतवाराहः स एव वाराहश्च । अयमेव ब्रह्मोत्पत्तिसमये ब्राह्म उच्यते इति ज्ञेयम् । एवं पितृकल्प एव प्रथमपरार्द्धान्ते पद्मनिर्मितलोकत्वात् पाद्म उच्यते इति च । अतः श्री भागवतस्य सारस्वतकल्पकथामयत्वं तु प्रायिकमेव ॥ ४६ ॥ ४७ ॥

### श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनीव्याख्या

किञ्च नैतद्भगवतो वस्तुतः कर्मेत्याह । अस्य विश्वस्य जन्मादौ जन्मस्थितिसंहारे कर्मणि परस्य परमेश्वरस्य इत्थम्भावः कर्त्तृत्वं भवति किन्तु अनुविधीयते श्रुतिस्मृत्यादिषु सर्वत्र वर्ण्यते । किमर्थं कर्तृत्वप्रतिषेधार्थम् । हि यतो मायया तत् आरोपितं सृष्ट्यादीनां गुणकार्य्यत्वात् बहिरंगाया एव कर्त्तृत्वं परमपुरुषे आरोपितमिति मत्कृतमपीदं मत्स्वामित्वात् तेन परमेश्वरेणैव कृतं न तु वस्तुतः परमेश्वरः स्वस्वरूपेण कर्त्तेत्यर्थः । तथाच श्रुतिः—निष्फलं निष्क्रियं शान्तं निरवद्यं निरञ्जनमिति ॥ ४५ ॥ ❀ ❀ प्रकरणमुपसंहरति ब्रह्मणः संबन्धी कल्पः सम्वत्सरशतात्मको ब्रह्मणः परमायुरूपः विकल्पोऽवान्तरो ब्रह्मदिनरूपः यत्र महा-

कल्पे प्राकृतमहदादिसर्गाः अवान्तरकल्पे च वैकृताः स्थावरादिसर्गा इत्ययंविधिः प्रकारः अन्यैर्महाकल्पादिभिः साधारणः एवं च यावान्, कल्पो विकल्पो वेत्यस्य प्रश्नस्योत्तरं संक्षेपेण दत्तम् ॥ ४६ ॥ ❁ ❁ विस्तरेण तु यथाकालोऽनुमीयत इत्यस्य प्रश्नस्योत्तरमध्य एव तस्य ( कल्पपरिमाण प्रश्नस्य ) उत्तरं दास्यमानं प्रतिजानीते । परिमाणं कीदृशं कल्पानां लक्षणमेव विग्रहो वपुर्यस्य तत् कल्पादिलक्षणं विना कालपरिमाणं न सिध्यतीत्यर्थः । यथा यथावत् । पुरस्तात् तृतीयस्कन्धे । पाद्मं कल्पं प्रथमपरार्द्धान्तभवम् । कल्पगणना तु स्कान्दप्रभासखण्डाज्ज्ञेया यथा—प्रथमः श्वेतकल्पस्तु द्वितीयो नीललोहितः । वामदेवस्तृतीयस्तु ततो गाथान्तरोऽपरः ॥ रौरवः पञ्चमः प्रोक्तः षष्ठः प्राण इति स्मृतः । सप्तमोऽथ बृहत्कल्पः कन्दर्पोऽष्टम उच्यते ॥ सद्योऽथ नवमः प्रोक्त ईशानो दशमः स्मृतः ध्यान एकादशः प्रोक्तस्तथा सारस्वतोऽपरः त्रयोदश उदानस्तु गरुडोऽथ चतुर्दशः । कौर्मः पञ्चदशो ज्ञेयः पौर्णमासी प्रजापतेः ॥ षोडशो नारसिंहस्तु समाधिस्तु ततोऽपरः आग्नेयो विष्णुजो वंशः सोमवंशस्ततोऽपरः ॥ द्वाविंशो भावनः प्रोक्तः सुपुमानिति चापरः वैकुण्ठश्चार्चिषस्तद्वत् वल्लीकल्पस्ततोऽपरः । सप्तविंशोऽथ वैराजो गौरीकल्पस्तथा परः । माहेश्वरस्तथा प्रोक्तस्त्रिपुरो यत्र घातितः ॥ पितृकल्पस्तथान्ते च यः कुहूर्ब्रह्मणः स्मृतः । त्रिंशत् कल्पाः समाख्याता ब्रह्मणो दिवसैः सदा ॥ अतीताश्च भविष्याश्च वाराहो वर्त्ततेऽधुना । प्रतिपद्ब्रह्मणः प्रोक्ता द्वितीयार्द्धस्य साम्प्रतम् ॥ इति तत्र श्वेतः श्वेतवराहः स एव वराहश्च । अयमेव ब्रह्मोत्पत्तिसमये ब्राह्म उच्यते । एवं पितृकल्प एव प्रथमपरार्द्धान्ते पद्मनिर्मितलोकत्वात् पाद्म उच्यते इति च ॥ ४७ ॥

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यतोऽस्य विश्वस्य जन्मादौ कर्मणि परस्य भगवदितरस्य तद्विश्वकर्तृत्वं नानुविधीयते विधिवाक्येन न प्रतिपाद्यते तथाह भगवान्सूत्रकारः ईक्षतेर्नाशब्दम् रचनानुपपत्तेरित्यादि कथं तर्हि कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिरिति श्रुत्या कालादेर्जगत्कर्तृत्वमुच्यते कर्तृत्वप्रतिषेधार्थं तेषां जगत्कर्तृत्वापवादार्थं मायया कृपया मुमुक्ष्वनुग्रहाय आरोपितम् नतु सिद्धांततया प्रतिपादितम् पुरुष इति चिंत्यमिति वाक्यशेषे पुरुषस्य सिद्धांततयोक्तत्वात् विस्तरस्तु वेदांतकौस्तुभे द्रष्टव्यः ॥ ४५ ॥ ❁ ❁ संक्षेपतः प्रतिपादितं विश्वरचनादिकमुपसंहरति अयं त्विति । अयं सृष्ट्यादिनिरूपणेन सूचितः ब्रह्मणः संबन्धी कल्पो महाकल्पः सविकल्पः विकल्पेन अवांतरकल्पेन सहितः उदाहृतः उदाहरणमात्रेण दर्शितः यत्र यस्मिन्सविकल्पे ब्रह्मकल्पे प्राकृतवैकृताः सर्गाः महाकल्पे प्राकृताः महदादिसर्गाः अवांतरकल्पे च वैकृताः स्थावरादिसर्गाः अयं विधिरन्यैः सविकल्पैर्महाकल्पैः साधारणः समानः ॥ ४६ ॥ ❁ ❁ वक्ष्यमाणं विस्तरं प्रतिजानीते परिमाणमिति कालस्य परिमाणं स्थूलं सूक्ष्मं च कल्पस्य लक्षणं स्वरूपम् तद्विग्रहं विभागं मन्वन्तरादिरूपं च यथा याथातथ्येन पुरस्तादग्रिमे स्कन्धे व्याख्यास्ये कथयिष्ये पाद्मं कल्पमथो इति कात्स्न्र्येन व्याख्यायमानं शृणु ॥ ४७ ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

तत्र हेतुमाह—**नाऽस्य कर्माणीति** । अस्य जन्मादौ कर्माणि । मायानियन्तुः परस्य । नाऽनुविधीयते अनुविधानं न क्रियते । परः सम्बन्धिरूपेण नाऽनुविधानं करोतीत्यर्थः । कुत इत्यपेक्षायामाह— **मायायाऽऽरोपितं हि तदिति** । जगद्भावादयः सर्वे व्यामोहिकमायाकार्यविषयतारूपाः । ते न भगवत्कार्या इति तत्र कर्तृत्वादिना भगवदनुसन्धानं नास्तीत्यर्थः । तर्हि किमिति निरूप्यते जगत्कर्तृत्वं भगवति ? तत्राऽह—**कर्त्तृत्वप्रतिषेधार्थमिति** । प्रतीतं ही कर्तृत्वं प्रतिषेध्यं भगवांस्तु स्वरूपं पश्चादहमित्येवोक्तवान् । न तु मया कृतमिति । अहं वा जातमिति । बुद्धिसौकर्यार्थमेव तथा निरूपितं मायया करोतीति स्वयमेव जायत इति । तज्जत्वादित्यपि तदेव जः न तु तस्माज्जात इति । तस्मादुत्पत्त्यादिकल्पनाहीनं सर्वं ब्रह्मेत्येव ब्रह्मविद्भिर्ज्ञातव्यं न तु कल्पनायुक्तम् । यतो माययाऽरोपितं तत् ॥ ४५ ॥ ❁ ❁ एवं ब्रह्मवादं कर्तृवादं च निरूप्य एतादृशं रूपं भगवतः कस्मिन्कल्प इत्याकाङ्क्षायां ब्रह्मकल्प इत्युत्तरमाह—**अयं तु ब्रह्मणः कल्प इति** । कदाचित्सर्वमात्मैव भवतीह जनार्दन इति । ब्रह्मकल्पे[1] । विकल्पे तु ब्रह्मकल्पावान्तरकल्पे मायया सर्वरूपो भवतीत्युभयमप्यत्र निरूपितमिति ब्रह्मणः कल्पः सविकल्पः उदाहृत इत्युक्तम् । तुशब्देनाऽन्ये कल्पाः प्राकृता व्यावर्त्तिताः । अत एवाऽत्र दशविधा लीलास्तुल्याः कल्पान्तरे तु विषमास्तदाह—**विधिः साधारणो यत्रेति** । यत्र ब्रह्मकल्पे प्राकृतानां वैकृतानां च कल्पानां विधिरुत्पत्तिप्रकारः साधारणः । प्राकृते वा कल्पे वैकृते वा ये उत्पद्यन्ते ते तुल्याः । ननु कल्पान्तरवत्प्राकृतास्त्रय एव । वैकृता अन्ये । उभयात्मकस्तु कौमार इत्यादिविशेषः । तेऽत्र न सन्ति । विधिः साधारणो यत्रेत्येकं वाक्यम् । यत्र सर्गाः प्राकृतवैकृता इत्यपरम् । प्राकृता एव वैकृता न त्वतिरिक्ता इत्यर्थः ॥ ४६ ॥ ❁ ❁ **एतावता सर्वेषां प्रश्नानामुत्तरमुक्तम्** । उभयोर्नोक्तं कालकल्पयोः । तदग्रे वक्ष्यामीत्याह—**परिमाणं च कालस्येति** । परमाण्वादिद्विपरार्द्धावसानस्य कालस्य परिमाणं परिमाणहेतुः सूर्यगत्यादिः । सोऽग्रे वक्तव्यः । चकारात्स्वरूपं कार्यं च । **कल्पलक्षणविग्रहमिति** । कल्पानां लक्षणं धर्मव्यवस्था । कृते एतादृशो धर्मः एतादृशी प्रवृत्तिरिति लक्षणम् । विग्रह-

१. ब्रह्मकल्पः घ.

शरीरं एतावद्युगमिति । सहस्रचतुष्टयात्मकं कृतमिति यथा । एतद्द्वयम् । यथा पुरस्ताद्व्याख्यास्ये । यथा यथा वत् । यथा पुरस्ताद्वा पूर्वकल्पे यथैतयो रूपं तथा व्याख्यास्ये । एवं विस्तरेण सर्वं वक्तुं कल्पान्तरमुपक्षिपति—पाद्मं कल्पमथो शृण्विति । सर्गादीनां विशेषाः पाद्मकल्पे भवन्ति । अतो भगवद्दशलीलाविस्तारार्थं अथो भिन्नप्रक्रमेण शृणु । सावधानतया श्रवणार्थमुपदेशः । अनेनैकस्य दिवसस्य विरतिर्ज्ञायते । यतो भिन्नप्रक्रमेण श्रवणं बोधयति ॥ ४७ ॥

### श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

नाऽस्येत्यत्र मूलमेवं युज्यते । अस्य प्रपञ्चस्य जन्मादौ जन्मस्थितिभङ्गेषु परस्य मायानियन्तुः कर्माणि तदनुकूलाः क्रियाः कर्तृत्वप्रतिषेधार्थम्, तत्र हेतुः, हि यतो हेतोः तत्कर्तृत्वं माययाऽऽरोपितम्, तत्रापि हेतुः, नानुविधीयत इति, परेण कर्तृत्वादिभिरनुकरणं न क्रियते 'तमेव भान्तमि'ति श्रुत्या परानुविधायित्वमन्यस्योच्यते, न तु परस्यान्यानुविधायित्वम्, अतो मायाद्वारकं कर्तृत्वं नास्तीति तादृशं तन्मायया रोपितम्, यस्मादेवं तस्मात्तानि कर्माणि मायारोपितकर्तृत्वनिषेधपराणीति, तदेतद-भिसन्धायाहुः पर इत्यादि । तदेतद्विशदीकुर्वन्ति जगदित्यादि । अत्र मूलं 'ऋतेऽर्थमि'ति वाक्यम् । नास्तीति ब्रह्मविदां नास्ति । प्रतीतमिति अनुविधायितया प्रतीतम् । तत्र हेतुः, भगवानित्यादि । तर्हि स्थूलसूक्ष्मरूपनिरूपणं श्रुतौ पुराणे च किमर्थमित्यत आहुः बुद्धीत्यादि । 'अत्र मायया करोती'ति 'स्वयमेव जात' इति पक्षद्वयं यथासम्भवं पुराणे श्रुतौ च ज्ञेयम्, न तु यथाक्रमम्, एतेन पूर्ववद्वेत्यधिकरणोक्तपक्षस्यैकदेशीयमतीयत्वे बीजमप्युक्तं ज्ञेयम् । नन्वेवं सति 'तज्जलानिति श्रुतिव्याकोप इत्यत आहुः तज्जेत्यादि । तथा च, तत्र सप्तमीतत्पुरुषो बुद्धिसौकर्यार्थः । वस्तुतस्तु मयूरव्यंसकादिसमास एव तात्पर्यगोचर इति न तद्व्याकोप इत्यर्थः । तेनोभयव्यपदेशसूत्रमेव सिद्धान्तसूत्रं व्यासचरणानां तथैव तात्पर्यादिति बोधितम् । फलितमाहुः तस्मादित्यादि । तस्मादिति अखण्डब्रह्मवादस्यैव श्रुतितात्पर्यगोचरत्वात् उत्पत्यादिकल्पनाहीनं 'तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् । आविर्भावतिरोभावजन्मनाशविकल्पवदि'ति वैष्णववाक्याज्जगदंशेपि तत्कल्पानाहीनं तथेत्यर्थः ॥ ४५ ॥ ❀ ❀ अयमित्यत्र कस्मिन् कल्प इति साम्प्रतमानन्दमयनित्यसृष्टेरप्रतियमानत्वात् कस्मिन् कल्प इत्यर्थः ॥ ४६ ॥

### श्रीगिरिधरकृता बालप्रबोधिनी

कुतस्तथा द्रष्टुं नार्हन्तीत्यपेक्षायामाह—नेति । अस्य विश्वस्य जन्मादिरूपे कर्मणि परस्य परमेश्वरस्य कर्तृत्वं नास्ति श्रुत्याऽपि तात्पर्येण न प्रतिपाद्यते, किन्तु कर्तृत्वप्रतिषेधार्थमनुविधीयते केवलमनुवर्ण्यते । हि यस्मात्तत् गुणगतं कर्तृत्वादिकं तत्र मायया भ्रान्त्या आरोपितमिति । तथा दशमे वसुदेवोऽपि वक्ष्यति 'त्वयीश्वरे ब्रह्मणि नो विरुध्यते तदाश्रयत्वादुपचर्यते गुणैः' इति ॥ ४५ ॥ ❀ ❀ 'पुरुषोऽण्डं विनिर्भिद्य'' इत्यादिनोक्तः को वा कल्प इत्यपेक्षां पूरयन्नुपसंहरति—अयं त्विति । सविकल्पः अवान्तरकल्पविभागवान् अयं तु ब्रह्मणः कल्पो यस्मिन् कल्पे ब्रह्मा जातः स कल्पः उदाहृतः उदाहरणतया सङ्क्षेपत उक्तः । कल्पान्तरं विहायैतस्य कथनं कथमित्यपेक्षायामाह—विधिरिति । यत्र कहाकल्पे प्राकृताः महदादिपृथिव्यन्ताः सर्गाः वैकृताः पृथिव्यादिविकारारब्धाः स्थावरादिसर्गा इत्ययं विधिः प्रकारः अन्यैर्महाकल्पैः साधारणः समानः ॥ ४६ ॥ ❀ ❀ एवं सङ्क्षेपतः कथितमुपसंहृत्य विस्तरतः कथनं प्रतिजानीते—परिमाणमिति । कालस्य परिमाणं स्थूलं सूक्ष्मं च स्वरूपं कल्पस्य लक्षणमियानेवंरूप इति तद्विग्रहमतान्तरकल्पमन्वन्तरादिरूपं विभागं च यथाऽस्ति तथा पुरस्तात् तृतीयस्कन्धे व्याख्यास्यामि । एष सर्वोऽपि विशेषः पाद्मे कल्पेऽस्ति अथो तस्मात्पाद्मं कल्पं त्वं शृणिवत्यन्वयः ॥ ४७ ॥

### हिन्दी अनुवाद

सृष्टिकी रचना आदि कर्मोंका निरूपण करके पूर्ण परमात्मासे कर्म या कर्तापनका सम्बन्ध नहीं जोड़ा गया है । वह तो मायासे आरोपित होनेके कारण कर्तृत्वका निषेध करनेके लिये ही है ॥ ४५ ॥ ❀ ❀ यह मैंने ब्रह्माजीके महाकल्पका अवान्तर कल्पोंके साथ वर्णन किया है । सब कल्पोंमें सृष्टि-क्रम एक-सा ही है । अन्तर है तो केवल इतना ही कि महाकल्पके प्रारम्भमें प्रकृतिसे क्रमशः महत्तत्वादिकी उत्पत्ति होती है और कल्पोंके प्रारम्भमें प्राकृत सृष्टि तो ज्यों-की-त्यों रहती ही है, चराचर प्राणियोंकी वैकृत सृष्टि नवीन रूपसे होती है ॥ ४६ ॥ ❀ ❀ परीक्षित्! कालका परिमाण, कल्प और उसके अन्तर्गत मन्वन्तरोंका वर्णन आगे चलकर करेंगे । अब तुम पाद्म-कल्पका वर्णन सावधान होकर सुनो ॥ ४७ ॥

## शौनक उवाच

**यदाह नो भवान् सूत क्षत्ता भागवतोत्तमः । चचार तीर्थानि भुवस्त्यक्त्वा बन्धून्सुदुस्त्यजान् ॥४८॥**

**कुत्र कौषारवेस्तस्य संवादोऽध्यात्मसंश्रितः । यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वमुवाच ह ॥४९॥**

---

१. वद । पुरस्तादिति ख. । २. अथो इति कार्त्स्न्येन व्याख्यायमानं शृण्विति श्रीधरस्वामिनः । ३. प्रा० पा०—कृत्स्नं च दुस्त्यजम् । ४. प्रा. पा. संश्रयः ।

ब्रूहि नस्तदिदं सौम्य विदुरस्य विचेष्टितम् । बन्धुत्यागनिमित्तं च तथैवागतवान् पुनः ॥५०॥

सूत उवाच

राज्ञा परीक्षिता पृष्टो यदवोचन्महामुनिः । तद्वोऽभिधास्ये शृणुत राज्ञः प्रश्नानुसारतः ॥५१॥

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धेऽष्टा[1]दशसाहस्र्यां
संहितायां पुरुषसंस्थानुवर्णनं नाम
दशमोऽध्यायः ॥ १० ॥

## इति द्वितीयः स्कन्धः समाप्तः ।

### श्रीधरस्वामिकृता भावार्थदीपिकाव्याख्या

यदर्थं सृष्ट्यादिनिरूपणं तदेव साक्षाच्छ्रोतुकामः कथांतरं पृच्छति । यदाहेति । भुवः संबंधीनि तीर्थानि । यद्वा भुवः क्षेत्राणि चेति ॥ ४८ ॥ ❋ ❋ कौषारवेर्मैत्रेयस्य तस्य क्षत्तुश्च अध्यात्मज्ञानसंश्रितः संवादः ॥ ४९ ॥ ❋ ❋ पुनरागतवांस्तत्र च निमित्तं ब्रूहि ॥ ५० ॥ ❋ ❋ राज्ञा पृष्ट इति । अयमर्थः । यद्यूयं पृच्छथेदमेव राजाऽपि शुकं पृष्टवान् । शुकोऽपि विदुरमैत्रेयसंवादं पुरस्कृत्य ये पूर्वं राज्ञा कृताः प्रश्नास्तदनुसारेणैव सर्वं पुराणार्थमवोचत्तदेवाहं वोऽभिधास्यामि । तथैव शृणुतेति ॥ ५१ ॥

श्रीमद्भागवतं येन स्वब्रह्ममुखतो मितम् ॥ ब्रह्मनारदयोः प्रोक्तं तं वंदे गुरुमीश्वरम् ॥ १ ॥
यत्सूत्रयंत्रितं विश्वं नरीनर्ति जगत्त्रयम् ॥ संतस्तमेव पृच्छन्तु यदत्र स्खलितं मम ॥ २ ॥
द्वितीयस्कंधसंबंधिपदभावार्थदीपिका ॥ उद्दीप्यतामियं सद्भिर्यथा स्यात्तत्त्वदीपिका ॥ ३ ॥
ईक्षंतामिच्छया संतः क्षमंतां मम साहसम् ॥ मया हि स्वीयबोधाय कृतमेतन्न सर्वतः ॥ ४ ॥

इति श्रीमद्भागवतटीकायां श्रीधरस्वामिविरचितायां भावार्थदीपिकायां द्वितीयस्कन्धे दशमोऽध्यायः ॥ १० ॥

### वंशीधरकृता भावार्थदीपिकाप्रकाशव्याख्या

तदेवं प्रस्तुतमपि पाद्मकल्पकथनं कथांतरश्रवणोत्कंठया स्थगितीकृत्य पृच्छतीत्याह । यदर्थमित्यादि यदाहेति "विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिम्" इत्यादिना यदुद्धवानवोचदित्यर्थः । भगवान्सर्वज्ञः ॥ ४८ ॥ ❋ ❋ कुत्रेति स्थानप्रश्नः । यद्वा पृष्टो यद्वा तत्त्वमुवाचेत्युभयत्र यच्छब्दान्वयत्वात्प्रश्नोत्तरयोः प्रश्नौ ॥ ४९ ॥ ❋ ❋ हे सौम्येति । श्रीव्यासदेवकृपया त्वयि सौम्यतास्तीति भावः । तव च पुनरागमने ॥ ५० ॥ ❋ ❋ अत्राशयमाह—अयमर्थ इति ॥ ५१ ॥

स्वब्रह्ममुखतः स्वश्च ब्रह्मा च स्वब्रह्माणौ तयोर्मुखं स्वब्रह्ममुखं तेन तृतीयार्थे तसिः स्वमुखेन ब्रह्मणे ब्रह्ममुखेन नारदायेत्यर्थः । मितं संक्षिप्तम् । तं परमात्मरूपं गुरुम् ॥ १ ॥ ❋ ❋ विश्वं सर्वं यस्य सूत्रं सूत्रमद्वेष्टनशीला माया तत्र यंत्रितं प्रोतम् । अत्र व्याख्याने स्खलितं च्युतं स एवांतर्यामी भूत्वा यथा प्रेरय्य व्याख्यापयति तथाहं व्याख्यामीति भावः ॥ २ ॥ ❋ ❋ यथा तत्त्वस्य याथार्थस्य दीपिका प्रकाशिका भवेत् यथा सद्भिर्विद्वद्भिरियं लोके प्रकाश्यतां प्रकटीक्रियतामिति प्रार्थनायां लोट् ॥ ३ ॥ ❋ ❋ ईक्षंतां पश्यंतु । साहसमयथाव्याख्यानम् । स्वीयबोधाय स्वस्य स्वशिष्याणां च बोधाय विस्मृत्यलाभाय सर्वतः सर्वेषां बोधाय नन्वित्यर्थः ॥ ४ ॥

येन श्रीब्रह्मणे प्रोक्तं श्रीमद्भागवतं पुरा । संक्षेपेणैव कल्पादौ तं वंदे नंदनंदनम् ॥ १ ॥
द्वितीयस्कंधभावार्थदीपिकाविवृतिः कृता । वंशीधरेण विदुषा गौडं कौशिकगोत्रिणा ॥ २ ॥
इमां गृह्णन्तु विवृतिं परमानन्ददायिनीम् ॥ विदुषां कृष्णभक्तानां विद्वांसो गुणिवत्सलाः ॥ ३ ॥

इति श्रीवंशीधरशर्मकृतश्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कन्धे दशमोऽध्यायः ॥ १० ॥
समाप्तोऽयं द्वितीयस्कन्धः ॥

### श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

भुवः क्षेत्राणि चेति । अत्र पक्षे भुव इति द्वितीयाबहुवचनम् ॥ ४८—५१ ॥

इति श्री भागवतभावार्थदीपिकादीपिन्यां द्वितीयस्कन्धः सम्पूर्णः

---

1. प्राचीनप्रतौ—'ऽष्टादशसाहस्र्यां संहितायां' मयमंशो न ।

### श्रीमद्वीरराघवव्याख्या

एवं स्थिते शौनकः इत्यभिव्याहृतं राजा निशम्य भरतर्षभ इत्यादिना। स्वकृतस्य राजकृतप्रश्नस्य वैयासकेरिति वचस्तत्त्वनिश्चयमात्मन इत्यादिना सूतेनोक्तं शुकोक्तमुत्तरं श्रुत्वा पुनरपि राजकृतप्रश्नानामेव शुकोक्तान्युत्तराणि विदुरमैत्रेयसंवादरूपेण श्रोतुकामः पृच्छति यथेति त्रिभिः। हे सूत भागवतश्रेष्ठ भगवान् उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां चेत्युक्तगुणसम्पन्नो योऽसौ क्षत्ता विदुरः सुदुस्त्यजाँस्त्यक्तुमशक्यान् बन्धूं स्त्यक्त्वा भुवः पृथिव्याः सम्बन्धीनि तीर्थानि चचार॥ ४८॥ ❀ ❀ तस्य विदुरस्य कौषारवेर्मैत्रेयस्य च कुत्र प्रदेशेऽध्यात्मसम्मत आत्मवित्सम्मतः सम्वादोऽभूत्। पृष्टो विदुरेण पृष्टः स भगवान्मैत्रेयः तस्मै विदुराय यद्वा यदेव तत्त्वमुवाच तन्नो ब्रूहीत्युत्तरेणान्वयः॥ ४९॥ ❀ ❀ तदिदं तत्त्वं सौम्य हे सूत विदुरस्य विचेष्टितं बन्धुत्यागे निमित्तं यत्तदपि पुनर्यथा येन प्रकारेणागतवांस्तं प्रकारं च नोऽस्मभ्यं ब्रूहीत्यर्थः॥ ५०॥ ❀ ❀ सूतस्तु भवत्पृष्टमेव राज्ञा श्रीशुकं प्रतिपृष्टमतः शुकोक्तिरेव भवदीयप्रश्नस्याप्युत्तरमित्याह राज्ञेति। परीक्षिता राज्ञाऽऽसमन्तात्पृष्टो महामुनिः श्रीशुको यन्मैत्रेयोक्तमवोचत्तदेव राजप्रश्नानुक्रमेण वो युष्मभ्यमभिधास्ये कथयिष्ये शृणुत श्रवणं कुरुतेत्यर्थः। यूयमिति शेषः॥ ५१॥

**इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचर्याप्रसन्नतत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन वीरराघवविदुषा विलिखितायां श्रीमद्भागवतचन्द्रिकायां द्वितीयस्कंधदीपिकायां दशमोऽध्यायः॥**

### श्रीमद्विजयध्वजतीर्थकृता पदरत्नावलीव्याख्या

अस्य ग्रन्थस्य शुकशिष्यसूतशौनकसंवादत्वं स्पष्टयन् शौनकप्रश्नप्रकारमाह यदाहेति—विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिमित्यादिना क्षत्ता बन्धूंस्त्यक्त्वाभुवस्तीर्थानि चचार। तत्र तीर्थसञ्चरणसमये मैत्रेयादात्मज्ञानं चापेति यद्धवानाह॥ ४८॥ ❀ ❀ तत्र किं तत्राह कुत्र इति। तस्य विदुरस्याध्यात्मसंभवः आत्मनां पुरुषाणामधिकस्य हरेः कथायाः सम्भवो यस्मात्स तथा। यद्वात्मानं शरीरमधिकृत्य वर्तमानं देहेन्द्रियादितद्विषयो विदुरेण पृष्टः स भगवांस्तस्मै विदुराय यद्वा तत्त्वमुवाच ह। हेत्यनेन ग्रन्थान्तरप्रसिद्धिमाह प्रत्यारम्भे प्रसिद्धौ हेति यादवः॥ ४९, ५०॥ ❀ ❀ तत्र सूतः शौनकप्रश्नपरिहारप्रकारं प्रतिजानीते राज्ञेति। यत्समाधानं राज्ञः प्रश्नानुसारत इति पुनरुक्त्या प्रश्नयोरेकविषयत्वेन परिहारोऽप्युक्तः तत्प्रश्नप्रतिवचनमपि युष्मत्प्रश्नप्रतिवचनमेवेति दर्शयति॥ ५१॥

**इति श्रीमहेन्द्रतीर्थपूज्यपादशिष्यविजयध्वजतीर्थयतीन्द्रकृतायां श्रीमद्भागवतटीकायां पदरत्नावल्यां द्वितीयस्कन्धे दशमोऽध्यायः॥**

### श्रीमज्जीवगोस्वामिकृता क्रमसन्दर्भव्याख्या

तदेवं प्रस्तुतमपि पाद्मकल्पकथनं कथान्तरश्रवणोत्कण्ठ्या स्थगितीकृत्य पृच्छति यदाह इति॥ ४८॥ ❀ ❀ कुत्रेति स्थानप्रश्नः तस्य परमादरणीयत्वात् यद्वा पृष्टो यद्वा तत्त्वमुवाचेत्युभयत्र यच्छब्दान्वयत्वात्प्रश्नोत्तरयोः प्रश्नौ॥ ४९, ५०॥ ❀ ❀ अथात्र श्रीशुकप्रतिज्ञातपाद्मकल्पकथने भवदभीष्टं च सम्पत्स्यत इत्यभिप्रेत्याह राज्ञेति। तेनापि श्रीविदुरादिप्रस्तावपूर्वकं श्रीशौनकं वत् पुनः प्रश्नः कृतोऽस्ति श्रीशुकेनापि तथोत्तरितमस्तीति बोधितं सवासनत्वात्। तथा च तृतीये वक्ष्यते कुत्र क्षत्तुर्भगवत इत्यादिना॥ ५१॥

**इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे दशमोऽध्यायः॥**

**द्वितीयस्कन्धस्य क्रमसन्दर्भः समाप्तः**

### श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनीव्याख्या

तदेवं प्रस्तुतमपि पाद्मकल्पकथनं कथान्तरश्रवणोत्कण्ठया स्थगितीकृत्य पृच्छति यदाहेति। विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिमित्यादिना यद्भवानवोचदित्यर्थः। भगवान् सर्वज्ञः। क्षत्ता विदुरः कौषारवेर्मैत्रेयस्य॥ ४८, ४९, ५०॥ ❀ ❀ राजा पृष्ट इति। अयमर्थः यद् यूयं पृच्छथ इदमेव राजाऽपि शुकं पृष्टवान्। शुकोऽपि विदुरमैत्रेयसम्वादं पुरस्कृत्य ये पूर्वं राज्ञा कृताः प्रश्नास्तदनुसारेण सर्वमवोचत् तदेवं वोऽभिधास्ये॥ ५१॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। द्वितीये दशमोऽध्यायः सङ्गतः सङ्गतः सताम्॥

ब्रह्मणश्च तृणस्यापि चेष्टा प्रातिस्विकीयतः। स एव भगवान् विश्वं धिन्वन्वृष्ट्यात् कृपाऽमृतम्॥

**इति श्रीमहामहोपाध्यायश्रीमद्विश्वनाथचक्रवर्त्तिकृतायां सारार्थदर्शिन्यां टीकायां द्वितीयस्कंधः समाप्तः॥**

### श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवं संक्षेपेणोक्तं शास्त्रार्थं श्रुत्वाऽथ परीक्षित्प्रश्नानां शुकोक्तानि प्रत्युत्तराणि मैत्रेयविदुराख्याधिकया शुश्रूषुः शौनकः

पृच्छति यदिति त्रिभिः । हे सूत, दुस्त्यजान् त्यक्तुमशक्यान्बन्धून् त्यक्त्वा भुवः सम्बन्धीनि तीर्थानि क्षत्ता विदुरः चचारेति यद्यं प्रति नोऽस्मभ्यं भवानाह प्रथमस्कन्धे तस्य कुत्र सम्वाद इत्यग्रिमेणान्वयः ॥ ४८ ॥ ❀ ❀ तस्य क्षत्तुः कौषारवेः मैत्रेयस्य च सम्वादः कुत्र स्थाने अभूत् स मैत्रेयो विदुरेण पृष्टः तस्मै यत्तत्त्वमुवाच तद् ब्रूहीत्युत्तरेणान्वयो भगवानिति । उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानितीत्येवं गुणसम्पन्नः ॥ ४९ ॥ ❀ ❀ हे सौम्य, तत् त्वं ब्रूहि तथा बन्धुत्यागनिमित्तं पुनरागतवान् तत्र निमित्तमिदं सर्वं विदुरस्य विचेष्टितं च ब्रूहीत्यर्थः ॥ ५० ॥ ❀ ❀ राज्ञेति । मां यूय यत्पृच्छथ तज्जिज्ञासुना राज्ञा परीक्षितापि पृष्टः शुको विदुरमैत्रेयसम्वादद्वारा राज्ञः पूर्वत्र प्रदर्शिता ये प्रश्नाः तेषामनुसारेण यत्सर्वं पुराणार्थमवोचत् तदेवाहं वोऽभिधास्यामि तथैव यूयं शृणुत ॥ ५१ ॥

इति श्रीमद्भागवतसिद्धांतप्रदीपे श्रीमत्सनत्कुमारसन्ततिप्रवर्तकभगवन्निम्बार्कचरणचिन्तकश्रीशुक-
सुधाप्रणीते द्वितीयस्कंधीये दशमाध्यायार्थप्रकाशः ॥

### श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एवं शुकपरीक्षित्संवादे विरते शौनको भगवत्कथाश्रवणे व्यग्रस्तादृशीं कथां पूर्वनिरूपितां पृच्छति । यस्यां कथायां कतिपयप्रश्नार्थज्ञानेऽपि परमा रतिर्भवति तादृशमेव हि श्रोतव्यम् । तदाह सूतः—"विदुरस्तीर्थयात्रायामि"त्यत्र "यावतः कृतवान् प्रश्नान् क्षत्ता कौषरवेऽग्रतःजातैकभक्तिर्गोविन्दे तेभ्यश्चोपरराम हे"ति । भागवतं श्रावयिष्यामीति यद्यपि सूतेन प्रतिज्ञातं तथापि विदुरमैत्रेयसंवादलक्षणस्य भागवतस्य शीघ्रफलत्वात् तदेव त्वया कथनीयमिति प्रोत्साहयति शौनकः—यदाह भगवानिति त्रिभिः । भगवानिति मैत्रेयस्य सर्वज्ञता सूचिता । यदाह भगवानिति भिन्नं वाक्यम् । भगवान्मैत्रेय इत्यर्थः । अथवा । क्षत्तृमैत्रेय-संवादे भगवान् यदाह । यद् भगवतो वाक्यं ताभ्यां निरूपितमित्यर्थः । यदाह नो भवानिति पाठः स्पष्टः । सूतेति सम्बोधनम् । कुत्राऽऽह किमाहेत्याकाङ्क्षायामाह । क्षत्ता भागवतोत्तमो बन्धूंस्त्यक्त्वा भुवस्तीर्थानि चचार । तादृशश्च कौषारवेश्च संवादः कुत्र विषये यत्र भगवद्वाक्ये तदर्थे वा विचारात्मकः संवादस्तत्कथयेति वक्तव्ये भगवद्वाक्यस्यैव मुख्यत्वात्तत्रैव भगवद्वाक्यविशेषे संवादो भविष्यतीति ज्ञात्वाऽपि विशेषज्ञानार्थं कुत्रेति पृच्छति । देशप्रश्ने तु कुत्र देशे स संवादो जात इति । त्वया [1]कथितेऽपि स्वयं वा तत्र गत्वा श्रोतव्यमित्यभिप्रायः । पाठान्तरे इतिशब्दोऽध्याहर्त्तव्यः । सुदुस्त्यजानिति तदादेशोपदेशचरितानि विदुरस्य पृच्छति । भागवतेभ्य उत्तमः यस्त्वापद्दशायामपि न विभ्रान्तः । भुवस्तीर्थानीति गन्तुं ज्ञातुं च शक्यानि । तान्यपि वक्तव्यानीत्य-भिप्रायः । यैः सम्यक् शुद्धो भक्तिं प्राप्तवानिति । ततोऽपि पूर्वमेव तस्य चित्तशुद्धिरुत्कृष्टा जातेति ज्ञापयति—त्यक्त्वा बन्धूनिति । सुदुस्त्यजानिति अन्तःकरणेनाऽपि त्यक्त्वा इति ज्ञायते । एतावता परीक्षिदपेक्षयाऽपि स मुख्यश्रोता निरूपितः । कुषारोः पुत्रः कौषारविः । कौषा[2]रवस्य वा । प्रथमपक्षे बाह्वादित्वादिञ् । तस्य पूर्वोक्तस्य विदुरस्य । उभयोस्तुल्यत्वाय षष्ठ्यौ । अर्थात्संवादोऽपि पृष्टः । अन्यथा केवलस्थानं श्रुतमप्यप्रयोजकं स्यात् । अध्यात्मसंज्ञित इति स संवादः श्रोतुः कार्यसाधक इत्यध्यात्म-शब्देनोक्तः । अन्यथा तदज्ञानाद्विशेषणमयुक्तं स्यात् । अध्यात्मेति संज्ञापि[3]तः । अनेन संवादेनैवाऽन्योन्यकथारूपेणैव तस्य भक्तिर्जातेति संवादस्यैव माहात्म्यमुक्तम् । यद्वेति पक्षान्तरम् । वाशब्दः पूर्वपक्षं व्यावर्त्तयति । न स्थानविशेषे संवादात्तस्य भक्तिः किन्तूपदेशादित्यपि पक्षे तमुपदेशं वदेत्याह—यद्वेति । स भगवानिति । भगवत्सहितः । केवलेनोपदिष्टं कथं हृदयारूढं भवेत् । तस्मा इति केवलं तदर्थमेव । पृष्ट इति नहि तादृशः स्वार्थं यादृशं तादृशं पृच्छति । वक्ताऽपि यत्तत्त्वमुक्तवान् तद्-ब्रूहीति सम्बन्धः । हेत्याश्चर्ये । विदुरस्य विचेष्टितं वक्तव्यम् । तत्त्वोपदेशो विदुरस्याऽनुचित इत्याश्चर्यम् । तथाप्युपदेशो जात इति तस्य विशिष्टं किञ्चिच्चेष्टितमस्ति येन तादृशोऽप्युपदेशम[4]र्हति । किञ्च । बन्धुत्यागेऽपि निमित्तं वक्तव्यम् । अन्यथा शूद्रयोनावुत्पन्नस्य प्रव्राजोऽनुचितः स्यात् । चकाराज्ज्ञानहेतावपि निमित्तं वक्तव्यम् । किञ्च । तज्ज्ञानं सर्वथोत्तमम् । यज्ज्ञानप्राप्तौ पूर्वजातवैमनस्यादिकं परित्यज्य दैहिकीं व्रीडां परित्यज्य तथैवाऽसंस्कृतरूपेणैव पुनरागतवान् । अतः साक्षात्सर्वमोहनिवर्त्तकमुत्तमाधिकारनिरूपकं यज्ज्ञानं तत्संवादे सम्पन्नं तदपि भगवदुक्तमेव भविष्यतीति तत्कथयेत्यर्थः ॥ ४८ ॥ ४९ ॥ ५० ॥ ❀ ❀ एवं ऋषिभिः पृष्टस्तदुत्तरं वदन् शुकोक्तमेव तदिति सरस्वतीसंवादात् यथा विदुरादीनां भक्तिस्तथा भवतामपि भविष्यतीति बोधयन् भवतां वाक्यं संवादिजातमित्याह—राज्ञा परीक्षिता पृष्ट इति । अयमेवार्थः परीक्षिताऽपि पृष्टः शुकेन यदा कथाक्षेपः कृतः एवमेतत्पुरा पृष्ट इति । तदा महामुनिः । तत्स्वरूपतः पर्यवसानतश्च जानन्नवोचत् । तदेव वो युष्मभ्यमभिधास्ये कथयिष्यामि । एवं सति पूर्वं यद्भवद्भिः पृष्टं यदाह भगवान् शुक इति, यच्चेदानीं यदपि मयोक्तं सोऽहं वः श्रावयिष्यामीति तदप्यविरुद्धं भवति । अतः शुकोक्तिमेव कथयिष्यामि परं सावधानतया शृणुत । शुकस्तु तत्र सभायामृषिभिर्बहुधा पृष्टं बह्वेवोक्तवांस्तन्मुख्यश्रोतृबुद्ध्यनुसारि न भवतीति प्रकृतत्वाभावात् तद्व्यावृत्त्यर्थमाह—राज्ञः प्रश्नानुसारत इति । राज्ञः प्रश्नमनुसृत्य तदुत्तरत्वेनैव यदुक्तं तत्कथयिष्यामीत्यर्थः ॥ ५१ ॥

---

१. त्वया अकथितेपीति ख. २. कुषारवस्येति ख. । ३. संज्ञापित इति क. ख. । ४ मर्हसीति ख.

द्वितीयस्कन्धविवृतिः श्रीकृष्णचरणाम्बुजे। निवेदिताऽतियत्नेन युक्तिपुष्पाञ्जलिः स्फुटा॥ १॥
भक्तेषु शास्त्रहृदयेषु निवेदयामि शास्त्रार्थतो यदि हरिर्भवतामभीष्टः।
तत्पश्यताऽत्र विवृतिं भगवद्गुणानां सन्देहवारणविचारणतः प्रसन्नाम्॥ २॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां द्वितीयस्कन्धे दशमोऽध्यायः॥ १०॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

यदाहेत्यत्र। यद्वा, 'स भगवानि'त्यग्रे वक्ष्यमाणत्वात् पुनरुक्तिरायातीत्यरुच्या पक्षान्तरमाहुः अथ वेत्यादि। एवमपि तस्मा इत्यध्याहारो व्याख्यानक्लेशश्चेत्यरुच्या पाठान्तरमाहुः यदाहनो भवान् इत्यादि। सूतेत्यादि। प्रथमपाठे यच्छब्दार्थस्य सामान्यतया विशेषस्यास्फुटत्वादुक्ताकाङ्क्षायां विशेषं वक्तुं सूतेति सम्बोधनमाहेत्यर्थः। तमेव प्रष्टव्यं विशेषं स्फुटीकुर्वन्ति क्षत्तेत्यादिना। नन्वेवं विशेषप्रष्टव्ये अग्रिमवाक्ये यत्रेतिपदं वदेन्न तु कुत्रेति पदमिति शङ्कायां तदाशयमाहुः यत्रेत्यादि। कुत्रेति पृच्छतीति कस्मिन् भगवद्वाक्य इति पृच्छतीत्यर्थः। द्वितीयपाठानुसारेण कुत्रेतिपदस्य तात्पर्यमाहुः देशेत्यादि। त्वया कथितेपीति त्वया कथनानन्तरमपीत्यर्थः। पाठान्तर इति यदाह नो भवानिति पाठे। अस्मिन् पाठे देशोपदेशौ द्वितीयप्रश्नविषयौ, विदुरचरित्रं प्रथमप्रश्नविषय इत्याहुः तदेत्यादि। स्फुटमग्रिमम्।

इति श्रीमद्वल्लभनन्दनचरणरजःपूरितहृदयस्य श्रीपीताम्बरात्मजस्य पुरुषोत्तमस्य कृतौ द्वितीयस्कन्धसुबोधिनीप्रकाशे दशमाध्यायविवरणं सम्पूर्णम्।

श्रीगिरिधरकृता बालप्रबोधिनी

एवं शुकस्य पाद्मकल्पकथनप्रतिज्ञां श्रुत्वा तत्र का वा कथा भविष्यति का वा नेत्याशङ्क्य सैव कथा श्रोतव्या यतः शीघ्रं मे भक्तिः स्यात्तादृशी तु 'जातैकभक्तिर्गोविन्दे' इत्युक्तत्वाद्विदुरमैत्रेयसंवादरूपेति निश्चित्य तामेव पृच्छति—यदाहेति। स्ववशवर्तित्वेन तस्मिन् स्वस्नेहं सूचयन् सम्बोधयति—सूतेति। भागवतेषु उत्तमः क्षत्ता विदुरो दुस्त्यजान् त्यक्तुमशक्यानपि बन्धूंस्त्यक्त्वा तीर्थानि भुवो भगवत्क्षेत्राणि चचार तत्राध्यात्मसंश्रयः आत्मा परमात्मा भगवांस्तत्सम्बन्धिज्ञानभक्त्यादिहेतुभूतः कौषारवेर्मैत्रेयस्य तस्य विदुरस्य च संवादोऽभूदिति नोऽस्माकं यद्भवानाह स संवादः कुत्र जातः विदुरेण पृष्टः सन् स भगवान् सर्वज्ञो मैत्रेयो यद्वा यदेव तत्त्वं परमार्थं तस्मै विदुरायोवाच ह इति स्पष्टं यथा स्यात्तथा। तदिदं तत्त्वं विदुरस्य विचेष्टितं तीर्थपर्यटनकथाप्रश्नश्रवणादिकं तद्बन्धुत्यागस्यनिमित्तं गृहान्निर्गतः पुनर्यथा येन प्रकारेणागतवांस्तथा तं प्रकारं च नोऽस्मभ्यं ब्रूहीति त्रयाणामन्वयः। भगवद्भक्तत्वेन तत्त्वज्ञत्वेनास्मद्वशवर्तित्वेन च त्वमतिप्रियदर्शनोऽस्यतो सङ्कोचेन पृच्छाम इति सूचयन् सम्बोधयति—सौम्येति॥ ४८॥ ४९॥ ५०॥ ❀ ❀ एवं शौनकेन पृष्टः सूत उत्तरदानं प्रतिजानीते—राज्ञेति। यद्विदुरमैत्रेयसंवादं यूयं मां पृच्छथ तदेव राज्ञा परीक्षिताऽपि पृष्टो महामुनिः श्रीशुकः राज्ञः प्रश्नानुसारतः प्रश्नक्रमेण यदुत्तरमवोचत् तद्वो युष्मानहमभिधास्ये कथयिष्यामि यूयं सावधानतया शृणुतेत्यन्वयः॥ ५१॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा॥ १॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी॥ २॥
रचिता च द्वितीयेऽत्र मननस्य निरूपणे। दशमो विवृतोऽध्यायः फलस्य विनिरूपकः॥ ३॥
यदनुग्रहतष्टीका द्वितीयेऽपि विनिर्मिता॥ स एव भगवान् कृष्णः करोतु प्रसृतामिमाम्॥ ४॥

॥ इति द्वितीयस्कन्धः समाप्तः॥

हिन्दी अनुवाद

शौनकजीने पूछा—सूतजी! आपने हमलोगोंसे कहा था कि भगवान्‌के परम भक्त विदुरजीने अपने अति दुस्त्यज कुटुम्बियोंको भी छोड़कर पृथ्वीके विभिन्न तीर्थोंमें विचरण किया था॥ ४८॥ ❀ ❀ उस यात्रामें मैत्रेय ऋषिके साथ अध्यात्मके सम्बन्धमें उनकी बातचीत कहाँ हुई? तथा मैत्रेयजीने उनके प्रश्न करनेपर किस तत्त्वका उपदेश किया?॥ ४९॥ ❀ ❀ सूतजी! आपका स्वभाव बड़ा सौम्य है। आप विदुरजीका वह चरित्र हमें सुनाइये। उन्होंने अपने भाई-बन्धुओंको क्यों छोड़ा? और फिर उनके पास क्यों लौट आये?॥ ५०॥ ❀ ❀ सूतजीने कहा—शौनकादि ऋषियो! राजा परीक्षित्‌ने भी यही बात पूछी थी। उनके प्रश्नोंके उत्तरमें श्रीशुकदेवजी महाराजने जो कुछ कहा था, वही मैं आपलोगोंसे कहता हूँ। सावधान होकर सुनिये॥ ५१॥

## दशवाँ अध्याय समाप्त

इति द्वितीय स्कन्ध समाप्त

"हरिः शरणम्"